VEDAS, Rigveda

P.B. Sansk. 30

22500268821

# RIG-VEDA-SANHITA,

THE

## SACRED HYMNS OF THE BRAHMANS;

TOGETHER WITH THE

## COMMENTARY OF SAYANACHARYA.

EDITED BY

MAX MÜLLER, M. A.

CHRIST CHURCH, OXFORD.

VOLUME II.

LIBRARY

PUBLISHED UNDER THE PATRONAGE OF

THE HONOURABLE THE EAST-INDIA-COMPANY.

LONDON,

WILLIAM H. ALLEN AND CO.,

BOOKSELLERS TO THE HONOURABLE THE EAST-INDIA-COMPANY,

7, LEADENHALL STREET.

1854.

WELLCOME LIBRARY INSTITUTE

P.B. Sansk 30

WELLCOME LIBRARY INSTITUTE

OXFORD,

PRINTED BY JAMES WRIGHT, PRINTER TO THE UNIVERSITY.

TO

RUSSELL ELLICE, ESQ., CHAIRMAN,

MAJOR JAMES OLIPHANT, DEPUTY CHAIRMAN,

WILLIAM WIGRAM, ESQ.,
JOHN LOCH, ESQ.,
CHARLES MILLS, ESQ.,
JOHN MASTERMAN, ESQ.,
J. P. MUSPRATT, ESQ.,
HENRY ALEXANDER, ESQ.,
LIEUTENANT-GEN. SIR J. LUSHINGTON,
HENRY SHANK, ESQ.,
JOHN COTTON, ESQ.,
WILLIAM BUTTERWORTH BAYLEY, ESQ.,
J. SHEPHERD, ESQ.,
M. T. SMITH, ESQ.,
WILLIAM HENRY C. PLOWDEN, ESQ.,
ELLIOT MACNAGHTEN, ESQ.,
THE HONOURABLE W. H. LESLIE MELVILLE,
ROSS DONNELLY MANGLES, ESQ.,
WILLIAM DENT, ESQ.,
MAJOR J. A. MOORE,
J. H. ASTELL, ESQ.,
H. T. PRINSEP, ESQ.,
DUDLEY C. MARJORIBANKS, ESQ.,

DIRECTORS

FOR MANAGING THE AFFAIRS

OF

THE HONOURABLE THE EAST-INDIA-COMPANY,

THIS SECOND VOLUME

OF

THE RIG-VEDA SANHITA

IS RESPECTFULLY AND GRATEFULLY DEDICATED

BY THEIR OBEDIENT SERVANT,

OXFORD, 1853.

MAX MÜLLER.

# PREFACE.

THE principles followed in the first volume in editing the hymns of the Rig-veda, and in restoring the text of Sáyaṇa's Commentary, have been strictly adhered to in the second. My own conviction and the approval of those best competent to judge have not allowed me to adopt a different course, although others have thought Sáyaṇa's Commentary undeserving a critical edition, and the time that has been expended on it. Yet, perhaps, neither the age nor the country of an author can justly be pleaded as an excuse for disregarding those rules of critical scholarship which in classical philology have been ratified by the experience of the last three centuries; and though I feel obliged to apologize for the consequent delay in the publication of this second volume, I should be more sorry if I had now to publish it without the conviction that all sources available for the restoration of the text had been fully exhausted.

The MSS. of the Sanhitá and Pada-text of the hymns have been the same for the second as for the first volume, and therefore require no further notice.

The case differs with the MSS. of Sáyaṇa's Commentary. For the first Ashṭaka I was able almost always to determine the original reading of each of the three families of MSS. by a comparison of the different members belonging to each; and it was found that in all important passages the readings of the three families, A., B., and C., could be so easily balanced that it rarely remained doubtful which of the three had to give way before the others. On this account it seemed to me unnecessary to publish the *varietas lectionis* for the first Ashṭaka; and, with the exception of a few inaccuracies which really seem to be unavoidable in the course of editing so voluminous a work, I have not met, in the many excellent reviews of this edition of the Rig-veda, with any remarks which could on this point have changed my opinion.

In the second Ashṭaka, however, this course could be no longer followed. When I began the printing of the second Ashṭaka, to represent the A. class I had only one MS. instead of three, and this again was defective to such an extent that it could hardly be used for more than half of the second book. The MSS. of the B. class were the same as for the first Ashṭaka; and I had even received a new copy from Bombay, which I call B 3. This, however, proved of little use, as it was but a new transcript of the same original from which Professor Burnouf's MS. had been taken. It could not have been copied from B 1, because this MS. was already in my hands when the new copy was made in India. There can be no doubt, however, that it was copied from a copy of B 1. Most likely the Pandit who parted with his old MS. (B 1.) had a transcript made before he sold the original, and this transcript was copied in B 3. With regard to the C. MSS. it will be seen that three only out of the seven contain the second Ashṭaka complete.

Under these circumstances it became impossible to determine with certainty the original reading of each of the three families; nay, for many passages the text of one or even two families was lost beyond recovery. Besides, almost all the MSS. of the second and the following Ashṭakas seem to have been less frequently studied in India, and therefore less carefully corrected, than the first Ashṭaka. The principal difficulty, however, arose from the defective state of A 2, because the text of the A. class is throughout the whole commentary by far the most authentic, and had been the principal authority for my edition. Before the first Ashṭaka was finished I had therefore written to India to obtain a new MS. for the second. After waiting, however, for a considerable time, I received the news that the MS. which Dr. Roer had procured for me at Calcutta had been lost by shipwreck. Not wishing to retard the publication of the second volume still longer, I began to print with the MSS. then at hand. Most fortunately, in the course of carrying the second Ashṭaka through the press, a new MS. was forwarded from India by Dr. Ballantyne, the distinguished Principal of the Sanskrit College at Benares. It was sent to Professor Wilson, and he most kindly presented it to me. It is a complete copy of Sáyaṇa's Commentary, and, as far as I know, the most ancient MS. of this author in Europe. The first Ashṭaka contains 648 leaves, but has no date. The second has 260, the third 398, the fourth 312 leaves. At the end of this Ashṭaka the following date is given: ॥ संवत १६ ज्येष्ठवदि प ऋ वे १ संवत आषाढा २४ वर्षे ॥ This is Samvat

1624 or A.D. 1681. The fifth Ashṭaka has 237, the sixth 264 leaves, the last containing again a date; संवत् १६२३ वर्षे ज्येष्टमासे शुक्लपक्षे पूर्णमास्या पून्यतथौ गुरुवने: । This is therefore a year earlier, 1623 Samvat, or 1680 A.D. In the seventh Ashṭaka, which contains 274, and in the eighth, which contains 322 leaves, the last leaves on which the date is usually marked, are lost. We may therefore ascribe this copy to the years 1680 and 1681. The oldest MS. which I had used before was that of the first Ashṭaka at the National Library in Paris (A 1.), which bears the date Samvat 1625, or 1682 A.D. Colebrooke's MS. (A 2.) was dated between 1747 and 1760 A.D.; and fragments of the Commentary to the first Ashṭaka at the Royal Library in Berlin (A 3.) exhibit their date as Samvat 1664 and 1665, which is 1721–1722 A.D. As all the other MSS. of Sáyaṇa's Commentary are still more modern, this last arrived MS., now in my possession, is therefore the oldest in Europe.

But though it is the oldest MS., it does not, as I expected, belong to the A. class. On comparing it with the other MSS. I found that it belongs to class C., and may in fact be considered as the prototype of all the C. MSS. This would by itself have made this copy extremely valuable. Its value, however, was further increased when I found that in the second Ashṭaka considerable portions had been most carefully compared and corrected after a MS. belonging to the A. class. If it had not been for the modern date of Colebrooke's copy, I should have said that the collation had been taken from this very MS. (A 2.) As it is, we must suppose that the Benares MS. was collated with an older A. MS., whence afterwards Colebrooke's copy was taken. As these collations and corrections, which are very numerous, were made in the usual Indian manner, by covering the original text with yellow orpiment and writing the various reading over it, or on the margin, it was possible in many cases to use this MS. as an authority not only for the C. but also for the A. class; a discovery which makes this MS. invaluable, particularly for the second Ashṭaka, where the text of the A. MSS. was frequently lost altogether. As to the C. MSS. they are all, though not immediately, derived from this copy, but *before* it had been corrected by a collation with an A. MS. This can be proved from accidental mistakes and indistinct corrections which occur in this MS., and have afterwards found their way into all the C. MSS. I suppose therefore that this (my own MS. from Benares) had been repeatedly transcribed there before it was collated with an A. MS.; that one of these transcripts was brought to Calcutta, and

that from it most, if not all, of the C. MSS. were taken at Calcutta. Certain it is that C 1, C 2, and C 3. came from Calcutta, and large portions, which were copied for me from a MS. belonging to the Asiatic Society in Calcutta, contain literally the same text as the other C. MSS. There are readings, however, which are peculiar to the C. copies, and which do not occur in my Benares MS. Some are found in one or two of the C. copies only. These are either accidental mistakes, or occasional conjectures, which, after finding their way into one copy, were afterwards repeated by successive transcribers. They are useful as indicating the exact relationship of some of the C. MSS., but they can never claim any diplomatic authority. There is another class of various readings which run through all the C. MSS., but which have no guarantee in the old Benares C. They deserve a more careful consideration, for they are evidently old errors, or possibly old corrections. In passages where the C.'s agree among themselves, but differ from the Benares C., this generally agrees with A. These C. readings therefore, as they do not proceed from the Benares C., are in reality only later alterations of the original A. text. Though I have hardly ever adopted the readings of the C.'s, where they differ from the A.'s and the Benares C., I have inserted them in the *varietas lectionis,* because occasionally they seem to contain useful conjectures. Thus Rv. II. 6, 4. (page 445. line 10.) Ca. has प्रेरका वा; the same mistake occurs in A., while all the C.'s have the correct reading प्रेरको वा. It also happens, as has been shown in the Preface to the first volume, that passages originally wanting in the C. family have been supplied from other sources. In this manner C. and A. readings have been mixed up together in one and the same copy, particularly in Dr. Mill's, so as to cause considerable confusion in some parts of Sáyaṇa's work. In later portions of the Commentary some of the C.'s cease to be C.'s, and become A.'s, owing to the writer having changed the original from which he copied.

By this new MS., which in its original text I count with the C., in its corrections with the A. MSS., while if it has to be quoted by itself, it will be marked Ca., the *apparatus criticus* became much simplified. The various readings of the C. MSS. have no longer any authority by themselves, but only so far as they agree with the original C. *before* it was collated. The text of the A. MSS. is supplied by Ca., where the A.'s are wanting, and confirmed where they and the corrections in Ca. agree.

It might be asked, why, if the A. MSS. agree with the corrected text of Ca.,

the whole family of the A.'s should not rather be considered as branching off from Ca., *after* the general text of the C. family was corrected as we find it in Ca.? and why the alterations in Ca. should not be taken for independent corrections made by the writer of Ca., instead of being gleaned from a collation with an A. MS.? On all important points the A. MSS. agree with the corrected Ca.; and on minor points it is impossible to deny that slight differences could as well be ascribed to the several copyists of the A. MSS. There are passages, however, which make it impossible to entertain this supposition: Rv. II. 9, 3. for instance, उदीरिथ in Ca. has been corrected into उदारिथ. Here the C. MSS. have उदीरिथ, because they were copied from Ca. before it was corrected. But A. also has उदीरिथ. This by itself might be a mistake of the copyist of A.; but this peculiar mistake is not likely to have happened if A. had been copied from Ca., where this very mistake had already been very distinctly emendated. I have selected this passage for another purpose also. It shows that occasionally corrections are made in Ca. which cannot be traced back to A. They generally refer to such palpable errors, as for instance उदीरिथ instead of उदारिथ; and in these cases it is clear that the intelligent writer of Ca. was guided by his own judgment without looking to the authority of any MS. In order to prove that A. was copied from Ca., it would be necessary to point out passages where corrections in Ca. had been misread by the writer of A. This happens not unfrequently with the C. MSS. Alterations made by the original writer of Ca. were mistaken by the later copyists, and these mistakes are occasionally of such a character that they could only have happened with the very leaf of Ca. before the eyes of the copyist. Now I have not been able to find any evidence of this kind against the A. MSS. Quite at the beginning of the second Ashṭaka, for instance (page 1. line 9), Ca. reads ऋषिश्चान्यस्माद्दपेति परिभाषया। The writer seeing that he had left out रि between पे ति, made a mark at the top of पे, and wrote रि on the margin. The copyist of the first C. MS. mistook this mark for a vowel, and without looking to the margin wrote °द्दपैति. A. however has °द्दपेरिति. The same happened Rv. II. 6, 4, where Ca. had सूरिवेद्वान्. This the original writer himself corrected into सूरिर्विद्वान्, only that the space did not allow him to do more than to make a mark at the top of वे, and to draw a slight line between र and व. The copyist of C. mistook this for सूरिर्वैद्वान्, which henceforth became the reading of the C. MSS. Indeed it looks very much like सूरिर्वैद्वान् in Ca. A. however reads सूरिर्विद्वान्. Rv. I. 181, 8. (p. 366. l. 24.) Ca. had originally जलदः

प्रदानविशेषो वा. Accordingly all the C.'s read जलरः. A. however has जलदः, and from it the correction is made in Ca., where, subsequent to the taking of the first C. copy, the र was covered with yellow, and changed into द. जलरः is evidently an old mistake, because it occurs in B. also. Rv. III. 1, 8. (p. 626. l. 14.) the C. MSS. have जनुषा जन्म मनुष्याणां, thus leaving out two lines. The omission was originally made by the writer of Ca., but afterwards supplied on the margin from A. That it was not supplied from B., but from A., can be proved by the words स्वत एव बंधुरिति यावत्, which are not in B., but in A. only. At the beginning of the third Ashṭaka (Rv. III. 7, 1.) the invocation in Ca. is simply श्रीगणेशाय नमः ॥ ओं वागीश etc. It is the same in the C.'s. A 2. has श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ ॥ वागीश etc. The B.'s have श्रीगजेशाय नमः श्रीगुरुभ्यो नमः ॥ वागीश; only B. (Taylor) has a slight correction श्रीगणेशाय etc. Coincidences of this kind though they may seem irrelevant are really the most convincing. Again, Rv. III. 7, 1. (p. 661. l. 7.) A 2. has त प्र य आरुः, while Ca. and the C.'s have the right reading तत्र प्र य आरुः. In the same verse (p. 662. l. 3.) A 2. has शितिपृष्ठशब्दस्य; Ca. and the C.'s coincide in giving शितिपृष्ठस्य । पृष्ठशब्दस्य. Rv. III. 7, 2. (p. 663. l. 11.) Ca. has द्वितीयायां instead of the more primitive reading द्वितीयैकवचनांतस्य, which is in A 2. and B. The C.'s have again द्वितीयायां like Ca. As no case of this kind can be made out against A., it is necessary to regard the corrections in Ca. as collations from a MS. which was connected with the A. class. How A. and Ca. came originally to differ, is hard to say. But as it is impossible to account for the text of the one simply as a corruption of the other, A. and Ca. must be considered as two branches diverging from the original stock of Sáyaṇa's work which is lost to us. A. and Ca. are coordinate, not subordinate, though A. stands higher than Ca. B. also stands independent from A. and Ca. The C. MSS. on the contrary are subordinate to Ca., or, as in later portions of the Commentary, to A., and must therefore be discarded where the evidence for a reading has to be weighed by the authority of MSS. Even in cases where the C. MSS., particularly C 2. and C 5., contain large portions of the Commentary which are taken from an A. MS., they are of very little use for restoring the original text of A., except occcasionally in the second Ashṭaka where A 2. is defective. Here C 5. (Wilson 74.) has sometimes supplied the deficiency, but the modern date and general incorrectness of this MS. hardly allow us even then to ascribe much weight to its readings.

If we compare the three MSS., A., Ca., and the C.'s at the beginning of the

second Ashṭaka, it will be seen that they always confirm our view of their mutual relationship even in the most minute points. In कृतकृत्याः (p. 1. l. 2) Ca. had left out the Visarga, and it is wanting in the C.'s. It was afterwards added in Ca., above the line, कृतकृत्याः, and it stands above the line in A. also. P. 1. l. 6. Ca. had त्वेया instead of ज्ञेया. त्वेया became the reading of the C.'s, while in Ca. it was altered into ज्ञेया, which is the reading of A. P. 1. l. 7. Ca. had शतनामाद्ये, which was corrected by the writer himself (not *secunda manu* or with yellow orpiment) into शतर्चिनामाद्ये. This correction was therefore adopted by the C.'s, and it is also the reading of A. P. 1. l. 8. Ca. had °नुवाकै; one of the vowels was afterwards covered with yellow. The C. MSS. therefore read अनुवाकै; A. has अनुवाके. P. 1. l. 9. we read in Ca. पंचदर्शंचे. The C. MSS. adopt this as पंचदर्शंचे, while in Ca. it is corrected into पंचदशर्चं as it stands in A. P. 1. l. 10. देवा in Ca. was left out, and added on the margin. It is wanting in the C.'s. P. 1. l. 11. Ca. had प्र वो श्वैश्वदेवं. Here the copyist of the first C. MS. must have corrected the mistake, which was indeed very palpable, for the C.'s read वैश्वदेवं, which is also in Ca., but as a correction. P. 1. l. 11. Ca. had अस्य विशेषो लिंगिकः. Thus the C.'s have अस्य विशेषो। लैंगिकः। Ca. was afterwards corrected into विशेषविनियोगो लैंगिकः, but in such a manner that none but a learned copyist could have made out the correction. A. however has the right reading. P. 1. l. 17. Ca. had पातलशीलं, which became the reading of the C.'s. In Ca. it was altered into पालनशीलं, by putting १ over ल, and २ over त, and covering part of त with yellow. A. has distinctly पालनशीलं. Again (l. 18) after रुद्राय, रुत् is left out in Ca., and added from A. in the margin. It is wanting in the C.'s. Afterwards Ca. had originally तद्धेतुभूतं दुरितं द्रवयित्वे स्यंद्रावयित्वे। This was, not at all distinctly, corrected into दुरितं वा तस्य द्रावयित्वे, which is the reading of A. But the old mistake remained in the C.'s. After नामकाय (l. 19), देवाय is left out in Ca. and C.; it was added in Ca. from A. P. 2. l. 1. इषुध्यान् शत्रू Ca. and C.; इषुध्या शत्रून् Ca. sec. man., and A. P. 2. l. 3. सहि दिवो Ca. and C.; सह दिवो Ca. sec. man., and A. P. 2. l. 5. द्यावापृथिव्योर्मिध्ये Ca. The *i* in मिध्ये is covered with yellow in Ca., so that one should expect मिध्ये, in the C.'s, instead of which they have the correct reading मध्ये. On looking more closely, however, we find that the *i*, before it was covered with yellow, was already struck out with ink *prima manu*, which accounts for the adoption of the corrected reading in the C.'s. P. 2. l. 5. अस्तौषि Ca. and C.; अस्तोषि Ca. sec. man. and A. P. 2. l. 6. पतेः Ca. and C.; पातेः Ca. sec. man. and A. Ibidem, षिवात उणादि फ्रः Ca.; षिवात उणादि रुः C. The text of Ca. is corrected into पिवतेर्वा औणादिको फ्रः, but in such a confused way, that the writer

of A. could hardly have got his correct text पिवतेवैा श्चौशादिको रुः from Ca. P. 2. l. 8. दिव ञडिदं Ca. and C.; दिवः ञडिदं Ca. sec. man. and A. P. 2. l. 9. स्तौतिश्छांदसो Ca. and C.; स्तौतेश्छांदसो Ca. and A.; both sec. man. P. 2. l. 10. दधाते: । किः Ca. C.; दधातेः किः । Ca. sec. man. and A. P. 2. l. 10. कृत्स्वरेणां । तोदात्तः Ca. C.; कृत्स्वरेणांतोदात्तः Ca. sec. man. and A. P. 2. l. 10. उदोत्तत्वं Ca. C.; उदात्तत्वं Ca. sec. man. and A.

These are the various readings for one verse only. I have given them in full, partly to show that they confirm my view of the relation of the MSS. in the minutest detail, partly to convince those, who are so eager for a complete *varietas lectionis,* of the entire uselessness of such a compilation.

There is one more MSS. of Sáyaṇa which has come to hand since the publication of the first volume, and which, though rarely quoted in the *varietas lectionis,* deserves to be mentioned here. It was sent to me as a present by Mr. T. Edward Hall of Benares, to whose zealous exertions Sanskrit literature is already greatly indebted. Unfortunately it is but a fragment, beginning with the twenty-seventh Varga of the third Adhyáya of the third Ashṭaka, and ending at the end of the third Ashṭaka. But it is of great importance in so far as it served to confirm those principles of diplomatic criticism on which all the other MSS. of Sáyaṇa had been previously classified, and according to which their respective weight and authority had been determined. Its title is संवत् १६२४ वर्षे ॥ ॥ आषाढवदि ११ बुधे लिषितं ॥ श्रीरस्तु ॥ ॥ कल्याणमस्तु ॥ ॥ शिवमस्तु सर्वजगत परहितनिरता भवंति । भूतगणा दोषा प्रयांतु नाशो स्तु सर्वत्र सुखी भवतु लोकाः ॥ ॥ कल्याणं भूयात् ॥ This shows that its age is exactly the same as that of Ca.; Samvat 1624, or A.D. 1681. Its readings would therefore have had considerable weight whether they coincided with any of the three classes or not. But on a close examination it was found that not a single reading, not even a mistake, occurred in this MS. which was not known already from the A. MSS. Nay, I feel almost convinced that Colebrooke's A. MS. was copied directly from the fragment which is now in my possession. Rv. IV. 2, 13. (vol. III. p. 18.) the whole explanation of the thirteenth verse had been left out in Aa., but was afterwards added so as to cover the whole margin, not without giving rise to many ambiguities by the indistinctness of the letters. All these ambiguous letters are reproduced with the greatest exactness in Colebrooke's MS., where the explanation stands no longer in the margin, but forms part of the Commentary. A still clearer case occurs Rv. IV. 4, 4. (vol. III. p. 35.) Here also the Commentary on verse 4. had been left out in Aa., and been supplied as far as the space allowed on the margin. We have first two long lines at the top of the page. After this the text is con-

tinued on the margin of the right side, then on the margin of the left, and one line is placed under the last line of the text. I give as exact a copy of it as possible:

अथ चतुर्थी॥ उदग्ने तिष्ठेति। तिग्महेते तिग्मास्तीक्ष्णा हेतयो ज्वाला यस्य स तथोक्तः तादृश हे अग्ने उत्तिष्ठ रक्षोहननार्थं उद्य तो भवत्। शत्रून्प्रति आ तनुष्व। ज्वालासंधं विस्तारय। तेस्तैजः संघैः अमित्रान शत्रून् न्योषतात् नितरां दह हे समिधान स

| | |
|---|---|
| ष्टांतः अतसं | मितिं ह्रीं |
| न। यथा शु | ह्निं प्यमा |
| न्कमनार्द्रम | नाग्ने यः पुमा |
| तंस काष्ठं द | न् नो स्माक |
| हसि तद्वत् | मरातिं भा |
| ँषता त। उष | वप्रधानो नि |
| दाहे लोटि हे | र्देंशः अरा |
| स्तुह्योरिति | तित्वं शात्रवं |
| तातङ्गदेशः। | चक्रे कुरुते |
| धक्षि। दहे लो | अरातिम |
| टि बहुलं छंद | दानं वा कुरु |
| सीति शपो लु | ते तं पुमांसं |
| क् हो ढ इति ढ | नीवा न्यग्भू |
| त्वं भष्भावः षढोः कः सीति कत्वं निघातः॥ | तं धक्षि द |
| | ह। तत्व ह |

This is reproduced in Colebrooke's MS. (A 2.) in the following manner:

॥ चतुर्थी॥ उदग्ने तिष्ठेति॥ तिग्महेते तिग्मास्ती – हेतयो ज्वाला यस्य स तथोक्तः तादृश हे अग्ने उत्तिष्ठ रक्षोहननार्थं उद्यतो भवत्। शत्रून्प्रति आ तनुष्व ज्वालासंधं विस्तारय तस्तैजःसंघैः अमित्रान शत्रून् न्योषतात् निरंतरां दह हे समिधान स"ष्टांतः अतसं न। यथा शुन्कमनार्द्रमतं स काष्ठं दहसि तद्वत् ँषताता उष दाहे लोटि हेस्तुह्योरिति तातङादेशः धक्षि। दहे लोटि बहुलं छंदसीति शपो लुक् हो ढ इति ढत्वं भष्पभावः षढोः कः सीति कत्वं निघातः॥

"ह्निमिति ह्रींप्यमानाग्ने यः पुमान् नो स्माकमरातिं भावप्रधाने निर्देशः अरातित्वं शाशनं चक्रे कुरुते तं पुमांसं नीवा न्यग्भूतं धक्षि देहा तत्व ह"

If we compare the readings of the two MSS., and remember that both came from Benares, there can hardly be a doubt that the latter (A 2.) was copied directly from Aa. It is clear that the writer of Colebrooke's MS. was misled by the marginal notes of Aa., that he left out all that was written on the right margin, and went on from the end of the second line to the third line on the left margin. After having proceeded to the end of the verse he became aware of his mistake, and then added the whole omitted passage on the margin. This is nearly convincing. But there are other points to show that A 2. is a direct descendant of Aa. The क्ष्ण in तीक्ष्ण is very indistinct in Aa.; a blank is left in A 2. The ष in ज्वालासंघं looks, according to Aa.'s style of writing, very much like ध; A 1. has ध. In

ऽेषतात्। the Viráma under त is covered in Aa. by the ट्टि of the next line; the writer of A 2. did not perceive this, and thus altered त्। into ता. In Aa. the marked ह्निं in the fourth line is meant as a correction of the marked र्त्ति in the third. The writer of A 2. began his marginal notes with the fourth line, mistook the third as an addition to come in after the marked ह्निं, and thus wrote ह्निमिति ह्रीं instead of मिह्निह्रीं. शत्वं in Aa. would look exactly like शाशनं to one not familiar with the peculiar style of writing used in these marginal notes; in A 2. we find शाशनं. Other coincidences between Aa. and A 2. require no explanation. The only real difference between the two is निरंतरां in A 2. instead of नितरां in Aa.; a mistake evidently produced by the distraction of the writer, and the omission of the passage between कुरुते and कुरुते. This will be sufficient to show that Aa. is really the prototype of the A. MSS., and that therefore, if the whole of this MS. could have been recovered, it would have rendered to the A. class the same service which was rendered to the C. class by Ca.

## VARIETAS LECTIONIS.

### Maṇḍala I. Súkta 122.

### Ashṭaka II.

Page 2. l. 9. (I. 122, 1.) कर्मण्यधिकरणे च ॥ सप्तम्यधिकरणे च A. B. C. See Páṇ. III. 3, 93, and II. 3, 36.

P. 4. l. 8. (122, 4.) प्रवर्षेणाध्वनियुक्तस्य A. Ca. प्रकर्षेणाध्वनियुक्तस्य C. प्रकर्षेण ध्वनियुक्तस्य B.

P. 5. l. 25. (122, 7.) अवरुंधाना B. अवरुद्धा A. C.

P. 8. l. 13. (122, 11.) Instead of लट्, B. has लुङ्, A. and C. लङ्. If it were लङ्, the termination तः (i. e. त) would not be व्यत्ययेन; if it were लुङ्, the शपो लुक् could not be called छांदसः।

P. 9. l. 12. (122, 12.) येषु is omitted in A. B. C.

P. 9. l. 14. (122, 12.) Instead of लेटि, A. B. C. have लोटि.

P. 10. l. 1. (122, 13.) Instead of तरतेरौणादिक उसिः, B. has औणादिको सुन्, A. and C. कोऽसुन्.

P. 10. l. 3. (122, 13.) किं प्रसाधयति A. C. प्रसादियति B.

P. 10. l. 4. (122, 13.) न प्रसाधयंति ॥ संप्रसाधयंति A. Ca. प्रसाधयंति C. राजायंति B.

P. 10. l. 6. (122, 13.) किं साधयंति A. Ca. किं - धयंति C. किं सादीयंति B.

P. 10. l. 17. (122, 14.) °तरमेव चाकंतु A. Ca. °तरमेव वा चकंतु C. °तरमेव वा चाकतु B. l. 18. आचकंत्विति A. आचाकंत्विति Ca. प्रोवाचकं° C. आस्माचकं B.

P. 13. l. 17. (123, 4.) प्रतिहतमुद्योगं प्रकाशनरूपं ॥ प्रतिगृहमुद्योगं प्रकाशनरूपं A. Ca. प्रतिहतमुद्योगं प्रकाशनरूपं C. प्रतिहतमुद्योगप्रकाशरूप B.

P. 15. l. 17. (123, 7.) परिक्षपयतोर्वा ॥ परिक्षपयितोर्वा B. परिक्षिपयितोर्वा A. Ca. परिक्षितोपि C.

P. 16. l. 4. (123, 8.) न दृश्यंते A. Ca. B. नश्यंते C.

P. 16. l. 5. (123, 8.) All the MSS. read स चैकविंशतिघटिकाभिः षड्विंशतिपराभिश्च संमितः। except B., which has पराभि संमितः। There is no doubt a mistake in this part of the Commentary. A day consists of 60 Ghaṭikás, a Ghaṭiká of 60 Kalas, a Kala of 60 Nimeshas, a Nimesha of 30 Tatparas: cf. Bháskara's Guṇitádhyáya, I. 21, translated by Dr. Roer; Journal of the Asiatic Society of Bengal, No. CXLV. p. 55. Now if, according to Sáyaṇa, the sun's daily course is 5059 Yojanas, which is the equatorial circumference of the earth, (cf. Bentley, Historical View of the Hindu Astronomy, p. 185,) the thirty Yojanas which are ascribed to the duration of twilight cannot correspond to 21 Ghaṭikás and 26 Paras, even if it were possible to take Para in the sense of Tatparas. The numbers 21, 26, however, are such that they seem to be based on calculation, though on a very inaccurate one. For

$$30 \text{ Yojanas} = \frac{30}{5059} \times 60 \times 60 \text{ Kalas}$$

$$= 21 + \frac{1761}{5059}$$

$$\text{And } \frac{1761}{5059} \text{ Kalas} = 60 \times \frac{1761}{5059} \text{ Nimeshas}$$

$$= 20 + \frac{4480}{5059}$$

$$\text{or } 30 \text{ Yojanas} = 21 \text{ Kalas} + 20\tfrac{4480}{5059} \text{ Nimeshas.}$$

We get still nearer to Sáyaṇa's numbers if we put the approximate value $\frac{1}{168}$ for the fraction $\frac{30}{5059}$. This gives 30 Yojanas = 21 Kalas + $25\frac{5}{7}$ Nimeshas.

P. 16. l. 10. (123, 8.) उदिता B. C. (?) उदितो A. Ca.

P. 16. l. 23. (123, 8.) यमकोट्यां ॥ यवकोद्यां A. Ca. B. ययवकोद्यां C. Cf. Reinaud, Mémoire sur l'Inde, p. 341; and Rája Rádhakanta's Sabda-Kalpa-Druma s. v.

P. 17. l. 19. (123, 10.) जनांतिके विवसना A. Ca. B. वसना C.

P. 21. l. 18. (124, 3.) सम्यगानयित्री (सम्यग्मानयित्री is a misprint) सम्यगनयित्री A. Ca. सम्यगमनयित्री B. सम्यगनपित्री C. If the causative of ऋण् could be formed with a short ऋ, the reading of A. would be correct.

P. 25. l. 2. (124, 7.) तां तु सभ्या विचार्यै यदीयं रिक्थं लभते चेदक्षैः संताड्य तदीयं धनं वितरंति A. Ca. There is evidently a mistake in the grammatical construction of this sentence. It lies either in चेद् or in संताड्य. No help is to be derived from the various readings of the MSS. B. has चेद्दक्षैः; C 2. reads यदीयं रित्यं लते चेदक्षैः संतोड्य।; C 5. तांत सद्या विद्या विचाय and संतात्म. The Commentary on the Nirukta is of no use for the grammatical restitution of the text, but as it explains the custom alluded to by

Sáyaṇa, I shall give here some extracts from it. गर्तः सभास्थाणुरिति। अक्षनिवपनपीठमित्यर्थः। गृणातेः स हि सत्यसंगरो भवति। संगीर्यंते हि तत्र सत्यं। इदमत्र पतितमिदमत्र न पतितमित्येवं प्रायेण कितवास्तत्रानृतं ब्रुवते। तमेवंलक्षणं गर्तमारोहति या स्त्री सा गर्तारुगित्युच्यते। तदेतद्गर्तस्य सभास्थाणोरारोहणं रिक्थलाभहेतुर्दाक्षिणात्येष्वपुत्रायाः अपतिकायाः स्त्रियाः प्रसिद्धं। तयैव प्रसिद्ध्या निरुच्यते। देशसमाचारव्यवस्थयापि क्वचिन्मंत्रार्थो निर्वक्तव्य इत्येतदनेन प्रदर्शितं भवति। तं तत्र यापुत्रा यापतिका सारोहति। तं सभास्थाणुं तत्र कितवमध्येऽवस्थितं यापुत्रा स्त्री यापतिका सारोहति तस्मिन्नुपविशतीत्यर्थः। ततः सा भर्तृबंधुभ्यः सकाशाद्रिक्थं लभते। यस्तस्या भर्तृसक्तोऽंशस्तं। एवमसौ सनये लब्धये धनानां गर्तमारोहति।

P. 26. l. 4. (124, 8.) सम्यगननहेतव आपः समनाः। ता गच्छंतीति Ca. sec. manu. सम्यगागमनहेतवः B. सम्यगमन° A. C.

P. 27. l. 23. (124, 11.) दृष्ट्वोदयो॥ दृष्टोदयो B. दृष्ट्वा जयो A. C.

P. 29. l. 19. (125, 1.) राजानुचरैः B. राजानुचरः A. C.

P. 29. l. 21. (125, 1.) स्वकीये चासन उप°॥ स्वकीयमासनोप° C. Ca. pr. man. स्वकीयमनस्यमुप° B. स्वकीय चासने उप A. Ca. sec. man.

P. 29. l. 22. (125, 1.) किंनामा B. किं नाम A. C. Ibid. स च पृष्टो मातरं पितरं च स्ववृत्तांतं चाचचक्षे॥ मातरं पितरं च स्ववृत्तांतं आचक्ष A. C. मातरपितरं च स्ववृत्तांतं आचक्ष B.

P. 30. l. 1. (125, 1.) राजन्यत्वात् A. Ca. sec. man. C 5. राजत्वात् Ca. pr. man. C. B. Ibid. प्रतिग्रह इत्युक्तत्वात् B. प्रतिग्रहात् A. C.

P. 30. l. 4. (125, 1.) ऋषिरुशिग्नामिकां॥ ऋषिः उशिग्नामकां A. B. C. उशिग्नामिकां would better be left out here or in the sixth line.

P. 32. l. 17. (125, 4.) इत्यध्यवसितवंतमप्युप॥ इत्यध्येवसितवंतमप्युप B. इत्यवगतमिति उप A. इत्यवगतमपि उप Ca. C.

P32. . l. 24. (125, 4.) प्राणिनः Ca. prima manu. C. B. प्राणिनं A. Ca. sec. man.

P. 37. l. 7. (126, 4.) पज्रा घासाद्यन्नवंतः A. Ca. sec. man. — साधानयंतः C. and Ca. prima manu.? वासावनयंतः B.

P. 44. l. 7. (127, 5.) हविरश्नंत॥ हविरश्नंन् A. हविरश्ननू Ca. prima manu. हविरश्नन् C. हविरश्नंन्ः Ca. sec. man. हविरश्नतः B.

P. 45. l. 2. (127, 6.) अत एवानवग्रहः स एव शिष्यते॥ एत एमानवग्रह स एव शिष्यते B. एत एवानवाग्रः स एव शिष्यते A. Ca. अत एवानवाग्रः स एव सिष्यतेः C.

P. 47. l. 11. (127, 9.) उक्तगुणविशिष्टः C. गुणयुक्तविशिष्टः A. B. Ca.

P. 48. l. 10. (127, 10.) Instead of घृतादिहविर्युक्तो read घृतादिप्रबुद्धहविर्युक्तो A. B. Ca. °प्रयुद्ध° C.

P. 49. l. 3. (127, 11.) युक्तेन त्वदायत्ते मय्यनुग्रहयुक्तेनेत्यर्थः॥ युक्तेन स्वकीयत्वेन मय्यनुग्रहयुक्तेनेत्यर्थः। A. Ca. sec. man. युक्तेन त्वदीयत्ते मय्यनुग्रहयुक्तेनेत्यर्थः Ca. prima man. C. युक्तेन स्वदायत्ते मनुष्यग्रहयुक्तेनेत्यर्थः B.

P. 54. l. 17. (128, 6.) °रस्तु व्यपदेशमात्रेणेति भावः A. Ca. sec. man. °रस्तु विपदेशमात्रेति भावः Ca. pr. man. C. °रस्तूपदेश° B.

P. 59. l. 10. (129, 3.) रुद्रो वै क्रूरो यदयमग्निरिति। A. Ca. sec. man. रुद्रो वै क्रूरो यदग्निरिति C. pr. man. C. रुद्रो वा एष यऽग्निरिति B.

P. 62. l. 5. (129, 6.) क्षुद्रमिव। क्षेप्तुं शक्यमुदकादिकमिव। उदकं यथा तिष्ठति स्रवन्नश्यति तथासावपीत्यर्थः। B. reads क्षुद्रमिवाक्षेप्तुं शक्यमुदकादिकमिव उदकं यथा तिष्ठति अवेन्नश्यति तथासावपीत्यर्थः।. A. has उदकं

यथा तिष्ठति स्रवन्नश्यति, and C. तिष्ठति अवन्नश्यति ।. The mistake probably lies in तिष्ठति, instead of which a locative might be expected of a word meaning 'precipice,' or something similar, into which water falls and disappears. Two verbs like तिष्ठति and नश्यति put together without a copula is against the usual style of Sáyaṇa. It would be irregular also to join स्रवन् or निस्रवन् to words like निष्ठ (loss, disappearance, end) or विष्ठ (fæces), reading निष्ठनिस्रवन् instead of तिष्ठति स्रवन्. Still less could तिष्ठति be taken for a locative, or in the sense of standing water (सरसि).

P. 65. l. 9. (129, 10.) All the MSS. read महते प्रीतये instead of महत्यै प्रीतये. It is possible that Sáyaṇa himself wrote महते, intending to add, as he frequently does, अवसे or रक्षणाय. In this case he would have made the adjective agree, not with प्रीतये, but with रक्षणाय. As it is, the authority of the MSS. must give way before the claims of grammar.

P. 66. l. 12. (129, 11.) Instead of तमिंद्रं देवा न व्यसृज्यंतेत्यादि, B. reads तमिंद्रो देवता इ सृज्यंतेत्यादि; C. and A. तमिंद्रो देवान् विसृज्यतेत्यादि. We might read तमिंद्रं देवा व्यसृज्यंतेत्यादि, taking विसृज् in the sense of 'creating,' as it is frequently used in vaidik as well as epic works. This would correspond better with the text of the hymn, where it is said that Indra was created by his father to destroy the evil spirits. The words of the Commentator are probably a quotation from a Bráhmaṇa, and may thus still receive a safer correction.

P. 70. l. 6. (130, 4.) Instead of स्वोपयोगाय (A. C.), B. reads यागाय, which with reference to the Yúpa gives a good sense; but it is evidently a later correction of the transcribers. Ca. reads पयोगाय, and has स्वो in the margin.

P. 70. l. 27. (130, 5.) Instead of यस्मै कस्मैचित्समर्थाय तदर्थं, A. and Ca. sec. man. read यस्य कस्यचित्समर्थाय तदर्थं, C. यस्य कस्य न समर्थाय तदर्थं. In B. the whole sentence from यथा घा to यद्वा is left out. I have corrected it, because it seemed too ungrammatical for the time of Sáyaṇa to have the pronoun in the genitive joined to a substantive in the dative. Similar barbarisms occur, however, in later works and less erudite authors.

P. 74. l. 14. (130, 9.) ततः करोति पूर्वं A. B. C.

P. 74. l. 24. (130, 9.) यथा त्वोतेन A. C. यथा चोरणेनेण B. (चोरेण?).

P. 75. l. 10. (130, 10.) आष्टमिकमाद्युदात्तत्वं A. B. C. It refers therefore to Páṇ. VIII. 1, 19, and in particular to अपादादौ of VIII. 1, 18. The आद्युदात्तत्वं can be called आष्टमिकं only in a negative sense, or by way of प्रत्युदाहरणं.

P. 78. l. 4. (131, 3.) यस्य गृहानित्यादिनैमित्तिकवा° ॥ यस्य गृहामित्यानै° A. यस्य गृहानित्यनै° C. Ca. यस्य गृहनित्यनैमित्तिककाम्यवा° B.

P. 78. l. 13. (131, 3.) किं हि वचनेन कुर्यान्नास्ति B. किं हि वचनं न कुर्या नास्त्वि C. किं हि वचनं न कुर्यानास्ति A. Ca.

P. 79. l. 16. (131, 4.) इमान्यप्कार्याणि ॥ इमानि अप्कार्याणि A. Ca. इमानि अपकार्याणि C. इमानि अपः कार्याणि B.

P. 80. l. 6. (131, 5.) युद्धाय हि धीराः संभजंते । A. C. यद्वा ये धीराः संभजंते B.

P. 80. l. 7. (131, 5.) संग्रामवासिनस्त्वय्यन्यामन्यामन्यांश्चान्यांश्च ॥ °नः त्वय्यन्यामन्यः C. °नः त्वय्यन्यामन्यां A. Ca. °नः ॥ त्वयि अन्यामन्यां B.

P. 80. l. 11. (131, 5.) इत्यदादेशे ॥ इत्यादोशे C. इत्यादेशे A. Ca. B.

P. 80. l. 24. (131, 6.) अपि नाम जानीहि B. अपि नाम तावकमसत् A. Ca. sec. m. नावकमसत् C. Ca. pr. m.

P. 81. l. 2. (131, 6.) गुणप्रतिषेधाभः ॥ गुणाभावः A. B. C.

P. 82. l. 10. (132, 1.) Instead of हे मघवन् । मघः सौख्यं । तद्वन्निंद्र, which is the reading of A. and C., B. has the more usual explanation, हे मघवन् धनवन्निंद्र ।

P. 82. l. 11. (132, 1.) The Commentator explains इंद्रत्वोताः as a compound without adverting at all to the irregularity of such a composition. The Pada-text does not separate इंद्र from त्वोताः, and I have therefore left it as one word. If त्वोताः is to be taken in the sense of 'protected by thee,' it must of course be separated from इंद्र, whilst if इंद्रत्वोताः is one word, the first part is probably इंद्रत्व in the sense of 'the power of Indra,' and the whole means 'protected by the power of Indra.' The question is only how far we are allowed to alter the accent of the word. त्वाऽऊंतः is a common expression; इंद्रत्वाऽऊताः occurs but once more in a hymn of Sobhari, VIII. 19, 16, where Sáyaṇa explains it again by इंद्रेण ईश्वरेण त्वया ऊता रक्षिताः संतः ।

P. 82. l. 14. (132, 1.) The words पूर्व्यें धनेऽस्मिन्यज्ञे belong only to B., and may be a later addition. It often happens where Sáyaṇa leaves words in the text without explanation, that the writers of B. supply them by conjecture.

P. 83. l. 11. (132, 2.) All the MSS. read करोतेः शतरि.

P. 84. l. 20. (132, 3.) प्रकाशं A. B. C. प्रकारं (?).

P. 85. l. 14. (132, 4.) तमेव यष्टारं B. The Commentator seems to distinguish between कंचिद्व्रतं, which he explains by अयज्वानं, and हृणायंतं चिद्व्रतं, i. e. अस्मासु रोषं कुर्वंतमेव यष्टारं. A. and C. however read कुर्वंतं तमेवायष्टारं ।

P. 87. l. 19. (132, 6.) This quotation from Śaunaka refers to his Rig-vidhána, of which two MSS. exist in the E.I.H. Collection, No. 1732. Both leave out the second verse from ता जपन् to समश्नुते । which is found, however, in all the MSS. of Sáyaṇa. In the first verse A. Ca. read उभे पुनामीति सूक्ते समर्चेस्तु प्रकीर्तिताः । C. समर्चे सुप्राकीर्तितोः । I have adopted the text of B. उभे पुनामीति पुरा रिपुघ्न्यस्तु प्रकीर्तिताः । as it coincides with both the MSS. of the Rig-vidhána, only that 1732 a. reads परा instead of पुरा. For the same reason I have adopted नियच्छति at the end of the third verse; it rests on the authority not only of B., but also of the Rig-vidhána MSS. 1732 a. and b. A. and C. read निकृंतति instead.

P. 88. l. 2. (133, 1.) I am not quite certain whether मही: is explained by उर्वीः । The passage is wanting in B.; A. Ca. sec. m. read महीः तुर्वीः, Ca. pr. m. and C. महीः सर्वाः ।

P. 90. l. 19. (133, 6.) द्युलोक आश्रयभूतः॥ द्युलोकः आश्रयभूतः B. द्युलोको नामाश्रयभूतः A. द्युलोकानामाश्रयभूतः Ca. sec. m. द्युलोकानाश्रयभूतः C. Ca. pr. m. (द्युलोको देवानामाश्रयभूतः ?).

P. 91. l. 1. (133, 6.) विचिंत्याग्निं A. Ca. विविचिंत्याग्निं C. इत्यग्निं B.

P. 91. l. 11. (133, 6.) त्रिसप्तैः सप्तभिस्त्रिभिः सप्तभिर्वा सप्तभिरत्नु° A. Ca. त्रिसप्तैः त्रिभिः सप्तभिर्वा° C. त्रिसप्तैः सप्तभिः सप्तभिर्वा सप्तभिरत्नु° B.

P. 93. l. 2. (134, 1.) छांदस उपधालोपः A. C. छांदस नुलोपः B.

P. 93. l. 13. (134, 2.) अभिप्रवदशा° B. C. अभिप्रवः दशा° A. Ca. pr. m.

P. 94. l. 17. (134, 3.) ससतीमुपपत्या A. C. ससतीं पत्या° B.

P. 94. l. 19. (134, 3.) कर्मव्यग्रेणोपपत्स्यपंतं A. C. omitted in B. व्यग्रेण = व्यग्रतया or वैयग्र्येण.

P. 97. l. 27. (135, 1.) After नियुता, B. adds नियुद्भिरागच्छेति शेषः। यद्वा.

P. 98. l. 25. (135, 2.) यष्टव्येन A. B. C., not यष्टव्यत्वेन.

P. 101. l. 26. (135, 6.) अभिलक्ष्यासृज्यंत॥ अभिसृज्यालक्ष्यंत A. Ca. B. अभिलक्ष्यासृज्यंत C.

P. 102. l. 16. (135, 7.) प्रियतप्यात्मिका A. B. C. instead of the more usual प्रियसत्यात्मिका.

P. 106. l. 11. (136, 2.) संगतमभूत्। A. and C. read संगतोऽभूत्, while B. leaves it out altogether. Perhaps it is a repetition from the preceding line; but if it is at all to be repeated here, it must be संगतं instead of संगतो. The same fault occurs again in all the MSS., line 14, संगतोऽभूत् instead of संगतमभूत्.

P. 106. l. 16. (136, 2.) All the MSS. have यद्यपि, and again तथा यद्यपि. The sense, however, would become much clearer if the first यद्यपि was omitted.

P. 106. l. 20. (136, 2.) दधाते। धारयतः। दधाये। A. Ca. दधाथे धारयथः। C. दधाये। धारयथः B. And again line 22, दधाये A. C., दधाये B. P. 107. l. 8. also, all the MSS. have सचेथे instead of सचेते, but explain it by भवतः।

P. 107. l. 6. (163, 3.) Here again Sáyaṇa's Commentary follows a different text from that which we find in the MSS. of the Rig-veda. All the MSS. read धारयत्क्षितिं as one word, while Sáyaṇa explains it as two, धारयत् क्षितिं, which is evidently wrong.

P. 108. l. 25. (136, 5.) Here also instead of पातः। परितो रक्षतं॥ A. C. have पायः। परितो रक्षतं। B. पातः। परितो रक्षतं। Cf. p. 106. l. 20.

P. 112. l. 9. (137, 2.) सोमासः सोमा—तमिति शेषः। A. Ca., except that they read दध्याश्रयण° and यावभिर°. C. leaves out the whole from दध्याशिरो to दध्याशिरा, and has also यावभिर°. B. has सोमासः सोमाः ग्रावभिः इभिषुताः संपन्नाः अत अयाततमिति शेषः। दध्याशिरः॥ दध्याश्रयणवंतः इमे—तमिति शेषः। only leaving out सोमाः before सुतासो मंत्रेण.

P. 113. l. 7. (137, 4.) केवल औणादिकोऽरप्रत्ययः॥ केवल औणादिको अरिप्रत्ययः। A. Ca. B. केवल क्षणादिको अरिप्रत्ययः। C. See, however, Uṇádi-Sútra III. 131.

P. 114. l. 7. (138, 1.) इति शेषः। A. B. C.

P. 115. l. 4. (138, 2.) अन्नं कृधि कुर्वित्यर्थः॥ अन्नं अधि कुर्वित्यर्थः A. Ca. अन्न अ। धि कुर्वित्यर्थः। C. अन्नं कृधि कुवित्यर्थः। B.

P. 116. l. 8. (138, 4.) पादपूरणः। All the MSS. read here पदपूरणः, and throughout they vary between पद° and पाद°. I have always adopted पादपूरण in the text: cf.

Páṇ. VI. 1, 134. सोऽचि लोपे चेत्पादपूरणं ।; VI. 1, 57. गोःपादांते ।; and VIII. 1, 18. अनुदात्तं सर्वमपादादौ ।. In the Nirukta I. 9., however, we read अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रंथेषु वाक्यपूरणा आगच्छंति पदपूरणास्ते मिताक्षरेषु, and I find no various reading in the MSS. of the Nirukta or of its Commentary. In the Prátiśákhyas again we have पादपूरण, as Pr. A. XII. 103. क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् । सत्वाभिधायकं नाम निपातः पादपूरणः ॥

P. 116. l. 9. (138, 4.) पूषनामेदं । A. Ca. पूषणामेदं C. पूषणमिदं B.

P. 116. l. 10. (138, 4.) ओ इति ॥ अजाः ओ इति । A. Ca. B. आजाः ऊं इति । C. These readings have probably arisen from the word अजाः, which had occurred several times before, and was still in the mind of the transcribers. It is evidently an old mistake. Either it owes its origin to a mere *lusus memoriæ*, or, what is more likely, it is a corruption of आङ् उ instead of ओ.

P. 116. l. 14. (138, 4.) यद्वा अघृणे ॥ यद्वा आहृणे A. यद्वा आह्वण C. यद्वा आहूयमान B.

P. 118. l. 9. (139, 2.) त्वदुद्देश्यैः and त्वदासक्तेन A. B. C. instead of युष्मद्° or तद्° ।

P. 118. l. 10. (139, 2.) आत्मीयैरनन्यैश्चक्षुरादींद्रियैः ॥ आत्मीयैरन्यैश्चुरा° A. C. आत्मीयैरिंद्रियैः B. But line 11, B. reads अस्मदीयैश्चक्षुरादींद्रियैर्नासाद्य°, while A. has अस्मदीयैरिंद्रियैः मनासाद्य°, C. अस्मदीयैरिंद्रियैः स नसाद्य°.

P. 119. l. 23. (139, 4.) वां युवयोर्वंधुरे C. वां युवयोर्वंधुरत्वय B. युवां युवयोर्वंधुरे A. Ca. The reading may have been वां युवां युवयो°; but it is not unlikely that Sáyaṇa himself wrote वां युवयो°, though युवां would have made the sentence much clearer. That Sáyaṇa himself had not written युवां, I conclude from this, that वंधुरे, which is here left out in B., is some lines further down wrongly inserted after another वां युवयोः. It is curious, however, that वंधुरे should occur after this second वां युवयोः, not only in B., but in A. also, though in A. it had been inserted in its right place. वां युवां युवयोः would be the best reading, and might be defended by A. and Ca.

P. 119. l. 25. (139, 4.) स्याम । अस्थापयाम ॥ स्याम स्थापयाम । B. स्याम तस्थापयामास । C. Ca. pr. m. स्याम स्थापयामास । A. Ca. sec. m.

P. 121. l. 25. (139, 7.) आवाहनं । A. B. C.

P. 122. l. 12. (139, 7.) लब्ध्वेव वा लोपस्त इति तलोपः ॥ लब्ध्वेव° Ca. A. (but C[a] 5. has ल - व वा.) लब्धेव वा लोपस्त इति लोपः । C. लोपस्त ङत तलोपः । B.

P. 124. l. 5. (139, 9.) The last lines of the Commentary contain several difficult passages, probably owing to defects in the original MS. C. leaves out the words from अस्माकं to जन्मा, and instead of संबद्धा यागा वा, A. Ca. read संबद्धा या गावः, B. संबंधा यागा वा. The most difficult sentence, however, is the following: असौ विशिष्टजन्मा वो यदा योग्ये इति तैर्वक्तव्यत्वेन तदधीनत्वं । A. Ca. C. leaves out the first words and begins अवो यदा योग्ये इति निर्वक्तव्यत्वेन तदधीनत्वं. B. again has असौ विशिष्टा जन्मा वौ यदा योग्ये इति ॥ तैर्वक्तव्यत्वेन तदधीनत्वं. None of these readings can be the right one, and I was obliged to write by conjecture असौ विशिष्टजन्मा वो यज्ञयोग्य इति तैर्वक्तव्यत्वेन तदधीनत्वं. दा or द्ध is a common mistake for ज्ञ in Sanskrit MSS. The sense would be, 'These old sages know my noble descent, and as they live amongst the great Rishis they can tell them

that this man (I myself, Parucchepa,) is of noble origin, and therefore fit to offer sacrifices. In this way our sacrifices may be said to be dependent on them.' Afterwards B. leaves out the words from वाचा to वाचा, while both the other MSS. insert सर्वो जनः before किंच, but without a verb corresponding to it. In B. we have afterwards, after नमामि चेत्यर्थः, the words तथा इंद्राग्नी गिरा आनमे । ह पूरणः । which occur neither in A. nor C. ह पूरणः refers to the ह in the first Páda; the other words serve as a commentary to that portion of the text of which Sáyaṇa's explanation had been lost in B.

P. 124. l. 26. (139, 10.) वृष्ट्युत्पन्नैः B. C. वृष्ट्युत्पनैः A. Ca. वृष्ट्युत्पादनैः or वृष्ट्युदकैः ? ॥

P. 127. l. 2. (140, 1.) ज्ञानविचारकत्वादिति भावः A. C. ज्ञानाति ॥ रेकत्वादिति भावः B.

P. 127. l. 4. (140, 1.) हृद्येन ॥ हृद्येन A. Ca. दूद्येन C. नृद्येन B.

P. 131. l. 8. (140, 8.) इवाकुटिलाः A. B. C.

P. 131. l. 20. (140, 8.) प्राणयन् रक्षति A. C. प्राणान् रक्षति B.

P. 132. l. 6. (140, 9.) विवने A. Ca. sec. m. विचरे C. विवारे B.

P. 133. l. 22. (140, 12.) After दुःखात्मकस्य a word like संसारस्य is required, but is omitted in all the MSS.

P. 140. l. 12. (141, 9.) विश्वथा विश्व इव विश्वात्मक इव विभुर्मित्रार्यमात्मना सर्वव्यापी परिभूः स्वतेजसा सर्वतः परिभविता सन् A. C. विश्वथा सर्वथा विभुः प्रभुः परिभूः परिभविता सन् B. सर्वथा omitted in B 3.

P. 141. l. 25. (141, 12.) उतशब्दोऽप्यर्थः । स च संभावनायां B. उतशब्दो स व संभावनायां C. उतशब्दोऽत्र संभावनायां A. Ca. sec. m.

P. 142. l. 3. (141, 12.) चंद्ररथः सुवर्णमयरथोपेतः A. Ca. sec. m. चंद्ररथः आह्लादरथः B. चंद्ररथः C. Ca. pr. m.

P. 142. l. 18. (141, 13.) शब्दयंतु । निष्पूर्वः स्तनतिः शब्दकर्मा ॥ शब्दयंतु । निष्पूर्वः स्तनोति शब्दकर्मा B. शब्दयंतुः पूर्वः । स्तनौवि शब्दकर्मा C. शब्दयंतीत्यर्थः । तनोति शब्दकर्मा A. Ca. sec. m.

P. 142. l. 21. (141, 13.) अभिनिसः स्तनः शब्दसंज्ञायां ॥ अभिनिसस्तनः शब्दसंज्ञायां B. अतिनिः श्रस्वं नश्यतु संतु संज्ञायां A. Ca. (नस्यंत Cª 5.) अत्ति निः असां नश्यतु शंज्ञायां C.

P. 144. l. 16. (142, 3.) अद्य क्षणे B. C. साद्युपेक्षणे A. Ca.

P. 149. l. 3. (142, 13.) यक्ष्यमाणदेवतानां ताः B. यक्ष्यमाणादेवतानां ताः A. Ca. देवतानां नाः C.

P. 152. l. 10. (143, 5.) वरणाय ॥ वरूणाय A. Ca. B. रणाय C.

P. 153. l. 13. (143, 7.) यद्वा प्रतीकमंगं । दीप्तज्वालामित्यर्थः B. यद्वा प्रदीप्तमंगं दीप्तज्वालामित्यर्थः A. Ca. deest in C. (लमित्यर्थः Cª 5.)

P. 153. l. 17. (143, 7.) अनुक्रांतो वा A. B. C. अनाक्रांतो वा ?.

P. 154. l. 22. (144, 1.) आ चतुर्थात्कर्मणोऽभिसमीक्षेतेदं करिष्यतीत्युक्तत्वात् ॥ आ चतुर्थ्यात्कर्मणोऽभिसमीक्ष्येतेदं करिष्यतीत्युक्तत्वात् A. Ca. आ चतुर्थात्कर्मणो भिसमीक्ष्येतेदं करीष्य इति त्युक्तत्वात् C. आ चतुर्थात्कर्मणो भिसमीक्षेतेदं करिष्यतीत्युक्तत्वात् B. (आ चतुर्थ्यात् कर्मणो तिसमीक्षतेदं करिष्यतीत्युक्तत्वात् Cª 5.)

P. 157. l. 7. (144, 5.) व्रिशो विशः A. Ca. व्रिशो वृिशः B. अंगुलयः विपा :परस्प° C. In Rájayajvan's Commentary on the Nighaṇṭu व्रिशः is derived from विश प्रवेशने । क्विपि रेफ उपजनः । He also quotes this passage from the Rig-veda, with the Commentary of Mádhava, which differs, however, from our text: कर्मसु धीयमाना दशांगुलय इति माधवभाष्यं ॥

P. 157. l. 13. (144, 5.) अधिशब्दोऽनर्थको धात्वर्थमात्रानुवादी ॥ अधिशब्दानर्थके त्वात्वर्थमात्रानुवादी A. Ca. (त्वत्व° $C^a$ 5.) अधिशब्दो र्थको शत्वर्थमात्रानुवादी C. अधिशब्दो नर्थकत्वात्वदर्थमात्रानुवादी B.

P. 158. l. 25. (145, 1.) From the sixth to the thirteenth Súkta of the twenty-first Anuváka there is a mistake in the Commentary as to the number of each hymn.

P. 159. l. 8. (145, 1.) यत्स्वर्गादिविषयं प्रष्टव्यमस्ति तत्तस्यैव प्रष्टव्यमस्ति। तस्यैव प्रष्टव्यत्वे ॥ स्वर्गादिविषयं प्रष्टव्यमस्ति तत्तस्यैव प्रष्टव्यत्वे A. B. Ca. यत्स्वर्गादिविषयं प्रष्टव्यमस्ति तत्तस्यैव प्रष्टव्यमस्ति। तत्तस्यैव प्रष्टव्यमस्ति। तत्तस्यैव प्रष्टव्यत्वे C.

P. 159. l. 15. (145, 1.) असाध्यं नियम्यापि साधयितुं शक्त इत्यर्थः A. C. °म्यानपि B. (°म्य नापि साधयितुं शक्य?.)

P. 160. l. 17. (145, 3.) मंचाः क्रोशंतीतिवत् A. Ca. मंवाः क्रोशंतीतिवन् C. मंत्राः॥ क्रोशंतीतिवत् B.

P. 160. l. 22. (145, 3.) तयात्वैव परस्तादाम्नास्यते ॥ पुरस्ताद° A. B. C. See, however, I. 161, 6.

P. 168. l. 6. (147, 4.) अन्यान्यप्यस्म° A. B. C. अन्यान्यपि यान्यस्म°?.

P. 168. l. 14. (147, 5.) कर्ता A. B. C. कर्तारं?.

P. 169. l. 11. (148, 1.) सृष्टा मनोरपत्यं A. C. सृष्टा मनस्पतिः पुनर्मनस्त्रीभावे मनोरपत्यं B. and Nirukta.

P. 169. l. 16. (148, 1.) स्वृतो भासं ज्योतिषां स्वृतो भासेति वेति A. Ca. sec. man. स्मृतौ ना सं ज्योतिषां सजो भासं ज्योतिषां स्वृतो भासेनि वेति C. स्वृतो रसान्स्वृतो भासं ज्योतिषां स्वृतो भासेति वा B. and Nirukta.

P. 171. l. 21. (148, 5.) ईदृग्रूपा भयेऽपि A. B. C. ईदृग्रूपोभयेऽपि?. ईदृग्रूपा गर्भेऽपि?.

P. 172. l. 27. (149, 2.) उत्पादक इत्यर्थः। एवं सर्वोत्पादकः श्रवोभिः ॥ उत्पादक इत्यर्थः। एवं सर्वोत्पादक इत्यर्थः। एवं सर्वोत्पादकः श्रवोभिः A. Ca. sec. m. उत्पादक इत्यर्थः। एवों सर्वोत्पादकः श्रवोभिः B. उत्पादक इत्यर्थः। एवं सर्वोत्पादक इत्यर्थः एवं सर्वोत्पादक इत्यर्थः एवं सर्वोत्पादक इत्यर्थः एवं सर्वोत्पादकः श्रवोभिः C. उत्पादक इत्यर्थः। एवं सर्वोत्पादक इत्यर्थः। एवं सर्वोत्पादक इत्यर्थः। एवं सर्वोत्पादकः श्रवोभिः Ca. pr. m. $C^a$ 5.

P. 173. l. 5. (149, 2.) Instead of प्रापयति, Prof. Wilson proposes प्राणयति, which would certainly be more appropriate; but all the MSS. have प्रापयति.

P. 173. l. 7. (149,2.) यद्यग्निर्न पचेत् पूरयेदेव नोत्पद्यते A.Ca.B. यद्यग्निनी पचेत् ॥ पूरयेदे° C. $C^a$ 5. (पूरयैदेव B 3.) I conjecture यद्यग्निर्न पचेत् पूर्णदेहो नोत्पद्येत. Prof. Wilson, whom I consulted on this passage, gives the following explanation: "I do not think any conjecture is necessary, but that उत्पद्यते may be used impersonally, or with *id* or तद् for its nominative. 'When Agni does not mature or verily fill (or satisfy), *it* is not produced; that is, nothing is produced, production does not take place.' The construction is elliptical, but not unintelligible. With reference, however, to the phrase पश्वादिदेहाकारेण, देहो might be inserted, but it is not indispensable."

P. 176. l. 24. (150, 3.) In the Chándogya-upanishad (VII. 10), from which these words are taken, the text is मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रमसमेष सोमो राजा.

P. 177. l. 16. (151, 1.) तच्चैकया द्वित्वादपि स्यात् A. तच्चैकया द्वित्वादभिस्यात् Ca. C. तच्चैकया द्वित्वादभिस्यात् B. The sense is that गव्यवः expresses merely the possession of cows, even where a man possesses (or wishes to possess) only a few of them; गोषु, the

plural, is therefore added to show that many cows are intended. One expects something like तच्चैकगोस्वामित्वादपि स्यात्, or तच्चैकद्वित्वित्वादपि स्यात्, but neither is quite satisfactory. Prof. Wilson proposes तच्चैकया द्वित्वादि or एकया द्वित्वाद्यपि स्यात्, explaining it by "in this place by one (or the singular), two, three, or more may be;" that is, he who wishes for a cow, means he who wishes for many cows; as Gopati, 'lord of a cow,' means 'lord of many cows,' etc.

P. 180. l. 16. (151, 5.) मेघाच्छन्ने सति ॥ मघच्छन्न सति B. घच्छान्न संति C. घच्छान्नति संति A. Ca.

P. 182. l. 15. (151, 8.) ददाये इत्यर्थः ॥ ददात इत्यर्थः A. Ca. sec. m. ददत इत्यर्थः Ca. pr. m. C. $C^a$ 5. B.

P. 183. l. 4. (151, 9.) न तरत इत्यर्थः ॥ न नरतत इत्यर्थः A. C. न नरत इत्यर्थः B. न रतत इत्यर्थः $C^a$ 5.

P. 183. l. 19. (152, 1.) पीनौ A. Ca. sec. m. B. पीतौ Ca. pr. m. C. $C^a$ 5.

P. 184. l. 15. (152, 2.) संतोऽपि ॥ संत्यपि A. Ca. B. सत्यपि C. $C^a$ 5.

P. 186. l. 21. (152, 6.) यथा शिष्टं भिक्षेत यथा च कर्म समापनेन रक्षेत् ॥ यथाशिक्षं भिक्षेत यथा स कर्मसापनेन रक्षेत् A. C. यथाशिषं भिक्षित यथा स कर्मसमापने वक्षेत् B.

P. 187. l. 23. (153, 1.) धीतिभिः स्वकीयैः कर्मभिर्भरंति ॥ धीतिभिः स्वकीयैर्भरंति A. B. C.

P. 192. l. 22. (154, 4.) The quotation from the Chandogyáraṇyaka is evidently made from memory, and therefore not very accurate. As it is difficult to correct Sáyaṇa's text, I add the passage from the original (VIII. 2 and 3): स त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति । "तत्तेजोऽसृजत" । तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत । ता आप ऐक्षंत बह्वयः स्याम प्रजायेमहीति ता अन्नमसृजंत ॥ ॥ सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति ॥ Instead of हंताहमि°, A. and C. read हतमि°, B. हंतेम°.

P. 193. l. 6. (154, 5.) B 1. contains sundry marginal notes to this hymn, which, being addressed to Vishṇu, was probably of greater interest to the Bráhmans than hymns to Agni, Váyu, etc. These notes are generally of little value. One of them has already been received into the text by B 2. and B 3. Both of them add मायावीजादितिरभिगदिते सत्यपि after परमेश्वरस्य. B 1. has as a marginal note to मध्व उत्सः, अमृतस्योत्पत्तिः वर्तते; and it gives सुकर्मणां in addition to सुकृतिनां. But these notes have not found their way into B 3.

P. 193. l. 26. (154, 6.) B 1. has अनायासेन गंतारः as a marginal note to अयासः ॥

P. 194. l. 24. (155, 1.) सर्वलोक A. B. C. स्वर्लोक? cf. 155, 5.

P. 196. l. 3. (155, 3.) द्यावापृथिव्योः स्थापितं सामर्थ्यं A. C. द्यावापृथिव्योः (संबंधि in marg.) स्थापितं लिंगं सामर्थ्यं B.

P. 197. l. 22. (155, 6.) विविधानेव स्वभावान् A. Ca. sec. m. विविधानेन स्व° Ca. pr. m. C. विविधानैनेकस्व° B.

P. 200. l. 12. (156, 3.) यद्वा नाम यज्ञनामनमनं विष्णोरेव ॥ यद्वा नाम यज्ञनामनमनं विष्णुरेव A. Ca. sec. m. यद्वानाम यना नमनं विष्णुरेव C. रक नाम यज्ञात्मना नमनं विष्णुरेव B.

P. 202. l. 10. (157, 1.) अयुक्षातां. The Commentator seems to have read आ । अयुक्षातां; this in the Sandhi-text gives आयुक्षातां, which is the reading of the MSS.

P. 204. l. 22. (157, 6.) Instead of राथ्येभिः, S 3. has रथ्येभिः।

P. 205. l. 3. (157, 6.) Before आ वां, A. has the words सवैत्न रथा युवां, C. सवैत्न रथवो वां or सवैत्न रथयो वां. They are wanting in B., and refer to another hymn addressed to the Aśvins.

From the beginning of the third Adhyáya to the end of Varga 13. I possess fragments of a MS. which was procured for me at Calcutta. It is a modern copy, but it contains very useful readings, and the original from which it was copied seems to have been an excellent MS. I ascertained, however, that the Pandit who copied it for me had occasionally inserted corrections of his own. On this account the readings of this MS. ought to be tested by their own intrinsic value only; and in the few cases where the MS. had to be quoted I have called it D., because it cannot claim a place in any one of the three historical families of Sáyaṇa's manuscripts.

P. 208. l. 11. (158, 4.) एवमवध्यं तं त्रैतनो A. C. एवमवध्यं त त्रितनो B.

P. 208. l. 18. (158, 4.) दशतयो दशवारः॥ दशतारः A. B. C. दशतयोऽपरिमितावयवः (cf. Páṇ. V. 2, 42) दशतारः D.

P. 209. l. 24. (158, 6.) वलीपलितगात्रो. All the MSS. read वलीपह्नितगात्रो, where पह्नित is too unusual an expression to be retained. However, वलीपलितगात्रो also is not satisfactory, and the reading of D., बलिवलितगात्रो, offers at least a probable conjecture.

P. 212. l. 4. (159, 3.) जज्ञुः। ज्ञातवंतः A. C. sec. m. जातवंतः B. Ca. pr. m. C.

P. 213. l. 1. (159, 5.) From here to 161, 3. A 1. is wanting (p. 213—218).

P. 214. l. 12. (160, 1.) उदकोत्पादनायाप्रयत्नवत्यावित्यर्थः॥ °त्नमयतीत्यर्थः B. °त्नवमती इत्यर्थः C. °त्नवतीत्यर्थः D. D. explains कवि by शब्दमुदकं, while B. and C. leave it unexplained. शब्दयदुदकं would be better.

P. 214. l. 13. (160, 1.) वृष्ट्युदकधारयत्सूर्योपेते॥ धारीवित्सू° B. धारवित्सू° Ca. धारिवित्सू° C. धारितत्सू° D.

P. 215. l. 19. (160, 3.) विश्वाहा is not explained in B. and C. D. supplies it as usual.

P. 216. l. 11. (160, 4.) लिटि रेफसामान्यात् Ca. sec. m. रेसामान्यात् B. Ca. pr. m. C. This refers to Páṇ. VII. 4, 71: ऋकारैकदेशस्य रेफस्य हल्त्वे न ग्रहणादिहापि नुट्. D. has रश्रुतिसामान्यात्.

P. 219. l. 19. (161, 4.) D. adds ऋषेरिदं वाक्यं at the beginning of the fourth verse. None of the other MSS. have it.

P. 220. l. 12. (161, 5.) उपहवकाले B. उपहूव C. A. or उपद्रव.

P. 220. l. 26. (161, 6.) परस्ताच्च॥ पुरस्ताच्च A. B. C.

P. 221. l. 1. (161, 6.) विश्वरूपामित्यस्याश्च पंक्तिरिति B. D. विश्वरूपाविति च तस्याश्वपंक्तिमिति केचन A. विश्वरूपामिति च तस्याश्च पंक्तिरिति C.

P. 221. l. 5. (161, 6.) इत्येवमृषिराह॥ °षिमाह A. B. C.

P. 222. l. 8. (161, 8.) अथवा ऋभून्प्रति तस्यैवेदं वाक्यं A. B. C. D. writes मंत्रस्यैव° by conjecture. तस्य however refers to ऋषेः.

P. 223. l. 23. (161, 10.) पिंशति। अपर॥ पिंशति पित्रोः अपरः A. B. C. D. has पिंशति पित्रोरपर. Perhaps पित्रोः belongs to तयोर्न किंचिद्, and may have been an old marginal gloss.

P. 226. l. 14. (161, 14.) अंतरिक्षात् after द्युलोकात् would better be omitted; but it stands in A. B. C. D.

P. 226. l. 24. (162, 1.) The words from षड्विंशति to शिष्ट्वा are wanting in A. and C. B. has अधिवपेत् instead of आवपेत्. D. adds अस्मात्पुरस्तात् after the first शिष्ट्वा, with reference to the following इत्यस्मात्पुरस्ताद्वा.

P. 228. l. 2. (162, 2.) After शतृ D. adds यद्वा छांदसः शपः श्नुः । एरनेकाच इति यण् ॥

P. 228. l. 17. (162, 3.) I have added the words अहोरात्रे—उक्तत्वात् from D., as the meaning of Sáyaṇa would scarcely be intelligible without them.

P. 229. l. 11. (162, 8.) All the MSS. have अवाप्योरित्यल्लोपः (त्यलोपः B.), though in A. and C. it looks more like अवायो°. I cannot find the passage in Páṇini to which this quotation refers. The rules for the nominative singular of the word in question are Páṇ. III. 2, 71, 1 and 2. श्वेतवहादीनां डस्. D. therefore adds after अल्लोपः the words अवयाः श्वेतवाः पुरोडाशेति निपातितः. Cf. Páṇ. III. 2, 71, 3, and VIII. 2, 67.

P. 229. l. 13. (162, 5.) प्रशास्ता A. B. C. प्रशस्ता D.

P. 230. l. 1. (162, 6.) D. reads उत अपि च ये यूपार्हस्य छिन्नस्य काष्ठस्य वाढारः ॥

P. 230. l. 7. (162, 6.) बलेन A. B. C. फलेन D.

P. 230. l. 16. (162, 7.) प्राग्नपार्श्वभागः B. प्राग्नपार्श्वाद्भाग A. Ca. प्राग्नात्पार्श्वाद्भाग C. D. has पश्चाद्भागः, which would correspond better with पृष्ठः.

P. 233. l. 1. (162, 12.) यथास्माभिरश्व उपालभ्य एवं स्पृहयंति ॥ यथास्माभिरश्व उपालभ्येर एवं स्पृहयंति B. यथाश्वाभिरश्व उपालभ्ये एवं स्पृहयंति A. Ca. यथाश्वाभि अश्व उपालभ्ये एवं स्पृहयंति C. यथास्माभिरश्व उपालभ्ये एवं स्पृहयंति D. यथास्मभ्यमश्वे? or अस्माभिरुपलभ्येऽश्वे?.

P. 233. l. 7. (162, 13.) मांस्पचन्याः, S. I. 2, 3. P. I. 2. See, however, Prátiśákhya I. 4, 101.

P. 234. l. 1. (162, 14.) यद्वा बंधनं वट् तद्वंतं प्रदेशं A. C. B. has पट्. Some words are wanting to complete this sentence. तद्वान्प्रदेशः, however, is not likely to have been the original reading.

P. 234. l. 20. (162, 15.) यद्वा इष्टं प्रयाजैराप्रीतं वीतं पर्यग्निकृतं A. B. C. यद्वा इष्टं प्रयाजे वीतं प्रीतिरापर्यग्निकृतं D. It would be better to read यद्वा इष्टं प्रयाजैः वीतमाप्रीभिः पर्यग्निकृतं, but the MSS. are against it.

P. 234. l. 21. (162, 15.) अभिगूर्तं ये यजामह इत्यागूर्त्योक्तं ॥ अभिगूर्तं ये यजामह इत्याग्नेर्युक्तं A. ये यजामह इत्यागूरुक्तं B. ये यजामह इत्यागूर्युक्तं D. अभिगूर्तं ये यजामह इत्यागूर्युक्तं Ca.; lacuna in C. The reading of D. seems the best, and might have been adopted. The आगूः precedes the याज्या, याज्यादावागूर्भवतीत्युक्तत्वात्.

P. 235. l. 7. (162, 16.) Instead of चात्वाले (A. B. C. D.), Prof. Wilson proposes to read चषाले. See verse 6.

P. 235. l. 16. (162, 17.) अर्पतोऽगमनं कुर्वन् A. C. दर्पतो गमनं कुर्वन् B. D.

P. 235. l. 17. (162, 17.) पाष्ण्या requires a gloss, पादाधोभागेन.

P. 235. l. 18. (162, 17.) यत् यस्मात् तस्मात्ते तव; left out in A. B. C., and supplied from D.

P. 236. l. 7. (162, 18.) इदमवद्यमिति A. Ca. इदमेवद्यमिति B. इदमद्यमिति C.? इदमवद्यरमिति D.

P. 236. l. 14. (162, 19.) एकः । एक एव । स कः ॥ एक एव तत्स कः A. C. एकः एक एव तत्सकः B. एक एक एव स एकः D.

P. 237. l. 1. (162, 20.) भोगायतनत्वात्तव ॥ भोगाय तन्वः तव A. C. भोगाय तन्वस्तव B. भोगायत-नत्वात्तव D.

P. 237. l. 2. (162, 20.) वियोगज्ञनिता D. व्योमज्ञनिता A. B. C.

P. 237. l. 4. (162, 20.) केवलमांसग्रहणेषु: D. केवलमांसग्रहणे A. B. C.

P. 238. l. 10. (162, 22.) समूहार्थे यत् A. B. C. D. According to Pánini it should be यः।

P. 240. l. 9. (163, 3.) दुर्दिनरूपेण A. C. दुदिनेरूपेण B. D. has दुर्निरूपेण (दुर्निरूप्येण ?), which might seem preferable if it rested on the authority of MSS. The same applies to योगादिसाधन° (A. B. C.), instead of which D. has यागादिसाधन°.

P. 242. l. 6. (163, 6.) आदित्यमंडलादप्युपरिभूतैः. A. and C. have पश्यान्युपरिभूतैः, leaving out the whole sentence between. B. has preserved it, but reads प्रादित्यमंडलादित्युपरिभूतैः. D. reads आदित्यमंडलेष्वपरिभूतैः।

P. 244. l. 15. (163, 10.) शीघ्रधावनाय D. श्रीः प्रधावनाय A. B. C.

P. 244. l. 24. (163, 10.) यदापुर्दिव्य° A. B. C. D. or यु. The Nirukta and its Commentary (Durga) have यदापन्दिव्य°, which corresponds better with the Aorist आक्षिषुः।

P. 246. l. 17. (164, 1.) द्विपंचाशहचं ॥ द्विपंचाशत्यृचं A. B. C.; and again (p. 247. l. 18.) चत्वा-रिंशहचं ॥ चत्वारिंशत्यृचं A. B. C.

P. 247. l. 21. (164, 1.) A. is wanting from 164, 1—164, 16 (p. 247—258).

P. 248. l. 21. (164, 1.) संरभ्राणि. The Brihad Áranyaka, from which this passage seems to have been taken, reads संहभ्राणि. Cf. Brih. Ár. p. 616.

P. 249. l. 2. (164, 1.) स्वरसत्वाभावात् B. Ca. B. in marg. प्रकरणवि रोधी instead of स्व. प्रक-रणविरसत्वात् ?.

P. 249. l. 15. (164, 2.) किं वस्तुतः सप्त Ca. sec. m. किंच वस्तुतः सप्त C. किंच स्तुतः सप्त B. Ca. pr. m.

P. 249. l. 27. (164, 2.) तिस्रो नाभिस्थानीयाः संध्याः संबद्धा वा त्रय ऋतवो यस्य ॥ तिस्रो नाभिस्थानीयः संबंधानाद्ये ये ऋततो यस्य B 1. (तिस्रो° संबंधानाद्यय° B 3.) तिस्रो नाभिस्थानीयाः संबंद्धा वा त्रय ऋतवो यस्य Ca. C.

P. 252. l. 8. (164, 5.) तत्कषतीति Ca. C. तत्कर्षतीति B.

P. 253. l. 6. (164, 6.) अवाङ्मनसगम्यं B. Ca. C.

P. 253. l. 8. (164, 6.) त्रिविधान् Ca. C. विविधान् B.

P. 253. l. 10. (164, 6.) अविशेषमस्तिनाममात्रमेकरूप° ॥ अविशेषमसिगात्रमेकरूप° B. (न on the top of त्र in B 1.) अविशेषमस्तिनामात्रमेकरूप° Ca. C.

P. 254. l. 10. (164, 8.) हलमुखेन ॥ हलमुखे C. वलमुखे Ca. जलमुखे B. हलयुक्तैः ?.

P. 254. l. 14. (164, 8.) सम्यगभिवृद्धानि सस्यानीति वचनं Ca. C. सम्यगभिहृष्येद्धानि रस्यानीति (सुवृष्टि marg.) वचनं ॥

P. 255. l. 24. (164, 11.) द्वादशसंख्याक्मेषादिराश्यात्मकैर्वा अरैः रथांगावयवैर्युक्तं B. C. The words द्वादशसंख्याक्मेषादिराश्यात्मकैर्वा seem to be a later addition, inserted in the wrong place. The original reading was probably द्वादशसंख्याकैररै रथांगावयवैर्युक्तं, and after this the words द्वादशसंख्याक्मेषादिराश्यात्मकैर्वा were to be added.

P. 256. l. 16. (164, 12.) परायत्तं Ca. पर्यायतं B. C.

P. 257. l. 5. (164, 13.) आ तस्थुः is not explained in B. or C. except by वर्तंत इत्यर्थः. As इत्यर्थः is generally preceded by a more literal explanation, it is likely that the omission is owing to the copyists, and not, as in other cases, to Sáyaṇa himself.

P. 259. l. 5. (164, 16.) लक्षणोऽस्ति स ईं॥ लक्षणोऽस्ति सः स ईं B. लक्षणास्तिस्त स ईं C. लक्षणास्त्रिसः स ईं A. लक्षणास्तिसः स ईं Ca. sec. m. (णे pr. m.)

P. 259. l. 9. (164, 16.) लौकिकोक्तिरियं B. लौकिकोऽग्निरयं A. Ca. sec. m. (रि pr. m.) लोकिको निरियं C.

P. 259. l. 23. (164, 16.) इत्युपक्रम्य—मंत्रकृदिति B. A. and C. enlarge on this passage, as happens frequently in quotations from Bráhmaṇas. After उपक्रम्य, A. has first ते, which belonged probably to ते देवानपृच्छंत, and then, after repeating the words from शिशुर्वांगिरसो to आमंत्रयत, A. goes on तं पितरोऽब्रुवन्नधर्मं करोषि etc. C. agrees with A. except that तं पितरोऽब्रुवन् follows at once after उपक्रम्य. In Ca. the words from शिशुर्वा to स उज्जदुजयति stand in the margin. A. Ca. and B. have मंत्रप्रद्रष्टुः, C. मंत्रद्रष्टुः. The whole passage from the Táṇḍya-bráhmaṇa (13, 3.) is this: शिशुर्वा आंगिरसो मंत्रकृतां मंत्रकृदासीत्। स पितॄन् पुत्रका इत्यामंत्रयत। तं पितरोऽब्रुवन्नधर्मं करोषि यो नः पितॄन्सतः पुत्रका इत्यामंत्रयस इति। सोऽब्रवीदहं वाव पितास्मि यो मंत्रकृदस्मीति। ते देवानपृच्छंत (देवेषुपृ°)। ते देवा अब्रुवन् एष वाव पिता यो मंत्रकृदिति तद्धै स उदजयत्॥ See also Manu II. 151.

P. 261. l. 15. (164, 19.) चक्रथुः कृतवंतौ तानि; these words are omitted in all the MSS.

P. 262. l. 8. (164, 20.) जीवादन्यो जीवाश्रयणात् B. जीवादन्यो ना जीवाश्रयणात् A. Ca. जीवादन्यो ता जीवाश्रयणात् C. If जीवादन्यो be the right reading, we should perhaps also read जीवात्मा परमात्मनोऽन्यः. A. Ca. and B. however have नान्यः, and C. also has न्नन्यः.

P. 262. l. 10. (164, 20.) वास्तवाभेदं चापे° C. वास्तवभेदं वापे° B. वास्तवभेदं चापे° Ca. A.

P. 262. l. 23. (164, 20.) अनीशया Ca. correct. C. अशनीया A. (शनीया Ca.) ऽनीया B.: cf. Muṇḍaka Upanishad III. 2.

P. 263. l. 6. (164, 20.) न च तद्भावा नाम्नो तन्म° A. Ca. C. न च तदा वान्नान्यो B. न च तद्भावान्यत्व is not likely to have been the original reading, but neither तद्भावादन्यः nor तद्भावनाम्नोः would be much better.

P. 264. l. 5. (164, 21.) मदन्यः A. C. deest in B.

P. 264. l. 8. (164, 21.) परमात्माभूवं॥ परमात्मा भूतं A. Ca. B. परमात्मभूतं C.

P. 266. l. 9. (164, 23.) शोंसावोमिति etc. In explanation of these sacrificial formulæ B 1. gives the following marginal notes: होता प्रातःसवने शोंसावोमिति मंत्रेणाध्वर्युमाह्वयते। तस्यायमर्थः। हे अध्वर्यो शोंसावः शंसनं कुर्वतः। ओमित्यनुज्ञार्थं। त्वयानुज्ञा देयेत्युक्तं भवति। सोऽयं त्र्यक्षरो मंत्रः। ततोऽध्वर्युः शंसामोदैवोमिति पंचाक्षरेण प्रतिगृह्णाति। उत्तरं ब्रुयात्। तस्यायमर्थः। होतस्त्वं शंसनं कुरु। तत्रामोदैव। हर्ष एवास्माकं। अतोऽनुज्ञा दत्ता। तदेतन्मंत्रद्वयं मिलित्वाष्टाक्षरं संपद्यते। एवमुत्तरत्र ज्ञेयं। होता शस्त्रं पठित्वा उक्थं वाचीति चतुरक्षरं मंत्रं ब्रूयात्। मदीयायां वाचि संपन्नं। तस्यार्थः। ततोऽध्वर्युरोमुक्थशा इति चतुरक्षरं मंत्रं ब्रूयात्। ओमित्यंगीकारे। उक्थशास्त्वं शस्त्रशंसी भवसीत्यर्थः। तदेतन्मंत्रद्वयं मिलित्वाष्टाक्षरं संपद्यते। In the Commentary on Ásvaláyana the following explanation is given: शोंसावेति शंसावेत्यर्थः। स एव प्रणवांतः शोंसावोमिति पठ्यते॥ शोंसामो दैवेति प्रतिगरो भवति। शंसामो दैवोमिति वा॥

P. 266. l. 23. (164, 23.) एतदेवैकादशाक्षरं भवति ॥ एतदेवावशाक्षरं भवति A. C. एतदेवादश (द्वा over द) B. The next sentence from अध्वर्यु° to भवति is left out in A. and C. It is not clear how the words of the Hotri can be said to contain eleven syllables except by allowing for Vaidik productions; the words are the same in Ásvaláyana V. 50.

From 164, 24. to the end of the hymn A. is wanting (p. 267—291).

P. 267. l. 13. (164, 24.) एकस्यामृच्यारूढं ॥ एकस्यामृच्यगूढं Ca. C. एकस्यामृच्यागूढं B.

P. 269. l. 6. (164, 26.) यद्वर्मं इत्यतपत् ॥ यध्वां इत्यपतत् B. यध्वर्मं इत्युपपत् Ca. C.

P. 269. l. 7. (164, 26.) तन्नद्देशोऽभीद्धः C. तन्नादृशोऽभीद्धः B. Ca.

P. 270. l. 24. (164, 28.) प्रतिपादनभेदाद् Ca. प्रतिभादनभेदाद् C. प्रतिभेदनभेदाद् B.

P. 271. l. 10. (164, 29.) बालकस्यादनस्तनपानादि° ॥ बालकस्याज्जन° Ca. (ज्य° C.) बालकस्यार्जुनपानादि° B.

P. 271. l. 27. (164, 29.) एकत्वश्रवणेन वा Ca. C. एकत्वाश्रयणेन वा B.

P. 272. l. 21. (164, 30.) The line which the MSS. give here might perhaps be placed before जीवस्य वैलक्षण्यमाह (p. 273. l. 3).

P. 273. l. 1. (164, 30.) B. explains एजत् by a marginal note एजृ कंपने.

P. 273. l. 2. (164, 30.) अथैतेपृा ॥ अथैतेव Ca. pr. m. C. अथैते B., and in marg. एषः. It should be आ शेते च; and this seems to be intended by some indistinct corrections in Ca.

P. 277. l. 4. (164, 36.) महदहंकारौ ॥ मदाकारौ C. मदाहंकारौ Ca. महकारौ B. प्रकृति being written over it.

P. 277. l. 5. (164, 36.) अविकृतिरूपाया विकाराश्रयाया मूलप्रकृतेः ॥ अविकृतिरूपाः विकाराश्रयायाः मूलप्रकृतौ Ca. C. अविकृतिरूपा विकाराश्रयाः मूलप्रकृतौ B. The words अविकृतिरूपा विकाराश्रयाः cannot be applied in their technical sense to the महदाद्याः प्रकृतिविकृतयः सप्त:, but only to the मूलप्रकृतिरविकृतिः. The genitive is better than the locative on account of the following च. In a wider sense अविकृतिरूपाः might be taken as an explanation of अर्द्धगर्भाः.

P. 277. l. 17. (164, 37.) After अनुगतोऽस्मि, B. has अस्ति भाति प्रियमिति; Ca. reads अनुगतोस्ति भातित्रियमिति, C. भानित्रियमिति, which is unintelligible. भावत्रयमिति or भावित्वमिति is not satisfactory.

P. 277. l. 22. (164, 37.) तदनन्यत्वमारंभणशब्दादिभ्य इति Ca. B. C. has आरंभशब्दा°, but आरंभण is the reading of the Vedánta-sútras, II. 1, 15.

P. 277. l. 24. (164, 37.) यदिव यत्परोक्ष° ॥ यदिवा यदापरोक्षजानं C. B. (ज्ञा corrected in Ca.)

P. 277. l. 24. (164, 37.) After परोक्षज्ञानं, B. leaves out the words from जानं to जानं. C. has तदित्। तद्वदेवमस्मि इदं सर्वमहमस्मीति ज्ञानं (तदित Ca.)

P. 278. l. 24. (164, 38.) स्थानः। यत्न ॥ स्थानत्रय Ca. C. स्थानत्रय B., and in marg. अवस्थात्रय.

P. 279. l. 7. (164, 38.) सात्विकजातेः। त° ॥ स ऋत्विजाते त° B. स ऋत्विजातेः त° Ca. C.

P. 284. l. 16. (164, 44.) छेदनेन नापितकार्यं ॥ छेदनेनापि तत्कार्यं C. B. छेदनं नापितकार्यं Ca., which would have been adopted, if the MSS. had been then at hand.

P. 285. l. 3. (164, 45.) परिमिता ॥ वाक्परिमिता B. वाक्यपरिमिता Ca. C.

P. 285. l. 17. (164, 45.) याज्ञिकैः समाम्नातोऽनुष्ठेयार्थप्रकाशको वेदभागो मंत्राः । मंत्रविधान° ॥ याज्ञिकैः समाख्यातो नुष्ठेयार्थं प्रकाशादिर्मंत्रविधान° Ca. याज्ञिकैः समाख्यातौ नुष्ठेयार्थे प्रकाशादिर्मंत्रविधान° C. याज्ञिकैः समाख्यातोऽनुष्ठेयार्थं प्रकाशादिर्मंत्रविधान B 1. (ष्ठेयार्थं B 3.) All the MSS. have mixed the explanation of the Mantra with that of the Kalpa; the former is अनुष्ठेयार्थप्रकाशक, the latter मंत्रविधानप्रतिपादक. The quotation इति मंत्राः कल्पोऽत ऊर्ध्वं is of frequent occurrence in the Bráhmaṇas. B 1. takes it as a quotation from a Sútra, and has in the margin सूत्र प्रथमाध्याय खं°४. Some of the Sútras differ very little from the Bráhmaṇas, and some Bráhmaṇas contain considerable portions written in the style of Sútras. Thus Kumárila says, आरुणपराशरशाखाब्राह्मणस्य कल्परूपत्वं. Sáyaṇa, in his Introduction to the Aitareya-bráhmaṇa, writes कल्पस्त्वारुणकेतुकचयनप्रकरणे समाम्नायते । इति मंत्राः कल्पोऽत ऊर्ध्वं यदि बलिं हरेदिति. See Prolegomena, p. 144.

P. 286. l. 1. (164, 45.) वाच्यस्य B. खाख्यस्य C. रवाख्यस्य Ca.

P. 288. l. 6. (164, 48.) नाभ्यरिहाणि. This is the reading of the MSS., which may be meant for नाभ्यभिधानि or नभ्याभिधानि; but the cerebral *n* seems to point to something else: cf. Páṇ. IV. 2, 80.

P. 291. l. 19. (165, 1.) The quotation from the Rig-vidhána required some alterations. A. (which begins again with this hymn) has कया शुभेति पैशुन्यं श्रुत्वा चायं नृपद्विजां; C. has कया शुभेति पशून्यं श्रुत्वा चायं नृपद्विजां (Ca. पै°); while the text of the Rig-vidhána is in one MS. कया शुभेति पाशून्यं कृत्वा चार्यं नृपद्विजैः, in the other कया शुभेति पैशून्यं कृत्वाचार्यैनृपद्विजैः.

P. 295. l. 8. (165, 7.) यद्यस्यैव तत्तस्यैव भवतु । तर्हीहं ॥ यद्यस्यैव तुर्हीहं A. C. अद्यस्यैव तुर्हीहं B.

P. 297. l. 16. (165, 12.) मत्कृतैः ॥ त्वत्कृतैः A. B. C. It might be मत्कृतैः or युष्मत्कृतैः.

P. 302. l. 12. (166, 6.) विक्षेपणशीलं दंती ॥ विक्षेपणशील दती C. विक्षेपणशीतदेति A. Ca. विक्षेपणशील दंती B.

P. 309. l. 5. From 167, 4—171, 6. A. is wanting (p. 309—328).

P. 315. l. 13. (168, 4.) After अपापाः, Ca. C. give quite a different explanation to the end of the verse: अपापाः समुंदनेन पांसु विचुः व्यावयंति । चालयंति ॥ It seems to refer to अरेणवः, but the text is corrupt.

P. 323. l. 19. (170, 1.) नैव नास्ति B. Ca. C.

P. 324. l. 3. (170, 2.) अस्माननपराधिनः B. अस्मानपराधिनः Ca. C.

P. 327. l. 10. (171, 3.) Between इद्रश्च and सुखयंतु B. and Ca. C. have यूयं.

P. 327. l. 20. (171, 4.) अस्माननपराधिनः. B. and Ca. C. have अस्मानपराधिनः.

P. 330. l. 16. (173, 2.) स्वेदुहव्यैः स्वायत्तेद्धविष्कैः । यद्वा स्वयं प्राप्नेंधकं हव्यं येषां B. स्वेदुहव्यैः स्वायत्तेद्धविष्कैः । यद्वा स्वयंप्राप्नेंदू उदकं हव्यं येषां A. Ca. C.

P. 333. l. 3. (173, 6.) वृजनमिव । वृजनैः कर्तनार्थस्येदं रूपं B. वृजनमिव च मे वृजनैः कर्तनार्थस्येदं रूपं A. C.

P. 333. l. 17. (173, 7.) निमित्तेऽर्थे ॥ निमित्तेऽर्थं A. B. C.

P. 333. l. 18. (173, 7.) प्रयतंते ॥ प्रयंत इति A. B. C.

P. 335. l. 21. (173, 11.) तत्सवन ॥ तत्सह A. C. तत्सदनं B.

P. 336. l. 10. (173, 12.) योत्स्यामीति B. नोऽस्मभ्यमीति A. C.

P. 338. l. 1. (174, 2.) कातरत्वानिंदावन् ॥ कातरयदानिंदावन् B. कातरयत्वानिंदान A. C.

P. 338. l. 2. (174, 2.) तटाकादीनि ॥ तयछकादीनि A. B. C.

P. 338. l. 22. (174, 3.) वस्तोर्वस्तुं ॥ वस्ता वस्तुं B. वस्तोः वस्तु A. C.

P. 338. l. 24. (174, 3.) यागाद्यनुष्ठानपरः स्यास्यामीत्यर्थः ॥ यागाद्यनुष्ठानपुर स्यास्यामीत्यर्थः B. यागाद्यनुष्ठानपरास्याम्यामीत्यर्थः A. C.

P. 340. l. 13. (174, 6.) सचा सह शूर्ताः क्षिप्रा हविःप्रदानेन त्वयापत्यं B. त्वया सह शूर्ताः क्षिप्रा हविःप्रदानेन तया अपत्यं A. C. The construction is wrong in both cases, unless we read वहमानाः संति instead of वहमाना ये संति ते प्रपश्यन्. Perhaps वहमानाः संति was the original reading, and ये प्रपश्यन् ते was added as a new sentence: or वाहमानाः । वाहमाना ये संति ते प्रपश्यन्.

P. 340. l. 16. (174, 6.) क्षिप्मा वर्जिताः ॥ क्षिप्रा वर्जिताः A. B. C.

P. 341. l. 25. (174, 9.) From here to 180, 7. (p. 360.) A. is wanting.

P. 346. l. 21. (176, 2.) व्रीह्यादिकमुप्यते Ca. C. व्रीह्यादिकमुच्यते B.

P. 351. l. 12. (178, 1.) श्रुतयः B. Ca. C. It ought to be श्रुतीः, unless the whole sentence is taken as a parenthesis. Cf. Rv. vol. III. p. 191. l. 13.

P. 352. l. 21. (178, 4.) तथैव ॥ यथैव B. Ca. C.

P. 355. l. 15. (179, 4.) निमित्तात्कामात् । निमित्तासंतः कामात्कथं B. निमित्ताः संतः कामात्कथं Ca. C.

P. 355. l. 26. (179, 5.) The first part of this verse has been lost in the Commentary; none of the MSS. have preserved it. The words अस्मिन्पक्षे etc. however, towards the end of the verse, seem to indicate that Sáyaṇa had given before an explanation of the words हृत्सु पीतं. In the same verse (p. 356. l. 5.) B. has यद्वा यमपवर्जनीयतया, Ca. C. यद्वा यामपवर्जनीयतया. Again, instead of कामहतः सन् कामेन निरुद्ध एव, Ca. C. have कामहतः सन् नमिननिरुद्ध एव, and B. कामहतः सनः कामिननिरुद्ध एव.

P. 357. l. 9. (180, 1.) दीयति तकतीति ॥ दीयति टकतीति Ca. C. दीयति तफवीति B.: cf. Nigh. II. 14.

P. 357. l. 9. (180, 1.) त्वदागमनकाले B. C.

P. 358. l. 2. (180, 2.) रथं प्राप्नुय इत्यर्थः ॥ रथं वाप्रय इत्यर्थः Ca. C. रथं वा अय इत्यर्थः B.

P. 359. l. 2. (180, 4.) तप्तघर्मसकाशात् Ca. C. न पूर्वं घर्मसकाशात् B.

P. 360. l. 1. (180, 5.) सर्वप्रदेशव्यापित्वं ॥ सर्वप्रदेशवाचित्वं B. सर्वप्रदेशवाचत्वं Ca. C.

P. 361. l. 18. (180, 8.) After स इव all the MSS. have मध्ये. Either a whole sentence has been dropped, to which मध्ये belonged (संग्राममध्ये), or it was meant to follow after तेषु; तेषु मध्ये प्रयस्तः ॥

P. 362. l. 1. (180, 9.) वहतः A. B. C., instead of वहथः; a transition from the second to the third person, not unusual in Sáyaṇa.

P. 362. l. 4. (180, 9.) कर्मणि निर्वृत्ते पुनरपगच्छति ॥ कर्मण्यपवृत्ते पुनर्निगच्छति A. B. C.

P. 365. l. 12. (181, 5 ) अन्यतमस्य A. B. C., instead of अन्यतरस्य, which would be more correct.

P. 365. l. 23. (181, 6.) वर्धिता एवेंद्रः ॥ वर्धिता देवेंद्रः A. C. वर्धिता देवैंद्रः B.

P. 366. l. 21. (181, 8.) स्तुतिवाक् Ca. C. B. स्तुतिर्वाक् A. Ca. sec. m. स्तुतिरूपा वाक्?.

P. 367. l. 1. (181, 8.) शांतनात्सेक उदकस्येव ॥ शांतनात्सेके उदकस्यैव A. Ca. शांतनात्सेके उदके उदकस्येव

B. शांतनात्सेके उदकस्येव C. शांतनात् is probably a mistake; it may be meant for शांत्वनात् ('because there is comfort, as if water was sprinkled') or for आप्यायनात् ('because there is growth'); but neither of the two emendations is probable.

P. 367. l. 8. (181, 9.) From here to 188, 6. A. is wanting. The Commentary from 184, 1. to 185, 5, however, is found in A 2. at the beginning of the seventh Adhyáya.

P. 368. l. 6. (182, 1.) पालयितृधनौ C. पालायतृधनौ B.

P. 370. l. 2. (182, 5.) प्रसादफलकराश्विनौ B. प्रमादफलकाराश्विनौ Ca. रोश्वि° C.

P. 373. l. 2. (183, 3.) यजमानाय दत्तहविषा तद्वान् B. Ca. C. यजमानदत्तहविषा तद्वान् seems to be a necessary correction.

P. 381. l. 24. (185, 6.) वृष्ट्यादेः देवानां Ca. C. वृष्ट्या देवानां B.

P. 382. l. 24. (185, 8.) तयोरश्विन्यादिवद्बहुमननासंभवादुचितमेव ॥ तयोरश्विन्यादिवद्भूमनासंभवादुचितमेव B. तयोरश्विन्यादिवशमननासंभवादुचितेमेव Ca. C. There is a mistake in this line, which the reading adopted in the text does not remove.

P. 386. l. 15. (186, 4.) सर्वैदेव वेत्यर्थः ॥ सर्वैदेववार्थः B. सर्वदेववार्थः Ca. C.

P. 389. l. 1. (186, 9.) उत्पादयंति ॥ उत्पादयंतु B. C.

P. 389. l. 2. (186, 9.) सर्वेनामवृणोति B. Ca. C. (सर्वां द्यामावृणोति or सर्वेमाशृणाति?) line 3. महत्सेना ऽवृष्ट्या B. Ca. C. करोति B. करोतु Ca. C.

P. 390. l. 4. (187, 1.) In Sáyaṇa's quotation from Śaunaka's Rig-vidhána there are several readings differing from the MSS. of the Rig-vidhána: भुंजीत ह्यविकुत्सयन् B. भुंजीत ह्यवकुत्सयन् Ca., but corrected into भुंजीयादवकुत्सितं, which probably would be found to be the reading of A. if a new A. MS. should be discovered. The MS. of the Rig-vidhána, E. I. H. 1732 a. has भुंजीयादविकुत्सितं; 1732 b. has भुंजीयादवकुत्सितं. Again, विषमप्यमृतं भवेत् B. C.; but Ca. corrected (= A.) has विषमप्यन्नतामियात्, which is the reading of Rig-vidhána 1732 b., while 1732 a. has ऽमृतामियात्. Instead of नावाग्यतस्तु, which is the reading of MSS. 1732 a. b., B. has वक्तव्यमेव भुंजीत, C. वक्तव्याय च भुंजीत, corrected into न वक्तव्याय.

P. 393. l. 15. (187, 9.) All the MSS. are so defective in this verse, that it is impossible to complete the sentence except by conjecture. B. reads हे सोम ते तव यत् यमंश गंवाशिरः गोविकारः क्षीराद्याश्रयणद्रव्य यवाशिरः यवविकाराश्रय शरीर पीवो वभ ॥ Ca. has हे सोम ते तव यत् यमंशं गवाशिरः गोविकारक्षीराद्याश्रयणद्रव्या यवाशिरः गोविकारक्षीराद्याश्रय शरीर पीवो भव । This has been corrected by marginal notes. First, after the last श्र, ण was put in, which, however, must have been meant to come in after श्रय; then this ण was blotted out, and a whole line put in after the same letter, णद्रव्या यवशिरः गोविकारक्षीराद्यश्रय. The *á* of द्रव्या is again cancelled, and the whole emendation is erroneous, as it could only have been meant for यवविकाराश्रयण. But even after this there is no construction in the Commentary, and it is not clear even whether the Commentator referred गवाशिरः and यवाशिरः to भजामहे or to ते. To judge from the MSS., Sáyaṇa seems to have taken these words as accusatives dependant on

यत् or यमंशं. In this case we might read हे सोम ते तव यत् यमंशं गवाशिरो गोविकारक्षीराद्याश्रपणद्रव्यं यवाशिरो यवविकाराश्रपणद्रव्यं भजामहे सेवामहे तेन हे वातापे शरीर पीवो भव । The proper commentary, however, would be this; हे सोम ते तव यत् यमंशं भजामहे सेवामहे । कीदृशस्य तव । गवाशिरः । गोविकारक्षीरादिमिश्रितस्य । यवाशिरः । यवैर्मिश्रितस्य च । तेन इत्यादि ।. मिश्रित is the usual explanation, although आशिर् is derived from श्रीञ्. See II. 22, 1. यवाशिरं यवमयैः सक्तुभिर्मिश्रितं । आङ्पूर्वस्य श्रीणातेः क्विपि अपस्पृधेथामित्यादिना शिर् इत्यादेशः.

P. 393. l. 21. (187, 10.) In this verse again B. leaves out करंभो यः, Ca. reads करंभयः, and leaves out all between ओषधे त्वं पी° and °ष्टो गतः ॥

P. 397. l. 6. (188, 9.) Before रेतसः, Ca. C. and B. have the words यावक्षो वै (पावको वै?).

P. 399. l. 14. (189, 2.) Ca. has a marginal note with regard to शं योः । यौतेर्विच् । गुणः । यो । सुः । इति भट्टभास्कराः. Bhaṭṭabháskara wrote a Vedabháshya (cf. Devarája's Commentary on the Nirukta), and another grammatical Commentary on the Paribháshás (cf. Colebrooke's Miscellaneous Essays, p. 42). He is quoted by Sáyaṇa, I. 63, 4. I. 71, 4. I. 84, 15, &c.

P. 400. l. 16. (189, 5.) इत्यनयाशयमभिजुहोति Ca. इत्यनयाशमभिजुहोति B. आशयं is explained as यस्मिन्नाज्ये पुरोडाशः शायितस्तदाशयं.

P. 401. l. 7. (189, 6.) The MSS. read विष्पट्, but, as no etymology is given, and as the word does not occur again in the Rig-veda, it is difficult to say whether it be meant for विष्पट् or विष्पट्.

P. 402. l. 12. (190, 1.) From 190, 1. to 191, 4. the Commentary of A 2. is found again at the beginning of the seventh Adhyáya.

P. 403. l. 15. (190, 2.) सर्वे भवंति A. B. C. सर्वे व्यक्ता भवंति?.

P. 405. l. 18. (190, 6.) हे बहस्पते B. हे ब्राह्मणस्पते A. Ca.

P. 407. l. 3. (191, 1.) अमृणसौर्यं. Shaḍguruśishya has the following note: अमृणानि सूर्यश्चात्र देवता । अमृणसूर्यमिति प्राप्ते उत्तरपदवृद्धिश्छांदसी ।

P. 411. l. 12. (191, 10.) The Pada-text has सः । चित् ।, but the Commentator explains it as सः । ऊं इति । चित् ।, while in the next verse the Pada gives सो इति instead of सा । ऊं इति ॥

P. 412. l. 10. (191, 11.) विषहर्त्री A. C. विषहंत्री B.

P. 412. l. 12. (191, 11.) यद्वेहावृत्तविषं तस्य शकुनेभ्यः आदित्याप्रदानसमस्तीयुक्तं भवति B. यद्देहवृतविषं तस्य शंकुनोभ्य आदित्याप्रदानसमस्तीत्युक्तं भवति A. C. Both readings are evidently inaccurate; but, not knowing the character and style of the work from which this quotation is taken, I find it impossible to propose a more satisfactory reading.

P. 412. l. 23. (191, 12.) सूक्ष्मचटिका ॥ सूक्ष्मचटकिंका B. सूक्ष्मचटकिका A. C.

P. 414. l. 4. (191, 15.) यावद्विषापगमं तं पाषाणानुघातमनुतिष्ठंति तद्विदः ॥ यावद्विषापगमम्रं पाषाणमनुतिष्ठति तद्विदः B. यावद्विषामगास तं पाषाणमनुच्चातमनुतिष्ठंति तद्विदः A. यावद्विषामगास तं पाषाणमनुच्चातमनुतिष्ठंति तद्विदः Ca. pr. m. यावद्विषामगाम तं पाषाणमनुघातमनुतिष्ठंति तद्विदः C.

Some of the MSS. of the Sanhitá-text contain a number of hymns, or sometimes single verses, which are not explained by Sáyaṇa, and did not form part

of what the Brahmans consider the canonical text of the Rig-veda. They are called 'Khila,' and in some MSS. 'Pariśishṭa.' I have never met with them in the Pada-text of the Rig-veda, and some of the Sanhitá MSS. also omit them. Still some of them may claim a considerable antiquity; and though they are not included in the index of the hymns ascribed to Kátyáyana, there can be no doubt that they were known to Kátyáyana's predecessor, S'aunaka, who was the author of several Anukramaṇís to the Rig-veda. He mentions the Khilas in general in the introduction to his Anuváka-anukramaṇí:

एकैकमनुवाकं तु खिलानि ब्राह्मणानि च । संवत्सरे संवत्सरे पठेदहरहः शुचिः ॥

Again, in the third verse of the same Anukramaṇí, between the 13th and 14th Anuváka of the first Maṇḍala, S'aunaka states distinctly that he does not enumerate the Khailika Anuvákas:

खैलिकानामनादेशोऽस्मिन् ग्रंथेऽनुवाकानां । यस्तु चर्चायते वेदे तस्य संख्येति न श्रुतिः ॥[a]

Where the number of the Anuvákas, of the Súktas, the Vargas, the verses, the metres, and of the single words in the Rig-veda is given by S'aunaka (the words amount to 153826), the Khilas are never taken into account. But the very fact that they were not counted by S'aunaka, and that he himself says so, shows that they existed in his time. The number of hymns in the S'ákala-śákhá is 1017, but, as S'aunaka says, exclusive of the Khilas: सहस्रमेतत्सूक्तानां निश्चितं खैलिकैर्विना दश सप्त च पठ्यंते. The Báshkala-śákhá, according to S'aunaka, contained eight hymns more, but again, as he says, exclusive of Khilas: एतत्सहस्रं दश सप्त चैव अष्टावतो बाष्कलकेऽधिकानि । तान्पारणे शाकले शैशिरीये[b] वदंति शिष्टा न खिलेषु विप्राः ॥ Another proof of the antiquity of these Khila-hymns consists in their being quoted in the Nirukta[c]. In Páṇini the Khilas are not mentioned except in the Gaṇa-páṭha. Some of the verses which are Khilas in the Rig-veda occur in the text of the Átharvaṇa. In the Vájasaneyi-sanhitá several entire Adhyáyas are called Khila (XXVI—XXXV), and even in the latest works of the Vaidik period, in the Áraṇyakas and Upanishads, some portions are still marked as apocryphal. The 7th and 8th Adhyáya of the Brihadáraṇyaka are called Khila and Pariśishṭa in the Commentary (p. 948. ed. Roer), and the whole Yájnikí Upanishad is called by the same name. In the epic poem of the Mahábhárata the Harivanśa is reckoned as a Khila.

As I did not insert the Khila-hymns in the printed text of the Rig-veda, I shall give them in the notes at the end of each Maṇḍala. They generally occur

[a] This is the original reading, which has afterwards been changed into खैलिकानामनादेशोऽनुवाकानामिह स्मृतः. The Commentary adds, अतोऽत्रोत्तरत्रापि खिलवर्जमृगुच्यत इति भावः ।. In S'aunaka's Árshanukramaṇí the Khilas seem to have been mentioned.

[b] शैशिरीया इति पठंत्यन्ये ।

[c] Cf. Roth, Abhandlungen, p. 31.

at the end of Maṇḍalas and Anuvákas, not of Ashṭakas and Adhyáyas, another proof of the early date of their insertion.

At the end of the 9th Anuváka of the first Maṇḍala the MS. of the E. I. H. 129. (S 3.) gives a Khila. It is counted as the 9th Varga, but in order to adjust the numbers the 20th Varga is counted twice. It does not occur in S 1. and S 2., nor in MSS. Bodl. Wilson 429, 435, 443.

शनैश्चित्सूर्येण आदित्येन सहीयसा । अहं यशस्विनां यशो विद्यारूपाख्या ददे ॥
उद्यन्नद्यमित्रो भज पिता पुत्रेभ्यो यथा । दीर्घायुत्वस्य हेशिषे तस्य नो धेहि सूर्य ॥
उद्यंतं त्वा मित्रमह आरोहंतं विचक्षण । पश्येम शरदः शतं जीवेम शरदः शतं ॥

These verses are not to be found either in the Rig, Sáma, Yajur, or Atharva-veda.

At the end of the first Maṇḍala S 1. and S 3. give another Khila. It is not found in S 2., nor in MSS. Bodl. Wilson 429, 435. The accents are given in S 1., but by a person not very conversant with Vaidik grammar.

मा बिभेर्न मरिष्यसि परि त्वा पामि सर्वतः । घनेन हन्मि वृश्चिकमहं दंडेनागतं ॥
आदित्यरथवेगेन विष्णुबाहुबलेन च । गरुडपक्षनिपातेन भूमिं गच्छ महायशाः ॥
गरुडस्य जातमात्रेण त्रयो लोकाः प्रकंपिताः । प्रकंपिता मही सर्वा सशैलवनकानना ॥
गगनं नष्टचंद्रार्कं ज्योतिषं न प्रकाशते । देवता [d] भयभीताश्च मारुतो न प्रवायति [e] मारुतो न प्रवायत्यों नमः ॥
भो सर्प भद्र भद्रं ते दूरं गच्छ महाविषाः । [f] जनमेजयस्य यज्ञांते आस्तीकवचनं स्मर ॥
आस्तीकवचनं श्रुत्वा यः सर्पो न निवर्तते । शतधा भिद्यते मूर्ध्नि शिंशवृक्षफलं यथा ॥

The first of these verses, as my friend Dr. Aufrecht informs me, occurs in the Átharvaṇa X. 4, 9, though with considerable changes:

अरसा इहाहयो ये अंति ये च दूरके । घनेन हन्मि वृश्चिकमहिं दंडेनागतं ॥

The two last verses occur in the Mahábhárata I. 2190, with some slight alterations:

सर्पापसर्प भद्रं ते गच्छ सर्प महाविष । जनमेजयस्य यज्ञांते आस्तीकवचनं स्मर ॥
आस्तीकस्य वचः श्रुत्वा यः सर्पो न निवर्तते । शतधा भिद्यते मूर्ध्नि शिंशवृक्षफलं यथा ॥

## Maṇḍala II.

At the beginning of the second Maṇḍala S 2. adds,

विश्वेश्वर विरूपाक्ष विश्वरूप सदाशिव । शरणं भव भूतेश करुणां कर शंभव ॥

P. 416. l. 4. (II. 1, 1.) यद्वा आशु शीघ्रं शुच् दीप्तः सन् यतः स सेव्यत इति ॥ यद्वा आशु शीघ्रं शुचा दीप्त सन् यतः संसेव्यत इति A. C. यद्वा आशु शीघ्रं शुच दीप्तः सन् यतः स सेव्यत इति B. Perhaps आशु शीघ्रं शुचा दीप्त्या सन्यते सेव्यत इति.

[d] भयवित्रस्ता S 3. [e] मारुतो न प्रवायत्यों नमः deest in S 3. [f] जन्मेज S 3.

P. 416. l. 17. (II. 1, 2.) A. is wanting from here to II. 5, 7; II. 1, 2—9, however, is found at the beginning of the seventh Adhyáya.

P. 426. l. 26. (II. 2, 5.) द्यौर्द्युलोकांतरिक्षं Ca. C. द्यौर्द्युलोके रिक्षं B.

P. 428. l. 1. (II. 2, 7.) After नशब्दश्चार्थे, B. adds प्रादयो धैव्यवसायेन व्यवहरंति ॥

P. 430. l. 19. (II, 3, 1.) समिद्धोऽग्निरग्निना नरा° Ca. C. समिधाग्निनरा° B.

P. 437. l. 20. (II. 4, 4.) Instead of यद्वास्याग्नेः संबंधिनी पुष्टिर्यथा यजमानविषया रवा तद्वत्, Ca. C. have यद्वास्याग्नेः संबंधिनी तद्वत् यद्वास्याग्नेः संबंधिनी पुष्टिर्यजमानविषया रवास्तस्याग्नेः पुष्टिर्यथा रवा तद्वत्.

P. 438. l. 26. (II. 4, 5.) यद्वा नभोभिः ॥ स यथा नभोभिः B. Ca. C.

P. 440. l. 22. (II. 5, 1.) प्रयक्षन्. The Pada has प्रऽयक्षन्, the Sanhitá प्रयक्षं जेन्यं; a final न् before palatals is written as Anusvára in most Vaidik MSS.

P. 441. l. 2. (II. 5, 1.) यमं यमयितव्यं ॥ यमं यमेतव्यं B. Ca. C.

P. 441. l. 3. (II. 5, 1.) वाजिनोऽन्नस्य B. Ca. C.

P. 444. l. 26. (II. 6, 2.) स्तुत्युपबृंहितेन ॥ स्तुत्युपब्रूहितेन A. B. C.

P. 446. l. 26. (II. 7, 1.) तेऽध्वर्य्वादिभिः ॥ ते अध्वर्य्वादिभिः A. B. C.

P. 447. l. 9. (II. 7, 2.) उभयविधाया द्विषः ॥ उभयविधायाः विद्विषः A. B. C.

P. 447. l. 9. (II. 7, 2.) पूरय A. C. पूरयः B. Although पर्षि is explained in some passages by पूरय (cf. Rv. I. 174, 9), it was probably meant for पालय in our verse. See also Rv. I. 129, 5.

P. 447. l. 14. (II. 7, 3.) धारा अल्पसुतीरिव त्मनात्मनैवान्यनिरपेक्षेण ॥ धारा असस्तुतीरिव त्मना आत्मनैव अन्यनिरपेक्षण A. C. धारा असस्तुतिरिव त्मना आत्मनैव अन्यनिरपेक्षेण B. Sáyaṇa seems to have read त्मना instead of त्वया. अल्पसुतीः is merely conjectural, and not quite satisfactory because सुतिः is itself a Vaidik word. The whole may be a quotation, though this would hardly be in accordance with Sáyaṇa's usual style of interpretation.

P. 447. l. 15. (II. 7, 3.) अभिक्रम्य A. B. C.

P. 447. l. 26. (II. 7, 5.) सेकृभिः ॥ सेवभिः A. C. deest in B.

P. 452. l. 23. (II. 9, 4.) यद्वा मानयिता ॥ यद्वा मनोता A. B. Ca. has मनोता, but the C. MSS. have मानाता, which, as it does not occur in Ca., is evidently a mistake of the first copyist; *o*, according to the old spelling, being frequently mistaken for *á* + *á*.

P. 455. l. 17. (II. 10, 4.) There is an omission in all the MSS. towards the end of the Commentary. After घृतेन च we expect the verb जिहर्मि, which I have inserted to complete the sentence, but instead of which the MSS. give extracts from a Bráhmaṇa. In the usual style of Sáyaṇa such extracts would be preceded by तथा च ब्राह्मणं, while here all the MSS. begin at once and quite abruptly with the words प्रति क्षेष. Another irregularity is this, that the quotation from the Bráhmaṇa refers not only to this, but also to the following verse. A. reads घृतेन च प्रति क्षेष सर्वाणि भूतानि क्षेति पृथिव्या एष वयसा धूमेन वृहतं व्यचिष्टमै रभसं दृशानमित्यनवकाशनवनमन्नैरन्नादी दीप्यमानमित्येतदा विश्वत इत्या सर्वतः प्रत्यंचं जुहोतीत्येतदरक्षसेत्यहेलमानेन मनसेदं जुषेतेत्येतन्मयश्रीरिति मर्यश्रीरित्येष स्पृहयद्वर्णो अग्निर्ना-

भिमृश इति न ह्येष मृशेत दीप्यमानो भवतीति ॥ Ca. has घृतेन च प्रति ह्येष सर्वाणि भूतानि क्षेति पृथिव्या एष वयसा धूमेन वृहनं (sec. man. तं) व्यचिष्टमन्नै रभसं दृशानमित्यनवकाशनवनमन्नै (sec. man. न्नै) रन्नादं (sec. man. दं) दीप्यमानमित्येतदा विश्वत इत्या सर्वत प्रत्यंचं (दीप्यमानं struck out, but not in C.) जुहोती (मी C.) त्येतदरक्षसेत्यहेलमामानेन मनसेदं जुषेतेत्येतन्मयश्रीरिति मर्यश्रीरित्येष स्पृहयद्वर्णो अग्निर्नाभिमृश इति म (sec. man. न) ह्येष मृशेत दीप्यमानो भवतीति । The readings of the C. MSS. are the same as Ca. prima manu, with the exception of दीप्यमानं, which is left out in C., and म (sec. man. न), which is omitted. B. has घृतेन च प्रति ह्येष सर्वाणि भूतानि क्षेति पृथिव्या एष वयसा धूमेन बृहंतं व्याचिश्वमन्नै रभसं दृशानमित्यनवकाशनवन्नमात्वरन्नादं दीप्यमानमित्येतदा विश्वत इत्या सर्वतः प्रत्यं (sec. man. त्यृ) चं जुहोमीत्येतदरक्षासत्यहेलमानेन मसेदं जुषेतेत्येतन्मर्यश्रीरिति मर्यश्रीरित्येंष स्पृहयद्वर्णो अग्निर्नाभिमृशेति न ह्येष मृशेत दीप्यमानो भवतीति ॥ As it would have been difficult to restore the text from the MSS. of Sayaṇa's Commentary, it was necessary to collate the Bráhmaṇas, in which these verses are explained. Now the hymn in question is recited by the Hotṛi as part of the Prátaranuváka. We might therefore expect to find Bráhmaṇa explanations in the corresponding part of the Aitareya-bráhmaṇa, II. 24—28. Here, however, no exegetical remarks are made on this particular hymn. As the Udgátri is not concerned with our hymn, we cannot expect to find an explanation of it in the Sáma-veda-bráhmaṇa. The Adhvaryu priest has to use the first two verses of our hymn in the first part of the Agnicayana sacrifice. These hymns, the Ukhásambharaṇa-mantras, are collected in the Taittiríya-sanhitá, IV. 1, and here accordingly we find our verse though slightly modified: जिघर्मि ॥४॥ अग्निं मनसा घृतेन प्रति ष्यंतं भुवनानि विश्वा । पृथुं तिरश्चा वयसा बृहंतं व्यचिष्ठमन्नं रभसं विदानं । आ त्वा जिघर्मि वचसा घृतेनारक्षसा मनसा तज्जुषस्व । मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तनुवा जर्हृषाणः । The Bráhmaṇa to this is contained in the following, the fifth book of the Taittiríyakam (V. 1, 3, 2): जिघर्म्यग्निं मनसा घृतेनेत्याह । मनसा हि पुरुषो यज्ञमभिगच्छति ॥ प्रतिष्यंतं भुवनानि विश्वेत्याह । सर्वं ह्येष प्रत्यङ् क्षेति ॥ पृथुं तिरश्चा वयसा बृहंतमित्याहाल्पो ह्येष जातो महान् ॥२॥ भवति ॥ व्यचिष्ठमन्नं रभसं विदानमित्याहान्नमेवास्मै स्वदयति सर्वमस्मै स्वदते य एवं वेदा त्वा जिघर्मि वचसा घृतेनेत्याह । तस्माद्यत्पुरुषो मनसाभिगच्छति तद्वाचा वदत्यरक्षसेत्याह रक्षसामपहत्यै ॥ मर्यश्रीः स्पृहयद्वर्णो अग्निरित्याहापचितिमेवास्मिन्दधात्यपचितिमान्भवति य एवं ॥३॥ वेद मनसा त्वेतामाप्नुमर्हेति यामध्वर्युरनग्नावाहुतिं जुहोति मनस्वतीभ्यां जुहोत्याहुत्यै द्वाभ्यां प्रतिष्ठित्यै etc. The last Veda which we can look to for a Bráhmaṇa explanation is the White Yajur-veda. Here we find the two verses in question as 23 and 24 in the eleventh book of the Vájasaneyi-sanhitá, again with slight modifications. The corresponding Bráhmaṇa ought to be in the Ukhásambharaṇa of the S'atapatha-bráhmaṇa, and here indeed we meet with explanations very similar to those given by Sáyaṇa. Prap. 3. Bráhm. 1. Kaṇḍiká 19. we read, आ त्वा जिघर्मि मनसा घृतेनेति । आ त्वा जुहोमि मनसा च घृतेन चेत्येतत् ॥ प्रतिक्षियंतं भुवनानि विश्वेति । प्रत्यङ् ह्येष सर्वाणि भुवनानि क्षियति ॥ पृथुं तिरश्चा वयसा वृहंतमिति पृथुर्वा एष तिर्यङ् वयसा बृहन् धूमेन व्यचिष्ठमन्नै रभसं दृशानमित्यवकाशवंतमन्नैरन्नादं दीप्यमानमित्येतत् ॥१९॥ आ विश्वतः प्रत्यंचं जिघर्मीत्या सर्वतः प्रत्यंचं जुहोम्येतदरक्षसा मनसा तज्जुषेतेत्यहेडमानेन मनसा तज्जोषयेतेत्येतन्मर्यश्रीः स्पृहयद्वर्णोऽग्निर्नाभिमृशे तन्वा जर्भुराण इति न ह्येषोऽभिमृशे तन्वा दीप्यमानो भवति ॥ Although this is the Bráhmaṇa which Sáyaṇa must have had in his mind when

he wrote his Commentary, it is difficult to account for the differences between the original text and his quotation, unless we suppose him to have quoted from another S'ákhá of the S'atapatha-bráhmaṇa. There is no MS. of the Ukhá-sambharaṇa according to the Káṇva-śákhá in Europe. As it was impossible, therefore, to restore the original reading, I have left the quotation as it stands in Sáyaṇa, merely correcting those mistakes which could be corrected on the authority of the MSS.

The same discrepancy between the text of the Bráhmaṇa and Sáyaṇa's quotation may be observed II. 9, 1. Here the passage referred to occurs in the S'atapatha-bráhmaṇa VI. 3, 3, 7: नि होता होतृषदने विदान इति । अग्निर्वै होता कृष्णाजिनं होतृषदनं विदान इति विद्वानित्येतत् त्वेषो दीदिवान् ॥२॥ असदत्सुदक्ष इति त्वेषो दीप्यमानोऽसदत्सुदक्ष इत्येतददब्धव्रतप्रमतिर्वसिष्ठ इत्यदब्धव्रतप्रमतिर्ह्येष वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निरिति सर्वं वै सहस्रं सर्वंभरः शुचिजिह्वो अग्निरित्येतद्वाभ्यामाग्नेयीभ्यां त्रिष्टुब्भ्यां तस्योक्तो बंधुः ॥

P. 457. l. 17. From II. 11, 2. to II. 15, 1. A. is wanting.

P. 457. l. 22. (II. 11, 2.) लङि सिपि रूपं ॥ लङि सिचि रूपं B. लङि सि रूपं Ca. C.

P. 458. l. 16. (II. 11, 4.) इतीत्थंरूपेण B. इतीत्येवंरूपेण Ca. C.

P. 458. l. 17. (II. 11, 4.) सुष्ठु प्रेरकेण ॥ सुष्ठु प्रकारेण Ca. C. B.

P. 461. l. 20. (II. 11, 11.) लिटि रूपं ॥ लङि रूपं Ca. C. B.

P. 462. l. 13. (II. 11, 13.) ये ते तवावस्यवो ॥ तेन अवस्यवो B. ते तव अवस्यवो C. ते तव अस्यवो Ca.

P. 463. l. 11. (II. 11, 15.) इत् एवार्थे ॥ इत् इवार्थे B. Ca. C.

P. 463. l. 14. (II. 11, 15.) पशुपुत्रादिभिरस्मान् अस्मत्पालनेन च ॥ पशुपुत्रादिभिरस्मादिभिरस्मान् पालनेन च Ca. पशुपुत्रादिभिरस्मिाभिरस्मात्पालनेन च B., and sec. manu रस्मदिभिरस्मत्पालनेन च.

P. 464. l. 25. (II. 11, 19.) Instead of सनेम one MS. reads सनेम. See the Commentary. तरंतः, however, is ádyudátta in all the MSS.

P. 465. l. 23. (II. 11, 20.) अर्बुदवधः स्पष्टमुक्तः ॥ अर्बुदवयः स्पष्टमुक्तं B. Ca. C. See Rv. I. 51, 6.

P. 468. l. 5. (II. 12, 1.) अस्मिन्पक्षे भवतेर्व्यत्ययेन ॥ अस्मिन्यज्ञे प्रत्यये व्यत्ययेन Ca. अस्मिन्यज्ञे प्रवेंत्र व्यत्ययेन B.

P. 470. l. 5. (II. 12, 5.) The whole passage from तथा च मंत्रै to स इंद्रोऽस्तीति is left out in Ca. The original reading in Ca. seems to have been तथा च मंत्रैर्नेंद्रो अस्तीति, but this is corrected into तथा च मंत्रे नेंद्रो अस्तीति, which became the reading of the C. MSS. In B., where this passage is preserved, mistakes occur towards the end; the MS. has ह्रस्वः । त् तस्मात् अस्मा इंद्राय स इंद्रो, and ग्र is added in the margin.

P. 473. l. 10. (II. 12, 12.) ये च मेऽशिमिविद्विषः ॥ ये च मेश इति द्विषः Ca. C. ये चेमेंर्शवतिद्विषः B. Cf. Taitt. Ár. I. 9. अशिमिविद्विषः is explained by Sáyaṇa शिमिः कर्म कृष्यादिकं । तस्य विघातकाः शिमिविद्विषः । तद्विपरीता अशिमिविद्विषः । कृष्याद्यनुकूलप्रवृत्तयो वायव इत्यर्थः.

P. 481. l. 20. (II. 13, 13.) अंतर्णीतण्यर्थत्वात् C. B. अंतर्भावितण्यर्थत्वात् B. sec. manu in marg. Ibidem स त्वन्यः (?) सत्वत्यं Ca. C. सत्वंत्यं B.

P. 483. l. 19. (II. 14, 4.) जने लोपः Ca.; जवे लोपः B.; but neither of the two readings seems right. It might be जनेति लोपः or गमेति लोपः, but even then the elision of the न would not be accounted for.

P. 486. l. 17. (II. 14, 10.) अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः । सः स्यार्द्धधातुक इति ॥ अत्र लोपोऽभ्यासस्यार्द्धधातुक इति Ca. B. Cf. Páṇ. VII. 4, 58, and 49.

P. 487. l. 1. (II. 14, 11.) ऊर्दरं न । ऊर्ध्वं दीर्णमूर्दरं कुसूलं Ca. In the margin Ca. adds मूर्जं न दीर्णं, which the C. MSS. adopt, reading ऊर्ध्वं दीर्णमूर्जं न दीर्णमूर्दरं. B. has ऊर्दरं न । उद्दीर्णमूर्दरं कुसूलं. The addition in Ca. is taken from the Nirukta, III. 20: ऊर्दरं कृदरमित्यावपनस्योर्दरमुद्दीर्णं भवत्यूर्जं दीर्णं वा । तमूर्दरं न पृणता यवेनेत्यपि निगमो भवति । तमूर्दरमिव पूरयत यवेन. Roth has पूरयति, but the Nirukta and its Commentary have पूरयत, MS. 1738. and 357. The same MS. 1738. reads also उद्दीर्णं like Sáyaṇa, but the Commentator says, ऊर्ध्वं हि तदीर्णं भवति.

P. 494. l. 20. From II. 16, 6. to II. 23, 11. A. is wanting.

P. 497. l. 19. (II. 17, 3.) प्रथमं मुख्यं ॥ प्रथममुक्थ्यं Ca. C. B.

P. 505. l. 24. (II. 19, 2.) इति स्वराणि स्वसराणि ॥ इति स्व इति स्वसराणि Ca. and B.; but स्व इति is cancelled in B.

P. 508. l. 13. (II. 19, 7.) मितां ह्रस्व इति ह्रस्वः. Instead of this Ca. reads हिंसकस्यासुरस्य स्वमिति स्वरः. B. has only हिंस्वरः. The words हिंसकस्यासुरस्य are evidently repeated from the preceding line, being an explanation of पीयोः. Therefore we have स्वमिति स्वरः together with हिंस्वरः, which leads naturally to a conjecture like मितां ह्रस्व इति ह्रस्वः, though it cannot be denied that something else also may have stood here in Sáyaṇa's original. Rv. I. 174, 8, where the same words occur, ननमो वधरदेवस्य पीयोः, no explanation is given.

P. 509. l. 19. (II. 20, 1.) मनीषा मनस इषया B. मनस ईशया Ca. The MSS. are always at variance in the explanation of this word. The Nirukta explains मनीषा by मनस ईषा, but it is hardly credible that Yáska should mean ईषा in the sense of 'pole or shaft of a plough.' From the manner in which Sáyaṇa explains मनीषा, it would seem as if he took ईषा either as इषा, in the sense of इच्छा, 'wish, desire;' or as ईशा, in the sense of 'power.' Both forms, इषा and ईशा, would be ungrammatical; but in grammatical explanations Indian grammarians are not always grammatical. In some cases the Commentator has evidently derived मनीषा from मनः and ईश्; for instance, I. 186, 1, मनस ईशितृत्वेन, though here also इषितृत्वेन would not be too much for Sáyaṇa, and in the majority of cases इष् is indeed best supported by the MSS.

P. 510. l. 18. (II. 20, 3.) फलस्य शमयिता B. Ca. C. यवयिता?

P. 520. l. 21. (II. 23, 2.) C. adds वसत्येषु परं तेज इति उस्राः, a gloss which occurs neither in Ca. nor in B., and must therefore be ascribed to the later copyists of the C. MSS.

P. 521. l. 7. (II. 23, 3.) स्वर्गस्य लंभकं; the MSS. have सर्वस्य लंभकं. See, however, Rv. Bh. I. 96, 4.

P. 522. l. 4. (II. 23, 5.) The वा after ध्वरसः seems to indicate the omission of another word. As ध्वरः occurs but once more in the Rig-veda, IV. 23, 7, where ध्वरसं is simply explained by हिंसिकां, it is difficult to supply the omission.

P. 526. l. 25. (II. 23, 15.) क्रतुमत् ज्ञानोपेतं A. C. कर्मसाधनं च विभाति B.

P. 528. l. 3. (II. 23, 17.) After हे ब्रह्मणस्पते all the MSS. (A. B. C.) have ब्रह्मणस्पतिं महो महत ऋतस्य यज्ञस्य धर्तरि धारके यजमाने, and they omit त्वां to explain त्वा, which I have added after उत्कृष्टं. Instead of सारेण A. and Ca. have साधारणं, and भवति instead of भवेति.

P. 536. l. 20. (II. 24, 13.) अतस्ते तमस्मदीयं यज्ञं ॥ अतस्ते तमस्मदीयं यशः A. B. C.

P. 536. l. 26. (II. 24, 13.) वशाया गोः ॥ वशायागे A. B. C.

P. 537. l. 24. From II. 24, 15. to II. 31, 1. A. is wanting.

P. 545. l. 25. (II. 27, 4.) एवंगुणविशिष्टानुग्रहा वा ॥ एवंगुणविशिष्टा ग्रहा वा B. एवंगुणविशिष्टा ग्रहानु वा C. Ca. The वा, which stands in all the MSS., shows that something is omitted.

P. 548. l. 9. (II. 27, 9.) ऋजीकाय स्तोतॄणां Ca. B.; might it be ऋजीकाय स्तोत्रे वा?

P. 554. l. 6. (II. 28, 3.) पूर्वामंत्रितांगवद्भावेन ॥ पूर्वमनांगवद्भवेन B. पूर्वमतांगवद्भवेन Ca.

P. 557. l. 25. (II. 28, 11.) अवयुत्य स्थितो is neither in B. nor in Ca.; it was supplied from II. 27, 17.

P. 574. l. 7. (II. 32, 8.) Instead of एवमुत्तरत्रापि योज्यं (A. Ca.) B. has या सिनीवाली या राका या सरस्वती ता एता अह्वे. The last sentence इंद्रवरुणेत्यादि belongs only to A. and C.

P. 574. l. 12. (II. 33, 1.) B. leaves out considerable portions of the Commentary. After प्रथमं सूक्तं B. reads गृत्समद ऋषिः त्रिष्टुप् छंदः रुद्रो देवता । आ ते पंचोना रौद्रमित्यनुक्रमणिका । तत्र प्रथमा । हे मरुतां पितः रुद्र ते त्वदीयमस्मभ्यं दातव्यं सुम्नमेतु । आगच्छतु । तथा त्वं नोऽस्मान् सूर्यस्य संदृशः संदर्शनान्मा युयोथाः । मा पृथक्कार्षीः. Then in marg. "यु मिश्रणामिश्रयोः । लङि छांदसः शपः श्लुः । छंदस्युभयथेत्यार्द्धधातुकत्वेन ङित्वाभावाद्गुणः । अर्वेति शत्रुर्भ्रातृव्यो वा अर्वेति श्रुतेः । नोऽस्माकं वीरो" वीर्यवान्पुत्रादिरभिक्षमेत । अभिभवतु । हे रुद्र etc. Instead of शत्रौ A. reads शत्रुर्भ्रातृ°; Ca. has शत्रो, altered into शत्रुर्भ्रातृ°. Instead of पुत्रादिः Ca. and A. have पुत्रो हि.

P. 575. l. 13. (II. 33, 2.) B. leaves out again several portions of the Commentary, principally the grammatical explanations.

P. 581. l. 8. (II. 33, 14.) अप परि वर्जने Ca. A. अपपरी वर्जने C. deest in B.

P. 582. l. 7. (II. 34, 1.) After चालयितारः the C. MSS., but not Ca., have यद्वा सर्वस्य जगतो धारयितारः ॥

P. 582. l. 15. (II. 34, 1.) भृम्याख्यो ॥ भृमिणाख्या A. C. deest in B.

P. 583. l. 19. (II. 34, 3.) कर्णैः कृतैर्मध्यप्रदेशैः ॥ कर्णैः कृतैर्मध्यंप्रदेशैः A. Ca. कर्णैः कृतैः मध्यप्रदेशैः B. कर्णैः कृमेर्मध्यंप्रदेशौः C.

P. 583. l. 21. (II. 34, 3.) समानवयस्काः A. B. C. It ought to be समानमनस्काः.

P. 584. l. 7. (II. 34, 4.) अनवभ्रराधसः etc. B., which still contains an abbreviated text, reads अनवभ्रं भ्रंशनरहितं राधो धनं येषां ते बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं. The words from नञ् to the end are marked with two dots over the line, which indicates that they were to be omitted. But as they are evidently taken from the text which we find in A. and C., we may conclude that the shorter text of B. for the last two leaves is the result of an intentional abbreviation.

P. 588. l. 20. (II. 34, 13.) शब्दकारिभिर्वीणाख्यैर्वीणाविशेषैः A. B. C. शब्दकारिभिः क्षोण्याख्यैर्वीणाविशेषैः?

P. 588. l. 26. (II. 34, 13.) मेघादुदकं चिंतयंतः A. B. C. मेघादुदकं चिरवंतः or सिंचंतः?

P. 592. l. 25. (II. 35, 5.) B., which is complete again, adds हि पूरणः at the end of

verse 5. The same addition occurs at the end of verse 8, where B. alone reads चः पूरणः.

P. 597. l. 23. (II. 36, 1.) उपरिष्टादेव ताः ॥ उपरिष्टाद्देवताः A. B. C.

P. 605. l. 19. (II. 38, 4.) The MSS. of the text have अदर्धः or अदर्द्धः; Sáyaṇa अदर्दः.

P. 607. l. 7. (II. 38, 7.) After अरण्येषु the MSS. have यथा. Instead of देवस्य सवितुः A. and Ca. C. have ईशः.

P. 623. l. 12. (II. 43, 1.) Sáyaṇa does not quote the last words of the Sarvánukrama ताभ्यामृषिरध्वनि वाश्यमानं शकुंतं तुष्टाव. Shaḍguruśishya explains शकुंतं by कपिंजलाख्यं पक्षिरूपिणमिंद्रं. The Liṭ of तुष्टाव he explains by अस्तौदिति वाच्ये तुष्टावेत्युपदेशप्रत्यभिज्ञानार्थं । उक्तं हि बृहद्देवतायां व्यक्तं । श्रुतं तु पुनरेवैच्छन्निंद्रो भूत्वा कपिंजलः । ऋषेर्जिगमिषोराशां ववाशेर्स्येण दक्षिणां । स तमार्षेण संप्रेक्ष्य चक्षुषा पक्षिरूपिणं । एताभ्यामभितुष्टाव सूक्ताभ्यां तु कनिक्रददिति ॥

At the end of the second Maṇḍala S 1. has the following Khila:

भद्रं वंद दक्षिणतो भद्रमुत्तरतो वदं । भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिंजल[g] ॥
भद्रं वद पुत्रैर्भद्रं वद गृहेषु च । भद्रमस्माकं वद भद्रं नो अभयं वद ॥
भद्रमधस्तान्नो वद भद्रमुपरिष्टान्नो वद । भद्रं भद्रं न आवद भद्रं नः सर्वतो वद ॥
असपत्नं पुरस्तान्नः शिवं दक्षिणतस्कृधि । अभयं सततं पश्चाद्भद्रमुत्तरतो गृहे ॥
यौवनानि महयसि जिग्युषामिव दुंदुभिः । शकुंतक प्रदक्षिणं शतपत्राभि नो वद ॥
आवदंस्त्वं शकुने भद्रमावंदतूष्णीमासीनः सुमतिं चिकिद्धि नः । यदुत्पतन्वदसि [h] कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥

S 2. and MS. Bodl. Wilson 429. have not got it, but S 2. adds after Varga 12, पदशिष्टं, a word occurring so frequently in the MSS. instead of परिशिष्टं, that I am almost inclined to take it as a synonyme of Pariśishta. It might mean what is left out in the Pada. S 3. and MS. Bodl. Wilson 435. give the first five verses, both without accents except in the first verse. Neither the Sáma, Yajur, or Atharvaveda contain this Khila. The first verse is quoted in the Nirukta, IX. 5; cf. Roth, Abhandlungen, p. 32, and Notes on Nir. IX. 5.

## Maṇḍala III.

Sáyaṇa passes over what Kátyáyana says about the race of Viśvámitra: कुशिकस्त्वैषीरथिरिंद्रतुल्यं पुत्रमिच्छन्ब्रह्मचर्यं चचार । तस्येंद्र एव गाथी पुत्रो जज्ञे गाथिनो विश्वामित्रः स तृतीयं मंडलमपश्यत्. According to Shaḍguruśishya this preamble was meant to vindicate the Riśhitva of the family of Viśvámitra: सत्यपवादे स्वयमृषित्वमनुभवतो विश्वामित्रगोत्रस्य विवक्षयेतिहासमाह. This was probably the reason why Sáyaṇa left it out.

P. 632. l. 4. (III. 1, 16.) वटिवयुक्तन्यायेन? A. C. नत्विवयुक्तन्योयेन B.

P. 636. l. 4. (III. 2, 2.) प्रभाधनः C. प्रधानः A. Ca. प्रभाधानः B., but altered into प्रधानः.

P. 640. l. 3. (III. 2, 12.) स्वरोहिद्भिः ॥ स्वदेशोभिः A. C. स्वरितो ग्निः B.

[g] कपिंगल S 3.

[h] On Karkari and Kárkáriṇa, see Prof. Stenzler, Indische Studien II. 159.

P. 642. l. 9. (III. 3, 2.) Instead of धियावसुः प्रज्ञया व्याप्तः, which is in B., A. and C. read विभावसुः प्रभया व्याप्तः. A. in the text of the hymn has धियावसुः.

P. 646. l. 3. (III. 4, 1.) त्वष्टुर्यांज्या तत्र इत्येषा ॥ त्वष्टुर्याज्ये वमित्येषा A. C. त्वष्टुर्याज्येषु वमित्येषा B., षु struck out man. sec.

P. 646. l. 23. (III. 4, 2.) शरीराणां न पातयितः ॥ शरीराणां न पातः B. शरीराणां पातः A. C.

P. 648. l. 4. (III. 4, 5.) प्रविचरंत । प्रविचरंतु C. विचरंत प्रविचरंतु A. Ca. अभिविचरंत । प्रविचरंतु B.

P. 649. l. 7. (III. 4, 8.) मनुष्यैश्च संगता त्य ‾ इऴा A. Ca. मनुष्यैश्च संगत्य C. मनुष्यैश्च संगता इऴा B.

P. 649. l. 9. (III. 4, 8.) अर्वागाभिमुख्यमेतद्बर्हिः सदंतु । आसीदंतु ॥ अर्वागाभिमुख्यं एतवँद्बर्हिः सदंतु । आसीदंतु A. आयागतिमुख्यं एतद्बर्हिः सदंतु । आसीदंतु Ca., but with a marginal correction in black ink, अर्वागाभि°. आयागतिमुख्यं एतद्बर्हिः सदंतु आसीदंतु C. आयाति अर्वाक् आभिमुख्यं देवीरिदं एतद्बर्हिः सदंतु आसीदंतु B.

P. 650. l. 17. (III. 5, 1.) सूक्तत्रयस्य ॥ सूक्तेयस्य A. C. B.

P. 658. l. 11. (III. 6, 9.) बलार्थं अन्नार्थं वा A. Ca. manu sec.; deest in C. B. reads सोम-मुद्दिश्य instead.

## Ashṭaka III.

From the beginning of the third Ashṭaka to the end of the eighth a new MS. comes in, E. I. H. 1861—1864. It was bequeathed in 1822 by Dr. Taylor to the Honourable Court of Directors; and as it was procured at Bombay we might expect that it belonged to the B. class. It is indeed but a repetition of the same MS. which we have in B 1. 2. 3., and therefore of no importance for the restitution of the text. The mutual relation of the different MSS. may be seen from the beginning of the third Ashṭaka.

B 1. has श्रीगजेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ वागीशाद्याः सुमनस इत्यादि ॥
B 3. has श्रीगणेशाय नमः श्रीगुरुभ्यो नमः ॥ वागीशाद्याः सुमनस इत्यादि ॥
B 4. has श्रीगणेशाय नमः श्रीगुरुभ्यो नमः वागीशाद्याः सुमनस इत्यादि ॥
A 2. has श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ ॥ वागीशाद्या इत्यादि ॥
Ca. has श्रीगणेशाय नमः ॥ ॐ वागीशाद्याः सुमनस इत्यादि ॥
C 2. has श्रीगणेशाय नमः ॥ ॐ वागीशाद्याः सुमनस इत्यादि ॥
C 4. has श्रीगणेशाय नमः ॐ वागीशाद्याः सुमनस इत्यादि ॥
C 5. has श्रीगणेशाय नमः वागीशाद्याः सुमनस इत्यादि ॥

P. 664. l. 9. (III. 7, 3.) नील not to be found in the Gaṇa वृषादि.

P. 664. l. 11. (III. 7, 3.) The Uṇádi-sútra is given differently by the different MSS. A. has अत्यविचमितमिरभिपनिपतिभ्य; C. अत्यविचमिरमितमिरभिलभिपनिपतिभ्य; B. अत्यविचमितमिरमिपतिभ्य.

P. 664. l. 20. (III. 7, 4.) ऊर्जयंतीरवलं बलिन कुर्वंत्यः B. °रवलं वलिं कुर्वंत्यः A. अग्निं बलिनं कुर्वंतः C.

P. 664. l. 21. (III. 7, 4.) स्तभूयमानं॥ सभू स्तंभनं तमिछंतं A. स्तभु स्तंभनं तमिछंतं C. स्तभू स्तम्भनं तमिछंतं B.

P. 666. l. 21. (III. 7, 6.) व्याज्यर्तिभ्यः क्रुरिति क्रुः. In A. the words from व्यत्ययेनांन° to °र्तिभ्यः have been omitted. व्याज्यर्तिभ्यः क्रुरिति क्रुः Ca. व्यांजर्तिभ्यः क्रुरिति क्रुः B. No rule is found in the Uṇádi-sútras by which अक्रुः is explained. क्रतुः is explained there

by itself, without अक्तुः; Uṇ. S. I. 71. In the next passage where अक्तुः is discussed by Sáyaṇa, he considers it as a báhulaka formation; III. 17, 1. अज्यत एभिरिति बाहुलकत्वात् क्तुः करणे। कित्त्वादुपधालोपः। प्रत्ययस्वरः॥

P. 667. l. 7. (III. 7, 7.) Between देवानां and व्रता C. adds संबंधीनि.

P. 667. l. 8. (III. 7, 7.) अग्नेः प्रसादाद्देवा यज्ञान् लब्धवंत A. C. अग्नेः प्रसादाद्धविर्लक्षणान्नवंतो देवा यज्ञान् लब्धवंत B.

P. 667. l. 10. (III. 7, 7.) गतेः प्रकृतिस्वरत्वं A. B. गतेः पूर्वपदप्रकृतिस्वरत्वं C.

P. 667. l. 17. (III. 7, 8.) Repeated from III. 4, 7.

P. 669. l. 21. (III. 7, 10.) उष दाहे B. उष प्रुष दाहे A. C.

P. 670. l. 8. (III. 7, 11.) गवादिपशून् संपादयित्री A. B. गवादिपशूनां प्रदात्री C.

P. 670. l. 22. (III. 8, 1.) वैश्वदेवी यौपी वा C. यूपी वा A. B.

P. 670. l. 21. (III. 8, 1.) Ca. has a marginal note on leaf 8[b]. The words are एरनेकाच इति यण्। उदात्तस्वरितयोरिति स्वरितत्वं। अनुष्टुप्। ईषद्दुःसुषु स्थ इति विधीयमान. They are preceded by a २, and in the second line there is a mark between कृत्नस्य and यूपो. It is clear that these words did not come from the Kalam of Sáyaṇa; and as neither A. nor B. has them, they were most probably an incidental remark made by a Brahman as he was reading or explaining the Veda. All the later C. MSS. have inserted this line between कृत्नस्य and यूपो.

P. 670. l. 26. (III. 8, 1.) यूपपरिव्ययणे C. यूपपरिव्ययमाणे A. B. Some words seem to have been omitted; we expect यूपपरिव्ययणे युवा सुवासा इत्येषा। यूपे परिव्ययमाणे युवा सुवासाः परिवीत आगादिति परिदध्यादिति सूत्रितत्वात्.

P. 671. l. 1. (III. 8, 1.) यूपैकादशिन्याम C. यश्चैकादशन्याम B. स्तवैकादशमन्या A.

P. 671. l. 11. (III. 8, 1.) देवसंबंधिना मधुना deest in A. B.

P. 671. l. 24. (III. 8, 1.) प्रत्ययस्वरेण मध्योदात्तः B. प्रत्ययस्वरेणाद्युदात्तः A. C.

P. 672. l. 12. (III. 8, 1.) श्नाभ्यस्तयोरात इत्याकारलोपः। दधस्तथोश्चेति भष्भावः A. B. In Ca. all except the last word भावः was omitted, but supplied by a marginal note. The other C. MSS. have inserted the words in their proper place.

P. 672. l. 13. (III. 8, 1.) क्षियंति निवसंत्यस्मिन्नित्यधिकरणे घः॥ क्षियंति निवसंति अधिकरणे क्तः A. and B., except that B. has something like पृः instead of क्तः. Ca. had the same reading as A., but it was corrected by marginal notes into the reading which has been adopted in the text.

P. 672. l. 14. (III. 8, 1.) The words from निवास to रुकारः are omitted in A.; those from उपस्थे to पूर्वपदांतोदात्तत्वं are omitted in A. and Ca., but Ca. has added them in the margin.

P. 676. l. 14. (III. 8, 6.) निमिम्युः। अवटेषु प्रचिक्षिपुः॥ निमिम्युः प्रचिक्षिपुः A. Ca. had the same, but it was corrected into निमिम्युः अवटेषु प्रचिक्षिपुः. B. has निमिम्युः अनंदेषु प्रचिक्षिपुः, and sec. manu आनंदेषु.

P. 676. l. 21. (III. 8, 6.) स्वधितिः खड्गः॥ स्वधिति ह्रस्वः A. C. स्वधितिः ह्रस्वः B. Perhaps the original MS. had स्वधितिः ड्गखः (with २ १ written above), which might have given rise to the reading of ह्रस्वः.

P. 677. l. 12. (III. 8, 7.) इति श्वेतं यज्ञः ॥ इति श्वेतं MSS.

P. 677. l. 17. (III. 8, 7.) व्यंतु. The MSS. agree in deriving व्यंतु from इण् गतौ; but the इकारलोपः, which they likewise agree in (except that A. has नृ इकारलोप), shows that it was derived from वी, which in the Dhátupáṭha is 24, 39, while इण् is 24, 36. From वी we should get वियंतु, and by इकारलोपः, व्यंतु. Sáyaṇa may possibly have given two derivations; one from इण् गतौ, which would give यंतु, and with वकारोपजन, व्यंतु; and a second from वी गति°, making वियंतु, and by इकारलोपः, व्यंतु.

P. 678. l. 22. (III. 8, 9.) दीप्तानि वासांसि A. C. दीप्तानि दर्शनाख्यानि वासांसि B.

P. 679. l. 12. (III. 8, 10.) प्रतिमुक्तकंटकाः ॥ प्रतिमूक्तकटाः B. अमुक्तकंटकाः A. प्रमुक्तकंटकाः Ca., and ति in marg.

P. 680. l. 1. (III. 8, 11.) सहस्रवल्शाः सहस्रशाखाः संतो A. B. C., but Ca. adds in marg. पुत्रपौत्रादिसंतानपरंपरया सहस्रशा°.

P. 680. l. 8. (III. 8, 11.) पादादित्वादनिघातः A. B. C., but Ca. sec. manu यद्वृत्तयोगादनिघातः.

P. 680. l. 21. (III. 9, 1.) सुदीदितिं ॥ सुदीधितिं A. B. C., but B. sec. manu सुदीदितिं.

P. 681. l. 9. (III 9, 2.) वना काननानि. Ca. adds in the margin रक्षितुं.

P. 681. l. 10. (III. 9, 2.) मातृरूपो Ca. marg.; deest in A. B.

P. 682. l. 1. (III. 9, 3.) तदुचितफलप्रदानेन B. ते दुचित् । फलप्रदानेने A. C. Ca. sec. manu दुर्चित् । फलप्रदानेने.

P. 682. l. 3. (III. 9, 3.) सख्ये मैत्रे A. C. सख्ये मित्रत्वे B.

P. 684. l. 4. (III. 9, 6.) विश्वान् । विश प्रवेशन etc. The text has been restored according to the Uṇádi-sútras. B., though hardly legible, seems to agree with it, adding only रक्षि (to form रक्ष). In A. the whole explanation is missing; C. has a number of corrections sec. manu, most of which are unintelligible.

P. 684. l. 6. (III. 9, 6.) कृत्वा । टा । जसादयश्छं° ॥ शसाद° A. B. C. Cf. Rv. I. 39, 1.

P. 684. l. 9. (III. 9, 6.) वस्वादित्वात् ॥ वास्वादित्वात् A. C., but Ca. sec. manu वाय्वादित्वात्. B. reads शाखादित्वात्, evidently a later correction.

P. 684. l. 18. (III. 9, 7.) छंदयति छदयति C. छंदयति छंदयति A. B. Naigh. III. 14. has छंदति छदयते, with the various reading छदयति.

P. 684. l. 20. (III. 9, 7.) यद्यस्मात् ॥ यस्मात् A. B. C. After काल एव B. adds यत् यं.

P. 684. l. 21. (III. 9, 7.) दीप्यमानं त्वां पशवो A. C. दीप्यमानं अभिमतफलपशवो B.

P. 684. l. 22. (III. 9, 7.) पश्वादिलक्षणं फलं B. A. C. omit फलं.

P. 684. l. 23. (III. 9, 7.) इत्येतस्माज्ञातोरुपरि रक्° A. C. °ज्ञातो रक् B.

P. 684. l. 25. (III. 9, 7.) छद अपाकरणे A. अपावरणे Ca. sec. m. अपवारणे B.

P. 685. l. 21. (III. 9, 8.) ईड स्तुतौ । अस्मारयत्; the two last words have been inserted from the margin of Ca.; they are wanting in A. B.

P. 686. l. 3. (III. 9, 9.) त्रीणि शता त्रीणि शतानि Ca., tríṇi śatá being inserted in the margin. B. A. have only त्रीणि शतानि. In the next following words त्री सहस्राणि is omitted by B., but given by A. C.

P. 686. l. 10. (III. 9, 9.) त्रयस्त्रिंशाविति A. त्रयस्त्रिंशविति Ca., and sec. m. शदिति. त्रिंशश्चेति B.

P. 686. l. 13. (III. 9, 9.) त्रयानां दशतां, as before दशानां दशतां. त्रयाणां दशतानां A. C. त्रयाणां दशानां B.

P. 686. l. 15. (III. 9, 9.) गु स्तुतावित्यस्माद्धातोर्गुदंशोर्नुदश्च । उ° १. १५६. ॥ गु स्तुतावित्यस्माडातोर्नुदशोर्गुदश्चेति A. C. °धातोर्नुदश्चेति B.

P. 686. l. 20. (III. 9, 9.) वाक्येत्यनुवृत्तौ चादित्वान्निघाताभावः ॥ वाक्यत्यनुवृत्तौ इतश्चेदित्वान्निघाताभावः A. वाक्यत्यनुवृत्तौ इतश्चेत्वान्निघाताभावः C. B., omitting this explanation, substitutes भिन्नवाक्यत्वान्निघाताभावः, which the margin of Ca. has likewise, with the var. lect. अभिन्न°.

P. 689. l. 12. (III. 10, 5.) इति यप्रत्ययः ॥ इति प्रत्ययः A. B. C.

P. 689. l. 14. (III. 10, 5.) The words from बिभ्रते to the end are omitted in A. The passage is given in B., and Ca. reads in marg. भृञ् भरणे । जुहोत्यादि भृञामित्यभ्यासस्य ईत्वे.

P. 689. l. 25. (III. 10, 6.) स्तुतिरूपास्ता वाच A. C. स्तुतिरूपा वाचो B.

P. 690. l. 2. (III. 10, 6.) अस्मात्पातृतुदिवचिरिचीत्यादिना ॥ अस्मात्पातृतुंदिवचिरवीत्यादिना A. Ca. pr. m. अस्मात्पातृतृदिविचिदिविवीत्यादिना Ca. sec. m. अस्मात्पातृतृदिविरचीत्यादिना B.

P. 690. l. 12. (III. 10, 7.) तदर्थं यष्टव्यागन्यादीन् A. B. C., but the margin of Ca. has यष्टव्यान्देवानग्न्यादीन्.

P. 690. l. 26. (III. 10, 8.) शोभनसामर्थ्योपेतं दानभोगार्हं धनमस्मे अस्मभ्यं दीदिहि । यद्वा द्युमत्तेजोयुक्तं सुवीर्यं. This passage has been supplied from the margin of Ca.; it was probably left out owing to the repetition of the word सुवीर्यं.

P. 691. l. 3. (III. 10, 8.) समीपवर्ती भव Ca. sec. m. समीपवर्तसिव A. C. समीपे वर्तसि B.

P. 691. l. 8. (III. 10, 8.) °त्वादगुणः A. B. C. °त्वाद् गुणाभावः Ca. sec. m.

P. 691. l. 21. (III. 10, 9.) मघनरूपेण A. B. महेंधनरूपेण Ca. sec. m.

P. 691. l. 22. (III. 10, 9.) सोमाद्याहुतिभिः A. B. C. सोमाज्याद्याहुतिभिः Ca. in marg.

P. 692. l. 1. (III. 10, 9.) रिचः । उपधावृद्धिः. The last word supplied from the margin of Ca.

P. 693. l. 20. (III. 11, 3.) अस्यैतादृशस्याग्नेरर्थं गमनस्वभावं तेजोऽस्याकाशे दृश्यमानस्य तमसस्तरणि हि । तारकं खलु । निवर्तकमिति यावत् B. अस्य एतादृशस्याग्नेरर्थं गमनस्वभावं तेजः अस्य आकाशदृस्यमानस्य तमसः । तरणि हि रेकं खलु निवर्तकमिति यावत् A. अस्य एतादृशस्याग्नेरर्थं गमनस्वभावं तेजः (तरणि हि माकारौ तरणस्वभावं सर्वत्र प्रसरणस्वभावमित्यर्थः । यद्वा गमनस्वभावं तेजः marg.) अस्य काशे दृश्यमानस्य तमसस्तरणि तावद् खलु निवर्तकमिति यावत् Ca.

P. 694. l. 16. (III. 11, 5.) तत्कर्माणि A. B. C. तत्तत्कर्माणि margin of Ca.

P. 694. l. 18. (III. 11, 5.) न दाभ्यः A. B. C. Ca. sec. m. अदाभ्यः. The original reading was probably अदाभ्यो न दाभ्यः.

P. 695. l. 7. (III. 11, 6.) ऽमृक्तः ॥ अत एव अमृक्तः Ca. marg.

P. 695. l. 14. (III. 11, 6.) तु वृत्ति etc.; inserted from the margin of Ca.; the whole passage being omitted in A. B. has तुः सौत्रो धातुः क्तिप्रत्ययः as a marginal note.

P. 695. l. 15. (III. 11, 6.) श्रुयतेऽन्नमिति Ca. sec. m. श्रूयते कर्मेति A. श्रूयते कर्मणीति B.

P. 696. l. 25. (III. 11, 9.) वाजेषु युद्धेषु A. B. C. Margin of Ca. वाजेषु यज्ञेषु.

P. 697. l. 14. (III. 12, 1.) The words between सूत्रि° and °यस्तृचः are omitted in A. The Viniyoga of verse 4, तोशा वृत्रहणा, is omitted in A., B., and C., but supplied by Ca. in the margin.

P. 698. l. 4. (III. 12, 1.) यद्वा to पिबतं. The whole passage missing in B.

P. 698. l. 23. (III. 12, 1.) अनादेशप्राप्तौ A. B. C. अनादेशे प्राप्ते Ca. sec. m.

P. 699. l. 5. (III. 12, 3.) उचितफलप्रदानेनोपच्छंन्दकाविं° Ca. sec. m. °प्रदानेन पापच्छेदकौ B. °प्रदाने पापच्छंदकौ A. C.

P. 699. l. 12. (III. 12, 3.) इति टेरुत्वं ॥ इती टे रुत्वं B. इतीर रुत्वं A. इतीर रुत्वं Ca. sec. m. C. inserts afterwards in the margin पररूपत्वं.

P. 699. l. 22. (III. 12, 4.) The words from परस्परापेक्षया to दातारौ are supplied from the margin of Ca. B. has the same, but omits परस्परापेक्षया जयशीलौ. The same explanation occurs in Sáyaṇa's Commentary on the Sáma-veda.

P. 699. l. 26. (III. 12, 4.) लुकि सति ह्वः संप्रसारणमित्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं । उवङादेशः A. The words after इत्यनुवृत्तौ are omitted in Ca., but added in the margin. In B. the words इत्यनुवृत्तौ बहुलं छंदसी are struck out.

P. 699. l. 27. (III. 12, 4.) शीङ्क्रुशिरुहिजिक्षिनृभ्य. This is the reading on which the Uṇádi-sútras and Ujjvaladatta's Uṇádivṛitti agree. उहशिरुहिजिसृक्षिहभ्य A. C. शीङ्ह-शिरुहिजिक्षिसनिभ्यः Ca. sec. m. ह्रशिरुहिजिसृक्षिप्येभ्य B.

P. 700. l. 19. (III. 12, 5.) उक्थं येषां ते. ते added in the margin of Ca. उक्थमेषां A. B. C.

P. 701. l. 3. (III. 12, 6.) दासयंत्युपक्षपयंतीति दासा उपक्षपयितारः Ca. sec. m. दासयंति उ दासा उपक्ष-यितारः A. दासयंति इति । उ दासा उपक्षयितारः C. दासयंति इति दासा उपक्षयितारः B.

P. 701. l. 22. (III. 12, 7.) क्विच्क्रौ च संज्ञायां added from the margin of Ca.

P. 702. l. 4. (III. 12, 8.) परस्परमवियुज्य ॥ परस्परं वियुज्य A. B. C.

P. 702. l. 5. (III. 12, 8.) सहैव वर्तमानत्वं B. स्वाहे च वर्तमानं A. C.

P. 702. l. 16. (III. 12, 9.) शत्रून्परिभवयः Ca. marg. शत्रून्परिभूषयः A. B. C.

P. 702. l. 22. (III. 13, 1.) वैश्वामित्रऋषभस्यार्षमग्निदेवताकम् added from B.

P. 702. l. 24. (III. 13, 1.) The words from विश्वामित्रपुत्र to the beginning of the first verse are omitted in B.

P. 703. l. 9. (III. 13, 1.) वो युष्मत्संबंधिने A. C. नो अस्मत्सं° margin of Ca. नो युष्मत्सं° B.

P. 703. l. 10. (III. 13, 1.) वृद्धतमं प्रभूतमिदं स्तुतिरूपं स्तोत्रशस्त्रादि वोक्थ्यजातं A. C. वृधतमं इदं प्रभूतं स्तोत्रं B.

P. 703. l. 11. (III. 13, 1.) प्राचै उच्चारय A. C. प्राचै उच्चारयत B., and Ca. sec. m.

P. 703. l. 25. (III. 13, 2.) अग्नेः प्रकाशकत्वेन A. C. अग्नेः प्रयोजकत्वेन B.

P. 704. l. 1. (III. 13, 2.) From हविषां प्रदातृत्वेन to हविर्वह° only in B., and in the margin of Ca.

P. 704. l. 15. (III. 13, 3.) कालापराधेन A. C. कालोपराधेन B.

P. 704. l. 19. (III. 13, 3.) वः । युष्मत्संबंधिनं B. वः संबंधिनं A. C.

P. 704. l. 20. (III. 13, 3.) आहुतिप्रदानेन ॥ °प्रधानेन B. °सदानेन A. C.

P. 707. l. 2. (III. 13, 7.) अनेन शरीरस्य क्षीरादिद्वारा बलारोग्यप्रदं गवादिकं ॥ बलारो ¯ पदं गत्वादिकं A. C. बलीरोपादयं गत्वादिकं B. बलारोग्यपदं गवादिकं Ca. sec. m.

P. 708. l. 7. (III. 14, 1.) तस्य पित्त्वादनुदात्तस्वरे धातुस्वरः B., and Ca. sec. m. तस्य पित्त्वादनु-दात्तत्वे प्रत्ययस्वरः A. C.

P. 708. l. 9. (III. 14, 1.) After इति A. gives part of the explanation of the fourth and fifth verses, from शोचिषा दीप्त्या to मनसा अंतः. Ca. had the same, but the superfluous passages were remarked in time, and partly cancelled by the copyist.

P. 710. l. 1. (III. 14, 4.) अर्चन् वदंति A. C. ˉवहंति B., and Ca. sec. m.

P. 712. l. 1. (III. 14, 7.) अकर्म etc. The grammatical explanation omitted in B.

P. 714. l. 13. (III. 15, 3.) उदित्यनुवृत्तौ ॥ उदित्यनुवृत्तौ A. B. C.

P. 715. l. 8. (III. 15, 4.) हुत्वेन ढः inserted from C.

P. 716. l. 2. (III. 15, 5.) सखिः संनिरूढः A. B. सखिः संभक्ता सं[त]जनीयो वा यद्वा सखिः संख्यातः त्वं संनिरूढः C.

P. 716. l. 4. (III. 15, 5.) यथा रथो धान्यादिकं A. B. C. Between रथो and धान्यादिकं, Ca. marg. adds गंत्र्यादिकः. धान्यादिकं B. धन्यादिकं A. धनादिकं C.

P. 716. l. 8. (III. 15, 5.) सखिः पस स्वप्ने B. पेस स्वापे A. सखिः पसनतेः स्वातेर्वा किन् लिङ्गत्वात् द्विवचनं पस स्वापे Ca. In the third Ashṭaka Ca. must generally be taken as the sole representative of the C. class, because the text of the other C. MSS. was mixed by the copyists, and sometimes taken from C., sometimes from A. The other C. MSS. are therefore of little value for determining the original text of Sáyaṇa; and, except where the contrary is stated, C. is henceforth to be regarded as the mark of Ca.

P. 716. l. 20. (III. 15, 6.) तथा मर्तस्य शत्रोर्दुर्मति A. B. तथा मर्तस्य मनुष्यस्य अस्य दुर्मति C. अस्य being a correction (sec. m.) instead of शत्रोः as it seems.

P. 716. l. 22. (III. 15, 6.) पा पान इत्येतस्य A. B. पी प्यायतेर्युड्लुगस्य लोटि शपो लुगभावश्छांदसः पा पान etc. C.

P. 716. l. 24. (III. 15, 6.) आमंत्रितस्याविद्यमानवत्त्वेन etc. आमंत्रितस्याविद्यमान अतिङ उत्तर° A. आमंत्रितस्याविद्यमानत्वेन [विद्यमानत्वेन inserted from the margin] अतिङ उत्तर° C. आमंत्रितस्य विद्यमानत्वेन अतिङ् उत्तरत्वाभावेन B.

P. 717. l. 18. (III. 16, 1.) अयं यजनीयत्वेन A. C. अयं यजमानेन B. sec. m.

P. 717. l. 22. (III. 16, 1.) तत्स्वामित्वात् omitted in B.

P. 718. l. 14. (III. 16, 2.) पृतनासु सेनासु तदुपलक्षितेषु संग्रामेषु ॥ पृतनासु सेनासु तद्रक्षितेषु संग्रामेषु B. पृतनासु सेनासु तत् दुरक्षिपेषु क्षितेषु संग्रामेषु A. पृतनासु [सेनासु क्षिपेषु marg.] सेनोपलक्षितेषु संग्रामेषु C.

P. 718. l. 15. (III. 16, 2.) The words between आत्मनो and आत्मनो inserted from Ca., C 2; wanting in A. B.

P. 719. l. 25. (III. 16, 4.) पुरोडाशादिहविर्भारसहनशीलः A. B. °हविर्भागस्य सहनशीलः C.

P. 720. l. 1. (III. 16, 4.) यद्वा विश्वानि to पूर्ववत् taken from Ca., where it stands immediately after आनयति, but not sec. m.

P. 720. l. 11. (III. 16, 4.) विश्वेत्यादिषु. The whole passage only in Ca.

P. 720. l. 17. (III. 16, 5.) दारिद्र्याय. Ca. inserts after it अदानाय.

P. 720. l. 18. (III. 16, 5.) तथावीरतायै to संपत्त्यभावस्य विषयभूतान्मा कुरु omitted in A. तथावीरतायै अपुत्रतायै मा कुरु तथा अस्मान् अगोतायै etc. B.

P. 720. l. 22. (III. 16, 5.) द्वेषांश्च ॥ द्वेषाँश्च B. द्वेषा च A. द्वेषान् C.

P. 722. l. 13. (III. 17, 1.) After घृतनिर्णिक् C. pr. m. has निर्णिगिति रूपनाम । दीप्तरूपः. Cf. Maṇḍala II. 35, 4.

P. 722. l. 18. (III. 17, 1.) बाहुलकत्वात् कुः ॥ बाहुलवा कुः A. C. बाहुलवात् कुः C. sec. m. In B. the whole passage is wanting.

P. 723. l. 11. (III. 17, 2.) तन्प्रत्ययेनांतोदात्तः A. C. deest in B. तन्प्रत्ययांतो व्यत्ययेनांतोदात्तः may have been the original text.

P. 723. l. 26. (III. 17, 3.) प्रजामेका. The passage is partly corrected after the text of the Átharvaṇa VIII. 9, 13, where, instead of the first रक्षति, we read जिन्वति. प्रजामेका रक्षत्यूर्जमेका रक्षन्नतमेकारक्षतीति A. प्रजामेका रक्षात्यूर्जमेका च तामकारक्षतीति C. sec. m.

P. 724. l. 21. (III. 17, 4.) वार्त्ताहारी C. वार्त्ताकारी A. अन्नकारी B.

P. 724. l. 26. (III. 17, 4.) पादादित्वान्न निघातः ॥ पादादित्वान्निघातः A. B. C.

P. 727. l. 15. (III. 18, 2.) संप्रसारणवलीयस्त्वान्निवृत्तिः A. C. संप्रसारणवलीयस्त्वान्निघातः B.

P. 728. l. 2. (III. 18, 3.) वंदमानस्त्वां स्तुवन्नहं C. वंदमानस्त्वं वंदमामहं A. वंदमानोऽहं B. sec. m.

P. 728. l. 3. (III. 18, 3.) तावद्देहि A. C. तावदेहि B.

P. 728. l. 5. (III. 18, 3.) इध्मः B. इध्मं A. C.

P. 728. l. 21. (III. 18, 4.) विश्वामित्रोत्पन्नेषु only from C. but pr. m.

P. 728. l. 22. (III. 18, 4.) एकस्मिन्बहुवचनं C. एक एकस्मिन्बहुवचनं A. एकः एकस्मिन्बहुवचनं B.

P. 728. l. 24. (III. 18, 4.) शं रोगाणां शमनमस्मासु C. शं रोगाणां यं शमनं चास्मासु A. शं रोगाणामुपशमनं चास्मासु B.

P. 728. l. 25. (III. 18, 4.) योर्भयानां यावनं मिश्रणं C. योर्मेनंत्रयानां अमिश्रण A. योः भयानां अमिश्रणं B.

P. 729. l. 8. (III. 18, 4.) अदिशदि°; C. inserts before it -- इंद्रव्रजोगोविचि.

P. 729. l. 9. (III. 18, 4.) डुकृञ् करणे A. B. कृत्करणं C.

P. 729. l. 18. (III. 18, 5.) उत्तमं धनं A. C. धनं wanting in B.

P. 729. l. 20. (III. 18, 5.) खलु भवसि. भवसि added from the margin of C.

P. 731. l. 6. (III. 19, 2.) प्राप्तैर्धनैः सह सन् C. sec. m. प्राप्तैर्धनैः सह A. सह सन् omitted in B.

P. 731. l. 17. (III. 19, 2.) संग्रामयतेरेव C. सन्नामयतेरेव A. सम्मानयतेरेव B.

P. 732. l. 1. (III. 19, 3.) त्वोतो यस्त्वया रक्ष्यमाणः C. त्वोतः स त्वया रक्षमाणः A. त्वोतः तया रक्षमाणः B.

P. 732. l. 4. (III. 19, 3.) अभिमतफलप्रदाने शकितुमिच्छोः A. C. अभिमतत्वात् फलप्रदानशंकितुमिच्छोः B.

P. 732. l. 5. (III. 19, 3.) प्रभावे महिम्नि A. B. C. adds ऐश्वर्ये.

P. 732. l. 9. (III. 19, 3.) इत्यूठवलोपः C. इत्युट लोपः A. इत्यूठलोपः B.

P. 733. l. 1. (III. 19, 4.) देवानिह ॥ देवमिह A. B. C.

P. 733. l. 16. (III. 19, 5.) पालयिता भवामीति A. C. पालयिता भवानीति B.

P. 733. l. 18. (III. 19, 5.) सक्षणेषु ॥ स्नक्षणेषु A. B. C.

P. 734. l. 13. (III. 20, 1.) सजोषसः परस्परं संगता भूत्वा A. B. सजोषसः सह प्रीयमाणाः संमिलिता भूत्वा C.

P. 735. l. 6. (III. 20, 2.) After जिह्वाः B. reads स्वहिकादिभेदेन त्रिप्रकारा जिह्वाः; C. also had सात्विकादिभेदेन त्रिप्रकाराः, but in brackets.

P. 735. l. 21. (III. 20, 3.) धर्महितस्य तव. C. inserts here अत्र तैत्तिरीयेऽमृतस्य धर्मेति पाठात्सूत्रकृता अग्ने भूरीत्याग्नेय्या धाम --- छंदे निर्दिष्टत्वात्तदनुसारेण पूर्वे भाष्यकृतो व्याख्यातवंतः. The whole

passage, however, is marked as a later addition (sec. m.), though it stands in the text.

P. 735. l. 23. (III. 20, 3.) अपेक्षितफलप्रश्नविषयाणां A. B. अपेक्षितफलप्रद (किं फलं अपेक्षितं इति पृष्टा बंधवो येन तादृश अनुग्रह) विषयाणां C. It seems that many marginal notes existed in the original codex.

P. 735. l. 25. (III. 20, 3.) संदधुः संप्रयुयुजिरे A. संदधुः संयुयुजिरे C. संदधुः संदधिरे किंच संप्रयुयुजिरे B.

P. 736. l. 20. (III. 20, 4.) वृत्रस्य हंता A. B. वृत्रस्य पापस्य हंता C.

P. 737. l. 24. (III. 20, 5.) एवमेकस्मिन्पादे आकारादटि परतः वकारस्य रुत्वधत्वपूर्वसवर्णानुनासिकादेशा उन्नेयाः C. एवमेकस्मिन्पादे अकारादटि फलः। अकारस्यात्वधत्वपूर्वसवर्णानुनासिका उन्नियाः A. एवमेकस्मिन्पादे आकारादटि रुत्वपूर्वसवर्णानुनासिका उन्नीयाः B.

P. 738. l. 20. (III. 21, 1.) प्रथमः प्रथम स्थाने प्रथतेस्माद्वितीयादय A. प्रथतेऽस्मात् द्वितीयादय C. प्रथमः प्रथतेस्मात्तृतीयादय B.

P. 739. l. 1. (III. 21, 2.) स्वायत्तधर्मके added from B. and C. pr. m. संगे A. B.

P. 739. l. 3. (III. 21, 2.) मेदसो मेदोरूपस्य C., but pr. m. वपारूपस्य. मेदसो मेदोपेताः मेदसो मेदोरूपस्य A. B.

P. 739. l. 24. (III. 21, 3.) संतौ भवो भवे छंदसीति etc. संतौ भावः तत्र साधुरिति वा भावे छंदसीति तत्र साधुरिति वा यत्प्रत्ययः A. संतौ भवः तत्र साधुरिति वा भवे छंदसीति तत्र साधुरिति वा यत्प्रत्ययः C. B.: Cf. Rv. I. 15, 12.

P. 741. l. 2. (III. 21, 5.) यद्वा to श्रोतंति added from C.

P. 741. l. 6. (III. 21, 5.) दद दान इत्यस्य लटि ङित्वादात्मनेपदं A. दद दान इत्यस्य लुङि ङित्वादात्मनेपदं C. sec. m. दद has Átmanep. because it is अनुदात्तेत्, Páṇ. I. 13, 12. डुदाञ् B.

P. 741. l. 12. (III. 21, 5.) At the end of the 21st Súkta A. and B. (sec. m.) have खिलं. C. omits the word खिलं, and has instead ब्राह्मणानुसंहितमिदं सूक्तं तत्र ब्राह्मणं पदव्याख्यानात्मकं न भवतीति नात्र लिखितं.

P. 741. l. 25. (III. 22, 1.) सोमं कामयमान यस्मिन्नग्नौ हुतं सुतं A. सोमं कामयमानः इंद्र यस्मिन्नग्नौ हुतं सुतं C. सोमं कामनः इंद्रं यस्मिन्नग्नौ सुतं B.

P. 742. l. 1. (III. 22, 1.) तमत्यं वेमवशादतनशीलं C. यंतसत्यं वेगवशदेतनशीलं A. तं अत्यं वेगन् शादतनशीलं B.

P. 742. l. 1. (III. 22, 1.) अश्वमिव. C. inserts after it यद्वा सहस्रिणमिति वाजविशेषणं सहस्रसंख्याकं.

P. 742. l. 2. (III. 22, 1.) सोमाद्यनेकप्रकारं A. C. सोमाद्यनेकरूपं B.

P. 742. l. 14. (III. 22, 2.) आहवनीयादिरूपतया. C. inserts after it दाहपाकादिकर्तृतया.

P. 742. l. 18. (III. 22, 2.) कृतवानसि त्वेषो added from Ca.

P. 743. l. 13. (III. 22, 3.) इति धिष्ण्याः प्राणाभिमानिनो देवाः A. B. इति धिष्ण्याः प्राणाः। यद्वा धिषणा स्तुतिः तदर्हाः प्राणाः। ये धिष्ण्याः प्राणाभिमानिनो देवाः C.

P. 743. l. 19. (III. 22, 3.) The text is given from the MSS. of the S'atapatha-bráhmaṇa (Mádhyandina S'ákhá). The MSS. of the Commentary read, ते हि सर्वा धिय इष्यांति या रोचने परस्तातानेष सचते A. B. ते सर्वधियं उष्यांति। तानेष सचते C.

P. 744. l. 2. (III. 22, 3.) ह्रस्वादयः॥ ह्रस्वत्वादयः A. B. C.

P. 744. l. 12. (III. 22, 4.) With the exception of the words पुरीषमर्हंतीति पुरीषे भवा वा,

which are added after पुरीष्यासः, the whole passage as far as सजोषसः has been given from C. A. omits the whole as far as सजोषसः. पुरीष्यासः सिकतामिश्राः चित्याः अग्नयः प्रवणे-भिमृत्खननसाधनभूतैरभ्र्यादिभिः सहिताः सजोषसः B.

P. 744. l. 16. (III. 22, 4.) प्रयच्छतां A. B. C. प्रयछंत्विति शेषः Ca.

P. 745. l. 26. (III. 23, 1.) जूरी यूरी हिंसावयोहान्योः ॥ जूरीमुरी हिंसावयोहान्योः C. pr. m. जॄ व्यत्येयन शतृप्रत्ययः A. B. and C. sec. m.; but there would not be a व्यत्ययः, if शतृ were added to जॄ; nor could the *ú* be explained without the addition of बहुलं छंदसीत्युत्वं. Cf. Rv. I. 117, 7.

P. 746. l. 13. (III. 23, 2.) अलूलुडतां C. अलूहतां A. विलूडतां B.

P. 746. l. 20. (III. 23, 2.) The words from रेवत् to श्रवणे taken from C. B. omits all from रेवत् to गतिगंधनयोः.

P. 746. l. 26. (III. 23, 2.) द्युदुभ्यां चेति भोजसूत्रेण उप्रत्ययः C. द्युयुवाभ्यां चेति भोजसूत्रेण प्रत्ययः B. द्युयुवाभ्यां चेति भोजनसूत्रेण प्रत्ययः A. The Sútra could not be found.

P. 746. l. 27. (III. 23, 2.) स्वं स्वमभिमतं C. स्वं स्वं एतं A. B.

P. 747. l. 9. (III. 23, 3.) प्रथनसाधनत्वेन A. प्रथम° B. मंथन° C.

P. 747. l. 10. (III. 23, 3.) हे देवश्रवाः. C. adds आत्मन आमंत्रणं.

P. 747. l. 12. (III. 23, 3.) वशवर्ती A. C. वशकर्ता B.

P. 748. l. 3. (III. 23, 4.) मनुष्यसंचार C. मनुषयसंचारण B. In A. the passage is omitted.

P. 748. l. 22. (III. 24, 1.) गाथिनो विश्वामित्र A. B. C. गाथिसुतो विश्वामित्र?

P. 749. l. 11. (III. 24, 1.) अस्य लुग्विकरणत्वात्वे न भवतः A. अस्य लुग्विकरणत्वादीत्वे न भवतः C. अस्यालुग्विकरणे त्वे न भवतः B.

P. 749. l. 23. (III. 24, 2.) यज्ञेषु प्रीतिमान् ॥ यज्ञेषु inserted from C.

P. 749. l. 23. (III. 24, 2.) इळायामीड्यायां ॥ इळायां inserted from C.

P. 750. l. 10. (III. 24, 3.) अग्ने मम मत्संबंधिन्यस्मिन्यज्ञे ॥ अग्ने त्वं मम संबंध्यस्मिन्यज्ञे C. अग्ने मम संबंध्यस्मिन्पक्षे A. B.

P. 750. l. 11. (III. 24, 3.) जृशॄस्तृजागृभ्यः ॥ जागृभ्यः A. B. स्वजागृभ्यः C.

P. 751. l. 26. (III. 25, 1.) तनयोऽसि. C. has after it द्यावापृथिवीभ्यां वा एवं जातां देवाः पर्यगृह्णन्निति श्रुतेः जातस्याग्नेः परिग्रहाज्जननीवत्तयोर्मातृत्वं इत्यर्थः.

P. 755. l. 3. (III. 26, 1.) विश्वानरोऽग्निः ॥ विश्वानरः कश्चि C. B. विश्वानरः कश्चित् Ca. A.

P. 756. l. 3. (III. 26, 2.) यद्वा स्यदःशब्देनाध्वा लक्ष्यते B. यद्वां स्यशब्देन द्वां लक्षते A. यद्वा स्यद-शब्देन तद्वाँल्लक्ष्यते C.

P. 756. l. 19. (III. 26, 3.) A. omits all between प्रतिदिनं समिध्यते and अयुंजन् in verse 4.

P. 756. l. 21. (III. 26, 3.) जातो B. आत्मजातो C.

P. 757. l. 16. (III. 26, 4.) चालयंति ॥ वालयंति A. B. चालयंति C.

P. 757. l. 17. (III. 26, 4.) अस्मात्रवेर्निद्वेति A. B. C. The ʿUṇádi-sútra I. 48. is तवेर्णिद्वा; Sáyaṇa has changed it to explain the accent. Cf. Rv. I. 35, 4.

P. 757. l. 19. (III. 26, 4.) पृषु सेचने ॥ पृष सेचने C. पृष संधाने A. B.

P. 758. l. 25. (III. 26, 6.) मारुतं तेजो याचामहे. C. has after it यद्वा व्रातं व्रातं वारकं गणं गणं सप्त गणान् ओजो बलं याचामहे.

P. 759. l. 19. (III. 26, 7.) स त्रेधात्मानं व्यभजत्। आदित्यं तृतीयं A. स त्रेधात्मानं व्यभजत आदित्यं द्वितीयं (sec. m., but तृतीयं pr. m.) C. स त्रेधात्मानं विभजत् आदित्यं तृतीयं B. The margin of B. adds अग्नि तृतीयं.

P. 759. l. 20. (III. 26, 7.) श्रवणमननादिनिरपेक्षेण स्वभावसाक्षात्° A. श्रवणमननादिनैरपेक्ष्येण स्वभावत एव साक्षात्° C. श्रवणमननादिसाधननिरपेक्षण स्वभावसाक्षात् B.

P. 759. l. 23. (III. 26, 7.) भोगात्मकं A. C. भोगार्थकं B.

P. 759. l. 24. (III. 26, 7.) अभिधाय वाय्वात्मनांतरिक्षाधिष्ठातृतां inserted from C.

P. 761. l. 2. (III. 26, 8.) अर्चनीयं. C. adds after it निरतिशयानंदलक्षणं.

P. 761. l. 6. (III. 26, 8.) सर्वंजगच्च पर्यपश्यत्। परितः सर्वतः स्वात्मतयादर्शत् C. जगत् पर्यपश्यत् सर्वतः प्राप्ततयादर्शत् B. In A. the passage is omitted.

P. 761. l. 23. (III. 26, 9.) न कदापि A. C. न क्वापि B.

P. 761. l. 23. (III. 26, 9.) उत्सं. C. has after it लुप्तोपममेतत्.

P. 762. l. 2. (III. 26, 9.) अस्मादुदियमिमृदिभ्यकृषिभ्यः A. अस्मादुदियमिगृदिकृषिभ्यः C. अस्मादुदियमिगदिकृषिभ्यः B. असि is added here as the radical of अंस. Instead of गुधि, as printed in the Uṇádi-text (ed. Boehtlingk), गुधि has been adopted from the MS. of Ujjvaladatta.

P. 762. l. 28. (III. 27, 1.) इति तिस्रः सामिधेन्यः. The two last words were inserted from C., where however they are struck out sec. m.

P. 763. l. 8. (III. 27, 1.) After अंचति C. adds जारयति.

P. 763. l. 15. (III. 27, 1.) सुम्नयुरिति. Ca. has after it आग्नेयपक्षे। हेऽग्ने वस्त्वदर्थमभिद्यवोऽभिगतदीप्तयो हविष्मंत आसादितैश्चरुपुरोडाशादिभिः सहिता वाजा अन्नानि समिल्लक्षणानि घृताच्या जुह्वा सह प्रक्रम्यंते। प्र वो वाजा इत्यन्वाहान्नं वै वाज इति देवान[ं] देवत्वं। समानमन्यत्.

P. 764. l. 5. (III. 27, 2.) पूर्वपदप्रकृतिस्वरः. Ca. has after it यद्वा उभयत्र छंदसीवनिपाविति वनिप्.

P. 764. l. 25. (III. 27, 4.) शोचिष्केशः ज्वालाकेशः C. शोचिष्केशः दीप्तज्वालः B. In A. no explanation is given.

P. 765. l. 2. (III. 27, 4.) याच्ञार्थः ॥ याच्ञ्यार्थः A. B. C.

P. 765. l. 8. (III. 27, 5.) घृतस्य विलयनद्वारा शोधनं येनेति A. C. घृतस्य विलयनद्वारा घृतशोधक इति B.

P. 769. l. 12. (III. 27, 13.) वृषु सेचने corrected. वृषी सेचने A. B. C.

P. 769. l. 21. (III. 27, 14.) तद्वत् C. तद्वतो A. B.

P. 770. l. 6. (III. 27, 15.) वृषणो वृषाणो A. वृषाणो omitted by B. C.

P. 770. l. 7. (III. 27, 15.) आहुतिद्वारा A. C. वृष्टिद्वारा B. sec. m.

P. 772. l. 4. (III. 28, 3.) तिरोहिते सति. Ca. adds पूर्वेद्युस्तृतीयसवनेऽभिषुतं परेद्युः प्रातःकाले हूयमानमीदृशं सोमं.

P. 772. l. 17. (III. 28, 4.) माध्यंदिने मध्यंदिनसंबंधिनि ॥ माध्यंदिनसंबंधिनि A. B. C.

P. 773. l. 14. (III. 28, 5.) अन्निति तत्र नानुवर्तनात् ॥ अणिति तत्रानुवर्तनात् A. In C. अणिति is left out, but supplied in the margin. In B. all is wanting. The quotation seems to refer to Páṇ. V. 3, 48.

P. 774. l. 18. (III. 29, 1.) प्रजननमग्निजननसाधन C. प्रजननमग्नेर्ज्वलनसाधन B. प्रजननसाधन A.

P. 776. l. 1. (III. 29, 3.) उत्तरवेद्या उत्पन्नो added from C.

P. 777. l. 7. (III. 29, 5.) मनसा वाचा चैकविधमेव कर्म कुर्वाणं inserted from C.

P. 777. l. 10. (III. 29, 5.) अग्निपूर्वकत्वात्सर्वेषामुत्तरक्रतूनां A. C. अग्निपूर्वकत्वात्सर्वमुत्तरक्रतूनां B.

P. 778. l. 4. (III. 29, 6.) वाह्यालीस्थानेषु C. वाह्यलीस्थानेषु A. वाह्यास्थलीस्थानेषु B.

P. 778. l. 5. (III. 29, 6.) यामन् यामनि वेगगमने A. C. यामन् याने विशेषवेगगमने B.

P. 778. l. 7. (III. 29, 6.) तृणानि च A. C. तृणानीव B.

P. 778. l. 8. (III. 29, 6.) दग्धस्थानानि C. दग्ध्रस्थानानि A. तदंतश्चे स्थानानि B.

P. 779. l. 8. (III. 29, 8.) उत्तरवेद्या नाभौ B. उत्तरवेद्यां नाभौ A. C.

P. 779. l. 10. (III. 29, 8.) सुकृतजान्योपभोगस्य A. C. सुकृतजन्योपभोगस्य C. sec. m. कृतजन्मोपभोगस्य B.

P. 779. l. 23. (III. 29, 9.) The words धुनोति कंपयतीति धूमोऽग्निः। एवंविधं are added from C. In A. these and the following words are omitted.

P. 780. l. 20. (III. 29, 10.) यद्वा to वर्धय wanting in B. After यद्वा C. has गॄ शब्दे। गृणंतीति गिरः स्तोतारः। पाठः.

P. 781. l. 17. (III. 29, 11.) पा रक्षणे पद्ॣ गतौ पातेः क्विन् A. पा रक्षणे पद्ॣ गतौ वा रुयंतः क्विप् C. pr. m.; वा is struck out sec. m. पा रक्षणे पद गतौ पातेः क्विन् B.

P. 781. l. 27. (III. 29, 11.) हृभृसृस्तृसूभ्य इति ईमनिन् A. B. C. The Uṇádi-sútra IV. 149. has हृभृधृसृस्तृशृभ्य इमनिच्. Cf. Rv. I. 55, 2, where वरीमन् is said to be formed by the औणादिक ईमनिन्प्रत्ययः. From the root सृ, सर्वीमन् is formed.

P. 782. l. 23. (III. 29, 13.) अग्रुवः. The etymological explanation is given only by C. In A. the whole passage is wanting.

P. 782. l. 25. (III. 29, 13.) हर्षाद्वस्तद्वयसंपुटेन शब्दं कुर्वंति A. Ca. हविर्शब्दं कुर्वंति B.

P. 782. l. 26. (III. 29, 13.) हर्षादुद्घोषंति C. हर्षते घोषंति A. B.

P. 786. l. 22. (III. 30, 1.) प्रयांसीतराख्यपि. C. adds after it धानाकरंभादीनि.

P. 787. l. 2. (III. 30, 1.) सोमपदस्येतरवाक्ये A. B. सोमपदस्योत्तरवाक्ये C.

P. 788. l. 3. (III. 30, 3.) वृषभ कामानां वर्षक हे इंद्र यस्त्वं omitted in C.

P. 788. l. 7. (III. 30, 3.) After तुविकूर्मिः there is a lacuna in A. B., which is supplied by Ca. in the following way: संग्रामे नानाविधकर्मणां कर्ता ऋघावान् शत्रुविषयहिंसावान् भवतीति शेषः प्रत्यक्षकृतः। हे वृषभ कामानां वर्षक अत एव उग्रः etc. The passage, however, has been given according to C 2.

P. 788. l. 23. (III. 30, 4.) अच्युतानि च्युतिरहितानि C. अच्युतानि च्यवनरहितानि B. अच्युतानि रहितानि A.

P. 789. l. 4. (III. 30, 4.) हंतीति A. C. जिघ्नतीति B.

P. 789. l. 20. (III. 30, 5.) करोषीति यावत्॥ करोषीति यत् A. B. करोषीति यत C.

P. 789. l. 20. (III. 30, 5.) लोके प्रसिद्ध एव C. लोके प्रसिद्धः प्रभावः A. B.

P. 790. l. 6. (III. 30, 6.) शत्रूनभिलक्ष्य A. C. अस्मानभिलक्ष्य B.

P. 790. l. 8. (III. 30, 6.) प्रमृणन् हिंसन्. हिंसन् added from C.

P. 790. l. 9. (III. 30, 6.) पलायनपरांश्च A. B. पलायनपरायणांश्च C.

P. 790. l. 14. (III. 30, 6.) आभाद्यास्त्रस्य B. ति अभ्याद्यस्य A. आभाद्यास्त्रीयाम्य C.

P. 790. l. 23. (III. 30, 7.) निरंतरमैश्वर्यं A. B. निरतिशयमैश्वर्यं C.

P. 791. l. 16. (III. 30, 8.) कंचिदसुरं. C. adds त्वाष्ट्रं वृत्रं.

P. 791. l. 25. (III. 30, 8.) कुण शब्दने A. B. कुण संशब्दने C. The Dhátupáṭha has कुण शब्दोपकरणयोः.

P. 792. l. 6. (III. 30, 9.) अपारां. C. has after it दूडंदूपारां, i. e. दूरपारां.

P. 792. l. 7. (III. 30, 9.) भूमिं सामनां समानां C 2. भूमिं सामानां Ca. भूमिं सामनां B. भूमिं समेनां A.

P. 792. l. 8. (III. 30, 9.) यद्वा सम एव साम A. C. यद्वा सम एव सामनुः B. pr. m. साम sec. m.

P. 792. l. 9. (III. 30, 9.) तस्माद्वेव साम इति C. तस्माद्वचसमे A. तस्माद्वचसमे B. pr. m. तस्माद्वे वव साम C 2.

P. 792. l. 10. (III. 30, 9.) साम्यवती ॥ साम्यवती C. B. साम्यवती Ca. सम्यवती A.

P. 792. l. 12. (III. 30, 9.) तथांतरिक्षं to आगच्छतु only in C.

P. 792. l. 15. (III. 30, 9.) सम एव सामः C. सम एव सामं A. B.

P. 792. l. 15. (III. 30, 9.) इष गतौ ॥ इषु गतौ A. B. इषि गतौ C.

P. 792. l. 18. (III. 30, 9.) स्तंभु स्तंभन A. B. स्तंभु रोधन C.

P. 792. l. 21. (III. 30, 9.) क्षिप् धातोर्हस्वश्च B. क्षिपधातोर्हस्वश्च A. क्षिप् हस्वश्चेति क्षिप् धातोर्हस्वश्च C. Cf. Uṇádi-sútra II. 59.

P. 793. l. 6. (III. 30, 10.) पुरा हंतोस्तव वज्रप्रहारात्प्राक् A. B. एतादृशो मेघः पुरो हंतोः हननात् वज्रप्रहारात्प्राक् C.

P. 793. l. 6. (III. 30, 10.) विसिष्टो A. विशिष्टो B. विश्लिष्टो C.

P. 793. l. 14. (III. 30, 10.) धमतिर्गतिकर्मा. C. has after it सुरः हननात्प्राक् विविधमगच्छत् तं हत्वा गतिर्गमयितुमागोन्निति.

P. 793. l. 16. (III. 30, 10.) वल्यते ॥ C. adds यद्वा गोजीत्येकवचनं गवां व्रजो गोष्ठभूतो वलो नामाकरोदिंद्रः तं पुरुहूतं शब्दायमानास्ता गावोऽभ्यगच्छते आच्छाद्यते etc.

P. 794. l. 12. (III. 30, 11.) After शीघ्रमागच्छेति भावः Ca. adds यद्वा संगतानि वाजानन्नानि अंतरिक्षादाहृत्यास्मानभि प्रापयेति शेषः.

P. 795. l. 11. (III. 30, 13.) Between वि and वस्वत्याः Ca. adds पाठ। अक्तोः रात्रेः यामन् यामनि निर्गमने सति विवस्वत्यास्तमांसि विवासनवत्या उषसः. It is one of the many marginal notes which are found in Ca., but which do not occur in the other C. MSS.

P. 795. l. 13. (III. 30, 13.) उषःकालः Ca. काल A. काले B. C.

P. 795. l. 14. (III. 30, 13.) आगात् व्यपैति तदा A. B. C. आगतः तदा Ca.

P. 795. l. 16. (III. 30, 13.) After इंद्रस्य तवै, Ca. adds यद्वा महिना महिम्ना युक्तः आगादिति संबंधः तानींद्रस्य कर्म कर्माणि सुकृता सुष्ठु कृतानि पुरूणि बहूनि विद्यंते पाठः.

P. 796. l. 3. (III. 30, 14.) यद्यस्मादुदकात्स्वास्म स्वादुतरं संभृतं स्वेन संपादितं ॥ यद्यस्मादुदकस्वादुतर सभृतं संपादितं A. यद्यस्मादुदकात्स्मात्स्म स्वादुत्वकरं संउतं स्वेन संपादितं Ca. यथा स्मादुदकः स्मा तस्मादुत्वकर संभृतं स्वेन संपादितं C. यद्यस्मादुदकात्स्वा स्वादुतरं संभृतं स्वेन संपादितं B.

P. 796. l. 20. (III. 30, 15.) दुष्टमायुधानि B. दुष्टं माधानि A. C. दुष्टशब्दायमानाः माधानि Ca.

P. 796. l. 23. (III. 30, 15.) दृह दृहि वृह वृहि वृद्धौ A. दृहि वृह वृह वृद्धौ A. दृह दृहि वृद्धौ B.

P. 796. l. 28. (III. 30, 15.) After रिपवः A. has रपवचवसिवक्ते; Ca. रपवसिवक्ते; C. पच वचसिञ्चोपधाया; B. sec. m. रप हिंसायां. Might it be रप वचसि व्यक्ते?

P. 797. l. 14. (III. 30, 16.) After नय Ca. adds शत्रून्वा वशं नय.

P. 798. l. 2. (III. 30, 17.) क्रियतोऽनिर्ज्ञायमाण C. क्रियतो भिज्ञायमान B. क्रियतो भिज्ञायमाण A.

P. 798. l. 24. (III. 30, 18.) After भवेम Ca. adds यद्वा प्रणेतः स्वस्तयेऽस्माकं च। जितस्त्वं यदा महांति बहूनि हवीरूपाख्यन्नानि समासीदसि तदा वयं बृहतो महतो रायो धनस्य संभक्तारो भवेम.

P. 799. l. 14. (III. 30, 19.) गादाभ्यामिषणजितीषाच् Ca. A. गादाभ्यामिषुजितीषुच् C. B.

P. 799. l. 16. (III. 30, 19.) सीयुट आद्धधा° A. B. C. सीयुटः सलोपः आद्धधा° B. sec. m.

P. 800. l. 4. (III. 30, 20.) प्रख्याने। सिप्॥ प्रख्याने। किप् A.

P. 800. l. 13. (III. 30, 21.) विदारय before आद्रियस्व Ca.

P. 802. l. 3–5. (III. 31, 1.) शासद्वह्रिरित्युच्यते B. All between is left out. In C. the commentary on verse 1. and part of verse 2. is omitted.

P. 802. l. 6. (III. 31, 1.) स मे पुत्रः पुत्रो भवेदिति॥ पुत्रो पुत्रो भवेत्° A. पुत्रो भवेत् B. Ca. Cf. Manu, IX. 127.

P. 802. l. 7. (III. 31, 1.) नप्त्यं नप्तृभवं पिंडदानादिकं कर्तव्यतया गात् गच्छति B. नप्त्यं नप्तारं पौत्रं गात् गच्छति। दुहितुः पुत्रत्वेन स्वीकाराद्दौहित्रं नप्तृभवं पिंडदानादिकं कर्तव्यतया गात् गच्छति A. Ca. After गच्छति A. and Ca. add कर्तृकं पिंडदानादिकं गच्छतीत्यर्थः पाठः.

P. 802. l. 11. (III. 31, 1.) तत्पतिं॥ यत् पतिं A. Ca. विट्पतिं B.

P. 802. l. 11. (III. 31, 1.) यत्र यस्या दुहितुः B. The first explanation from यत्र यस्मिन्विषये to दुःखापगमात् is given in A. and Ca.

P. 802. l. 16. (III. 31, 1.) तया स्वशरीरं A. C. तस्यां स्ववीर्यं B.

P. 803. l. 12. (III. 31, 2.) तु तुरीयकं Ca. तुरीयकं A. तु तृतीयकं B.

P. 803. l. 14. (III. 31, 2.) वह्निं। अविह्निः स्त्री वह्निः पुमान् स्वभार्यायाया वोढृत्वात् अवह्निश्च वह्निः A. Ca. वह्निः स्त्री वह्निः पुमान् स्वभार्याया उदर्यत्वात् अवह्निश्च B. The Commentary to the Nirukta says, वह्निं च बध्वा वोढारं पुत्रं अवह्निं चावोढ्रीं स्त्रियं। तयोर्द्वयोरपि वोढ्रवोढ्रोः पुत्रयोरन्यतरः etc.

P. 804. l. 2. (III. 31, 2.) जनेर्णिच्चि॥ जनेर्लिङि B. जनेर्लिटि C. जने लीट A.

P. 804. l. 10. (III. 31, 3.) कंपमानो॥ कं भाजयमानो Ca. कं भजयमानो A. कंपमानो B.

P. 807. l. 12. (III. 31, 7.) घूद निरासे A. C. क्षरणे B.

P. 807. l. 16. (III. 31, 7.) सर्तेर्धातो B. C. सर्त्तीतो Ca. सर्त्तितो A.

P. 807. l. 25. (III. 31, 8.) सर्वमिति प्रतिमानं प्रतिनिधिः॥ प्रतिनिधिः सर्वमिति प्रतिमानं A. Ca. सर्व-मिति प्रतिमानं B. C.

P. 809. l. 15. (III. 31, 10.) ते व्याप्यातपिष्ट॥ ते व्याप्रा वर्तिताः A. ते व्यात्पा वर्तिताः B. ते व्यप्यावतिष्ट C.

P. 809. l. 23. (III. 31, 10.) घुष संशब्दने A. C. घुषिर विशब्दने B.

P. 810. l. 9. (III. 31, 11.) क्रमेणासु वसतीति A. B. क्रमेण हविरासु भवतीति Ca. क्रमेण हविष्वासु वतीति C.

P. 810. l. 15. (III. 31, 11.) स्वार्थे घप्रत्ययः Ca. स्वार्थे वृषेदरादत्वात् घप्रत्ययः A. स्वार्थ पृषोदरादित्वात्स्वार्थे घप्रत्ययः C. स्वार्थे पृषोदरादित्वात् घप्रत्ययः B.

P. 811. l. 3. (III. 31, 12.) अंतरिक्षेण विष्कभ्नंतो A. B. अंतरिक्षेण यज्ञेन वा विष्कभ्नंतो Ca.

P. 811. l. 5. (III. 31, 12.) After अस्थापयन् Ca. adds यज्ञैरेव लोकस्थितिरिंद्रस्य च वृद्धिरिति कीर्त्तेत.

P. 811. l. 8. (III. 31, 12.) Between रोधने and इति निपातनात् all is omitted in A. B.

P. 811. l. 21. (III. 31, 13.) धात्। अकरोत् B. धात् A. C. धात् धारयेत् Ca.

P. 812. l. 12. (III. 31, 14.) प्रापयामः॥ प्रापयामः हे Ca. प्रापयामहे C. प्रायामहे A. याचामहे B.

P. 814. l. 8. (III. 31, 17.) कृष्णे॥ C. adds कृष्णा चाकृष्णा च कृष्णे.

P. 814. l. 9. (III. 31, 17.) ऋजुगतयः ॥ C. adds यद्वा ऋज्वयसः ऋजुकर्माण इत्यर्थः.

P. 815. l. 20. (III. 31, 19.) सन्यसे to इत्यर्थः added from C.

P. 816. l. 20. (III. 31, 21.) दिशतु A. B. C. अदिशत् Ca.

P. 816. l. 23. (III. 31, 21.) Before व्रजे गाः etc. Ca. adds द्वाराण्युद्घाट्य गा निरगमयदित्यर्थः.

P. 820. l. 2. (III. 32, 5.) After हर्यश्व B. adds हरितवर्णाश्वोपेत.

P. 820. l. 21. (III. 32, 6.) वधेन युद्धेन A. B. C. वधेनायुधेन?

P. 821. l. 17. (III. 32, 7.) अपरिमिते रोदसी added from B.

P. 826. l. 4. (III. 32, 14.) Before आह्वयंति Ca. adds धारणार्थं. The passage is left out in A.

P. 826. l. 23. (III. 32, 15.) तं सोमं चोदिताधारे सिंचामि ॥ तं सोमं added from C.

P. 827. l. 14. (III. 32, 16.) सखिभ्यः सखिभिः. Ca. inserts सखीभूपर्वतैर्दृढीकृतमपि गव्यं गोसंबंधिनमूर्वं गणमारुजः आभग्नवानसि यदा वलेन रुद्धा गाः जेतुमंगिरसां कृते प्रवृद्धोऽसि तदा सर्वेऽपि त्वां न वारयंतीत्यर्थः.

P. 828. l. 12. (III. 33, 1.) संभेदमाययावनुययुरितरे। अथ A. C. संभेदमागत्योत्तितीर्षुः B.

P. 828. l. 26. (III. 33, 1.) कूलविपाटनात् विपाशनाद्वा विमोचनाद्वा. The MSS. insert after विपाशनाद्वा the following words: हतपुत्रोऽभूत् तमोवृत्तेर्मुमूर्षोर्वसिष्ठस्य पाशा अस्यां व्यपाश्यंत. Cf. Durga's Commentary on Nir. IX. 26: विपाशनाद्वा। किमस्यां व्यपाश्यत। पाशा अस्यां व्यपाश्यंत वसिष्ठस्य मुमूर्षतः। वसिष्ठः किल निममज्जास्यां मुमूर्षुः पुत्रमरणशोकार्त्तः पाशैरात्मानं बद्ध्वा। तस्य किल ते पाशा अस्यां व्यपाश्यंत व्यमुच्यंतोदकेन.

P. 833. l. 14. (III. 33, 7.) Ca. adds at the beginning of the verse इदमृषेर्वाक्यं.

P. 834. l. 8. (III. 33, 8.) यत्संवादात्मकं ॥ Ca. has after it इंद्रमाहात्म्यप्रकाशनरूपं वा.

P. 834. l. 8. (III. 33, 8.) नोऽभीत्य ॥ नोधिष इत्या A. नाधीष इत्या C. मनीषा इत्यादि B.

P. 836. l. 22. (III. 33, 11.) उत्तीर्णा भवेयुः ॥ Ca. adds तथा कुर्विति शेषः.

P. 837. l. 14. (III. 33, 12.) Ca. has at the beginning इदमुत्तीर्णस्य विश्वामित्रस्य वाक्यं.

P. 838. l. 6. (III. 33, 13.) पूर्वमुत्तितीर्षुर्विश्वामित्रो नदीरुक्त्वाधुनोत्तितीर्षुः A. B. पूर्वमुत्तीर्णो विश्वामित्रो नदीरुक्त्वाधुनोत्तितीर्षुः C.

P. 838. l. 7. (III. 33, 13.) युगकीला deest in A. B. C. युग्यकंट C. युग्यकंठ A. युग्यकड B.

P. 839. l. 17. (III. 34, 1.) वावृधानो वर्धमानो A. Ca. वावृधानो वर्धयमानो C. वावृधानो वर्धनशीलो B. marg.

P. 839. l. 17. (III. 34, 1.) भूरिदात्रः। दायते etc. A. C. भूरिदात्रो बहुच्छेदनसाधनयुक्तः B. marg.

P. 839. l. 19. (III. 34, 1.) आपृणत्। सर्वतोऽतर्पयत् C. आपृणत्। स्वप्रकाशेन पूरितवान् B. marg.; omitted in A.

P. 840. l. 10. (III. 34, 2.) नहेर्हेलोपश्च ॥ महेर्हेलोपश्च A. B. C.

P. 841. l. 13. (III. 34, 2.) धेना जिगातीत्यत्र प्रत्ययस्वरेणांतोदात्तः. In the passage quoted by Sáyaṇa धेना is ádyudátta, as it ought to be, if नित्त्व is anuvṛitta.

P. 842. l. 3. (III. 34, 4.) कृपृभ्यां कित्. This Sútra does not exist in the Uṇádi-sútras; cf. III. 148.

P. 844. l. 24. (III. 34, 8.) धिया स्तुत्या रणयंतः स्तोतारः A.B. धिया स्तुत्या कर्मणा वा रणं येषां ते स्तोतारः Ca.

P. 845. l. 2. (III. 34, 8.) ससान तत्तलोकात्वाग्निभ्यो ददौ A. ससान लोकवासिभ्यो ददौ B. ससान तत्तल्लोकवासिभ्यो ददौ C. ससान असुरेभ्यः समाहृत्य देवेभ्यो ददौ सततल्लोकवासिभ्यो ददौ Ca.

P. 848. l. 19. (III. 35, 3.) विघसं A. C. व्यघासं Ca. यवसं B.

P. 849. l. 12. (III. 35, 4.) समानप्रसिद्धी ॥ Ca. inserts before it वेगबलयोः.

P. 849. l. 14. (III. 35, 4.) सुष्टुद्वारं A. B. C. सुखकरं Ca.

P. 853. l. 23. (III. 36, 1.) सुते सुते ॥ Ca. has after it परोऽर्द्धर्चः परोक्षकृतः.

P. 857. l. 4. (III. 36, 6.) रथ्येव रथिन इव ॥ Ca. adds गंतव्यं देशं.

P. 857. l. 6. (III. 36, 6.) लताखंडरूपोऽल्पः सोमः A. लताखंडोपेतः सोमः Ca. लताखंडपाल्पः सोमः C. लताखंडजः सोमः B.

P. 861. l. 24. (III. 37, 4.) आकृषंति ॥ आकृषति A. B. C.

P. 863. l. 2. (III. 37, 7.) पृतनानामाज्यं पृतनाज्यं ॥ पृतनाज्यं deest in A. B. C.

P. 863. l. 26. (III. 37, 9.) निषादपंचमेषु चतुर्षु जनेषु A. B. वसुरादिषु स्थानेषु Ca.

P. 865. l. 13. (III. 38, 1.) काष्ठं संस्करोति A. B. रथं संस्करोति Ca. The same has after तद्वत् the words अस्मा इदु स्तोमं संहिनोमि रथं न तष्टेवेति निगमः.

P. 867. l. 21. (III. 38, 4.) आच्छादयन् added from Ca. B. has धार्यमानः.

P. 867. l. 24. (III. 38, 4.) महदाश्रयोपेतं A. B. महदाश्रयोपेतं C.

P. 868. l. 10. (III. 38, 5.) Before वृषभः A. B. C. (but not Ca.) have तयोः पूर्वः.

P. 870. l. 8. (III. 38, 8.) अमतिं दीप्तिं C. अमतिं कांतिं A. B.

P. 873. l. 11. (III. 39, 3.) शस्त्रादीनि कर्माणि ॥ Ca. adds यद्वा वपूंषि रूपाणि.

P. 875. l. 13. (III. 39, 6.) उत्सावित्र्यां भोगवत्यां गवि ॥ उत्साविर्‌यां गवि B. उत्सावि गवि A. C.

P. 882. l. 18. (III. 41, 2.) स्तीर्णमभूत् ॥ स्तीर्णं मरुतं A. स्तीर्णमत Ca. स्तीर्णं मरुत् C. स्तीर्णं B.

P. 886. l. 21. (III. 42, 2.) नृमन ॥ नृत मन B. नृनमन A. नृनमन C.

P. 887. l. 20. (III. 42, 5.) अन्नधन Ca. सेनाधन B. sec. m. निधने A. C.

P. 889. l. 15. (III. 43, 1.) ऽप्यावपनीयं added from Ca.

P. 889. l. 22. (III. 43, 1.) आ अभिलक्ष्य ॥ अनु अभिलक्ष्य A. B. C.

P. 890. l. 14. (III. 43, 2.) करणे supplied from C.

P. 891. l. 14. (III. 43, 4.) अथ धानावत्. After अथ Ca. has परोक्षस्तुतिः.

P. 891. l. 23. (III. 43, 5.) After हे इंद्र कुवित् Ca. adds अत्र कुविच्छब्दः कदा इत्यर्थे वर्तते बहुवाची वा.

P. 895. l. 20. (III. 44, 4.) प्राणहारकं C. प्राणापहारं B. प्रहारकं A.

P. 896. l. 5. (III. 44, 5.) अभिषुतं सोममपावृणोत् ॥ अभिषुतमपावृणोत् A. B. C.

P. 896. l. 14. (III. 45, 1.) श्रुत्या A. B. श्रौतो C.

P. 896. l. 14. (III. 45, 1.) स्मार्तं C. शास्त्रं A. B.

P. 896. l. 24. (III. 45, 1.) अतिगच्छंति ॥ अभिगच्छंति A. B. C.

P. 909. l. 16. (III. 49, 2.) युद्धमासाद्य B. युमासाद्य A. युद्धस्य मध्ये C.

P. 909. l. 18. (III. 49, 2.) न कोऽप्यभ्यस्तीत्यर्थः ॥ न कोऽप्यस्तीत्यर्थः A. B. C.

P. 910. l. 3. (III. 49, 3.) सहवा बलवान् A. C. सहवा सहायवान् बलवान् B.

P. 910. l. 23. (III. 49, 4.) पृष्टः ॥ Ca. adds व्याप्तः.

P. 916. l. 4. (III. 51, 3.) सत्रासाहं शत्रूणामेव हंतारं A. B. सत्रासाहं सत्यमेव शत्रूणामभिभवितारं C.

P. 919. l. 22. (III. 51, 9.) इदमनु अनेनानुक्रमेण उद्देशानुक्रमेणेत्यर्थः C. इदमनु अनेनानुक्रमेणेत्यर्थः Ca. इदमनु क्रमेण उद्देशानुक्रमेणेत्यर्थः A. B.

P. 923. l. 1. (III. 52, 6.) After महय Ca. adds संभावय.

P. 924. l. 9. (III. 53, 1.) ससर्पर्यैं ॥ ससर्पेयें A. B. ससर्पैर्यौ C. and the Anukramaṇí.

P. 925. l. 1. (III. 53, 2.) हारियोजनस्य added from C.

P. 925. l. 26. (III. 53, 3.) दत्स्व A. C. वदस्व B.

P. 926. l. 13. (III. 53, 4.) Ca. adds after तत्र गृह एव the words यत्र ते जाया तिष्ठति.

P. 927. l. 5. (III. 53, 5.) अत्र स्थितौ रासभस्य हेषारवं कुर्वतो वाजिनोऽश्वस्य रथाद्विमोचनं प्रयोजनं C. वाजिनः अश्वाः तेषां विमोचनं अत्र स्थितौ रासभस्य शब्दयुक्तस्य रथस्य B.; omitted in A.

P. 927. l. 19. (III. 53, 6.) यद्वा सुरणं सुरमणीयं यथा भवति तथा गृहे जाया तिष्ठति added from C. See the grammatical explanation.

P. 927. l. 25. (III. 53, 6.) Instead of प्रत्ययस्य (C.) A. has गव्ययसी, B. गव्ययसि. Before प्रत्ययस्य a grammatical explanation seems to have been omitted, which might be supplied in the following manner: यद्वा रणो रमणीयः। वशिरण्योरुपसंख्यानमित्यप्.

P. 930. l. 26. (III. 53, 12.) स्तावयामि C. स्तौमि A. B.

P. 932. l. 2. (III. 53, 14.) शूद्रापत्यैश्च C. शूद्रवित्तैश्च A. B.

P. 932. l. 3. (III. 53, 14.) पातकहेतुत्वेन स्मरणात्। पतितस्य संबंधि धनं नैचाशाखं A. B. पातकहेतुत्वेन स नीचाशाखः। तत्संबंधिधनं नैचाशाखं C.

P. 932. l. 7. (III. 53, 14.) प्रेप्सवो वा A. C. प्रेप्सा वा B., which is supported by the authority of the Nirukta and Nirukta-bháshya.

P. 932. l. 8. (III. 53, 14.) घरणं A. C. हरणं B. हर्म्यै Nirukta.

P. 932. l. 11. (III. 53, 14.) तत्स्यं A. B. तस्वं C. The MSS. of the Nirukta (E. I. H. 1378. and MS. Paris.) have तत्स्यं; Roth's edition gives तस्तंभे.

P. 932. l. 17–20. (III. 53, 15.) The S'lokás are taken from C. They are to be found in Shadguruśishya's commentary on the Anukramaṇí.

P. 935. l. 27. (III. 53, 21.) The commentary on verses 21—24. was omitted by the writer of A 2. The copyist of MS. Pada 1. omitted the whole 23rd Varga, probably for the same reason for which Durga abstained from explaining the second Páda of verse 23. This occurs Nir. IV. 14, but Durga declines to explain it because the passage is supposed to contain a curse on Vasishṭha, Vasishṭha being the ancestor of the family to which Durga himself belonged. Durga says, यस्मिन्निगम एष शब्दः (लोधः) सा वसिष्ठद्वेषिणी ऋक् अहं च कापिष्ठलो वासिष्ठः अतस्तां न निर्ब्रवीमि ॥ In the Anukramaṇí also it is said, अंत्या अभिशापार्थाः। ता वसिष्ठद्वेषिण्यः। न वसिष्ठाः शृण्वंति। and Shadguruśishya adds the following quotation from S'aunaka's Bṛihaddevatá to the same effect:

शतधा भिद्यते मूर्द्धा कीर्तनेन[i] श्रुतेन च। तेषां बालाः प्रमीयंते[k] तस्मात्तास्तु न कीर्तयेत् ॥

P. 935. l. 27. (III. 53, 21.) पुरा खलु only in C.—P. 936. l. 1. केनचित्कारणेन only in C.—P. 936. l. 2. ऋग्भिः only in C.—P. 936. l. 2. अभिशापरूपास्ता only in C.—P. 936. l. 9. शौर्यवन् only in C.—P. 936. l. 10. यातयति to लुक् only in C.—P. 936. l. 13. प्रशस्यतराभिः only in C.—P. 936. l. 13. द्वेष्यो only in C.—P. 936. l. 15. पंचवृत्तिः only in C.

[i] कीर्त्तितो च MS. E. I. H. 1823. कीर्त्तनैन 2396.    [k] प्रगीयंते E. I. H. 1823. प्रमायंत 2396.

P. 936. l. 22. (III. 53, 22.) चिच्छब्द उपमार्थः। यथा परशुं only in C.—P. 936. l. 23. शाल्मली B. —P. 936. l. 25. प्रयस्ता आपहता B. हे प्रयस्तापहृता C.—P. 936. l. 26. फेनं मुखात् B. पतुमुखात् C.

P. 937. l. 6. (III. 53, 23.) पुरा खलु only in C.—P. 937. l. 6. प्रयात् B. प्रापत् C.—P. 937. l. 6. मौनिनं only in C.—P. 937. l. 8. मंत्रगणसामर्थ्यं C. मंत्रसामर्थ्यं B.—P. 937. l. 9. पशु मन्यमानाः। पशु इति निपातः पशुशब्दसमानार्थः। पशुभिः वाज्ञ (perhaps पशुमिव यज्ञे) मन्यमानाः C. B. has only पशुवत् मन्यमानाः.—P. 937. l. 11. एवं to नाहेतीति only in C. वसिष्ठं धिक्करोति B.—P. 937. l. 12. नावाजिनमिति C. अवाजिनं मूर्खं B.—P. 937. l. 12. अवाजिनं वाचां इमो वाजिनः सर्वज्ञः। तद्विलक्षणं मूर्खजनं C.—P. 937. l. 14. तेन सह न स्पर्धंत इत्यर्थः। तदा only in C.

P. 937. l. 22. (III. 53, 24.) प्रपित्वं प्रगमनं न जानंति शिष्टैः सह C. प्रपित्वं प्रगमनं तिशिष्टैः सह B.—P. 937. l. 25. चरंति B. व्यारयंतिः Ca. व्यापयंतिः C.

P. 940. l. 6. (III. 54, 4.) अद्यतनाः C. अन्यतराः B., wanting in A.

P. 940. l. 18. (III. 54, 5.) C. has after प्राप्नोति the words केन मार्गेण देवास्तर्पयितव्या इति.

P. 940. l. 22. (III. 54, 5.) After इत्यभिप्रायः C. adds दिव एषा पृथक्स्तुतिः.

P. 941. l. 12. (III. 54, 6.) सहास्तां तौ व्येतां॥ सहास्तां तौ ख्येतां Ca. सहास्तां तौ व्येतां C. सह स्तां तौ घ्येतां A. सह स्तां तौ व्येतां B.

P. 942. l. 1. (III. 54, 7.) परस्परं ब्रूतः. C. has after it कर्मणि कर्तृप्रत्ययः.

P. 945. l. 14. (III. 54, 13.) After द्योतमानाः C. adds द्योतमानस्य रुद्रस्य पुत्रा वा; and after मारयितारः the words मनुष्येभ्यो हिता वा.

P. 947. l. 8. (III. 54, 16.) After चारु नाम Ca. has नासत्याविति नामरूपं च.

P. 951. l. 14. (III. 55, 1.) After महदैश्वर्यं Ca. has बृहद्देवतायामेव सूक्तं। अस्तौद्विश्वात्मना सर्वान्मन्यमानः परं पदं। देवानामसुरत्वं तदेकं महदितीरयन्निति.

P. 954. l. 22. (III. 55, 8.) आऽयत् MSS. आयत् Sáyaṇa.

P. 954. l. 24. (III. 55, 8.) Ca. has at the beginning of the verse अत्र दावाग्निवादः.

P. 957. l. 13. (III. 55, 13.) Ca. after निहितमकरोत् adds the words यद्वा कया भुवा कस्यां भुवि प्रदेशे अधःस्थानीयं मेघं निदधे। धारयति। न ज्ञायते। वर्षाकाल एव केवलं दृश्यते मेघः.

P. 958. l. 13. (III. 55, 15.) असाधारणलिंगेनेति C. असाधारणसंगेनेपि B. असाधारणसंगेनोत A.

P. 959. l. 17. (III. 55, 17.) लोके हि A. C. यथा B.

P. 960. l. 3. (III. 55, 18.) After शूरस्येंद्रस्य Ca. has सूर्यस्य वा.

P. 961. l. 18. (III. 55, 21.) पुरतो निश्चयेन A. B. पुरतो इन्द्रस्य पुरतो C.

P. 963. l. 10. (III. 56, 1.) यच्च पर्वतादीनामुन्नततयावस्थानं added from C.

P. 963. l. 11. (III. 56, 1.) अन्ययितुं A. B. C.

P. 968. l. 1. (III. 57, 1.) विवेकवान् A. B. सत्यानृतविवेकवान् C.

P. 969. l. 9. (III. 57, 3.) धेनवो A. B. नवप्रसूता गावः C.

P. 970. l. 2. (III. 57, 4.) मनवे मनुष्य° C. मनवे अनुष्ठान° A. B.

P. 970. l. 14. (III. 57, 5.) After प्रेर्यते C. adds यद्वा मधुमती माधुर्यवती सुमेधाः शोभनप्रज्ञानोपेता उरूची। महत इंद्रादीनंचति पूजयतीत्युरूची। जिह्वा वाक् देवेभ्याह्वानार्थं प्रेर्यते.

P. 972. l. 26. (III. 58, 3.) किं deest in MSS.: cf. Rv. I. 118, 3.

P. 975. l. 3. (III. 58, 7.) After अह्नि तिरोहिते Ca. inserts अह्नि भवं अह्न्यं। पूर्वेद्युस्तृतीयसवनेऽभिषुतं परेद्युः प्रातःकाले.

P. 978. l. 9. (III. 59, 3.) After वरिमन् Ca. adds उरुतरे.

P. 981. l. 11. (III. 60, 1.) तेषां भावो A. B. तेषां समूहो C.

P. 984. l. 8. (III. 60, 5.) बप्सति ॥ बभसति A. B. C.

P. 984. l. 15. (III. 60, 5.) भसेर्गेट्टिति ॥ भासराद्रेति A. B. भसेर्गेति C. गस Ca. The rule does not occur in the Uṇádi-sútras.

P. 984. l. 24. (III. 60, 6.) After अहानि Ca. adds सौत्यानि.

P. 986. l. 1. (III. 61, 1.) युवतिरित्युपमा A. C. युवतिस्तरुणीत्युपमा B.

P. 987. l. 3. (III. 61, 3.) From मार्गः to चाविति दीर्घः the text is taken from Ca.

P. 987. l. 22. (III. 61, 4.) शेर्लुक् ॥ सा लुक् A. मोर्लुक् B. सोर्लुक् C.

P. 988. l. 18. (III. 61, 6.) द्युलोकात् A. B. C. द्युलोकादुद्गच्छंती Ca.

P. 989. l. 11. (III. 61, 7.) Before सर्वत्र Ca. has स्वतेजोभिः.

P. 990. l. 1. (III. 62, 1.) After अभिमन्यमानाः Ca. has बाध्यमानाः.

P. 990. l. 7. (III. 62, 1.) अन्यस्मै देवाय न तुज्याः ॥ अन्यस्मै देवाय मात्यं तुज्याः A. B. C. अन्यस्मै देवाय तुज्याः Ca.

P. 991. l. 7. (III. 62, 3.) From यद्वा हूयते to हविरिति inserted from C.

P 991. l. 11. (III. 62, 3.) After पालयतु Ca. adds यद्वा होत्रा होतुरग्नेः पत्नी भारती सूर्यपत्नी च सरस्वती च तिस्रो देव्यः पालयंत्विति.

P. 993. l. 5. (III. 62, 9.) अत्र सकर्मकत्वात् C. अकर्मकत्वात् A. B.: cf. Páṇ. I. 3, 29, 3.

P. 993. l. 8. (III. 62, 10.) The whole passage from दोषो आगात् to द्वे आ विश्वदेव omitted in A. and B.

P. 993. l. 15–17. (III. 62, 10.) Ca. has the following various readings: it adds सर्वासु श्रुतिषु प्रसिद्धस्य after तत्तस्य; द्योतमानस्य after देवस्य; आत्मभूतं after परमेश्वरस्य; तद्योऽहं सोऽसौ योऽसौ सोऽहमिति after धीमहि. It omits तेजः, which A. B. give after स्वयंज्योतिः.

P. 993. l. 22. (III. 62, 10.) From ध्येयतया to धीमहि inserted from Ca. P. 993. l. 24. धीशब्दस्य कर्मपरत्वे deest in A. B.

P. 995. l. 1. (III. 62, 14.) After द्विपाद्भः Ca. adds प्रजाभ्यः.

P. 996. l. 7. (III. 62, 17.) युवां दक्षस्य । दक्षं धनं बलं वा ॥ वां दक्षं धनं बलं वा A. B. युवां दक्षस्य धनं बलं वा C.

I cannot conclude this second volume of the Rig-veda without acknowledging my obligation for much useful advice and kind assistance which from many quarters I have continued to receive. Professor Wilson has taken the same active interest in this as in the first part, and there is not a sheet that has not received the benefit of his careful perusal. The present volume has not indeed had the advantage of Dr. Rieu's revision, to whom much of the praise bestowed on the correctness of the press in the first is due. But in the latter portion of this volume I have been able to avail myself of the assist-

ance and active cooperation of my learned friend Dr. Aufrecht of Berlin, and the benefit hence derived cannot be too highly valued. I may hope that by his continued assistance I shall be able to bring this edition to an end in a much shorter time than I at first expected. Dr. Ballantyne of Benares, Dr. Röer of Calcutta, Mr. Edward Hall of Benares, and lately Mr. Walter Elliott of Vizagapatam, have all in the most obliging manner assisted me in the execution of my work by the transmission of several most valuable MSS., without which, I fear, I should never have succeeded in accomplishing a work which I commenced without perhaps a full consciousness of all its difficulties. I have been also honoured by that distinguished scholar and noble patron of Sanskrit literature, Rája Radhakanta Deva of Calcutta, with a most valuable present, the Sabda Kalpa Druma, a work which by its comprehensive range and its excellent arrangement stands unrivalled in Indian philology. At Oxford, again, I have had the advantage of the Bodleian Library, where, under the liberal management of Dr. Bandinel, scholars of all countries may avail themselves of the treasures of one of the finest collections in Europe with the same facility as if at work in their own private library.

Nor can any one, perhaps, acknowledge more thankfully than myself the valuable additions lately made to our knowledge of Vaidik literature and antiquities by the combined labours of so many distinguished scholars in India, England, France, and Germany. Many difficulties, against which I had to contend singlehanded in the first volume, have been removed by their publications. On commencing this edition I had first to copy and collate many works continually quoted by Sáyaṇa, or otherwise essential to a full comprehension of the Rig-veda. There were then no editions of the other Vedas, of the Nirukta, the Aitareya-bráhmaṇa, Ásvaláyana, and similar works. Yet it would have been impossible to print even the first pages of Sáyaṇa's Commentary without having to a certain extent established a critical text of these writings. Several have since been published, and their text has been settled with an accuracy greater than the limits of my time allowed me even to aim at in these supplementary treatises. Our comprehension of these works has been considerably facilitated either by translations or by notes and indices. The only works from which assistance could be derived when I commenced this edition were Rosen's first book of the Rig-veda and some valuable essays by Professor Nève and Dr. Kuhn. At present we have Professor Roth's edition of the Nirukta, Professor Benfey's Sáma-veda,

Dr. Weber's Yajur-veda, valuable treatises on the Grihya-sútras by Professor Stenzler, useful indices to the Vedas by Messrs. Pertsch and Whitney, and last, not least, the first specimen of Vaidik lexicography by Roth. Many obscure points in the earliest literature of India have received new light in the first and second volumes of Lassen's classical work on Indian Antiquities. Names formerly known to few have become familiar to all through the indefatigable industry of Dr. Weber. On the whole an entirely new direction has been given to Sanskrit philology, and during the last six years the Vaidik has received greater attention than any other period of Sanskrit literature.

But since the publication of the first volume of the Rig-veda we have suffered one irreparable loss. The death of Eugène Burnouf has deprived Sanskrit philology of one of its chief supporters, of one of its greatest ornaments. His loss will be long felt in different departments of Oriental learning, where his name is associated with some of the most brilliant discoveries of our age;—nowhere longer and more keenly than among the friends and students of Sanskrit literature. Of Burnouf's works I need not here speak. As the first scientific decipherer of the Cuneiform inscriptions, he has erected to himself a monument more lasting than the mountain-records of Persia. As the first Pali scholar and the historian of Buddhism, his fame will not easily be surpassed by future researches. As the first editor and interpreter of the Zend-avesta, his memory will endure so long as the human race values the traditions of its early childhood. But Burnouf's key to all these discoveries was Sanskrit; and in Sanskrit philology, where his influence was most beneficial, his loss is now felt most severely. I do not here allude to the Bhagavat-purána and other monuments of his persevering industry now left unfinished, nor to the works he contemplated, nor to the treasures he had collected. In losing Burnouf, we have lost not only an indefatigable fellow-labourer, not only a disinterested teacher, but a most respected judge; in his approval valued by all, in his censure feared, in his verdict distinguished unfailingly by fairness and by truth. Though he published but little on the Veda, yet I may safely assert—and those with whom I had the benefit of attending his lectures at the Collège de France, Barthelemy St. Hilaire, Gorresio, Nève, Pavie, Foucaux, Roth, Goldstücker, Bardelli, and many others, will bear me out—that there was not then a scholar in Europe more conversant with the language and the traditions of the Veda than Burnouf. The intimate friend of Rosen, he alone kept up after Rosen's death

the tradition of Vaidik studies. He impressed their importance on all who came to study under him, and he proved that for a true appreciation of the early history of mankind, and for a comparative study of the religions of the East, a knowledge of the Veda was indispensable. The new impulse given to Sanskrit philology in that direction, and the subsequent publication of numerous Vaidik works, were due to him; and for my own part I can only repeat, that without Burnouf's advice, encouragement, and assistance, I should never have been able to undertake this edition of the Rig-veda. When I heard of his death I felt—and I believe that many engaged in similar studies shared the feeling—as if our work had lost much of its charm and its purpose. 'What will Burnouf say?' was my earliest thought, on completing the first volume of the Rig-veda. And now as I am finishing the second, in its turn submitted to the judgment of so many scholars whose friendship I value, and whose learning I admire, my thoughts turn again to him who is no longer among us, and I think, not without sadness, of what his judgment would have been.

M. M.

SIR ROBERT TAYLOR'S INSTITUTION, OXFORD,
*Christmas* 1853.

# ऋग्वेदसंहिता

सायणाचार्यविरचितमाधवीयवेदार्थप्रकाशनामकभाष्यसहिता

शार्मण्यदेशोत्पन्नेनेंगलण्डदेशनिवासिना भट्टमोक्षमूलरेण संशोधिता

श्रीमद्भारतवर्षाधिपतीनामनुमत्या च


उक्षतरणाभिधाननगरे

विद्यामंदिरसंस्थानमुद्रायंत्रालये मुद्रिता

---

संवत् १९११ वर्षे

---


॥ द्वितीयाष्टकादि तृतीयाष्टकचतुर्थाध्यायैकादशवर्गपर्यंतं ॥

ओं

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
प्रक्रिया प्रथमे कांडे साकल्येनोपवर्णिता।
अत ऊर्ध्वतनी ज्ञेया स्मर्यते च क्वचित्क्वचित् ॥

अथ द्वितीयाष्टके प्रथमोऽध्याय आरभ्यते। शतर्चिनामाद्ये मंडले चतुर्विंशत्यनुवाकाः। तेषु कदित्थेत्यष्टादशानुवाके षट् सूक्तानि। तत्र प्र वः पांतमिति द्वितीयं सूक्तं। पंचोनेत्यनुवर्तमानात्पंचदशर्चं। ऋषिश्चान्यस्मादृषेरिति परिभाषया कक्षीवानृषिः। अनादेशपरिभाषया त्रिष्टुप्। विश्वे देवा देवता। प्र वो वैश्वदेवमित्यनुक्रमणिका। अस्य विशेषविनियोगो लैंगिकः ॥

॥ तत्र प्रथमामृचमाह ॥

ओं प्र वः पांतं रघुमन्यवोऽंधो यज्ञं रुद्राय मीळ्हुषे भरध्वं।
दिवो अस्तोष्यसुरस्य वीरैरिषुध्येव मरुतो रोदस्योः ॥ १ ॥

ओं प्र। वः। पांतं। रघुऽमन्यवः। अंधः। यज्ञं। रुद्राय। मीळ्हुषे। भरध्वं।
दिवः। अस्तोषि। असुरस्य। वीरैः। इषुध्याऽइव। मरुतः। रोदस्योः ॥ १ ॥

हे रघुमन्यवो लघुक्रोधा अक्रोधिन ऋत्विजो वो युष्माकं पांतं पालनशीलं पातव्यं वा यज्ञं यागसाधनमंधोऽन्नमाज्यसोमादिलक्षणं रुद्राय। रुत् दुःखं तद्धेतुभूतं दुरितं वा। तस्य द्रावयित्रे। एतन्नामकाय देवाय मीळ्हुषे फलस्य

वर्षित्रे तदर्थं प्रभरध्वं । प्रकर्षेण संपादयत । अहं चेषुध्येव । इषुध्या शत्रून्यथा निरस्यति तथा वीरैरमित्राणां विविधमीरकैर्वीर्योपेतैर्वा तदनुचरैर्मरुदादिभिः सह दिवो द्युलोकसकाशात् । उपलक्षणमेतत् । लोकत्रयादप्यसुरस्य निरसितव्यानामसुराणां निरसितुः । कर्मणि षष्ठी । निरसितारं । तमेव देवं रोदस्योर्निरोधनवत्योर्द्यावापृथिव्योर्मध्ये वर्तमानान्मरुतश्चास्तोषि । स्तौमि ॥ पांतं । पांतमित्यत्र पातेः शतृ पिबतेर्वौणादिको रुः । मीळ्हुषे । दाश्वान् साह्वानिति क्वसुप्रत्ययांतो निपातः । चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं । शासिवसीत्यादिना षत्वं । दिवः । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । अस्तोषि । स्तौतेश्छांदसो लुङ् । इषुध्येव । इषवो धीयंतेऽत्रेतीषुधीः । कर्मण्यधिकरणे चेति दधातेः किः । कृत्स्वरेणांतोदात्तः । उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं ॥

॥ अथ द्वितीया ॥

पत्नीव पूर्वहूतिं वावृधध्या उषासानक्ता पुरुधा विदाने ।
स्तरीर्नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः ॥ २ ॥
पत्नीऽइव । पूर्वऽहूतिं । ववृधध्यै । उषसानक्ता । पुरुधा । विदाने इति ।
स्तरीः । न । अत्कं । विऽउतं । वसाना । सूर्यस्य । श्रिया । सुऽदृशी । हिरण्यैः ॥ २ ॥

पत्नीव पत्नी यथा पूर्वहूतिं पत्युः पूर्वाह्वानं ववृधध्यै वर्धयितुं शीघ्रगतिर्भवति तद्वदुषासानक्ताहोरात्रे देवते अपि पुरुधा बहुप्रकारं बहुविधैः स्तोत्रैर्विदाने ज्ञायमाने सत्यौ पूर्वहूतिं ववृधध्या अस्मदीयं पूर्वाह्वानं वर्धयितुं शीघ्रमागच्छतमिति शेषः । यद्वा । ववृधध्या अस्मद्वर्धनाय पुरुधा बहुप्रकारं विदाने वर्धनोपायाज्ञानत्यौ भवतमिति शेषः । उषासानक्ता । उषासोषसः । पा॰ ६. ३. ३१. । इति पूर्वपदस्योषासादेशः । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । अथ केवलोषा उच्यते । स्तरीः शत्रूणां हिंसकस्तेजसाच्छन्नो वादित्यः स इव हिरण्यैर्हिरण्यवर्णै रश्मिभिर्व्युतं विततं विशेषेण संबद्धमत्कमक्तं संततं वा रूपं वसानाच्छादयंती धारयंती सूर्यस्य श्रिया शोभया सुदृशी शोभनं दृश्यमाना । सूर्यस्य पुरोगामिनी रश्मिभिः खल्वेषा जगद्भासयति । तादृश्युषा अस्मत्पूर्वहूतिं पालयत्वित्यर्थः । यद्वा । हिरण्यैर्हितरमणीयैः प्रकाशैर्धनविशेषैर्वा सहागच्छतु ॥ व्युतं । व्येञो निष्ठायां वचिस्वपीत्यादिना संप्रसारणं । स्तरीः । अवितृस्तृ इतीकारप्रत्ययः ॥

॥ अथ तृतीया ॥

ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान्।
शिशीतमिंद्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यंतु देवाः ॥ ३ ॥
ममत्तु। नः। परिऽज्मा। वसर्हा। ममत्तु। वातः। अपां। वृषण्ऽवान्।
शिशीतं। इंद्रापर्वता। युवं। नः। तत्। नः। विश्वे। वरिवस्यंतु। देवाः ॥ ३ ॥

नोऽस्मान्वसर्हा वसनार्हो गार्हपत्यादिरूपेण यद्वा वासकानामाच्छादकानां वृक्षादीनां हंताग्निः। अथवा वसर्हा वासार्हो वासरस्य गमयिता परिज्मा परितो गंतादित्यो ममत्तु। मादयतु। तथापां वृष्ट्युदकानां वृषण्वान् वर्षणवान् वृष्ट्युत्पादको वातो वायुरस्मान्ममत्तु। किंच हे इंद्रापर्वता। इंद्रः प्रसिद्धः। पर्वतः पर्ववान् वृष्ट्यादिपूरणवान्पर्जन्यः। तौ युवं युवां नोऽस्मानस्मद्बुद्धिं वा शिशीतं। तीक्ष्णीकुरुतं। शोधयतमित्यर्थः। तत्तस्मात् यस्मादहं सर्वान्देवान् स्तौमि तस्माद्विश्वे सर्वेऽपि देवा नोऽस्माकं वरिवस्यंतु। प्रभूतमन्नं दातुमिच्छंतु। समृद्धान्नप्रदानेन प्रीणयंत्वित्यर्थः ॥ ममत्तु। मदी हर्षे। अंतर्भावितण्यर्थाल्लोटि छांदसो विकरणस्य श्लुः। द्विर्वचनं। शिशीतं। ई हल्यघोरितीत्वं। बहुलं छंदसीत्यभ्यासस्येत्वं। इंद्रापर्वतेत्यच देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः ॥

॥ अथ चतुर्थी ॥

उत त्या मे यशसा श्वेतनायै व्यंता पांतौशिजो हुवध्यै।
प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः ॥ ४ ॥
उत। त्या। मे। यशसा। श्वेतनायै। व्यंता। पांता। औशिजः। हुवध्यै।
प्र। वः। नपातं। अपां। कृणुध्वं। प्र। मातरा। रास्पिनस्य। आयोः ॥ ४ ॥

औशिज उशिजः पुत्रः कक्षीवानहं मे। तादर्थ्ये चतुर्थी। मदर्थं यशसा। यश इत्यन्नं बलं कीर्तिर्वोच्यते। तद्वंतौ व्यंता भक्षयंतौ चरुपुरोडाशादिकं पांता पिबंतावाज्यसोमादिकं त्या। तच्छब्दसमानार्थस्त्यच्छब्दः। यौ स्तुत्यत्वेन प्रसिद्धौ तावश्विनौ। अत्र यद्यपि विशेषो न श्रुतः। तथापि सूक्तस्य वैश्वदेवत्वादुषःसंबंधात् द्विवचनलिंगाच्चाश्विनाविति गम्यते। तादृशावश्विनौ श्वेतनायै। इति षष्ठ्यर्थे चतुर्थी। विश्वं जगत् श्वेतयंत्या उषसः। तत्संबंधिनि काले। उषःका-

लीनाह्वानाय यजेयमिति शेषः। हे ऋत्विजः। वो यूयं। प्रथमार्थे द्वितीया। अपामुदकानां नपातं नपातयितारं तासां नप्तारं वाग्निं। अद्भ्य ओषधिवनस्पतयः। ताभ्योऽग्निरित्यपां नप्तृत्वमग्नेः। तं देवं प्रकृणुध्वं। करोतिरत्र क्रियासामान्यवाची क्रियाविशेषे स्तोत्रे पर्यवस्यति। प्रकर्षेण स्तुध्वमित्यर्थः। किंच रास्पिनस्य। रपते रसतेर्वा शब्दनार्थस्य घञंतस्य कृतसकारपकारोपजनस्य रास्प इति भवति। तदस्यास्तीति रास्पि स्तोत्रं। तद्वान् रास्पिनः स्तोता। तस्यायोस्तादृशस्य मनुष्यस्य मम मह्यं मातरा मातृवद्धितकारिण्यावहोरात्रदेवते अपि प्रकृणुध्वं। अथवा रास्पिनस्य। एको मत्वर्थप्रत्ययश्छांदसः। प्रवर्षणध्वनियुक्तस्य वृष्ट्युदकस्य गमनशीलस्य निर्मात्र्यावहोरात्रे प्रकृणुध्वं॥ व्यंता पांता। उभयत्र सुपां सुलुगित्याकारः॥

॥ अथ पंचमी ॥

आ वो॑ रुवण्युमौ॑शि॒जो हु॒वध्यै॒ घोषे॑व॒ शंस॒मर्जु॑नस्य॒ नंशे॑।
प्र वः॑ पू॒ष्णे दा॒वन॒ आँ अच्छा॑ वोचेय व॒सुता॑तिम॒ग्नेः॥ ५॥
आ। व॒ः। रु॒व॒ण्युं। औ॒शि॒जः। हु॒वध्यै॑। घोषा॑ऽइव। शंसं॑। अर्जु॑नस्य। नंशे॑।
प्र। व॒ः। पू॒ष्णे। दा॒वने॑। आ। अच्छ॑। वो॒चे॒य॒। व॒सु॒ऽता॑तिं। अ॒ग्नेः॥ ५॥

हे देवा औशिजः कक्षीवानहं वो युष्माकं संबंधिनं रुवण्युं रवणीयं शब्दनीयं शंसं स्तोत्रमाहुवध्यै युष्मदाह्वानायाच्छा वोचेय। आभिमुख्येन ब्रवीमि। यद्वात्राप्यश्विनावेवोच्येते। तस्मिन्पक्षे बहुवचनं पूजार्थं। हे अश्विनौ वो युष्मान् घोषेव। एतन्नामिका ब्रह्मवादिनीव। सा यथार्जुनस्य श्वेतवर्णस्य स्वशरीरगतत्वग्रोगस्य नंशे नाशनाय यथाश्विनोः शंसमकार्षीत् तद्वदहमपीत्यर्थः। हे देवा युष्मत्संबंधिने दावन आ आभिमुख्येन फलस्य दात्रे पूष्णे पोषकायैतन्नामकाय देवायापि। आकारस्याङोऽनुनासिकश्छंदसीति प्रकृतिभावः। अच्छाभिमुख्यगमनेन वोचेय। स्तौमि। वच परिभाषणे। लिङ्याशिष्यङ्। वच उमित्युम्। किंच। अग्नेर्वसुतातिं तत्संबंधि धनमपि वोचेय। स्तौमि तमेवाग्निं॥

॥ इति द्वितीयस्य प्रथमे प्रथमो वर्गः॥

॥ अथ षष्ठी ॥

श्रुतं मे मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीं।
श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिंधुरद्भिः ॥ ६ ॥

श्रुतं। मे। मित्रावरुणा। हवा। इमा। उत। श्रुतं। सदने। विश्वतः। सीं।
श्रोतु। नः। श्रोतुऽरातिः। सुऽश्रोतुः। सुऽक्षेत्रा। सिंधुः। अत्ऽभिः ॥ ६ ॥

हे मित्रावरुणा। एतन्नामानावहोरात्राभिमानिदेवौ युवामिमेमानि हवास्मदाह्वानानि श्रुतं। शृणुतं। न केवलमस्मदाह्वानं उतापि च सदने यागगृहे विश्वत उद्गात्रादिभिः सर्वतः क्रियमाणं सीमेतत्स्तोत्रमपि श्रुतं। शृणुतं। किंच श्रोतुरातिः सर्वत्र श्रूयमाणधनस्तोहशदानो वा सुश्रोतुरस्मदाह्वानस्य सम्यक्श्रोता सिंधुर्जलाभिमानी देवः सुक्षेत्रा सुक्षेत्राण्यद्भिर्वृष्टिजलैः क्लेदयन्निति शेषः। यद्वास्मत्क्षेत्राण्यद्भिः सुक्षेत्राणि सस्यादिसमृद्धानि कुर्वन् नो हवं शृणोतु। सुक्षेत्रत्वलाभाय शृणोत्वित्यर्थः ॥ हवा इमा। उभयत्र विभक्त्या आकारः। श्रुतमित्यत्र बहुलं छंदसीति विकरणस्य लुक् ॥

॥ अथ सप्तमी ॥

स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पज्रे।
श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुंधानासो अग्मन् ॥ ७ ॥

स्तुषे। सा। वां। वरुण। मित्र। रातिः। गवां। शता। पृक्षऽयामेषु। पज्रे।
श्रुतऽरथे। प्रियऽरथे। दधानाः। सद्यः। पुष्टिं। निऽरुंधानासः। अग्मन् ॥ ७ ॥

हे मित्र हे वरुण देव वां युवामहं स्तुषे। स्तुवे। व्यत्ययेन मध्यमः। युवयोः संबंधिनी सा प्रसिद्धा रातिर्दानं शता शतानां शतसंख्यानामपरिमितानां गवां संबंधिन्यसंख्यातगोविषया रातिः पज्रे कक्षीवति मयि पृक्षयामेषु। पृक्ष इत्यकारांतोऽप्यस्ति। पृक्षाणामन्नानां नियमनं येषु स्तोत्रेषु यज्ञेषु वा तेषु निमित्तभूतेषु भवत्विति शेषः। किंच मित्रादयो देवाः श्रुतरथे सर्वत्र प्रसिद्धरथोपेते प्रियरथे प्रीयमाणरथयुक्ते सर्वदा रथप्रिये पज्रे च मय्येव दधानाः प्रीतिं धारयंतः सद्य आगमनानंतरमेव पुष्टिं गवादिपोषं निरुंधानासोऽवरुंधाना अस्मास्वेव स्थापयंतः। यद्वा मयि पुष्टिं दधानाः कुर्वाणा निरुंधानासः कृतामेव

पुष्टिं मयि स्थिरां कुर्वंतोऽग्मन्। आगच्छंतु ॥ रातिः। रा दाने। भावे क्तिन्। मंत्रे वृषेत्यादिना क्तिन उदात्तत्वं। शता। सुपां सुलुगिति षष्ठ्याः पूर्वसवर्णदीर्घत्वं। दधानाः। जुहोत्यादित्वाच्छपः श्लुः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। अग्मन्। गमेश्छांदसे लुङि मंत्रे घसेत्यादिना च्लेर्लुक्। गमहनेत्युपधालोपः ॥

॥ अथाष्टमीमृचमाह ॥

अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः।
जनो यः पज्रेभ्यो वाजिनीवानश्वावतो रथिनो मह्यं सूरिः ॥ ८ ॥
अस्य। स्तुषे। महिऽमघस्य। राधः। सचा। सनेम। नहुषः। सुऽवीराः।
जनः। यः। पज्रेभ्यः। वाजिनीऽवान्। अश्वऽवतः। रथिनः। मह्यं। सूरिः ॥ ८ ॥

महिमघस्य। महि महत्पूज्यं मघो धनमन्नं वा यस्य देवसंघस्य स तथोक्तः। तादृशस्यास्य राधो धनं स्तुषे। स्तुवे। व्यत्ययेन मध्यमः। धनलाभाय प्रभूतधनं देवसंघं स्तौमीत्यर्थः। किंच नहुषः। मनुष्यनामैतत्। परस्परस्नेहबंधोपेता मनुष्या वयं कक्षीवंतः सुवीराः शोभनपुत्राद्युपेताः संतः सचा सह परस्परैकमत्येन सनेम। त्वद्दत्तं धनं संभजेम। लभेमहि। देवसंघो विशेष्यते। यो जनो देवजनो यश्च देवसंघः पज्रेभ्योऽंगिरोगोत्रोत्पन्नेभ्यः कक्षीवद्भ्यः। पज्रा वा अंगिरस इति श्रुतेः। तेभ्यो वाजिनीवान्। वाजोऽन्नं। तद्वती क्रिया वाजिनी। तया तद्वान्भवति। यद्वैको मत्वर्थीयप्रत्ययश्छांदसः। अस्मभ्यं प्रदेयेन दत्तेन वान्नेन तद्वान्भवतीत्यर्थः। यश्च देवसंघोऽश्वावतो बहुभिस्त्वद्दत्तैरश्वैस्तद्वतो रथिनो रथवतो मह्यं मे सूरिः प्रेरको भवति। अश्वानां रथानां प्रेरयितारं देवसंघं स्तुष इत्यर्थः ॥ सुवीराः। वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। अश्वावतः। अश्वशब्दस्य मंत्रे सोमाश्वेत्यादिना मतुपि दीर्घत्वं ॥

॥ अथ नवमी ॥

जनो यो मित्रावरुणावभिध्रुगपो न वां सुनोत्यक्ष्णयाध्रुक्।
स्वयं स यक्ष्मं हृदये नि धत्त आप यदीं होत्राभिर्ऋतावा ॥ ९ ॥
जनः। यः। मित्रावरुणौ। अभिऽध्रुक्। अपः। न। वां। सुनोति। अक्ष्णयाऽध्रुक्।
स्वयं। सः। यक्ष्मं। हृदये। नि। धत्ते। आप। यत्। ईं। होत्राभिः। ऋतऽवा ॥ ९ ॥

हे मित्रावरुणौ युष्माकं यो जनोऽभिध्रुक् अभितो द्रोग्धा भवति। अयष्टा भवतीत्यर्थः। यश्चाक्ष्णयाध्रुक् चक्रेण मार्गेण द्रुह्यति। अन्यथाप्रकारेण द्रुह्यति। द्रोहप्रकार उच्यते। वां युवामपः सोमरसान् न सुनोति। अभिषवं न करोति। युवामतिक्राम्यान्यदेवतार्थं सुनोतीत्यभिप्रायः। अयमेवाक्ष्णया द्रोहः। स मूढो द्विविधो जनः स्वयं यक्ष्मं व्याधिं हृदये स्वचित्ते निधत्ते। स्थापयति। अनुष्ठातॄणां भोगान्पश्यन्व्यथितो भवतीत्यर्थः। यत्। लिंगव्यत्ययः। य उक्तविलक्षणः पुमान् ऋतावा यज्ञवान् परिगृहीतयज्ञो होत्राभिः। वाङ्नामैतत्। स्तुतिवाग्भिरीमेनं सोमरसमाप। व्याप्नोति। स्तुवन् सोममभिषुणोतीति यावत्। स नरः पृत्सु यातीति वक्ष्यमाणेन सह संबंधः॥ अभिध्रुक्। द्रुहेः सत्सुद्विषेति क्विप्। संहितायां भष्भावश्छांदसः। ऋतावेत्यत्र छंदसीवनिपाविति मत्वर्थीयो वनिप्। अन्येषामपि दृश्यत इति संहितायां दीर्घत्वं॥

॥ अथ दशमी ॥

स व्राधतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः।
विसृष्टरातिर्याति बाळ्हसृत्वा विश्वासु पृत्सु सदमिच्छूरः॥ १०॥

सः। व्राधतः। नहुषः। दंऽसुजूतः। शर्धऽतरः। नरां। गूर्तऽश्रवाः।
विसृष्टऽरातिः। याति। बाळ्हऽसृत्वा। विश्वासु। पृत्ऽसु। सदं। इत्। शूरः॥ १०॥

हे मित्रावरुणौ युवां गतमंत्रावसानोक्तलक्षणो युष्मत्पूजको जनो दंसुजूतो दांतैरश्वैः सुष्ठु प्रेरितः। अत एव नरां नराणां शर्धस्तरोऽतिशयेनाभिभविता। अथवातिशयेन बलवान्। नराणां स्वसमानानां मध्ये गूर्तश्रवा उद्गूर्णदीप्तिः प्रख्यातान्नो वा। विसृष्टरातिरर्थिभ्यः प्रदत्तधनः। एवं महानुभावः शूरः सन् विश्वासु पृत्सु सर्वेषु जन्येषु संग्रामेषु व्राधतः। महन्नामैतत्। हिंसकान्महतोऽपि नहुषः। मनुष्यनामैतत्। मनुष्यान् शत्रून्प्रति बाळ्हसृत्वा भृशं सताशंकितगमनः सन् सदमित् सदैव याति। गच्छति॥ दंसुजूतः। दामेर्विच्। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। गूर्तश्रवाः। गुरी उद्यमने। नसत्तनिषत्तेत्यादौ निपातनान्निष्ठानत्वाभावः। विसृष्टरातिः। विपूर्वात्सृजतेः कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन एव शिष्यते। पृत्सु। पद्दादिषु मांस्पृत्स्नूनामुपसंख्यानमिति पृतनाशब्दस्य पृदादेशः।

सावेकाच इति विभक्तेरुदात्तत्वं । बाळ्हसृत्वा । सर्तेरन्येभ्योऽपि दृश्यंत इति क्वनिप् ॥

॥ इति द्वितीयस्य प्रथमे द्वितीयो वर्गः ॥

॥ अथैकादशी ॥

अध ग्मंता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मंद्राः ।
नभोजुवो यन्निरवस्य राधः प्रशस्तये महिना रथवते ॥ ११ ॥
अध । ग्मंत । नहुषः । हवं । सूरेः । श्रोत । राजानः । अमृतस्य । मंद्राः ।
नभःऽजुवः । यत् । निरवस्य । राधः । प्रऽशस्तये । महिना । रथऽवते ॥ ११ ॥

हे राजानो राजमानाः सर्वस्येश्वरा वा हे मंद्रा मादयितारो यूयममृतस्यामरणस्य सूरेः स्तोत्रादिप्रेरकस्य नहुषो मनुष्यस्य मम हवमाह्वानं श्रोत । शृणुत । बहुलं छंदसीति शपो लुक् । अमृतस्येत्यत्र बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं । अध अथ श्रवणानंतरं ग्मंत । आगच्छत । गमेश्छांदसो लट् । मध्यमबहुवचनस्य व्यत्ययेन तः । बहुलं छंदसीति शपो लुक् । गमहनेत्युपधालोपः । किमर्थमागमनं । उच्यते । नभोजुवो नभसि व्याप्ता यूयं यद्यस्मान्निरवस्य निर्गतरक्षकस्य युष्मद्व्यतिरेकेण रक्षकांतररहितस्य । अथवा निर्गतो मुखादुच्चरितो रवः शब्दः स्तोत्ररूपो यस्य तादृशस्य रथवते रथवतो यजमानस्य । षष्ठ्यर्थे चतुर्थी । महिना महिम्ना माहात्म्येन । मकारलोपश्छांदसः । तेन युक्तं राधः समृद्धिसाधनं हविर्लक्षणं संराधकं स्तोत्रं वा प्रशस्तये । प्रशंसितुं कामयध्वे । तस्मादाह्वानं शृणुत आगच्छत चेति ॥

॥ अथ द्वादशीमृचमाह ॥

एतं शर्धं धाम यस्य सूरेरित्यवोचन्दशतयस्य नंशे ।
द्युम्नानि येषु वसुताती रारन्विश्वे सन्वंतु प्रभृथेषु वाजं ॥ १२ ॥
एतं । शर्धं । धाम । यस्य । सूरेः । इति । अवोचन् । दशऽतयस्य । नंशे ।
द्युम्नानि । येषु । वसुऽतातिः । ररन् । विश्वे । सन्वंतु । प्रऽभृथेषु । वाजं ॥ १२ ॥

यस्य सूरेर्हविरादिप्रेरकस्य यजमानस्य संबंधिनो दशतयस्य दशेंद्रियसंवर्धकत्वेन

दशावयवस्यान्नस्य नंशे प्राप्तये वयमाहूताः स्म । तस्मै यजमानायैतमिदानीं दातव्यत्वेन वर्तमानं शर्धं परेषामभिभावकमन्नं तत्प्राप्तिहेतुं बलं वा धाम । विद्धाम करवामेत्यवोचन्देवाः । धाम । दधातेर्लुङि गातिस्थेति सिचो लुक् । वचेरकारस्योम् । अस्यतिवक्तीत्यादिना च्लेरङ् । येषु देवेषु द्युम्नानि द्योतमानान्यन्नानि वसुतातिर्वसूनां धनानां तातिर्विस्तारश्च वसून्येव वा रारन् । रमंते भृशं । तातिः । तनोतेः क्तिनि व्यत्ययेनात्वं । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । यद्वा स्वार्थिकस्तातिल् । रारन्निति रमतेर्यङ्लुगंतस्य लुङि रूपं । ते विश्वे सर्वे देवाः प्रभृथेषु प्रकृष्टभरणेषु यागेषु वाजमन्नं सन्वंतु । ददंतु । प्रयच्छंतु । षणु दाने । यद्वा । यस्य सूरेः स्वभूतस्य च दशतयस्य दश चमसेष्ववस्थितस्य सोमस्य प्राप्तये वयमाहूताः स्म तस्मा एतं शर्धं धामेत्यवोचन् । यस्मादेवं तस्मात्प्रभृथेषु यागेषु वाजं तादृशं सोमलक्षणमन्नं विश्वे देवाः सन्वंतु । संभजंतां । वन षण संभक्ताविन्यस्य व्यत्ययेनोप्रत्ययः । कीदृशेषु यज्ञेषु । येषु वसुतातिर्वसूनां हविर्लक्षणानां धनानां वा विस्तारयितार ऋत्विजः । वचनव्यत्ययः । द्युम्नानि द्योतमानानि हवींषि रारन् । ददति । रा दाने । लेटि छांदसः शपः श्लुः । छंदस्युभयथेत्यार्धधातुकत्वादातो लोप इटि चेत्याकारलोपः । अत एवाभ्यस्तानामादिरित्याद्युदात्तत्वाभावश्च ॥

॥ त्रयोदशीमृचमाह ॥

मंदा॑महे॒ दश॑तयस्य धा॒सेर्द्वि॒र्यत्पंच॒ बिभ्र॑तो॒ यंत्यन्ना॑ ।
किमि॒ष्टाश्व॑ इ॒ष्टर॑श्मिरे॒त ई॑शा॒नास॒स्तरु॑ष ऋंजते॒ नॄन् ॥ १३ ॥
मंदा॑महे । दश॑ऽतयस्य । धा॒सेः । द्विः । यत् । पंच॑ । बिभ्र॑तः । यंति॑ । अन्ना॑ ।
किं । इ॒ष्टऽअ॑श्वः । इ॒ष्टऽर॑श्मिः । ए॒ते । ई॒शा॒नास॑ः । तरु॑षः । ऋं॒ज॒ते॒ । नॄन् ॥ १३ ॥

मंदामहे । स्तुमो वयं देवान् । मदि स्तुतौ । इदित्त्वान्नुम् । किमर्थं । दशतयस्य धासेर्दशेंद्रियतृप्तिसाधनत्वेन दशावयवस्यान्नस्य यद्यस्मात् द्विः पंच दशविधान्यन्नानि । दशचमसगृहीतत्वादन्नस्य दशविधत्वं । एवंविधमन्नं धारयंतो दश चमसाध्वर्यवो यंति । होमाय गच्छंत्याहवनीयं प्रति । यद्वाश्वमेधिकानि दशान्नानि जुहोतीत्याम्नातान्याज्यमध्वादीनि दशविधान्यन्नानि विश्वेभ्यो देवेभ्यो होतुं धारयंतो यंति यदा तदा मंदामह इति । न चेष्टाश्वप्रभृतीन्यष्टॄन्विहाय कस्मादस्मान्प्र-

त्यागमिष्यंतीति वाच्यं । तरुषः शत्रूणां तारकान् । तरतेरौणादिक उसिः । नॄन् नेतॄन्कर्मणां । एवं महानुभावान्वरुणादीनिष्टांश्च एतन्नामको राजा किमृंजते । किं प्रसाधयति । तथेष्टरश्मिश्च किमृंजते । एत इदानीं वर्तमाना ईशानासः पृथिव्या ईश्वरा राजानश्च न प्रसाधयंति । यद्वा येषां स्तोतॄणामस्माकमेते स्तुता देवा ईशानासः स्वामिनः किल तादृशान्तरुषः शत्रूणां तारकान् नॄन् कर्मनिर्वाहकानस्मानिष्टांश्चादयः किं साधयंति किमुपद्रवंति । न प्रभवंतीत्यर्थः ॥

॥ अथ चतुर्दशी ॥

हिर॑ण्यकर्णं मणिग्रीवमर्ण॒स्तन्नो॒ विश्वे॑ वरिवस्यंतु दे॒वाः ।
अ॒र्यो गिरः॑ स॒द्य आ ज॒ग्मुषी॒रोस्राश्चा॑कंतूभये॒ष्वस्मे ॥ १४ ॥
हिर॑ण्यऽकर्णं । म॒णि॒ऽग्री॒वं । अर्णः॑ । तत् । नः॒ । विश्वे॑ । व॒रि॒व॒स्यं॒तु । दे॒वाः ।
अ॒र्यः॑ । गिरः॑ । स॒द्यः । आ । ज॒ग्मुषीः॑ । आ । उ॒स्राः । चा॒कं॒तु । उ॒भये॑षु । अ॒स्मे इति॑ ॥ १४ ॥

हिरण्यकर्णं हिरण्यविकारकुंडलाद्युपेतकर्णं मणिग्रीवं रत्नाद्युपेतकंठं । एतद्द्वयं सर्वावयवस्याप्युपलक्षणं । एवं सर्वांगाभरणयुक्तमर्णं अरणीयं रूपं तद्वंतं पुत्रादिकमित्यर्थः । उक्तलक्षणमस्मदीयं रूपं वा नोऽस्माकं विश्वे सर्वे देवा वरिवस्यंतु । परिचरंतु । प्रयच्छंत्वित्यर्थः । अर्योऽरणीयो विश्वेषां देवानां संघो जग्मुषीः स्तोतुर्मुखान्निर्गच्छंतीर्गिरः स्तुतीरुस्राः । विकारे प्रकृतिशब्दः । क्षीराज्यादीनि हवींषि च सद्योऽस्मदागमनानंतरमेव चाकंतु । कामयंतां । छांदसः शपः श्लुः परस्मैपदं च । यद्वा यङ्लुकि नुगभावः । आचकंत्विति वा योज्यं । पर्याप्तं कामयंतामित्यर्थः । केष्विति तदुच्यते । अस्मे अस्माकं संबंधिषूभयेषु स्तोतृषु यष्टृषु च । यद्वास्माकमुभयेष्वैहिकामुष्मिकविषयेषूभयविधेषु फलेषु ॥

॥ पंचदशीमृचमाह ॥

च॒त्वारो॑ मा मश॒र्शार॑स्य॒ शिश्व॑स्त्रयो॒ राज्ञ॒ आय॑वसस्य जि॒ष्णोः ।
रथो॑ वां मित्रावरुणा दी॒र्घाप्साः॒ स्यूम॑गभस्तिः॒ सूरो॒ नाद्यौ॑त् ॥ १५ ॥
च॒त्वारः॑ । मा॒ । म॒श॒र्शार॑स्य । शिश्वः॑ । त्रयः॑ । राज्ञः॑ । आय॑वसस्य । जि॒ष्णोः ।
रथः॑ । वा॒म् । मि॒त्रा॒व॒रु॒णा॒ । दी॒र्घऽअ॑प्साः । स्यूम॑ऽगभस्तिः । सूरः॑ । न । अ॒द्यौ॒त् ॥ १५ ॥

मा मां कक्षीवंतं मशर्शारस्य । मशकीकृत्य भृशं शृणोति शारयति वामि-

वानिति मशर्शारः। एतन्नामकस्य राज्ञः शिम्वः शिशवः शिशुवदप्रबुद्धाश्चत्वारः पुत्रा बाधंत इति शेषः। शिशुशब्दस्य जसादिषु छंदसि वावचनमिति गुणाभावः। तथायवसस्य सर्वतः प्राप्तान्नस्यैतन्नाम्नो राज्ञो जिष्णोर्जयशीलस्य पुत्रास्त्रयस्तेऽपि बाधंत इति शेषः। हे मित्रावरुणा। एतन्नामानौ देवौ वां युवयोः संबंधी रथो दीर्घाप्साः। अप्स इति रूपनाम। अतिविस्तृतरूपः। स्यूमगभस्तिः। स्यूममिति सुखनाम। सुखकरदीप्तिः सन् सूरो न सूर्य इवाद्यौत्। द्योततां। उक्तानामस्मद्विरोधिनां पुरतः स्फुरन् भयजनको भवत्वित्यर्थः। द्युतेश्छंदसि लुङ्लङ्लिट इति लुङ्। द्युद्भ्यो लुङि। पा॰ १. ३. ९१.। इति परस्मैपदं। सिचि वृद्धिः परस्मैपदेष्विति वृद्धिः। बहुलं छंदसीतीडभावे हल्ङ्यादिसंयोगांतलोपौ। यद्वा द्यु अभिगमने। आदादिकः। छांदसे लङ्युतो वृद्धिर्लुकि हलीति वृद्धिः॥

॥ इति द्वितीयस्य प्रथमे तृतीयो वर्गः॥

कदित्थेत्यस्मिन्नष्टादशेऽनुवाके षट् सूक्तानि। तत्र पृथू रथ इति तृतीयं सूक्तं त्रयोदशर्चं। अत्रानुक्रमणिका। पृथुः सप्तोनोषस्यं त्विति। दीर्घतमसः पुत्रः कक्षीवानृषिर्ऋषिश्चान्यस्मादृषेरिति परिभाषितत्वात्। अनादेशपरिभाषया त्रिष्टुप् छंदः। तुशब्दप्रयोगादिदमादिके सूक्ते उषादेवताके॥ प्रातरनुवाक उषस्ये क्रतावस्य चोत्तरस्य च विनियोगः। अथोषस्य इति खंडे सूत्रितं। पृथू रथ इति सूक्ते प्रत्यर्चिरित्यष्टौ। आ॰ ४. १४.। इति। तथाश्विनशास्त्र इदमादिसूक्तद्वयस्य विनियोगः। प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात्॥

॥ तत्र प्रथमा॥

पृथू रथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः।
कृष्णादुदस्थादर्या३ विहायाश्चिकित्संती मानुषाय क्षयाय॥१॥
पृथुः। रथः। दक्षिणायाः। अयोजि। आ। एनं। देवासः। अमृतासः। अस्थुः।
कृष्णात्। उत्। अस्थात्। अर्या। विऽहायाः। चिकित्संती। मानुषाय। क्षयाय॥१॥

दक्षिणायाः प्रवृद्धायाः स्वव्यापारकुशलाया उषोदेवतायाः पृथुर्विस्तीर्णो रथोऽयोजि। अश्वैर्युक्तः संनद्धोऽभूत्। अत्र यद्यपि देवताविशेषो न श्रुतस्तथाप्युषस्यत्वादुषस इति गम्यते। एनं संनद्धं रथममृतासोऽमरणधर्माणो देवासो

देवनशीला हविर्भाजो देवा आस्थुः। आस्थितवंतः। देवयजनं गंतुमारूढा इत्यर्थः। अनंतरं सोषाः कृष्णान्निकृष्टवर्णान्नैशात्तमसः सकाशादुदस्थात्। उत्थिताभूत्। कृष्णं कृष्यतेर्निकृष्टो वर्णः। नि॰ २. २०.। इति यास्कः। कीदृशी सा। अर्या। अरणीया पूजनीया। विहायाः। विविधगमनयुक्ता महती वा। विहाया इति महन्नाम विहाया यह्व इति तन्नामसु पाठात्। मानुषाय क्षयाय मनुष्याणां निवासाय चिकित्संती। अंधकारनिवारणरूपां चिकित्सां कुर्वती। तमो निवारयंतीत्यर्थः॥

॥ अथ द्वितीया ॥

पूर्वा॒ विश्व॑स्मा॒द्भुव॑नादबोधि॒ जयं॑ती॒ वाजं॑ बृह॒ती सनु॑त्री।
उ॒च्चा व्य॑ख्यद्युव॒तिः पु॑न॒र्भूरोषा अ॑गन्प्रथ॒मा पू॒र्वहू॑तौ॥ २॥

पूर्वा॑। विश्व॑स्मात्। भुव॑नात्। अ॒बो॒धि॒। जयं॑ती। वाजं॑। बृ॒ह॒ती। सनु॑त्री।
उ॒च्चा। वि। अ॒ख्य॒त्। यु॒व॒तिः। पु॒नः॒ऽभूः। आ। उ॒षाः। अ॒ग॒न्। प्र॒थ॒मा। पू॒र्वऽहू॑तौ॥ २॥

विश्वस्माद्भुवनात्सर्वस्मात्सुप्ताद्भूतजातात्पूर्वा प्रथमा सतीयमुषा अबोधि। बुद्धाभूत्। उषःकालमवगत्य हि पश्चात्सर्वे प्राणिनः प्रतिबुध्यंते। कीदृशी सा। वाजं गमनशीलं प्रकाशं निर्वर्त्यांधकारं जयंती पराभवं कुर्वती। यद्वा। वाजशब्दोऽन्ननामसु पठितत्वादन्ननाम। अन्नं वै वाज इति श्रुतेश्च। यजमानार्थमन्नं संपादयंती। बृहती महती सनुत्री सर्वं जगत्संभजंती दात्री वा प्रकाशस्य। किंच सोषा उच्चोच्चैरुन्नता सती व्यख्यत्। विचष्टे। सर्वं जगत्पश्यतीत्यर्थः। कीदृशी सा। युवतिः। मिश्रणशीला नित्ययौवना वा। पुनर्भूः। पुनः पुनर्भवनशीला प्रतिदिनं वर्तमानत्वात्। सोषाः पूर्वहूतौ सत्यां प्रथमा मुख्या प्रकृष्टा सत्यागन्। देवयजनदेशं प्रत्यागच्छति। प्रथम इति मुख्यनाम प्रतमो भवतीति यास्कः। नि॰ २. २२.। इतरदेवेभ्यः पूर्वमाहूता सती शीघ्रमेवागच्छतीत्यर्थः॥

॥ अथ तृतीया ॥

यद॒द्य भा॒गं वि॒भजा॑सि॒ नृभ्य॒ उषो॑ देवि मर्त्य॒त्रा सु॑जाते।
दे॒वो नो॒ अत्र॑ सवि॒ता दमू॑ना॒ अना॑गसो वोचति॒ सूर्या॑य॥ ३॥

यत्। अ॒द्य। भा॒गं। वि॒ऽभजा॑सि। नृ॒ऽभ्यः॑। उषः॑। दे॒वि॒। म॒र्त्य॒ऽत्रा। सु॒ऽजा॒ते॒।
दे॒वः। नः॒। अत्र॑। स॒वि॒ता। दमू॑नाः। अना॑गसः। वो॒च॒ति॒। सूर्या॑य॥ ३॥

सुजाते शोभनजनने देवि देवनशीले हे उषः। उषःकालाभिमानिदेवते। मर्त्यत्रा मनुष्याणां पालयित्री त्वमद्यास्मिन्काले नृभ्यो मनुष्येभ्यो यत् यं भागं भजनीयं स्वकीयप्रकाशस्यांशं विभजासि। विभज्य ददासि। यद्वा मर्त्यत्रा मर्त्येषु मध्ये नृभ्यो यजमानेभ्यो देवानां भागं विभज्य ददासि। उषसि प्रवृत्तायां हविषो दीयमानत्वादुषसो दातृत्वमुपचर्यते। अत्रास्मिन्भागविषये दमूना यजमानेभ्योऽभिमतफलदानमनाः। दमूना दममना वा दानमना वा दांतमना वेति निरुक्तवचनं। नि० ४. ४.। तादृशः सविता प्रेरको देवो नोऽस्माननागसो वोचति। अपापान् यागयोग्यान्ब्रवीतु। अनुगृह्णात्वित्यर्थः। किमर्थं। सूर्याय। अस्मद्यागदेशं प्रति सूर्यस्यागमनार्थं ॥

॥ अथ चतुर्थी ॥

गृहंगृहमहना यात्यच्छा दिवेदिवे अधि नामा दधाना।
सिषासंती द्योतना शश्वदागादग्रमग्रमिद्भजते वसूनां ॥ ४ ॥

गृहंऽगृहं। अहना। याति। अच्छ। दिवेऽदिवे। अधि। नाम। दधाना।
सिसासंती। द्योतना। शश्वत्। आ। अगात्। अग्रंऽअग्रं। इत्। भजते। वसूनां ॥ ४ ॥

अहना। उषोनामैतत्। अहना द्योतनेति तन्नामसु पाठात्। सा देवी दिवे दिवे प्रत्यहं। दिवे दिवे द्यवि द्यवीत्यहर्नामसु पाठात्। गृहं गृहं तत्तद्यज्ञगृहमच्छाभिमुख्येन याति। गच्छति। कीदृशी। अध्यधिकं नाम नमनं प्रह्वत्वं प्रतिहतमुद्योगं प्रकाशनरूपं दधाना धारयंती। यद्वा। अधि दधानाधिकं धारयंती। किंच। सिषासंती। संभक्तुमिच्छंती द्योतना कृत्स्नं जगत् द्योतनशीला शश्वत् प्रतिदिनमागात्। आगच्छति। पूर्वं यातीत्युक्तत्वात्पुनरागादिति वचनमावश्यकत्वद्योतनार्थं। आगत्य च वसूनां धनानां हविर्लक्षणानामग्रमग्रमित् तत्तच्छ्रेष्ठभागं भजते। सेवते। स्वीकरोतीत्यर्थः ॥

॥ अथ पंचमीमृचमाह ॥

भगस्य स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व।
पश्चा स दघ्या यो अघस्य धाता जयेम तं दक्षिणया रथेन ॥ ५ ॥

भगस्य। स्वसा। वरुणस्य। जामिः। उषः। सूनृते। प्रथमा। जरस्व।
पश्चा। सः। दघ्याः। यः। अघस्य। धाता। जयेम। तं। दक्षिणया। रथेन ॥ ५ ॥

सूनृते सुष्ठु मनुष्याणां नेत्रुषो हे उषो देवते भगस्य सर्वैर्भजनीयस्यादित्यस्य स्वसासि। स्वसृस्थानीयासि। तेन सहोत्पद्यमानत्वात्तद्वत्पूज्येत्यर्थः। तथा वरुणस्य तमोवारकस्य सवितुर्देवस्य जामिरसि। भगिनीस्थानीयासि। एकस्मिन्नेव स्थान उत्पद्यमानत्वात्। जनयंत्युत्पादयंत्यस्यामपत्यमन्य इति जामिः। यद्वा जमति गच्छति स्वोत्पत्तिस्थानादन्यत्रेति। उक्तनिर्वचनद्वयमभिप्रेत्य यास्क आह। न जामये भागिन्यै। जामिरन्येऽस्यां जनयंति जामपत्यं जमतेर्वा स्याद्गतिकर्मणो निर्गमनप्राया भवति। नि॰ ३. ६.। इति। तादृशी त्वं प्रथमेतरदेवेभ्यः पूर्वोत्कृष्टा वा सती जरस्व। स्तुता भव। जरति स्तुत्यर्थः। जरा स्तुतिर्जरतेः स्तुतिकर्मणः। नि॰ १०.८.। इति यास्कः। पश्चा पश्चात्त्वत्प्रीत्यनंतरं योऽघस्य धाता यः कश्चिद्दुःखस्य तदुत्पादकपापस्य वा धारयितास्ति स दध्याः। गच्छतु। वचनव्यत्ययः। दध्यतिर्गत्यर्थः। दध्यति दभ्नोतीति गत्यर्थेषु पाठात्। यदि स पापी बलीयान् तं दक्षिणया प्रवृद्धया सहायभूतया त्वया रथेनास्मदीयरथादिसाधनेन च जयेम॥

॥ इति द्वितीयस्य प्रथमे चतुर्थो वर्गः ॥

॥ अथ षष्ठी ॥

उदी॑रतां सू॒नृता॒ उत्पुरं॑धी॒रुद॒ग्नयः॑ शुशुचा॒नासो॑ अस्थुः।
स्पा॒र्हा वसू॑नि॒ तम॒सापगूळ्हा॒विष्कृ॑ण्वंत्यु॒षसो॑ विभा॒तीः॥ ६॥

उत्। ई॒र॒तां॒। सू॒नृताः॑। उत्। पुरं॑ऽधीः। उत्। अ॒ग्नयः॑। शु॒शु॒चा॒नासः॑। अ॒स्थुः॒।
स्पा॒र्हा। वसू॑नि। तम॑सा। अप॑ऽगूळ्हा। आ॒विः। कृ॒ण्वं॒ति॒। उ॒षसः॑। वि॒ऽभा॒तीः॥६॥

सूनृताः प्रियसत्यात्मिका वाच उदीरतां। उद्गच्छंतु। हे ऋत्विज उत्कृष्टं यथा भवति तथा स्तोत्रं प्रवर्तयध्वं। तथा पुरंधीः पुरंधयः। पुरं शरीरं यासु धीयते याभिर्वा ता पुरंधयः प्रज्ञाः प्रयोगविषयाः। ता अप्युन्मिषंतु। प्रज्ञोपलक्षितानि कर्माणि प्रवर्ततामित्यर्थः। यद्यपि प्राणवायुना शरीरं धार्यते तथापि यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राण इति श्रुतेः प्राणप्रज्ञयोरेकत्वात्प्रज्ञायाः शरीरधारणमविरुद्धं। तथाग्नय आहवनीयाद्याः शुशुचानासोऽत्यंतं दीप्यमाना उदस्थुः। उत्तिष्ठंतु। प्रज्वलयंत्वित्यर्थः। किमर्थमेवमिति तदुच्यते। यतो विभातीर्विविधं भासमाना उषस उषोदेवतास्तमसापगूळ्हान्यंधकारेणात्यंतं गोपितानि स्पार्हा स्पृहणीयानि वसूनि वासयोग्यानि यज्ञ-

साधनभूतहविरादीन्याविष्कृण्वंति । यथावस्तु प्रकटीकुर्वंति । तस्मात्स्तोत्रादिकं कुर्वंत्वित्यर्थः ॥

॥ सप्तमीमृचमाह ॥

अपान्यदेत्यभ्य१न्यदेति विषुरूपे अहनी सं चरेते ।
परिक्षितोस्तमो अन्या गुहाकरद्यौदुषाः शोशुचता रथेन ॥ ७ ॥

अप । अन्यत् । एति । अभि । अन्यत् । एति । विषुरूपे इति विषुऽरूपे । अहनी इति । सं । चरेते इति ।
परिऽक्षितोः । तमः । अन्या । गुहा । अकः । अद्यौत् । उषाः । शोशुचता । रथेन ॥ ७ ॥

इदानीमहोरात्रस्तुतिद्वारोषाः स्तूयते । विषुरूपे वक्ष्यमाणप्रकारेण नानारूपे अहनी अहश्च रात्रिश्चोभे संचरेते । समित्येकीभावे । सहैवाव्यवधानेन चरतः । अत्राह्नः साहचर्यात्तत्प्रतियोगित्वाच्च रात्रिरप्यहरित्युच्यते । उत्तरत्र मंत्रांतरेऽयमेवार्थः स्पष्ट आम्नातः । अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः । ऋ० ५.१.९. । इति । तयोर्मध्येऽन्यद्रात्रिरूपमहरपैति । अपगच्छति । प्रतिलोमं गच्छति वा । अपेत्येतस्य प्रातिलोम्यं । नि० १. ३. । इति यास्कः । अन्यच्च दिवसाख्यमहरभ्येति । आभिमुख्येन गच्छति । अभीत्याभिमुख्यं । नि० १. ३. । इति यास्कः । रात्र्यां प्रतिनिवृत्तायामहरभिमुखमागच्छतीत्यर्थः । विषुरूपे संचरेते इति यदुक्तं तदेव स्पष्टीक्रियते । परिक्षितोः पर्यायेण निवसतोः परिक्षपयतोर्वा । प्राणिनामहःस्वतीतेष्वायुषः क्षयात्परिक्षपणं प्रसिद्धं । तयोर्मध्येऽन्या रात्रिस्तमस्तमोरूपा गुहा पदार्थानां गूहनमकः । करोति । अन्याहरेकदेशभूता वोषाः शोशुचता भृशं दीप्तेन रथेनाद्यौत् । द्योतते प्रकाशते प्रकाशयति वा सर्वं । रात्रिस्तमोरूपत्वात्सर्वं जगदावृणोति । उषास्तु सर्वान्भावान्प्रकाशयतीत्युषसः स्तुतिः ॥

॥ अष्टमीमृचमाह ॥

सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचंते वरुणस्य धाम ।
अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परि यंति सद्यः ॥ ८ ॥

सऽदृशीः । अद्य । सऽदृशीः । इत् । ऊं इति । श्वः । दीर्घं । सचंते । वरुणस्य । धाम ।
अनवद्याः । त्रिंशतं । योजनानि । एकाऽएका । क्रतुं । परि । यंति । सद्यः ॥ ८ ॥

अद्यास्मिन्नहनि सदृशीरित् परस्परं सदृश्य एव। तथा श्व इत् परस्मिन्नप्यहनि सदृशीः परस्परं सदृश्य एव। उशब्दोऽपिशब्दार्थः। इच्छब्द एवार्थः। अद्यतन्योऽपि श्वस्तनीभिः सदृश्यः श्वस्तन्यश्चाद्यतनीभिः। एवमहरंतरेण सादृश्यं। कथं सादृश्यमिति तदुपपाद्यते। यदा नक्षत्राणि न दृश्यंते सूर्यश्च नोदेति उषसः स कालः। स चैकविंशतिघटिकाभिः षड्विंशतिपराभिश्च संमितः। सूर्यो हि प्रतिदिनमेकोनषष्ट्यधिकपंचसहस्रयोजनानि मेरुप्रादक्षिण्येन परिभ्रमति। तथा सति यत्र यत्र लंकादिभूप्रदेशे सूर्यो गच्छति। तस्य तस्य पुरस्तात्त्रिंशद्योजनमुषा अपि गच्छति। सूर्यो यस्मिन्देशे गच्छति तत्र त्रिंशद्योजनं पुरस्ताद्देशस्थितानामुदितो दृश्यते। एवं सर्वप्रदेशेष्वपि। तथोषा अपि यत्र गच्छति ततः पुरस्तात्त्रिंशद्योजनभूभागवर्तिनामुदिता दृश्यते। एवं लंकादिसर्वप्रदेशस्थितानामप्युषस उदयोऽवगंतव्यः। एवं च सत्येकस्मिन्भूभागे यावत्कालं यथोषाः प्रकाशयति तथा भूभागांतरेऽपि तावंतं कालं प्रकाशयति। एवमुक्तरीत्यैकस्मिन्नेवाहनि सर्वप्रदेशवर्तिनामप्युषसः सदृश्यः। प्रदेशबाहुल्यमपेक्ष्योषसां बहुत्वाद्बहुवचनं। एवमेकरूपा उषसोऽनवद्याः शुद्धाः। तासामुदयात्सर्वे भावा अनवद्या भविष्यंति किमु वक्तव्यं तासामनवद्यत्वे। दीर्घमुक्तरीत्यात्यंतमायतं वरुणस्य तमोनिवारकस्य सूर्यस्य धाम स्थानं मेरुवलयं सचंते। प्रतिदिनं सेवंते। कियद्दूरमिति तदुच्यते। त्रिंशतं योजनानि। त्रिंशद्योजनानि पुरतः। सूर्यो यत्र यत्रोदेति ततस्ततस्त्रिंशद्योजनं पुरस्तादुद्यंतीत्यर्थः। किंच। आसां मध्य एकैकोषा लंकाद्येकैकभूभागवर्तिनां क्रतुं गमनागमनादिरूपं कर्म तद्विषयां प्रज्ञां वा। तथा च निरुक्तं। क्रतुं दधिक्राः कर्म वा प्रज्ञां वा। नि॰ २.२८.। इति। सद्यस्तदानीमेव स्वोदयकाल एव परियंति। परितो गच्छंति। निर्वहंतीत्यर्थः। तत्तद्भूभागविशेषेण सूर्यस्योदयो ज्योतिःशास्त्रे प्रदर्शितः। उदयो यो लंकायां सोऽस्तमयः सवितुरेव सिद्धपुरे। मध्याह्नो यमकोट्यां रोमकविषयेऽर्द्धरात्रः स्यादिति॥

॥ अथ नवमी ॥

जा॒न॒त्यह्नः॑ प्रथ॒मस्य॒ नाम॑ शु॒क्रा कृ॒ष्णाद॑जनिष्ट श्वि॒ती॒ची।

ऋ॒तस्य॒ योषा॒ न मि॑नाति॒ धामाह॑रहर्निष्कृ॒तमा॒ चर॑न्ती॥९॥

जा॒न॒ती। अह्नः॑। प्र॒थ॒मस्य॑। नाम॑। शु॒क्रा। कृ॒ष्णात्। अ॒ज॒नि॒ष्ट॒। श्वि॒ती॒ची।

ऋ॒तस्य॑। योषा॑। न। मि॒ना॒ति॒। धाम॑। अहः॑ऽअहः। निः॒ऽकृ॒तं। आ॒ऽचर॑न्ती॥९॥

उषाः प्रथमस्य मुख्यस्य प्रथमानस्य वाह्नो दिवसस्य नाम नमनमागमनं जानत्यवगच्छंती । प्राणिनां प्रज्ञापयंतीत्यर्थः । सोषाः शुक्रा स्वतो दीप्ता । अत एव श्वितीची श्वैत्यं गच्छंती प्रकाशं प्राप्नुवती कृष्णान्निकृष्टात्तमसः सकाशादजनिष्ट । प्रादुर्भवति । यद्यपि तमसः सकाशान्नोत्पद्यते तथापि तदनंतरभावित्वात्तत उत्पद्यत इत्युपचर्यते । उत्पन्ना सा ऋतस्य सत्यभूतस्यादित्यस्य धाम तेजोयुक्तं स्थानं योषा मिश्रयंती न मिनाति । न हिनस्ति । तदीयं तेजो न पराभवति । अपि त्वहरहः सर्वेष्वहःसु निष्कृतमाचरंती । अलंकारशोभं कुर्वती । यद्वा ऋतस्य सत्यभूतस्य यज्ञस्य धाम देवयजनाख्यं स्थानं योषा मिश्रणशीला सती न मिनाति । न हिनस्ति । किंत्वहरहः सर्वेषु यागदिवसेषु निष्कृतं हविरादीनां प्रकाशनरूपमलंकारमाचरंती कुर्वती । तादृश्युषा अजनिष्टेति पूर्वत्रान्वयः ॥

॥ अथ दशमी ॥

कन्येव तन्वा३ शाशदानाँ एषि देवि देवमियक्षमाणं ।
संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ॥ १० ॥
कन्याऽइव । तन्वा । शाशदाना । एषि । देवि । देवं । इयक्षमाणं ।
संऽस्मयमाना । युवतिः । पुरस्तात् । आविः । वक्षांसि । कृणुषे । विऽभाती ॥ १० ॥

तन्वा शरीरेण शाशदाना शाशद्यमाना स्पष्टतां प्राप्नुवती । शाशदानः शाशद्यमानः । नि॰ ६. १६. । इति यास्कः । कन्येव कमनीया कन्यकेव । कन्या कमनीया भवति क्वेयं नेतव्येति वा । नि॰ ४. १५. । इति यास्कः । सा यथा जनांतिके विवसना संचरति तथा हे उषस्त्वं कन्या कमनीयाप्रगल्भा सती तन्वा शरीरेण शाशदाना स्पष्टतां गच्छंती दृश्यसे । पश्चात्प्रगल्भा सती हे देवि देवनशील इयक्षमाणं यष्टुमिच्छंतमभिमतं दातुमिच्छंतं वा देवं द्योतनस्वभावं सूर्यरूपं प्रियमेषि । गच्छसि । ततः पश्चात् युवतिर्यौवनोपेता सती पुरस्तात्पत्युः सूर्यस्य पुरतः संस्मयमाना समीषद्धसंती हास्यं कुर्वती विभात्यत्यंतं भासमाना वक्षांसि वक्षसोपलक्षितानवयवानाविष्कृणुषे । प्रकटीकरोषि । यद्वा । युवतिरिति लुप्तोपमा । यथा लोके प्रगल्भा योषित् पुरस्तात्प्रियतमस्य पुरतः संस्मयमाना दंतप्रदर्शनायेषद्धसनं कुर्वती वक्षांसि वक्षसोपलक्षितानि गोप्यानि बाहूमूलस्तनादीन्याविष्करोति तथा त्वमपीत्यर्थः । यद्वा । पुरस्तात्पूर्वस्यां दिशि संस्मय-

माना स्मितोपमप्रकाशं कुर्वती युवतिः सर्वेषु भावेषु मिश्रणशीला वक्षांसि। वक्ष इति रूपनाम। दंतस्थानीयानि नीलपीतादीनि रूपाण्याविष्करोषि॥

॥ इति द्वितीयस्य प्रथमे पंचमो वर्गः॥

॥ अथैकादशी॥

सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कं।
भद्रा त्वमुषो वितरं व्युच्छ न तत्ते अन्या उषसो नशंत॥ ११॥
सुऽसंकाशा। मातृमृष्टाऽइव। योषा। आविः। तन्वं। कृणुषे। दृशे। कं।
भद्रा। त्वं। उषः। विऽतरं। वि। उच्छ। न। तत्। ते। अन्याः। उषसः। नशंत॥ ११॥

हे उषो देवि मातृमृष्टा मातृभिर्जननीभिः शुद्धीकृता योषेव सुसंकाशात्यर्थं प्रकाशमाना त्वं तन्वं स्वकीयां तनुं दृशे सर्वेषां दर्शनायाविः कृणुषे। प्रकटयसि। यथा लोके माचादिना स्वलंकृतात्यंतं शोभना सती स्वकीयं लावण्योपेतं सर्वशरीरं दर्शनायाविष्करोति तद्वत्त्वमपीत्यर्थः। अत्र कमिति पादपूरणोऽत्र विशेषस्याभावात् शिशिरं जीवनाय कमितिवत्। तथा च यास्काचार्यः। मिताक्षरेष्वनर्थकाः कमीमिद्विति। नि॰ १. ९.। इति। यद्वा कमिति सुखवचनः। सुखं यथा भवति तथाविष्कृणुष इत्यर्थः। हे उषः। यत एवं करोष्यतो भद्रा कल्याणशीला स्तुत्या वितरं व्युच्छ। आवरकमंधकारं विप्रकृष्टं यथा भवति तथा विवासय। अत्र यद्यपि विशेषो न श्रुतस्तथापि प्रकाशनिवर्त्यत्वात्परिहरणीयत्वाच्च व्युदसनीयं तम एवेति गम्यते। किंच ते तव तद्व्युदसनमन्या उषसोऽतीता आगामिन्यश्च न नशंत। न व्याप्नुवंति। तथा व्युच्छेति भावः॥ नशिर्व्याप्तिकर्मा। इन्वति नक्षेति व्याप्तिकर्मसु पाठात्॥

॥ द्वादशीमृचमाह॥

अश्वावतीर्गोमतीर्विश्ववारा यतमाना रश्मिभिः सूर्यस्य।
परा च यंति पुनरा च यंति भद्रा नाम वहमाना उषासः॥ १२॥
अश्वऽवतीः। गोऽमतीः। विश्वऽवाराः। यतमानाः। रश्मिऽभिः। सूर्यस्य।
परा। च। यंति। पुनः। आ। च। यंति। भद्रा। नाम। वहमानाः। उषसः॥ १२॥

अश्वावतीरश्ववत्यो बहुभिरश्वैस्तद्वत्यः । तथा गोमतीर्बहुभिर्गोभिस्तद्वत्यः । विश्ववारा विश्वे वारा वरणीयाः काला यासां तास्तथोक्ताः । सार्वकालीना इत्यर्थः । यद्वा विश्वैर्वरणीया इत्यर्थः । सूर्यस्य रश्मिभिर्यतमानाः सूर्यरश्मिभिः साकं तमोनिवारणाय प्रयत्नं कुर्वाणाः । यद्यपि सूर्यरश्मय एव जगत्प्रकाशनाय प्रभवंति तथापि सूर्योदयात्पूर्वं तमोनिवारणस्यापेक्षितत्वात्तासामपि प्रयत्नमविरुद्धं । रश्मिदेवता अपि प्रकाशिका इत्यर्थः । किंच भद्रा भद्रं कल्याणं स्तुत्यं वा नाम नमनं सर्वजनानुकूल्यं वहमाना धारयमाणा उषास उषोदेवताः परा च यंति । परायंति च । तथा पुनरा च यंति । पुनरायंति च । परस्परापेक्षयोभयत्र चशब्दः । या एवातीतेषु दिनेषु गतास्ता एव पुनःपुनर्दिनांतरेष्वप्यायंति । जगन्निर्वाहाय प्रतिदिनं गतागतं कुर्वंतीत्यर्थः ॥

॥ त्रयोदशीमृचमाह ॥

ऋतस्य॑ र॒श्मिम॑नु॒यच्छ॑माना भ॒द्रंभ॑द्रं॒ क्रतु॑म॒स्मासु॑ धेहि ।
उषो॑ नो अ॒द्य सु॒हवा॒ व्यु॑च्छा॒स्मासु॒ रायो॑ म॒घव॑त्सु च स्युः ॥ १३ ॥

ऋत॒स्य॑ । र॒श्मिं । अ॒नु॒ऽयच्छ॑माना । भ॒द्रंऽभ॑द्रं । क्रतु॑ं । अ॒स्मासु॑ । धे॒हि॒ ।
उष॑ः । नः॒ । अ॒द्य । सु॒ऽहवा॑ । वि । उ॒च्छ॒ । अ॒स्मासु॑ । राय॑ः । म॒घव॑त्ऽसु । च॒ ।
स्युरिति॑ स्युः ॥ १३ ॥

हे उषः । ऋतस्य सत्यभूतस्यादित्यस्य रश्मिं रश्मीननुयच्छमानानुकूल्येन प्रवर्तमाना त्वं भद्रं भद्रं क्रतुं तत्तत्कल्याणं स्तुत्यं वा लौकिकं वैदिकं कर्म तद्विषयां प्रज्ञां वा धेहि । स्थापय । हे उषः । नोऽस्मदर्थं सुहवा सुष्ठाहूता सती व्युच्छ । तमो विवासय । प्रकाशं कुर्वित्यर्थः । किमर्थमिति तदुच्यते । मघवत्सु । मघमिति धननाम । हविर्लक्षणधनयुक्तेष्वस्मासु यजमानेषु रायश्च स्युः । बहुविधानि धनानि संभवंत्विति पूर्वोक्तेन क्रतुना सह समुच्चयार्थश्चशब्दः ॥

॥ इति द्वितीयस्य प्रथमे षष्ठो वर्गः ॥

उषा उच्छंतीति त्रयोदशर्चं चतुर्थं सूक्तं दैर्घतमसः कक्षीवत आर्षं त्रैष्टुभमुषस्यं । उषा उच्छंतीत्यनुक्रांतं । विनियोगस्तु पूर्वसूक्त एवोक्तः ॥

॥ तत्र प्रथमा ॥

उषा उच्छंती समिधाने अग्ना उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत्।
देवो नो अत्र सविता न्वर्थं प्रासावीद्द्विपत्प्र चतुष्पदित्यै ॥ १॥
उषाः। उच्छंती। संऽइधाने। अग्नौ। उत्ऽयन्। सूर्यः। उर्विया। ज्योतिः। अश्रेत्।
देवः। नः। अत्र। सविता। नु। अर्थं। प्र। असावीत्। द्विऽपत्। प्र। चतुःऽपत्। इत्यै ॥१॥

एषोषाः समिधानेऽग्नौ। अग्नित्वसामान्येनैकवचनं। अग्निषु समिध्यमानेषु सत्सु। कर्मार्थे कर्तृप्रयोगः। उषःकाले ह्याहवनीयादयः प्रज्वाल्यंते। उच्छंती तमो विवासयंत्युर्वियोरु बहुलं ज्योतिः प्रकाशमश्रेत्। सेवते। प्रकाशते प्रकाशयति वा सर्वं। किमिव। उद्यन् सूर्यः। उपमाप्रधाननिर्देशः। उदितः सूर्य इव। सूर्यो यथा प्रकाशयति तथेत्यर्थः। अत्र त्वदुदयानंतरमस्मिन्कर्मणि वा सविता देवः सर्वस्य प्रेरकः सूर्यो नोऽस्मदर्थं नु क्षिप्रमर्थं। अर्थशब्दोऽत्र विशेषणवाची नपुंसकलिंगः। अयन्नर्थानि कृणवन्नपांसीत्यादौ। ऋ॰ ७. ४. ८. तथादृष्टत्वात्। अरणीयं द्विपत् पादद्वयोपेतं मनुष्यादिरूपं धनं प्रासावीत्। अनुजानातु। ददात्वित्यर्थः। तथा चतुष्पत् पादचतुष्टयोपेतं गवादिरूपं धनं प्रासावीत्। किमर्थं। इत्यै। द्विपदां चतुष्पदां च गमनाय। यद्वा न इत्या इति संबंधः। अस्मद्गमनागमनादिव्यापारायेत्यर्थः ॥

॥ अथ द्वितीया ॥

अमिनती दैव्यानि व्रतानि प्रमिनती मनुष्या युगानि।
ईयुषीणामुपमा शश्वतीनामायतीनां प्रथमोषा व्यद्यौत् ॥ २॥
अमिनती। दैव्यानि। व्रतानि। प्रऽमिनती। मनुष्या। युगानि।
ईयुषीणां। उपमा। शश्वतीनां। आऽयतीनां। प्रथमा। उषाः। वि। अद्यौत् ॥ २॥

दैव्यानि व्रतानि देवसंबंधीन्यग्निहोत्रादीनि कर्माणि। व्रतमिति कर्मनाम। व्रतं कर्वरमिति तन्नामसु पाठात्। तानि कर्माण्यमिनत्यहिंसंती भानप्रदानेनानुकूलं कुर्वती। तथा मनुष्या मनुष्याणां युगानि युगोपलक्षितान्निमेषादिकालावयवान्प्रमिनती प्रकर्षेण हिंसंती। आयुः क्षपयंतीत्यर्थः। यद्वा युगानि

युग्मानि परस्परसंयोगं प्रमिनती हिंसंती वियोगं कुर्वंतीत्यर्थः। उषःकाले सर्वे यथायथं स्वस्वव्यापाराय गच्छंतीति प्रसिद्धं। किंच। ईयुषीणां गच्छंतीनामतीतानां शश्वतीनां नित्यानामुषसामुपमा ताभिः सदृशीत्यर्थः। सादृश्यं च सदृशीरिदु श्व इत्यत्रोक्तं। तथायतीनां प्रथमा। आगमिनीनामुषसां प्रथमभाविनी सती व्यद्यौत्। विशेषेण प्रकाशते। यद्वा। ईयुषीणां गमनशीलानां पश्वादीनां शश्वतीनां संततिप्रवाहरूपेण नित्यानामुपमा तद्वन्नित्येत्यर्थः। तथायतीनां रात्र्यवसानसमय उत्पद्यमानानां प्रज्ञावागादीनां प्रथमा प्रथमभाविनी। उषस्यागतायां वाचो बुद्धयश्व स्फुरंतीति प्रसिद्धं। तादृशी देवी व्यद्यौत्। प्राणिनामनुग्रहाय द्योतते ॥

॥ अथ तृतीया ॥

एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात्।
ऋतस्य पंथामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥ ३ ॥

एषा। दिवः। दुहिता। प्रति। अदर्शि। ज्योतिः। वसाना। समना। पुरस्तात्।
ऋतस्य। पंथां। अनु। एति। साधु। प्रजानतीऽइव। न। दिशः। मिनाति ॥ ३ ॥

एषोषा दिवो द्योतमानात्मकस्य द्युलोकस्य दुहिता दुहितृस्थानीया। तत उत्पद्यमानत्वाद्दुहितेत्युपचर्यते। पुरस्तात्पूर्वस्यां दिशि प्रति प्रत्येकमदर्शि। दृश्यते। सर्वेषामपि प्राणिनामाभिमुख्येन प्रकाशत इत्यर्थः। कीदृशी सा। ज्योतिर्वसाना। तेजोरूपं वस्त्रमाच्छादयंती तेजसा प्रकाशयंती। समना सम्यग्मनयित्री चेष्टयित्री। अंतर्भावितण्यर्थोऽयं। यद्वा सह युगपदेव मन्यतेऽवबुध्यते प्राणिभिरिति समना। व्युत्पत्त्यनवधारणादनवग्रहः। सा तादृशी ऋतस्यादित्यस्य पंथां पंथानं मेरोः प्रांतप्रदेशमनुक्रमेण साधु सम्यगेति। गच्छति। सूर्यो यत्र यत्र गच्छति तत्र तत्र पुरस्तादुषा अपि गच्छतीत्यर्थः। सैव विशेष्यते। प्रजानतीव। प्रियभूतस्य सूर्यस्य मार्गो मयापि गंतव्य इति चेतयंतीव। यथा लोके प्रियतमेऽनुरागयुक्ता काचिद्भर्तारं सर्वास्ववस्थासु न विमुंचति तथेयमपीत्यर्थः। किंच दिशः प्रागादिका न मिनाति। न हिनस्ति। किंतूषा यत्र गच्छति सा प्राचीत्येवं प्रागादिव्यवहारं करोतीत्यर्थः ॥

॥ अथ चतुर्थी ॥

उपो॑ अदर्शि शुंध्युवो॒ न वक्षो॑ नो॒धा इ॑वा॒विर॑कृत प्रि॒याणि॑ ।
अ॒द्म॒सन्न स॑स॒तो बो॒धयं॑ती शश्वत्त॒मागा॒त्पुन॑रे॒युषी॑णां ॥ ४ ॥

उपो॒ इति॑ । अ॒द॒र्शि॒ । शुं॒ध्युव॑ः । न । वक्षः॑ । नो॒धाःऽइ॑व । आ॒विः । अ॒कृ॒त । प्रि॒याणि॑ । अ॒द्म॒ऽसत् । न । स॒स॒तः । बो॒धयं॑ती । श॒श्व॒त्ऽत॒मा । आ । अ॒गा॒त् । पुन॑ः । आ॒ऽई॒यु॒षी॑णां ॥ ४ ॥

एषोषाः । उपो इति निपातद्वयसमुदायात्मक एको निपातः । सर्वैः समीप एवादर्शि । दृश्यते । तत्र दृष्टांतः । शुंध्युवो न वक्षः । अत्र नकार उपमार्थीय उपरिष्टात्प्रयुज्यमानत्वात् । यत्र तु प्रतिषेधो विवक्षितस्तत्र पुरस्तान्नकारः प्रयुज्यते । तथा च यास्कः । पुरस्तादुपाचारस्तस्य यत्प्रतिषेधतीति । तस्योदाहरणं नेंद्रं देवममंसतेति । उपरिष्टादुपाचारस्तस्य येनोपमिमीत इति । तस्योदाहरणं दुर्मदासो न सुरायामिति । नि० १. ४. । शुंध्युरादित्यः सर्वेषां शोधकत्वात् । तस्य वक्षो वक्षःस्थानीयो रश्मिसमूहः । स यथा प्रकाशमानो दृश्यते तथेत्यर्थः । यद्वा शुंध्युरिति जलचरः श्वेतवर्णः पक्षिविशेषः । स यथा स्वकीयं वक्षः प्रकाशयन्दृश्यते तद्वदित्यर्थः । किंच । नोधा इव प्रियाण्याविरकृत । नवनं स्तोत्रं धारयतीति नोधाः । एतन्नामा महर्षिर्देवतास्तुतिव्याजेन नानाविधैर्मंत्रैः प्रियाणि स्वमनीषितान्याविष्कृतवान् । तथैषापि स्वकीयानि सर्वलोकप्रियाणि तेजांस्याविरकरोत् । किंच । अद्मसन्न । अत्राप्युपमार्थीय नकारः । अद्यत इत्यद्मान्नं । तस्य पाकाय गृहे सीदतीत्यद्मसत् पाचिका योषित् ससतो बोधयंती । सा यथा स्वपतः पुत्रादीन्भोजनाय बोधयति तद्वत् । यद्वा । अद्मेति गृहनाम वरूथमद्मेति तन्नामसु पाठात् । तत्र सीदतीत्यद्मसज्जननी । सा यथा स्वपतः पुत्रादीनुषःकाले प्रबोधयति तथा भुवनाख्ये गृहे सीदंती तत्रत्यान्प्राणिनः प्रबोधयंतीयमुषाः । आ ईयुषीणामागमनशीलानां स्त्रीणां मध्ये शश्वत्तमा पुनःपुनरागच्छति । प्रातर्नियतमागच्छंतीनां वारयोषितां मध्ये स्वयमेका सती नियतमागच्छतीत्यभिप्रायः । अत्र निरुक्तं । उपादर्शि शुंध्युवः शुंध्युरादित्यो भवति शोधनात्तस्यैव वक्षो भासोऽध्यूळ्हमिदमपीतरद्वक्ष एतस्मादेवाध्यूळ्हं काये । शकुनिरपि शुंध्युरुच्यते शोधनादेवोदकचरो भवति । आपोऽपि शुंध्युव उच्यंते

शोधनादेव। नोधा ऋषिर्भवति नवनं दधाति स यथा स्तुत्या कामानाविष्कुरुत एवमुषा रूपाण्याविष्कुरुते। अद्मसदद्मान्नं भवत्यद्मसादिनीति वान्नसानिनीति वा। ससतो बोधयंती शश्वत्तमागात्पुनरेयुषीणां। स्वपतो बोधयंती शाश्वतिकतमागात्पुनरागामिनीनां। नि॰ ४. १६.। इति ॥

॥ अथ पंचमी ॥

पूर्वे अर्द्धे रजसो अप्त्यस्य गवां जनित्र्यकृत प्र केतुं।
व्यु प्रथते वितरं वरीय ओभा पृणंती पित्रोरुपस्था ॥ ५ ॥
पूर्वे। अर्द्धे। रजसः। अप्त्यस्य। गवां। जनित्री। अकृत। प्र। केतुं।
वि। ऊं इति। प्रथते। विऽतरं। वरीयः। आ। उभा। पृणंती। पित्रोः। उपऽस्था ॥ ५ ॥

अप्त्यस्य व्यापनशीलस्य विस्तृतस्य रजसो रंजकस्यांतरिक्षलोकस्य। रजःशब्दोऽतरिक्षलोकवाची लोका रजांस्युच्यंत इति यास्केनोक्तत्वात्। नि॰ ४. १९.। तस्य पूर्वेऽर्द्धे पूर्वस्मिन्भागे जनित्र्युत्पन्ना सती गवां दिशां रश्मीनां वा केतुं प्रज्ञानं प्राकृत। प्रकर्षेण करोति। यद्वा रजसो रंजकस्याह्नः। रजःशब्दोऽहर्वाची। असृगहनी रजसी उच्येते इति यास्केनोक्तत्वात्। नि॰ ४. १९.। तस्य पूर्वेऽर्द्धे पूर्वस्मिन्भाग उषःकाले गवां वाचां जनित्री जनयित्र्युत्पादयित्री। उषःकाले सर्वेषां प्राणिनां वाचः स्फुरंतीति प्रसिद्धं। यद्वा। अप्त्यस्य कर्मसु स्थितस्य जंतोः केतुं गमनागमनादिरूपं कर्म। केतुरिति कर्मनाम केतः केतुरिति तन्नामसु पाठात्। प्राकृत। प्रकर्षेण करोति। किंच पित्रोः पालयित्र्योर्द्यावापृथिव्योरुपस्थोपस्थ उत्संगेऽतरालप्रदेशे स्थित्वोभोभे द्यावापृथिव्यौ पृणंती। स्वतेजसा पूरयंती। यद्वा। उभोभयोः पित्रोरिति संबंधः। वितरं विशिष्टतरं वरीय उरुतरमतिविस्तीर्णं यथा भवति तथा व्यु प्रथते। विशेषेणैव प्रख्याता भवति। प्रकाशत इत्यर्थः। उशब्दोऽवधारणार्थः पादपूरणो वा मिताक्षरेष्वनर्थकाः कमीमिद्विति यास्केनोक्तत्वात् ॥

॥ इति द्वितीयस्य प्रथमे सप्तमो वर्गः ॥

॥ अथ षष्ठी ॥

एवेदेषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिं।
अरेपसा तन्वा३ शाशदाना नार्भादीषते न महो विभाती ॥ ६ ॥

एव। इत्। एषा। पुरुऽतमा। दृशे। कं। न। अजामिं। न। परि। वृणक्ति। जामिं।
अरेपसा। तन्वा। शाशदाना। न। अर्भात्। ईषते। न। महः। विऽभाती ॥६॥

एषोषा एवेत्। इच्छब्द एवकारार्थः। एवमेवेदानीं भासमानप्रकारेणैव पुरुतमा विपुलतमात्यंतविस्तृता सत्यजामिं विजातीयं मनुष्यादिजातिं न परिवृणक्ति। परितः सर्वतो न वर्जयति। तथा जामिं सजातीयं देवजातिं न परिवृणक्ति। न परिवर्जयति। मनुष्यादिकं देवादिकं च तदुपलक्षितं लोकद्वयं वा कार्त्स्न्येन प्रकाशयतीत्यर्थः। किमर्थमिति तदुच्यते। दृशे कं। सुखेन सर्वेषां दर्शनाय। सुखं यथा भवति तथा सर्वान्दर्शयितुं वा। किंच। अरेपसापापया निर्मलया तन्वा शरीरेण शाशदाना शाशाद्यमाना। शाशदानः शाशाद्यमान इति यास्कः। स्पष्टतां गच्छंतीत्यर्थः। विभाती विशेषेण प्रकाशयंती साभादल्पात्पुत्रिकादेः सकाशान्नेषते। न गच्छति। तमपि प्रकाशयति। तथा महो महतो मेर्वादेः सकाशान्नेषते। न गच्छति। तमपि प्रकाशयति। पूर्वं लोकद्वयं प्रकाशत इत्युक्तं। इदानीमस्मिंल्लोके परमाखादि पर्वतपर्यंतं कृत्स्नं प्रकाशयतीत्यर्थः ॥

॥ अथ सप्तमी ॥

अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानां।
जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः ॥७॥

अभ्राताऽइव। पुंसः। एति। प्रतीची। गर्तऽआरुगिव। सनये। धनानां।
जायाऽइव। पत्ये। उशती। सुऽवासाः। उषाः। हस्राऽइव। नि। रिणीते। अप्सः ॥७॥

अभ्रातेव भ्रातृरहितेव पुंसः पित्रादीन्प्रतीची स्वकीयस्थानात्प्रतिनिवृत्तमुखी सत्येति। गच्छति। यथा लोके भ्रातृरहिता योषित्स्वोचितवासोऽलंकारादिलाभाय पितॄनेति। सति भ्रातरि स एवोचितप्रदानादिना सम्यक् तोषयति। तदभावात्पितरमेव प्राप्नोति। यद्वा। सति स्वभ्रातरि स एव पितुः पिंडदानादिकं संतानकृत्यं करोति। तस्याभावात्स्वयमेव तत्कर्तुं पित्रादीन्गच्छति। तद्वदियमुषा अपि स्वोचितप्रकाशादिलाभाय स्वप्रकाशदानाय वा पितृभूतं सूर्यमाभिमुख्येन गच्छति। अयमेको दृष्टांतः। तथा धनानां सनये गर्तारुगिवेत्यपरो दृष्टांतः। गर्त इति गृहनाम। कृदरो गर्त इति तन्नामसु पाठात्। अत्रौचित्येन राजपुरुषैर्न्यायनिर्णेतृभिश्चाधिष्ठितं स्थानमुच्यते। तदारोहतीति गर्तारुक्।

यथा लोके काचिद्गतभर्तृका योषिद्धनानां स्वकीयरिक्थानां सनये लाभाय गर्तमागच्छति। तां तु सभ्या विचार्य यदीयं रिक्थं लभते चेदक्षैः संताड्य तदीयं धनं वितरंति। तथेयमपि धनानां प्रीणनसाधनानां प्रकाशानां सनये लाभाय गर्तमाकाशं सूर्यनिवासस्थानमारोहति। देशविशेषाचारमपेक्ष्यैवं दृष्टांतितं। किंच। पत्य उशती कामयमाना सुवासा दुकूलादिशोभनवसना स्वलंकृता। पूर्वं रजोदर्शनसमये मलिनवस्त्रा सती स्नानानंतरं शोभनवस्त्राभरणादिना शोभमाना विशेषेण पतिं भोगाय कांक्षंती तेन सह संक्रीडते। तथेयमुषा अतिनैशेनांधकारेणावृतत्वान्मलिनवसनापि प्रभाते स्वतेजसावृतत्वात्सुवसना सती पतिस्थानीयेन सूर्येण साकं संक्रीडमाना हस्रेव हसनेवाप्सो दंतस्थानीयानि रूपाणि नीलपीतादीनि। यद्वा निरूप्यमाणानि पदार्थजातानि निरिणीते। नितरां रिणीते गमयति। प्रकाशयतीत्यर्थः। यथा लोके काचिद्रमणीया योषित्स्मितव्याजेन दंतान्विवृणुते तथेयमपि सर्वाणि रूपाणि प्रकाशयतीत्यर्थः। अयं मंत्रो निरुक्ते स्पष्टं व्याख्यातः। अभ्रातृकेव पुंसः पितॄनेत्यभिमुखी संतानकर्मणे पिंडदानाय न पतिं गर्तारोहिणीव धनलाभाय दाक्षिणाजी। गर्तः सभस्थाणुर्गृणातेः सत्यसंगरो भवति तं तत्र यापुत्रा यापतिका सा रोहति तां तत्राक्षैराघ्नंति सा रिक्थं लभत इति। जायेव पत्ये कामयमाना सुवासा ऋतुकालेषूषा हसनेव दंतान्विवृणुते। नि॰ ३. ५.। इति च ॥

॥ अथाष्टमी ॥

स्वसा स्वस्रे ज्यायस्यै योनिमारैगपैत्यस्याः प्रतिचक्ष्येव।
व्युच्छंती रश्मिभिः सूर्यस्यांज्यंक्ते समनगा इव व्राः ॥ ८ ॥

स्वसा। स्वस्रे। ज्यायस्यै। योनिं। अरैक्। अप। एति। अस्याः। प्रतिचक्ष्यऽइव। विऽउच्छंती। रश्मिऽभिः। सूर्यस्य। अंजि। अंक्ते। समनगाःऽइव। व्राः ॥ ८ ॥

एकस्मादेवांतरिक्षादुत्पन्नत्वात्परस्परं स्वसृभावः। तथाप्याहुः प्राथम्या तेजस्वित्वाच्च ज्यायस्त्वं। स्वयमेव सरतीति वा स्वसा। रात्रिः स्वस्रे ज्यायस्या उक्तरीत्या ज्येष्ठायै योनिमुत्पत्तिस्थानमपरराात्ररूपमारैक्। अरिचत्। प्रादात्। प्रेरचयतीत्यर्थः। तथा च पूर्वत्राम्नातं रात्र्युषसे योनिमारैगिति। दत्वा चास्या उत्पन्नाया उषसः प्रतिचक्ष्येव ज्ञापयित्वेव स्वयमपसृत्यैव गच्छति। ज्यायस्या-

मागतायां तस्यै स्वस्थानं दत्वा स्वयं तत्संनिधौ स्थातुमनुचितमिति विज्ञायैवापगच्छतीति भावः । एवमुत्पन्नैषा सूर्यस्य रश्मिभिर्व्युच्छंती तमो विवासयंत्यंजि व्यंजकं तेजः । यद्वा । अंजि व्यक्तं जगत् । अंक्ते । अनक्ति प्रकाशयति । किमिव । समनगा इव । सम्यगननहेतव आपः समना । ता गच्छंतीति समनगा विद्युतः । व्रा व्राताः । विद्युत्संघा इव । यद्वा । सम्यगननाय गच्छंतीति समनगाः सूर्यरश्मयः । त इव व्रा व्राताः संघीभूताः । ते यथांजते जगत्प्रकाशयंति तथेत्यर्थः ॥ व्रात इत्यत्र तकारलोपश्छांदसः ॥

॥ अथ नवमी ॥

आसां पूर्वासामहंसु स्वसॄणामपरा पूर्वामभ्येति पश्चात् ।
ताः प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छंतु सुदिना उषासः ॥ ९ ॥

आसां । पूर्वासां । अहंऽसु । स्वसॄणां । अपरा । पूर्वां । अभि । एति । पश्चात् ।
ताः । प्रत्नऽवत् । नव्यसीः । नूनं । अस्मे इति । रेवत् । उच्छंतु । सुऽदिनाः । उषसः ॥ ९ ॥

स्वसॄणां परस्परं स्वसृभावमापन्नानां स्वयं सरंतीनां वा पूर्वासां पुरातनीनामासामुषसां मध्येऽहस्वहःसु प्रतिदिनमपरान्याद्यंतन्युषा पूर्वामतीतदिवससंबंधिनीमुषसं पश्चादनुसृत्याभ्येति । अभिमुखं गच्छति । अव्यवधानेन गच्छतीत्यर्थः । सर्वेष्वहःस्वेवमेवाभ्येति । नव्यसीर्नवीयस्यो नवतरा आगामिन्यस्ता उषास उषसोऽपि नूनं निश्चयं प्रत्नवत् पुरातन्य इव सुदिनाः शोभनकर्मानुष्ठानसाधनदिवसाः शोभनदिनमुखा वा सत्योऽस्मे अस्माकं रेवत् बहुधनविशिष्टं यथा भवति तथोच्छंतु । प्रकाशयंतु । पूर्वतन्यो यथौच्छन् तथागमिन्योऽप्युच्छंत्वित्यर्थः ॥

॥ अथ दशमी ॥

प्र बोधयोषः पृणतो मघोन्यबुध्यमानाः पणयः ससंतु ।
रेवदुच्छ मघवद्भ्यो मघोनि रेवत्स्तोत्रे सूनृते जारयंती ॥ १० ॥

प्र । बोधय । उषः । पृणतः । मघोनि । अबुध्यमानाः । पणयः । ससंतु ।
रेवत् । उच्छ । मघवत्ऽभ्यः । मघोनि । रेवत् । स्तोत्रे । सूनृते । जरयंती ॥ १० ॥

हे मघोनि मघवति । अस्मभ्यं दातव्यैर्बहुभिर्धनैस्तद्वत्युषो हे उषो देवि पृणतो

हविःप्रदानस्मान्यजमानान्प्रबोधय। प्रज्ञापय। प्रतिबुद्धान्कुरु। किंच। पणयो व्ययासहिष्णवो वणिजः। पणिर्वणिग्भवतीति यास्कः। पणय इति लुब्धका अबुध्यमाना यागादीनकुर्वाणा अदानशीला अस्मच्छत्रवः ससंतु। स्वपंतु। दीर्घनिद्रा भवंतु। म्रियतामित्यर्थः। तथा च मंत्रांतरं ससंतु त्या अरातयो बोधंतु शूर रातयः। ऋ० १. २९. ४.। इति। किंच हे मघोन्यस्मद्दत्तहविर्भिस्तद्वति हे उषो मघवद्भ्यो हविर्लक्षणान्नवद्भ्यो यजमानेभ्यस्तेषामर्थं रेवत् धनवत्समृद्धिमदुच्छ। विभाहि। किंच हे सूनृते सुष्ठु मनुष्याणां नेत्रि देवि जरयंती सर्वप्राणिनः क्षपयंती त्वं स्तोत्रे स्तुतिकर्त्रे यजमानाय तदर्थं रेवत् धनवत्समृद्ध्यर्थमुच्छेति शेषः॥

॥ इति द्वितीयस्य प्रथमेऽष्टमो वर्गः॥

॥ अथैकादशी॥

अवेयमश्वैद्युवतिः पुरस्ताद्युंक्ते गवामरुणानामनीकं।
वि नूनमुच्छादसति प्र केतुर्गृहंगृहमुप तिष्ठाते अग्निः॥ ११॥

अव। इयं। अश्वैत्। युवतिः। पुरस्तात्। युंक्ते। गवां। अरुणानां। अनीकं।
वि। नूनं। उच्छात्। असति। प्र। केतुः। गृहंऽगृहं। उप। तिष्ठाते। अग्निः॥ ११॥

इयमुषा युवतिर्यौवनोपेतयोषित्स्थानीया। यद्वा सर्वेषु भावेषु मिश्रयंती। पुरस्तात्पूर्वस्यां दिश्यवाश्वैत्। अत्यर्थमागच्छति वर्धते वा। अत्रावशब्दो विनिग्रहार्थीयो न्यवेति विनिग्रहार्थीयौ। नि० १. ३.। इति यास्केनोक्तत्वात्। तत्कथमवगम्यत इति तत्राह। इयमरुणानामरुणवर्णानां गवां प्रसिद्धानामेतन्नामकानामश्वानां वानीकं समूहं युंक्ते। रथे योजयति। अरुण्यो गाव उषसां श्यावाः सवितुः। निघ० १. १५.। इति। यथा लोके वाहनसंनाहं दृष्ट्वा प्रयाणमनुमीयते तथात्राप्यरुणरश्मीनामश्वानां दर्शनादुषा आगच्छतीत्यध्यवसीयते। यद्वारुणानां रश्मीनां समूहं युंक्ते। तथा नूनं निश्चयमेषा व्युच्छात्। तमो विवर्जयिष्यति। यत इयं गा युनक्ति अत एव कारणाद्यथा लोकेऽश्वसंनाहं दृष्ट्वोद्योऽनुमीयते तथात्रापीत्यर्थः। तादृशी सासत्यसत्प्राये नीरूपेऽंतरिक्षे तिरोधायकत्वादशोभने तमसि वा केतुः केतुस्थानीया ज्ञापयित्री प्रकर्षेण विविधं भासत इति शेषः। उपसर्गवशाद्योग्यक्रियाध्याहारः। यद्वा। असति तमोरूपेऽंधकारे प्र केतुः प्रकर्षेण ज्ञापयित्री सती नूनं व्युच्छादिति पूर्वत्रान्वयः।

तस्मिन्काले ऽग्निराहवनीयादिरूपो गृहं गृहं सर्वयजमानगृहमग्निहोत्राद्यर्थमुपतिष्ठाते । उपतिष्ठते । दीप्यत इत्यर्थः ॥

॥ अथ द्वादशी ॥

उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।

अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥ १२ ॥

उत् । ते । वयः । चित् । वसतेः । अपप्तन् । नरः । च । ये । पितुऽभाजः । विऽउष्टौ ।

अमा । सते । वहसि । भूरि । वामं । उषः । देवि । दाशुषे । मर्त्याय ॥ १२ ॥

ते तव व्युष्टौ सत्यां वयश्चित् गमनवंतः पक्षिणोऽपि । चिदित्येषोऽपिशब्दार्थो निपातानामनेकार्थत्वात् । उच्चावचेष्वर्थेषु निपतंतीति यास्केनोक्तत्वात् । वसतेर्निवासस्थानान्नीडादेरुद्गूर्ध्वमपप्तन् । पतंति । पूर्ववाक्ये गृहं गृहमुपतिष्ठातेऽग्निरित्युक्तत्वात्तदपेक्षयापिशब्दः । किंच नरश्च मनुष्याश्च पितुभाजोऽन्नवंतोऽन्नार्थिनः कृषिवाणिज्यादिकर्तारः स्वस्वव्यापारार्थमुत् उन्मुखा अपप्तन् । गच्छंति । तथा मंत्रांतरं पद्वदीयत उत्पातयति पक्षिणः । ऋ॰ १.४८.५. । इति । एवं सत्यां हे देवि देवनशील उषोदेवतेऽमा गृहे देवयजनाख्ये सते तिष्ठते यजमानाय तदर्थं । अमेति गृहनाम । अमा दम इति तन्नामसु पठितत्वात् । यद्वा । अमा सह हूयमानेनाग्निना सह निवसते यजमानाय । अमा वसेतामित्यादौ सहार्थे प्रयोगात् । मर्त्याय मनुष्याय दाशुषे हविर्दत्तवते यजमानाय भूरि वामं बहु शोभनं धनं वहसि । प्रापयसि ॥

॥ अथ त्रयोदशी ॥

अस्तोढ्वं स्तोम्या ब्रह्मणा मेऽवीवृधध्वमुशतीरुषासः ।

युष्माकं देवीरवसा सनेम सहस्रिणं च शतिनं च वाजं ॥ १३ ॥

अस्तोढ्वं । स्तोम्याः । ब्रह्मणा । मे । अवीवृधध्वं । उशतीः । उषसः ।

युष्माकं । देवीः । अवसा । सनेम । सहस्रिणं । च । शतिनं । च । वाजं ॥ १३ ॥

एवं सूक्तद्वयोक्तरीत्या बहुधा स्तुत्वा तां च स्तुतिमनया निवेदयित्वा स्वाभीष्टं प्रार्थयते । हे स्तोम्याः । स्तोमः स्तोत्रं तदर्हंतीति स्तोम्याः स्तुत्यर्हा उषसः । यतो यूयं तादृश्यः । अतो मे मत्स्वभूतेन ब्रह्मणा सूक्तद्वयगतमंत्ररूपेण स्तोत्रे-

णास्तोढ्वं। स्तुता भवत। किंच हे उषास उषसः। उशतीः स्तोतॄनस्मान् अस्मत्समृद्धिं वा कामयमाना यूयमवीवृधध्वं। अस्मान्प्रवर्धयत। किंच हे देवी देव्यो देवनशीलाः। युष्माकमवसा युष्मत्संबंधिना रक्षणेन वयं सहस्रिणं सहस्रसंख्याकमभीष्टं धनं सनेम। लभेमहि। तथा शतिनं च वाजं शतसंख्याकमपरिमितं धनं सनेम। युष्मत्कृतेन शतसहस्रपरिमितधनादिरूपरक्षणेन वयमप्यर्थिभ्यः शतसहस्रपरिमितस्य धनस्य सनितारो भवेमेत्यर्थः॥

॥ इति द्वितीयस्य प्रथमे नवमो वर्गः॥

प्राता रत्नमिति सप्तर्चं पंचमं सूक्तं काक्षीवतं। दानस्य स्तूयमानत्वाद्दानदेवत्यं या तेनोच्यते सा देवतेति परिभाषितत्वात्। त्रैष्टुभं। उपेत्यादिके द्वे जगत्यौ। प्राता रत्नं सप्त स्वनयस्य दानस्तुतिरुप जगत्यावित्यनुक्रमणिका॥

॥ तत्र प्रथमा॥

प्राता रत्नं प्रातरित्वा दधाति तं चिकित्वान्प्रतिगृह्या नि धत्ते।
तेन प्रजां वर्धयमान आयू रायस्पोषेण सचते सुवीरः॥१॥
प्रातरित्वा। रत्नं। प्रातःऽइत्वा। दधाति। तं। चिकित्वान्। प्रतिऽगृह्य। नि। धत्ते।
तेन। प्रऽजां। वर्धयमानः। आयुः। रायः। पोषेण। सचते। सुऽवीरः॥१॥

अत्रेतिहासमाचक्षते। दैर्घतमसः कक्षीवान्नाम ऋषिर्ब्रह्मचर्यं चरिष्यन्वेदाभ्यासाय गुरुकुले चिरकालमुषित्वा वेदान्सम्यगधीत्य व्रतानि च चरित्वा तेनानुज्ञातः पुनः स्वगृहं प्रति प्रयास्यन् मध्ये मार्गे रात्रौ विश्रांतः। प्रभाते भावयव्यस्य पुत्रः स्वनयो नाम राजानुचरैः संक्रीडमानोऽकस्मात्कक्षीवतोऽतिकमाससाद। स च रभसा प्रतिबुद्धः सहसोत्तस्थौ। तं च राजा पाणिं गृहीत्वा स्वकीये चासन उपवेश्यास्य सौंदर्यमवगत्य स्वकन्याप्रदानमनाः पप्रच्छ भगवन् कस्य पुत्रः किंनामा त्वमिति। स च पृष्टो मातरं पितरं च स्ववृत्तांतं चाचचक्षे। स च राजा संभाव्य इत्यवगत्य मुदितमनाः स्वगृहं प्राप्यास्मै मधुपर्कमारचय्य वस्त्रमाल्यादिभिः पूजयित्वा सरथा दश कन्याः शतं निष्कानश्वशतं पुंगवानां शतं गवां षष्ट्युत्तरसहस्रं पुनरेकादश रथांश्च प्रादात्। स च सर्वमनुक्रमेण प्रतिगृह्य दीर्घतमसोऽतिकमागत्य तस्मै प्रादर्शयत्॥ ननु कक्ष्या नामाश्वबंधनी रज्जुः। तद्वान्कक्षीवान्। अश्वबंधनं च राज्ञ एवोचितं। अतोऽस्य

राजन्यत्वात्प्रतिग्रहो नोपपद्यते । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इत्युक्तत्वात् । मनु॰ १०. ७६. । तस्माद्ब्राह्मणस्यैवाधिकारो न तु क्षत्रियस्येति । नैष दोषः । यद्यप्यसौ कलिंगाख्यस्य राज्ञः पुत्रस्तथापि तेन कलिंगेन स्वयं वृद्धत्वादपत्योत्पादनाय सामर्थ्यमलभमानेन तदुत्पादनाय याचितो दीर्घतमा ऋषिरुशिङ्गामिकामपत्योत्पादनाय प्रेषितया राजमहिष्यातिजरठेन महर्षिणा सह रंतुं लज्जमानया स्ववस्त्राभरणैरलंकृत्य स्वप्रतिनिधित्वेन प्रेषितामुशिङ्गामिकां योषितं दासीमित्यवगत्य मंत्रपूतेन जलेनाभिषिच्य ऋषिपुत्रीं कृत्वा तया सह रेमे । तदुत्पन्नः कक्षीवान्नाम ऋषिः । एतत्सर्वमस्माभिः पूर्वाध्याय नासत्याभ्यामित्यत्र सूक्ते विस्तरेण प्रतिपादितं । अतोऽस्य क्षत्रियसंबंधात्कक्षीवानिति नामोपपन्नं । दीर्घतमसः परमर्षेरुत्पन्नत्वेन ब्राह्मणत्वात्प्रतिग्रहोऽप्युपपन्न एव ॥ इदमादि सूक्तद्वयं स्वनयस्य राज्ञो दानप्रशंसाख्यानप्रतिपादकं । नन्वनुक्रमण्यां स्वनयस्य दानस्तुतिरिति दानतुष्टो भावयव्यं तुष्टावेति चोभयत्र स्तोतव्यं भिन्नमेवानुगम्यत इत्युच्यते । उत्तरसूक्तस्य प्रथमायामृच्यधि क्षियतो भाव्यस्येति दातुर्भावयव्यस्य श्रूयमाणत्वात्तत्प्राथम्यमुपजीव्य पृथगुपात्तं । वस्तुतस्तु पितुर्नाम्ना पुत्रस्य व्यवहर्तव्यत्वात् तथा आ रुद्रास इत्यादौ बहुशः प्रयोगदर्शनात्स्वनयेन दत्ता इति तत्रैव सूक्ते स्वनयस्यापि श्रूयमाणत्वाच्चोभयत्रापि दातृप्रतिगृहीत्रोरेकत्वेनैकमेव दानप्रशंसारूपमाख्यानमिति प्रसिद्धं । स च कक्षीवानानीतं सर्वं पितुर्निवेदयन् परोक्षेणैव दानप्रकारं प्रशंसति ॥ स्वनयो नाम राजा प्रातरित्वा प्रातरेवात्मनः सकाशमागतः सन् रत्नं रमणीयं निष्कादिकं प्रातः प्रभातकाले दधाति । अस्मत्संनिधौ स्थापयति । ददाति । तं स्थापितं सर्वं चिकित्वान् चेतनावान् अदुष्टमित्यवगतवान्प्रतिगृह्य स्वीकृत्य निधत्ते । पितुः समीपे स्थापयति । अनंतरं तेन दत्तेन निष्कादिना प्रजां पुत्रभृत्यादिरूपां वर्धयमानः पोषयन् आयुर्जीवितं च वर्धयन् सुवीरः शोभनैर्वीरैः पुत्रभृत्यादिभिरुपेतः सन् रायस्पोषेण धनानां पुनःपुनर्वर्धनेन सचते । असौ राजा संगच्छतामिति तव दातुराशिषं प्रार्थयते ॥

॥ अथ द्वितीया ॥

सुगुरसत्सुहिरण्यः स्वश्वो बृहदस्मै वय इंद्रो दधाति ।
यस्त्वायंतं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति ॥ २ ॥

सुऽगुः। असत्। सुऽहिरण्यः। सुऽअश्वः। बृहत्। अस्मै। वयः। इंद्रः। दधाति।
यः। त्वा। आऽयंतं। वसुना। प्रातःऽइत्वः। मुक्षीजयाऽइव। पदिं। उत्ऽसिनाति॥२॥

अत्र कक्षीवतः पितानीतेन धनेन संतुष्टो राजानं बहुप्रकारेणाशास्ते। असौ स्वनयो राजा सुगुरसत्। शोभनैर्बहुभिर्गोभिस्तद्वान्भवतु। तथा सुहिरण्यः सुष्ठु हितरमणीयैर्धनैस्तद्वान्भवतु। तथा स्वश्वः शोभनैरश्वैस्तद्वान् सन् अस्मै राज्ञे प्रदात्रे बृहत् प्रभूतं वयोऽन्नमिंद्रः परमेश्वरो धर्मदेवता दधाति। दधातु। ददातु। यतोऽयं राजा गोहिरण्याश्वान्नानि बहुसंख्याकानि दत्तवान् अतस्तेषामभिवृद्धिप्रार्थनोचितैव। कस्यैवमाशीरिति स उच्यते यः यो राजा प्रातरित्वः प्रातरागामिन्नतिथे पुत्र आयंतं गुरुकुलादागतं पदिं पथिकं यदृच्छया गंतारं त्वा त्वां वसुनान्नसाधनेन गवादिधनेनोत्सिनाति। गमनत उत्कृष्टं बध्नाति। गतिं निरुणद्धीत्यर्थः। प्रतिबंधे दृष्टांत उच्यते। मुक्षीजयेव पदिं। मुच्यमाना सती बंधनं जयतीति मुक्षीजा मृगपक्ष्यादिबंधनी रज्जुः। तया पाशको यथा पदिं गंतारं मृगपक्ष्यादिकमुत्सिनाति बध्नाति तथा मयाननुज्ञातमपि त्वां गमनं प्रतिबध्य गवादीष्टदानादिना यो राजा तोषयति स एवं भवत्विति। पदिरिति पदं व्याचक्षाणेन यास्केन तदुदाहरणमयमंत्रो व्याख्यातः। सुगुर्भवति ततनात्रेति। नि॰ ५. १९.॥

॥ अथ तृतीया ॥

आयमद्य सुकृतं प्रातरिच्छन्निष्टेः पुत्रं वसुमता रथेन।
अंशोः सुतं पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः॥३॥

आऽयं। अद्य। सुऽकृतं। प्रातः। इच्छन्। इष्टेः। पुत्रं। वसुऽमता। रथेन।
अंशोः। सुतं। पायय। मत्सरस्य। क्षयत्ऽवीरं। वर्धय। सूनृताभिः॥३॥

प्रातः पूर्वेद्युः प्रभातकालेऽयं धनं दत्तवान् तस्मिन्नेव काले सुकृतं शोभनस्य कर्तारं त्वामिच्छन् प्राप्तुमिच्छन् कदा द्रक्ष्यामीति कामयमानोऽहमद्यास्मिन्दिन इदानीमायं। प्राप्तोऽस्मि। अत्र यद्यपि केवलं प्रातरित्येव श्रुतं न पूर्वेद्युरिति तथाप्यद्यायमित्युक्तत्वादर्थात्पूर्वेद्युः प्रातरिति गम्यते। कीदृशं। इष्टेरिष्टस्येष्टसाधनस्य यागस्य वा पुत्रं पुरु त्रातारं। पुत्रः पुरु त्रायत इति यास्कः। कर्तारमित्यर्थः। केन साधनेनेति तदुच्यते। वसुमता रथेन। समृद्धधनवता रथेन

साधनेन। यद्वा तेन सहित इति सहार्थे तृतीया। किंच तदानीं तेन समृद्धेन धनेनांशोरंशुमतो वल्लीरूपस्य मत्सरस्य मादनसाधनस्य सोमस्य। मत्सरः सोमो मंदतेस्तृप्तिकर्मण इति निरुक्तं। तस्य सुतमभिषुतं रसं पायय। आत्मानं पायय। इष्टसाधनं सोमयागं कुर्वित्यर्थः। कृत्वा च क्षयद्वीरं क्षियंतो निवसंतो वीराः पुत्रभृत्यादयो यस्य तं तादृशं त्वदिष्टसाधनबहुधनप्रदातारं सूनृताभिः प्रियसत्यात्मिकाभिर्वाग्भिर्वर्धय। समृद्धं कुरु। पुत्रभृत्यादिवीरैर्यथा प्रवृद्धो भवति तथा कामयेत्यर्थः ॥

॥ अथ चतुर्थी ॥

उप॑ क्षरंति॒ सिंध॑वो मयो॒भुव॑ ईजा॒नं च॑ य॒क्ष्यमा॑णं च धे॒नवः॑।
पृ॒णंतं॑ च॒ पपु॑रिं च श्रव॒स्यवो॑ घृ॒तस्य॒ धारा॒ उप॑ यंति वि॒श्वतः॑ ॥ ४ ॥
उप॑। क्ष॒रं॒ति॒। सिंध॑वः। म॒यः॒ऽभुवः॑। ई॒जा॒नं। च॒। य॒क्ष्यमा॑णं। च॒। धे॒नवः॑।
पृ॒णंतं॑। च॒। पपु॑रिं। च॒। श्र॒व॒स्यवः॑। घृ॒तस्य॑। धारा॑ः। उप॑। यं॒ति॒। वि॒श्वतः॑ ॥ ४ ॥

पूर्वस्यामृच्यानीतेन धनेन सोमयागं कुर्वित्युक्तं। तमेव सोमयागं फलप्रदर्शनेन स्तौति। सिंधवः स्यंदनशीलाः प्रस्तुतपयोधाराः। सिंधुः स्यंदनादिति यास्कः। मयोभुवः सुखभावयित्र्यः। मय इति सुखनाम। मयः सुम्नमिति तन्नामसु पाठात्। धेनवः प्रीणयित्र्यो गाव ईजानं सोमयागमनुतिष्ठंतं तथा यक्ष्यमाणं यक्ष्य इति प्रणीतं कुर्वंतं च। न केवलमीजानं अपि तु यक्ष्य इत्यध्यवसितवंतमप्युप उपेत्य क्षरंति। स्रवंति। प्रीणयंतीत्यर्थः। न च पूर्वस्यामृचि सोमं पिबेत्युक्तत्वात् सर्वेषां सोमयागानामग्निष्टोमात्मकज्योतिष्टोमस्य प्रकृतस्य ज्योतिष्टोमेन स्वर्गकामो यजेतेति स्वर्ग एव फलत्वेन श्रुतः न गवादिकमिति वाच्यं। स्वर्गवद्गवादिकामनयापि सोमयागस्य कर्तुं शक्यत्वात्। न केवलं सोमयागमनुतिष्ठतामेव महत्फलं अपि तु सुकृतसाधनानि कर्मांतराण्यधितिष्ठतामपि महत्फलमस्त्येवेति दर्शयति। पृणंतं पितॄन्प्रीणयंतं पपुरिं प्रीणनशीलमिष्टदातारं प्राणिनः सर्वदा प्रीणयंतं च पुरुषं श्रवस्यवोऽन्नमिच्छंत्योऽन्नसमृद्धिहेतवो घृतस्य धाराः। यद्वा घृतकुल्याः। विश्वतः सर्वत उप उपेत्य यंति। प्राप्नुवंति। प्रीणयंतीत्यर्थः ॥

॥ अथ पंचमी ॥

नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ।
तस्मा आपो घृतमर्षंति सिंधवस्तस्मा इयं दक्षिणा पिन्वते सदा ॥ ५ ॥

नाकस्य । पृष्ठे । अधि । तिष्ठति । श्रितः । यः । पृणाति । सः । ह । देवेषु । गच्छति ।
तस्मै । आपः । घृतं । अर्षंति । सिंधवः । तस्मै । इयं । दक्षिणा । पिन्वते । सदा ॥ ५ ॥

सोमयागप्रशंसाप्रसंगेन सामान्यतो दानमेतदादिभिस्त्रिभिः प्रशंसति । यद्वा सोमस्यैव स्तुतत्वाद्दक्षिणाशब्दस्य याग एव प्रसिद्धत्वाच्च सूक्तपरिसमाप्ते सोमयाग एव तैः प्रस्तूयते । यः यो मर्त्यः पृणाति । हविरादिदानेन देवादीन्प्रीणाति स नाकस्य । कमिति सुखनाम । तद्विरुद्धमकं । न विद्यतेऽकं दुःखं तत्साधनं पापं वेति नाको द्युलोकः । तथा श्रूयते । न वा अमुं लोकं जग्मुषे किं चनाकमिति । नि॰ २. १४. । तस्य पृष्ठ उन्नत उपरिदेशे श्रितः सन्नध्यधिकमाकल्पांतं तिष्ठति । यद्वा । अधितिष्ठति । अधिष्ठाय प्रमुखो भूत्वा तिष्ठति । न केवलं स्वर्गाश्रयणं किंतु देवेषु मध्ये गच्छति वर्तते । स्वयमेव देवो भवतीत्यर्थः । हेति प्रसिद्धौ । तस्मै प्रीणयित्रे पुरुषाय सिंधवः स्यंदनशीला आपो घृतं तेजोवत्सारमर्षंति । गच्छंति । रसवत्यो भवंतीत्यर्थः । किंचेयं भूमिरपि दक्षिणा सस्यादिफलसंपादनदक्षा सती सदा सर्वकालं पिन्वते । सेचयति तोषयतीत्यर्थः ॥ दातुर्जीवनसाधकान्नोदकानि रुचिराणि समृद्धानि भवंतीत्यर्थः ॥

॥ अथ षष्ठी ॥

दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः ।
दक्षिणावंतो अमृतं भजंते दक्षिणावंतः प्र तिरंत आयुः ॥ ६ ॥

दक्षिणाऽवतां । इत् । इमानि । चित्रा । दक्षिणाऽवतां । दिवि । सूर्यासः ।
दक्षिणाऽवंतः । अमृतं । भजंते । दक्षिणाऽवंतः । प्र । तिरंते । आयुः ॥ ६ ॥

दक्षिणावतां बहुविधगोहिरण्यादिरूपदक्षिणाप्रदातॄणां । इच्छब्द एवकारार्थः । तेषामेवार्थ इमानि भूमौ दृश्यमानानि चित्राणि चायनीयानि स्रक्चंदनमणिमुक्तादिरूपाणि द्रव्याणि समृद्धानि भवंतीति शेषः । किंच दक्षिणावतामेव दिवि द्युलोके सूर्यासः सूर्यसंबंधिनो लोकास्तदनुगृहीता लोका वा

समृद्धा भवंति । किंच दक्षिणावंत एवामृतं जरामरणरहितं स्थानं भजंते । सेवंते । यद्वा दानेनापहतपाप्मान आत्मानं विदित्वामृतमविनाशं मोक्षं भजंते । प्राप्नुवंति यज्ञेन दानेनेति श्रुतेः । किंच दक्षिणावंत एवायुः प्रतिरंते । अतिदीर्घमेवमायुष्यं लभंते । प्रपूर्वस्तिरतिर्वर्धनार्थः । इदिति सर्वत्र संबध्यते ॥

॥ अथ सप्तमी ॥

मा पृणंतो दुरितमेन आरन्मा जारिषुः सूरयः सुव्रतासः ।
अन्यस्तेषां परिधिरस्तु कश्चिदपृणंतमभि सं यंतु शोकाः ॥ ७ ॥
मा । पृणंतः । दुःऽइतं । एनः । आ । अरन् । मा । जारिषुः । सूरयः । सुऽव्रतासः ।
अन्यः । तेषां । परिऽधिः । अस्तु । कः । चित् । अपृणंतं । अभि । सं । यंतु । शोकाः ॥ ७ ॥

अन्वयव्यतिरेकाभ्यां दानं प्रशंसितुमाह । पृणंतो देवादीन्हविरादिना प्रीणयंतः संतो दुरितं दुष्टं यथा भवति तथा प्राप्तं दुःखमेनस्तत्साधनं पापं च मारन् । मा प्राप्नुवन् । न केवलं दातार एव अपि तु सूरयो देवानां स्तोतारो विद्वांसो मा जारिषुः । जरया न जीर्णा भवेयुः । तथा सुव्रतासः शोभनकृच्छ्रचांद्रायणादिनियमवंतोऽपि मा जारिषुः । तर्ह्येषामन्यो जनः क इति स उच्यत । तेषां दातॄणां स्तोतॄणां वान्यस्तेभ्योऽन्यो यः कोऽपि पुरुषः परिधिः पापस्य परितो धारकोऽस्तु । यद्वा । अन्यो यः कश्चन पापदेवस्तेषां परिधिस्थानीयो व्यवधायकोऽस्तु । यथाग्नेः परिधिः स्वयं रक्षःप्रभृतिभिर्बाध्यमानः स्वांतर्हितमग्निं रक्षति तद्वत् । अथवा । अन्यो धर्मविशेषस्तेषां परिधिः परिधानमस्तु । कवचस्थानीयोऽस्तु । तर्हि किं प्राप्नुयुरिति उच्यते । अपृणंतं देवादीनप्रीणयंतमदातारं शोकाश्चित्तपीडास्तत्साधनाः पाप्मानोऽभ्यभिमुखं संयंतु । सम्यक् प्राप्नुवंतु । वयं सुखिनो भवेमेत्यर्थः ॥

॥ इति द्वितीयस्य प्रथमे दशमो वर्गः ॥

अमंदानिति षष्ठं सूक्तं सप्तेत्यनुवर्तनात्सप्तर्चं । आदितः पंचानां कक्षीवानृषिः षष्ठ्या भावयव्यः सप्तम्या रोमशा नाम ब्रह्मवादिनी । आदितः पंचानां भावयव्यस्य स्तुतिरूपत्वात्स एव देवता या तेनोच्यत इति न्यायात् । अंत्ययोः षष्ठीसप्तम्योस्तु भावयव्यरोमशयोः संवादः । षष्ठ्या भावयव्यः सप्तम्या रोमशा । यद्यपि स्वनयेन दत्ता इति श्रूयमाणत्वात्तस्यैव स्तुत्या भाव्यं तथापि पितृपुत्र-

योरभेदात् आ रुद्रास इतिवत् पितृनाम्ना व्यवहर्तुं शक्यत्वात् प्रथमायामृचि भावयव्यस्येत्युक्तत्वाच्च भावयव्यं तुष्टावेत्येतदविरुद्धमित्युक्तं पूर्वसूक्त एव । आदितः पंच त्रिष्टुभः । अंत्ये अनुष्टुभौ । तथा चानुक्रांतं । अमंदानिति कक्षीवान्दानतुष्टः पंचभिर्भावयव्यं तुष्टावांत्ये अनुष्टुभौ भावयव्यरोमशयोर्दंपत्योः संवाद इति । उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

अमंदान्स्तोमान्प्र भरे मनीषा सिंधावधि क्षियतो भाव्यस्य ।
यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ॥ १ ॥
अमंदान् । स्तोमान् । प्र । भरे । मनीषा । सिंधौ । अधि । क्षियतः । भाव्यस्य ।
यः । मे । सहस्रं । अमिमीत । सवान् । अतूर्तः । राजा । श्रवः । इच्छमानः ॥ १ ॥

सिंधौ सिंधुदेशे यद्वा लक्षणया सिंधुतीरे समुद्रतीरेऽधिक्षियतऽधिनिवसतो भाव्यस्य भावयव्यस्य । तत्पुत्रस्य स्वनयस्येत्यर्थः । तस्यामंदान् अनल्पान् स्तोमान् स्तोत्राणि तन्निष्ठबहुविधदानादीनां कीर्तनानि मनीषा मनीषया प्रियातिशयबुद्ध्या प्रभरे । प्रकर्षेण संपादयामि । कस्तस्य विशेष इति तत्राह । अतूर्तः केनाप्यहिंसितो यो राजा मे मदर्थं सहस्रं तत्संख्याकान् सवान् । सूयंते सोमा एष्विति सवाः सोमयागाः । तानमिमीत । संपूर्णधनप्रदानेन निर्मितवान् । किमिच्छन् । श्रवः सर्वैः श्रूयमाणां कीर्त्तिमात्मन इच्छमानः कामयमानः । यतोऽयमार्त्विज्याद्युपाधिना विना कीर्त्यर्थमेव बहु धनं प्रादात् अतस्तं स्तौमीत्यर्थः ॥

॥ अथ द्वितीया ॥

शतं राज्ञो नाधमानस्य निष्कान् शतमश्वान्प्रयतान्सद्य आदं ।
शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ॥ २ ॥
शतं । राज्ञः । नाधमानस्य । निष्कान् । शतं । अश्वान् । प्रऽयतान् । सद्यः । आदं ।
शतं । कक्षीवान् । असुरस्य । गोनां । दिवि । श्रवः । अजरं । आ । ततान ॥ २ ॥

नाधमानस्य स्वीकर्तव्यमित्युच्चैर्याचमानस्यासुरस्य धनानां निरसितुर्दानशीलस्य राज्ञः स्वतेजसा दीप्यमानस्य स्वनयस्य निष्कान् आभरणविशेषान् इयत्ताविशेषविशिष्टानि वा सुवर्णानि शतसंख्याकानि । शतं सहस्रमित्यपरिमित-

वचनः। अपरिमितान् सद्यः प्रार्थनानंतरमेव कक्षीवानहमादं। आत्तवानस्मि। स्वीकृतवानस्मीत्यर्थः। तथा प्रयतान् शुद्धान् लक्षणोपेतानश्वानध्वगमनसमर्थान् हयानादं। आत्तवान्। तथा गोनां पुंगवानां बलीवर्दानामित्यर्थः। उत्तरमंत्रे स्त्रीगवीनामभिधानात्। तेषां शतमादं। एवं प्रदाता राजा दिवि द्युलोके श्रवः कीर्त्तिमजरं शाश्वतीमाततान। विस्तारितवान्। गवादिप्रतिग्रहीताहं स्वर्गे कीर्त्तिमकरवमित्यर्थः॥

॥ अथ तृतीया ॥

उप॑ मा श्या॒वाः स्व॒नये॑न द॒त्ता व॒धूमं॑तो॒ दश॒ रथा॑सो अस्थुः।
ष॒ष्टिः स॒ह॒स्रमनु॒ गव्य॒मागा॒त्सन॑त्क॒क्षीवाँ॑ अभिपि॒त्वे अह्ना॑म्॥३॥

उप॑। मा॒। श्या॒वाः। स्व॒नये॑न। द॒त्ताः। व॒धूऽमं॑तः। दश॑। रथा॑सः। अ॒स्थुः।
ष॒ष्टिः। स॒ह॒स्रं। अनु॑। गव्य॑ं। आ। अ॒गा॒त्। सन॑त्। क॒क्षीवा॑न्। अ॒भि॒ऽपि॒त्वे। अह्ना॑म्॥३॥

स्वनयेन दत्ताः श्यावास्तद्वर्णाश्वैर्युक्तत्वात् श्यावा वधूमंत आरूढाभिर्वधूभिस्तद्वंतो दश एतत्संख्याका रथासो रथा उपास्थुः। उपस्थिताः। गव्यशब्दो गोसमूहवाची। षष्टिः सहस्रमनु गव्यं षष्ट्यधिकं सहस्रं गवां समूहोऽन्वागात्। आगतः। तत आत्मानं परोक्षेण ब्रवीति। तत्सर्वं प्रतिगृह्यायं कक्षीवानह्नां दिवसानां मध्येऽभिपित्वे सन्निहितेऽहनि सनत्। स्वीकृतं रथवध्वादिकं स्वपित्रे समर्पयति स्वयं वा स्वीकरोति। अभिपित्वशब्द आसन्नकालवाची प्रपित्वशब्द इतिवत्। स च प्रपित्वेऽभीक इत्यासन्नस्येति यास्केनोक्तत्वादासन्नवचनः। नि॰ ३. २०.। उपसर्गभेदेऽप्यर्थाभेदः॥

॥ अथ चतुर्थी ॥

च॒त्वा॒रिं॒शद्दश॑रथस्य॒ शोणा॑ः स॒ह॒स्रस्याग्रे॒ श्रेणिं॑ नयंति।
म॒द॒च्युत॑ः कृश॒नाव॑तो॒ अत्या॑न्क॒क्षीव॑ंत॒ उद॑मृक्षंत प॒ज्राः॥४॥

च॒त्वा॒रिं॒शत्। दश॑ऽरथस्य। शोणा॑ः। स॒ह॒स्र॑स्य। अग्रे॑। श्रेणि॑ं। न॒यं॒ति॒।
म॒द॒ऽच्युत॑ः। कृश॒न॒ऽव॑तः। अत्या॑न्। क॒क्षीव॑ंतः। उत्। अ॒मृ॒क्षं॒त॒। प॒ज्राः॥४॥

दशरथस्य दशसंख्याकरथवतः सहस्रस्य सहस्रसंख्याकानुचरोपेतस्य कक्षीवतो गोयूथसहस्रस्य वाग्रे पुरस्तात् शोणा शोणवर्णोपेता अश्वाश्चत्वारिंशत्

एकैकस्य रथस्य चतुष्टये सति दशरथानां मिलित्वा चत्वारिंशदश्वा भवंति । तेऽपि श्रेणिं पंक्तिमाश्रित्य नयंति । रथानभिमतदेशं प्रापयंति । युक्ताश्वनियुक्तान् रथान् श्रेणिं श्रेणीभावं नयंति । प्रापयंति । एकैकं रथं चत्वारश्चत्वारः पंक्त्याकारेण वहंतीत्यर्थः । अथ तान् कक्षीवंतः । कक्ष्याश्वसंबंधिनी रज्जुः । कक्ष्या रज्जुरश्वस्येति यास्केनोक्तत्वात् । ताभिस्तद्वंतः । यद्वा अंगिरसः पुत्राः सर्वेऽपि कक्षीवंतः । अथवा कक्षीवदनुचराः सर्वेऽपि छत्रिन्यायेन कक्षीवंतः । पज्रा घासाद्यन्नवंतः संतो मदच्युतो मदस्राविण उद्वृत्तान् शत्रूणां मदस्य च्यावयितृन्वा कृशनावतः सुवर्णमयनानाभरणयुक्तान् । कृशनमिति हिरण्यनाम कृशनं लोहमिति तन्नामसु पाठात् । सुवर्णाभरणोपेतानत्यान् सततगमनशीलानश्वानुदमृक्षंत । अध्वश्रमजनितस्वेदापनयनायोत्कृष्टं मार्जयंति ॥

॥ अथ पंचमी ॥

पूर्वामनु प्रयतिमाददे वस्त्रीन्युक्ताँ अष्टावरिधायसो गाः ।
सुबंधवो ये विश्या इव व्रा अनस्वंतः श्रव ऐषंत पज्राः ॥ ५ ॥
पूर्वां । अनु । प्रऽयतिं । आ । ददे । वः । त्रीन् । युक्तान् । अष्टौ । अरिऽधायसः । गाः ।
सुऽबंधवः । ये । विश्याःऽइव । व्राः । अनस्वंतः । श्रवः । ऐषंत । पज्राः ॥ ५ ॥

इदानीमानीतं धनं बंधुभ्यो निवेदयन्नाह । हे सुबंधवः पूर्वां प्रयतिं पूर्वं प्रदानमनु तमनुसृत्य वक्ष्यमाणानि रथादीनि युष्मदर्थमाददे । स्वीकृतवानस्मि । यद्वा पूर्वां प्रयतिं प्रदेयं रथादिकमनु दानक्रमेणैवाददे । प्रतिगृहीतवानस्मि । कानि तानीति । त्रीनष्टौ च युक्तान् चतुर्भिश्चतुर्भिरश्वैर्धनैर्वा युक्तान् रथानिति शेषः । अत्र संख्यापृथक् निर्देशो न विवक्षितः । तथारिधायसोऽरिभिरीश्वरैर्धारणीया बहुमूल्या असंख्याता गाश्चाददे । अत्र वक्ष्यमाणानि पूर्वं प्रतिगृहीतादधिकानीति युक्तं । पूर्वमेव पित्रे निवेदितानां पुनर्बंधुभ्यो निवेदनासंभवात् वधूमंतो दश रथासो अस्थुरिति दशानां रथानामुक्तत्वादत्र च त्रीनष्टावित्येकादशानां वक्ष्यमाणत्वाद्वधूविशिष्टानामन्येभ्यो दातुमनुचितत्वाच्चान्यानीति युक्तं । उक्तानामेवानुवदनपक्षे दश वधूयुक्ता रथा एको धनपूर्ण इति विवेकः । उक्तानामेव रथादीनां पुनरभिधानं प्रकृष्टत्वज्ञापनार्थं सर्वे ब्राह्मणा आगता वसिष्ठश्चागत इतिवत् । इदानीं परोक्षेणाह । सुबंधवः शोभना विद्यायोनिसंबंधिनो

येषां ते तथोक्ताः । यद्वा शोभनबांधवोपेताः परस्परमनुरागयुक्ता इत्यर्थः । विशः प्रजाः । तत्र भवा विश्याः । व्रियंत इति व्रा व्राताः । तकारलोपश्छांदसः । विश्यां व्राता यथा परस्परमनुरागवंतस्तथैवैतेऽपीत्यर्थः । पज्रा अन्नवंतोऽंगिरसः संतानप्रभवा ये संति ते सर्वे सुबंधवोऽनस्वंतः शकटवंतो हविर्धानशकटोपलक्षितसोमयागवंतः संतः श्रवः सर्वत्र श्रूयमाणां कीर्त्तिमैषंत । इच्छंति इच्छंतु वा । तदर्थमादद इति शेषः ॥

॥ अथ षष्ठी ॥

आगधिता परिगधिता या कशीकेव जंगहे ।
ददाति मह्यं यादुरी याशूनां भोज्या शता ॥ ६ ॥

आऽगधिता । परिऽगधिता । या । कशीकाऽइव । जंगहे ।
ददाति । मह्यं । यादुरी । याशूनां । भोज्या । शता ॥ ६ ॥

संभोगाय प्रार्थितो भावयव्यः स्वभार्या रोमशामप्रौढेति बुद्ध्या परिहसन्नाह । भोज्या भोगयोग्यैषागधिता आ समंताद्गृहीता स्वीकृता । तथा परिगधिता परितो गृहीता । आदरातिशयाय पुनर्वचनं । गध्यं गृह्णातेरिति यास्कः । नि॰ ५. १५. । यद्वा । आगधिता आ समंतान्मिश्रयंती । आंतरं प्रजननेन वाह्यं भुजादिभिरित्यर्थः । गध्यतिर्मिश्रीभावकर्मेति यास्कः । नि॰ ५. १५. । पूर्वस्मिन् पक्षे पुरुषस्य प्राधान्यं । उत्तरस्मिंस्तु योषित इति भेदः । कीदृशी सा । या जंगहे । अत्यर्थं गृह्णाति कदाचिदपि न मुंचति । अत्यागे दृष्टांतः । कशीकेव । कशीका नाम सूतवत्सा नकुली । सा यथा पत्या सह चिरकालं क्रीडति न कदाचिदपि विमुंचति । तथैषापि । किंच भोज्यैषा यादुरी । यादुरित्युदकनाम । रेतोलक्षणमुदकं प्रभूतं ददातीति यादुरी बहुरेतोयुक्तेत्यर्थः । तादृशी सती याशूनां संभोगानां । यश इति प्रजनननाम । तत्संबंधीनि कर्माणि याशूनि भोगाः । तेषां शता शतान्यसंख्यातानि मह्यं ददाति ॥

रोमशा नाम बृहस्पतेः पुत्री ब्रह्मवादिनी परिहसंतं स्वपतिं प्रत्याह ॥

॥ अथ सप्तमी ॥

उपोप मे परा मृश मा मे दभ्राणि मन्यथाः ।
सर्वाहमस्मि रोमशा गंधारीणामिवाविका ॥ ७ ॥

उपऽउप। मे। परा। मृश। मा। मे। दभ्राणि। मन्यथाः।
सर्वा। अहं। अस्मि। रोमशा। गंधारीणांऽइव। अविका ॥ ७ ॥

भो पते मे मां। द्वितीयार्थे चतुर्थी। उपोप। द्वितीय उपशब्दः पादपूरणः। उपेत्य परामृश। सम्यक् स्पृश। भोगयोग्यामवगच्छेत्यर्थः। यद्वा मे मम गोपनीयमंगमुपोप परामृश। अत्यंतमांतरं स्पृश। परामर्शाभावशंकां निवारयति। मे मदंगानि रोमाणि दभ्राणि मा मन्यथाः। अल्पानि मा बुध्यस्व। दभ्रमर्भकमित्यल्पस्येति दभ्रं दभ्नोतेरिति यास्कः। नि° ३. २०.। अदभ्रत्वमेव विशदयति। अहं रोमशा बहुरोमयुक्तास्मि। यतोऽहमीदृशी अतः सर्वा संपूर्णावयवास्मि। रोमशत्वे दृष्टांतः। गंधारीणामविकेव। गंधारा देशाः। तेषां संबंधिन्यविजातिरिव। तद्देशस्था अवयो मेषा यथा रोमशाः। तथाहमस्मि। यद्वा गंधारीणां गर्भधारिणीनां स्त्रीणामविकात्यर्थं तर्पयंती योनिरिव। तासामा प्रसवं रोमादिविकर्तनस्य शास्त्रे निषिद्धत्वाद्योनी रोमशा भवति। अतः सोपमीयते। यतोऽहमीदृशी अतो मामप्रौढां मावबुध्यस्वेत्यर्थः ॥

॥ इति द्वितीयस्य प्रथम एकादशो वर्गः ॥

॥ इति प्रथमे मंडलेऽष्टादशोऽनुवाकः ॥

एकोनविंशेऽनुवाके सप्त सूक्तानि। तत्राग्निं होतारमिति प्रथमं सूक्तमेकादशर्चं दिवोदासपुत्रस्य परुच्छेपस्यार्षमाग्नेयमात्यष्टं। स हि शर्ध इत्यस्याः षट्सप्तत्यक्षरातिधृतिः। उत्कृत्यभिकृतिसंकृतिविकृत्याकृतिप्रकृतिकृत्यतिधृतिधृत्यत्यष्ट्यष्टिषु चतुरुत्तरशताक्षरमारभ्य चतुर्णां परित्यागेनैकैकमुक्तं छंदो जायते। तथा सत्यत्यष्ट्यतिधृती उक्तसंख्योपेते स्यातां। एतत्सर्वं छंदोग्रंथे चतुःशतमुत्कृतिरित्यादिसूत्रैः प्रतिपादितं। पि° ४. १.॥ तथा चानुक्रांतं। अग्निमेकादश परुच्छेपो दैवोदासिराग्नेयं तु पारुच्छेपं सर्वमात्यष्टं तत्रातिधृतिः षष्ठीति। सूक्तस्य विशेषविनियोगो लैंगिकः। दशरात्रस्य षष्ठेऽहनि प्रातःसवने प्रस्थितयाज्यानां पुरस्तादन्या ऋचः कृत्वा प्राकृताभिश्च सह यष्टव्यं। तत्राग्नीध्रस्यैषा प्रथमा। षष्ठस्य प्रातःसवन इति खंडे सूचितं। अग्निं होतारं मन्ये दास्वंतं दध्यङ् ह मे जनुषं पूर्वो अंगिराः। आ° ८. १.। इति ॥

॥ सैषा प्रथमा ॥

अग्निं होतारं मन्ये दास्वंतं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसं ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु वष्टि शोचिषाजुह्वानस्य सर्पिषः ॥ १ ॥

अग्निं । होतारं । मन्ये । दास्वंतं । वसुं । सूनुं । सहसः । जातऽवेदसं ।
विप्रं । न । जातऽवेदसं ॥ यः । ऊर्ध्वया । सुऽअध्वरः । देवः । देवाच्या । कृपा ।
घृतस्य । विऽभ्राष्टिं । अनु । वष्टि । शोचिषा । आऽजुह्वानस्य । सर्पिषः ॥ १ ॥

अग्निं सर्वासां देवसेनानामग्रण्यं यज्ञेष्वग्रं नीयमानं वा होतारमस्मद्यागं प्रति देवानामाह्वातारं यद्वा होमनिष्पादकं होतारं । जुहोतेर्होतेत्यौर्णवाभ इति यास्कः । नि॰ ७. १५. । अग्निमद्य होतारमवृणीतेति श्रुतेः । अग्निमग्र आवहेति चाग्नेराह्वातृत्वं प्रसिद्धं । अग्निं होतारं मन्ये । एवं प्रतिविशेषणं मन्य इति संबंधः । यद्वा यागनिष्पत्तेरेवापेक्षितत्वादेतदेव विधेयविशेषणं । इतराणि वक्ष्यमाणविशेषणानि स्तुतिपराणि । दास्वंतं । अतिशयेन दानवंतं । वसुं । सर्वेषां निवासहेतुं । सहसः सूनुं । बलस्य पुत्रं । अग्निमंथनकाले बलेन मथ्यमान उत्पद्यत इति पुत्रत्वमुपचर्यते । जातवेदसं । जातानां वेदितारं जातप्रज्ञं जातबलं वा । जातवेदःशब्दो यास्केन बहुधा निरुक्तः । अग्नेर्जातवेदस्त्वे दृष्टांतः । विप्रं न जातवेदसं । जातविद्यं मेधाविनं ब्राह्मणमिव । तं यथा बहुमन्यंते तथा त्वामपि मन्ये । स्तौमीत्यर्थः । उक्तगुणविशिष्टो यो देवः स्वध्वरः शोभनयज्ञवान् यज्ञं सम्यक् निर्वहन् ऊर्ध्वयोन्नतयोत्कृष्टया देवाच्या देवान्पूजयंत्या देवान्प्रत्यक्तया वा कृपा कृपया सामर्थ्यलक्षणया । देवान्प्रत्यक्तया कृपेति यास्कः । नि॰ ६. ८. । तेभ्यो हविर्वहनबुद्ध्या युक्तः सन् आजुह्वानस्य आ समंताद्धूयमानस्य सर्पिषः सरणशीलस्य घृतस्य विलेपनेन दीप्तस्याज्यस्य विभ्राष्टिं विशेषेण भ्राजमानमनु स्वयमपि तदाज्यं शोचिषा ज्वालया वष्टि । कामयते । स्वीकरोतीत्यर्थः ॥

॥ अथ द्वितीया ॥

यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमंगिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः ।
परिज्मानमिव द्यां होतारं चर्षणीनां ।
शोचिष्केशं वृषणं यमिमा विशः प्रावंतु जूतये विशः ॥ २ ॥

यजिष्ठं। त्वा। यजमानाः। हुवेम। ज्येष्ठं। अंगिरसां। विप्र। मन्मऽभिः। विप्रेभिः। शुक्र। मन्मऽभिः॥ परिज्मानंऽइव। द्यां। होतारं। चर्षणीनां। शोचिःऽकेशं। वृषणं। यं। इमाः। विशः। प्र। अवंतु। जूतये। विशः॥२॥

हे विप्र मेधाविन् शुक्र दीप्तज्वालाग्ने यजिष्ठमतिशयेन यष्टृतमं त्वा त्वां यजमाना वयं यष्टारो हुवेम। आह्वयामः। यतो वयं यजमाना यतश्च त्वं यजिष्ठः अतो हुवेमेत्यभिप्रायः। कीदृशं त्वां। अंगिरसामंगिरोगोत्रोत्पन्नानां मध्ये ज्येष्ठं। यद्वांगाराणां मध्ये ज्येष्ठं ज्वालायुक्तत्वात्। अंगिरा अंगारा इति यास्कः। येऽंगारा आसंस्तेऽंगिरसोऽभवन्निति श्रुतेः। केन साधनेनेति तदुच्यते। मन्मभिर्मननसाधनैर्विप्रेभिर्विशेषेण प्रीणयितृभिर्मन्मभिर्मंत्रैः। यद्वा विप्रेभिर्मेधाविभिर्ऋत्विग्भिर्मन्मभिर्मंत्रैश्च सहिता वयमिति संबंधः। त्वदाह्वानानंतरं परिज्मानं परितो गच्छंतं द्यामिव सूर्यमिव होतारं देवानामाह्वातारं। केषामर्थे। चर्षणीनां। मनुष्यनामैतत्। मनुष्याणां यजमानानामर्थे। यद्वा चर्षणीनां पूर्वं मनुष्याणामेव सतां पश्चाद्यागादिसाधनेन देवत्वमापन्नानां देवानामाह्वातारं। तथा शोचिष्केशं। केशवदत्यंतायतज्वालोपेतं वृषणं वर्षितारं। एवंरूपं त्वां विशस्त्वामेव निविशमाना इमा विशो यजमानरूपाः प्रजा जूतये स्वर्गाद्यभिमतफलप्राप्तये प्रावंतु। प्रकर्षेण प्रीणयंतु। तादृशं त्वां हुवेमेति संबंधः॥

॥ अथ तृतीया ॥

स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहंतरः परशुर्न द्रुहंतरः।
वीळु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरं।
निःषहमाणो यमते नायते धन्वासहा नायते॥३॥

सः। हि। पुरु। चित्। ओजसा। विरुक्मता। दीद्यानः। भवति। द्रुहंऽतरः। परशुः। न। द्रुहंऽतरः॥ वीळु। चित्। यस्य। संऽऋतौ। श्रुवत्। वनाऽइव। यत्। स्थिरं। निःऽसहमानः। यमते। न। अयते। धन्वऽसहा। न। अयते॥३॥

स हि स एव पूर्वं स्तुत एवाग्निर्विरुक्मता विशेषेण रोचनवतौजसा ज्वालारूपेण बलेन पुरु चित् अत्यधिकमेव दीद्यानो दीप्यमानो द्रुहंतरो द्रोग्धॄणां छेदनाय प्रयुक्तः परशुर्न। परशुरिव। स यथामोघं हिनस्ति तथायमपि। किंच

यस्याग्नेः समृतौ संगतौ संयोगे वीळु चित् दृढमपि पाषाणादिकं ध्रुवत् गच्छेत् शीर्येत । तथा यत्स्थिरं यच्च पर्वतादि स्थिरमचलितं तदपि ध्रुवत् । वीड्विति दृढनाम । वीळु च्यौत्नमिति तन्नामसु पाठात् । तत्र दृष्टांतः । वनेव । उदक-मिव । उदकं यथाग्निसंयोगे शुष्यति तथेत्यर्थः । अत्यंतदृढं स्थिरमपि हिनस्ति अस्मद्द्रोग्धारं शत्रुं हिनस्तीति किमु वक्तव्यमित्यभिप्रायः । किंचायमग्निर्निःष-हमाणः शत्रून्निःशेषेणाभिभवन् यमते । उपरमते । शत्रुषु मध्ये क्रीडति । तानेव नाशयति । तथा कुर्वन् नायते । न गच्छति । शत्रोः सकाशान्न पलायते । तत्र दृष्टांतः । धन्वसहा न । धनुषा शत्रूनभिभवतीति धन्वसहा धानुष्कः । सहतेरसुन् छांदसोऽंत्यलोपः । स यथा शत्रोरभिमुखं विध्यति न पलायते तद्वदित्यर्थः । यद्वा दृढधनुर्वहनक्षमो धन्वसहः । अस्मिन्पक्षे पचाद्यच् । सुपां सुलुगित्याकारः । दृढधन्वा सन्नायते न चलति ॥

॥ अथ चतुर्थी ॥

दृळ्हा चिदस्मा अनु दुर्यथा विदे तेजिष्ठाभिररणिभिर्दाष्ट्यवसेऽग्नये दाष्ट्यवसे ।
प्र यः पुरूणि गाहते तक्षद्वनेव शोचिषा ।
स्थिरा चिदन्ना नि रिणात्योजसा नि स्थिराणि चिदोजसा ॥ ४ ॥

दृळ्हा । चित् । अस्मै । अनु । दुः । यथा । विदे । तेजिष्ठाभिः । अरणिऽभिः । दाष्टि । अवसे । अग्नये । दाष्टि । अवसे ॥ प्र । यः । पुरूणि । गाहते । तक्षत् । वनाऽइव । शोचिषा । स्थिरा । चित् । अन्ना । नि । रिणाति । ओजसा । नि । स्थिराणि । चित् । ओजसा ॥४॥

अस्मा अग्नये दृळ्हा चित् । दृळ्हान्येव सारवंति हवींष्यनुक्रमेण प्रतिमंत्रं दुः । ददति । ददातेर्लुङि गातिस्थेति सिचो लुक् । आत इति झेर्जुस् । यजमाना ददति । दाने दृष्टांतः । यथा विदे । विदुषे परमार्थदर्शिने यथोत्कृष्टानि धनानि वितरंति दानशीलाः । यद्वा । अयमग्निर्यथा विदे । विंदते । स्वातिरिक्तं हविर्देवेभ्यो दातुं लभते स्वीकरोति तथा दुरिति । विंदतेश्छांदसः शपो लुक् । लोपस्त आत्मनेपदेष्विति तलोपः । किंच सोऽग्निस्तेजिष्ठाभिररणिभिरत्यंततेजोयुक्तैर्मा-र्गैर्यज्ञादिरूपैर्दाष्टि । पूजितः सन् स्वर्गादिकं ददाति । दासृ दाने । शपो लुक् । किमर्थं । अवसे । तद्रक्षणाय । यद्वा तेजिष्ठाभिरतिशयेन तेजोवद्भिररणिभिर्गमनै-रितरदेवानुद्दिश्य यजमानेन दत्तं हविरवसे तेषां स्वीकाराय दाष्टि । अयमग्निर्द-

दाति । नयति । किंचाग्नये । इतरदेवताप्रदानसमयेऽपि यजमानोऽग्नयेऽग्नि-प्रीतये दाष्टि । प्रथमं ददाति । किमर्थं । अवसे । रक्षणार्थं । यद्ययमतृप्तः स्यात् इतरेभ्यो दत्तमपि स्वयं स्वीकुर्यात् तस्मादग्नये प्रयाजादिरूपेण ददातीत्यर्थः । किंच योऽग्निः पुरूणि बहूनि सामर्थ्यात् यजमानधनादीनि प्रगाहते । प्रविशति । प्रविश्य च वाश्यादिरूपया ज्वालया तष्टत् । तनूकरोति नाशयतीत्यर्थः । तत्र दृष्टांतः । वनेव । वृक्षादिसमूहानि वनानि यथा प्रविश्य तक्षति दहति तथेत्यर्थः । किंचायमग्निः स्थिरा स्थिराणि कठिनान्यन्नान्नानि व्रीह्यादीन्योजसा तेजोरूपया ज्वालया नि नितरां रिणाति । गच्छति । पचतीत्यर्थः । री गतिरेषणयोः क्र्यादिकः । प्वादीनां ह्रस्व इति ह्रस्वः । तथौजसा स्वकीयेन तेजसा स्थिराण्यपरिहरणीयानि पापान्यमित्राणि वा निरिणाति । निःशेषेण गच्छति । नाशयतीत्यर्थः ॥

॥ अथ पंचमी ॥

तम॑स्य पृ॒क्षमुप॑रासु धीमहि॒ नक्तं॒ यः सु॒दर्शं॑तरो॒ दिवा॑तरा॒दप्रा॑युषे॒ दिवा॑तरात् ।
आद॒स्यायु॒र्ग्रभ॑णवद्वी॒ळु शर्म॒ न सू॒नवे॑ ।
भ॒क्तमभ॑क्त॒मवो॒ व्यंतो॑ अ॒जरा॑ अ॒ग्नयो॒ व्यंतो॑ अ॒जराः॑ ॥ ५ ॥

तं । अ॒स्य॒ । पृ॒क्षं । उप॑रासु । धी॒म॒हि॒ । नक्तं॑ । यः । सु॒दर्शं॑ऽतरः । दिवा॑ऽतरात् । अप्र॑ऽआयुषे । दिवा॑ऽतरात् ॥ आत् । अ॒स्य॒ । आयुः॑ । ग्रभ॑णऽवत् । वी॒ळु । शर्म॑ । न । सू॒नवे॑ । भ॒क्तं । अभ॑क्तं । अवः॑ । व्यंतः॑ । अ॒जराः॑ । अ॒ग्नयः॑ । व्यंतः॑ । अ॒जराः॑ ॥ ५ ॥

अस्यास्मै पृक्षं हविर्लक्षणमन्नमुपरासु । उपरमंतेऽस्मिन् हवींषीत्युपरा वेदिसमीपभूमयः । तासु धीमहि । धारयामः । अस्येत्युक्तं कस्येत्याह । योऽग्निर्नक्तं रात्रौ दिवातरात् अह्नोऽपि सुदर्शतरः । अत्यर्थं सर्वैर्दर्शनीयो भवति । यतोऽयं रात्रौ सर्वेषु भावेषु तमसावृतत्वाददृश्यमानेष्वपि स्वयमत्यर्थं प्रकाशते । अतोऽस्मै धीमहि । पुनः कीदृशाय । दिवातरादह्नः सकाशादेवाप्रायुषे । प्रगतमायुर्यस्यासौ प्रायुः । न प्रायुरप्रायुः । तस्मै । असौ योऽस्तमेति स सर्वेषां भूतानां प्राणानादायास्तमेतीति श्रुते रात्रौ सर्वे भावा निद्रयावृतत्वात्प्रायुष इव भवंति । अयमग्निस्तु सर्वप्राणिप्राणापहर्तुः सूर्यस्य रात्रौ स्वस्मिन्नेव प्रवेशात्प्रकृष्टायुर्भवति । अतोऽपि धीमहि । किंच । आत् अत एव कारणात् यतोऽयं सुदर्शतरो

यतश्चायमप्रायुः । अतः कारणादस्यास्मै तदर्थमायुर्हविर्लक्षणमन्नं ग्रभणवत् ग्रहणयुक्तमभूत् । ग्रहणे दृष्टांतः । सूनवे पुत्राय पित्रोर्वीकु शर्म दृढं सुखसाधनं गृहं यथा ग्रहणवद्भवति तथेत्यर्थः । शर्मेति गृहनाम शर्म वर्मेति तन्नामसु पाठात् । इदानीमाहवनीयादिरूपेणाग्नेर्बहुत्वमपेक्ष्याह । एतेऽग्नयो भक्तं सेवमानमभक्तमसेवमानं च व्यंत एते प्राणिनोऽनुग्राह्या इति बुध्यमाना अवः । रक्षंति । यद्यपि विशेषेण प्राणिनो दाहपाकादिद्वारा रक्षंति तथाप्यस्ति यजमानेष्वतिशय इत्याह । व्यंतस्तैः प्रत्तं हविरश्नंत अजरा भवंति । स्वयं हविषाजराः संतो यजमानानप्यजरान्कुर्वंतीत्यर्थः ॥

॥ इति द्वितीयस्य प्रथमे द्वादशो वर्गः ॥

॥ अथ षष्ठी ॥

स हि शर्धो न मारुतं तुविष्वणिरप्नस्वतीषूर्वरास्विष्टनिरार्तनास्विष्टनिः ।
आदद्धव्यान्याददिर्यज्ञस्य केतुरर्हणा ।
अध स्मास्य हर्षतो हृषीवतो विश्वे जुषंत पंथां नरः शुभे न पंथां ॥ ६ ॥

सः । हि । शर्धः । न । मारुतं । तुविऽस्वनिः । अप्नस्वतीषु । उर्वरासु । इष्टनिः । आर्तनासु । इष्टनिः ॥ आदत् । हव्यानि । आऽददिः । यज्ञस्य । केतुः । अर्हणा । अध । स्म । अस्य । हर्षतः । हृषीवतः । विश्वे । जुषंत । पंथां । नरः । शुभे । न । पंथां ॥ ६ ॥

स हि स एव स्तुत्यतया प्रसिद्ध एवाग्निस्तुविष्वणिः । तुवीति बहुनाम । उरु तुवीति तन्नामसु पाठात् । बहुस्वनिः प्रभूतध्वनियुक्तो वर्तते । अत्यंतज्वलितेऽग्नौ वायुसंपर्कात् भुगिभुगिति ध्वनिरुत्पद्यते । ज्वलतीत्यर्थः । ध्वनने दृष्टांतः । मारुतं शर्धो न । मरुत्संबंधि बलमिव । मरुतां समूहो यथा ध्वनयति तथेत्यर्थः । कुत्रेति तदुच्यते । अप्नस्वतीषु खननप्रोक्षणादिकर्मोपेतासु । अप्न इति कर्मनाम । अप्नो दंस इति तन्नामसु पाठात् । उर्वरासूरुवरणयुक्तासु श्रेष्ठासु वेदिभूमिषु । कीदृशोऽयं । इष्टनिः । यष्टव्यः । औणादिकोऽनिक् तुगागमश्च । किंच आर्तनासु । आर्तान्करोत्यार्तयति । आर्तयंतीत्यार्तनाः पृतनाः । तासु । ण्यासश्रंथो युच् । पा॰ ३. ३. १०७. । वृषादित्वादाद्युदात्तत्वं । तासां जयायेष्टनिरिष्टव्यो यष्टव्यो वा । किंच । एवं स्वनयन्नग्निर्हव्याज्यपुरोडाशादीन्यादत् । अत्ति भक्षयति । छांदसो लुक् । यद्वा । आङ्पूर्वाद्ददातेराङो यमहन इति व्यत्ययेनात्म-

नेपदाभावः। गातिस्थेति सिचो लुक्। छांदसो ह्रस्वः। केवलादेव वा छंदस्यपि दृश्यत इत्यनजादेरप्याडागमः। अत एवानवग्रहः स एव शिष्यते॥ आददिः। सर्वत्र हविरादानशीलः। तथा यज्ञस्य केतुः प्रज्ञापकः केतुस्थानीयो वा। अर्हणा पूजनीयः॥ सुपां सुलुगिति सोराकारः। प्रत्ययाद्युदात्तत्वं छांदसं॥ किंच हर्षतो हविर्भक्षणादत्यंतहर्षयुक्तस्य यद्वाभिमतफलदानेन यजमानान्हर्षयतो हृषीवत आज्यस्वीकारेण हर्षयुक्तस्याग्नेः पंथां पंथानं मार्गं विश्वे सर्वे मनुष्या जुषंत। अप्रीणयन् असेवंत वा। किमर्थं। शुभे। शोभनाय। सुखप्राप्तये पंथानं सर्वैर्गंतव्यमैहिकामुष्मिकफलस्याग्नेरेव मार्गं सर्वेऽनुगच्छंति। अग्निमेव प्रीणयित्वा साधयंति। मार्गाश्रयणे दृष्टांतः। यथा लोके नरो मनुष्याः शुभे शोभनाय सुखप्राप्तये पंथानं सर्वैर्गंतव्यं निर्भयं प्रौढमार्गमिव॥

॥ अथ सप्तमी ॥

द्विता यदीं कीस्तासो अभिद्यवो नमस्यंत उपवोचंत भृगवो मथ्नंतो दाशा भृगवः।
अग्निरीशे वसूनां शुचिर्यो धर्णिरेषां।
प्रियाँ अपिधीँर्वनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः॥ ७॥

द्विता। यत्। ईं। कीस्तासः। अभिऽद्यवः। नमस्यंतः। उपऽवोचंत। भृगवः। मथ्नंतः। दाशा। भृगवः॥ अग्निः। ईशे। वसूनां। शुचिः। यः। धर्णिः। एषां। प्रियान्। अपिऽधीन्। वनिषीष्ट। मेधिरः। आ। वनिषीष्ट। मेधिरः॥ ७॥

यत् यं द्विता द्वित्वमापन्नं द्विप्रकारं श्रौतस्मार्तभेदेन द्वित्वमापन्नं। यद्वा। उपलक्षणमेतत्। आहवनीयादिरूपेण नानाविधं। यद्वा द्विता द्विविधायैहिकामुष्मिकफलायोभयाय॥ विभक्तेराजादेशः॥ ईमिममग्निं कीस्तासः कीर्तनं कुर्वतः स्तोतारः॥ पचाद्यचि छांदसं सत्वं॥ अभिद्यवोऽभितो द्योतमाना नमस्यंतो नमस्कारोपलक्षितमुपस्थानं कुर्वंतो भृगवो भृगुगोत्रोत्पन्ना महर्षय उपवोचंत। उपेत्य ब्रुवंति। किं कुर्वंतः। दाशा दानेन निमित्तभूतेन हविर्दानार्थं मथ्नंतः। अरण्यामग्निमंथनं कुर्वंतः। तथा भृगवो भ्रष्टारो हविषां पापानां वा। किंचाग्निः शुचिर्दीप्तो धर्णिर्धारणकुशलोऽयमग्निरेषां दीयमानानां वसूनां हविर्लक्षणानामीशे। ईष्टे समर्थो भवति॥ लोपस्त आत्मनेपदेष्विति तलोपः॥ यद्वा। एषां दृश्यमानानां मणिमुक्तादीनां वसूनामीशे। ईष्टे। समर्थो भवति प्रदातु-

मिति शेषः । किंचायमग्निर्मेधिरः । मेधो यज्ञः । तद्वान् । स्वयं यष्टव्यत्वेन प्रधानभूतः सन् प्रियान् स्वप्रीतिहेतूनाज्यादीनपिधीन् पर्याप्तिपर्यंतं दत्तान्वनिषीष्ट । संभक्तवान् । संभजतां वा । तथा मेधिरो मेधावानसावावनिषीष्ट । अन्यदेवताकेष्वपि यज्ञेषु स्वयमाज्यभागप्रयाजादिरूपं हविः संभजते ॥

॥ अथाष्टमी ॥

विश्वा॑सां त्वा वि॒शां पतिं॑ हवामहे॒ सर्वा॑सां समा॒नं दंप॑तिं भु॒जे स॒त्यगि॑र्वाहसं भु॒जे ।
अति॑थिं॒ मानु॑षाणां पि॒तुर्न यस्या॑स॒या ।
अ॒मी च॒ विश्वे॑ अ॒मृता॑स॒ आ वयो॑ ह॒व्या दे॒वेष्वा वयः॑ ॥ ८ ॥

विश्वा॑सां । त्वा॒ । वि॒शां । पतिं॑ । ह॒वा॒म॒हे॒ । सर्वा॑सां । स॒मा॒नं । दंऽप॑तिं । भु॒जे । स॒त्यऽगि॑र्वाहसं । भु॒जे ॥ अति॑थिं । मानु॑षाणां । पि॒तुः । न । यस्य॑ । आ॒स॒या । अ॒मी इति॑ । च॒ । विश्वे॑ । अ॒मृता॑सः । आ । वयः॑ । ह॒व्या । दे॒वेषु॑ । आ । वयः॑ ॥ ८ ॥

विश्वासां सर्वासां विशां प्रजानां यजमानानां पतिमभिमतफलदानेन पालकं हवामहे । आह्वयामः । न केवलं यजमानानां किंतु सर्वासां प्रजानां समानमेकरूपं । दहनपचनाद्युपकारस्य सर्वेषां समत्वात् । तथा दंपतिं गार्हपत्यादिरूपेण गृहस्य पालकं ॥ दम इति गृहनाम दमे कृत्तिरिति तन्नामसु पाठात् । अकारलोपश्छांदसः ॥ किमर्थं । भुजे भोगाय हवामहे । आह्वयामः । पुनः स एव विशेष्यते । सत्यगिर्वाहसं यथार्थभूतानामविसंवादिफलानां स्तुतिरूपाणां गिरां वोढारं । यद्वा गिरो मंत्ररूपा वहंतीति गिर्वाहस ऋत्विजः । सत्या अविसंवादिफला गिर्वाहसो यस्य तं तादृशं हवामह इति शेषः ॥ वहिहाधाञ्भ्य इत्यसुन् । णिदित्यनुवृत्तेरुपधावृद्धिः ॥ पुनः कीदृशं । मानुषाणां मनुष्याणामतिथिमतिथिवत्पूज्यं दर्शादितिथिमपेक्ष्यागंतारं वा । किंचास्याग्नेरासया समीपे ॥ आसेत्यंतिकनाम । आसा अंबरमिति तन्नामसु पाठात् ॥ तत्समीपेऽमी विश्वेऽमृतासो हविर्भोक्तृत्वेन प्रसिद्धाः सर्वे देवा अया गच्छंति ॥ उपसर्गवशाद्योग्यक्रियाध्याहारः ॥ किमर्थं । वयो हविर्लक्षणान्नमुद्दिश्य । अग्निमुखादेवेतरेभ्यो दीयमानत्वात् । तत्र दृष्टांतः । पितुर्न । पितुरंतिके पुत्रादयो यथान्नाद्यर्थं सेवंते तद्वत् । किंच वयो नेतार ऋत्विजोऽपि देवेष्वितरेष्विज्यमानेषु मध्य हवींषि ददत्यग्नये ॥ वेतेरौणादिको डिः । विचि वा गुणः ॥

॥ अथ नवमी ॥

त्वमग्ने सहसा सहंतमः शुष्मिंतमो जायसे देवतातये रयिर्न देवतातये।
शुष्मिंतमो हि ते मदो द्युम्निंतम उत क्रतुः।
अध स्मा ते परि चरंत्यजर श्रुष्टीवानो नाजर ॥ ९॥

त्वं। अग्ने। सहसा। सहन्ऽतमः। शुष्मिन्ऽतमः। जायसे। देवऽतातये। रयिः। न। देवऽतातये॥ शुष्मिन्ऽतमः। हि। ते। मदः। द्युम्निन्ऽतमः। उत। क्रतुः। अध। स्म। ते। परि। चरंति। अजर। श्रुष्टीऽवानः। न। अजर ॥ ९॥

हे अग्ने त्वं सहसा बलेन सहंतमोऽतिशयेन शत्रूणामभिभविता। तथा शुष्मिंतमोऽतिशयेन तेजस्वी जायसे॥ सहेरौणादिकः कनिन्। नाद्घस्येति नुट्॥ किमर्थं। देवतातये। देवानां विस्तारयुक्ताय यागाय तदर्थं। यज्ञनामैतत्। यद्वा। उक्तगुणविशिष्टः स जायसे। अरण्योरुत्पद्यसे। यज्ञार्थत्वे दृष्टांतः। रयिर्न देवतातये। धनं यथा यज्ञार्थमुत्पद्यते। तथा चोक्तं यज्ञार्थं द्रव्यमुत्पन्नमिति। किंच ते तव मद आज्यस्वीकारजनितो हर्षः शुष्मिंतमः। अतिशयेन बलवान्। हिशब्दः प्रसिद्धौ। आज्येनाग्नेर्मदो भवतीति प्रसिद्धं। अपि च ते क्रतुः कर्मविशेषोऽपि द्युम्निंतमः। यशोयुक्तोऽन्नयुक्तो वा खलु॥ द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः। नि° ५.५.॥ अध अतः कारणात् अजर हे जरारहिताग्ने ते त्वां परिचरंति यजमानाः। तत्र दृष्टांतः। श्रुष्टीवानो न। दूता इव। ते यथा वार्ताविशेषप्रदानेन राजानं सेवंते तद्वत्॥ छंदसीवनिपाविति वनिप्। छांदसं प्रत्ययाद्युदात्तत्वं॥ अजर। भक्तानामजरयितुः॥ अंतर्भावितण्यर्थात्पचाद्यच्॥ यद्वा। अजर अस्तोतः। जरा स्तुतिः। असौ न कस्यापि स्तोता भवति किंतु सर्वैः स्वयं स्तूयते। तादृशं त्वां परिचरंतीत्यर्थः॥

॥ अथ दशमी ॥

प्र वो महे सहसा सहस्वत उषर्बुधे पशुषे नाग्नये स्तोमो बभूत्वग्नये।
प्रति यदीं हविष्मान्विश्वासु क्षासु जोगुवे।
अग्रे रेभो न जरत ऋषूणां जूर्णिर्होत ऋषूणां ॥ १०॥

प्र । वः । महे । सहसा । सहस्वते । उषःऽबुधे । पशुऽसे । न । अग्नये ।
स्तोमः । बभूतु । अग्नये ॥ प्रति । यत् । ईं । हविष्मान् । विश्वासु । क्षासु । जोगुवे ।
अग्रे । रेभः । न । जरते । ऋषूणां । जूर्णिः । होता । ऋषूणां ॥ १० ॥

हे उद्गात्रादयः स्तोतारः वो युष्माकं संबंधि स्तोमः स्तोत्रमग्नये प्रबभूतु । प्रीणयितुं समर्थं भवतु ॥ छांदसः शपः श्लुः । अत्वं चाभ्यासस्य । भूसुवोस्तिङीति गुणाभावः ॥ कीदृशायाग्नये । महे । महते पूज्याय । सहसा पराभिभवसामर्थ्येन तद्वते । उषर्बुधे । उषःकाले प्रबुध्यमानाय ॥ अहरादीनां पत्यादिषूपसंख्यानमिति रत्वं ॥ पशुषे । पशुफलप्रदाय । नशब्दोऽपिशब्दार्थः । यद्वा । पशुषे पशुप्रदात्रे प्रभवे यथा स्तुतिः क्रियते तद्वत् । किमर्थमिति तदुच्यते । ईं एनमग्निं प्रति लक्षीकृत्य हविष्मान् घृतादिहविर्युक्तो यजमानो विश्वासु क्षासु सर्वासु निवासभूतासु वेदिभूमिषु जोगुवे । अत्यर्थं गच्छति ॥ गुवतेर्यङ्लुगंताच्छांदसो लिट् । व्यत्ययेनात्मनेपदं । अमंत्र इति पर्युदासादामभावः । क्षेति भूनाम । क्षा क्षामेति तन्नामसु पाठात् ॥ ऋषूणामागंतॄणां देवानां मध्ये श्रेष्ठमग्निं जूर्णिः स्तुतिकुशलो होताग्र इतरदेवेभ्यः पूर्वं जरते । स्तौति । तत्र दृष्टांतः । ऋषूणां महतां धनवतामग्रे रेभो न । वंदीव ॥ ऋषी गतौ । औणादिकः कुप्रत्ययः । नामन्यतरस्यामिति नाम उदात्तत्वं ॥ यद्वा ऋषूणामित्येतद्धोतृविशेषणं । ऋषूणां ज्ञानवतां मध्ये श्रेष्ठोऽयं होतेत्यर्थः ॥

॥ अथैकादशी ॥

स नो नेदिष्ठं ददृशान आ भराग्ने देवेभिः सचनाः सुचेतुना महो रायः सुचेतुना ।
महि शविष्ठ नस्कृधि संचक्षे भुजे अस्यै ।
महि स्तोतृभ्यो मघवन्त्सुवीर्यं मथीरुग्रो न शवसा ॥ ११ ॥

सः । नः । नेदिष्ठं । ददृशानः । आ । भर । अग्ने । देवेभिः । सऽचनाः । सुऽचेतुना ।
महः । रायः । सुऽचेतुना ॥ महि । शविष्ठ । नः । कृधि । संऽचक्षे । भुजे । अस्यै ।
महि । स्तोतृऽभ्यः । मघऽवन् । सुऽवीर्यं । मथीः । उग्रः । न । शवसा ॥ ११ ॥

हे अग्ने स त्वं नो नेदिष्ठमत्यंतसमीपे ददृशानो वेद्यां ददृशानो दीप्तत्वेन दृश्यमानो देवेभिः सचना इतरैर्देवैः समानान्नः । अग्निमुखेनैवेतरेषां हविःस्वी-

कारात्समानान्तत्वं। सुचेतुना शोभनेन चेतनेन चेतसा वा। पुनस्तदेव विशेष्यते। सुचेतुना शोभनचेतोवता मया ॥ औणादिक उः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥ युक्तेन। त्वदायत्ते मय्यनुग्रहयुक्तेनेत्यर्थः। तादृशस्त्वं महः पूजनीयानि रायो धनान्याभर। अस्माकमाहर। हे अग्ने शविष्ठ बलवन्नग्ने नोऽस्मभ्यं महि महदन्नं महतीं कीर्तिं वा कृधि। कुरु। संपादय। शविष्ठेति संबोधितत्वात्तदेव प्रार्थ्यत इति गम्यते। किमर्थं। संचक्षे। सम्यग्दर्शनीयत्वाय। अस्या अस्याः पृथिव्याः संबंधिने भुजे भोगाय। यद्वा संचक्षे भुज इति सामानाधिकरण्यं। सम्यग्दर्शनीयाय भोगायेत्यर्थः। न केवलं यजमानेभ्योऽस्मभ्यमेव। अपि तु स्तोतृभ्यः स्तोत्रकर्तृभ्योऽपि। हे मघवन् अन्नवन्नग्ने सुवीर्यं शोभनपुत्रभृत्याद्युपेतं धनं शोभनसामर्थ्यं वा कृधि। कुरु। किंच शवसा बलेन युक्तः सन् मथीः। अस्मद्विरोधिनो नाशय॥ लुङि ह्म्यंतक्षणेति वृद्धिप्रतिषेधः। कारकपक्ष औणादिक ईकारः। आद्युदात्तश्छांदसः॥ यद्वा मथीर्मथनवांस्त्वमस्मदर्थं शवसा बलेन युक्तो भवेति शेषः। तत्र दृष्टांतः। उग्रो न शवसा। यथा कश्चित् क्रूरः शवसा बलेन मथीर्भवति तद्वत् ॥

॥ इति द्वितीयस्य प्रथमे त्रयोदशो वर्गः ॥

अयं जायतेत्यष्टर्चं द्वितीयं सूक्तं। अयं जायताष्टावित्यनुक्रमणिका। परुच्छेप ऋषिः। सर्वमात्यष्टमित्युक्तत्वादत्यष्टिश्छंदः। आग्नेयं त्विति तुशब्दस्योक्तत्वादिदमादिमं चाग्नेयं॥ पृष्ठ्यस्य षष्ठेऽहन्येतत्सूक्तमाज्यशस्त्रत्वेन विनियुक्तं। सूचितं च षष्ठस्येति खंडे। अयं जायत मनुषो धरीमणीत्याज्यं। आ॰ ८. १.। इति ॥

॥ तत्र प्रथमा ॥

अयं जायत मनुषो धरीमणि होता यजिष्ठ उशिजामनु व्रतमग्निः स्वमनु व्रतं।
विश्वश्रुष्टिः सखीयते रयिरिव श्रवस्यते।
अदब्धो होता नि षददिळस्पदे परिवीत इळस्पदे ॥ १ ॥

अयं। जायत। मनुषः। धरीमणि। होता। यजिष्ठः। उशिजां। अनु। व्रतं।
अग्निः। स्वं। अनु। व्रतं ॥ विश्वऽश्रुष्टिः। सखिऽयते। रयिःऽइव। श्रवस्यते।
अदब्धः। होता। नि। सदत्। इळः। पदे। परिऽवीतः। इळः। पदे ॥ १ ॥

अयमग्निर्मनुषो मनुष्यस्याध्वर्योः सकाशाज्जायत। अरणिमंथनेनोत्पन्नः। कीदृशोऽयं। होता देवानामाह्वाता यजिष्ठोऽतिशयेन यष्टृतमः। किमर्थमुत्पन्न इति। उशिजां फलस्य कामयितॄणां यजमानानां व्रतं सोमयागादिरूपं कर्मानु लक्षीकृत्य। न केवलं परार्थमेव अपि त्वयमर्थः। स्वं व्रतमनु स्वकीयं हविःस्वीकारादिरूपं कर्मानुलक्ष्य। पुनः स एव विशेष्यते। विश्वश्रुष्टिः। विश्वविषयकर्मवान्। कस्मै। सखीयते। सखित्वमात्मन इच्छते। तथा श्रवस्यते। अतिप्रसिद्धान्नमात्मन इच्छते यजमानाय रयिरिव धनस्थानीयो भवति। धनं यथा सख्यमन्नसमृद्धिं च साधयति तद्वदयमग्निरपि तस्मै द्वयं साधयतीत्यर्थः। किंचायमग्निरिळस्पद इडाया भूम्याः पदे॥ अंत्यलोपश्छांदसः॥ धरीमणि सारभूते स्थाने वेदिरूपे। वेदिमाहुः परमंतं पृथिव्या इति श्रुतेः। एतावती वै पृथिवीयावती वेदिरिति च। पुनस्तदेव विशिष्यते। इळस्पदे। इडादेवताया मनोः पुत्र्या गोरूपाया इडोपह्वानमंत्रप्रतिपादितायाः पदे पादन्यासप्रदेशे। इडा वै मानवी यज्ञानुकाशिन्यासीदितीडायाः पदे घृतवति स्वाहेति च श्रुतेः। निषदत्। निषीदति। कीदृशोऽयमग्निः। अदब्धः। केनाप्यहिंसितः। होता। होमनिष्पादकः। परिवीतः। ऋत्विग्भिः परिधिभिर्वा परितो वेष्टितः। एवंभूतः सन् निषदत्॥

॥ अथ द्वितीया ॥

तं यज्ञसाधमपि वातयामस्यृतस्य पथा नमसा हविष्मता देवताता हविष्मता।
स न ऊर्जामुपाभृत्यया कृपा न जूर्यति।
यं मातरिश्वा मनवे परावतो देवं भाः परावतः ॥ २ ॥

तं। यज्ञऽसाधं। अपि। वातयामसि। ऋतस्य। पथा। नमसा। हविष्मता। देवऽताता। हविष्मता॥ सः। नः। ऊर्जां। उपऽआभृति। अया। कृपा। न। जूर्यति। यं। मातरिश्वा। मनवे। पराऽवतः। देवं। भारिति भाः। पराऽवतः ॥ २ ॥

यज्ञसाधं यज्ञस्य साधकं॥ साध्नोतेः क्विपि कृदुत्तरपदप्रकृतिस्वरत्वं॥ तमग्निं वेद्यां स्थापितमपि वातयामसि। अपिः संभावनार्थः। आ परितोषं सेवामहे॥ वात गतिसुखसेवनयोः। चौरादिकः। इदंतो मसिः॥ केनोपायेनेति तदुच्यते। ऋतस्य पथा यागस्य मार्गेन यागानुष्ठानेन। यज्ञेन देवेभ्य इति श्रुतेर्यज्ञेन

देवस्य महती प्रीतिर्भवति। यद्वा। ऋतस्य यज्ञस्य पथा। मार्गस्तीर्थाख्यः पूर्वेणोत्करमपरेण प्रणीताः। आ॰ १. १.। इत्यादिसूत्रोक्तः। तेन मार्गेण गत्वा। पुनः केन। हविष्मताज्यादिप्रदेयद्रव्यवता नमसा नमस्कारोपलक्षणेन स्तोत्रेणोपस्थानेन वा। तदुभयेनेत्यर्थः। कुत्रेति तदुच्यते। हविष्मता हविष्मत्याज्यपुरोडाशादिबहुहविर्युक्ते देवताता देवानां विस्तारयुक्ते यज्ञे। किंच सोऽग्निर्नोऽस्मत्संबंधिनामूर्जा हविर्लक्षणानामन्नानामुपाभृत्युपाहरणे तत्स्वीकारविषये॥ उपाङ्पसृष्टाद्धरतेः क्तिन्। हृग्रहोर्भ इति भत्वं। सुपां सुलुगिति सप्तम्या लुक्। तादौ चेत्यनंतरस्य गतेः प्रकृतिस्वरत्वं॥ अया कृपानया सामर्थ्यलक्षणया कल्पनया हविःस्वीकरणरूपया न जूर्यति। यज्ञसमाप्तिपर्यंतं न नश्यति। अजरो वर्तत इत्यर्थः। स इत्युक्तं। क इत्याह। यमग्निं देवं द्योतनशीलं मातरिश्वांतरिक्षसंचारी वायुः पूर्वं मनवे मनोरर्थाय परावतोऽतिदूरं गतवत आदित्याद्वाः। अभासीत्। औचित्येन भूमौ स्थापितवानित्यर्थः। तद्वत्परावतो दूराद्देवमग्निमस्मद्देवयजनं प्रति स्थापयत्वित्यर्थः॥

॥ अथ तृतीया ॥

एवेन सद्यः पर्येति पार्थिवं मुहुर्गी रेतो वृषभः कनिक्रदद्दधद्रेतः कनिक्रदत्।
शतं चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः।
सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु॥ ३॥

एवेन। सद्यः। परि। एति। पार्थिवं। मुहुःऽगीः। रेतः। वृषभः। कनिक्रदत्। दधत्। रेतः। कनिक्रदत्॥ शतं। चक्षाणः। अक्षऽभिः। देवः। वनेषु। तुर्वणिः। सदः। दधानः। उपरेषु। सानुषु। अग्निः। परेषु। सानुषु॥ ३॥

अयमग्निरेवेन गमनसाधनेन गमनेन वा सद्योऽस्मदाह्वानानंतरं पार्थिवं पृथिवीसंबंधि स्थानं वेदिलक्षणमेव परि परितः। यद्वाभिमुख्यार्थो वा पर्येति। गच्छति। कीदृशोऽग्निः। मुहुर्गीः। सर्वदा गीयमानः। रेतःशब्देन तत्कार्यं हवीरूपमन्नमुच्यते। तद्वान्॥ मत्वर्थीयो लुप्यते॥ वृषभः कामानां वर्षिता कनिक्रदत् शब्दयन् पर्येति। पुनः स एव विशेष्यते। रेतो दधत्। आज्यादिस्वीकारेणात्यधिकं सामर्थ्यं दधानः कनिक्रदत् शब्दयन् पर्येतीति शेषः। पुनः स एव विशेष्यते। अयमग्निर्देवो वनेषु संभजनेषु स्तोत्रेषु निमित्तभूतेष्वक्षभिरक्ष-

स्थानीयाभिर्ज्वालाभिः शतं चक्षाणः सर्वतः प्रकाशमानः। यद्वा ज्वालोत्कर्षेण यजमानेन कृतं शतगुणितं प्रख्यापयन्। तथा तुर्वणिः शीघ्रगंता शत्रूणां हिंसको वा ॥ तुर्वणिस्तूर्णवनिरिति यास्कः। नि° ६. १४.॥ किंच सानुषु समुच्छ्रितेषु ॥ सानु समुच्छ्रितं भवतीति यास्कः। नि° २. २४.॥ तेषूपरेषु। उपरमंत एष्वग्नय इत्युपरा धिष्ण्या यजमानगृहा वा। तेषु सदो दधानः स्थानं धारयमाणोऽग्निः सद्यः पर्येतीति पूर्वेणान्वयः। किमर्थं। परेषूत्कृष्टेषु सानुषु समुच्छ्रितेषु कर्मसु हविःषु वा निमित्तभूतेषु ॥

॥ अथ चतुर्थी ॥

स सुक्रतुः पुरोहितो दमेदमेऽग्निर्यज्ञस्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेतति।
क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे।
यतो घृतश्रीरतिथिरजायत वह्निर्वेधा अजायत ॥ ४ ॥

सः। सुऽक्रतुः। पुरःऽहितः। दमेऽदमे। अग्निः। यज्ञस्य। अध्वरस्य। चेतति।
क्रत्वा। यज्ञस्य। चेतति ॥ क्रत्वा। वेधाः। इषुऽयते। विश्वा। जातानि। पस्पशे।
यतः। घृतऽश्रीः। अतिथिः। अजायत। वह्निः। वेधाः। अजायत ॥ ४॥

सोऽग्निः सुक्रतुः शोभनकर्मा पुरोहितः पुरो धार्यमाणः। यद्वा पुरोहितवद्यागनिर्वाहकः सन् दमे दमे तत्तद्यजमानगृहे सर्वेषु देवयजनेषु वाध्वरस्य नाशरहितस्य फलप्रदस्य यज्ञस्य तदर्थं चेतति। जानाति। प्रबुध्यत इत्यर्थः। किंचायं यजमानोऽपि क्रत्वा शोभनेन कर्मणा यज्ञस्य चेतति। कर्तव्यतामवजानाति। किंचायमग्निरपि क्रत्वा प्रकृष्टेन कर्मणा वेधा विविधानां फलानां कर्ता सन् इषूयते। इष्यत इतीषुरन्नमागमनं वा। तदिच्छते यजमानार्थं। विश्वा जातानि सर्वाणि संपादितानि हविरादीनि पस्पशे। अत्यर्थं स्पृशति। स्वीकरोति। यतोऽयं घृतश्रीर्घृतं सेवमानोऽतिथिरतिथिवत्पूज्यश्चाजायत। उत्पन्नः। यतः कारणात् घृतमत्यर्थं सेवमानः प्रवृद्धोऽभवत्। अतः पस्पश इत्यर्थः। एवमग्नौ प्रवृद्धे सति यजमानोऽपि वह्निर्हविषां वोढा वेधा विविधस्य फलस्य कर्तोत्पादयिताजायत। समर्थोऽभवत् ॥

॥ अथ पंचमी ॥

क्रत्वा यदस्य तविषीषु पृंचतेऽग्नेरवेण मरुतां न भोज्येषिराय न भोज्या ।
स हि ष्मा दानमिन्वति वसूनां च मज्मना ।
स नस्त्रासते दुरितादभिह्रुतः शंसादघादभिह्रुतः ॥ ५ ॥

क्रत्वा । यत् । अस्य । तविषीषु । पृंचते । अग्नेः । अवेन । मरुतां । न । भोज्या ।
इषिराय । न । भोज्या ॥ सः । हि । स्म । दानं । इन्वति । वसूनां । च । मज्मना ।
सः । नः । त्रासते । दुःऽइतात् । अभिऽह्रुतः । शंसात् । अघात् । अभिऽह्रुतः ॥ ५ ॥

यद्यस्मात्कारणात्सर्वे यजमानाः क्रत्वा प्रकृष्टेन कर्मणा हविःप्रदानादिरूपेणास्याग्नेस्तविषीषु प्रबलासु ज्वालास्ववेन तृप्तिनिमित्तेन भोज्या भक्ष्याणि पुरोडाशादीनि पृंचते । मिश्रयंति ॥ तविषीति कर्मनाम तविषी शुष्ममिति तन्नामसु पाठात् ॥ तत्र दृष्टांतः । मरुतां न भोज्या । वायूनां संबंधीनि व्रीह्याद्यन्नानीव । वायुषु मेघं निर्भिद्य वृष्टिं जनयत्सु सत्सु सस्यादिद्वारा व्रीह्यादिभोज्यानि यथा पृंचते तथेत्यर्थः । दाने दृष्टांतः । इषिराय न भोज्या । एषणयुक्ताय याचमानायार्थिने भोज्या भोग्यादीनि भक्ष्यादीनि यथा दीयंते तद्वत् ॥ इषिरशब्दो यास्केनैवं निरुक्तः । ईषणेन वैषणेन वा । नि॰ ४. ७. । इति ॥ अतः कारणात् स खलु यजमानो दानमिन्वति । हविःप्रदानं तस्मै व्याप्नोति । यद्वा स्वयमभिमतं दानमिन्वति ॥ इन्वतिर्व्याप्तिकर्मा । इन्वति ननक्षेति तत्कर्मसु पाठात् ॥ केन सामर्थ्येनेति । वसूनां च मज्मना । निवासयोग्यानां धनानामग्निना लब्धानां बलेनैव । यद्वा सोऽग्निर्वसूनां हविर्निवासयोग्यानां ज्वालारूपाणां धनानां मज्मना बलेन दानमिन्वतीति शेषः । किंच सोऽग्निरभिह्रुत आभिमुख्येन पापैः ह्रियमाणान् नोऽस्मान् दुरितात्पापात् त्रासते । त्रायते । तथा शंसादतिप्रभूतत्वेन शंसनीयात् । यद्वा हिंसकात् । अभिह्रुतोऽभितो ह्रियमाणादघात् दुःखात् तत्कारणात्पापाद्वा त्रासते । त्रायते ॥

॥ इति द्वितीयस्य प्रथमे चतुर्दशो वर्गः ॥

॥ अथ षष्ठी ॥

विश्वो॒ विहा॑या अर॒तिर्वसु॑र्दधे॒ हस्ते॑ दक्षि॑णे त॒रणि॒र्न शि॑श्रथच्छ्र॒वस्यया॒ न शि॑श्रथत्।
विश्वं॑स्मा॒ इदि॑षुध्यते॒ दे॑व॒त्रा ह॒व्यमोहि॑षे।
विश्वं॑स्मा॒ इत्सुकृते॒ वार॑मृण्वत्य॒ग्निर्द्वारा॒ व्यृ॑ण्वति ॥ ६ ॥

विश्वः॑। विऽहा॑याः। अ॒र॒तिः। वसुः॑। द॒धे। हस्ते॑। दक्षि॑णे। त॒रणिः॑। न। शि॒श्र॒थ॒त्। श्र॒व॒स्यया॑। न। शि॒श्र॒थ॒त् ॥ विश्वं॑स्मै। इत्। इ॒षुध्यते। दे॒व॒ऽत्रा। ह॒व्यं। आ। ऊ॒हि॒षे। विश्वं॑स्मै। इत्। सु॒ऽकृते॑। वारं॑। ऋ॒ण्व॒ति॒। अ॒ग्निः। द्वारा॑। वि। ऋ॒ण्व॒ति॒ ॥ ६ ॥

अयमग्निर्दक्षिणेऽभिमतं प्रदातुमुत्साहयुक्ते हस्ते वामेतरे यजमानाय दातव्यं धनं दधे। धारयति। कीदृशोऽयं। विश्वः। सर्वैर्गंतव्यः। यद्वा विश्वात्मकः। विहायाः। महान्॥ विहाया इति महन्नाम विहाया यह्व इति तन्नामसु पाठात्॥ अरतिः। ईश्वरोऽरममाणो वाप्रीतिः॥ अत्र वहिवस्यर्तिभ्यश्चिदित्यतिप्रत्ययः। चित्वद्भावादंतोदात्तः॥ धृत्वा च शिश्रथत्। धृतं हस्तं यजमानार्थं श्रथयति। ददाति॥ श्रथयतेर्लुङि चङि रूपं॥ तत्र दृष्टांतः। तरणिर्न। तरणिरिव तारकः सूर्य इव। स यथा स्वोपासकायाभिमतं हस्ते धृत्वा वितरति तद्वत्। यद्वा तरणिः सर्वस्य तारकः। न शिश्रथत्। यजमानं न श्रथयति न विमुंचति। किंच श्रवस्यया न शिश्रथत्। हवीरूपान्नेच्छयैव न शिश्रथत्। न विमुंचति। अयमनुग्रहेणैव पालयते हविःस्वीकारस्तु व्यपदेशमात्रेणेति भावः। इदानीं प्रत्यक्षकृतः। हे अग्ने देवत्रा देवेषु मध्येऽतिशयेन त्वं विश्वस्मै सर्वस्मा इषुध्यते हविरात्मन इच्छत इंद्रादये॥ इषुध्यतिः कंड्वादिः॥ हव्यं तत्तद्देवतामुद्दिश्य प्रत्तं पुरोडाशादिकमोहिषे। सर्वतो वहसि॥ वहेर्लेटि यजादित्वात्संप्रसारणं॥ किंचायमग्निर्विश्वस्मै सुकृते शोभनयज्ञकर्त्रे यजमानाय वारं सर्वैर्वरणीयं क्षुदादिनिवारकं वान्नादिकमृण्वति। गच्छति। करोतीत्यर्थः। किंचायमग्निर्द्वारा स्वर्गाद्यभिमतद्वाराणि व्यृण्वति। विवृणोति। प्रतिबंधकपापापनयनद्वाराभिमतानि साधयतीत्यर्थः॥ ऋण्वतिर्गतिकर्मा। यद्वा रिविर्गत्यर्थः। इदित्वान्नुम्। छांदसं रेफस्य संप्रसारणं॥

॥ अथ सप्तमी ॥

स मानुषे वृजने शंतमो हितो३ग्निर्यज्ञेषु जेन्यो न विश्पतिः प्रियो यज्ञेषु विश्पतिः।
स हव्या मानुषाणामिळा कृतानि पत्यते ।
स नस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः ॥ ७ ॥

सः । मानुषे । वृजने । शंऽतमः । हितः । अग्निः । यज्ञेषु । जेन्यः । न । विश्पतिः ।
प्रियः । यज्ञेषु । विश्पतिः ॥ सः । हव्या । मानुषाणां । इळा । कृतानि । पत्यते ।
सः । नः । त्रासते । वरुणस्य । धूर्तेः । महः । देवस्य । धूर्तेः ॥ ७ ॥

सोऽग्निर्मानुषे मनुष्यस्य यजमानस्य संबंधिनि वृजने वर्जनीये पापे निमित्तभूते सति यज्ञेषु निमित्तेषु शंतमोऽत्यंतं सुखतमः । अनिष्टस्य निवारकत्वात् । अत एव हितः । स्वर्गाद्यभिमतसाधकत्वात् । किंचायं विश्पतिर्ऋत्विग्रूपाणां प्रजानामतिशयेन पालकः ॥ पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं ॥ अत एव प्रियश्च भवति । तत्र दृष्टांतः । जेन्यो न विश्पतिः । जयशीलो राजेव । स यथा परसेनाद्युपद्रवपरिहारेण सम्यक् परिपालनेन च प्रजानां प्रियो भवति । किंचायमग्निर्मानुषाणां मनुष्याणां यजमानानां संबंधीनि हव्या हवींषीळा कृतानीळायां वेद्यां कृतानि संपादितान्युद्दिश्य पत्यते । पतति । आगच्छति । किंच सोऽग्निर्नोऽस्मान्यजमानान्वरुणस्य वारकस्य धूर्तेर्हिंसकस्य भयात्त्रासते । त्रायते । यद्वा धूर्तेरिति पंचमी । वरुणस्य पापदेवस्य धूर्तेर्हिंसकात् । किंच महो महतो देवस्य धूर्तेर्हिंसातः त्रासते । पालयते । अयष्टारमग्निर्हिनस्तीति प्रसिद्धं । यद्वैकमेव वाक्यं । धूर्तेर्हिंसकस्य महो महतो वरुणस्य देवस्य वरुणाख्यायाः पापदेवताया धूर्तेर्हिंसातो नोऽस्मान् सोऽग्निस्त्रासते । त्रायते ॥

॥ अथाष्टमी ॥

अग्निं होतारमीळते वसुधितिं प्रियं चेतिष्ठमरतिं न्येरिरे हव्यवाहं न्येरिरे ।
विश्वायुं विश्ववेदसं होतारं यजतं कविं ।
देवासो रण्वमवसे वसूयवो गीर्भी रण्वं वसूयवः ॥ ८ ॥

अग्निं । होतारं । ईळते । वसुऽधितिं । प्रियं । चेतिष्ठं । अरतिं । नि । एरिरे । हव्यऽवाहं । नि । एरिरे ॥ विश्वऽआयुं । विश्वऽवेदसं । होतारं । यजतं । कविं । देवासः । रण्वं । अवसे । वसुऽयवः । गीःऽभिः । रण्वं । वसुऽयवः ॥ ८ ॥

अमुमग्निं होतारमाह्वातारं होमनिष्पादकं वेळते । ऋत्विजः स्तुवंति । तथा वसुधितिं धनस्य धारयितारं वा । अत एव प्रियं सर्वेषां प्रियतमं चेतिष्ठमतिशयेन यजमानानां चेतयितारं । यद्वा प्रकृष्टचेतनवंतं । चेत्तृशब्दात्तुश्छंदसीतीष्ठन् । तुरिष्ठेमेयःस्विति तृलोपः । अरतिमीश्वरं । तादृशं देवं न्येरिरे । नितरां प्राप्ताः । प्राप्तिरेव विशेष्यते । हव्यवाहं न्येरिरे । निःशेषेण प्राप्ताः । इतरदेवेभ्यो हव्यं वोढुं यथा प्रभवति तथा नितरां प्राप्ताः । पुनः कीदृशं । विश्वायुं सर्वत्र प्राणिजीवनं विश्ववेदसं सर्वप्रज्ञं होतारं देवानामाह्वातारं यजतं यजनीयं कविं सर्वज्ञं ॥ इर प्रेरणे इर गतौ इत्यन्यतमस्य लिटि रूपं ॥ किंच देवासो देवनशीला ऋत्विजो रण्वमतिमध्वाशब्दयंतमवसेऽस्य रक्षणाय वसूयवो वसुकामाः संतः । पुनः कीदृशाः । गीर्भिः स्तुतिभी रण्वं रणयंतं रमणीयं वा वसूयवो वसु हवीरूपमन्नमग्नये प्रदातुमात्मन इच्छंतो न्येरिरे । प्रीतो यथा धनं प्रयच्छति तथा हविरादिना प्राप्ता इत्यर्थः ॥

॥ इति द्वितीयस्य प्रथमे पंचदशो वर्गः ॥

यं त्वं रथमित्येकादशर्चं तृतीयं सूक्तं पारुच्छेपं सर्वमात्यष्टमित्युक्तत्वादत्यष्टिछंदस्कं । अनुक्तत्वादिंद्रं । प्रप्रा वो अस्मे इत्यादिके द्वे अतिशक्वर्यौ षष्ट्यक्षरोपेतत्वात् । पाहि न इत्यंत्याष्टिः चतुःषष्ट्यक्षरोपेतत्वात् । प्र तद्वोचेयमिति षष्ठीदुदेवत्या । तथा चानुक्रमणिका । यं त्वमेकादश षष्ठ्यैंद्वी प्रप्रा वोऽतिशक्वर्यावष्टिरंत्येति ॥ दशरात्रस्य षष्ठेऽहनि मरुत्वतीये शस्त्र एतत्सूक्तं षष्ठस्येति खंडे सूचितं । यं त्वं रथमिंद्र स यो वृषेति । आ॰ ८. १. ॥

॥ तत्र प्रथमा ॥

यं त्वं रथमिंद्र मेधसातयेऽपाका संतमिषिर प्रणयसि प्रानवद्य नयसि ।
सद्यश्चित्तमभिष्टये करो वशश्च वाजिनं ।
सास्माकमनवद्य तूतुजान वेधसामिमां वाचं न वेधसां ॥ १ ॥

यं। त्वं। रथं। इंद्र। मेधऽसातये। अपाका। संतं। इषिर। प्रऽनयसि। प्र। अनवद्य। नयसि॥ सद्यः। चित्। तं। अभिष्टये। करः। वशः। च। वाजिनं। सः। अस्माकं। अनवद्य। तूतुजान। वेधसां। इमां। वाचं। न। वेधसां॥१॥

हे इंद्र इषिर यज्ञगमनशील त्वं मेधसातये यज्ञस्य दानाय लाभाय वा यं यजमानं प्रति रथं प्रणयसि प्रापयसि॥ द्विकर्मकोऽयं॥ कीदृशं यजमानं। अपाका। अपाकमनल्पप्रज्ञयाधिकारवंतं॥ पाकः पक्तव्यो भवतीति यास्कः। नि० ३.१२.॥ अत एव संतं पंडितं संतं। किंच हे अनवद्य अनिंदित यं यजमानं धनविद्यादिना प्रणयसि। प्रकृष्टं नयसि। तं यजमानं सद्यश्चित् तदानीमेव तदनुग्रहकाल एवाभिष्टय आभिमुख्येन यागायाभिमतप्राप्तये॥ अभिपूर्वादिषेः क्तिन्। शकंध्वादित्वात्पररूपत्वं। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥ करः। समर्थं करोषि॥ लेटि व्यत्ययेन शप्॥ एवं कृत्वा च वाजिनं हविर्लक्षणमन्नं तद्वंतं वा वशः। कामयसे च॥ वष्टेर्लेट्यडागमः। तिङः परत्वादनिघातः॥ यजमानेनाहूतः सन् शीघ्रमेवागत्य हविः स्वीकृत्य यागं साधु निर्वर्त्य तं चाभिमतफलेन संयोज्य पुनर्हविः स्वीकरोषीत्यर्थः। हे इंद्र अनवद्य अनिंदित सर्वैः स्तूयमान तूतुजान अस्माननुग्रहीतुं त्वरमाण॥ तुजेः प्रेरणार्थाल्लिटः कानच्। तुजादीनां दीर्घोऽभ्यासस्येत्यभ्यासस्य दीर्घत्वं॥ स त्वं॥ सोऽचि लोपे चेदिति संहितायां सोर्लोपः॥ वेधसां विविधफलकर्तॄणां मध्ये श्रेष्ठतया वेधसां मेधाविनामस्माकं संबंधि हविः स्वीकुर्वित्यर्थः। तत्र दृष्टांतः। इमां वाचं न। अस्मदीयां स्तुतिरूपां वाचमिव। स्तुतिं यथा स्वीकरोषि तथा हविरपीत्यर्थः॥

॥ अथ द्वितीया ॥

स श्रुधि यः स्मा पृतनासु कासु चिद्दक्षाय्य इंद्र भरहूतये नृभिरसि प्रतूर्तये नृभिः।
यः शूरैः स्वः सनिता यो विप्रैर्वाजं तरुता।
तमीशानास इरधंत वाजिनं पृक्षमत्यं न वाजिनं॥२॥

सः। श्रुधि। यः। स्म। पृतनासु। कासु। चित्। दक्षाय्यः। इंद्र। भरऽहूतये। नृऽभिः। असि। प्रऽतूर्तये। नृऽभिः॥ यः। शूरैः। स्व१रिति स्वः। सनिता। यः। विप्रैः। वाजं। तरुता। तं। ईशानासः। इरधंत। वाजिनं। पृक्षं। अत्यं। न। वाजिनं॥२॥

हे इंद्र स वक्ष्यमाणगुणविशिष्टस्त्वं श्रुधि। अस्मदाह्वानं स्तोत्रं वा शृणु॥ हेर्धिभावः॥ यः स्म यः खलु त्वं नृभिर्मनुष्यैरेव सद्भिः पश्चाद्देवत्वमापन्नैर्मरुद्भिः। पुनस्त एव विशेष्यंते। नृभिः संग्रामनयनशीलैः। इंद्रस्य मरुतां साहाय्यमिंद्रो मरुद्भिर्मरुतो हैनं नाजहुरित्यादिषु प्रसिद्धं। तैः सहितः सन् कासु चित्पृतनासु सर्वेषु प्रौढेष्वपि संग्रामेषु भरहूतये भरणविशिष्टाह्वानयुक्ताय प्रतूर्तये प्रकृष्टहिंसनाय। यद्वा भरहूतये शूरो भव प्रहरेत्येवमादिभरणयुक्ताह्वानाय प्रतूर्तये च शूराणां प्रकृष्टवधाय च दक्षाय्योऽसि। प्रवर्धनशीलोऽसि। यद्वा नृभिर्नेतृभिर्यजमानैः प्रार्थितः सन् प्रतूर्तये शत्रूणां पापानां वा प्रकृष्टहिंसनाय दक्षाय्योऽसि। समर्थोऽसि। किंच यस्त्वं शूरैः शौर्योपेतैर्मरुद्भिरन्यैर्भटैर्वा सहितः सन् स्वः स्वयमेव सनिता संग्राममयस्यान्यस्य वा मनीषितस्य सनिता संभक्तासि। सत्यपि तेषां साहित्येऽन्यनैरपेक्ष्येणैव तरुतासीत्यर्थः॥ तरतेस्तृनि ग्रसितस्कभितेत्यादौ निपात्यते॥ यश्च त्वं विप्रैर्मेधाविभिर्ऋत्विग्भिः स्तुतः सन् वाजं तरुता तेभ्योऽन्नस्य दातासि। विप्रैर्मरुद्भिः सहित इति संबंधः। तं तादृशं वाजिनं गमनवंतं पृक्षं हविर्लक्षणान्नवंतमिंद्रमीशानासः सम्यगभ्यर्थयितुं समर्था ऋत्विज इरधंत। संराधंति सेवंते। तत्र दृष्टांतः। वाजिनं वेजनवंतं गमनवंतं पृक्षं घासाद्यन्नवंतमत्यं न। अश्वमिव। तं यथा समर्थाः स्वादुघासप्रदानादिना पोषयंति तद्वत्॥ अत्य इत्यश्वनाम। अत्यो हय इति तन्नामसु पठितत्वात्॥

॥ अथ तृतीया ॥

दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीररुं शूर मर्त्यं परिवृणक्षि मर्त्यं।
इंद्रोत तुभ्यं तद्दिवे तद्रुद्राय स्वयशसे।
मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय सप्रथः॥ ३॥

दस्मः। हि। स्म। वृषणं। पिन्वसि। त्वचं। कं। चित्। यावीः। अररुं। शूर। मर्त्यं। परिऽवृणक्षि। मर्त्यं॥ इंद्र। उत। तुभ्यं। तत्। दिवे। तत्। रुद्राय। स्वऽयशसे। मित्राय। वोचं। वरुणाय। सऽप्रथः। सुऽमृळीकाय। सऽप्रथः॥ ३॥

हे इंद्र त्वं दस्मो हि। शत्रूणामुपक्षपणकर्ता खलु। अत एव कारणात् वृषणं स्वतो वर्षणशीलं त्वचं संवरणवंतं पुटबंधनवदुदकवेष्टनवंतं कं चिज्जलधारिणं मेघं पिन्वसि। निर्भिद्य सेचयसि। किंच मर्त्ये मर्त्यवदररुमरणशीलं गम-

नस्वभावं कंचिन्मेघं हे शूर विक्रांत यावीः । मिश्रयसि ॥ यौतेश्छांदसे लुङि छांदसोऽडभावः ॥ अवर्षणेन गच्छंतं बलान्निगृह्य वर्षयसीत्यर्थः । यथा शूरः कश्चिद्बलवंतं गच्छंतं वैरिणं निगृह्य स्वीकरोति तद्वदित्यर्थः । तथा मर्त्यं मरणशीलं शीर्यमाणस्वभावं निरुदकं कंचिन्मेघं परिवृणक्षि । सर्वतो वर्जयसि । औदासीन्यं करोषीत्यर्थः । हे इंद्र तत्तादृशं कर्म वर्षणरूपं सप्रथः सर्वतः पृथु यथा भवति तथा तुभ्यं वोचं । ब्रवीमि । इंद्र एव विशेष्यते । स्वयशसे स्वकीययशोयुक्ताय । तथा दिव उत । त्वदाश्रयभूतायै द्युलोकदेवताया अपि तत्तादृशं कर्म वोचं । ब्रवीमि । उतशब्दोऽपिशब्दार्थः । वर्षणकर्मणो द्युदेवताया आनुकूल्यात्तस्या अपि वचनं युक्तं । तथा रुद्राय । जगतां दुःखद्रावयित्रे रोदनशीलाय वाग्नये तद्वोचं । रुद्रो वै क्रूरो यदयमग्निरिति श्रुते रुद्रत्वं । सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति श्रुते रोदनस्वभावत्वं प्रसिद्धं । तस्य चाहुतिद्वारा वृष्ट्यनुकूलत्वात्तस्यापि कथनं युक्तं । स्वयशस इत्यस्य रुद्रायेत्यनेन वा संबंधः संनिहितत्वाद्योग्यत्वाच्च । स्वकीययशोयुक्तायाग्नय इत्यर्थः । तथा मित्रायाहरभिमानिदेवतायै तद्वोचं । वरुणाय रात्र्यभिमानिदेवतायै तद्वोचं । अहोरात्रे वै मित्रावरुणौ । अहोरात्राभ्यां खलु वै पर्जन्यो वर्षतीति । तथा मैत्रं वा अहर्वारुणी रात्रिरित्यादिश्रुतिभ्यो मित्रावरुणयोरहोरात्राभिमानिदेवत्वं । अत एव श्रुतेर्वृष्टिप्रदातृत्वात्ताभ्यामपि प्रथनं युक्तं । सुमृळीकाय शोभनसुखयित्रे प्रजानां । एतत्सर्वत्र संबध्यते । उक्तेभ्यो देवेभ्यः सप्रथः सर्वतः पृथ्विति विस्तीर्णं यथा भवति तथा तद्वर्षणकर्म ब्रवीमि ॥

॥ अथ चतुर्थी ॥

अ॒स्माकं॑ व॒ इंद्र॑मुश्मसी॒ष्टये॒ सखा॑यं वि॒श्वायुं॑ प्रा॒सहं॑ यु॒जं॒ वाजे॑षु प्रा॒सहं॑ यु॒जं॑ ।
अ॒स्माकं॒ ब्रह्मो॒तयेऽवा॑ पृ॒त्सुषु॒ कासु॑ चित् ।
न॒हि त्वा॒ शत्रुः॒ स्तर॑ते स्तृ॒णोषि॒ यं विश्वं॑ शत्रुं॑ स्तृ॒णोषि॒ यं ॥ ४ ॥

अ॒स्माकं॑ । वः॒ । इंद्रं॑ । उ॒श्म॒सि॒ । इ॒ष्टये॑ । सखा॑यं । वि॒श्वऽआ॑युं । प्र॒ऽसहं॑ । यु॒जं॑ । वाजे॑षु । प्र॒ऽसहं॑ । यु॒जं॑ ॥ अ॒स्माकं॑ । ब्रह्म॑ । ऊ॒तये॑ । अव॑ । पृ॒त्सुषु॑ । कासु॑ । चि॒त् । न॒हि । त्वा॒ । शत्रुः॑ । स्तर॑ते । स्तृ॒णोषि॑ । यं । विश्वं॑ । शत्रुं॑ । स्तृ॒णोषि॑ । यं ॥ ४ ॥

हे ऋत्विजः । अस्माकमस्मदर्थमिष्टये यागायाभिमतैषणाय वेंद्रमुश्मसि ।

अभिमतं कामयामहे ॥ वश कांतौ । आदादिकः । इदंतो मसिः । ग्रहिज्येत्यादिना संप्रसारणं ॥ यद्वास्माकं सखायमिति संबंधः । कीदृशमिंद्रं । सखायं सखिवदत्यंतहितकारिणं समानख्यानं वा । विश्वायुं विश्वेषां यागानां गंतारं । प्रासहं प्रकर्षेण शत्रूणां मर्षयितारं ॥ सहेः क्विप् । नहिवृतीत्यादिनोपसर्गस्य दीर्घः ॥ युजं सर्वदा युक्तं सहायभूतमित्यर्थः । पुनः स एव विशेष्यते । वाजेषु हवीरूपान्नेषु तद्वत्सु यज्ञेषु वा निमित्तभूतेषु प्रासहं । यज्ञविघातिनः सहमानं । युजं । अभिमतफलैर्युक्तं मरुद्भिर्वा । किंच हे इंद्र अस्माकमूतये रक्षणाय ब्रह्म परिवृढं कर्मावं । रक्ष । कस्तत्र विशेष इति तत्राह । कासु चित् पृत्सु संग्रामेषु ॥ पृत्सु समत्स्विति संग्रामनामसु पाठात्तन्नामत्वं ॥ तेषु त्वा त्वां नहि स्तरते । न हिनस्ति । न विरोधमाचरति यं स्तृणोषि । यं विश्वं शत्रुं स्तृणोषि वारयसि स कश्चिदपि शत्रुर्न हिनस्ति । तव महत्त्वेन सर्वे भीता विधेया भवंति शत्रुभावं न कोऽप्याचरति । अजातशत्रुत्वादित्यर्थः ॥

॥ अथ पंचमी ॥

नि षू न॒मातिमतिं॒ कय॑स्य चि॒त्तेजि॑ष्ठाभिर॒रणि॑भि॒र्नोतिभि॑रु॒ग्राभि॑रुग्रोति॒भिः॑ ।
नेषि॑ णो॒ यथा॑ पु॒राने॒नाः शूर॒ मन्य॑से ।
विश्वा॑नि पू॒रोरप॑ पर्षि॒ वह्नि॑रा॒सा वह्नि॑र्नो॒ अच्छ॑ ॥ ५ ॥

नि । सु । न॒म॒ । अति॑ऽमतिं । कय॑स्य । चि॒त् । तेजि॑ष्ठाभिः । अ॒रणि॑ऽभिः । न । ऊ॒तिऽभिः॑ ।
उ॒ग्राभिः॑ । उ॒ग्र॒ । ऊ॒तिऽभिः॑ ॥ नेषि॑ । नः॒ । यथा॑ । पु॒रा । अ॒ने॒नाः । शू॒र॒ । मन्य॑से ।
विश्वा॑नि । पू॒रोः । अप॑ । प॒र्षि॒ । वह्निः॑ । आ॒सा । वह्निः॑ । नः॒ । अच्छ॑ ॥ ५ ॥

हे इंद्र कयस्य चित् त्वद्भक्तस्य यजमानस्यातिमतिमतिक्रांतमननं विरुद्धमनस्कं शत्रुं नि षू नम । नितरां सुष्ठु नामय । अस्मत्प्रणतं कुरु ॥ अंतर्भावितण्यर्थोऽयं ॥ हे उग्र उद्गूर्णबल । ऊतिभी रक्षणैः प्रीतिभिर्वा युक्तः सन् तेजिष्ठाभिररणिभिर्न । अतिशयेन तेजस्विभिर्युद्धादिरूपैर्मार्गैरिव ॥ तेजस्वच्छब्दादातिशायनिक इष्ठन् । विन्मतोर्लुक् । टेरिति टिलोपः ॥ अतिमतिं वृत्रादिं यथा नामितवान् तथास्मद्विरोधिनमपीत्यर्थः । यद्वोत्तरत्रान्वयः । तेजिष्ठाभिररणिभिर्न । तेजोयुक्तैर्गमनसाधनैर्यज्ञादिमार्गैर्यथास्मान्योजितवानसि तथोग्राभिः प्रकाशकाभिरूतिभी रक्षणैर्यागफलभूतैर्नोऽस्मान् नेषि । नयसि । अभिमत-

स्वर्गादिफलं प्रापयसीत्यर्थः ॥ नयतेश्छांदसः शपो लुक् ॥ तत्र दृष्टांतः । पुरा पूर्वस्मिन्कालेऽस्मत्पित्रादीन्यथोतिभिर्नीतवानसि तथा नेषीत्यर्थः । हे शूर विक्रांत त्वमनेना मन्यसे । सर्वैरपापत्वेनावबुध्यसे । स्वर्गाद्यभिमतसाधकत्वादिति भावः । यद्वा अनेनास्त्वमस्मानप्यनेनसो मन्यसे । किंच । हे इंद्र वह्निर्वृष्ट्यादिप्रदानेन जगतां निर्वाहकः सन् पूरोर्मनुष्यस्य यजमानस्य ॥ पूरुरिति मनुष्यनाम पूरवो जगत इति तन्नामसु पाठात् ॥ तस्य विश्वानि सर्वाण्येनांस्यपपर्षि । अपकृत्य पालयसि ॥ पृणातेश्छांदसः शपो लुक् ॥ अतोऽस्माकमप्यासांतिके देवयजनदेशेऽच्छाभिमुख्येनागत्य वह्निरभिमतानां वोढा सन् अप अनभिमतमपकृत्य पर्षि । अभिमतफलं पूरयसि ॥

॥ इति द्वितीयस्य प्रथमे षोडशो वर्गः ॥

॥ अथ षष्ठी ॥

प्र तद्वोचेयं भव्यायेंदवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति ।
स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिं ।
अव स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥ ६ ॥

प्र । तत् । वोचेयं । भव्याय । इंदवे । हव्यः । न । यः । इषऽवान् । मन्म । रेजति । रक्षःऽहा । मन्म । रेजति ॥ स्वयं । सः । अस्मत् । आ । निदः । वधैः । अजेत । दुःऽमतिं । अव । स्रवेत् । अघऽशंसः । अवऽतरं । अव । क्षुद्रंऽइव । स्रवेत् ॥ ६ ॥

भव्याय भवनशीलाय प्रतिदिनं कलाभिवृद्ध्या वर्धनशीलायेंदवेऽमृतेन सर्वस्य क्लेदयित्रे तदर्थं तद्वक्ष्यमाणं कर्म स्तोत्रं वा प्रवोचेयं । प्रकर्षेण वक्तुं शक्तो भूयासं । स्तुतेरतिमहत्त्वादिति भावः ॥ वचेर्लिङ्याशिष्यङ् । वच उम् ॥ कस्य तदिति । य इंदुरिषवान् एषणवान् मन्म मननीयं स्तोत्रं कर्म वोद्दिश्य रेजति गच्छति ॥ रेजतिर्गत्यर्थः । रेजति दध्यतीति तन्नामसु पाठात् ॥ आगमने दृष्टांतः । हव्यो न । होतव्य आह्वातव्यो वा हव्य इंद्र इव । प्रायेणेंद्र आगच्छेत्यादिनेंद्र एवाहूयते । स इव । स एव विशेष्यते । रक्षोहा यज्ञविघातकानां रक्षसां हंता मन्म तेषामेव कर्म हननादिरूपं रेजति गच्छति । चालयति नाशयतीत्यर्थः । स एवेंदुः स्वयं निदः ॥ णिदि कुत्सायां । क्विप् । सावेकाच इति विभक्तेरुदात्तता ॥ अस्मन्निंदि-

तुर्वैरिणो वधैर्हननोपायैः ॥ हनश्च वध इति भावेऽप्। तत्संनियोगेन वधादेशः। स चादंतोऽंतोदात्तः॥ दुर्मतिं दुर्बुद्धिमस्मत् अस्मत्तोऽजेत। आक्षिपेत्। अवनयेत्। किंच। अघशंसोऽघानां पापानां हिंसादीनां शंसिता स्तेनोऽवतरमत्यंतनिकृष्टमव स्वस्थानादवाङ्मुखो भूत्वा स्रवेत्। गच्छतु। अधः पतत्वित्यर्थः॥ अघशंसः स्तेनः। अघशंसो वृक इति तन्नामसु पाठात्॥ अवस्रवणमेव प्रार्थ्यते। क्षुद्रमिव। क्षेप्तुं शक्यमुदकादिकमिव। उदकं यथा तिष्ठति स्रवन्नश्यति तथासावपीत्यर्थः॥

॥ अथ सप्तमी ॥

वनेम तद्धोत्रया चितंत्या वनेम रयिं रयिवः सुवीर्यं रण्वं संतं सुवीर्यं।
दुर्मन्मानं सुमंतुभिरेमिषा पृचीमहि।
आ सत्याभिरिंद्रं द्युम्नहूतिभिर्यजत्रं द्युम्नहूतिभिः ॥ ७ ॥

वनेम। तत्। होत्रया। चितंत्या। वनेम। रयिं। रयिऽवः। सुऽवीर्यं।
रण्वं। संतं। सुऽवीर्यं॥ दुःऽमन्मानं। सुमंतुऽभिः। आ। ईं। इषा। पृचीमहि।
आ। सत्याभिः। इंद्रं। द्युम्नहूतिऽभिः। यजत्रं। द्युम्नहूतिऽभिः॥ ७॥

हे इंद्र वयं यजमानास्तत्तादृशं स्तुत्यं तव रूपं। यद्वा तत्ते वयं चितंत्या तव गुणान् ज्ञापयंत्या॥ चिती संज्ञाने। अस्माण्णयंताच्छतरि व्यत्ययेन शः॥ होत्रया होमसाधनभूतया स्तुतिरूपया वाचा वनेम संभजेम। यद्वा शब्दयेम। स्तुतिं करवामेत्यर्थः॥ होत्रेति वाङ्नाम होत्रा गीरिति तन्नामसु पाठात्॥ किंच। एवं स्तोतारो वयमपि हे रयिवो विशिष्टधनवन्निंद्र रयिं धनं वनेम। संभजेम। कीदृशं रयिं। सुवीर्यं। शोभनसामर्थ्योपेतं। रण्वं। रमणीयं गंतव्यं वार्थिभिः। संतं। सर्वदा वर्तमानं। यज्ञादिद्वारा बाहुशो दीयमानमपि प्रवर्धमानं। पुनस्तदेव विशेष्यते। सुवीर्यं। शोभनपुत्रभृत्याद्युपेतं। धनेन तेषां संपादयितुं शक्यत्वात्॥ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं॥ किंच हे इंद्र दुर्मन्मानं दुःखेन मंतुं शक्यं त्वां। तव महिम्नोऽतिमहत्त्वात्। सुमंतुभिः शोभनैर्मननैस्तत्साधनैः स्तोत्रैर्वेषा हवीरूपेणान्नेन चापृचीमहि। सर्वतः संपृक्ता भूयास्म। यद्वा। इषान्नेन निमित्तेन। पूर्वं धनस्य प्रार्थितत्वादिदानीमन्नं प्रार्थ्यते॥ पृची संपर्के। लिङि छांदसो विकरणस्य लुक्॥ किंच यजत्रं यागनिष्पादकमिंद्रं सत्याभिरविसंवा-

दिनीभिर्यथाभिलाषमुपजायमानफलाभिर्द्युम्नहूतिभिः । हरिव आगच्छ मेधातिथेर्मेषेत्याह्वानैरित्यर्थः । पुनस्ता एव विशेष्यंते । द्युम्नहूतिभिर्हविर्लक्षणान्ननिमित्तैराह्वानैरापृचीमहीति शेषः ॥ द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः ॥

॥ अथाष्टमी ॥

प्रप्रा वो अस्मे स्वयंशोभिरूती परिवर्ग इंद्रो दुर्मतीनां दरीमन्दुर्मतीनां ।
स्वयं सा रिषयध्यै या न उपेषे अत्रैः ।
हतेमसन्न वक्षति क्षिप्ता जूर्णिर्न वक्षति ॥ ८ ॥

प्रऽप्र । वः । अस्मे इति । स्वयंशःऽभिः । ऊती । परिऽवर्गे । इंद्रः । दुःऽमतीनां । दरीमन् । दुःऽमतीनां ॥ स्वयं । सा । रिषयध्यै । या । नः । उपऽईषे । अत्रैः । हता । ईं । असत् । न । वक्षति । क्षिप्ता । जूर्णिः । न । वक्षति ॥ ८ ॥

हे ऋत्विजः । वो युष्मदर्थमस्मे अस्मदर्थं चायमिंद्रः स्वयशोभिः स्वकीययशोयुक्तैरूतिभी रक्षणैर्दुर्मतीनां दुर्मननयुक्तानां विरोधिनां परिवर्गे परितो वर्जने निमित्तभूते सति प्रप्रा । प्रकृष्टो भवति । समर्थो भवतीत्यर्थः ॥ द्विर्भावः पादपूरणः ॥ यद्वा हे ऋत्विजः । वो युष्मदर्थमस्मे अस्माकं संबंधिभिः स्वयशोभिः स्वयमेवान्यनैरपेक्ष्येण स्तोतुं समर्थैः स्तोत्रैस्तुष्टः सन् ऊती उतौ रक्षणे प्रप्रा । प्रकृष्टो भवति ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ कुत्रेति तदुच्यते । दुर्मतीनां दुष्टानां परिवर्गे परितो वर्जनवति संग्रामे यागे वा । पुनः स एव विशेष्यते । दुर्मतीनां दुष्टबहुमानवतां हननबुद्धीनां दरीमन् दरीमण्यतिशयेन दारयितरि । एवमिंद्रे सम्यक् पालयति सत्यत्रैर्भक्षकैरस्मद्विरोधिभिर्या जूर्णिर्जववती सेना ॥ जूर्णिर्जवतेर्वा द्रवतेर्वा दूनोतेर्वेति यास्कः । नि॰ ६.४.॥ नोऽस्मान् प्रति रिषयध्यै हिंसितुं ॥ रिषेर्ण्यंतात्तुमर्थे शध्यैप्रत्ययः ॥ उपेष उपगंतुमस्मान् प्राप्तुं ॥ ईङ् गतौ । तुमर्थे क्सेप्रत्ययः ॥ क्षिप्ता प्रेरिता सा सेना स्वयं हतेमसत् । हिंसितैवासीत् । न वक्षति । अस्मान्न वहेत् । न प्राप्नोति । तथास्मद्धिंसकान् शत्रूनपि पुनर्न वक्षति । न वहति ॥ वहेर्लेट्यडागमः । सिब्बहुलमिति सिप् ॥ इंद्रसामर्थ्येन तत्रैव नष्टाभूदित्यर्थः ॥

॥ अथ नवमी ॥

त्वं नं इंद्र राया परींणसा याहि पथाँ अनेहसा पुरो यांह्यरक्षसां ।
सचस्व नः पराक आ सचस्वास्तमीक आ ।
पाहि नों दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः ॥ ९ ॥

त्वं । नः । इंद्र । राया । परींणसा । याहि । पथा । अनेहसा ।
पुरः । याहि । अरक्षसा ॥ सचस्व । नः । पराके । आ । सचस्व । अस्तंऽईके । आ ।
पाहि । नः । दूरात् । आरात् । अभिष्टिऽभिः । सदा । पाहि । अभिष्टिऽभिः ॥ ९ ॥

हे इंद्र त्वं नः पथास्मत्संबंधिना मार्गेण पुरो याहि । आगच्छ ॥ भस्य टेर्लोपः । उदात्तनिवृत्तिस्वरेण तृतीयाया उदात्तत्वं ॥ कीदृशेन मार्गेण । अरक्षसा । रक्षोवर्जितेन । अनेहसा । अपापेन । यज्ञगमनमार्गस्य स्तुतिचोदितत्वादनेहस्त्वं । यद्वा नोऽस्मानुद्दिश्य याहि । किंविशिष्ट इति परीणसा परितो नद्धेन रायास्मभ्यं दातव्येन बहुविधधनेन युक्तः सन् । हे इंद्र नोऽस्मान् पराकेऽत्यंतदूरदेशात् स्वर्गलक्षणादासचस्व । समवेतो भव ॥ पराक इति दूरनाम पराके पराचैरिति तन्नामसु पाठात् ॥ तथास्तमीकेऽत्यंतांतिके देवयजनदेशे सचस्व । अस्मत्प्रत्तं हविः सेवस्व । संगच्छस्व वा । किंच नोऽस्मान् दूरात् दूरदेशात्स्वर्गादेः सकाशात् पाहि । रक्ष । आरात् संनिहितादिह लोकात् पाहि । पालय । यद्वा दूरादयागकाले स्वर्ग एवोषित्वास्मान्पाहि । पालय । आराद्यागकाले संनिहिते देवयजनदेशे पाहि । केनेति तदुच्यते । अभिष्टिभिः । आभिमुख्यैर्यागैस्तन्निर्वाहैः । यद्वाभ्यागमनैः । किं बहुना । सर्वकालं यागकालेऽयागकाले दूरेऽंतिके चाभिष्टिभिरभित एषणैः पाहि । सम्यक् परिपालय ॥

॥ अथ दशमी ॥

त्वं नं इंद्र राया तरूषसोग्रं चित्त्वा महिमा संक्षदवसे महे मित्रं नावसे ।
ओजिष्ठ त्रातरविता रथं कं चिदमर्त्य ।
अन्यमस्मद्रिरिषेः कं चिदद्रिवो रिरिक्षंतं चिदद्रिवः ॥ १० ॥

त्वं। नः। इंद्र। राया। तरूषसा। उग्रं। चित्। त्वा। महिमा। सक्षत्। अवसे। महे। मित्रं। न। अवसे॥ ओजिष्ठ। त्रातः। अवितरिति। रथं। कं। चित्। अमर्त्य। अन्यं। अस्मत्। रिरिषेः। कं। चित्। अद्रिऽवः। रिरिक्षंतं। चित्। अद्रिऽवः॥१०॥

हे इंद्र त्वं नोऽस्मान्तरूषसा तरणकुशलेनास्मानापद्भ्य उत्तरीतुं शक्तेन राया धनेनोद्धर्ता भवेति शेषः। हे इंद्र त्वा त्वामुग्रं चित् उद्गूर्णबलं संतं त्वामेव महिमा महत्त्वमस्मत्स्तोत्रजनितः कश्चिदतिशयः सक्षत्। सेवते संभजते। उत्कर्षयतीत्यर्थः। किमर्थं। अवसे। त्वत्प्रीतये। तत्र दृष्टांतः। महे महतेऽवसे रक्षणाय प्रकाशारोग्यादिरूपाय मित्रं न। सर्वजनमित्रं सूर्यमिव। तं यथा महत्त्वेन संयोजयंति तथेत्यर्थः। यद्वा मित्रं न प्रियहितरूपं सखायमिव। तं यथा महत्यै प्रीतये संभजंते तद्वत्। किंच हे ओजिष्ठ ओजस्वितमातिशयेन बलवन् त्रातः। रक्षितः। अस्मान्पालयितर्वा। अमर्त्य। अमरणधर्मन्निंद्र। अवितरस्मान्धनेन तर्पयितस्त्वं। कं चिद्रथं वेगवंतमारुह्यास्मद्देवयजनं शीघ्रमागच्छेति शेषः। तथा हे अद्रिवः शत्रूणामतिशयेन भक्षकेंद्र अस्मदन्यं रिरिक्षंतं चित् अल्पं महांतं वा शत्रुमिति शेषः। रिरिषेः। बाधस्व। तथा हे अद्रिवः। अद्रेरादर्तर्भक्षक वा शत्रूणां॥ अद्रिवन्नद्रिरादृणात्यनेनापि वात्तेः स्यादिति निरुक्तं। नि° ४.४.॥ रिरिक्षंतं चित् अत्यंतं कुत्सितं हिंसंतमपि शत्रुं रिरिषेः। बाधस्व॥ रिष हिंसायां। छांदसः शपः श्लुः। पुनर्व्यत्ययेन शः। रिरिक्षंतं। अस्मादेव सनि हलंताच्चेति सनः कित्त्वाद्गुणाभावः। चिदित्यवकुत्सितः। कुल्माषांश्चिदाहरेत्यवकुत्सित इति यास्केनोक्तत्वात्। नि° १.४.। यद्वा समुच्चयार्थः। कंचिदित्यनेन सह समुच्चीयते॥

॥ अथैकादशी ॥

पाहि नं इंद्र सुष्टुत स्रिधोऽवयाता सदमिद्दुर्मतीनां देवः सन्दुर्मतीनां।
हंता पापस्य रक्षसस्त्राता विप्रस्य मावतः।
अधा हि त्वा जनिता जीजनद्वसो रक्षोहणं त्वा जीजनद्वसो॥ ११॥

पाहि। नः। इंद्र। सुऽस्तुत। स्रिधः। अवऽयाता। सदं। इत्। दुःऽमतीनां। देवः। सन्। दुःऽमतीनां॥ हंता। पापस्य। रक्षसः। त्राता। विप्रस्य। माऽवतः। अध। हि। त्वा। जनिता। जीजनत्। वसो इति। रक्षःऽहनं। त्वा। जीजनत्। वसो इति॥११॥

हे इंद्र सुष्टुत शोभनस्तुत त्वं स्रिधो दुःखात् तदुत्पादकात्पापाद्वा नोऽस्मान्पाहि। रक्ष। यतस्त्वं दुर्मतीनां दुर्मनस्कानां रक्षःप्रभृतीनां ॥ नामन्यतरस्यामिति नाम उदात्तत्वं ॥ सदमित् सर्वदैवावयाताधोयापयिता प्रापयितासि। अतः पाहि। अत एव हे इंद्र देवोऽस्मत्स्तुत्या हृष्टः सन् दुर्मतीनां दुष्टमननवतां यागविघातका-नामवयातासि। तथा रक्षसो रक्षणनिमित्तभूतस्य ॥ रक्षो रक्षितव्यमस्मादिति यास्कः ॥ तादृशस्य पापस्य फलप्रतिबंधरूपस्य हंता घातकोऽसि। यद्वा पापस्य पापिनो रक्षसो राक्षसादेर्हंतासि। तथा मावतो मत्सदृशस्य विप्रस्य मेधाविनो यजमानस्य त्राता रक्षितासि। अध अतो हेतोर्हे इंद्र वसो सर्वेषां निवासभूत त्वा त्वां जनिता सर्वस्य जनयितादिकर्ता परमेश्वरो जीजनत्। अजनयत्। उत्पादित-वान्। तथा हे वसो वासयितः। त्वा त्वां रक्षोहणं जीजनत्। रक्षोहननायोत्पा-दितवान्॥ जनयतेर्लुङि चङि रूपं ॥ यज्ञादिविघातिनां रक्षःप्रभृतीनां विघाताय हींद्रस्यावतारः। तमिंद्रं देवा न व्यसृज्यंतेत्यादिप्रसिद्धद्योतनार्थो हिशब्दः ॥

॥ इति द्वितीयस्य प्रथमे सप्तदशो वर्गः ॥

एंद्र याह्युप न इति दशर्चं चतुर्थं सूक्तं पारुच्छेपमैंद्रं। अंत्या स नो नव्येभि-रित्येषा त्रिष्टुप् शिष्टा अत्यष्टयः। अत्र त्रिष्टुबंतपरिभाषा नाश्रीयते सर्वमात्यष्ट-मिति विशेषेण प्रतिज्ञातत्वात्। एंद्र याहि दशांत्या त्रिष्टुबित्यनुक्रमणिका ॥ पृष्ठ्यषडहस्य षष्ठेऽहनि निष्केवल्यमेतत्सूक्तं। षष्ठस्येति खंडे सूचितं। एंद्र याह्युप नः प्र घान्वस्य। आ॰ ८. १.। इति ॥ महाव्रते माध्यंदिनसवने ब्राह्मणाच्छंसि-नोऽनुरूपतृचे प्रथमैंद्र याहीत्येषा। महाव्रतस्य पंचविंशतिमिति खंडे शौनकेन सूचितं। एंद्र याह्युप नः परावत इंद्राय हि द्यौरसुरो अनम्नत। ऐ॰ आ॰ ५.१.१.। इति ॥

॥ सैषा सूक्ते प्रथमा ॥

एंद्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्तं राजेव सत्पतिः।
हवामहे त्वा वयं प्रयस्वंतः सुते सचा।
पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ॥ १ ॥

आ। इंद्र। याहि। उप। नः। पराऽवतः। न। अयं। अच्छ। विदथानिऽइव। सत्ऽपतिः। अस्तं। राजाऽइव। सत्ऽपतिः ॥ हवामहे। त्वा। वयं। प्रयस्वंतः। सुते। सचा। पुत्रासः। न। पितरं। वाजऽसातये। मंहिष्ठं। वाजऽसातये ॥ १ ॥

हे इंद्र परावतो दूरदेशात् स्वर्गलक्षणात् नोऽस्मानुपयाहि। अस्मत्समीपं प्रत्यागच्छ। तत्र दृष्टांतः। अयं न पुरोवर्त्यग्निरभिषुतः सोमो वा प्रस्तुतत्वान्निर्दिश्यते। स इव। यद्यपि पुरस्तादुपाचारान्निषेधार्थीयो नकारः सर्वत्र। तथाप्यत्रौचित्येनोपमार्थीयो गृह्यते। यद्वा परावतो न दूरदेशादिव। यद्यपि यज्ञे सर्वदा संनिहितस्तथापि स्वर्गाख्याद्दूरदेशादिवास्मिन्यज्ञे ॥ अयमिति विभक्तिव्यत्ययः ॥ अमुं देवयजनदेशमच्छाभिप्राप्तुमायाहीति शेषः। तत्र दृष्टांतः। सत्पतिः सतां सर्वदा वर्तमानानामृत्विजां पालको यजमान इव ॥ पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं ॥ स यथा विदथानि वेदनान्यनुष्ठेयज्ञानानि यद्वा सतां विद्यमानानां फलानां पालकोऽग्निः। स यथा विदथानि यज्ञगृहाण्यागच्छति तद्वत्त्वमपि यज्ञगृहाण्यागच्छ। यद्वा सतां नक्षत्राणां पतिश्चंद्रमा अस्तमिव। स यथा स्वधामस्थानमागच्छति तद्वत्। किंच। प्रयस्वंतो हविर्लक्षणान्नवंतो वयं यजमानास्त्वा त्वां हवामहे। आह्वयामः। किमर्थं। सुते। अभिषुते सोमे निमित्तभूते सति। कीदृशा वयं। सचा। ऋत्विग्भिः सहिताः॥ सचा सहेत्यर्थ इति यास्कः॥ आह्वाने दृष्टांतः। पुत्रासः पुत्राः पितरं न पालकं जनकमिव। तं यथा वाजसातयेऽन्नस्य संभजनायाह्वयंति तथा वयमपि त्वां तदर्थमाह्वयामः। किंच। मंहिष्ठं मंहनीयं त्वां वाजसातये संग्रामप्राप्तये तज्जयाय हविःस्वीकाराय वाह्वयामः ॥

षष्ठेऽहनि माध्यंदिने सवने प्रस्थितयाज्यानां पुरस्तादन्या ऋचः प्रक्षेपणीया। तत्र होतुः पुरस्तात् पिबा सोममिंद्रेत्येषा। षष्ठस्य प्रातःसवन इति खंडे सूचितं। पिबा सोममिंद्र सुवानमद्रिभिरिंद्राय हि द्यौरसुरो अनम्नत। आ° ८. १.। इति ॥

॥ सैषा सूक्ते द्वितीया ॥

पिबा सोममिंद्र सुवानमद्रिभिः कोशेन सिक्तमवतं न वंसगस्तातृषाणो न वंसगः।
मदाय हर्यताय ते तुविष्टमाय धायसे।
आ त्वा यच्छंतु हरितो न सूर्यमहा विश्वेव सूर्यं ॥ २ ॥

पिब। सोमं। इंद्र। सुवानं। अद्रिऽभिः। कोशेन। सिक्तं। अवतं। न। वंसगः।
ततृषाणः। न। वंसगः ॥ मदाय। हर्यताय। ते। तुविःऽतमाय। धायसे।
आ। त्वा। यच्छंतु। हरितः। न। सूर्यं। अहा। विश्वाऽइव। सूर्यं ॥ २ ॥

हे इंद्र वंसगो वननीयगमनस्त्वं सोमं पिबा ॥ द्व्यचोऽतस्तिङ इति दीर्घः ॥ कीदृशं तं । अद्रिभिरभिषवसाधनैर्ग्रावभिः सुवानं सूयमानं ॥ कर्मणि कर्तृप्रत्ययः ॥ कोशेन सिक्तं । कोशस्थानीयेन दशापवित्रेण शोधितं । यद्वावतमित्यनेन सह संबंधः । कोशेनेति लक्षणेन सिक्तं स्वोचितजलेन पूरितमवतं न । आहावलक्षणमवटमिव । तं यथा वंसगो वननीयगमनो तृषा शीघ्रगामी वृषभः पिबति तद्वत् । ततृषाणो न वंसगः । यथात्यंतं तृषितो वंसगो वननीयगमनः शीघ्रगामी पुरुष आहावादिकमागत्य पिबति तद्वत् । किमर्थं पानमिति तत्राह । ते तव मदाय तृप्तये हर्यताय विक्रांतिहेतवे कांत्यर्थं वा ॥ हर्य गतिकांत्योः । भृमृदृशीत्यादिनातच् ॥ तुविष्टमाय महत्त्वाय प्रवृद्धत्वाय । धायसे । यदर्थं मद उपजायते तदर्थाय ॥ धाञो वहिहाधाञ्भ्य इत्यसुनि णिदित्यनुवृत्तेरातो युगिति युक् ॥ यद्वा ते तव तुविष्टमाय धायसे । अतिप्रभूताय पानाय त्वा त्वामायच्छंतु । आभिमुख्येन गमयंतु । अश्वा इति शेषः । तत्र दृष्टांतः । हरितो न सूर्यं । हरितवर्णविशिष्टा एतन्नामका अश्वाः सूर्यमिव । तं यथातित्वरयाभिमतदेशमभिप्रेरिता वहंति तद्वत् । किंच । अहा विश्वा । सर्वाण्यहानि सूर्यमिव । तं यथा त एव प्रतिदिनं वहंति । तथास्मद्यागदिवसेषु प्रतिदिनमावहंतु ॥

॥ अथ तृतीया ॥

अविंदद्दिवो निहितं गुहा निधिं वेर्न गर्भं परिवीतमश्मन्यनंते अंतरश्मनि ।
व्रजं वज्री गवामिव सिषासन्नंगिरस्तमः ।
अपावृणोदिष इंद्रः परीवृता द्वार इषः परीवृताः ॥ ३ ॥

अविंदत् । दिवः । निऽहितं । गुहा । निऽधिं । वेः । न । गर्भं । परिऽवीतं । अश्मनि । अनंते । अंतः । अश्मनि ॥ व्रजं । वज्री । गवांऽइव । सिसासन् । अंगिरःऽतमः । अप । अवृणोत् । इषः । इंद्रः । परिऽवृताः । द्वारः । इषः । परिऽवृताः ॥ ३ ॥

अयमिंद्रो दिवो द्युलोकादानीतं सोममविंदत् । अलभत लब्धवान् । द्युलोकाद्गायत्र्या पक्षिरूपयापहृतं भूमावानीतं स्वीकृतवानित्यर्थः । द्युलोकादानयनं तैत्तिरीये तृतीयस्यामितो दिवि सोम आसीत्तं गायत्र्याहरदित्यादिषु प्रसिद्धं । स एव विशेष्यते । गुहा निहितं । अतिगोप्ये प्रदेशे पर्वतादौ स्थापितं । अत एव निधिं निधिस्थानीयं । अनाशमित्यर्थः । आनयने दृष्टांतः । वेः पक्षिणो गर्भं

न। शिशुमिव। यथा कपोतादिस्त्री पक्षिणी स्वशिशुं व्याधादिभयात्कस्मिंश्चिद्दुर्गमे स्थापयित्वा तत्स्थानमजानती परिभ्रम्य विंदते तद्वदित्यर्थः। पुनः कीदृशं। अश्मनि पाषाणेऽतिमहति विस्तृतेऽनंतेऽश्मन्यपरिमितपाषाणे पर्वतादौ परिवीतं लताकंटकादिना परितो वेष्टितं। सत्स्वपीतरेषु देवेषु कोऽस्यातिशय इति तत्राह। अयमिंद्रो वज्री वज्रवान् गवां व्रजमिव पणिनासुरेणापहृतं भूमौ खनित्वा पाषाणेन पिहितद्वारं गवां व्रजं यथा तमसुरं जित्वा द्वारमुद्घाट्य लब्धवान् तद्वत्सोमं सिषासन् संभक्तुमिच्छन्॥ सनीवंतर्धेति विकल्पनादिडभावे जनसनेत्यात्वं॥ अविंदत्। अयमर्थः पणिनेव गाव इत्यादिश्रुतिषु प्रसिद्धः। तथायमिंद्रः परीवृताः परितो मेघेनावृता इषोऽन्नहेतुभूतस्योदकस्य द्वारो द्वाराण्यपावृणोत्। अपवृतान्यकरोत्। उद्घाटितवानित्यर्थः। तथा कृत्वेष इष्यमाणानि व्रीह्याद्यन्नानि परीवृता भूमौ परितो व्याप्तान्यकरोत्। वज्रेण मेघं भित्त्वा जलवर्षणेन सस्यादिसमृद्धिं कृत्वा व्रीह्यादिकं भूमौ व्याप्तमकरोदित्यर्थः। यतोऽयमेवं कृतवान् अतः सोमस्वीकारो युक्तः॥

॥ अथ चतुर्थी ॥

दादृहाणो वज्रमिंद्रो गभस्त्योः क्षद्मेव तिग्ममसनाय सं श्यदहिहत्याय सं श्यत्।
संविव्यान ओजसा शवोभिरिंद्र मज्मना।
तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि॥४॥

दादृहाणः। वज्रं। इंद्रः। गभस्त्योः। क्षद्मऽइव। तिग्मं। असनाय। सं। श्यत्। अहिऽहत्याय। सं। श्यत्॥ संऽविव्यानः। ओजसा। शवःऽभिः। इंद्र। मज्मना। तष्टाऽइव। वृक्षं। वनिनः। नि। वृश्चसि। परश्वाऽइव। नि। वृश्चसि॥४॥

अयमिंद्रो गभस्त्योर्बाह्वोर्वज्रं दादृहाणो दृढं गृह्णन्॥ दृह दृहि वृद्धौ। लिटः कानच्। गभस्ती इति बाहुनाम गभस्ती बाहू इति तन्नामसु पाठात्॥ किमर्थं। असनाय। शत्रोरुपरि क्षेपणाय। तिग्ममत्यंततीक्ष्णं वज्रं संश्यत्। सम्यक् तीक्ष्णीकरोति॥ शो तनूकरणे। ओतः श्यनीत्योकारलोपः। छांदसोऽडभावः। यद्वा लेटीतश्च लोप इतीकारलोपः॥ तत्र दृष्टांतः। क्षद्मेव। उदकमिव। उदकं यथा शत्रूणां निरसनायाभिमंत्रणादिसंस्कारेण तीक्ष्णीक्रियते तद्वत्॥ क्षद्मेत्युदकनाम क्षद्म नभ इति तन्नामसु पाठात्॥ पुनरपि तदेव विशेष्यते। अहिहत्याय।

अहेर्वृत्रस्य मेघस्य वा हननाय॥ हंतेर्हनस्त चेति क्यप् तकारांतादेशश्च॥ संश्यत्। पूर्वमेव तीक्ष्णं सत् पुनरपि वधाय तीक्ष्णयति। हे इंद्र ओजसा बलेन पराभिभवनसामर्थ्येन शवोभिः सेनालक्षणैर्बलैर्मज्मना शारीरेण च बलेन संविव्यानः सम्यक् युक्तः सन्॥ विव्यान इति लिटः कानच्। ग्रहिज्यावयीति संप्रसारणं॥ तष्टा वृक्षमिव। यथा कश्चित्तष्टा वृक्षाणां तक्षणस्य साधु कर्ता वनिनो वनसंबंधिनो वृक्षं निवृश्चति। स्वोपयोगाय नितरां छिनत्ति तक्षणेन तनूकरोति। तथा त्वमप्यस्मासु वक्रमाचरंतं शत्रुं निवृश्चसि। किंच परश्वेव निवृश्चसि। यथा परशुना कश्चिच्छिनत्ति वृक्षं तथा त्वमप्युक्तैस्त्रिविधैर्बलैर्नितरामस्मद्द्वेषिणं वृश्चसि॥

॥ अथ पंचमी ॥

त्वं वृथा नद्य इंद्र सर्तवेऽच्छा समुद्रमसृजो रथाँ इव वाजयतो रथाँ इव।
इत ऊतीरयुंजत समानमर्थमक्षितं।
धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः॥५॥

त्वं। वृथा। नद्यः। इंद्र। सर्तवे। अच्छ। समुद्रं। असृजः। रथान्ऽइव।
वाजऽयतः। रथान्ऽइव॥ इतः। ऊतीः। अयुंजत। समानं। अर्थं। अक्षितं।
धेनूःऽइव। मनवे। विश्वऽदोहसः। जनाय। विश्वऽदोहसः॥५॥

हे इंद्र त्वं वृथाप्रयत्नेनैव नद्यो नदीः समुद्रमच्छाभिमुख्येन सर्तवे प्राप्तुमसृजः। मेघं निर्भिद्योत्पादितवानसि। तत्र दृष्टांतः। रथानिव। यथा त्वं रथानस्मद्यागं प्रत्यच्छ सर्तव आभिमुख्येन प्राप्तुमसृजः सृष्टवानसि तद्वत्। किंच। वाजयतो रथानिव। संग्राममन्नं वेच्छंतो राजादयो रथानिव। ते यथा संग्रामं प्रत्योषध्यादिकं वाभिसर्तुं रथान् सृजंति तद्वत्॥ क्यजंतात् शतुरनुम इति विभक्तेरुदात्तत्वं॥ किंच। इतोऽस्मत्संनिधिदेशं॥ द्वितीयार्थे तसिल्॥ अस्मान् प्रत्यूतीरूत्यो गमनवत्यो रक्षणवत्यो वा नद्यः समानमर्थं समानप्रयोजनवदक्षितमुदकमयुंजत। योजितवत्यः। त्वत्प्रसादादिति भावः॥ अर्थशब्द उदकविशेषणः सन् नपुंसकलिंगः। अक्षितमित्युदकनाम। अक्षितं बर्हिरिति तन्नामसु पाठात्॥ तत्र दृष्टांतः। मनवे मनोरर्थाय धेनूरिव धेनवो यथा विश्वदोहसः सर्वार्थं दोग्ध्र्योऽभवन्। यथा वा जनाय यस्मै कस्मैचित्समर्थाय तदर्थं विश्वदोहसो

भवंति सर्वक्षीरप्रदा भवंति। यद्वा जनाय सर्वजनार्थं सस्यादीनभिलक्ष्य नद्यो विश्वदोहसः संपूर्णदोग्ध्र्यो भवंति। सर्वत्र प्रवहंति। अत्र नद्यः प्रीणनाद्दोहस इत्युपचर्यंते। ईदृग्जगदुपकारिवृष्टिप्रद इतींद्रस्यैव स्तुतिः॥

॥ इति द्वितीयस्य प्रथमेऽष्टादशो वर्गः॥

॥ अथ षष्ठी॥

इ॒मां ते॒ वाचं॑ वसू॒यंत॑ आ॒यवो॒ रथं॒ न धीरः॒ स्वपा॑ अतक्षिषुः सु॒म्नाय॒ त्वाम॑तक्षिषुः।
शुं॒भंतो॒ जेन्यं॑ यथा॒ वाजे॑षु विप्र वा॒जिन॑म्।
अत्य॑मिव॒ शव॑से सा॒तये॒ धना॒ विश्वा॒ धना॑नि सा॒तये॑॥ ६॥

इ॒मां। ते॒। वाच॑म्। व॒सु॒ऽयंतः॑। आ॒यवः॑। रथ॑म्। न। धीरः॑। सु॒ऽअपाः॑। अ॒त॒क्षि॒षुः॒। सु॒म्नाय॑। त्वाम्। अ॒त॒क्षि॒षुः॒॥ शुं॒भंतः॑। जेन्य॑म्। य॒था॒। वाजे॑षु। वि॒प्र॒। वा॒जिन॑म्। अत्य॑म्ऽइव। शव॑से। सा॒तये॑। धना॑। विश्वा॑। धना॑नि। सा॒तये॑॥ ६॥

हे इंद्र ते त्वदर्थं वसूयंतो धनमात्मन इच्छंत आयवो दातव्यहवीरूपान्नवंत ऋत्विजः॥ आयव इति मनुष्यनाम। आयवोऽनव इति तन्नामसु पाठात्॥ त इमां क्रियमाणां स्तुतिरूपां वाचमतक्षिषुः। संपादितवंतः। स्वपाः शोभनकर्मवान् कुशली॥ बहुव्रीहौ सौमनसी इत्युत्तरपदाद्युदात्तत्वं॥ धीरो धीमान् रथं न। रथमिव। तं यथा प्रयत्नेन साधु करोति तद्वत्। एवं कृत्वा त्वां सुम्नाय सुखायातक्षिषुः। अनुकूलमुत्पादयंति॥ सुम्नमिति सुखनाम। सुम्नं सुग्म्यमिति तन्नामसु पाठात्॥ किंच हे विप्र मेधाविन्निंद्र वाजेषु संग्रामेषु वाजिनं वेगवंतं त्वां शुंभंतो गुणैर्दीपयंतोऽतक्षिषुः। स्तुत्या प्रीणयंति। तत्र दृष्टांतः। जेन्यं यथा। जयशीलं शूरं यथा भटाः स्तुवंति तद्वत्। यद्वा जेन्यं जयशीलं वाजिनं वेगवंतमश्वं वाजेषु संग्रामेषु यथोत्साहयंति तद्वत्। किंच शवसे बलाय धना धनानां सातये लाभाय च स्तुम इति शेषः॥ ऊतियूतिजूतिसातीत्यादिना क्तिन उदात्तत्वं॥ न केवलं धनमात्रं किंतु विश्वा धनानि सातये कृत्स्नानि प्रीणनसाधनानि गवादिधनानि॥ षष्ठ्यर्थे द्वितीया॥ तेषां लाभाय। तत्र दृष्टांतः। धना धने संग्रामे शवसे वैरिजयसाधनबलाय सातये तेषामेव धनानां प्राप्तये चात्यमिव। सततगामिनमश्वमिव। तं यथा स्तुवंति तद्वत्॥

॥ अथ सप्तमी ॥

भिनत्पुरो नवतिमिंद्र पूरवे दिवोदासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो ।
अतिथिग्वाय शंबरं गिरेरुग्रो अवाभरत् ।
महो धनानि दयमान ओजसा विश्वा धनान्योजसा ॥ ७ ॥

भिनत् । पुरः । नवतिं । इंद्र । पूरवे । दिवःऽदासाय । महि । दाशुषे । नृतो इति । वज्रेण । दाशुषे । नृतो इति ॥ अतिथिऽग्वाय । शंबरं । गिरेः । उग्रः । अव । अभरत् । महः । धनानि । दयमानः । ओजसा । विश्वा । धनानि । ओजसा ॥ ७ ॥

हे इंद्र नृतो रणे नर्तनशील त्वं दाशुषे हविर्दत्तवते पूरवेऽभिमतपूरकाय ॥ मनुष्यनामैतत् ॥ महि महते दिवोदासायैतन्नामकाय राज्ञे ॥ दिवो दासे षष्ठ्या अलुगित्यलुक् । दिवोदासादीनां छंदसीति पूर्वपदाद्युदात्तत्वं ॥ नवतिमेतत्संख्याकानि पुरः शत्रूणां पुराणि भिनत् । भिन्नवानसि । तथा हे नृतो गात्रविक्षेपणकुशल हस्तपादादिप्रक्षेपेण शत्रूणां हिंसक वज्रेण क्षेपणसमर्थेनायुधेन दाशुषे हविर्दत्तवते दिवोदासायान्यस्मै वा भिनत् । तमपि शत्रुं भिन्नवानसि । इदानीं परोक्षेणाह । अतिथिग्वाय पूजार्थमतिथिं गच्छते दिवोदासाय तदर्थं ॥ गमेरौणादिको ड्वप्रत्ययः ॥ उग्र उद्गूर्णबल इंद्रः पूर्वं पुरभेदनसमये विद्रमयम्रियमाणं गिरिमारूढं शंबरमेतन्नामानमसुरं गिरेर्दुर्गमात्पर्वतादेः सकाशादोजसा स्वकीयेन बलेनावाभरत् । अवाङ्मुखमवकृष्यमाणं हृतवान् । किं कुर्वन् । महो महांति धनानि तदीयगवाश्वादीनि दयमानो दिवोदासाय राज्ञे साधयन् ॥ दय दानगतिहिंसादानेषु । शपः पित्त्वादनुदात्तत्वे शानचो लसार्वधातुकस्वरेण धातुस्वरः ॥ न केवलमल्पं धनं किंतु विश्वा धनानि सर्वाण्यपि तेषां मणिमुक्तादीन्योजसा स्वकीयेन बलेन दयमानः साधयन्नवाभरत् ॥

॥ अथाष्टमी ॥

इंद्रः समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजिषु स्वर्मीळ्हेष्वाजिषु ।
मनवे शासदव्रतान्त्वचं कृष्णामरंधयत् ।
दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति ॥ ८ ॥

इंद्रः। समत्ऽसु। यजमानं। आर्यं। प्र। आवत्। विश्वेषु। शतंऽऊतिः। आजिषु। स्वःऽमीळ्हेषु। आजिषु ॥ मनवे। शासत्। अव्रतान्। त्वचं। कृष्णां। अरंधयत्। धक्षत्। न। विश्वं। ततृषाणं। ओषति। नि। अर्शसानं। ओषति ॥ ८ ॥

अयमिंद्रः समत्सु रणेषु प्रहारनिमित्तेषु यजमानं यष्टारमार्यमरणीयं सर्वैर्गंतव्यं प्रावत्। रक्षति ॥ समत्स्विति संग्रामनाम समत्सु समरण इति तन्नामसु पाठात् ॥ किंच शतमूतिः स्वभक्तेष्वपरिमितरक्षण इंद्रो विश्वेषु ॥ लिंगव्यत्ययः ॥ आजिषु सर्वेषु स्पर्धानिमित्तेषु संग्रामेषु यजमानं प्रावत्। तथा स्वर्मीळ्हेषु स्वर्गदेशेषु सुखस्य सेचयत्सु वाजिषु महासंग्रामेषु प्रावत्। स्वर्गप्रदानेन रक्षति। रण आभिमुख्येन हतानां वीराणां स्वर्गः पराशरेण स्मर्यते। द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ। परिव्राड्योगयुक्तश्च रणे योऽभिमुखो हत इति। अत्रेतिहासमाचक्षते। अंशुमती नाम नदी। तस्यास्तीरे कृष्णनामासुरो वर्णितश्च कृष्णो दशसहस्रैरनुचरैरुपेतस्तद्देशवर्तिनः पीडयन्नास्ते। तत्रेंद्रो बृहस्पतिना प्रेरितः सन् मरुद्भिः सहितः कृष्णां तदीयत्वचमुत्कृत्य सानुचरमवधीत्। अयमर्थोऽव द्रप्सो अंशुमतीमतिष्ठदित्यादिनोपरिष्टाद्वक्ष्यते। तदत्रोच्यते। अयमिंद्रो मनवे मनुष्याय ॥ विभक्तिव्यत्ययः ॥ मनुष्याणामर्थायाव्रतान्। व्रतमिति कर्मनाम। तद्रहितान् यागविद्वेषिणः शासत्। शिक्षितवान् हिंसितवान् ॥ शासेर्लेट्यडागमः ॥ तथा कृष्णां त्वचं कृष्णनाम्नोऽसुरस्य कृष्णवर्णां त्वचमुत्कृत्यारंधयत्। हिंसितवान् ॥ रध हिंसायां। रधिजभोरचीति नुम् ॥ केन प्रकारेणेति तदुच्यते। धक्षत् भस्मीकरोति ॥ लेट्यडागमः। सिब्बहुलमिति सिप् ॥ तथा विश्वं ततृषाणमोषति। सर्वमपि हिंसकं तदनुचरसंघं दहति। यत्किंचिदवशिष्टमिति नेत्याह। अर्शसानं हिंसारुचिं हतावशिष्टं सर्वमपि न्योषति। निःशेषेण दहति ॥

॥ अथ नवमी ॥

सूरश्चक्रं प्र वृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायतीशान आ मुषायति।
उशना यत्परावतोऽजगन्नूतये कवे।
सुम्नानि विश्वा मनुषेव तुर्वणिरहा विश्वेव तुर्वणिः ॥ ९ ॥

सूरः। चक्रं। प्र। वृहत्। जातः। ओजसा। प्रऽपित्वे। वाचं। अरुणः। मुषायति। ईशानः। आ। मुषायति॥ उशना। यत्। पराऽवतः। अजगन्। ऊतये। कवे। सुम्नानि। विश्वा। मनुषाऽइव। तुर्वणिः। अहा। विश्वाऽइव। तुर्वणिः॥९॥

अत्रापीतिहासमाचक्षते। केचनासुराः पूर्वमिंद्रवज्रेण वधो मा भूदिति ब्रह्मणो वरं लब्ध्वेंद्रमगणयित्वोद्वृत्ता आसन्। तान् हंतुमिंद्रः सूर्यरथस्य चक्रमादायावधीदिति। तदिदमुच्यते। अयमिंद्रः सूरः सूर्यस्य॥ षष्ठ्यर्थे प्रथमा॥ चक्रं रथस्य चक्रमादायौजसा शारीरेण बलेन जातः समृद्धः सन् प्रवृहत्। प्रक्षिप्तवान्॥ वृहू उद्यमने। तौदादिकः॥ किंच। अरुणोऽरुणवर्णोऽत्यंततेजोयुक्तः सन्। यद्वा गमनशीलः सन् प्रपित्वे तेषां समीपे तत्समीपमागत्य वाचं वागुपलक्षितं प्राणं मुषायति। मुमोष मुष्णाति वा॥ प्रपित्व इत्यासन्ननाम॥ यद्वा वाचं तेषां प्रहारध्वनिं मुषायति। तेषु हतेषु ध्वनिः स्वयमेव विश्रांतो भवति। अवधीदित्यर्थः। अथवा। इंद्र एव द्युस्थानः सन् आदित्यात्मना स्तूयते। सूरः सूर्यो जात उदितः सन् ओजसा स्वकीयेन तेजसा युक्तश्चक्रं प्रवृहत्। तमोनिवारणार्थमसुरजयाय वा चक्रोपलक्षितं रथं प्रकर्षेणोद्यतं ततः करोति पूर्वं। अरुणस्तद्रथयंता प्रपित्वे मंदेहाद्यसुराणां प्रपित्वे समीपे वाचं तेषां जहि भिंधीत्यादिध्वनिं मुषायति। मुष्णाति॥ मुषेरुत्तरस्य श्नोऽहावपि छंदसि शायजपीति शायजादेशः॥ तदनंतरं सूर्य ईशानः सर्वाणि तमांस्यसुरान्वा निराकर्तुं समर्थः सन् आमुषायति। समंतान्मुष्णाति। अथ प्रत्यक्षकृतः। हे कवे क्रांतदर्शिन् यत् यस्त्वमुशना उशनस एतन्नाम्नो महर्षेरूतये रक्षणाय परावतो दूरात्स्वर्गस्थानादजगन्। गतवानसि प्राप्तवानसि॥ गमेः सिपि छांदसः शपः श्लुः। हल्ङ्यादिलोपे मो नो धातोरिति नत्वं॥ यद्वा। उशना उशनसा युक्तः सन् अजगन्। आगच्छ। आगत्य च विश्वा विश्वानि सुम्नानि सुखसाधनानि धनान्यादायास्माकं तुर्वनिस्तूर्णवनिः क्षिप्रं संभक्ता भवेति शेषः॥ तुर्वणिस्तूर्णवनिरिति निरुक्तं॥ तत्र दृष्टांतः। मनुषेव मनुष्येणेव। यथा त्वोतेन परिवृढाय देशांतराद्भिमतं धनमानीयते तद्वत्। यद्वा मनुषेव मनुष्याणामिव। इतरेषामृत्विजां विश्वा सुम्नानि सर्वाणि धनान्यादाय तुर्वणिर्भवसि। तद्वदस्माकमपि। न केवलमेकस्मिन्नेव यागदिने किंत्वहा विश्वेव। विश्वान्यप्यहानि। सर्वेष्वप्यहःसु तुर्व-

णिर्भव। यद्वा तुर्वणिस्त्वमहा विश्वेव विश्वान्यहान्यतिदीर्घमायुष्यं यथा ददासि तथा सुम्नान्यपि। उभयमपि देहीत्यर्थः॥

॥ अथ दशमी ॥

स नो॒ नव्ये॑भिर्वृषकर्मन्नु॒क्थैः पुरां॑ दर्तः पा॒युभिः॑ पाहि श॒ग्मैः।
दि॒वो॒दा॒सेभि॑रिंद्र॒ स्तवा॑नो वावृधी॒था अहो॑भिरिव॒ द्यौः॥१०॥

सः। नः॒। नव्ये॑भिः। वृ॒ष॒ऽक॒र्म॒न्। उ॒क्थैः। पुरां॑। द॒र्त॒रिति॑ दर्तः। पा॒यु॒ऽभिः॑। पा॒हि॒। श॒ग्मैः।
दि॒वः॒ऽदा॒सेभिः॑। इं॒द्र॒। स्तवा॑नः। व॒वृ॒धी॒थाः। अहो॑भिःऽइव। द्यौः॥१०॥

हे इंद्र वृषकर्मन् अभिमतवर्षणव्यापारवन् पुरां दर्तः। असुरपुराणां दारयितः॥ सुबामंत्रित इति षष्ठ्याः परांगवद्भावात् षष्ठ्यामंत्रितसमुदायस्य पादादित्वादाष्टमिकमाद्युदात्तत्वं॥ स तादृशो महानुभावस्त्वं नोऽस्मत्संबंधिभिर्नव्येभिर्नूतनैरुक्थैरिदानीं प्रतिपादितप्रकारैः स्तोत्रैस्तुष्टः सन् पायुभिः पालनप्रकारैः शग्मैः सुखैश्चैहिकामुष्मिकरूपैः पाहि। पालय। किंच हे इंद्र दिवोदासेभिर्दिवोदासगोत्रोत्पन्नैः॥ अर्शआदित्वादच्॥ अस्माभिः परुच्छेपैः। यद्वा पूजार्थं बहुवचनं। स्तवानः स्तूयमानः॥ कर्मणि कर्तृप्रत्ययः॥ ववृधीथाः। प्रवृद्धो भव॥ वृधेर्लिङि छांदसः शपः श्लुः॥ किमिव। अहोभिरिव द्यौः। द्योतनशील आदित्योऽहोभिः प्रसिद्धैर्यथा प्रवृद्धो भवति। तथास्मत्स्तुत्यात्यंतं प्रवृद्धो भवेत्यर्थः॥

॥ इति द्वितीयस्य प्रथम एकोनविंशो वर्गः॥

इंद्राय हीति सप्तर्चं पंचमं सूक्तं। इंद्राय सप्तेत्यनुक्रमणिका। परुच्छेप ऋषिः। अत्यष्टिश्छंदः। इंद्रो देवता॥ पृष्ठ्यस्य षष्ठेऽहनि माध्यंदिनसवने होत्रकाः स्वस्वशस्त्र एतत्सूक्तं तृचत्रयं कृत्वारंभणीयाभ्य ऊर्ध्वमावपेयुः। अत्रायं विभागः। आद्यास्तिस्रो मैत्रावरुणस्य। तृतीयाद्यास्तिस्रो ब्राह्मणाच्छंसिनः। पंचम्याद्यास्तिस्रोऽच्छावाकस्य। एतच्चतुर्थेऽहनीति खंडे सूचितं। षष्ठेऽहनींद्राय हि द्यौरसुरो अनम्नतेत्येवमेव। आ॰ ७. ११.। इति॥ तत्रैवाहनि तस्मिन्नेव सवने प्रशास्त्रादीनां प्रस्थितयाज्याभ्यः पुरस्तात् आदितः षडृच एकैकशः प्रक्षेपणीयाः। षष्ठस्येति खंडे सूचितं। इंद्राय हि द्यौरसुरो अनम्नतेति षड्। आ॰ ८. १.। इति॥ महाव्रते निष्केवल्य इंद्राय हीति तृचो वैकल्पिकानुरूपद्वितीयः। महाव्रत-

स्येति खंडे सूचितं। एंद्र याह्युप नः परावत इंद्राय हि द्यौरसुरो अनम्नत। ऐ॰ आ॰ ५. १.। इति ॥

॥ तत्रेयं प्रथमा ॥

इंद्राय हि द्यौरसुरो अनम्नतेंद्राय मही पृथिवी वरीमभिर्द्युम्नसाता वरीमभिः।
इंद्रं विश्वे सजोषसो देवासो दधिरे पुरः।
इंद्राय विश्वा सवनानि मानुषा रातानि संतु मानुषा ॥ १ ॥

इंद्राय। हि। द्यौः। असुरः। अनम्नत। इंद्राय। मही। पृथिवी। वरीमऽभिः। द्युम्नऽसाता। वरीमऽभिः ॥ इंद्रं। विश्वे। सऽजोषसः। देवासः। दधिरे। पुरः। इंद्राय। विश्वा। सवनानि। मानुषा। रातानि। संतु। मानुषा ॥ १ ॥

द्यौर्द्योतनशीलो द्युलोकस्तन्निवासी देवसंघो वा स चासुरो निरसनशीलः। शत्रूणामपुण्यकृतामेव तन्निवासात्। इंद्राय हींद्रायैवानम्नत। स्वयमेव प्रह्वो भवति ॥ नमेश्छांदसे लङि कर्मकर्तर्यात्मनेपदं। न दुहस्नुनमामिति यगभावः। पा॰ ३. १. ८९.। छांदसः शपः श्लुः। हलादिशेषाभावश्च। अनुनासिकलोपः ॥ हिशब्दः प्रसिद्ध्यर्थो वा। तथेंद्रायेंद्रार्थं मही महती पृथिवी भूमिस्तत्रत्यः सर्वो जनो वानम्नत। उभयत्राश्रयवाचिशब्देनाश्रयी लक्ष्यते ग्राम आगच्छत इतिवत्। केन साधनेनेति तदुच्यते। वरीमभिर्वरणीयैः स्तोत्रैर्हविर्भिर्वा। किंच द्युम्नसाता द्युम्नसातावन्नस्य यशसो वा लाभे निमित्ते सति वरीमभिर्वरणीयैर्हविर्भिर्युक्ता यजमानाः प्रह्वा भवंति। किंच। इंद्रमेव विश्वे सर्वे देवासो देवाः सजोषसः समानप्रीतियुक्ता ऐकमत्यभाजः पूर्वमसुरजयार्थं पुरो दधिरे। पुरतः स्थापितवंतः। इंद्रमुखेनैवासुरान् जितवंत इत्यर्थः। तथा मानुषा सवनानि मनुष्याणां संबंधीन्यभिषवयुक्तानि प्रातरादिसवनानींद्राय संतु। इंद्रायैव भवंतु। तथा मानुषा मनुष्याणामृत्विजां संबंधीनि रातानि दातव्यानि पुरोडाशादीनींद्राय हींद्रायैव संतु। इंद्रं प्रीणयितुं समर्थानि भवंत्वित्यर्थः ॥

॥ अथ द्वितीया ॥

विश्वेषु हि त्वा सवनेषु तुंजते समानमेकं वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक्।
तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि।
इंद्रं न यज्ञैश्चितयंत आयवः स्तोमेभिरिंद्रमायवः ॥ २ ॥

विश्वेषु। हि। त्वा। सवनेषु। तुंजते। समानं। एकं। वृषऽमन्यवः। पृथक्।
स्व१रिति स्वः। सनिष्यवः। पृथक्॥ तं। त्वा। नावं। न। पर्षणिं। शूषस्य। धुरि। धीमहि।
इंद्रं। न। यज्ञैः। चितयंतः। आयवः। स्तोमेभिः। इंद्रं। आयवः ॥ २॥

हे इंद्र त्वा त्वामेकमेकमेव संतं विश्वेषु सर्वेषु सवनेषु तद्वत्स्वेकाहाहीनसत्ररूपेषु सर्वेषु सोमयागेषु यजमानास्तुंजते। त्वरयंति। हविरादीनि ददते। कीदृशं त्वां। समानं। सर्वेषामेकरूपं। कीदृशा यजमानाः। वृषमण्यवः। अभिमतवर्षणाय त्वामेव मन्यमानाः। पृथक् विविच्य स्वस्वयागे किमिच्छंतः। स्वः स्वर्गं सुखविशेषं वा सनिष्यवः संभक्तुकामाः पृथक् तुंजते। पृथगेव त्वरयंति॥ तुंजतिर्दानार्थः शिक्षति तुंजत इति तन्नामसु पाठात्॥ तं तादृशं त्वा त्वां शूषस्य बलस्य सेनारूपस्य धुरि वहने तज्जयाय धीमहि। स्थापयामः। यद्वा शूषस्यास्मदीयशारीरबलस्य धुरि धीमहि॥ शूषमिति बलनाम शूषं सह इति तन्नामसु पाठात्॥ तत्र दृष्टांतः। पर्षणिं नावं न। पारस्य संभक्त्रीं पूरयित्रीं वा फलस्य नावमिव। तां यथा भारवहने स्थापयंति॥ पार तीर कर्मसमाप्तौ। छंदसि वनसनेति सनेरिन्प्रत्ययः। पा॰ ३.२.२७.। पृषोदरादिः। पिपर्तेरौणादिकः सनिप्रत्ययो वा॥ कीदृशा वयं। आयवो मनुष्या यजमाना यज्ञैः साधनैरिंद्रं न चितयंतः। परमेश्वरमिव त्वां चेतयंतः। परमेश्वरबुद्ध्या भावयंत इत्यर्थः। यद्वा नशब्द एवकारार्थः। इंद्रमेव त्वां जानंतः। तथा स्तोमेभिः स्तोत्रैरिंद्रमेवायवो गच्छंतो वयं धीमहि॥ दधातेर्लिङि छांदसः शपो लुक्॥

॥ अथ तृतीया ॥

वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता गव्यस्य निःसृजः सक्षंत इंद्र निःसृजः।
यद्गव्यंता द्वा जना स्व१र्यंता समूहसि।
आविष्करिक्रद्वृषणं सचाभुवं वज्रमिंद्र सचाभुवं ॥ ३॥

वि। त्वा। ततस्रे। मिथुनाः। अवस्यवः। व्रजस्य। साता। गव्यस्य। निःऽसृजः।
सक्षंतः। इंद्र। निःऽसृजः॥ यत्। गव्यंता। द्वा। जना। स्वः। यंता। संऽऊहसि।
आविः। करिक्रत्। वृषणं। सचाऽभुवं। वज्रं। इंद्र। सचाऽभुवं॥ ३॥

हे इंद्र त्वा त्वामुद्दिश्य मिथुनाः पत्नीसहिता यजमाना विततस्रे। यज्ञं

वितन्वते । यद्वा यज्ञे पयोव्रतादिनात्मानमुपक्षयंति ॥ तमु उपक्षये । छांदसे लिटीरयो रे इति रेभावः ॥ किमर्थं । गव्यस्य व्रजस्य साता । गवां संबंधिनो यूथस्य लाभे निमित्तभूते सति । न च सर्वत्राग्निहोत्रादिनित्यवाक्येषु कारीरीचित्रादिकाम्यवाक्येषु यस्योदयं यस्य गृहानित्यादिनैमित्तिकवाक्येषु पुरुषस्यैवार्थित्वादेः सद्भावात्तस्यैवाधिकारः स्त्रियास्तु सत्यप्यर्थित्वेऽध्ययनाभावेन विद्वत्ताया अभावादत एव सामर्थ्याभावाच्च नास्त्यधिकार इति वाच्यं । यद्यपि स्त्रिया नास्ति पृथगधिकारस्तथापि पूर्वमीमांसायां षष्ठेऽधिकाराध्याये तृतीयचतुर्थाभ्यामधिकरणाभ्यां अस्त्येव स्त्रिया अधिकारः स च पत्या सहेति प्रपंचितत्वात् जायापती अग्निमादधीयातामित्याधानविधानात् स्मृतिषु च नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं । म० ५.१५५.। इति पृथगधिकारस्यैव निवारितत्वादस्त्येव स्त्रियाः पत्या सहाधिकारः । अध्ययनाभावेऽपि वेदं पत्न्यै प्रदाय वाचयेत् । आ० १.११.। इति सूत्रकारवचनात् पत्न्यन्वास्त इत्यादिविधिषु सुप्रजसस्त्वा वयमित्यादिमंत्रविधानाद्यत्र वचनमस्ति तत्रास्त्येव मंत्रेऽधिकारः किं हि वचनेन कुर्यान्नास्ति वचनस्यातिभार इति न्यायात् । तस्मान्मिथुना यज्ञं ततस्न इत्येतद्युक्तं । कीदृशास्ते । अवस्यवः । इंद्रायात्मने तृप्तिमिच्छंतः । निःसृजः । निःशेषेण हविस्त्यजंतः । सक्षंतः ॥ सक्षतिर्गत्यर्थः ॥ त्वां संभजमानाः । पुनस्त एव विशेष्यंते । निःसृजः । फलप्रतिबंधकं पापं निर्गमयंतः । कस्तव विशेष इति तदुच्यते । यत् यस्मात्कारणाद्गव्यंता गामात्मन इच्छंतौ ॥ गोशब्दात्सुप आत्मनः क्यच् । वांतो यि प्रत्यय इत्यवादेशः ॥ स्वर्यंता स्वर्गं यंतौ गंतुमुद्युक्तौ द्वा जना द्वौ जायापतीरूपौ जनौ समूहसि । संयुक्तयोरेवाभिमतं स्वर्गादिकं प्रापयसि । यद्वा सम्यगनुष्ठितवंतावित्यूहसि । निश्चिनोषि । अतः पत्नीसहिता अनुतिष्ठंतीत्यर्थः । किंच हे इंद्र त्वं वृषणं वर्षकं कामानां सचाभुवं सहैवोत्पन्नं त्वया विना भूतं तथा सचाभुवं शत्रुवधादिव्यापारसमर्थ्येन सहैवोत्पन्नं वज्रमाविष्करिक्रत् । आविष्कुर्वन्प्रकटयन्वर्तस इति शेषः ॥

॥ अथ चतुर्थी ॥

विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिंद्र शारदीरवातिरः सासहानो अवातिरः ।
शासस्तमिंद्र मर्त्यमयज्युं शवसस्पते ।
महीममुष्णाः पृथिवीमिमा अपो मंदसान इमा अपः ॥ ४ ॥

विदुः । ते । अस्य । वीर्यस्य । पूरवः । पुरः । यत् । इंद्र । शारदीः । अवऽअतिरः ।
ससहानः । अवऽअतिरः ॥ शासः । तं । इंद्र । मर्त्यं । अयज्युं । शवसः । पते ।
महीं । अमुष्णाः । पृथिवीं । इमाः । अपः । मंदसानः । इमाः । अपः ॥ ४ ॥

हे इंद्र ते वीर्यस्य तव संबंधिनोऽस्य वीर्यस्य ॥ कर्मणि षष्ठी ॥ वक्ष्यमाणमेतद्वीर्यं विदुः । ये पूरवो मनुष्या यजमानास्तव महत्त्वं जानानास्त्वामेव यजंति ते विदुः । यद्वा । अस्य वीर्यस्य माहात्म्यमिति शेषः ॥ विदुष्ट इत्यत्र युष्मत्तत्ततक्षुःष्विति विसर्जनीयस्य सत्वं ॥ वीर्यमेव विशेष्यते । हे इंद्र यद्यस्मात्कारणात् शारदीः संवत्सरसंबंधिनीः संवत्सरपर्यंतं प्राकारपरिखादिभिर्दृढीकृताः पुरः शत्रूणां पुरीरवातिरः । अनाशयः ॥ अवपूर्वस्तिरतिर्नाशनार्थः ॥ किं कुर्वन् । ससहानः । तत्रत्यानभिभवन् धनाद्यपहारेण पीडयन् ॥ सहतेर्यङ्लुगंतात्ताच्छीलिकश्चानश् ॥ अवातिरः । किंच । हे इंद्र तं मर्त्यं मरणधर्माणमयज्युमयष्टारं यज्ञविघातिनं राक्षसादि शासः । निगृहीतवानसि । हे शवसस्पते बलस्य पालकेंद्र त्वं महीं महतीं पृथिवीमिमा अपश्च समुद्रनद्यात्मकान्युदकानि चामुष्णाः । बलादपहृतवानसि । असुरैरन्यैर्वा यज्ञविद्वेषिभिराक्रांतां भूमिं तत्संबंधिनीरपश्च तेषां पुराणि भित्त्वापहृतवानसीत्यर्थः । किं दुःखेन । नेत्याह । मंदसानः । हृष्यन्नेवेमा अप इमान्यप्कार्याणि व्रीह्याद्यन्नान्यमुष्णाः । लब्धवानसि ॥

॥ अथ पंचमी ॥

आदित्ते अस्य वीर्यस्य चर्किरन्मदेषु वृषन्नुशिजो यदाविथ सखीयतो यदाविथ ।
चकर्थ कारमेभ्यः पृतनासु प्रवंतवे ।
ते अन्यामन्यां नद्यं सनिष्णत श्रवस्यंतः सनिष्णत ॥ ५ ॥

आत् । इत् । ते । अस्य । वीर्यस्य । चर्किरन् । मदेषु । वृषन् । उशिजः । यत् । आविथ ।
सखिऽयतः । यत् । आविथ ॥ चकर्थ । कारं । एभ्यः । पृतनासु । प्रऽवंतवे ।
ते । अन्यांऽअन्यां । नद्यं । सनिष्णत । श्रवस्यंतः । सनिष्णत ॥ ५ ॥

हे इंद्र आत् अत एव हेतोस्ते वीर्यस्य तव संबंधिने वीर्याय तदभिवृद्धये चर्किरन् । पुनःपुनः सोमं विकिरंति ॥ किरतेर्यङ्लुगंताद्व्यत्ययेन शः ॥ सर्वेषु सवनेषु वितरंति यजमानाः । अत इत्युक्तं कुत इत्याह । मदेषु वृषन् सोमजनि-

तमदेषु सत्सु हे कामानां वर्षितरुशिजस्त्वां कामयमानान्यजमानान् यद्यतः कारणादाविथ । रक्षसि । किंच सखीयतस्तव सखित्वमात्मन इच्छतोऽस्मान् यद्यस्मादाविथ । तर्पयसि । अभिमतेन प्रीणयसि । अतश्चक्रिरन् । किंच हे इंद्र एभ्यो यजमानेभ्यः कारं शब्दं सिंहनादलक्षणं चकर्थ । करोषि ॥ करोतेः कर्मणि घञ् । कर्षात्वत इत्यंतोदात्तत्वं ॥ कुत्रेति तदुच्यते । पृतनासु । संग्रामेषु । किमर्थं । प्रवंतवे । प्रकर्षेण वनितुं संभक्तुं । युद्धाय हि धीराः संभजंते ॥ वनतेस्तुमर्थे तवेन्प्रत्ययः । तादौ चेति गतेः प्रकृतिस्वरत्वं ॥ किंच ते तव संग्रामवासिनस्त्वय्यन्यामन्यामन्यांश्चान्यांश्च ॥ अन्यमन्यं प्रतिकर्म व्यतिहारे सर्वनाम्नो द्विर्वचनं ॥ नद्यं नदिं संतोषं समृद्धिं ॥ टुनदि समृद्धौ । पूर्वरूपत्वं बाधित्वा छांदसो यणादेशः ॥ सनिष्णत । संभजंते ॥ सनेर्लेटि सिब्बहुलमिति सिप् । इट् । व्यत्ययेन पुनः श्नाप्रत्ययः । आत्मनेपदेष्वनत इत्यदादेशे श्नाभ्यस्तयोरात इत्याकारलोपः । छांदसः टेरेत्वाभावः ॥ तथा श्रवस्यंतोऽन्नमिच्छंतो जयाल्लब्धमन्नं कांक्षंतः सनिष्णत । संभजंते ॥

॥ अथ षष्ठी ॥

उतो नो अस्या उषसो जुषेत ह्य१र्कस्य बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः ।
यदिंद्र हंतवे मृधो वृषा वज्रिं चिकेतसि ।
आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः ॥ ६ ॥

उतो इति । नः । अस्याः । उषसः । जुषेत । हि । अर्कस्य । बोधि । हविषः । हवीमऽभिः ।
स्वःऽसाता । हवीमऽभिः ॥ यत् । इंद्र । हंतवे । मृधः । वृषा । वज्रिन् । चिकेतसि ।
आ । मे । अस्य । वेधसः । नवीयसः । मन्म । श्रुधि । नवीयसः ॥ ६ ॥

अयमिंद्रो नोऽस्माकं संबंधिनीमस्या उषसः ॥ कर्मणि षष्ठी ॥ एतामुषसं सुत्याहःसंबंधिनमुषःकालमुतो जुषेत । अपि नाम सेवेत । उषस्येवास्माकमयमिंद्रो यज्ञं गच्छेदित्यर्थः ॥ हिः पूरणार्थः ॥ गत्वा चार्कस्य हविषः ॥ पूर्ववत्कर्मणि षष्ठी ॥ अर्चनसाधनं हविर्हवीमभिर्हवनप्रकारविशेषैर्दत्तं हविरुतो बोधि । अपि नाम जानीहि । किंच स्वर्षाता स्वर्गस्यान्यस्य सुखविशेषस्य वा संभजनस्थाने यज्ञे हवीमभिराह्वानैराहूतो भवेति शेषः । अस्माभिराहूतः सन् उषस्येवागत्य हविः स्वीकरोषीत्यर्थः । कस्मादिदमुच्यते । यद्यस्मात्कारणात् हे वज्रिन् वज्रयुक्तेंद्र मृधो हिंसकाञ्छत्रून् हंतवे हंतुं वृषा वर्षिता सन् कामानां

चिकेतसि। अवबुध्यसे ॥ कित ज्ञाने। जौहोत्यादिकः। लेट्यडागमः। नाभ्यस्तस्याचि पितीत्यत्र छंदसि वहुलमिति वचनाल्लघूपधगुणप्रतिषेधाभावः। अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ तस्माद्ब्रूमः। हे इंद्र मे मम मन्म मननीयं स्तोत्रमाश्रुधि। सर्वतः शृणु। कीदृशस्य मे। वेधसो मेधाविनः। नवीयसो नवतरस्य। दीक्षितसंस्कारैः संस्कृतत्वान्नवीयस्त्वं। पुनर्विशेष्यते। नवीयसोऽतिशयेन नवनवतः। असाधारणस्तुतिमतः। अत्र यजमानविशेषणैस्तत्कर्तृकं स्तोत्रमेव विशिष्टं भवति ॥

॥ अथ सप्तमी ॥

त्वं तमिंद्र वावृधानो अस्मयुरमित्रयंतं तुविजात मर्त्यं वज्रेण शूर मर्त्यं।
जहि यो नो अघायति शृणुष्व सुश्रवस्तमः।
रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मतिः ॥ ७ ॥

त्वं। तं। इंद्र। ववृधानः। अस्मऽयुः। अमित्रऽयंतं। तुविऽजात। मर्त्यं।
वज्रेण। शूर। मर्त्यं ॥ जहि। यः। नः। अघऽयति। शृणुष्व। सुश्रवःऽतमः।
रिष्टं। न। यामन्। अप। भूतु। दुःऽमतिः। विश्वा। अप। भूतु। दुःऽमतिः ॥ ७ ॥

हे इंद्र तुविजात। अस्मत्स्तुत्या वहुभावमापन्न शूर विक्रांत त्वं ववृधानोऽत्यर्थं वर्धमानोऽस्मयुरस्मान् त्वद्भक्तान्कामयमानस्त्वममित्रयंतमस्मासु शत्रुत्वमाचरंतं मर्त्यं मरणस्वभावं वज्रेण जहि ॥ हंतेर्ज इति जादेशः। तस्यासिद्धवदत्राभादित्यसिद्धत्वात् हेर्लुगभावः ॥ तमित्युक्तं। कमित्याह। यो मर्त्यो नोऽस्माकमघायति। अघं पापं दुःखं वेच्छति। तं जहि ॥ अश्वाघस्यादित्यात्वं ॥ किंच हे सुश्रवस्तम अतिशयेन शोभनश्रवणस्त्वं शृणुष्व। श्रावयास्मद्वाक्यं। कीदृशं तदिति तदुच्यते। हे इंद्र त्वत्प्रसादात् दुर्मतिरस्मज्जिघांसाविषया दुष्टा बुद्धिरपभूतु। अपगता भवतु ॥ छांदसः शपो लुक्। भूसुवोस्तिङीति गुणप्रतिषेधः ॥ न केवलं हिंसारूपा अपि तु विश्वा सर्वापि क्रोधपरिवादादिरूपापभूतु। तत्र दृष्टांतः। यामन् यामन्यध्वनि रिष्टं न। अध्वनः श्रमेण हिंसितं परिश्रांतं यथा दुर्मतिश्चौरादिविषया वाधते तद्वदस्मान्वाधमाना दुर्मतिरपगच्छतु। यद्वा यामनि मार्गे यज्ञादिरूपे रिष्टमसुरकृतं हिंसादिरूपं विघ्नं परिहरसि। तद्वत् ॥

॥ इति द्वितीयस्य प्रथमे विंशो वर्गः ॥

त्वया वयमिति षडृचं षष्ठं सूक्तं । पारुच्छेपमात्यष्टमैंद्रं । युवंतमित्ययमैंद्रापार्वतोऽर्द्धर्चः । त्वया वयं षड्युवंतमैंद्रापार्वतोऽर्द्धर्चं इत्यनुक्रमणिका ॥ विनियोगो लैंगिकः ॥ तत्र त्वया वयमित्येषा प्रथमा ॥

त्वया वयं मघवन्पूर्व्ये धन इंद्रत्वोताः सासह्याम पृतन्यतो वनुयाम वनुष्यतः ।
नेदिष्ठे अस्मिन्नहन्यधि वोचा नु सुन्वते ।
अस्मिन्यज्ञे वि चयेमा भरे कृतं वाजयंतो भरे कृतं ॥ १ ॥

त्वया । वयं । मघऽवन् । पूर्व्ये । धने । इंद्रत्वाऽऊताः । ससह्याम । पृतन्यतः ।
वनुयाम । वनुष्यतः ॥ नेदिष्ठे । अस्मिन् । अहनि । अधि । वोच । नु । सुन्वते ।
अस्मिन् । यज्ञे । वि । चयेम । भरे । कृतं । वाजऽयंतः । भरे । कृतं ॥ १ ॥

हे मघवन् । मघः सौख्यं । तद्वन्निंद्र त्वया साधनेन युक्ता वयं । अत एवेंद्रत्वोता अतिप्रबलेनेंद्रेण त्वया रक्षिताः संतः ॥ प्रत्ययोत्तरपदयोश्चेति त्वादेशः । छांदसमात्वं ॥ पृतन्यतः पृतनामात्मन इच्छतः प्रबलसेनायुक्ताञ्छत्रून् ससह्याम । अभिभवेम । तथा वनुष्यतोऽस्मत्प्रहारायागच्छतः शत्रून्वनुयाम । तेषामागमनात्पूर्वमेव वयं संभजेम । किंच । पूर्व्ये धनेऽस्मिन्यज्ञे नेदिष्ठेऽत्यंतसंनिहितेऽस्मिन्नहन्यभिषवयुक्तेऽद्यतनेऽहनि सुन्वते यजमानाय तदर्थमधिवोच । तं हविःप्रदं यजमानं यज्ञं वा नु क्षिप्रमधिकं ब्रूहि ॥ लोटि व्यत्ययेनाङ् । वच उम् ॥ किंच हे इंद्र वयं यजमाना भरे संग्रामे कृतं जयस्य कर्तारं त्वामुद्दिश्य तज्जयार्थं वाजयंतो हविर्लक्षणान्नमुपाचरंतो विचयेम । स्तोत्रादिकं हविरादिकं वा विचिनुयाम ॥ चिनोतेर्व्यत्ययेन शप् ॥ पुनः कीदृशं त्वां । भरे देवानां संग्रामेऽसुरजये देवानां सम्यक् भरणे वा कृतं कर्तारं ॥ भर इति संग्रामनाम भरतेर्वा हरतेर्वा । नि० ४. २४. । इति यास्कः ॥

॥ अथ द्वितीया ॥

स्वर्जेषे भर आप्रस्य वक्मन्युषर्बुधः स्वस्मिन्नंजसि क्राणस्य स्वस्मिन्नंजसि ।
अहन्निंद्रो यथा विदे शीर्ष्णाशीर्ष्णोपवाच्यः ।
अस्मत्रा ते सध्र्यक् संतु रातयो भद्रा भद्रस्य रातयः ॥ २ ॥

स्वः॑ऽजेषे। भरे॑। आ॒प्रस्य॑। वक्म॑नि। उ॒षः॒ऽबुधः॑। स्वस्मि॑न्। अंज॑सि। क्रा॒णस्य॑। स्वस्मि॑न्। अंज॑सि॥ अह॑न्। इंद्रः॑। यथा॑। वि॒दे। शी॒र्ष्णाऽशी॑र्ष्णा। उ॒प॒ऽवाच्यः॑। अ॒स्म॒ऽत्रा। ते। स॒ध्र्य॑क्। सं॒तु। रा॒तयः॑। भ॒द्राः। भ॒द्रस्य॑। रा॒तयः॑ ॥ २॥

अयमिंद्रः स्वर्जेषे स्वर्गगमनसाधने भरे संग्रामे। युद्ध आभिमुख्येन हतस्य स्वर्गो द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनावित्यादिस्मृतिषु प्रसिद्धः। आप्रस्याप्नशीलस्य शत्रुवधायेतस्ततो व्याप्तस्य॥ औणादिको रः॥ भूरस्य वक्मनि मार्गभूते स्वस्मिन् स्वभूतेऽंजस्यभिव्यक्तिमति कपटादिरहिते। पुनः स एव विशेष्यते। स्वस्मिन्नंजसि स्वकीयेऽंजसि मुखे। महति संग्रामे। यद्वा स्वस्मिन्नंजसि शत्रौ स्वयमेवाप्रच्छन्नत्वेनागते सत्यहन्। शत्रून् हिनस्ति। कस्य संग्राम इति तदुच्यते। आप्रस्यापनशीलस्य आ समंतादिंद्रस्य प्रीणयितुर्वा। उषर्बुध उषःकालेऽनुष्ठानाय प्रबुध्यमानस्य। क्राणस्य यागं कुर्वाणस्य॥ करोतेः शतरि छांदसः शपो लुक्। अस्य यजमानस्य शत्रूनहन्। हिनस्ति। अतः कारणादयमिंद्रः शीर्ष्णाशीर्ष्णोपवाच्यः। सर्वेषां शिरसा प्रणम्यः स्तुत्यः॥ शीर्षंश्छंदसीत्युदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। नित्यवीप्सयोरिति द्विर्भावः॥ तत्र दृष्टांतः। यथा विदे सर्वज्ञाय शिरसा प्रणतिः क्रियते स्तूयते च तथैनमित्यर्थः। यद्वा यथा विदे। येन प्रकारेण हंतव्यं शत्रुं जानासि तं तं प्रहंसि॥ वेत्तेर्व्यत्ययेनात्मनेपदं। पुरुषव्यत्ययः। लोपस्त आत्मनेपदेष्विति तलोपः॥ अथवा यथा विदे। यं यं विंदसे लभसे शत्रुं तं तं मारयसि। अतः कारणात्स्तुत्य इत्यर्थः॥ अस्मिन्पक्षे छांदसो विकरणस्य लुक्। पूर्ववत्तलोपः॥ किंच हे इंद्र ते रातयस्तव संबंधीनि धनानि दानान्यस्मत्रास्मास्वेव सध्र्यक् सहैकोद्योगेन संतु। भवंतु॥ सहपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्। सहस्य सध्रिरिति सध्र्यादेशः। अद्रिसध्र्योरंतोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थमिति स चांतोदात्तः। उदात्तस्वरितयोर्यण इति स्वरितः॥ किंच भद्रस्य स्तुत्यस्य रातयोऽस्मासु दत्तानि दानानि भद्रा अतिस्थिराणि संतु॥

॥ अथ तृतीया ॥

तत्तु प्रयः॑ प्र॒त्नथा॑ ते शुशुक्व॒नं यस्मि॑न्य॒ज्ञे वार॒मकृ॑ण्वत॒ क्षय॑मृ॒तस्य॒ वार॑सि॒ क्षय॑।

वि तद्वो॑चेर॒ध द्वि॒तांतः॑ पश्यं॑ति र॒श्मिभिः॑।

स घा॑ विदे अन्विंद्रो॑ ग॒वेष॑णो बंधु॒क्षिद्भ्यो॑ ग॒वेष॑णः ॥ ३॥

तत्। नु। प्रयः। प्रत्नऽथा। ते। शुशुक्वनं। यस्मिन्। यज्ञे। वारं। अकृण्वत। क्षयं। ऋतस्य। वाः। असि। क्षयं॥ वि। तत्। वोचेः। अध। द्विता। अंतः। पश्यंति। रश्मिऽभिः। सः। घ। विदे। अनु। इंद्रः। गोऽएषणः। बंधुक्षित्ऽभ्यः। गोऽएषणः ॥३॥

हे इंद्र तत्तु खलु प्रसिद्धं प्रयो हविर्लक्षणमन्नं शुशुक्वनमाज्यादिसंयोगेन भृशं दीप्तं॥ शुचेर्दीप्तिकर्मण एतद्रूपं॥ ते तव स्वभूतं प्रत्नथा ते तव स्वं भवति। तथाद्यतनमपि। सर्वदा त्वामेव यजंत इति भावः॥ प्रत्नपूर्वविश्वेत्यादिनेवार्थे थाल्। लित्स्वरः॥ कीदृशं तदिति उच्यते। यज्ञे यागे यस्मिन् हविषि दातव्ये सति वारं वरणीयं क्षयं स्थानं वेदिलक्षणमकृण्वत। कुर्वंत्यृत्विजः। कस्तव विशेष इति चेत् उच्यते। ऋतस्य सत्यफलस्य यज्ञस्य वारसि क्षयं। निवासस्थानं संभक्तोऽसि। यद्वा। ऋतमित्युदकनाम। तस्य क्षयं स्थानं प्राप्तोऽसि। वृष्टिप्रदोऽसीत्यर्थः। अथवा। ऋतस्यादित्यस्य क्षयं स्थानं द्युलोकाख्यं वारसि। यजमानं गमयितासि। तत्रादृशं वक्ष्यमाणं कर्म विवोचेः। विब्रूहि। अध अतः कारणात् द्वितांतर्द्वित्वोपेतयोर्द्यावापृथिव्योर्मध्येऽंतरिक्षे रश्मिभिरादित्यकिरणैः पश्यंति। मेघं निर्भिद्य रश्मिद्वारा प्रवर्षणरूपं कर्म सर्वे जनाः प्रत्यक्षतः पश्यंति। अस्मद्दत्तं हविरादित्यं प्रापयित्वा तद्रश्मिद्वारा वृष्टिं जनयसीत्येतत्सर्वैर्दृश्यत इत्यर्थः। इदानीं परोक्षतया स्तौति। स घ स खल्विंद्रो गवेषण उदकस्यान्वेषणशीलः। तथा बंधुक्षिद्भ्यो हविःप्रदानादिना बंधुभावं प्राप्तवद्भ्यो यजमानेभ्यो गवेषणो गवां प्रसिद्धानामेषणकर्ता॥ इषेर्बाहुलकात्कर्तरि ल्युट्। यद्वा गवेष् मार्गणे। पूर्ववत् ल्युट्॥ यजमानफलस्य मृगयितेत्यर्थः। अनु उक्तक्रमेणैव कर्ता सन् विदे। विंदते। उदकप्राप्तिप्रकाशं जानाति॥

॥ अथ चतुर्थी ॥

नू इत्था ते पूर्वथा च प्रवाच्यं यदंगिरोभ्योऽवृणोरप व्रजमिंद्र शिक्षन्नप व्रजं।
ऐभ्यः समान्या दिशास्मभ्यं जेषि योत्सि च।
सुन्वद्भ्यो रंधया कं चिदव्रतं हृणायंतं चिदव्रतं ॥४॥

नु। इत्था। ते। पूर्वऽथा। च। प्रऽवाच्यं। यत्। अंगिरःऽभ्यः। अवृणोः। अप। व्रजं। इंद्र। शिक्षन्। अप। व्रजं॥ आ। एभ्यः। समान्या। दिशा। अस्मभ्यं। जेषि। योत्सि। च। सुन्वत्ऽभ्यः। रंधय। कं। चित्। अव्रतं। हृणायंतं। चित्। अव्रतं ॥४॥

हे इंद्र ते तव संबंधि कर्मेत्थेत्थमुक्तप्रकारं वक्ष्यमाणरूपं वा पूर्वथा पूर्वमिव पूर्वं यथा नु क्षिप्रं प्रवाच्यं सर्वैः स्तोतव्यं। तद्वदिदानींतनमपि स्तुत्यं॥ नू इत्थेत्यत्रैषा अक्षादित्वात्प्रकृतिभावः ॥ कीदृशं तदिति तदुच्यते। यत्त्वमंगिरोभ्य एतन्नोचोत्पन्नेभ्यो महर्षिभ्यस्तेषामर्थाय व्रजमंतरिक्षे गच्छंतं मेघमपावृणोः। अपवृतवानसि। मेघमुद्घाट्य वृष्टिमुत्पादितवानसि॥ व्रज इति मेघनाम व्रजो वराह इति तन्नामसु पाठात्॥ किंच हे इंद्र व्रजं गवां समूहमयष्टृभ्योऽपहृत्य तेभ्य एवांगिरोभ्यः शिक्षन् वितरन् रक्षितवानसि। यद्वा पणिभिरपहृतं विले स्थितं गवां व्रजमपहर्तुमपावृणोः। अपवृतद्वारमकरोः। किंच हे इंद्र एभ्य उक्तेभ्य ऋषिभ्यः समान्या दिशा समानया रीत्या तेभ्यो यथा ददासि तद्वदस्मभ्यमपि जेषि। धनं संग्रामं वा जय। तदर्थं योत्सि। युध्यस्व च॥ छांदसो विकरणस्य लुक्। व्यत्ययेन परस्मैपदं॥ किंच त्वं सुन्वद्भ्यस्त्वदर्थमभिषवं कुर्वद्भ्योऽस्मभ्यं कंचिदव्रतं सर्वमप्ययज्वानं यागविरोधिनं रंधय। बाधय। मदधीनं कुर्वित्यर्थः। न केवलमयज्वानं किंतु हृणायंतं चिदव्रतं॥ चिदित्यवकुत्सिते॥ अस्मासु रोषं कुर्वंतं तमेव यष्टारं स्वयं रोषवंतं वा। यद्वा हृणायंतं चित् रोषं कुर्वंतमप्यव्रतमकर्माणं पुनर्हननासमर्थं कुर्वन् रंधय॥ हृणीङ् रोषे कंड्वादिः। व्यत्ययेनाकारः॥

॥ अथ पंचमी ॥

सं यज्जना॒न् क्रतु॑भि॒ः शूर॑ ई॒क्षय॒द्धने॑ हि॒ते त॑रुषंत श्रव॒स्यव॒ः प्र य॑क्षंत श्रव॒स्यव॑ः।
तस्मा॒ आयु॑ः प्र॒जाव॒दिद्बाधे॑ अर्च॒न्त्योज॑सा।
इंद्र॑ ओ॒क्यं॑ दिधिषंत धी॒तयो॑ दे॒वाँ अच्छा॒ न धी॒तय॑ः॥५॥

सं। यत्। जना॑न्। क्रतु॑ऽभिः। शूर॑ः। ई॒क्षय॑त्। धने॑। हि॒ते। त॒रु॒षं॒त। श्र॒व॒स्यव॑ः।
प्र। य॒क्षं॒त। श्र॒व॒स्यव॑ः॥ तस्मै॑। आयु॑ः। प्र॒जाऽव॑त्। इत्। बाधे॑। अर्च॑न्ति॒। ओज॑सा।
इंद्रे॑। ओ॒क्यं॑। दि॒धि॒षं॒त। धी॒तय॑ः। दे॒वान्। अच्छ॑। न। धी॒तय॑ः॥५॥

यत् य इंद्रः शूरो विक्रांतः सन् जनान् सर्वान्प्राणिनः क्रतुभिः प्रज्ञाभिः समीक्षयत्। सम्यगीक्षयति तत्तद्विषयान्। अंतर्यामिरूपेण सर्वेषां बुद्धिषु स्थित्वा तैर्विषयानुल्लेखयतीत्यर्थः। यद्वा क्रतुभिः कर्मभिः सुकृतदुःकृतरूपैर्निमित्तभूतैस्तत्तत्फलैर्योजयति। एवं प्रेरयति सति श्रवस्यवोऽन्नमिच्छंतो यजमाना धने गवादिरूपे हितेऽभिमते सति। यद्वा हिते धनेऽभिप्रेते सति तरुषंत। हिंसंति

शत्रून् ॥ तरुष्यतिर्वधकर्मा । छांदसे लुङि व्यत्ययेन च्लेरङ् । तरतेर्वा लङ्युकार- सिप्शपस्त्वयो विकरणाः ॥ तरतीत्यर्थः । अतः कारणात् श्रवस्यवोऽन्नं हविर्ल- क्षणमिंद्रायात्मने वेच्छंतः संतः प्रयक्षंत । प्रकर्षेण यजंते ॥ छांदसे लुङि व्यत्ययेन क्सः ॥ किंच तस्मा इत् तस्मै प्रसिद्धायेंद्रायैवायुर्हविर्लक्षणमन्नं प्रजावत् पुत्रा- दिसहितं भवति । तैः सहितैर्दीयत इत्यर्थः । किंच यजमाना ओजसा स्वकीयेन बलेन युक्ता बाधे शत्रूणां बाधने निमित्तभूते सति बाधितुं वा ॥ कृत्यार्थे तवैकेन्केन्यत्वन इति केन्प्रत्ययः ॥ अर्चंति पूजयंति । यद्वा तस्मा इत् यजमा- नायैव बाधे बले निमित्तभूते सति ॥ बाध इति बलनाम बाधस्तविषीति तन्नामसु पाठात् ॥ प्रजावत् पुत्राद्युपेतमायुरन्नं लब्धुमोजसा बलेन युक्ता अर्चंति । इंद्रं पूजयंति ऋत्विज इति शेषः । किंच धीतयः कर्मवंतो यजमाना इंद्र इंद्रसमीपे ॥ गंगायां घोष इतिवत् तत्सामीप्यं लक्ष्यते ॥ इंद्रलोक इत्यर्थः । तत्रौक्यमोको निवासस्थानं॥ स्वार्थे यत्॥ दिधिषंत । धारयंति ॥ धिष शब्दे । अत्र धारणार्थः । जौहोत्यादिकः । व्यत्ययेनांतादेशः ॥ त एव पुनर्विशेष्यंते । धीतयः स्वर्गसाधनकर्मवंतः संतो देवां अच्छा न देवानाभिमुख्येन प्राप्तुमिवौक्यं दि- धिषंतेत्यन्वयः ॥

अविवाक्येऽहनि मानसग्रहभक्षणानंतरं नक्षत्रेषु दृश्यमानेष्वध्वर्युप्रमुखाः सर्वे युवं तमित्येतां जपेयुः । गार्हपत्ये जुह्वतीति खंडे सूचितं । युवं तमिंद्रा- पर्वता पुरोयुधेति जपंतः । आ॰ ८. १३. । इति ॥

॥ सैषा षष्ठी ॥

युवं तमिंद्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तंतमिद्धतं ।
दूरे चत्ताय छंत्सद्गहनं यदिनक्षत् ।
अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ॥ ६ ॥

युवं । तं । इंद्रापर्वता । पुरःऽयुधा । यः । नः । पृतन्यात् । अप । तंऽतं । इत् । हतं । वज्रेण । तंऽतं । इत् । हतं ॥ दूरे । चत्ताय । छंत्सत् । गहनं । यत् । इनक्षत् । अस्माकं । शत्रून् । परि । शूर । विश्वतः । दर्मा । दर्षीष्ट । विश्वतः ॥ ६ ॥

हे इंद्रापर्वता । इंद्रः प्रसिद्धः । पर्वतः पर्ववान्मेघः । तदभिमानी देवः । तौ युवं युवां पुरोयुधा संग्रामे पुरतो योद्धारौ नोऽस्माकं यः शत्रुः पृतन्यात् अस्मान्

हंतुं पृतनामात्मन इच्छति तं तमित् सर्वमपि शत्रुमपहतं। नाशयतं॥ हंतेर्लोट्यनुदात्तोपदेशेत्यनुनासिकलोपः ॥ केन साधनेनेति तदुच्यते। तं तमित् सर्वमपि शत्रुं हंतुं वज्रेण साधनेन प्राप्नुतं। ईदृक् सामर्थ्यमस्तीति दर्शयति। यत् यो वज्रः ॥ लिंगव्यत्ययः ॥ दूरे चत्तायात्यंतदूरदेशे गताय ॥ चातयतेर्वा नाशकर्मणः॥ नष्टायादर्शनमापन्नायेत्यर्थः॥ ग्रसितस्कभितेत्यादौ निपातनादिडभावः॥ तादृशं शत्रुं छंत्सत्। छंदयति कामयते हंतुं॥ छंदतेः कांतिकर्मण इदं रूपं॥ किंच गहनं दुरवगाहं स्थानमतिकठिनं हृदयं शत्रुसमीपं वेनक्षत् व्याप्नोति॥ नक्ष गतौ। छांदस इकारोपजनः। इनक्षतिर्वा प्रकृत्यंतरं॥ इदानीमिंद्र एव स्तूयते। हे शूर शौर्योपेतेंद्रास्माकं विरोधिनः शत्रून् विश्वतो विश्वान्॥ सार्वविभक्तिकस्तसिल्॥ परि परितो विश्वतो विश्वैरुपायैर्दर्षीष्ट। दारयसि। किंच। दर्मा शत्रूणां दारकः॥ दारयतेरन्येभ्योऽपि दृश्यंत इति मनिन्। णिलोप उदात्तनिवृत्तिस्वरेण मनिन उदात्तत्वं। ह्रस्वश्छांदसः। यद्वा दॄ भये। घटादित्वान्मितां ह्रस्व इति ह्रस्वत्वं॥ तव पूर्वोक्तो वज्रो विश्वतः सर्वान् शत्रून् सर्वैरुपायैर्वा दर्षीष्ट। दारयति। यद्वा दर्मा शत्रूणां दारक इंद्रो दर्षीष्ट। कार्त्स्न्येन दारयति शत्रून्॥

॥ इति द्वितीयस्य प्रथम एकविंशो वर्गः ॥

उभे पुनामीति सप्तर्चं सप्तमं सूक्तं पारुच्छेपमैंद्रं। आद्या त्रिष्टुप्। अभिव्लग्येत्याद्यास्तिस्रोऽनुष्टुभः। पिशंगभृष्टिमित्येषा गायत्री। अवर्मह इत्येषा धृतिः। वनोति हीत्यनभिधानादत्यष्टिः। अत्रानुक्रमणिका। उभे सप्तादौ त्रिष्टुप् तिस्रोऽनुष्टुभो गायत्री धृतिरिति॥ अस्य सूक्तस्य विनियोगमाह शौनकः। उभे पुनामीति पुरा रिपुघ्नस्तु प्रकीर्तिताः। ता जपन् प्रयतो नित्यमिष्टान् कामान्समश्नुते। ता जपन् हंति रक्षांसि सपत्नांश्च नियच्छति। ऋग्वि० १. २५.॥

॥ तत्र प्रथमा ॥

उ॒भे पु॑नामि॒ रोद॑सी ऋ॒तेन॒ द्रुहो॑ दहामि॒ सं म॒हीर॑नि॒न्द्राः।
अ॒भि॒व्लग्य॒ यत्र॑ ह॒ता अ॒मित्रा॒ वैल॒स्थानं॒ परि॑ तृ॒ळ्हा अशे॑रन्॥ १॥

उ॒भे इति॑। पु॒ना॒मि॒। रोद॑सी॒ इति॑। ऋ॒तेन॑। द्रुहः॑। द॒हा॒मि॒। सं। म॒हीः। अ॒नि॒न्द्राः।
अ॒भि॒ऽव्लग्य॑। यत्र॑। ह॒ताः। अ॒मित्राः॑। वै॒ल॒ऽस्था॒नं। परि॑। तृ॒ळ्हाः। अशे॑रन्॥ ५॥

हे इंद्र ऋतेन त्वदुद्देश्येन यज्ञेन बलेनोभे रोदसी द्यावापृथिव्यौ पुनामि।

लोकद्वयं हिंसकानां तवायष्टॄणां वापगमनेन पावयामि । किंच भूलोकेऽनिंद्रा इंद्रविरहितानामाश्रयभूता महीरुर्वीः । अत एव द्रुहो द्रोहिणामाधारभूतत्वात्स्वयमपि द्रोग्ध्रीः संदहामि । संभूयैकहेलया दहामि । पुनस्ता एव विशेष्यंते । यत्र यासु भूमिष्वमित्राः शत्रवोऽभिव्लग्याभितो गत्वा हताः सर्वतः प्राप्ता अस्माभिर्घातिता वा ॥ व्लुगतिर्गतिकर्मा । छांदसो धातुः ॥ ते सर्वे परि तृळ्हा हिंसिताः ॥ तृहू हिंसार्थः । ऊदित्त्वाद्यस्य विभाषेतीट्प्रतिषेधः ॥ हिंसिताः संतोऽशेरन् । शयनं प्राप्ताः ॥ शेतेर्व्यत्ययेन परस्मैपदं । शीङो रुट् । पा० ७. १. ६. । शीङः सार्वधातुके गुणः ॥ वैलस्थानं ॥ विलशब्दो गर्तसमानार्थः । स च गर्तः श्मशानवचनः । अतोऽयमपि श्मशानवाची । अथवा विलसंबंधिस्थानं नागलोकः । तत्र वाशेरन् । यद्वा विल क्षेप इति धातुः । घनर्थे कः । स्वार्थिकोऽण् । तत्र शवाः क्षिप्यंत इति वैलस्थानं श्मशानं ॥ तत्र त्वया हता भूमिं श्मशानवत्कृत्वा सर्वत्र शेरते । तान्दहामीत्यर्थः ॥

॥ अथ द्वितीया ॥

अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनां ।
छिंधि वटूरिणा पदा महावटूरिणा पदा ॥ २ ॥
अभिऽव्लग्य । चित् । अद्रिऽवः । शीर्षा । यातुऽमतीनां ।
छिंधि । वटूरिणा । पदा । महाऽवटूरिणा । पदा ॥ २ ॥

अद्रिवो वैरिणां भक्षक यद्वाद्रेर्मेघस्यादर्तरिंद्र त्वं यातुमतीनां हिंसावतीनां सेनानां । यद्वा यातनसाधनान्यायुधानि यातूनि तद्वतीनां । अथवा यातवो रक्षांसि तद्वतीनां सेनानां ॥ कर्मणि षष्ठी ॥ शत्रूणां सेनाः । शीर्षा शीर्षाण्यभिव्लग्या चित् अभितः प्राप्य छिंधि । चूर्णय । यद्वा तासां संबंधीनि रथादीनि छिंधि । केन साधनेनेति तदुच्यते । वटूरिणा पदा । वेष्टनशीलेन सर्वव्याप्तेन त्वदीयपादेन । अतिविस्तृतेनेत्यर्थः । यद्वा वटूरिणा पदा वेष्टनशीलेन हस्तिनः संबंधिना पादेन । ऐरावतपादेनेत्यर्थः । न केवलेन येन केन पादेनेत्याह महावटूरिणा पदा महावेष्टनवता स्वीयेनैरावतसंबंधिना वा पादेन छिंधि । चूर्णय ॥ वट वेष्टने । खर्जिपिज्यादिभ्य ऊरोलचावित्यूरच्प्रत्ययः । अत इनिठनाविती निः ॥

॥ अथ तृतीया ॥

अवासां मघवन् जहि शर्धो यातुमतीनां ।
वैलस्थानके अर्मके महावैलस्थे अर्मके ॥ ३ ॥
अव । आसां । मघऽवन् । जहि । शर्धः । यातुऽमतीनां ।
वैलऽस्थानके । अर्मके । महाऽवैलस्थे । अर्मके ॥ ३ ॥

हे इंद्र मघवन् धनवन् आसां यातुमतीनां । यातनसाधनान्यायुधानि यातूनि । तद्वतीनां यातुधानवतां वा सेनानां शर्धो बलमवजहि । चूर्णय । तथा कृत्वा चार्मके कुत्सिते शवैररणीये वैलस्थानके कुत्सिते पूर्वोक्तलक्षणे श्मशाने क्षपयेति शेषः । यद्वा वैलस्थानके बिलसंबंधिनि कुत्सिते स्थानेऽधकारावृतेऽधोलोके स्थापयेति शेषः । ननु यच क्वचित्क्षुद्रे नेत्याह । महावैलस्थे सर्वैर्गंतव्ये महाश्मशाने नागलोके वा । पुनः कीदृशे । अर्मके । कुत्सिते गतासुभिररणीये ॥

॥ अथ चतुर्थी ॥

यासां तिस्रः पंचाशतोऽभिव्लंगैरपावपः ।
तत्सु ते मनायति तकत्सु ते मनायति ॥ ४ ॥
यासां । तिस्रः । पंचाशतः । अभिऽव्लंगैः । अपाऽअवपः ।
तत् । सु । ते । मनायति । तकत् । सु । ते । मनायति ॥ ४ ॥

हे इंद्र यासां पूर्वमंत्रोक्तलक्षणानां सेनानां तिस्रः पंचाशतः त्रिगुणितपंचाशत्संख्यां सार्द्धशतमभिव्लंगैरभिगमनैः ॥ व्लंगतिर्गतिकर्मेत्युक्तं ॥ अभिगम्यापावपः । नाशितवानसि । हे इंद्र तत्तादृशं सेनावधादिरूपं कर्म सु मनायति । सुष्ठु संभावयतीत्यर्थः । किंच हे इंद्र ते तवाध्यर्द्धशतशत्रुसेनाजयरूपं महदपि तकदिति सु मनायति । अत्यल्पमिदमिति सुष्ठु मन्यते ॥

॥ अथ पंचमी ॥

पिशंगभृष्टिमंभृणं पिशाचिमिंद्र सं मृण । सर्वं रक्षो नि बर्हय ॥ ५ ॥
पिशंगऽभृष्टिं । अंभृणं । पिशाचिं । इंद्र । सं । मृण । सर्वं । रक्षः । नि । बर्हय ॥ ५ ॥

हे इंद्र पिशंगभृष्टिमीषद्रक्तवर्णं। अंभृणमतिभयंकरं शब्दायमानं ॥ भ्रण शब्दे। यङ्लुगंतात्पचाद्यचि छांदसो मलोपश्च ॥ यद्वा महांतमतिप्रवृद्धमित्यर्थः ॥ अंभृण इति महन्नाम अंभृणो माहिन इति तत्र पाठात् ॥ उक्तविधिं पिशाचिं पिशाचविशेषं। जरामित्येके। संमृण। सम्यक् हिंसय। न केवलं तमेकं किंतु सर्वं रक्षो रक्षणनिमित्तभूतं राक्षसादिकं निबर्हय। निषूदय ॥ बृह हिंसायां चौरादिकः ॥ नामय ॥ वधकर्मैतत् नितोशयति निबर्हयतीति तत्रोक्तत्वात् ॥

दशरात्रस्य षष्ठेऽहनि प्रउगशस्त्र ऐंद्रतृचस्यावर्मह इंद्रेत्यादिके प्रथमाद्वितीये। षष्ठस्येति खंडे सूचितं। अवर्मह इंद्र वृषन्निंद्र। आ॰ ८.१.। इति ॥

॥ सैषा षष्ठी ॥

अवर्मह इंद्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो
घृणान्न भीषाँ अद्रिवः ॥ शुष्मिंतमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे।
अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर सत्वभिः ॥ ६ ॥

अवः। महः। इंद्र। दादृहि। श्रुधि। नः। शुशोच। हि। द्यौः। क्षाः। न। भीषा। अद्रिऽवः।
घृणात्। न। भीषा। अद्रिऽवः ॥ शुष्मिन्ऽतमः। हि। शुष्मिऽभिः। वधैः। उग्रेभिः। ईयसे।
अपुरुषऽघ्नः। अप्रतिऽइत। शूर। सत्वऽभिः। त्रिऽसप्तैः। शूर। सत्वऽभिः ॥ ६ ॥

हे इंद्र महो महतो मेघस्य ॥ कर्मणि षष्ठी ॥ महांतं जलधारिणं मेघं महांतं वृत्रं वावरवस्तादवाङ्मुखं ॥ पूर्वाधरेत्यादिनासिप्रत्ययोऽवादेशश्च। अम्नरूधरव-रित्युभयथा छंदसि। पा॰ ८.२.७०.। इति रेफः ॥ दादृहि। विदारय। किंच नोऽस्म-द्वाक्यं श्रुधि। शृणु। हे अद्रिवः। अद्रिर्मेघः। तद्वन्निंद्र हि यस्मात्कारणात् द्यौर्द्युलोक आश्रयभूतः शुशोच शोचति वृष्ट्यभावेन हविराद्यभावादिति भावः। तत्र दृष्टांतः। क्षा न ॥ क्षेति भूनाम। क्षायंति निवसंत्यस्यामिति क्षाः। क्षै जै षै क्षये। अधिकरणे क्विप् ॥ क्षा न सर्वनिवासाश्रयभूमिरिव। सा यथा भीषा वृष्ट्यभा-वात्सस्यादिशोषभीत्या शोचति तद्वत्। लोकद्वयमपि वृष्ट्यभावेन शोचतीत्यर्थः। असुरपक्षं लोकद्वयमावृत्य प्रवर्धमानं धर्तुमसहमाने द्यावापृथिव्यौ शोचत इत्यर्थः। तस्मात् श्रुधीति पूर्वत्रान्वयः। भीतौ दृष्टांतः। हे अद्रिवः शत्रूणां भक्षक। यद्वाद्रिर्वज्रः। तेन तद्वन् हे इंद्र घृणाद्भीषा न। दीप्तादग्नेर्मूर्तितरात् त्वष्टुर्भीत्येव। त्वष्टुर्भीत्या पूर्वं यथा द्यावापृथिव्यौ शोचतस्तद्वत्। अत्रेतिहासमाहुः।

पूर्वं जगति महांधकारेणावृते सति देवा विचिंत्याग्निं प्रार्थितवंतः। स च त्वष्टृरूपेण द्यावापृथिवीभ्यां सकाशात्तमो विदस्यन्नुदपद्यत। तं दृष्ट्वा द्यावापृथिव्यौ बिभ्यतुरिति। सचोभे त्वष्टुर्बिभ्यतुरित्यादिश्रुतितोऽवगंतव्यः। यद्वा घणः केवलोऽग्निः। तस्माद्यथा बिभीतस्तद्वत्। सा च भीतिररेजेतां रोदसी इत्यादिश्रुतितोऽवगंतव्या। तादृशभीतिं वृष्टिप्रदानेन परिहरेत्यर्थः। हे इंद्र त्वं शुष्मिभिर्बलैः शुष्मिंतमो हि। अतिशयेन बलवान् खलु। अतः कारणादुग्रेभिरुद्गूर्णैरतिक्रूरैर्वधैस्तदुपायैः सहितस्त्वमीयसे। शत्रून् मेघान्वा गच्छसि॥ ईङ् गतौ। दैवादिकत्वात् श्यन्॥ यद्वा शुष्मिभिर्वधैरिति संबंधः। हे शूर विक्रांत सत्वभिरप्रतीत। अवसन्नै रक्षःप्रभृतिभिरप्रतिगत युद्धे शत्रुभिरनाक्रांत। यद्वा सत्वभिः प्राणिभिरसंस्कृतमनस्कैरनधिगत। अपुरुषघ्नः पौरुषोपेतानां यजनसमर्थानामहननस्त्वं। त्रिसप्तैः सत्वभिस्त्रिभिः सप्तभिर्वा सत्वभिरनुचरैरुपेतः सन् ईयस इत्यन्वयः॥

प्रातःसवने ब्राह्मणाच्छंसिनः प्रस्थितयाज्यायाः पुरस्ताद्वनोति हीत्येषा प्रक्षेपणीया। तत्रैव खंडे सूचितं। वनोति हि सुन्वन् क्षयं परीणसो मो षु वो अस्मदभि तानि पौंस्या। आ॰ ८. १.। इति॥

॥ तामेतां सप्तमीमृचमाह॥

वनोति हि सुन्वन्क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्विषः।
सुन्वान इत्सिषासति सहस्रा वाज्यवृतः।
सुन्वानायेंद्रो ददात्याभुवं रयिं ददात्याभुवं॥ ७॥

वनोति। हि। सुन्वन्। क्षयं। परीणसः। सुन्वानः। हि। स्म। यजति। अव। द्विषः। देवानां। अव। द्विषः॥ सुन्वानः। इत्। सिसासति। सहस्रा। वाजी। अवृतः। सुन्वानाय। इंद्रः। ददाति। आऽभुवं। रयिं। ददाति। आऽभुवं॥ ७॥

हे इंद्र सुन्वन् त्वामुद्दिश्याभिषवं कुर्वन्यजमानः क्षयं सर्वैर्वस्तव्यं गंतव्यं वा गृहं वनोति हि। त्वत्प्रसादात्संभजते। हिः प्रसिद्ध्यर्थः। किंच सुन्वानो हि सोमयागं कुर्वाण एव परीणसः परितो नद्धान् संबद्धान् द्विषो द्वेष्टॄनवयजति। नाशयति। न केवलं यागद्वेषिणः देवानां द्विषोऽप्यवजयति। किंच सुन्वान इत् अभिषवोपलक्षितं यागं कुर्वाणो हे इंद्र त्वत्प्रसादाद्वाजी वाजवान् अन्नवान्

अवृतः परैरनाक्रांतः सन् सहस्रा सहस्राख्यपरिमितानि गवादिधनानि सिषासति। साधयितुं संभक्तुमिच्छति ॥ सनेः सनि सनीवंतर्धेति विकल्पनादिडभावे जनसनखनेत्यात्वं ॥ केनेदं लभ्यत इति तत्राह। सुन्वानायेंद्रमुद्दिश्य सोमयागं कुर्वाणाय यजमानाय वायमिंद्र आभुवं समंताद्भवनशीलं तथाभुवं पुनर्भवनशीलमतिसमृद्धं रयिं गवादिरूपं धनं ददाति। प्रयच्छति। तस्मात्सुन्वानः सिषासतीत्यर्थः ॥

॥ इति द्वितीयस्य प्रथमे द्वाविंशो वर्गः ॥

॥ इति प्रथमे मंडल एकोनविंशोऽनुवाकः ॥

विंशेऽनुवाके षट् सूक्तानि। तत्रा त्वा जुव इति षडृचं प्रथमं सूक्तं पारुच्छेपमात्यष्टं। त्वं नो वायवित्यंत्याष्टिश्चतुःषष्ट्यक्षरा। वायव्यं त्वित्युच्यमानत्वादिदमुत्तरं च वायुदेवत्यं। अत्रानुक्रमणिका। आ त्वा षड्वायव्यं त्वंत्याष्टिरिति। विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

आ त्वा जुवो रारहाणा अभि प्रयो वायो वहंत्विह पूर्वपीतये सोमस्य पूर्वपीतये।
ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जानती।
नियुत्वंता रथेना याहि दावने वायो मखस्य दावने ॥ १ ॥

आ। त्वा। जुवः। ररहाणाः। अभि। प्रयः। वायो इति। वहंतु। इह। पूर्वऽपीतये। सोमस्य। पूर्वऽपीतये ॥ ऊर्ध्वा। ते। अनु। सूनृता। मनः। तिष्ठतु। जानती। नियुत्वंता। रथेन। आ। याहि। दावने। वायो इति। मखस्य। दावने ॥ १ ॥

हे वायो त्वा त्वां जुवो गमनशीला ररहाणाः शीघ्रगामिनो बलवंतो वा सामर्थ्यान्नियुत्संज्ञका अश्वाः ॥ रहि गतौ। लिटः कानच्। छांदसोऽनुनासिकलोपः ॥ इहास्मिन्यज्ञे वहंतु। प्रापयंतु। किमर्थं। पूर्वपीतये। पूर्ववत्पानाय। पुनः किमर्थं। पूर्वपीतये। इतरदेवेभ्यः पुरा पानाय ॥ मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं ॥ किंच हे वायो ते तव संबंधि मनोऽनु सूनृता प्रियसत्यात्मिका स्तुतिरूपास्मदीया वाक् तिष्ठतु। आश्रित्य सर्वदा वर्ततां। हर्षयत्वित्यर्थः ॥ सूनृतेति वाङ्नाम सूनृता ब्रह्मेति तन्नामसूक्तत्वात् ॥ ऊर्ध्वोन्नता तथा जानती तव गुणान्विशेषेणावगच्छंती। सोमपानार्थं स्तुत्यर्थं च हे वायो मखस्य यज्ञस्य

दावने दातव्याय हविषे तत्स्वीकाराय । पुनः किमर्थं । दावने । अस्मभ्यमभिमतदानाय ॥ उभयत्र ददातेः कर्मणि भावे च क्रमेणौणादिको वनिः । छांदस उपधालोपः ॥ नियुत्वता रथेन नियुद्भिर्युक्तेन रथेनायाहि । आगच्छ ॥

॥ अथ द्वितीया ॥

मंदंतु त्वा मंदिनो वायविंदवोऽस्मत्क्राणासः सुकृता अभिद्यवो
गोभिः क्राणा अभिद्यवः ॥ यद्ध क्राणा इरध्यै दक्षं सचंत ऊतयः ।
सध्रीचीना नियुतो दावने धिय उप ब्रुवत ईं धियः ॥ २ ॥

मंदंतु । त्वा । मंदिनः । वायो इति । इंदवः । अस्मत् । क्राणासः । सुऽकृताः । अभिऽद्यवः ।
गोभिः । क्राणाः । अभिऽद्यवः ॥ यत् । ह । क्राणाः । इरध्यै । दक्षं । सचंते । ऊतयः ।
सध्रीचीनाः । निऽयुतः । दावने । धियः । उप । ब्रुवते । ईं । धियः ॥ २ ॥

हे वायो त्वा त्वामस्मदस्माकं संबंधिन इंदवः क्लेदयितारः सोमा मंदंतु । मादयंतु ॥ व्यत्ययेन परस्मैपदं ॥ कीदृशाः सोमाः । मंदिनो मादयितारः क्राणासः कुर्वाणाः स्वकार्यं हर्षादिकं सुकृता अभिषवदशापवित्रशोधनग्रहणादिभिः सुष्ठु कृताः । अभिद्यवोऽभितो द्योतयंतो गोभिर्वाग्भिर्मंत्ररूपाभिः क्राणाः क्रियमाणा हूयमानाः । यद्वा गोभिर्गंतृभिराहवनीयं प्रत्यानेतृभिः क्राणा हूयमानाः ॥ करोतेः शानच् । छांदसः शपो लुक् ॥ तथाभिद्यवोऽभिगंतारः । हे वायो यत् यस्मात्कारणात् । हशब्दः प्रसिद्धौ । दक्षमस्मद्यागदेशं प्रति गंतुमुत्साहवंतं समर्धयितारमीं त्वां नियुत एतत्संज्ञकास्तवाश्वा दावने दानाय हविःस्वीकारनिमित्तं धियः कर्माण्युद्दिश्य सचंते । त्वां संगच्छंते यागदेशं वा । किमर्थं । इरध्यै । प्रापयितुं परिचरितुं वा ॥ ईर गतौ । तुमर्थे कध्यैप्रत्ययः । ह्रस्वश्छांदसः । इरध्यतिः परिचरणकर्मा । इरध्यति विधेमेति तन्नामसूक्तत्वात् ॥ कीदृशास्ताः । क्राणाः । स्वव्यापारं रथवाहनादिकं कुर्वाणाः ॥ क्राणाः कुर्वाणा इति यास्कः ॥ ऊतयः । रक्षणवंतः प्रीतियुक्ता वा । तथा सध्रीचीनाः । त्वया सहांचंतो गच्छंतः ॥ सहस्य सध्रिर्विभाषांचेरिति स्वार्थे खः । व्यत्ययेनांतोदात्तः ॥ किंच धियः कर्मवंतो बुद्धिमंतो वा ऋत्विजो यजमाना वोपब्रुवते । उपेत्य ब्रुवंति स्वाभिमतं विज्ञापयंति वा ॥

॥ अथ तृतीया ॥

वायुर्युंक्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ॥ प्र बोधया पुरंधिं जार आ ससतीमिव ।
प्र चक्षय रोदसी वासयोषसः श्रवसे वासयोषसः ॥ ३ ॥

वायुः । युंक्ते । रोहिता । वायुः । अरुणा । वायुः । रथे । अजिरा । धुरि । वोळ्हवे । वहिष्ठा । धुरि । वोळ्हवे ॥ प्र । बोधय । पुरंऽधिं । जारः । आ । ससतीऽइव ।
प्र । चक्षय । रोदसी इति । वासय । उषसः । श्रवसे । वासय । उषसः ॥ ३ ॥

अयं वायू रोहिता रोहितवर्णावश्वौ धुरि धारणप्रदेशे रथस्याग्रभागे यद्वा भारवहने युंक्ते । क्वचिद्योजयति । तथा क्वचिदरुणारुणवर्णौ धुरि युंक्ते । तथाजिराजिरौ गमनशीलौ वर्णविशेषयुक्तौ कदाचिद्युंक्ते । यद्वैतदुभयत्र संबध्यते । किमर्थं युंक्त इति तदाह । वोळ्हवे । धुरं वोढुं भारवहनाय । किंच वहिष्ठा वहिष्ठावतिशयेन वोढारावश्वौ ॥ वोढृशब्दादिष्ठनि तुरिष्ठेमेयःस्विति तृलोपः । टत्वादिकमसिद्धत्वान्निवर्तते । द्विवचनस्याकारः ॥ धुरि वोळ्हवे । महद्भारं वोढुं । महति भारे वोढव्ये सति पुनःपुनर्वायुग्रहणं । अतो योजनवचनं चातिशीघ्रमागच्छतीति ज्ञापनार्थं । इदानीं प्रत्यक्षेणाह । हे वायो पुरंधिं बहुप्रज्ञं सामर्थ्याद्यजमानमिति गम्यते ॥ पुरंधिर्बहुधिरिति यास्कः ॥ तं प्रबोधय । रथेन शीघ्रमागत्य प्रज्ञापय हविःस्वीकारायेति भावः । तत्र दृष्टांतः । जारः पारदारिक आ ससतीमुपपत्यागमनध्यानेनेषत्स्वपंतीं पुरंधिमिव प्रकृष्टशरीरधारिणीं योषितमिव । तां यथा स्वसंकेतेन स प्रबोधयति तद्वत्त्वमपि कर्मव्यग्रेणेषत्स्वपंतं यजमानं प्रबोधय । किंच तदर्थं रोदसी द्यावापृथिव्यौ प्रचक्षय । प्रकर्षेण प्रख्यापय । प्रकाशयेत्यर्थः । तत्प्रकाशार्थमुषसो वासय । उषःकालानपि यथावत्स्थापय । प्रभातं कुर्वित्यर्थः । पुनस्तदेव प्रार्थ्यते । श्रवसे ॥ श्रव इत्यन्ननाम ॥ तव हवीरूपान्नस्वीकारायोषसो वासय ॥

॥ अथ चतुर्थी ॥

तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा नव्येषु रश्मिषु ।
तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दोहते ।
अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः ॥ ४ ॥

तुभ्यं। उषसः। शुचयः। पराऽवति। भद्रा। वस्त्रा। तन्वते। दंऽसु। रश्मिषु। चित्रा। नव्येषु। रश्मिषु ॥ तुभ्यं। धेनुः। सबःऽदुघा। विश्वा। वसूनि। दोहते। अजनयः। मरुतः। वक्षणाभ्यः। दिवः। आ। वक्षणाभ्यः ॥ ४ ॥

हे वायो तुभ्यं त्वदर्थमुषास उषसः पूर्वोक्तरीत्या त्वया प्रकाशिताः शुचयः शुद्धा दीप्ता वा परावत्यत्यंतदूरदेशेऽंतरिक्षे दंसु दंसेषु कर्मवत्सु। यद्वा गृहनामैतत्। अंत्यलोपश्छांदसः। गृहवदाच्छादकेषु रश्मिषु स्वकीयेषु तैर्भद्रा भंदनीयानि कल्याणानि वस्त्राच्छादनयोग्यानि वस्त्राणि तन्वते। विस्तारयंति। यद्वा। उषसो दंसु यागगृहेषु देवयजनेषु रश्मिषु होमाय प्रदीप्ताग्निज्वालावत्स्वागताय तुभ्यं भद्रा वस्त्रा तन्वते। अग्निज्वाला एव वस्त्राणि विस्तारयंतीत्यर्थः। उषःकालेऽग्नीनां प्रज्वाल्यमानत्वात्ता एव वस्त्राणीत्युपचर्यंते। ननु केवलं साधारणानि वस्त्राणि नेत्याह। नव्येषु नूतनेषु स्तूयमानेषु ॥ णु स्तुतौ। अचो यत्। वांतो यि प्रत्यय इत्यवादेशः। यतोऽनाव इत्याद्युदात्तत्वं ॥ रश्मिषु चित्राणि नानावर्णयुक्तान्याश्चर्यभूतानि तन्वते। उषःकाले रश्मीनां नानावर्णत्वादिति भावः। अग्निद्वारेति पक्षे ज्वालानां कालीकरालीत्यादिरूपेण नानावर्णत्वाच्चित्रत्वं। किंच हे वायो तुभ्यं त्वदर्थं त्वद्यागार्थमेव धेनुर्घृतादिना प्रीणयित्री गौः। जातावेकवचनं। सबर्दुघा। सबरित्यमृतनाम। तस्य दोग्ध्री ॥ दुहः कप् घश्चेति कप् ॥ सती विश्वा वसूनि सर्वाणि धनान्याज्यादिरूपाणि दोहते। स्वयमेव दुग्धे। प्रीणयतीत्यर्थः ॥ कर्मकर्तरि न दुहस्नुनमामिति यगभावः। छांदसः शपो लुगभावः ॥ कस्तत्र विशेष इति चेत् उच्यते। हे वायो दिवो दीप्तादंतरिक्षान्मरुत एतन्नामकान् मेघं विशीर्य वृष्ट्युत्पादकान् त्वदंशभूतान्देवानजनयः। जनयसि। उत्पादयसि। किमर्थमिति तदुच्यते। वक्षणाभ्यः। प्रवहणशीलाभ्योऽद्भ्यो वृष्टिलक्षणाभ्यः। तथा वक्षणाभ्यः। नदीनामैतत्। वक्षणा रुजाना इति तन्नामसु पाठात्। तासामर्थाय ॥

॥ अथ पंचमी ॥

तुभ्यं शुक्रासः शुचयस्तुरण्यवो मदेषूग्रा इषणंत भुर्वण्यपामिषंत भुर्वणि।
त्वां त्सारी दसमानो भगमीट्टे तक्ववीये।
त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि धर्मणा ॥ ५ ॥

तुभ्यं । शुक्रासः । शुचयः । तुरण्यवः । मदेषु । उग्राः । इषणंत । भुर्वणि । अपां । इषंत । भुर्वणि ॥ त्वां । त्सारी । दसमानः । भगं । ईट्टे । तक्कऽवीये । त्वं । विश्वस्मात् । भुवनात् । पासि । धर्मणा । असुर्यात् । पासि । धर्मणा ॥ ५ ॥

हे वायो तुभ्यं त्वदर्थं शुक्रासो दीप्ताः शुचयः शुद्धाः । सोमस्य पातारोऽत्यंतं शुद्धा भवंति । किमु वक्तव्यं तेषां शुद्धत्वे । तुरण्यवस्त्वरणयुक्तास्त्वां प्राप्तुं । उग्रा उद्गूर्णतेजसः सोमा मदेषु तव मदेषु निमित्तभूतेषु भुर्वणि भरणवति याग इषणंत । आहवनीयं प्रति गच्छंति इच्छंति वा ॥ व्यत्ययेनात्मनेपदं । शश्नमौ द्वौ विकरणौ ॥ किंचापां भुर्वणि मेघ इषंत । उदकमिच्छंत्युत्पादयितुं । अग्नौ हूयमानस्याहुतेरादित्यद्वारा वृष्ट्युत्पादकत्वात् । यद्वा यजमानास्त्वामुद्दिश्याजुह्वाना अपां वर्षणमिषंत । इच्छंति । किंच हे वायो भगं भजनीयं त्वां त्सारी त्सरणवान् अत्यंतभीतो दसमान उपक्षीणो यज्ञविघातकैः पयोव्रतादिनियमैर्वा यजमानस्तक्कवीये तस्कराणां यज्ञविघातिनामन्यत्र गमनायेट्टे । स्तौति ॥ ईड स्तुतौ । अदादित्वाच्छपो लुक् ॥ यतस्त्वं विश्वस्माद्भुवनात् सर्वस्माल्लोकात् भूतजाताद्वा लोकत्रयसंबंधिनो भयाद्धर्मणास्मदीयहविषां धारणेन पासि । पालयसि । किंच । असुर्यात् असुरसंबंधिनो भयाद्विशेषेण पासि धर्मणास्मद्धारणेन पोषणेन वा युक्तः सन् । यत एवं करोषि अत स्तौमीत्यर्थः ॥

॥ अथ षष्ठी ॥

त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः पीतिमर्हसि सुतानां पीतिमर्हसि ।
उतो विहुत्मतीनां विशां ववर्जुषीणां ।
विश्वा इत्ते धेनवो दुह्र आशिरं घृतं दुह्रत आशिरं ॥ ६ ॥

त्वं । नः । वायो इति । एषां । अपूर्व्यः । सोमानां । प्रथमः । पीतिं । अर्हसि । सुतानां । पीतिं । अर्हसि ॥ उतो इति । विहुत्मतीनां । विशां । ववर्जुषीणां । विश्वाः । इत् । ते । धेनवः । दुह्रे । आऽशिरं । घृतं । दुह्रते । आऽशिरं ॥ ६ ॥

हे वायो त्वमपूर्व्यः । न विद्यते पूर्वं यस्मात् तत्पानमपूर्वं । तदर्हतीत्यपूर्व्यः । तादृशः । अत एव प्रथम इतरदेवेभ्यः पूर्वभूतः सन् सोमानां पीतिं पानमर्हसि । प्राप्नोषि । सुतानामभिषवकृतानां सोमानां पीतिं पानमर्हसि । यत्र

यत्राभिषवोऽस्ति तत्र सर्वत्र नियमेन पिबसीत्यर्थः । पूर्वं प्राथम्याभिप्रायेण इदानीं तु सर्वत्र सोमवति यागेऽस्य पानमस्तीति ज्ञापयितुं पृथगभिधानं । न केवलं सोमपानमात्रं उतो अपि तु विहुत्मतीनां विशेषेण होमवतीनामाह्वानवतीनां वा ॥ जुहोतेः संपदादिलक्षणो भावे क्विप् । ततो मतुप्ङीपौ ॥ ववर्जुषीणामनभिमतपापं वर्जयंतीनां ॥ वर्जयतेर्लिटः क्वसुङीप्संप्रसारणत्वानि ॥ विशां ऋत्विग्यजमानरूपाणां प्रजानां संबंधि हविः स्वीकरोषीति शेषः । यद्वा तेषां यष्टॄणां विश्वा इत् धेनवः सर्वा अपि गावस्ते त्वदर्थमाशिरमाश्रयणद्रव्यं क्षीरं दुह्रे । दुहंति स्वयमेव ॥ कर्तरि न दुहस्नुनमामिति यगभावः । लोपस्त आत्मनेपदेष्विति तलोपः । बहुलं छंदसीति रुट् ॥ तथाशिरं घृतमुपस्तरणाभिघारणाद्याश्रयणाय योग्यं करणं द्रव्यं दुह्रते ॥

॥ इति द्वितीयस्य प्रथमे त्रयोविंशो वर्गः ॥

स्तीर्णं बर्हिरिति नवर्चं सूक्तं पारुच्छेपमात्यष्टं । पूर्वत्र तुशब्दाद्वायुदेवत्यं । आ वां रथ इत्यादि ऋक्पंचकमैंद्रं । सप्तम्यष्टम्यावष्टी । अत्रानुक्रमणिका । स्तीर्णं नव चतुर्थ्याद्याः पंचैंद्र्यश्चोपांत्ये अष्टी इति ॥ सूक्तस्य विशेषविनियोगो लैंगिकः । दशरात्रस्य षष्ठेऽहनि प्रउगशस्त्र आद्यौ तृचौ प्राकृतयोर्वायव्यैंद्रवायव्ययोः स्थाने विनियुक्तौ । षष्ठस्य प्रातःसवन इति खंडे सूचितं । स्तीर्णं बर्हिरिति तृचौ । आ° ८. १. । इति ॥

॥ तत्र प्रथमा ॥

स्तीर्णं बर्हिरुप नो याहि वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर्नियुत्वते ।
तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे ।
प्र ते सुतासो मधुमंतो अस्थिरन्मदाय क्रत्वे अस्थिरन् ॥ १ ॥

स्तीर्णं । बर्हिः । उप । नः । याहि । वीतये । सहस्रेण । निऽयुता । नियुत्वते । शतिनीभिः । नियुत्वते ॥ तुभ्यं । हि । पूर्वऽपीतये । देवाः । देवाय । येमिरे । प्र । ते । सुतासः । मधुऽमंतः । अस्थिरन् । मदाय । क्रत्वे । अस्थिरन् ॥ १ ॥

हे वायो नोऽस्मद्यज्ञार्थं स्तीर्णमास्तृतं बर्हिरभिलक्ष्योपयाहि । आगच्छ । किमर्थं । वीतये । हविषां भक्षणाय । केन साधनेनेति तदुच्यते । सहस्रेण सहस्रसंख्याकेन नियुता । जातावेकवचनं । नियुत इति वायोरश्वानां नामधेयं

नियुतो वायोरिति निरुक्त उक्तत्वात्। तथा शतिनीभिः शतसंख्योपेताभिर्नियुद्भिरागच्छेति शेषः। यद्वा सहस्रेण नियुता शतिनीभिश्च नियुद्भिर्नियुत्वते तद्वते देवाय हविर्दीयत इति शेषः। यद्वा तुभ्यमित्यनेन संबंधः। उक्तसंख्याकाभिर्नियुद्भिस्तद्वते देवाय द्योतमानाय तुभ्यं ॥ ङयि चेत्याद्युदात्तत्वं ॥ पूर्वपीतय इतरदेवेभ्यः पूर्वं पानाय देवा येमिरे। यमितवंतः। यद्वा स्तोतार ऋत्विजो देवाय तुभ्यं येमिरे। आहवनीयं प्रति सोमं नियमितवंतः। अग्रं पिबा मधूनां सुतं वायो इत्यादिमंत्रांतरप्रसिद्धिद्योतनार्थो हिशब्दः। किंचैते त्वदर्थं सुता अभिषुता मधुमंतो माधुर्योपेताः सोमा मदाय तव मोदायास्थिरन्। तिष्ठंति। किंच क्रत्वे कर्मणे तत्सिद्ध्यर्थमस्थिरन्। ऋत्विग्भिर्धृतास्तिष्ठंति। अतस्त्वं पिबेति शेषः ॥ तिष्ठतेश्छांदसे लुङि व्यत्ययेन झस्य रन्। स्थाघ्वोरिच्चेति सिचः कित्त्वं धातोरित्वं च। ह्रस्वादंगादिति सिलोपः ॥

॥ अथ द्वितीया ॥

तुभ्यायं सोमः परिपूतो अद्रिभिः स्पार्हा वसानः परि कोशमर्षति
शुक्रा वसानो अर्षति ॥ तवायं भाग आयुषु सोमो देवेषु हूयते।
वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्मयुः ॥ २ ॥

तुभ्यं। अयं। सोमः। परिऽपूतः। अद्रिऽभिः। स्पार्हा। वसानः। परि। कोशं। अर्षति।
शुक्रा। वसानः। अर्षति ॥ तव। अयं। भागः। आयुषु। सोमः। देवेषु। हूयते।
वह। वायो इति। निऽयुतः। याहि। अस्मऽयुः। जुषाणः। याहि। अस्मऽयुः ॥ २ ॥

हे वायो तुभ्य तुभ्यं त्वदर्थं ॥ सुपां सुलुगिति चतुर्थ्या लुक् ॥ अयं सोमो हूयमानः कोशं कोशस्थानीयं ग्रहमर्षति। गच्छति प्राप्नोति। कीदृशः सोमः। अद्रिभिः परिपूतः। अभिषवसाधनैरपगतऋजीषत्वेन शोधितः। यद्वा। अद्रिभिरभिषुतो दशापवित्रशोधनेन ग्रहणेन वा शोधितः। तथा स्पार्हा स्पृहणीयानि तेजांसि वसानः पिधानः। किंच शुक्रा निर्मलानि दीप्तानि वा तेजांसि वसानः सोमोऽर्षति। त्वां प्राप्नोति ॥ ऋषी गतौ। व्यत्ययेन शप् ॥ हे वायो आयुषु मनुष्येषु यष्टव्येन स्थितो भागो भजनीयः सोमस्तव त्वदर्थं देवेषु मध्ये हूयते। सत्स्वपीतरेषु देवेषु यतः सोमस्तव भागः अतः प्रथमं तुभ्यं हूयत इत्यर्थः। किंच हे वायो एवं तं सोममस्मयुरस्माभिस्तद्वान् ॥ मत्वर्थीयो युः ॥ त्वं नियुतो

वह। नियुत्संज्ञकानश्वान्वहनाय प्रापय। ततः परं याहि। दिवं प्रति गच्छ। तथा कुर्वन् अस्मयुरस्माभिर्युक्तः सन्ननुगृह्णन् अस्मान्कामयमानो वा॥ क्यचि छांदसेऽत्यलोपे क्याच्छंदसीत्युः॥ जुषाणः प्रीयमाणो याहि। गच्छ॥

॥ अथ तृतीया ॥

आ नो॑ नि॒युद्भिः॑ श॒तिनी॑भिरध्व॒रं स॑ह॒स्रिणी॑भि॒रुप॑ याहि वी॒तये॑

वायो॑ ह॒व्यानि॑ वी॒तये॑॥ तवा॒यं भा॒ग ऋ॒त्वियः॒ सर॑श्मिः॒ सूर्ये॒ सचा॑।

अ॒ध्व॒र्युभि॒र्भर॑माणा अयंसत॒ वायो॑ शु॒क्रा अ॑यंसत॥ ३॥

आ। नः॒। नि॒युत्ऽभिः॑। श॒तिनी॑भिः। अ॒ध्व॒रं। स॒ह॒स्रिणी॑भिः। उप॑। या॒हि॒। वी॒तये॑।

वायो॒ इति॑। ह॒व्यानि॑। वी॒तये॑॥ तव॑। अ॒यं। भा॒गः। ऋ॒त्वियः॑। सऽर॑श्मिः। सूर्ये॑। सचा॑।

अ॒ध्व॒र्युऽभिः॑। भर॑माणाः। अ॒यं॒स॒त॒। वायो॒ इति॑। शु॒क्राः। अ॒यं॒स॒त॒॥ ३॥

हे वायो त्वं नोऽध्वरमस्मत्संबंधिनं यज्ञं शतिनीभिर्नियुद्भिः सहस्रिणीभिश्च ताभिः। त्वदीयैरश्वैर्नोऽस्मद्यज्ञमुपयाहि। उपागच्छ। किमर्थं। वीतये। त्वदभिमतकामाय तत्पूर्तये। आगत्य च हव्यानि वीतये सोमादिहविर्भक्षणायाध्वरं हव्यानि चोपलक्ष्य तेषामेव भक्षणाय शतसहस्रैरश्वैरतिशीघ्रमागच्छेत्यर्थः। किंचायं तव भागो भजनीयः सोम ऋत्वियः प्राप्तकालः प्रदानावसरं प्राप्तः। ऋतुशब्देन प्रदानकालो लक्ष्यते॥ छंदसि घस्। पा॰ ५. १. १०६.। सिति चेति पदसंज्ञा। भसंज्ञाया बाधादोर्गुणाभावे यण्॥ किंच सोमः सूर्ये उदिते सति तस्य रश्मिभिः सह सरश्मिर्भवति। समानदीप्तिर्भवति। यद्वा तैः सहितो भवति। यतः सूर्ये उदिते सति रश्मिर्भवति अतः प्राप्तकाल इत्यर्थः। किंच सोमा अध्वर्युभिश्चमसाध्वर्युभिः। तेषां दशत्वाद्बहुवचनं। तैर्भरमाणा भ्रियमाणा अयंसत। नियता अभवन्। किंच हे वायो ते सोमाः शुक्रा अयंसत। अत्यंतदीप्ता उद्यताः। अतस्तेषां भक्षणायायाहीत्यर्थः॥

॥ अथ चतुर्थी ॥

आ वां॒ रथो॑ नि॒युत्वा॑न्वक्ष॒दव॑से॒ऽभि प्रयां॑सि॒ सुधि॑तानि वी॒तये॑

वायो॑ ह॒व्यानि॑ वी॒तये॑॥ पिब॑तं॒ मध्वो॒ अंध॑सः पूर्व॒पेयं॒ हि वां॑ हि॒तं।

वाय॒वा चं॒द्रेण॒ राध॒सा गं॑त॒मिंद्र॑श्च॒ राध॒सा गं॑तं॥ ४॥

आ। वां। रथः। नियुत्वान्। वक्षत्। अवसे। अभि। प्रयांसि। सुऽधितानि। वीतये। वायो इति। हव्यानि। वीतये॥ पिबतं। मध्वः। अंधसः। पूर्वऽपेयं। हि। वां। हितं। वायो इति। आ। चंद्रेण। राधसा। आ। गतं। इंद्रः। च। राधसा। आ। गतं ॥४॥

केवलं वायुं स्तुत्वा व्यासक्ततयेंद्रवायू स्तौति। हे वायो त्वामिंद्रं च वां युष्मान् रथो युवयोः संबंधी रथो नियुत्वान् नियुद्भिरश्वैस्तद्वान् सन् आवक्षत्। देवयजनं प्रति युष्मानावहतु ॥ वहेर्लेट्यडागमः। सिब्बहुलमिति सिप् ॥ यद्यपि नियुतो वायोरेव रथस्योचिताः। तथापि व्यासक्तदेवतात्वात् सहैवागमनादिंद्रार्थमपि वहंति। किमर्थं। अवसे। गमनाय रक्षणाय वा। पुनश्च किमर्थं। प्रयांस्यन्नानि सोमलक्षणानि सुधितानि सुष्ठु गृहीतानि वीतये। तेषां भक्षणाय। तथा हव्यानि वीतय इतरेषां सवनीयपुरोडाशादीनां खादनाय ॥ वेतेः क्तिन्। मंत्रे वृषेत्यादिना तस्योदात्तत्वं॥ किंच मध्वो मधुररसस्यांधसोऽन्नस्य सोमरूपस्य ॥ कर्मणि षष्ठी ॥ मधुरं सोमं पिबतं। यतः पूर्वपेयमितरदेवेभ्यः पूर्वपानं युवयोर्हितं ॥ पातेरचो यदिति यत्। ईद्यतीतीकारः ॥ अभिमतं अतः प्रथमं पिबतमित्यर्थः। यद्यपींद्रादपि वायोः पूर्वपानं त्वं हि पूर्वपा असि देव दधिषे पूर्वपेयमित्यादिषु सर्वत्र प्रसिद्धं तथापींद्रस्येतरदेवेभ्यः पूर्वं वायुना सह पानं चेंद्रतुरीयार्थवादनब्राह्मणे देवा वै सोमस्य राज्ञोऽग्रपेयेन समपादयन्नित्यत्र प्रतिपादितं। ऐ॰ ब्रा॰ २. २५.। किंचागमनसमये हे वायो त्वमिंद्रश्च चंद्रेणास्मदाह्लादकेन हिरण्येन राधसा गवादिरूपेण धनेन च सहागतं। आगच्छतं। राधसा रत्नेन धनेन सहागतं ॥ गमेर्लोटि छांदसः शपो लुक्। अनुदात्तोपदेशेत्यनुनासिकलोपः। लुङि च मंत्रे घसेति च्लेर्लुक् ॥

॥ अथ पंचमी ॥

आ वां धियो ववृत्युरध्वराँ उपेममिंदुं मर्मृजंत वाजिनमाशुमत्यं न वाजिनं।
तेषां पिबतमस्मयू आ नो गंतमिहोत्या।
इंद्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवं ॥५॥

आ। वां। धियः। ववृत्युः। अध्वरान्। उप। इमं। इंदुं। मर्मृजंत। वाजिनं। आशुं। अत्यं। न। वाजिनं॥ तेषां। पिबतं। अस्मयू इत्यस्मऽयू। आ। नः। गंतं। इह। ऊत्या। इंद्रवायू इति। सुतानां। अद्रिऽभिः। युवं। मदाय। वाजऽदा। युवं ॥५॥

हे इंद्रवायू वां युवां धियः कर्माणि स्तोत्रादिलक्षणान्यध्वरानुप अस्मदीयान्यज्ञान् लक्षीकृत्य ववृत्युः। अतिशयेन वर्तयंति प्रवर्तयंति। किंच युष्मदर्थं वाजिनं ग्रहणाय द्रोणकलशाद्ग्रहान्प्रति गमनवंतमामिक्षावंतं वेममिंदुं पुरतो वर्तमानं सोमं मर्मृजंत। अध्वर्यवो दशापवित्रेण संमार्जयंति। मार्जने दृष्टांतः। आशुमतिशीघ्रगामिनमत्यं न। सततं गंतारं वाजिनं वेजनवंतमश्वमिव यथा स्वेदाद्यपनयनेन संमार्जयंति तद्वत्। किंच हे इंद्रवायू तेषामध्वर्यूणां संबंधिनः शोधितान् सोमान्पिबतं। पानं कुरुतं। तदर्थं नोऽस्माकं यज्ञं प्रतीहेदानीमूत्यास्मद्रक्षणेन सहागतं। आगच्छतं। किंच हे इंद्रवायू अस्मयू अस्मद्यज्ञमिच्छंतौ युवं युवामद्रिभिर्ग्रावभिः सुतानामभिषुतानां॥ पूर्ववत्कर्मणि षष्ठी॥ तान्पिबतमिति शेषः। किमर्थं। मदाय तृप्तये मोदाय वा। यतो युवं युवां वाजदा वाजस्यान्नस्य दातारौ। अतः पिबतमित्यन्वयः॥

॥ इति द्वितीयस्य प्रथमे चतुर्विंशो वर्गः॥

॥ अथ षष्ठी॥

इमे वां सोमा अप्स्वा सुता इहाध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत।
एते वामभ्यसृक्षत तिरः पवित्रमाशवः।
युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया॥६॥

इमे। वां। सोमाः। अप्ऽसु। आ। सुताः। इह। अध्वर्युऽभिः। भरमाणाः। अयंसत। वायो इति। शुक्राः। अयंसत॥ एते। वां। अभि। असृक्षत। तिरः। पवित्रं। आशवः। युवाऽयवः। अति। रोमाणि। अव्यया। सोमासः। अति। अव्यया॥६॥

हे वायो वां युवयोस्तव चेंद्रस्य च स्वभूता इमे सोमा अप्स्वस्मदीयेषु कर्मसु॥ ऊडिदमित्यादिना विभक्तेरुदात्तत्वं॥ इहास्मिन्नभिषवस्थाने सुता अध्वर्युभिर्भरमाणास्तैर्भ्रियमाणा गृहीता होतुं वा ह्रियमाणाः॥ कर्मणि कर्तृप्रत्ययः॥ संत आयंसत। आगच्छंत। युवयोर्नियता भवंति। किंच त एव सोमाः शुक्राः शुभ्रा दीप्ता अयंसत। नियता भवंति। किंचैत आशवो व्यापकाः सोमा वां युवां प्रीणयितुमिति शेषः। तिरः पवित्रं तिर्यग्भूतं सोमांतर्धायकं वोर्णामयं पवित्रमभ्यसृक्षत। अभिलक्ष्यासृज्यंत। सृष्टा भवंति॥ सृजेः कर्मणि लुङि लिङ्सिचावात्मनेपदेष्विति सिचः किद्वाद्गुणाभावोऽमागमाभावश्च॥ किंच

आ। वां। रथः। नियुत्वान्। वक्षत्। अवसे। अभि। प्रयांसि। सुऽधितानि। वीतये। वायो इति। हव्यानि। वीतये॥ पिबतं। मध्वः। अंधसः। पूर्वऽपेयं। हि। वां। हितं। वायो इति। आ। चंद्रेण। राधसा। आ। गतं। इंद्रः। च। राधसा। आ। गतं ॥४॥

केवलं वायुं स्तुत्वा व्यासक्ततयेंद्रवायू स्तौति । हे वायो त्वमिंद्रं च वां युष्मान् रथो युवयोः संबंधी रथो नियुत्वान् नियुद्भिरश्वैस्तद्वान् सन् आवक्षत् । देवयजनं प्रति युष्मानावहतु ॥ वहेर्लेट्यडागमः। सिब्बहुलमिति सिप् ॥ यद्यपि नियुतो वायोरेव रथस्योचिताः। तथापि व्यासक्तदेवतात्वात् सहैवागमनादिंद्रार्थमपि वहंति। किमर्थं। अवसे। गमनाय रक्षणाय वा। पुनश्च किमर्थं। प्रयांस्यन्नानि सोमलक्षणानि सुधितानि सुष्ठु गृहीतानि वीतये। तेषां भक्षणाय। तथा हव्यानि वीतय इतरेषां सवनीयपुरोडाशादीनां खादनाय॥ वेतेः क्तिन्। मंत्रे वृषेत्यादिना तस्योदात्तत्वं॥ किंच मध्वो मधुररसस्यांधसोऽन्नस्य सोमरूपस्य ॥ कर्मणि षष्ठी ॥ मधुरं सोमं पिबतं। यतः पूर्वपेयमितरदेवेभ्यः पूर्वपानं युवयोर्हितं ॥ पातेरचो यदिति यत्। ईद्यतीतीकारः ॥ अभिमतं अतः प्रथमं पिबतमित्यर्थः। यद्यपींद्रादपि वायोः पूर्वपानं त्वं हि पूर्वपा असि देव दधिषे पूर्वपेयमित्यादिषु सर्वत्र प्रसिद्धं तथापींद्रस्येतरदेवेभ्यः पूर्वं वायुना सह पानं चेंद्रतुरीयार्थवादनब्राह्मणे देवा वै सोमस्य राज्ञोऽग्रपेयेन समपादयन्नित्यत्र प्रतिपादितं। ऐ॰ ब्रा॰ २. २५.। किंचागमनसमये हे वायो त्वमिंद्रश्च चंद्रेणास्मदाह्लादकेन हिरण्येन राधसा गवादिरूपेण धनेन च सहागतं। आगच्छतं। राधसा रत्नेन धनेन सहागतं॥ गमेर्लोटि छांदसः शपो लुक्। अनुदात्तोपदेशेत्यनुनासिकलोपः। लुङि च मंत्रे घसेति च्लेर्लुक्॥

॥ अथ पंचमी ॥

आ वां धियो ववृत्युरध्वराँ उपेममिंदुं मर्मृजंत वाजिनमाशुमत्यं न वाजिनं।
तेषां पिबतमस्मयू आ नो गंतमिहोत्या।
इंद्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवं ॥५॥

आ। वां। धियः। ववृत्युः। अध्वरान्। उप। इमं। इंदुं। मर्मृजंत। वाजिनं। आशुं। अत्यं। न। वाजिनं॥ तेषां। पिबतं। अस्मयू इत्यस्मऽयू। आ। नः। गंतं। इह। ऊत्या। इंद्रवायू इति। सुतानां। अद्रिऽभिः। युवं। मदाय। वाजऽदा। युवं ॥५॥

हे इंद्रवायू वां युवां धियः कर्माणि स्तोत्रादिलक्षणान्यध्वरानुप अस्मदीयान्यज्ञान् लक्षीकृत्य ववृत्युः। अतिशयेन वर्तयंति प्रवर्तयंति। किंच युष्मदर्थं वाजिनं ग्रहणाय द्रोणकलशाद्ग्रहान्प्रति गमनवंतमामिक्षावंतं वेममिंदुं पुरतो वर्तमानं सोमं मर्मृजंत। अध्वर्यवो दशापवित्रेण संमार्जयंति। मार्जने दृष्टांतः। आशुमतिशीघ्रगामिनमत्यं न। सततं गंतारं वाजिनं वेजनवंतमश्वमिव यथा स्वेदाद्यपनयनेन संमार्जयंति तद्वत्। किंच हे इंद्रवायू तेषामध्वर्यूणां संबंधिनः शोधितान् सोमान्पिबतं। पानं कुरुतं। तदर्थं नोऽस्माकं यज्ञं प्रतीहेदानीमूत्यास्मद्रक्षणेन सहागतं। आगच्छतं। किंच हे इंद्रवायू अस्मयू अस्मद्यज्ञमिच्छंतौ युवं युवामद्रिभिर्ग्रावभिः सुतानामभिषुतानां ॥ पूर्ववत्कर्मणि षष्ठी ॥ तान्पिबतमिति शेषः। किमर्थं। मदाय तृप्त्यै मोदाय वा। यतो युवं युवां वाजदा वाजस्यान्नस्य दातारौ। अतः पिबतमित्यन्वयः ॥

॥ इति द्वितीयस्य प्रथमे चतुर्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

इमे वां सोमा अप्स्वा सुता इहाध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत।
एते वामभ्यसृक्षत तिरः पवित्रमाशवः।
युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया ॥ ६ ॥

इमे। वां। सोमाः। अप्ऽसु। आ। सुताः। इह। अध्वर्युऽभिः। भरमाणाः। अयंसत। वायो इति। शुक्राः। अयंसत ॥ एते। वां। अभि। असृक्षत। तिरः। पवित्रं। आशवः। युवाऽयवः। अति। रोमाणि। अव्यया। सोमासः। अति। अव्यया ॥ ६ ॥

हे वायो वां युवयोस्तव चेंद्रस्य च स्वभूता इमे सोमा अप्स्वस्मदीयेषु कर्मसु ॥ ऊडिदमित्यादिना विभक्तेरुदात्तत्वं ॥ इहास्मिन्नभिषवस्थाने सुता अध्वर्युभिर्भरमाणास्तैर्भ्रियमाणा गृहीता होतुं वा ह्रियमाणाः ॥ कर्मणि कर्तृप्रत्ययः ॥ संत आयंसत। आगच्छंत। युवयोर्नियता भवंति। किंच त एव सोमाः शुक्राः शुभ्रा दीप्ता अयंसत। नियता भवंति। किंचैत आशवो व्यापकाः सोमा वां युवां प्रीणयितुमिति शेषः। तिरः पवित्रं तिर्यग्भूतं सोमांतर्धायकं वोर्णामयं पवित्रमभ्यसृक्षत। अभिलक्ष्यासृज्यंत। सृष्टा भवंति ॥ सृजेः कर्मणि लुङि लिङ्सिचावात्मनेपदेष्विति सिचः कित्त्वाद्गुणाभावोऽमागमाभावश्च ॥ किंच

युवायवो युवां कामयमानाः सोमासः सोमा अव्ययाव्ययान्यच्छिन्नानि रोमाणि पवित्रसंबंधीन्यविरोमाणि । यद्वा । अव्यया अविमयानि ॥ मकारो लुप्यते ॥ तादृशानि रोमाण्यति अतिक्रम्य पात्रान्गच्छंतीति शेषः । पुनस्त एव विशेष्यंते । अत्यतिशयेनाव्यया व्ययरहिताः सोमासः सोमा असृक्षतेति शेषः ॥

॥ अथ सप्तमी ॥

अति॑ वायो सस॒तो या॑हि॒ शश्व॑तो॒ यत्र॒ ग्रावा॒ वद॑ति॒ तत्र॑ गच्छतं गृ॒हमिंद्र॑श्च गच्छतं ।
वि सू॒नृता॒ ददृ॑शे॒ रीय॑ते घृ॒तमा पू॒र्णया॑ नि॒युता॑ याथो अ॒ध्व॒रमिंद्र॑श्च याथो अ॒ध्व॒रं ॥७॥

अति॑ । वा॒यो॒ इति॑ । स॒स॒तः । या॒हि॒ । शश्व॑तः । यत्र॑ । ग्रावा॑ । वद॑ति । तत्र॑ । ग॒च्छ॒तं॒ ।
गृ॒हं । इंद्रः॑ । च॒ । ग॒च्छ॒तं॒ ।
वि । सू॒नृता॑ । ददृ॑शे । रीय॑ते । घृ॒तं । आ । पू॒र्णया॑ । नि॒ऽयुता॑ । या॒थः॒ । अ॒ध्व॒रं ।
इंद्रः॑ । च॒ । या॒थः॒ । अ॒ध्व॒रं ॥७॥

हे वायो त्वं ससत आलस्यादिना निद्रां कुर्वतः शश्वतो बहून्यजमानान् ॥ शश्वदिति बहुनाम शश्वत् विश्वमिति तन्नामसु पाठात् ॥ अति अतिक्रम्योपेक्ष्यास्मद्यज्ञं याहि । गच्छ । इंद्रश्च तथा करोतु । कं देशमिति तमाह यत्र ग्रावा वदति । यस्मिन्देशेऽभिषवार्थः पाषाणध्वनिः श्रूयते तत्र गच्छतं तं देशं प्रत्यागच्छतं । गृहं यज्ञगृहं गच्छतं । पुनः स्थानमेव विशेष्यते । सूनृता प्रियतथ्यात्मिका स्तुतिरूपा वाक् यत्र विददृशे । विशेषेण दृश्यत इत्यर्थः । तत्र गच्छतं । यत्र च घृतमत्यंतदीप्तमाज्यं होमार्थं गृहीतं रीयते गच्छति । आहवनीयं प्रति नीयते ॥ रीङ् स्रवणे । दिवादित्वात् श्यन् ॥ तत्र गच्छतं । गमनप्रकार एव विशेष्यते । पूर्णया संपूर्णया पुष्टांगया नियुता ॥ जातावेकवचनं ॥ नियुज्जात्याध्वरमस्मदीयं यज्ञमायाथः । आभिमुख्येन प्रयाथः । किंच हे वायो त्वमिंद्रश्च युवामध्वरमस्मदीयं यागं याथः । सहैवागच्छतं । तथास्माभिरपि सहैव गच्छतमित्यर्थः ॥

॥ अथाष्टमी ॥

अत्राह॒ तद्व॑हेथे॒ मध्व॒ आहु॑तिं॒ यमश्व॒त्थमु॑प॒तिष्ठ॑त जा॒यवो॒ऽस्मे ते सं॑तु जा॒यवः॑ ।
सा॒कं गावः॒ सुव॑ते॒ पच्य॑ते॒ यवो॒ न ते॑ वाय॒ उप॑ दस्यंति धे॒नवो॒
नाप॑ दस्यंति धे॒नवः॑ ॥ ८॥

अत्र। अह। तत्। वहेथे इति। मध्वः। आऽहुतिं। यं। अश्वत्थं। उपऽतिष्ठंत। जायवः।
अस्मे इति। ते। संतु। जायवः।
साकं। गावः। सुवते। पच्यंते। यवः। न। ते। वायो इति। उप। दस्यंति। धेनवः।
न। अप। दस्यंति। धेनवः ॥ ८ ॥

हे इंद्रवायू अत्राहास्मिन्नेव यज्ञे ॥ अहेति विनिग्रहार्थीयः ॥ मध्वो मधुरसस्य मधुसदृशस्य वा तत् तस्याहुतिं प्रदेयद्रव्यं वहेथे। धारयतं। यं सोममश्वत्थं पर्वतादिव्याप्तिप्रदेशे स्थितं जायवो जेतारो यजमाना उपतिष्ठंति। उपेत्य तिष्ठंति क्रयाद्यर्थं। किंच। अस्मे अस्माकं संबंधिनो जायवो जेतारः कर्मनिर्वहितारस्ते ऋत्विजः संतु। समर्था भवंतु। यज्ञं निर्वहंत्वित्यर्थः। यद्वा ते प्रसिद्धाः प्रयोगकुशला जायवो जेतार ऋत्विजोऽस्मे संतु नान्यस्य। अत्र वहेथे इत्युक्तं कोऽत्र विशेष इति तत्राह। हे इंद्रवायू अस्मिन्यज्ञे गावो धेनवः साकं सहैव सुवते। युष्मदर्थमेव क्षीरमुत्पादयंति। दोग्ध्र्यो भवंतीत्यर्थः। यद्वा गावः साकं सहैव सुवते। अपत्यमुत्पादयंति त्वद्दोहनार्थं ॥ आदादिकः। ङित्त्वात्तास्यनुदात्तेदिति लसार्वधातुकानुदात्तत्वे धातुस्वरः ॥ किंच यवः ॥ जातावेकवचनं। उपलक्षणमेतत् ॥ यवादिभिः पुरोडाशादिकं पच्यत इत्यर्थः। किंच। हे वायो इंद्र च यतो गाव एवं सुवते। अतस्ते त्वदर्था धेनवो नोपदस्यंति। नोपक्षीणा भवंति। रोगादिना कृशा न भवंति। न केवलमनुपक्षीणाः किंतु धेनवो युष्मत्प्रीणयित्र्यो गावो नापदस्यंति। चौराद्युपहारैरुपक्षीणा नष्टा न भवंति ॥

॥ अथ नवमी ॥

इमे ये ते सु वायो बाह्वोजसोऽंतर्नदी ते पतयंत्युक्षणो महि व्राधंत उक्षणः।
धन्वन् चिद्ये अनाशवो जीराश्चिदगिरौकसः।
सूर्यस्येव रश्मयो दुर्नियंतवो हस्तयोर्दुर्नियंतवः ॥ ९ ॥

इमे। ये। ते। सु। वायो इति। बाहुऽओजसः। अंतः। नदी इति। ते। पतयंति। उक्षणः।
महि। व्राधंतः। उक्षणः ॥ धन्वन्। चित्। ये। अनाशवः। जीराः। चित्। अगिराऽओकसः।
सूर्यस्यऽइव। रश्मयः। दुःऽनियंतवः। हस्तयोः। दुःऽनियंतवः ॥ ९ ॥

हे सु वायो शोभनफलप्रद वायुदेव ते तव स्वभूता इमे पुरतो दृश्यमाना

येऽश्वाः संति । ते नदी नंदने द्यावापृथिव्यावंतस्तयोरंतराले तं त्वां पतयंति । पातयंति गमयंति । यद्वा ते तव संबंधिनोऽश्वाः पतयंति । पतंति यज्ञदेशं गच्छंति ॥ पत गतौ चौरादिरदंतः । कीदृशास्ते । बाह्वोजसः । बाहुषु प्रकृष्टबलवंतः । उपलक्षणमेतत् सर्वांगबला इत्यर्थः । किंच उक्षणः सेक्तारः । युवान इत्यर्थः । महि महदतिप्रभूतं व्राधंतो वर्धमानाः । तथोक्षण उक्षाणः । तत्सदृशा इत्यर्थः ॥ वा षपूर्वस्य निगम इति दीर्घाभावः ॥ किंच धन्वञ्चित् धन्वन्युदकनिर्गमनापादानभूतेऽंतरिक्षेऽपि निरालंबेऽनाशवो नाशरहिता अव्याप्ता वा । आकाशे विलंबमकुर्वाणा इत्यर्थः । अत एव जीराश्चित् ॥ चिच्छब्दः पूजायां ॥ अत्यंतं क्षिप्रगतयः । यद्वा अनाशव इत्यनेन सह समुच्चयार्थश्चिच्छब्दः । आकाशमार्गेऽक्षीणाः शीघ्रगतयश्चेत्यर्थः । किंच अगिरौकसः । गिरा ओकः स्थानं येषां नास्ति ते तादृशाः । भर्त्सनादिना स्थितिमलभमाना इत्यर्थः ॥ छांदसस्तृतीयाया अलुक् ॥ तदेव स्पष्टयति । सूर्यस्य रश्मय इव दुर्नियंतवः । दुःखेन नियंतव्याः । ते यथा क्षणेन दश दिशो व्याप्नुवंति बहवश्च तद्वदेतेऽपीत्यर्थः । पूर्वं गिरानिर्ग्राह्यत्वमुक्तं । इदानीं हस्तेनाप्यनिर्ग्राह्यत्वमाह । हस्तयोर्दुर्नियंतवः । उभाभ्यामपि हस्ताभ्यां दुःखेन नियंतव्याः । देवयजनगमनाय शीघ्रगामिन इत्यर्थः ॥

॥ इति द्वितीयस्य प्रथमे पंचविंशो वर्गः ॥

प्र सु ज्येष्ठमिति सप्तर्चं तृतीयं सूक्तं। ऋषिश्चान्यस्मादिति परिभाषया परुच्छेप ऋषिः । अत्यष्टिश्छंदः । ऊती देवानामित्यंत्या त्रिष्टुप्। अत्र त्रिष्टुबंतपरिभाषा नाश्रीयते सर्वमात्यष्टमिति विशेषपरिभाषया बाधितत्वात्। मित्रावरुणौ देवता। अंत्ययोस्तु तन्मंत्रलिंगोक्तदेवता। तथा चानुक्रांतं प्र सु सप्त मैत्रावरुणं त्वंत्ये लिंगोक्तदेवते अंत्या त्रिष्टुप् । तुशब्दप्रयोगादिदमादिके द्वे सूक्ते मैत्रावरुणदेवताके। विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

प्र सु ज्येष्ठं निचिराभ्यां बृहन्नमो हव्यं मतिं भरता मृळयद्भ्यां स्वादिष्ठं मृळयद्भ्यां ।
ता सम्राजा घृतासुती यज्ञेयज्ञ उपस्तुता ।
अथैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे ॥ १ ॥

प्र॒। सु। ज्येष्ठं॑। नि॒ऽचि॒राभ्यां॑। बृ॒हत्। नमः॑। ह॒व्यं। म॒तिं। भ॒र॒त॒। मृ॒ळ॒यत्ऽभ्यां॑।
स्वादि॑ष्ठं। मृ॒ळ॒यत्ऽभ्यां॑।
ता। सं॒ऽराजा॑। घृ॒तासु॑ती॒ इति॑ घृ॒तऽआ॑सुती। य॒ज्ञेऽय॑ज्ञे। उप॑ऽस्तुता।
अथ॑। ए॒नोः॒। क्ष॒त्रं। न। कुतः॑। च॒न। आ॒ऽधृषे॑। दे॒व॒ऽत्वं। नु। चि॒त्। आ॒ऽधृषे॑॥१॥

हे ऋत्विजो मित्रावरुणाभ्यां ज्येष्ठं प्रशस्यं बृहन्महदतिप्रवृद्धं नमो नमस्कारोपलक्षितं स्तोत्रं तदुपलक्षितं हविर्लक्षणमन्नं वा प्रभरत। संपादयत॥ नम इत्यन्ननाम नम आयुरिति तन्नामसु पाठात्॥ किंच हव्यं हव्यां मतिं तत्प्रदानविषयां बुद्धिं भरत। यद्वा मतिं पूज्यं हव्यं हविर्भरत। पूर्वत्र पुरोडाशाद्यदनीयमन्नं इदानीं तु सोमाज्यादिरूपं निपेयं हविरिति विवेकः। कीदृशाभ्यां ताभ्यां। निचिराभ्यां। नितरां चिरकालाभ्यां। नित्याभ्यामित्यर्थः। प्रवाहरूपेणेति भावः। किंच मृळयद्भ्यां। स्तुत्या हविःस्वीकारेण स्वयं मृडित्वा यजमानमपि सुखयद्भ्यां। तथा स्वादिष्ठं स्वादुतरं मृळयद्भ्यां हविः सुखयद्भ्यां। भक्षयद्भ्यामित्यर्थः। कस्तयोर्विशेष इति तत्राह। ता तौ मित्रावरुणौ सम्राजा सम्यग्राजमानौ॥ राजतेः क्विप्। मो राजि समः क्वाविति समो मकारस्य मकारः॥ घृतासुती। घृतमासूयत आदीयते याभ्यां तौ तादृशौ। यद्वा घृतमुदकं वृष्टिलक्षणं प्रसूयते सर्वत्रानुज्ञायते याभ्यां तौ। एतयोरहोरात्राभिमानिदेवत्वादहोरात्रद्वारा वृष्ट्युत्पादकत्वात् अहोरात्रे वै मित्रावरुणावहोरात्राभ्यां खलु वै पर्जन्यो वर्षतीति श्रुतेर्वृष्ट्यनुज्ञाप्रदत्वं प्रसिद्धं। किंचैतौ यज्ञे यज्ञे सर्वेष्वपि यज्ञेषूपस्तुता सर्वैर्ऋत्विग्भिः स्तूयमानौ॥ गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥ अथ अपि चैनोरेनयोः॥ संज्ञापूर्वकस्य विधेरनित्यत्वादोसि च। पा॰ ७.३.१०४.। इति गुणाभावेऽतो गुण इति पररूपत्वं॥ क्षत्रं बलं कुतश्चन कस्मादपि च शत्रो राक्षसादेः सकाशात् कस्मादप्युपायाद्वा नाधृषे। आधर्षितुं नाम शक्यं न भवति॥ कृत्यार्थे तवैकेनिति केन्प्रत्ययः। किंच तयोर्देवत्वं नू चित् देवभावोऽपि नाधृषे। आधर्षणायोग्यः। यद्वा पूर्वमिवेदानीमपि॥ नू चिदिति निपातः पुराणनवयोरिति यास्केनोक्तत्वात्॥ आधृषे न केनाप्याधर्षणीयो भवति। एतयोर्बलं नाधृष्यं किमु तद्देवत्वमिति भावः॥

॥ अथ द्वितीया ॥

अदर्शि गातुरुरवे वरीयसी पंथा ऋतस्य समयंस्त रश्मिभिश्चक्षुर्भगस्य रश्मिभिः।
द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च।
अधा दधाते बृहदुक्थ्यं१वयं उपस्तुत्यं बृहद्वयः ॥ २ ॥

अदर्शि। गातुः। उरवे। वरीयसी। पंथाः। ऋतस्य। सं। अयंस्त। रश्मिऽभिः।
चक्षुः। भगस्य। रश्मिऽभिः ॥ द्युक्षं। मित्रस्य। सदनं। अर्यम्णः। वरुणस्य। च।
अध। दधाते इति। बृहत्। उक्थ्यं। वयः। उपऽस्तुत्यं। बृहत्। वयः ॥ २ ॥

गातुर्गमनशीला वरीयस्युरुतरोषा उरवे विस्तीर्णाय यागाय गमनादिव्यापारायादर्शि। सर्वैर्दृष्टत्वात्। तथा ऋतस्य गमनशीलस्यादित्यस्य पंथा मार्ग आकाशलक्षणो रश्मिभिः समयंस्त। प्रकाशैः संगतोऽभूत्। भगस्य सर्वैर्भजनीयस्यैतन्नामकस्य देवस्य रश्मिभिश्चक्षुः सर्वप्राणिनां लोचनं समयंस्त। संगतमभूत्। सर्वे स्वस्वद्रव्यदर्शनाय समर्था अभवन्नित्यर्थः। तदेव स्पष्टीक्रियते। मित्रस्य प्रकाशकारित्वात्सर्वजनमित्रस्य सदनं गृहमंतरिक्षं द्युक्षं दीप्तानां निवासस्थानं रश्मिभिः समयंस्त। संगतमभूत्। तथार्यम्ण एतन्नामकस्य देवस्य ॥ उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं ॥ द्युक्षं सदनं रश्मिभिः समयंस्त। किंच वरुणस्य तमोनिवारकस्यैतन्नामकस्य देवस्य सदनं तथाभूत्। यद्यपि सूर्यस्यैकत्वेऽप्युपाधिभेदेन भेदात्पृथक् स्तुतिः तथा यद्यपि त्रिभिरपि प्रकाश्यमप्यंतरिक्षमेकं तथापि प्रकाशकानां भेदात् त्रिधा स्तूयते। उदयानंतरं कर्मानुष्ठानाय प्रकाशोऽभवदित्यर्थः। अध अत कारणात् उदितत्वादेवोक्थ्यं स्तुत्यं बृहत् प्रभूतं वयो हविर्लक्षणमन्नं दधाते। धारयतः। किंच। उपस्तुत्यमुपेत्य स्तोतव्यं॥ एतिस्तुशास्वित्यादिना क्यप् ॥ बृहत्स्तोमादिना महत्स्तोत्रं वयो हविर्लक्षणमन्नं च दधाते ॥

॥ अथ तृतीया ॥

ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमा सचेते दिवेदिवे जागृवांसा दिवेदिवे।
ज्योतिष्मत्क्षत्रमाशाते आदित्या दानुनस्पती।
मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः ॥ ३ ॥

ज्योति॑ष्मतीं। अदि॑तिं। धा॒र॒यत्ऽक्षि॑तिं। स्वः॑ऽवतीं। आ। स॒चे॒ते॒ इति॑। दि॒वेऽदि॑वे। जा॒गृ॒ऽवांसा॑। दि॒वेऽदि॑वे।

ज्योति॑ष्मत्। क्ष॒त्रं। आ॒शा॒ते॒ इति॑। आ॒दि॒त्या। दानु॑नः। पती॒ इति॑।

मि॒त्रः। तयोः॑। वरु॑णः। या॒त॒यत्ऽज॑नः। अ॒र्य॒मा। या॒त॒यत्ऽज॑नः ॥ ३ ॥

अयं यजमानो ज्योतिष्मतीमाहवनीयाग्नेस्तेजोयुक्तामदितिमदीनां संपूर्णलक्षणां क्षितिमग्नेर्निवासयोग्यां भूमिमुत्तरवेदिलक्षणां धारयत्। धारयति। स्वयं कृतवानित्यर्थः। एतावती वै पृथिवी यावती वेदिरिति श्रुतेः। तथा स्वर्वतीं यज्ञनिष्पत्तिद्वारा स्वर्गवतीं। ईदृशीं तामासचेते। मित्रावरुणौ संगतौ भवतः। न केवलमेतस्मिन्नेवाहनि किंतु दिवे दिवे सर्वेष्वप्यहःसु। कीदृशौ तौ। दिवे दिवे प्रतिदिनं जागृवांसा प्रबोधं कुर्वाणौ। यज्ञं गंतुमनलसावित्यर्थः। किंच वेदिमागत्य ज्योतिष्मदाज्यादिस्वीकारेणातिशयेन तेजोयुक्तं क्षत्रं बलमाशाते। अश्नुवाते। प्राप्नुतः॥ अश्नोतेश्छांदसे लिट्यनित्यमागमशासनमिति वचनान्नुडभावः। लटि वा छांदसः शपः श्नुः॥ कीदृशाविति तावाह आदित्यादितेः पुत्रौ दानुनस्पती दानस्याज्यादिप्रदानस्य स्वामिनौ। अभिमतदानस्य पालयितारौ वा॥ षष्ठ्याः पतिपुत्रेति संहितायां सत्वं॥ मित्रश्च वरुणश्च तावुभौ देवौ। अर्यमाख्यस्तु देवस्तयोर्मित्रावरुणयोर्यातयज्जनः। तयोरेव संबंधादुभयोर्मध्ये स्थितो यातयज्जनः स्वस्वव्यापारनियोजितसर्वजनः। मित्रावरुणावहोरात्रदेवौ। अर्यमा तु तयोरेव सामर्थ्यात्सर्वप्राणिनः प्रेरयतीत्यर्थः। किंच यातयज्जनः। यातयंति लोकं यदीया जनाः प्रेष्याः स तादृशः। यद्वा यात्यमाना नरके निपात्यमाना जनाः प्राणिनोऽयष्टारो येन स तादृशः। कर्मसाक्षित्वात्स्वस्वकर्मानुरोधेन प्राणिनः सुकृते यातयतीत्यर्थः। तादृशोऽर्यमा मित्रावरुणयोरधीनो वर्तत इति शेषः॥

॥ अथ चतुर्थी ॥

अ॒यं मि॒त्राय॒ वरु॑णाय॒ शंत॑मः सोमो॑ भूत्वव॒पाने॒ष्वाभ॑गो दे॒वो दे॒वेष्वाभ॑गः।

तं दे॒वासो॑ जुषेरत॒ विश्वे॑ अ॒द्य स॒जोष॑सः।

तथा॑ राजाना करथो॒ यदीम॑ह॒ ऋता॑वाना॒ यदीम॑हे ॥ ४ ॥

अयं । मित्राय । वरुणाय । शंऽतमः । सोमः । भूतु । अवऽपानेषु । आऽभगः । देवः । देवेषु । आऽभगः ॥ तं । देवासः । जुषेरत । विश्वे । अद्य । सऽजोषसः । तथा । राजाना । करथः । यत् । ईमहे । ऋतऽवाना । यत् । ईमहे ॥ ४ ॥

अयमस्माभिर्हूयमानः सोमो मित्राय वरुणाय च शंतमः पीयमानः सन् सुखतमो भूतु । भवतु ॥ छांदसः शपो लुक् । भूसुवोस्तिङीति गुणाभावः ॥ अवपानेष्ववाङ्मुखचमसपानेषु विषयेषु आ सर्वतो भगो भजनीयस्ताभ्यां । किंच देवो दीप्यमानो देवेषु मित्रावरुणानुचरेष्वितरदेवेषु तैराभग आभजनीयः । यद्वा देवेषु स्तोतृषु यजमानेषु मध्ये देवो दीप्यमानः । तथाभगस्तैरेव आ सर्वतो भजनीयः । किंच तं सोमं विश्वे सर्वे देवासो देवा अद्यास्मिन्नहनि जुषेरत । सेवंते ॥ छांदसो रूस्य रन्नादेशाभावः । बहुलं छंदसीति रुडागमः ॥ कीदृशास्ते । सजोषसः समानप्रीतियुक्ताः । तथा राजाना राजमाना मित्रावरुणौ युवां करथः । कुरुतं । सेवेथे इत्यर्थः ॥ व्यत्ययेन शप् ॥ यद्यस्मात्कारणाद्यदीमहे यत्प्राप्तुमस्तद्देवान्याचामहे ॥ ईङ् गतौ । दैवादिकः । छांदसो विकरणस्य लुक् ॥ तस्माज्जुषेरत । तथा ऋतावाना ऋतवंतौ सत्यवंतौ यज्ञवंतौ वा मित्रावरुणावीमहे । अभिमतफलं तयोः पानं वा याचामहे ॥

॥ अथ पंचमी ॥

यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परि पातो अंहसो दाश्वांसं मर्तमंहसः ।
तमर्यमाभि रक्षत्यृजूयंतमनु व्रतं ।
उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतं ॥ ५ ॥

यः । मित्राय । वरुणाय । अविधत् । जनः । अनर्वाणं । तं । परि । पातः । अंहसः । दाश्वांसं । मर्तं । अंहसः ॥ तं । अर्यमा । अभि । रक्षति । ऋजुऽयंतं । अनु । व्रतं । उक्थैः । यः । एनोः । परिऽभूषति । व्रतं । स्तोमैः । आऽभूषति । व्रतं ॥ ५ ॥

यो जनो यजमानो मित्राय वरुणाय च ॥ कर्मणः संप्रदानत्वाच्चतुर्थी ॥ मित्रं वरुणं चाविधत् । परिचरति । तं जनं युष्मत्परिचारकमनर्वाणमद्वेषिणं ॥ भ्रातृव्यो वा अर्वेति श्रुतेः ॥ अनल्पं वानन्यसेविनं परिपातः । परितो रक्षतां ।

कस्मादिति तदुच्यते। अंहसः। न्यूनातिरेकजनितात्पापात्। न केवलं सामान्यं जनं अपि तु दाश्वांसं हविर्दत्तवंतं मर्तं मरणधर्माणमंहसः सर्वस्मादपि पापात्। न केवलं भवंतावेव अपि त्वर्यमा सर्वेषां नियंता देव ऋजूयंतं देवेष्वार्जवमाचरंतं यजमानमनु व्रतं तदीयं कर्मानुलक्ष्याभिरक्षति। अभितो रक्षति। कोऽस्य जनस्य विशेष इति तत्राह। यो यजमान उक्थैः शस्त्रैरेनोरेनयोर्मित्रावरुणयोर्व्रतं कर्म परिभूषति। परिगृह्णाति। तथा यजमानो युष्मदीयं व्रतं कर्म स्तोमैः स्तोत्रैर्गानयुक्तमंत्रसाध्यैराभूषति। सर्वतोऽलंकरोति॥ भूष अलंकारे भौवादिकः॥ तमभिरक्षंतीत्यन्वयः॥

॥ अथ षष्ठी ॥

नमो॑ दि॒वे बृ॑ह॒ते रोद॑सीभ्यां मि॒त्राय॑ वोचं॒ वरु॑णाय मी॒ळ्हुषे॑।
सुमृ॒ळी॒काय॑ मी॒ळ्हुषे॑॥ इंद्र॑म॒ग्निमुप॑ स्तुहि द्यु॒क्षम॑र्य॒मणं॒ भगं॑।
ज्योग्जीवं॑तः प्र॒जया॑ सचेमहि॒ सोम॑स्यो॒ती सचे॑महि॥ ६॥

नमः॑। दि॒वे। बृ॒ह॒ते। रोद॑सीभ्यां। मि॒त्राय॑। वो॒चं॒। वरु॑णाय। मी॒ळ्हुषे॑।
सु॒ऽमृ॒ळी॒काय॑। मी॒ळ्हुषे॑॥ इंद्रं॑। अ॒ग्निं। उप॑। स्तु॒हि॒। द्यु॒क्षं। अ॒र्य॒मणं॑। भगं॑।
ज्योक्। जीवं॑तः। प्र॒ऽजया॑। स॒चे॒म॒हि॒। सोम॑स्य। ऊ॒ती। स॒चे॒म॒हि॒॥ ६॥

दिवे द्योतमानाय सूर्याय नमो वोचं। नमस्कारोपलक्षितं स्तोत्रं वोचं। ब्रवीमि। स्तौमीत्यर्थः। कीदृशाय तस्मै। बृहते महते॥ बृहन्महतोरुपसंख्यानमिति विभक्तिरुदात्ता॥ स्तुत्याय। तथा रोदसीभ्यां द्यावापृथिवीभ्यां तदभिमानिदेवाभ्यां नमो वोचं। तथा मित्राय सर्वजनहितायाहरभिमानिदेवाय नमो वोचं। तथा वरुणायावरकाय रात्र्यभिमानिदेवाय। तथा मीळ्हुषेऽभिमतफलस्य सेक्त्रे रुद्राय। कीदृशाय तस्मै। सुमृळीकाय शोभनसुखयित्रे। पुनः स एव विशेष्यते। मीळ्हुषे सुमृळीकायेति द्वे प्रत्येकविशेषणभूते। इदानीं यजमान ऋत्विजं स्वात्मानं वा प्रति ब्रवीति। हे होतः हे आत्मन्वा इंद्रमग्निं द्युक्षं दीप्तिमंतमर्यमणं भगं चोप उपेत्य बुद्ध्या प्राप्य स्तुहि। स्तुतिं कुरु। अस्मदनुग्रहात् ज्योक् चिरकालं जीवंतो जीवनोपेता वयं प्रजया पुत्रभृत्यादिना सचेमहि। संगता भूयास्म। किंच सोमस्येंदोरूती ऊत्या सचेमहि। तमपि स्तुत्वा तत्कारितेन रक्षणेन सहिता भूयास्मेत्यर्थः॥

॥ अथ सप्तमी ॥

ऊती देवानां वयमिंद्रवंतो मंसीमहि स्वयशसो मरुद्भिः ।
अग्निर्मित्रो वरुणः शर्म यंसन् तदश्याम मघवानो वयं च ॥ ७ ॥

ऊती । देवानां । वयं । इंद्रऽवंतः । मंसीमहि । स्वऽयशसः । मरुत्ऽभिः ।
अग्निः । मित्रः । वरुणः । शर्म । यंसन् । तत् । अश्याम । मघऽवानः । वयं । च ॥ ७ ॥

इंद्रवंतः प्रीतेनेंद्रेण तद्वंतो वयं देवानां देवान् ॥ कर्मणि षष्ठी ॥ ऊती ऊत्या तर्पणेन हविरादिना मंसीमहि । मन्येमहि । कीदृशा वयं । स्वयशसः स्वायत्तकीर्त्तयो मरुद्भिः स्तुत्या हृष्टैर्मरुद्भिर्देवैरनुगृहीताः । यद्वा देवानामूत्या रक्षणेन रक्षिता मंसीमहि मंतारो भवेम सामर्थ्यात्तेषामेव महत्त्वस्य । किंचाग्निर्मित्रवरुणा देवाः शर्म यंसन् । अस्माकं सुखं प्रायच्छन् तं तं वरं । मघवानो वयं च तैर्दत्तान्नवंतः संतस्तत्सुखमश्याम । व्याप्नुयाम ॥ अश्नोतेराशिषि लिङि छंदस्युभयथेति सार्वधातुकत्वात्सलोपः ॥

॥ इति द्वितीयस्य प्रथमे षड्विंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके प्रथमोऽध्यायः समाप्तः ॥

---

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ द्वितीयाष्टके द्वितीयोऽध्याय आरभ्यते । सुषुमा यातमिति तृचात्मकं चतुर्थं सूक्तं पारुच्छेपमतिशाक्वरं षष्ट्यक्षरोपेतत्वात् । पूर्ववत् तुशब्दप्रयोगान्मैत्रावरुणौ । अत्रात्यष्टिपरिभाषा नाश्रीयतेऽतिशाक्वरमिति विशेषितत्वात् ।

अत्रानुक्रमणिका। सुषुम तृचमतिशाक्वरमिति ॥ दशरात्रस्य षष्ठेऽहनि प्रातःसवने प्रउगशस्त्र इदं सूक्तं मित्रावरुणदेवत्यं तृतीयतृचं। सूत्रितं च। स्तीर्णं बर्हिरिति तृचौ सुषुमा यातमद्रिभिः। आ० ८.१.। इति ॥ तथास्मिन्नेव मैत्रावरुणस्य प्रस्थितयाज्यायाः पुरस्तादाद्या प्रक्षेपणीया। षष्ठस्य प्रातःसवन इति खंडे सूत्रितं। सुषुमा यातमद्रिभिः। आ० ८.१.। इति ॥

॥ सैषा सूक्ते प्रथमा ॥

सुषुमा यातमद्रिभिर्गोश्रीता मत्सरा इमे सोमासो मत्सरा इमे।
आ राजाना दिविस्पृशास्मत्रा गंतमुप नः।
इमे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः ॥ १ ॥

सुसुम। आ। यातं। अद्रिऽभिः। गोऽश्रीताः। मत्सराः। इमे।
सोमासः। मत्सराः। इमे ॥ आ। राजाना। दिविऽस्पृशा। अस्मऽत्रा। गंतं। उप। नः।
इमे। वां। मित्रावरुणा। गोऽआशिरः। सोमाः। शुक्राः। गोऽआशिरः ॥ १ ॥

हे मित्रावरुणौ आयातं। अस्मद्यज्ञं प्रत्यागच्छतं। आगमनाय किमस्तीति चेत् तत्राह। अद्रिभिरभिषवसाधनैर्ग्रावभिः सुषुम। सोमं सुतवंतो वयं ॥ सुनोतेर्लिटि रूपं ॥ अतो गोश्रीताः। विकारे प्रकृतिशब्दः। पयोभिर्मिश्रिताः। तस्मान्मैत्रावरुणं पयसा श्रीणातीति हि ब्राह्मणं। मत्सरास्तृप्तिहेतवः सोमाः ॥ मत्सरः सोमो मंदतेस्तृप्तिकर्मण इति यास्कः। नि० २.५.॥ इमे पुरतो गृहीता वर्तंते। अत आयातं। पुनस्त एव विशेष्यंते। इमे सोमासो मत्सराः। मदहेतवो मादने मात्सर्यवंतो वेतरयज्ञगतसोमेभ्यः सोमाः। कीदृशौ युवां। राजाना राजनशीलौ दिविस्पृशा द्युलोकवासिनौ ॥ हृद्युभ्यां ङेरुपसंख्यानमित्यलुक् ॥ ईदृशौ युवामस्मत्रास्मासु मध्येऽस्मत्पालकौ वा युवां नोऽस्मत्संबंधिनं यज्ञमुपगंतं। आगच्छतं। किंच हे मित्रावरुणा एतन्नामानौ देवौ वां युवयोरर्थायेमे सोमा गवाशिरः। पूर्ववद्विकारे प्रकृतिशब्दः। गोभिः क्षीरैराशिरो मिश्रिताः संजाताः। किंच गवाशिरो गोभिरुदकैर्मिश्रिताः संजाताः। यद्वा गोभिः स्तुतिलक्षणैर्मंत्रैर्मिश्रिताः। अत एव शुक्रा दीप्ताः संजाताः। आशिरमवनयति शुक्रत्वायेति श्रुतेः ॥

॥ अथ द्वितीया ॥

इम आ यातमिंदवः सोमासो दध्याशिरः सुतासो दध्याशिरः ।
उत वामुषसो बुधि साकं सूर्यस्य रश्मिभिः ।
सुतो मित्राय वरुणाय पीतये चारुर्ऋताय पीतये ॥ २ ॥
इमे । आ । यातं । इंदवः । सोमासः । दधिऽआशिरः । सुतासः । दधिऽआशिरः ।
उत । वां । उषसः । बुधि । साकं । सूर्यस्य । रश्मिऽभिः ।
सुतः । मित्राय । वरुणाय । पीतये । चारुः । ऋताय । पीतये ॥ २ ॥

हे मित्रावरुणौ आयातं । आगच्छतं । यतो युष्मदर्थमिंदवः क्लेदनसमर्थाः सोमासः सोमा दध्याशिरो दध्याश्रयणवंतः संत इमे पुरतो ग्रहेण गृहीता वर्तंते अत आयातं । किंच दध्याशिरो धीयमानाशिरः सोमाः सुतासो मंत्रेण ग्रावभिरभिषुताः संपन्नाः । अत आयातमिति शेषः । आदित्यग्रहे दध्यवनयसद्भावात्तदपेक्षया दध्याशिर इत्युक्तं । उतापि च वां युवयोः प्रीतये पालनायोषसो बुध्युषसः संबंधिनि बोधे सति ॥ संपदादिलक्षणो भावे क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं ॥ प्रकाशे संजाते सति । न केवलमुषस एव बोधः अपि तु सूर्यस्य रश्मिभिः साकं सूर्यकिरणैः सह प्रकाशे हविःप्रदानाय संजाते सति सुतः सोमोऽभिषुतः । इदानीं वियुज्योच्यते । मित्राय सर्वहितायैतन्नामकायाहरभिमानिदेवाय तथा वरुणायावरकाय रात्र्यभिमानिदेवाय च तदर्थं सोम सुत इति शेषः । किंच ऋताय यज्ञाय तन्निर्वाहकाय तदर्थं पीतये पानाय । यज्ञसिद्ध्यर्थं हि देवानां सोमपानं ॥ यद्वा कर्तरि क्तिच् ॥ पीतये पात्रे ऋत्विगादये ऋताय यज्ञाय तन्निर्वाहकाय वा चारुश्चरणीयो भक्षणीयः सोमः सुतोऽभिषुतः ॥

॥ अथ तृतीया ॥

तां वां धेनुं न वासरीमंशुं दुहंत्यद्रिभिः सोमं दुहंत्यद्रिभिः ।
अस्मत्रा गंतमुप नोऽर्वाचा सोमपीतये ।
अयं वां मित्रावरुणा नृभिः सुतः सोम आ पीतये सुतः ॥ ३ ॥

तां । वां । धेनुं । न । वासरीं । अंशुं । दुहंति । अद्रिऽभिः ।
सोमं । दुहंति । अद्रिऽभिः ॥ अस्मऽत्रा । गंतं । उप । नः । अर्वाचा । सोमऽपीतये ।
अयं । वां । मित्रावरुणा । नृऽभिः । सुतः । सोमः । आ । पीतये । सुतः ॥ ३ ॥

वां युवयोः संबंधिनमंशुं वल्लीरूपं सोमं दुहंति । संपादयंत्यध्वर्यवः । किमिव । तां प्रसिद्धामग्निहोत्राद्यर्थां वासरीं सर्वांगाच्छादितपयस्कां । बहुक्षीरामित्यर्थः । यद्वा पयआदिनाच्छादयित्रीं ॥ वस आच्छादने । औणादिकोऽरिप्रत्ययः । कृदिकारादक्तिन इति ङीष् । यद्वा केवल औणादिकोऽरप्रत्ययः स्वार्थिकोऽण् ॥ धेनुं न । प्रीणयित्रीं गामिव । केन साधनेनेति तदाह । अद्रिभिरभिषवसाधनैर्ग्रावभिः । किंच अद्रिभिस्तैरेव साधनैः सोमं युष्मदर्थमेव दुहंति । वल्लीरूपं सोमं युष्मदर्थमेवोदकेनाप्लाव्य रसं दुहंति । किंच अर्वाचास्मदभिमुखौ संतौ सोमपीतये सोमपानायास्मत्रास्मत्त्रातारौ युवां नोऽस्मदीयं यज्ञमुपगंतं । उपागच्छतं । किंच वां युष्मदर्थमयं सोमो नृभिर्नेतृभिर्यज्ञनिर्वाहकैर्ऋत्विग्भिः सुतः । अभिषुतः । किंच आ पीतये संपूर्णपानाय सुतः । अत आगच्छतमित्यर्थः ॥

॥ इति द्वितीयस्य द्वितीये प्रथमो वर्गः ॥

प्रप्र पूष्ण इति चतुर्ऋचं पंचमं सूक्तं पारुच्छेपमात्यष्टं पूषदेवताकं । प्रप्र चतुष्कं पौष्णमित्यनुक्रांतं । विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

प्रप्रं पूष्णस्तुविजातस्यं शस्यते महित्वमस्य तवसो न तंदते स्तोत्रमस्य न तंदते ।
अर्चामि सुम्नयन्नहमंत्यूतिं मयोभुवं ।
विश्वस्य यो मनं आयुयुवे मखो देव आयुयुवे मखः ॥ १ ॥
प्रऽप्रं । पूष्णः । तुविऽजातस्यं । शस्यते । महिऽत्वं । अस्य । तवसः । न । तंदते ।
स्तोत्रं । अस्य । न । तंदते ॥ अर्चामि । सुम्नऽयन् । अहं । अंतिऽऊतिं । मयःऽभुवं ।
विश्वस्य । यः । मनः । आऽयुयुवे । मखः । देवः । आऽयुयुवे । मखः ॥ १ ॥

तुविजातस्य बहुयजमानार्थमुत्पन्नस्यास्य पूष्णः पोषकस्यैतन्नामकस्य देवस्य तवसो महित्वं बलस्य महत्त्वं प्रप्र शस्यते । प्रस्तूयते सर्वैः ॥ वीप्सा पादपूरणे ॥ न तंदते । न हिनस्ति कश्चित्तदपि । किंचास्य पूष्णः स्तोत्रं न तंदते । न

हिनस्ति। न विरमति। सर्वोऽपि जन एनं स्तौतीत्यर्थः। जगत्पोषकत्वादिति भावः। अतः कारणादहं अहमपि यजमानः सुम्नयन् सुखमिच्छन् अर्चामि। स्तौमि। कीदृशं तं। अंत्यूतिं। आसन्नरक्षणं॥ कादिलोपो बहुलमिति कलोपः॥ स्तुत्यनंतरमेव वरप्रदमित्यर्थः। मयोभुवं। सुखस्योत्पादकं भावयितारं वा। यः पूषा मखो यज्ञवान्॥ मत्वर्थो लुप्यते॥ विश्वस्य सर्वस्य स्तोतुर्ऋत्विजो मन आयुयुवे। समंतान्मिश्रयति। शीघ्रवरप्रदानादिति भावः। किंच देवो दीप्यमान इति शेषः। मखो मखं यज्ञमायुयुवे। संपूर्तिपर्यंतं मिश्रयति। यद्वा विश्वस्य मनोमिश्रयणे यजमाने किमायतमिति चेत् उच्यते मखो यज्ञनिर्वाहकोऽयं पूषा देवो यजमानस्य मन आयुयुवे। समंतान्मिश्रयति। सामर्थ्याद्यजमानस्य मन इति लभ्यते॥ यौतेश्छांदसो लिट्॥

॥ अथ द्वितीया ॥

प्र हि त्वा॑ पूषन्नजि॒रं न याम॑नि॒ स्तोमे॑भिः कृ॒ण्व ऋ॒णवो॒ यथा॒ मृध॑
उष्ट्रो॒ न पी॑परो॒ मृधः॑॥ हु॒वे यत्त्वा॑ मयो॒भुवं॑ दे॒वं स॒ख्याय॒ मर्त्यः॑।
अ॒स्माक॑मांगू॒षां द्यु॒म्निन॑स्कृधि॒ वाजे॑षु द्यु॒म्निन॑स्कृधि॥ २॥

प्र। हि। त्वा॒। पू॒ष॒न्। अ॒जि॒रं। न। याम॑नि। स्तोमे॑भिः। कृ॒ण्वे। ऋ॒ण॒वः॑। यथा॑। मृधः॑।
उष्ट्रः॑। न। पी॒प॒रः॒। मृधः॑॥ हु॒वे। यत्। त्वा॒। म॒यः॒ऽभुवं॑। दे॒वं। स॒ख्याय॑। मर्त्यः॑।
अ॒स्माकं॑। आं॒गू॒षान्। द्यु॒म्निनः॑। कृ॒धि॒। वाजे॑षु। द्यु॒म्निनः॑। कृ॒धि॒॥ २॥

हे पूषन् अजिरं यज्ञदेशं प्रति गमनवंतं त्वा त्वां यामनि गमने निमित्तभूते सति स्तोमेभिः स्तोमैः प्रकृण्वे। प्रकृष्टं करोमि। तत्र दृष्टांतः। यामनि शीघ्रगमनेऽजिरं न शीघ्रगामिनमश्वमिव। स यथा प्रस्तूयते तद्वत्। किंच यथा मृधः संग्रामानुद्दिश्य ऋणवः। गच्छेः। तथा प्रकृण्वे। यद्वा यथा ऋणवः। अस्मद्यज्ञं प्रति गच्छेः॥ ऋण गतौ। तानादिकः। लेट्यडागमः॥ तथा त्वां कृण्वे। किंच मृधो हिंसकान्योद्धॄन् संग्रामे पीपरः। पारं नयसि॥ पारयतेर्लुङि चङि रूपं॥ तत्र दृष्टांतः। उष्ट्रो न। उष्ट्रो यथा भारं वोढा पारयति तद्वन्मृधः संग्रामात्पीपरः। पारं नयसि। अतः कारणात् त्वा त्वां मयोभुवं सुखस्य भावयितारं देवं देवनशीलं पूषणं मर्त्यो मरणधर्मा मनुष्योऽहं हुवे। आह्वयामि। किमर्थं। सख्याय। समानख्यानाय प्रियकरणाय। एवमाहूतः सन्नस्माकमांगूषानाघो-

षान् स्तोमान् ॥ आंगूषः स्तोम आघोष इति यास्कः ॥ द्युम्निनस्कृधि । द्योतनवतः कुरु । यद्वा स्तोमान् यशोवतोऽन्नवतो वा कृधि । अस्मत्स्तुत्या प्रीतस्त्वमेवं कुर्वित्यर्थः । किंच वाजेषु संग्रामेषु द्युम्निनोऽन्नवतः कृधि । अस्मद्वैरिणो जित्वा तेषामन्नं कृधि कुर्वित्यर्थः ॥

॥ अथ तृतीया ॥

यस्य ते पूषन्त्सख्ये विपन्यवः क्रत्वा चित्संतोऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे ।
तामनु त्वा नवीयसीं नियुतं राय ईमहे ।
अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव ॥ ३ ॥

यस्य । ते । पूषन् । सख्ये । विपन्यवः । क्रत्वा । चित् । संतः । अवसा । बुभुज्रिरे । इति । क्रत्वा । बुभुज्रिरे ॥ तां । अनु । त्वा । नवीयसीं । निऽयुतं । रायः । ईमहे । अहेळमानः । उरुऽशंस । सरी । भव । वाजेऽवाजे । सरी । भव ॥ ३ ॥

हे पूषन् देव यस्य ते रक्षकत्वेन प्रसिद्धस्य तव सख्ये सखित्वे हितकरणे सति क्रत्वा चित् क्रतुना प्रकृष्टेन कर्मणैव ॥ जसादिषु छंदसि वावचनमिति नाभावाभावः ॥ संतो भवंतं प्रीणयितारः संतो विपन्यवो विशेषेण स्तोत्रशीलाः । यद्वा मेधाविनामैतत् । मेधाविनो यजमाना अवसा त्वत्कृतेन रक्षणेन रक्षिताः संतो बुभुज्रिरे । भुंजते भोगान् । इति एवमेव सर्वदा क्रत्वा कर्मणा बुभुज्रिरे । भुंजते सर्वे पाल्यंत इति वा ॥ भुजेश्छंदसि लिटि बहुलं छंदसीति रुट् ॥ तां तादृशीं नवीयसीं नवतरां स्तुत्यां वा रक्षामनु अनुसृत्य रक्षाया अनंतरं त्वां नियुतं राय एतत्संख्याकान्धनानीमहे । याचामहे । किंच हे उरुशंस बहुधा स्तुत्य त्वमहेळमानोऽक्रुध्यन् अस्मासु सुमनाः सन् सरी भव । अस्माभिर्गंतव्यो भव ॥ सर्तेरौणादिक इनिप्रत्ययः । आद्युदात्तत्वं ॥ किंच त्वं वाजे वाजे सर्वेष्वपि संग्रामेषु सरी भव । गमनशीलो भव । पुरतो गंता भवेत्यर्थः ॥

॥ अथ चतुर्थी ॥

अस्या ऊ षू ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व श्रवस्यतामजाश्व ।
ओ षू त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः ।
नहि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे ॥ ४ ॥

अस्याः। ऊं इति। सु। नः। उप। सातये। भुवः। अहेळमानः। ररिऽवान्। अजऽअश्व। श्रवस्यतां। अजऽअश्व॥ ओ इति। सु। त्वा। ववृतीमहि। स्तोमेभिः। दस्म। साधुऽभिः। नहि। त्वा। पूषन्। अतिऽमन्ये। आघृणे। न। ते। सख्यं। अपऽह्नुवे ॥ ४॥

हे अजाश्व पूषन्। अजाश्वेति पूषणमाहेति यास्कः। नि॰ ४. २५.। नोऽस्माकमस्या अस्यै ॥ चतुर्थ्यर्थे षष्ठी ॥ सातये लाभायाहेळमानोऽक्रुध्यन् अनादरमकुर्वन् ररिवान् दाता च सन् सु सुष्ठु उप भुवः। समीपस्थो भव ॥ रातेश्छांदसस्य लिटः क्वसुः। पदसंज्ञाया अभावेऽपि पपिवांसं तस्थिवांसमित्यादौ छांदसोऽवग्रहो दृश्यते। ऊ इति पादपूरणः॥ किंच श्रवस्यतामन्नमिच्छतामस्माकं हे अजाश्व अजा एवाश्वस्थानीया यस्य तादृश त्वं। पूषनामेदं। ररिवांश्च सन् उपभुवः ॥ ओ इति निपातद्वयसमुदायात्मक एको निपातः॥ हे दस्म शत्रूणामुपक्षपयितः पूषन् त्वा त्वां ओ षु ववृतीमहि। सर्वत एव सुतरां वर्तयेमहि ॥ वृतेरंतर्भावितण्यर्थाल्लिङि बहुलं छंदसीति शपः श्लुः ॥ यद्वांतरगमनान्निवर्तयाम इत्यर्थः। केन साधनेनेति तदुच्यते। साधुभिः स्तोमेभिः। त्वां प्रीणयितुं समर्थैः स्तोत्रैः। किंच हे पूषन् आघृणे सर्वतो वृष्टेः क्षारयितः। यद्वा आघृणे हविषामाहर्तः स्वीकर्तस्त्वां नह्यतिमन्ये। अवमतिं नैव करोमि। न केवलमनतिक्रममात्रं किंतु ते सख्यं तव सखित्वं हितकर्तृत्वं नह्यपह्नुवे। नैवापनयामि। न त्यजामि सर्वतः प्रख्यापयामीत्यर्थः ॥

॥ इति द्वितीयस्य द्वितीये द्वितीयो वर्गः ॥

अस्तु श्रौषडित्येकादशर्चं षष्ठं सूक्तं। अत्रानुक्रमणिका। अस्तु श्रौषळेकादश वैश्वदेवी मैत्रावरुण्याश्विन्यस्तिस्र ऐंद्र्याग्नेयी मारुत्यैंद्राग्नी बार्हस्पत्या वैश्वदेव्यंत्या त्रिष्टुप् पंचमी बृहती वैश्वदेवमेतदेवमन्यासामपि सूक्तप्रयोगे वैश्वदेवत्वं सूक्तभेदप्रयोगे यल्लिंगं सा देवतेति॥ परुच्छेप ऋषिः। अंत्या त्रिष्टुप् पंचमी बृहती। अन्या अत्यष्टयो विशेषाभावात्। कृत्स्नं सूक्तं वैश्वदेवं। तत्राद्याया विश्वे देवा देवता। द्वितीयाया मित्रावरुणौ। अथ तिस्रोऽश्विदेवताकाः। ऐंद्री षष्ठी। सप्तम्याग्नेयी। अष्टमी मारुती। नवम्यैंद्राग्नी। दशमी बार्हस्पत्या। एकादशी वैश्वदेवी ॥ सूक्तविनियोगो लैंगिकः। दशरात्रस्य षष्ठेऽहनि प्रउगशस्त्र आद्या वैश्वदेवतृचे प्रथमा। षष्ठस्येति खंडे सूत्रितं। अस्तु श्रौषळ्ळो षू णो अग्ने। आ॰ ८. १.। इति ॥

॥ सैषा सूक्ते प्रथमा ॥

अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु तच्छर्धो दिव्यं वृणीमह इंद्रवायू वृणीमहे।
यद्ध क्राणा विवस्वति नाभा संदायि नव्यसी।
अध प्र सू न उप यंतु धीतयो देवाँ अच्छा न धीतयः ॥ १ ॥

अस्तु। श्रौषट्। पुरः। अग्निं। धिया। दधे। आ। नु। तत्। शर्धः। दिव्यं। वृणीमहे। इंद्रवायू इति। वृणीमहे ॥ यत्। ह। क्राणा। विवस्वति। नाभा। संऽदायि। नव्यसी। अध। प्र। सु। नः। उप। यंतु। धीतयः। देवान्। अच्छ। न। धीतयः ॥ १ ॥

अहं पुरः पुरत उत्तरवेद्यामग्निमाहवनीयाख्यं धिया प्रज्ञया प्रणयनादिकर्मणा दधे। धारितवानस्मि। तच्छर्धस्तादृशं बलवंतं वाग्निं यद्वा तच्छर्धस्तादृशं मरुतां स्वरूपं बलं दिव्यं दिवि भवं नु क्षिप्रमावृणीमहे। आभिमुख्येन संभजामहे। किंच इंद्रवायू वृणीमहे। यद्यस्मात्कारणाद्विवस्वति दीप्तमति नाभा नाभौ भूम्या नाभिस्थाने देवयजने वेदिरूपे। यद्वा नाभौ सर्वफलस्य संबंधके यज्ञे। यज्ञमाहुर्भुवनस्य नाभिमिति श्रुतेः। क्राणा कुर्वाणा स्वार्थप्रकाशनं नव्यसी नवतरा स्तुतिरूपा वाक् संदायि। संबध्यते ॥ छांदसः कर्मणि लुङ् ॥ अस्माभिः प्रयुज्यत इत्यर्थः। यस्मात्स्तुतिः क्रियते तस्मादस्तु श्रौषट्। अस्याः स्तुतेः श्रवणं भवतु। श्रोता भवतु वा मरुतां गणोऽग्निर्वा। इंद्रावायुपक्षे प्रत्येकापेक्षयैकवचनं। अध अनंतरेण धीतयोऽस्मदीयानि कर्माणि स्तुत्यादिरूपाणि प्र सूपयंतु। प्रकर्षेण सुष्ठु युष्मानुपगच्छंतु। किंच देवां अच्छा न। अग्न्यादिदेवानाभिमुख्येन प्राप्तुमिव धीतयोऽस्मदीयानि कर्माण्युपयंतु। तेषां समीपं प्राप्नुवंतु ॥

॥ अथ द्वितीया ॥

यद्ध त्यन्मित्रावरुणावृतादध्याददाथे अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना।
युवोरित्थाधि सद्मस्वपश्याम हिरण्ययं।
धीभिश्चन मनसा स्वेभिरक्षभिः सोमस्य स्वेभिरक्षभिः ॥ २ ॥

यत्। ह। त्यत्। मित्रावरुणौ। ऋतात्। अधि। आददाथे इत्याऽददाथे। अनृतं। स्वेन। मन्युना। दक्षस्य। स्वेन। मन्युना ॥ युवोः। इत्था। अधि। सद्मऽसु। अपश्याम। हिरण्ययं। धीभिः। चन। मनसा। स्वेभिः। अक्षऽभिः। सोमस्य। स्वेभिः। अक्षऽभिः ॥ २ ॥

हे मित्रावरुणौ ऋतादादित्यात्स्यत् तदुदकं यद्यस्मात्कारणादधि अधिकमा-ददाथे। सर्वतो ददथः। कीदृशमुदकं। अनृतं नश्वरं शोषणस्वभावं। केन सा-धनेन। स्वेन मन्युना स्वकीयेन तेजसा। अहोरात्राभिमानिदेवौ मित्रावरुणौ खलु वृष्टिं मोचयतः। अहोरात्रे वा इत्यादिश्रुतिः पूर्वमेवोदाहृता। मन्युर्विशे-ष्यते। दक्षस्य समर्थस्य स्वेन मन्युना। आत्मभूतेन मननीयेन सामर्थ्येन। किंच हे मित्रावरुणौ युवोः ॥ अंत्यलोपश्छांदसः ॥ युवयोः संबंधिनं हिरण्ययं हि-रणमयं रूपं ॥ ऋत्व्यवास्त्व्यवास्त्वेत्यादौ मयटो मशब्दलोपो निपात्यते ॥ इत्था इत्थं वक्ष्यमाणप्रकारेण सद्मसु यज्ञसदनेष्ववध्यपश्याम। पश्येम। केन साधनेनेति तदुच्यते। धीभिः। त्वदुद्देश्यैः कर्मभिर्यज्ञादिरूपैः। मनसा चन। त्वदासक्तेन चेतसा च। स्वेभिरक्षभिः। आत्मीयैरनन्यैश्चक्षुरादींद्रियैः। किंच सोमस्य सोमं स्वेभिरक्षभिरस्मदीयैरिंद्रियैः ॥ नासाद्यपेक्षया बहुवचनं ॥

पृष्ठ्यस्य षष्ठेऽहनि प्रउगशस्त्रे युवां स्तोमेभिरित्याश्विनस्तृचः। षष्ठस्येति खंडे सूचितं। युवां स्तोमेभिर्देवयंतो अश्विनावर्मेह इंद्र। आ॰ ८. १.। इति ॥

॥ सैषा तृतीया ॥

यु॒वां स्तोमे॑भिर्देव॒यंतो॑ अश्विनाश्रा॒वयं॑त इव॒ श्लोक॑मा॒यवो॑ यु॒वां ह॒व्याभ्या॒३॒॑यवः॑ ।
यु॒वोर्विश्वा॒ अधि॒ श्रियः॒ पृक्ष॑श्च विश्ववेदसा ।
प्रु॒षा॒यंते॑ वां प॒वयो॑ हिर॒ण्यये॒ रथे॑ दस्रा हिर॒ण्यये॑ ॥ ३ ॥

यु॒वां। स्तोमे॑भिः। दे॒व॒ऽयंतः॑। अ॒श्वि॒ना॒। आ॒श्र॒वयं॑तःऽइव। श्लोकं॑। आ॒यवः॑।
यु॒वां। ह॒व्या। अ॒भि। आ॒यवः॑ ॥ यु॒वोः। विश्वाः॑। अधि॑। श्रियः॑। पृक्षः॑। च॒। वि॒श्व॒ऽवे॒द॒सा॒।
प्रु॒षा॒यंते॑। वा॒ं। प॒वयः॑। हि॒र॒ण्यये॑। रथे॑। द॒स्रा॒। हि॒र॒ण्यये॑ ॥ ३ ॥

हे अश्विना अश्विनौ देवौ युवां स्तोमेभिः स्तोत्रैर्देवयंतो युवामात्मन इच्छंत आयवः ॥ मनुष्यनामैतत् ॥ यजमानाः श्लोकं युष्मदीयस्तुतिरूपां वाचमाश्रा-वयंत इव सर्वतः श्रवणविषयां कर्वंत इव स्तुवंति ॥ श्लोक इति वाङ्नाम श्लोको धारा इति तन्नामसूक्तत्वात् ॥ कीदृशास्ते। युवां हव्या हविषाज्यादिनाभ्यायव आभिमुख्येन गंतारः। प्रीणयितुमिति शेषः। हवींष्याभिमुख्येन प्रापयंतो वा। किंच हे विश्ववेदसा सर्वधनौ युवोर्युवयोः संबंधिन्यो विश्वाः श्रियः सेवनीयाः सर्वा लक्ष्मीर्धनकनकादिरूपा अधि अधिकं भजंत इति शेषः। किंच पृक्षश्चान्न-

मपि युष्मत्प्रसादादधि अधिकं लभंते। किंच हे दस्रा शत्रूणामुपक्षपयितारौ वां हिरण्यये रथे हिरण्मये मधुपूर्णे रथे पवयस्तन्नेमयः प्रुषायंते। क्षरंति स्रवंति ॥ प्रुष प्लुष स्नेहनसेचनपूरणेषु। छंदसि शायजपीत्यहावपि श्नः शायजादेशः ॥ मधुपूर्णपात्रोपेतत्वात् शीघ्रगमनेन चक्रेषु मधूनि स्रवंतीति भावः। पवी रथनेमिर्भवति यद्विपुनाति भूमिमिति निरुक्तं। अश्विनो रथस्य मधुपूर्णत्वं त्रयः पवयो मधुवाहने रथ इत्यादिषु प्रसिद्धं। किंच तादृशे हिरण्यये हृदयरमणे रथे मधुरं हविर्वहतमिति शेषः ॥

॥ अथ चतुर्थी ॥

अचेति दस्रा व्यु१नाकमृण्वथो युंजते वां रथयुजो दिविष्टिष्वध्वस्मानो दिविष्टिषु।
अधि वां स्थाम वंधुरे रथे दस्रा हिरण्यये।
पथेव यंतावनुशासता रजोऽंजसा शासता रजः ॥ ४ ॥

अचेति। दस्रा। वि। ऊं इति। नाकं। ऋण्वथः। युंजते। वां। रथऽयुजः। दिविष्टिषु। अध्वस्मानः। दिविष्टिषु ॥ अधि। वां। स्थाम। वंधुरे। रथे। दस्रा। हिरण्यये। पथाऽइव। यंतौ। अनुऽशासता। रजः। अंजसा। शासता। रजः ॥ ४ ॥

हे दस्रा दस्रावश्विनौ अचेति। वक्ष्यमाणं युष्मच्चेष्टितं ज्ञायते सर्वैः। किं तदिति तदुच्यते। नाकं स्वर्गं व्यृण्वथः। विशेषेण गच्छथः ॥ ऋणु गतौ तानादिकः। लेट्यडागमः ॥ यज्ञसंपूर्त्यनंतरमिति यावत्। उशब्दोऽवधारणे। यद्वा नाकं। अकं दुःखं तद्रहितं यज्ञमृण्वथः। विशेषेण गच्छथ एव। तदर्थं वां रथयुजो युष्मत्संबंधिनो रथस्य योजयितारः सारथयो दिविष्टिषु स्वर्गस्यैषणेषु द्योतनात्मकस्य यज्ञस्यैषणेषु गमनेषु वा निमित्तभूतेषु युंजते। अश्वान्योजयंति रथे। युक्ते रथे वा युष्मान्। त एव विशेष्यंते। दिविष्टिषु दिवो गमनेषु निरालंबाकाशगमनेष्वध्वस्मानो रथस्य तदाश्रितस्य च ध्वंसमकुर्वाणाः। किंच हे दस्रा अश्विनौ वां युवयोर्वंधुरे बंधुरत्रययुक्ते। युगबंधनाधारः काष्ठविशेषो बंधुरं। तादृशत्रययुक्तत्वं रथो यो वां त्रिवंधुर इत्यादिषु प्रसिद्धं। हिरण्यये हिरण्मये रथेऽधि तादृशस्य रथस्योपरि स्थाम। अस्थापयाम ॥ छांदसे लङि बहुलं छंदसीत्यडभावः। आद्युदात्तश्छांदसः ॥ कीदृशौ। पथेव सुपथेन मार्गेण निरालंब आकाशे रजो रंजनात्मकं स्वर्गं प्रति यंतौ गच्छंतौ। लोका रजांस्युच्यंत इत्युक्त-

त्वात्। अनुशासता। अननुकूलान् शत्रूननुशासतौ विधेयीकुर्वंतौ॥ शासेः शतरि जक्षित्यादय इत्यभ्यस्तत्वादभ्यस्तानामादिरित्याद्युदात्तत्वं॥ किंच अंजसा मुख्यत्वेन प्रकृष्टं रज उदकं वृष्टिलक्षणं शासता शासतौ बलाद्विधेयीकुर्वंतौ॥

॥ अथ पंचमी ॥

शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतं।

मा वां रातिरुप दसत्कदा चनास्मद्रातिः कदा चन॥५॥

शचीभिः। नः। शचीवसू इति शचीऽवसू। दिवा। नक्तं। दशस्यतं।

मा। वां। रातिः। उप। दसत्। कदा। चन। अस्मत्। रातिः। कदा। चन॥५॥

हे शचीवसू। शचीति कर्मनाम। अस्मदनुष्ठितज्योतिष्टोमादिकर्मधनौ युवां शचीभिरस्मदीयैः कर्मभिर्यागादिभिर्निमित्तभूतैर्दिवा नक्तमहनि रात्रौ च दशस्यतं। अभिमतं ददेथां॥ दाशृ दान इत्यस्येदं छांदसं रूपं। यद्वा दशस्यतिर्दानार्थः कंड्वादिषु द्रष्टव्यः॥ वां युवयो रातिर्दानं कदाचन सर्वदा यागकालेऽयागकालेऽपि मोपदसत्। मोपक्षीणं भूत्॥ दसु उपक्षये। लुङि पुषादिद्युतादीति च्लेरङ्॥ न केवलं युष्मदीयं अपि त्वस्माकमपि रातिर्दानं हविरादिप्रदानं सर्वविषयं दानं वार्थिभ्यः कदाचन सर्वावस्थायामपि मोपदसत्। उपक्षीणं मा भूत्। सर्वदा वर्ततां। अहमपि सर्वदा युष्मानुद्दिश्य दद्यां युवामपि मदभिमतं सर्वदा दत्तमित्यर्थः॥

॥ इति द्वितीयस्य द्वितीये तृतीयो वर्गः ॥

पृष्ठ्यस्य षष्ठेऽहनि प्रउगशस्त्रस्यैंद्रे तृचे तृतीया वृषन्निंद्रेत्येषा। वृषन्निंद्र वृषपाणास इंदवः सुषुमा यातमद्रिभिः। आ॰ ८.१.। इति॥ तत्रैव सवने प्रस्थितयाज्यानां पुरस्तादन्या ऋचः प्रक्षिप्योभयीभिर्यष्टव्यं। तत्र होतुः प्रस्थितयाज्यायाः पुरस्तादेषा प्रक्षेपणीया। सूचितं च। षष्ठस्य प्रातःसवने प्रस्थितयाज्यानां पुरस्तादन्याः कृत्वोभाभ्यामनवानंतो यजंति। आ॰ ८.१.। इति॥

॥ सैषा सूक्ते षष्ठी ॥

वृषन्निंद्र वृषपाणास इंदव इमे सुता अद्रिषुतास उद्भिदस्तुभ्यं सुतास उद्भिदः।

ते त्वा मंदंतु दावने महे चित्राय राधसे।

गीर्भिर्गिर्वाह स्तवमान आ गहि सुमृळीको न आ गहि॥६॥

वृषन्। इंद्र। वृषऽपानासः। इंदवः। इमे। सुताः। अद्रिऽसुतासः। उत्ऽभिदः। तुभ्यं। सुतासः। उत्ऽभिदः ॥ ते। त्वा। मंदंतु। दावने। महे। चित्राय। राधसे। गीःऽभिः। गिर्वाहः। स्तवमानः। आ। गहि। सुऽमृळीकः। नः। आ। गहि ॥ ६॥

हे इंद्र वृषन् वर्षितः कामानां इमे पुरतो दृश्यमाना इंदवः सोमाः सुताः। त्वदर्थमभिषुताः। कीदृशास्ते। वृषपाणासः। अभिमतवर्षकेण त्वया पातव्याः। अद्रिषुतासः। अद्रिभिर्दृढैः पाषाणैरभिषवसाधनैः सुताः। उद्भिदः। उद्भेदका वर्षस्य। त एव पुनर्विशेष्यंते। उद्भिदो बलस्योद्भेदका उद्भिन्ना वा पर्वतादौ तादृशाः सोमास्तुभ्यं सुतासस्त्वदर्थमेवाभिषुताः। किंच ते तादृशाः सोमास्त्वा त्वां मंदंतु। तर्पयंतु। कुत्रेति तदुच्यते। दावने। दानवति यागे। अभिमतदानाय वा। तथा महे महते चित्राय चीयमानाय विचित्राय नानाविधाय वा राधसे धनाय। किंच हे गिर्वाहः। गिरां स्तुतीनामस्मदीयानां वोढः ॥ वहिहाधाञ्भ्य इत्यसुन् ॥ गीर्भिरस्मत्स्तुतिभिः स्तवमानः सन् आगहि। आगच्छ। नोऽस्मान् सुमृळीकः सुष्ठु मृडयिता सन् आगहि। आगच्छ ॥

दशरात्रस्य षष्ठेऽहनि प्रातःसवने नेष्टुः प्रस्थितयाज्यायाः पुरस्तादो षू णो अग्न इत्येषावपनीयैकीकृत्योभाभ्यां यागः। षष्ठस्येति खंडे सूचितं। ओ षू णो अग्ने शृणुहि त्वमीळितोऽग्निं होतारं। आ॰ ८.१.। इति ॥ तस्मिन्नेव सवने प्रउगशस्त्रे द्वितीया। सूचितं च अस्तु श्रौषळो षू णो अग्ने। आ॰ ८.१.। इति ॥

॥ सैषा सप्तमी ॥

ओ षू णो अग्ने शृणुहि त्वमीळितो देवेभ्यो ब्रवसि यज्ञियेभ्यो राजभ्यो यज्ञियेभ्यः।
यद्ध त्यामंगिरोभ्यो धेनुं देवा अदत्तन।
वि तां दुह्रे अर्यमा कर्तरी सचाँ एष तां वेद मे सचा ॥ ७॥

ओ इति। सु। नः। अग्ने। शृणुहि। त्वं। ईळितः। देवेभ्यः। ब्रवसि। यज्ञियेभ्यः। राजऽभ्यः। यज्ञियेभ्यः ॥ यत्। ह। त्यां। अंगिरःऽभ्यः। धेनुं। देवाः। अदत्तन। वि। तां। दुह्रे। अर्यमा। कर्तरि। सचा। एषः। तां। वेद। मे। सचा ॥ ७॥

हे अग्ने त्वं नोऽस्मदीयमावाहनं स्तुतिं वेळितोऽस्माभिः स्तुतः सन् ओ षु शृणुहि ॥ ओ इति निपातद्वयसमुदायात्मक एको निपातः ॥ आभिमुख्येनैव

सुष्ठु शृणु ॥ उतश्च प्रत्ययादिति छंदसि वावचनमिति हेर्लुगभावः ॥ श्रुत्वा च देवेभ्यो देवनशीलेभ्यो यज्ञियेभ्यो यज्ञार्हेभ्यो हविर्भाग्भ्यः स्तुतिभाग्भ्यश्चेत्यर्थः ॥ यज्ञर्त्विग्भ्यामिति घः ॥ तेभ्यो यज्ञियेभ्यो यज्ञार्हेभ्यो यजमानेभ्यः संबंधि कर्म ब्रवसि। ब्रूहि ॥ ब्रवीतेर्लेट्यडागमः ॥ कीदृशेभ्यः। राजभ्यः। राजमानेभ्यः। इदानीं देवाः प्रत्यक्षेणोच्यंते। अत्रेतिहासमाहुः। अंगिरसो नाम महर्षयः पूर्वं यज्ञार्थं देवान् स्तुत्या प्रीणयित्वा गा अयाचंत। ते प्रीताः कामदुघां प्रादुः। लब्धां च तां धेनुं क्षीरं दोग्धुमशक्नुवाना अर्यमणं देवं प्रार्थयन्। स च प्रार्थितोऽग्निहोत्राद्यर्थं क्षीरं दुदोहेति तदिदमत्रोच्यते। यत् यां त्यां तां प्रसिद्धां धेनुं क्षीरादिना प्रीणयित्रीं गां ह देवा अंगिरोभ्यस्तदर्थमदत्तन। दत्तवंतः ॥ तप्तनप्तनथनाश्चेति तनादेशः ॥ तां धेनुमर्यमा सर्वस्य नियमिता देवः कर्तरि सर्वस्योत्पादके त्वय्यग्नौ सचा इतरदेवेभ्यः साकं विदुह्रे। विविधं दुग्धवान् ॥ दुहेर्लिटि बहुलं छंदसीति रुट्। छंदसि वेति वचनाद्विर्वचनाभावः। लट्येव वा लोपस्त इति तलोपः ॥ एषः एष एवार्यमा तां धेनुं मे सचा मत्समवायेन वेद। जानाति। अर्यमाहमपि जानामीत्यर्थः। ईदृशी धेनुस्त्वदर्थमेव दुह्यत इत्यग्नेः स्तुतिः ॥

मो षु वो अस्मदिति प्रस्थितयाज्या। सूचितं च। मो षु वो अस्मदभि तानि पौंस्यौ षू णो अग्ने। आ॰ ८. १.। इति ॥

॥ सैषाष्टमी ॥

मो षु वो अस्मदभि तानि पौंस्या सना भूवन्द्युम्नानि मोत जारिषुरस्मत्पुरोत जारिषुः।
यद्वश्चित्रं युगेयुगे नव्यं घोषादमर्त्यं।
अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च दुष्टरं ॥ ८ ॥

मो इति। सु। वः। अस्मत्। अभि। तानि। पौंस्या। सना। भूवन्। द्युम्नानि। मा। उत। जारिषुः। अस्मत्। पुरा। उत। जारिषुः ॥ यत्। वः। चित्रं। युगेऽयुगे। नव्यं। घोषात्। अमर्त्यं। अस्मासु। तत्। मरुतः। यत्। च। दुस्तरं। दिधृत। यत्। च। दुस्तरं ॥ ८ ॥

हे मरुतः। वो युष्मत्संबंधीनि तानि प्रसिद्धानि पौंस्या पौंस्यानि बलानि सना सदातनानि नित्यानि द्युम्नानि प्रकाशयुक्तानि यद्वा सना संभजनीयानि द्युम्नानि धनवंति यशोवंति वा ॥ मत्वर्थीयो लुप्यते। मो इति निपातद्वयसमुदाय उशब्दोऽवधारणे ॥ अस्मदस्मान् मो ष्वभिभूवन्। सुष्ठु मैवाभिभवन्।

यद्वा अस्मत्तोऽपगतानि मा भूवन्। उत अपि च। यद्वा द्युम्नानीत्येतदुत्तरत्र संबध्यते। द्युम्नानि धनानि यशांसि वास्मदीयानि मा जारिषुः। क्षीणानि मा भूवन्। उत अपि चास्मत्पुरा पुराणि लक्ष्णया तत्रस्थाः प्राणिनो मा जारिषुः। जीर्णा नष्टा मा भूवन्। किंच वो युष्मत्संबंधि चित्रं चायनीयं नानाविधं नव्यं नूतनं स्तोतव्यं वामर्त्यममरणधर्मकं मर्त्येषु दुर्लभं वा यदस्ति घोषात् घोषाः॥ व्यत्ययेन पंचमी॥ शब्दोपेता गवादयो घोषोपलक्षिता ग्रामनगरादयो वा ये संति तत्सर्वं युगे युगे युगशब्दोपलक्षिते तत्तत्कालेऽस्मासु। अस्मास्वेव भवत्विति शेषः। नान्यस्य। किंच हे मरुतः यच्च दुस्तरं दुःखेन तरणीयं संपादनीयं धनं दिधृत धारयत तदस्मासु। किंच दुस्तरं शत्रुभिरहिंसितं तत्सर्वमपि विशेषेणास्मासु स्थापयत॥

पृष्ठ्यस्य षष्ठेऽहन्यच्छावाकस्य प्रस्थितयाज्यायाः पुरस्तात् दध्यङ् ह म इत्येषा। सूचितं च। दध्यङ् ह मे जनुषं पूर्वो अंगिरा एवमेव माध्यंदिने। आ॰ ८.१.। इति॥

॥ सैषा नवमी ॥

दध्यङ् ह मे जनुषं पूर्वो अंगिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदुस्ते मे पूर्वे मनुर्विदुः।
तेषां देवेष्वायतिरस्माकं तेषु नाभयः।
तेषां पदेन मह्या नमे गिरेंद्राग्नी आ नमे गिरा॥ ९॥

दध्यङ्। ह। मे। जनुषं। पूर्वः। अंगिराः। प्रियऽमेधः। कण्वः। अत्रिः। मनुः। विदुः। ते। मे। पूर्वे। मनुः। विदुः॥ तेषां। देवेषु। आऽयतिः। अस्माकं। तेषु। नाभयः। तेषां। पदेन। महि। आ। नमे। गिरा। इंद्राग्नी इति। आ। नमे। गिरा॥ ९॥

दध्यङ् अथर्वगोत्रोत्पन्न एतन्नामको महर्षिः स च पूर्वः पूरकः सर्वस्य पुरातनो वा। अंगिरा अंगारः। तद्वत्तेजस्वीत्यर्थः। यद्वा अंगारा एवांगिरसोऽभवन् येऽंगारा आसंस्तेऽगिरसोऽभवन्निति श्रुतेः। अंगिरा अंगारा अंकना अंचना इति निरुक्तं। एतन्नामा महर्षिश्च प्रियमेधो मेधाप्रियः। प्रियमेधः प्रिया अस्य मेधाः। नि॰ ३.१७.। इति यास्कः। स च कण्वो मेधावी स चात्रिर्दुःखत्रयरहितः। अत्रिर्न त्रय इति निरुक्तं। ३.१७.। मनुर्मननवान् एतन्नामा महर्षिः। एते सर्वे महात्मानो महर्षयो मे जनुषं दिवोदासपुत्रस्य परुच्छेपस्य जन्म विदुः। जानंति॥ वेत्तेर्विदो लटो वेति झेरुसादेशः॥ किंच ते पूर्वोक्ताः

पूर्वे पूर्वकालीना मेऽस्मत्पित्रादीञ्जानंत इत्यर्थः। मनुर्मनवो ज्ञानवंतो यतस्ते पूर्वे मनवश्च अतो विदुरिति भावः ॥ सुपां सुलुगिति जसो लुक् ॥ तेषां ज्ञान उपपत्तिमाह। तेषां दध्यङादीनां देवेष्वितरेषु देवनशीलेषु महर्षिषु मध्य आयतिर्दीर्घकालसंबंधोऽस्ति। अतो विदुरित्यर्थः। ततश्च किमित्याह। अस्माकं नाभयो जीवेन सह संबंधवंतः प्राणाः फलेन संबद्धा यागा वा तेषु तेष्वेव वर्तंते। असौ विशिष्टजन्मा वो यज्ञयोग्य इति तैर्वक्तव्यत्वेन तदधीनत्वं। तेषां दध्यङादीनां पदेनास्पदेन महत्त्वेन निमित्तेन गिरा स्तुतिरूपया वाचा महि महदत्यधिकं नमे। नमामि। सर्वो जनः। किंच तेषामनुग्रहाद्यज्ञयोग्यः सन् इंद्राग्नी गिरा स्तुतिरूपया वाचा युक्तः सन्नानमे। आभिमुख्येन नमामि स्तौमि। नमामि चेत्यर्थः ॥ नमेर्व्यत्ययेनात्मनेपदं। यद्वा कर्मकर्तरि न दुहस्नुनमामिति यकः प्रतिषेधः। स्वयमेव नतोऽस्मि ॥

॥ अथ दशमी ॥

होता॑ यक्षद्व॒निनो॑ वंत॒ वार्यं॒ बृह॒स्पति॑र्यजति वे॒न उ॒क्षभिः॑ पुरु॒वारे॑भिरु॒क्षभिः॑।
ज॒गृ॒भ्मा दू॒रआ॑दिशं॒ श्लोक॑मद्रे॒रध॒ त्मना॑।
अधा॑रयदर॒रिंदा॑नि सु॒क्रतुः॑ पु॒रू सद्मा॑नि सु॒क्रतुः॑ ॥ १० ॥

होता॑। य॒क्ष॒त्। व॒निनः॑। वं॒त॒। वार्यं॑। बृह॒स्पतिः॑। य॒ज॒ति॒। वे॒नः। उ॒क्षऽभिः॑। पु॒रु॒ऽवारे॑भिः। उ॒क्षऽभिः॑ ॥ ज॒गृ॒भ्म। दू॒रेऽआ॑दिशं। श्लोकं॑। अद्रेः॑। अधं॑। त्मना॑। अधा॑रयत्। अ॒र॒रिंदा॑नि। सु॒ऽक्रतुः॑। पु॒रु। सद्मा॑नि। सु॒ऽक्रतुः॑ ॥ १० ॥

अयं होता दैव्योऽग्निर्मानुषो वा देवानामाह्वाता यक्षत्। याज्यां पठतु ॥ यजेर्लेट्यडागमः। सिब्बहुलमिति सिप् ॥ वनिनो वननवंतः हविः कामयमाना वा देवा वार्यं वरणीयं सोमं वंत। संभजंतां ॥ वनतेश्छांदसे लङि व्यत्ययेनात्मनेपदं। बहुलं छंदसीति शपो लुक्। छांदसोऽंत्यलोपः ॥ तदर्थं बृहस्पतिर्बृहतो मंत्रस्य हविषो वा पालकोऽध्वर्युर्दैव्यो बृहस्पतिर्वा स्वयमेव यजति। यागं करोति। कीदृशः सः। वेनः। कामयमानः। केन साधनेनेति तदुच्यते। उक्षभिः सेचकैः सोमैः पुरुवारेभिर्बहुभिर्वरणीयैः। तथोक्षभिः सेचनसमर्थैरुदकैः। तन्निमित्तभूतैर्हूयमानैराहुतिभिरादित्यद्वारा वृष्ट्युत्पन्नैः। वयं यजमाना दूरआदिशं दूरदेशे आदिगादेशो यस्य तादृशं ॥ हलदंतात्सप्तम्याः। पा॰ ६. ३. ९.। इत्यलुक् ॥

अद्रेः। जातावेकवचनं। अभिषवसाधनस्य ग्राव्णः श्लोकं वाचं ध्वनिं जगृभ्म। गृह्णीमः श्रोत्राभ्यां। पूजार्थं बहुवचनं। इदानीं परोक्षकृतः। सुक्रतुः शोभनकर्मायं यजमानोऽध अथ यागसंपूर्त्यनंतरमररिंदानि॥ उदकनामैतत् अररिंदानि ध्वस्मन्वदिति तन्नामसु पाठात्॥ वृष्टिलक्षणान्युदकानि त्मना आत्मनाधारयत्। धारयति॥ ररिर्दाता। नास्त्यन्यो ररिरस्य पिपासोपशमनस्य तादृशं पिपासोपशमनं ददतीत्यररिंदानि। यद्वा अररिरितश्चेतश्च गमनं। औणादिकोऽरिप्रत्ययः। आतोऽनुपसर्गे कः। पृषोदरादित्वादभिमतस्वरूपस्वरसिद्धिः। तद्ददतीत्यररिंदान्युदकानि चेष्टाप्रदानीत्यर्थः। आपोमयाः प्राणा इति श्रुतेः। यद्वा ररिर्दानं। न विद्यते तादृशं दानमितरभूतेषु तदररि। तद्ददतीत्यररिंदानि। अन्यैरदेयं लोकोपकारि भोगं ददतीत्यर्थः॥ तादृशान्युदकानि यागेनोत्पादितवानित्यर्थः। किंच सुक्रतुः शोभनकर्मायं पुरु पुरूणि बहूनि सद्मानि सदनानि सुखनिवासयोग्यानि गृहाण्यधारयत्। यद्वा बृहस्पतिः सुक्रतुश्चायमध्वर्युररिंदान्युक्तलक्षणान्यभिषवसाधनान्युदकान्यधारयत्। धारितवान्। तथा सुक्रतुः शोभनप्रज्ञः पुरु सद्मानि सदनानि हविरासादनान्यधारयत्॥

दशरात्रे षष्ठेऽहनि प्रउगशस्त्रे वैश्वदेवतृचस्य द्वितीया ये देवास इत्येषा। सूत्रितं च। ये देवासो दिव्येकादश स्थेयमददाद्रभसं। आ० ८.१.। इति॥

॥ सैषैकादशी ॥

ये दे॑वासो दि॒व्येका॑दश॒ स्थ पृ॑थि॒व्यामध्येका॑दश॒ स्थ।
अ॒प्सु॒क्षितो॑ महि॒नैका॑दश॒ स्थ ते दे॑वासो य॒ज्ञमि॒मं जु॑षध्वं॥ ११॥

ये। दे॒वा॒सः॒। दि॒वि। एका॑दश। स्थ। पृ॒थि॒व्यां। अधि॑। एका॑दश। स्थ।
अ॒प्सु॒ऽक्षितः॑। म॒हि॒ना। एका॑दश। स्थ। ते। दे॒वा॒सः॒। य॒ज्ञं। इ॒मं। जु॒ष॒ध्वं॒॥ ११॥

हे देवासो देवा द्योतनशीला ये यूयं दिवि द्युलोक एकादश स्थ। एकं च दश चेत्येतत्संख्याका भवथ। तथा पृथिव्यामधि उपर्येकादश स्थ। एतत्संख्याका भवथ। किंच अप्सुक्षितः। तद्वेतुत्वात्तात्स्थ्यं। अप्स्वंतरिक्षे क्षियंति निवसंतीत्यप्सुक्षितः॥ क्षियतेः क्विप्। तत्पुरुषे कृतीत्यलुक्॥ अंतरिक्षवासिनो देवा एकादश स्थ तत्संख्याका भवथ। यद्वा अंतरिक्षस्येयं संज्ञा। आपः पृथिवीत्यंतरिक्षनामसु पाठात्। यद्यपि तिस्र एव देवता इत्युक्तत्वात् क्षित्याद्यभिमानिन्यो

देवतास्तिस्र एव तथापि महिना महत्त्वेन स्वस्वविभूत्या त्रयस्त्रिंशत्संख्याका भवंति। तत्तत्स्थाना अन्यास्तद्विभूतय इत्युक्तत्वात्। महिना देवास इत्येते सर्वत्र संबध्यंते। ते यूयं हे देवासो मिलित्वोक्तसंख्याका देवा इममस्मदीयं यज्ञं जुषध्वं। संभजध्वं। तत्संबंधि हविर्वा सेवित्वा प्रीणयध्वं॥ एकं च दश च एकादश। प्रागेकादशभ्यः। पा॰ ५. ३. ४९.। इति निपातनाद्दीर्घः। संख्येति पूर्वपदप्रकृतिस्वरत्वं॥

॥ इति द्वितीयस्य द्वितीये चतुर्थो वर्गः ॥

॥ इति प्रथमे मंडले विंशोऽनुवाकः ॥

एकविंशेऽनुवाके सप्त सूक्तानि। तत्र वेदिषद इति प्रथमं सूक्तं त्रयोदशर्चं। उचथ्यपुत्रस्य दीर्घतमस आर्षं। आग्नेयं। अंत्ये त्रिष्टुभौ। शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः। दशमी त्रिष्टुप् जगती वा। अत्यष्टिपरिभाषा निवृत्ता। अत्रानुक्रमणिका। वेदिषदे सप्तोना दीर्घतमा औचथ्य आग्नेयं तु द्वित्रिष्टुबंतं तु त्रिष्टुब्दशमी वेति॥ प्रातरनुवाकस्याग्नेये क्रतौ जागते छंदसीदमादीनि तृतीयवर्जितानि षट् सूक्तानि विनियुक्तानि। तथाश्विनशस्त्रे षण्णां तृतीयवर्जितानां सूक्तानां विनियोगः। सूत्रितं च। वेदिषद इति षण्णां तृतीयमुद्धरेत्। आ॰ ४. १३.। इति॥

॥ तत्रेयं प्रथमा ॥

वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनं॥ १॥
वेदिऽसदे। प्रियऽधामाय। सुऽद्युते। धासिंऽइव। प्र। भर। योनिं। अग्नये।
वस्त्रेणऽइव। वासय। मन्मना। शुचिं। ज्योतिःऽरथं। शुक्रऽवर्णं। तमःऽहनं॥ १॥

हे अध्वर्यो वेदिषदे वेद्यां सीदते नित्यं प्रियधामाय प्रियधाम्ने प्रियस्थानायोत्तरवेदिलक्षणप्रियाय सुद्युते शोभनद्योतनायाग्नयेऽग्रनयनादिगुणविशिष्टाय योनिं स्थानं वेद्याख्यं धासिमिव हवीरूपमन्नमिव प्रभर। प्रहर। प्रकर्षेण संपादयेत्यर्थः। तच्च स्थानं वस्त्रेणेव तेन यथा मार्दवायास्तृणाति तद्वत् मन्मना मननीयेन संभारेण बर्हिषा वा वेदिस्थानं वासय। आच्छादय। कीदृशं तत्स्थानमिति तदुच्यते। शुचिं। उत्पवनप्रोक्षणादिनामेध्यासुरादीनामपगतत्वाच्छुद्धं। ज्योतीरथं। ज्योतिष आज्यादेरग्नेर्वा रथस्थानीयमाधारभूतत्वात्। शुक्रवर्णं।

अग्न्युपेतत्वाद्दीप्तवर्णे। अत एव तमोहनं। तमसोऽंधकारस्य हंतारमज्ञानस्य वा। अग्निसाध्ययज्ञादिद्वारा ज्ञानविचारकत्वादिति भावः। यद्वा तस्यां योनौ स्थाने वस्त्रेण यथा गोपनीयं वस्तु गोपयंति तद्वत्तमग्निं वासय। निवासय स्थापय। मन्मना मननीयेन हृद्येन वस्त्रसदृशेन मृदुकाष्ठादिनाच्छादय वा। कीदृशं। ज्योतीरथं। दीप्तिरथोपेतं। शेषं पूर्ववत्॥

॥ अथ द्वितीया ॥

अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः।
अन्यस्यासा जिह्वया जेन्यो वृषा न्य१न्येन वनिनो मृष्ट वारणः॥२॥

अभि। द्विऽजन्मा। त्रिऽवृत्। अन्नं। ऋज्यते। संवत्सरे। ववृधे। जग्धं। ईमिति। पुनरिति। अन्यस्य। आसा। जिह्वया। जेन्यः। वृषा। नि। अन्येन। वनिनः। मृष्ट। वारणः॥२॥

द्विजन्मा। द्वाभ्यामरणीभ्यां जायमानत्वात् यद्वा मथनेनाधानसंस्कारेण चोत्पन्नत्वात् द्विजन्मत्वं॥ अन्येभ्योऽपि दृश्यंत इति मनिन्॥ अयमग्निस्त्रिवृदन्नमाज्यपुरोडाशसोमरूपेण त्रिप्रकारमन्नमदनीयमभिऋज्यते। प्राप्नोति। अभित आभिमुख्येन नयति भक्षयति॥ ऋज गतिस्थानार्जनोपार्जनेषु। व्यत्ययेन श्यन्॥ यद्वा भृज्यते॥ भ्रस्जो पाके॥ पक्कं करोति वा। किंच। ई इदं॥ ईमित्यत्र सांहितिको मलोपश्छांदसः॥ जग्धं भक्षितं संवत्सरे पूर्णे पुनर्ववृधे। अग्निर्वर्धयति। जीर्णस्य पुनर्वृद्धभावाद्यजमानं हविर्वृद्ध्या प्रतिसंवत्सरं यागसमर्थं करोतीत्यर्थः। यद्वा एकवारं भक्षितं हविः पुनः संवत्सरे पूर्णे संवत्सर उदरस्थं वर्धते वर्धयति वा भक्षितारं। किंचायमग्निर्वृषा वर्षकः सन् अन्यस्य हविष आसा आस्येन जिह्वया जेन्यः प्रभूतो भवतीति शेषः। यद्वा वर्षिता सन् एकेन रूपेणान्यस्य यज्ञे होत्रादेर्जिह्वया तदुपलक्षितया स्रुचा जेन्यो प्रवृद्धो भवति। तथान्येन दावाग्निरूपेण वारणः सर्वेषां वारकः सन् वनिनो वनसंबंधिनो वृक्षान्निमृष्ट। निमार्ष्टि। दहतीत्यर्थः॥ मृजेश्छांदसे लङि व्यत्ययेनात्मनेपदं॥

॥ अथ तृतीया ॥

कृष्णप्रुतौ वेविजे अस्य सक्षिता उभा तरेते अभि मातरा शिशुं।
प्राचाजिह्वं ध्वसयंतं तृषुच्युतमा साच्यं कुपयं वर्धनं पितुः॥३॥

कृष्णऽप्रुतौ। वेविजे इति। अस्य। सऽक्षितौ। उभा। तरेते इति। अभि। मातरा। शिशुं।
प्राचाऽजिह्वं। ध्वसयंतं। तृषुऽच्युतं। आ। साच्यं। कुपयं। वर्धनं। पितुः ॥ ३ ॥

अस्याग्नेर्मातरा मातृस्थानीये उत्पादयित्र्यावुभा उभे अरण्याख्ये मातरौ वेविजे। चलतः ॥ ओविजी भयचलनयोः। अस्माद्यङ्लुगंतात् व्यत्ययेनात्मनेपदमेकवचनं च। लोपस्त आत्मनेपदेष्विति तलोपः। चादिलोपे विभाषेति निघाताभावः ॥ मथनोपक्रमे कृष्णप्रुतावग्निसंपर्कात्कृष्णवर्णतां प्राप्नुवत्यौ प्रापयंत्यौ वा भूमिं। तथा सक्षितौ समानकार्यमग्न्युत्पादनं गच्छंत्यौ। एवंभूते मातरौ शिशुं शिशुवदुत्पत्तिसमयेऽत्यल्पमग्निमभितरेते। आभिमुख्येन प्राप्नुतश्च। कीदृशं शिशुं। प्राचाजिह्वं। प्राग्देशस्थितजिह्वास्थानीयज्वालं। ध्वसयंतं। तमो नाशयंतं। तृषुच्युतं। अरणीभ्यां क्षिप्रं निर्गच्छंतं। अक्लेशेन योनेः सकाशात् शीघ्रमुत्पद्यमानं। आ ईषत् साच्यं समवेतव्यं मृदुकाष्ठचूर्णादिना। कुपयं गोपनीयं पितुः पालकस्य यजमानस्य वर्धनं प्रवर्धनं प्रवर्धयितारं। उक्तप्रकारैर्लौकिकशिशुसाधारणैरुपेतं शिशुमग्निं मातरावुत्पादयत इत्यर्थः ॥

॥ अथ चतुर्थी ॥

मुमुक्ष्वो३ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः।
असमना अजिरासो रघुष्पदो वातजूता उप युज्यंत आशवः ॥ ४ ॥

मुमुक्ष्वः। मनवे। मानवस्यते। रघुऽद्रुवः। कृष्णऽसीतासः। ऊं इति। जुवः।
असमनाः। अजिरासः। रघुऽस्यदः। वातऽजूताः। उप। युज्यंते। आशवः ॥ ४ ॥

मनवे मननवते मानवस्यते मानवानृत्विजः कर्मार्थमिच्छते यजमानाय तदर्थमध्वर्य्वादिभिरग्नेर्ज्वाला उपयुज्यंते यज्ञेषु। सूक्तस्याग्नेयत्वादौचित्याज्ज्वाला इति गम्यते। कीदृश्यस्ताः। मुमुक्ष्वः। मुमुक्षव आहुतिद्वारा यजमानं मोक्तुमिच्छंत्यो ब्रह्मलोकं प्रापयंत्यः ॥ जसादिषु छंदसि वावचनमिति गुणाभावः ॥ ज्वालानामाहुतिद्वारा ब्रह्मलोकप्राप्तिसाधनत्वं काली करालीत्युपक्रम्य श्रूयते। एतेषु यश्चरते भ्राजमानेषु यथाकालं चाहुतयो ह्याददायन् तं नयंत्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवास। मुं० उ० १. २.। इति। रघुद्रुवः। क्षिप्रं गच्छंत्यः। कृष्णसीतासः। कृष्णमार्गाः। उकारः समुच्चयार्थः। जुवः। जवनशीलाः शीघ्रकारिण्यः स्वव्यापारेषु। असमनाः। असमानमनस्काः। काश्चन

प्राङ्मुख्यो गच्छंति काश्चन प्रत्यङ्मुख्य इति विविधमनस्काः ॥ व्यत्ययेनैकवचनं ॥ यद्वा असमना भिन्नवर्णाः। भिन्नवर्णत्वं च तत्रैव श्रूयते। काली कराली च मनोजवा च सुलोहिता या च सधूम्रवर्णा स्फुलिंगिनी विश्वभुवी च देवी लेलायमाना इति सप्त जिह्वा इति। अजिरासः। गमनशीलाः। रघुस्यदः। शीघ्रं स्यंदमानाः। वातजूताः। वातप्रेरिताः ॥ तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥ आशवः। व्यापनशीलाः ॥

॥ अथ पंचमी ॥

आदस्य ते ध्वसयंतो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः।
यत्सीं महीमवनिं प्राभि मर्मृशदभिश्वसन्स्तनयन्नेति नानदत् ॥ ५ ॥

आत्। अस्य। ते। ध्वसयंतः। वृथा। ईरते। कृष्णं। अभ्वं। महि। वर्पः। करिक्रतः।
यत्। सीं। महीं। अवनिं। प्र। अभि। मर्मृशत्। अभिऽश्वसन्। स्तनयन्। एति।
नानदत् ॥ ५ ॥

आदनंतरमस्य स्तूयमानस्याग्नेस्ते प्रसिद्धा विस्फुलिंगा वृथा सहैवेरते। सर्वतो गच्छंति। कीदृशास्ते। ध्वसयंतः। तमांसि ध्वसयंतः। तथा कृष्णवर्णमभ्वं महांतमभिभवद्गमनमार्गं महि महद्वर्पो रूपं प्रकाशं करिक्रतः। अत्यर्थं कुर्वंतः। कस्मिन् काल इति तदुच्यते। यत् यदा महीं महतीमवनिं भूमिं सीं सर्वतो मर्मृशत्। पुनःपुनरामृशत् ॥ मृशेर्यङ्लुगंताच्छतर्यभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ अभिश्वसन् सर्वतश्चेष्टमानः स्तनयन् शब्दं कुर्वन् नानदत् अत्यर्थं शब्दयत् ॥ पूर्ववत्प्रत्ययस्वरौ ॥ अभितः प्रकर्षेणेति गच्छति। यदेतस्ततो जिह्वाभिर्लेलिहानो भुगुभुगुध्वनिं कुर्वन् ज्वलति तदैव विस्फुलिंगा उद्भवंतीत्यर्थः ॥

॥ इति द्वितीयस्य द्वितीये पंचमो वर्गः ॥

॥ अथ षष्ठी ॥

भूषन्न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत्।
ओजायमानस्तन्वश्च शुंभते भीमो न शृंगा दविधाव दुर्गृभिः ॥ ६ ॥

भूषन्। न। यः। अधि। बभ्रूषु। नम्नते। वृषाऽइव। पत्नीः। अभि। एति। रोरुवत्।
ओजायमानः। तन्वः। च। शुंभते। भीमः। न। शृंगा। दविधाव। दुःऽगृभिः ॥ ६ ॥

योऽग्निर्बभ्रूषु बभ्रुवर्णास्वोषधीषु भरणकुशलासु वा जगतामधि अधिकं नम्नते। नमति। काष्ठानि प्रविशति॥ नमतेर्लेट्यडागमः। व्यत्ययेन श्ना। यद्वा लङि छांदसः शपः श्नुः। व्यत्ययेन हलादिशेषाभावः॥ भूषन्न। भूतान्येव स्वतेजसा भूषयन्निव। किंचायं प्रविशन् वृषेव सेक्ता वृषभ इव पत्नीस्तमेव पालयित्रीः समर्धयित्रीरोषधी रोरुवत्॥ रौतेर्यङ्लुगंताच्छतर्यभ्यस्तानामादिरित्याद्युदात्तत्वं॥ अत्यर्थं शब्दयन्नभ्येति। अभितो गच्छति। प्रथममोषधीः प्रविश्य पश्चात्प्रबुद्धः सन् तानेव दहतीत्यर्थः। किंच एवं कृत्वा ओजायमानः। ओज इति बलनाम। स्वयं बलमिवाचरन्॥ कर्तुः क्यङ् सलोपश्चेति क्यङ्सलोपौ॥ धूमादिभिर्विना केवलं तेजोरूप एव सन् तन्वश्च शुंभते। स्वशरीरभूता ज्वाला अपि दीपयति। पोषयतीत्यर्थः। किंच प्रवृद्धज्वालो दुर्गृभिः केनचिदपि ग्रहीतुमशक्यः सन् भीमो न भयंकरो मृग इव स यथा दुर्ग्रहः सन् शृंगं चालयति तद्वदयमपि शृंगाणि शृंगवदुन्नता ज्वाला दविधाव। अत्यर्थं चालयति॥ धुनोतेर्यङ्लुगंताल्लिटि रूपं। अस्य च दाधर्त्यादावितिशब्देन संग्रहो द्रष्टव्यः॥

॥ अथ सप्तमी ॥

स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये।
पुनर्वर्धंते अपि यंति देव्यमन्यद्वर्पः पित्रोः कृण्वते सचा ॥७॥
सः। संऽस्तिरः। विऽस्तिरः। सं। गृभायति। जानन्। एव। जानतीः। नित्यः। आ। शये।
पुनः। वर्धंते। अपि। यंति। देव्यं। अन्यत्। वर्पः। पित्रोः। कृण्वते। सचा ॥७॥

सोऽग्निः संस्तिर आच्छन्नः॥ संपूर्वात्स्तृणातेर्मूलविभुजादित्वात्कप्रत्ययः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं॥ तथा विस्तरः कदाचिद्विस्तीर्णः सन् संगृभायति। संगृह्णात्योषधीः। किंच अयं जानन्नेव यजमानार्थं प्रवृद्धेन भवितव्यं अतो ज्वालाभिः संयोज्य इत्यधिगच्छन्नेव जानतीर्यजमानार्थं प्रवृद्धाभिर्भवितव्यमित्यवगच्छंतीर्ज्वाला नित्योऽविच्छिन्नः सन् आशये। आशेते। आश्रयतीत्यर्थः॥ लोपस्त आत्मनपदेष्विति तलोपः॥ एवंभूतज्वालाः पुनः पूर्वं प्रवृद्धा एव पुनरपि यागयोग्या यथा भवंति तथा वर्धंते। देव्यं यागादिव्यवहारयोग्यं स्तुत्यं वाग्निमपि यंति। प्राप्नुवंति। यद्यप्यग्निज्वालयोरेकत्वं तथापि राहोः शिर इतिवदौपचारिको गंतृगंतव्यभावः। किंच एवं प्रवृद्धा ज्वाला ओषधयो वा

सचा अग्निना सह पित्रोर्जगत्पालयित्रोस्ताभ्यां संभूय द्यावापृथिव्योरन्यत्पूर्वमविद्यमानं तेजोमयं वर्पो रूपं कृणुते । कुर्वंति । लोकद्वयं स्पृशंतीत्यर्थः ॥

॥ अथाष्टमी ॥

तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मम्रुषीः प्रायवे पुनः ।
तासां जरां प्रमुंचन्नेति नानदद्सुं परं जनयन् जीवमस्तृतं ॥ ८ ॥

तं । अग्रुवः । केशिनीः । सं । हि । रेभिरे । ऊर्ध्वाः । तस्थुः । मम्रुषीः । प्र । आयवे । पुनरिति ।
तासां । जरां । प्रऽमुंचन् । एति । नानदत् । असुं । परं । जनयन् । जीवं । अस्तृतं ॥ ८ ॥

तमग्निमग्रुवोऽग्रतः स्थिताः । यद्वा अंगुलिनामैतत् । अंगुलय इवाकुटिलाः केशिनीः केशस्थानीयोर्ध्वभाविकार्ष्ण्योपेता ज्वालाः सं रेभिरे हि । परिरंभं कुर्वंति खलु । आलिंगंति । किंचैवं कुर्वंत्यो मम्रुषीर्मृता अंगारभावमापन्ना अपि ॥ म्रियतेः क्वसुप्रत्ययांतात् ङीपि रूपं ॥ आयव आगच्छतेऽग्नये भर्त्रे पुनः स्वोपद्रवमजानत्य ऊर्ध्वाः प्रतस्थुः । ऊर्ध्वमुखा उन्नताः प्रतस्थिरे । मृतप्राया अपि प्रत्युत्थानं कृतवत्य इत्यर्थः । एवं कृतवतीषु सतीषु स भर्ताग्निस्तासां ज्वालानां जरां वयोहानिं प्रमुंचन् प्रकर्षेण मोचयन् नानदत् जरापरिहाराय मंत्रयन्निवात्यर्थं शब्दयन् । न केवलं जराहानिरेव अपि तु परं निरतिशयमसुं प्राणमस्तृतं काष्ठोदकादिप्रक्षेपेणाप्यहिंसितं जीवं प्राणधारणसामर्थ्यं जनयन्नुत्पादयन्नेति । गच्छति । तासां ज्वालानां संनिधिं प्राप्नोति । यथा लोके काश्चन रमण्यो रमणेन सह निर्भरं क्रीडित्वा पश्चात्प्रोषिते तस्मिन्विरहेण जीर्णा म्रियमाणाः पश्चात्तस्मिन्नागते सति स्वदौर्बल्यमगणयित्वा संतोषेण परिष्वंगाय चेष्टंते स भर्ता मंत्रोच्चारणेन जरामपनीयोचितप्रदानेन प्राणयन् रक्षतीत्ययं भावोऽत्रानुसंधेयः ॥

॥ अथ नवमी ॥

अधीवासं परि मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ज्रयः ।
वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते वर्तनीरह ॥ ९ ॥

अधीवासं । परि । मातुः । रिहन् । अह । तुविऽग्रेभिः । सत्वऽभिः । याति । वि । ज्रयः ।
वयः । दधत् । पत्ऽवते । रेरिहत् । सदा । अनु । श्येनी । सचते । वर्तनिः । अह ॥ ९ ॥

दावाग्निः स्तूयते। अयमग्निर्मातुर्भूतानां निर्मातुर्भूमेरधीवासमुपर्याच्छादनस्थानीयं तृणगुल्मौषध्यादिकं परि परितो रिहन् लिहन्। अहेति प्रसिद्धौ। यद्वा मातुर्भूमेरधीवासमुपरि धार्यमाणं वस्त्रं परि परितो रिहन् संपादयन् तुविग्रेभिः प्रभूतं शब्दयद्भिः प्रभूतगमनैर्वा सत्वभिः प्राणिभिः सहितो जयो जयसा जवेन वियाति। विविधं गच्छति। किंच पद्वते पादवते द्विपदे चतुष्पदे च वयोऽन्नं तत्तदुचितं दधत् ददत्। विवने दावानले भीत्या पलायमानान्प्राणिनो व्याघ्रादयो भक्षयंतीति प्रसिद्धं। किं कुर्वन्। सदा सर्वदा तृणादिकं रेरिहत् दहन्। किंच श्येनी श्यामवर्णो वर्तनिर्मार्गो वियांतमनु अनुक्रमेण सचते। सेवते। यत्र यत्राग्निर्गच्छति तत्र तत्र मार्गोऽपि कृष्णो भवति। अहेति प्रसिद्धौ ॥

॥ अथ दशमी ॥

अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृषभो दमूनाः।
अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः ॥ १० ॥

अस्माकं। अग्ने। मघवत्ऽसु। दीदिहि। अध। श्वसीवान्। वृषभः। दमूनाः।
अवऽअस्य। शिशुऽमतीः। अदीदेः। वर्मऽइव। युत्ऽसु। परिऽजर्भुराणः ॥ १० ॥

हे अग्ने अस्माकं मघवत्स्वस्मत्संबंधिष्वन्नवत्सु यागेषु गृहेषु वा दीदिहि। दीप्यस्व। अध अथानंतरं श्वसीवान् श्वसनवान् ज्वालाभिश्चेष्टावान् अस्मत्प्राणनवान्वा वृषभो वर्षिताभिमतानां दमूना दानमना दममना दांतमना वा सर्वत्र भवेति शेषः। स उक्तलक्षणस्त्वं शिशुमतीरवास्य। शिशुशब्देन तदवस्था लक्ष्यते। शैशववतीर्ज्वाला अपक्षेप्य विहायादीदेः। भृशं दीप्यस्व। कीदृशस्त्वं। युत्सु संग्रामेषु वर्मेव कवचमिव परिजर्भुराणोऽस्मद्द्वेष्टॄन् पुनःपुनः परिहरन्। यद्वा युत्सु संग्रामेषु वर्मेव परिजर्भुराणो भव ॥ हरतेर्यङ्लुगंताद्व्यत्ययेन शानच्। अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ उक्तगुणको भवान्मघवत्सु यज्ञेषु दीप्यस्व ॥

॥ इति द्वितीयस्य द्वितीये षष्ठो वर्गः ॥

॥ अथैकादशी ॥

इदमग्ने सुधितं दुर्धितादधि प्रियादु चिन्मन्मनः प्रेयो अस्तु ते।
यत्ते शुक्रं तन्वो३ रोचते शुचि तेनास्मभ्यं वनसे रत्नमा त्वं ॥ ११ ॥

इदं। अग्ने। सुऽधितं। दुःऽधितात्। अधि। प्रियात्। ऊं इति। चित्। मन्मनः। प्रेयः। अस्तु। ते।
यत्। ते। शुक्रं। तन्वः। रोचते। शुचि। तेन। अस्मभ्यं। वनसे। रत्नं। आ। त्वं ॥११॥

हे अग्ने इदमस्मदीयं सोमादिरूपं हविः। कीदृशं तत्। दुर्धितादुष्टं स्थापितात्कठिनात्काष्ठादेरधि उपरि सुधितं सुहितं सुष्ठु दत्तं। मन्मनो मननीयात्प्रियादुचित् तव हृद्यादपि ॥ उशब्दोऽवधारणे चिच्छब्दोऽपिशब्दार्थः ॥ ते तव प्रेयोऽतिप्रियतममस्तु। तत्किमित्याह। हे अग्ने ते तव तन्वः शरीरस्य घृतेनोज्ज्वलिताया ज्वालायाः शुचिर्निर्मलं शुक्रं दीप्तं यत्तेजो रोचते तेन सह रत्नं रमणीयं मणिमुक्तादिकं वितरन्नस्मभ्यं वनसे। अस्मान्संभजस्व ॥ वनतेर्व्यत्ययेनात्मनेपदं ॥

॥ अथ द्वादशी ॥

रथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने।
अस्माकं वीराँ उत नो मघोनो जनाँश्च या पारयाच्छर्म या च ॥१२॥
रथाय। नावं। उत। नः। गृहाय। नित्यऽअरित्रां। पत्ऽवतीं। रासि। अग्ने।
अस्माकं। वीरान्। उत। नः। मघोनः। जनान्। च। या। पारयात्। शर्म। या। च ॥१२॥

हे अग्ने उत अपि च रथाय रंहणाय गृहाय सर्वस्यायतनभूताय नोऽस्माकं यजमानाय नावं संसारोत्तारिकां सोमयागात्मिकां नावं। यज्ञो वै सुतर्मा नौरित्यादिषु श्रुतिषु नौरूपत्वेन स्तुतत्वात्। कीदृशीं तां। नित्यारित्रां। नियतऋत्विग्यूपोदकाकर्षणकाष्ठसाधनोपेतां। पद्वतीं ॥ ह्रस्वनुड्भ्यामिति मतुप उदात्तत्वं ॥ द्रव्यदेवतामंत्रादिरूपपादोपेतां। ईदृशीं यज्ञात्मिकां नावं रासि। देहि संपादय ॥ रातिर्दानकर्मा दासति रातीति तन्नामसु पाठात् ॥ सैव विशेष्यते। उत अपि च या नौरस्माकं वीरानस्मत्संबंधिनः पुत्रादीन्मघोनो हविर्लक्षणान्नवतः करोति। जनांश्च यजमानानस्मानपि या नौः पारयात्। पारयेत् उत्तारयेत् ॥ पारयतेर्लेट्याडागमः ॥ जननमरणादिबहुदुःखात्मकस्य पारं निरतिशयसुखास्पदं ब्रह्मलोकं प्रापयेत्। एष वः पुण्यः सुकृतो ब्रह्मलोक इति यागाद्यनुष्ठानवतां श्रूयमाणत्वात्। एवं प्रापय्य च या नौः शर्म सुखं निरतिशयं ब्रह्म प्रापयेत्। परस्यांते कृतात्मानः प्रविशंति परं पदमित्युक्तत्वात्। चित्तशुद्ध्युत्पादनद्वारा विविदिषंति यज्ञेन दानेनेति श्रुतेः ॥

॥ अथ त्रयोदशी ॥

अभी नो अग्न उक्थमिज्जुगुर्या द्यावाक्षामा सिंधवश्च स्वगूर्ताः ।
गव्यं यव्यं यंतो दीर्घाहेषं वरमरुण्यो वरंत ॥ १३ ॥

अभि । नः । अग्ने । उक्थं । इत् । जुगुर्याः । द्यावाक्षामा । सिंधवः । च । स्वऽगूर्ताः ।
गव्यं । यव्यं । यंतः । दीर्घा । अहा । इषं । वरं । अरुण्यः । वरंत ॥ १३ ॥

हे अग्ने न उक्थं शस्त्रमभिजुगुर्याः । आभिमुख्येन स्तुहि प्रोत्साहय । सम्यक् शस्त्रमित्यंगीकुरु ॥ गॄ शब्दे । लिङि बहुलं छंदसीति विकरणस्य श्लुः । बहुलं छंदसीत्युत्वं ॥ तथा द्यावाक्षामा द्यावापृथिव्यावपि यज्ञसाधनसंपादनेन प्रोत्साहयतां । तथा सिंधवः स्यंदनशीला नद्यश्च स्वगूर्ताः स्वयमेव गामिन्यो गव्यं गोसंभवं क्षीरादिकं गवां तृणाद्युत्पादनद्वारा । यव्यं । उपलक्षणमेतत् । यवव्रीह्यादिजन्यं पुरोडाशादिकं यंतः प्रापयंतः प्रोत्साहयंतु । तथारुण्योऽरुणवर्णगोयुक्ताः ॥ मत्वर्थीयो लुप्यते ॥ आरुण्यसाधनभूता उषसः । तद्धेतुत्वात्ताच्छब्द्यं । दीर्घाहा सर्वाण्यहानि सर्वकालमिषमिष्यमाणमन्नरसादिकं वरं वरणीयं श्रेष्ठमन्यदपि यागसाधनं वरंत । प्रापयंतु ॥ वृङ् संभक्तौ । अंतर्भावितण्यर्थाच्छांदसो लङ् । व्यत्ययेन शप् ॥ साधयंतु । एतत्सर्वमग्नेः प्रसादादित्यग्नेरेव स्तुतित्वादाग्नेयत्वमविरुद्धं ॥

॥ इति द्वितीयस्य द्वितीये सप्तमो वर्गः ॥

बळित्थेति त्रयोदशर्चं द्वितीयं सूक्तं दैर्घतमसं जागतं । अंत्ये त्रिष्टुभौ । अग्निर्देवता ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।
यदीमुप ह्वरते साधते मतिर्ऋतस्य धेना अनयंत सस्रुतः ॥ १ ॥

बट् । इत्था । तत् । वपुषे । धायि । दर्शतं । देवस्य । भर्गः । सहसः । यतः । जनि ।
यत् । ईं । उप । ह्वरते । साधते । मतिः । ऋतस्य । धेनाः । अनयंत । सऽस्रुतः ॥ १ ॥

देवस्य द्योतनशीलस्यादित्यस्य दर्शतं सर्वैर्दर्शनीयं तत् प्रसिद्धं भर्गस्तेज इत्था इत्थं सर्वैर्दृश्यमानप्रकारेण वपुषे शरीरव्यवहाराय दार्ढ्याय धायि । धार्यते सर्वैः ॥

बळित्थेत्युभे अपि सत्यनामनी बट् श्रत् सत्रा इत्थेति तन्नामसु पाठात्॥ जाठराग्निना भुक्तानां जरणेन शरीरधारणं प्रसिद्धं। तत्रोपपत्तिमाह। यतः सहसो जनि। यतः कारणान्मथनकाले बलेनोत्पन्नः अतो बलाय धार्यत इत्यर्थः। यदी यदेतत्प्रसिद्धं लोकोपकार्यग्नेस्तेजो मतिर्मदीया बुद्धिरुपह्वरते। उपगच्छति। उपगम्य वर्तते वा॥ ह्वृ कौटिल्ये॥ साधते च। तेनैव तेजसा साधयति स्वाभीष्टं। किंच ऋतस्य यज्ञसाधकस्याग्नेस्तेजसा धेनाः सर्वप्राणिनां वाचः सस्रुतः समानं गच्छंत्यः सहैव प्रवर्तमानाः॥ स्रवतेः कर्तरि क्विप्॥ अनयंत। नयंति। निर्वहंति जगद्व्यवहारं॥ व्यत्ययेनात्मनेपदं॥ यद्वा ऋतस्य धेना यज्ञस्य संबंधिन्यो मंत्ररूपा वाचः सस्रुतो होत्रादिमुखेन सहैव प्रवर्तमाना अनयंत। नयंति। अग्नेः स्तोत्रं निर्वहंति। अग्नेस्तेजसा वा यज्ञं निर्वहंति। तेजोमयी वागिति श्रुतेः। अतः कारणान्मतिरुपह्वरत इत्यर्थः॥ धेनेति वाङ्नाम धेना ग्ना इति तन्नामसु पाठात्॥

॥ अथ द्वितीया ॥

पृक्षो वपुः पितुमान्नित्य आ शये द्वितीयमा सप्तशिवासु मातृषु।
तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयंत योषणः ॥ २ ॥
पृक्षः। वपुः। पितुऽमान्। नित्यः। आ। शये। द्वितीयं। आ। सप्तऽशिवासु। मातृषु।
तृतीयं। अस्य। वृषभस्य। दोहसे। दशऽप्रमतिं। जनयंत। योषणः ॥ २ ॥

अयमग्निः पृक्षोऽन्नसाधकः पाकादिना। वपुर्वपुष्मान् शरीराभिवृद्धिहेतुः पितुमान् हविर्लक्षणान्नयुक्तो नित्यः शाश्वतः। ईदृशः सन् प्रथमं पृथिवीस्थानः सन् आशये। आशेते। दाहपाकादि लौकिकं कर्म यज्ञादि वैदिकं कर्म च निवर्तयन्ध्रुवो भूमौ वर्तत इत्यर्थः। तथा सप्तशिवासु मातृषु सप्तलोकशिवकरीषु मातृस्थानीयासु हितकरीषु वृष्टिषु द्वितीयमाशेते। मध्यमस्थानो विद्युद्रूपो वा वर्तते। अस्य वृषभस्य वर्षितुरस्यैव वैद्युताग्नेः सहायत्वेन संबंधिने दोहसे दोग्ध्र आदित्यस्योदकस्य वर्षयित्र आदित्यरश्मये॥ दुहेः कर्तर्यसुप्रत्ययः॥ तत्प्रवृत्तये तृतीयमाशेते। द्युस्थानो वर्तते। यद्वा अस्य वृषभस्य वर्षितुः प्रसिद्धस्यादित्यस्य संबंधिने दोग्ध्रे रश्मये तत्प्रवृत्त्यर्थं। आदित्यरश्मयो घर्मकाले भूमिस्थमुदकमाकृष्य सूर्यं प्रापय्य तत्र चिरकालं धृत्वा पुनरंतरिक्षं प्राप्य मेघेषु स्थित्वा वर्षकाले प्रवर्षंतीति प्रसिद्धं। अतो रश्मेर्दोग्धृत्वं। ईदृशं त्रिस्थानमग्निं महाभागं

योषणो मिश्रणशीलाः सर्वा दिशो जनयंत । उत्पादयंति । सर्वासु दिक्षु प्रसृत इत्यर्थः । कीदृशं तं । दशप्रमतिं । दशसु दिक्षु प्रकृष्टमननवंतं पूज्यत्वाय । यद्वा मथनकाले दशभिरंगुलीभिरुत्पन्नं लोकत्रये दशदिक्षु च व्याप्तमित्यर्थः ॥

॥ अथ तृतीया ॥

निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रंत सूरयः ।

यदीमनु प्रदिवो मध्व आधवे गुहा संतं मातरिश्वा मथायति ॥ ३ ॥

निः । यत् । ईं । बुध्नात् । महिषस्य । वर्पसः । ईशानासः । शवसा । क्रंत । सूरयः ।

यत् । ईं । अनु । प्रऽदिवः । मध्वः । आऽधवे । गुहा । संतं । मातरिश्वा । मथायति ॥ ३ ॥

ईमेनमग्निं यद्यस्मात्कारणान्महिषस्य ॥ महन्नामैतत् । महिषोऽम्व ऋभुक्षा इति तन्नामसु पाठात् ॥ महतो यज्ञस्य बुध्नान्मूलादधानादारभ्य वर्पसः ॥ रूपनामैतत् ॥ रूपस्योपक्रमोपसंहारात्मकस्य सिद्धय ईशानासः स्वकीयव्यापारसमर्थाः सूरयो मेधाविन ऋत्विजः शवसा बलेन मंत्रादिरूपेण शारीरेण वा निष्क्रंत । निष्कुर्वंति साधयंति । उत्पादयंति काष्ठात् । यद्वा एनमग्निं बुध्नादादितो मथनादारभ्य महिषस्य वर्पसो महतो रूपस्याहुतिस्वीकारसमर्थस्य सिद्धये निष्कुर्वंति ॥ करोतेश्छांदसे लुङि मंत्रे घसेति च्लेर्लुक् । व्यत्ययेनांतादेशः ॥ किंच यत् ईमेनमेवाग्निं प्रदिवः पुराणात् अनादिकालमारभ्य न केवलमिदानीमेवेत्यर्थः । पूर्ववदिदानीं मध्वो मधुनो मधुसदृशस्याधव आधवने प्रक्षेपे निमित्ते सति गुहा संतं गुहायां वेद्यां काष्ठेषु निगूढं संतं मातरिश्वांतरिक्षे चेष्टमानो वायुरनुक्रमेण मथायति । चालयति । उद्बोधयतीत्यर्थः । यद्वा मातरि फलस्य मातरि यागे श्वसति चेष्टत इति मातरिश्वा यजमानो गुहा संतमरण्योर्निगूढं संतं प्रादुर्भावायानुक्रमेण मथायति । मथ्नाति । उत्पादयतीत्यर्थः । यस्मादेवंरूपस्तस्मात्स्तोतव्य इत्यर्थः ॥

॥ अथ चतुर्थी ॥

प्र यत्पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति ।

उभा यदस्य जनुषं यदिन्वत आदिद्यविष्ठो अभवद्घृणा शुचिः ॥ ४ ॥

प्र । यत् । पितुः । परमात् । नीयते । परि । आ । पृक्षुधः । वीरुधः । दंऽसु । रोहति ।

उभा । यत् । अस्य । जनुषं । यत् । इन्वतः । आत् । इत् । यविष्ठः । अभवत् । घृणा । शुचिः ॥ ४ ॥

यद्यस्मात्पितुरन्नस्य पशुलक्षणस्य ॥ षष्ठीस्थाने प्रथमा ॥ तस्य परमात् परमत्वाद्धेतोः । उत्कृष्टत्वायेत्यर्थः । तदर्थं प्रपरिणीयते । प्रकर्षेण परितो नीयते । पर्यग्निक्रियत इत्यर्थः । यद्वा पितुरुत्पादकात्परमादुत्कृष्टाद्गार्हपत्यलक्षणस्याग्नेः सकाशादाहवनीयं प्रति प्रपरिणीयते । प्रकर्षेण नीयते ॥ पर्यनर्थकः ॥ किंच पृक्षुधः पशुपुरोडाशादिषु दाहमध्ये धीयमानाः ॥ यद्वा प्रशब्दस्य संप्रसारणं । क्षुध बुभुक्षायां । क्विप् ॥ प्रक्षोध्याः प्रकर्षेण बुभुक्षिता भोक्तुमिष्यमाणा वीरुधो दंसु दंतेषु मध्य आरोहति । आरोहंति । प्रविशंतीत्यर्थः । यद्यस्मादुभा उभावध्वर्युयजमानौ उभे अरणी वास्याग्नेर्जनुषं जन्मोत्पत्तिमिन्वतः । व्याप्नुतः । स्वीकुरुत इत्यर्थः ॥ इवि व्याप्तौ । इदित्वान्नुम् ॥ आदित् अत एव कारणाच्छुचिः शुद्धोऽयमग्निर्घृणा यजमानेष्वनुग्रहेण । यद्वा घृणा घृणो दीप्तिमान् ॥ मत्वर्थो लुप्यते ॥ दीप्ता वा यविष्ठो युवतमोऽभवत् । संपन्नः । स्वीकारसमर्थोऽभवदित्यर्थः ॥

॥ अथ पंचमी ॥

आदिन्मातॄराविशद्यास्वा शुचिरहिंस्यमान उर्विया वि वावृधे ।
अनु यत्पूर्वा अरुहत्सनाजुवो नि नव्यसीष्ववरासु धावते ॥ ५ ॥

आत् । इत् । मातॄः । आ । अविशत् । यासु । आ । शुचिः । अहिंस्यमानः । उर्विया । वि । ववृधे ।
अनु । यत् । पूर्वाः । अरुहत् । सनाऽजुवः । नि । नव्यसीषु । अवरासु । धावते ॥ ५ ॥

अयमग्निरा शुचिर्दीप्तः सन् आदित् पूर्वमंत्रे यविष्ठोऽभवदित्युक्तत्वात् तदनंतरमेव मातॄरुत्पादयित्रीर्मातृस्थानीया दश दिश आ अविशत् । सर्वतः प्रविशति । पूर्वंच दशप्रमतिं जनयंत योषण इत्युक्तत्वात् दिशां मातृत्वं । दिक्षु प्रकाशेन व्याप्त इत्यर्थः । मातरो विशेष्यंते । यासु मातृष्वहिंस्यमानः परैरपीड्यमान उर्विया उर्वतिप्रभूतं विवावृधे । विविधं प्रवृद्धोऽभवत् । तास्वाविशत् । यथा लोके कश्चित्तेजस्वी जनन्याः स्तनपानपरिपीडादिभिः सम्यक् पोषितो लोके प्रकाश्य पुनरागत्य मातरमालिंगति तद्वदिति भावः । कस्मिन्काल इति तत्राह । यत् यदा सनाजुवो दीर्घकालवियोगिन्यः स्थापनकाल एव प्रक्षिप्ताः अत एव पूर्वाः प्रथमभाविनीरोषधीरनुक्रमेणारुहत् । आरोहति ॥ रुहेश्छांदसो लुङ् । कृमृदृरुहिभ्यश्छंदसीति च्लेरङादेशः ॥ उपरि प्रज्वलति । तथा नव्यसीषु नवतरासु अत एवावरासु अत एव पूर्वापेक्षया निकृष्टासु पश्चाद्भाविनीष्वो-

षधीषु निधावते । नितरां नीचैर्वा गच्छति । अंतःप्रविशतीत्यर्थः । यदा काष्ठा-
नामधस्तादुपरिष्टाच्च प्रविश्य ज्वलति । तदा दिक्षु प्रकाशितोऽभवदित्यर्थः ॥

॥ इति द्वितीयस्य द्वितीयेऽष्टमो वर्गः ॥

॥ अथ षष्ठी ॥

आदिद्धोतारं वृणते दिविष्टिषु भगमिव पपृचानास ऋंजते ।
देवान्यत्क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे ॥ ६ ॥
आत् । इत् । होतारं । वृणते । दिविष्टिषु । भगंऽइव । पपृचानासः । ऋंजते ।
देवान् । यत् । क्रत्वा । मज्मना । पुरुऽस्तुतः । मर्तं । शंसं । विश्वधा । वेति । धायसे ॥ ६ ॥

होतारं होमनिष्पादकमाह्वातारं वा देवानां ईदृशमग्निं दिविष्टिषु दिवसैषणेषु निमित्तभूतेषु वृणते । संभजते । आदित् अनंतरमेव । तथा पपृचानासो हविषा स्तुत्या च संपृचाना ऋत्विजो यजमानाः ॥ पृचेश्छांदसस्य लिटः कानच् ॥ ऋंजते । प्रसाधयंति । किमिव । भगमिव । तं यथा जनाः प्रसाधयंति तद्वत् । यद्वा महांतं राजानमिव सूर्यदीप्तिवत्पूज्यमित्यर्थः ॥ ऋंजतिः प्रसाधनकर्मेति यास्कः ॥ यत् यस्मादयमग्निः पुरुष्टुतो बहुभिर्बहुधा वा स्तूयमानः क्रत्वा क्रतुना कर्मणा यागादिरूपेण मज्मना शारीरेण बलेन च युक्तान्देवान्व्यवहर्तॄनृत्विजो यज्ञभुजो देवान्वा क्रत्वा मज्मना च योजयितुं तथा मर्तं यजमानं शंसं स्तुतिं च स्तुत्यं वा तं विश्वधा विश्वधनो यद्वा विश्वात्मकोऽयं वेति । पूर्वोक्तान्कामयते । किमर्थं । धायसे । हविर्लक्षणान्नाय । तस्माद्धोतारमग्निं वृणते ऋंजते च ॥

॥ अथ सप्तमी ॥

वि यदस्थाद्यजतो वातचोदितो ह्वारो न वक्वा जरणा अनाकृतः ।
तस्य पत्मन्दक्षुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः ॥ ७ ॥
वि । यत् । अस्थात् । यजतः । वातऽचोदितः । ह्वारः । न । वक्वा । जरणाः । अनाकृतः ।
तस्य । पत्मन् । धक्षुषः । कृष्णऽजंहसः । शुचिऽजन्मनः । रजः । आ । विऽअध्वनः ॥ ७ ॥

यत् यदायमग्निर्वातचोदितो वायुना प्रेरितः ॥ तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥ यजतः सर्वैर्यष्टव्यो यष्टुं योग्यः सन् व्यस्थात् । वितिष्ठते सर्वतो व्याप्नो

भवति। तत्र दृष्टांतः। अनाकृतोऽनिवारितोऽप्रतिहतप्रसरो वक्वा बहुवक्ता ॥ वचेरन्येभ्योऽपि दृश्यंत इति वनिप्। दृशिग्रहणात्कुत्वं ॥ ह्वारो न कुटिल इव विदूषणकादिरिव ॥ ह्वरतेर्ण्यंतात्पचाद्यच् ॥ स यथा जरणाः स्तुतीर्वितिष्ठते। विविधं कुर्वन् वर्तते। तद्वदयमप्यनाकृतोऽप्रतिबद्धप्रसरो व्यवस्थितः। तदा तस्याग्नेः पत्मन् पतने मार्गे यद्रूपे रजो रंजनात्मको लोक आस्थात्। आतिष्ठति। सर्वत आश्रयति। अग्नौ बहुधा यजतीत्यर्थः। कीदृशस्य तस्य। धक्षुषः। दहतः ॥ दहेर्लिटः क्वसुः ॥ कृष्णजंहसः। कृष्णमार्गस्य ॥ पुनःपुनर्गम्यत इति जंहा मार्गः। हंतेर्यङ्लुगंतात्कर्मण्यसुन्। कुत्वाभावश्छांदसः ॥ शुचिजन्मनः। मंत्रसहितारण्योरुत्पन्नत्वात्। व्यध्वनः। विविधज्वालस्यानियतमार्गस्य ॥

॥ अथाष्टमी ॥

रथो॒ न या॒तः शिक्व॑भिः कृ॒तो द्यामंगे॑भिररु॒षेभि॑रीयते।
आद॑स्य॒ ते कृ॒ष्णासो॑ दक्षि सू॒रयः॒ शूर॑स्येव त्वे॒षथा॑दीषते॒ वयः॑ ॥ ८ ॥

रथः॑। न। या॒तः। शिक्व॑ऽभिः। कृ॒तः। द्यां। अंगे॑भिः। अ॒रु॒षेभिः॑। ई॒य॒ते॒।
आत्। अ॒स्य॒। ते। कृ॒ष्णासः॑। ध॒क्षि॒। सू॒रयः॑। शूर॑स्यऽइव। त्वे॒षथा॑त्। ई॒ष॒ते॒। वयः॑ ॥ ८ ॥

अयमग्निः शिक्वभी रज्जुभिः कृतो बद्धो रथो न रथ इव। स यथा स्वीयैश्वादिभिरंगैरीयते तद्वत् यातः स्थापितः सन् अरुषेभिर्गमनशीलैरंगेभिर्ज्वालादिरूपैरवयवैर्द्यामंतरिक्षमाज्येन हृष्टः सन् ईयते। गच्छति ॥ ईङ् गतौ ॥ आत् प्रवृद्ध्यनंतरमस्याग्नेस्ते सूरयः सरणयो मार्गाः कृष्णासः कृष्णवर्णा भवंति। यत एवं भवंति तदर्थं दक्षि। दहति काष्ठान् ॥ पुरुषव्यत्ययः। छांदसः शपो लुक् ॥ किंच ज्वलितस्याग्नेस्त्वेषथाद्दीप्तात्तेजसः सकाशाद्वयो गमनवंतः पक्षिमृगादय ईषते। गच्छंति ॥ ईष गत्यादौ। बहुलं छंदसीति शपो लुक् ॥ पलायंते। तत्र दृष्टांतः। शूरस्य त्वेषथाद्वय इव। कस्यचिद्विक्रांतस्य दीप्तात्तेजसः सकाशाद्भीत्या पलायमाना इव। एवमंतरिक्षं स्पृशन् सर्वतो दहतीति सर्वदा दावाग्निरूपेण स्तूयते ॥

॥ अथ नवमी ॥

त्वया॒ ह्य॑ग्ने॒ वरु॑णो धृ॒तव्र॑तो मि॒त्रः शा॑श॒द्रे अ॑र्य॒मा सु॒दान॑वः।
यत्सी॒मनु॒ क्रतु॑ना वि॒श्वथा॑ वि॒भुर॒रान्न ने॒मिः प॑रि॒भूरजा॑यथाः ॥ ९ ॥

त्वया॑ । हि । अ॒ग्ने॒ । वरु॑णः । धृ॒तऽव्र॑तः । मि॒त्रः । शा॒श॒द्रे । अ॒र्य॒मा । सु॒ऽदान॑वः ।
यत् । सी॒म् । अनु॑ । क्रतु॑ना । वि॒श्वऽथा॑ । वि॒ऽभुः । अ॒रान् । न । ने॒मिः । प॒रि॒ऽभूः ।
अजा॑यथाः ॥ ९ ॥

हे अग्ने त्वया खलु वरुणो रात्र्यभिमानी देवो धृतव्रतः स्वीकृतवर्षणादिकर्मा भवति । तथा मित्रोऽहरभिमानी देवः शाशद्रे । शातयति तमः ॥ शद्लृ शातने । छांदसो लिङ् । बहुलं छंदसीति रुट् । तुजादित्वादभ्यासदीर्घः ॥ तथार्यमोभयोर्मध्यवर्ती देवः सुदानवः शोभनदानो भवति ॥ व्यत्ययेन बहुवचनं ॥ यद्वा एते वरुणादयः सुदानवः शोभनदानाः स्वस्वकार्यकर्तारस्त्वया हि शाशद्रे । तीक्ष्णीक्रियंते । हिशब्दो मंत्रांतरप्रसिद्धिद्योतनार्थः । त्वमग्ने वरुणो जायस इति हि मंत्रांतरं ॥ शदेः कर्मणि छांदसो लिट् । इरयो रे इति रेभावः । हि चेति निघाताभावः ॥ वरुणादीनामग्न्यायत्तत्व उपपत्तिमाह । यद्यस्मात्कारणात् हे अग्ने सीं सर्वतः क्रतुना कर्मणा विश्वथा विश्व इव विश्वात्मक इव विभुर्मित्रार्यमात्मना सर्वव्यापी परिभूः स्वतेजसा सर्वतः परिभाविता सन् अनुक्रमेणाजायथाः । जायसे । प्रादुर्भवसि । तत्र दृष्टांतः । अरान् रथस्य चक्रान् नेमिर्न बाह्यवलय इव । स यथा व्याप्य तिष्ठति तद्वदयमग्निर्वरुणादीन्व्याप्य तिष्ठति ॥

॥ अथ दशमी ॥

त्वम॑ग्ने शशमा॒नाय॑ सुन्व॒ते रत्नं॑ यविष्ठ दे॒वता॑तिमिन्वसि ।
तं त्वा॒ नु नव्यं॑ सहसो युवन्व॒यं भग॒ं न का॒रे म॑हिरत्न धीमहि ॥ १० ॥
त्वं । अ॒ग्ने॒ । श॒श॒मा॒नाय॑ । सु॒न्व॒ते । रत्नं॑ । य॒वि॒ष्ठ॒ । दे॒वऽता॑तिं । इ॒न्व॒सि॒ ।
तं । त्वा॒ । नु । नव्यं॑ । स॒ह॒सः॒ । यु॒व॒न् । व॒यं । भगं॑ । न । का॒रे । म॒हि॒ऽर॒त्न॒ । धी॒म॒हि॒ ॥ १० ॥

हे अग्ने यविष्ठ युवतम त्वं शशमानाय त्वां स्तुवते ॥ शशमानः शंसमान इति यास्कः ॥ सुन्वते त्वदर्थमभिषवं कुर्वते यजमानाय तद्यागार्थं रत्नं रमणीयं हविर्देवतातिं देवेषु तायमाणं विस्तार्यमाणमिन्वसि । व्याप्नोषि । अस्मत्प्रत्तं हविर्देवान्प्रापयसीत्यर्थः ॥ इन्वतिर्व्याप्तिकर्मा । इन्वति ननक्षेति तन्नामसु पाठात् ॥ हे सहसो युवन् । युवशब्देनोत्पत्तिर्लक्ष्यते । मथनकाले बलेनोत्पन्न बलस्य मिश्रयितर्वा । यद्वा सहसस्पुत्र युवन् नित्यतरुण महिरत्न अस्मत्प्रदेयमहद्रमणीयधन नव्यं नवतरं स्तुत्यं वा तं तादृशं हविर्भुजं त्वा त्वां वयं यजमानाः

कारे शब्दे स्तोचलक्षणे नु क्षिप्रं धीमहि। स्थापयामः। हविःप्रदानसमये क्षिप्रमेव स्तुम इत्यर्थः। तत्र दृष्टांतः। भगं न। आदित्यमिव। यद्वा महांतं राजानमिव। तं यथा स्तुवंति तद्वत्॥

॥ अथैकादशी ॥

अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिं।
रश्मीँरिव यो यमति जन्मनी उभे देवानां शंसमृत आ च सुक्रतुः॥ ११॥

अस्मे इति। रयिं। न। सुऽअर्थं। दमूनसं। भगं। दक्षं। न। पपृचासि। धर्णसिं।
रश्मीन्ऽइव। यः। यमति। जन्मनी इति। उभे इति। देवानां। शंसं। ऋते। आ।
च। सुऽक्रतुः॥ ११॥

हे अग्ने त्वमस्मे अस्मासु स्वर्थं सुष्ठ्वरणीयं दमूनसं दमनीयमुपास्यं॥ दमेरूनसिरित्यूनसिप्रत्ययः॥ रयिं न पपृचासि। धनं यथा संपृणक्षि। तथा भगं सर्वैर्भजनीयं दक्षं न उत्साहवंतं प्रबुद्धं वा धर्णसिं विद्यादिधारणकुशलं पुत्रं यथा पपृचासि संपृणक्षि। उभयमपि ददासीत्यर्थः॥ पृची संपर्के। लेट्याडागमः। बहुलं छंदसीति विकरणस्य श्लुः॥ इदानीं परोक्षेणाह। योऽग्नी रश्मीरिव स्वकीयान् रश्मीन्यथा यमति नियमयति विस्तारयति तद्वत् स उभे जन्मनी जननाधारभूतावुभौ लोकौ यमति। नियच्छति। तथा सुक्रतुः शोभनकर्मायमृतेऽस्मदीययज्ञे देवानां देवसंबंधिनं शंसं स्तवं च आ यमति। आयच्छति। सर्वदा ददाति। यद्वा पूर्वार्द्धे पपृचासीत्यपि परोक्षत्वाय प्रथमपुरुषतया योज्यं॥

॥ अथ द्वादशी ॥

उत नः सुद्योत्मा जीराश्वो होता मंद्रः शृणवच्चंद्ररथः।
स नो नेषन्नेषतमैरमूरोऽग्निर्वामं सुवितं वस्यो अच्छ॥ १२॥

उत। नः। सुऽद्योत्मा। जीरऽअश्वः। होता। मंद्रः। शृणवत्। चंद्रऽरथः।
सः। नः। नेषत्। नेषऽतमैः। अमूरः। अग्निः। वामं। सुवितं। वस्यः। अच्छ॥ १२॥

उतशब्दोऽप्यर्थः। स च संभावनायां। सोऽग्निर्नोऽस्मदीयमाह्वानमुत शृणवत्। अपि नाम शृणुयात्। यद्वा नोऽस्मान् श्रावयेत्। देवेषु मध्ये प्रख्यापयेत्॥

शृणोतेर्लेट्यडागमः ॥ कीदृशोऽयं । सुद्योत्मा । सुद्योतमानः ॥ द्युत दीप्तौ । अन्येभ्योऽपि दृश्यंत इति मनिन् ॥ जीराश्वः । शीघ्रगमनाश्वः । होता देवानामाह्वाता मंद्रो मदनशीलश्चंद्ररथः सुवर्णमयरथोपेतः । किंचायममूरोऽमूढबलो वस्वो वसनीयः । स प्रसिद्धोऽग्निर्नेषतमैरत्यर्थं नेतृभिः कर्मभिः स्तोत्रैर्वा नोऽस्मान् उत नेषत् । अपि नाम नयेत् । यज्ञस्य पारं प्रापयेत् ॥ नयतेर्लेट्यडागमः । सिब्बहुलमिति सिप् ॥ किमर्थं । वामं वननीयं सुवितं सुष्ठु प्राप्यं सर्वैः कांक्षणीयं स्वर्गमच्छ । आभिमुख्येन प्राप्तुं नेषत् ॥

॥ अथ त्रयोदशी ॥

अस्ताव्यग्निः शिमीवद्भिरर्कैः साम्राज्याय प्रतरं दधानः ।

अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्युः ॥ १३ ॥

अस्तावि । अग्निः । शिमीवत्ऽभिः । अर्कैः । साम्ऽराज्याय । प्रऽतरं । दधानः ।

अमी इति । च । ये । मघऽवानः । वयं । च । मिहं । न । सूरः । अति । निः । ततन्युः ॥ १३ ॥

अयमग्निः शिमीवद्भिर्हविःप्रदानादिकर्मवद्भिरर्कैरर्चनसाधनैर्मंत्रैरस्तावि । स्तुतोऽस्माभिर्यजमानैः ॥ शिमीति कर्मनाम । शिमी शक्तिरिति तन्नामसु पाठात् ॥ कीदृशोऽयं । साम्राज्याय साम्राज्यस्येति कर्मणि षष्ठीस्थाने चतुर्थी । सम्यग्राजमानत्वं प्रतरं प्रकृष्टतरमत्यर्थं दधानः ॥ अमु च छंदसीत्यमुप्रत्ययः ॥ किंचेममग्निममी च पुरोवर्तमाना ऋत्विजः पुत्रादयो वा ये वयं च पूर्वं स्तोतृत्वेन प्रसिद्धा वयमप्यति अत्यर्थं निष्टतन्युः । शब्दयंतु ॥ निष्पूर्वः स्तनतिः शब्दकर्मा ॥ इतः परमप्यस्मत्पुत्रपौत्रादयो वयं चाग्निं स्तुम इत्यर्थः । तत्र दृष्टांतः । मिहं न सूरः । मिहं मेहनशीलं मेघं यथा सूरः सूर्यो वृष्ट्यर्थं शब्दयति तद्वत् ॥ लिङि छांदसो विकरणस्य श्लुः । अभिनिसः स्तनः शब्दसंज्ञायां । पा० ८. ३. ८६. । इति षत्वं ॥

॥ इति द्वितीयस्य द्वितीये नवमो वर्गः ॥

समिद्ध इति त्रयोदशर्चं तृतीयं सूक्तमानुष्टुभं । प्रथमायाः समिन्नामकोऽग्निर्देवता समिद्धोऽग्निः । द्वितीयादीनां तनूनपान्नराशंस इळो बर्हिर्देवीर्द्वार उषासानक्ता दैव्यौ होतारौ प्रचेतसौ तिस्रो देव्यः सरस्वतीळाभारत्यस्त्वष्टा वनस्पतिः स्वाहाकृतिरित्येताः क्रमेण देवताः । अंत्याया इंद्रः । तिस्रो देव्य इत्यस्य विवरणं

सरस्वतीलाभारत्य इति ॥ अत्रानुक्रमणिका । समिद्ध आप्रिय आनुष्टुभमंत्यैंद्रीति ॥ अत्रेध्मतनूनपादादिभिर्यज्ञावयववाचिभिर्यज्ञ एवोच्यते । अतः स एव देवतेति कात्थक्यस्य मतं । अग्निरेव समिदादिभिरुच्यते । अतः स एव देवतेति शाकपूणेर्मतं । निरुक्ते किंदेवताः प्रयाजानुयाजा इति छंदोदेवता इत्यादिपक्षांतरं बहुधा प्रदर्श्य तदर्थे ब्राह्मणादि चोदाहृत्य इतरे पक्षा अर्थवादा आग्नेया एवेति सिद्धांतितं अथ किंदेवताः प्रयाजानुयाजा इत्यादिना । नि० ८. २१. ॥ पशावंगिरोगोत्रोत्पन्नानामेतदाप्रीसूक्तं । एकादश प्रयाजा इति खंडे सूचितं । समिद्धो अद्येति सर्वेषां यथऋषि वा । आ० ३. २. । इति । अत्र यथऋषिग्रहणात् ॥ आप्रीसूक्तानि त्रिविधानि । तत्र वासिष्ठात्रेयवाध्र्यश्वगार्त्समदानि चत्वारि नराशंसवंति । मैधातिथदैर्घतमसप्रैषिकानि नराशंसतनूनपादुभयवंति । इतराणि तनूनपात्वंतीति । तत्रैतत्सूक्तं दैर्घतमसत्वादुभयवत् ॥

॥ तत्र प्रथमा ॥

समिद्धो अग्न आ वह देवाँ अद्य यतस्रुचे ।
तंतुं तनुष्व पूर्व्यं सुतसोमाय दाशुषे ॥ १ ॥
संऽइद्धः । अग्ने । आ । वह । देवान् । अद्य । यतऽस्रुचे ।
तंतुं । तनुष्व । पूर्व्यं । सुतऽसोमाय । दाशुषे ॥ १ ॥

हे अग्ने समिद्धः सम्यग्दीपित एतन्नामकस्त्वमद्यास्मिन्यागदिने देवान् हविषां भोक्तॄनग्न्यादीनावह । अस्मद्यज्ञं प्रति प्रापय । यतस्रुचे यागायोद्यतस्रुचे यजमानाय तदर्थं । आवाह्य च सुतसोमाय यागार्थमभिषुतसोमाय दाशुषे हविर्दत्तवते । यद्यपीदानीमेवाहूयंते देवाः तथापि पूर्वानुष्ठानापेक्षया भाव्यपेक्षया वा दाशुष इत्युच्यते । हविर्दात्रे वा यजमानाय तदर्थं पूर्व्यं पूर्वेभ्यो देवेभ्यो हितं पूर्वकालीनं वा तंतुं यज्ञं तनुष्व । विस्तारय ॥

॥ अथ द्वितीया ॥

घृतवंतमुप मासि मधुमंतं तनूनपात् ।
यज्ञं विप्रस्य मावतः शशमानस्य दाशुषः ॥ २ ॥
घृतऽवंतं । उप । मासि । मधुऽमंतं । तनूऽनपात् ।
यज्ञं । विप्रस्य । माऽवंतः । शशमानस्य । दाशुषः ॥ २ ॥

हे तनूनपात्। तनूनपादाज्यमिति कात्थक्यपक्षे तन्वो गावो भोगानां तासु जायमानत्वात् ताभ्य उत्पन्नं क्षीरं क्षीरात्सर्पिरित्याज्यस्य नप्तृत्वं। तद्वान्यज्ञः। अग्निपक्ष आपस्तन्व उच्यंते। ताभ्य ओषधिवनस्पतयः। तेभ्योऽग्निरिति नप्तृत्वं। अरणीभ्यामिति भावः। एतन्नामक हे अग्ने विप्रस्य मेधाविनः शशमानस्य शंसमानस्य त्वां स्तुवतो दाश्रुषो हविर्दत्तवतो मावतो मत्सदृशस्य यजमानस्य॥ युष्मदस्मद्भ्यां छंदसि सादृश्य इति वतुप्। आ सर्वनाम्न इत्यात्वं॥ घृतवंतं क्षरदाज्योपेतं मधुमंतं माधुर्योपेतं सोमादिमधुरद्रव्येण तद्वंतं यज्ञमुप उपेत्य मासि। निर्मिमीषे। मितो भवसि वा। संपूर्तिपर्यंतं तिष्ठसीत्यर्थः॥ मा माने। आदादिकः॥

॥ अथ तृतीया ॥

शुचिः पावको अद्भुतो मध्वा यज्ञं मिमिक्षति।
नराशंसस्त्रिरा दिवो देवो देवेषु यज्ञियः॥ ३॥
शुचिः। पावकः। अद्भुतः। मध्वा। यज्ञं। मिमिक्षति।
नराशंसः। त्रिः। आ। दिवः। देवः। देवेषु। यज्ञियः॥ ३॥

देवेषु मध्ये शुचिः शुद्धो दीप्तो वा पावकोऽन्नस्यापूतस्य शोधयिताद्भुतोऽभूत इव अद्य क्षणे भविता। आश्चर्यभूत इत्यर्थः। देवो द्योतनशीलो यज्ञियो यज्ञसंपादनार्हः। ईदृशो नराशंसो नरैः कर्मनेतृभिर्ऋत्विग्भिः शंसनीयोऽग्निर्दिवो द्युलोकादागत्य मध्वा मधुरेण रसेन यज्ञमस्मदीयं त्रिरामिमिक्षति। त्रिवारं समंतात्सिंचति। स्वादयतीत्यर्थः। यद्वा मधुरेण फलेन त्रिरामिमिक्षति। योजयतीत्यर्थः। नराशंसो यज्ञ इति कात्थक्यपक्षे यज्ञाभिमानी देवो द्योतमानो द्युलोकादागत्यानुष्ठीयमानो यज्ञं त्रिरामिमिक्षति। अयं नराशंसो देवस्त्रिरा॥ उपसर्गवशाद्योग्यक्रियाध्याहारः॥ त्रिवारमागच्छति। त्रिराहरति वा फलं। अवशिष्टं पूर्ववन्नेयं॥

॥ अथ चतुर्थी ॥

ईळितो अग्न आ वहेंद्रं चित्रमिह प्रियं।
इयं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते॥ ४॥
ईळितः। अग्ने। आ। वह। इंद्रं। चित्रं। इह। प्रियं।
इयं। हि। त्वा। मतिः। मम। अच्छ। सुऽजिह्व। वच्यते॥ ४॥

हे अग्ने ईळितः सर्वैः स्तुत्य इएनामकस्त्वमिहास्मिन्यज्ञे चित्रं चायनीयं प्रियं प्रीणयितारमस्मान् हविः स्वीकर्तुं वा प्रीतियुक्तमिंद्रमावह। आह्वय। हे सुजिह्व घृतपानेन शोभनज्वाल इयं मम मतिर्मननसाधना स्तुतिरूपा वाक् त्वा त्वामच्छ आभिमुख्येन प्राप्तुं वच्यते। मतिरेवास्मदीयोच्यते ॥ हिः पूरणार्थः। वचेर्यकि संप्रसारणाच्चेति पूर्वरूपस्य वा छंदसीति विकल्पितत्वादभावे यण् ॥ अत्र पुरोडाशादीडभिमानियज्ञपरतया वा व्याख्येयं। एवमुत्तरत्र यज्ञांगैर्यज्ञसंबंधिदेवताभिश्च यज्ञ एवोच्यत इति तत्परत्वेन व्याख्येयं ॥

॥ अथ पंचमी ॥

स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे।
वृंजे देवव्यचस्तममिंद्राय शर्म सप्रथः ॥ ५ ॥
स्तृणानासः। यतऽस्रुचः। बर्हिः। यज्ञे। सुऽअध्वरे।
वृंजे। देवव्यचःऽतमं। इंद्राय। शर्म। सऽप्रथः ॥ ५ ॥

स्वध्वरे शोभनप्रायणीयाद्यवांतरयागवति यज्ञे सोमयागे बर्हिर्दर्भान् स्तृणानास आस्तरंतो यतस्रुचो नियमितजुह्वादिपात्रा ऋत्विजो देवव्यचस्तममतिशयेन देवगामिनं सप्रथः सर्वतो विस्तीर्णं शर्म सुखसाधनं गृहमिंद्राय वृंजे। विवर्जयंति। संपादयंतीत्यर्थः ॥

॥ अथ षष्ठी ॥

वि श्रयंतामृतावृधः प्रयै देवेभ्यो महीः।
पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः ॥ ६ ॥
वि। श्रयंतां। ऋतऽवृधः। प्रऽयै। देवेभ्यः। महीः।
पावकासः। पुरुऽस्पृहः। द्वारः। देवीः। असश्चतः ॥ ६ ॥

द्वारो देवीर्यज्ञस्य द्वाराभिमानिन्यो देवता विश्रयंतां। विविधं श्रयंतु। विवृत्ता भवंतु। किमर्थं। देवेभ्यः प्रयै। प्रयातुं देवानां प्रापणाय ॥ प्रयै रोहिष्यै अव्यथिष्यै। पा० ३. ४. १०। इति निपातितः ॥ कीदृश्यस्ताः। ऋतवृधः। यज्ञस्य वर्धयित्र्यः पूज्याः। पावकासः। शोधयित्र्यः। पुरुस्पृहः। बहुस्पृहणीयाः। असश्चतः। असज्यमानाः परस्परविप्रकृष्टा इत्यर्थः ॥

॥ इति द्वितीयस्य द्वितीये दशमो वर्गः ॥

॥ अथ सप्तमी ॥

आ भंदमाने उपाके नक्तोषासा सुपेशसा ।
यह्वी ऋतस्य मातरा सीदतां बर्हिरा सुमत् ॥ ७ ॥
आ । भंदमाने इति । उपाके इति । नक्तोषसा । सुऽपेशसा ।
यह्वी इति । ऋतस्य । मातरा । सीदतां । बर्हिः । आ । सुऽमत् ॥ ७ ॥

भंदमाने सर्वैः स्तूयमाने उपाके परस्परं संनिहिते सुपेशसा शोभनरूपे ॥ पेश इति रूपनाम ॥ यह्वी महत्यौ अपत्यरूपे वा प्रतिदिनं जायमानत्वात् ॥ यह्वित्यपत्यनाम यह्वः सूनुरिति तन्नामसु पाठात् ॥ ऋतस्य मातरा यज्ञस्य निर्मात्र्यौ । ताभ्यामागमनाद्यज्ञस्य संपूर्तेर्यज्ञमातृत्वमुपचर्यते । यद्वा अतिरात्रादीनामहोरात्रसाध्यत्वात् । नक्तोषासा उक्तगुणविशिष्टे अहोरात्रदेवते सुमत् स्वयमेवास्माभिरप्रार्थिते इत्यर्थः । यद्वा सुमत् बर्हिरास्तृतं दर्भमा समंतादासीदतां । उपाविशतां । यद्वा ऋतस्येति कर्मणि षष्ठी । यज्ञमासीदतां । आसाद्य च बर्हिरास्तृतं दर्भं स्वयमेवादत्तां ॥

॥ अथाष्टमी ॥

मंद्रजिह्वा जुगुर्वणी होतारा दैव्या कवी ।
यज्ञं नो यक्षतामिमं सिध्रमद्य दिविस्पृशं ॥ ८ ॥
मंद्रऽजिह्वा । जुगुर्वणी इति । होतारा । दैव्या । कवी इति ।
यज्ञं । नः । यक्षतां । इमं । सिध्रं । अद्य । दिविऽस्पृशं ॥ ८ ॥

मंद्रजिह्वा देवानां मादनज्वालौ जुगुर्वणी भृशं गृणतां स्तुवतां यजमानानां संभक्तारौ ॥ यङ्लुगंतात् क्विपि छांदसी रूपसिद्धिः । तस्मिन्नुपपदे वनतेश्छंदसि वनसनरक्षिमथामितीन्प्रत्ययः ॥ कवी मेधाविनौ क्रांतदर्शिनौ दैव्या होतारा देवसंबंधिनौ होतारौ अयं च मध्यमस्थानश्चेत्युभौ सिध्रं फलसाधनभूतं ॥ सिधेः स्फायितंचीत्यादिना रक् ॥ दिविस्पृशं द्युलोकवासिदेवान् स्पृशंतं । तैर्हविषः स्वीक्रियमाणत्वादिति भावः । ईदृशं नोऽस्मदीयमिमं यज्ञमद्य यक्षतां । अनुतिष्ठतां पूजयतां वा । सम्यङ्निर्वाहयतामित्यर्थः ॥

॥ अथ नवमी ॥

शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती ।
इळा सरस्वती मही बर्हिः सीदंतु यज्ञियाः ॥ ९ ॥
शुचिः । देवेषु । अर्पिता । होत्रा । मरुत्ऽसु । भारती ।
इळा । सरस्वती । मही । बर्हिः । सीदंतु । यज्ञियाः ॥ ९ ॥

शुचिः शुद्धा मरुत्सु विरुद्धलक्षणयामरणेषु देवेषु द्योतनशीलेषु स्तोतृषु मरुत्सु ऋत्विक्षु वार्पिता नियता होत्रा होमनिष्पादिका भारती भरतस्यादित्यस्य संबंधिनी द्युस्थाना वाक् । तथेळा पार्थिवी प्रैषादिरूपा मही महती सरस्वती । सर इत्युदकनाम तद्वती स्तनितादिरूपा माध्यमिका च वाक् एतास्तिस्रस्त्रिस्थानवागभिमानिदेवता यज्ञिया यज्ञार्हाः सत्यो बर्हिः स्तीर्णं सीदंतु । उपविशंतु ॥ तिस्र इत्यत्र तिसृभ्यो जस इति जस उदात्तत्वं ॥

॥ अथ दशमी ॥

तन्नस्तुरीयमद्भुतं पुरु वारं पुरु त्मना ।
त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः ॥ १० ॥
तत् । नः । तुरीयं । अद्भुतं । पुरु । वा । अरं । पुरु । त्मना ।
त्वष्टा । पोषाय । वि । स्यतु । राये । नाभा । नः । अस्मऽयुः ॥ १० ॥

नोऽस्मदर्थं तत् तादृशं तुरीयं तूर्णं व्याप्यद्भुतं सद्य आविर्भवद्भूतमिव सत् । यद्वा महन्नामैतत् । सारतो महत् पुरु वारं बहूनां प्राणिनामर्थायैवारं अलं समर्थं । यद्वा पुरु वारं बहु प्रभूतं च ॥ वाशब्दश्चार्थे । अरं अलं ॥ त्मना आत्मना पुरु । बहुक्रियाविशेषणमेतत् । ईदृशमुदकं त्वष्टा वृष्ट्यादेः कर्ता ॥ त्वष्टृशब्दो यास्केनैवं व्याख्यातः । त्वष्टा तूर्णमश्नुत इति नैरुक्तास्त्विषेर्वा स्याद्दीप्तिकर्मणस्त्वक्षतेर्वा स्यात्करोतिकर्मणः । नि० ८. १३. । इति ॥ तन्नामको वैद्युतोऽग्निरस्मयुरस्मान्कामयमानो देवो नः पोषायास्मत्पुष्टये राये समृद्धये च नाभा नाभौ वृष्टेर्बंधके मेघस्य नाभिस्थानेऽवस्थितमुक्तलक्षणमुदकं विष्यतु । विविधं गमयतु ॥ षोऽंतकर्मणि । ओतः श्यनीत्योकारलोपः । उपसर्गात्सुनोतीति षत्वं ॥ यद्वा नो नाभा अस्मत्संबंधियज्ञनाभावुत्तरवेद्यां राये ॥ षष्ठ्यर्थे

चतुर्थी॥ रायो गवादिधनस्य पोषाय पुष्टये॥ स्यतिरुपसृष्टो विमोचनार्थः॥ उक्तलक्षणां वृष्टिं मुंचतु॥

॥ अथैकादशी ॥

अवसृजन्नुप त्मना देवान्यक्षि वनस्पते ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरः ॥ ११ ॥
अवऽसृजन् । उप । त्मना । देवान् । यक्षि । वनस्पते ।
अग्निः । हव्या । सुसूदति । देवः । देवेषु । मेधिरः ॥ ११ ॥

हे वनस्पते वनानां पालक यूपाभिमानिदेवाग्ने अवसृजन् स्वैरं वर्तयन् ऋत्विजः स्वस्वकर्मसु व्यापारयन् त्मना आत्मना देवान्हविर्भुज उपयक्षि। उपेत्य यज॥ बहुलं छंदसीति शपो लुक्॥ देवो द्योतमानो मेधिरो मेधावान् अग्निराहवनीयो देवेषूभयेषां मध्ये हव्या हवींषि सुसूदति। प्रेरयति। स्वीकरोति॥ षूद क्षरणे। बहुलं छंदसीति शपः श्लुः। लेटोऽडाटावित्यडागमः। यद्वा यूपाग्निरेव परोक्षेणोच्यते। सोऽग्निर्हवींषि सुष्ठु स्वीकरोति॥

॥ अथ द्वादशी ॥

पूषण्वते मरुत्वते विश्वदेवाय वायवे ।
स्वाहा गायत्रवेपसे हव्यमिंद्राय कर्तन ॥ १२ ॥
पूषण्ऽवते । मरुत्वते । विश्वऽदेवाय । वायवे ।
स्वाहा । गायत्रऽवेपसे । हव्यं । इंद्राय । कर्तन ॥ १२ ॥

पूषण्वते पूष्णा तद्वते॥ अनो नुडिति नुट्। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं॥ मरुत्वते मरुद्भिस्तद्वते विश्वदेवाय सर्वदेवसंघाय वायवे गमनशीलाय वायुदेवाय च। तथा गायत्रवेपसे॥ वेप इति रूपनाम। गायत्रशब्द इतरसामोपलक्षणः॥ गायत्रं वेपो रूपं यस्य तादृशायेंद्राय हव्यं हविः प्रदातुं स्वाहा कर्तन। स्वाहाकारं कुरुत ऋत्विजः॥ करोतेर्लोटि तप्तनप्तनथनाश्चेति तनबादेशः॥

॥ अथ त्रयोदशी ॥

स्वाहाकृतान्या गह्युप हव्यानि वीतये ।
इंद्रा गहि श्रुधी हवं त्वां हवंते अध्वरे ॥ १३ ॥

स्वाहा॑ऽकृतानि । आ । ग॒हि॒ । उप॑ । ह॒व्यानि॑ । वी॒तये॑ ।

इंद्र॑ । आ । ग॒हि॒ । श्रु॒धि । हवं॑ । त्वां । ह॒वं॒ते॒ । अ॒ध्व॒रे ॥ १३ ॥

हे इंद्र स्वाहाकृतानि । स्वाहेत्येवंपूर्वा कृतिः करणमुच्चारणं यक्ष्यमाणदेवतानां ताः स्वाहाकृतयः । तद्वंति हव्यानि हवींषि । अत्र प्रयाजेषु वषट्कारप्रदानात्स्वाहाकृतं हविरित्यर्थः । तद्धविरुपेत्य वीतये भक्षणायागहि । आगच्छ ॥ गमेश्छांदसः शपो लुक् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥ तथा हे इंद्र आगहि । स्तोत्राण्यभिलक्ष्यागच्छ । आगत्य हवमस्मदीयमाह्वानं श्रुधि । शृणु । यतस्त्वामध्वरेऽहिंसात्मके यागे हवंते । आह्वयंति ऋत्विजः । अतः श्रुधि ॥ ह्वयतेर्बहुलं छंदसीति संप्रसारणं ॥

॥ इति द्वितीयस्य द्वितीय एकादशो वर्गः ॥

प्र तव्यसीमित्यष्टर्चं चतुर्थं सूक्तं दैर्घतमसं । तथा चानुक्रांतं । प्र तव्यसीमष्टावाग्नेयं तु तत्त्रिष्टुबंतमिति । तु तदित्युक्तत्वादिदमादिसूक्ताष्टकस्याग्निर्देवता । अंत्या त्रिष्टुप् शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः । अग्निष्टोम आग्निमारुते शस्त्र इदं सूक्तं जातवेदस्यनिविद्धानीयं । अथ यथेतमिति खंडे सूचितं । प्र तव्यसीं नव्यसीमापो हि ष्ठेति तिस्रः । आ॰ ५.२०. । इति ॥ दशरात्रस्य प्रथमेऽप्यहनि जातवेदस्यनिविद्धानं आश्वमेधिके मध्यमेऽहनि च निविद्धानं । तथा चाचार्योऽतिदेश ऐकाहिकान्युपशंस्य तेषु निविदो दध्यादेवमेवाग्निमारुते । आ॰ १०.१०. । इति ॥

॥ तत्र प्रथमा ॥

प्र तव्यं॑सीं॒ नव्यं॑सीं धी॒तिम॒ग्नये॑ वा॒चो म॒तिं सह॑सः सू॒नवे॑ भरे ।

अ॒पां नपा॒द्यो वसु॑भिः स॒ह प्रि॒यो होता॑ पृथि॒व्यां न्यसी॑दहत्वियः॑ ॥ १ ॥

प्र । तव्यं॑सीं । नव्यं॑सीं । धी॒तिं । अ॒ग्नये॑ । वा॒चः । म॒तिं । सह॑सः । सू॒नवे॑ । भ॒रे॒ ।

अ॒पां । नपा॑त् । यः । वसु॑ऽभिः । स॒ह । प्रि॒यः । होता॑ । पृ॒थि॒व्यां । नि । अ॒सी॑दत् ।

ऋ॒त्वियः॑ ॥ १ ॥

अहमग्ने तव्यसीं तवीयसीमतिशयेन वर्धयित्रीं ॥ तवतिर्वृद्ध्यर्थः सौत्रो धातुः । अस्मात्तृजंताच्छंदसीतीयसुन् । तुरिष्ठेमेयःस्विति तृलोपः । छांदस ईकारलोपः ॥

नव्यसी नवतरामपूर्वां धीतिं यागलक्षणमुक्तगुणकं कर्म प्रभरे। प्रकर्षेण करोमि। तथोक्तलक्षणां वाचो मतिं स्तुतिरूपं कर्म भरे। कीदृशायाग्नये। सहसो बलस्य सूनवे पुत्राय। किंच योऽग्निरपां नपात् तासां नप्ता। अद्भ्य ओषधयः ओषधीभ्योऽग्निरित्यग्नेर्नप्तृत्वं। अथवा अपां न पातयिता वैद्युताग्निरूपेण प्रवर्षकत्वादिति भावः। तथा प्रियो यजमानस्य प्रीणयिता प्रियतमो वा तस्य होता होमनिष्पादकः। सोऽग्निर्ऋत्वियः प्राप्तकालः प्राप्तप्रदानसमयः सन् पृथिव्यां वेदिलक्षणायां वसुभिर्निवासयोग्यैर्गवादिधनैः सहितो न्यसीदत्। नितरां सीदति ॥

॥ अथ द्वितीया ॥

स जायमानः परमे व्योमन्याविरग्निरभवन्मातरिश्वने।
अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत् ॥ २ ॥

सः। जायमानः। परमे। विऽओमनि। आविः। अग्निः। अभवत्। मातरिश्वने। अस्य। क्रत्वा। संऽइधानस्य। मज्मना। प्र। द्यावा। शोचिः। पृथिवी इति। अरोचयत् ॥ २ ॥

स पूर्वोक्तोऽग्निर्जायमानोऽरणीभ्यामुत्पद्यमानः काष्ठेषु वा प्रादुर्भूतः सन् तदानीमेव परम उत्कृष्टे व्योमनि विविधरक्षणवति वेदिदेशे मातरिश्वनेऽतरिक्षसंचारिणे वायवे प्रथममाविरभवत्। प्रत्यक्षोऽभूत्। त्वमग्ने प्रथमो मातरिश्वन आविर्भवेत्यादिश्रुत्यंतरप्रसिद्धेः। वायुसंयोगात्प्रज्वलित इत्यर्थः। अथवा मातरि फलस्य निर्मातरि यज्ञे श्वसिति चेष्टत इति मातरिश्वा यजमानः। तदर्थं। किंच समिधानस्येंधनैः सम्यक् वर्धमानस्याग्नेर्मज्मना॥ बलनामैतत्॥ बलवता क्रत्वा क्रतुना कर्मणा ज्वालनादिव्यापारेण शोचिर्द्यावा पृथिवी च प्रारोचयत्। प्रकर्षेणादीपयत् ॥ मध्ये शोचिःशब्दश्छांदसः ॥ मज्मना क्रत्वा समिधानस्येति वा योज्यं। प्रबलेन समिंधनादिव्यापारेण समिध्यमानस्येत्यर्थः ॥

॥ अथ तृतीया ॥

अस्य त्वेषा अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः।
भात्वक्षसो अत्यक्तुर्न सिंधवोऽग्ने रेजंते असंसंतो अजराः ॥ ३ ॥

अस्य। त्वेषाः। अजराः। अस्य। भानवः। सुऽसंदृशः। सुऽप्रतीकस्य। सुऽद्युतः।
भाऽत्वक्षसः। अति। अक्तुः। न। सिंधवः। अग्नेः। रेजंते। अससंतः। अजराः ॥३॥

अस्य स्तूयमानस्याग्नेस्त्वेषा दीप्तयोऽजरा जरारहिता अजीर्णाः। अविरता इत्यर्थः॥ नञो जरमरेत्यादिनोत्तरपदाद्युदात्तत्वं॥ तथा सुप्रतीकस्य शोभनमुखस्याग्नेर्भानवो रश्मयः। दीप्तेरुक्तत्वादत्र विस्फुलिंगा अवगंतव्याः। ते च सुसंदृशः सुष्ठु सम्यग्द्रष्टारः सर्वतो व्याप्ता इत्यर्थः। सुद्युतः सुष्ठु सर्वतो द्योतमानाः। तथास्याग्नेर्भात्वक्षसः॥ त्वक्ष इति बलनाम त्वक्षः शर्ध इति बलनामसु पाठात्॥ भासमानबलाः॥ अक्तुरिति रात्रिनामैतत् अक्तूर्म्येति तन्नामसूक्तत्वात्। द्वितीयार्थे प्रथमा॥ अक्तुं जगदंजकं नैशं तमोऽति अतिक्रम्य सिंधवः स्यंदमानाः सर्वत्र व्याप्नुवंतोऽससंतः स्वव्यापारेष्वस्वपंतोऽविरता अत एवाजरा न रेजंते। न कंपंते दाहपाकादिषु न चलंति न चाल्यंते वान्यैः। यद्वा नशब्दो दृष्टांतवचनः। भात्वक्षसो भा एव त्वक्षो बलं यस्य तादृशस्यादित्यस्य सिंधवो न रश्मय इव। ते यथा स्यंदनशीला व्याप्तिमंतोऽक्तुरति अंजकं तमोऽतिक्रम्याससंतो रेजंते तद्वद्भात्वक्षसोऽस्याग्नेरुक्तलक्षणा दीप्तयोऽपि सर्वत्र रेजंते। कंपंते। व्याप्नुवंतीत्यर्थः॥

॥ अथ चतुर्थी ॥

यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना।
अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति ॥४॥
यं। आऽईरिरे। भृगवः। विश्वऽवेदसं। नाभा। पृथिव्याः। भुवनस्य। मज्मना।
अग्निं। तं। गीःऽभिः। हिनुहि। स्वे। आ। दमे। यः। एकः। वस्वः। वरुणः।
न। राजति ॥४॥

विश्ववेदसं सर्वधनं॥ वेद इति धननाम वेदो वरिव इति तन्नामसु पाठात्॥ तादृशं यमग्निं भृगवो भृगुगोत्रोत्पन्नाः पापस्य भर्जकाः पृथिव्या वेद्याः। एकदेशे कृत्स्नशब्दः। यद्वा एतावती वै पृथिवीत्यादिश्रुतेर्वेद्याः पृथिवीत्वं। तस्या नाभावुत्तरवेद्यां भुवनस्य भूतजातस्य मज्मना बलेन निमित्तेन आ आभिमुख्येनेरिरे। ईरितवंतः स्थापितवंतः। तमग्निं स्वे स्वकीये दमे गृह उत्तरवेद्यां गीर्भिः स्तुतिभिराहिनुहि। प्राप्नुहि॥ हि गतौ वृद्धौ च। उतश्च प्रत्ययाच्छंदसि वाव-

चनमिति हेर्लिंगभावः ॥ योऽग्निरेको मुख्यः सन् एक एव वा वस्वो वसुनो गवादिधनस्य राजति । ईश्वरो भवति प्रदातुमिति शेषः ॥ राजतीत्यैश्वर्यकर्मा क्षियति राजतीति तन्नामसु पाठात् ॥ तत्र दृष्टांतः । वरुणो न । वारक आदित्य इव । स यथा सर्वस्येष्टे तद्वत् ॥

॥ अथ पंचमी ॥

न यो वराय मरुतामिव स्वनः सेनेव सृष्टा दिव्या यथाशनिः ।
अग्निर्जंभैस्तिगितैरत्ति भर्वति योधो न शत्रून्त्स वना न्यृंजते ॥ ५ ॥

न । यः । वराय । मरुताम्ऽइव । स्वनः । सेनाऽइव । सृष्टा । दिव्या । यथा । अशनिः ।
अग्निः । जंभैः । तिगितैः । अत्ति । भर्वति । योधः । न । शत्रून् । सः । वना । नि । ऋंजते ॥ ५ ॥

योऽग्निर्वराय वरणाय निग्रहाय शक्तो न भवति । तत्र दृष्टांतत्रयमुच्यते । मरुतां स्वन इव । स यथाग्राह्यस्तद्वत् । तथा सृष्टा वैरिक्षयार्थं प्रबलेनाभिसृष्टा सेनेव । सा यथान्यैरनिरोध्या तद्वत् । तथा दिव्या दिवि भवाशनिर्यथा पतत्येव न निवार्यते तद्वत् । ईदृक् सामर्थ्यमस्तीति दर्शयति । अयमग्निस्तिगितैर्निशितैस्तीक्ष्णीभूतैः ॥ अंत्यविकारश्छांदसः ॥ जंभैर्दंतैर्दंतस्थानीयाभिर्ज्वालाभिरत्ति । अस्मद्विरोधिनो भक्षयति । तथा भर्वति । हिनस्ति ॥ भर्व हिंसायां । यास्कस्त्वाह भर्वतिरत्तिकर्मेति । यद्यप्यत्तिभर्वत्योरदनमेवार्थः तथापि तदवांतरभेदोऽवगंतव्यः ॥ तत्र दृष्टांतः । योधो न । संप्रहर्ता शूर इव । स यथा शत्रून्भर्वति भक्षयति तद्वत् । किंच सोऽग्निर्वना वनानि वृक्षादिसमूहान् न्यृंजते । नितरां प्रसाधयति दहतीत्यर्थः ॥ ऋंजतिः प्रसाधनकर्मेति यास्कः ॥

॥ अथ षष्ठी ॥

कुविन्नो अग्निरुचथस्य वीरसद्वसुष्कुविद्वसुभिः काममावरत् ।
चोदः कुवित्तुतुज्यात्सातये धियः शुचिप्रतीकं तमया धिया गृणे ॥ ६ ॥

कुवित् । नः । अग्निः । उचथस्य । वीः । असत् । वसुः । कुवित् । वसुऽभिः । कामं । आऽवरत् ।
चोदः । कुवित् । तुतुज्यात् । सातये । धियः । शुचिऽप्रतीकं । तं । अया । धिया । गृणे ॥ ६ ॥

अयमग्निर्नोऽस्माकमुचथस्योक्थस्य स्तोत्रस्य कुवित् बहुवारं वीः कामयितासत् । भवतु ॥ अस्तेर्लेट्यडागमः ॥ यद्वा उचथस्यैतन्नामकस्य महर्षेर्गोत्रप्रभवस्य

न इति संबंधः । तथा वसुर्वासयिता सर्वेषां वसुस्थानीयो वा वसुभिर्वासयितृभिर्धनैः काममत्यर्थमभिमतं वा कुवित् अतिप्रभूतमावरत् । आवृणोतु । अभिमतप्रदानेन कामं निवर्तयत्वित्यर्थः ॥ वृणोतेर्लेट्यडागमः । छांदसो विकरणस्य लुक् ॥ अयमग्निश्चोदोऽस्माकं कर्मसु प्रेरकः सन् धियः कर्माणि सातये लाभाय कुवित् बहु तुतुज्यात् त्वरयतु । प्रेरयत्वित्यर्थः ॥ तुजिः प्रेरणार्थः । छांदसः शपः श्लुः ॥ शुचिप्रतीकं शोभनावयवं शोभनज्वालं तमग्निमया धियानया स्तुतिरूपया प्रज्ञया गृणे । उच्चारयामि । स्तौमीत्यर्थः ॥

॥ अथ सप्तमी ॥

घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मित्रं न समिधान ऋंजते ।
इंधानो अक्रो विदथेषु दीद्यच्छुक्रवर्णामुदु नो यंसते धियं ॥ ७ ॥

घृतऽप्रतीकं । वः । ऋतस्य । धूःऽसदं । अग्निं । मित्रं । न । संऽइधानः । ऋंजते ।
इंधानः । अक्रः । विदथेषु । दीद्यत् । शुक्रऽवर्णां । उत् । ऊं इति । नः । यंसते । धियं ॥ ७ ॥

घृतप्रतीकं घृतोपक्रमं प्रयाजादिष्वाज्यैर्हूयमानत्वात् । यद्वा प्रतीकमंगं । दीप्तज्वालमित्यर्थः । किंच वो युष्मत्संबंधिन ऋतस्य यज्ञस्य धूर्षदं धुरि निर्वहणे सीदंतं यज्ञनिर्वाहकमग्निं मित्रं न मित्रमिव समिधान इध्मैर्दीपयमान ऋंजते । प्रसाधयति ॥ ऋंजतिः प्रसाधनकर्मा ॥ इंधानः सम्यग्दीप्यमानोऽक्रो ज्वालासमिदादिभिराक्रांतोऽन्यैरनुक्रांतो वा ॥ क्रमेश्छांदसो डः ॥ विदथेषु यज्ञेषु वेदयत्सु स्तोत्रेषु निमित्तभूतेषु दीद्यत् स्वयं दीप्यमानोऽस्मदीयां धियं प्रज्ञां यागादिविषयां शुभ्रवर्णां निर्मलां ज्योतिष्टोमादि कर्म वोदु यंसते । उद्योतयत्येव ॥ यमेर्लेट्यडागमः । सिप् । उशब्दोऽवधारणे । धीरिति कर्मनाम धीः शमीति तन्नामसु पाठात् ॥

॥ अथाष्टमी ॥

अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः ।
अदब्धेभिरदृपितेभिरिष्टेऽनिमिषद्भिः परि पाहि नो जाः ॥ ८ ॥

अप्रऽयुच्छन् । अप्रयुच्छत्ऽभिः । अग्ने । शिवेभिः । नः । पायुऽभिः । पाहि । शग्मैः ।
अदब्धेभिः । अदृपितेभिः । इष्टे । अनिमिषत्ऽभिः । परि । पाहि । नः । जाः ॥ ८ ॥

हे अग्ने अप्रयुच्छन् अस्मास्वप्रमाद्यन् ॥ युच्छ प्रमादे ॥ अविच्छिन्नप्रवृत्तिः सन् अप्रयुच्छद्भिरप्रमाद्यद्भिरनवधानरहितैः शिवेभिर्मंगलकल्याणैः शग्मैः सुखकरैः पायुभी रक्षणप्रकारैर्नोऽस्मान् पाहि। रक्ष। किंच हे इष्टे सर्वैरेषणीयाग्ने जा जायमानोऽस्माभिर्दीयमानः सन् अदब्धेभिरहिंसितैरदृपितेभिः केनचिदप्यपरिभूतैः ॥ दृप हंप उत्क्लेशे तौदादिकः ॥ अनिमिषद्भिर्निमेषरहितैरनलसस्वभावैः। ईदृशैर्लक्षणैर्नोऽस्मान् परि परितः पाहि। पालय। यद्वा उपर्युपरि जायंत इति जाः। नो जा अस्मत्संबंधिनीः पुत्रपौत्रादिरूपाः प्रजाः परि पाहि। परितो रक्ष। न केवलमस्मान् किंत्वस्मत्पुत्रपौत्रादीनपि रक्ष ॥

॥ इति द्वितीयस्य द्वितीये द्वादशो वर्गः ॥

एति प्र होतेति सप्तर्चं पंचमं सूक्तं दैर्घतमसं जागतं। पूर्वत्राग्नेयं तु तदित्युक्तत्वादिदमप्याग्नेयं। तथा चानुक्रमणिका। एति प्र सप्त जागतमिति ॥ प्रातरनुवाकाश्विनशस्त्रयोर्विनियोग उक्तः ॥

॥ तत्र प्रथमा ॥

एति प्र होता व्रतमस्य माययोर्ध्वां दधानः शुचिपेशसं धियं।
अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते ॥ १ ॥

एति। प्र। होता। व्रतं। अस्य। मायया। ऊर्ध्वां। दधानः। शुचिऽपेशसं। धियं।
अभि। स्रुचः। क्रमते। दक्षिणाऽआवृतः। याः। अस्य। धाम। प्रथमं। ह। निंसते ॥ १ ॥

अयं होता होमनिष्पादकोऽध्वर्युरस्याग्नेर्व्रतं हविःप्रदानादिरूपं कर्म कर्तुं मायया कर्तव्यविशेषप्रज्ञया युक्तः सन् प्रैति। प्रकर्षेण गच्छति होतुं ॥ मायेति प्रज्ञानाम माया वयुनमिति तन्नामसु पाठात् ॥ कीदृशोऽयं। ऊर्ध्वामुपर्यारूढां शुचिपेशसं शोभनरूपोपेतां ॥ पेश इति रूपनाम ॥ धियं प्रज्ञां दधानः। आ चतुर्थात्कर्मणोऽभिसमीक्षेतेदं करिष्यतीत्युक्तत्वात्। आगत्य च दक्षिणावृतः प्रादक्षिण्येन वर्तमानाः स्रुचो जुह्वादीः क्रमते। गृह्णाति। कीदृश्यः स्रुचः। याः प्रथमं पात्रासादनकालेऽस्याग्नेर्धाम स्थानं निंसते ॥ निंस चुंबन इति धातुः ॥ चुंबंति भजंत इत्यर्थः। प्रथममनुष्ठेयक्रमं बुद्ध्वा प्रैति पश्चात्स्रुचः क्रमत इत्यर्थः ॥ हशब्दः प्रसिद्धौ ॥ यद्वा होता देवानामाह्वातायमग्निरस्य यजमानस्य व्रतं कर्म ज्योतिष्टोमादि प्रज्ञाविशेषेण युक्तः सन् एति यज्ञदेशं प्रत्यागच्छति। कीदृशोऽयं।

ऊर्ध्वामूर्ध्ववर्तिं शुचिपेशसं शोभनरूपोपेतं धियं ज्वालाचलनादिरूपं कर्म दधानो धारयमाणः। आगत्य च दक्षिणावृत उक्तलक्षणाः स्रुचो घृतपूर्णा जुहूपभृदादिका अभिक्रमते। आक्रमते। घृतं स्वीकर्तुं ज्वालाः प्रसर्पतीत्यर्थः। याः स्रुचः प्रथमं पूर्वं हविरासादनकालेऽस्याग्नेर्धाम स्थानं वेदिलक्षणं निंसते। चुंबंति। प्राप्ताः॥ हशब्दः प्रसिद्धौ। णिसि चुंबने। अदादित्वाच्छपो लुक्। इदित्त्वान्नुम्॥

॥ अथ द्वितीया ॥

अभीमृतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः।
अपामुपस्थे विभृतो यदावसदध स्वधा अधयद्याभिरीयते ॥ २॥

अभि। ईं। ऋतस्य। दोहनाः। अनूषत। योनौ। देवस्य। सदने। परिऽवृताः। अपां। उपऽस्थे। विऽभृतः। यत्। आ। अवसत्। अध। स्वधाः। अधयत्। याभिः। ईयते ॥ २॥

ऋतस्योदकस्य दोहना धारा योनावुत्पत्तिस्थाने देवस्य सदने द्योतमानस्यादित्यस्य स्थाने परीवृतास्तद्रश्मिभिः परितो व्याप्ताः सत्योऽभ्यनूषत। अभिनवा भवंति। आभवंत्येव स्तूयंते वा। कदेत्यत आह। यत् यदापामुपस्थ उदकानामुत्संगेऽंतर्विभृतो विशेषेण ताभिर्धार्यमाणः सन् आवसत्। आक्रम्य निवसत्ययमग्निस्तदानीमित्यर्थः। अध अधुना स्वधा अमृतोपमा अपोऽधयत्। पिबति सर्वो लोकः। ता विशेष्यंते। याभिः सहेयतेऽयमग्निः संगच्छते वा भूमिं ता अधयत्। विद्युदात्मनोदकानि जगत्पाययत इत्यग्नेः स्तुतिः॥

॥ अथ तृतीया ॥

युयूषतः सवयसा तदिद्वपुः समानमर्थं वितरिता मिथः।
आदीं भगो न हव्यः समस्मदा वोळ्हुर्न रश्मीन्त्समयंस्त सारथिः ॥ ३॥

युयूषतः। सऽवयसा। तत्। इत्। वपुः। समानं। अर्थं। विऽतरिता। मिथः। आत्। ईं। भगः। न। हव्यः। सं। अस्मत्। आ। वोळ्हुः। न। रश्मीन्। सं। अयंस्त। सारथिः ॥ ३॥

सवयसा समानवयस्कौ ॥ वयःशब्देन सामर्थ्यं लक्ष्यते ॥ समानसामर्थ्यौ तदित् तदानीमेव यदा प्रवृद्धो भवति तदानीमेव समानमर्थं समानं प्रयोजनं

निष्पत्तिं मिथः प्रत्येकं वितरिचता भृशं तरंतौ होत्रध्वर्यू वपुरग्नेः शरीरं युयूषतः स्वस्वव्यापारेण मिश्रयितुमिच्छतः । प्रैषानंतरं याज्यादिपाठो होतुर्व्यापारः । वषट्कारानंतरं होमोऽध्वर्योरिति विभागः । अत्रेदमनुसंधेयं । सवयसा समानवयस्कौ मिथः प्रत्येकं समानं प्रयोजनं सुखप्राप्तिं वितरिचता विशेषेण तरितुमिच्छंतौ ॥ तरतेर्यङ्लुगंताच्छतरि दाधर्त्यादौ निपात्यते । द्विवचनस्याकारः ॥ जायापती तद्वपुस्तदेव परस्परं शरीरं युयूषतो मिश्रयितुमिच्छतः परस्परमालिंगतः । तद्वदग्निं साकं होत्रध्वर्यू युयूषतः । आदीं अनंतरमेव हव्य आहवनीयोऽग्निः सारथिः सरणशीलः सारथिवद्यज्ञात्मकस्य रथस्य निर्वाहको वा सन् अस्मत् अस्माकं संबंधिनो रश्मीन् रश्मिवदायता घृतधारा आ सर्वतः समयंस्त । सम्यक् स्वीकरोति । तत्र दृष्टांतद्वयमुच्यते । भगो न । सर्वैः सेवनीय आदित्यः स यथा सर्वतः पूजामादत्ते तद्वत् । सारथी रथस्य यंता वोढुर्वाहकस्याश्वादे रश्मीन्न । प्रतिग्रहानिव । तान्यथा स्वीकरोति तद्वदयमग्निरपि हवींषि समयंस्त ॥

॥ अथ चतुर्थी ॥

यमी॒ द्वा सव॑यसा सप॒र्यतः॑ समा॒ने योना॑ मिथु॒ना समो॑कसा ।
दिवा॒ न नक्तं॑ पलि॒तो युवा॑जनि पु॒रू चर॑न्न॒जरो॒ मानु॑षा यु॒गा ॥ ४ ॥

यं । ई॒ । द्वा । सऽव॑यसा । स॒प॒र्यतः॑ । स॒मा॒ने । योना॑ । मि॒थु॒ना । संऽओ॑कसा ।
दिवा॑ । न । नक्तं॑ । प॒लि॒तः । युवा॑ । अ॒ज॒नि॒ । पुरु । चर॑न् । अ॒जरः॑ । मानु॑षा । यु॒गा ॥ ४ ॥

यमीमेनमग्निं द्वा द्वौ सवयसा समानवयस्कौ समानसामर्थ्यौ वा समाने योना योनौ फलस्योत्पत्तिस्थाने यज्ञे वर्तमानौ मिथुना दंपती इवैककार्योद्युक्तौ समोकसा समाननिवासौ देवयजनस्थानौ । ईदृशौ होत्रध्वर्यू सपर्यतः । पूजयतः स्तुत्या हविःप्रदानेन च प्रीणयतः । कदेत्याह । दिवा न अहनीव नक्तं रात्रावपि । सर्वदेत्यर्थः । एवं पूज्यमानोऽग्निः पलितः पूर्वमंगारावस्थायां जीर्णोऽपि समिंधनानंतरं युवा तरुणस्तेजसा सर्वस्य मिश्रयिता वाजनि । जायते । एवं जातोऽयं मानुषा युगा मनोः संबंधीनि युगानि जायापतिरूपाणि होत्रध्वर्युरूपाणि वोद्दिश्य पुरु चरन् बह्वाज्यादिकं भक्षयन् अजरोऽजीर्णो जरारहितो वर्तते ॥

॥ अथ पंचमी ॥

तमीं हिन्वंति धीतयो दश व्रिशो देवं मर्तास ऊतये हवामहे।
धनोरधि प्रवत आ स ऋंखत्यभिव्रजद्भिर्वयुना नवाधित ॥ ५ ॥

तं। ईं। हिन्वंति। धीतयः। दर्श। व्रिशः। देवं। मर्तासः। ऊतये। हवामहे।
धनोः। अधि। प्रऽवतः। आ। सः। ऋंखति। अभिव्रजत्ऽभिः। वयुना।
नवा। अधित ॥ ५ ॥

देवं द्योतमानं तमेनमग्निं दश धीतयो दशसंख्याका अंगुलयो व्रिशो विशः परस्परविश्लिष्टा हिन्वंति। प्रीणयंति मथनकाले। तथा मर्तासो मनुष्या वयं यजमाना ऊतये रक्षणाय हवामहे। आह्वयामः। कोऽस्य विशेष इत्युच्यते। अयमग्निर्धनोर्धनुषः सकाशात्प्रवत आ प्रकर्षेण गच्छतो बाणानिव। तान्यथा शत्रोरुपरि मुंचति॥ आ इत्युपमार्थे॥ तद्वत्सोऽग्निर्धनुःस्थानीयान्निजशरीरसकाशात्प्रवतः प्रकृष्टवेगवतो रश्मीनृखति। गमयति॥ रिविर्गत्यर्थः। अत्रांतर्भावितरायर्थोऽयं। इदित्वान्नुम्। छांदसं रेफस्य संप्रसारणं। अधिशब्दोऽनर्थको धात्वर्थमात्रानुवादी॥ किंच एवं प्रवृद्धोऽग्निरभिव्रजद्भिरनुष्ठानार्थमभितः संचरद्भिर्ज्ञेयमर्थमभिगच्छद्भिर्वा तदर्थं नवा नवानि नूतनानि वयुना वयुनानि प्रज्ञानान्यनुष्ठानविषयाण्यधित। धारयति। ज्ञापयतीत्यर्थः। यद्वा अभिव्रजद्भिराभिमुख्येन गच्छद्भिर्होत्रादिभिः क्रियमाणानि नवानि वयुनानि प्रज्ञाविशिष्टानि स्तोत्रादीन्यधित। धत्ते॥ धाञश्छांदसे लुङि स्थाघ्वोरिच्चेतीत्वं। उत्तरस्य सिचः कित्त्वं। ह्रस्वादंगादिति सलोपः॥

॥ अथ षष्ठी ॥

त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य पशुपा इव त्मना।
एनी त एते बृहती अभिश्रिया हिरण्ययी वक्करी बर्हिराशाते ॥ ६ ॥

त्वं। हि। अग्ने। दिव्यस्य। राजसि। त्वं। पार्थिवस्य। पशुपाःऽइव। त्मना।
एनी इति। ते। एते इति। बृहती इति। अभिऽश्रिया। हिरण्ययी इति। वक्करी
इति। बर्हिः। आशाते इति ॥ ६ ॥

हे अग्ने त्वं दिव्यस्य दिवि भवस्य देवादेर्विद्युदात्मना वृष्ट्यादेर्वा राजसि।

ईशिषे ॥ ऐश्वर्यनामैतत् ॥ तथा पार्थिवस्य पृथिवीसंबंधिनो मनुष्यादे राजसि । ईश्वरो भवसि । किमन्यतंचत्वेन नेत्याह । त्मना । आत्मनैव स्वसामर्थ्येनैव । तत्र दृष्टांतः । पशुपा इव । पशुपालको यथा स्वसामर्थ्येनैव पशूनां निरोधनिर्गमनादिव्यापारेषु समर्थो भवति तद्वत् । एतद्दृष्टांतेनात्यंतस्वातंत्र्यमुक्तं भवति । किंच यस्मादेवं तस्मात्ते तव बर्हिर्यज्ञमेते प्रसिद्धे एनी एतवर्णे शुभ्रे द्यावापृथिव्यावाशाते । अश्नुवाते व्याप्नुतः ॥ वर्णादनुदात्तादिति ङीप् तकारस्य नः ॥ कीदृश्यौ ते । बृहती । महत्यावतिविस्तृते । अभिश्रिया । प्राप्तैश्वर्ये अभितः सेव्ये वा । हिरण्ययी । हितरमणीये । वक्करी । अतिकुशलं शब्दयंत्यौ ॥ वचेर्वनिपि वनो र चेति ङीप्रेफौ । छांदसं कुत्वं । वकि कौटिल्य इत्यस्माद्वा छांदसो नुमभावः ॥ ईदृश्यौ द्यावापृथिव्यौ बर्हिरश्नुवाते ॥

॥ अथ सप्तमी ॥

अग्ने॑ जु॒षस्व॒ प्रति॑ हर्य॒ तद्वचो॒ मंद्र॒ स्वधा॑व॒ ऋत॑जात॒ सुक्र॑तो ।
यो वि॒श्वतः॑ प्र॒त्यङ्ङसि॑ द॒र्श॒तो र॒ण्वः संदृ॑ष्टौ पितु॒माँ इ॑व॒ क्षयः॑ ॥ ७ ॥

अग्ने॑ । जु॒षस्व॑ । प्रति॑ । ह॒र्य॒ । तत् । वचः॑ । मंद्र॑ । स्वधा॑ऽवः । ऋत॑ऽजात । सुक्र॑तो॒ इति॒ सुऽक्र॑तो ।
यः । वि॒श्वतः॑ । प्र॒त्यङ् । असि॑ । द॒र्श॒तः । र॒ण्वः । सम्ऽदृ॑ष्टौ । पि॒तु॒मान्ऽइ॑व । क्षयः॑ ॥ ७ ॥

हे अग्ने जुषस्व सेवस्व हविः प्रीतो भव वा स्तुत्या । किंच तत्तादृशं प्रियकरं वचो वाग्रूपं स्तोत्रं प्रतिहर्य । पुनः कामयस्व । हे मंद्र मादनशील स्तुत्य वा हे स्वधावो हविर्लक्षणान्नवन् हे ऋतजात यज्ञार्थमुत्पन्न हे सुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा । य ईदृशस्त्वं विश्वतः सर्वस्य स्थावरजंगमस्य जगतः प्रत्यङ्ङसि । अभिमत अनुकूलोऽसि । न पराङ्मुख इत्यर्थः । तथा दर्शतो दर्शनीयः सर्वैः । किंच संदृष्टौ सम्यग्दर्शने रण्वो रमणशीलो रमयिता वा भवसि सर्वस्य । यद्वा तव संदृष्टौ सत्यां सर्वो जनः क्षयो निवासवान्भवति । तत्र दृष्टांतः । पितुमानिव । अतिप्रभूतान्नस्वामी यथा सर्वैर्वस्तव्यो गंतव्यश्च भवति तद्वत् ॥

॥ इति द्वितीयस्य द्वितीये त्रयोदशो वर्गः ॥

तं पृच्छतेति पंचर्चं पंचमं सूक्तं । अत्रानुक्रमणिका । तं पृच्छत पंचांत्या त्रिष्टुबिति । दीर्घतमा ऋषिः । पूर्वत्राग्नेयं तु तदित्युक्तत्वादिदमप्याग्नेयं । अंत्या

त्रिष्टुप्। शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः ॥ प्रातरनुवाकाश्विनशस्त्रयोरस्य विनियोग उक्तः ॥

॥ तत्र प्रथमा ॥

तं पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा न्वीयते।
तस्मिन्त्संति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः ॥ १ ॥
तं। पृच्छत। सः। जगाम। सः। वेद। सः। चिकित्वान्। ईयते। सः। नु। ईयते।
तस्मिन्। संति। प्रऽशिषः। तस्मिन्। इष्टयः। सः। वाजस्य। शवसः। शुष्मिणः। पतिः ॥१॥

हे यजमानाः तमग्निं पृच्छत। यत्स्वर्गादिविषयं प्रष्टव्यमस्ति तत्तस्यैव प्रष्टव्यमस्ति। तस्यैव प्रष्टव्यत्वेऽतिशयमाह। स जगाम। स सर्वत्र गच्छति। अत एव स वेद। स च प्रष्टव्यं जानाति। किमितरसाधारण्येन। नेत्याह। स चिकित्वान् स एव चेतनावान्। स विशेषज्ञ इत्यर्थः। स एवेयते। ज्ञेयसकाशं गच्छति। पुनर्गतिरेव विशेष्यते। सः सोऽग्निरेव नु क्षिप्रमीयते। यद्यजमानस्य ज्ञेयमस्ति तमर्थं ज्ञातुं शीघ्रमेव गच्छतीत्यर्थः। यद्वा ज्ञानार्थमीयते। सेव्यते। तथा शीघ्रमनुसेव्यते। यस्मादयमुक्तरूपः तस्मात्तमेव पृच्छतेत्यर्थः। तत्रापेक्षिताः कामाः संतीत्याह। तस्मिन्नग्नौ प्रशिषः प्रशासनानि नियमनसामर्थ्यानि संति। असाध्यं नियम्यापि साधयितुं शक्त इत्यर्थः। किंच तस्मिन्नेवाग्नाविष्टय इष्टव्या भोगाः सर्वफलसाधका यागा वा संति। किंच सोऽग्निर्वाजस्यान्नस्य शवसो बलस्य च पतिः पालयिता दाता। किंच शुष्मिणो बलवतो राजादेरपि पतिः स्वामी। यस्मादयं महानुभावस्तस्मात्तमेव पृष्ट्वा पुरुषार्थं साधयतेति ॥

॥ अथ द्वितीया ॥

तमित्पृच्छंति न सिमो वि पृच्छति स्वेनेव धीरो मनसा यदग्रभीत्।
न मृष्यते प्रथमं नापरं वचोऽस्य क्रत्वा सचते अप्रदृपितः ॥ २ ॥
तं। इत्। पृच्छंति। न। सिमः। वि। पृच्छति। स्वेनऽइव। धीरः। मनसा। यत्। अग्रभीत्।
न। मृष्यते। प्रथमं। न। अपरं। वचः। अस्य। क्रत्वा। सचते। अप्रऽदृपितः ॥ २ ॥

पूर्वमंत्रेऽग्निं पृच्छतेत्युक्तं। अत्र तु सोऽनुनयेन प्रष्टव्य इत्याह। तमित् तमेवाग्निं पृच्छंति स तु नान्यं पृच्छति प्रश्नसमयेऽपि। सिमः सर्वजनो न

विपृच्छति । विपरीतं न पृच्छति । पृष्टोऽपि धीरो धीमानयं स्वेनेव मनसा ॥ इवशब्द एवार्थे ॥ स्वकीययैव बुद्ध्या यत् यत्कार्यमग्रभीत् वदामीत्यादत्ते । तदेव प्रतिब्रूते न तु प्रश्नानुकूलं । स्वतंत्रेश्वर इत्युक्तं भवति । यद्वा प्रष्टा धीमान् स्वेन मनसा वाचा वाच्यं विचार्य यदग्रभीत् यद्वाक्यं वक्तव्यत्वेन स्वीकुर्यात् तदेवाग्निं पृच्छति न तु बहु भाषत इत्यर्थः । परवाक्यासह्यत्वमाह । अयमग्निः प्रथमं वचः स्ववाक्यात्पूर्वभावि वचनं न मृष्यते । न सहते । तथापरं वचः स्वोक्त्यनंतरभावि प्रतिवचनं न मृष्यते । यस्मादयमेवंविधस्तस्मादप्रहपितः । अप्रहप्तः । यद्वा तेन शिक्षितोऽनुदंडः सर्वो लोकोऽस्य महानुभावस्याग्नेः क्रत्वा क्रतुना रक्षणादिकर्मणा सह सचते । संगच्छते । जीवतीत्यर्थः ॥

॥ अथ तृतीया ॥

तमिद्गच्छंति जुह्व१स्तमर्वतीर्विश्वान्येकः शृणवद्वचांसि मे ।
पुरुप्रैषस्ततुरिर्यज्ञसाधनोऽच्छिद्रोतिः शिशुरादत्त सं रभः ॥ ३ ॥

तं । इत् । गच्छंति । जुह्वः । तं । अर्वतीः । विश्वानि । एकः । शृणवत् । वचांसि । मे ।
पुरुऽप्रैषः । ततुरिः । यज्ञऽसाधनः । अच्छिद्रऽऊतिः । शिशुः । आ । अदत्त । सं । रभः ॥ ३ ॥

जुह्वोऽस्मदीया जुहूपभृदादयस्तमित् तमेवोद्दिश्याज्यपूर्णाः सत्यो गच्छंति प्रीणयितुं । यद्वा हूयंत इति जुह्व आहुतयः सोमादिरूपाः । अथवा जुह्वादिषु स्थितान्याज्यान्यपाश्रयाश्रयिणोरभेदेन जुह्व इत्युच्यंते । मंचाः क्रोशंतीतिवत् । ता अपि तमेव गच्छंति । अस्य सर्वदेवतात्मकत्वात् । अत्रैवेतरदेवतार्थमपि हूयमानं चेति भावः । किंच अर्वतीः प्राप्तिमत्यः स्तुतयस्तमित् तमेवाग्निं गच्छंति सर्वदेवतात्मकत्वादेव । स एवैकोऽयमग्निर्विश्वानि मे मदीयानि वचांसि स्तोत्ररूपाणि शृणवत् । शृणोति । अग्नेः सर्वदेवतात्मकत्वं तैत्तिरीया आहुः । ते देवा बिभ्यतोऽग्निं प्राविशन् तस्मादाहुरग्निः सर्वा देवता इति । तथात्रैव परस्तादाम्नास्यते । ऋ० सं० ५. १. ३. । त्वमग्ने वरुणो जायसे यत्त्वं मित्र इत्यादिकोऽस्य विशेष इत्युच्यते । पुरुप्रैषो बहुप्रैषभाक् । यद्वा बहुप्रेषणः । सर्वस्याज्ञापयितेत्यर्थः । ततुरिस्तारयिता ॥ तरतेरंतर्णीतण्यर्थादादृगमहन इति किन्प्रत्ययः । बहुलं छंदसीत्युत्वं ॥ यज्ञसाधनो यज्ञसाधकः । अग्न्यधीनत्वाद्यज्ञस्य । अच्छिद्रोतिरविच्छिन्नरक्षणः शिशुः शिशुवत्प्रियकारी शोचयिता वा शत्रूणां । एवंभूतोऽग्निः सं रभो यज्ञादिसंरंभवान् सन् आदत्त । आदत्ते हविरादिकं स्वीकरोति ॥

॥ अथ चतुर्थी ॥

उपस्थायं चरति यत्समारत सद्यो जातस्तत्सार युज्येभिः ।
अभि श्वांतं मृशते नांद्ये मुदे यदीं गच्छंत्युशतीरपिष्ठितं ॥ ४ ॥

उपऽस्थायं । चरति । यत् । संऽआरत । सद्यः । जातः । तत्सार । युज्येभिः ।
अभि । श्वांतं । मृशते । नांद्ये । मुदे । यत् । ईं । गच्छंति । उशतीः । अपिऽस्थितं ॥ ४ ॥

यत् यदाध्वर्युरुपस्थायं चरति । उपस्थायोपस्थायानुतिष्ठति । उत्पत्त्यनुकूलव्यापारं करोति । कदेत्याह । यत् समारत । समगच्छत मथनेनाविरभवत् ॥ समो गम्यृच्छीत्यर्तेरात्मनेपदं ॥ सद्यस्तदानीमेव जात उत्पन्नः सन् युज्येभिर्योक्तुं संबंद्धुं समर्थैः फलैर्मिश्रयितुमर्हैस्तेजोभिर्वा युक्तः सन् तत्सार । अरण्योर्गूढः सन् चचार । यद्वा युज्येभिरश्वैर्जातमात्र एव सर्वत्र संचचार ॥ त्सर छद्मगतौ । लिटि णलि रूपं ॥ एवं प्रवृद्धोऽयं श्वांतं श्रांतं शांतं वा यजमानं नांद्ये नंदनीये कर्मणि निमित्तभूते सति मुदे तस्य संतोषायाभिमृशते । अभिमर्शनं करोति फलप्रदानेनेति भावः । यथा लोके गुर्वादिः श्रांतं शिष्यादिकं स्पृशति तद्वत् । कदेति चेत् उच्यते । यत् यदापिष्ठितं व्याप्य वर्तमानमीमेनमग्निमुशतीः कामयमाना आज्यधाराः स्तुतयो वा गच्छंति । प्राप्नुवंति । तदाभिमृशते ॥

॥ अथ पंचमी ॥

स ईं मृगो अप्यो वनर्गुरुप त्वच्युपमस्यां नि धायि ।
व्यब्रवीद्वयुना मर्त्येभ्योऽग्निर्विद्वाँ ऋतचिद्धि सत्यः ॥ ५ ॥

सः । ईं । मृगः । अप्यः । वनर्गुः । उप । त्वचि । उपऽमस्यां । नि । धायि ।
वि । अब्रवीत् । वयुना । मर्त्येभ्यः । अग्निः । विद्वान् । ऋतऽचित् । हि । सत्यः ॥ ५ ॥

स ईं स एवाग्निरुपमस्यामुपमायामुपमास्पदायां त्वच्योषध्यादिभिराच्छादितायां वेद्यामुपनिधायि । उपस्थाप्यते । उत्तरत्रोपभोगाय । कीदृशः सः । मृगः । मार्जयितान्वेषणशीलो वा ॥ मृगो मार्ष्टेर्गतिकर्मणः । नि॰ १. २०. । इति यास्कः ॥ अप्यः । आप्यो गंतव्यः । अपः कर्म तत्र साधुर्वा । वनर्गुः । वनगामी ॥ ऋच्छतेर्गमेश्चेदं रूपं । यद्वा गमेरेव । उपपदस्य रुडागमश्छांदसः ॥ एवंभूतोऽग्निर्मर्त्येभ्यो मरणधर्मेभ्यो यजमानादिरूपेभ्यो वयुनानि प्रज्ञानान्यनुष्ठेयज्ञानानि व्यब्रवीत् ।

विशेषेण ब्रवीति। उपदिशति॥ वयुनमिति प्रज्ञानाम वयुनमभिख्येति तन्नामसु पाठात्॥ ईदृक् सामर्थ्यमस्तीति दर्शयति। अयमग्निर्विद्वान् सर्वज्ञ ऋतचित् यज्ञस्योदकस्य वा चेतिता ज्ञाता सत्यः। सत् क्रियमाणं कर्म तत्र साधुः। सत्सु भवो वा सत् फलं तदर्हतीति वा। सम्यक् प्रद इत्यर्थः। यस्मादयमुक्तसामर्थ्योपेतस्तस्मात्प्रज्ञोपदेशो युक्तः। हिशब्दः प्रसिद्धौ॥

॥ इति द्वितीयस्य द्वितीये चतुर्दशो वर्गः॥

त्रिमूर्धानमिति पंचर्चं षष्ठं सूक्तं दैर्घतमसं। आग्नेयं पूर्वचाग्नेयं तु तदित्युक्तत्वात्। त्रिमूर्धानमित्यनुक्रमणिका॥ प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छंदसीदमादिसूक्तत्रयस्य विनियोगः। अथैतस्या इति खंडे सूचितं त्रिमूर्धानमिति त्रीणि। आ॰ ४. १३.। इति॥

॥ तत्र प्रथमा॥

त्रिमूर्धानं सप्तरश्मिं गृणीषेऽनूनमग्निं पित्रोरुपस्थे।
निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसं॥१॥
त्रिऽमूर्धानं। सप्तऽरश्मिं। गृणीषे। अनूनं। अग्निं। पित्रोः। उपऽस्थे।
निऽसत्तं। अस्य। चरतः। ध्रुवस्य। विश्वा। दिवः। रोचना। आपप्रिऽवांसं॥१॥

अनयाग्निर्यज्ञरूपेण स्तूयते। त्रिमूर्धानं सवनत्रयरूपमूर्धत्रयोपेतं॥ द्वित्रिभ्यां पाद्न्मूर्धसु बहुव्रीहावित्युत्तरपदांतोदात्तत्वं॥ किंच सप्तरश्मिं नियामकसप्तच्छंदोयुक्तं। अनूनमविकलं संपूर्णफलं। अग्निमग्निसाध्यमंगनादिगुणयुक्तं वा पित्रोरुपस्थे द्यावापृथिव्योरुत्संगे निषत्तं निषण्णं। मध्ये वर्तमानमित्यर्थः। भूमिस्थद्रव्येण द्युलोकस्थदेवताभिश्च साध्यत्वादिति यावत्। किंच ध्रुवस्य निश्चलस्य चरतो हविर्भक्षयतोऽस्याग्नेः संबंधिनं यज्ञं दिवो द्युलोकादागतानि विश्वानि रोचनानि देवविमानान्यापप्रिवांसं सर्वतः पूरयितारं गृणीषे। गृणीहि स्तुहि। यद्वा। अयमग्निरेवोच्यते। त्रिमूर्धवदत्र क्षित्यंतरिक्षद्युलोकाख्यस्थानत्रयोपेतं लोकत्रयव्याप्तमित्यर्थः। गार्हपत्यादिस्थानत्रयवर्तिनं वा। सप्तरश्मिं सप्तज्वालं। अनूनमन्यूनं। पित्रोर्द्यावापृथिव्योरुपस्थ उत्संगे निषत्तं॥ नसत्तनिषत्तेति निपातनान्निष्ठानत्वाभावः॥ निषण्णं। आपप्रिवांसं सर्वतः पूरयंतं कामानां। उक्तलक्षणविशिष्टमग्निं गृणीषे। गृणीहि स्तुहि। किंच चरतः सर्वत्र ज्वालाभिर्गच्छतो

ध्रुवस्य धृतत्वादविचलितस्य दिवो द्योतमानस्यास्याग्नेर्विश्वा सर्वाणि रोचना रोचमानानि तेजांसि सर्वत्र व्याप्नुवंतीति शेषः। ईदृशमग्निं स्तुहीत्यंतरात्मनः प्रैषः॥

॥ अथ द्वितीया ॥

उक्षा महाँ अभि ववक्ष एने अजरस्तस्थावितऊतिर्ऋष्वः।
उर्व्याः पदो नि दधाति सानौ रिहंत्यूधो अरुषासो अस्य ॥ २॥

उक्षा। महान्। अभि। ववक्षे। एने इति। अजरः। तस्थौ। इतःऽऊतिः। ऋष्वः।
उर्व्याः। पदः। नि। दधाति। सानौ। रिहंति। ऊधः। अरुषासः। अस्य ॥ २॥

उक्षा सेक्ता। फलप्रदातेत्यर्थः। अत एव महान् महिम्ना स्वरूपेणोद्वृत्तवृषभसदृशोऽयमग्निरेने द्यावापृथिव्यावभि अभिक्रम्य व्याप्य ववक्षे। वहति। व्याप्नोतीत्यर्थः॥ वहतेर्लेटि छांदसः शपः श्लुः। लोपस्त आत्मनेपदेष्विति तलोपः। सिब्बहुलमिति सिप्॥ वृष्ट्यादिप्रदानेन हविर्वहनेन च लोकद्वयस्य वासिनो देवान्मनुष्यांश्च रक्षतीत्यर्थः। किंचायमजरो जरारहित ऋष्वो महान् पूज्यः॥ महन्नामैतत् ऋष्व उक्ष इति तन्नामसु पाठात्॥ तथा इतऊतिः प्राप्तरक्षणः सन् तस्थौ। स्थितो वर्तते। यद्वा उक्तगुणोऽयमितऊतिरित एव गमनवान् अस्मद्देवयजनाभिमुखगमनवान् तस्थौ। वर्तते। तदनतरमुर्व्या विस्तृताया भूम्याः सानौ समुच्छ्रते प्रदेशे वेदिलक्षणे पदो निदधाति। पदानि स्थापयति करोति। किंचास्याग्नेररुषासोऽरुषा आरोचना ऊधरूधःस्थानीयमंतरिक्षं रिहंति लिहंति। यद्वास्योधरूधःस्थानीयं यज्ञमरुषास आरोचना ब्रह्मवर्चसेन यजमाना रिहंति। अभिमतस्वर्गादीनि लिहंति॥

॥ अथ तृतीया ॥

समानं वत्समभि संचरंती विष्वग्धेनू वि चरतः सुमेके।
अनपवृज्याँ अध्वनो मिमाने विश्वान्केताँ अधि महो दधाने ॥ ३॥

समानं। वत्सं। अभि। संचरंती इति संऽचरंती। विष्वक्। धेनू इति। वि। चरतः। सुमेके इति सुऽमेके।
अनपऽवृज्यान्। अध्वनः। मिमाने इति। विश्वान्। केतान्। अधि। महः। दधाने इति॥ ३॥

समानमेकमेव वत्सं वत्सस्थानीयं पुत्रवद्धर्षहेतुमग्निमभिमुखं संचरंती संचरंत्यौ द्वे धेनू अग्निहितकरणेन प्रीणयित्र्यौ पत्नीयजमानलक्षणे धेनू विष्वग्विचरतः। संचरतः। स्तनपानादिसदृशेंधनप्रक्षेपसंमार्जनादिना सम्यक् वर्धयत इत्यर्थः। कीदृश्यौ ते। सुमेके। शोभनकर्माणौ शोभनमेहने वा। परिचरणकुशले इत्यर्थः। किंच अनपवृज्यान् अपवर्जनीयरहितान्॥ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥ अध्वनो मार्गान् अग्नेः प्रांतप्रदेशान् केशाद्यमेध्यरहितान्निमाने संपादयित्र्यौ। किंच विश्वान्केतान् सर्वाणि प्रज्ञानानि प्रवर्धनविषयाणि महो महांत्यधि अधिकं दधाने धारयंत्यौ। ईदृश्यावध्वर्युयजमानरूपे जायापतिरूपे वा धेनू विष्वग्विचरतः॥

॥ अथ चतुर्थी ॥

धीरा॑सः प॒दं क॒वयो॑ नयंति॒ नाना॑ हृ॒दा रक्ष॑माणा अजु॒र्यं।
सिषा॑संत॒: पर्य॑पश्यंत॒ सिंधु॑मा॒विरे॑भ्यो अभव॒त्सूर्यो॒ नॄन्॥ ४॥
धीरा॑सः। प॒दं। क॒वयः॑। न॒यं॒ति॒। नाना॑। हृ॒दा। रक्ष॑माणाः। अ॒जु॒र्यं।
सिसा॑संतः। परि॑। अ॒प॒श्यं॒त। सिंधु॑। आ॒विः। ए॒भ्यः॒। अ॒भ॒व॒त्। सूर्यः॑। नॄन्॥ ४॥

धीरासो धीमंतः प्रयोगज्ञा अध्वर्य्वादयोऽजुर्यमजयमजीर्णमेनमग्निं पदं स्थानं वेदिलक्षणं नयंति। प्रापयंति। मथनदेशाद्गार्हपत्याद्वा। अथवा वक्ष्यमाणलक्षणा यजमानादयः पदमास्पदं सर्वकामानामास्पदमेनं गमयंति। कीदृशास्ते। कवयः। क्रांतदर्शिनो मेधाविनोऽनूचाना वा। ये वा अनूचानास्ते कवय इति श्रुतेः। किंच नाना हृदा बहुप्रकारया बुद्ध्या रक्षमाणा धारयमाणाः। किंचैवंरूपास्ते सिंधुं स्यंदमानं यज्ञद्वारा फलानि स्रवंतमग्निं सिषासंतः संभक्तुमिच्छंतः॥ सनेः सनि सनीवंतर्धेति विकल्पनादिडभावः। जनसनखनामित्यात्वं॥ पर्यपश्यंत। परितः पश्यंति। शुश्रूषंत इत्यर्थः। किंच सूर्यः सर्वस्य प्रसवितायमग्निरेभ्य एवं कुर्वद्भ्यो नॄन् नृभ्यो नेतृभ्य आविरभवत्। तेषामनुग्रहेण प्रत्यक्षोऽभवत्॥ नॄनित्यत्र वचनव्यत्ययः॥ नॄन् प्राणिनोऽनुग्रहीतुमिति वा योज्यं॥

॥ अथ पंचमी ॥

दि॒दृक्षेण्य॒: परि॒ काष्ठा॑सु जेन्य॑ ई॒ळेन्यो॑ म॒हो अर्भा॑य जी॒वसे॑।
पु॒रु॒त्रा यदभ॑व॒त्सूरहै॑भ्यो॒ गर्भे॑भ्यो म॒घवा॑ वि॒श्वद॑र्शतः॥ ५॥

दिदृक्षेण्यः। परि। काष्ठासु। जेन्यः। ईळेन्यः। महः। अर्भाय। जीवसे।
पुरुऽत्रा। यत्। अभवत्। सूः। अह। एभ्यः। गर्भेभ्यः। मघऽवा। विश्वऽदर्शतः ॥५॥

अयमग्निः काष्ठासु परस्परं व्यावर्तमानासु दशसु दिक्षु दिदृक्षेण्यः। अनुग्रहयुक्त्या दर्शनयुक्तो भवति। यद्वा द्रष्टुमेष्टव्यो दर्शनेच्छाविषयभूतः ॥ दृशेः सनंतात्कृत्यार्थे तवैकेन्केन्येति केन्यप्रत्ययः ॥ अत एव जेन्यः सर्वत्र प्रादुर्भवनशीलो भवति जयशीलो वा। किंच प्रदानसमय ईळेन्यः स्तुत्यो भवति। किमर्थमेवं। महो महतो देवादेरर्भायार्भकस्याल्पस्य यजमानादेर्वा जीवसे जीवनाय। हविर्वहनेन धनप्रदानेनेति विवेकः। तत्रोपपत्तिमाह। यदह यस्मात्खलु पुरुत्रा बहुषु देशेषु ॥ देवमनुष्येत्यादिना त्राप्रत्ययः ॥ मघवा हविर्लक्षणान्नवान् विश्वदर्शतः सर्वविषयद्रष्टव्यवानयमग्निरेभ्यो गर्भेभ्यः ॥ षष्ठ्यर्थे चतुर्थी ॥ एषामृत्विजां गर्भवच्छिशुवदत्यंतरक्षणीयानां सूरभवत्। प्रसवितोत्पादयिताभवत्। भवति। तस्मान्नाना हृदा रक्षमाणाः कवयः पदं नयंतीति पूर्वत्र संबंधः ॥

॥ इति द्वितीयस्य द्वितीये पंचदशो वर्गः ॥

कथा त इति पंचर्चं सप्तमं सूक्तं दैर्घतमसमाग्नेयं त्रैष्टुभं। कथेत्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोरस्य सूक्तस्य विनियोगस्त्रिमूर्द्धानमिति त्रीणीत्यनेनोक्तः ॥

॥ तत्र प्रथमा ॥

कथा ते अग्ने शुचयंत आयोर्ददाशुर्वाजेभिराशुषाणाः।
उभे यत्तोके तनये दधाना ऋतस्य सामन्रणयंत देवाः ॥१॥

कथा। ते। अग्ने। शुचयंतः। आयोः। ददाशुः। वाजेभिः। आशुषाणाः।
उभे इति। यत्। तोके इति। तनये। दधानाः। ऋतस्य। सामन्। रणयंत। देवाः ॥१॥

हे अग्ने ते तव संबंधिनो रश्मयः शुचयंतो दीप्तिं सर्वत्र चक्षाणाः प्रकटयंत आशुषाणा आशु शीघ्रं संभक्तार आशूसंभक्तारो वा। वाय्वादेरपि शीघ्रं संभक्तार इत्यर्थः। यद्वा समंताच्छोषयितारः। यद्वा सर्वं व्याप्नुवंतः ॥ अश्नोतेर्लिटः कानच्। व्यत्ययेनोप्रत्ययः। सिच् चेति द्विविकरणता। आङ्पूर्वादंतर्भावितण्यर्थाच्छुषेः शानचि छांदसः शपो लुक्। आशुशब्दात्सनोतेः कर्मण्यण् ॥

ईदृशा रश्मयो वाजेभिरन्नैः सहितमायोरायुरायुष्यं ॥ कर्मणि षष्ठी ॥ कथा केनोपायेन ददाशुः । ददति ॥ दाशृ दाने । छांदसो लिट् ॥ तमुपायमनुगृहाणेत्यर्थः । रश्मीनां वरप्रदानं कुत्र दृष्टमिति चेत् उच्यते । यद्यस्मादुभे उक्ते अन्नायुषी तोके पुत्रे तनयेऽनवच्छेदेन कुटुंबस्य विस्तारके । यद्वा तोके पुत्रे तनये तत्पुत्रादौ च दधाना धारयंतो देवा व्यवहर्तारो यजमाना ऋतस्य यज्ञस्य संबंधिनि सामन् साम्नि रथंतरादौ रणयंत । रमंते । रमयंति शब्दयंत्येव वा । यस्मादन्नायुःपुत्रादिसहिताः सोमेनेष्ट्वा साम्नि रमंते तस्माद्रश्मयो ददतीत्यवगम्यत इत्यर्थः । तादृशान्त्वदीयान्रश्मीन् मामप्यनुगृहाणेत्यर्थः ॥

॥ अथ द्वितीया ॥

बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वंदारुस्ते तन्वं वंदे अग्ने ॥ २ ॥
बोध । मे । अस्य । वचसः । यविष्ठ । मंहिष्ठस्य । प्रऽभृतस्य । स्वधाऽवः ।
पीयति । त्वः । अनु । त्वः । गृणाति । वंदारुः । ते । तन्वं । वंदे । अग्ने ॥ २ ॥

हे यविष्ठ युवतम हे स्वधावो हविर्लक्षणान्नेन तद्वन्नग्ने मे मदीयस्य मंहिष्ठस्यातिशयेन पूजनीयस्य प्रभृतस्य प्रकर्षेण संपादितस्यास्येदानीं क्रियमाणस्य वचसः स्तुतिरूपस्य वचनस्य ॥ कर्मणि षष्ठी ॥ उक्तलक्षणं वचो बोध । बुध्यस्व । स्तुतो भवेत्यर्थः । हे अग्ने लोके त्वः ॥ अत्र यास्कस्त्वो नेम इत्यर्धस्येत्युक्त्वैतदेवोदाजहार । नि० ३. २०. ॥ एको जनः पीयति ॥ वधकर्मैतत् ॥ हिनस्ति । यज्ञादिना न पूजयतीत्यर्थः । त्व एकोऽनुगृणाति । अनुकूलमुच्चारयति । तयोर्मध्ये हे अग्ने वंदारुर्वंदनशीलोऽहं ते तव तन्वं तनुं तव मूर्तिं वंदे । स्तौमि ॥

॥ अथ तृतीया ॥

ये पायवो मामतेयं ते अग्ने पश्यंतो अंधं दुरितादरक्षन् ।
ररक्ष तान्सुकृतो विश्ववेदा दिप्संत इद्रिपवो नाह देभुः ॥ ३ ॥
ये । पायवः । मामतेयं । ते । अग्ने । पश्यंतः । अंधं । दुःऽइतात् । अरक्षन् ।
ररक्ष । तान् । सुऽकृतः । विश्वऽवेदाः । दिप्संतः । इत् । रिपवः । न । अह । देभुः ॥ ३ ॥

अत्रेतिहासमाचक्षते। उचथ्यबृहस्पतिनामानौ द्वावृषी आस्तां। तत्रोचथ्यस्य ममता नाम भार्या। सा च गर्भिणी। तां बृहस्पतिर्गृहीत्वारमयत्। शुक्रनिर्गमनावसरे प्राप्ते गर्भस्थं रेतः प्रावादीत् हे मुने रेतो मा त्याक्षीः पूर्वमहं वसामि रेतःसंकरं मा कार्षीरिति। एवमुक्तो बृहस्पतिर्बलात्प्रतिरुद्धरेतस्कः सन् शशाप। हे गर्भ त्वं यतो रेतोनिरोधमकरोः अतस्त्वं दीर्घं तमः प्राप्नुहि जात्यंधो भवेति। एवं शप्तो ममतायां दीर्घतमा अजायत। स चोत्पन्नस्तमोव्यययाग्निमस्तौषीत्। स च स्तुत्या प्रीत आंध्यं पर्यहरदिति। तदिदमत्रोच्यते। हे अग्ने ते तव संबंधिनो ये पायवः प्रसिद्धाः पालयितारो रश्मयो मामतेयं ममतायाः पुत्रं दीर्घतमसमंधं पश्यंतोऽधोऽयं अतोऽस्माभी रक्षणीय इत्यवगच्छंतो दुरिताद्दुष्टं प्राप्नाद्दुःखादरक्षन् तान्सुकृतः सुखकर्तृन् विश्ववेदा विश्वप्रज्ञो ररक्ष। रक्षति। अस्मत्पालनायेति भावः। तैरस्मानपि रक्षिष्यतीत्यर्थः। एवं रक्षितानस्मान् दिप्संतो दंभितुमिच्छंतो रिपवः कामादयो नाह देभुः॥ अहेति विनिग्रहार्थीयः॥ न खलु दंभितुं शक्नुवंति॥ दंभु दंभे। श्रंथिग्रंथिदंभिस्वंजीनामिति वक्तव्यं। पा॰ १. २. ६. १.। इति लिटः कित्त्वादनिदितामिति नलोपः। तस्यासिद्धत्वादेत्वाभ्यासलोपयोरप्राप्तौ दंभेश्चेति वक्तव्यमिति तौ विधीयेते॥ यद्वा सूक्तद्रष्टा दीर्घतमाः स्वयमेवात्मानं परोक्षतया ब्रवीति॥

॥ अथ चतुर्थी ॥

यो नो अग्ने अररिवाँ अघायुररातीवा मर्चयति द्वयेन।
मंत्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः॥ ४॥
यः। नः। अग्ने। अररिऽवान्। अघऽयुः। अरातिऽवा। मर्चयति। द्वयेन।
मंत्रः। गुरुः। पुनः। अस्तु। सः। अस्मै। अनु। मृक्षीष्ट। तन्वं। दुःऽउक्तैः॥ ४॥

हे अग्ने नोऽस्मान्युष्मद्रक्षितान् योऽघायुर्मारणादिरूपपापेच्छावान् अररिरदाता। अस्मद्दानप्रतिबंधक इत्यर्थः॥ रातेश्छांदसस्य लिटः क्वसुः॥ अरातीवा स्वयमदानवान्॥ छंदसि वनिप्। तदिच्छतीति मत्वर्थीयो वनिप्॥ शत्रुत्वमाचरन् यः शत्रुर्द्वयेन मानसवाचिकभेदेन द्विविधेन॥ न ददामीति मानसो मंत्रः। निंदाद्यारोपेण दाननिवारणं वाचिको मंत्रः। यद्वा मायाहेतुकेन विरुद्धरूपेण द्विविधेन मंत्रेण। यो विरुद्धमाचरति तन्न संकीर्तयति यच्च प्रियं ब्रूते

तन्न करोति अन्यद्वदतीत्येवं मंत्रस्वरूपद्वैविध्यं। पूर्वं मानसवाचिकभेदेन इदानीं वाचिककायिकभेदेनेति विवेकः ॥ ईदृशेन मंत्रेण यः शत्रुर्मर्चयति। भर्त्सयति विधेयीकरोति वास्मान्। स मंत्रैकदेशो मानसरूपोऽस्मै पुनर्गुरुरस्तु॥ षष्ठ्यर्थे चतुर्थी ॥ प्रयोक्तुरेव पुनर्गरितास्तु। तथा दुरुक्तैर्दुर्वाक्यैर्निंदारूपैर्वाचिकैस्तन्वं स्वकीयां तनुमनुमृक्षीष्ट। अनुमार्ष्टु। अनुक्रमेण लुंपतु। यद्वा स द्विविधो मंत्रोऽस्मै प्रयोक्तुरेव गुरुर्गरितास्तु। अन्यान्यपस्तन्यक्काराय प्रयुक्तानि निष्ठुरभाषणानि संति। तैर्दुरुक्तैः सोऽरातिः स्वतनुमेवावलुंपतु। स्वात्मानमेवावृत्य दहत्वित्यर्थः ॥

॥ अथ पंचमी ॥

उत वा यः सहस्य प्रविद्वान्मर्तो मर्तं मर्चयति द्वयेन।

अतः पाहि स्तवमान स्तुवंतमग्ने माकिर्नो दुरिताय धायीः ॥ ५ ॥

उत। वा। यः। सहस्य। प्रऽविद्वान्। मर्तः। मर्तं। मर्चयति। द्वयेन।

अतः। पाहि। स्तवमान। स्तुवंतं। अग्ने। माकिः। नः। दुःऽइताय। धायीः ॥ ५ ॥

पूर्वमंत्रे द्विविधकुटिलमंत्रेण कर्ता तन्मंत्रणं प्राप्नोतु मास्मानित्युक्तं। अत्र तु तन्मंत्रेणास्मान्पाहीत्यग्निः प्रार्थ्यते। उत वा हे सहस्य। सह इति बलनाम। तत्र भवाग्ने। यो मर्तो मरणधर्मा मनुष्यः प्रविद्वान् मायामंत्रेण प्रकर्षेण जानन् द्वयेन पूर्वोक्तरीत्या द्विविधमंत्रेण मर्तं मनुष्यं मर्चयति। विधेयीकरोति भर्त्सयति वा। अतस्तादृशाद्भर्त्सनात्तत्कर्तुः सकाशाद्वा हे स्तवमान स्तूयमानाग्ने स्तुवंतं स्तुतिं कुर्वंतं मां पाहि। रक्ष। किंच नोऽस्मान्दुरिताय तत्कृताय दुर्मंत्रणप्रयुक्तदुःखाय समर्थं माकिर्धायीः। मा स्थापय। दुरितभाजनं मा कार्षीरित्यर्थः ॥ धि धारणे। व्यत्ययेनेट्। सिचि वृद्धिः। न माङ्योग इत्यडभावः ॥

॥ इति द्वितीयस्य द्वितीये षोडशो वर्गः ॥

मथीद्यदिति पंचर्चमष्टमं सूक्तं दैर्घतमसं त्रैष्टुभमाग्नेयं। मथीद्यदित्यनुक्रमणिका। सूक्तत्रयमध्यस्य तृतीयत्वेन पूर्वं विनियोग उक्तः ॥

॥ तत्र प्रथमा ॥

मथीद्यदीं विष्टो मातरिश्वा होतारं विश्वाप्सुं विश्वदेव्यं।

नि यं दधुर्मनुष्यासु विक्षु स्वर्१ण चित्रं वपुषे विभावं ॥ १ ॥

मथीत्। यत्। ई्। विष्टः। मातरिश्वा। होतारं। विश्वऽअप्सुं। विश्वऽदेव्यं।
नि। यं। दधुः। मनुष्यासु। विक्षु। स्वः। न। चित्रं। वपुषे। विभाऽवं ॥ १ ॥

होतारं देवानामाह्वातारं विश्वाप्सुं॥ अप्स्विति रूपनाम॥ नानारूपं पार्थिववैद्युतजाठरादिभेदेनाहवनीयादिभेदेन वा। यद्वा कालीकराल्यादिरूपेण ज्वालानां वैरूप्याद्विश्वरूपत्वं। विश्वदेव्यं सर्वदेवयोग्यक्रियासाधुं यदी यमेनमग्निं मातरिश्वा वृष्ट्यादिनिर्माचंतरिक्षश्वसनो वायुर्विष्टः काष्ठेष्वंतःप्रविष्टः सन् मथीत्। अमथ्नात्। प्रावर्धयदित्यर्थः॥ मथे विलोडने। ह्म्यंतक्षणेति वृद्धिप्रतिषेधः॥ पुनः स एव विशेष्यते। यमग्निं मनुष्यासु मत्वा कर्म कुर्वतीषु विक्षु ऋत्विग्रूपासु प्रजासु पूर्वं वपुषे यज्ञसिद्धये निदधुः। धारयंति यजमानाः॥ मनुष्यशब्दो निरुक्ते बहुधा निरुक्तः। मनुष्याः कस्मान्मत्वा कर्माणि सीव्यंति मनस्यमानेन सृष्टा मनोरपत्यं मनुषो वा। नि॰ ३. ७.। इति॥ यद्वा पूर्वं देवा मनुष्यासु मनोरपत्यभूतासु विक्षु प्रजासु प्राणिषु वपुषे स्वरूपाय यागादिस्वरूपप्रकाशाय शरीरधारणाय वा जाठराग्निरूपेण निदधुः। स्थापितवंतः। तत्र दृष्टांतः। स्वर्ण। स्वरणं स्वीरणं वा। आदित्यमिव चित्रं चायनीयं विभावं विविधप्रकाशवंतं यथा प्रकाशादिसाधनाय धारयंति तद्वत्॥ स्वःशब्दं यास्क एवं निरुवाच। स्वरादित्यो भवति सु अरणः सु ईरणः स्वृतो रसान्स्वृतो भासं ज्योतिषां स्वृतो भासेति वा। नि॰ २. १४.। इति॥ ईदृशं यं निदधुस्तं मथीदिति पूर्वत्रान्वयः॥

॥ अथ द्वितीया ॥

ददानमिन्न ददभंत मन्माग्निर्वरूथं मम तस्य चाकन्।
जुषंत विश्वान्यस्य कर्मोपस्तुतिं भरमाणस्य कारोः ॥ २ ॥
ददानं। इत्। न। ददभंत। मन्म। अग्निः। वरूथं। मम। तस्य। चाकन्।
जुषंत। विश्वानि। अस्य। कर्म। उपऽस्तुतिं। भरमाणस्य। कारोः ॥ २ ॥

मन्म मननीयं स्तोत्रं हविरादिकं वा ददानमित् अग्नये कुर्वाणमेव मां दंभितारो वैरिणो न ददभंत। दंभितुं हिंसितुं न प्रभवंति॥ दंभेर्बहुलं छंदसीति विकरणस्य श्लुः। व्यत्ययेनांतादेशः॥ मम कोऽतिशय इति उच्यते। तस्य प्रदातुर्मम वरूथं वरणीयं स्तोत्रादिकमयमग्निश्चाकन्। अत्यर्थं कामयते॥ कन-

तिः कांतिकर्मा । अस्माद्यङ्लुगंताल्लङि छांदसोऽडभावः । बहुलादेव वा छांदसस्तुजादित्वादभ्यासदीर्घः ॥ यस्मादेवं तस्मान्न दभ्नुवंतीत्यर्थः । न केवलमग्निरेव कामयते किंतु सर्वे देवाः कामयंत इत्याह । उपस्तुतिं भरमाणस्य कुर्वाणस्य कारोः स्तोतुरस्य यजमानस्य मम विश्वानि सर्वाणि हविःप्रदानादिरूपाणि जुषंत सर्वे देवाः । अतो न दद्भंतेत्यर्थः ॥

॥ अथ तृतीया ॥

नित्ये चिन्नु यं सदने जगृभ्रे प्रशस्तिभिर्दधिरे यज्ञियासः ।
प्र सू नयंत गृभयंत इष्टावश्वासो न रथ्यो रारहाणाः ॥ ३ ॥
नित्ये । चित् । नु । यं । सदने । जगृभ्रे । प्रशस्तिऽभिः । दधिरे । यज्ञियासः ।
प्र । सु । नयंत । गृभयंतः । इष्टौ । अश्वासः । न । रथ्यः । ररहाणाः ॥ ३ ॥

यज्ञियासो यज्ञयोग्या यजमाना ऋत्विजो वा यं मथनेनोत्पन्नमग्निं नित्ये चित्सदने नित्य एव गार्हपत्यलक्षणेऽग्न्यासादनस्थाने नु क्षिप्रं जगृभ्रे । गृह्णाति ॥ ग्रहेर्लिटीरयो र इति रेभावः । हृग्रहोर्भ इति भत्वं ॥ नित्यं गतश्रियो ध्रियते नित्यं गार्हपत्यमिति सूत्राद्गार्हपत्यो नित्यः । तदाश्रयत्वात्सदनमपि नित्यमुच्यते । गृहीत्वा प्रशस्तिभिः प्रशंसाभिः स्तुतिभिर्दधिरे । धारयंत्याहवनीयार्थं । धृत्वा चेष्टावेषणसाधने यज्ञे निमित्तभूते सति गृभयंत ऋत्विजः प्र सू नयंत । सुष्ठु प्रणयंति । तत्र दृष्टांतः । ररहाणा रंहसा गच्छंतः ॥ रहि गतौ । छांदसस्य लिटः कानच् । अनित्यमागमशासनमिति नुमभावः ॥ रथ्यो रथवंतस्तत्र नियुक्ताः ॥ छंदसीवनिपाविति रथशब्दान्मत्वर्थीय ईकारः ॥ अश्वासो न । अश्वा इव । ते यथा धृत्वा रथस्वामिनमभिमतदेशं नयंति तद्वत् ॥

॥ अथ चतुर्थी ॥

पुरूणि दस्मो नि रिणाति जंभैराद्रोचते वन आ विभावा ।
आदस्य वातो अनु वाति शोचिरस्तुर्न शर्यामसनामनु द्यून् ॥ ४ ॥
पुरूणि । दस्मः । नि । रिणाति । जंभैः । आत् । रोचते । वने । आ । विभाऽवा ।
आत् । अस्य । वातः । अनु । वाति । शोचिः । अस्तुः । न । शर्यां । असनां । अनु । द्यून् ॥ ४ ॥

अत्र दावाग्निरूपेणायं स्तूयते । दस्म उपक्षपयितायमग्निः पुरूणि बहूनि

वृक्षादीनि निरिणाति। नितरां हिनस्ति ॥ री गतिरेषणयोः। प्वादित्वाद्ध्रस्वः॥ केन साधनेनेति तदुच्यते। जंभैः। दंतस्थानीयाभिर्ज्वालाभिः। आत् दाहानंतरं वने वृक्षादिसमूहात्मके विभावा विविधप्रकाशयुक्तः सन् रोचते। दीप्तो भवति। आत् अनंतरमस्य शोचिर्ज्वाला अनुकूलं वातोऽग्निसखिभूतो वायुरनु द्यून्॥ अन्विति वीप्सार्थे॥ प्रतिदिनमनुकूलं वाति। ज्वाला आदाय गच्छति। तत्र दृष्टांतः। अस्तुः क्षेप्तुः सकाशादसनां गच्छंती शर्या न। शरो नाम हिंसासाधनलोहमयमिषुमुखं। तत्प्रचुरां। यद्वा शरो नाम वंशावांतरजातीयः काष्ठविशेषः। तद्विकारामिषुमिव। शर्या इषवः शरमय्य इति यास्कः। नि॰ ५.४.। यद्वा शर एव शर्या। अथवा शरो हिंसा तत्करोतीति शर्या इषुः। तां यथा वायुर्नोदकजन्यो वेगो वानुकूलं प्रेरयति तद्वत्॥

॥ अथ पंचमी ॥

न यं रिपवो न रिषण्यवो गर्भे संतं रेषणा रेषयंति।
अंधा अपश्या न दभन्नभिख्या नित्यास ईं प्रेतारो अरक्षन्॥५॥

न। यं। रिपवः। न। रिषण्यवः। गर्भे। संतं। रेषणाः। रेषयंति।
अंधाः। अपश्याः। न। दभन्। अभिऽख्या। नित्यासः। ईं। प्रेतारः। अरक्षन्॥५॥

यमग्निं गर्भे गर्भवद्रक्षकेऽरणिमध्ये संतं वर्तमानं रिपवो नरा न रेषयंति। न दुःखयंति। तथा रिषण्यवोऽन्ये हिंसकाः॥ दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यतीति क्यचि निपात्यते। क्याच्छंदसीत्युः॥ न हिंसंति। कीदृशास्ते। रेषणाः। हिंसनस्वभावाः। यद्वा तैः क्रियमाणा हिंसनप्रकारा न हिंसंति। किंचास्याभिख्या अभितः ख्यातिं माहात्म्यमंधा ज्ञानशक्तिरहिता अविद्वांसः अत एवापश्या अद्रष्टारः। यद्वा विद्वांसोऽप्यभावयितारः। अनुपासका इत्यर्थः। ईदृग्रूपा भयेऽपि न दभन्। न दभ्नुवंति न हिंसंति। लौकिकोपकारेणापि प्रयोजकत्वादिति भावः। तर्ह्यस्य पारमार्थिकं रूपं के जानंतीति चेत् उच्यते। नित्यासो नित्या अविचलितभक्तयः। अग्निहोत्रादिनित्यकर्मरता वा। अग्न्यनुग्रहात्स्वयमपि नित्या भविष्यंतीति भावि नित्यत्वमाश्रित्य नित्या उपचर्यंते। तादृशा यजमानाः प्रेतारो यज्ञादिना तमेव तर्पयितारः संत ईमेनमरक्षन्। रक्षंति। यज्ञादिरूपेण भजंत इत्यर्थः॥

॥ इति द्वितीयस्य द्वितीये सप्तदशो वर्गः॥

महः स इति पंचर्चं नवमं सूक्तं दैर्घतमसं वैराजमाग्नेयं। दशकास्त्रयो वि-राळेकादशका वेत्युक्तलक्षणसद्भावात्। तथा चानुक्रांतं। महः स वैराजमिति॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा ॥

म॒हः स रा॒य एष॑ते॒ पति॒र्दन्नि॒न इ॒नस्य॒ वसु॑नः प॒द आ।

उप॒ ध्रज॑न्त॒मद्र॑यो वि॒धन्नित्॥ १॥

म॒हः। सः। रा॒यः। आ। ई॒ष॒ते॒। पति॑ः। दन्। इ॒नः। इ॒नस्य॑। वसु॑नः। प॒दे। आ।

उप॑। ध्रज॑न्तं। अद्र॑यः। वि॒धन्। इत्॥ १॥

महो महतः पूज्यस्य रायो गवादिरूपस्य धनस्य पतिः पालकः स्वामी सोऽग्निर्दन् ददत् अभिमतं प्रयच्छन्॥ ददातेः शतरि छांदसः शपो लुक्। तस्य छंदस्युभयथेत्यार्द्धधातुकत्वादातो लोप इति चेत्याकारलोपः॥ आ आभिमुख्ये-नास्मद्देवयजनं प्रतीषते। गच्छति। किंच इनस्य स्वामिनोऽपीनः स्वामी सर्वस्य पतिरित्यर्थः। ईदृशोऽयं वसुनो धनस्य पद आस्पदभूते वेदिस्थान आ। आश्रयति॥ उपसर्गवशाद्योग्यक्रियाध्याहारः॥ यद्वा वसुनो निवासयोग्यस्य धनस्यापीन इति संबंधः। यद्वा वसुप्राप्तिः प्रसिद्धा। किंच उपध्रजंतमुपगच्छंत-मेनमभिषवार्थमद्रयो ग्राववंतो यजमाना विधन्नित्। परिचरंत्येव॥ विध वि-धाने। तौदादिकः। लङि बहुलं छंदसीत्यडभावः। निघाताभावश्छांदसः। यद्वा पूर्वत्र तच्छब्दश्रुतेरत्र यच्छब्दाध्याहारेणास्य संबंधादनिघातः॥ यद्वा अद्र-योऽभिषवग्रावाणः स्वशब्दैरुप उपेत्य विधन्नित्। पूजयंत्येव। आह्लादं जनयं-तीत्यर्थः॥

॥ अथ द्वितीया ॥

स यो वृषा॑ न॒रां न रोद॑स्योः॒ श्रवो॑भि॒रस्ति॑ जी॒वपी॑तसर्गः।

प्र यः स॑स्रा॒णः शि॑श्री॒त योनौ॑॥ २॥

सः। यः। वृषा॑। न॒रां। न। रोद॑स्योः। श्रवः॑ऽभिः। अस्ति॑। जी॒वपी॑तऽसर्गः।

प्र। यः। स॒स्रा॒णः। शि॒श्री॒त। योनौ॑॥ २॥

स तादृशो योऽग्निर्नरां न मनुष्याणामिव रोदस्योर्द्यावापृथिव्योरपि वृषा सेक्ता। उत्पादक इत्यर्थः। एवं सर्वोत्पादकः श्रवोभिः सर्वत्र श्रूयमाणैर्यशोभिर्युक्तः

सन्नस्ति। वर्तते। सर्वोत्पादक इत्युक्तं तच्चोपपत्तिमाह। यतोऽयं जीवपीतसर्गः। जीवैर्नानाविधैः पीत आस्वादितः सर्गः सृष्टिक्रमो यस्य स तथोक्तः॥ तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। पुनर्बहुव्रीहौ स एव स्वरः॥ अत्रायं सृष्टिक्रमः। अयमग्निः स्वदत्तं हविरादित्यं प्रापय्य तद्रश्मिभिः सह वैद्युतरूपेण मेघद्वारोदकेन प्रवर्ष्य सर्वान्प्राणिनः प्रापयतीत्यतो वृष्ट्युत्पादनद्वारोत्पादयिता। इदानीं साक्षादुत्पादकत्वमाह। योऽग्निर्योनौ गर्भाशये सस्राणः प्रविष्टः सन् शिश्रीत। निषिक्तं रेतः पारयति। नृपश्वादिदेहाकारेण परिणमयतीत्यर्थः। यद्यग्निर्न पचेत् पूरयेदेव नोत्पद्यते। तस्मादयं साक्षादेवोत्पादकः। स तादृशोऽग्निर्यशस्वी वर्तत इत्यर्थः। यद्वा योऽग्निर्नरां न नराणां कर्मसूत्साहयुक्तानां यजमानानामिव॥ नरा मनुष्या नृत्यंति कर्मस्विति यास्कः। नि° ५. १.॥ तेषां यथा स्वर्गाद्यभिमतवर्षकः तद्वद्रोदस्योरपि। आश्रयवाचिना शब्देनाश्रयिणो लक्ष्यंते। भूलोकवर्तिनां वृष्टिप्रदानेन द्युलोकवर्तिनां हविःप्रापणेनेति भावः। स तादृशोऽग्निः श्रवोभिर्हविर्लक्षणैः सोमाज्यादिभिरन्नैर्निमित्तभूतैर्जीवपीतसर्गो जीवविशेषैर्यजमानैरविशेषेण सर्वैर्वास्वादितस्वभावः सन् अस्ति। प्रकृष्टो वर्तते। अमुमग्निं हविर्भिः प्रीणयित्वा स्वाभिमतान्भोगान्भुंजत इत्यर्थः। किंच योऽग्निर्योनौ स्वकीयस्थाने वेदिलक्षणे सस्राणः प्रविष्टः सन् शिश्रीत। स्वस्मिन्प्राप्तं पुरोडाशादिकं पचति सोऽयमग्निरस्ति। महानुभावो वर्तते॥

॥ अथ तृतीया ॥

आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३ नार्वा।
सूरो न रुरुक्वाञ्छतात्मा॥ ३॥

आ। यः। पुरं। नार्मिणी। अदीदेत्। अत्यः। कविः। नभन्यः। न। अर्वा।
सूरः। न। रुरुक्वान्। शतऽआत्मा॥ ३॥

योऽग्निर्नार्मिणी नर्मवती यजमानानां संबंधिनीमुत्तरवेदिं। यद्वा नृणां मनसि स्थितां यजमानानां यज्ञार्थं यां भूमिं प्रत्यग्न्यागमनमनीषा विद्यते तां पुरं तत्स्थानमादीदेत्। दीपयति। कीदृशोऽयं। अत्यः। अपेक्षितदेशं प्रत्यतनशीलः। कविः। क्रांतदर्शी। तत्र दृष्टांतः। अर्वारणकुशलो नभन्यो न नभस्याकाशे भवो नभस्वान्वायुरिव। किंच शतात्मा। शतं सहस्रमित्यपरिमितवचनः।

तत्तद्यजमानगृहापेक्षया आहवनीयगार्हपत्याद्यपेक्षया वा नानारूपत्वं। अथवा मित्रवरुणभेदेनाग्नेर्मित्रादिरूपं त्वमग्ने वरुणो जायसे यत् इंद्रं मित्रं वरुणमग्निमाहुरित्यादिश्रुतिषु प्रसिद्धं। अग्नेरेवेंद्राद्यात्मकत्वमाहुरिति द्वितीयमंत्रस्यार्थः। तादृशोऽयं सूरो न सूर्य इव रुरुक्वान् दीप्यमानः॥ रुच दीप्तौ। छांदसस्य लिटः क्वसुः॥ अतः स तादृशोऽग्निरस्ति। उत्कृष्टं वर्तत इति पूर्वत्रान्वयः॥

॥ अथ चतुर्थी ॥

अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात्।
होता यजिष्ठो अपां सधस्थे॥ ४॥

अभि। द्विऽजन्मा। त्री। रोचनानि। विश्वा। रजांसि। शुशुचानः। अस्थात्।
होता। यजिष्ठः। अपां। सधऽस्थे॥ ४॥

अयमग्निर्द्विजन्मा द्वाभ्यामरणीभ्यां जायमानः। यद्वा मथनात्प्रथमं जन्म। उत्पत्त्यनंतरं पवमानेष्ट्यादिसंस्काररूपं द्वितीयं जन्मेव। एवं द्विजन्मत्वं। अथवा द्यावापृथिवीभ्यामुत्पन्नत्वात्। तादृशोऽग्निस्त्री रोचनानि त्रीणि रोचनानि क्षित्यादिस्थानानि गार्हपत्यादीनि वाभिशुशुचानोऽभितः प्रकाशयन्। न केवलं त्रीण्येव किंतु विश्वा रजांसि सर्वाण्यपि रंजनात्मकानि क्षित्यादिलोकान् शुशुचानोऽभितः प्रकाशयन् दीपयन् होता देवानामाह्वाता यजिष्ठो यष्टृतमः सन् अपां प्रोक्षण्याद्युदकानां सधस्थे सहस्थाने यागदेश आस्थात्। तिष्ठति॥

॥ अथ पंचमी ॥

अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या।
मर्तो यो अस्मै सुतुको ददाश॥ ५॥

अयं। सः। होता। यः। द्विऽजन्मा। विश्वा। दधे। वार्याणि। श्रवस्या।
मर्तः। यः। अस्मै। सुऽतुकः। ददाश॥ ५॥

यो द्विजन्मा स एव होता होमनिष्पादकः। अरणीभ्यामुत्पन्नस्यैव गार्हपत्यद्वाराहवनीयत्वात्। आह्वाता वा देवानां सोऽयं विश्वा विश्वानि वार्याणि वरणीयानि॥ ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं॥ श्रवस्या श्रवस्यया। श्रवोऽन्नं हविर्लक्षणं। तदिच्छया॥ श्रवःशब्दात् क्यजंतात् अ प्रत्ययादिति भावे

अप्रत्ययः ॥ दधे । धारयति । अस्मा उक्तस्वरूपायाग्नये यो मर्त्यो ददाश । ददाति । स सुतुकः शोभनपुत्रो भवति ॥

॥ इति द्वितीयस्य द्वितीयेऽष्टादशो वर्गः ॥

पुरु त्वेति तृचात्मकं दशमं सूक्तं दैर्घतमसमाग्नेयमौष्णिहं । पुरु तृचमौष्णिहमित्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोरौष्णिहे छंदस्यस्य विनियोगः । अथैतस्या इति खंडे सूचितं । पुरु त्वा त्वामग्ने । आ॰ ४. १३. । इति ॥

॥ तत्र प्रथमा ॥

पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा ।

तोदस्येव शरण आ महस्य ॥ १ ॥

पुरु । त्वा । दाश्वान् । वोचे । अरिः । अग्ने । तव । स्वित् । आ ।

तोदस्यऽइव । शरणे । आ । महस्य ॥ १ ॥

हे अग्ने त्वा त्वां पुरु बहु वोचे । यद्वा बहु दाश्वानिति संबंधः । पुत्रं देहि वित्तं देहीत्याद्याशासनानि ब्रवीमीत्यर्थः । किं तूष्णीं नेत्याह । यतो दाश्वान् अभिमतं हविर्दत्तवानस्मि अतो वोचे । इतरसाधारण्येन ब्रुवतः कथं दातव्यमिति न मंतव्यं । यतोऽहं हे अग्ने तव स्वित् तवैव आ आभिमुख्येनारिरर्ता हविरादिप्रापणेन सेवकोऽहं । तत्र दृष्टांतः । महस्य महतस्तोदस्येव शिक्षकस्य स्वामिनः शरणे । अस्य गृहे यथा गर्भदासादिरा समंतान्नियतो वर्तते तद्वदहमपि । यस्मादेवं तस्मादभिमतं बहु वोचे त्वमपि तत्सर्वं देहीत्यर्थः ॥ अत्र निरुक्तं । बहु दाश्वांस्त्वामेवाभिह्वयाम्यरिरमित्र ऋच्छतेः । ईश्वरोऽप्यरिरेतस्मादेव । यदन्यदेवत्या अग्नावाहुतयो हूयंत इत्येतदृष्ट्वैवमवक्ष्यत् तोदस्येव शरण आ महस्य तुदस्येव शरणेऽधि महतः । नि॰ ५. ७. । इति ॥

॥ अथ द्वितीया ॥

व्यनिनस्य धनिनः प्रहोषे चिदररुषः ।

कदा चन प्रजिगतो अदेवयोः ॥ २ ॥

वि । अनिनस्य । धनिनः । प्रऽहोषे । चित् । अररुषः ।

कदा । चन । प्रऽजिगतः । अदेवऽयोः ॥ २ ॥

पूर्वमंत्रे स्वाभीष्टं बहु विज्ञापयामीत्युक्तं। अत्र तु स्वविलक्षणेभ्यो दानादिरहितेभ्यो दानं न दातव्यमिति प्रार्थयते। हे अग्ने त्वां विशेषेण ब्रवीमि॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। अथवा सन्निहितत्वाद्वोच इत्यनुषज्यते॥ अस्मदर्थं यद्यजिज्ञपन् तद्विरुद्धं वोचे। वक्ष्यमाणस्वरूपस्य न दातव्यमिति ब्रवीमीत्यर्थः। तेषां स्वरूपमाह। अनिनस्य। अस्वामिनः। त्वामस्वामिनं कुर्वाणस्य। तथा धनिनः समग्रधनवतः। पूर्वमेव धनवतो दानस्य निरर्थकत्वात्तन्निवार्यते। यद्वा यागाद्यनुपयोगिधनवत इत्यर्थः। किंच। प्र होषे प्रकर्षेण होतुमरुषोऽददतो दक्षिणारूपेण। यद्वा प्र होषेऽनिनस्येति संबंधः। प्रकर्षेण होतुमसमर्थस्येत्यर्थः। अत्रेनशब्देन तत्स्थं सामर्थ्यं लक्ष्यते। चिच्छब्दः समुच्चयार्थः। किंच कदाचन प्रजिगतः। कदाचिदपि प्रकर्षेण देवानस्तुवतः॥ अत्र चनेति निपातद्वयसमुदायः। तत्र चशब्दः समुच्चये नशब्दो निषेधे॥ किंच अदेवयोः। देवानात्मनोऽनिच्छतः। एतेषां न दातव्यमिति विवोच इत्यर्थः॥ निंदितानां स्वरूपनिरूपणेन स्वस्याताहशत्वात् बहु वोच इत्येतद्युक्तमेवेत्युक्तं भवति। यद्वा चनेति चिच्छब्दपर्यायः। उक्तप्रकारेण दुष्टस्यापि कदाचित्प्रजिगतो यदाकदाचित्त्वां स्तुवतो विवोचे। ताहशस्य दातव्यमिति विशेषेण ब्रवीमि। किमु वक्तव्यमस्मदर्थमिति भावः॥

॥ अथ तृतीया ॥

स चंद्रो विप्र मर्त्यो महो व्राधंतमो दिवि।
प्रप्रेत्ते अग्ने वनुषः स्याम॥ ३॥
सः। चंद्रः। विप्र। मर्त्यः। महः। व्राधन्ऽतमः। दिवि।
प्रऽप्र। इत्। ते। अग्ने। वनुषः। स्याम॥ ३॥

हे अग्ने विप्र मेधाविन् यो मर्त्यस्त्वां यजते स मर्त्यो यजमानो दिवि द्युलोके चंद्रः सर्वेषामाह्लादकश्चंद्रसहशो भवति। यद्वा चंद्र एव भवति। यजमानानां चंद्रत्वप्राप्तिं छंदोगा आमनंति। पितृलोकादाकाशमाकाशाच्चंद्रमसमेष सोमो राजेति। सोमलोके विभूतिमनुभूयेति च। तथा मुंडकेऽपि द्युलोकप्राप्तिराम्नायते। एह्येहीति तमाहुतयः सुवर्चसः सूर्यरश्मिभिर्यजमानं वहंति तं नयंत्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवास इति। एष वः पुण्यः सुकृतो ब्रह्मलोक इति च। पुनः स एव विशेष्यते। महो महतोऽपि व्राधंतमः

प्रवृद्धतमः। इतरदेवानामपि श्रेष्ठ इत्यर्थः। अतोऽग्ने ते तव प्रप्रेत् प्रकर्षेणैव वनुषः संभक्तारः स्याम। यद्वा प्रीणयित्वा प्रप्रेत् स्याम। प्रकृष्टा एव भवेम॥

॥ इति द्वितीयस्य द्वितीय एकोनविंशो वर्गः॥

मित्रं न यमिति नवर्चमेकादशं सूक्तं दैर्घतमसं जागतं मैत्रावरुणं। आद्या मैत्र्येव। अत्रानुक्रमणिका। मित्रं नव मैत्रावरुणं हि जागतं मैत्र्याद्येति॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा॥

मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन्।
अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषामवः॥ १॥
मित्रं। न। यं। शिम्या। गोषु। गव्यवः। सुऽआध्यः। विदथे। अप्ऽसु। जीजनन्।
अरेजेतां। रोदसी इति। पाजसा। गिरा। प्रति। प्रियं। यजतं। जनुषां। अवः॥ १॥

यमग्निं शिम्या॥ कर्मनामैतत् शिमी शक्तिरिति तन्नामसु पाठात्॥ ऋत्वा प्रकाशवृष्ट्युत्पादनादिकर्मणा मित्रं न मित्रमिव स्थितं। यद्वा शिम्येत्येतत् क्रियया सह संबध्यते। गोषु बह्वीषु निमित्तभूतासु गव्यवो गा आत्मन इच्छंतः। अत्र यद्यपि गव्यव इत्येवालं न गोष्विति। तथापि गव्यव इत्यत्र गोस्वामित्वं प्रतिपाद्यते। तच्चैकयाद्वित्वादपि स्यात्। अतः स्पृहणीया बह्व्य इत्यवगमयितुं गोष्विति पदं। यथा गवामसि गोपतिः। गणानां त्वा गणपतिं। तथा स्वाध्यः सुष्ठ्वाध्यातारः फलस्योत्पादयितारः शोभनध्याना वा विदथे यागेऽप्स्वंतरिक्षे वैद्युतरूपेण वर्तमानं॥ आप इत्यंतरिक्षनाम आपः पृथिवीति तन्नामसूक्तत्वात्॥ अग्नेरंतरिक्षोत्पत्तिर्यदग्ने दिविजा अस्यप्सुजा वाप्स्वग्ने सधिष्टवेत्यादिमंत्रांतरेषु प्रसिद्धा। प्रियं सर्वेषां प्रियतमं प्रीणयितारं वा यजतं यष्टव्यमग्निं जनुषां जन्मवतां प्राणिनामवः प्रति रक्षणं निमित्तीकृत्य शिम्या मथनादिकर्मणा जीजनन्। जनयंति यजमानाः। यद्वा अप्सु निमित्तभूतासु जीजनन् सर्वप्राणिनामुपकाराय वृष्ट्यर्थं चेत्यर्थः। एवमुत्पन्नस्याग्नेः पाजसा बलेन गिरा भयंकरशब्देन च रोदसी द्यावापृथिव्यावरेजेतां। अकंपेतां। अग्नेः सकाशात्कंपनमरेजेतां रोदसी होतृवूर्ये इत्यादिश्रुतिषु प्रसिद्धं। न च सर्वरक्षणार्थमुत्पादितोऽग्निर्लोकद्वयस्य भीतिमजनयत् किमेतदिति वाच्यं निंदास्तुतित्वात्। यथा

लोको बिभीतस्तथा प्रवृद्धोऽभवदिति स्तुतौ पर्यवसानात् ॥ यद्यप्यत्राग्निरेव प्रतिपाद्यते मित्रस्तु परं दृष्टांतित एव तथापि द्युस्थानस्याग्नेरेव मित्रत्वान्मंत्रस्य मैत्रत्वमविरुद्धं । यद्वा मित्रं न सखायमिव स्थितं मित्रनामकं देवं यज्ञेऽंतरिक्षे च ऋत्विजः प्रादुर्भावयंति । शिष्टमेतद्विशेषेण तथैव योजनीयं ॥

॥ अथ द्वितीया ॥

यद्ध त्यद्वां पुरुमीळ्हस्य सोमिनः प्र मित्रासो न दधिरे स्वाभुवः ।
अध क्रतुं विदतं गातुमर्चत उत श्रुतं वृषणा पस्त्यावतः ॥ २ ॥
यत् । ह । त्यत् । वां । पुरुऽमीळ्हस्य । सोमिनः । प्र । मित्रासः । न । दधिरे । सुऽआभुवः ।
अध । क्रतुं । विदतं । गातुं । अर्चते । उत । श्रुतं । वृषणा । पस्त्यऽवतः ॥ २ ॥

हे मित्रावरुणौ यद्यस्मात्कारणाद्वां पुरुमीळ्हस्य बहुलाभीष्टसेचनस्य सोमिनः स्वाभुवः सोमवतः स्वाभावनशीलस्य ॥ कर्मणि षष्ठी ॥ त्यदुक्तलक्षणं कर्म प्र मित्रासो न मित्राणीव मित्रभूता ऋत्विजः प्रदधिरे । प्रकर्षेण धारयंति ॥ हेति पूरणः ॥ अध अतः कारणाद्गातुं युष्मद्गमनमर्चते ॥ षष्ठ्यर्थे चतुर्थी ॥ अर्चतः पूजयतो यजमानस्य क्रतुं कर्म विदतं । जानीतं ॥ विदेर्लोटि व्यत्ययेन शः ॥ उत अपि च हे वृषणा कामानां वर्षितारौ युवां पस्त्यावतः ॥ पस्त्येति गृहनाम पस्त्या दुरोण इति तन्नामसूक्तत्वात् ॥ सदःप्राचीनवंशादिगृहवतो यजमानस्याह्वानं स्तोत्रं वा श्रुतं । शृणुतं ॥ छांदसो विकरणस्य लुक् ॥ यद्वा यद्यस्मात्सोमिनः सोमवतः पुरुमीळ्हस्यैतन्नामकस्य राज्ञो मित्रासो न मित्राणीव स्थिताः स्वाभुवः स्वाभवनशीलाः स्वस्वव्यापारसमर्था दधिरे । अध अतः कारणात्तस्यार्चतेऽर्चतः क्रतुं विदतमित्यादि पूर्ववत् ॥

॥ अथ तृतीया ॥

आ वां भूषन्क्षितयो जन्म रोदस्योः प्रवाच्यं वृषणा दक्षसे महे ।
यदीमृताय भरथो यदर्वते प्र होत्रया शिम्या वीथो अध्वरं ॥ ३ ॥
आ । वां । भूषन् । क्षितयः । जन्म । रोदस्योः । प्रऽवाच्यं । वृषणा । दक्षसे । महे ।
यत् । ईं । ऋताय । भरथः । यत् । अर्वते । प्र । होत्रया । शिम्या । वीथः । अध्वरं ॥ ३ ॥

हे वृषणा कामानां वर्षितारौ हे मित्रावरुणौ वां युवयोः संबंधि जन्म

जननमुत्पत्तिं रोदस्योर्द्यावापृथिव्योः सकाशात् । द्यावापृथिवीभ्यामेव सर्वेषामुत्पत्तेः । यद्वा मित्र इति सर्वोपकार्यग्निरुच्यते वरुण इति तमोनिवारक आदित्यः । उभयोः पृथिवीद्युस्थानत्वात् । ततः पूर्वमंत्रे मित्रदृष्टांतत्वेनाग्निः स्तुतः । अत इदमधिगम्यते । अग्निरेव मित्र इति । तथान्यत्रापि । अग्निं मित्रं न क्षितिषु प्रशंस्यं । मित्रं वयं सुधितं भृगवो दधुरिति च । प्रवाच्यं स्तुत्यं तादृग्युवयोर्जन्म महे महते दक्षसे सर्वविषयबलाय क्षितयो मनुष्या यजमाना आभूषन् । सर्वतोऽलंकुर्वंति । श्लाघंत इत्यर्थः । जन्मनः प्रवाच्यत्वमाह । यदी यस्मादेव कारणात् ॥ अथवा ईमित्यनर्थकः । मिताक्षरेष्वनर्थकाः कमीमिद्वितीत्युक्तत्वात् ॥ ऋताय यज्ञाय भरथः सामर्थ्यं । यत् यस्माच्च कारणादर्वते युष्मान् प्राप्नवते यजमानाय च भरथोऽभिमतं फलं । अथवा उभयत्र कर्मणः संप्रदानत्वाच्चतुर्थी । यज्ञं यजमानं च भरथ इत्यर्थः । तथा च होत्रया स्तुतिरूपया वाचा शिम्या हविःप्रदानादिकर्मणा च प्रवीथः । प्रकर्षेण प्राप्नुथः । तस्मात्प्रवाच्यं जन्म भूषयंतीत्यर्थः ॥ होत्रेति वाङ्नाम होत्रा गीरिति तन्नामसु पाठात् ॥

॥ अथ चतुर्थी ॥

प्र सा क्षि॒तिर॑सुर॒ या महि॑ प्रि॒य ऋता॑वानावृ॒तमा घो॑षथो बृ॒हत् ।
यु॒वं दि॒वो बृ॑ह॒तो दक्ष॑मा॒भुवं॒ गां न धु॒र्युप॑ युंजाथे अ॒पः ॥ ४ ॥
प्र । सा । क्षि॒तिः । अ॒सु॒रा॒ । या । महि॑ । प्रि॒या । ऋत॑ऽवानौ । ऋ॒तं । आ । घो॒ष॒थः॒ । बृ॒हत् ।
यु॒वं । दि॒वः । बृ॒ह॒तः । दक्षं॑ । आ॒ऽभुवं॑ । गां । न । धु॒रि । उप॑ । यु॒ञ्जा॒थे॒ इति॑ । अ॒पः ॥ ४ ॥

हे असुरा असुरौ बलवंतौ मित्रावरुणौ युवयोर्या क्षितिर्देवयजनरूपा महि महदत्यधिकं प्रिया प्रियतरा प्रीणयित्री वा सा क्षितिः प्र । प्रकर्षेण संपादिता ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ तामासीदतमिति शेषः । यागभूमिर्देवानां प्रियेति प्रसिद्धं । आसाद्य च हे ऋतावानौ ऋतवंतौ युवां बृहत्प्रवृद्धमृतमस्मदीयं यज्ञमाघोषथः । अवैकल्येन संपादित इति स्तुतमित्यर्थः । यतो युवं युवां बृहतो महतो दिवो द्युलोकस्य धुरि दक्षं तर्पणवहने समर्थं । अथवा बृहतो दिवो महतो द्युलोकस्थदेवान् दक्षं प्रीणयितुमिति शेषः । यद्वा कर्मणि षष्ठी । दिवो द्योतनात्मकं बृहतः प्रभूतं दक्षमभिमतसाधनसमर्थमाभुवं सर्वतो भवनशीलमपः कर्म सोमयागरूपमुपयुंजाथे । सेवेथे । तत्रत्यं हविः स्वीकुरुथ इत्यर्थः ।

उपयोगे दृष्टांतः। धुरि शारीरबलस्य निर्वाहे तदर्था गां न। धेनुमिव। तां यथोपयुंजते तद्वत्। यद्वा विकारे प्रकृतिशब्दः। क्षीरादिकमिव। तस्माहत-माघोषथः॥

॥ अथ पंचमी ॥

मही अत्रं महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन्धेनवः।
स्वरंति ता उपरताति सूर्यमा निम्रुच उषसस्तक्ववीरिव ॥ ५ ॥
मही इति। अत्रं। महिना। वारं। ऋण्वथः। अरेणवः। तुजः। आ। सद्मन्। धेनवः।
स्वरंति। ताः। उपरऽताति। सूर्यं। आ। निऽम्रुचः। उषसः। तक्ववीःऽइव ॥ ५ ॥

हे मित्रावरुणौ युवां मही महत्यां॥ सप्तम्येकवचने पूर्वसवर्णदीर्घः। ईदूतौ च सप्तम्यर्थे। पा॰ १. १. १९.। इति प्रगृह्यता॥ अत्रास्यां पृथिव्यां महिना महत्त्वेन या धेनूर्वारं वरणीयं प्रदेशमृण्वथः॥ अंतर्भावितण्यर्थोऽयं॥ गमनादिव्यव-हारस्य तयोरधीनत्वात् द्यावापृथिव्योरभिमानिदेवत्वाच्च मित्रावरुणयोः। ता एता धेनवो गावः सायंकाले युष्मन्महत्त्वेनारेणवोऽनवद्यास्तस्कराद्यनपहारेणानष्टा वा तुजः क्षीराणां प्रदात्र्यः॥ तुजतिर्दानकर्मा॥ सद्मन् सद्मनि गोष्ठ आ आश्रिता आगच्छंति वा॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः॥ ता एवंकारिता धेनव उप-रताति उपरतातौ॥ सप्तम्या लुक्॥ मेघानां विस्तारवत्यंतरिक्षे मेघाच्छन्ने सति सूर्यं सर्वस्य प्रसवितारं सुवीर्यं शोभनसामर्थ्यं वा। सुवीर्यो मर्यो यथा गोपायत इति तत्सूर्यस्य सूर्यत्वमिति श्रुत्यंतरात्। आदित्यमभिलक्ष्य स्वरंति। स्वर्येति सुखसंचाराय॥ स्वृ शब्दोपतापयोः। भौवादिकः॥ कस्मिन्काल इति तदुच्यते। निम्रुच उषसः। सर्वेष्वपि सायंकालेषूषःकालेषु च। तत्र दृष्टांतः। तक्ववीरिव। तक्वा स्तेनः। तस्य वेता गंता मनुष्यः। स यथा क्रोशति तद्वत्। एवं निरुद्धानां गवां सुखचारो युष्मदायत्त इति तयोः स्तुतिः॥

॥ इति द्वितीयस्य द्वितीये विंशो वर्गः॥

॥ अथ षष्ठी ॥

आ वामृताय केशिनीरनूषत मित्र यत्र वरुण गातुमर्चथः।
अव त्मना सृजतं पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः ॥ ६ ॥

आ। वां। ऋतार्य। केशिनीः। अनूषत। मित्रं। यत्रं। वरुण। गातुं। अर्चथः।
अर्व। त्मनां। सृजतं। पिन्वंतं। धियः। युवं। विप्रस्य। मन्मनां। इरज्यथः ॥ ६ ॥

हे मित्रावरुणौ केशिनीः केशवत्योऽग्नेर्ज्वाला वां युवयोर्ऋताय यज्ञार्थमानूषत। हविःसमर्पणेनाभिपूजयंतीत्यर्थः। कुत्रेति तदुच्यते। हे मित्र हे वरुण युवामुभौ यत्र यागे गातुं गमनं देवयजनदेशं वा ॥ गातुरिति पृथिवीनाम गातुः पूषेत्युक्तत्वात् ॥ अर्चथः। पूजयथः। स्वीकुरुथ इत्यर्थः। आगत्य च त्मना आत्मनैवावसृजतं। वृष्टिमवाङ्मुखं विसृजतं। तथा कृत्वा धियोऽस्मदीयानि कर्माणि पिन्वतं। वर्धयतमित्यर्थः। एवं कृत्वा विप्रस्य मेधाविनो यजमानस्य मन्मनां मननवतीनां स्तुतीनां युवं युवामिरज्यथः। ईश्वरौ स्वामिनौ भवथः॥ इरज्यतिरैश्वर्यकर्मा इरज्यति पत्यत इति तन्नामसूक्तत्वात् ॥

॥ अथ सप्तमी ॥

यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः।
उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः सुमतिं गंतमस्मयू ॥ ७ ॥
यः। वां। यज्ञैः। शशमानः। ह। दाशति। कविः। होता। यजति। मन्मऽसाधनः।
उप। अह। तं। गच्छथः। वीथः। अध्वरं। अच्छ। गिरः। सुऽमतिं। गंतं।
अस्मयू इत्यस्मऽयू ॥ ७ ॥

यो ह। यः खलु यजमानो वां युवामुद्दिश्य युवाभ्यां वा यज्ञैर्यागैर्निमित्तभूतैः शशमानः शंसमानो दाशति। हविरादिकं स्वस्वत्वं निवर्त्य युष्मत्स्वत्वापादनं करोति। य एव कविरनूचानः। येऽनूचानास्ते कवय इति श्रुतेः। अथवा कविर्मेधावी होता सम्यक् होमनिष्पादको यजमानो मन्मसाधनो मननीयद्रव्यदक्षिणादिसाधनोपेतः सन् यजति। सोमयागादिकं करोति। तमेव यजमानं सुमतिं शोभनप्रज्ञमुप उपलक्ष्य गच्छथः। प्राप्नुथः खलु। अध्वरं तदीयं यज्ञं वीथः। कामयेथे। किंच अस्मयू अस्मान् कामयमानौ युवां गिरः स्तुतीरच्छ अभिलक्ष्य गंतं। गच्छतं। तादृशं मां प्राप्य स्तुतीः स्वीकुरुतमित्यर्थः। अत्र यद्यपि तमिति सामान्यनिर्देशः प्रतिभाति तथाप्यस्मयू इत्युक्तत्वाद्दीर्घतमाः स्वात्मानमेव परोक्षतयोक्तवानिति गम्यते। यद्वा यो दाशति यश्च यजते तमुपेत्य

तदीयं यज्ञं कामयेथे। अतोऽस्मयू युवां सुमतिं मां मदीया गिरः स्तुतीरच्छ अभिलक्ष्य गच्छतं ॥

॥ अथाष्टमी ॥

युवां यज्ञैः प्रथमा गोभिरंजत ऋतावाना मनसो न प्रयुक्तिषु।
भरंति वां मन्मना संयता गिरोऽदृप्यता मनसा रेवदाशाथे ॥ ८ ॥

युवां। यज्ञैः। प्रथमा। गोभिः। अंजते। ऋतऽवाना। मनसः। न। प्रऽयुक्तिषु।
भरंति। वां। मन्मना। संऽयता। गिरः। अदृप्यता। मनसा। रेवत्। आशाथे इति॥८॥

हे ऋतावाना यज्ञवंतौ वृष्ट्युदकवंतौ वा मित्रावरुणौ युवां प्रथमा प्रथमौ यज्ञैर्यजनसाधनैर्गोभिर्गोविकारैः पयआदिभिरंजते। व्यंजयंति यजमानाः। देवभागं यागेषु क्षीरादिभिर्यजंत इत्यर्थः। यद्वा गोभिरंजते। स्तुवंति। तत्र दृष्टांतः। प्रयुक्तिषु प्रयोगेषु मनसो न॥ कर्मणि षष्ठी॥ मन इव। तद्यथा प्रथमं व्यंजयंति मुख्यं कुर्वंति तत्पूर्वकत्वात्सर्वव्यवहारस्य। किंच वां युवां मन्मना मननवता संयता युवामेव सम्यग्गच्छता चित्तेन गिरः स्तुतीर्भरंति। संपादयंति। यस्मादेवं तस्माददृप्यतानभिभववता मनसा प्रकृष्टेन चेतसा युक्तौ संतौ रेवत् धनवत्कर्मास्मदीयमाशाथे। अश्नुवाथे व्याप्नुथः। ददाथे इत्यर्थः॥ अश्नोतेर्लिट्यनित्यमागमशासनमिति वचनादिडभावः॥

॥ अथ नवमी ॥

रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति माहिनं।
न वां द्यावोऽहभिर्नोत सिंधवो न देवत्वं पणयो नानशुर्मघं ॥ ९ ॥

रेवत्। वयः। दधाथे इति। रेवत्। आशाथे इति। नरा। मायाभिः। इतऽऊति। माहिनं।
न। वां। द्यावः। अहऽभिः। न। उत। सिंधवः। न। देवऽत्वं। पणयः। न। आनशुः।
मघं ॥ ९ ॥

हे मित्रावरुणौ युवां रेवत् धनवद्वयोऽन्नं दधाथे। उभयं च धारयथः। यस्मादेवं तस्माद्रेवत् धनवत्। सहदृष्टत्वाद्वय इति गम्यते। धनविशिष्टमन्नं हे नरा नेतारौ युवामाशाथे। अश्नुवाथे। अस्मभ्यं ददाथे इत्यर्थः। कीदृशं। मायाभिर्युवयोः प्रज्ञाभिरितऊति। इतोऽस्मदभिमुखं गमनवत् इतो रक्षणवद्वा।

माहिनं ॥ महन्नामैतत् ॥ अतिमहत् । ईदृशोर्युवयोरेतादृशं सामर्थ्यं कुत इत्यत आह । वां युवयोर्देवत्वमहभिरहोभी रात्रिभिः । अत्राहःशब्देन रात्रिरभिधीयते द्योशब्देनाहःपृथगभिधानात् । ताभिः सहिता द्यावो दिवसा नानशुः । न प्राप्नुवंति । अहश्च रात्रिश्चोभे न तरत इत्यर्थः । उत अपि च सिंधवः स्यंदनशीला नद्यो न चैवानशुः । तथा युवयोर्देवत्वं पणयोऽसुरा अपि नानशुः । मघं धनं च नानशिरे । लोकत्रये युवयोः पराभवितारो न केऽपि संतीत्यर्थः ॥

॥ इति द्वितीयस्य द्वितीय एकविंशो वर्गः ॥

युवं वस्त्राणीति सप्तर्चं द्वादशं सूक्तं दैर्घतमसं । अनादेशपरिभाषया त्रैष्टुभं । मैत्रावरुणं पूर्वत्र मैत्रावरुणं हीत्युक्तत्वात् ॥ सूक्तविनियोगो लैंगिकः । मैत्रावरुणे पशावाद्या वपायाज्या । प्रदानानामिति खंडे सूचितं । युवं वस्त्राणि पीवसा वसाथे प्र बाहवा सिसृतं जीवसे नः । आ० ३. ८. । इति ॥ सैव समावर्तने नववस्त्रधारणे विनियुक्ता । सूचितं च युवं वस्त्राणि पीवसा वसाथे इत्यहते वाससी आच्छाद्य । आ० गृ० ३. ८. । इति ॥

॥ तत्र प्रथमा ॥

युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मंतवो ह सर्गाः ।
अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ॥ १ ॥

युवं । वस्त्राणि । पीवसा । वसाथे इति । युवोः । अच्छिद्राः । मंतवः । ह । सर्गाः ।
अव । अतिरतं । अनृतानि । विश्वा । ऋतेन । मित्रावरुणा । सचेथे इति ॥ १ ॥

हे मित्रावरुणौ पीवसा पीनौ युवं युवां । यद्वा पीवसा पीनान्यच्छिन्नानि वस्त्राण्याच्छादनयोग्यानि वासांसि वसाथे । आच्छादयथः । यद्वा पीवसा स्थूलेन प्रभूतेन तेजसा वस्त्राणि दधाथे । अविच्छिन्नानि वस्त्रस्थानीयानि तेजांसि धारयथ इत्यर्थः । किंच युवयोः सर्गाः सृष्टय अच्छिद्रा अच्छिन्ना मंतवो ह मननीयाश्च । ईदृशौ युवां विश्वा विश्वानि सर्वाण्यनृतान्यसत्यान्यप्रियाणि पापान्यवातिरतं । नाशयतं ॥ विश्वेत्यत्र संहितायामृत्यक इति प्रकृतिभावो ह्रस्वत्वं च ॥ ऋतेन फलेन तत्साधनेन यज्ञेन वा सचेथे । संगच्छेथे । अस्मभ्यं योजयथ इत्यर्थः ॥

॥ अथ द्वितीया ॥

एतच्चन त्वो वि चिकेतदेषां सत्यो मंत्रः कविशस्त ऋघावान् ।
त्रिरश्रिं हंति चतुरश्रिरुग्रो देवनिदो ह प्रथमा अजूर्यन् ॥ २ ॥
एतत् । चन । त्वः । वि । चिकेतत् । एषां । सत्यः । मंत्रः । कविऽशस्तः । ऋघावान् ।
त्रिःऽअश्रिं । हंति । चतुःऽअश्रिः । उग्रः । देवऽनिदः । ह । प्रथमाः । अजूर्यन् ॥ २ ॥

एषामेतयोर्मध्ये ॥ बहुवचनं पूजार्थं । यद्वा तदनुचरापेक्षया बहुवचनं ॥ एतयोर्मध्ये त्वश्चन एक एवैतद्वक्ष्यमाणं सामर्थ्यरूपं कर्म विचिकेतत् । विशेषेण चेतति । अनुतिष्ठतीत्यर्थः । स विशेष्यते । स एकः सत्योऽवाध्यः सत्सु भवो वा मंत्रो मननवान् कविशस्तः कविभिर्मेधाविभिः शंसनीय ऋघावान् हिंसावान् । अनेन वक्ष्यमाणस्य सामर्थ्यस्य संभाविता प्रतिपादिताभवदित्युक्तं । किं तदित्याशंक्याह । त्रिरश्रिं । अश्रित्रयोपेतमायुधं त्रिरश्रि । तद्वंतं ॥ मत्वर्थो लुप्यते ॥ उपलक्षणमेतत् सर्वायुधसंपन्नमित्यर्थः । एतन्नामानं वा चतुरश्रिस्ततोऽप्यधिकायुधवान् । न केवलमायुधसामर्थ्यं । किंतु उग्रः स्वयमुद्गूर्णबलो हंति । हिनस्त्यतिबलं शत्रुं । किंच युवयोरेकस्यैव सामर्थ्येन देवनिदो ह देवनिंदकास्तु प्रथमाः समर्थाः संतोऽप्यजूर्यन् । स्वयमेव जीर्णा भवंति ॥ जीर्यतेः श्यनि बहुलं छंदसीत्युत्वं ॥ युवयोर्मध्य एकोऽपि महाबलः । मिलितयोस्तु सामर्थ्यं किमु वक्तव्यमिति भावः । अथवा एषां युवयोरेतदुत्तरत्र वक्ष्यमाणं सामर्थ्यमेकः सत्यादिलक्षणो विचिकेतत् । विशेषेण जानाति । शेषं पूर्ववत् ॥

॥ अथ तृतीया ॥

अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत ।
गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत् ॥ ३ ॥
अपात् । एति । प्रथमा । पत्ऽवतीनां । कः । तत् । वां । मित्रावरुणा । आ । चिकेत ।
गर्भः । भारं । भरति । आ । चित् । अस्य । ऋतं । पिपर्ति । अनृतं । नि । तारीत् ॥ ३ ॥

हे मित्रावरुणा मित्रावरुणौ पद्वतीनां मनुष्यादीनां प्रजानां प्रथमा प्रथमभाविन्यपात् पादरहितोषाः । प्रतिदिनं सूर्यचंद्रादिवत् स्वस्याः परिभ्रमणाभावात् सूर्यगमनेनैव स्वगमनादपादिति चैतीति चोपचर्यते । तत्रादृशं युवयोः प्रसिद्धं

कर्म क आचिकेत । क आभिमुख्येन जानाति ॥ कित ज्ञाने ॥ तत्स्तुत्यमित्यर्थः । मित्रावरुणयोरहोरात्रदेवत्वादहोरात्रयोरंतरालस्यैवोषस्त्वादेतत्कर्मत्वं । किं चास्य लोकस्य भारं निर्वाहं गर्भो युवयोर्गर्भस्थानीयः शिशुरादित्यः । अहोरात्रयोर्मध्यकाल उत्पन्नेस्ताभ्यामेव मित्रावरुणत्वात् अहोरात्रे वै मित्रावरुणाविति श्रुतेः । स आहरति चित् । समंतान्निर्वहत्येव । हरति वास्य भारं जाड्यं ॥ चिदित्यवधारणे ॥ तत्कथमिति तदुच्यते । ऋतं सत्यं जगतः प्रकाशगमनादिरूपं पिपर्ति । पूरयति । अनृतमुक्तविलक्षणमंधकारं गमनादिनिरोधं च नितारीत् । नितरति । निमज्जयति । नाशयतीत्यर्थः ॥ शिशोर्जगद्भारवहनरूपं कर्म युष्मत्सामर्थ्यादिति ॥

॥ अथ चतुर्थी ॥

प्रयंतमित्परि जारं कनीनां पश्यामसि नोपनिपद्यमानं ।
अनवपृग्णा वितता वसानं प्रियं मित्रस्य वरुणस्य धाम ॥ ४ ॥
प्रऽयंतं । इत् । परि । जारं । कनीनां । पश्यामसि । न । उपऽनिपद्यमानं ।
अनवऽपृग्णा । विऽतता । वसानं । प्रियं । मित्रस्य । वरुणस्य । धाम ॥ ४ ॥

कनीनां कमनीयानां दीप्तानां कन्यकास्थानीयानामुषसां ॥ कनतेः कांतिकर्मण इञ् । कृदिकारादक्तिन इति ङीष् । आमि कन्याशब्दस्य वा छांदसं संप्रसारणं ॥ तासां जारमादित्यं प्रयंतमित् प्रगच्छंतमेव परिपश्यामसि । वयं परिपश्यामः । उपनिपद्यमानं क्षणमात्रमपि निषीदंतं न पश्यामः । एतदपि तयोः सामर्थ्यं । पुनस्तदेव विशेष्यते । अनवपृग्णा अनवपृग्णानि अत एव विततानि तेजांसि वसानमाच्छादयंतं प्रियं सर्वेषां प्रियभूतं मित्रस्य वरुणस्य च धाम तेजःस्थानभूतं । यद्वा प्रियं धामेति संबध्यते । तयोः प्रेमस्थानं । ईदृशमादित्यं युष्मदनुज्ञया संचरंतं पश्यामसि ॥

॥ अथ पंचमी ॥

अनश्वो जातो अनभीशुरर्वा कनिक्रदत्पतयदूर्ध्वसानुः ।
अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणंतः ॥ ५ ॥
अनश्वः । जातः । अनभीशुः । अर्वा । कनिक्रदत् । पतयत् । ऊर्ध्वऽसानुः ।
अचित्तं । ब्रह्म । जुजुषुः । युवानः । प्र । मित्रे । धाम । वरुणे । गृणंतः ॥ ५ ॥

स एवादित्योऽनश्वः । यद्यपि शीघ्रगाम्यश्वरहितस्तथाप्यनभीशुरालंबनाधारप्रग्रहस्थानीयरश्मिरहितः । तथाप्यर्वा जातः शीघ्रगमनवान् संपन्नः । तथाविधोऽयमादित्यः कनिक्रदत् । अत्यर्थं क्रंदयन् ॥ क्रंदेर्यङ्लुगंताच्छतरि दाधर्त्यादौ निपात्यते ॥ ऊर्ध्वसानुरूपर्युपरि समुच्छ्रयणः सन् पतयत् । गच्छति । अचित्तं चित्ताविषयं ब्रह्म परिवृढमुक्तरूपं कर्म मित्रे वरुणे च उभयोर्धाम तेजःस्थानं युवानो मिश्रयंतस्तयोर्धाम्न्यारोपयंतः । तथा प्रगृणंतो युवयोस्तेजः प्रभवमिति प्रकर्षेण स्तुवंतो जुजुषुः । सेवंते । मनुष्याः सूर्यस्य निरालंबांतरिक्षसंचारात्मकं कर्म वरुणमित्रयोरधीनमिति स्तुवंतीत्यर्थः ॥

॥ अथ षष्ठी ॥

आ धे॒नवो॑ मामते॒यमवं॑तीर्ब्रह्म॒प्रियं॑ पीपय॒न्त्सस्मि॒न्नूध॑न् ।
पि॒त्वो भि॑क्षेत व॒युना॑नि वि॒द्वाना॒सावि॒वा॑स॒न्नदि॑तिमुरुष्येत् ॥ ६ ॥

आ । धे॒नवः॑ । मा॒म॒ते॒यं । अवं॑तीः । ब्र॒ह्म॒ऽप्रियं॑ । पी॒प॒य॒न् । सस्मि॑न् । ऊध॑न् ।
पि॒त्वः । भि॒क्षे॒त॒ । व॒युना॑नि । वि॒द्वान् । आ॒सा । आ॒ऽविवा॑सन् । अदि॑तिं । उ॒रु॒ष्ये॒त् ॥ ६ ॥

मामतेयं ममतायाः पुत्रं दीर्घतमसं मां ब्रह्मप्रियं परिवृढस्य कर्मणः प्रियतमं परिवृढस्याग्नेः प्रीणयितारमवंतीरवंत्यः प्रीणयंत्यो धेनवो गावः सस्मिन् स्वकीय ऊधन् ऊधस्यापीपयन् । सर्वत आप्याययंतु ॥ प्यायतेर्णिचि छांदसः पीभावः ॥ ऊधोगतेन क्षीरेण युवाभ्यां प्रदेयेन नोऽस्मान्रक्षंत्वित्यर्थः । मित्रावरुणाभ्यां पयस्येति श्रुतेः । एवं प्रदत्तहविर्वयुनान्यनुष्ठानविषयज्ञानानि विद्वान् जानन् हुतशेषो भक्षणीय इत्यवगच्छन् दीर्घतमाः पित्वः पितोर्हुतशिष्टस्यान्नस्य तादृगन्नमासा आस्येन भक्षयितुं भिक्षेत । याचेत युष्मान् । किंच विवासन् युवां परिचरन् अदितिमखंडितमन्यूनमेतत्कर्मोरुष्येत् । यथा शिष्टं भिक्षेत यथा च कर्म समापनेन रक्षेत् तथापीपयन्नित्यर्थः ॥

मैत्रावरुणपशौ वपाया एषानुवाक्या । सूत्रितं च । आ वां मित्रावरुणा हव्यजुष्टिमायातं मित्रावरुणा । आ॰ ३. ८. । इति ॥

॥ सैषा सप्तमी ॥

आ वां॑ मित्रावरुणा ह॒व्यजु॑ष्टिं॒ नम॑सा देवा॒वव॑सा ववृत्यां ।
अ॒स्माकं॒ ब्रह्म॒ पृत॑नासु सह्या अ॒स्माकं॑ वृ॒ष्टिर्दि॒व्या सु॑पा॒रा ॥ ७ ॥

आ । वां । मित्रावरुणा । हव्यऽजुष्टिं । नमसा । देवौ । अवसा । ववृत्यां ।
अस्माकं । ब्रह्म । पृतनासु । सह्याः । अस्माकं । वृष्टिः । दिव्या । सुऽपारा ॥ ७ ॥

हे देवौ देवनशीलौ मित्रावरुणा मित्रावरुणौ वां युवां हव्यजुष्टिं हविःसेवां नमसा नमस्कारोपलक्षितेन स्तोत्रेणावसा रक्षणेन निमित्तभूतेनाववृत्यां । आवर्तयेयं । यद्वा नमस्कारेणावसानेन चाववृत्यां । किंच हे मित्रावरुणौ अस्माकं संबंधि ब्रह्मेदानीं क्रियमाणं परिवृढं कर्म पृतनासु संग्रामेषु सह्याः । सह्यात् । शत्रूनभिभूयात् । अनेन कर्मणा शत्रूनभिभवेयमित्यर्थः । किंच अस्माकं दिव्या दिवि भवा वृष्टिः सुपारा सुष्ठु पारयित्री भवत्विति शेषः । वृष्टौ सत्यां व्रीह्यादिद्वारा कर्मसमाप्तेरिति भावः ॥

॥ इति द्वितीयस्य द्वितीये द्वाविंशो वर्गः ॥

यजामहे वामिति चतुर्ऋचं चतुर्दशं सूक्तं दैर्घतमसं त्रैष्टुभं मैत्रावरुणं । यजामहे चतुष्कमित्यनुक्रमणिका । विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः ।
घृतैर्घृतस्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरंति ॥ १ ॥

यजामहे । वां । महः । सऽजोषाः । हव्येभिः । मित्रावरुणा । नमःऽभिः ।
घृतैः । घृतस्नू इति घृतऽस्नू । अध । यत् । वां । अस्मे इति । अध्वर्यवः । न ।
धीतिऽभिः । भरंति ॥ १ ॥

हे घृतस्नू घृतस्य स्रावयितारौ मित्रावरुणौ महो महांतौ वां यजामहे । पूजयामो यजमाना ऋत्विजश्च । कीदृशाः । सजोषाः । समानप्रीतियुक्ताः । केन साधनेनेति तदुच्यते । हव्येभिः । पुरोडाशादिभिर्नमोभिर्नमस्कारोपलक्षितैः । अध अपि च यद्यस्मात्कारणाद्वां युवामध्वर्यवोऽस्मदीया अध्वर्यवोऽपि ॥ अत्र नशब्दोऽप्यर्थे । तेऽपि धीतिभिः स्वकीयैः कर्मभिर्भरंति । पोषयंति । तस्माद्यजामहे ॥

॥ अथ द्वितीया ॥

प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रावरुणा सुवृक्तिः ।
अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन् ॥ २ ॥

प्रऽस्तुतिः। वां। धाम। न। प्रऽयुक्तिः। अयामि। मित्रावरुणा। सुऽवृक्तिः।
अनक्ति। यत्। वां। विदथेषु। होता। सुम्नं। वां। सूरिः। वृषणौ। इयक्षन्॥२॥

हे मित्रावरुणौ वां युवयोः संबंधिनो यागस्य प्रस्तुतिः प्रस्तावना करोमीति संकल्प एव न प्रयुक्तिः कृत्स्नप्रयोगो न संपन्नः। तावतैव युवयोर्धाम तेजःस्थानमयामि। प्राप्नोमि। सुवृक्तिर्युवयोः शोभनावर्जकश्च युष्मत्परिग्रहादस्मि। यत् यदा तु विदथेषु यज्ञेषु वां युवां होता होमनिष्पादकोऽयमध्वर्युरनक्ति। हविषागच्छति। होमं करोतीत्यर्थः। यद्वा होता देवानामाह्वातैतन्नामक ऋत्विक् शस्त्रादिना वामनक्ति। व्यंजयति। तदा सूरिर्युष्मन्माहात्म्यविदियक्षन् यागं कर्तुमिच्छन्नहं हे वृषणौ कामानां वर्षितारौ वां युवयोः सुम्नं युष्मत्संबंधि सुखं देवत्वलक्षणमयामीति शेषः॥

॥ अथ तृतीया ॥

पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हविर्दे।
हिनोति यद्वां विदथे सपर्यन्त्स रातहव्यो मानुषो न होता॥३॥
पीपाय। धेनुः। अदितिः। ऋताय। जनाय। मित्रावरुणा। हविःऽदे।
हिनोति। यत्। वां। विदथे। सपर्यन्। सः। रातऽहव्यः। मानुषः। न। होता॥३॥

हे मित्रावरुणा मित्रावरुणौ ऋताय युष्मत्संबंधियज्ञाय हविर्दे हविषो दात्रे॥ आतो मनिन्निति विच्। भत्व आतो धातोरित्याकारलोपः॥ जनाय यजमानाय च धेनुः प्रीणयित्री गौरदितिरदीना बहुक्षीरा सती पीपाय। क्षीरेण पुनःपुनराप्यायतां॥ प्यायतेश्छांदसः प्रार्थनायां लिट्। लिड्यङोश्चेति पीभावः॥ पयस्यादिहविष्कं यज्ञं पयोव्रतादिषु यजमानं चेत्यर्थः। कस्मिन्काल इति चेत् तत्राह। यत् यदा सः प्रसिद्धो रातहव्य एतन्नामा राजा सपर्यन् स्तुत्या पूजयन् मानुषो होता न मनुष्यस्य यजमानस्य संबंध्येतन्नामक ऋत्विगिव विदथे यज्ञे वां हिनोति। हविरादिना प्रीणयति। तदा पीपायेत्याह॥

॥ अथ चतुर्थी ॥

उत वां विक्षु मद्यास्वंधो गाव आपश्च पीपयंत देवीः।
उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः॥४॥

उत । वां । विक्षु । मद्यासु । अंधः । गावः । आपः । च । पीपयंत । देवीः ।
उतो इति । नः । अस्य । पूर्व्यः । पतिः । दन् । वीतं । पातं । पयसः । उस्रियायाः ॥४॥

उत अपि च हे मित्रावरुणौ वां युवामंधोऽदनीयमन्नं पयोरूपं पुरोडाशादिरूपं वा देवीर्द्योतनशीला गाव आपश्च व्रीह्यादिप्रवर्धकान्युदकानि च मद्यासु युष्माभिर्मदनीयासु विक्षु प्रजासु यजमानलक्षणासु तासामभिवृद्ध्यर्थं पीपयंत । आप्याययंतु । उतो अपि च नोऽस्मत्संबंधिनोऽस्य यजमानस्य पूर्व्यः पूर्वकालीनः पतिः पालकोऽग्निर्दन् दाता भवत्विति शेषः । अग्नौ हूयमानत्वात्सर्वेषामपि हविषां । यस्मादेवं तस्मात् हे मित्रावरुणौ वीतं । भक्षयतं पुरोडाशादिकं । उस्रियायाः क्षीराद्यस्राविण्या गोः पयसः पयः पातं । यद्वा घनीभूतं पयस्याया वीतं स्रवद्रूपं पातं ॥

॥ इति द्वितीयस्य द्वितीये त्रयोविंशो वर्गः ॥

विष्णोर्नु कमिति षड़ृचं पंचदशं सूक्तं दैर्घतमसं त्रैष्टुभं वैष्णवं । अत्रानुक्रमणिका । विष्णोः षड्वैष्णवं हीति ॥ आभिप्लवषडहेषूक्थ्येषु तृतीयसवने स्तोमवृद्धावच्छावाकस्य स्तोमातिशंसनार्थमिदमादिसूक्तद्वयं विनियुक्तं । स्तोमे वर्धमान इति खंडे सूचितं । विष्णोर्नु कमिति सूक्ते परो मात्रयेत्यच्छावाकः । आ॰ ७. ९. । इति ॥ तथा तृतीयसवने सोमातिरेक उत्तरसंस्थोपगंतव्या आतिरात्रात् ततोऽप्यतिरिक्ते तदर्थमेव शस्त्रमुपजनयितव्यं । तत्रैतदेव सूक्तं सोमातिरेक इति खंडे सूचितं । महां इंद्रो नृवद्विष्णोर्नु कं । आ॰ ६. ७. । इति ॥ आग्निमारुतशस्त्र आद्या विनियुक्ता । अथ यथैतमिति खंडे सूचितं विष्णोर्नु कं वीर्याणि प्रवोचं तंतुं तन्वन्रजसो भानुमन्विहि । आ॰ ५. २०. । इति ॥

॥ सैषा प्रथमा ॥

विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥ १ ॥
विष्णोः । नु । कं । वीर्याणि । प्र । वोचं । यः । पार्थिवानि । विऽममे । रजांसि ।
यः । अस्कभायत् । उत्ऽतरं । सधऽस्थं । विऽचक्रमाणः । त्रेधा । उरुऽगायः ॥१॥

हे नरा विष्णोर्व्यापनशीलस्य देवस्य वीर्याणि वीरकर्माणि नु कमतिशीघ्रं

प्रवोचं। प्रब्रवीमि ॥ अत्र यद्यपि नु कमिति पदद्वयं तथापि यास्केन नवोत्तराणि पदानि । नैघ॰ ३. १२. । इत्युक्तत्वात् शाखांतर एकत्वेन पाठाच्च नु इत्येतस्मिन्नेवार्थे नु कमिति पदद्वयं ॥ कानि तानीति तत्राह । यो विष्णुः पार्थिवानि पृथिवीसंबंधीनि रजांसि रंजनात्मकानि क्षित्यादिलोकत्रयाभिमानीन्यग्निवाय्वादित्यरूपाणि रजांसि विममे । विशेषेण निर्ममे । अत्र त्रयो लोका अपि पृथिवीशब्दवाच्याः । तथा च मंत्रांतरं । यदींद्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थ इति । तैत्तिरीयेऽपि । योऽस्यां पृथिव्यामस्यायुषेत्युपक्रम्य यो द्वितीयस्यां तृतीयस्यां पृथिव्यामिति । तस्माल्लोकत्रयस्य पृथिवीशब्दवाच्यत्वं । किंच यश्च विष्णुरुत्तरमुन्नततरमतिविस्तीर्णं सधस्थं सहस्थानं लोकत्रयाश्रयभूतमंतरिक्षमस्कभायत् । तेषामाधारत्वेन स्तंभितवान् । निर्मितवानित्यर्थः । अनेनांतरिक्षाश्रितं लोकत्रयमपि सृष्टवानित्युक्तं भवति । यद्वा यो विष्णुः पार्थिवानि पृथिवीसंबंधीनि रजांसि पृथिव्या अधस्तनसप्तलोकान्विममे । विविधं निर्मितवान् ॥ रजःशब्दो लोकवाची लोका रजांस्युच्यंत इति यास्केनोक्तत्वात् । किंच यश्चोत्तरमुन्नततरमुत्तरभाविनं सधस्थं सहस्थानं पुण्यकृतां सहनिवासयोग्यं भूरादिलोकसप्तकमस्कभायत् । स्कंभितवान् । सृष्टवानित्यर्थः ॥ स्कंभेः स्तंभुस्तुंभ्विति विहितस्य श्नः छंदसि शायजपीति व्यत्ययेन शायजादेशः ॥ अथवा पार्थिवानि पृथिवीनिमित्तकानि रजांसि लोकान् विममे । भूरादिलोकत्रयमित्यर्थः । भूम्यामुपार्जितकर्मभोगार्थत्वादितरलोकानां तत्कारणत्वं । किंच यश्चोत्तरमुत्कृष्टतरं सर्वेषां लोकानामुपरिभूतं । अपुनरावृत्तेस्तस्योत्कृष्टत्वं । सधस्थमुपासकानां सहस्थानं सत्यलोकमस्कभायत् । स्कंभितवान् । ध्रुवं स्थापितवानित्यर्थः । किं कुर्वन् । त्रेधा विचक्रमाणः । त्रिप्रकारं स्वसृष्टान् लोकान्विविधं क्रममाणः । विष्णोस्त्रेधा क्रमणमिदं विष्णुर्विचक्रम इत्यादिश्रुतिषु प्रसिद्धं । अत एवोरुगायः । उरुभिर्महद्भिर्गीयमानः । अतिप्रभूतं गीयमानो वा । य एवं कृतवान् तादृशस्य विष्णोर्वीर्याणि प्रवोचं ॥

तृतीयसवने सोमातिरेक एव शस्त्रमुपजनयितव्यं । तत्र प्र तदित्ययमनुरूपस्तृचः । सोमातिरेक इति खंडे सूत्रितं । प्र तद्विष्णुः स्तवते वीर्येणेति स्तोत्रियानुरूपौ । आ॰ ६. ७. । इति ॥ वाजपेयेनाधिपत्यकाम इति खंडे सूत्रितं । प्र तत्ते अद्य शिपिविष्ट नाम प्र तद्विष्णुः स्तवते वीर्येण । आ॰ ९. ९. । इति ॥

॥ तत्र प्रथमा सूक्ते द्वितीयैषा ॥

प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा ॥ २ ॥
प्र । तत् । विष्णुः । स्तवते । वीर्येण । मृगः । न । भीमः । कुचरः । गिरिऽस्थाः ।
यस्य । उरुषु । त्रिषु । विऽक्रमणेषु । अधिऽक्षियंति । भुवनानि । विश्वा ॥ २ ॥

यस्येति वक्ष्यमाणत्वात् स इति अवगम्यते । स महानुभावो वीर्येण स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण स्तवते । स्तूयते सर्वैः ॥ कर्मणि व्यत्ययेन शप् ॥ वीर्येण स्तूयमानत्वे दृष्टांतः । मृगो न सिंहादिरिव । यथा स्वविरोधिनो मृगयिता सिंहो भीमो भीतिजनकः कुचरः कुत्सितहिंसादिकर्ता दुर्गमप्रदेशगंता वा गिरिष्ठाः पर्वताद्युन्नतप्रदेशस्थायीः सर्वैः स्तूयते । अस्मिन्नर्थे निरुक्तं मृगो न भीमः कुचरो गिरिष्ठाः । मृग इव भीमः कुचरो गिरिष्ठा मृगो मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्माद्भीष्मोऽप्येतस्मादेव । कुचर इति चरतिकर्म कुत्सितमथ चेद्देवताभिधानं क्वायं न चरतीति वा । गिरिष्ठा गिरिस्थायी गिरिः पर्वतः समुद्गीर्णो भवति पर्ववान् पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वा । नि॰ १. २०. । इति ॥ तद्वद्यमपि मृगोऽन्वेष्टा शत्रूणां भीमो भयानकः सर्वेषां भीत्यपादानभूतः । परमेश्वराद्भीतिर्भीषास्माद्वातः पवत इत्यादिश्रुतिषु प्रसिद्धा । किंच कुचरः शत्रुवधादिकुत्सितकर्मकर्ता कुषु सर्वासु भूमिषु लोकत्रये संचारी वा । तथा गिरिष्ठा गिरिवदुच्छ्रितलोकस्थायी । यद्वा गिरि मंत्रादिरूपायां वाचि सर्वदा वर्तमानः । ईदृशोऽयं स्वमहिम्ना स्तूयते । किंच यस्य विष्णोरुरुषु विस्तीर्णेषु त्रिसंख्याकेषु विक्रमणेषु पादप्रक्षेपेषु विश्वा सर्वाणि भुवनानि भूतजातान्याश्रित्य निवसंति स विष्णुः स्तूयते ॥

॥ अथ तृतीया ॥

प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ॥ ३ ॥
प्र । विष्णवे । शूषं । एतु । मन्म । गिरिऽक्षिते । उरुऽगायाय । वृष्णे ।
यः । इदं । दीर्घं । प्रऽयतं । सधऽस्थं । एकः । विऽममे । त्रिऽभिः । इत् । पदेभिः ॥ ३ ॥

विष्णवे सर्वव्यापकाय शूषमस्मत्कृत्यादिजन्यं महद्बलत्वं मन्म मननं स्तोत्रं। मननीयं शूषं बलं वा विष्णुमेतु । प्राप्नोतु ॥ कर्मणः संप्रदानत्वाच्चतुर्थी ॥ कीदृशाय । गिरिक्षिते । वाचि गिरिवदुन्नतप्रदेशे वा तिष्ठते । उरुगायाय । बहुभिर्गीयमानाय। वृष्णे। वर्षित्रे कामानां। एवं महानुभावं शूषं प्राप्नोतु। कोऽस्य विशेष इति उच्यते। यो विष्णुरिदं प्रसिद्धं दृश्यमानं दीर्घमतिविस्तृतं प्रयतं नियतं सधस्थं सहस्थानं लोकत्रयमेक इत् एक एवाद्वितीयः सन् त्रिभिः पदेभिः पादैर्विममे। विशेषेण निर्मितवान् ॥

॥ अथ चतुर्थी ॥

यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदंति ।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ॥ ४ ॥
यस्य । त्री । पूर्णा । मधुना । पदानि । अक्षीयमाणा । स्वधया । मदंति ।
यः। ऊं इति। त्रिऽधातु। पृथिवी। उत। द्यां। एकः। दाधार। भुवनानि। विश्वा ॥४॥

यस्य विष्णोर्मधुना मधुरेण दिव्येनामृतेन पूर्णा पूर्णानि त्रीणि पदानि पादप्रक्षेपणान्यक्षीयमाणाक्षीयमाणानि स्वधयान्नेन मदंति । मादयंति तदाश्रितजनान्। य उ य एव पृथिवीं प्रख्यातां भूमिं द्यामुत द्योतनात्मकमंतरिक्षं च विश्वा भुवनानि सर्वाणि भूतजातानि चतुर्दश लोकांश्च। यद्वा पृथिवीशब्देनाधोवर्तीन्यतलवितलादिसप्तभुवनान्युपात्तानि। द्युशब्देन तदवांतररूपाणि भूरादिसप्तभुवनानि। एवं चतुर्दश लोकान् विश्वा भुवनानि सर्वाण्यपि तत्रत्यानि भूतजातानि त्रिधातु। त्रयाणां धातूनां समाहारस्त्रिधातु। पृथिव्यप्तेजोरूपधातुत्रयविशिष्टं यथा भवति तथा दाधार। धृतवान् ॥ तुजादित्वादभ्यासस्य दीर्घत्वं ॥ उत्पादितवानित्यर्थः । छंदोगारण्यके । तत्तेजोऽसृजत तदन्नमसृजत ता आप ऐक्षंतेति भूतत्रयसृष्टिमुक्त्वा हंतेमास्तिस्रो देवतास्तासां त्रिवृतं त्रिवृतमेकैकां करवाणीत्यादिना त्रिवृत्करणसृष्टिरुपपादिता । यद्वा त्रिधातु कालत्रयं गुणत्रयं वा दाधारेत्यन्वयः ॥

आतिथ्यायां तदस्येत्येषा प्रधानस्य याज्या । अथातिथ्येति खंडे सूचितं । इदं विष्णुर्विचक्रमे तदस्य प्रियमभि पाथो अश्यां । आ॰ ४. ५. । इति ॥

॥ सैषा पंचमी ॥

तद॑स्य प्रि॒यम॒भि पाथो॑ अश्यां॒ नरो॒ यत्र॑ देव॒यवो॒ मद॑न्ति ।
उ॒रु॒क्र॒मस्य॒ स हि बन्धु॑रि॒त्था विष्णोः॑ प॒दे प॑र॒मे मध्व॒ उत्सः॑ ॥ ५ ॥

तत् । अ॒स्य॒ । प्रि॒यं । अ॒भि । पाथः॑ । अ॒श्यां॒ । नरः॑ । यत्र॑ । दे॒व॒ऽयवः॑ । मद॑न्ति ।
उ॒रु॒ऽक्र॒मस्य॑ । सः । हि । बंधुः॑ । इ॒त्था । विष्णोः॑ । प॒दे । प॒र॒मे । मध्वः॑ । उत्सः॑ ॥ ५ ॥

अस्य महतो विष्णोः प्रियं प्रियभूतं तत् सर्वैः सेव्यत्वेन प्रसिद्धं पाथः ॥ अंतरिक्षनामैतत् । पाथोऽंतरिक्षं पथा व्याख्यातं । नि॰ ६.७. । इति यास्केनोक्तत्वात् ॥ अविनश्वरं ब्रह्मलोकमित्यर्थः । अश्यां । व्याप्नुयां । तदेव विशेष्यते । यत्र स्थाने देवयवो देवं द्योतनस्वभावं विष्णुमात्मन इच्छंतो यज्ञदानादिभिः प्राप्नुमिच्छंतो नरो मदंति । तृप्तिमनुभवंति । तदश्यामित्यन्वयः । पुनरपि तदेव विशेष्यते । उरुक्रमस्यात्यधिकं सर्वं जगदाक्रममाणस्य तत्तदात्मना । अत एव विष्णोर्व्यापकस्य परमेश्वरस्य परम उत्कृष्टे निरतिशये केवलसुखात्मके पदे स्थाने मध्वो मधुरस्योत्सो निष्यंदो वर्तते । तदश्यां । यत्र क्षुत्तृष्णाजरामरणपुनरावृत्त्यादिभयं नास्ति संकल्पमात्रेणामृतकुल्यादिभोगाः प्राप्यंते तादृशमित्यर्थः । ततोऽधिकं नास्तीत्याह । इत्था इत्थमुक्तप्रकारेण स हि बंधुः स खलु सर्वेषां सुकृतिनां बंधूभूतो हितकरो वा । तस्य पदं प्राप्तवतां न पुनरावृत्तिः । न च पुनरावर्तत इति श्रुतेस्तस्य बंधुत्वं । हिशब्दः सर्वश्रुतिस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः ॥

॥ अथ षष्ठी ॥

ता वां॒ वास्तू॑न्युश्मसि॒ गम॑ध्यै॒ यत्र॒ गावो॒ भूरि॑शृंगा अ॒यासः॑ ।
अत्राह॒ तदु॑रुगा॒यस्य॒ वृष्णः॑ प॒र॒मं प॒दम॑व भाति॒ भूरि॑ ॥ ६ ॥

ता । वा॒ं । वास्तू॑नि । उ॒श्म॒सि॒ । गम॑ध्यै । यत्र॑ । गावः॑ । भूरि॑ऽशृंगाः । अ॒यासः॑ ।
अत्र॑ । अह॑ । तत् । उ॒रु॒ऽगा॒यस्य॑ । वृष्णः॑ । प॒र॒मं । प॒दं । अव॑ । भा॒ति॒ । भूरि॑ ॥ ६ ॥

हे पत्नीयजमानौ वां युष्मदर्थं ता तानि गंतव्यत्वेन प्रसिद्धानि वास्तूनि सुखनिवासयोग्यानि स्थानानि गमध्यै युवयोर्गमनायोश्मसि । कामयामहे । तदर्थं विष्णुं प्रार्थयाम इत्यर्थः । तानीत्युक्तं कानीत्याह । यत्र येषु वास्तुषु गावो रश्मयो भूरिशृंगा अत्यंतोन्नत्युपेता बहुभिराश्रयणीया वायासोऽयना गंता-

रोऽतिविस्तृताः। यद्वा यासो गंतारः। अतादृशा अत्यंतप्रकाशयुक्ता इत्यर्थः। अत्राह अत्र खलु वास्त्वाधारभूते द्युलोके उरुगायस्य बहुभिर्महात्मभिर्गातव्यस्य स्तुत्यस्य वृष्णः कामानां वर्षितुर्विष्णोस्तत् तादृशं सर्वत्र पुराणादिषु गंतव्यत्वेन प्रसिद्धं परमं निरतिशयं पदं स्थानं भूर्यतिप्रभूतमवभाति। स्वमहिम्ना स्फुरति॥ अयं मंत्रो यास्केन गोशब्दो रश्मिवाचक इति व्याचक्षाणेन व्याख्यातः। तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृंगा बहुशृंगा भूरीति बहुनो नामधेयं प्रभवतीति सतः शृंगं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गत- मिति वा शिरसो निर्गतमिति वायासोऽयनाः। तत्र तदुरुगायस्य विष्णोर्म- हागतेः परमं पदं परार्ध्यस्थमवभाति भूरि। पादः पद्यतेः। नि० २.७.। इति॥

॥ इति द्वितीयस्य द्वितीये चतुर्विंशो वर्गः॥

प्र वः पांतमिति षडृचं षोडशं सूक्तं दैर्घतमसं जागतं। पूर्वत्र वैष्णवं हीत्युक्त- त्वाद्वैष्णवं। आद्यस्तृच इंद्रदेवताकश्च। प्र वो जागतं त्विंद्रश्चाद्यस्तृच इत्यनुक्रम- णिका॥ आभिप्लविकेषूक्थ्येषु स्तोमातिशंसन उक्तो विनियोगः॥

॥ तत्र प्रथमा॥

प्र वः॒ पांत॒मंध॑सो धियाय॒ते म॒हे शूरा॑य॒ विष्ण॑वे चार्चत।
या सानु॑नि॒ पर्व॑ताना॒मदा॑भ्या म॒हस्त॒स्थतु॒रर्व॑तेव सा॒धुना॑॥१॥

प्र। वः॒। पांतं॑। अंध॑सः। धि॒या॒ऽय॒ते। म॒हे। शूरा॑य। विष्ण॑वे। च॒। अ॒र्च॒त॒।
या। सानु॑नि। पर्व॑तानां। अदा॑भ्या। म॒हः। त॒स्थतुः॑। अर्व॑ताऽइव। सा॒धुना॑॥१॥

हे अध्वर्य्वादयः वो युष्माकं संबंधि पांतं पालनस्वभावं पातव्यं वांध- सोऽधः सोमरूपमन्नं प्रार्चत। प्रकर्षेण संपादयत। कस्मै। धियायते स्तुती- रिच्छते महे महते शूराय विक्रांतायेंद्राय। विष्णवे व्यापकायैतन्नामकाय देवाय च। कस्तयोरतिशय इति उच्यते। या याविंद्राविष्णू पर्वतानां प्रीणनवतां पूरणवतां वा॥ पर्वतशब्दो यास्केनैवं निरुक्तः पर्ववान् पर्वतः पर्वः पुनः पृणातेः प्रीणा- तेर्वेति॥ उक्तलक्षणानां लोकानां सानुनि समुच्छ्रितप्रदेशे। सर्वलोक इत्यर्थः। अथवा मेघानां समुच्छ्रितप्रदेशे॥ पर्वतशब्दो मेघनामसूक्तत्वात्॥ तत्र तस्थतुः। तिष्ठतः। कीदृशौ तौ। अदाभ्या। अदंभनीयौ परैरनभिभाव्यौ। अत एव महो महांतौ। यद्वा महो महसि स्वतेजसि सानुनीत्यनेन संबंधः। तत्र दृष्टांतः।

साधुनाभिमतदेशप्रापणसमर्थेनार्वता वेगवताश्वेनेव। तेन यथात्युच्छ्रितं प्रदेशमारोहति तद्वदुच्चं पदमारूढौ। तस्मात्ताभ्यामर्चत ॥

सोमातिरेके तृतीयसवन एषा वैकल्पिकी याज्या। तथा च सूचितं त्वेषमित्था समरणं शिमीवतोरिति वा याज्या। आ॰ ६. ७.। इति ॥

॥ सैषा द्वितीया ॥

त्वेषमित्था समरणं शिमीवतोरिंद्राविष्णू सुतपा वामुरुष्यति।
या मर्त्याय प्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ॥ २ ॥

त्वेषं। इत्था। सम्ऽअरणं। शिमीऽवतोः। इंद्राविष्णू इति। सुतऽपाः। वां। उरुष्यति।
या। मर्त्याय। प्रतिऽधीयमानं। इत्। कृशानोः। अस्तुः। असनां। उरुष्यथः ॥२॥

हे इंद्राविष्णू शिमीवतोरिष्टप्रदानादिकर्मवतोर्वा युवयोरित्था इत्थं त्वेषं प्रदीप्तं समरणं सम्यक् यागदेशगमनं सुतपा हुतशिष्टसोमपीतयजमान उरुष्यति। रक्षति। यागेन पूजयति। यद्वा शिमीवतोः प्रहरणादिकर्मवतोर्वा युवयोस्त्वेषं दीप्तं शौर्योपेतं समरणं सम्यक् परस्परगमनोपेतं वृष्टिप्रदानाय मेघविदारणरूपं यजमान उरुष्यति। रक्षति। स्तौतीत्यर्थः। कस्तयोरतिशय इति उच्यते। या याविंद्राविष्णू मर्त्याय मनुष्याय हविर्दात्रे यजमानाय प्रतिधीयमानमित् प्रतिधातव्यं फलरूपमसनामसनं चलनशीलं प्रदानशीलमन्नादिकमस्तुरभिमतक्षेप्तुर्निरसितुर्वा शत्रूणां कृशानोरग्नेः सकाशादुरुष्यथः। अविच्छेदेन प्रवर्तयथः। वह्नौ हुतं हविः स्वीकृत्य तन्मुखादेव फलमपि दास्यथ इत्यर्थः ॥

॥ अथ तृतीया ॥

ता ईं वर्धंति मह्यस्य पौंस्यं नि मातरा नयति रेतसे भुजे।
दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः ॥ ३ ॥

ताः। ईं। वर्धंति। महि। अस्य। पौंस्यं। नि। मातरा। नयति। रेतसे। भुजे।
दधाति। पुत्रः। अवरं। परं। पितुः। नाम। तृतीयं। अधि। रोचने। दिवः ॥ ३॥

ताः सोमरूपाः प्रसिद्धा आहुतयो यजमानेन हुता ईमेतदस्येंद्रस्य महि महत्पौंस्यं पुंसः कर्म वक्ष्यमाणरूपं बलं वर्धंति। वर्धयंति। ईमित्यनर्थको वा। स चेंद्रः सोमपानजनितं सामर्थ्यं मातरा द्यावापृथिव्यौ निनयति। नि-

तरां प्रापयति । किमर्थं । रेतसे । प्राणिनां पुत्राद्युत्पादनसामर्थ्याय । भुजे । तेषां भोगाय रक्षणाय वा । कुत्रेति तदुच्यते । दिवो द्योतमानस्यादित्यस्याधि अधिकं रोचने रोचमाने मंडले । नाम नमनं द्यावापृथिव्योः स्थापितं सामर्थ्यं पुत्रः पुरुत्राता सर्वो जनः पितुः पालकाद्विष्णोरनुग्रहात् । यद्वा पितुः स्वोत्पादकात्स्वयमुत्पन्नं सत् अवरं निकृष्टं नाम पौत्रसंज्ञं परं तदुत्कृष्टं पुत्र इति नाम तदुभयापेक्षया तृतीयं पितेति नाम दधाति । धारयति । त्रीणि वाव रेतांसि पिता पुत्रः पौत्र इति श्रुतेः । अस्यायमर्थः । अग्नौ हुताः सोमाहूतय आदित्यमंडलं प्राप्य द्वादशात्मनः सवितुर्मूर्त्त्यंतराविंद्राविष्णू पोषयंति । तुष्टौ तौ मेघद्वारा वर्षतः । तया वृष्ट्या सस्यादिद्वारा प्रजाः पुत्रपौत्रादिरूपेण वर्धयत इत्येवं महानुभावाविंद्राविष्णू इति ॥

॥ अथ चतुर्थी ॥

तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः ।
यः पार्थिवानि त्रिभिरिद्विगामभिरुरु क्रमिष्टोरुगायाय जीवसे ॥ ४ ॥
तत्ऽतत् । इत् । अस्य । पौंस्यं । गृणीमसि । इनस्य । त्रातुः । अवृकस्य । मीळ्हुषः ।
यः । पार्थिवानि । त्रिऽभिः । इत् । विगामऽभिः । उरु । क्रमिष्ट । उरुऽगायाय ।
जीवसे ॥ ४ ॥

अस्य महानुभावस्य तत्तत्पौंस्यं पुंस्त्वं पराक्रमातिशयं गृणीमसि । गृणीमः । स्तुमः । कीदृशस्यास्य । इनस्य । सर्वस्य स्वामिनः । त्रातुः । पालकस्य । अवृकस्य । वृको हिंसकः शत्र्वादिः । तद्रहितस्य । मीळ्हुषः । सेक्तुर्नित्यतरुणस्य । स्तुत्येषु पराक्रमेषु मध्यमेकमुदाहरति । यो विष्णुः पार्थिवानि पृथिव्यादीनि प्रथनवंति वा सामर्थ्यात् रजांसीति गम्यते । लोकत्रयस्यापि पृथिवीशब्दवाच्यत्वं पूर्वमुदाहृतं । तानि त्रिभिरिद्विगामभिस्त्रिभिरेव विविधगमनैरुरु विस्तीर्णं यथा भवति तथा क्रमिष्ट । क्रांतवान् । विचक्रम इत्यर्थः । उरुगायायोरुगातव्याय जीवसे लोकत्रयरक्षणाय । यद्वा उरुगायाय ॥ षष्ठ्यर्थे चतुर्थी ॥ उरुगायस्य विष्णोरीदृशं पराक्रमं गृणीमसि । किमर्थं । जीवसे । जीवनाय रक्षणाय ॥

॥ अथ पंचमी ॥

द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो भुरण्यति ।
तृतीयमस्य नकिरा दधर्षति वयश्चन पतयंतः पतत्रिणः ॥ ५ ॥

द्वे इति । इत् । अस्य । क्रमणे इति । स्वःऽदृशः । अभिऽख्याय । मर्त्यः । भुरण्यति ।
तृतीयं । अस्य । नकिः । आ । दधर्षति । वयः । चन । पतयंतः । पतत्रिणः ॥ ५ ॥

अस्य स्वर्दृशः स्वर्गस्य सर्वस्य वा द्रष्टुर्विष्णोर्द्वे इत् क्रमणे द्वे एव पदे मर्त्यो मनुष्योऽभिख्याय सर्वभूत्यादिना प्रख्याय भुरण्यति । गच्छति । भजते ॥ भुरण्यतिः कंड्वादिर्गतिकर्मा भुरण्यति शवतीति तत्कर्मसु पाठात् ॥ प्रसिद्धत्वाद्भूलोकं वृष्ट्यागमनादंतरिक्षं चेत्युभे क्रमणे जानाति । अस्य विष्णोस्तृतीयं क्रमणं द्युलोकाख्यं कोऽपि मर्त्यो नकिर्नैवादधर्षति । बुद्ध्या नाभिभवति । ज्ञातुं न शक्नोतीत्यर्थः । न केवलं मनुष्य एव अपि तु वयश्चन वेतारो मरुतोऽपि । कीदृशास्ते । पतयंतः । सर्वत्र गमनसमर्थाः । तथा पतत्रिणः पतनशीला गरुडादयो वायवो वा नकिरादधर्षति । नैव शक्नुवंति ॥ धृषेर्लेट्यडागमः ॥ सत्यलोकस्यात्यंतविप्रकृष्टत्वेन सर्वेषामविषयत्वादिति भावः ॥

॥ अथ षष्ठी ॥

चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीँरवीविपत् ।
बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवं ॥ ६ ॥

चतुःऽभिः । साकं । नवतिं । च । नामऽभिः । चक्रं । न । वृत्तं । व्यतीन् । अवीविपत् ।
बृहत्ऽशरीरः । विऽमिमानः । ऋक्वऽभिः । युवा । अकुमारः । प्रति । एति । आऽहवं ॥ ६ ॥

अयमादित्यात्मा विष्णुश्चतुर्भिः साकं सहितां नवतिं । सचतुर्नवतिमित्यर्थः । एतत्संख्याकान्कालावयवान् नामभिः स्वकीयनमनप्रकारैः प्रेरणविशेषैर्वृत्तं यथा भवति तथा व्यतीन् विविधानेव स्वभावान् वृत्तं चक्रं न बह्वरोपेतं चक्रमिव । तं यथा शत्रोरुपरि प्रक्षेपेण भ्रमयति तद्वदुक्तसंख्याकान्कालावयवानवीविपत् । कंपयति भ्रमयति ॥ टुवेपृ कंपने । ण्यंताल्लुङि चङि रूपं ॥ के पुनस्त उच्यंते । संवत्सर एकः । अयने द्वे । पंचर्तवः । द्वादश मासाः । चतुर्विंशत्यर्धमासाः । त्रिंशदहोरात्राः । अष्टौ यामाः । एकस्मिन्दिने पर्यावर्तमानानि मेषादीनि द्वादश

लग्नानीति मिलित्वा चतुरधिकनवतिसंख्याकानवीविपत्। ननु आदित्यः स्वयमपि इतरवत्परिभ्रमति । कथं भ्रमयतीत्युच्यते। नैष दोषः । एतेषां भ्रामकस्य ध्रुवस्य विष्णोर्मूर्त्यंतरत्वात्। अथवा स्वभ्रमणाधीनत्वादितरेषां परिभ्रमणस्य। अतः स्वयं भ्रमयतीत्युच्यते। एवं कालात्मको विष्णुर्बृहच्छरीरो विराडात्मना सर्वदेवमनुष्यादिशरीराणां स्वशरीरत्वात्। बृहच्छरीरत्वमेवोपपादयति। विमिमानो विविधमात्मानं मिमानो देवतिर्यगात्मना विभज्य स्थापयन्। यद्वा ऋक्भिः स्तुतिमद्भिर्मंत्रवद्भिर्वा विमिमानः। यद्यपि विभुस्तथापि भक्ताधीनत्वात् स्तुत्या मीयते। युवा सर्वत्र मिश्रणशीलो नित्यतरुणो वा। अत एवाकुमारोऽनल्पः। एवंभूतो महाविष्णुराहवमाह्वानं प्रत्येति। गच्छति यज्ञदेशं ॥

॥ इति द्वितीयस्य द्वितीये पंचविंशो वर्गः ॥

भवा मित्र इति पंचर्चं सप्तदशं सूक्तं दैर्घतमसं। जागतं त्वित्युक्तत्वादिदमपि जागतं । वैष्णवं हीत्युक्तत्वाद्वैष्णवं । भव पंचेत्यनुक्रांतं ॥ उक्थ्ये तृतीयसवनेऽच्छावाकशस्त्र एतत्सूक्तं विनियुक्तं। उक्थ्ये तु होत्रकाणामिति खंडे सूचितं भवा मित्रः सं वां कर्मणा। आ॰ ६.१.। इति ॥ सोम्यचरोरुभयतो घृतेन यष्टव्यं तत्रोपरितने घृतयाग उरु विष्णो विक्रमस्वेति प्राकृता याज्या। दशमेऽहनि तु तस्याः स्थाने भवा मित्र इत्येषा प्रयोक्तव्या। दशमेऽहनीति खंडे सूचितं। उरु विष्णो विक्रमस्वेति घृतयाज्यास्थाने भवा मित्रः। आ॰ ८.१२.। इति ॥

॥ सैषा सूक्ते प्रथमा ॥

भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न एवया उ सप्रथाः ।
अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो यज्ञश्च राध्यो हविष्मता ॥ १ ॥

भव। मित्रः। न। शेव्यः। घृतऽआसुतिः। विभूतऽद्युम्नः। एवऽयाः। ऊं इति। सऽप्रथाः।
अध। ते। विष्णो इति। विदुषा। चित्। अर्ध्यः। स्तोमः। यज्ञः। च। राध्यः। हविष्मता ॥१॥

हे विष्णो मित्रो न। मितेर्दुःखात् त्राता सखा आदित्यो वा मित्रः ॥ प्रमीतेस्त्रायत इति निरुक्तं ।१०. २१.॥ तद्वत् शेव्यः साधुः सुखकर्ता घृतासुतिः । घृतमुदकमासूयते येन स तादृशः । यद्वा घृतमाज्यमाभिमुख्येन नीयते यस्मै स तादृशः । विभूतद्युम्नः प्रभूतयशाः प्रभूतान्नो वा । एवया रक्षणस्य मिश्रयिता

प्रापयिता। सप्रथाः सर्वतः पृथुः। प्रतिविशेषणं नो भवेति संबंधः ॥ द्व्यचोऽत-स्तिङ इति दीर्घः । उ इति पादपूरणः ॥ हे विष्णो त्वं यस्मादीदृशो भवसि अधास्मात्ते तव स्तोमः स्तोत्रविशेषो विदुषा त्वन्माहात्म्यवेदित्रा यजमानेनार्ह्यैः पुनःपुनः प्रवर्धनार्हः । एकवारकरणे न संपूर्यत इत्यर्थः । तथा ते यज्ञश्च हविष्मता तेन यजमानेन राध्यः समाराधनीयः। यद्वा विदुषा होत्रा स्तोमो राध्यो हविष्मता यज्ञश्च राध्यः ॥

॥ अथ द्वितीया ॥

यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति ।
यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसत् ॥ २ ॥
यः । पूर्व्याय । वेधसे । नवीयसे । सुमत्ऽजानये । विष्णवे । ददाशति ।
यः । जातं । अस्य । महतः । महि । ब्रवत् । सः । इत् । ऊं इति । श्रवःऽभिः । युज्यं । चित् । अभि । असत् ॥ २ ॥

यः यो मर्त्यः पूर्व्याय पूर्वकालीनाय। नित्यायेत्यर्थः। वेधसे विविधजगत्कर्त्रे नवीयसे नित्यनूतनाय। अत्यंतरमणीयायेत्यर्थः। स्तुत्याय वा सुमज्जानये स्वय-मेवोत्पन्नाय ॥ जनेरौणादिक इण् । सुमत्स्वयमित्यर्थः । नि० ६. २२.। इति यास्कः ॥ यद्वा सुतरां मादयतीति सुमत्। तादृशी जाया यस्य स तथोक्तः। तस्मै सर्वजगन्मादनशीलश्रीपतय इत्यर्थः ॥ बहुव्रीहौ जायाया निङिति नि-ङादेशः समासांतः। वलि लोपः ॥ उक्तगुणकाय विष्णवे व्यापकाय ददाशति। हविरादिकं ददाति। किंच अस्य विष्णोर्महतो महानुभावस्य महि महत् पूज्यं जातं जन्मोत्पत्तिं हिरण्यगर्भादिरूपं जन्म ब्रवत्। ब्रूयात्॥ ब्रवीतेर्लेट्यडागमः॥ संकीर्तयेत्। सेदु ॥ उशब्दोऽपिशब्दार्थः ॥ सोऽपि दाता श्रवोभिरन्नैः कीर्ति-भिर्वा युक्तः सन् युज्यं चित् सर्वैर्गंतव्यमेव तत्पदमाभिमुख्येनासत्। गच्छति। प्राप्नोति ॥

॥ अथ तृतीया ॥

तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन ।
आस्य जानंतो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे ॥ ३ ॥

तं। ऊं इति॑। स्तो॒तारः। पू॒र्व्यं। यथा॑। वि॒द। ऋ॒तस्य॑। गर्भं॑। ज॒नुषा॑। पि॒प॒र्त॒न।
आ। अ॒स्य॒। जा॒नंतः॑। नाम॑। चि॒त्। वि॒व॒क्त॒न। म॒हः। ते॒। वि॒ष्णो॒ इति॑। सु॒ऽम॒तिं।
भ॒जा॒म॒हे॒ ॥ ३ ॥

हे स्तोतारः तमु तमेव विष्णुं पूर्व्यं पूर्वार्हमनादिसंसिद्धमृतस्य गर्भं यज्ञस्य गर्भभूतं। यज्ञात्मनोत्पन्नमित्यर्थः। यज्ञो वै विष्णुरिति श्रुतेः। यद्वा ऋतस्योदकस्य गर्भं गर्भकारणं। उदकोत्पादकमित्यर्थः। अप एव ससर्जादाविति स्मृतेः। एवंभूतं विष्णुं यथा विद। जानीथ। तथा जनुषा जन्मना स्वत एव न केनचिद्वरलाभादिना पिपर्तन। स्तोत्रादिना प्रीणयत। यावदस्य माहात्म्यं जानीथ तावदित्यर्थः॥ विदेर्लेटि मध्यमबहुवचनं। विद ऋतस्येत्यत्र संहितायामृत्यक इति प्रकृतिभावः॥ किंच अस्य महानुभावस्य विष्णोर्नाम चित् सर्वैर्नमनीयमभिधानं सार्वात्म्यप्रतिपादकं विष्णुरित्येतन्नाम जानंतः पुरुषार्थप्रदमित्यधिगच्छंत आ समंताद्विवक्तन। वदत संकीर्तयत। यद्वा नाम यज्ञनामनमनं विष्णोरेव सर्वेषां स्वर्गापवर्गसाधनायेच्छयाद्यात्मना द्रव्यदेवतात्मना वा परिणाममाजानंतो यूयं विवक्तन। ब्रूत स्तुत॥ वचेर्लोटि छांदसः शपः श्लुः। बहुलं छंदसीत्यभ्यासस्येत्वं। पूर्ववत्तनादेशः॥ इदानीं साक्षात्कृत्याह। हे विष्णो सर्वात्मक देव महो महतस्ते तव सुमतिं सुष्ठु मतिं शोभात्मिकां बुद्धिं वा भजामहे। सेवामहे वयं यजमानाः॥

अग्नीषोमप्रणयने तमस्य राजेत्येषा प्रयोक्तव्या। अग्नीषोमौ प्रणेष्यत्स्विति खंडे सूचितं। तमस्य राजा वरुणस्तमश्विनेत्यर्धर्च आरमेत्। आ॰ ४. १०.। इति॥

॥ सैषा चतुर्थी ॥

तम॑स्य॒ राजा॒ वरु॑ण॒स्तम॒श्विना॒ क्रतुं॑ सचंत॒ मारु॑तस्य वे॒धसः॑।
दा॒धार॒ दक्ष॑मुत्त॒मम॑ह॒र्विदं॑ व्र॒जं च॒ विष्णुः॒ सखि॑वाँ अपोर्णु॒ते ॥ ४ ॥

तं। अ॒स्य॒। राजा॑। वरु॑णः। तं। अ॒श्विना॑। क्रतुं॑। स॒चं॒त॒। मारु॑तस्य। वे॒धसः॑।
दा॒धार॑। दक्षं॑। उ॒त्ऽत॒मं। अ॒ह॒ःऽविदं॑। व्र॒जं। च॒। विष्णुः॑। सखि॑ऽवान्। अ॒प॒ऽऊ॒र्णु॒ते॒ ॥ ४ ॥

मारुतस्य। मरुतामृत्विजां संघातो मारुतं। तद्वतः॥ मत्वर्थो लुप्यते॥ मरुतां देवानां संबंधिनो वा वेधसो मेधाविनोऽस्य यजमानस्य तं प्रसिद्धं क्रतुं यागं

यज्ञात्मकं विष्णुं। यज्ञो वै विष्णुरिति श्रुतेः। राजा राजमानो वरुणः सचंत। सेवते। तमेव क्रतुं यागमश्विनाश्विनौ सचेते। अन्येऽपि देवाः सचंते। सेवंते। किंच विष्णुः सवनत्रयात्मना व्याप्तो विष्णुः सखिवान् यजमानादिसखिभिर्युक्तः सन् उत्तममुत्कृष्टतममहर्विदमहर्वेत्तारं। स्वर्गोत्पादकमित्यर्थः। दक्षं बलं फलप्रदानसामर्थ्यरूपं दाधार। धृतवान्। किंच व्रजं च मेघं च ॥ व्रज इति मेघनाम व्रजश्चरुरिति तन्नामसु पाठात् ॥ तं वृष्ट्युदकायापोर्णुते। अपगतावरणं करोति। आहुतिद्वारा यज्ञस्यैव वृष्ट्युत्पादकत्वात्। यद्वा मारुतस्य मरुत्संघातस्य देवगणस्य वेधसो विधातुः स्रष्टुर्विष्णोः क्रतुं कर्म पालनादिरूपं वरुणादयः सचंते। तदधीनत्वात्पालनस्य। स च सखिवान् इंद्रमरुदादिसहायोपेतः सन् उक्तलक्षणं दक्षं वृष्ट्युत्पादनादिसामर्थ्यरूपं बलं दाधार। तथा व्रजं चोपोर्णुते ॥

॥ अथ पंचमी ॥

आ यो विवाय सचथाय दैव्य इंद्राय विष्णुः सुकृते सुकृत्तरः।
वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत् ॥ ५ ॥
आ। यः। विवाय। सचथाय। दैव्यः। इंद्राय। विष्णुः। सुऽकृते। सुकृत्ऽतरः।
वेधाः। अजिन्वत्। त्रिऽसधस्थः। आर्यं। ऋतस्य। भागे। यजमानं। आ। अभजत् ॥ ५ ॥

यो विष्णुर्दैव्यो दिवि भवः सुकृत्तरः शोभनफलप्रदानां मध्ये श्रेष्ठ आविवाय। आगच्छति ॥ वेतेर्लिटि रूपं ॥ किमर्थं। सचथाय। सचनाय यागसहायकरणाय। कस्मै। इंद्राय। इरां हविर्लक्षणान्नं द्रावयतीतींद्रो यजमानः। इंद्र इरां दृणातीति इदंकरणादित्याग्रायण इति यास्केनोक्तनिर्वचनस्यात्रापि सद्भावात्। नि° १०. ८.॥ तस्मा उक्तरूपाय यजमानाय सुकृते शोभनस्तुतिकर्त्रे। आगत्य च वेधा अभिमतफलविधाता त्रिषधस्थस्त्रिसंख्योपेतसहस्थानवान्। सवनत्रयस्थानः क्षित्यादिस्थानत्रयो वा विष्णुः। आर्यमागंतव्यं यजमानमजिन्वत्। प्रीणयति ॥ जिवि प्रीणनार्थः। इदित्वान्नुम् ॥ तदर्थमृतस्य यज्ञस्य भागे हुतशेषरूपे तं यजमानमाभजत्। भजति। समीपयतीत्यर्थः। यद्वा ऋतस्य यज्ञस्य भागे फले यजमानमाभजत्। स्वामित्वेन स्थापयति ॥

॥ इति द्वितीयस्य द्वितीये षड्विंशो वर्गः ॥

॥ इति प्रथमे मंडल एकविंशोऽनुवाकः ॥

द्वाविंशेऽनुवाकेऽष्टौ सूक्तानि । तत्राबोध्यग्निर्ज्म इति प्रथमं सूक्तं षड़ृचं दैर्घतमसमाश्विनं । पूर्ववच्च जागतं त्विति तुशब्दादिदमपि जागतं । अंत्ये द्वे त्रिष्टुभौ । अबोधि षळाश्विनं त्वंत्ये त्रिष्टुभावित्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोर्जागते छंदस्युक्तो विनियोगः । अथाश्विन इति खंडे सूचितं । अबोध्यग्निर्ज्म एष स्य भानुः । आ॰ ४. १५. । इति ॥

॥ तत्र प्रथमा ॥

अबोध्यग्निर्ज्म उदेति सूर्यो व्यु१षाश्चंद्रा मह्यावो अर्चिषा ।
आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक् ॥ १ ॥
अबोधि । अग्निः । ज्मः । उत् । एति । सूर्यः । वि । उषाः । चंद्रा । मही । आवः । अर्चिषा ।
अयुक्षातां । अश्विना । यातवे । रथं । प्र । असावीत् । देवः । सविता । जगत् । पृथक् ॥ १ ॥

अयमग्निर्विहितः सन् ज्मो ज्मायाः पृथिव्या वेदिलक्षणायाः संबंधी सन् अबोधि । प्रतिबोधितः ॥ ज्मेति पृथिवीनाम ग्मा ज्मेति तन्नामसूक्तत्वात् ॥ किंच सूर्य उदेति । मही महत्युषा अर्चिषा प्रकृष्टेन तेजसा चंद्रा प्राणिनामाह्लादिनी सती व्यावः । तमांसि विवासयति ॥ वसेर्लुङि छांदसश्च्लेर्लुक् । छंदस्यपि दृश्यत इत्याडागमः ॥ यत इयमुषा उदेति यतश्च सूर्यो यतश्चायमग्निः प्रबुद्धो भवति अतः कारणात् हे अश्विनौ युष्मत्संबंधिनं रथं यातवे देवयजनगमनाय रासभाभ्यामायुक्षातां । आभिमुख्येन युंजाथां । तथा सविता सर्वकर्मणोऽनुज्ञाता देवो जगत् जंगमं प्राणिजातं पृथक् स्वस्वकर्मानुरोधेन प्रासावीत् । प्रसौतु । अनुजानातु ॥

॥ अथ द्वितीया ॥

यद्युंजाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतं ।
अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥ २ ॥
यत् । युंजाथे इति । वृषणं । अश्विना । रथं । घृतेन । नः । मधुना । क्षत्रं । उक्षतं ।
अस्माकं । ब्रह्म । पृतनासु । जिन्वतं । वयं । धना । शूरऽसाता । भजेमहि ॥ २ ॥

हे अश्विनाश्विनौ यद्यदा वृषणं वृष्ट्यादिवर्षकं रथं युंजाथे । योजयथः । तदा नः क्षत्रमस्मदीयं बलं क्षत्रियजातं वा घृतेनोदकेन मधुना मधुरेणोक्षतं ।

प्रवर्धयतमित्यर्थः। यद्वा घृतेन क्षरणरूपेण मधुना मधुरेणामृतेनोक्षतं। युष्मद्रथस्थेन मधुनास्मदीयं बलं प्रवर्धयतमित्यर्थः। अश्विनो रथस्य मधुपूर्णत्वं मधुवाहनो रथ इत्यादिषु प्रसिद्धं। किंच अस्माकं पृतनास्वस्मदीयासु पुत्रभृत्यादिमनुष्यरूपासु प्रजासु ब्रह्म ब्राह्मं तेजो जिन्वतं॥ पृतना इति मनुष्यनाम विवस्वंतः पृतना इति तन्नामसूक्तत्वात्॥ यद्वा पृतनासु परकीयासु प्रजासु ब्रह्म तासां परिवृढमन्नमस्माकं जिन्वतं। प्रीणयतं॥ ब्रह्मेत्यन्ननाम ब्रह्म वर्च इति तन्नामसूक्तत्वात्॥ वयं च शूरसाता शूरसातौ शूराणां प्रहारादिना युक्ते संग्रामे धना तदीयानि धनानि बहुविधानि भजेमहि। लभेमहि॥

॥ अथ तृतीया ॥

अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः।
त्रिवंधुरो मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे॥३॥

अर्वाङ्। त्रिऽचक्रः। मधुऽवाहनः। रथः। जीरऽअश्वः। अश्विनोः। यातु। सुऽस्तुतः।
त्रिऽवंधुरः। मघऽवा। विश्वऽसौभगः। शं। नः। आ। वक्षत्। द्विऽपदे। चतुःऽपदे॥३॥

अश्विनो रथोऽर्वाङ् अस्मदभिमुखो यातु। गच्छतु। कीदृशः। त्रिचक्रः। चक्रत्रययुक्तः। मधुवाहनः। मधुवोढा। जीराश्वः। शीघ्रगाम्यश्वोपेतः। सुष्टुतः। अत एव अस्माभिः स्तूयमानः। त्रिवंधुरः। निम्नोन्नतकाष्ठत्रयोपेतः। सारथ्याश्रयस्थानं वंधुरं। मघवा धनवान् अत एव विश्वसौभगः सर्वसौभाग्योपेतः। ईदृशोऽश्विनो रथो नोऽस्माकं द्विपदे पुत्रादिप्रजायै चतुष्पदे पशवे च शं सुखमावक्षत्। आवहतु॥ वहेर्लेट्यडागमः। सिप्॥

॥ अथ चतुर्थी ॥

आ न ऊर्जं वहतमश्विना युवं मधुमत्या नः कशया मिमिक्षतं।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा॥४॥

आ। नः। ऊर्जं। वहतं। अश्विना। युवं। मधुऽमत्या। नः। कशया। मिमिक्षतं।
प्र। आयुः। तारिष्टं। निः। रपांसि। मृक्षतं। सेधतं। द्वेषः। भवतं। सचाऽभुवा॥४॥

हे अश्विना अश्विनौ युवं युवां नोऽस्माकमूर्जं बलं बलप्राणनसमर्थमन्नमावहतं। प्रापयतं। किंच नोऽस्मान्मधुमत्या माधुर्योपेतया कशया वाचेष्टप्र-

दानरूपया मिमिक्षतं। सिंचतं प्रीणयतं ॥ कशेति वाङ्नाम कशा धिषणेति तन्नामसूक्तत्वात्। यद्वा मधुमत्या माधुर्यवृष्टिमत्या माधुर्योपेतया कशयाश्वताडन्या नोऽस्मान्मिमिक्षतं ॥ मध्वित्युदकनाम मधु पुरीषमिति तन्नामसूक्तत्वात् ॥ कशयाश्वताडनेन शीघ्रमागत्य वृष्टिरूपं फलं दास्यत इति कशाया मधुमत्त्वं। किंच आयुरायुष्यं प्रतारिष्टं। प्रवर्धयतं ॥ प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ तथा रपांसि मृक्षतं। पापानि निःशेषेण शोधयतं ॥ रपो रिप्रमिति पापनामनी भवतः नि॰ ४. २१.। इति यास्कः ॥ किंच द्वेषो द्वेष्यममित्रादिकं सेधतं। नाशयतं। इदं च भाव्यं। सचाभुवा सहभुवावस्मत्कार्येषु सहभवनवंतौ भवतं। भवंतावैकमत्यं भजत इत्यर्थः ॥ वाक्यभेदादनिघातः ॥

॥ अथ पंचमी ॥

युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वंतः।
युवमग्निं च वृषणावपश्च वनस्पतीँरश्विनावैरयेथां ॥ ५ ॥
युवं। ह। गर्भं। जगतीषु। धत्थः। युवं। विश्वेषु। भुवनेषु। अंतरिति।
युवं। अग्निं। च। वृषणौ। अपः। च। वनस्पतीन्। अश्विनौ। ऐरयेथां ॥ ५ ॥

हे अश्विना अश्विनौ युवं ह युवां खलु जगतीष्वंतर्गमनशीलासु गोषु मध्ये गर्भं धत्थः। धारयथः। न केवलं गोष्वेव अपि तु युवं युवां विश्वेषु सर्वेषु भुवनेषु भूतजातेष्वंतर्मध्ये गर्भं धत्थः। वृष्टिद्वारामिषरूपत्वेन गर्भस्थरेतसः पोषकत्वात्। किंच हे वृषणौ कामानां वर्षितारौ युवं युवामग्निं चापश्च वनस्पतींश्चैरयेथां। प्रवर्तयेथां। आहुतिभोगायाग्निं स्वीकृत्य च वृष्ट्युदकानि उदकैरोषधिवनस्पत्यादिकं। एतान्यस्मदर्थं प्रेरयेथां ॥

॥ अथ षष्ठी ॥

युवं ह स्थो भिषजा भेषजेभिरथो ह स्थो रथ्या३ राथ्येभिः।
अथो ह क्षत्रमधि धत्थ उग्रा यो वां हविष्मान्मनसा ददाश ॥ ६ ॥
युवं। ह। स्थः। भिषजा। भेषजेभिः। अथो इति। ह। स्थः। रथ्या। रथ्येभिरिति रथ्येभिः।
अथो इति। ह। क्षत्रं। अधि। धत्थः। उग्रा। यः। वां। हविष्मान्। मनसा। ददाश ॥ ६ ॥

हे अश्विनौ युवं युवां ह खलु भेषजेभिर्भेषजैरौषधैः ॥ भेषजौषधभेषज्यान्यगदो

जायुरगदं तच्चौषधमिति चाभिधानात्। तैर्भिषजा भिषजौ स्थः ॥ हशब्दोऽश्विनौ हि देवानां भिषजावित्यादिप्रसिद्धिद्योतनार्थः ॥ अथो अपि च रथ्येभी रथवोढृभिरश्वै रथ्या रथवंतौ स्थः। आ वां रथो अश्विनेत्यादिप्रसिद्धिद्योतनार्थो हशब्दः। अनयो रथेन विशेषसंबंधो युवोर्हि पूर्वं सवितोषसा रथमृताय चित्रं घृतवंतमिष्यतीत्यादिमंत्रांतरेषु प्रसिद्धः। अथो अपि च युवयोः क्षत्रं बलमधि ह। अधिकं खलु ॥ हशब्दः प्रसिद्धौ ॥ यस्मादेवं तस्मात् हे उग्रा उद्गूर्णसामर्थ्यावश्विनौ वां युवाभ्यां यो हविष्मान् आज्यपुरोडाशादिहविर्युक्तो यजमानो मनसा युष्मदायत्तेन चेतसा ददाश। ददाति हविरादिकं। तं धत्थः। धारयथः। अत्यधिकमनुगृह्णीथ इत्यर्थः। प्रभूतबलौ युवां रथमारुह्यास्मद्देवयजनमागत्य हविःप्रदं मां धृत्वास्मद्यज्ञेऽस्मान्विचिकित्सतमिति तात्पर्यार्थः ॥

॥ इति द्वितीयस्य द्वितीये सप्तविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।  
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके द्वितीयोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।  
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ तृतीयाध्याय आरभ्यते। वसू रुद्रेत्येतदनुवाकापेक्षया द्वितीयं सूक्तं षड्चं दैर्घतमसं। पूर्वंचाश्विनं त्वित्युक्तत्वादिदमप्याश्विनं। अनादेशपरिभाषया त्रैष्टुभं। दीर्घतमा मामतेय इत्यंत्यानुष्टुप्। तथा चानुक्रांतं। वसू अंत्यानुष्टुबिति ॥ अस्य विशेषविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

वसू रुद्रा पुरुमंतू वृधंता दशस्यतं नो वृषणावभिष्टौ ।
दस्रा ह यद्रेक्ण औचथ्यो वां प्र यत्सस्राथे अकवाभिरूती ॥ १ ॥

वसू इति । रुद्रा । पुरुमंतू इति पुरुऽमंतू । वृधंता । दशस्यतं । नः । वृषणौ । अभिष्टौ ।
दस्रा । ह । यत् । रेक्णः । औचथ्यः । वां । प्र । यत् । सस्राथे इति । अकवाभिः । ऊती ॥ १ ॥

हे वृषणौ कामानां वर्षितारौ दस्रास्मद्विरोध्युपक्षपयितारौ हे अश्विनौ युवां नोऽस्मभ्यं दशस्यतं । दत्तं दित्सितं फलं । कीदृशौ युवां । वसू । वासयितारौ प्रजानां । वसुना धनेन तद्वंतौ वा ॥ मत्वर्थो लुप्यते ॥ रुद्रा रुद्रौ । रुत् दुःखं तद्धेतुभूतं पापं वा । तस्य द्रावयितारौ । संग्रामे भयंकरं शब्दयंतौ वा ॥ रुद्रो रौतीति सत इति यास्कः ॥ पुरुमंतू । बहूनां ज्ञातारौ ॥ मनेरौणादिकस्तुन्प्रत्ययः ॥ वृधंता वर्धमानौ स्तोत्रादिना । अभिष्टौ । आभिमुख्येन पूजितौ । अभीष्टसाधकौ वा ॥ हशब्द उक्तगुणप्रसिद्धिद्योतनार्थः ॥ किमर्थं दीयत इति चेत् । यद्यस्मादौचथ्य उचथ्यस्य पुत्रो दीर्घतमा वां युवां रेक्णो धनं स्तुतिव्याजेन प्रार्थयते । तदर्थं । यद्वा अयं यजमानो यद्यस्माद्रेक्णो हविर्लक्षणमन्नं वां युवाभ्यां दास्यति ददातीति शेषः । यस्माच्चाकवाभिरकुत्सितैरूती ऊतिभी रक्षणैः ॥ सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घः ॥ प्रसस्राथे । प्रसारयथः । प्रकर्षेण दत्थः । तस्माद्दशस्यतं । यस्मादभिमतप्रदौ यस्माच्चायं प्रार्थयते ददाति वा हविः । तस्माद्दशस्यतमित्यर्थः ॥

॥ अथ द्वितीया ॥

को वां दाशत्सुमतये चिदस्यै वसू यद्धेथे नमसा पदे गोः ।
जिगृतमस्मे रेवतीः पुरंधीः कामप्रेणेव मनसा चरंता ॥ २ ॥

कः । वां । दाशत् । सुऽमतये । चित् । अस्यै । वसू इति । यत् । धेथे इति । नमसा । पदे । गोः ।
जिगृतं । अस्मे इति । रेवतीः । पुरंऽधीः । कामप्रेणऽइव । मनसा । चरंता ॥ २ ॥

हे वसू वासयितारावश्विनौ वां युवयोः संबंधिन्या अस्यै वक्ष्यमाणरूपायै सुमतये चित् शोभनबुद्ध्यै ॥ चित् पूजायामप्यर्थे वा ॥ स्वल्पेनैव हविषा महत्फलप्रदानरूपाया ईदृश्या अपि बुद्ध्यै प्रीणनाय को दाशत् । को दद्यात् । दातुं

शक्नुयात्। युवयोः प्रभावस्यातिमहत्त्वादिति भावः ॥ दाशतेर्लेट्यडागमः ॥ कथं मतेः सौष्ठवमिति तदुच्यते। यद्यस्मात्कारणाद्गोः पदे भूम्याः सर्वैर्गंतव्यायाः स्तुत्याया वा वेदिरूपायाः स्थाने। एतावती वै पृथिवी यावती वेदिरिति श्रुतेः। गौरिति भूमिनाम। तथा च निरुक्तं। गौरिति पृथिव्या नामधेयं यद्दूरं गता भवति यच्चास्यां भूतानि गच्छंति गातेर्वौकारो नामकरणः। नि॰ २. ५.। इति ॥ तादृशे स्थानेऽस्माभिः प्रार्थितौ संतौ नमसा हविर्लक्षणेन यवमात्रप्रकारेणान्नेन धेथे। धारयथो बहुप्रदानविषयां बुद्धिं ॥ दधातेर्लेटि बहुलं छंदसीति विकरणस्य लुक्। धातोर्ह्रस्वत्वं। आतो ङित इतीयादेशः ॥ यस्मादेवं तस्मादस्मे अस्मभ्यं रेवतीः क्षीरादिधनवतीः पुरंधीः शरीरधारिकाः शरीराभिवृद्धिहेतूर्गा जिगृतं। शब्दयतं। दत्तमित्यर्थः ॥ गॄ शब्दे। छांदसः शपः श्लुः। अभ्यासस्येत्वं ह्रस्वत्वं च ॥ पुनस्तावेव विशेष्येते। कामप्रेणेव ॥ इवशब्द एवकारार्थः ॥ कामपूरकेणैव मनसा सह चरंता चरंतौ। यजमानस्य कामाः पूरणीया इति कृतसंकल्पावित्यर्थः ॥ प्रा पूरणे। कामं प्रातीति कामप्रः। आतोऽनुपसर्गे कः ॥

॥ अथ तृतीया ॥

युक्तो ह यद्वां तौग्र्याय पेरुर्वि मध्ये अर्णसो धायि पज्रः।
उप वामवः शरणं गमेयं शूरो नाज्म पतयद्भिरेवैः ॥ ३ ॥

युक्तः। ह। यत्। वां। तौग्र्याय। पेरुः। वि। मध्ये। अर्णसः। धायि। पज्रः।
उप। वां। अवः। शरणं। गमेयं। शूरः। न। अज्म। पतयत्ऽभिः। एवैः ॥ ३ ॥

अत्रेतिहासमाहुः। तौग्र्यनामकं राजानं युद्धे शत्रवः पराभाव्य पाशैर्दृढं बद्ध्वा समुद्रमध्ये प्रचिक्षिपुः। स चोत्तरीतुमशक्तः सन् अश्विनौ तुष्टाव। तौ च तुष्टौ शीघ्रमेव रथमश्वैर्योजयित्वा समुद्रमागत्य तमुत्तार्यापालयतामिति। अयमर्थोऽजोहवीदश्विना तौग्र्य इत्यादिमंत्रांतरे प्रसिद्धः। सोऽत्रोच्यते। हे अश्विनौ वां युवयोः संबंधी पेरुः पारणकुशलो रथो युक्तो ह। अश्वैर्युक्तः खलु। हशब्दो मंत्रांतरप्रसिद्धिद्योतनार्थः। स चोदाहृतः। कस्मै। तौग्र्याय। एतन्नाम्ने राज्ञे। तद्बंधमोचनार्थं। कुत्रेति तदुच्यते। अर्णसोऽंभसो मध्ये समुद्रस्य मध्ये। स च पज्रः पाजसा बलेन तीर्णः सन् विधायि। धारितः स्थापितः। यस्मादेवं तस्माद्वां युवयोरवो रक्षणं शरणमुपगमेयं। संप्राप्नुयां। ऐहिकदुःखाद्विमुक्तो युष्मत्स्थानं

संभजेयं। गतौ दृष्टांतः। पतयद्भिरेवैरश्वैः शूरो न शूर इव। स यथाजौ जित्वा निर्भयं स्वगृहं प्राप्नोति तद्वत्॥

॥ अथ चतुर्थी ॥

उप॑स्तुतिरौच॒थ्यमु॑रुष्ये॒न्मा मामि॒मे प॑त॒त्रिणी॒ वि दु॑ग्धां।
मा मामेधो॒ दश॑तयश्चि॒तो धा॒क् प्र यद्वां॑ ब॒द्धस्त्मनि॒ खाद॑ति॒ क्षां॥४॥

उप॑ऽस्तुतिः। औ॒च॒थ्यं। उ॒रु॒ष्येत्। मा। मां। इ॒मे इति॑। प॒त॒त्रिणी॒ इति॑। वि। दु॒ग्धां॒।
मा। मां। एध॑ः। दश॑ऽतयः। चि॒तः। धा॒क्। प्र। यत्। वा॒म्। ब॒द्धः। त्मनि॑। खाद॑ति। क्षां॥४॥

अत्राख्यानमाहुः। जराजरितगात्रं जात्यंधं दीर्घतमसं मामतेयं वरिवसितुमशक्नुवानाः स्वगर्भदासा अग्नौ प्रदाहाय प्रचिक्षिपुः। तत्र क्षिप्तोऽश्विनावस्तावीत्। तौ चैनमरक्षतां। ततोऽप्यम्रियमाणमुदकेष्ववपातयन्। तत्र निमग्नः पुनरश्विनौ तुष्टाव। तुष्टौ संतौ तौ जलादुदहार्ष्टां। एवमवध्यं तं त्रैतनो नामकः कश्चिद्दासोऽस्य शिरो वक्षश्च वितक्षत्। ततोऽप्यपालयतामिति। तदिदमृग्द्वयाभ्यामुच्यते। हे अश्विनौ उपस्तुतिर्युवां बुद्ध्योपेत्य क्रियमाणा स्तुतिरौचथ्यमुचथस्य पुत्रं दीर्घतमसं मामुरुष्येत्। रक्षेद्दाहाद्युपद्रवात्॥ उरुष्यती रक्षाकर्मेति यास्कः॥ एवं सामान्येनोक्त्वा विशेषेण प्रत्युपद्रवपरिहारं प्रार्थयते। इमे प्रसिद्धे पतत्रिणी पतनशीले पुनरावर्तनशीले अहोरात्रे मां मा विदुग्धां। विशेषेण दोहगतसारं मा कार्ष्टां। प्राणनिर्गमनानुकूल्यं मा कुरुतामित्यर्थः। किंच मां दशतयो दशवारश्चितः संचितः संपादित एधः प्रज्वालितेंधनसंघो मा धाक्। मा धाक्षीत्॥ दहतेर्लुङि सिचि हलंतलक्षणा वृद्धिः। बहुलं छंदसीतीडभावः। हल्ङ्यादिसंयोगांतलोपौ॥ दुःसहदुःखप्राप्तिं दर्शयति। यत् यस्माद्वां युवयोः संबंध्ययं जनो बद्धः पाशैर्गाढं वेष्टितः सन् त्मन्यात्मन्यात्मना क्षां भूमिं खादति। भक्षयति। गंतुमशक्तः सन् भूमौ परिलुठतीत्यर्थः। तस्मादुपस्तुतिरौचथ्यमुरुष्येदिति॥

अस्याः पंचम्या विनियोगमाह शौनकः। ऋग्वि॰ १. २५.॥ आततायिनमायांतं दृष्ट्वा व्याघ्रमथो वृकं। न मा गरन्निति जपंस्तेभ्य एव प्रमुच्यते। चिरात्रोपोषितो रात्रौ जपेदा सूर्यदर्शनात्। आप्लुत्य प्रयतः सूर्यमुपतिष्ठेद्दिवाकरं। पश्यंति तस्करा नैनं तथान्ये पापबुद्धयः। एकः शतानि त्रायेत तस्करेभ्यश्चरन्पथीति॥

॥ अथ पंचमी ॥

न मा गरन्नद्यो मातृतमा दासा यदीं सुसमुब्धमवाधुः ।
शिरो यदस्य त्रैतनो वितक्षत्स्वयं दास उरो अंसावपि ग्ध ॥ ५ ॥
न । मा । गरन् । नद्यः । मातृऽतमाः । दासाः । यत् । ईं । सुऽसंमुब्धं । अवऽअधुः ।
शिरः । यत् । अस्य । त्रैतनः । विऽतक्षत् । स्वयं । दासः । उरः । अंसौ । अपि । ग्धेति ग्ध ॥ ५ ॥

नद्यो नदनशीला मातृतमा मातृवज्जगतां हितकारिण्य आपो मा मां दीर्घतमसं गरन् । न गिरेयुः । निमग्नं मा कुर्युः ॥ गॄ निगरणे । लेटि व्यत्ययेन शप् ॥ गिरणप्राप्तिं दर्शयति । यद्यस्माद्दासा अस्मदुपक्षपयितारो मदीयगर्भदासा ईमेनं दीर्घतमसं मां सुसमुब्धं सुष्ठु संकुचितसर्वांगं ॥ स्वती पूजायामिति प्रादिसमासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ अवाधुः । अवाङ्मुखमपातयन् । किंच अस्य मम शिरः स त्रैतन एतन्नामको दासोऽत्यंतनिर्घृणः सन् यद्यस्माद्वितक्षत् । विविधं तष्टवान् । तस्मात्स दासः स्वयं स्वकीयमेव शिरस्तक्षतु । न केवलं शिर एव अपि तु मदीयमुरो वक्षःस्थलमंसौ च ग्ध । हतवान् । विदारितवानित्यर्थः ॥ हंतेर्लुङि छांदसमेतद्रूपं ॥ ततः स्वकीयमुरोंऽसावपि स्वशस्त्रेणैव तथा कृतवान् । तद्युवयोर्माहात्म्यमिति भावः ॥

॥ अथ षष्ठी ॥

दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे ।
अपामर्थं यतीनां ब्रह्मा भवति सारथिः ॥ ६ ॥
दीर्घऽतमाः । मामतेयः । जुजुर्वान् । दशमे । युगे ।
अपां । अर्थं । यतीनां । ब्रह्मा । भवति । सारथिः ॥ ६ ॥

दीर्घतमा एतन्नामा महर्षिः स च मामतेयो ममतायाः पुत्रो दशमे युगे दशयुगपर्यंतं महानुभावयोरश्विनोः प्रभावात्पूर्वोक्ताद्दुःखाद्विमुक्तोऽत्यंतसुखी स्वपुत्रभार्यादिभिः सहितो जीवितवान् । दशमे युगेऽतीते सति जुजुर्वान् जीर्णो वलीपलितगात्रो बभूव । एवंभूतः सन् अर्थं पुरुषैरर्थ्यमानं कर्मफलं स्वर्गादिकं यतीनां प्राप्नुवतीनामपामप्कार्याणां प्रजानां । यद्वा अपामपसां कर्मणामर्थं प्रयोजनं यतीनां तासां प्रजानां ब्रह्मा ब्रह्मसदृशः परिवृढो भवति । किंच सारथिः

तद्वन्निर्वाहको भवति । देवो भवतीत्यर्थः । एवमस्य वृत्तांतं मंत्रोऽनुवदति । स्वयं वा स्वात्मानं पारोक्ष्येणाश्विनोर्महानुभावत्वं प्रकटयितुं ब्रवीति ॥

॥ इति द्वितीयस्य तृतीये प्रथमो वर्गः ॥

प्र द्यावेति पंचर्चं तृतीयं सूक्तं दैर्घतमसं जागतं द्यावापृथिव्यं । अनुक्रांतं च । प्र द्यावा पंच द्यावापृथिव्यं तु जागतं त्विति ॥ अग्निष्टोमे पृष्ठ्यस्य षष्ठेऽहनि च द्यावापृथिव्यनिविद्धानमेतत्सूक्तं । तथा च सूत्रं । प्र द्यावेति दैर्घतमसं । आ॰ ५. १८. । इति ॥ आद्या द्यावापृथिव्ये पशौ हविषो याज्या । तथा च सूचितं । प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मृळा नो रुद्रोत नो मयस्कृधीति द्वे । आ॰ ३. ८. । इति ॥

॥ सैषा सूक्ते प्रथमा ॥

प्र द्यावा॑ य॒ज्ञैः पृ॑थि॒वी ऋ॑ता॒वृधा॑ म॒ही स्तु॑षे वि॒दथे॑षु॒ प्रचे॑तसा ।
दे॒वेभि॒र्ये दे॒वपु॑त्रे सु॒दंस॑से॒त्था धि॒या वार्या॑णि प्र॒भूष॑तः ॥ १ ॥

प्र । द्यावा॑ । य॒ज्ञैः । पृ॒थि॒वी इति॑ । ऋ॒त॒ऽवृधा॑ । म॒ही इति॑ । स्तु॒षे॒ । वि॒दथे॑षु । प्रऽचे॑तसा । दे॒वेभिः॑ । ये इति॑ । दे॒वपु॑त्रे॒ इति॑ दे॒वऽपु॑त्रे । सु॒ऽदंस॑सा । इ॒त्था । धि॒या । वार्या॑णि । प्र॒ऽभूष॑तः ॥ १ ॥

द्यावापृथिवी द्यावापृथिव्यौ ॥ दिवो द्यावेति द्यावादेश आद्युदात्तः । पृथिवीशब्दो ङीषंतोऽंतोदात्तः । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । समासमध्ये पदांतरपाठश्छांदसः ॥ अहं यजमानो यज्ञैर्यागैस्तत्प्रदानैर्निमित्तभूतैर्हविःप्रदानार्थं प्रस्तुषे । प्रकर्षेण स्तौमि ॥ पुरुषव्यत्ययः ॥ कीदृश्यौ ते । ऋतावृधा । यज्ञस्य वर्धयित्र्यौ । मही । महत्यौ । विदथेषु यागेषु प्रचेतसा प्रकर्षेणास्मान् चेतयित्र्यौ । अस्माभिश्चेतयितव्ये वा । ईदृश्यौ स्तुषे । अनयोः कोऽतिशय इति उच्यते । ये द्यावापृथिव्यौ देवेभिर्यजमानैर्देवपुत्रे देवा यजमानाः पुत्रस्थानीयाः शुश्रूषका ययोस्ते तादृश्यौ । यद्वा देवेभिर्विशिष्टे सुदंससा ॥ दंस इति कर्मनाम ॥ शोभनकर्मोपेते इत्था सत्यं ॥ इत्थेति सत्यनाम सत्रा इत्थेति तन्नामसु पाठात् ॥ सत्यं धियास्मदनुग्रहबुद्ध्या वार्याणि वरणीयानि धनान्यस्मभ्यं प्रभूषतः । अलंकुरुतः । दत्त इत्यर्थः । यद्वा वार्याणि हवींषि धिया कर्मणा निमित्तेन कर्मसमाप्त्यर्थं प्रभूषतः । प्रकर्षेण स्वीकुरुतः ॥

॥ अथ द्वितीया ॥

उत मन्ये पितुरद्रुहो मनो मातुर्महि स्वतवस्तद्धवीमभिः ।
सुरेतसा पितरा भूम चक्रतुरुरु प्रजाया अमृतं वरीमभिः ॥ २ ॥

उत । मन्ये । पितुः । अद्रुहः । मनः । मातुः । महि । स्वऽतवः । तत् । हवीमऽभिः ।
सुऽरेतसा । पितरा । भूम । चक्रतुः । उरु । प्रऽजायाः । अमृतं । वरीमऽभिः ॥ २ ॥

उत अपि च पितुः पितृस्थानीयायाः पाश्या अद्रुहोऽद्रोग्धुः । न हि कदाचित्पिता स्वपुत्रादये द्रुह्यति । तादृश्याः पृथिव्याः स्वतवः स्वायत्तं बलं स्वयमेवास्मदनुग्रहाय त्वरमाणं । अत एव महि महत् । तत्तादृशमनुग्रहयुक्तं मनश्चित्तं हवीमभिर्ह्वनैराह्वानैर्मन्ये । जानामि । प्रसादयामीत्यर्थः । यद्वा तत्तादृशमुक्तलक्षणं मनो हवीमभिर्ह्वनैर्महि मन्ये । अतिमहत्प्रवृद्धं मन्ये । तथा मातुः सर्वस्योत्पादयितुरंतरिक्षस्य द्युलोकस्य ॥ मातांतरिक्षं निर्मीयंतेऽस्मिन्भूतानि । नि॰ २.८. । इति निरुक्तं ॥ यद्वा पितुर्द्युलोकस्य मातुर्भूम्याः । द्यौर्वः पिता पृथिवी मातेति श्रुतेः । तत्तादृशमुक्तलक्षणं मनो मन्ये । द्यावापृथिव्योर्मनोऽस्मदाह्वानैः प्रीणयामीत्यर्थः । किंच पितरा माता च पिता च पितरौ द्यावापृथिव्यौ सुरेतसा शोभनसामर्थ्येन प्रजाया यजमानादिरूपाया वरीमभिर्वरिष्ठै रक्षणविशेषैर्भूम बहुतरमुरु विस्तीर्णममृतममरणभूतमभिलषितं चक्रतुः । कुरुतः ॥

॥ अथ तृतीया ॥

ते सूनवः स्वपसः सुदंससो मही जज्ञुर्मातरा पूर्वचित्तये ।
स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः ॥ ३ ॥

ते । सूनवः । सुऽअपसः । सुऽदंससः । मही इति । जज्ञुः । मातरा । पूर्वऽचित्तये ।
स्थातुः । च । सत्यं । जगतः । च । धर्मणि । पुत्रस्य । पाथः । पदं । अद्वयाविनः ॥ ३ ॥

ते प्रसिद्धाः सूनवो युवाभ्यामुत्पन्नाः पुत्रस्थानीयाः प्रजाः स्वपसः शोभनकर्माणः सुदंससः शोभनदर्शना युवां मही महत्यौ मातरा मातृवद्धितकारिण्यौ जज्ञुः । जानंति । महानुभावतामवगच्छंति । किमर्थं । पूर्वचित्तये । प्रथमबुद्धयेऽनुग्रहरूपायै । किंच ते द्यावापृथिव्यौ स्थातुः स्थावरस्य जगतो जंगमस्य पुत्रस्य पुत्रस्थानीयस्योभयविधस्य जगतोऽद्वयाविनः । न विद्यते द्वयं यस्य तादृशस्य

स्वजीवनाय युष्मद्व्यतिरिक्तमजानत इत्यर्थः । ईदृशस्य धर्मणि धारणे रक्षणे निमित्तभूते सति पदं स्थानं सत्यमबाध्यं पाथः । रक्षथः । दत्थ इत्यर्थः । यद्वा ते प्रसिद्धाः सूनव उत्पाद्यमानाः स्वपसः शोभनप्रकाशादिकर्माणः सुदंससः शोभनदर्शनाः सुष्ठूपक्षयंतो वात्मानं स्वव्यापाराय । ईदृशा रश्मयो मही महत्यौ द्यावापृथिव्यौ पूर्वचित्तये प्राणिनां पूर्वज्ञानाय जज्ञुः । ज्ञातवंतः । द्यावापृथिव्यो-रंतराले व्याप्ता इत्यर्थः । किंच स्थातुर्जगतश्च धर्मणि धारणे तदर्थमद्वयाविनो मार्गद्वयरहितस्य ॥ बहुलं छंदसीति द्वयशब्दान्मत्वर्थीयो विनिः । अन्येषामपि दृश्यत इति दीर्घः ॥ पुत्रस्य युष्मत्पुत्रस्थानीयस्यादित्यस्य पदं मार्गं सत्यं पाथः । अवश्यं रक्षथः ॥

॥ अथ चतुर्थी ॥

ते मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा ।
नव्यंनव्यं तंतुमा तन्वते दिवि समुद्रे अंतः कवयः सुदीतयः ॥ ४ ॥

ते । मायिनः । ममिरे । सुऽप्रचेतसः । जामी इति । सयोनी इति सऽयोनी ।
मिथुना । संऽओकसा ।
नव्यंऽनव्यं । तंतुं । आ । तन्वते । दिवि । समुद्रे । अंतरिति । कवयः । सुऽदीतयः ॥ ४ ॥

ते प्रसिद्धे द्यावापृथिव्यौ मायिनः । माया प्रज्ञा । स्वविषयप्रज्ञावंतः प्रज्ञोपलक्षितकर्मवंतो वा सुप्रचेतसः सुष्ठु प्रकर्षेण चेतितुं शक्ता रश्मयो ममिरे । मिमते । प्रमाणेन परिच्छिंदंति । कीदृश्यौ ते । जामी । परस्परं भगिनी । एतत्कुत इति चेत् उच्यते । सयोनी समानोत्पत्तिस्थाने । मिथुना प्राण्युत्पत्तये मिथुनभूते । परस्परमवियुक्ते इत्यर्थः । समोकसा समानस्थाने द्युपृथिव्योरेकस्मिन्नेवावकाशरूप आकाशेऽवस्थानात् । समीचीनस्थाने वा । किंच कवयो मेधाविनः स्वव्यापारविषयज्ञानवंतः सुदीतयः सुष्ठुद्योतना रश्मयो दिवि द्योतमाने समुद्रेऽंतरिक्षेऽंतर्मध्ये ॥ समुद्रशब्दोऽंतरिक्षनामसु पाठात्तद्वचनः । स चैवं यास्केन निरुक्तः । समुद्रः कस्मात्समुद्द्रवंत्यस्मादापः समभिद्रवंत्येनमापः संमोदंतेऽस्मिन्भूतानि समुदको भवति समुनत्तीति वा । नि॰ २. १०. । इति ॥ नव्यं नव्यं तंतुं तननीयं विस्तारणीयं । जात्येकवचनं । रश्मीन् आ तन्वते । समंताद्विस्तारयंति ॥

॥ अथ पंचमी ॥

तद्राधो अद्य सवितुर्वरेण्यं वयं देवस्य प्रसवे मनामहे ।
अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमंतं शतग्विनं ॥ ५ ॥
तत् । राधः । अद्य । सवितुः । वरेण्यं । वयं । देवस्य । प्रऽसवे । मनामहे ।
अस्मभ्यं । द्यावापृथिवी इति । सुऽचेतुना । रयिं । धत्तं । वसुऽमंतं । शतऽग्विनं ॥ ५ ॥

वयं यजमानाः सवितुः सर्वस्य प्रसवितुर्देवस्यादित्यस्यांतर्यामिरूपिणः प्रसवेऽनुज्ञायां सत्यां तत्तादृशं वरेण्यं वरणीयं राधः पुरुषार्थसाधनसमर्थं गवादि धनं मनामहे । याचामहे ॥ मन्यतिर्याच्ञाकर्मा । छांदसः शप् ॥ यद्वा पुनःपुनरभ्यस्यामः । लप्सीमहीति यावत् ॥ म्ना अभ्यासे । व्यत्ययेनात्मनेपदं । शपि पाघ्रादिना मनादेशः ॥ किंचास्मभ्यं द्यावापृथिवी द्यावापृथिव्यौ सुचेतुना शोभनचेतनेनास्मदनुग्रहबुद्ध्या रयिं धनं धत्तं । दत्तं । कीदृशं । वसुमंतं । निवासयोग्यगृहादिविशिष्टं । शतग्विनं । शतसंख्याकगवादिविशिष्टं ॥

॥ इति द्वितीयस्य तृतीये द्वितीयो वर्गः ॥

ते हीति पंचर्चं चतुर्थं सूक्तं दैर्घतमसं जागतं द्यावापृथिव्यं । ते हीत्यनुक्रांतं ॥ चतुर्विंशेऽहनि वैश्वदेवशस्त्रे द्यावापृथिव्यनिविद्धानमेतत्सूक्तं ते हि द्यावापृथिवी यज्ञस्य वो रथ्यमिति वैश्वदेवं । आ॰ ७. ४. । इति सूचितत्वात् ॥ तथा पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहनि वैश्वदेवे द्यावापृथिव्यं निविद्धानीयं चातुर्विंशकं तृतीयसवनं । आ॰ ७. ६. । इत्याभिप्लविके द्वितीयेऽहन्यतिदिष्टत्वात् । आभिप्लविकाद्द्वितीयादह्नः पृष्ठ्यस्य द्वितीयेऽहन्येतत्सूक्तमतिदेशतः प्राप्तं पृष्ठ्यस्याभिप्लवेनोक्ते अहनी आद्ये आद्याभ्यां । आ॰ ७. १०. । इति सूचितत्वात् ॥ प्रथमाश्विनशस्त्रे विनियुक्ता । संस्थितेष्वाश्विनायेत्यत्र सूचितं । ते हि द्यावापृथिवी विश्वशंभुवा विश्वस्य देवीमृचयस्य । आ॰ ६. ५. । इति ॥

॥ सैषा सूक्ते प्रथमा ॥

ते हि द्यावापृथिवी विश्वशंभुव ऋतावरी रजसो धारयत्कवी ।
सुजन्मनी धिषणे अंतरीयते देवो देवी धर्मणा सूर्यः शुचिः ॥ १ ॥

ते इति॑ । हि । द्यावा॑पृथि॒वी इति॑ । वि॒श्वऽशं॑भुवा । ऋ॒तव॑री॒ इत्यृ॒तऽव॑री । रज॑सः । धा॒र॒यत्क॑वी॒ इति॑ धा॒र॒यत्ऽक॑वी ।
सु॒जन्म॑नी॒ इति॑ सु॒ऽजन्म॑नी । धि॒षणे॒ इति॑ । अ॒न्तः । ई॒य॒ते । दे॒वः । दे॒वी इति॑ । धर्म॑णा । सूर्यः॑ । शुचिः॑ ॥ १ ॥

ते हि ते खलु प्रसिद्धे द्यावापृथिवी अंतस्तयोरंतराले शुचिः शुद्धो विश्वस्य शोचयिता वा देवो दीप्यमानः सूर्यो धर्मणा प्रकाशोदकदानादिधारणेन युक्तः सन् ईयते । सर्वदा गच्छति ॥ ईङ् गतौ दैवादिकः ॥ तादृशं कर्म युवयोरनुग्रहादिति स्तुतिः । कीदृश्यौ ते । विश्वशंभुवा । विश्वं सुखभावयितृ ययोस्ते विश्वशंभुवा । विश्वस्य सुखयित्र्यावित्यर्थः । ऋतावरी । ऋतवत्यौ ॥ ऋतशब्दाच्छंदसीवनिपाविति वनिप् । वनो र चेति ङीब्रेफौ ॥ रजस उदकस्योदकोत्पत्तौ ॥ उदकं रज उच्यत इति निरुक्तं ॥ धारयत्कवी अकृच्छ्रेण धारकं कवि ययोस्ते तादृश्यौ । उदकोत्पादनायाप्रयत्नवत्यावित्यर्थः । यद्वा धारयत्कविर्मनीषादित्यो ययोस्ते तादृश्यौ वृष्ट्युदकधारयत्सूर्योपेते इत्यर्थः । सुजन्मनी । शोभनजन्मवत्यौ धिषणे धर्षणोपेते । स्वव्यापारेषु प्रगल्भे इत्यर्थः । देवी द्योतमाने । अत्र यद्यपि धिषणे इत्येतत् धिषणे रोदसी इति तन्नामसूक्तत्वाद्द्यावापृथिवीनाम । तथापि द्यावापृथिवी इत्यस्य विद्यमानत्वाद्यौगिकं द्रष्टव्यं ॥

॥ अथ द्वितीया ॥

उ॒रु॒व्यच॑सा म॒हिनी॑ अ॒स॒श्चता॑ पि॒ता मा॒ता च॒ भुव॑नानि रक्षतः ।
सु॒धृष्ट॑मे व॒पु॒ष्ये॒३॒॑ न रोद॑सी पि॒ता यत्सी॑म॒भि रू॒पैरवा॑सयत् ॥ २ ॥
उ॒रु॒ऽव्यच॑सा । म॒हिनी॒ इति॑ । अ॒स॒श्चता॑ । पि॒ता । मा॒ता । च॒ । भुव॑नानि । र॒क्ष॒तः ।
सु॒धृष्ट॑मे॒ इति॑ सु॒ऽधृष्ट॑मे । व॒पु॒ष्ये॒३॒॑ इति॑ । न । रोद॑सी॒ इति॑ । पि॒ता । यत् । सी॒म् । अ॒भि । रू॒पैः । अवा॑सयत् ॥ २ ॥

उरुव्यचसा प्रभूतव्यचनवत्यौ विस्तीर्णे महिनी अत एव महत्यौ । असश्चता असज्यमाने परस्परवियुक्ते इत्यर्थः । पिता पालयित्री द्यौः माता निर्मात्री पृथिवी चेत्युभे भुवनानि भूतजातानि रक्षतः । पालयतः । द्यौः पितः पृथिवी

मातरित्यादिश्रुतेर्मातापितृरूपत्वं। किंच सुधृष्टमे अतिशयेन धृष्टे ॥ छांदसस्त-कारलोपः ॥ प्रगल्भे रोदसी द्यावापृथिव्यौ वपुषे न वपुषो हिते इव। प्राणिनां पितराविव शरीररक्षके इत्यर्थः। तदेवोपपादयति। यद्यस्मात्सी सर्वतः पिता पितृस्थानीया द्यौ रूपैर्निरूपणसाधनैः प्रशस्तैः प्रकाशैर्निरूप्यमाणैर्वृष्ट्यादि-भिर्वाभ्यवासयत्। अभिवासयति। अधितिष्ठति। तस्मात्पिता माता च भुव-नानि रक्षतः ॥

॥ अथ तृतीया ॥

स वह्निः पुत्रः पित्रोः पवित्रवान्पुनाति धीरो भुवनानि मायया।
धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य दुक्षत ॥ ३ ॥
सः। वह्निः। पुत्रः। पित्रोः। पवित्रऽवान्। पुनाति। धीरः। भुवनानि। मायया।
धेनुं। च। पृश्निं। वृषभं। सुऽरेतसं। विश्वाहा। शुक्रं। पयः। अस्य। धुक्षत ॥ ३ ॥

पित्रोर्मातापित्रोर्द्यावापृथिव्योः ॥ पिता मात्रेति पिता शिष्यते। उदात्तयण इति पितुर्विभक्तिरुदात्ता ॥ पुत्रः पुरुत्राता पुत्रस्थानीय आदित्यः पवित्रवान् पावनरश्मियुक्तो धीरो धीमान् स वह्निः फलस्य वोढा धारकः सन् मायया प्रज्ञया स्वकीयया भुवनानि भूतजातानि पुनाति। पावयति। प्रकाशयतीत्यर्थः। किंच स एव पुत्रः पृश्निं शुक्लवर्णां धेनुं प्रीणयित्रीं भूमिं सुरेतसं शोभनसामर्थ्यं शोभनोदकं वा वृषभं सेक्तारं द्युलोकं च मायया पुनाति। प्रकाशयतीत्यर्थः। कदा। विश्वाहा। सर्वाण्यप्यहानि। सर्वकालमित्यर्थः। किंच अस्य द्युलोकस्य। यद्वा कर्मणि षष्ठी। इमं द्युलोकं शुक्रं पयो दीप्तं पयःसदृशमुदकं धुक्षत्। दोग्धि ॥ दुहेश्छांदसे लुङि शल इगुपधादनिटः क्स इति च्लेः क्सादेशः ॥ ईदृशो महा-नुभाव आदित्यस्तयोः पुत्र इति द्यावापृथिव्योः स्तुतिः ॥

॥ अथ चतुर्थी ॥

अयं देवानामपसामपस्तमो यो जजान रोदसी विश्वशंभुवा।
वि यो ममे रजसी सुक्रतूययाजरेभिः स्कंभनेभिः समानृचे ॥ ४ ॥
अयं। देवानां। अपसां। अपःऽतमः। यः। जजान। रोदसी इति। विश्वऽशंभुवा।
वि। यः। ममे। रजसी इति। सुक्रतुऽयया। अजरेभिः। स्कंभनेभिः। सं। आनृचे ॥ ४ ॥

पूर्वं पुत्रमाहात्म्येनैते प्रशस्येदानीं स्वोत्पादकस्तुत्या प्रशंसति। अयं देवानां मध्ये देवतमः। अपसामपस्तमः। अप इति कर्मनाम तेन तद्वान् लक्ष्यते। कर्मवतां मध्ये प्रकृष्टकर्मा। अयमित्युक्तं क इत्याह। यो देवो विश्वशंभुवा सर्वप्रकारेण भूतानां सुखस्य भावयित्र्यौ रोदसी द्यावापृथिव्यौ महानुभावे जजान। उत्पादितवान्। न केवलमुत्पादनमात्रं अपि तु यो देवो रजसी रंजनात्मिके द्यावापृथिव्यौ। रजसी इति द्यावापृथिव्योर्नाम रजसी सदसी इति तन्नामसु पाठात्॥ उक्तरूपे विममे। विशेषेण परिच्छिनत्ति। किं स्वोपभोगाय नेत्याह। सुक्रतूयया। शोभनकर्मेच्छया। येन कर्मणा प्राणिनां सुखं संभवति तादृक्कर्मेच्छया। अथ वैतदुत्तरत्र संबध्यते। सुक्रतूययोक्तेन निमित्तेनेमे द्यावापृथिव्यावजरेभिरजीर्णैर्दृढतरैः स्कंभनेभिर्गतिबंधनैः शंकुभिः समानृचे। सम्यक् सर्वतः पूजितवान्। स्थापितवानित्यर्थः॥ ऋच स्तुतौ। लिटि रेफसामान्याद्विहलत्वमस्तीति तस्मान्नुड् द्विहल इत्यभ्यासस्य नुट्॥ यस्मादेवं तस्मादयमेव देवोऽयमेवापस्तम इत्येवं महानुभावेन परमेश्वरेणोत्पन्ने इति स्तुतिः॥

॥ अथ पंचमी ॥

ते नो॑ गृणा॒ने म॑हिनी॒ महि॒ श्रवः॑ क्ष॒त्रं द्या॑वापृथिवी धासथो बृ॒हत्।
येना॒भि कृ॒ष्टीस्त॒तना॑म वि॒श्वहा॑ प॒नाय्य॒मोजो॑ अ॒स्मे समि॑न्वतं॥ ५॥

ते इति॑। नः॒। गृ॒णा॒ने इति॑। म॒हि॒नी॒ इति॑। महि॑। श्रवः॑। क्ष॒त्रं। द्या॒वा॒पृ॒थि॒वी॒ इति॑। धा॒स॒थः॒। बृ॒हत्।
येन॑। अ॒भि। कृ॒ष्टीः। त॒तना॑म। वि॒श्वहा॑। प॒नाय्यं॑। ओजः॑। अ॒स्मे इति॑। सं। इ॒न्व॒तं॒॥५॥

ते प्रसिद्धे हे द्यावापृथिवी द्यावापृथिव्यौ गृणाने अस्माभिः स्तूयमाने सत्यौ॥ कर्मणि कर्तृप्रत्ययः॥ महि महदतिप्रभूतं श्रवः सर्वत्र प्रसिद्धमन्नं सर्वत्र श्रूयमाणां कीर्त्तिं वा नोऽस्मभ्यं धासथः। धत्तं॥ दधातेर्लेट्यडागमः। सिब्बहुलमिति सिप्॥ तथा बृहदतिप्रभूतं क्षत्रं बलं धासथः। तदेव विशेष्यते। येनान्नबलेन विश्वहा सर्वेष्वप्यहःसु कृष्टीः पुत्रादिरूपाः प्रजा अभिततनाम। अभितो विस्तारयाम॥ तनोतेर्लोटि छांदसो विकरणस्य श्लुः। आडुत्तमस्येत्याडागमः। तस्य छंदस्युभयथेत्यार्द्धधातुकत्वादभ्यस्ताद्युदात्तत्वाभावे धातुस्वरः॥ कृष्टय इति मनुष्यनाम कृष्टयश्चर्षणय इति तन्नामसु पाठात्॥ किंच पनाय्यं स्तुत्यमोजः

शरीरबलमस्मे अस्मासु सम्यगिन्वतं। प्रवर्धयतमित्यर्थः॥ इन्वतिर्व्याप्तिवचनः। इन्वति ननक्षेति तन्नामसु पाठात्॥

॥ इति द्वितीयस्य तृतीये तृतीयो वर्गः॥

किमु श्रेष्ठ इति चतुर्दशर्चं पंचमं सूक्तं दैर्घतमसमार्भवं। अंत्या त्रिष्टुप् शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः। अनुक्रांतं च किमु श्रेष्ठः षळूनार्भवं त्रिष्टुबंतमिति॥ व्यूळ्हे दशरात्रे षष्ठेऽहनि वैश्वदेवशस्त्र आर्भवं निविद्धानं द्विप्रतीकं। तत्र किमु श्रेष्ठ इत्येतदंत्यवर्जं प्रतीकं। व्यूळ्हश्चेदिति खंडे सूचितं किमु श्रेष्ठ उप नो वाजा इति त्रयोदशार्भवं चतस्रश्च। आ॰ ८. ८.। इति॥

॥ तत्र प्रथमा॥

किमु श्रेष्ठः किं यविष्ठो न आजगन्किमीयते दूत्यं१ कद्यदूचिम।
न निंदिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम॥ १॥

किं। ऊं इति। श्रेष्ठः। किं। यविष्ठः। नः। आ। अजगन्। किं। ईयते। दूत्यं। कत्। यत्। ऊचिम।
न। निंदिम। चमसं। यः। महाऽकुलः। अग्ने। भ्रातः। द्रुणः। इत्। भूतिं। ऊदिम॥ १॥

ऋभवो नाम सुधन्वनस्त्रयः पुत्रा ऋभुर्विभ्वा वाज इति। ते च मनुष्याः संतः सुकर्मणा देवत्वं प्राप्य कदाचित्कर्मकाले सोमपानाय प्रवृत्ताः। तान्प्रति देवैः प्रेरितोऽग्निः परस्परसमानरूपान्दृष्ट्वा स्वयमपि तदाकारं धृत्वा तेषु मध्ये स्वयं चतुर्थः सन् पातुं प्रवृत्तः। ते च ऋभव आगतं तं समानरूपमवलोक्य विवेक्तुमसमर्थाः परस्परमेवं संदिहते। अयं किमु श्रेष्ठः किं नु खल्वस्मत्तोऽयं प्रशस्यतमो वयसा श्रेष्ठः सोऽस्मानाजगन्। आगमत्। प्राप्तः॥ गमेर्लङि छांदसः शपः श्लुः। हल्ङ्यादिलोपे मो नो धातोरिति नत्वं। अजगन्निति गतिकर्मा अगन्नजगन्निति तन्नामसु पाठात्॥ किं यविष्ठः। किं वास्माकं युवतमोऽस्मत्तः कनीयान् आजगन्। प्राप्तः। किं वा दूत्यं दूतकर्म देवसंबंधीयते। गच्छति। देवैः प्रेरितो दूतोऽस्मानागतो वा॥ दूतस्य भागकर्मणी इति यत्॥ यदूचिम यदेतद्ब्रूमः तत्कत्। कथं निश्चेतव्यमित्यर्थः। वयं तावत्त्रय एव इदानीं चत्वारः समानरूपा वर्तामहे। तस्मादयमधिकः किमु श्रेष्ठ इति विचिकित्सा। एवं संदिह्य कथंचित्स्वतोऽन्यं निश्चित्य तं प्रत्यपरोक्षेण ब्रुवते। हे अग्ने भ्रातः भ्रातृवद्भागार्ह। भ्राता यथा बलात्स्वकीयभागं स्वीकरोति तद्वत् समानरूपमाश्रित्य

बलाच्चमसपानाय प्रवृत्त इति भ्रातरित्युक्तं । हे तादृशाग्ने चमसं न निंदिम । अधिकः समागत इति पानमकृत्वा चमसं न दूषयामः ॥ णिदि कुत्सायां । छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः ॥ अदूष्यत्वे कारणमाह । यश्चमसो महाकुलः । महाकुलोत्पन्नस्त्वष्ट्रा निर्मितत्वात् । वक्ष्यति च त्वष्टा ग्नास्वंतर्यानज इति । अतः कारणात् द्रुणः । विकारे प्रकृतिशब्दः । ततश्च तत्स्थे तच्छब्दः । इच्छब्दोऽवधारणे । दारुविकारचमसस्य भूतिं प्राप्तिमूदिम । ब्रूमः ॥ विदेश्छांदसे लिटि वचिस्वपीति संप्रसारणं । क्रादिनियमादिट् ॥

॥ अथ द्वितीया ॥

एकं चमसं चतुरः कृणोतन तद्वो देवा अब्रुवन्तद्व आगमं ।
सौधन्वना यद्येवा करिष्यथ साकं देवैर्यज्ञियासो भविष्यथ ॥ २ ॥
एकं । चमसं । चतुरः । कृणोतन । तत् । वः । देवाः । अब्रुवन् । तत् । वः । आ । अगमं ।
सौधन्वनाः । यदि । एव । करिष्यथ । साकं । देवैः । यज्ञियासः । भविष्यथ ॥ २ ॥

एवं पृष्टोऽग्निस्तान्प्रत्युवाच । हे सौधन्वनाः सुधन्वनः पुत्राः यूयमेकं चमसं त्वष्ट्रा संपादितं पूर्वमेकमेव संतं चमसं चतुरः कृणोतन । चतुःसंख्याकान्कुरुत ॥ चतुरः शसीत्यंतोदात्तत्वं । पूर्ववत्तनप् ॥ यथोपरितने ज्येष्ठ आह चमसा द्वा करेतीत्युपक्रम्य कनिष्ठ आह चतुरस्करेतीति चतुष्कं निर्धारितं । न केवलमहमेव ब्रवीमि किंतु वो युष्मान्प्रति तदुक्तं चतुर्धाकरणरूपं कर्मोत्तरच वक्ष्यमाणमश्वरथादिकरणरूपं च कर्म देवा इंद्रादयोऽब्रुवन् । देवत्वप्राप्त्युपायत्वेन तत्तादृशं कर्म वो युष्माकं वक्तुमहमागमं । प्राप्तोऽस्मि । यस्मादेवं तस्माद्यूयं यद्येवा करिष्यथ । यद्येवं मदुक्तप्रकारेण कर्तुं शक्नुथ । तथा चेत् देवैः साकं सह यज्ञियासो भविष्यथेति तैरुक्तमित्यर्थः ॥

॥ अथ तृतीया ॥

अग्निं दूतं प्रति यदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः ।
धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि ॥ ३ ॥
अग्निं । दूतं । प्रति । यत् । अब्रवीतन । अश्वः । कर्त्वः । रथः । उत । इह । कर्त्वः ।
धेनुः । कर्त्वा । युवशा । कर्त्वा । द्वा । तानि । भ्रातः । अनु । वः । कृत्वी । आ । इमसि ॥ ३ ॥

हे आगत देव अग्निमंगनादिगुणविशिष्टं दूतं दूतकर्म प्राप्तवंतं त्वां प्रति यत् यत्कार्यमब्रवीतन । अब्रुवन् ॥ व्यत्ययेन मध्यमः । पूर्ववत्तनप् ॥ किमिति अश्वः कर्त्वः । एकस्मादश्वादश्वांतरं कर्तव्यमित्यर्थः । अश्वादश्वमतक्षतेति वक्ष्यमाणत्वात् ॥ कृत्यार्थे तवैकेनिति त्वन्प्रत्ययः ॥ उत अपि च रथः कर्त्वः कर्तव्यः । धेनुः कर्त्वा । चर्मरहिता मृता गौर्नित्यदोग्ध्री पुनर्नूतना कार्या । तदुत्तरत्र निश्चर्मणो गामरिणीत धीतिभिरिति वक्ष्यमाणत्वात् । तथा द्वा द्वौ पितरौ जीर्णौ संतौ पुनर्युवशा युवानौ शयानौ प्रकृष्टयौवनोपेतौ कर्त्वा कर्तव्यौ । हे भ्रातरग्ने युष्माकं देवानां तैरुक्तानि कर्माणि कृत्वा अनु पश्चात्कृत्वी कृत्व्या कर्मणेमसि । एमः । आभिमुख्येन प्राप्नुमः ॥ इण् गतौ । इदंतो मसिः ॥ यद्वा ऋषेरिदं वाक्यं । हे ऋभवो यूयमागतमग्निं दूतं प्रति यदब्रवीतन यत्कार्यं वक्ष्यमाणरूपं कर्तव्यत्वेन वदथ । अंगीकुरुथ । तानि सर्वाणि संपाद्य हे भ्रातरग्ने कृत्व्या कर्मणेमसीति ब्रूथेत्यृषिराह ॥

॥ अथ चतुर्थी ॥

चकृवांस ऋभवस्तदपृच्छत क्वेदभूद्यः स्य दूतो न आजगन् ।
यदावाख्यच्चमसाञ्चतुरः कृतानादित्त्वष्टा ग्नास्वंतर्न्यानजे ॥ ४ ॥

चकृऽवांसः । ऋभवः । तत् । अपृच्छत । क्व । इत् । अभूत् । यः । स्यः । दूतः । नः । आ । अजगन् ।
यदा । अवऽअख्यत् । चमसान् । चतुरः । कृतान् । आत् । इत् । त्वष्टा । ग्नासु । अंतः । नि । आनजे ॥ ४ ॥

हे ऋभवः तत्कार्यं यथा चकृवांसः कृतवंतो यूयमपृच्छत । प्रश्नं कुरुत ॥ करोतेर्लिटः क्वसुः ॥ अत्र यद्यप्यृभुरिति त्रयाणां मध्य एकस्य नाम तथापि तस्य प्राथम्याच्छत्रिणो गच्छंतीतिवत्सर्वेऽप्यृभव उच्यंते । किमिति । स्यः स दूतः क्वेदभूत् । कुत्र गतः । स इत्युक्ते क इत्याह । यः यो दूतो नोऽस्मानाजगन् । आगमत् । प्राप्तः । एवंभूते सति यदायं त्वष्टा चतुरः कृताञ्चमसानवाख्यत् । अभिपश्यति ॥ ख्यातेर्लुङ्यस्यतिवक्तिख्यातीति च्लेरङादेशः ॥ आदित् अनंतरमेव त्वष्टा तस्य चमसस्योत्पादक एतन्नामको देवो ग्नासु स्त्रीषु ॥ मेना ग्ना इति स्त्रीणामिति निरुक्तं ॥ अंतर्मध्ये न्यानजे । न्यक्तोऽभूत् । स्त्रियमात्मानममन्यतेत्यर्थः ॥ अंजेर्लिटि तस्मान्नुट् द्विहल इति नुट् । छांदसोऽनुनासिकलोपः ॥

॥ अथ पंचमी ॥

हनामैनाँ इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिंदिषुः ।

अन्या नामानि कृण्वते सुते सचाँ अन्यैरेनान्कन्या३ नामभिः स्परत् ॥ ५ ॥

हनाम । एनान् । इति । त्वष्टा । यत् । अब्रवीत् । चमसं । ये । देवऽपानं । अनिंदिषुः ।

अन्या । नामानि । कृण्वते । सुते । सचा । अन्यैः । एनान् । कन्या । नामऽभिः । स्परत् ॥ ५ ॥

एतान्वक्ष्यमाणान् हनामेति यद्यदाब्रवीत्त्वष्टा । पूजार्थं बहुवचनं । एतच्छब्दस्य प्रकृतपरामर्शकत्वात् ऋभूणां प्रकृतत्वात् तेषां हननप्रसक्तिं दर्शयति । ये देवपानं देवैः पातव्यं चमसं ये ऋभवो निंदिषुः । निंदामकुर्वन् । देवयोग्यं त्वाष्ट्रचमसं मनुष्या ऋभवः स्वीकृत्य चतुर्धा व्यभजन् । तान् हनामेति यदाब्रवीदित्यर्थः । तदा प्रभृति मनुष्याः सुतेऽभिषुते सोमे पानाय प्रस्तुते सति सचा सह परस्परमन्या नामान्यन्यानि होत्रध्वर्यूद्गात्रादीनि कृण्वते । कुर्वंति । पूर्वं नाम प्रच्छाद्योपहवकालेऽध्वर्य उपह्वयस्व होतरुपह्वयस्वेत्येवमन्यैरेव नामभिरात्मानं त्वष्टृवधभीत्या प्रख्यापयंतीत्यर्थः । पूर्वमन्यानि कथं प्रसक्तानीत्यत आह । एनानृभून् कन्या स्वोत्पादयित्री मातान्यैरेव नामभिः स्परत् । प्रीणयति ॥ स्पृ प्रीतिबलनयोः । लेट्यडागमः ॥

॥ इति द्वितीयस्य तृतीये चतुर्थो वर्गः ॥

॥ अथ षष्ठी ॥

इंद्रो हरी युयुजे अश्विना रथं बृहस्पतिर्विश्वरूपामुपाजत ।

ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन ॥ ६ ॥

इंद्रः । हरी इति । युयुजे । अश्विना । रथं । बृहस्पतिः । विश्वऽरूपां । उप । आजत ।

ऋभुः । विऽभ्वा । वाजः । देवान् । अगच्छत । सुऽअपसः । यज्ञियं । भागं । ऐतन ॥ ६ ॥

पूर्वं सृष्टानां क्रमेण विनियोगमाह । इंद्रो हरी युयुजे । एतन्नामानावश्वौ रथे योजितवान् । तथाश्विनाश्विनौ रथं योजितवंतौ । तथा बृहस्पतिर्बृहतो मंत्रस्य पालयितैतन्नामको देवो विश्वरूपां नानारूपोपेतां गामुपाजत । उपागमत् । स्वीकृतवानित्यर्थः । यद्यप्यत्र गौरिति विशेषो न श्रुतस्तथापि पूर्वं धेनुः कर्त्वेत्युक्तत्वात् परस्ताच्च ये धेनुं विश्वजुवं विश्वरूपामिति वक्ष्यमाणत्वाच्च विश्वरूपा

गौरित्येवाध्यवसीयते । अत एव विश्वरूपामित्यस्याश्च पंक्तिरिति केचन व्याचक्षते तदसत् । युष्मत्संपादितानि रथादीनींद्रादयः स्वभागत्वेनाकल्पयन् । तस्मादृभुर्विभ्वा वाजश्च यूयं देवान् इंद्रादीनगच्छत । गत्वा च हे स्वपसः शोभनाश्वरथादिकर्मवंतो यूयं यज्ञियं यज्ञार्हं यज्ञसंबंधिनं भागं सोमरूपं देवत्वं प्राप्तैः सेवनीयमैतन । प्राप्नुत । कर्मसामर्थ्येन हविर्भुजो भवतेत्यर्थः । इत्येवमृषिराह ॥

॥ अथ सप्तमी ॥

निश्चर्मणो गामरिणीत धीतिभिर्या जरंता युवशा ताकृणोतन ।
सौधन्वना अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ अयातन ॥ ७ ॥
निः । चर्मणः । गां । अरिणीत । धीतिऽभिः । या । जरंता । युवशा । ता । अकृणोतन ।
सौधन्वनाः । अश्वात् । अश्वं । अतक्षत । युक्त्वा । रथं । उप । देवान् । अयातन ॥ ७ ॥

हे सौधन्वना यूयं निश्चर्मणो मृताया गोः सकाशादुत्कृत्ताच्चर्मणो गां नूतनां निररिणीत । निरगमयत । उत्पादितवंत इत्यर्थः । तेनैव चर्मणा संवीतां तत्सदृशीमन्यां धेनुं कृतवंत इत्यर्थः । यद्यपि पूर्वमेवाश्वादीनां विनियोग उक्तस्तथापि तेषामत्यंतदुःखसंपाद्यत्वज्ञापनाय पुनराह । न केवलं गोकरणमेव । अपि च या जरंता यौ जीर्णौ पितरौ ता तौ युवशा युवानौ कृणोतन । अकुरुत । किंच अश्वादश्वमेकेन विद्यमानेनाश्वेनाश्वांतरमतक्षत । प्रयत्नेन संपादितवंतः । यस्मादेवं कृतवंतस्तस्माद्रथं युष्मदीयं युक्त्वाश्वैर्योजयित्वा देवानिंद्रादीनुपायातन । देवसमीपं प्राप्नुत ॥

॥ अथाष्टमी ॥

इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुंजनेजनं ।
सौधन्वना यदि तन्नेव हर्यथ तृतीये घा सवने मादयाध्वै ॥ ८ ॥
इदं । उदकं । पिबत । इति । अब्रवीतन । इदं । वा । घ । पिबत । मुंजऽनेजनं ।
सौधन्वनाः । यदि । तत् । नऽइव । हर्यथ । तृतीये । घ । सवने । मादयाध्वै ॥ ८ ॥

इदानीमृषिर्देवैरुक्तमर्थं तान्संबोध्य यूयमृभूनेवमुक्तवंतः स्थेत्यनुवाचयति । हे सौधन्वनाः सुधन्वनः पुत्राः यूयमिदमुदकं सोमलक्षणं पिबतेत्यब्रवीतन । इत्युक्तवंतः ॥ ब्रवीतेर्लङि मध्यमबहुवचनस्य तस्य तनबादेशे पित्त्वाद्भुव ईट्

। पा॰ ७. ३. ९३. ॥ एतत्प्रातःसवनिकाभिप्रायं । वा अथवा । घेत्यनर्थकः प्रसिद्ध्यर्थो वा । इदं मुंजनेजनं । मुंजवान्नाम पर्वतः सोमोत्पत्तिस्थानं । तत आहृतत्वात्तेन मुंजतृणेन शोधितं । अपगततृणमित्यर्थः । इदं सोमरसरूपमुदकं पिबतेत्यब्रवीतन । एतन्माध्यंदिनसवनाभिप्रायं । हे ऋभवो यूयं तदुभयसवनसंबंधि सोमपानकार्ये नेव हर्येथ । नैव कामयथ ॥ हर्यतिः कांतिकर्मा । हर्यति उशदिति तत्कर्मसु पाठात् ॥ तृतीये सवने तु मादयाध्वै । अत्यर्थं तृप्ता भवथ । ऋभवो देवाः सोमस्य मत्सन्निति तृतीयसवने तेषां सोमपानसद्भावात् । एवं यूयमृभूनुक्तवंतः । अथवा ऋभून्प्रति तस्यैवेदं वाक्यं । हे सौधन्वना यूयं देवत्वं प्राप्य देवयजनं प्रति सोमपानाय रथेनागत्य श्रांतानश्वान् प्रातःसवन इदमुदकं सोमलक्षणं पिबतेत्यब्रवीतन । तत्र यदि नेच्छथ इदं वा मुंजनेजनं मुंजेन दूषितं वाजिनं पिबतेत्यब्रवीतन । पश्चात्तद्द्वयं यदि नेव हर्येथ हे अश्वा यूयं तृतीये सवने मादयाध्वै । तत्रापि वाजिनप्रचारात् ॥

॥ अथ नवमी ॥

आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत् ।
वधर्यंतीं बहुभ्यः प्रैको अब्रवीदृता वदंतश्चमसाँ अपिंशत ॥ ९ ॥
आपः । भूयिष्ठाः । इति । एकः । अब्रवीत् । अग्निः । भूयिष्ठः । इति । अन्यः । अब्रवीत् ।
वधःऽयंतीं । बहुऽभ्यः । प्र । एकः । अब्रवीत् । ऋता । वदंतः । चमसान् । अपिंशत ॥ ९ ॥

चमसचतुर्धाकरणकाले किमिति सत्यं वदंतो व्यभजन्निति तदाह । एकस्त्रयाणामन्यतम आपो भूयिष्ठा इत्यब्रवीत् । न ह्युदकात्प्रशस्तं लोकोपकारकं तत्त्वांतरमस्ति । आपो भूयिष्ठा इत्यृतमवादीत् । अपामेव श्रेष्ठत्वमप एव ससर्जादावित्यादिशास्त्रात् । तथान्योऽग्निर्भूयिष्ठ इत्यब्रवीत् । आंतरं वाह्यं च दाहपाकभुक्तजरणादिव्यापारेणाग्नेरेव जगन्निर्वाहकत्वादग्नेरेव भूयिष्ठत्वमित्येव मन्यते । तथा वधर्यंती । वधरिति रेफांतोऽपि वज्रनाम । वधोऽर्क इति तन्नामसु पाठात् । तदिच्छति वृष्ट्युदकायेति वधर्यंती मेघपंक्तिरुच्यते । यद्यपीयं स्ववधार्थं वज्रं स्वयमेव नापेक्षते । तथापि वृष्ट्यर्थमिंद्रवज्रेण हन्यमानत्वात् तदिच्छंतीत्युपचर्यते । यद्वा बहुभ्यस्तेषामर्थाय वधर्यंती वधमात्मन इच्छंती भूमिं ॥ छांदसो रेफोपजनः ॥ तामेवैको बहुभ्यः संवादिभ्यः श्रेष्ठतमामब्रवीत् । उदकस्यापि

मेघकारणत्वात्। एवमृता ऋतान्युक्तरूपाणि यथार्थानि वाक्यानि वदंतः परस्परं ब्रुवंतश्चमसानपिंशत। अवयविनोऽकुरुत। चतुर्धा व्यभजतेत्यर्थः॥ पिशि अवयवे। शे मुचादीनामिति नुम्॥ इदमेव ऋतवदनमपेक्ष्य ऋभुशब्दं व्याचक्षाणो यास्कः। ऋभव उरु भांतीति वर्तेन भांतीति वर्तेन भवंतीति वा। नि॰ ११. १५.। इत्युक्तत्वात्॥

॥ अथ दशमी ॥

श्रोणामेकं उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतं।
आ निम्रुचः शकृदेको अपाभरत्किं स्वित्पुत्रेभ्यः पितरा उपावतुः॥ १०॥

श्रोणां। एकः। उदकं। गां। अव। अजति। मांसं। एकः। पिंशति। सूनया। आऽभृतं।
आ। निऽम्रुचः। शकृत्। एकः। अप। अभरत्। किं। स्वित्। पुत्रेभ्यः। पितरौ।
उप। आवतुः॥ १०॥

अत्र ऋभव एव ऋत्विग्रूपेण स्थित्वा सर्वत्र यज्ञं निर्वहंतीत्याह। श्रोणां शोणं॥ वा छंदसीति पररूपाभावः॥ शोणवर्णमुदकं रुधिरमेक ऋभुषु मध्ये ऋत्विक् गामवाजति। बाह्यभूमिं प्रति गमयति। रक्षोभागत्वेन स्थापयति। तथैको मांसं सूनया छेदनसाधनेन स्वधितिनाभृतं संपादितं पिंशति। हृदयजिह्वावक्षआद्याकारेणाहृतं संपादितं मांसं पिंशति। अवयवीकरोति। स्वधितिना तत्तदवयवान्विभजतीत्यर्थः। अथैको निम्रुचो निःशेषेण छिन्नान्मांसात् शकृत् कुक्षिस्थं जरत्तृणमूवध्यनामकमपाभरत्। अपाहरन्निरसनाय। एवं ऋत्विग्रूपेण स्थितेभ्यः पुत्रेभ्यः पुरुत्रातृभ्यः पुत्रस्थानीयेभ्य ऋभुभ्यः सर्वेष्वनुष्ठितेषु पितरा यज्ञस्य पालयितारौ जायापती किंस्विदुपावतुः। किं नु खलु प्राप्नुतः॥ अवतेः प्राप्त्यर्थाच्छांदसो लिट्॥ सर्वं तैरेवानुष्ठितमिति तयोर्न किंचित्कृत्यमस्तीत्यर्थः। अथवायमर्थः। एकस्तेषामन्यतमः श्रोणां पंगुकां गामुदकं प्रत्यवगमयति। अपरः सूनया मांसविक्रयिण्याभृतं संपादितं मांसं पिंशति। अपर आ निम्रुचोऽस्तमयादर्वागेव शकृज्जोपुरीषं हरति। एवमृभुभिरनुष्ठिते सति किंस्विदेतस्मात्परिचरणादन्यत्पुत्रेभ्यः सकाशादुपावतुः। उपगच्छेतामिति॥

॥ इति द्वितीयस्य तृतीये पंचमो वर्गः॥

॥ अथैकादशी ॥

उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वपः स्वपस्यया नरः ।
अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानु गच्छथ ॥ ११ ॥
उद्वत्ऽसु । अस्मै । अकृणोतन । तृणं । निवत्ऽसु । अपः । सुऽअपस्यया । नरः ।
अगोह्यस्य । यत् । असस्तन । गृहे । तत् । अद्य । इदं । ऋभवः । न । अनु । गच्छथ ॥ ११ ॥

पुराणप्रसिद्धान्सुधन्वनः पुत्रान् कर्मणा देवत्वं प्राप्नवत ऋभून् स्तुत्वा वेदप्रसिद्धा सूर्यरश्मिरूपानृभूनिदानीं स्तौति । तथा च यास्को निरुक्ते पुराणप्रक्रियासिद्धानृभून्बहुधा निरुच्य तत्रोदाहरणत्वेन विष्ट्वी शमीत्येतामुदाहृत्यादित्यरश्मयोऽप्यृभव उच्यंत इत्युक्त्वा तस्मिन्नर्थ एतामृचमुदाजहार । नि॰ ११.१६. । हे ऋभवः । उरु प्रभूतं भासमाना ऋतेनादित्येन भासमाना वा ऋतेनोदकेनोदकार्थमुत्पन्ना वा । रश्मीनामुरुभासमानत्वं प्रसिद्धं । तथादित्यादुत्पत्तिरपि । उदकार्थं भवनमपि रश्मीनां घर्मकाले भूमिगतं सारमादाय पुनर्वर्षकाले प्रवर्षतीति प्रसिद्धं । आदित्याज्जायते वृष्टिरिति शास्त्रात् । तथाविधा नरः प्रकाशवृष्ट्युदकादेर्नेतारो यूयमुद्वत्सून्नतेषु प्रदेशेषु मेर्वादिषु तृणं व्रीहियवादिरूपमस्मै प्राणिजातायोपकारार्थमकृणोतन । कृतवंतः स्थ ॥ उपसर्गाच्छंदसि धात्वर्थे वति ॥ तथा निवत्सु प्रवणदेशेष्वस्मा एवाप उदकान्यकृणोतन । अकुर्वत । किं स्वभोगार्थं नेत्याह । स्वपस्यया । शोभनकर्मेच्छया । शोभनं कर्मभिः कृतमिति यथा यजमानाः स्तुवंति तदिच्छयेत्यर्थः । किंच यूयमगोह्यस्याग्राह्यस्यादित्यस्य गृहे मंडले यत् यावत्कालमसस्तन । सुप्तवंतः स्थ । रात्रौ निर्व्यापारास्तिष्ठथ ॥ षस स्वप्ने । अस्माल्लङि पूर्ववत्तस्य तनबादेशः । अदादित्वाच्छपो लुक् ॥ तत्तावंतं कालमद्याहनीदमिदानीं नानुगच्छथ । अनुसृत्य न गच्छथ । यावंतं कालं रात्रौ सूर्ये निगूढा वर्तध्वे तावंतमेव कालमहन्यपि नानुगच्छथेत्यर्थः । यद्वा अगोपनीयस्य तस्य गृहेऽतरिक्षे यत् यावंतं कालमसस्तन । वृष्टिमदत्वा स्वापमकुरुत । तत् तावंतं कालमद्येदानीं वर्षसमय इदं सस्याभिवर्धनवृष्टिप्रवाहरूपं कर्म नानुगच्छथ । अनुसृत्य न प्राप्नुथ । यावंतं कालं विवर्षथ तावंतमेव कालं प्रवर्षयेत्यर्थः ॥

॥ अथ द्वादशी ॥

संमील्य यद्भुवना पर्यसर्पत क्व स्वित्तात्या पितरा व आसतुः ।
अशपत यः करस्नं व आददे यः प्राब्रवीत्प्रो तस्मा अब्रवीतन ॥ १२ ॥

सम्ऽमील्य । यत् । भुवना । परिऽअसर्पत । क्व । स्वित् । तात्या । पितरा । वः । आसतुः ।
अशपत । यः । करस्नं । वः । आऽददे । यः । प्र । अब्रवीत् । प्रो इति । तस्मै ।
अब्रवीतन ॥ १२ ॥

हे ऋभवो रश्मयो यूयं यत् यदा भुवना भूतजातानि संमील्य संमीलनं कृत्वा जलधरपटलैराच्छाद्य पर्यसर्पत । परितः सर्पणं कुरुथ । वर्षयेत्यर्थः । तात्या तातौ तायमाने वृष्ट्युदके । यद्वा तात्या तासु वर्षासु ॥ छांदसस्त्यप्रत्ययो दकारस्यात्वं च ॥ अथवा पितृविशेषणं । तात्या तत्कालीनौ पितरा जगतः पालकौ सूर्याचंद्रमसौ क्व स्विदासतुः । कुत्र खलु तिष्ठतः ॥ अस्तेर्लिटि व्यत्ययेन भूभावाभावः । यद्वा असतेर्गत्यर्थस्य लिट्येतद्रूपं ॥ अहोराचाविभागेन प्रवर्षयेत्यर्थः । किंच ईदृशान्वो युष्मान् यःकोऽपि वृष्टिप्रतिबंधकारी राक्षसादिः करस्नं ॥ बाहुनामैतत् करस्नौ बाहू इत्युक्तत्वात् अच त्वकारांतं ॥ युष्मदीयं हस्तमाददे । गृह्णाति । प्रतिरोधं करोति । तमशपत । नाशयथ । यश्च प्राब्रवीत् प्रकर्षेण वाचा निरुंद्धे । तस्मै प्रो प्रैवाब्रवीतन । प्रकर्षेण भर्त्सनादिशब्दं कुरुथ । यद्वा यो नूनं स्तौति तं प्रकर्षेण स्तुतेत्यर्थः ॥

॥ अथ त्रयोदशी ॥

सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत् ।
श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत ॥ १३ ॥

सुसुप्वांसः । ऋभवः । तत् । अपृच्छत । अगोह्य । कः । इदं । नः । अबूबुधत् ।
श्वानं । बस्तः । बोधयितारं । अब्रवीत् । संवत्सरे । इदं । अद्य । वि । अख्यत ॥ १३ ॥

हे ऋभवो रश्म्यात्मका यूयं सुषुप्वांस आदित्यमंडले स्वपंतो वर्षणाय ॥ स्वपेर्लिटः क्वसुः ॥ तमादित्यं तद्वाक्यमपृच्छत । प्रश्नं कुरुथ । किं तदिति चेत् उच्यते । हे अगोह्य केन चिदगोपनीयादित्य स्वामिन् नोऽस्मदीयमिदं कर्म वर्षणरूपं कोऽबूबुधत् । बोधयति । प्रेरयति । साहाय्यं करोति ॥ बुधेर्ण्यंताल्लुङि

चङि रूपं ॥ बस्तः सर्वस्य वासयितादित्यः ॥ वसेरौणादिकस्तप्रत्ययः । बवयोरभेदाद्बत्वं ॥ बोधयितारं प्रेरयितारं श्वानमब्रवीत् । अंतरिक्षे श्वसंतं वायुं प्रावादीत् । असौ युष्मान्प्रेरयतीति । अथवा वायुसाहाय्येन वर्षंतो यूयं संवत्सरे पूर्णेऽद्येदानीमिदं जगद्व्यख्यत । विविधं प्रकाशितवंतः । पूर्वं सूर्याचंद्रमसौ यथा न दृश्येते तथा वर्षित्वेदानीं वर्षकालेऽतीते विश्वं जगद्व्यक्तं कुरुथेत्यर्थः ॥ ख्यातेर्लुङ्यस्यतिवक्तिख्यातीत्यङ् ॥

॥ अथ चतुर्दशी ॥

दि॒वा यां॑ति म॒रुतो॒ भूम्या॒ग्निर॒यं वातो॑ अं॒तरि॑क्षेण याति ।
अ॒द्भिर्या॑ति॒ वरु॑णः समु॒द्रैर्यु॒ष्माँ इ॒च्छंतः॑ शवसो नपातः ॥ १४ ॥

दि॒वा । यांति॒ । म॒रुतः॑ । भूम्या॑ । अ॒ग्निः । अ॒यं । वातः॑ । अं॒तरि॑क्षेण । या॒ति॒ ।
अ॒त्ऽभिः । या॒ति॒ । वरु॑णः । स॒मु॒द्रैः । यु॒ष्मान् । इ॒च्छंतः॑ । श॒व॒सः॒ । न॒पा॒तः॒ ॥ १४ ॥

हे शवसो वृष्टिकार्यस्य बलस्य नपातो नपातयितार ऋभवः युष्मानिच्छंतो वृष्ट्यनुकूलचिकीर्षया युष्मानेवेच्छंतः सर्वे देवा आयांति । कस्मादिति तदुच्यते । मरुतो वृष्ट्यनुकूला देवा दिवा द्युलोकादंतरिक्षाद्यांति । आगच्छंति ॥ सावेकाच इति तृतीयाविभक्तेरुदात्तत्वं ॥ भूम्या भूमेः सकाशादग्निर्याति । आगच्छति । अयं वातः सर्वदा संचारी वायुरंतरिक्षेण याति । अंतरिक्षादायाति । तथा वरुण आवरको जलाभिमानी देवः समुद्रैः समुंदनस्वभावैरद्भिः । ताभ्य आयाति । यद्वा पूर्वं वृष्टिसाहाय्यायागता एते देवाः कृतकार्याः संतः पुनर्युष्मान्कामयमानाः स्वस्वदेशं प्रति यांतीत्यर्थः ॥

॥ इति द्वितीयस्य तृतीये षष्ठो वर्गः ॥

मा नो मित्र इति द्वाविंशत्यृचं पंचमं सूक्तं दैर्घतमसं । तृतीयाषष्ठ्यौ जगत्यौ । शिष्टा त्रिष्टुभः । अश्वस्य स्तूयमानत्वाद्या तेनोच्यते सा देवतेति न्यायेनाश्वो देवता । अत्रानुक्रमणिका । मा नो द्व्यधिकाश्वस्तुतिस्तु तृतीयाषष्ठ्यौ जगत्याविति ॥ अश्वमेधस्य मध्यमेऽहन्यध्रिगुप्रैषेऽध्रिगो शमीध्वमिति शिष्ट्वा षड्विंशतिरस्य वंक्रय इत्यस्मात्पुरस्ताद्वैतत्सूक्तमावपेत् । त्रीणि सुत्यानि भवंतीति खंडे सूचितं । अध्रिगो शमीध्वमिति शिष्ट्वा षड्विंशतिरस्य वंक्रय इति वा मा नो मित्र इत्यावपेत । आ॰ १०. ८. । इति ॥

॥ तत्र प्रथमा ॥

मा नो॑ मि॒त्रो वरु॑णो अर्य॒मायुरिंद्र॑ ऋभु॒क्षा म॒रुतः॒ परि॑ ख्यन् ।
यद्वा॒जिनो॑ दे॒वजा॑तस्य॒ सप्तेः॑ प्रव॒क्ष्यामो॑ वि॒दथे॑ वी॒र्या॑णि ॥ १ ॥

मा । नः॒ । मि॒त्रः । वरु॑णः । अ॒र्य॒मा । आ॒युः । इंद्रः॑ । ऋ॒भु॒क्षाः । म॒रुतः॑ । परि॑ । ख्य॒न् ।
यत् । वा॒जिनः॑ । दे॒वऽजा॑तस्य । सप्तेः॑ । प्र॒ऽव॒क्ष्यामः॑ । वि॒दथे॑ । वी॒र्या॑णि ॥ १ ॥

नोऽस्मानश्वं स्तोतुं प्रवृत्तान्मित्रादयो देवा मा परिख्यन् । परिख्यानं मा कुर्वंतु । परिख्यानं नाम निंदा । महानुभावं देवजातमश्वं तुच्छा नराः स्तुवंतीति मा कुर्वंतु ॥ ख्यातेर्माङि लुङ्यस्यतिवक्तीत्यादिना च्लेरङ् ॥ अहरभिमानी देवो मित्रो रात्र्यभिमानी वरुणः । अर्यमा तयोरंतरालाभिमान्यादित्यः । आयुः सततगंता वायुः ॥ वकारलोपो वा ॥ इंद्रः प्रसिद्धः । ऋभुक्षा देवानां निवासभूतः प्रजापतिः । यद्वैतन्महन्नामेंद्रविशेषणं ऋभुक्षा उक्षेति तन्नामसु पाठात् । निंदायाः प्रसक्तिं दर्शयति । यत् यस्माद्वाजिनो वेजनवतो बह्वन्नवतो वा देवजातस्य बहुदेवतास्वरूपेणोत्पन्नस्य । उषादीनामस्य शिरआद्यवयवत्वादिति भावः । उषा वा अश्वस्य मेध्यस्य शिर इत्यादिश्रुतेः । यद्वा देवेभ्यो जातस्य गंधर्वकुल उत्पन्नत्वात् । सप्तेः सर्पणशीलस्य । अश्वनामैतत् । एवंविधस्याश्वस्य महानुभावस्य वीर्याणि वीरकर्माणि सामर्थ्यानि विदथे वेदनसाधने यज्ञे प्रवक्ष्यामः । प्रकर्षेण ब्रूमः । अतो मा परिख्यन् प्रत्युतानुगृह्णंत्वित्यर्थः ॥

॥ अथ द्वितीया ॥

यन्नि॒र्णिजा॒ रेक्ण॑सा॒ प्रावृ॑तस्य रा॒तिं गृ॑भी॒तां मु॑ख॒तो नयं॑ति ।
सुप्रा॑ङजो मेम्य॑द्वि॒श्वरू॑प इंद्रापू॒ष्णोः प्रि॒यमप्ये॑ति॒ पाथः॑ ॥ २ ॥

यत् । निः॒ऽनिजा॑ । रेक्ण॑सा । प्रावृ॑तस्य । रा॒तिं । गृ॒भी॒तां । मु॒ख॒तः । नयं॑ति ।
सु॒ऽप्राङ् । अ॒जः । मेम्य॑त् । वि॒श्वऽरू॑पः । इं॒द्रा॒पू॒ष्णोः । प्रि॒यं । अपि॑ । ए॒ति॒ । पाथः॑ ॥ २ ॥

यत् यस्मान्निर्णिजा । निर्णिगिति रूपनाम । रेक्णसा । रेक्ण इति धननाम । निर्णिक् वव्रिरिति रेक्णो रिक्थमिति च तन्नामसूक्तत्वात् ॥ उभयत्र मत्वर्थो लुप्यते ॥ रूपवता हिरण्यवताभरणेन प्रावृतस्य सर्वतो वेष्टितस्याश्वस्य मुखतः पुरस्ताद्गृभीतां गृहीतां रातिं दातव्यां दातव्यत्वेन गृहीतामजां नयंत्यृत्विजः । स

तादृशोऽजः सुप्राङ् सुष्ठु प्रशस्यागमनो मेम्यत् हन्यमानः ॥ मीञ् हिंसायां । अस्माद्यंङ्लुगंतात्कर्मणि व्यत्ययेन शतृ ॥ यद्वा तस्य शब्दानुकरणं मेमेशब्दं कुर्वन् । विश्वरूपो बहुवर्णोपेतः कृष्णग्रीवः कृष्णललामो वानेकवर्ण इत्यर्थः । एवंरूपोऽयमिंद्रापूष्णोः । इंद्रः प्रसिद्धः । पूषा पोषको देवोऽग्निः । तयोः प्रियं। आग्नेयः कृष्णग्रीव इत्युक्तत्वादग्नेः प्रियत्वं । सर्वेऽपीद्रस्येतींद्रप्रियत्वं । एवंरूपं पाथोऽन्नमप्येति । प्राप्नोतु ॥

॥ अथ तृतीया ॥

एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनं सौश्रवसाय जिन्वति ॥ ३ ॥
एषः । छागः । पुरः । अश्वेन । वाजिना । पूष्णः । भागः । नीयते । विश्वऽदेव्यः ।
अभिऽप्रियं । यत् । पुरोळाशं । अर्वता । त्वष्टा । इत् । एनं । सौश्रवसाय । जिन्वति ॥ ३ ॥

एष छागः शृंगरहितोऽजोऽश्वेन वाजिना शीघ्रव्यापकेनाश्वेन सह पूष्णः पोषकस्याग्नेर्भागो भजनीयो विश्वदेव्यः सर्वदेवार्हः । अग्नेः सर्वदेवात्मकत्वात् तदर्हत्वेन सर्वदेवप्रियत्वं । एवंविधोऽजः पुरः पुरस्तान्नीयते । प्राप्यते । यत् यस्मादेवं क्रियते तस्मात्प्रियं प्रीणयितारं पुरोडाशं पुरस्ताद्दातव्यमेनमजं त्वष्टा सर्वस्योत्पादको देवः । त्वष्टा रूपाणि विकरोतीति श्रुतेः । तूर्णव्यापकोऽग्निर्वा । उभे त्वष्टुर्बिभ्यतुरित्युक्तत्वात् अहोरात्रे इति वारणी इति वेति यास्केनारणी बिभ्यतुरित्युक्तत्वात् । नि° ८. १५. । अरणिसंबंधोऽग्नेरेवेति गम्यते । अर्वतारण-वताश्वेन सह सौश्रवसाय देवानां शोभनान्ननिमित्तमभिजिन्वति । प्रीतिहेतुकं करोति ॥

॥ अथ चतुर्थी ॥

यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयंति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥ ४ ॥
यत् । हविष्यं । ऋतुऽशः । देवऽयानं । त्रिः । मानुषाः । परि । अश्वं । नयंति ।
अत्र । पूष्णः । प्रथमः । भागः । एति । यज्ञं । देवेभ्यः । प्रतिऽवेदयन् । अजः ॥ ४ ॥

हविष्यं हविर्योग्यं देवयानं देवानां प्रापणीयमश्वं यत् यदा मानुषा ऋत्विज ऋतुश ऋतावृतौ काले काले त्रिः परिणयंति । पर्यग्निकुर्वंतीत्यर्थः । अत्रा-

स्मिन्समये ॥ ऋचि तुनुघेति दीर्घः ॥ पूष्णः पोषकस्याग्नेर्भागोऽजः प्रथम एति । पुरोगामी सन् गच्छति । किं कुर्वन् । यज्ञं देवेभ्यः प्रतिवेदयन् प्रख्यापयन् ॥

॥ अथ पंचमी ॥

होताध्वर्युरावया अग्निमिंधो ग्रावग्राभ उत शंस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वं ॥ ५ ॥

होता । अध्वर्युः । आऽवयाः । अग्निंऽइंधः । ग्रावऽग्राभः । उत । शंस्ता । सुऽविप्रः ।
तेन । यज्ञेन । सुऽअरंकृतेन । सुऽइष्टेन । वक्षणाः । आ । पृणध्वं ॥ ५ ॥

होता देवानामाह्वातैतन्नामक ऋत्विक् अध्वर्युरध्वरयुरध्वरस्य नेता । सोऽप्यावया आभिमुख्येन हविषां गमयिता । अध्वर्योर्विशेषणमेतत् ॥ आङ्पूर्वाद्वेतेरसुन् । पूर्वपदप्रकृतिस्वरत्वं च ॥ यद्वा आभिमुख्येनावयष्टा प्रतिप्रस्थातोच्यते ॥ अवे यजः । पा० ३. २. ७२. । इति ण्विन् । अवाप्योरुपसर्गयोरित्यल्लोपः ॥ अग्निमिंधोऽग्नीत् ॥ भ्राष्ट्राग्न्योरिंधे । पा० ६. ३. ७०. ६. । इति मुम् ॥ ग्रावग्राभः । ग्राव्णः स्तुत्या गृह्णातीति ग्रावस्तुत् ॥ कर्मण्यण् ॥ उत अपि च शंस्ता प्रशास्ता । सुविप्र इति मेधाविनाम । शोभनमेधोपेतो ब्रह्मोच्यते । ब्रह्मा त्वो वदति जातविद्यामित्यत्र ब्रह्मैको जाते जाते विद्यां वदति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हतीत्युक्तत्वाद्ब्रह्मैव सुविप्रशब्देनाभिधेयः । स चानुक्तऋत्विगुपलक्षकः । एते सर्वे तेन प्रसिद्धेन स्वरंकृतेन सुष्ठ्वरणीयं कृतेन स्वलंकृतेन वोच्चारसौष्ठवादिना सुष्ठु संपादितेन स्विष्टेन सुष्ठ्विष्टेन यज्ञेन वक्षणा अभितो घृतकुल्यादीन् प्रवहणस्वभावाः प्रसिद्धा नदीर्वापृणध्वं । सर्वतः पूरयत । यज्ञं सम्यक् निवर्त्य फलं साधयतेत्यर्थः ॥

॥ इति द्वितीयस्य तृतीये सप्तमो वर्गः ॥

॥ अथ षष्ठी ॥

यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनं संभरंत्युतो तेषामभिगूर्तिर्न इन्वतु ॥ ६ ॥

यूपऽव्रस्काः । उत । ये । यूपऽवाहाः । चषालं । ये । अश्वऽयूपाय । तक्षति ।
ये । च । अर्वते । पचनं । संऽभरंति । उतो इति । तेषां । अभिऽगूर्तिः । नः । इन्वतु ॥ ६ ॥

यूपव्रस्का यूपार्हवृक्षस्य व्रश्चनकर्तारश्छेत्तारः। उत ये च यूपवाहाश्छिन्नस्य वोढारः। ये च चषालं। यूपस्योपरिस्थाप्यं यूपाग्रभागं चषालमाहुः। तद्येऽश्व-यूपायाश्वबंधनयूपाय तक्षति ॥ तक्षतीति वचनव्यत्ययः ॥ साधु संपादयंति। ये चार्वतेऽरणवतेऽश्वाय पचनं पाकसाधनं काष्ठभांडादिकं संभरंति। उतो अपि च नोऽस्मत्संबंधिनां तेषामृत्विजामभिगूर्तिः संकल्पः सर्वथा करणीयमिति बुद्धि-रिन्वतु। व्याप्नोतु ॥ इन्वतिर्व्याप्तिवचनः। इन्वति ननक्षेति तद्वचनेषु पाठात् ॥ यद्वा तेषामभिगूर्तिर्नोऽस्मानिन्वतु। यागं साधुपारं प्रापय्य फलेन योजय-त्वित्यर्थः ॥

॥ अथ सप्तमी ॥

उप॒ प्रागा॑त्सु॒मन्मे॑ऽधायि॒ मन्म॑ दे॒वाना॒माशा॒ उप॑ वी॒तपृ॑ष्ठः।
अन्वे॑नं॒ विप्रा॒ ऋष॑यो मदंति दे॒वानां॑ पु॒ष्टे च॑कृमा सु॒बंधुं॑ ॥ ७ ॥

उप॑। प्र। अ॒गा॒त्। सु॒ऽमत्। मे॒। अ॒धा॒यि॒। मन्म॑। दे॒वाना॑ं। आशाः॑। उप॑। वी॒तऽपृ॑ष्ठः।
अनु॑। ए॒नं॒। विप्राः॑। ऋष॑यः। म॒दं॒ति॒। दे॒वाना॑ं। पु॒ष्टे। च॒कृ॒म॒। सु॒ऽबंधु॑ं ॥ ७ ॥

मन्म मननीयं फलं सुमदुप प्रागात्। उपप्रैतु ॥ सुमत् स्वयमित्यर्थ इति यास्कः ॥ यद्वा स्वयमेव मादयितृतमे मय्यधायि। धीयते। फलभूतोऽश्व आगतः स च मया धृत इत्यर्थः। किमर्थं। वीतपृष्ठः साधुपोषणेन प्राप्तपार्श्वभागः कांत-पृष्ठो वा। अत्यंतं दृप्त इत्यर्थः। तादृशोऽयं देवानामाशाः पूरयितुमुपगच्छतु। यागार्थमागतमेनं सुबंधुं शोभनबंधनमश्वं देवानामाशास्यमानानां पुष्टे पोष-णाय चकृम। कुर्मः। तं च विप्रा मेधाविन ऋत्विज ऋषयोऽतींद्रियद्रष्टारोऽन्ये वा विप्रा ऋषयश्चानुमदंति। अनुमोदंतां। सम्यक् कृतमिति परितुष्यंतु ॥

॥ अथाष्टमी ॥

यद्वा॒जिनो॒ दाम॑ सं॒दान॒मर्व॑तो॒ या शी॑र्ष॒ण्या॑ रश॒ना रज्जु॑रस्य।
यद्वा॑ घास्य॒ प्रभृ॑तमा॒स्ये॒३॒॑ तृणं॒ सर्वा॒ ता ते॒ अपि॑ दे॒वेष्व॑स्तु ॥ ८ ॥

यत्। वा॒जिनः॑। दाम॑। सं॒ऽदान॑ं। अर्व॑तः। या। शी॒र्ष॒ण्या॑। र॒श॒ना। रज्जुः॑। अ॒स्य॒।
यत्। वा॒। घ॒। अ॒स्य॒। प्रऽभृ॑तं। आ॒स्ये॑। तृण॑ं। सर्वा॑। ता। ते॒। अपि॑। दे॒वेषु॑। अ॒स्तु॒ ॥ ८ ॥

वाजिनो गमनवतोऽश्वस्य यद्दाम ग्रीवाबद्धा रज्जुः। यच्च संदानं सम्यग-

वच्छेदकं बंधकं पादबंधनं दामास्ति। या चास्य शीर्षण्या शिरसि बद्धा खलीनरज्जुरस्ति॥ शिरःशब्दाद्भवे छंदसीति यत्। ये च तद्धिते। पा॰ ६. १. ६१.। इति शीर्षन्भावः। तित्स्वरितः॥ यद्वा घास्याश्वस्यास्ये मुखे प्रभृतं प्रहृतं प्रक्षिप्तं तृणमस्ति॥ घशब्दो हार्थे स च प्रसिद्ध्यर्थः॥ सर्वा सर्वाणि ता तानि सर्वाण्यपि हे अश्व ते तव संबंधीनि देवेष्वस्तु। संतु। देवेषु मध्ये भवंतु। देवत्वं प्राप्नुवंतु वा॥ वचनव्यत्ययः॥ अत्रोपयुक्तानां सर्वेषां देवत्वं किल अश्वस्य तत्प्राप्तिर्नाशासनीया॥

॥ अथ नवमी ॥

यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु॥ ९॥
यत्। अश्वस्य। क्रविषः। मक्षिका। आश। यत्। वा। स्वरौ। स्वऽधितौ। रिप्तं। अस्ति।
यत्। हस्तयोः। शमितुः। यत्। नखेषु। सर्वा। ता। ते। अपि। देवेषु। अस्तु॥ ९॥

अश्वस्य तदवयवभूतस्य क्रविष आममांसस्य यत् यदंगं मक्षिकाश। अभक्षयत्॥ अश भोजने॥ यद्वा कर्मणि षष्ठी॥ अश्वस्य यन्मांसं भक्षयति। वा अथवा स्वरौ पश्वंजनकाले यद्रिप्तं लिप्तमस्ति। स्वरुणा पशुमनक्तीति श्रुतेः। अथवा स्वधितौ छेदनकाले। अवदानकाले यद्रिप्तमस्ति। शमितुर्हस्तयोर्लिप्तमस्ति। विशसनकाले यच्च नखेषु लिप्तं। ता सर्वा तानि सर्वाणि हे अश्व ते तव संबंधीनि देवेष्वस्तु। देवेषु संतोषार्थाय भवंतु॥

॥ अथ दशमी ॥

यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गंधो अस्ति।
सुकृता तच्छमितारः कृण्वंतूत मेधं शृतपाकं पचंतु॥ १०॥
यत्। ऊवध्यं। उदरस्य। अपऽवाति। यः। आमस्य। क्रविषः। गंधः। अस्ति।
सुऽकृता। तत्। शमितारः। कृण्वंतु। उत। मेधं। शृतऽपाकं। पचंतु॥ १०॥

उदरस्य संबंधि यदूवध्यमीषज्जीर्णं तृणं पुरीषमपवाति। अपगच्छति। यश्चामस्यापक्वस्य क्रविषो मांसस्य गंधोऽस्ति। लेशोऽस्ति। पाकस्य समये यत्किंचिदूवध्यमपक्वस्य च लेशोऽस्ति। आमगंधोऽस्ति। तत्सर्वं शमितारो विशसनकर्तारः

सुकृता कृखंतु । सुकृतमुक्तदोषरहितं कुर्वंतु । उत अपि च मेधं मेध्यं यज्ञार्हं पश्ववयवं शृतपाकं देवयोग्यपाकोपेतं यथा भवति तथा पचंतु । पितृमनुष्यादियोग्यमतिपक्वमीषत्पक्वं च मा कुर्वंत्वित्यर्थः ॥

॥ इति द्वितीयस्य तृतीयेऽष्टमो वर्गः ॥

॥ अथैकादशी ॥

यत्ते गात्रा॑द॒ग्निना॑ प॒च्यमा॑नाद॒भि शूलं॒ निह॑तस्याव॒धाव॑ति ।
मा तद्भूम्या॒मा श्रि॑षन्मा तृणे॑षु दे॒वेभ्य॒स्तदु॒शद्भ्यो॑ रा॒तम॑स्तु ॥ ११ ॥

यत् । ते॒ । गात्रा॑त् । अ॒ग्निना॑ । प॒च्यमा॑नात् । अ॒भि । शूलं॑ । नि॑ऽह॑तस्य । अ॒व॒ऽधाव॑ति ।
मा । तत् । भूम्यां॑ । आ । श्रि॒ष॒त् । मा । तृणे॑षु । दे॒वेभ्यः॑ । तत् । उ॒शत्ऽभ्यः॑ । रा॒तं । अ॒स्तु॒ ॥ ११ ॥

हे अश्व ते तवाग्निना पच्यमानाद्गात्राद्यदूष्मरूपं रसो वा यत्किंचिदवधावति । तथा निहतस्य निःशेषेण हतस्य तव यदंगं रसरूपं शूलमभिलक्ष्यावधावति । निर्गच्छति । तत् तदंगं भूम्यां मा श्रिषत् । आश्लिष्टं मा भूत् ॥ श्लिषेः पुषादित्वादङ् ॥ पाकसमये तथा मा तृणेषु विशसनसमये दर्भेषु मापगच्छतु । तर्हि तत्पतितं कुत्र गच्छत्विति चेत् उच्यते । तत् तादृशमुशद्भ्यः कृत्स्नं हविः कामयमानेभ्यो देवेभ्यो रातं दत्तमस्तु ॥

॥ अथ द्वादशी ॥

ये वा॒जिनं॑ परि॒पश्यं॑ति प॒क्वं य ई॑मा॒हुः सु॑र॒भिर्निर्ह॒रेति॑ ।
ये चार्व॑तो मां॒सभि॒क्षामु॒पास॑त उ॒तो तेषा॑म॒भिगू॑र्तिर्न इन्वतु ॥ १२ ॥

ये । वा॒जिनं॑ । प॒रि॒ऽप॒श्यं॑ति । प॒क्वं । ये । ई॒ । आ॒हुः । सु॒र॒भिः । निः । ह॒र॒ । इति॑ ।
ये । च॒ । अर्व॑तः । मां॒स॒ऽभि॒क्षां । उ॒प॒ऽआसं॑ते । उ॒तो इति॑ । तेषां॑ । अ॒भि॒ऽगू॑र्तिः ।
नः॒ । इ॒न्व॒तु॒ ॥ १२ ॥

ये पक्वं वाजिनमश्वमश्वावयवं परिपश्यंति । परितः पावनबुद्ध्येक्षंते । य ईं ये चैनं सुरभिः शोभनगंधोऽतो निर्हर किंचिदप्यस्मभ्यं देहीत्याहुः । यद्वा निःशेषेण देवेभ्यो हरेत्याहुः । यतः सुरभिः अतो देवयोग्यमिति । किंच ये चार्वतो मांसभिक्षामुपासते । ये नरा अस्यार्वतोऽश्वस्य हुतशिष्टमांसयाचनामुपासते । कांक्षंते । उतो अपि च तेषामुक्तविधानामभिगूर्तिरभित उद्यमनं

नोऽस्मानिन्वतु। व्याप्नोतु। यथास्माभिरश्व उपालब्ध एवं स्पृहयंति तथा यज्ञो निर्वाहयत्वित्यर्थः ॥ यद्वा मंत्रो देवपरो व्याख्येयः। ये देवा वाजिनं पक्वं परिपश्यंति कदा होष्यतीति विलंबं दृष्ट्वा ये च सुरभिः ईमेनं निर्हर निःशेषेणास्मभ्यं देहीत्याहुः। ये चार्वतोऽश्वस्य मांसभिक्षामुपासते तेषामभिगूर्तिर्न इन्वतु। तेषामुद्यमः सफलो भवत्वित्यर्थः ॥

॥ अथ त्रयोदशी ॥

यन्नीक्षणं मांस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि।
ऊष्मण्यापिधाना चरूणामंकाः सूनाः परि भूषंत्यश्वं ॥ १३ ॥
यत्। निऽईक्षणं। मांस्पचन्याः। उखायाः। या। पात्राणि। यूष्णः। आऽसेचनानि।
ऊष्मण्या। अपिऽधाना। चरूणां। अंकाः। सूनाः। परि। भूषंति। अश्वं ॥ १३ ॥

मांस्पचन्या मांसपचन्याः ॥ पचतेरधिकरणे ल्युट् ॥ मांसस्य पचि युड्घञोः। पा॰ ६. १. १४४. ५.। इत्यंतलोपः ॥ उखायाः स्थाल्या नीक्षणं पाकपरीक्षासाधनं काष्ठं। तथा या यानि पात्राणि यूष्णो रसस्य क्वथितस्यासेचनान्यासेचनसाधनानि। तथोष्मण्योष्मनिवारणार्हाणि पात्राणि। तथा चरूणां पात्राणां मांसपूर्णानामपिधानापिधानानि तत्साधनानि। तथांका हृदयाद्यवयवांकनसाधना वेतसशाखाः। सूना अवदानसाधनाः स्वधित्यादय एतमश्वमश्वावयवं परिभूषंति। परितो भूषयंति। स्वस्वव्यापारेण साधयंतीत्यर्थः ॥ भूष अलंकारे। भौवादिकः ॥

॥ अथ चतुर्दशी ॥

निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥ १४ ॥
निऽक्रमणं। निऽसदनं। विऽवर्तनं। यत्। च। पड्बीशं। अर्वतः।
यत्। च। पपौ। यत्। च। घासिं। जघास। सर्वा। ता। ते। अपि। देवेषु। अस्तु ॥ १४ ॥

यन्निक्रमणं। नितरां क्रमते यत्र तन्निक्रमणं स्थानं। नितरां सीदत्यत्रेति निषदनं। विवर्तनं विविधवर्तनमितस्ततो लुंठनं यत्र तत् ॥ सर्वत्राधिकरणे

ल्युट् ॥ यच्चार्वतोऽश्वस्य पड्बीशं पादबंधनं । यद्वा बंधनं पट् तद्वान्प्रदेशः । अत्र सर्वत्र देवार्थस्याश्वस्य रोमादीनामपि निरर्थकत्वाभावाय तत्स्थानमपि स्वीक्रियते । यद्वा क्रियापरावगंतव्या । आलंभसमये निग्रहेण या निक्रमणादयश्चेष्टाः संति ता इत्यर्थः । यच्च पपौ । यदुदकमपिबत् । यच्च घासिमदनीयं तृणादिकं जघास । अभक्षयत् । हे अश्व ते तव ता तानि सर्वाणि क्रमणादीनि देवेष्वस्तु । संतु । देवेषु व्याप्नोतु । तान्यपि निरर्थकानि मा भूवन्नित्यर्थः ॥

॥ अथ पंचदशी ॥

मा त्वाग्निर्ध्वनयीद्धूमगंधिर्मोखा भ्राजंत्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णंत्यश्वं ॥ १५ ॥

मा । त्वा । अग्निः । ध्वनयीत् । धूमऽगंधिः । मा । उखा । भ्राजंती । अभि । विक्त । जघ्रिः ।
इष्टं । वीतं । अभिऽगूर्तं । वषट्ऽकृतं । तं । देवासः । प्रति । गृभ्णंति । अश्वं ॥ १५ ॥

हे अश्व त्वा त्वां धूमगंधिर्धूमेन व्याप्नोऽग्निर्मा ध्वनयीत् । मा ध्वनयत् । धूमं दृष्ट्वा शब्दं मा कुर्वित्यर्थः । अश्वस्य शब्दने प्रायश्चित्तविधानात् । यद्वा हे पच्यमानाश्वावयव त्वा त्वां धूमगंधिरग्निर्मा ध्वनयीत् । ध्वनौ सति भांडभंगः स्यात् ॥ नोनयतीत्यादिना चङ्प्रतिषेधः । ह्म्यंतक्षणेति वृद्ध्यभावः ॥ किंच भ्राजंत्यत्यंताग्निसंयोगेन दीप्नोखा स्थाली माभिविक्त । अभितो मा चीचलत् । तापातिशयेन मा नीनशदित्यर्थः ॥ ओविजी भयचलनयोः । छांदसो विकरणस्य लुक् । लुङि वा झलो झलीति सलोपः ॥ स्थाली विशेष्यते । जघ्रिः । जिघ्रती तापेन ॥ घ्रा गंधोपादाने । आदृगमहन इति किन्प्रत्ययः ॥ तं तादृशमश्वमिष्टं होतुमिषितं वीतं होमायानीतमभिगूर्तमाभिमुख्येन प्रदानायोद्यतं । यद्वा इष्टं प्रयाजैराप्रीतं वीतं पर्यग्निकृतमभिगूर्तं ये यजामह इत्यागूर्त्योक्तं वषट्कृतं वषट्कारेण देवसंस्कृतं । एवंभूतं तं देवासो देवाः प्रतिगृभ्णंति । प्रतिगृह्णंति ॥

॥ इति द्वितीयस्य तृतीये नवमो वर्गः ॥

॥ अथ षोडशी ॥

यदश्वाय वास उपस्तृणंत्यधीवासं या हिरण्यान्यस्मै ।
संदानमर्वंतं पड्बीशं प्रिया देवेष्वा यामयंति ॥ १६ ॥

यत्। अश्वाय। वासः। उपऽस्तृणंति। अधीवासं। या। हिरण्यानि। अस्मै।
संऽदानं। अर्वंतं। पड्बीशं। प्रिया। देवेषु। आ। यमयंति ॥ १६ ॥

अश्वाय संज्ञप्यमानायाधीवासमुपर्याच्छादनयोग्यं यद्वास उपस्तृणंति। सर्वत आच्छादयंति ॥ स्तृञ् आच्छादने क्र्यादिकः ॥ तथास्मा अश्वाय या यानि हिरण्यानि सौवर्णराजतकांस्यानि कल्पयंति । तथार्वंतं ॥ षष्ठ्यर्थे द्वितीया ॥ अर्वतोऽश्वस्य संदानं शिरोबंधनं पड्बीशं पादेषु प्रविष्टं पादबंधनं । एतानि प्रिया देवानां प्रियतराणि चात्वाले बद्ध्वा स्थापितानि देवेष्वायामयंति । प्रापयंति ॥

॥ अथ सप्तदशी ॥

यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद ।
स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥ १७ ॥
यत्। ते। सादे। महसा। शूकृतस्य। पार्ष्ण्या। वा। कशया। वा। तुतोद ।
स्रुचाऽइव। ता। हविषः। अध्वरेषु। सर्वा। ता। ते। ब्रह्मणा। सूदयामि ॥ १७ ॥

महसा बलेन शूकृतस्य । शब्दानुकरणमेतत् । शूत्कारं कुर्वतस्ते तव सादे सदनेऽगमने निमित्तभूते सति ॥ सदेर्भावे घञ् । कर्षात्वत इत्यंतोदात्तत्वं ॥ अर्थतोऽगमनं कुर्वन् शूत्कारं कुर्वतस्ते त्वां पार्ष्ण्या वा कशया वा तुतोद व्यथयति यत् यस्मात् तस्मात्ते तव ता तानि सर्वा सर्वाण्यध्वरेषु यागेषु ब्रह्मणा मंत्रेण सूदयामि । क्षरामि। आहुतित्वेन कल्पयामीत्यर्थः। तत्र दृष्टांतः। अध्वरेषु यागेषु हविषो हविराज्यादिकं स्रुचेव। स्रुचा यथा सूदयंति तद्वत् ॥

॥ अथाष्टादशी ॥

चतुस्त्रिंशद्वाजिनो देवबंधोर्वंक्रीरश्वस्य स्वधितिः समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥ १८ ॥
चतुःऽत्रिंशत्। वाजिनः। देवऽबंधोः। वंक्रीः। अश्वस्य। स्वऽधितिः। सं। एति ।
अच्छिद्रा। गात्रा। वयुना। कृणोत। परुःपरुः। अनुऽघुष्य। वि। शस्त ॥ १८ ॥

वाजिनोऽश्वस्य देवबंधोर्देवानां प्रियस्य चतुस्त्रिंशद्वंक्रीरेतत्संख्यान्युभयपार्श्वा-

स्थीनि स्वधितिश्छेदनसाधनोऽसिः समेति। सम्यग्गच्छति छेदनाय। इतरेषामजादीनां षड्विंशतिरेव षड्विंशतिरस्य वंक्रय इति प्रैषात्। हे विशनस्य कर्तारः अस्याश्वस्य गात्राणि शरीरावयवान् अच्छिद्राणि यथा भवंति तथा वयुना वयुनानि प्रज्ञानानि ॥ वयुनमिति प्रज्ञानाम। वयुनमभिख्येति तन्नामसूक्तत्वात् ॥ कृणोत। कुरुत ॥ तप्तनप्तनथनाश्चेति तबादेशः ॥ हृदयजिह्वावक्षःप्रभृतीनि प्रज्ञाय मध्ये छिन्नानि मा कुरुतेत्यर्थः। तदर्थं परुःपरुः प्रतिपर्व प्रतिहृदयाद्यवयवमनुघुष्य इदमवद्यमिति संशब्द्यैव विशस्त। विशसनं कुरुत ॥ शस् हिंसायां। छांदसः शपो लुक् ॥ गात्रं गात्रमस्यानूनं कृणुतादिति प्रैषात् ॥

॥ अथैकोनविंशी ॥

एकस्त्वष्टुरश्वस्या विशस्ता द्वा यंतारा भवतस्तथ ऋतुः।
या ते गात्राणामृतुथा कृणोमि ताता पिंडानां प्र जुहोम्यग्नौ ॥ १९ ॥

एकः। त्वष्टुः। अश्वस्य। विऽशस्ता। द्वा। यंतारा। भवतः। तथा। ऋतुः।
या। ते। गात्राणां। ऋतुऽथा। कृणोमि। ताऽता। पिंडानां। प्र। जुहोमि। अग्नौ ॥ १९ ॥

त्वष्टुरस्य दीप्तस्याश्वस्य विशस्ता विशनस्य कर्ता एकः। एक एव। स कः। ऋतुः। एतदुपलक्षितः कालात्मा। तस्यैव सर्वेषामपि पर्यवसितृत्वात्। यद्वा ऋतुर्निःशंकं विशसनाय गंता शमिता। तथा द्वा यंतारा नियमयितारावहोरात्रे देवौ द्यावापृथिव्यौ वा ऋत्विक्षु भवतः ॥ तथा ऋतुरित्यत्र ऋत्यक इति प्रकृतिभावो ह्रस्वत्वं च ॥ हे अश्व ते तव गात्राणां मध्ये या यानि हृदयाद्यवयवानि ऋतुथा काले कृणोमि। छिनद्मि। संपादयामि। पिंडानां मध्ये ता ता तानि तानि प्रज्ञानानुरोधेनाग्नौ जुहोमि। प्रकर्षेण हुतं करोमि ॥

॥ अथ विंशी ॥

मा त्वा तपत्प्रिय आत्मापियंतं मा स्वधितिस्तन्व१ आ तिष्ठिपत्ते।
मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः ॥ २० ॥

मा। त्वा। तपत्। प्रियः। आत्मा। अपिऽयंतं। मा। स्वऽधितिः। तन्वः। आ। तिस्थिपत्। ते।
मा। ते। गृध्नुः। अविऽशस्ता। अतिऽहाय। छिद्रा। गात्राणि। असिना। मिथु।
करिति कः ॥ २० ॥

हे अश्व त्वा त्वामपियंतं देवान्प्रति गच्छंतं प्रिय आत्मा भोगायतनत्वात्तव प्रियतरो देहो मा तपत्। तप्तं मा कार्षीत्। वियोगजनिता व्यथा मा भूदित्यर्थः। स्वधितिः शस्त्रं ते तव तन्वस्तनूरंगानि मातिष्ठिपत्। त्वयि चिरमास्थितानि मा कार्षीत् ॥ स्थापयतेर्लुङि तिष्ठतेरिदितीत्वं ॥ तथा ते तव गात्राणि गृध्नुः केवलमांसग्रहणेप्सुरविशस्ता विशसनेऽकुशलः शमिताविहाय न्यूनातिरेकभावेन तत्तदंगमतिक्रम्य मध्ये मिथु मिथ्या व्यर्थमसिना छिद्रा छिद्राणि तिर्यक् छिन्नानि मा कः। मा कार्षीत् ॥ करोतेर्लुङि मंत्रे घसेति च्लेर्लुक्। गुणः। हल्ङ्याब्भ्य इति तलोपः ॥

॥ अथैकविंशी ॥

न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः ।
हरी ते युंजा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥ २१ ॥

न। वै। ऊं इति। एतत्। म्रियसे। न। रिष्यसि। देवान्। इत्। एषि। पथिऽभिः। सुऽगेभिः।
हरी इति। ते। युंजा। पृषती इति। अभूतां। उप। अस्थात्। वाजी। धुरि। रासभस्य ॥ २१ ॥

न वा उ नैव खल्वेतन्म्रियसे ॥ वाशब्द एवकारार्थः। उ इत्यवधारणे ॥ नैवेदानीमितराश्ववन्मृतो भवसि। देवत्वप्राप्तेर्वक्ष्यमाणत्वात्। अत एव न रिष्यसि। न हिंस्यसे। व्यर्थहिंसाया अभावात्। ननु प्रत्यक्षतो मृतिरवयवनाशश्च दृश्यते। कथमेवमुच्यत इति उच्यते। सुगेभिः पथिभिः शोभनगमनसाधनैर्मार्गैर्देवयानलक्षणैर्देवानिदेषि। देवानेव प्राप्नोषि। अतो युक्तैषोक्तिः। कैः साधनैरिति तत्राह। ते त्वां वोढुं हरी एतन्नामानाविंद्रस्याश्वौ ते तव युंजा। रथे युक्तावभूतां। भविष्यतः। आशंसारूपत्वाद्भूतार्थनिर्देशः। हरी इंद्रस्येति निरुक्तं। तथा पृषती पृषत्यौ मरुतां वाहनभूतौ युंजाभूतां। युक्तौ भविष्यतः। पृषत्यो मरुतामिति च निरुक्तं ॥ युजेर्ऋत्विगित्यादिना क्विन्। युजेरसमास इति नुम्। सुपां सुलुगित्याकारः ॥ तथा रासभस्याश्विवाहनस्यैतन्नामकस्याश्वस्य धुरि स्थाने वर्तमानः कश्चिद्वाज्युपास्थात्। उपस्थास्यति वहतीत्यर्थः। यद्वा रासभस्य भानोर्धुरि वर्त्मनि युक्तो वाज्यश्व उपस्थास्यति। देवत्वं गच्छतस्तव गमनायेंद्रादयः स्वस्ववाहनानि प्रेषयंतीत्यर्थः। यद्वा तत्तद्देवभावमापन्नं त्वां तानि तानि वाहनानि वहंति ॥

उपाकरणकालेऽवघ्राणावर्तने यद्यश्वो न कुर्यात् तदेषा नैमित्तिकी यजमा-

नवाचनार्था भवति। तथा च सूचितं। सुगव्यं नो वाजी स्वश्व्यमिति यजमानं वाचयेत्। आ० १०.८.। इति ॥

॥ सैषा सूक्ते द्वाविंशी ॥

सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ उत विश्वापुषं रयिं।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनतां हविष्मान् ॥ २२ ॥
सुऽगव्यं। नः। वाजी। सुऽअश्व्यं। पुंसः। पुत्रान्। उत। विश्वऽपुषं। रयिं।
अनागाःऽत्वं। नः। अदितिः। कृणोतु। क्षत्रं। नः। अश्वः। वनतां। हविष्मान् ॥ २२ ॥

वाज्यश्व आलभ्यमानो नोऽस्माकं सुगव्यं शोभनेन गोसमूहेन युक्तं विश्वापुषं रयिं विश्वस्य पोषकं धनं कृणोतु। करोतु ॥ खलगोरथात्। पा० ४.२.५०.। इति समूहार्थे यत्। छांदसमुत्तरपदाद्युदात्तत्वं। यद्वा सामूहिकस्याणः प्रसंगे सर्वत्र गोरजादिप्रत्ययप्रसंग इति यत्। तदंतस्याद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं ॥ तथा स्वश्व्यं शोभनाश्वसमूहयुक्तं। तथा पुंसः पुत्रान्। पुत्रशब्दः स्त्रीपुमपत्यसाधारणः। अतः पुमपत्यानीत्यर्थः। यद्वा पुंसो बध्वादीन् पुत्रान् पुरुरक्षकानात्मजान्। स्त्र्यपत्यानि पुमपत्यानि चेत्यर्थः। उत अपि च विश्वापुषं रयिं विश्वपोषणसमर्थं धनं। किंच नोऽस्मानदितिरदीनोऽश्वोऽनागास्त्वं कृणोतु। सर्वतो निष्पापत्वं करोतु। उक्तानां फलानां न्यूनातिरेकजनितपापक्षयाभावेऽसंभवादपापत्वं प्रार्थ्यते। किंच हविष्मान् हविर्भूतावयवोपेतोऽश्वो नोऽस्माकं क्षत्रं बलं क्षात्रं तेजो वनतां। संभजतां। कुरुतां ॥

॥ इति द्वितीयस्य तृतीये दशमो वर्गः ॥

यदक्रंद इति त्रयोदशर्चं सप्तमं सूक्तं दैर्घतमसं त्रैष्टुभं। अश्वस्य स्तूयमानत्वात्तद्देवत्यं। यदक्रंदः सप्तोनेत्यनुक्रमणिका ॥ आश्वमेधिके मध्यमेऽहन्युपाकरणायावस्थितमश्वमाद्याभिरेकादशभिः स्तौति। तथा च त्रीणि सुत्यानीति खंडे सूचितं। तमवस्थितमुपाकरणाय यदक्रंद इत्येकादशभिः स्तौत्यप्रणुवन्। आ० १०.८.। इति ॥

॥ तत्र प्रथमा ॥

यदक्रंदः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात्।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥ १ ॥

यत्। अक्रंदः। प्रथमं। जायमानः। उत्ऽयन्। समुद्रात्। उत। वा। पुरीषात्।
श्येनस्य। पक्षा। हरिणस्य। बाहू इति। उपऽस्तुत्यं। महि। जातं। ते। अर्वन्॥१॥

हे अर्वन् अरणकुशलाश्व ते तव जातं जन्म जननमुपस्तुत्यं। उपेत्य सर्वैः स्तोतव्यं॥ स्तौतेरेतिस्तुशास्विति क्यप्। ततस्तुक्॥ कथं स्तुत्यत्वमिति उच्यते। यद्यस्मात्समुद्रात्॥ अंतरिक्षनामैतत्। उदकसमुंदनापादानाद्यक्षगंधर्वादिसंमोदनाधिकरणाद्वांतरिक्षात्प्रथमं पूर्वं जायमान उत्पन्नः। यद्वा समुद्र आदित्यः समुंदनाद्वृष्ट्या। तस्माद्वा जायमानः। सूरादश्वं वसवो निरतष्टेति वक्ष्यमाणत्वात्। उत वा अथवा पुरीषात् सर्वकामानां पूरकादुदकात्प्रथममुद्यन् जायमानः। स तादृशस्त्वं यद्यस्मादक्रंदः। महाशब्दमकरोर्यजमानमनुग्रहीतुं। किंच ते पक्षा पतनसाधनौ पक्षौ श्येनस्य पक्षाविव। तौ यथा शीघ्रपतनसाधनौ तादृशावित्यर्थः। तव बाहू हरिणस्य बाहू इव। तौ यथा वेगवंतौ तादृशावित्यर्थः। यस्मादेवं तस्मात्ते जन्म स्तुत्यमित्यर्थः॥

॥ अथ द्वितीया ॥

यमेन दत्तं त्रित एनमायुनगिंद्र एणं प्रथमो अध्यतिष्ठत्।
गंधर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट॥२॥
यमेन। दत्तं। त्रितः। एनं। अयुनक्। इंद्रः। एनं। प्रथमः। अधि। अतिष्ठत्।
गंधर्वः। अस्य। रशनां। अगृभ्णात्। सूरात्। अश्वं। वसवः। निः। अतष्ट॥२॥

यमेन नियामकेनाग्निना दत्तमेनमश्वं त्रितः पृथिव्यादिषु त्रिषु स्थानेषु वर्तमानः स्तीर्णतमो वा वायुरयुनक्। रथे योजितवान्। किंचैनमश्वमिंद्रः प्रथमः प्रतमः प्रकृष्टतमः॥ प्रथम इति मुख्यनाम॥ अध्यतिष्ठत्। अधिष्ठितवान्। अस्य गंधर्वः सोमः। सोमेन समया विपृक्त इति वक्ष्यमाणत्वात्। स चास्याश्वस्य रशनां नियमनरज्जुमगृभ्णात्। अग्रहीत्। ईदृशोऽश्वः कुतः समुत्पन्न इति चेत् उच्यते। हे वसवो रश्मयो यूयं सूरादादित्यादश्वमेवं महानुभावं निरतष्ट। निःशेषेण साधु संपादितवंतः। यद्वा वसुशब्देनोक्ता एव यमादयः परामृश्यंते। हे वसवः स्वस्वव्यापारेण सर्वस्याच्छादयितारो यूयं सूरादादित्यादश्वमेनं निरतष्ट। अतक्षत॥ निरित्येष [illegible]त्येतस्य स्थाने। तक्षतिः करो[illegible]कर्मा। स च

क्रियासामान्यवचनः । अत्रौचित्याद्धारणे वर्तते । सम्यग्धारितवंत इत्यर्थः ॥ तक्षेर्लङि छांदसः शपो लुक्। स्कोः संयोगाद्योरिति कलोपः ॥

॥ अथ तृतीया ॥

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बंधनानि ॥ ३ ॥

असि । यमः । असि । आदित्यः । अर्वन् । असि । त्रितः । गुह्येन । व्रतेन ।
असि । सोमेन । समया । विऽपृक्तः । आहुः । ते । त्रीणि । दिवि । बंधनानि ॥ ३ ॥

हे अर्वन् त्वं यमोऽसि । नियमिताग्निरसि । तेन दत्तत्वात्तच्छब्दव्यपदेशः । तथादित्योऽसि । सूरान्निरतष्टेत्युक्तत्वात् । तथा गुह्येन व्रतेन गोपनीयेन दुर्दिनरूपेण वा कर्मणा सर्वत्र व्याप्तिरूपेणेत्यर्थः । तेन त्रितस्त्रिषु स्थानेषु तायमानो वायुरसि । त्रित एनमायुनगित्युक्तत्वात्तद्रूपत्वं । अथवा गुह्येन व्रतेन गोपनीयेन कर्मणा योगादिसाधनरूपेण त्रित एतन्नामक ऋषिरसि । किंच हे अश्व त्वं सोमेन समया सह विपृक्तः ॥ वीत्येष समित्येतस्मिन्नर्थे ॥ संपृक्तोऽसि तेन गृहीतत्वात् । हे अश्वैवंरूप ते तव दिवि द्युलोक आदित्ये वा वर्तमानस्य त्रीणि बंधनान्युत्पत्तिकारणान्याहुः पुराविदः । वसव आदित्यो द्युस्थानं चेति त्रीणि ॥

॥ अथ चतुर्थी ॥

त्रीणि त आहुर्दिवि बंधनानि त्रीण्यप्सु त्रीण्यंतः समुद्रे ।
उतेव मे वरुणश्छंत्स्यर्वन्यत्रा त आहुः परमं जनित्रं ॥ ४ ॥

त्रीणि । ते । आहुः । दिवि । बंधनानि । त्रीणि । अप्ऽसु । त्रीणि । अंतरिति । समुद्रे ।
उतऽइव । मे । वरुणः । छंत्सि । अर्वन् । यत्र । ते । आहुः । परमं । जनित्रं ॥ ४ ॥

पूर्वं दिवि त्रीणि बंधनानीत्युक्तं । इदानीं स्थानत्रयेष्वपि त्रीणि बंधनानीत्याह । हे अर्वन् ते तव दिवि संबंधनानि त्रीण्याहुः । तानि पूर्वमुक्तानि । अप्सु । अबुपजीवितत्वाद्भूलोकोऽप्यप्शब्देनाभिधीयते । पृथिव्यां त्रीणि बंधनान्याहुः । अन्नं स्थानं वीजमिति त्रीणि । तथा समुद्रेऽंतः समुद्रमध्ये समुद्द्रवणादपादानात्समुद्रमंतरिक्षं । तस्मिन् त्रीणि वृष्ट्युत्पत्तिनिमित्तानि मेघो विद्युत् स्तनितमिति । उतेव । इवशब्दश्चार्थे । अपि च हे अर्वन् अश्व वरुणः पापस्य वारकः फलस्यावर्ज-

यिता वा त्वं मे मह्यं छंसि। कथयसि। किं कथयसीति चेत् उच्यते। ते तव परमं जनित्रं निरतिशयं जन्म ॥ जनेरौणादिक इत्रप्रत्ययः ॥ यत्र येषु त्रिषूक्तेषु स्थानेष्वाहुः। कथयंति। यद्वा यत्र यस्मिन्नादित्ये परमं जनित्रमाहुः। सूरादश्वं वसवो निरतष्टेत्युक्तत्वात्। तादृशं प्रशस्यं जन्म यज्ञसाधनभावेन कथयसीत्यर्थः ॥

॥ अथ पंचमी ॥

इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधाना।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षंति गोपाः ॥ ५ ॥
इमा। ते। वाजिन्। अवऽमार्जनानि। इमा। शफानां। सनितुः। निऽधाना।
अत्र। ते। भद्राः। रशनाः। अपश्यं। ऋतस्यं। याः। अभिऽरक्षंति। गोपाः ॥ ५ ॥

हे वाजिन्नश्व ते संबंधीन्यवमार्जनान्यंगसंशोधकानि स्थानानीमा। इमान्युक्तानि द्युलोकादीनि। किंच सनितुर्यागसंभक्तुस्तवेमेमानि शफानां निधानानि स्थानानि। संचारप्रदेशा इत्यर्थः। किंचात्रैव ते तव भद्रा भंदनीयाः कल्याणा रशना ग्रीवादिषु संयुक्ता रज्जूरत्रापश्यं। एषूक्तेषु स्थानेष्वपश्यं। रशना विशेष्यंते। या गोपा गोपयित्र्यो रशना ऋतस्य सत्यभूतस्य यज्ञसाधनस्य वाश्वस्य ॥ कर्मणि षष्ठी ॥ ऋतमभिरक्षंति। अभितः पालयंति। ता अपश्यं। दृष्टवानस्मि। यद्वा इमा ते तवावमार्जनान्यंगप्रक्षालनसाधनान्युदकानि इमानि सनितुस्तव शफानां निधानानि देवयजनभूमयः संचारप्रदेशा वा। अत्रास्मिन्देवयजनस्थाने या रशना गोपास्तव पालयितारो राजपुरुषा ऋत्विजो वा ऋतस्य संबंधिनोऽभिरक्षंति ता अपश्यं ॥

॥ इति द्वितीयस्य तृतीय एकादशो वर्गः ॥

॥ अथ षष्ठी ॥

आत्मानं ते मनसारादजानामवो दिवा पतयंतं पतंगं।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥ ६ ॥
आत्मानं। ते। मनसा। आरात्। अजानां। अवः। दिवा। पतयंतं। पतंगं।
शिरः। अपश्यं। पथिऽभिः। सुऽगेभिः। अरेणुऽभिः। जेहमानं। पतत्रि ॥ ६ ॥

हे अश्व ते तवात्मानं शरीरं मनसास्मदीयेन प्रकृष्टगमनवता चेतसाराद्-

तिदूरे स्थितमजानां । जानामि । अतिव्याप्तं भावयामीत्यर्थः । कथं । अवः । अवस्तात् । सामर्थ्याद्भूमेः । भूमिमारभ्य दिवांतरिक्षेण मार्गेण पतंगमादित्यं पतयंतं गच्छंतं व्याप्नुवंतं । यद्वा यतो दिवांतरिक्षेण मार्गेण दिवि वा पतयंतं गच्छंतं पतंगमादित्यमवः । आवः । व्याप्नोषि । अतो व्याप्तं जानामि । किंच शिरोऽपश्यं । तव शिर एवं पश्यामि । कथं । सुगेभिः शोभनगमनसाधनैररेणुभिरपापैः पथिभिर्मार्गैः । आदित्यमंडलादप्युपरिभूतैः सत्यलोकमार्गैरित्यर्थः । तत्र प्रतिबंधाभावान्मार्गाणामुक्तरूपत्वं । तथाविधैस्तैर्जेहमानमुपर्युपरि व्याप्नुवत् पतत्रि पतनवत् शिरोऽपश्यं । भावयामि । एवं लोकत्रयव्याप्तं भावयामीत्यर्थः । यद्वा ते आत्मानमेवं भावयामि मनसा दिवा द्योतनात्मकेनांतरिक्षमार्गेण दिवः सकाशाद्वावोऽवस्तादवाङ्मुखं पतयंतं यागदेशं प्रति व्याप्नुवत् अत एव पतंगं पतनशीलमधःपतदादित्यसदृशं वा । एवं तव शिरो भावयामीत्यर्थः । शिरश्चैवमपश्यं । उक्तरूपैर्देवयजनमार्गैर्जेहमानं । यज्ञदेशं व्याप्नुवत् पतत्रि शीघ्रगामि शिरः पश्यामि । यद्यप्यात्मशब्देन सशिरस्कं शरीरमुक्तं तथापि देहात्पूर्वं शिरसो दृश्यमानत्वात् पृथगभिधीयते ॥

॥ अथ सप्तमी ॥

अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।
यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः ॥ ७ ॥
अत्र । ते । रूपं । उत्ऽतमं । अपश्यं । जिगीषमाणं । इषः । आ । पदे । गोः ।
यदा । ते । मर्तः । अनु । भोगं । आनट् । आत् । इत् । ग्रसिष्ठः । ओषधीः । अजीगरिति ॥ ७ ॥

एवं गमनानंतरं हे अश्व ते तवोत्तममुक्तरूपेणोत्कृष्टतमं रूपमत्रास्मिन्यागदेशेऽपश्यं । पश्यामि । कीदृशं । गोर्भूम्याः पदे स्थाने देवस्थाने देवयजनप्रदेश आजिधावनस्थाने वेषः ॥ कर्मणि षष्ठी ॥ इषमिष्यमाणमन्नमन्नानि वा आ सर्वतो जिगीषमाणं । गंतुमिच्छंतं । हे अश्व ते तव यदा मर्तो मनुष्यो भोगं भोक्तव्यमन्नमन्वानट् ॥ नशतिर्गतिकर्मा ॥ अनुक्रमेण समीपं गमयति । आदित् अनंतरं तदानीमेव तदनुग्रहाद्विलंबमकृत्वा ग्रसिष्ठो महातृष्णयेव ग्रसितृतमो भक्षयितृतमः सन् ओषधीरन्नान्यजीगः । गिरसि । भक्षयसि । महानुभावोऽपि त्वं लौकिकाश्ववत्तुच्छेन पुरुषेण दीयमानं स्वल्पं भक्ष्यमनुग्रहात्स्वीकरोषीत्यर्थः ॥

॥ अथाष्टमी ॥

अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनां।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ॥ ८ ॥

अनु। त्वा। रथः। अनु। मर्यः। अर्वन्। अनु। गावः। अनु। भगः। कनीनां।
अनु। व्रातासः। तव। सख्यं। ईयुः। अनु। देवाः। ममिरे। वीर्यं। ते ॥ ८ ॥

इदानीं कृत्स्नस्य लोकस्यापि मुख्य इति प्रतिपादयति। हे अर्वन् गमनशीलाश्व त्वा त्वामनु अनुसृत्य रथो गच्छति। ततः पुरतोऽश्वस्य गमनात्। तथा मर्यो मर्त्यस्त्वा त्वामनु॥ जात्येकवचनं॥ अनु गावः। गावोऽपि त्वामनुगच्छंति। तथा कनीनां कन्यकानां स्त्रीणां भगो भाग्यं सौंदर्यं त्वद्गमनु। तथा व्रातासो व्राताः संघात्मका अन्येऽश्वसमूहा वस्वादिदेवगणा वा त्वामनु अनुसृत्य तव सख्यमीयुः। सखिभावं गच्छंति। देवा ऋत्विजो द्योतमाना देवा वा त्वामनुसृत्य ते वीर्यं वीरकर्म ममिरे। स्तुत्या मांति। अतः सर्वोऽपि त्वामनुसरः त्वं तु सर्वस्य श्रेष्ठ इत्यर्थः॥

॥ अथ नवमी ॥

हिरण्यशृंगोऽयो अस्य पादा मनोजवा अवर इंद्र आसीत्।
देवा इदस्य हविरद्यमायन्यो अर्वंतं प्रथमो अध्यतिष्ठत् ॥ ९ ॥

हिरण्यऽशृंगः। अयः। अस्य। पादाः। मनःऽजवाः। अवरः। इंद्रः। आसीत्।
देवाः। इत्। अस्य। हविःऽअद्यं। आयन्। यः। अर्वंतं। प्रथमः। अधिऽअतिष्ठत् ॥ ९ ॥

अयमश्वो हिरण्यशृंगो हितरमणीयशृंगो वा। उन्नतशिरस्को हृदयरमणशृंगस्थानीयशिरोरुहो वा। अस्य पादा अयः। अयोमयाः। अयःपिंडसदृशा इत्यर्थः। तथा मनोजवा मनोवेगाः। अथवैतदिंद्रविशेषणं। ईदृशस्याश्वस्य सामर्थ्यं प्रति मनोवेग इंद्रोऽप्यवरो निकृष्ट आसीत्। किंचास्याश्वस्य हविरद्यं हविषोऽदनं भक्षणं॥ स्वार्थिको यत्॥ अदनयोग्यं हविर्वापेक्ष्य देवा इत् सर्वेऽपि देवा आयन्। प्राप्ताः। य इंद्रोऽर्वंतं प्रथमः प्रथमभावी सन् अध्यतिष्ठत्। अधिष्ठितवान्। सहविष्ट्वेन स्वकीयत्वेन वाश्रितवानित्यर्थः। इंद्र एणं प्रथमो अध्यतिष्ठदिति ह्युक्तं॥

॥ अथ दशमी ॥

ई॒र्मान्ता॑सः॒ सिलि॑कमध्यमासः॒ सं शूर॑णासो दि॒व्यासो॒ अत्याः॑ ।
हं॒सा इ॑व श्रेणि॒शो य॑तन्ते॒ यदाक्षि॑षुर्दि॒व्यमज्म॒मश्वाः॑ ॥ १० ॥

ई॒र्मऽअ॑न्तासः । सिलि॑कऽमध्यमासः । सं । शूर॑णासः । दि॒व्यासः॑ । अत्याः॑ ।
हं॒साःऽइ॑व । श्रे॒णि॒ऽशः । य॒त॑न्ते॒ । यत् । आक्षि॑षुः । दि॒व्यं । अज्म॑ं । अश्वाः॑ ॥ १० ॥

अत्राश्वसमूहस्तुतिद्वारेणायं स्तूयते। ईर्मांतासः। ईरिताः प्रेरिता अंता येषां ते तथोक्ताः। विरलांता इत्यर्थः। सिलिकमध्यमासः। संसृताः संगता मध्यप्रदेशा येषां ते तथोक्ताः। मध्ये निविडा इत्यर्थः। अथवा शरीरस्यैते विशेषणे। ईर्म ईरितः पुरतो नुन्न इत्यर्थः। तादृशः पृथुरंतो जघनप्रदेशो येषां ते तादृशाः। तथा सिलिकमध्यमासः। संसृतः संगतः संलग्नो मध्यभागो येषां ते तादृशाः। पुष्टत्वात्प्रौढपृष्ठाः संलग्नमध्याश्चेत्यर्थः। जघनपुरोभागावपेक्ष्य सिलिकमध्यमा इत्युक्तं। समित्ययमुपसर्गो यतंत इत्याख्यातेन संबंधयितव्यः। शूरणासो विक्रमशीला दिव्यासो दिवि भवा अत्या अतनशीलाः। यद्यप्ययमश्वनाम तथाप्यश्वशब्दस्य वक्ष्यमाणत्वादयं यौगिकोऽवगंतव्यः। ईदृशा अश्वाः श्रेणिशः। एकव्यापाराणां बहूनां समूहः श्रेणिरित्युच्यते। शीघ्रधावनाय श्रेणिशः पंक्तीभूय संयतंते। सम्यक् यत्नं कुर्वंति। तत्र दृष्टांतः। हंसा इव। ते यथा श्रेणीभूता ईर्मांतास इत्याद्युक्तरूपाः संतोऽंतरिक्षे गमनाय यतंते तद्वत्। कदा। उच्यते। यत् यदाश्वा दिव्यमज्मं गमनं गंतव्यं वा मार्गमाक्षिषुः। व्याप्नुवंति। तदा॥ अयं मंत्रो यास्केनैवं व्याख्यातः। ईर्मांताः समीरितांताः पृथ्वंता वा सिलिकमध्यमाः संसृतमध्यमाः शीर्षमध्यमा वा अपि वा शिर आदित्यो भवति यदनुशेते सर्वाणि भूतानि मध्ये चैषां तिष्ठति। इदमपीतरच्छिर एतस्मादेव समाश्रितान्येतदिंद्रियाणि भवंति। सं शूरणासो दिव्यासो अत्याः। शूरः शवतेर्गतिकर्मणो दिव्या दिविजा अत्या अतनाः। हंसा इव श्रेणिशो यतंते। हंसा हंतेर्घ्नंत्यध्वानं। श्रेणिश इति श्रोणः श्रयतेः समाश्रिता भवंति। यदाक्षिषुर्यदापुर्दिव्यमज्ममजनिमाजिमश्वाः। नि॰ ४. १३.। इति॥

॥ इति द्वितीयस्य तृतीये द्वादशो वर्गः ॥

॥ अथैकादशी ॥

तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वात इव ध्रजीमान्।
तव शृंगाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरंति ॥ ११ ॥
तव। शरीरं। पतयिष्णु। अर्वन्। तव। चित्तं। वातःऽइव। ध्रजीमान्।
तव। शृंगाणि। विऽस्थिता। पुरुऽत्रा। अरण्येषु। जर्भुराणा। चरंति ॥ ११ ॥

हे अर्वन् तव शरीरं पतयिष्णु पतनशीलं व्याप्तमित्यर्थः। तथा तव चित्तं मनो वात इव ध्रजीमान्। शीघ्रगमनवायुरिव। तद्वच्छीघ्रगमनानुकूलमित्यर्थः। किंच तव शृंगाणि शिरसो निर्गताः शृंगस्थानीयाः केशाः पुरुत्रा पुरुषु बहुषु प्रदेशेषु विष्ठिता विष्ठितानि। विविधं स्थिताः। किंच त एवारण्येषु जर्भुराणा मनोहराणि पूर्यमाणानि वा। एवंभूताः केशाश्चरंति। यद्वाचाश्वस्य शृंगाभावात् तद्वदुन्नतानि तेजांसि परिगृह्यंते ॥

आश्वमेधिके मध्यमेऽहन्यध्रिगुप्रैषे मा नो मित्र इति सूक्तानंतरमुप प्रागाच्छसनमिति द्वे ऋचौ शंसनीये। सूत्रितं च। उप प्रागाच्छसनमिति द्वे। आ॰ १०.८.। इति ॥

॥ सैषा सूक्ते द्वादशी ॥

उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः।
अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यंति रेभाः ॥ १२ ॥
उप। प्र। अगात्। शसनं। वाजी। अर्वा। देवद्रीचा। मनसा। दीध्यानः।
अजः। पुरः। नीयते। नाभिः। अस्य। अनु। पश्चात्। कवयः। यंति। रेभाः ॥ १२ ॥

अयमर्वारणकुशलो वाज्यश्वः शसनं विशसनस्थानमुपप्रागात्। उपप्रैति। किं कुर्वन्। देवद्रीचा मनसा देवान् गच्छता मनसा दीध्यानो ध्यायन्। कदा देवानस्मदवयवेनार्चामि देवत्वं प्राप्नोमीति वा मनसि ध्यायन्। किंचास्य पुरः पुरस्तान्नाभिर्नहनं। बंधुभूत इत्यर्थः। यद्वास्य बंधनस्थानीयोऽविमुक्तत्वात्। एवंभूतोऽजः पुरो नीयते। पुरतः प्राप्यते। अनु अनुसृत्य पश्चात् अनंतरं। अत्र यद्यप्युभयोः पर्यवसितोऽर्थ एक एव। तथाप्यजाश्वोभयानंतर्यत्वप्रकटनाय पदद्वयं। यद्वा अन्विति क्रियया संबध्यते। कवयोऽनूचाना रेभाः स्तोतार ऋत्विजो यंति। गच्छंति।

ये वा अनूचानास्ते कवय इति श्रुतेः। यद्वा कवय इति मेधाविनाम कविर्मनीषीति तन्नामसु पठितत्वात्। रेभ इति स्तोतृनाम रेभो जरितेति तत्र पाठात्॥

॥ अथ त्रयोदशी ॥

उप प्रागात्परमं यत्सधस्थमर्वाँ अच्छा पितरं मातरं च ।
अद्या देवाञ्जुष्टतमो हि गम्या अथा शास्ते दाशुषे वार्याणि ॥ १३ ॥
उप । प्र । अगात् । परमं । यत् । सधऽस्थं । अर्वान् । अच्छ । पितरं । मातरं । च ।
अद्य । देवान् । जुष्टऽतमः । हि । गम्याः । अथ । आ । शास्ते । दाशुषे । वार्याणि ॥ १३ ॥

अर्वानरणकुशलोऽयमश्व उपप्रागात्। उपगच्छति। किं। यत् परममुत्कृष्टं सधस्थं सहस्थानं सुकृतिभिरेकत्रनिवासयोग्यं स्वर्गाख्यं यदस्ति तत्। किमर्थं। पितरं मातरं चाच्छ आभिमुख्येन प्राप्तुं। हे अश्वाद्यास्मिन्काले जुष्टतमः प्रीततमः स्वर्गं प्राप्नोमीति हर्षयुक्त इत्यर्थः। एवंभूतो देवान् गम्याः। गच्छेः। हिशब्दो यज्ञ उपयुक्तस्य पशोः स्वर्गप्राप्तेः सगर्भ्यो नु सखा सयूथ्य इत्यादिमंत्रांतरप्रसिद्धिद्योतनार्थः। अथानंतरं यजमान आशास्ते। कस्मै। दाशुषे। हविर्दत्तवते स्वस्मै। कानि। वार्याणि। वरणीयानि धनानि। यद्वा पुरुषस्य व्यत्ययः। आशास्ते प्रार्थये यजमानार्थं॥

॥ इति द्वितीयस्य तृतीये त्रयोदशो वर्गः ॥

अस्य वामस्येति द्विपंचाशदृचमष्टमं सूक्तं दैर्घतमसं। अत्रेयमनुक्रमणिका। अस्य द्विपंचाशत् अल्पस्तवं त्वेतत्संशयोत्थापनप्रश्नप्रतिवाक्यान्यत्र प्रायेण ज्ञानमोक्षाक्षरप्रशंसा च पंचपादं साकंजानां यज्ञायत्रेऽयं स शिंक्ते सप्तार्द्धगर्भा गौरीरिति जगत्यः। एतदंतं तु वैश्वदेवं तस्याः समुद्रा इति वाचः समुद्रा आपोऽक्षरं सा प्रस्तारपंक्तिः शकमयमिति शकधूम उक्षाणं पृश्निमिति सोमस्त्रयः केशिन इत्यग्निः सूर्यो वायुश्च केशिनश्चत्वारि वाग्वाच इंद्रं मित्रं सौर्यो द्वादशेति संवत्सरसंस्थं कालचक्रवर्णनं यस्ते सरस्वत्यै यज्ञेन साध्येभ्यः परानुष्टुप्सौरी पर्जन्याग्निदेवता वांत्या सरस्वते सूर्याय वेति॥ अत्र स्तुत्याबहुत्वेन स्तुतिभागस्याल्पीयस्त्वादिदं सूक्तमल्पस्तवनं। न सूक्तांतरवद्बहुस्तवं। इदमेव वैलक्षण्यं तुशब्देन द्योत्यते। अस्मिन्सूक्ते प्रायेण संशयोत्थापनादयो बहवोऽर्थाः प्रतिपाद्यंते। अचिकित्वाञ्चिकितुष इत्यनया संशय उत्थाप्यते। पृच्छामि त्वेत्यत्र प्रश्नः प्रतीयते।

इयं वेदिरित्यत्र प्रतिवचनं। य ईं चकारेत्यादिना ज्ञानप्रशंसा प्रतिपाद्यते। अपश्यं गोपामित्यादिना ब्रह्मसाक्षात्काररूपस्य प्रशंसा। न क्षरतीत्यक्षरं ब्रह्म। द्वा सुपर्णेत्यादिना तस्य प्रशंसा। पंचपादं पितरं साकंजानां सप्तथं यन्नायत्रे अधि अयं स शिंक्ते सप्तार्द्धगर्भा गौरीर्मिमायेति षट् जगत्यः। समानमेतदित्यनुष्टुप्। तस्याः समुद्रा इति प्रस्तारपंक्तिः। तल्लक्षणं छंदोग्रंथे सूचितं। प्रस्तारपंक्तिः पुरत इति। पुरतः पूर्वार्द्धे द्वादशाक्षरौ जागतौ पादौ ततो द्वावष्टाक्षरौ गायत्रौ सा प्रस्तारपंक्तिरिति सूत्रार्थः। अनुक्रमण्यामप्युक्तं। आद्यौ चेत्प्रस्तारपंक्तिरिति। शिष्टा अनादेशपरिभाषया त्रिष्टुभः। गौरीर्मिमायेत्येतदंतानां विश्वे देवा देवता। तस्याः समुद्रा इत्यस्याः पूर्वार्द्धस्य वाग्देवता। उत्तरार्द्धस्यापः। शकमयमित्यस्याः पूर्वार्द्धस्य शकधूमः। उक्षाणं पृश्निमित्युत्तरार्द्धस्य सोमो देवता। त्रयः केशिन इत्यस्या अग्निसूर्यवायवः। चत्वारि वागित्येषा वाग्देवताका। इंद्रं मित्रं वरुणं कृष्णं नियानमित्येते सूर्यदेवते। द्वादश प्रधय इत्यस्याः संवत्सरात्मा कालो देवता। यस्ते स्तन इत्यस्याः सरस्वती। यज्ञेनेत्यस्याः साध्या देवता। समानमेतदित्यस्याः सूर्यः पर्जन्यो वाग्नयो वा देवता। दिव्यं सुपर्णमित्यस्याः सरस्वान् सूर्यो वा देवता॥ कृत्स्नसूक्तस्य विनियोगं शौनक आह। स्तेयं कृत्वा द्विजो मोहात्त्रिरात्रोपोषितः शुचिः। सूक्तं जप्त्वास्यवामीयं क्षिप्रं मुच्येत किल्बिषादिति। ऋग्वि॰ १. २६.॥ महाव्रते वैश्वदेवशस्त्रे वैश्वदेवं निविद्धानं द्विप्रतीकं तत्रास्य वामस्येत्यादिकमेकचत्वारिंशदृचं प्रथमं प्रतीकं। पंचमारण्यके सूचितं। अस्य वामस्य पलितस्य होतुरिति सलिलस्य दैर्घतमस एकचत्वारिंशतं। ऐ॰ आ॰ ५. १३.। इति॥

॥ तत्र प्रथमा ॥

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः।
तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रं॥ १॥

अस्य। वामस्य। पलितस्य। होतुः। तस्य। भ्राता। मध्यमः। अस्ति। अश्नः।
तृतीयः। भ्राता। घृतऽपृष्ठः। अस्य। अत्र। अपश्यं। विश्पतिं। सप्तऽपुत्रं॥ १॥

अत्र द्वितीयपादे तच्छब्दश्रुतेः प्रथमपादे प्रतिविशेषणं योग्यक्रियार्थसंबद्धो यच्छब्दोऽध्याहार्यः। योऽयं दिवि द्योतते तस्यास्य वामस्य वननीयस्य संभजनीयस्यारोग्यार्थिभिः सर्वैः सेवनीयस्य पलितस्य पालयितुः प्रकाशवृष्ट्यादिप्र-

दानेन पालकस्य। तथा योऽयं दिवि द्योतते तस्यास्य होतुर्ह्वातव्यस्याह्वानार्हस्यादित्यस्य मध्यमो मध्यमस्थानः। मध्ये भवो वायुरुच्यते। आदित्याग्नी अपेक्ष्यास्य मध्यमत्वं। स चाश्नः सर्वत्र व्याप्तः। न हि वायुरहितः कश्चित्प्रदेशोऽस्ति। तादृशो भ्रातास्ति। भ्रातृस्थानीयो भवति। यथा लोके भ्राता पितृधनस्य भागं हरति तद्वत्। मध्यस्थानमंतरिक्षलोकं हरतीति वा। वृष्ट्यर्थं रश्मिभिराहृतानां भौमानां रसानां हरणाद्वा भ्रातेत्युच्यते। पित्र्येण धनेन स्वार्जितेन वा भर्तव्यो भवतीति भ्राता। मध्यमो वायुरपि वृष्ट्यर्थं रसैर्भर्तव्यो भवति। किंच घृतपृष्ठः। घृतमाहुतिलक्षणं पृष्ठे यस्य तादृशो भ्राता तस्य तृतीयोऽस्ति। भवति। त्रयाणां पूरणस्तृतीयः। उक्तोभयापेक्षया तृतीयत्वं। भ्रातृत्वं प्रतिपादितप्रकारेणात्रापि द्रष्टव्यं। रात्रौ सवितुस्तेजोभागस्य हरणात्। दिवा स्वकीयतेजसो भागस्य तदर्थमेव भक्तव्यत्वाद्वा भ्रातृत्वं। अत्रैषु भ्रातृषु मध्ये पुरोदेशे वा विश्पतिं विशां प्रजानां पालयितारं सप्तपुत्रं सर्पणरश्मिपुत्रोपेतं। ऐतिहासिकपक्षेऽदितिः पुत्रकामेति प्रस्तुते मित्रवरुणादिष्वदितिपुत्रेष्वस्यादित्यस्य सप्तमपुत्रत्वं। ईदृशं महानुभावमादित्यमपश्यं। अद्राक्षं। भावनयात्मत्वेन साक्षात्करोमीत्यर्थः। तद्योऽहं सोऽसौ योऽसौ सोऽहमिति श्रुतिः॥ एवं वा। अस्य वामस्य विश्वस्योद्गरितुः। स्रष्टुरित्यर्थः। पलितस्य पालयितुः स्वसृष्टजगत्पालनशीलस्य होतुरादातुः। स्वस्मिन्संहर्तुरित्यर्थः। परमेश्वरस्य सृष्ट्यादिकर्तृत्वं श्रुतिस्मृतिपुराणादिषु प्रसिद्धं। तस्य तादृशस्य परमेश्वरस्य भ्राता तद्भागहारी तदंशभूतः सूत्रात्मा मध्यमः सर्वत्र मध्ये वर्तमानोऽस्ति। जगद्धारकत्वेन वर्तते। स चाश्नो व्यापनशीलः। वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संरब्धानीति श्रुतेः। वक्ष्यमाणविराडपेक्षया वा मध्यमत्वं। किंचास्य परमेश्वरस्य तृतीयो घृतपृष्ठः। घृतमित्युदकनाम। तेन तत्कार्यं शरीरमुच्यते। तदेव पृष्ठं स्पर्शकं वा यस्य स तादृशः॥ पृष्ठं स्पृशतेरिति निरुक्तं॥ यद्वा प्रदीप्तपृष्ठः। पृष्ठशब्दः कृत्स्नशरीरोपलक्षकः। प्रकाशितशरीराभिमानीत्यर्थः। न त्वयं सूक्ष्मशरीराभिमानिसूत्रात्मवत्स्पर्शनाविषयो भवति। अत्रैषु मध्ये विश्पतिं विशां प्रजानां पतिं। उपलक्षणमेतत्। सर्वस्य पतिमित्यर्थः। सर्वस्य पतिः सर्वस्येशान इति श्रुतेः। सप्तपुत्रं सप्त लोकाः पुत्रा यस्य तादृशं। स्वमायया सृष्टसर्वलोकमित्यर्थः। अपश्यं। पश्येयं। साक्षात्करामीत्यर्थ॥ अयमर्थः। स्वाधीनमायाजगत्कारणभूतः परमेश्वर एकः। तत उत्पन्नौ स्थूलसूक्ष्मशरीरा-

भिमानिनौ द्वौ विराट्सूत्रात्मानौ। तेषु मध्ये द्वयोः साक्षात्कारेण मोक्षाभावात् सृष्ट्यादिकारणं परमेश्वरं ज्ञेयत्वेन प्रसिद्धं श्रवणमननादिसाधनेन साक्षात्करोमीत्यर्थः ॥ एवमुत्तरत्राप्यध्यात्मपरतया योजयितुं शक्यं। तथापि स्वरसत्वाभावाद्ग्रंथविस्तरभयाच्च न लिख्यते। यत्र द्वा सुपर्णेत्यादौ स्फुटमाध्यात्मिको ह्यर्थः प्रतीयते तत्र प्रतिपादयामः। अयं मंत्रो यास्केन व्याख्यातः। अस्य वामस्य वननीयस्य पलितस्य पालयितुरित्यादिना। तच्च व्याख्यानमत्रानुसंधेयं। नि° ४. २६.॥

॥ अथ द्वितीया ॥

सप्त युंजंति रथमेकचक्रमेको अश्वो वहति सप्तनामा।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥ २ ॥

सप्त। युंजंति। रथं। एकऽचक्रं। एकः। अश्वः। वहति। सप्तऽनामा।
त्रिऽनाभि। चक्रं। अजरं। अनर्वं। यत्र। इमा। विश्वा। भुवना। अधि। तस्थुः ॥ २ ॥

एकचक्रमेकरथांगोपेतं। यद्यपि त्रीणि चक्राणि तथापि तेषामेकरूपत्वादेकचक्रमित्युच्यते। रथं रंहणस्वभावं सूर्यस्य संबंधिनं सप्तैतत्संख्याका अश्वा युंजंति। अनुबध्नंति। वहंत्यहोरात्रनिर्वाहाय। किं वस्तुतः सप्त नेत्याह। एकोऽश्वः सप्तनामा। एक एव सप्ताभिधानः सप्तधा नमनप्रकारो वा। एक एव वायुः सप्तरूपं धृत्वा वहतीत्यर्थः। वायुधीनत्वादंतरिक्षसंचारस्य। एकचक्रमित्युक्तं कीदृशं तदित्यत आह। त्रिनाभि। वलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतं। अजरं। अमरणधर्मकं। अनर्वं। अशिथिलं। पुनस्तदेव विशेष्यते। यत्र यस्मिञ्चक्र इमा विश्वा भुवना इमानि प्रसिद्धानि सर्वाणि भूतजातान्यधि आश्रित्य तस्थुः। तिष्ठंति। यद्वा एकचक्रमेकचारिणमसाहाय्येन संचरंतं रथमादित्यमंडलं सप्त युंजंति। सर्पणस्वभावाः सप्तसंख्या वा रश्मयः सप्तप्रकारकार्या असाधारणाः परस्परविलक्षणाः षडृतवः। एकः साधारण इत्येवं। अथवा मासद्वयात्मकाः षट् अपरोऽधिकमासात्मक इत्येवं सप्तर्तवो युंजंति। एतस्य कार्यं निर्वहंतीत्यर्थः। स चैकोऽसहायोऽश्वो व्यापनशील आदित्यः सप्तनामा सप्त रसानां संनमयितारो रश्मयो यस्य तादृशः। सप्तऋषिभिः स्तूयमानो वादित्यो वहति। धारयति। भ्रमयतीत्यर्थः। किं। त्रिनाभि चक्रं। तिस्रो नाभिस्थानीयाः संध्याः संबद्धा वा त्रय ऋतवो यस्य तत्तादृशं। के ते। ग्रीष्मवर्षाहेमंताख्याः। यद्वा भूतभविष्यद्वर्तमा-

नाख्यास्त्रयः कालास्त्रिनाभयः। तद्विशिष्टं चक्रं चक्रवत्पुनःपुनः परिभ्रममाणं संवत्सराख्यं चक्रमजरममरणं। न हि कदाचिदपि कालो म्रियते। अनादिनिधनः काल इति स्मृतेः। अनर्वमप्रतिहतं। ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतमयमादित्यः पुनरावर्तयति। संवत्सरादर्वाचीनानां तत्रैवांतर्भावात् ततो युगादीनां तदावृत्तिसाध्यत्वात्संवत्सरस्य चक्रत्वेन निरूपणं। पुनः कीदृशं तत्। यत्र यस्मिंश्चक्र इमा विश्वा भुवना इमानि सर्वाणि भूतान्यधि तस्थुः। आश्रित्य तिष्ठंति। कालाधीनत्वात्सर्वस्य स्थितेः। ईदृशस्य कालस्य कारणभूतपरमेश्वरपरिज्ञानेन मोक्षसद्भावात् ज्ञानमोक्षाक्षरप्रशंसा चेत्यनुक्रमण्यामुक्तं॥ अयमपि मंत्रो यास्केन सप्त युंजंति रथमेकचक्रमेकचारिणमित्यादिना व्याख्यातः। तदत्राप्यनुसंधेयं। नि॰ ४.२७.॥

॥ अथ तृतीया ॥

इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहंत्यश्वाः।
सप्त स्वसारो अभि सं नवंते यत्र गवां निहिता सप्त नाम ॥ ३॥

इमं। रथं। अधि। ये। सप्त। तस्थुः। सप्तऽचक्रं। सप्त। वहंति। अश्वाः।
सप्त। स्वसारः। अभि। सं। नवंते। यत्र। गवां। निऽहिता। सप्त। नाम ॥ ३॥

इममुक्तस्वरूपमादित्यमंडलाख्यं संवत्सराख्यं वा रथं ये सप्त रश्मयोऽधितस्थुः। अधिष्ठिताः। संवत्सरपक्षेऽयनर्तुमासपक्षदिवसरात्रिमुहूर्ताख्याः सप्तावयवा अधितिष्ठंति। कीदृशं रथं। सप्तचक्रं। चकनाच्चरणात् क्रमणाद्वा चक्राणि रश्मयः। ते सप्त यस्य रथस्य तादृशमुभयविधं रथं पूर्वोक्ता अधिष्ठिता अश्वा व्यापनशीलाः सप्त वहंति। निर्वहंति च। तादृशं रथं सप्त स्वसारः स्वयंसरणाः। स्वरादित्यः। तेन सारिताः। परस्परं स्वसृभूता वा सप्तसंख्याका रश्मय ऋतवश्चाभिसंनवंते। आभिमुख्येन संगच्छंते। असाधारणाः परस्परविलक्षणकार्याः षडृतवः सर्वसाधारण एक इति सप्तत्वं। यद्वोक्तरूपा मासद्वयात्मकाः षट् त्रयोदशमासात्मकः सप्तम इति सप्तत्वं। कीदृशो रथ इति तदुच्यते। यत्र यस्मिन्रथ उभयविधे गवां वाचां स्तुतिरूपाणां सप्त सप्तविधानि नाम नमनानि सप्तस्वररूपाणि निहितानि। सप्तस्वरोपेतैः सामभिः स्तुत्यं रथमित्यर्थः। यद्वा गवामुदकानां सप्त सर्पणस्वभावानि नाम नमनानि यत्र यासु स्वसृषु निहिता। स्वसारः परस्परस्वसृभूता देवनद्योऽभिसंनवंते ॥

॥ अथ चतुर्थी ॥

को ददर्श प्रथमं जायमानमस्थन्वंतं यदनस्था बिभर्ति ।
भूम्या असुरसृगात्मा क्व स्वित्को विद्वांसमुप गात्प्रष्टुमेतत् ॥ ४ ॥
कः । ददर्श । प्रथमं । जायमानं । अस्थन्ऽवंतं । यत् । अनस्था । बिभर्ति ।
भूम्याः । असुः । असृक् । आत्मा । क्व । स्वित् । कः । विद्वांसं । उप । गात् । प्रष्टुं । एतत् ॥ ४ ॥

एवं प्रपंचस्य कालायत्ततां प्रतिपाद्य तस्य कारणभूतस्य परमेश्वरस्याविषयत्वमाह ॥ को ददर्श । को द्रष्टुं शक्नुयात् । कदा । प्रथमं । सृष्टेः पूर्वं । अव्याकृतावस्थायामित्यर्थः । किं । जायमानं । प्रथमभावविकारमापन्नं । उत्पद्यमानं प्रपंचमित्यर्थः । दुर्ज्ञेयत्वे हेतुमाह । यद्यस्मादस्थन्वंतमस्थिमंतं सशरीरं । उपलक्षणमेतत् । कार्यभावमापन्नमित्यर्थः । अनस्थास्थिरहिताशरीरा सांख्यप्रसिद्धा प्रकृतिर्वेदांतप्रसिद्धेश्वरायत्ता माया बिभर्ति । गर्भवदंतर्धारयति । अव्याकृतावस्थायामनस्थोऽशरीरः परमेश्वरो बिभर्ति । यदा केवलः परमेश्वरो मायासंवलितः सन् इदं जगन्निर्मितवानुत्पत्तिसमये देहादिसहितस्य कस्यचिदभावात्को ददर्श । तदानीं मनो नित्यमात्मा च नित्यः तत्संयोगात्कश्चिदात्मा जानानीति चेत् सोऽपि न संभवतीत्यत आह । भूम्याः संबंधि पार्थिवं स्थूलशरीरं । असुः प्राणः । तदुपलक्षितं सूक्ष्मशरीरं । असृक् शोणितं । एतत्सप्तधातूपलक्षकं । यद्यपि शरीरं पंचभूतात्मकं तथापि भूतद्वयप्रत्यक्षत्वात्तदपेक्षयोक्तं । आत्मा तैः संबद्धश्चेतनः क्व स्वित् । कुत्रास्ते । न कश्चिदस्तीत्यर्थः । नान्यत्किंचन मिषदिति श्रुतेः । विद्वांसं जगत्कारणविषयज्ञानवंतमन्यं गुर्वादिकमेतत्कारणं प्रष्टुं कः शिष्योऽल्पमतिरुपगात् । उपगच्छति । तादृशो देहेंद्रियसंघातरूप आत्मा तस्मिन्समये कुत्रास्ति । प्रष्टा प्रतिवक्ता चोभावपि नास्तीत्यर्थः । न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति श्रुतेः । यद्वा प्रथमं प्रथमभाविनं जगतः कारणभूतं को ददर्श । कः साक्षात्करोति । जायमानमस्थन्वंतं मनुष्यमनस्थिकः परमेश्वरः शारीरमशरीरो यद्यस्माद्बिभर्ति । द्रष्टुरपि तत्कार्यत्वादिति भावः । शिष्टं समानं ॥

॥ अथ पंचमी ॥

पाकः पृच्छामि मनसाविजानन्देवानामेना निहिता पदानि ।
वत्से बष्कयेऽधि सप्त तंतून्वि तत्निरे कवय ओतवा उ ॥ ५ ॥

पाकः। पृच्छामि। मनसा। अविऽजानन्। देवानां। एना। निऽहिता। पदानि।
वत्से। बष्कये। अधि। सप्त। तंतून्। वि। तत्निरे। कवयः। ओतवै। ऊं इति ॥५॥

पाकः पक्तव्योऽपक्वमतिरहं मनसा संस्कृतेनाविजानन् अतिगहनं तत्त्वं विशेषेण ज्ञातुमशक्नुवन् पृच्छामि। प्रश्नं करोमि। अज्ञाने कारणमाह। एना एनानि पदानि संदेहास्पदानि तत्त्वानि देवानां निहितानि। देवानामपि गूढानीत्यर्थः। यद्वा देवानां पदानि तत्त्वानि निधिवद्गोपयित्वा स्थापितानि। अतः पृच्छामि तत्त्वज्ञानोपयोगायेति शेषः। तानि कानीत्युच्यते। वत्से सर्वस्य निवासभूते बष्कये। बडिति सत्यनाम। तत्कषतीति बष्कय आदित्यः। यद्वा बष्कयो नामैकहायनो वत्सः। पुनरपि वत्सशब्दस्य पृथक् निर्देशाद्बष्कयशब्देन तत्कालमात्रं वक्ष्यते। तस्मिन्नादित्येऽधि अधिकं सप्त तंतून् तायमानान् सप्त सोमसंस्थान्कवयो मेधाविनो यजमाना ओतवै जगद्रूपतिर्यक्तंतून्वेतुं वितत्निरे। वितन्वंति। यद्वा सप्त तंतवः सप्त छंदांसि। तानि वितन्वंति। किमर्थं। ओतवै। सप्तसोमसंस्थारूपतिर्यक्तंतुसंतानाय। यज्ञनिर्माणायेत्यर्थः। यज्ञानां स्थितेः सूर्याधीनत्वादिति भावः। ईदृशं तत्त्वं पृच्छामीत्यर्थः॥

॥ इति द्वितीयस्य तृतीये चतुर्दशो वर्गः ॥

॥ अथ षष्ठी ॥

अचिकित्वाञ्चिकितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान्।
वि यस्तस्तंभ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकं ॥६॥

अचिकित्वान्। चिकितुषः। चित्। अत्र। कवीन्। पृच्छामि। विद्मने। न। विद्वान्।
वि। यः। तस्तंभ। षट्। इमा। रजांसि। अजस्य। रूपे। किं। अपि। स्वित्। एकं॥६॥

अचिकित्वान् देवतातत्त्वमजानन्नहं चिकितुषो विशेषेण तत्त्वं जानतः कवीन् क्रांतदर्शिनोऽधिगतपरमार्थानत्रास्मिंस्तत्त्वविषये पृच्छामि। किमर्थं। विद्मने। वेदनाय। परमार्थज्ञानाय। किं जानन्नेव पराभवाद्यर्थं नेत्याह। विद्वान् न पृच्छामि अपि त्वज्ञानादेव। यः परमेश्वरस्तस्तंभ स्तंभितवान् नियमितवान्। अथ य आत्मा सेतुर्विधृतिरेषां लोकानामसंभेदायेति श्रुतेः। किं। इमा इमानि षड्रजांसि लोकान्रंजनात्मकान्। लोका रजांस्युच्यंत इति निरुक्तं। यद्यपि लोकाः सप्त तथापि सत्यलोकस्य कर्मिणां सर्वेषां साधारणत्वाभावात् षडित्युक्तं। ननु

षडेवोक्ताः सप्तमः किमिति न निर्दिष्ट इति उच्यते । अजस्य जननादिरहितस्य चतुर्मुखस्य ब्रह्मणो रूपे स्वरूप एकं सत्यलोकाख्यं पुनरावृत्तिरहितं स्थानं किमपि स्वित् । किंस्विदेव । तन्न केनाप्यधिगंतुं शक्यमित्यर्थः । कैश्चिदेवोपासकैरर्चिरादिमार्गेण गंतव्यत्वादिति भावः । यद्वा षड्रजांसि विलक्षणाः षडृतवः । तान्यस्तंभयत्तत्त्वं । अजस्य गमनशीलस्य जन्मरहितस्य वादित्यस्य रूपे रूप्यमाणे दृश्यमाने मंडल एकमद्वितीयं किमपि स्वित् । यत्किंचिदवाङ्मनसगम्यं तत्त्वमस्ति तत्पृच्छामि । य एषोऽंतरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादिश्रुतिप्रतिपादितं तत्त्वमित्यर्थः । अथवा षडिमानि रजांसि त्रिविधान्भूलोकांश्च यस्तस्तंभ । तिस्रो भूमीर्धारयन् त्रीरुत द्यूनिति निगमः । तस्याजस्य परब्रह्मणो रूपे नानाविकारभाजि जगति किमपि स्विदेकमेकात्मकमस्तीति प्रश्नः । अविशेषमस्तिनाममाचमेकरूपमस्तीत्युत्तरविवक्षया प्रश्नः । अस्तीत्येवोपलब्धव्यमिति श्रुतेः ॥

॥ अथ सप्तमी ॥

इह ब्रवीतु य ईमंग वेदास्य वामस्य निहितं पदं वेः ।
शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः ॥ ७ ॥
इह । ब्रवीतु । यः । ईं । अंग । वेद । अस्य । वामस्य । निऽहितं । पदं । वेरिति वेः ।
शीर्ष्णः । क्षीरं । दुह्रते । गावः । अस्य । वव्रिं । वसानाः । उदकं । पदा । अपुः ॥ ७ ॥

इहेदानीमीमेतद्वक्ष्यमाणं तत्त्वमंग क्षिप्रमविचारे ब्रवीतु । कः । यो वेद सः । कीदृशं तत् । अस्य पुरतो दृश्यमानस्य वामस्य वननीयस्य वेर्गंतुरादित्यस्य पदं सर्वैर्गंतव्यं स्वरूपं निहितं गूढं वर्तते । किंचास्यादित्यस्य शीर्ष्णः शिरोवदुन्नतस्य सर्वेषामुत्कृष्टस्य वा गावः केचन वर्षकालीना रश्मयः क्षीरमुदकं दुह्रते । क्षरंति । वव्रिं । रूपनामैतत् । रूपं वसाना आच्छादयंतोऽतिविस्तरेण तेजसा तपंतः केचनास्य गावो रश्मय उदकं स्वसृष्टं पदा सृष्टेनैव मार्गेणापुः । पिबंति । भूमिं निरुदकां कुर्वंतीत्यर्थः । तस्य स्वरूपं ब्रवीत्वित्यन्वयः ॥

॥ अथाष्टमी ॥

माता पितरमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे ।
सा बीभत्सुर्गर्भरसा निविद्धा नमस्वंत इदुपवाकमीयुः ॥ ८ ॥

माता। पितरं। ऋते। आ। बभाज। धीती। अग्रे। मनसा। सं। हि। जग्मे।
सा। बीभत्सुः। गर्भऽरसा। निऽविद्धा। नमस्वंतः। इत्। उपऽवाकं। ईयुः ॥ ८ ॥

माता सर्वस्य निर्मात्री पृथिवी पितरं पालकं द्युलोकं तत्स्थं द्युलोकस्थमादित्यमित्यर्थः। तमाबभाज। आभजते। किमर्थं। ऋते। उदके यज्ञे वा निमित्तभूते सति। केन द्वारेण। धीती। धीत्या कर्मणा यागादिरूपेण। स्वकीयेनाज्यसोमादिहविषा तर्पयतीत्यर्थः। अग्रे ततः पूर्वं पिता च मनसास्यामभिप्रायवता चेतसा संजग्मे हि। संश्लिष्टो वर्तते खलु। वृष्टिमकरोदित्यर्थः। अनंतरं सा माता बीभत्सुर्गर्भबंधनेच्छावती गर्भरसा गर्भरसेन गर्भोत्पत्तिनिमित्तेन रसेन निविद्धा नितरां विद्धासीत्। यद्वा गर्भे रस ओषध्याद्युत्पादनसमर्थमुदकं यस्याः सा तादृश्युदकेनात्यंतं क्लिन्ना निविद्धा कृषीवलैर्हलमुखेन नितरां विदारिता भवति वीजावापार्थं। अत्रायं समाधिः। या काचन योषिदपत्यार्थं स्वपतिं युवानं यौति। स च तस्यामनुरागयुक्तः संगतो भवति। सा चांतर्वती सती पुत्राञ्जनयतीति तद्वद्वापि। अनंतरं नमस्वंत इत् भाविव्रीहिप्रियंग्वाद्यन्नवंत एवोपवाकमुपेत्य वचनं परस्परं सम्यगभिवृद्धानि सस्यानीति वचनमीयुः। प्राप्नुवंति। यद्वा हविर्लक्षणान्नवंत उपेत्य वचनं प्रैषादिरूपमीयुः। कृष्टौ सत्यां सस्यादिद्वारा यागमनुतिष्ठेयुरित्यर्थः॥

॥ अथ नवमी ॥

युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वंतः।
अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥ ९ ॥

युक्ता। माता। आसीत्। धुरि। दक्षिणायाः। अतिष्ठत्। गर्भः। वृजनीषु। अंतरिति।
अमीमेत्। वत्सः। अनु। गां। अपश्यत्। विश्वऽरूप्यं। त्रिषु। योजनेषु ॥ ९ ॥

माता। निर्मीयंतेऽस्मिन्भूतानीति माता द्यौः। दक्षिणाया अभिमतपूरणसमर्थाया पृथिव्या धुरि निर्वहणे युक्तासीत्। वर्षणाय समर्थाभूदित्यर्थः। कथमिति तदुच्यते। गर्भो गर्भस्थानीय उदकसंघो वृजनीषूदकवत्सु मेघपंक्तिष्वंतर्मध्येऽतिष्ठत्। तिष्ठति। अनंतरं वत्सः पुत्रस्थानीय उदकसंघस्त्रिषु योजनेषु मेघरश्मिवायुसंयुक्तेषु सत्स्वमीमेत्। वर्षणसमये शब्दयति। अनंतरं विश्वरूप्यं विश्वरूपवतीं गामन्वपश्यत्। अनुक्रमेण पश्यति। वर्षतीत्यर्थः। यद्वा त्रिषु

योजनेषु सत्सु वत्सो मेघो वर्षणाय गां भूमिं प्रत्यमीमेत्। अनंतरं सर्वो जनोऽनुक्रमेण विश्वरूप्यं सस्यादिभिर्नानारूपवतीं भूमिमपश्यत्। पश्यति ॥

॥ अथ दशमी ॥

तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयंति।
मंत्रयंते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वां ॥ १० ॥
तिस्रः। मातॄः। त्रीन्। पितॄन्। बिभ्रत्। एकः। ऊर्ध्वः। तस्थौ। न। ईं। अव। ग्लपयंति।
मंत्रयंते। दिवः। अमुष्य। पृष्ठे। विश्वऽविदं। वाचं। अविश्वऽमिन्वां ॥ १० ॥

एकः प्रधानभूतोऽसहायो वा पुत्रस्थानीय आदित्यः संवत्सराख्यः कालो वा तिस्रो मातॄः सस्यवृष्ट्याद्युत्पादयित्रीः। क्षित्यादिलोकत्रयमित्यर्थः। तथा त्रीन्पितॄन् जगतां पालयितॄन् लोकत्रयाभिमानिनोऽग्निवायुसूर्याख्यान्बिभ्रत् सन् ऊर्ध्वस्तस्थौ। उन्नतोऽत्यंतदीर्घस्तिष्ठति भूतभविष्यदाद्यात्मना। सूर्यपक्षे सर्वेभ्य उन्नतः। ईमेनं नावग्लपयंति। ग्लानिं नैव कुर्वंति। न हि काल आदित्यो वान्येन पराभूयते। दिवः पृष्ठे द्युलोकस्योपर्यंतरिक्षे मंत्रयंते। गुप्तं परस्परं भाषंते देवाः। किं। विश्वविदं विश्ववेदनसमर्थां विश्वैर्वेदनीयां वाविश्वमिन्वामसर्वव्यापिनीं वाचं गर्जितलक्षणां। अमुष्यादित्यस्य संबंधिनीं मंत्रयंत इत्यर्थः ॥

॥ इति द्वितीयस्य तृतीये पंचदशो वर्गः ॥

॥ अथैकादशी ॥

द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ॥ ११ ॥
द्वादशऽअरं। नहि। तत्। जराय। वर्वर्ति। चक्रं। परि। द्यां। ऋतस्य।
आ। पुत्राः। अग्ने। मिथुनासः। अत्र। सप्त। शतानि। विंशतिः। च। तस्थुः ॥ ११ ॥

ऋतस्योदकस्य सत्यात्मकस्य वादित्यस्य चक्रं पुनःपुनः क्रमणशीलं मंडलाख्यं रथचक्रं वा वर्वर्ति। पुनःपुनर्वर्तते। संचरति। कुत्र। द्यां परि। द्युलोकस्यांतरिक्षस्य परितः। कीदृशं तत्। द्वादशारं। द्वादशसंख्याकमेषादिराश्यात्मकैररै रथांगावयवैर्युक्तं। किंच तच्चक्रं नहि जराय। नैव खलु जरायै भवति। हे अग्ने सर्वदागमनयुक्तादित्य। यद्वा अग्नेरेव स्थानत्रये तत्तदात्मना वर्तमान-

त्वादसावप्यग्निरित्युच्यते। अत्रास्मिन्त्वदीये चक्रे मिथुनासः स्त्रीपुंसरूपेण परस्परमिथुनभूताः सप्त शतानि विंशतिश्च विंशत्युत्तरसप्तशतसंख्याकाः पुत्राः पुत्रवदुत्पद्यमानाः प्राणिनां दुःखात्त्रातारो वाहोरात्ररूपास्तस्थुः। तिष्ठंति। निष्पद्यंते। षष्ट्यधिकशतत्रयसंख्याकान्यहानि तावत्य एव रात्रय इत्येव तद्विभागः। सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः स एषोहः समान इत्यारण्यकं ॥

॥ अथ द्वादशी ॥

पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणं ।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितं ॥ १२ ॥
पंच ऽ पादं । पितरं । द्वादश ऽ आकृतिं । दिवः । आहुः । परे । अर्धे । पुरीषिणं ।
अथ । इमे । अन्ये । उपरे । वि ऽ चक्षणं । सप्त ऽ चक्रे । षट् ऽ अरे । आहुः । अर्पितं ॥ १२ ॥

पंचपादं पंचसंख्याकर्त्वात्मकपादोपेतं । एतद्धेमंतशिशिरयोरेकत्वाभिप्रायं । पितरं सर्वस्य प्रीणयितारं द्वादशाकृतिं द्वादश मास एवाकृतयो यस्य तादृशं पुरीषिणं वृष्ट्युदकेन तद्वंतं प्रीणयितारं वा। पुरीषमित्युदकनाम। उक्तलक्षणं संवत्सरचक्रं दिवो द्युलोकस्य परेऽर्धे। तात्स्थ्यात्ताच्छब्द्यं। परस्मिन्नर्धेऽतरिक्षलक्षणेऽवस्थित आदित्य इत्यर्थः। तस्मिन्नर्पितमाहुः। एतदुत्तरस्थितमत्राप्यनुषज्यते। यद्यत्रार्पितं तत्तदधीनं अतः संवत्सरं परायत्तमाहुरित्यर्थः। अथेमेऽपि चान्ये केचन वेदवादिन एवमाहुः। किमिति। उपरे। उपरमंतेऽस्मिन् उपरताः प्राणिनोऽत्रेति वोपरः संवत्सरः। तस्मिन्कीदृशे। सप्तचक्रे। सप्तादित्यरश्मयस्तद्द्वारेण चक्रस्थानीया यस्य स तथोक्तः। यद्वा अयनर्तुमासपक्षाहोरात्रिमुहूर्तानि सप्त सप्त चक्राणि पुनःपुनः क्रममाणानि यस्य तादृशे। षळरे। षड़ृतव एवारा नाभौ प्रत्यृताः संबद्धा यस्य तथोक्तलक्षणे संवत्सरे रथे विचक्षणं विविधदर्शनकरमादित्यमर्पितमाहुः। एतदुक्तं भवति। अमुमादित्यं दक्षिणोत्तररूपभिन्नगतेस्तीव्रमंदादिभावस्य च कालाधीनत्वात्तदधीनमाहुः। अन्ये तु संवत्सराद्यात्मकस्य कालस्य सूर्यगमनागमनसाध्यत्वात्तदायत्तत्वमाहुरिति ॥

॥ अथ त्रयोदशी ॥

पंचारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा ।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः ॥ १३ ॥

पंचऽअरे। चक्रे। परिऽवर्तमाने। तस्मिन्। आ। तस्थुः। भुवनानि। विश्वा।
तस्य। न। अक्षः। तप्यते। भूरिऽभारः। सनात्। एव। न। शीर्यते। सऽनाभिः ॥१३॥

पंचारे पंचर्तुरूपैररैर्युक्ते चक्रे संवत्सरात्मके परिवर्तमाने संवत्सरपरिवत्सरादिरूपेण पुनःपुनरावर्तमाने सति तस्मिन्कालचक्रे विश्वा भुवनानि सर्वाणि भूतजातानि वर्तंत इत्यर्थः। किंच तस्य चक्रस्य मध्ये वर्तमानोऽक्षो भूरिभारः सकलभुवनवहनेन प्रभूतभारोऽपि न तप्यते। न पीड्यते। किंच सनादेव सनातन एव सनाभिः समाननाभिकः सर्वदैकरूपनाभिरसौ न शीर्यते। न भिद्यते। यथा लौकिकरथाक्षो भारेण भग्नो भवति अक्षघातेन च नाभिर्विवृता भवति तद्वदत्रापि नास्तीत्यर्थः ॥

॥ अथ चतुर्दशी ॥

सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहंति।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥ १४ ॥
सऽनेमि। चक्रं। अजरं। वि। ववृते। उत्तानायां। दश। युक्ताः। वहंति।
सूर्यस्य। चक्षुः। रजसा। एति। आऽवृतं। तस्मिन्। आर्पिता। भुवनानि। विश्वा ॥१४॥

सनेमि समाननेम्येकप्रकारवहिर्वलयमक्षीणनेमि चक्रं संवत्सराख्यमजरं सदातनमपि जरारहितं विववृते। पुनःपुनर्विशेषेण वर्तते। उत्तानायामूर्ध्वतनायामीषायामुपरिविस्तृतभूम्यां वा दशेंद्रादयः पंच लोकपाला निषादपंचमाश्चत्वारो ब्राह्मणादयो वर्णा मिलित्वा दशसंख्याका युक्ताः स्वस्वव्यापारयुक्ता वहंति। निर्वहंति। कृत्स्नं जगन्निर्वहंतीत्यर्थः। तन्निर्वाहार्थत्वात्कालस्य। किंच सूर्यस्यादित्यस्य चक्षुर्ख्यानस्वभावं सर्वस्य चक्षुःस्थानीयं वा मंडलं ॥ चक्षुर्ख्यातेर्वा चष्टेर्वेति निरुक्तं। ४. ३.॥ रजसा वृष्ट्युदकेनावृतं व्याप्तमेति। गच्छति ॥ उदकं रज उच्यत इति यास्कः। नि॰ ४. १९.॥ तादृशे मंडले विश्वा भुवनानि सर्वाणि भूतजातान्यार्पिता। अर्पितानि। तदधीनत्वात्तेषां ॥

॥ अथ पंचदशी ॥

साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजंते विकृतानि रूपशः ॥ १५ ॥

त्वादसावप्यग्निरित्युच्यते। अत्रास्मिन्त्वदीये चक्रे मिथुनासः स्त्रीपुंसरूपेण परस्परमिथुनभूताः सप्त शतानि विंशतिश्च विंशत्युत्तरसप्तशतसंख्याकाः पुत्राः पुत्रवदुत्पद्यमानाः प्राणिनां दुःखात्त्रातारो वाहोरात्ररूपास्तस्थुः। तिष्ठंति। निष्पद्यंते। षष्ट्यधिकशतत्रयसंख्याकान्यहानि तावत्य एव रात्रय इत्येव तद्विभागः। सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः स एषोहः समान इत्यारण्यकं॥

॥ अथ द्वादशी ॥

पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणं।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितं॥ १२॥

पंचऽपादं। पितरं। द्वादशऽआकृतिं। दिवः। आहुः। परे। अर्धे। पुरीषिणं।
अथ। इमे। अन्ये। उपरे। विऽचक्षणं। सप्तऽचक्रे। षट्ऽअरे। आहुः। अर्पितं॥१२॥

पंचपादं पंचसंख्याकर्त्वात्मकपादोपेतं। एतद्धेमंतशिशिरयोरेकत्वाभिप्रायं। पितरं सर्वस्य प्रीणयितारं द्वादशाकृतिं द्वादश मास एवाकृतयो यस्य तादृशं पुरीषिणं वृष्ट्युदकेन तद्वंतं प्रीणयितारं वा। पुरीषमित्युदकनाम। उक्तलक्षणं संवत्सरचक्रं दिवो द्युलोकस्य परेऽर्धे। तात्स्थ्यात्ताच्छब्द्यं। परस्मिन्नर्धेऽंतरिक्षलक्षणेऽवस्थित आदित्य इत्यर्थः। तस्मिन्नर्पितमाहुः। एतदुत्तरस्थितमत्राप्यनुषज्यते। यद्यत्रार्पितं तत्तदधीनं अतः संवत्सरं परायत्तमाहुरित्यर्थः। अथेमेऽपि चान्ये केचन वेदवादिन एवमाहुः। किमिति। उपरे। उपरमंतेऽस्मिन् उपरताः प्राणिनोऽत्रेति वोपरः संवत्सरः। तस्मिन्कीदृशे। सप्तचक्रे। सप्तादित्यरश्मयस्तद्द्वारेण चक्रस्थानीया यस्य स तथोक्तः। यद्वा अयनर्तुमासपक्षाहोरात्रिमुहूर्तानि सप्त सप्त चक्राणि पुनःपुनः क्रममाणानि यस्य तादृशे। षळरे। षडृतव एवारा नाभौ प्रत्यृताः संबद्धा यस्य तथोक्तलक्षणे संवत्सरे रथे विचक्षणं विविधदर्शनकरमादित्यमर्पितमाहुः। एतदुक्तं भवति। अमुमादित्यं दक्षिणोत्तररूपभिन्नगतेस्तीव्रमंदादिभावस्य च कालाधीनत्वात्तदधीनमाहुः। अन्ये तु संवत्सराद्यात्मकस्य कालस्य सूर्यगमनागमनसाध्यत्वात्तदायत्तत्वमाहुरिति॥

॥ अथ त्रयोदशी ॥

पंचारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः॥ १३॥

पंचऽअरे। चक्रे। परिऽवर्तमाने। तस्मिन्। आ। तस्थुः। भुवनानि। विश्वा।
तस्य। न। अक्षः। तप्यते। भूरिऽभारः। सनात्। एव। न। शीर्यते। सऽनाभिः ॥१३॥

पंचारे पंचर्तुरूपैररैर्युक्ते चक्रे संवत्सरात्मके परिवर्तमाने संवत्सरपरिवत्सरादिरूपेण पुनःपुनरावर्तमाने सति तस्मिन्कालचक्रे विश्वा भुवनानि सर्वाणि भूतजातानि वर्तंत इत्यर्थः। किंच तस्य चक्रस्य मध्ये वर्तमानोऽक्षो भूरिभारः सकलभुवनवहनेन प्रभूतभारोऽपि न तप्यते। न पीड्यते। किंच सनादेव सनातन एव सनाभिः समाननाभिकः सर्वदैकरूपनाभिरसौ न शीर्यते। न भिद्यते। यथा लौकिकरथाक्षो भारेण भग्नो भवति अक्षघातेन च नाभिर्विवृता भवति तद्वदत्रापि नास्तीत्यर्थः ॥

॥ अथ चतुर्दशी ॥

सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहंति।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥ १४ ॥

सऽनेमि। चक्रं। अजरं। वि। ववृते। उत्तानायां। दश। युक्ताः। वहंति।
सूर्यस्य। चक्षुः। रजसा। एति। आऽवृतं। तस्मिन्। आर्पिता। भुवनानि। विश्वा ॥१४॥

सनेमि समाननेम्येकप्रकारवहिर्वलयमक्षीणनेमि चक्रं संवत्सराख्यमजरं सदातनमपि जरारहितं विववृते। पुनःपुनर्विशेषेण वर्तते। उत्तानायामूर्ध्वतनायामीषायामुपरिविस्तृतभूम्यां वा दशेंद्रादयः पंच लोकपाला निषादपंचमाश्चत्वारो ब्राह्मणादयो वर्णा मिलित्वा दशसंख्याका युक्ताः स्वस्वव्यापारयुक्ता वहंति। निर्वहंति। कृत्स्नं जगन्निर्वहंतीत्यर्थः। तन्निर्वाहार्थत्वात्कालस्य। किंच सूर्यस्यादित्यस्य चक्षुख्यानस्वभावं सर्वस्य चक्षुःस्थानीयं वा मंडलं ॥ चक्षुख्यातेर्वा चष्टेर्वेति निरुक्तं। ४. ३.॥ रजसा वृष्ट्युदकेनावृतं व्याप्तमेति। गच्छति ॥ उदकं रज उच्यत इति यास्कः। नि॰ ४. १९. ॥ तादृशे मंडले विश्वा भुवनानि सर्वाणि भूतजातान्यार्पिता। अर्पितानि। तदधीनत्वात्तेषां ॥

॥ अथ पंचदशी ॥

साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजंते विकृतानि रूपशः ॥ १५ ॥

साकंऽजानां। सप्तथं। आहुः। एकऽजं। षट्। इत्। यमाः। ऋषयः। देवऽजाः। इति।
तेषां। इष्टानि। विऽहितानि। धामऽशः। स्थात्रे। रेजंते। विऽकृतानि। रूपऽशः ॥ १५॥

साकंजानामेकस्मादादित्यात्सहोत्पन्नानां सप्तानामृतूनां मध्ये सप्तथं सप्तममृतुं॥ थट् च छंदसि। पा॰ ५. २. ५०। इति थट्॥ एकजमेकेनोत्पन्नमाहुः कालतत्त्वविदः। चैत्रादीनां द्वादशानां मासानां द्वयमेलनेन वसंताद्याः षडृतवो भवंति। अधिकमासेनैक उत्पद्यते सप्तमर्तुः। न च तादृशो मास एव नास्तीति मंतव्यं। अस्ति त्रयोदशो मास इत्याहुरिति श्रुतेः। तदेवोच्यते। षडिद्यमाः। इच्छब्द एवकारार्थः। षडेव ऋतवो मासद्वयरूपा ऋषयो गंतारः। ते च देवजाः। देवादादित्याज्जाता इत्येवमाहुः। सप्तमाधारस्य त्रयोदशस्य मासस्य देवाभावः। निःसूर्योऽधिकमासो मंडलं तपते रवेरित्यादिस्मृतेः। तस्मात् षडेव देवजाः अदेवज एकः। तेषामृतूनां स्वरूपाणीष्टानि सर्वलोकाभिमतानि धामशस्तत्तत्स्थाने विहितानि पृथक् पृथक् स्थापितानि रूपशो रूपभेदेन विकृतानि विविधाकृतियुक्तानि। स च रूपभेदस्तैत्तिरीयैराम्नातः स रसमह वसंताय प्रायच्छद्यवं ग्रीष्मायेत्यादि। स्थात्रेऽधिष्ठात्रे तदर्थाय रेजंते। चलंति। जगद्व्यवहाराय पुनःपुनरावर्तंत इत्यर्थः॥

॥ इति द्वितीयस्य तृतीये षोडशो वर्गः॥

॥ अथ षोडशी॥

स्त्रियंः सतीस्ताँ उं मे पुंस आंहुः पश्यंदक्षण्वान्न वि चेतदंधः।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासंत्॥ १६॥
स्त्रियंः। सतीः। तान्। ऊं इतिं। मे। पुंसः। आहुः। पश्यंत्। अक्षण्ऽवान्। न।
वि। चेतत्। अंधः।
कविः। यः। पुत्रः। सः। ईं। आ। चिकेत। यः। ता। विऽजानात्। सः। पितुः।
पिता। असत्॥ १६॥

मे मदीया या दीधितयः स्त्रियः संस्त्यानवत्यो योषितः सतीः सत्यः। योषिद्वदुदकरूपगर्भधारणात्स्त्रीत्वं। एषां रश्मीनामाविष्टलिंगत्वात्स्त्रीलिंगता। तान्

उ तान्रश्मीनेव पुंस आहुः। प्रभूतवृष्ट्युदकसेक्तॄन्पुरुषानाहुः। प्रतिनिर्देशापेक्षया पुंल्लिंगता। अमुमर्थमत्यंतनिगूढमक्षण्वान् ज्ञानदृष्ट्युपेतः कश्चिन्महान्पश्यत्। जानाति। अंधोऽतथारूपः स्थूलदृष्टिर्न विचेतत्। न विचेतयति। न जानाति। किंच यः कविः क्रांतदर्शी पुत्रः स्त्रीपुरुषरूपाणां रश्मीनां पुत्रस्थानीयः पुरु जगतां त्राता वृष्ट्युदकलक्षणोऽस्ति स ईं स एव पुत्रः। यद्वा ईमेनमर्थं स्त्रीणां सतीनां पश्चात्पुरुषभावमाचिकेत। सर्वतो जानाति। पित्रोः स्थितिं पुत्र एव जानाति नान्यः। यः कश्चित्ता तानि विजानात् स्त्रीपुरुषपुत्ररूपाणि जानीयात् स पितुः पितासत्। पिता वृष्ट्या जगत्पालको रश्मिसमूहः। तस्यापि पितादित्यः। स भवति। आदित्य एव भवतीत्यर्थः। यद्वा लौकिकोक्तिरियं। यस्तानि जानाति स एवं भवति। स्वयं पितुः पुत्रः सन्नपि स्वपुत्रापेक्षया पिता च भवति। पुत्रपौत्रादिसहितश्चिरकालं जीवी भवति। इत्यधिदैवतं॥ अथाध्यात्मं। या इदानीं स्त्रियः सतीः स्त्रीत्वं प्राप्ता आहुर्लौकिकाः तानु तानेव मे मह्यं पुंसः पुरुषानाहुः। प्रतिपादयंति तत्त्वज्ञाः। कथमन्यस्यान्यभावः। उच्यते। एकस्यैव निरस्तसमस्तोपाधिकस्यात्मनस्तद्देहावस्थानमात्रेण तत्तद्व्यपदेशोपपत्तेः। श्रूयते हि त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारीत्यादि। स्त्रीत्वं पुंस्त्वं चोभयमपि वस्तुतो नास्तीत्युक्तं भवति। स्मृतिरपि तदभावं बोधयति। नैव स्त्री न पुमानेष नैव चायं नपुंसकः। यद्यच्छरीरमादत्ते तेन तेन स चोद्यत इति। द्वितीयः पादः पूर्ववत्। किंच पुत्रो वयसाल्पोऽपि यः कविः क्रांतप्रज्ञो ज्ञानी स्यात् ईमिममर्थं स विचिकेत। जानाति। एवमुक्तलक्षणस्य परमात्मनस्ता तानि स्त्रीत्वपुंस्त्वादीनि यो विजानात्। औपाधिकानि जानीयात्। स पितुः स्वोत्पादकस्यापि ज्ञानरहितस्य पितासत्। पितृवत्पूज्यो भवति। उक्तमर्थमभिप्रेत्य तांडकब्राह्मणं। शिशुर्वा आंगिरसो मंत्रकृतां मंत्रकृदासीत् स पितॄन् पुत्रका इत्यामंत्रयतेत्युपक्रम्य ते देवानपृच्छंत। ते देवा अब्रुवन् एष वाव पिता यो मंत्रकृदिति। तद्वै स उदजयदिति मंत्रद्रष्टुरेव किल पितृत्वं। तत्त्ववित् पितुः पितासदिति किमाश्चर्यमित्यभिप्रायः॥

॥ अथ सप्तदशी ॥

अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात्।
सा कद्रीची कं स्विदर्धं परागात्क्व स्वित्सूते नहि यूथे अंतः॥१७॥

अवः। परेण। परः। एना। अवरेण। पदा। वत्सं। बिभ्रती। गौः। उत्। अस्थात्। सा। कद्रीची। कं। स्वित्। अर्धं। परा। अगात्। क्व। स्वित्। सूते। नहि। यूथे। अंतरिति ॥ १७ ॥

अत्राग्नौ हूयमानाहुतिर्गोरूपेण स्तूयते। गौर्गोरूपा गमनशीलैषाहुतिसंघेन पोष्यं वत्सं वत्सस्थानीयमग्निमवोऽवस्तादधोदेशे परेण पदा पादद्वयेन स्वावयवेनाकृष्य बिभ्रती धारयंती तथा परः परस्तादुपरिदेश एनानेनावरेण च पदा पादद्वयेनाकृष्य तमेव वत्सं बिभ्रत्युदस्थात्। सूर्यं प्रत्युत्तिष्ठति। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठत इति स्मृतेः। अथैवं कृतवती साहुतिः कद्रीची क्व गतेत्यनिश्चयगमनादित्यं प्राप्नवतीत्यर्थः। कं स्वित् कं फलभाजं पुरुषं प्रत्यर्धमर्धमार्गमागत्य यद्वा अर्धमृद्धं परागात्। परागच्छति। आगत्य च क्व स्वित्सूते। कुत्र प्रदेशे फलमुत्पादयति। नहीतरगोवदियं यूथेऽंतः सजातीयगोमध्ये सूते। साधारण्येन यत्रक्वचिन्न सूते। अपि तु कस्मिंश्चिदनुष्ठातरि। अतः स महान् को नु खल्विति। यद्वा आदित्यरश्मिसमूह एव गोरूपेण स्तूयते। गौरुक्तलक्षणा रश्मिरूपा गौर्वत्सं वत्सवद्रक्षणीयं यजमानमुक्तक्रमेण बिभ्रत्युदस्थात्। अथ तथा कृत्वा सा कद्रीच्यदृश्यगमना सती कं स्विदर्धमृद्धमर्धस्थानभाजं वा कंस्वित्पुरुषमादित्यं परागात्। अप्रतिनिवृत्ता गता। तं नयंत्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवास इति श्रुतेः। तथा कृत्वा च क्व स्वित्सूते। कस्मिन्निंद्रादिलोके जनयति। न सर्वत्र। शिष्टं समानं ॥

॥ अथाष्टादशी ॥

अवः परेण पितरं यो अस्यानुवेद पर एनावरेण।
कवीयमानः क इह प्र वोचद्देवं मनः कुतो अधि प्रजातं ॥ १८ ॥

अवः। परेण। पितरं। यः। अस्य। अनुऽवेद। परः। एना। अवरेण।
कविऽयमानः। कः। इह। प्र। वोचत्। देवं। मनः। कुतः। अधि। प्रऽजातं ॥ १८॥

अवोऽवस्तात्स्थितमस्य पितरमेतल्लोकपालकमग्निं परेणादित्येन सह योऽनुवेद। अनुक्रमेण जानाति। तथा परः परस्तात्स्थितमादित्यमस्य पितरं पालकं। सोऽपीममेव लोकं वृष्ट्यादिना पालयति। तादृशमादित्यमेनानेनावरेणाग्निना सह योऽनुवेद। अग्न्यादित्यौ व्यतिहारेणोपास्ते। यद्वा अभिभूतरजस्तमस्का-

वुबुद्धसत्त्वौ अत एव स्वाधीनमायावेतावेकत्वेन वाधिगच्छति। स तादृशः पुरुषः कवीयमानः कविवदाचरन् क्रांतदर्शित्वमात्मनः ख्यापयन् क इहास्मिन् लोके प्रवोचत्। प्रब्रवीति। किंच देवं द्योतमानं देवविषयमलौकिकं वा मनः कुतः कस्माददृष्टविशेषादधि आधिक्येन प्रजातं। उत्पन्नं। उभयमपि दुर्लभमित्यर्थः॥

॥ अथैकोनविंशी ॥

ये अ॒र्वाच॒स्ताँ उ॒ परा॑च आहु॒र्ये परा॑च॒स्ताँ उं अ॒र्वाचं॑ आहुः।
इंद्र॑श्च॒ या च॒क्रथुः॑ सोम॒ तानि॑ धु॒रा न यु॒क्ता रज॑सो वहंति॥१९।
ये। अ॒र्वाचः॑। तान्। ऊं इति॑। परा॑चः। आ॒हुः। ये। परा॑चः। तान्। ऊं इति॑। अ॒र्वाचः॑। आ॒हुः।
इंद्रः॑। च॒। या। च॒क्रथुः॑। सोम॒। तानि॑। धु॒रा। न। यु॒क्ताः। रज॑सः। व॒हं॒ति॒॥१९॥

ये सूर्यसोमयोश्चक्रे वर्तमाना रश्मयो ग्रहादयश्च तत्परिभ्रमणवशेनार्वाचोऽर्वागंचना अधोमुखाः संति। तां उ तानेव पराच आहुः। पराङ्मुखांचनानूर्ध्वानाहुः कालविदः। तथा प्रथमं ये परांचः परागंचनास्तां उ तानेवार्वाच आहुः। हे सोम त्वमिंद्रः परमेश्वर इरां भूमिं वृष्ट्या धारक आदित्यः। यद्वा द्वादशादित्यानां मध्य इंद्रोऽप्येकः। विवस्वदिंद्रयुता इत्युक्तत्वादयमपींद्रः। स च युवां या यानि मंडलपरिभ्रमणानि चक्रथुः। कृतवंतौ। तानि रजसो रंजनात्मकस्य लोकस्य॥ कर्मणि षष्ठी॥ लोकं वहंति। निर्वहंति। तत्र दृष्टांतः। धुरा शकटादौ धुरि युक्ताः संबद्धा अश्वादयो यथा धुरं वहंति तद्वत्। यद्वैतत्पूर्वार्द्धे दृष्टांतितं। धुरा युक्ताः। धुरि स्थितं चक्रमपि धुर्शब्देनोच्यते। तत्र युक्ताः समर्पिताः पुरुषास्तत्परिभ्रमणवशेनार्वाचोऽपि परांचः परांचोऽप्यर्वाचो भवंति तद्वत्॥

॥ अथ विंशी ॥

द्वा सु॑प॒र्णा स॒युजा॒ सखा॑या समा॒नं वृ॒क्षं परि॑ षस्वजाते।
तयो॑र॒न्यः पिप्प॑लं स्वाद्वत्त्यन॑श्नन्न॒न्यो अ॒भि चा॑कशीति॥२०॥
द्वा। सु॒ऽप॒र्णा। स॒ऽयुजा॑। सखा॑या। स॒मा॒नं। वृ॒क्षं। परि॑। स॒स्व॒जा॒ते॒ इति॑।
तयोः॑। अ॒न्यः। पिप्प॑लं। स्वा॒दु। अत्ति॑। अन॑श्नन्। अ॒न्यः। अ॒भि। चा॒क॒शी॒ति॒॥२०॥

अत्र लौकिकपक्षिद्वयदृष्टांतेन जीवपरमात्मानौ स्तूयेते। यथा लोके द्वौ

सुपर्णौ सुपतनौ शोभनगमनौ सयुजा समानयोगौ सखाया समानख्यानौ समानं वृक्षं परिषस्वजाते। एकमेव वृक्षं परिषस्वजाते। आश्रयतः। तयोरन्य एकः पिप्पलं पक्वं स्वादुतरमत्ति अपरोऽनश्नन् अभिचाकशीति। अभिपश्यति। तद्वत् द्वौ सुपर्णस्थानीयौ क्षेत्रज्ञपरमात्मानौ सयुजा समानयोगौ। योगो नाम संबंधः स च तादात्म्यलक्षणः। स एवात्मा जीवात्मनः स्वरूपं यस्य परमात्मन स तदात्मा। एवमन्यस्यापि स एवात्मा परमात्मनः स्वरूपं यस्य जीवात्मनः। एवमेकस्वरूपावित्यर्थः। अनेन भास्करमतानुसारिणोऽतिरेकिनाम्नो जीवात्मा परमात्मनो नान्यः। स च परमात्मा जीवादन्यो जीवाश्रयणादिति मतं निरस्तं भवति। ननु संबंधो द्विष्ठः। स च पक्षिणोरेव भेदमपेक्षते। अतः कथमैकात्म्यमिति। न। औपाधिकभेदं वास्तवाभेदं चापेक्ष्य प्रवृत्तः। अत एव सखायौ समानख्यानौ। नान्यख्यानौ। नन्वेकस्य यादृशं ख्यानं तादृशमेवान्यस्येति व्युत्पत्त्या भेदः स्फुटं प्रतिभाति। कथं तादात्म्यमुच्यत इति न वक्तव्यं। नात्र परस्परंदृष्टांतो दार्ष्टांतिकभावः। अपि तु यस्य यादृशं ख्यानं स्फुरणं परमात्मनस्तदेव ख्यानमितरस्यापि जीवात्मन इति सखायावित्युच्यते। एकरूपप्रकाशावित्यर्थः। अत उपपन्नमैकात्म्यं। अनेन वास्तवभेदोऽपि निरस्तः। समानं वृक्षं परिषस्वजाते इत्यत्र यथाश्रयांतराभावादुभयोरेकाश्रयत्वमभ्युपगंतव्यं तद्वत्सयुजा सखायावित्युभयत्रापेकयोगख्याने आश्रयणीये। वृश्च्यत इति वृक्षो देहः। स चोभयोः समान एक एव। जीवस्य भोगार्थत्वात् परमात्मना सृष्टैर्महाभूतैरारब्धत्वात्तस्योपलब्धिस्थानत्वाच्चोभयोरपि समानः। तादृशं समानं वृक्षं परिषस्वजाते। परिष्वजतः। आश्रयतः। न च जीवस्य वस्तुत ईश्वरत्वे कथं जीवबुद्ध्या संसारशोकाविति वाच्यं तयोर्मोहकृतत्वात्। तथा चाथर्वणिका अनुमंत्रमाम्नायास्य संदेहनिवर्तकमुत्तरं मंत्रमेवमामनंति। समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इति। अस्यायमर्थः। एक एव शरीरे पूर्णः पुरुषः परमात्मा निमग्नो निगूढः सन् स्वयमपीश्वरोऽप्यनीशत्वबुद्ध्या मुह्यमानो मूढः सन् शोचति। संसारेऽहं कर्ता सुखी दुःखीति जननमरणे अनुभवति। यदा तु जुष्टं नित्यतृप्तमन्यं संसारशोकातीतमीशं परमेश्वरं पश्यति स्वानन्यतया साक्षात्करोति। तदा वीतशोको देहाद्व्यतिरिक्तः स्वस्वरूपसाक्षात्कारेण गततापत्रयः सन् अस्य महिमानमिति। निरस्तसमस्तौपाधिकस्य परमेश्वरस्य महिमानं सार्वात्म्यसर्वज्ञत्वादिम-

हिमानमिति। एति प्राप्नोति। न च तद्भावान्यत्र तन्महिमा प्राप्यते। अतस्तद्रूपो भवतीत्यर्थः। तस्माद्वस्तुत एक एव। भेदस्तु मोहकृत इति प्रसिद्धं। अनुभवदशायां लौकिकबुद्ध्या भेदमभ्युपेत्योच्यते। तयोरन्यो जीवात्मा पिप्पलं कर्मफलं स्वादुभूतमत्ति। भुंक्ते। यस्य यदुपार्जितं तत्तस्य स्वादु भवति। अन्यः परमात्मानश्नन् आप्तकामत्वेनाभुंजानः स्पृहाया अभावात्। आप्तकामस्य का स्पृहेति स्मृतेः। तस्मादवास्तवभेदमुपजीव्य तयोरन्य इत्युक्तं। वस्तुतस्त्वनीशया शोचति मुह्यमान इत्युक्तत्वादभेद एव। तादृशः परमात्मा स्वात्मन्यध्यस्तं जगत्साक्षित्वेनेक्षते। अत्र द्वौ द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्तारावित्यादि निरुक्ते गतमस्य मंत्रस्य व्याख्यानमनुसंधेयं। नि॰ १४. ३०.॥

॥ इति द्वितीयस्य तृतीये सप्तदशो वर्गः ॥

॥ अथैकविंशी ॥

यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरंति।
इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश ॥२१॥
यत्र। सुऽपर्णाः। अमृतस्य। भागं। अनिऽमेषं। विदथा। अभिऽस्वरंति।
इनः। विश्वस्य। भुवनस्य। गोपाः। सः। मा। धीरः। पाकं। अत्र। आ। विवेश ॥२१॥

यत्रादित्यमंडले सुपर्णाः सुपतनाः शोभनगमना रश्मयोऽमृतस्योदकस्य भागं भजनीयमंशमादायानिमेषमनवरतं विदथा वेदनेन ज्ञानेनास्माभिरेवं कर्तव्यमिति बुद्ध्याभिस्वरंति। अभिप्रापयंति। यश्च विश्वस्य भुवनस्य भूतजातस्येनः स्वामी तथा तस्यैव गोपा गोपायिता रक्षितायमादित्यः परमेश्वरो धीरो धीमान् प्राण्यनुग्रहबुद्धियुक्तः सन् मा मां पाकं पक्तव्यमपक्वप्रज्ञमत्रास्मिन्स्वकीयमंडल आविवेश। प्रवेशयति। अत्रास्मदीये देहे वा नियामकतया प्रविष्ट इत्यधिदैवतपक्षे॥ अथाध्यात्मपक्षे॥ यत्र यस्मिन्नात्मनि सुपर्णाः शोभनपतनानि स्वस्वविषयग्रहणाय गमनकुशलानींद्रियाणि चक्षुरादीन्यमृतस्य भागं। अत्र विषयावच्छिन्नचैतन्यममृतमित्युच्यते। तस्य भागं भजनीयं स्वस्वांशमनिमेषं निमेषरहितमनारतं विदथा वेदनेन वृत्त्यवच्छिन्नचैतन्येनावरुद्धान्यभिस्वरंति। अभिप्रयंति। आवरणापगमनेन स्फोरयंति। किंच यस्त्विनः स्वाम्यस्य देहस्य विश्वस्य भुवनस्य गोपा गोपायिता रक्षिता। यद्वा विश्वस्य भुवनस्य भूतजातस्य

स्वाम्यस्य देहस्य गोपाः । अनेन तत्त्वपदार्थयोरेकत्वं प्रतिपादितं भवति । स परमेश्वरो धीरः समाधिनिष्ठः सर्वदाविक्रियो मा मां पाकं परिपक्वमनस्कं यागदानादिनापगतरजस्तमस्कत्वेन दर्पणवदतिनिर्मलसत्त्वोद्रिक्तमनस्कं मामाविवेश। उक्तरूपे चित्ते तादृशं वस्तु स्फुरतीत्यर्थः । यद्वापरिपक्वमना अहं पूर्वमज्ञानदशायां मदन्य ईश्वरोऽस्तीत्यविद्वान् ततः परमस्ति कश्चित्सर्वज्ञः सर्वेश्वरः सत्यज्ञानादिलक्षण इति निश्चित्य पश्चाद्गुरुशास्त्राभ्यां स एवाहमस्मीति मत्वा एवं पारंपर्येणावगत्यासंभावनाविपरीतभावने व्युदस्य भावनया साक्षात्कृत्य परिपूर्णः परमात्माभूवमित्यर्थः। अयमेव स मा धीरः पाकमत्राविवेशेत्यनेनोच्यते। नन्वनवच्छिन्नस्य परमात्मनः सर्वत्र व्याप्तत्वात्प्राप्तिरेव नोपपद्यते । संप्रत्यत्र प्राप्तिर्द्विविधा प्राप्तप्राप्तिरप्राप्तप्राप्तिश्चेति । प्राप्तस्यापि कंठे चामीकरन्यायेनावरणाज्ञानहानद्वारेण प्राप्तिरुपपद्यते। अस्य मंत्रस्य यन्निरुक्तं यत्र सुपर्णाः सुपतना आदित्यरश्मय इत्यादिकं तदत्र द्रष्टव्यं । नि॰ ३. १२. ॥

॥ अथ द्वाविंशी ॥

यस्मिन्वृक्षे मध्वदः सुपर्णा निविशंते सुवते चाधि विश्वे।
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ॥ २२ ॥

यस्मिन्। वृक्षे। मधुऽअदः। सुऽपर्णाः। निऽविशंते। सुवते। च। अधि। विश्वे। तस्य। इत्। आहुः। पिप्पलं। स्वादु। अग्रे। तत्। न। उत्। नशत्। यः। पितरं। न। वेद ॥ २२ ॥

अत्र वृक्षस्वरूपकल्पना। अधिदैव आदित्यमध्यात्म आत्मानं च प्रशंसति । यस्मिन्नादित्ये वृक्षे वृक्षवत्सर्वफलाश्रयभूते मध्वदः। मध्वित्युदकनाम। तददंतीति मध्वद उदकस्यात्तारः सुपर्णाः सुपतना रश्मयो निविशंते। प्रविशंति रात्रौ। सुवते च। पुनरुदयकाले प्रकाशं जनयंति च यस्मादादित्यात्। कुत्र। अधि विश्वे। विश्वस्योपरि। तस्यादित्यवृक्षस्य पिप्पलं पालकं फलं स्वादु रसवदग्र उपरि उपासनानंतरमाहुः। कथयंति तत्त्वविदः। यद्वा सर्वस्मादुपरि वर्तमानमाहुः। ईदृशं पितरं जगतः पालयितारं यो नरो न वेद। नोपास्ते। स तन्नोन्नशत् ॥ नशतिर्गतिकर्मा ॥ तत्फलं न प्राप्नोति। वेदितुस्त्वग्रे पिप्पलमाहुरित्यर्थः। इत्यधिदैवपक्षे ॥ अथाध्यात्मपक्षे। यस्मिन्परमात्मनि वृक्षे वृक्षवज्जम-

नादिरहितेऽविक्रिये सुपर्णाः शोभनगमनानींद्रियाणि मध्वदो मधुनो ज्ञानस्यात्तॄणि। तज्ज्ञानेन ज्ञानभांजीत्यर्थः। निविशंते। स्वापकाले स्वस्वविषयेभ्यः प्रतिनिवृत्तान्यात्मनिवृत्त्या लीयंते। पुनः प्रबोधकालेऽधि विश्वे विश्वस्योपरि सुवते च। उद्यंति। स्वस्वविषयान् लभंत इत्यर्थः। तस्य परमात्मनः पिप्पलं पालकं संसारत उद्धारकं स्वाद्वास्वादनीयममृतत्वलक्षणं ज्ञानं। यत्फलास्वादने पुनः क्षुत्तृष्णाशोकमोहजरामरणादयो न भवंति। तद्धि स्वादुतमं। इतरस्वर्गादिफलानि पुनर्जननाद्यापादकत्वादापातस्वादूनि। तत्फलमग्रे स्वरूपज्ञानोत्तरकालमाहुः। यः पुमान् पितरं पालकं ज्ञानफलं तत्फलाधारमात्मानं वा न वेद। न जानाति गुरुशास्त्रात्। स तत्फलं नोन्नशत्। न प्राप्नोति। अत आत्मानं यो वेद स एव तन्मोक्षफलं प्राप्नोतीत्यर्थः। यद्वा चर्मवदाकाशमित्यादिश्रुतेर्ज्ञानादन्योपायस्यामृतत्वप्राप्तिं निवारयति ब्रह्म वेद ब्रह्मैव भवतीत्यादिकानुज्ञाप्राप्तिमाह। तस्मादीदृशं परमेश्वरं विदित्वा मुक्तो भूयासमित्यर्थः॥

॥ अथ त्रयोविंशी ॥

यद्गा॑य॒त्रे अधि॑ गाय॒त्रमाहि॑तं॒ त्रैष्टु॑भाद्वा॒ त्रैष्टु॑भं॒ निर॒त॑क्षत।
यद्वा॒ जग॒ज्जग॒त्याहि॑तं प॒दं य इत्तद्वि॒दुस्ते अ॑मृत॒त्वमा॑नशुः॥२३॥

यत्। गा॒य॒त्रे। अधि॑। गा॒य॒त्रं। आऽहि॑तं। त्रैस्तु॑भात्। वा॒। त्रैस्तु॑भं। निः॒ऽअत॑क्षत।
यत्। वा॒। जग॑त्। जग॑ति। आऽहि॑तं। प॒दं। ये। इत्। तत्। वि॒दुः। ते। अ॒मृ॒त॒ऽत्वं।
आ॒न॒शुः॒॥२३॥

गायत्रे अधि गायत्रमाहितं। प्राथम्यात्सर्वैः स्तुत्यत्वाच्च गायत्री भूः। तदीयं स्थानं गायत्रं। अधि उपरि तत्र गायत्रमाग्नेयं पदमाहितं। प्रथमसृष्टत्वात् गायति त्रायते च व्युत्पत्त्या च प्रजापतेर्मुखाद्गायत्र्या सहोत्पन्नत्वाद्गत्त्याग्निरपि गायत्रः। गायत्रोऽग्निरिति श्रुतेः। भूम्यामग्निः स्थापित इति यदस्ति। तथा त्रैष्टुभात् द्वितीयत्वाद्वृष्टिपर्जन्यविद्युद्रूपत्रिस्तोभयुक्तादंतरिक्षात् त्रैष्टुभं स्तोभयुक्तमूर्द्ध्वाधस्तिर्यग्लक्षणस्तोभत्रयोपेतं वायुं निरतक्षत। साधु संपादितवंतो देवा इति यदस्ति। वा अथवा जगति सर्वैर्गंतव्य उन्नततमे वा तृतीयभूते द्युलोके जगद्गमनशीलमादित्याख्यं पदमाहितमिति यदस्ति। तदिदं त्रिषु स्थानेषु त्रयाणामग्न्यादीनां पदाधानं य इत् य एव नरा विदुर्जानंति। त एवामृतत्वमानशुः।

अमरणरूपं पदमाप्नुवंतीत्यधिलोकं ॥ अथाधियज्ञं ॥ गायत्रे प्रातःसवनेऽधि उपरि गायत्रं छंदः पदमाहितमिति यत्। तथा त्रैष्टुभान्माध्यंदिनात्सवनात्त्रैष्टुभं छंदो निरतक्षत। तत्र आहितमिति यत्। वा किंचेत्यर्थः। जगति तृतीयसवने जगत् जागतं पदमाहितमिति यत् तत्तादृशं सवनत्रयेषु छंदस्त्रयसंस्थानं ये नरा विदुः। यजमाना विदुर्जानंति। तेऽमृतत्वं ज्ञानानुष्ठानद्वारेण मोक्षमानशुः। आप्नुवंति। अथवा गायत्रे प्रातःसवने। त्रिषु सवनेषु छंदस्त्रयपरिमाणात् सवनान्यपि तत्तच्छंदःशब्देनोच्यंते। गायत्रं प्रातःसवनं त्रैष्टुभं माध्यंदिनं सवनं जागतं तृतीयसवनमिति श्रुतेः। तादृशे प्रातःसवनेऽधि उपरि गायत्रमष्टाक्षरात्मकमाहावप्रतिगररूपं गायत्रं पदमाहितं। तद्यथा होता शोंसावोमिति त्र्यक्षरेण तथा शंसामोदैवोमिति पंचाक्षरेणाध्वर्युः प्रतिगृणाति। आ॰ ५. ९.। तन्मिलित्वाष्टाक्षरं संपद्यते। तच्चाष्टाक्षरं गायत्रीसदृशं तस्या अपि पादस्याष्टाक्षरत्वात्। इदमेकं प्रातःसवनरूपे गायत्रपदप्रतिष्ठापनं। तथा सवनांतेऽपि शंसनानंतरमुक्थं वाचीति चतुरक्षरमाह। ओमुक्थशा इति चतुरक्षरमध्वर्युः। तदष्टाक्षरं संपद्यते। एतदेकं परं गायत्रे गायत्रस्थापनं। तथा त्रैष्टुभान्माध्यंदिनसवनात्त्रैष्टुभमाहावप्रतिगरणरूपं पदं निरतक्षत ऋत्विजः। तद्यथा माध्यंदिनसवने होताध्वर्यो शोंसावोमित्याह्वयते षडक्षरेण अध्वर्युश्च शंसामोदैवोमिति पंचाक्षरेण प्रतिगृणाति। तन्मिलित्वैकादशाक्षरं संपद्यते। इदमेकं माध्यंदिनसवनादौ त्रैष्टुभे त्रैष्टुभाधानं। तथा सवनांतेऽपि शंसनानंतरमुक्थं वाचि इंद्रायेति सप्ताक्षरमाह। अध्वर्युश्चोमुक्थशा इति चतुरक्षरेण प्रतिगृणाति। तन्मिलित्वैकादशाक्षरं संपद्यते। इदमपरं त्रैष्टुभे त्रैष्टुभस्थापनं। तथा तृतीयसवने होताध्वर्यो शोंशोंसावोमिति सप्ताक्षरेणाह्वयते शंसामोदैवोमिति पंचाक्षरेणाध्वर्युः प्रतिगृणाति। द्वादशाक्षरं भवति। तदिदं प्रथमं जागते जागतोत्पादनं। तथा पश्चादपि शंसनानंतरमाह उक्थं वाचीद्राय देवेभ्य इति। एतदेवैकादशाक्षरं भवति। अध्वर्युश्चोमित्येकाक्षरेण प्रतिगृणाति। तदुभयं मिलित्वा द्वादशाक्षरं भवति। तदिदमपरं जागते जागतपदस्थापनं। एवं त्रिषु छंदस्सु त्रिषु गायत्र्यादिसवनेषु गायत्रादिच्छंदस्त्रयपदप्रतिष्ठापनं। एतत्सर्वमैतरेयब्राह्मणे देवविशः कल्पयितव्या इति खंडे विस्पष्टमाम्नातं। १.९.॥ तत्तादृशं छंदसि छंदःस्थापनं य इत्तद्विदुः। य एव जानंति। त एवामृतत्वमानशुः। प्राप्नुवंत्यनुष्ठानद्वारा। एवमजानंतोऽनुष्ठानेनापि फलं न प्राप्नुवंतीत्यर्थः। तस्य साकल्याभावादिति भावः॥

॥ अथ चतुर्विंशी ॥

गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकं।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥ २४ ॥
गायत्रेण । प्रति । मिमीते । अर्कं । अर्केण । साम । त्रैस्तुभेन । वाकं ।
वाकेन । वाकं । द्विऽपदा । चतुःऽपदा । अक्षरेण । मिमते । सप्त । वाणीः ॥ २४ ॥

गायत्रेण गायत्रच्छंदसार्कमर्चनसाधनं मंत्रं प्रतिमिमीते। प्रत्येकं परिच्छिनत्ति॥ अर्को मंत्रो भवति यदेनेनार्चंतीति निरुक्तं ॥ प्रतिमंत्रं गायत्रेण छंदसोपनिबद्धं करोति । उपलक्षणमेतदन्येषां छंदसां । यद्वेतरेषां छंदसामस्यैव चतुश्चतुरक्षराधिक्येन तत्तच्छंदोभिः प्रतिमिमीत इत्यर्थः । यद्वा प्रतिशब्दः समित्येतस्मिन्नर्थे । छंदोभिर्मंत्रान् संमितं करोतीत्यर्थः । अर्केण साम । उक्तलक्षणेन मंत्रेण साम गायत्ररथंतरसंज्ञकं साम प्रतिमिमीते। नन्वेकं साम तृचे क्रियत इति तिसृष्वेकं साम विहितं । अतोऽर्कैः सामेति वक्तव्यं । कथमुच्यतेऽर्केणेति । न । वस्तुत एकं सामैकस्यामृच्यारूढं। पश्चादन्योन्यां तदुत्तरयोर्गायतीत्यतिदेशतः प्राप्तं तिसृषु गानं । अत एकवचनमविरुद्धं । त्रैष्टुभेन वाकं । अत्र त्रिष्टुबुपादानमितरच्छंदःप्रदर्शनार्थं । अथवा अनादेशे सर्वत्र त्रिष्टुभो ग्रहणात्प्राचुर्याभिप्रायेणेदमुक्तं । त्रैष्टुभेन द्विवारत्रिवारावृत्तेन द्वृचतृचरूपं वाकं वक्तव्यमेकैकं छंदः प्रतिमिमीते । अथवा वाकं सूक्तमेतावद्भिस्त्रिष्टुब्भिरुपनिबद्धमिदं सूक्तमिति । तादृशेन वाकेन वाकं वाकवर्गमनुवाकं वा मिमीते। कीदृशेन वाकेनेति स विशेष्यते । द्विपदा चतुष्पदा। पादद्वयबद्धविराडादिच्छंदोनिबद्धमंत्ररूपेण चतुष्पदा पादचतुष्टयोपेतेनानुष्टुबादिमंत्ररूपेणेति । ईयतीभिर्द्विपदाभिर्वर्गः ईयतीभिश्चतुष्पदाभिरूपेतो वर्गः । ईयद्भिपदरूपैर्वाकैः ईयच्चतुष्पदरूपैर्वाकैश्च परिमितोऽनुवाक इति । सूक्तपक्ष एतावद्भिः सूक्तैरयमनुवाक इति। किंचाक्षरेणाक्षरेणैव सप्त वाणीर्वागधिष्ठितानि सप्त छंदांसि मिमते। निर्माणं कुर्वंति। अष्टाक्षरा गायत्री एकादशाक्षरा त्रिष्टुप् द्वादशाक्षरा जगतीति । अक्षरैः पादाः परिमीयंते । परिमितैः पादैश्छंदांसि। ततः पादानां छंदसामक्षरं मूलमिति । तथा ऋग्वर्गसूक्तानुवाकादीनां चाक्षरं मूलमित्यक्षरप्रशंसा ॥

॥ अथ पंचविंशी ॥

जगता सिंधुं दिव्यस्तभायद्रथंतरे सूर्यं पर्यपश्यत् ।

गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ॥ २५ ॥

जगता । सिंधुं । दिवि । अस्तभायत् । रथंऽतरे । सूर्यं । परि । अपश्यत् ।

गायत्रस्य । संऽइधः । तिस्रः । आहुः । ततः । मह्ना । प्र । रिरिचे । महिऽत्वा ॥ २५ ॥

जगतीछंदस्कायामृच्युत्पन्नं साम जगत् । तेन ब्रह्मा सृष्टिकाले सिंधुं स्यंदनशीलमुदकस्य स्यंदकं वादित्यं दिवि द्युलोकेऽस्तभायत् । स्तंभितवान् । जागतो वा एष य एष तपतीति श्रुतिः । रथंतर एतन्नामके साम्नि स्तंभितं सूर्यं पर्यपश्यत् । परिदृष्टवान्प्रजापतिः । तदाधारभूतायामृचि । ऋ॰ ७. ३२. २२. । स्वर्दृशमिति सूर्यप्रतिपादकशब्ददर्शनात् । असौ वाव स्वर्दृगिति हि श्रुतिः । अत एव तत्र सूर्यदर्शनं विधीयते । रथंतरे प्रस्तूयमाने संमीलयेत् स्वर्दृशं प्रति वीक्षेतेति सामब्राह्मणेन । गायत्रस्य गायत्र्यामुत्पन्नस्य साम्नः समिधः समिंधनास्तिस्रो विभक्तीराहुः । पादत्रयमाहुरित्यर्थः । अथवा तिस्र ऋच आहुः । ततो हेतोर्मह्ना बलेन महित्वा महित्वेन प्ररिरिचे । प्ररिच्यते । अन्यानि सामानि पृथक् पृथक् निर्मितवान् । यद्वा गायत्रशब्दश्छंदोवाची । तस्य तिस्रो मूर्तीराहुः क्रमेणाष्टाक्षरैकादशाक्षरद्वादशाक्षरैर्गायत्रीत्रिष्टुब्जगत्यात्मिकाः । यस्मादेवं ततस्तस्माद्गायत्री छंदसां कनिष्ठा सती मह्ना बलेन महत्त्वेन प्ररिरिचे । सर्वाणि छंदांस्यतिक्रामति । येनैव बलेन सोममाहृतवती तादृशेनैवं भवति ॥

॥ इति द्वितीयस्य तृतीयेऽष्टादशो वर्गः ॥

प्रवर्ग्ये घर्मधुगाह्वानकाल उपह्वय इत्यादिके द्वे ऋचौ । उपह्वये सुदुघां धेनुमेतामिति द्वे । आ॰ ४. ७. । इति सूत्रितत्वात् ॥

॥ सैषा षड्विंशी ॥

उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनां ।

श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचं ॥ २६ ॥

उप । ह्वये । सुऽदुघां । धेनुं । एतां । सुऽहस्तः । गोऽधुक् । उत । दोहत् । एनां ।

श्रेष्ठं । सवं । सविता । साविषत् । नः । अभिऽइद्धः । घर्मः । तत् । ऊं इति । सु ।

प्र । वोचं ॥ २६ ॥

अहं होतोपह्वये। उपेत्याह्वयामि। किं। एतां धेनुं। आगच्छंतीं क्षीरेण प्रीणयित्रीं गां प्रवर्ग्यार्थां। पुनः कीदृशीं। सुदुघां। सुष्ठु दोग्ध्रीं। उत अपि च एनामुक्तलक्षणां गां सुहस्तः शोभनहस्तो दोहनकुशलो गोधुक् गोदोग्धाध्वर्युर्दोहत्। दोग्धि। यस्मादेवं तस्मादुपह्वय इत्यर्थः। तदर्थं सविता सर्वस्यानुज्ञाता परमेश्वरो नोऽस्मदीयं श्रेष्ठं प्रशस्यं सवं सोमयागं क्षीरं वा साविषत्। अनुजानातु। कथमेवं। तच्छब्दश्रुतेर्यच्छब्दाध्याहारः। यद्यस्माद्धर्मः प्रवर्ग्यः। यद्धर्म इत्यतपत्तद्धर्मस्य घर्मत्वमिति तैत्तिरीयकं। तन्नाहशोऽभीद्धोऽभिदीप्तः। तदुशब्द एवकारार्थः। तस्मादेव कारणात्सु प्रवोचं। सुष्ठु ब्रवीमि। उपह्वय इति। यद्वा एतां पुरतो दृश्यमानां धेनुं वृष्ट्या प्रीणयित्रीं मेघलक्षणां धेनुमुपह्वये। आह्वयामि वर्षदोहाय। किंचैनां धेनुं सुहस्तः शोभनदोहनकुशलहस्तोपेतो गोधुक् गोदोग्धादित्यो वा वायुर्दोहत्। दोग्धि। तदधीनत्वाद्वर्षणस्य। किंच तदर्थं सविता प्रेरकः परमेश्वरोऽस्मदर्थमस्मदुपभोगादृष्टमपेक्ष्य साविषत्। अनुजानातु। प्रतिबंधं मा करोत्वित्यर्थः। किमितीदमुच्यत इति उच्यते। घर्मो ग्रीष्मोऽवर्षणजनितः सस्यशोषोऽभीद्धः प्रवृद्धः। तदु षु प्रवोचं। तस्मादेव कारणाद्ब्रवीमि॥ ब्रवीतेर्लुङि वच्यादेशेऽस्यतिवक्तीत्यादिना च्लेरङ्। छांदसोऽडभावः॥

॥ अथ सप्तविंशी ॥

हिं॒कृ॒ण्व॒ती व॑सु॒पत्नी॒ वसू॑नां व॒त्समि॒च्छंती॒ मन॑सा॒भ्यागा॑त्।
दु॒हाम॒श्विभ्यां॒ पयो॑ अ॒घ्न्येयं सा व॑र्धतां मह॒ते सौभ॑गाय ॥ २७ ॥

हि॒ङ्ऽकृ॒ण्व॒ती। व॒सु॒ऽपत्नी॑। वसू॑नां। व॒त्सं। इ॒च्छंती॑। मन॑सा। अ॒भि। आ। अ॒गा॒त्।
दु॒हां। अ॒श्वि॒ऽभ्यां॑। पयः॑। अ॒घ्न्या। इ॒यं। सा। व॒र्ध॒तां॒। म॒ह॒ते। सौभ॑गाय ॥ २७ ॥

यथाहूता गौर्हिंकृण्वती वत्सं प्रति हिंकारं कुर्वती वसूनां वसुपत्नी क्षीरदध्याज्यादिबहुधनानां सर्वदा पालयित्री। वृत्त्यवृत्तिभ्यां वसुनः पालयित्रीत्वं। तस्यैवाधिक्यं च प्रतिपाद्यते। पुनः कीदृशी। मनसा वत्समिच्छंती। ईदृशी साभ्यागात्। अभ्यागमत्। इयमागताघ्न्या। गोनामैतत्। अहननीया गौरश्विभ्यां ताभ्यामर्थाय पयः क्षीरं दुहां। दुग्धां। सा तादृशी महते सौभगाय प्रवृद्धाय सौभाग्याय वर्धतां। प्रवृद्धा भवतु। यद्वास्मै सौभगाय क्षीरं वर्धयतां॥

अत्रापि वृष्टिपरत्वेन यथायोगं योग्यं। हिंकृखती वर्षणाय शब्दयंती वसूनां गोसस्यादिधनानां बहूनां वसुपत्नी तेषामेव पालयित्री वत्सं लोकं वत्सवत्पोषणीयं मनसेच्छंती प्रीणयितुमभ्यागात्। अभिगच्छति मेघरूपा। सा चाघ्न्याहंतव्या। प्रस्तुत्येत्यर्थः। पय उदकमश्विभ्यां व्याप्ताभ्यां स्थावरजंगमाभ्यामर्थाय। यद्वा अश्विनौ वाय्वादित्यौ। ताभ्यां सकाशाद्दुहां। दुग्धां। तौ हि वृष्टेर्मोचयितारौ। शिष्टमविशिष्टं॥

प्रवर्ग्येऽभिष्टवे दोहनसमये वत्से मातुः सकाशादपनीयमाने गौरमीमेदित्येषा। सूचितं च। गौरमीमेदनु वत्सं मिषंतं नमसेदुपसीदत। आ॰ ४.७.। इति॥

॥ सैषाष्टविंशी ॥

गौर॑मीमे॒दनु॑ व॒त्सं मि॒षंतं॑ मू॒र्द्धानं॒ हिङ्ङ॑कृणो॒न्मात॒वा उं॑।

सृक्वा॑णं घ॒र्मम॒भि वा॑वशा॒ना मिमा॑ति मा॒युं पय॑ते॒ पयो॑भिः ॥ २८ ॥

गौः। अ॒मी॒मे॒त्। अनु॑। व॒त्सं। मि॒षंतं॑। मू॒र्द्धानं॑। हिङ्। अ॒कृ॒णो॒त्। मात॒वै। ऊं॒ इति॑।

सृक्वा॑णं। घ॒र्मं। अ॒भि। वा॒व॒शा॒ना। मिमा॑ति। मा॒युं। पय॑ते। पयः॑ऽभिः ॥ २८ ॥

गौर्धेनुर्मिषंतं निमीलिताक्षं वत्समनु प्राप्यामीमेत्। शब्दं करोति॥ मीमयतिः शब्दकर्मा॥ यद्वा उक्तं वत्समनु आत्मानं प्रक्षिपति। किंच तस्य वत्सस्य मूर्द्धानं मातवै मातुं निर्मातुं लेहनेन शोधयितुं॥ उशब्दोऽवधारणे॥ हिङ्ङकृणोत्। हिंकारमकरोत्। करोति। किंच सृक्वाणं वत्सस्य शब्दवदनप्रांतं फेनस्य स्रष्टारं घर्मं क्षीरस्य क्षरणशीलं वत्समभि अभिलक्ष्य वावशाना भृशं कामयमाना मायुं शब्दं मिमाति। निर्माति। करोति। तादृशी सती पयोभिः प्रभूतैः क्षीरैः पयते। प्यायते। आप्यायनं करोति वत्सं॥ अत्रापि मेघपरतया योजनीयं। एवमाहूता मेघरूपा गौर्धेनुर्मिषंतं वृष्टिरूपक्षीराभावेन निमीलिताक्षलोकाख्यं पुत्रमनु अनुसृत्यामीमेत्। गर्जनशब्दं वर्षणचिह्नरूपं करोति। मूर्द्धस्थानीयां भूमिं मातवा उ निर्मातुमेव सस्यादियुक्तां कर्तुं हिङ्ङकृणोत्। हिंकाररूपं शब्दमकरोत्। प्रतिपादनभेदादपुनरुक्तिः। किंच सृक्वाणं फलस्य स्रष्टारं घर्मं दीप्तं पुत्रमभिवावशानाभिमुख्येन कामयमाना पयोभिरुदकैः पयते। प्यायते। आप्यायनं करोति॥

॥ अथैकोनत्रिंशी ॥

अयं स शिंक्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवंती प्रति वव्रिमौहत ॥ २९ ॥
अयं । सः । शिंक्ते । येन । गौः । अभिऽवृता । मिमाति । मायुं । ध्वसनौ । अधि । श्रिता ।
सा । चित्तिऽभिः । नि । हि । चकार । मर्त्यं । विऽद्युत् । भवंती । प्रति । वव्रिं । औहत ॥ २९ ॥

सोऽयं वत्सः शिंक्ते । अव्यक्तध्वनिं करोति । येन वत्सेन गौर्माताभीवृता । आगत्याभितो वेष्टिता भवति । किंच सा गौर्मायुं शब्दं मिमाति । निर्मिमाति । कुत्र स्थिता । ध्वसनावधि श्रिता । ध्वसनस्थाने गवां निवासाश्रयेऽधिष्ठिता । सा तादृशी चित्तिभिर्ज्ञानैस्तत्पूर्वकैः कर्मभिर्वा मर्त्यं नि चकार हि । नीचैः करोति । ज्ञानविशिष्टा मनुष्या यथा बालकस्यादनस्तनपानादिस्नेहं कुर्वंति ततोऽप्यतिशयमियं करोतीत्यर्थः । किंच विद्युद्भवंती बहुक्षीरमया विद्योतमाना वव्रिं स्वकीयं रूपं । वव्रिरिति रूपनाम । रूपं प्रत्यौहत । प्रकाशयति । यद्वा वत्सस्नेहातिशयस्वरूपं विद्युद्भवंती विद्युदिव शीघ्रदर्शनौहत । अयमेकार्थः ॥ अर्थांतरं च । शाकपूर्णिर्नाम निरुक्ताचार्यः सकलमंत्रदेवता जानामीत्यभिमानितवान् । दुर्ज्ञेयस्य तत्त्वस्य स्वरूपमसौ जानाति किलैनं व्यामोहयामीति मनसि कृत्वा संदिग्धोभयलिंगा देवता प्रादुरासीदथ तस्य पुरतः । स च तां न बुबुधे । बुबुत्सया च तां स्वरूपं प्रदर्शयेति पप्रच्छ । सा चायं स शिंक्त इत्येषा मद्देवता तत्र प्रतीयमानं मत्स्वरूपमित्युपदिदेश । नि॰ २.८. । कथमत्रोभयलिंगत्वं वस्तुत उभयलिंगत्वे कथं दैवतैक्यमिति उच्यते । अत्रोभयलिंगत्वमुभयथा संभवति स्त्रीपुंल्लिंगद्वयेन मध्योत्तमलिंगद्वयेन च । तत्कथं । अयं स येनेति पुंल्लिंगवाचिना शब्दत्रयेण मेघः प्रतीयते । अधिश्रिता सेत्यादिना स्त्रीलिंगवाचकेन माध्यमिका वाक् । अत उभयलिंगत्वं । तथा विद्युद्भवंतीत्यंतं मध्यमलिंगं तत्र मेघस्तनितयोर्माध्यमिकयोः प्रतीतेः । तथा सति वव्रिमौहतेत्यत्र वर्षेण पृथिवीं प्रच्छाद्य तस्या रसं प्रत्यादत्त इत्ययमर्थो विवक्षितः । स चादित्यव्यापार इत्युत्तमलिंगत्वं । तर्हि वस्तुत उभयलिंगत्वप्रतीतेरुभे अपि देवते यल्लिंगं सा देवतेति न्यायात् । अतः कथमेकदेवतासिद्धिरिति अयं स येनेत्येतेषां व्यत्ययाश्रयणेन सर्वदेवतानामधिष्ठात्मिकाया एकत्वश्रवणेन वा सर्वफलदात्मन एकत्वाश्र-

यणेन वा देवतैक्योपपत्तेः। अनेन मध्यमोत्तमभेदेनोभयलिंगत्वपक्षेऽपि देवतैक्यमुक्तं भवति। अत एकैव वा महानात्मा देवतेत्युक्तत्वाद्वस्तुतो देवतैक्यं अधिष्ठात्रधिष्ठानभेदेन भेदश्च न विरुध्यते॥ अयं स शिंक्ते। इयं सा माध्यमिकाया वाचोऽधिष्ठात्री देवता शिंक्ते। अव्यक्तध्वनिं करोति। येन गौरभीवृता। गौरिति वाङ्नाम। माध्यमिका वाक् ययाभिवृता। अभितो व्याप्ता। अधिष्ठितेत्यर्थः। सेयं शिंक्ते। अथवा अयं स शिंक्त इति नैव माध्यमिका वाक् निर्दिश्यते अपि तु मेघः। तस्यां वाचि शिंजानायां स एव शिंक्त इत्युपचर्यते मंचाः क्रोशंतीतिवत्। अयं स मेघः शब्दं करोति येन माध्यमिका वागभिव्याप्ता। शब्दने प्रकार एवोच्यते। मिमाति मायुं। स्तनितलक्षणं शब्दं करोति। अथवायं। लुप्तोपमा। मिनोति स्वतेजः सर्वत्र प्रक्षिपतीति मायुरादित्यः। तमिवातिदीप्तं करोतीत्यर्थः। अथवा सामर्थ्यादात्मानमादित्यसदृशं निर्मिमीते। कुत्र स्थिता। ध्वसनावधिश्रिता। ध्वंसने मेघेऽधिश्रिता। सा ईदृशी चित्तिभिः। कर्मनामैतत्। स्वकर्मभिर्वृष्टिरूपैर्मर्त्यं मरणधर्माणं स्थावरजंगमरूपं कृत्स्नं जगन्नि हि चकार। नीचैः करोति। मनुष्यान्प्रणतान्करोति। ओषध्यादिकं फलेनावनतं करोति। अथवा चित्तिभिर्द्योतनलक्षणैः कर्मभिः। विद्युति विद्योतमापद्यमाना प्रति वव्रिमौहत। वव्रिरिति रूपनाम। ऊहतिरत्र सामर्थ्यादुपसंहारवाची। प्रत्युपसंहरति। उदकलक्षणं रूपं पुनरादत्ते। रश्मिद्वारा वृष्टमुदकं पुनर्घर्मकाल आदत्ते। एकस्यैव ज्योतिषस्त्रेधाकरणाद्विद्युतः सूर्यरश्मिभाव उपपद्यते। तमू अकृण्वन् त्रेधा भुवे कमिति वक्ष्यमाणत्वात्। स्तनितस्य विद्युद्भावो मेघविद्युत्स्तनितानामभेदाभिप्रायेण॥

इदं शरीरं जीवावस्थायां। अनेन देहस्यासारता देहस्यानित्यत्वं च प्रतिपाद्यते॥

॥ अथ त्रिंशी ॥

अनच्छये तुरगातु जीवमेजद्ध्रुवं मध्य आ पस्त्यानां।

जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः॥ ३०॥

अनत्। शये। तुरऽगातु। जीवं। एजत्। ध्रुवं। मध्ये। आ। पस्त्यानां।

जीवः। मृतस्य। चरति। स्वधाभिः। अमर्त्यः। मर्त्येन। सऽयोनिः॥ ३०॥

अनत् प्राणनं कुर्वत् जीवं जीवनवत्तुरगातु स्वव्यापाराय तूर्णगमनं सदे-

जच्छये। शेते वर्तते। पश्चात्प्राणायामानंतरमुक्तविलक्षणं सत् ध्रुवमविचलितं सत् पस्त्यानां गृहाणां मध्ये। अथैतेष्वा स्थाणुवत्तिष्ठति। आकारः पूरणो वा। जीवस्य वैलक्षण्यमाह। मृतस्य शरीरस्य संबंधी जीवो मर्त्येन मरणधर्मकेन शरीरेण सयोनिः। पूर्वं समानोत्पत्तिस्थानः। यद्यपि जीवस्य न जन्मास्ति तथापि वपुषस्तत्सद्भावात्तत्संबंधेनोपचर्यते। तदेवाह। अमर्त्योऽमरणस्वभावः। जीवापीतं वाव किलेदं म्रियत इति श्रुतेः। उक्तस्वभावो जीवः स्वधाभिश्चरति। पुत्रकृतैः स्वधाकारपूर्वकदत्तैरन्नैश्चरति। वर्तत इत्यर्थः॥

॥ इति द्वितीयस्य तृतीय एकोनविंशो वर्गः॥

प्रवर्ग्येऽभिष्टवेऽपश्यं गोपामित्येका विनियुक्ता। सूचितं च। अपश्यं गोपामनिपद्यमानं स्रक्के द्रप्सस्य। आ॰ ४. ६.। इति॥

॥ सैषा सूक्त एकत्रिंशी॥

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरंतं।

स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वंतः॥ ३१॥

अपश्यं। गोपां। अनिऽपद्यमानं। आ। च। परा। च। पथिऽभिः। चरंतं।

सः। सध्रीचीः। सः। विषूचीः। वसानः। आ। वरीवर्ति। भुवनेषु। अंतरिति॥ ३१॥

अहं गोपां सर्वस्य लोकस्य वृष्टिप्रकाशादिना गोपायितारमनिपद्यमानं कदाचिदप्यविषण्णं। तथा पथिभिर्विचित्रैर्मार्गैरंतरिक्षरूपैराचरंतं च परा चरंतं च। उदयप्रभृत्या मध्याह्नमागच्छंतं मध्याह्नप्रभृत्या सायं पराङ्मुखं गच्छंतं। एवं महानुभावमादित्यमपश्यं। याथात्म्येन पश्येयं। किंच स आदित्यः सध्रीचीः सहांचतीर्विषूचीर्विष्वगंचती रात्रावपि चंद्रभौमादित्यानां प्रकाशयित्रीस्त्विषो वसान आच्छादयन् भुवनेषु भुवनैकदेशेषु लंकादिप्रदेशेष्वंतर्मध्य आवरीवर्ति। उदयास्तमयं कुर्वन् पुनःपुनरावर्तते। तमपश्यमित्यर्थः। एष वै गोपा एष हीदं सर्वं गोपायतीत्याद्यस्य ब्राह्मणं। अपश्यं गोपामित्याह असौ वा आदित्यो गोपा स हीमाः प्रजा गोपायतीत्यादि तैत्तिरीयकं च द्रष्टव्यं॥

॥ अथ द्वात्रिंशी॥

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात्।

स मातुर्योना परिवीतो अंतर्बहुप्रजा निर्ऋतिमा विवेश॥ ३२॥

यः। ई॒। च॒कार॑। न। सः। अ॒स्य। वे॒द॒। यः। ई॒। द॒दर्श॑। हि॒रुक्। इत्। नु। तस्मा॑त्।
सः। मा॒तुः। योना॑। परि॑ऽवीतः। अं॒तः। ब॒हु॒ऽप्र॒जाः। निः॒ऽऋ॑तिं। आ। वि॒वे॒श॒ ॥ ३२॥

अत्र गर्भवासक्लेशपूर्वकजननप्रतिपादनेन तत्परिहारायात्मा ज्ञातव्य इत्यर्थात्प्रतिपाद्यते। यः पुमान् पुत्रार्थमीमेनं गर्भं चकार। करोति विक्षिपति वा। तत्कारणभूतस्य विक्षेपद्वारेण न स पुमानस्य तत्त्वं वेद॥ कर्मणि षष्ठी वा॥ एनं गर्भं न जानाति। कथंभूतः कथं वा केन प्रयोजनेनेति सर्वात्मना न जानातीत्यर्थः। यश्च मातुरुदरस्थं ददर्शोदरवृद्ध्यन्यथानुत्पत्त्यानुमानेन वा दर्शयति तस्माद्द्रष्टुः सकाशात्स हिरुक् नु॥ हिरुगित्यंतर्हितनाम। इच्छब्द एवकारार्थः। नु निश्चये॥ अत्यंतमंतर्हित एव खलु॥ यद्वा यः संसारावस्थायामीमेनं कृषिवाणिज्यवेदाध्ययनादिकं चकार सोऽस्य एतन्न वेद लोकांतरे जन्मांतरे वा। तथा य ईमेनं ददर्श गिरिनदीसमुद्रबंध्वादिकं ददर्श जीवसमये। तस्माद्दृष्टाद्धिरुगिन्नु। पृथगेव। अत्रानुभूतं सर्वं न जन्मांतरे लोकांतरे वानुभवतीत्यर्थः। स तादृशो मातुर्जनन्या योना योनावंतः परिवीत उल्वजरायुभ्यां परितो वेष्टितः सन् बहुप्रजाः। बहुजन्मभाक्। अथवा उत्पन्नः सन् स्वयमप्यपत्योत्पादनेन बहुप्रजाः। एवं गर्भदुःखमनुभवन् निर्ऋत्यभिधानं प्रदुःखमनुभवति यावत् स्वरूपभूतात्मज्ञानं। अतस्तत्परिहारायात्मा ज्ञातव्य इत्युक्तं भवति। एवमात्मविदामभिप्रेतोऽर्थः॥ नैरुक्तानां तु मते य ईं चकार मध्यस्थानो वायुर्मेघो वैतद्वृष्ट्युदकं करोति। सोऽस्य तत्त्वमिति शेषः। अथवा एतत्कर्म न जानाति तयोरचेतनत्वादिति भावः। यस्तु ईमेतद्ददर्श पश्यति तस्मादपि हिरुक् अंतर्हितः। प्राणिकर्मवशेन काले वर्षिता परमेश्वर आदित्यात्मनि गूढ इत्यर्थः। य ईं हिरुक् अंतर्हितमीमेतद्ददर्श पश्यति स वृष्टिलक्षणः पुत्रो मातुर्निर्मातुरंतरिक्षस्य योनौ योनिवदुत्पत्त्याधारभूतेऽंतरिक्षे। उभयोरप्यंतरिक्षनामत्वात्सामान्यविशेषभावो द्रष्टव्यः। अंतरिक्षैकदेशे योन्यामंतर्मध्ये बहुप्रजाः। बहुप्रजातान्नो बहुप्राण्युपकारी। अथवा जनिरत्रांतर्भावितण्यर्थः। बहूनां धाराणां सस्यनिष्पादनद्वारेण प्राणिनां वा प्रजनयिता सन् निर्ऋतिं निरमणसाधनां भूमिमाविवेश। प्रविशति प्राप्नोतीत्यर्थः॥

॥ अथ त्रयस्त्रिंशी ॥

द्यौर्मे॑ पि॒ता ज॑नि॒ता नाभि॒रत्र॒ बंधु॑र्मे मा॒ता पृ॑थि॒वी म॒हीयं।
उ॒त्ता॒नयो॑श्च॒म्वो॒३॒॑र्योनि॑र॒ंतरत्रा॑ पि॒ता दु॑हि॒तुर्गर्भ॒माधा॑त् ॥ ३३ ॥

द्यौः। मे। पिता। जनिता। नाभिः। अत्र। बंधुः। मे। माता। पृथिवी। मही। इयं।
उत्तानयोः। चम्वोः। योनिः। अंतः। अत्र। पिता। दुहितुः। गर्भं। आ। अधात् ॥ ३३॥

दीर्घतमा ब्रवीति मे मम द्यौर्द्युलोकः पिता पालकः। न केवलं पालकत्वमात्रं अपि तु जनिता जनयितोत्पादयिता। तत्रोपपत्तिमाह। नाभिरत्र। नाभिभूतो भौमो रसोऽत्र तिष्ठतीति शेषः। ततश्चान्नं जायते अन्नाद्रेतः रेतसो मनुष्य इत्येवं पारंपर्येण जननसंबंधिनो हेतो रसस्यात्र सद्भावात्। अनेनैवाभिप्रायेण जनितेत्युच्यते। अत एव बंधुर्बंधिका तथेयं मही महती पृथिवी मे माता मातृस्थानीया स्वोद्भूतौषध्यादिनिर्मात्रीत्यर्थः। किंच उत्तानयोरूर्ध्वतनयोश्चम्वोः सर्वस्याप्योर्भोगसाधनयोर्द्यावापृथिव्योरंतर्मध्ये योनिः सर्वभूतनिर्माणाश्रयमंतरिक्षं वर्तत इति शेषः। अत्रास्मिन्नंतरिक्षे पिता द्युलोकः। अधिष्ठात्रधिष्ठानयोरभेदेनादित्यो द्यौरुच्यते। स्वरश्मिभिः। अथवा इंद्रः पर्जन्यो वा। दुहितुर्दूरे निहिताया भूम्या गर्भं सर्वोत्पादनसमर्थं वृष्ट्युदकलक्षणमाधात्। सर्वतः करोति ॥

आश्वमेधिके मध्यमेऽहनि ब्रह्मोद्ये होत्रादयः पृच्छामि त्वेत्यनया यजमानं पृच्छेयुः। तथा च सूत्रितं। एकैकशो यजमानं पृच्छंति पृच्छामि त्वा परमंतं पृथिव्याः। आ॰ १०. ९.। इति ॥

॥ सैषा चतुस्त्रिंशी ॥

पृच्छामि त्वा परमंतं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥ ३४॥
पृच्छामि। त्वा। परं। अंतं। पृथिव्याः। पृच्छामि। यत्र। भुवनस्य। नाभिः।
पृच्छामि। त्वा। वृष्णः। अश्वस्य। रेतः। पृच्छामि। वाचः। परमं। विऽओम ॥ ३४॥

हे यजमान त्वा त्वां पृच्छामि। प्रश्नं करोमि। किं। पृथिव्याः परमंतं। उत्कृष्टां काष्ठां। यत्र सर्वा पृथिवी समाप्यते तत्पृच्छामि। तथा त्वामन्यत्पृच्छामि। किं तदिति उच्यते। यत्र भुवनस्य भूतजातस्य नाभिः संनाहो बंधनं। यत्र सर्वं संनद्धं भवति तमित्यर्थः। किंच त्वा त्वां वृष्णो वर्षकस्याश्वस्य व्याप्तस्यादित्यस्य। असौ वा आदित्यो वृषाश्व इति तैत्तिरीयकं। तस्य रेतो रेतोवत्कारणं तत्किमिति

पृच्छामि। तथा वाचः सर्वस्य वाग्जातस्य परमं निरतिशयं व्योम स्थानं सर्वस्य वचसः कारणं। एतत्प्रश्नचतुष्टयं पृच्छामि ॥

अथैवं पृष्टो यजमान इयं वेदिरित्यनया प्रतिब्रूयात्। इयं वेदिः परो अंतः पृथिव्या इति प्रत्याह। आ॰ १०. ९.। इति सूचितत्वात् ॥

॥ सैषा पंचत्रिंशी ॥

इयं वेदिः परो अंतः पृथिव्या अयं यज्ञो भुवनस्य नाभिः।

अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ३५ ॥

इयं। वेदिः। परः। अंतः। पृथिव्याः। अयं। यज्ञः। भुवनस्य। नाभिः।

अयं। सोमः। वृष्णः। अश्वस्य। रेतः। ब्रह्मा। अयं। वाचः। परमं। विऽओम ॥ ३५ ॥

पृथिव्याः प्रथनवत्या भूम्याः परो अंतः परमंतं पर्यवसानमियं वेदिः। न हि वेद्यतिरिक्ता भूमिरस्ति। एतावती वै पृथिवी यावती वेदिरिति श्रुतेः। तथायं यज्ञो भुवनस्य भूतजातस्य नाभिः संनहनं। तत्रैव वृष्ट्यादिसर्वफलोत्पत्तेः सर्वप्राणिनां बंधकत्वात्। अथ वृष्णो वर्षकस्यादित्यस्य रेतोऽयं सोमो रसात्मकः। अग्नौ हुतः सोमरस आदित्यं प्राप्य वृष्ट्यादिफलं जनयति। अयं ब्रह्मा प्रजापतिरेव वाचो मंत्रादिरूपायाः परमं व्योम। उत्कृष्टं रक्षकं स्थानं। तत्रैवोत्पत्तेस्तत्रैव पर्यवसानाच्च ॥

॥ इति द्वितीयस्य तृतीये विंशो वर्गः ॥

॥ अथ षट्त्रिंशी ॥

सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठंति प्रदिशा विधर्मणि ॥

ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवंति विश्वतः ॥ ३६ ॥

सप्त। अर्धऽगर्भाः। भुवनस्य। रेतः। विष्णोः। तिष्ठंति। प्रऽदिशा। विऽधर्मणि।

ते। धीतिऽभिः। मनसा। ते। विपःऽचितः। परिऽभुवः। परि। भवंति। विश्वतः ॥ ३६ ॥

सप्त सर्पणस्वभावाः सप्तसंख्या वा रश्मयोऽर्धगर्भाः संवत्सरस्यार्धे गर्भे गर्भस्थानीयमुदकं धारयमाणाः। यद्वा ब्रह्मांडस्यार्धे मध्येऽतरिक्षे गर्भवद्वर्तमानाः। भुवनस्य लोकस्य रेतः सारं। वृष्टिप्रदत्वेन रेतोभूताः। तादृशा रश्मयो विष्णोर्व्यापकस्यादित्यस्य विधर्मणि जगद्धारणव्यापारे प्रदिशा प्रदेशेन तिष्ठंति। वर्तंते।

किंच ते धीतिभिः प्रज्ञाभिर्मनसा जगदुपकारः कर्तव्य इति बुद्ध्या च विश्वतः सर्वतः ॥ द्वितीयार्थे तसिः। विश्वं परिभवंति। परितो भावयंति। कृत्स्नं जगद्व्याप्नुवंतीत्यर्थः। यस्मादेवं तस्मात्ते त एव विपश्चितो बुद्धियुक्ताः परिभुवः सर्वत्र व्याप्ताश्च ॥ यद्वा सप्तार्धगर्भाः। सप्त महदहंकारौ पंच तन्मात्राणीति मिलित्वा सप्तसंख्यानि तत्त्वानि। अर्धगर्भाः। अविकृतिरूपाया विकाराश्रयाया मूलप्रकृतेः प्रकृतिविकृतेरुदासीनस्यात्मनश्चोत्पन्नत्वादर्धांशेन प्रपंचाकारेण परिणामादर्धगर्भाः पुरुषांशस्याविक्रियत्वादित्यभिप्रायः। अत एव तेषां प्रकृतिविकृतित्वं। यस्मादेवं तस्माद्भुवनस्य रेतः कारणं। कारणभूतानि तान्येव विष्णोर्व्याप्तस्य पुरुषस्य विधर्मणि प्रदिशा प्रदेशेन तिष्ठंति। इतरत्समानं ॥

॥ अथ सप्तत्रिंशी ॥

न वि जा॑नामि॒ यदि॑वे॒दमस्मि॑ नि॒ण्यः संन॑द्धो॒ मन॑सा चरामि।
य॒दा मागं॑न्प्रथम॒जा ऋ॒तस्यादिद्वा॒चो अ॑श्नुवे भा॒गम॒स्याः ॥ ३७ ॥

न। वि। जा॒ना॒मि॒। यत्ऽइ॑व। इ॒दं। अस्मि॑। नि॒ण्यः। संऽन॑द्धः। मन॑सा। च॒रा॒मि॒। य॒दा। मा॒। आ। अग॑न्। प्र॒थ॒म॒ऽजाः। ऋ॒तस्य॑। आत्। इत्। वा॒चः। अ॒श्नु॒वे॒। भा॒गं। अ॒स्याः ॥ ३७ ॥

अहं यदिवेदं यदपीदं विश्वमस्मि। कृत्स्नः प्रपंचोऽप्यहमेवास्मि। नामरूपांशं परमार्थं त्यक्त्वा सर्वत्रानुगतोऽस्मि। योऽयं सच्चिदानंदाकारोऽस्ति सोऽहमस्मीति न विजानामि। विविच्य नाज्ञासिषं। परं शास्त्रजनितमिदमहमस्मीति ज्ञानं जातं। अविवेक्यहमित्यर्थः। कार्यकारणयोरभेदात्। कृत्स्नप्रपंचस्यापि ब्रह्मानन्यत्वेन ब्रह्मैकत्वावगमे प्रपंचजातमपि स्वस्वरूपमेव भवति। इदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वं आत्मैवेदं सर्वं स ईक्षत बहु स्यां प्रजायेयेत्यादिश्रुतिभ्य एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात्। तदनन्यत्वमारंभणशब्दादिभ्य इत्याद्युपपत्तिभिश्च प्रपंचस्य ब्रह्मानन्यत्वं सिद्धं ॥ यद्वा इवशब्द उपमार्थः। यदिव यत्परोक्षज्ञानं सर्वैकात्म्यरूपमानुभाविकमस्ति। तदिव तद्वदेवाहमस्मि। इदं सर्वमहमस्मीति ज्ञानं मे जातं। अपि त्वेतद्दार्ष्टांतिकभूतं। आनुभविकं सार्वात्म्यं यदस्ति तन्न विजानामि। न प्राप्तोऽस्मि। शास्त्रजनितं सार्वात्म्यं जातं न त्वानुभाविकमित्यर्थः। तत्र कारणमाह। यतोऽहं निण्यः। अंतर्हित-

नामैतत्। अंतर्हितो मूढचित्तः। चित्तप्रत्यक्प्रवणाभावेन परिच्छिन्न इत्यर्थः। तत्रोपपत्तिमाह। संनद्धोऽविद्याकामकर्मभिः सम्यक् बद्धो वेष्टितः। अत एव मनसा युक्तो भावनासहिष्णुना वहिर्मुखेन विक्षिप्तेन चेतसा युक्तः संचरामि संसारे। अथवा मनसा संनद्धश्चरामि। इंद्रियपरवश एव सन् संसारे दुःखमनुभवामि। न सार्वात्म्यं जानामीति परिदेवते। यास्कोऽपीमं परिदेवनार्थत्वेनोदाजहार। अथापि परिदेवना कस्माच्चिद्भावात् न वि जानामि यदिवेदमस्मि। नि॰ ७. ३.। इति। वहिर्मुखचेतसः स्वरूपापरिज्ञानजनितं दुःखमन्यत्र श्रूयते। पराग्विश्वानि व्यवृणत्स्वयंभूस्तस्मात्पराङ् पश्यंति नांतरात्मन्निति। तर्हि कदैतद्भवतीत्याह। यदा मागन् आगमिष्यति तदा। किं तदित्युच्यते। ऋतस्य परमार्थस्य परस्य ब्रह्मणः प्रथमजाः प्रथमोन्मेषः प्रथमोत्पन्नश्चित्तप्रत्यक्प्रवणजनितोऽनुभावः। स यदा मा मां प्राप्नोति आदित् अनंतरमेवाव्यवधानेनास्या वाच ऐकात्म्यप्रतिपादिकाया उपनिषद्वाचो यदिवेदमस्मीत्युक्ताया वा भागं भजनीयं शब्दब्रह्मणा व्याप्तव्यं परं ब्रह्मपदमश्नुवे। प्राप्नोमि। चित्तस्य वहिर्मुखतां परित्यज्यांतर्मुखतैवादुःसंपादा। सा यदा स्यात् तदानीमेव स्वरूपं द्रष्टुं सुशकं भवति। पश्चाद्विलंबाभावात् यथा गिरिशिखरात्पतन् पाषाणोऽविलंबेन पतति तद्वत्। चित्तप्रत्यङ्मुखत्वस्य दुःशकत्वमपि तत्रैव श्रूयते। कश्चिद्धीरः प्रत्यगात्मानमैच्छदावृत्तचक्षुरमृतत्वमिच्छन्निति ॥

॥ अथाष्टत्रिंशी ॥

अपा॒ङ् प्राङे॑ति स्व॒धया॑ गृभी॒तोऽम॑र्त्यो॒ मर्त्ये॑ना॒ सयो॑निः।
ता शश्व॑न्ता विषू॒चीना॑ वि॒यन्ता॒ न्य१॒॑न्यं चि॒क्युर्न नि चि॑क्युर॒न्यं ॥ ३८ ॥
अपा॑ङ्। प्राङ्। ए॒ति॒। स्व॒धया॑। गृ॒भी॒तः। अम॑र्त्यः। मर्त्ये॑न। सऽयो॑निः।
ता। शश्व॑न्ता। वि॒षू॒चीना॑। वि॒ऽयन्ता॑। नि। अ॒न्यं। चि॒क्युः। न। नि। चि॒क्युः। अ॒न्यं ॥ ३८ ॥

अमर्त्योऽमरणधर्मायमात्मा मर्त्येन मरणधर्मणा भूतात्मना देहेन सयोनिः। समानस्थानः। यत्र परिच्छेदको देहोऽस्ति तत्र सर्वत्र सोऽयमपि तिष्ठन्नित्यर्थः। यद्वा समानोत्पत्तिः। सहवासेन स्वस्मिन्नप्युत्पत्तिरुपचर्यते। एवंभूतः सन् स्वधयान्नोपलक्षिततद्भोगेन गृभीतः। यद्वा स्वधाशब्देनान्नमयं शरीरं लक्ष्यते। तेन गृहीतः सन्नपाङेति। अपुण्यं कर्म कृत्वाधो गच्छति। प्राङेति। स्वर्गादिलोकं

प्राप्नोति। परमात्मैव सूक्ष्मशरीरोपाधिकः सन् नानाविधकर्म कृत्वा तद्भोगाय जीवसंज्ञां लब्ध्वा शरीरत्रयेण संबद्धो लोकांतरेषु संचरति। स्थूलसूक्ष्मोभयशरीरपरिग्रहेण लोके गुणत्रयान्वितः सन् परिभ्रमति। तथा च श्रूयते। गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता। स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिरिति। इदानीमुभयप्राधान्येनाह। ते तौ भूतात्मकर्त्रात्मानौ शश्वंताविभागेन सर्वदा वर्तमानौ। यद्वा सूक्ष्मशरीरपक्षे सर्वदा सहवास उपपद्यते। स्थूलशरीरपक्षेऽपि सात्विकजातेः। तत्कारणानां भूतसूक्ष्माणां सद्भावात्तत्र शरीरसंबंध उपपद्यते। विषूचीना। इह लोके सर्वत्रगमनौ। वियंता तत्तत्फलोपभोगाय सर्वलोकांतरेषु गच्छंतौ वर्तेते। तत्र नरा अन्यं भूतात्मानं निचिक्युः। नितरां विशेषेण पश्यंति जानंति। अन्यमपरं देहवच्छायातिरिक्तं न निचिक्युः। न जानंति। केचन पामरा देहव्यतिरिक्तं न जानंति। केचन विवेकिनः कर्तृत्वभोक्तृत्वोपेतो देहातिरिक्तः कश्चिदस्तीत्यनुमिमते। न केऽपि देहत्रयव्यतिरिक्तमात्मानं जानंति। अतो दुर्लभमात्मज्ञानमित्यर्थः॥

॥ अथैकोनचत्वारिंशी ॥

ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥३९॥
ऋचः। अक्षरे। परमे। विऽओमन्। यस्मिन्। देवाः। अधि। विश्वे। निऽसेदुः।
यः। तत्। न। वेद। किं। ऋचा। करिष्यति। ये। इत्। तत्। विदुः। ते। इमे। सं। आसते॥३९॥

पूर्वमंत्रे देहात्मजीवात्मानावुक्तौ। तयोरन्यस्य जीवात्मनः पारमार्थिकं रूपमस्ति तदत्रोच्यते। ऋचो अक्षरे। अत्र ऋक्शब्देन ऋक्प्रधानभूताः सांगापरविद्यात्मकाश्चत्वारो वेदा उच्यंते। ऋगादीनामपरविद्यात्वं मुंडके श्रूयते। द्वे विद्ये वेदितव्ये इति प्रतिज्ञाय तत्रापरा ऋग्वेदो यजुर्वेदः सामवेद इत्यादिना। तस्याः संबंधिन्यक्षरेऽदृश्यादिगुणके क्षरणरहितेऽनश्वरे नित्ये सर्वत्र व्याप्ते ब्रह्मणि। अक्षरशब्दस्य ब्रह्मवाचकत्वमेतद्वै तदक्षरस्य प्रशासने गार्गि यया तदक्षरमधिगम्यते येनाक्षरं पुरुषं वेद सत्यमित्यादिश्रुतिषु प्रसिद्धं। ऋगक्षरयोः प्रतिपाद्यप्रतिपादकभावः संबंधः। सर्वैर्वेदैः खलु ब्रह्माधिगम्यते। तं त्वौपनिषदं पुरुषं पृच्छामीत्यादिश्रुतेः। ननूपनिषद्भागानां तथास्तु। इतरेषां तु कथं ब्रह्मविषय-

त्वमिति उच्यते। यद्यपीतरभागानां यागादिविषयत्वं तथापि बुद्धिः श्रुत्युत्पादनद्वारा वेदसाधनत्वेन ब्रह्मविषया भविष्यति वेदानुवचनेन ब्राह्मणा विविदिषंतीत्यादिश्रुतेः। तदेव विशेष्यते। परम उत्कृष्टे निरतिशये व्योमन् व्योमनि व्योमसदृशे। अलेपत्वनीरूपत्वव्यापित्वादिसादृश्येन व्योमेत्युक्तं। यद्वा विशेषेण सर्वस्य रक्षके। निरधिष्ठा न कस्यचिदस्ति स्वाध्यस्तस्य सर्वस्याधिष्ठानत्वेन रक्षकत्वात्। तादृशे तत्त्वे सर्वमध्यस्तमित्यर्थः। पुनस्तदेव विशेष्यते। यस्मिन्परमात्मनि विश्वे सर्वे देवा अधि निषेदुः। निषीदंति। आश्रित्य तिष्ठंति। तस्मिन्। यद्वोक्तलक्षणे वस्तुनि ऋगुपलक्षिताः सर्वे सांगा वेदाः पर्यवसिता इत्यर्थः। यः यो मर्त्यस्तत्तादृशं देवादीनां स्वरूपलाभास्पदं कृत्स्नवेदैस्तात्पर्यं प्रतिपाद्यं यद्वस्तु न वेद न जानाति। स मर्त्य ऋचा पूर्वोक्तेन ऋगादिशब्दजालेन किं करिष्यति। वेदनसाधनेन वेदेन वेद्यमविदित्वा किं साधयतीत्यर्थः। प्रयोजनाभावात्सर्वस्यापि वेदस्य वैफल्यादिति भावः। अथवा योऽक्षरमविदित्वा कर्मणां कर्ता भवति यागादीननुतिष्ठति तेन किंचिदपि कर्म कृतं न भवतीत्यर्थः। य इत् य एव तत्तत्त्वं विदुर्जानंति त इमे समासते। त एवेमे ज्ञातारः समासते। सम्यक् तिष्ठंति। अपुनरावृत्त्या स्वरूपेऽवस्थानं समासनं। यद्वा ये विदुरित् ये जानंत्येव नानुतिष्ठंति। इच्छब्दोऽवधारणे। त इमे त एव समासते। गवामयनादिसहस्रसंवत्सरसत्रपर्यंतानि सहोपयंति। सहार्थे समृशब्दः। सत्रादधिकानां यागानामभावात् तेषामपि फलमेतज्ज्ञानेनैव प्राप्तं भवतीत्यर्थः। कर्तॄणां बहुत्वाद्बहुवचननिर्देशः॥ अन्ये त्वन्यथा वर्णयंति। ऋचः। ऋगर्चनीय आदित्य आदित्यमंडलमृगादिमयं वा। ऋग्भिः पूर्वाह्णे दिवि देव आदित्यो वा एष एतन्मंडलं तपति तत्र ता ऋच इत्यादिश्रुतेः। तस्य संबंधिन्यक्षरे परमे व्योमन्नित्युक्तलक्षणे ब्रह्मणि य एषोऽंतरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादिश्रुत्युक्तस्वरूपे यस्मिन् सर्वे देवा द्योतमाना रश्मयो निषेदुः। वर्तंते। य एतन्न वेद स केवलया ऋचा किं करिष्यति। ये जानंति भावयंति त एव विद्वांसः समासते। भूम्यां सुखेन रोगादिरहिता भोगिनः संतश्चिरकालं जीवंति॥ अपरे प्रकारांतरेण प्रतिपादयंति। ऋचोऽक्षरे ऋगुपलक्षितसर्ववेदसंबंधिन्यक्षरे प्रणवरूप ओंकारेऽविनाशिनि सर्ववेदेषु व्याप्ते वा। प्रणवस्य सर्ववेदसारत्वं ब्राह्मणे श्रूयते। तान्वेदानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायंताकार उकारो मकार इति। तानेकधा समभरत् तदेतदोमितीति। परमे निरतिशये। न हि प्रणवादधिकं

किंचिन्मंत्रजातमस्ति त्रिकालातीतस्य ब्रह्मणः प्रतिपादकत्वात्। यच्चान्यत्त्रिकालातीतं तदप्योंकार एव ओमिति ब्रह्मेत्यादिश्रुतेः। वेदानां प्रणवस्य स्थानप्रतिनिधिभावः संबंधो य ऋचोऽधीत इत्याद्युपक्रम्य यः प्रणवमधीते स सर्वमधीते ओमिति प्रतिपाद्यते। एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरमित्यादिश्रुतेः। यस्मिन्विश्वे सर्वे देवा अधि निषेदुः। प्रणवस्य सर्वमंत्रात्मकत्वात् मंत्रेषु सर्वदेवतानां निवासात् सर्वदेवनिवासत्वं। ब्रह्माधिष्ठानत्वाद्वा ब्रह्मणि सर्वदेवानां निवासात्। शिष्टमविशिष्टं ॥ अयं मंत्रो निरुक्ते व्याख्यातः। नि॰ १३. १०.॥ अपरे त्वपरथा वर्णयंति। ऋचः। ऋगर्चनीयो जीवः। तस्य संबंधिन्यक्षरेऽविनाशे व्याप्ते वा परमात्मनीत्यर्थः। अत एव जीवापेक्षया परम उत्कृष्टे निरुपाधिके व्योमन् विशेषेण सर्वाधिष्ठानत्वेन रक्षके व्योमसदृशे वा। यस्मिन्परमात्मनि देवा गमनवंतो व्यवहरंतो वेंद्रियसंज्ञका विश्वे सर्वेऽप्यधिनिषेदुः। निषीदंति। आश्रित्य वर्तंते। यस्तन्न वेद न जानाति। उपाध्यंशपरित्यागे तदेव स्वरूपमिति न पश्यति स्थूलो जनः किमृचा करिष्यति। केवलेन जीवेन जीवभावेन किं फलं प्राप्स्यति। जननमरणादिक्लेशस्यात्यागादिति भावः। ये तत्तत्त्वं विदुस्त इत्यादि सिद्धं ॥

अग्निहोत्रार्था धेनुर्यदि कुत्सितं शब्दं कुर्यात्तदानीं सूयवसादित्यनया यवसादिकं प्रयच्छेत्। तथा च सूत्रितं। वाश्यमानायै यवसं प्रयच्छेत् सूयवसाद्भगवती हि भूयाः। आ॰ ३. ११.। इति ॥ प्रवर्ग्येऽभिष्टव एषैव परिधानीया। सूत्रितं च। सूयवसाद्भगवती हि भूया इति परिदध्यात्। आ॰ ४. ७.। इति ॥

॥ सैषा चत्वारिंशी ॥

सूयवसाद्भगवती हि भूया अथो वयं भगवंतः स्याम।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरंती ॥ ४० ॥

सुयवसऽअत्। भगऽवती। हि। भूयाः। अथो इति। वयं। भगऽवंतः। स्याम।
अद्धि। तृणं। अघ्न्ये। विश्वऽदानीं। पिब। शुद्धं। उदकं। आऽचरंती ॥ ४० ॥

हे अघ्न्ये। गोनामैतत्। अहननीये हे गौस्त्वं सूयवसात् शोभनयवसस्य तृणादिकस्यात्त्री भगवती। भग इति धननाम। सर्वैर्भजनीयप्रभूतक्षीरादिधनवती भूयाः। भव। हिः पूरणः प्रसिद्धौ वा। लोके यवसादिभक्षणेन क्षीरादिसमृद्धिः

प्रसिद्धा। अथोऽनंतरमेव वयं यजमाना अपि भगवंतः प्रभूतेन धनेन तद्वंतः स्याम। अथैकवारं पूर्वमुक्तमिदानीं सर्वदा कर्तव्यमिति प्रार्थयते। विश्वदानीं विश्वकालं सर्वदा तृणमद्धि। भक्षय। आचरंती सर्वतो निर्गच्छंती शुद्धं निर्मलमुदकं पिब। अयं मंत्रो यास्केनैवं व्याख्यातः। सुयवसादिनी भगवती हि भवाथेदानीं वयं भगवंतः स्यामाद्धि तृणमघ्न्ये सर्वदा पिब च शुद्धमुदकमाचरंती। नि॰ ११. ४४.। इति ॥

॥ इति द्वितीयस्य तृतीय एकविंशो वर्गः ॥

॥ अथैकचत्वारिंशी ॥

गौ॒रीर्मि॑माय सलि॒लानि॒ तक्ष॒त्येक॑पदी द्वि॒पदी॒ सा चतु॑ष्पदी।
अ॒ष्टाप॑दी॒ नव॑पदी बभू॒वुषी॑ स॒हस्रा॑क्षरा पर॒मे व्यो॑मन् ॥ ४१ ॥

गौ॒रीः। मि॒मा॒य॒। स॒लि॒लानि॑। तक्ष॑ती। एक॑ऽपदी। द्वि॒ऽपदी॑। सा। चतुः॑ऽपदी।
अ॒ष्टाऽप॑दी। नव॑ऽपदी। ब॒भू॒वुषी॑। स॒ह॒स्र॑ऽअक्षरा। प॒र॒मे। विऽओ॑मन् ॥ ४१ ॥

गौरीर्गरणशीला माध्यमिका वाक् ॥ सुलोपाभावश्छांदसः ॥ मिमाय। शब्दयति। किं कुर्वंती। सलीलानि वृष्ट्युदकानि तक्षती। सम्यक् संपादयित्री। एकपदी। एकपादोपेतैकाधिष्ठाना मेघे वर्तमाना गमनसाधनेन वायुनैकपदी वा। द्विपदी। मेघांतरिक्षाख्यद्व्यधिष्ठाना। आदित्यो वा द्वितीयः। तथा सा चतुष्पदी। पादचतुष्टयोपेता दिक्चतुष्टयाधिष्ठाना। अथाष्टपदी। अवांतरदिगपेक्षयाष्टपादोपेताष्टाधिष्ठाना। नवपदी। उपरिदिगपेक्षया सूर्येण वा नवदिगधिष्ठाना। बभूवुषी एवंभूता ॥ भवेश्छांदसः क्वसुः। ततो ङीपि वसोः संप्रसारणं ॥ किमनया परिगणनया। सहस्राक्षरा। अपरिमितवचनोऽयं। अपरिमितव्याप्तियुक्ता। बहुव्यापनशीलोदकवतीत्यर्थः। कुत्रेति तदुच्यते। परमे व्योमन्। उदकाश्रयत्वेनोत्कृष्टेऽंतरिक्षे ॥ केचिदेवमाहुः। गौरीर्गरणशीला शब्दब्रह्मात्मिका वाक् मिमाय। मिमति। प्रतिष्ठार्थे धातुः। प्रतिष्ठितानि घटादिद्रव्याणि तक्षती। तत्तद्वाचकत्वेन निष्पादयंती। एकपदी। अव्याकृतत्वेनैकप्रतिष्ठानैकरूपा वात्मना। द्विपदी। सुप्तिङ्भेदेन पादद्वयवती। चतुष्पदी। नामाख्यातोपसर्गनिपातभेदेन। अष्टापदी। आमंत्रितसहिताष्टभेदेनाष्टपदी। नवपदी बभूवुषी। साव्ययैरुक्तैरष्टभिर्नवपदी। अथवा सनाभिकेषूरःकंठादिषु

नवसु पदेषु भवंती पश्चाद्बहुविधाभिव्यक्तिमुपेयुषी परमे व्योमन् उत्कृष्टे हृदयाकाशे मूलाधारे सहस्राक्षरानेकाकारेण व्याप्तानेकध्वनिप्रकारा भवतीत्यर्थः ॥ अयं मंत्र आचार्येणैवं व्याख्यातः। गौरीर्मिमाय सलिलानि तक्षती कुर्वत्येकपदी मध्यमेन चादित्येन च चतुष्पदी दिग्भिरष्टापदी दिग्भिश्चावांतरदिग्भिश्च नवपदी दिग्भिश्चावांतरदिग्भिश्चादित्येन च सहस्राक्षरा बहूदका परमे व्यवने। नि० ११.४०.। इति॥

॥ अथ द्विचत्वारिंशी ॥

तस्याः समुद्रा अधि वि क्षरंति तेन जीवंति प्रदिशश्चतस्रः।
ततः क्षरत्यक्षरं तद्विश्वमुप जीवति ॥ ४२ ॥
तस्याः। समुद्राः। अधि। वि। क्षरंति। तेन। जीवंति। प्रऽदिशः। चतस्रः।
ततः। क्षरति। अक्षरं। तत्। विश्वं। उप। जीवति ॥ ४२ ॥

तस्या उक्ताया गोः सकाशात्समुद्रा वृष्ट्युदकसमुंदनाधिकरणभूता मेघा अधि अधिकं प्रभूतमुदकं विक्षरंति। विविधं क्षरंति। तेनोदकेन प्रदिशश्चतस्रः। प्रशब्दो वीत्यर्थः। विदिशश्चतस्रो दिशश्च। अथवा प्रकृष्टा दिशो मुख्याश्चतस्रः। तत्स्थेषु ताच्छब्द्यं। तत्स्थाः पुरुषा जीवंति। ततः पश्चात्तदक्षरमुदकं क्षरति। सस्यादिकमुत्पादयतीत्यर्थः। तत् सस्यादिकं विश्वं जगदुपजीवति॥ अयमपि यास्केन व्याख्यातः। तस्याः समुद्रा अधिविक्षरंति वर्षंति मेघास्तेन जीवंति दिगाश्रयाणि भूतानि ततः क्षरत्यक्षरमुदकं तत्सर्वाणि भूतान्युपजीवंति। नि० ११. ४१.। इति॥

॥ अथ त्रिचत्वारिंशी ॥

शकमयं धूममारादपश्यं विषूवता पर एनावरेण।
उक्षाणं पृश्निमपचंत वीरास्तानि धर्माणि प्रथमान्यासन् ॥ ४३ ॥
शकऽमयं। धूमं। आरात्। अपश्यं। विषुऽवता। परः। एना। अवरेण।
उक्षाणं। पृश्निं। अपचंत। वीराः। तानि। धर्माणि। प्रथमानि। आसन् ॥ ४३ ॥

शकमयं शकृन्मयं शुष्कगोमयसंभूतं धूममारात् नातिदूर अपश्यं। दृष्टवानस्मि। दिवा धूमस्य दूरे दृश्यमानत्वात्स एव दर्शनविषयतयोक्तः। विषुवता व्याप्तिमतैनानेनावरेण निकृष्टेन धूमेन परः परस्तात्तत्कारणभूतमग्निमपश्यं।

अहं यजमान इत्यर्थः। किंचोक्षाणं फलस्य सेक्तारं पृश्निं शुक्लवर्णं। प्राश्नुते तेन फलमिति स्वयं प्राश्नुत इति वा पृश्निर्वल्लीरूपः सोमः। तं वीरा विविधेरणकुशला ऋत्विजोऽपचंत। अत्र धात्वर्थानादरेण तिङ्प्रत्ययः करोत्यर्थः। स च क्रियासामान्यवचनोऽत्रौचित्यादभिषवेण संपादितवंत इत्यर्थः। तानि तत्साधनानि धर्मान्यनुष्ठानानि प्रथमानि प्रतमानि प्रकृष्टानि फलपर्यवसानीयान्यासन्। संपादितान्यभवन्। यद्वा सोम उक्षाभवत् पूर्वं तं देवाः शकृतापचन्यज्ञार्थे तद्भवो धूमो मेघ आसीत् तदुच्यते। तत्परत्वेन वा मंत्रो व्याख्येयो विचक्षणैः॥

॥ अथ चतुश्चत्वारिंशी ॥

त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषां।
विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपं ॥४४॥

त्रयः। केशिनः। ऋतुऽथा। वि। चक्षते। संवत्सरे। वपते। एकः। एषां।
विश्वं। एकः। अभि। चष्टे। शचीभिः। ध्राजिः। एकस्य। ददृशे। न। रूपं ॥४४॥

केशस्थानीयप्रकृष्टरश्मियुक्तास्त्रयोऽग्न्यादित्यवायवः। ते च ऋतुथा काले काले विचक्षते। विविधलक्षणां भूमिं पश्यंति। तेषां पृथक् पृथक् कार्यमाह। एषां मध्य एकोऽग्निः संवत्सरेऽतीते सति संवत्सरं वपते। दाहेन केशस्थानीयौषधिवनस्पत्यादिकच्छेदनेन नापितकार्यं करोति। एक अन्य आदित्यो विश्वं सर्वं जगत् शचीभिः स्वकीयैः प्रकाशवृष्ट्यादिकर्मभिरभिचष्टे। सर्वतः पश्यति। एकस्य वायोर्ध्राजिर्गतिर्ददृशे। दृश्यते सर्वैः। न रूपं। अप्रत्यक्षत्वात् स्पर्शशब्दधृतिकंपलिंगैर्गम्यत इति हि न्यायविदो वदंति॥ अयमपि मंत्रो यास्केनैव व्याख्यातः। त्रयः केशिन ऋतुथा विचक्षते काले कालेऽभिविपश्यंति संवत्सरे वपत एक एषामित्यग्निः पृथिवीं दहति। सर्वमेकोऽभिपश्यति कर्मभिरादित्यो गतिरेकस्य दृश्यते न रूपं मध्यमस्य। नि॰ १२. २७.। इति॥

वाग्देवते पशौ चत्वारि वागिति हविषोऽनुवाक्या। चत्वारि वाक्परिमिता पदानि यज्ञेन वाचः पदवीयमायन्। आ॰ ३. ८.। इति सूचितत्वात्॥

॥ सैषा पंचचत्वारिंशी ॥

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंति ॥४५॥

च॒त्वारि॑। वाक्। परि॑ऽमिता। प॒दानि॑। तानि॑। वि॒दुः। ब्रा॒ह्म॒णाः। ये। म॒नी॒षिणः॑।
गुहा॑। त्रीणि॑। निऽहि॑ता। न। इ॒ङ्ग॒यं॒ति॒। तु॒रीयं॑। वा॒चः। म॒नु॒ष्याः॑। व॒दं॒ति॒ ॥४५॥

वाक् वाचः कृत्स्नायाः पदानि चत्वारि वाक्परिमिता परिमितानि। लोके या वागस्ति सा चतुर्विधा विभक्तेत्यर्थः। तानि पदानि ब्राह्मणा वेदविदो मनीषिणो मनस इषिणो मेधाविनो विदुः। जानंति। तेषां मध्ये त्रीणि गुहा गुहायां निहिता स्थापितानि नेंगयंति। न चेष्टंते। न प्रकाशंत इत्यर्थः। वाचस्तुरीयं पदं मनुष्या अज्ञास्तज्ज्ञाश्च वदंति। व्यक्तमुच्चारयंति। व्यवहरंति। कानि तानि चत्वारीत्यत्र बहवः स्वस्वमतानुरोधेन बहुधा वर्णयंति। सर्ववैदिकवाग्जालस्य संग्रहरूपा भूरादयस्तिस्रो व्याहृतयः प्रणव एक इति वेदत्रयसारत्वात्तासां व्याहृतीनामेव सारसंग्रहभूतत्वादकाराद्यात्मकस्य प्रणवस्येति सप्रणवासु व्याहृतिषु सर्वा वाक् परिमितेति केचन वेदवादिनो वदंति ॥ अपरे व्याकरणमतानुसारिणो नामाख्यातोपसर्गनिपातभेदेन। क्रियाप्रधानमाख्यातं। द्रव्यप्रधानं नाम। प्रागुपसृज्यत आख्यातपदस्येत्युपसर्गः प्रादिः। उच्चावचेष्वर्थेषु निपतनान्निपातोऽपितुचेत्यादिः। एतेष्वेव सर्वा वाक् परिमितेत्यखंडायाः कृत्स्नाया वाचश्चतुर्धा व्याकृतत्वात्। वाग्वै पराच्यव्याकृतावदत्तामिंद्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यत इति श्रुतेः ॥ अन्ये तु याज्ञिका मंत्राः कल्पो ब्राह्मणं चतुर्थी लौकिकीति। याज्ञिकैः समाम्नातोऽनुष्ठेयार्थप्रकाशको वेदभागो मंत्राः। मंत्रविधानप्रतिपादको वेदभाग इति मंत्राः कल्पोऽत ऊर्द्धमित्यादिनोक्तः कल्पः। मंत्रतात्पर्यार्थप्रकाशको वेदभागो ब्राह्मणं। भोगविषया गामानयेत्यादिरूपा व्यावहारिकी। एष्वेव सर्वा वाङ्नियमितेति याज्ञिकाः॥ ऋग्यजुःसामानि चतुर्थी व्यावहारिकीति नैरुक्ताः॥ सर्पाणां वाग्वयसां क्षुद्रसरीसृपस्य च चतुर्थी व्यावहारिकीत्यैतिहासिकाः॥ पशुषु तूणवेषु मृगेष्वात्मनि चेत्यात्मवादिनः॥ अपरे मातृकाः प्रकारांतरेण प्रतिपादयंति। परा पश्यंती मध्यमा वैखरीति चत्वारीति। एकैव नादात्मिका वाक् मूलाधारादुदिता सती परेत्युच्यते। नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात् सैव हृदयगामिनी पश्यंतीत्युच्यते योगिभिर्द्रष्टुं शक्यत्वात्। सैव बुद्धिं गता विवक्षां प्राप्ता मध्यमेत्युच्यते। मध्ये हृदयाख्य उदीयमानत्वान्मध्यमायाः। अथ यदा सैव वक्त्रे स्थिता ताल्वोष्ठादिव्यापारेण वहिर्निर्गच्छति तदा वैखरीत्युच्यते। एवं चत्वारि वाचः पदानि

परिमितानि। मनीषिणो मनसः स्वामिनः स्वाधीनमनस्का ब्राह्मणा वाच्यस्य शब्दब्रह्मणोऽधिगंतारो योगिनः परादिचत्वारि पदानि विदुः। जानंति। तेषु मध्ये त्रीणि परादीनि गुहा निहितानि। हृदयांतर्वर्तित्वात्। तुरीयं तु पदं वैखरीसंज्ञकं मनुष्याः सर्वे वदंति। व्याकरणप्रसिद्धानामाख्यातादिपक्षे मनीषिणो ब्राह्मणाः प्रकृतिप्रत्ययादिविभागज्ञा वाग्योगविदस्तानि पदानि जानंति। अवाग्योगविदः पामरा वाचो वाङ्मयस्य तुरीयं चतुर्थं भागं वदंति। व्यवहरंति। अर्थप्रकाशनाय प्रयुंजते। अयं मंत्रो निरुक्ते व्याख्यातः। सोऽत्राप्यनुसंधेयः। नि॰ १३. ९. ॥ अथापि ब्राह्मणं भवति सा वै वाक् सृष्टा चतुर्धा व्यभवदेष्वेव लोकेषु त्रीणि पशुषु तुरीयं। या पृथिव्यां साग्नौ सा रथंतरे। यांतरिक्षे सा वायौ सा वामदेव्ये। या दिवि सादित्ये सा बृहति सा स्तनयित्नावथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुः। तस्माद्ब्राह्मणा उभयीं वाचं वदंति या च देवानां या च मनुष्याणामिति ॥

॥ अथ षट्चत्वारिंशी ॥

इंद्रं॑ मि॒त्रं वरु॑णम॒ग्निमा॑हु॒रथो॑ दि॒व्यः स सु॑प॒र्णो ग॒रुत्मा॑न्।
एकं॑ स॒द्विप्रा॑ बहु॒धा व॑दंत्य॒ग्निं य॒मं मा॑त॒रिश्वा॑नमाहुः ॥ ४६ ॥

इंद्रं॑। मि॒त्रं। वरु॑णं। अ॒ग्निं। आ॒हु॒ः। अथो॒ इति॑। दि॒व्यः। सः। सु॒ऽप॒र्णः। ग॒रुत्मा॑न्।
एकं॑। सत्। विप्राः॑। ब॒हु॒धा। व॒दं॒ति॒। अ॒ग्निं। य॒मं। मा॒त॒रिश्वा॑नं। आ॒हु॒ः ॥ ४६ ॥

अमुमादित्यमैश्वर्यविशिष्टमिंद्रमाहुः। तथा मित्रं प्रमीतेर्मरणात्त्रातारमहरभिमानिनमेतन्नामकं देवं तमाहुः। वरुणं पापस्य निवारकं रात्र्यभिमानिनं देवमाहुः। तथाग्निमंगनादिगुणविशिष्टमेतन्नामकमाहुः। अथो अपि चायमेव दिव्यो दिवि भवः सुपर्णः सुपतनो गरुत्मान् गरणवान् पक्षवान्वा। एतन्नामको यः पक्ष्यस्ति सोऽप्ययमेव। कथमेकस्य नानात्वमिति उच्यते। अमुमेवादित्यमेकमेव वस्तुतः संतं विप्रा मेधाविनो देवतातत्त्वविदो बहुधा वदंति। तत्तत्कार्यकारणेनेंद्राद्यात्मानं वदंति। एकैव वा महानात्मा देवता सूर्य इत्याचक्षत इत्युक्तत्वात्। किंच तमेव वृष्ट्यादिकारणं वैद्युताग्निं यमं नियंतारं मातरिश्वानमंतरिक्षे श्वसंतं वायुमाहुः। सूर्यस्य ब्रह्मणोऽनन्यत्वेन सर्वात्म्यमुक्तं भवति। अत्र ये केचिदग्निः सर्वा देवता इत्यादिश्रुतितोऽयमेवाग्निरुत्तरे अपि ज्योतिषी इति मत्वाग्नेरेव

सर्वात्म्यप्रतिपादकोऽयं मंत्र इति वदंति । तत्पक्षे प्रथमोऽग्निशब्द उद्देश्यः । तमग्निमुद्दिश्येंद्राद्यात्मकत्वकथनं । अयं मंत्रो निरुक्त एवं व्याख्यातः । इममेवाग्निं महांतमात्मानमेकमात्मानं बहुधा मेधाविनो वदंति इंद्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मंतं । दिव्यो दिविजो गरुत्मान् गरणवान् गुर्वात्मा महात्मेति वा । नि॰ ७. १८. । इति ॥

॥ इति द्वितीयस्य तृतीये द्वाविंशो वर्गः ॥

वर्षकामेष्ट्यां तिस्रः पिंड्यो होतव्याः । तत्र कृष्णं नियानमिति तृतीयस्यानुवाक्या कृष्णं नियानं हरयः सुपर्णा नियुत्वंतो ग्रामजितो यथा नरः । आ॰ २. १३. । इति ॥

॥ सैषा सप्तचत्वारिंशी ॥

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतंति ।
त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते ॥ ४७ ॥

कृष्णं । निऽयानं । हरयः । सुऽपर्णाः । अपः । वसानाः । दिवं । उत् । पतंति ।
ते । आ । अववृत्रन् । सदनात् । ऋतस्य । आत् । इत् । घृतेन । पृथिवी । वि । उद्यते ॥ ४७ ॥

कृष्णं कृष्णवर्णं नियानं नियमेन गच्छंतं मेघं हरय उदकस्य हर्तारः सुपर्णाः शोभनपतना रश्मयोऽपो वसाना उदकानि वासयंतो मेघेषु । अद्भिर्मेघान्पूरयंत इत्यर्थः ॥ अंतर्भावितण्यर्थाद्द्विकर्मकत्वं ॥ यद्वा कृष्णं नियानं । नियमनं रात्रिः । देवानां हि रात्रिर्दक्षिणायनं । तत्प्रति । तस्मिन्वर्षकाल इत्यर्थः । एवं कुर्वंतो दिवं द्युलोकं तदाश्रितमादित्यं वोद्दिश्योत्पतंति । ऊर्ध्वं गच्छंति । ते रश्मय ऋतस्य सदनात् उदकस्य स्थानादादित्यमंडलादाववृत्रन् । आवर्तंते । अर्वाच आगच्छंति । आदित् अनंतरमेव यदार्वाग्गच्छंति तदानीमेव घृतेनोदकेन पृथिवी व्युद्यते । विविधं क्लिद्यते ॥ कृष्णं निरयणं रात्रिरादित्यस्य हरयः सुपर्णा हरणा आदित्यरश्मय इत्यादि निरुक्तं द्रष्टव्यं । नि॰ ७. २४. ॥

॥ अथाष्टचत्वारिंशी ॥

द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तस्मिन्त्साकं त्रिशता न शंकवोऽर्पिताः षष्टिर्न चलाचलासः ॥ ४८ ॥

द्वाद॑श। प्र॒ऽधयः॑। च॒क्रं। एकं॑। त्रीणि॑। नभ्या॑नि। कः। ऊं॒ इति॑। तत्। चि॒के॒त॒।
तस्मि॑न्। सा॒कं। त्रि॒ऽश॒ताः। न। श॒ंकवः॑। अ॒र्पि॒ताः। ष॒ष्टिः। न। च॒ला॒च॒लासः॑ ॥४८॥

द्वादश एतत्संख्याकाः प्रधयः परिधयः। प्रहिता वर्तंते। तत्स्थानीया द्वादश मासा एकमद्वितीयं चक्रं क्रमणस्वभावं संवत्सराख्यं चक्रमाश्रिताः। तथा त्रीणि त्रिसंख्याकानि नभ्यानि नभ्याश्रयाणि फलकानि तत्स्थानीयानि ग्रीष्मवर्षा-हेमंताख्यान्याश्रितानि। यथा सूर्यरथचक्रस्य द्वादश परिधयो नाभ्यरिहाणि त्रीणि फलकानि संति तद्वत्कालचक्रस्यापि। क उक्तोऽपि महान् तच्चक्रं चिकेत। जानाति। तस्मिंश्चक्रे साकं सह शंकव इव। अत्र पुरस्तादुपचारोऽपि नशब्दः सामर्थ्यादुपमार्थीयः। तस्मिन्नपि संवत्सरचक्रे त्रिशता एतत्संख्याकाः षष्टिर्न। नशब्दश्चार्थे। षष्टिश्चारा अरस्थानीयान्यहान्यर्पिता। अर्पितानि। कीदृशानि तानि। चलाचलासः। एकश्चलशब्दो द्विर्भावप्राप्तः। चलाः चलनस्वभावानीत्यर्थः॥ चरिचलिपतिवदीनामच्याक् चाभ्यासस्य। पा° ६.१.१२.२। इति द्विर्वचनमागागमश्च ततोऽसुक्॥ षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहानीति ब्राह्मणं। द्वादश प्रधयश्चक्रमेकमिति मासानां मासा मानादित्यादि निरुक्तं। नि° ४.२७.॥

प्रवर्ग्येऽभिष्टवे यस्ते स्तन इत्येका। सूचितं च। यस्ते स्तनः शशयो यो मयोभूर्गौरमीमेदनु वत्सं मिषंतं। आ° ४.७.। इति॥ एषैव सारस्वते पशौ हविषो याज्या। सूचितं च। यस्ते स्तनः शशयो यो मयोभूस्त्वं सोम प्र चिकितो मनीषेति द्वे। आ° ३.७.। इति॥

॥ सैषैकोनपंचाशी॥

यस्ते॒ स्तनः॑ शश॒यो यो म॑यो॒भूर्येन॑ विश्वा॒ पुष्य॑सि॒ वार्या॑णि।
यो र॑त्न॒धा व॑सु॒विद्यः सु॒दत्रः॒ सर॑स्वति॒ तमि॒ह धात॑वे कः॥४९॥

यः। ते॒। स्तनः॑। श॒श॒यः। यः। म॒यः॒ऽभूः। येन॑। विश्वा॑। पुष्य॑सि। वार्या॑णि।
यः। र॒त्न॒ऽधाः। व॒सु॒ऽवित्। यः। सु॒ऽदत्रः॑। सर॑स्वति। तं। इ॒ह। धात॑वे। क॒रिति॑ कः॥४९॥

हे सरस्वति ते तव संबंधी यः स्तनः स्तनवच्छिशुस्थानीयानां प्राणिनामाप्यायनकारी लौकिकवैदिकसुशब्दरूपः स्तनः शशयः शयानः। तव देहे वर्तमानः। यश्च स्तनो मयोभूः। रसास्वादिनां सुखस्य भावयिता। येन स्तनेन

विश्वा सर्वाणि वार्याणि वरणीयान्यभिमतरूपाणि धनानि पुष्यसि भोक्तृभ्यः। यश्च स्तनो रत्नधा बहुविधरमणीयरत्नानां धारयिता वसुवित् वसूनां वासयितॄणां धनानां वेत्ता लब्धा वेदयिता वा। किंच यः स्तनः सुदत्रः शोभनदानः। सुदत्रः कल्याणदान इति निरुक्तं। ६. १४.। अत्रासकृद्यच्छब्दश्रवणं स्तनस्यातिप्रशस्तत्वज्ञापनार्थं। हे देवि तं तादृशं सर्वप्राण्युपकारकं सूक्तमयं स्तनमिहास्मिन्कर्मणीदानीं वा धातवेऽस्माभिर्धातुं पातुं पानाय कः। कुरु॥

अग्निमंथने यज्ञेन यज्ञमित्येषा परिधानीया। यज्ञेन यज्ञमयजंत देवा इति परिदध्यात्। आ॰ २. १६.। इति सूचितत्वात्॥

॥ सैषा पंचाशी॥

यज्ञेन॑ य॒ज्ञम॑यजंत दे॒वास्तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्।

ते ह॒ नाकं॑ महि॒मानः॑ सचंत॒ यत्र॒ पूर्वे॑ सा॒ध्याः संति॑ दे॒वाः॥ ५०॥

य॒ज्ञेन॑। य॒ज्ञं। अ॒य॒जं॒त॒। दे॒वाः। तानि॑। धर्मा॑णि। प्र॒थ॒मानि॑। आ॒स॒न्।

ते। ह॒। नाकं॑। म॒हि॒मानः॑। स॒चं॒त॒। यत्र॑। पूर्वे॑। सा॒ध्याः। संति॑। दे॒वाः॥ ५०॥

देवा व्यवहर्तारो यजमाना यज्ञेन निर्मथ्याग्निना यज्ञं होमसाधनमाहवनीयमयजंत। पूजितवंतः। अनुष्ठानाय संयोजितवंत इत्यर्थः। अग्निं मथित्वा प्रहरति तेनैवाग्निनातिथ्यं कृयत इति हि तैत्तिरीयकं। तानि धर्माण्यग्निसाधनानि कर्माणि प्रथमानि। प्रथम इति मुख्यनाम। प्रतमानि प्रकृष्टतमान्यासन्। फलप्रसवसमर्थान्यभवन्नित्यर्थः। ते ह ते च यजमाना नाकं। नास्मिन्नकमस्तीति नाकः स्वर्गः। तं महिमानो माहात्म्ययुक्ताः सचंत। संगताः। कीदृशं नाकं। यत्र यस्मिन्नाके पूर्वे पूर्वतनाः साध्याः साधना यज्ञादिसाधनवंतः कर्मदेवा इत्यर्थः। ते संति। निवसंति। तं सचंत। तस्मादिदानीमपि मनुष्यैरेवं कर्तव्यमित्यर्थः। यद्वा देवा इदानीं देवभागमापन्नाः पूर्वं यज्ञेनाग्निना पशुभूतेन यज्ञं यष्टव्यमग्निमयजंत। पूजितवंतः। अग्नेरेव मूर्तिभेदेन देवत्वं च पशुत्वं च द्रष्टव्यं। अग्निः पशुरासीत्तमालभंत तेनायजंतेति श्रुतेः। शिष्टं पूर्ववत्। यत्र यस्मिन् स्वर्गे निमित्तभूते सति पूर्वे पूर्वतनाः साध्या देवाः साधनाश्छंदोऽभिमानिनः। आदित्या अंगिरसश्च साध्या देवा उच्यंते। छंदांसि वै साध्या देवास्तेऽग्रेऽग्निनाग्निमयजंत। ते स्वर्गलोकमायन्नादित्याश्चेवेहासन्नांगरसश्च। तेऽग्रेऽग्निनाग्निमयजंत। ते स्वर्गं लोकमायन्निति ब्राह्मणं। एते देवाः स्वर्गे संति भवंति।

स्वर्गप्राप्ता इत्यर्थः । यद्वा यज्ञेन ज्ञानादियज्ञेन यज्ञं विष्णुमयजंत । पूजयंति । ते नाकं विष्णुलोकं महानुभावाः सचंत । संगच्छंते । यत्र पूर्वे साध्यादयो देवाः संति तत्स्थानं । अग्निनाग्निमयजंत देवा इत्यादि निरुक्तमनुसंधेयं । नि॰ १२.४१. ॥

॥ अथैकपंचाशी ॥

समानमेतदुदकमुच्चैत्यव चाहभिः ।
भूमिं पर्जन्या जिन्वंति दिवं जिन्वंत्यग्नयः ॥ ५१ ॥
समानं । एतत् । उदकं । उत् । च । एति । अव । च । अहऽभिः ।
भूमिं । पर्जन्याः । जिन्वंति । दिवं । जिन्वंति । अग्नयः ॥ ५१ ॥

एतत्प्रसिद्धमुदकं समानं । एकरूपमित्यर्थः । अहभिः कैश्चिदहोभिर्ग्रीष्मकालीनैरुच्चैति । ऊर्ध्वं गच्छति । तथाहभिर्वर्षकालीनैरेव तदुदकमव चैति । अवाङ्मुखं च गच्छति ॥ चवायोगे प्रथमेति प्रथमा विभक्तिर्न निहन्यते ॥ रश्मिनाड्यैव भूमिं प्राप्नोति । तदेवोच्यते । पर्जन्याः प्रीणयितारो मेघा भूमिं जिन्वंति । उदकसंस्त्यायेन सस्याद्युत्पादनद्वारा भूमिष्ठान्प्रीणयंति । तथाग्नय आहवनीयाद्याः स्वे हुते दिवमादित्यादिद्युलोकस्थान्देवाञ्जिन्वंति । प्रीणयंति ॥

सरस्वद्देवताके पशौ दिव्यं सुपर्णमिति वपायाज्या । दिव्यं सुपर्णं वायसं बृहंतं स वावृधे नर्यो योषणासु । आ॰ ३. ८. । इति सूचितत्वात् ॥ अन्वारंभणीयायां सरस्वद्याग एषैव याज्या । सूचितं च । दिव्यं सुपर्णं वायसं बृहंतमा सवं सवितुर्यथेति ॥

॥ सैषा द्विपंचाशी ॥

दिव्यं सुपर्णं वायसं बृहंतमपां गर्भं दर्शतमोषधीनां ।
अभीपतो वृष्टिभिस्तर्पयंतं सरस्वंतमवसे जोहवीमि ॥ ५२ ॥
दिव्यं । सुऽपर्णं । वायसं । बृहंतं । अपां । गर्भं । दर्शतं । ओषधीनां ।
अभीपतः । वृष्टिऽभिः । तर्पयंतं । सरस्वंतं । अवसे । जोहवीमि ॥ ५२ ॥

दिव्यं दिवि भवं सुपर्णं शोभनगमनं वायसं गमनशीलं बृहंतं महांतमपां गर्भं वृष्ट्युदकानां गर्भवदुत्पादकं । ओषधीनामोषधीर्दर्शतं दर्शनाय दर्शयंतमित्यर्थः । यद्वा ओषधीनां गर्भं दर्शतमिति पृथग्विशेषणं । किंच अभीपत आनुकूल्येन वृष्टिभिस्तर्पयंतं । जगत्प्रीणयंतं । यद्वा अभीपतोऽभिगमनवतः सलि-

लाधारान् तटाकादीन् तर्पयंतं। अथवाभिगंताहं सरस्वंतमुदकवंतं। सर इत्युदकनाम। देवं सूर्यं वावसे रक्षणाय जोहवीमि। पुनःपुनराह्वामि ॥

॥ इति द्वितीयस्य तृतीये त्रयोविंशो वर्गः ॥

॥ इति प्रथमे मंडले द्वाविंशोऽनुवाकः ॥

त्रयोविंशेऽनुवाके पंचदश सूक्तानि। तत्र कया शुभेति पंचदशर्चं प्रथमं सूक्तं त्रैष्टुभं। अत्रानुक्रमणिका। कया पंचोना संवादस्तृतीयाद्ययुजो मरुतां वाक्यमंत्यस्तृचोऽगस्त्यस्य शिष्टा इंद्रस्यैकादशी च मरुत्वांस्त्विंद्रो देवतेति। अत्रेंद्रागस्त्यमरुतां संवादः प्रतिपाद्यते। तत्र तृतीयापंचमीसप्तमीनवमीनां मरुद्वाक्यरूपत्वात्त एवर्षयः। यस्य वाक्यं स ऋषिरिति न्यायात्। अंत्यतृचस्यागस्त्यवाक्यत्वात्स एवर्षिः। शिष्टा युज आद्या चैकादशी चेंद्रस्य वाक्यं। अतः स एवर्षिः। अत्र या तेनोच्यते सा देवतेति सामान्यापवादेन कृत्स्नस्य मरुत्वद्गुणक इंद्रो देवता ॥ संसवचातुर्विंशकयोर्मरुत्वतीयशस्त्रे निविद्धानीयात्पूर्वमेतत्सूक्तं। यदि पर्यायान्मरुत्वतीय इति खंडयोः सूचितं। कया शुभेति च मरुत्वतीये पुरस्तात्सूक्तस्य शंसेत्। आ० ६.६. ७.३.। इति ॥ आभिप्लविके पंचमेऽहनि मरुत्वतीय एतदेव सूक्तं। पंचमस्य कया शुभा यस्तिग्मशृंग इति मध्यंदिनः। आ० ७. ७.। इति सूचितत्वात् ॥ महाव्रते मरुत्वतीयशस्त्र एतत्सूक्तं। पंचमारण्यके कया शुभा सवयसः सनीला मरुत्वां इंद्र वृषभो रणाय। ऐ० आ० ५. १.। इत्युक्तत्वात् ॥ विषुवति मरुत्वतीय एतदेव निविद्धानीयं। त्यं सु मेषं कया शुभेति च मरुत्वतीयं। आ० ८. ६.। इति सूचितत्वात् ॥ अस्य विनियोगं शौनक आह। ज्ञातिपुत्रसुहृन्मित्रैर्यश्च राज्यं चिकीर्षति। नित्यं स नियतो भूत्वा सूक्तं तु मनसा जपेत्। कया शुभेति पैशून्यं कृत्वाचार्यनृपद्विजैः। श्रुत्वा पररहस्यं तु गुरोरथाह शौनकः। ऋग्वि० १. २६.। इति ॥

॥ तत्र प्रथमा ॥

कया शुभा सवयसः सनीळाः समान्या मरुतः सं मिमिक्षुः।
कया मती कुत एतास एतेऽर्चंति शुष्मं वृषणो वसूया ॥ १ ॥
कया। शुभा। सऽवयसः। सऽनीळाः। समान्या। मरुतः। सं। मिमिक्षुः।
कया। मती। कुतः। आऽइतासः। एते। अर्चंति। शुष्मं। वृषणः। वसुऽया ॥ १ ॥

इंद्रवाक्यं । सवयसः समानवयस्काः सनीलाः समानस्थाना एते मरुतः कया शुभा कैरपि दुर्ज्ञेयया शोभया समान्या सर्वेषामेकरूपया महत्या युक्ताः । यद्वा शुबित्युदकनाम । उक्तरूपया शुभोदकेन संमिमिक्षुः । लोकं सम्यक् सिंचंति ॥ मिहिसमानार्थो मिमिक्षतिधातुः ॥ यद्वा मां युद्धादिषु प्रवर्तमानं संमिमिक्षुः । तदर्थमेते मरुतः कयानिश्चेयया मती मत्या कुतो देशादेतासः । आगताः । आगत्य चैते वृषणो वर्षितारो वसूया वसूयया ॥ सुपां सुलुगिति पूर्वसवर्णदीर्घः ॥ धनेच्छया । यद्वा वसवो वासयितारो वा ॥ तेनैव जसो याजादेशः ॥ शुष्मं बलं वृष्टिप्रदानजनितं लोकेऽचैंति । पूजयंति । जगति कुर्वंति । यद्वा मम बलं वर्धयंतीत्यर्थः । मरुतो हैनं नाजहुरिति श्रुतेः । अत्रेंद्रमरुत्संवादरूपे सर्वत्र प्राणजीवात्मपरतयापि योजनीयं । अत्रापींद्रो ब्रूते ॥

॥ अथ द्वितीया ॥

कस्य ब्रह्माणि जुजुषुर्युवानः को अध्वरे मरुत आ ववर्त ।
श्येनाँ इव ध्रजतो अंतरिक्षे केन महा मनसा रीरमाम ॥ २ ॥

कस्य । ब्रह्माणि । जुजुषुः । युवानः । कः । अध्वरे । मरुतः । आ । ववर्त ।
श्येनान्ऽइव । ध्रजतः । अंतरिक्षे । केन । महा । मनसा । रीरमाम ॥ २ ॥

युवानो नित्यतरुणा महानुभावा मरुतः कस्य महाभागस्य ब्रह्माणि परिवृढानि हवींषि जुजुषुः । सेवंते । कश्च महानध्वरे स्वकीये यागे मरुत एतानाववर्त । यागांतरेभ्यो निवर्तयति । दुर्निग्रहत्वे दृष्टांतमाह । अंतरिक्षे ध्रजतो गच्छतः श्येनान् शंसनीयगमनानेतन्नामकान्पक्षिण इव । केन तत्प्रीतिसाधनेन महा महता मनसा मननवता स्तोत्रेण रीरमाम । रमेमहि ॥

अथ मरुत इंद्रेणोक्तास्तृतीययानया प्रतिब्रुवते ॥

॥ अथ तृतीया ॥

कुतस्त्वमिंद्र माहिनः सन्नेको यासि सत्पते किं त इत्था ।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ॥ ३ ॥

कुतः । त्वं । इंद्र । माहिनः । सन् । एकः । यासि । सत्ऽपते । किं । ते । इत्था ।
सं । पृच्छसे । संऽअराणः । शुभानैः । वोचेः । तत् । नः । हरिऽवः । यत् । ते । अस्मे इति ॥ ३ ॥

हे इंद्र सत्पते सतां पालक त्वं माहिनो महनीयः पूजनीयः। अनुचरैरनुगंतव्य इत्यर्थः। तथाभूतः सन्नपि एकोऽसहायः सन् कुतो यासि। कुतः कारणाद्यासि। यद्वा कुत्र यासि। ते तवेत्थेत्थं किं। किं त्वमेवमेव। किं न कोऽप्यनुचरोऽस्ति। किंच त्वं समराणोऽस्माभिः संगच्छमानः संपृच्छसे। समीचीनं पृच्छसि। हे हरिवः हरिभ्यां तद्वन्निंद्र ते तवास्मे अस्मासु यद्वक्तुमिष्टतममस्ति तन्नोऽस्मभ्यं शुभानैः शोभमानैर्वचनैर्वाचैः। ब्रूहि ॥

॥ अथ चतुर्थी ॥

ब्रह्माणि मे मतयः शं सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः।
आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥ ४ ॥

ब्रह्माणि। मे। मतयः। शं। सुतासः। शुष्मः। इयर्ति। प्रऽभृतः। मे। अद्रिः।
आ। शासते। प्रति। हर्यंति। उक्था। इमा। हरी इति। वहतः। ता। नः। अच्छ ॥ ४ ॥

अथैवं तैः पृष्टोऽनया चतुर्थ्येंद्रः प्रत्याह। हे मरुतः ब्रह्माणि सर्वाणि कर्माणि हवींषि वा मे मम स्वभूतानि। तथा मतयश्च मननयुक्ताः स्तुतयश्च मे मम शं सुखकार्याः। यद्वा मे मतयो बुद्धयस्तेष्वेव वर्तंत इति शेषः। तथा सुतासोऽभिषुताः सोमा मे मदीया मदर्था एव। अतो यज्ञं प्रति गंतव्यमित्यर्थः। किंच मध्ये राक्षसादिबाधपरिहाराय शुष्मो बलवान्मे मदीयोऽद्रिः शत्रूणां भक्षको वज्रः प्रभृतः सन्नियर्ति। गच्छत्येव लक्ष्यं प्रति न च निवर्तते। न केवलं हविरादीनां मदीयत्वमेव अपि तु यजमाना आशासते। मामेव प्रार्थयंते। किंचोक्थोक्थानि शस्त्राणि मां प्रतिहर्यंति। कामयंते। मामेव शंसंतीत्यर्थः। किंच नोऽस्मदीयाविमा हरी इमावश्वौ ता तानि गंतव्यानि हविरादीन्यच्छ अभिप्राप्तुं मां वहतः। अभिमतदेशं प्रापयतः। अत एव शीघ्रं गच्छामि। युष्माभिरपि तत्प्राप्तुं गंतव्यमित्यर्थः। अतोऽसहाय इति मंतव्यमिति भावः ॥

॥ अथ पंचमी ॥

अतो वयमंतमेभिर्युजानाः स्वक्षत्रेभिस्तन्वः शुंभमानाः।
महोभिरेताँ उप युज्महे न्विंद्र स्वधामनु हि नो बभूथ ॥ ५ ॥

अतः। वयं। अंतमेभिः। युजानाः। स्वऽक्षत्रेभिः। तन्वः। शुंभमानाः।
महःऽभिः। एतान्। उप। युज्महे। नु। इंद्र। स्वधां। अनु। हि। नः। बभूथ ॥ ५ ॥

एवमुक्ता मरुतस्तमेव ब्रुवते। हे इंद्र त्वं यस्मादेवं करोषि अतः कारणाद्वयमप्यंतमेभिरंतिकतमैरश्वैर्युजाना युक्ताः संतः। कीदृशैः। स्वक्षत्रेभिः। स्वायत्तबलैः। किंच महोभिस्तेजोभिस्तन्व आत्मशरीराणि शुंभमाना दीपयंतः। हर्षं प्राप्नुवाना इत्यर्थः। यद्वा महोभिः स्वमहत्त्वेन युक्ता वयमेतान् गंतून् नु क्षिप्रमुपयुज्महे। तव साकं हविरादि स्वीकुर्मह इत्यर्थः। हे इंद्र त्वमपि नोऽस्मत्संबंधि स्वधामुदकं बलं वानुबभूथ हि। अस्मत्सृष्टोदकजन्यं हविरनुभवसि खलु। हिशब्दः परस्परोपकार्योपकारिभावप्रसिद्धिद्योतनार्थः॥

॥ इति द्वितीयस्य तृतीये चतुर्विंशो वर्गः॥

॥ अथ षष्ठी॥

क्व१स्या वो मरुतः स्वधासीद्यन्मामेकं समधत्ताहिहत्ये।

अहं ह्यू१ग्रस्तविषस्तुविष्मान्विश्वस्य शत्रोरनमं वधस्नैः॥ ६॥

क्व। स्या। वः। मरुतः। स्वधा। आसीत्। यत्। मां। एकं। संऽअधत्त। अहिऽहत्ये।

अहं। हि। उग्रः। तविषः। तुविष्मान्। विश्वस्य। शत्रोः। अनमं। वधऽस्नैः॥ ६॥

स्या सा स्वधा तदुदकं बलं वा वो युष्माकं संबंधि क्वासीत्। नैवासीदित्यर्थः। अस्माकमुदकं त्वमनुभवसीति ब्रूथ। यत् या स्वधैकमसहायं मामहिहत्ये वृष्ट्यर्थं मेघहननकर्मणि वृत्रवधे वा समधत्त। सहितमभूत्। समासीदिति संबंधः। असहायस्य कथमिति मतं सेत्स्यतीत्यत आह। अहं हि अहं खलूग्र उद्गूर्णबलस्तविषो बलवान् तुविष्मान् महत्त्वोपेतोऽस्मि। यस्मादतिबलोऽहं तस्माद्विश्वस्य कृत्स्नस्य शत्रोः। मेघस्य शत्रुरेवायं॥ कर्मणि षष्ठी॥ सर्वं शत्रुसंघं वधस्नैर्वधरूपैः शोधनैर्वधकुशलैरित्यर्थः। यद्वा वध इति वज्रनाम। वधस्नैर्वज्रस्यासनैः क्षेपणप्रकारैरनमं। अनमयं॥ अंतर्भावितण्यर्थोऽयं॥ वशीकरोमीत्यर्थः॥

॥ अथ सप्तमी॥

भूरि चकर्थ युज्येभिरस्मे समानेभिर्वृषभ पौंस्येभिः।

भूरीणि हि कृणवामा शविष्ठेंद्र क्रत्वा मरुतो यद्वशाम॥ ७॥

भूरि। चकर्थ। युज्येभिः। अस्मे इति। समानेभिः। वृषभ। पौंस्येभिः।

भूरीणि। हि। कृणवाम। शविष्ठ। इंद्र। क्रत्वा। मरुतः। यत्। वशाम॥ ७॥

अथैवमुक्ता इंद्रं पुनराहुः। हे इंद्र वृषभ वर्षितस्त्वं भूरि चकर्थ। प्रभूतं कृतवानसि। सत्यमेव। तथाप्यस्मे अस्माकं समानेभिः समानैर्युज्येभिरस्माभिर्युक्तैः पौंस्येभिः पुंसः कर्मभिः सामर्थ्यैरेव चकर्थ। न त्वेक एवेत्यर्थः। हे शविष्ठ। शव इति बलनाम। हे इंद्र बलवत्तम वयं भूरीणि हि त्वत्कृतादपि प्रभूतानि कर्माणि कृणवाम। कृतवंतः स्म। हे इंद्र क्रत्वा क्रतुना कर्मणा यद्यद्वृष्ट्यादिकं वशाम। कामयामहे। तानि त्वत्तोऽप्यधिकानीत्यर्थः। यतो वयं मरुतः॥ छांदसमनुदात्तत्वं॥ एतेन स्वमहत्त्वं स्थापितं भवति। स्वरो व्यस्तः। अथवा इंद्रस्येदं वाक्यं। हे मरुतो यद्यस्यैव तत्तस्यैव भवतु। तर्ह्यहं च यूयं च सहैव क्रत्वा कर्मणा यद्वशाम यद्वृष्टिकर्म कामयामहे। तस्मादुदकं समानमेवेत्यर्थः। एवं मरुत इति निघातस्वरस्य व्याख्यानं॥

॥ अथाष्टमी ॥

वधीं वृत्रं मंरुत इंद्रियेण स्वेन भामेंन तविषो बंभूवान्।
अहमेता मनंवे विश्वश्चंद्राः सुगा अपश्चंकर वज्रंबाहुः॥ ८॥
वधीं। वृत्रं। मरुतः। इंद्रियेणं। स्वेनं। भामेंन। तविषः। बभूवान्।
अहं। एताः। मनंवे। विश्वऽचंद्राः। सुऽगाः। अपः। चकर। वज्रंऽबाहुः॥ ८॥

इदानीमिंद्र आह। हे मरुतः अहमिंद्र इंद्रियेण स्वेन भामेन कोपेन तविषो बलवान् बभूवान्। भूतः संपन्नः। कस्मै किमिति तदुच्यते। मनवे मनोरर्थायैता विश्वश्चंद्राः सर्वाह्लादकाः सुगाः सुगमनाः सर्वत्र वश्यादिषु गमनशीला अपो वृष्ट्युदकानि चकर। चकार। कृतवानस्मि। यतोऽहं वज्रबाहुः। अनेन सहायनैरपेक्ष्यमुक्तं भवति॥

॥ अथ नवमी ॥

अनुंत्तमा ते मघवन्नकिर्नु न त्वावाँ अस्ति देवता विदांनः।
न जायंमानो नशंते न जातो यानिं करिष्या कृणुहि प्रंवृद्ध॥ ९॥
अनुंत्तं। आ। ते। मघऽवन्। नकिः। नु। न। त्वाऽवान्। अस्ति। देवतां। विदांनः।
न। जायंमानः। नशंते। न। जातः। यानिं। करिष्या। कृणुहि। प्रऽवृद्ध॥ ९॥

इदानीं ते मरुतो हर्षेण प्रत्याहुः। आ इति स्मरणे। स्मृतवंतो वयमिदानीं

हे मघवन् ते त्वयानुत्तमप्रेरितं नकिर्नु । नैवास्ति । नु निश्चये । त्वया यदुक्तं तत्सत्यमित्यर्थः । हे देव त्वावान् त्वत्सदृशो विदानो विद्वान्॥ व्यत्ययेन शानच् ॥ जयोपायवेदिता देवता देवो नास्ति । किंच हे प्रवृद्ध अतिबल जायमानो जातो वा कश्चिद्देवो मर्त्यो वा त्वं यानि वृत्रवधादीनि करिष्या कर्तव्यानि कृणुहि कुरुषे तानि न नशते । न व्याप्नोति । नशतिर्व्याप्तिकर्मा । नान्यस्त्वच्चेष्टितानुकार्येवेत्यर्थः ॥

॥ अथ दशमी ॥

एकस्य चिन्मे विभ्व१स्त्वोजो या नु दधृष्वान्कृणवै मनीषा ।

अहं ह्यू१ग्रो मरुतो विदानो यानि च्यवमिंद्र इदीश एषां ॥ १० ॥

एकस्य । चित् । मे । विऽभु । अस्तु । ओजः । या । नु । दधृष्वान् । कृणवै । मनीषा ।

अहं । हि । उग्रः । मरुतः । विदानः । यानि । च्यवं । इंद्रः । इत् । ईशे । एषां ॥ १० ॥

इदानीमिंद्र आह । मे ममैकस्य चित् एकस्यैव विभु सर्वत्र गमनशीलमोजो बलमस्तु । यद्वा बलमेकस्यैवास्तु । किमर्थमिति चेत् उच्यते । या यानि कर्माणि मनीषा मनीषया मनस इषया दधृष्वान् धर्षितवानहं नु क्षिप्रं कृणवै कर्तुं शक्नुवानि । हे मरुतः अहं हि अहं खलूग्र उद्गूर्णबलो विदानो वेदनावान् । यानि यानि वसूनि च्यवं । अवगच्छामि । एषामहमेवेंद्र इत् ईश्वर एव सन् ईशे । ईश्वरो भवामि । अथवा विदानोऽहं यानि च्यवं यान्युद्दिश्य गच्छेयं । एषामीशे । यतोऽहमिंद्रः अतः शक्त इत्यर्थः ॥

॥ इति द्वितीयस्य तृतीये पंचविंशो वर्गः ॥

॥ अथैकादशी ॥

अमंदन्मा मरुतः स्तोमो अत्र यन्मे नरः श्रुत्यं ब्रह्म चक्र ।

इंद्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे तनूभिः ॥ ११ ॥

अमंदत् । मा । मरुतः । स्तोमः । अत्र । यत् । मे । नरः । श्रुत्यं । ब्रह्म । चक्र ।

इंद्राय । वृष्णे । सुऽमखाय । मह्यं । सख्ये । सखायः । तन्वे । तनूभिः ॥ ११ ॥

इदमपीद्रवाक्यं । हे मरुतः मा मामत्रास्मिन्नुदकोत्पादनविषये स्तोमः स्तोत्रममंदत् । मादयति मोदयते वा । हे नरः सखायो यूयं मे मम यत् श्रुत्यं सर्वैः

श्रोतव्यं ब्रह्म परिवृढमेघधारणादिरूपं चक्र । कृतवंतः । स्वप्रभूतं स्तोत्रं वा अनुत्तमा त इत्यादिकं । इंद्राय परमैश्वर्यगुणकाय वृष्णेऽभिमतवर्षित्रे सुमखाय शोभनयागाय सख्ये युष्माभिः समानख्यानाय तनूभिरनेकशरीरैरुपेताय मह्यं मम तन्वे मदीयशरीरपोषाय भवतु । यद्वा तनूभिरस्मच्छरीरभूतैर्युष्माभिः कृतं मह्यमेवास्त्वित्यर्थः ॥

॥ अथ द्वादशी ॥

एवेदेते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः ।
संचक्ष्या मरुतश्चंद्रवर्णा अच्छांत मे छदयाथा च नूनं ॥ १२ ॥

एव । इत् । एते । प्रति । मा । रोचमानाः । अनेद्यः । श्रवः । आ । इषः । दधानाः ।
संऽचक्ष्य । मरुतः । चंद्रऽवर्णाः । अच्छांत । मे । छदयाथ । च । नूनं ॥ १२ ॥

हे मरुतः एवेत् एवमेवैते यूयं मा मां प्रति रोचमाना मद्विषये संप्रीयमाना मां ख्यापयंतो वानेद्योऽनंतिकस्थं श्रवः कीर्तिमिषश्च दधानाः । आ इति चार्थे । यद्वानेद्य इति प्रशस्यनाम । प्रशस्यं यशोऽस्मत्तो दधाना अस्माभिर्वा धारयमाणाः । चंद्रवर्णाः । चंद्रमिति हिरण्यनाम । सुवर्णवर्णा यूयं मे मां संचक्ष्य सम्यक् प्रकाश्य नूनं निश्चयमच्छांत यशोभिराच्छादितवंतश्छदयाथ । आच्छादयथ च । मां प्रति सर्वदा रोचमाना मय्येव कीर्तिमन्नं च दधाना मत्कृतैः कर्मभिर्मामेव स्तुतेत्यर्थः ॥

॥ अथ त्रयोदशी ॥

को न्वत्र मरुतो मामहे वः प्र यातन सखीँरच्छा सखायः ।
मन्मानि चित्रा अपिवातयंत एषां भूत नवेदा म ऋतानां ॥ १३ ॥

कः । नु । अत्र । मरुतः । ममहे । वः । प्र । यातन । सखीन् । अच्छ । सखायः ।
मन्मानि । चित्राः । अपिऽवातयंतः । एषां । भूत । नवेदाः । मे । ऋतानां ॥ १३ ॥

हे मरुतो युष्मानत्र लोके को नु खलु मर्त्यो ममहे । पूजयति । हे सखायः सर्वस्य सखिवत् प्रियकारिणः संतः सखीन् हविःप्रदानेन सखिभूतान्यजमानानच्छ आभिमुख्येन प्राप्तुं प्रयातन । गच्छत । हे चित्राः चायनीया यूयं मन्मानि मननीयानि धनान्यपिवातयंतः संपूर्णं प्रापयंतो भूत । भवत । किंच मे मदीयानामेषामृतानामवितथानां नवेदा भूत । ज्ञातारो भवत ॥

॥ अथ चतुर्दशी ॥

आ यद्दुवस्याद्दुवसे न कारुरस्माञ्चक्रे मान्यस्य मेधा ।
ओ षु वर्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत् ॥ १४ ॥

आ । यत् । दुवस्यात् । दुवसे । न । कारुः । अस्मान् । चक्रे । मान्यस्य । मेधा ।
ओ इति । सु । वर्त । मरुतः । विप्रं । अच्छ । इमा । ब्रह्माणि । जरिता । वः । अर्चत् ॥ १४ ॥

हे मरुतो दुवस्यात् युष्मत्परिचरणार्हात्स्तोत्रात् तेन स्तोत्रेण दुवसे परिचरणाय पर्याप्ता कारुः कर्त्री स्तुतिकुशला मान्यस्य माननीयस्य विदुषो मेधा बुद्धिरस्मान् । नेति संप्रत्यर्थे । इदानींतनानाचक्रे । आभिमुख्येन करोति । प्राप्नोतीत्यर्थः । यद्वा षष्ठीबहुवचनं । इदं सूक्तं दुवस्यानां परिचरणार्हाणां दुवसे परिचरणायेत्यर्थः । अतो हे मरुतो यूयं विप्रं मेधाविनं यजमानं मामगस्त्यमच्छ आभिमुख्येन प्राप्तुं सु सुष्ठु वर्त । ओ इति निपातद्वयसमुदायरूप एको निपातः । आङित्याभिमुख्येन । उकारोऽवधारणे । आवर्तध्वमेव । किमर्थमेवमिति उच्यते । इमा ब्रह्माणि इमानि परिवृढानि कर्माण्युद्दिश्य जरिता स्तोता वो युष्मानर्चत् । अर्चति । यस्मादेवं तस्मादावर्तध्वमित्यर्थः ॥

अथ पंचदश्यां सूक्तोपक्रममारभ्य कृतां स्तुतिं मरुद्भ्यो निवेद्याभिमतमाशास्ते ॥

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुं ॥ १५ ॥

एषः । वः । स्तोमः । मरुतः । इयं । गीः । मान्दार्यस्य । मान्यस्य । कारोः ।
आ । इषा । यासीष्ट । तन्वे । वयां । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ १५ ॥

हे मरुतः एषः स्तोम इदानीं क्रियमाणप्रकारं स्तोत्रं वो युष्मदर्थं । युष्मत्प्रीणनाय भवत्वित्यर्थः । तथेयं गीः स्तुतिरूपा वागपि वो युष्मदर्थाय । यस्मादेवं तस्मान्मान्दार्यस्य स्तुतिविशेषैर्मदयितुः स्तुतिभिर्मदस्य प्रेरयितुर्वा मान्यस्य वरप्रदानादिना माननीयस्य कारोः स्तोतुरिषेच्छयायासीष्ट । आगच्छत । किमर्थं । तन्वे । शरीराय । तत्पोषायेत्यर्थः । वयां वयमपीषमन्नं वृजनं बलं जीरदानुं जयशीलदानमेतत्सर्वं विद्याम । युष्मास्वागतेषु यज्ञसंपूर्त्येष्ट्यादिद्वारा लभेमहि ॥

॥ इति द्वितीयस्य तृतीये षड्विंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके तृतीयोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
इत्थं द्वितीयाष्टकगस्तृतीयोऽध्याय आदरात् ।
व्याख्यातः सायणार्येण पुरुषार्थप्रदर्शकः ॥

अथ चतुर्थोऽध्याय आरभ्यते । कया शुभेत्यस्मिंस्त्रयोविंशेऽनुवाके पंचदश सूक्तानि । तत्र तन्न्वित्येतद्द्वितीयं सूक्तं पंचदशर्चं । अत्रानुक्रमणिका । तन्न्वगस्त्यो मारुतं हि द्वित्रिष्टुबंतं मित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसं दृष्ट्वा वासतीवरे कुंभे रेतोऽपतत्ततोऽगस्त्यवसिष्ठावजायेतामिति । सूक्तसंख्यानुवर्तत आन्यस्याः सूक्तसंख्याया इति परिभाषितत्वात्पंचदशर्चं । उक्तलक्षणेनागस्त्येन दृष्टत्वात्तस्यार्षं । मारुतं हीत्युक्तत्वात्तुह्यादिपरिभाषयेदमादिसूक्तत्रयं मरुद्देवताकं। अंत्ये द्वे त्रिष्टुभौ शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः । विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

तन्नु वोचाम रभसाय जन्मने पूर्वं महित्वं वृषभस्य केतवे ।
ऐधेव यामन्मरुतस्तुविष्वणो युधेव शक्रास्तविषाणि कर्तन ॥ १ ॥
तत् । नु । वोचाम । रभसाय । जन्मने । पूर्वं । महिऽत्वं । वृषभस्य । केतवे ।
ऐधाऽइव । यामन् । मरुतः । तुविऽस्वनः । युधाऽइव । शक्राः । तविषाणि । कर्तन ॥ १ ॥

हे मरुतो वयं युष्मदीयं तत्तादृशं प्रसिद्धं पूर्वं पूरकं पूर्वतनं वा महित्वं माहात्म्यं नु क्षिप्रं वोचाम । ब्रूमः । किमर्थं । रभसाय राभस्ययुक्ताय जन्मने

वेद्यां प्रादुर्भावाय। वेद्यां संनिधानायेत्यर्थः। तदपि किमर्थमित्यत आह। वृषभस्य फलस्य वर्षितुर्यज्ञस्य केतवे प्रज्ञानाय। वायुप्रेरणेन मेघागमनं प्रसिद्धं। हे तुविष्वणः गमनसंरंभेण प्रभूतध्वनियुक्ताः हे शक्राः सर्वमपि कर्तुं शक्ताः। यूयं यामन् यामनि यागगमने प्रस्तुते सत्यैधेव ऐधान्येधःसंबंधीनि तेजांसीव प्रायेण महत्त्वेन तविषाणि बलानि सामर्थ्यानि कर्तन। कुरुत। तन्स्तुम इत्यर्थः। तत्र दृष्टांतः। युधेव। युद्धेन तत्तद्युद्धनिमित्तं यथा तविषाणि कुरुथ तद्वत् ॥

॥ अथ द्वितीया ॥

नित्यं न सूनुं मधु बिभ्रत उप क्रीळंति क्रीळा विदथेषु घृष्वयः।
नक्षंति रुद्रा अवसा नमस्विनं न मर्धंति स्वतवसो हविष्कृतं ॥ २ ॥
नित्यं। न। सूनुं। मधु। बिभ्रतः। उप। क्रीळंति। क्रीळाः। विदथेषु। घृष्वयः।
नक्षंति। रुद्राः। अवसा। नमस्विनं। न। मर्धंति। स्वऽतवसः। हविःऽकृतं ॥ २ ॥

नित्यं न सूनुमौरसं प्रियं पुत्रमिव मधु मधुरं हविर्बिभ्रतो धारयंतो मरुतो विदथेषु यागेषु घृष्वयो रक्षःप्रभृतीनां घर्षकाः संतः क्रीळाः क्रीडनशीला उप उपेत्य क्रीळंति। विहरंति। किंच रुद्राः। रुद्रपुत्रा मरुतोऽपि रुद्रा उच्यंते। जन्यजनकयोरभेदात्। मरुतां रुद्रपुत्रत्वं पुराणेषु तपसा तुष्टौ पार्वतीपरमेश्वरौ मरुतः पुत्रत्वेन स्वीचक्रतुरिति प्रसिद्धं। नमस्विनं नमस्कारोपलक्षितस्तोत्रोपेतं हविष्कृतं हविषः कर्तारं प्रदातारं यजमानमवसा रक्षणेन तर्पणेन वा निमित्तभूतेन नक्षंति। व्याप्नुवंति। किंच। स्वतवसः स्वायत्तबला मरुतो यजमानं न मर्धंति। न संग्रामयंति। न क्लेशयंतीत्यर्थः ॥

॥ अथ तृतीया ॥

यस्मा ऊमासो अमृता अरासत रायस्पोषं च हविषा ददाशुषे।
उक्षंत्यस्मै मरुतो हिता इव पुरू रजांसि पयसा मयोभुवः ॥ ३ ॥
यस्मै। ऊमासः। अमृताः। अरासत। रायः। पोषं। च। हविषा। ददाशुषे।
उक्षंति। अस्मै। मरुतः। हिताःऽइव। पुरु। रजांसि। पयसा। मयःऽभुवः ॥ ३ ॥

यस्मै यजमानाय हविषा ददाशुषे सोमाद्यहविर्दत्तवते हविषा प्रीता ऊमासोऽवितारोऽमृता अमरणधर्माणो मरुतो रायस्पोषं धनस्य पुष्टिं। चशब्दात्प-

ष्वादिपुष्टिं । अरासत । प्रायच्छन् ॥ रासतिर्दानार्थः । अस्मै यजमानाय हिता इव हिताचरणाः सखाय इव संतो मयोभुवः सुखस्य भावयितारो मरुतो रजांसि लोकान् पुरू प्रभूतं यथा भवति तथा पयसोदकेन सस्याद्युत्पत्त्यर्थमुक्षंति । सिंचंति ॥

॥ अथ चतुर्थी ॥

आ ये रजांसि तविषीभिरव्यंत प्र व एवासः स्वयतासो अध्रजन् ।
भयंते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयतास्वृष्टिषु ॥ ४ ॥
आ । ये । रजांसि । तविषीभिः । अव्यंत । प्र । वः । एवासः । स्वऽयतासः । अध्रजन् ।
भयंते । विश्वा । भुवनानि । हर्म्या । चित्रः । वः । यामः । प्रऽयतासु । ऋष्टिषु ॥ ४ ॥

हे मरुतो युष्मत्संबंधिनो य एवास एवा अश्वविशेषास्तविषीभिः स्वकीयैर्बलैर्वृष्टिप्रदानादिरूपै रजांसि लोकानाव्यत । सर्वत आवृण्वंति । ते वो युष्माकमेवासोऽश्वाः स्वयतासः स्वयमेव सारथिना विनैव युक्ताः प्राध्रजन् । प्रकर्षेण गच्छंति । व्याप्नुवंति । किंच युष्मदागमनाद्विश्वा भुवनानि सर्वाणि भूतजातानि विश्वा हर्म्या सर्वाणि हर्म्याणि च भयंते । बिभ्यति पतनात् । यस्मादेवं तस्माद्वो यामश्चित्रश्चायनीयः । आश्चर्यभूत इत्यर्थः । भीतेः कारणमाह । ऋष्टिषु युद्धस्थासु हेतिषु प्रयतासु प्रकर्षेणोद्यतासु सतीषु । अथवा भीतौ दृष्टांतः । ऋष्टिषु प्रयतासु सतीषु । लुप्तोपमेयं । आयुधेषूद्यतेषु यथा जना बिभ्यति तद्वद्युष्मदागमनाद्बिभ्यतीत्यर्थः ॥

॥ अथ पंचमी ॥

यत्त्वेषयामा नदयंत पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः ।
विश्वो वो अज्मन्भयते वनस्पती रथीयंतीव प्र जिहीत ओषधिः ॥ ५ ॥
यत् । त्वेषऽयामाः । नदयंत । पर्वतान् । दिवः । वा । पृष्ठं । नर्याः । अचुच्यवुः ।
विश्वः । वः । अज्मन् । भयते । वनस्पतिः । रथियंतीऽइव । प्र । जिहीते । ओषधिः ॥ ५ ॥

मरुतस्त्वेषयामाः प्रदीप्तगमना यत् यदा पर्वतान् पर्ववतो गिरेर्गह्वराणि पूरकान्मेघान्वा नदयंत । नादयंति । वा अथवा दिवो विद्योतनात्मकस्यांतरिक्षस्य पृष्ठमुपरिभागं नर्या नरेभ्यो हिता अचुच्यवुः । गच्छंति । तदा वो युष्मत्संबंधिन्यज्मन् गमने निमित्तभूते सति विश्वो वनस्पतिर्वनस्य पालयिता

वृक्षसमूहो भयते । बिभेति । तथौषधिः प्रियंगुव्रीह्यादिः प्रजिहीते । प्रकर्षेण गच्छति । स्वस्थानादितस्ततश्चलतीत्यर्थः । तत्र दृष्टांतः । रथीयंतीव । रथमात्मन इच्छंती स्त्री रथारूढेत्यर्थः । तादृशी स्त्रीव । सा यथा चलति तद्वत् ॥

॥ इति द्वितीयस्य चतुर्थे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

यूयं न॑ उग्रा मरुतः सुचे॒तुनारि॑ष्टग्रामाः सुम॒तिं पि॑पर्तन ।
यत्रा॑ वो दि॒द्युद्रद॑ति॒ क्रिवि॑र्दती रि॒णाति॑ प॒श्वः सुधि॑तेव ब॒र्हणा॑ ॥ ६ ॥

यू॒यं । नः॒ । उ॒ग्राः॒ । म॒रु॒तः॒ । सु॒ऽचे॒तुना॑ । अरि॑ष्टऽग्रामाः । सु॒ऽम॒तिं । पि॒प॒र्त॒न॒ ।
यत्र॑ । वः॒ । दि॒द्युत् । रद॑ति । क्रिवि॑ःऽदती । रि॒णाति॑ । प॒श्वः । सुधि॑ताऽइव । ब॒र्हणा॑ ॥ ६ ॥

हे उग्रा उद्गूर्णबला मरुतो यूयं सुचेतुना शोभनचेतसारिष्टग्रामा अहिंसितसंघाः संतो नोऽस्माकं सुमतिं शोभनबुद्धिं पिपर्तन । पूरयत । कस्मिन्काल इति तदुच्यते । यत्र यस्मिन्काले वो युष्मत्संबंधिनी क्रिविर्दती विक्षेपणशीलं दंती दिद्युत् हेती रदति । लिखति मेघसंस्त्यायं । पश्वः पशूंश्च रिणाति । रेषति हिनस्ति । वायौ वाति सति पशवः शीर्यंत इति प्रसिद्धं । हिंसायां दृष्टांतः । सुधिता सुहिता सुष्ठु प्रेरिता बर्हणा हतिस्तत्साधना हेतिर्वा यथा रिणाति तद्वत् ॥

॥ अथ सप्तमी ॥

प्र स्क॒म्भदे॑ष्णा अनव॒भ्ररा॑धसोऽलातृ॒णासो॑ वि॒दथे॑षु सुष्टु॑ताः ।
अर्चं॑त्य॒र्कं म॑दि॒रस्य॑ पी॒तये॑ वि॒दुर्वी॒रस्य॑ प्रथ॒मानि॒ पौंस्या॑ ॥ ७ ॥

प्र । स्क॒म्भऽदे॑ष्णाः । अ॒न॒व॒भ्रऽरा॑धसः । अ॒ला॒तृ॒णास॑ः । वि॒दथे॑षु । सु॒ऽस्तु॒ताः ।
अर्चं॑ति । अ॒र्कं । म॒दि॒रस्य॑ । पी॒तये॑ । वि॒दुः । वी॒रस्य॑ । प्र॒थ॒मानि॑ । पौंस्या॑ ॥ ७ ॥

प्र स्कंभदेष्णाः प्रकर्षेण स्तंभितदानाः । अविरतदाना इत्यर्थः । अनवभ्रराधसोऽभ्रष्टहविरादिधनाः । राध इति धननाम । अलातृणासः ॥ नकारस्य स्थाने लकारः ॥ अनातृणास आतर्दनरहिताः । अथवा अलं पर्याप्तमातर्दनाः शत्रूणां । यद्वा अलमत्यर्थं दातारः फलानां । एवंरूपा मरुतो विदथेषु यागेष्वर्कमर्चनीयमिंद्रं स्वसखीभूतमर्चंति । पूजयंति । स्तुत्यादिना संभावयंतीत्यर्थः । किमर्थं

मदिरस्य मादनसाधनस्य सोमस्य पीतये पानाय। तस्येंद्रस्य महत्त्वं कथं जानंतीत्यत आह। ते मरुतो वीरस्य विविधं शत्रूणामीरकस्येंद्रस्य प्रथमानि प्रतमानि मुख्यानि पौंस्या पुंस्त्वानि वृत्रवधादिरूपाणि विदुर्जानंति ॥

॥ अथाष्टमी ॥

शतभुंजिभिस्तमभिहुंतेरघात्पूर्भी रक्षता मरुतो यमावत।
जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु ॥ ८ ॥
शतभुंजिऽभिः। तं। अभिऽहुंतेः। अघात्। पूःऽभिः। रक्षत। मरुतः। यं। आवत।
जनं। यं। उग्राः। तवसः। विऽरप्शिनः। पाथन। शंसात्। तनयस्य। पुष्टिषु ॥ ८ ॥

हे मरुतो यूयं शतभुजिभिः। शतमित्यपरिमितनाम। असंख्यातभोगवद्भिः पूर्भिः पालनैर्जेतव्यैः शत्रूणां नगरैर्वा तं रक्षत। पालयत। तमित्युक्तं। कमित्याह। यं जनमभिहुतेरभिभवकारणात्कुटिलस्वभावादघात्पापादावत। अरक्षत। किंच हे उग्रा उद्गूर्णतेजसो हे तवसो बलवंतो वेगवंतो वा हे विरप्शिनः ॥ महन्नामैतत् ॥ महांतः। रपणीयाः शब्दा रपाः। ते येषां ते विरप्शिनः। विविधा रप्शिनः स्तोतारो येषां ते यथोक्ता हे तादृशा यूयं यं च जनं पाथन। पाथ। रक्षथ। कस्मान्निमित्तादिति उच्यते। तनयस्य। उपलक्षणमेतत्। पुत्रादीनां पुष्टिषु पोषेषु निमित्तभूतेषु शंसादभिशंसनात्। यमेवं कुरुथ तं रक्षतेति शेषः। पापक्षयाद्यनिष्टपरिहारेण पुत्रादिपोषरूपेष्टप्राप्त्या च रक्षयेत्यर्थः ॥

॥ अथ नवमी ॥

विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्याहिता।
अंसेष्वा वः प्रपथेषु खादयोऽक्षो वश्चक्रा समया वि वावृते ॥ ९ ॥
विश्वानि। भद्रा। मरुतः। रथेषु। वः। मिथस्पृध्याऽइव। तविषाणि। आऽहिता।
अंसेषु। आ। वः। प्रऽपथेषु। खादयः। अक्षः। वः। चक्रा। समया। वि। ववृते ॥ ९ ॥

हे मरुतो वो रथेषु युष्मत्संबंधिरथेषु रंहणसाधनेषु विश्वानि भद्रा सर्वाणि कल्याणानि भोगयोग्यानि द्रव्याण्यस्मभ्यं प्रदेयानि फलानि वाहितानि। तथा वोऽंसेषु तदुपलक्षितभुजेष्वपि ॥ आकारोऽप्यर्थे ॥ मिथस्पृध्येव बला-

धिक्यात्परस्परस्पर्धाविषयाणि तविषाणि बलानि अंसेषूक्तलक्षणान्यायुधानि वाहितानि। किंच वः प्रपथेषु। प्रगताः पंथानो येषु विश्रामस्थानेषु तानि प्रपथानि। तेषु खादयः खाद्यानि भक्ष्याण्याहितानि। यद्वा प्रगतः पंथा यैस्तेषु पादाग्रेषु खादयः स्थिरा आभरणविशेषा आहिताः। किंच वोऽक्षो युष्मत्संबंधी रथ्योऽक्षश्चक्रा तत्रोपनिबद्धानि चक्राणि समया समीपे तेषां परिसरे विववृते। विशेषेण वर्तते। न कदाचिदपि चक्रेषु संलग्नो भवतीत्यर्थः। यस्मादेवं देवयजनगमनसाधनानि संति तस्माच्छीघ्रमागच्छध्वमित्यभिप्रायः॥

॥ अथ दशमी ॥

भूरीणि भद्रा नर्येषु बाहुषु वक्षःसु रुक्मा रभसासो अंजयः।
अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान्व्यनु श्रियो धिरे ॥ १० ॥

भूरीणि। भद्रा। नर्येषु। बाहुषु। वक्षःऽसु। रुक्माः। रभसासः। अंजयः।
अंसेषु। एताः। पविषु। क्षुराः। अधि। वयः। न। पक्षान्। वि। अनु। श्रियः। धिरे॥१०॥

ते मरुतो नर्येषु नरेभ्यो हितेषु बाहुषु भुजेषु भूरीणि प्रभूतानि भद्रा भद्राणि कल्याणानि धनानि स्तोतृभ्यो दातुं धिरे। दधिरे धारयंति। तथा वक्षःसूरःस्थलेषु रुक्माः सुवर्णरत्नादिनिर्मितान्याभरणानि धारयंति। कीदृशानि। रभसासो राभस्ययुक्तानि कांतिमंति वा। तथांजयो व्यक्तानि। अंसेषु भुजमूलेष्वेताः शुक्लवर्णा मालाः। पविषु वज्रसदृशेष्वायुधेषु क्षुराः क्षुरधाराः। अधि सप्तम्यर्थानुवादी। एवमेते मरुतः सर्वांगेषु श्रियो लक्ष्मीरनुक्रमेण विधिरे। विविधं धारयंति। तत्र दृष्टांतः। वयो न पक्षान्। पक्षिणः पक्षानिव॥

॥ इति द्वितीयस्य चतुर्थे द्वितीयो वर्गः॥

॥ अथैकादशी ॥

महांतो मह्ना विभ्वो३ विभूतयो दूरेदृशो ये दिव्या इव स्तृभिः।
मंद्राः सुजिह्वाः स्वरितार आसभिः संमिश्ला इंद्रे मरुतः परिष्टुभः ॥ ११ ॥

महांतः। मह्ना। विऽभ्वः। विऽभूतयः। दूरेऽदृशः। ये। दिव्याःऽइव। स्तृऽभिः।
मंद्राः। सुऽजिह्वाः। स्वरितारः। आसऽभिः। संऽमिश्लाः। इंद्रे। मरुतः।
परिऽस्तुभः ॥ ११ ॥

ये मरुतो महांतो महात्म्योपेताः । केन । मह्ना । महत्त्वेन प्रभावातिशयेन । तथा विभ्वो विभवो व्याप्ताः । तथा विभूतयो विविधैश्वर्यवंतः । दूरेदृशो दूरे दृश्यमानाः प्रकाशमानाः । दूरदर्शने दृष्टांतः । दिव्याः स्तृभिरिव ॥ स्तृ इति नक्षत्रनाम ऋक्षाः स्तृभिरिति नक्षत्राणामिति निरुक्तत्वात् ॥ दिवि भवा देवाः स्तृभिः स्वपुष्पकभूतैस्तेजःपुंजैर्नक्षत्रैर्यथा दूरे दृश्यमाना भवंति तद्वत् । किंच मंद्रा मादनाः सुजिह्वाः शोभनजिह्वा आसभिरास्यैः स्वरितारः शब्दयितारः । प्रियवचना इत्यर्थः । अत एव सुजिह्वा इत्युक्तं । किंच इंद्रे संमिश्लाः सम्यक् मिश्रयितारः । इंद्रसहायिन इत्यर्थः । मरुतो हैनं नाजहुरिति श्रुतेः । तथा परिष्टुभः परिस्तोभयुक्ताः स्तुतिभिर्युक्ताः । एवं महाभागा ये मरुतः संति तेऽस्मद्यज्ञमागच्छंतीति शेषः ॥

॥ अथ द्वादशी ॥

तद्वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रमदितेरिव व्रतं ।
इंद्रश्चन त्यजसा वि ह्रुणाति तज्जनाय यस्मै सुकृते अराध्वं ॥ १२ ॥
तत् । वः । सुऽजाताः । मरुतः । महिऽत्वनं । दीर्घं । वः । दात्रं । अदितेःऽइव । व्रतं ।
इंद्रः । चन । त्यजसा । वि । ह्रुणाति । तत् । जनाय । यस्मै । सुऽकृते । अराध्वं ॥ १२ ॥

हे सुजाताः शोभनजनना हे मरुतो वो युष्मदीयं महित्वनं महत्त्वं तत् तादृक् खलु । तदित्युक्तं किमित्याह । वो युष्माकं दात्रं दानं वृष्ट्यादिरूपं दीर्घमत्यायतमविच्छिन्नं । प्रकृष्टोपकारीत्यर्थः । दीर्घत्वे दृष्टांतः । अदितेर्व्रतमिव । अदीनाया देवमातुर्भूम्या वा । व्रतमिति कर्मनाम । तद्यथा दीर्घमतिविस्तृतं तद्वत् । अदितिर्द्यौरदितिरंतरिक्षमित्यादिमंत्रवर्णात् । किंच हे मरुतो यूयं यस्मै सुकृते शोभनयागादिकर्त्रे यजमानाय यदभिमतं धनमराध्वं तदिंद्रश्च इंद्रोऽपि त्यजसा त्यागेन न विह्रुणाति । न विह्वरति । कौटिल्यं न करोति ॥ चनेत्ययं यद्यपि निपातद्वयसमुदायरूप एको निपातः तथाप्यवयवविभागेन चशब्दः समुच्चये नशब्दो निषेधेऽधिगंतव्यः ॥ युष्मद्दनादित्यागमिंद्रत्यागोऽपि नातिक्रामतीत्यर्थः । यद्वा यस्मै तद्धनमराध्वं तमिंद्रोऽपि न कुटलयति । न निषेधयति किंत्वनुमोदयतीत्यर्थः ॥

॥ अथ त्रयोदशी ॥

तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसममृतास आवत ।
अया धिया मनवे श्रुष्टिमाव्या साकं नरो दंसनैरा चिकित्रिरे ॥ १३ ॥
तत् । वः । जामिऽत्वं । मरुतः । परे । युगे । पुरु । यत् । शंसं । अमृतासः । आवत ।
अया । धिया । मनवे । श्रुष्टिं । आव्य । साकं । नरः । दंसनैः । आ । चिकित्रिरे ॥ १३ ॥

हे मरुतो वो जामित्वं बंधुत्वमस्मद्विषयप्रेमाधिक्यं तत् खलु प्रसिद्धमित्यर्थः । कियत्पर्यंतमिति तदुच्यते । परे युगे । युगशब्दः कालोपलक्षकः । उत्कृष्टे महति कालेऽतीतेऽपि वर्तत इति शेषः । तत्कथमधिगतमित्यत आह । अमृतासोऽमरणधर्माणो हे मरुतो यूयं यद्यस्माच्छंसमस्माभिः क्रियमाणां स्तुतिं पुरु प्रभूतं यथा भवति तथावत । रक्षथ । तस्माद्युष्मत्कृतं जामित्वमविनाशीत्यर्थः । किंच यूयमया धियानयानुग्रहात्मिकया बुद्ध्या मनवे मनुष्याय स्तोत्रे यष्ट्रे वास्मदादये श्रुष्टिमाव्य कीर्त्तिं स्तुतिं वा रक्षित्वा साकं संभूय नरो नेतारः संतो दंसनैः कर्मभिरित्थंभूता आचिकित्रिरे । सर्वतो जानीथ ॥

॥ अथ चतुर्दशी ॥

येन दीर्घं मरुतः शूशवाम युष्माकेन परीणसा तुरासः ।
आ यत्ततनन्वृजने जनास एभिर्यज्ञेभिस्तदभीष्टिमश्यां ॥ १४ ॥
येन । दीर्घं । मरुतः । शुशवाम । युष्माकेन । परीणसा । तुरासः ।
आ । यत् । ततनन् । वृजने । जनासः । एभिः । यज्ञेभिः । तत् । अभि । इष्टिं । अश्यां ॥ १४ ॥

हे तुरासो वेगवंतो मरुतो युष्माकेन युष्मत्संबंधिना येन परीणसा ॥ यद्यप्येतद्बहुनामसु पठितं तथापि यद्बहु तन्महदपि भवतीत्यत्र महदित्यर्थे गृह्यते ॥ महता युष्मदभिगमनेनैषणेन वा दीर्घमायतं सत्रादिरूपं कर्म शूशवाम । प्रवर्धयामः । किंच यत् येन चाभिगमनेनैषणेन वा जनासो जना अस्मदीया वृजने संग्राम आततनन् । सर्वतो विस्तारयंति । स्वसामर्थ्यैः संग्रामं जयंतीत्यर्थः । तदिष्टिमेषणं गमनमेभिर्यज्ञेभिरिदानीं क्रियमाणैः स्तोत्रादिरूपैः पूजनैरभि आभिमुख्येनाश्यां । व्याप्नुयां ॥

॥ अथ पंचदशी ॥

एष वः स्तोमो मरुत इयं गीर्मांदार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुं ॥ १५ ॥

एषः । वः । स्तोमः । मरुतः । इयं । गीः । मांदार्यस्य । मान्यस्य । कारोः ।
आ । इषा । यासीष्ट । तन्वे । वयां । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ १५ ॥

अयं मंत्रस्तृतीयाध्यायांते व्याख्यातः । सूक्तोपक्रमप्रभृति क्रियमाणां स्तुतिं मरुद्भ्यः समर्प्य स्वाभीष्टमाशास्ते । हे मरुतः एष स्तोम इदानीं कृतं स्तोत्रं वो युष्माकं । युष्मदर्थमित्यर्थः । तथेयं गीः स्तुतिरूपा वागपि वो युष्माकं । कस्य संबंधीदमिति तदुच्यते । मांदार्यस्य ॥ मंदतेरीयतेश्च मांदार्यः ॥ स्तुतिं प्रेरयतो मान्यस्य माननार्हस्य कारोः । स्तोतृनामैतत् । स्तोतुः संबंधि । यद्वैतत्पदत्रय-मुत्तरत्र संबध्यते । उक्तलक्षणस्तोतुरिषेच्छया कामनया तन्वे युष्मच्छरीरवृद्ध्यै । स्तुत्या हि शरीरं वर्धते । आयासीष्ट । अभिगच्छतु स्तुतिः । वयां वयं चेषमन्नं वृजनं बलं जीरदानुं चिरकालजीवनं च विद्याम । लभेमहि ॥

॥ इति द्वितीयस्य चतुर्थे तृतीयो वर्गः ॥

सहस्रं त इत्येकादशर्चं तृतीयं सूक्तमागस्त्यं त्रैष्टुभं । आद्यैंद्री शिष्टा मरुद्देव-ताकाः पूर्वत्र हिशब्दात् । सहस्रमेकादशाद्यैंद्रीत्यनुक्रमणिका । विशेषविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

सहस्रं त इंद्रोतयो नः सहस्रमिषो हरिवो गूर्ततमाः ।
सहस्रं रायो मादयध्यै सहस्रिण उप नो यंतु वाजाः ॥ १ ॥

सहस्रं । ते । इंद्र । ऊतयः । नः । सहस्रं । इषः । हरिऽवः । गूर्तऽतमाः ।
सहस्रं । रायः । मादयध्यै । सहस्रिणः । उप । नः । यंतु । वाजाः ॥ १ ॥

हे इंद्र ते तवोतयो रक्षाप्रकाराः सहस्रमपरिमिता इत्यर्थः । नोऽस्मभ्यमु-पयंत्विति सर्वत्र योज्यं । तथा हे हरिवः । हरी इंद्रस्याश्वौ । ताभ्यां तद्वन्निंद्र गूर्ततमा अत्यंतं गूर्णानीष इषणीया अन्नानि सहस्रं बहूनि त्वदीयानि । तथा सहस्रं रायोऽपरिमितानि धनानि मणिमुक्तादीनि मादयध्यै अस्मान् मादयितुं

यानि संति तान्यस्मानुपयंतु । तथा सहस्रिणो वाजा गमनवंतश्चतुष्पाद्रूपाः पशवोऽपि नोऽस्मानुपयंतु । समीपं प्राप्नुवंतु ॥

॥ अथ द्वितीया ॥

आ नोऽवोभिर्मरुतो यांत्वच्छा ज्येष्ठेभिर्वा बृहद्दिवैः सुमायाः ।
अध यदेषां नियुतः परमाः समुद्रस्य चिद्धनयंत पारे ॥ २ ॥

आ । नः । अवःऽभिः । मरुतः । यांतु । अच्छ । ज्येष्ठेभिः । वा । बृहत्ऽदिवैः । सुऽमायाः ।
अध । यत् । एषां । निऽयुतः । परमाः । समुद्रस्य । चित् । धनयंत । पारे ॥ २ ॥

ते मरुतोऽवोभी रक्षणैः सहिता नोऽस्मानच्छ आभिमुख्येनायांतु । आगच्छंतु । सुमायाः । मायेति प्रज्ञानाम । शोभनप्रज्ञा एव मरुतो ज्येष्ठेभिर्बृहद्दिवैर्वा । ज्येष्ठैः प्रशस्यतमैर्मणिमुक्तादिधनैश्च सहिता आयांतु । वाशब्दः समुच्चये । आगमने कथमेषां सामर्थ्यमित्यत आह । अध अथैषां मरुतां यद्यस्मान्नियुत एतन्नामकाः परमा उत्कृष्टा अश्वाः समुद्रस्य चित् । चिच्छब्दोऽप्यर्थे । समुद्रस्यापि पारे परस्मिन्तीरे धनयंत । धनधारणं वहनं कुर्वंति । तस्माद्रक्षणैर्धनैश्चायांत्वित्यर्थः ॥

॥ अथ तृतीया ॥

मिम्यक्ष येषु सुधिता घृताची हिरण्यनिर्णिगुपरा न ऋष्टिः ।
गुहा चरंती मनुषो न योषा सभावती विदथ्येव सं वाक् ॥ ३ ॥

मिम्यक्ष । येषु । सुऽधिता । घृताची । हिरण्यऽनिर्निक् । उपरा । न । ऋष्टिः ।
गुहा । चरंती । मनुषः । न । योषा । सभाऽवती । विदथ्याऽइव । सं । वाक् ॥ ३ ॥

सुधिता सुष्ठु निहिता सुष्ठु हिता वा लोके घृताची घृतं क्षरणशीलमुदकमंचंती हिरण्यनिर्णिक् हितरमणीयरूपा । निर्णिगिति रूपनाम । एवंरूपा ऋष्टिर्विद्युदाख्यायुधविशेषो वा । उपरा न मेघमालेव येषु मरुत्सु संमिम्यक्ष । म्यक्षतिर्गतिकर्मा । संगताभूत् । मेघपंक्तिविद्युताविमे अपि संगते इत्यर्थः । मेघपंक्तिर्विद्युच्चोभे दृष्टांतेन विशेष्येते । गूहा निगूढा गुहायां वांतरिक्षे चरंती । तत्र दृष्टांतः । मनुषो न योषा । मनुष्यस्य परिवृढादेर्महिषीवत् । सा यथा सुवेषांतःपुर एव मध्ये चरति तद्वत् । किं सर्वदैवमिति नेत्याह । सभावती ।

सभा जनसंघः । तद्वती वर्षकाल आविर्भवंतीत्यर्थः । तत्र दृष्टांतः । विदथ्या वागिव । विदथो यज्ञः । तदर्हतीति विदथ्या प्रैषस्तोत्रादिरूपा वाक् । सा यथा यज्ञसभां प्राप्याविर्भवति तद्वत् । यद्वा विदथ्या वेदनार्हा विवदमानयोर्वाक् । सा यथा भवति तद्वत् । सैवंरूपा येषु मिम्यक्ष ते मरुतो देवयजनमागच्छंत्वित्यर्थः ॥

॥ अथ चतुर्थी ॥

परा शुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षुः ।
न रोदसी अप नुदंत घोरा जुषंत वृधं सख्याय देवाः ॥ ४ ॥
परा । शुभ्राः । अयासः । यव्या । साधारण्याऽइव । मरुतः । मिमिक्षुः ।
न । रोदसी इति । अप । नुदंत । घोराः । जुषंत । वृधं । सख्याय । देवाः ॥ ४ ॥

शुभ्राः शोभनालंकारा अयासोऽभिगंतारो मरुतो यव्या मिश्रणशीलया विद्युता परामिमिक्षुः । प्रकर्षेण सिंचंत्युदकसंस्त्यायं । साधारण्येव । यथा लोके साधारण्या स्त्रिया संगता युवानो रेतो मुंचंति तद्वत् । एवं कुर्वंतो घोरा अतिवृष्टिप्रदानेन भयंकरास्ते रोदसी द्यावापृथिव्यौ नापनुदंत । अपनोदनं वर्षणरूपं तिरस्कारं न कुर्वंति । द्यावापृथिवीवचनो रोदसीशब्दः सर्वत्राद्युदात्तः । अत्र तु व्यत्ययेनांतोदात्तत्वमिति द्रष्टव्यं । यद्वा रोदसा शब्देन रोदनस्वभावो रुद्रः । तस्य स्त्री रोदसीति केचिदाहुः । अपरे तु मरुतां स्त्रियो रोदसीति नामधेयमित्याहुः । अयमेव पक्षो युक्त उत्तरत्रैवं व्यवहारात् । तत्पक्षे रोदसी रोदस्यां ॥ ङीषंतात्सप्तम्या ईकारो लुग्वा । ईदूतौ च सप्तम्यर्थे इति प्रगृह्यसंज्ञा ॥ तस्यां प्रियं धनं मुंचंति । किंतु देवा मोदयितारो मादयितारो वा मरुतः सख्याय वृधं वृद्धिं जुषंत । सेवंते । द्यावापृथिवीपक्षे सख्याय जगतां सखिभावाय तयोर्वृद्धिं कुर्वंतीत्यर्थः ॥

॥ अथ पंचमी ॥

जोषद्यदीमसुर्या सचध्यै विषितस्तुका रोदसी नृमणाः ।
आ सूर्येव विधतो रथं गात्त्वेषप्रतीका नभसो नेत्या ॥ ५ ॥
जोषत् । यत् । ईं । असुर्या । सचध्यै । विसितऽस्तुका । रोदसी । नृऽमनाः ।
आ । सूर्याऽइव । विधतः । रथं । गात् । त्वेषऽप्रतीका । नभसः । न । इत्या ॥ ५ ॥

रोदसी मरुत्पत्नी विद्युद्वा एतन्नामकेयमपि ईमेनं मरुत्संघं जोषत्। सेवते ॥ जुषेर्लेट्यडागमः ॥ किमर्थं। सचध्यै। संगमनार्थं। कीदृशी सा। असुर्या। असुराः क्षेप्तारो मरुतः। तेषां स्वभूता। विषितस्तुका। विशिष्टकेशसंघा विप्रकीर्णकेशसंघा वा संभोगवशेन। तथा नृमणाः। नृषु नेतृषु मरुत्सु मननवती मनुष्येषु वा वृष्टिप्रदानमनोयुक्ता। त्वेषप्रतीका। दीप्तोपक्रमा दीप्तावयवा। ईदृशी देवी विधतः परिचरतो मरुत्संघस्य रथमागात्। आगच्छति व्याप्नोति। यागदेशं गंतुं रथमारुह्य वा यज्ञमागच्छति। केव। विधतः सूर्यस्य रथं त्वेषप्रतीका सूर्येव सूर्यपत्नीव। यद्वा सूर्यस्य दुहिताश्विनो रथमिव। सा यथारोहति तद्वत्। आगमने दृष्टांतः। नभस इत्या न। अंतरिक्षादित्ययोः साधारणोऽयं नभःशब्दः। नभ इति षट् साधारणानीत्युक्तत्वात्। अत्रादित्यवचनः। तस्य गतिरिव। सा यथा शीघ्रा तद्वत् ॥

॥ इति द्वितीयस्य चतुर्थे चतुर्थो वर्गः ॥

॥ अथ षष्ठी ॥

आस्थापयंत युवतिं युवानः शुभे निमिश्लां विदथेषु पज्रां ।
अर्को यद्वो मरुतो हविष्मान्गायद्गाथं सुतसोमो दुवस्यन् ॥ ६ ॥

आ। अस्थापयंत। युवतिं। युवानः। शुभे। निऽमिश्लां। विदथेषु। पज्रां।
अर्कः। यत्। वः। मरुतः। हविष्मान्। गायत्। गाथं। सुतऽसोमः। दुवस्यन् ॥ ६ ॥

युवानो मिश्रयंतो नित्यतरुणा वा मरुतो युवतिं मिश्रयंती नित्यतरुणी वा विद्युद्रूपां रोदस्यां स्त्रियमास्थापयंत। आस्थापयंति। देवतात्वेन रथे धारयंति। कीदृशीं तां। निमिश्लां। नियमेन मिश्रयंती। पज्रां। पज्रो बलं। तद्वंती। शुभे। शोभते दीप्यत इति शुबुदकं। वृष्ट्युदकार्थं। शुभे रथ इति वा योज्यं। किंनिमित्तं। विदथेषु यागेषु निमित्तभूतेषु। कदा। यत् यदा हे मरुतो वो युष्मान् अर्कः। मत्वर्थो लुप्यते। अर्चनसाधनमंत्रोपेतः स्तोता वा हविष्मान् प्रदेयाज्यादिहविर्युक्तः सुतसोमो होमायाभिषुतसोमोऽयं यजमानो दुवस्यन् परिचरन् गाथं गातव्यं स्तोत्रं गायत्। गायति। तदेत्यर्थः ॥

॥ अथ सप्तमी ॥

प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा सत्यो अस्ति ।
सचा यदीं वृषमणा अहंयुः स्थिरा चिज्जनीर्वहते सुभागाः ॥ ७ ॥
प्र । तं । विवक्मि । वक्म्यः । यः । एषां । मरुतां । महिमा । सत्यः । अस्ति ।
सचा । यत् । ईं । वृषऽमनाः । अहंऽयुः । स्थिरा । चित् । जनीः । वहते । सुऽभागाः ॥ ७ ॥

एषां मरुतां यो महिमा महत्त्वातिशयो वक्म्यः सर्वैः स्तुत्यः सत्योऽबाध्योऽमोघोऽस्ति तं प्रविवक्मि । प्रवच्मि । वर्णयामि । कथमेषां महिमा प्राप्त इति उच्यते । यद्यस्मादीमेतेषां संबंधिनी रोदसी वृषमणा वृष्ट्यादिवर्षणमनस्काहंयुरहंकारवती । जगदुपकारकर्त्री न कदाचिदस्तीत्यहंकारः । स्थिरा चित् । चिदिति पूजायां । अत्यंतमविनश्वरा । ईदृशी देवी सुभागाः शोभनभाग्योपेता जनीर्जननशीलाः प्रजा वृष्ट्युत्पत्तीर्वा वहते । धारयति । वृष्टौ सत्यां सर्वे प्राणिन उत्पद्यंते । यस्मादेवं तस्मान्महिमास्ति । तं महिमानं स्तौमीत्यर्थः ॥

॥ अथाष्टमी ॥

पांति मित्रावरुणाववद्याच्चयंत ईमर्यमो अप्रशस्तान् ।
उत च्यवंते अच्युता ध्रुवाणि वावृध ईं मरुतो दातिवारः ॥ ८ ॥
पांति । मित्रावरुणौ । अवद्यात् । चयंते । ईं । अर्यमो इति । अप्रऽशस्तान् ।
उत । च्यवंते । अच्युता । ध्रुवाणि । ववृधे । ईं । मरुतः । दातिऽवारः ॥ ८ ॥

हे मरुतो युष्मत्संबंधिनो देवा मित्रावरुणावहोरात्र्यभिमानिदेवावर्यमो । अर्यमा उ इति निपातसमुदायात्मकमेकं पदं । उशब्दोऽपिशब्दार्थे । अर्यमापि । एते त्रयोऽपीममुं लोकं यज्ञं वावद्याद्गर्ह्योदयथानुष्ठानात् । जगत्पक्षे व्यवहारप्रतिबंधरूपात् पांति । रक्षंति । तथैतेषामप्रशस्तान् क्षीणानपि पदार्थान् चयते । चायंति नाशयंति । उत अपि चैतैः प्रेरितान्यच्युताच्युतान्यस्रावीणि अत एव ध्रुवाण्यविचलानि मेघस्थोदकानि च्यवंते । च्यावयंति वैते । अहोरात्रे वै मित्रावरुणावहोरात्राभ्यां खलु वै पर्जन्यो वर्षतीति श्रुतेः । यद्वा अच्युतानि ध्रुवाणि धनानि च्यवंते । कदेति उच्यते । हे मरुतो युष्मदीय ईमयं कालो

दातिवारः प्रदेयजलः खंडितमेघो वा यदा ववृधे। वर्धते। तदा मित्रादयो देवा युष्मदनुकूलव्यापारेण जगद्रक्षंतीत्यर्थः। यद्वा दातिवारो दत्तवरणीयहविर्लक्षण-धनो यजमानो हे मरुत ईमेनान् युष्मान्ववृधे वर्धयति यदा तदेत्यर्थः ॥

॥ अथ नवमी ॥

नही नु वो मरुतो अंत्यस्मे आरात्तांच्चिच्छवसो अंतमापुः ।

ते धृष्णुना शवसा शूशुवांसोऽर्णो न द्वेषो धृषता परि ष्ठुः ॥ ९ ॥

नहि। नु। वः। मरुतः। अंति। अस्मे इति। आरात्तात्। चित्। शवसः। अंतं। आपुः।

ते। धृष्णुना। शवसा। शुशुऽवांसः। अर्णः। न। द्वेषः। धृषता। परि। स्थुः ॥ ९ ॥

हे मरुतो वः शवसो युष्माकं संबंधिनो बलस्यांतमवसानमंत्यंतिक आ-रात्ताच्चिद्दूरादपि। यद्वा चिदिति कुत्सायां। अत्यंतदूरात् अस्मे अस्मासु मध्य एकोऽपि नु क्षिप्रं न ह्यापुः। नैव खलु प्राप्नुवंति। संनिधावसंनिधौ च न प्राप्नुवंतीत्यर्थः। अथ परोक्षे प्राप्तबलत्वमाह। ते खलु मरुतो धृष्णुना धर्षकेण शवसा बलेन शूशुवांसो वर्धमाना अत एव धृषता पराभिभावकेन सामर्थ्येन द्विषो द्वेष्टॄन्परिष्ठुः। परिभवंति। वशीकुर्वंति। तत्र दृष्टांतः। अर्णो न। उदक-मिव। यथोदकं स्वविरोधि रजआदिकमभिभवति तद्वत्। यस्मादेवं तस्माच्छ-वसोऽतं नापुः ॥

वयमद्येत्येतां दशमीमस्तमित आदित्ये जपेत्। तथा च सूत्रं ॥ वयमद्येंद्रस्य प्रेष्ठा वयं श्वो वोचेमहीत्यस्तं यात्यादित्य इति। पाठस्तु ॥

वयमद्येंद्रस्य प्रेष्ठा वयं श्वो वोचेमहि समर्ये ।

वयं पुरा महि च नो अनु द्यून्तन्न ऋभुक्षा नरामनु ष्यात् ॥ १० ॥

वयं। अद्य। इंद्रस्य। प्रेष्ठाः। वयं। श्वः। वोचेमहि। सऽमर्ये।

वयं। पुरा। महि। च। नः। अनु। द्यून्। तत्। नः। ऋभुक्षाः। नरां। अनु। स्यात् ॥ १० ॥

अद्यास्मिन्दिने वयं यष्टार इंद्रस्य देवस्य प्रेष्ठाः प्रियतमा भवेम। यद्वा प्रिय-तमा वयमिंद्रस्य महत्त्वं वोचेमहि। स्तोतुं समर्था भूयास्म। किंच वयं श्वः परस्मिन्नपि दिने समर्ये। सह मर्या मर्त्या ऋत्विजो यस्मिन् स समर्यो यज्ञः। तस्मिन्। संग्रामे वेंद्रस्य महत्त्वं वोचेमहि। किंच वयं पुरा पूर्वस्मिन्नतीतेऽपि

काले महि महद्बलं नोऽस्मदर्थं वोचेमहि। तथा द्यून् दिवसाननु प्रतिदिवसमित्यर्थः। अतीत आगामिनि च दिवसे सर्वदा वोचेमहि। तत्तस्माहभुक्षाः। महन्नामैतत् ऋभुक्षा उक्षा इति तन्नामसु पाठात्। महानिंद्रो नरां मनुष्याणां मध्ये नोऽस्माननु स्यात्। अनु भवतु। अनुकूलमभिमतप्रदो वा भवतु ॥

॥ अथैकादशी ॥

एष वः स्तोमो मरुत इयं गीर्मांदार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुं ॥ ११ ॥

एषः। वः। स्तोमः। मरुतः। इयं। गीः। मांदार्यस्य। मान्यस्य। कारोः।
आ। इषा। यासीष्ट। तन्वे। वयां। विद्याम। इषं। वृजनं। जीरऽदानुं ॥ ११ ॥

एष इत्येकादशी व्याख्याता ॥

॥ इति द्वितीयस्य चतुर्थे पंचमो वर्गः ॥

यज्ञायज्ञेति दशर्चं चतुर्थं सूक्तमागस्त्यं मारुतं। अंत्यास्तिस्रस्त्रिष्टुभः। शिष्टाः सप्त त्रिष्टुबंतपरिभाषया जगत्यः। यज्ञायज्ञा दश त्रित्रिष्टुबंतमित्यनुक्रांतं। विशेषविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

यज्ञायज्ञा वः समना तुतुर्वणिर्धियंधियं वो देवया उ दधिध्वे।
आ वोऽर्वाचः सुविताय रोदस्योर्महे ववृत्यामवसे सुवृक्तिभिः ॥ १ ॥

यज्ञाऽयज्ञा। वः। समना। तुतुर्वणिः। धियंऽधियं। वः। देवऽयाः। ऊं इति। दधिध्वे।
आ। वः। अर्वाचः। सुविताय। रोदस्योः। महे। ववृत्यां। अवसे। सुवृक्तिऽभिः ॥ १ ॥

हे मरुतो वः समना समीकृतिर्न्यूनाधिकाभावलक्षणा यज्ञायज्ञा सर्वेष्वपि यज्ञेषु तुर्वणिस्तूर्णवनिस्त्वरमाणा संभजमाना भवति ॥ तुर्वणिस्तूर्णवनिरिति यास्कः ॥ तत्तद्यागावसर आगत्य हविः स्वीकृत्य वैकल्यपरिहारेण समं कुरुथेत्यर्थः। किंच वो यूयं धियंधियं युष्मत्संबंधिवृष्टिप्रदानादिरूपं सर्वं कर्म देवया देवान्प्रापयितार एव संतो दधिध्वे। धारयथ धारयध्वे वा। देवार्थहविराद्युत्पादनाय वृष्टिं कुरुथेत्यर्थः। यस्मादेवं कुरुथ तस्माद्वो युष्मानर्वाचोऽस्मदभिमुखानाववृत्यां। आवर्तयामि। किमर्थं। रोदस्योर्द्यावापृथिव्योर्महे महतेऽवसे रक्षणाय

प्रीणनाय वा । तदपि किमर्थमिति सुविताय सुष्ठु व्याप्ताय । कैः साधनैः । सुवृक्तिभिः शोभनावर्जनैः स्तोत्रैः ॥

॥ अथ द्वितीया ॥

वव्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायंत धूतयः ।
सहस्रियासो अपां नोर्मय आसा गावो वंद्यासो नोक्षणः ॥ २ ॥
वव्रासः । न । ये । स्वऽजाः । स्वऽतवसः । इषं । स्वः । अभिऽजायंत । धूतयः ।
सहस्रियासः । अपां । न । ऊर्मयः । आसा । गावः । वंद्यासः । न । उक्षणः ॥ २ ॥

ये मरुतो वव्रासो न । वव्रिरिति रूपनाम । रूपवंत इव । ते यथा प्रकृष्टा लक्ष्यंते तद्वत् ॥ यद्वा अरूपा अपि सरूपा इव । स्वजाः स्वयमेव स्वस्माद्वा जायमानाः । अनन्यहेतुका इत्यर्थः । धूतयः कंपनशीलाः संति त इषमन्नं हविर्लक्षणमन्नसाधनं सस्यादिकं वा स्वः स्वर्गं चाभिजायंत । अभिलक्ष्य प्रादुर्भवंति । ते दृष्टांतमुखेन श्रूयंते । अपां नोर्मयः । उदकानामूर्मय इव सहस्रियासः सहस्रसंमिताः । तथा वंद्यासो बहुक्षीरादिप्रदत्वेन स्तुत्या गावो न गाव इवासा समीप एव उक्षणो वृष्ट्युदकस्य सेक्तारः । तादृशा मरुतः प्रादुर्भवंतीत्यन्वयः ॥

॥ अथ तृतीया ॥

सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते ।
ऐषामंसेषु रंभिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे ॥ ३ ॥
सोमासः । न । ये । सुताः । तृप्तऽअंशवः । हृत्ऽसु । पीतासः । दुवसः । न । आसते ।
आ । एषां । अंसेषु । रंभिणीऽइव । ररभे । हस्तेषु । खादिः । च । कृतिः । च । सं । दधे ॥ ३ ॥

ये मरुतः सुता अभिषुतास्तृप्तांशवस्तर्पितावयवाः सोमासो न सोमा इव । यथा वल्लीरूपाः सोमा अभिषवात्पूर्वमाप्यायनेन तृप्तावयवाः संतः पश्चात्सुता अभिषुता रसभूताः पीतासः पीताः संतो हृत्सु पातॄणां हृदयेषु दुवसो नासते । परिचरंत इवासते तद्वत् ये मरुतो यज्ञ आहूतास्तृप्तावयवा भवंति ध्यायमानाः संतो हृत्सु हृदयेषु दुवसो न परिचरंत इवासते ॥ यद्वा प्राणादिरूपेण शरीरे स्थिता दुवसः परिचरंत इव गमनादिचेष्टाः कुर्वंत आसते । एषामंसेषु रंभिणीव

युवतमांसालंबिनी योषिदिव रारभे। आरेभे। आश्लिषति। अवलंबने सामर्थ्याच्छन्नयाख्यायुधविशेषो भुजलक्ष्मीर्वा। किंच हस्तेषु खादिर्हस्तत्राणकश्च कृतिः कर्तनी च खड्गलताष्टिश्च संदधे। संधीयते। सम्यक् धृता भवति। परस्परसमुच्चयार्थाश्चकाराः। ये मरुत उक्तरूपास्त आविर्भवंतीत्यर्थः॥

॥ अथ चतुर्थी ॥

अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कशया चोदत त्मना।

अरेणवस्तुविजाता अचुच्यवुर्दृळ्हानि चिन्मरुतो भ्राजदृष्टयः॥ ४॥

अव। स्वऽयुक्ताः। दिवः। आ। वृथा। ययुः। अमर्त्याः। कशया। चोदत। त्मना।

अरेणवः। तुविऽजाताः। अचुच्यवुः। दृळ्हानि। चित्। मरुतः। भ्राजत्ऽऋष्टयः॥ ४॥

एते मरुतः स्वयुक्ताः स्वैर्युक्ताः परस्परं संयुक्ताः स्वेन धनेन वा युक्ताः संतो दिवो द्युलोकाद्वृथानायासेनावाययुः। अवाङ्मुखमागच्छंति। हे अमर्त्या मरुतो यूयं त्मना आत्मना स्वयमेव कशया। वाङ्नामैतत्। वाचा स्तुतिरूपया चोदत। प्रेरयत। स्तोतुमिति शेषः। ते च मरुतोऽरेणवोऽपापास्तुविजाता बहुयज्ञेषु प्रादुर्भूता भ्राजदृष्टयो दीप्ता एवंभूताः संतो दृळ्हानि चिद्दृढान्यपि पर्वतान्यचुच्यवुः। च्यावयंति। चालयंति॥

॥ अथ पंचमी ॥

को वोऽन्तर्मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया।

धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्यो३ नैतशः॥ ५॥

कः। वः। अंतः। मरुतः। ऋष्टिऽविद्युतः। रेजति। त्मना। हन्वाऽइव। जिह्वया।

धन्वऽच्युतः। इषां। न। यामनि। पुरुऽप्रैषाः। अहन्यः। न। एतशः॥ ५॥

हे मरुतो हे ऋष्टिविद्युतो मेघभेदनायुधविशेषेण विद्योतमाना युष्माकमंतर्युष्मासु मध्ये स्थित्वा कः पुमान् रेजति। चालयति प्रेरयति। तर्हि कथं चालनमिति उच्यते। त्मना आत्मनैव। चालने दृष्टांतः। जिह्वया हन्वेव॥ द्विवचनस्याकारः॥ हनू इव। तौ यथा रसनया चाल्येते तद्वत्। यद्यप्येवं तथापीषामन्नानां तत्साधनानां सस्यानां यामनि प्राप्तौ समृद्ध्यर्थं धन्वच्युतो न। धन्वन्शब्दोऽन्तरिक्षस्य वचनः। तेन तत्स्थमुदकं लक्ष्यते। उदकस्राविणो मेघा इव।

ते यथाकांक्ष्यंते तथा युष्माननन्नादिप्राप्तये पुरुप्रैषा बहुविधं फलमिच्छन् यजमानः स्तोत्रैर्बहुप्रकारमाकारयतीत्यर्थः । तत्र दृष्टांतः । अहन्योऽह्नि भव एतशो न । अश्व इव । स यथा शिक्षकेण नानाप्रकारं प्राप्यते तद्वत् ॥

॥ इति द्वितीयस्य चतुर्थे षष्ठो वर्गः ॥

॥ अथ षष्ठी ॥

क्व स्विदस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय ।

यच्च्यावयथ विथुरेव संहितं व्यद्रिणा पतथ त्वेषमर्णवं ॥ ६ ॥

क्व । स्वित् । अस्य । रजसः । महः । परं । क्व । अवरं । मरुतः । यस्मिन् । आऽयय ।

यत् । च्यवयथ । विथुराऽइव । संऽहितं । वि । अद्रिणा । पतथ । त्वेषं । अर्णवं ॥ ६ ॥

हे मरुतो यूयं यस्मिन्नुदकनिमित्तभूते सत्यायय । आगच्छत । अस्य रजसो वृष्ट्युदकस्य लोकस्य वा महो महतः परं पारमंतं क्व स्वित् । कुत्रास्तीति नास्तीत्यर्थः । तथावरमवाङ् भाग आदिश्च क्व स्वित् । कुत्रास्ति । आद्यंतं न कोऽपि जानातीत्यर्थः । यद्यदा यूयं विथुरेव विथुराणि शिथिलानि तृणानीव संहितमेकभूतमुदकं च्यावयथ । स्वस्थानाच्चालयथ तदाद्रिणा वज्रेण त्वेषं दीप्तमर्णवमुदकवंतं मेघं विपतथ । विशीर्णं पातयथ ॥

॥ अथ सप्तमी ॥

सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिष्वती ।

भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जंजती ॥ ७ ॥

सातिः । न । वः । अमऽवती । स्वःऽवती । त्वेषा । विऽपाका । मरुतः । पिपिष्वती ।

भद्रा । वः । रातिः । पृणतः । न । दक्षिणा । पृथुऽज्रयी । असुर्याऽइव । जंजती ॥ ७ ॥

हे मरुतो वो युष्माकं संबंधिनी सातिर्न संभक्तिरिव । युष्मत्संभजनं यथा प्रशस्तगुणं तद्वद्वो रातिर्वृष्ट्यादिविषयामवती । अमात्यवतींद्रादिसहायवती । यथा राजेवामवानित्यत्रामशब्दोऽमात्यवचनः तद्वत् । यद्वा वः सातिः संविभक्तिर्नामवती । रोगवती न भवति । किंतु स्वर्वती सुखवती त्वेषा दीप्ता विपाका परिपक्वफला पिपिष्वती पेषणवती कृषीवलैः कर्षणवती । वृष्टौ सत्यां कर्षंतीति प्रसिद्धं । स्वविरोधिपेषणवती त्वेषा दीप्ता विपाका वा । भद्रा भंदनीया

स्तुत्या । किंच पृणतो दातुर्धनिकस्य दक्षिणा न । दक्षिणेव । तद्वत्समृद्धकरी । पृथुज्रयी पृथुजवा शीघ्रगामिनी । किंच असुर्येव असुरस्य स्वभूता जंजती सर्वानभिभवंती शक्तिरिव । सा यथाऽन्येभ्योऽपहृत्यान्यस्मै दातुं समर्था तद्वदियमपि मेघस्थमुदकमपहृत्य जगतो दातुं शक्तेत्यर्थः । ईदृशी रातिरस्मभ्यमस्त्विति भावः ॥

॥ अथाष्टमी ॥

प्रति॑ ष्टोभंति॒ सिंध॑वः प॒विभ्यो॒ यद॒भ्रियां॒ वाच॑मुदी॒रयं॑ति ।

अव॑ स्मयंत वि॒द्युतः॑ पृथि॒व्यां यदी॑ घृ॒तं म॒रुतः॑ प्रुष्णु॒वंति॑ ॥ ८ ॥

प्रति॑ । स्तो॒भं॒ति॒ । सिंध॑वः । प॒विऽभ्यः॑ । यत् । अ॒भ्रियाँ॑ । वाचँ॑ । उ॒त्ऽई॒रयँ॑ति ।

अव॑ । स्म॒यं॒त॒ । वि॒ऽद्युतः॑ । पृ॒थि॒व्यां । यदि॑ । घृ॒तं । म॒रुतः॑ । प्रु॒ष्णु॒वंति॑ ॥ ८ ॥

पविभ्यो मरुत्संबंधिवज्रेभ्यः सिंधवः स्यंदनशीला आपः प्रतिष्टोभंति । प्रतिचलंति । कदा । यत् यदाभ्रियामभ्रभवां वाचं शब्दं स्तनितलक्षणमुदीरयंति । उच्चारयंति वज्राणि । किंच विद्युतो विद्योतमानास्तडितः पृथिव्यामंतरिक्षे ॥ पृथिवीत्यंतरिक्षनाम । पृथिवी भूरिति तन्नामसूक्तत्वात् ॥ तत्रावस्मयंत । स्मयंते । अवाङ्मुखं प्रकाशंते । पृथिव्यामित्येतदुत्तरत्र वा योज्यं । यदि यदा पृथिव्यां भूम्यां घृतं क्षरदुदकं मरुतः प्रुष्णुवंति । प्रुष्णंति । सिंचंति ॥ प्रुषेः क्र्यादिकस्य व्यत्ययेन श्नुः ॥ यदैवं तदेत्यर्थः ॥

॥ अथ नवमी ॥

असू॑त॒ पृश्नि॑र्मह॒ते रणा॑य त्वे॒षम॒यासां॑ म॒रुता॒मनी॑कं ।

ते स॑प्स॒रासो॑ऽजनयं॒ताभ्व॒मादित्स्व॒धामि॑षि॒रां पर्य॑पश्यन् ॥ ९ ॥

असू॑त । पृश्नि॑ः । म॒ह॒ते । रणा॑य । त्वे॒षं । अ॒यासाँ॑ । म॒रुतां॑ । अनी॑कं ।

ते । स॒प्स॒रासः॑ । अ॒ज॒न॒यं॒त॒ । अभ्वँ॑ । आत् । इत् । स्व॒धां । इ॒षि॒रां । परि॑ । अ॒प॒श्य॒न् ॥ ९ ॥

पृश्निर्मरुन्माता नानावर्णा । पृश्निये वै पयसो मरुतो जाताः पृश्नेः पुत्रा उपमास इत्यादिश्रुतेः । तामेवांतरिक्षदेवतां केचिदाहुः । सा देवी त्वेषं दीप्तमयासां गंतॄणां मरुतामनीकं समूहमेकोनपंचाशत्संख्याकमसूत । उत्पादितवती । किमर्थं । महते रणाय । संग्रामाय । मेघजयायेत्यर्थः । ते च मरुतः सप्सरासः समानरूपा हिंसका वा मेघानामभ्वं मेघं जनयंति । उत्पादितवंतः । आदित्

अनंतरमेवेषिरां सर्वैरिष्टव्यां स्वधामन्नं सस्यादिसमृद्धिलक्षणं पर्यपश्यन् । परिपश्यंति सर्वे जनाः ॥

॥ अथ दशमी ॥

एष वः स्तोमो मरुत इयं गीर्मांदार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुं ॥ १० ॥
एषः । वः । स्तोमः । मरुतः । इयं । गीः । मांदार्यस्य । मान्यस्य । कारोः ।
आ । इषा । यासीष्ट । तन्वे । वयां । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ १० ॥

एष व इति दशमी व्याख्याता ॥

॥ इति द्वितीयस्य चतुर्थे सप्तमो वर्गः ॥

महश्चित्त्वमित्यष्टर्चं पंचमं सूक्तमैंद्रमागस्त्यं त्रैष्टुभं। द्वितीया चतुष्पदा विराट् अथ चतुष्पदा विराड् दशकैरित्युक्तत्वात् विराजो दिश इति पिंगलनागेन सूचितत्वाच्च । महोऽष्टौ द्वितीया विराडित्यनुक्रमणिका ॥ समूळ्हे दशरात्रे द्वितीये छंदोमे मरुत्वतीय इदं विश्वजितोऽग्निं नर इति खंडे सूचितं। द्वितीयस्य शंसा महां महश्चित्त्वमिंद्र। आ॰ ८.७.। इति ॥

॥ तत्र प्रथमा ॥

महश्चित्त्वमिंद्र यत एतान्महश्चिदसि त्यजसो वरूता ।
स नो वेधो मरुतां चिकित्वान्सुम्ना वनुष्व तव हि प्रेष्ठा ॥ १ ॥
महः । चित् । त्वं । इंद्र । यतः । एतान् । महः । चित् । असि । त्यजसः । वरूता ।
सः । नः । वेधः । मरुतां । चिकित्वान् । सुम्ना । वनुष्व । तव । हि । प्रेष्ठा ॥ १ ॥

हे इंद्र त्वं यतः कारणादेतान्मरुतो महश्चित् महतोऽपि सामर्थ्यातिशयवत्त्वात्त्वं निरपेक्षेणापि स्नेहान्न त्यजसीति शेषः । अतः कारणान्महश्चिदसि । चिदिति पादपूरणः । महतोऽपि त्यजसस्त्यागात् । यद्वैतत्क्रोधनाम । क्रोधाद्वा वरूता वरिता रक्षितासि। भवसि। यद्वा मरुतोऽपि त्यागाद्वृष्ट्यादिविषयाद्वारयितासि। यस्मादेवं तस्मात् हे मरुतां वेधो विधातः स तादृशस्त्वं चिकित्वान् चेतनावान् अस्मदनुग्रहविषयज्ञानोपेतः सन् नोऽस्मभ्यं सुम्ना सुखानि मरुदायत्तानि वृष्ट्या-

दिरूपाणि वनुष्व। देहि। तानि सुम्नानि तव हि प्रेष्ठा। तव खलु प्रियतमानि। हिशब्दोऽयमिंद्रो मरुत्सखेत्यादिश्रुतिषु प्रसिद्ध्यर्थः ॥

॥ अथ द्वितीया ॥

अयुंजन्त इंद्र विश्वकृष्टीर्विदानासो निष्षिधो मर्त्यत्रा ।
मरुतां पृत्सुतिर्हासमाना स्वर्मीळ्हस्य प्रधनस्य सातौ ॥ २ ॥
अयुंजन्। ते। इंद्र। विश्वऽकृष्टीः। विदानासः। निःऽसिधः। मर्त्यऽत्रा।
मरुतां। पृत्सुतिः। हासमाना। स्वःऽमीळ्हस्य। प्रऽधनस्य। सातौ ॥ २ ॥

पूर्वमंत्रे मरुतामिंद्रसाहाय्यमुक्तं। अत्रेंद्रस्य मरुत्साहाय्यमुच्यते ॥ हे इंद्र ते मरुतोऽयुंजन्। युज्यंते। त्वया युक्ता भवंतीत्यर्थः। कीदृशास्ते। विश्वकृष्टीः। विश्वकृष्टयः। राज्यत्वेन सर्वजनवंतः। किंच मर्त्यत्रा मर्त्येषु मर्त्यार्थं निष्षधो निःशेषेणोदकस्य सेक्तॄन्मेघान्विदानासो जानानाः। किंच येषां मरुतां पृत्सुतिः सेना स्वर्मीळ्हस्य प्रधनस्य सुखसेक्तुः प्रकृष्टधनवतो वृत्रादिसंग्रामस्य सातौ लाभे जये निमित्तभूते सति सेना हासमाना हासं कुर्वती हर्षयुक्ता भवति। यद्वा सुखेन मिह्यते जलं यस्मिन् तादृशस्य प्रधनस्य प्रकृष्टोदकाख्यधनसाधनस्य संग्रामस्य सातौ। मेघभेदनायेति यावत्। येषामीदृशी सेनास्ति ते मरुतोऽयुंजन्निति संबंधः ॥

॥ अथ तृतीया ॥

अम्यक्सा त इंद्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनंति ।
अग्निश्चिद्धि ष्मातसे शुशुक्वानापो न द्वीपं दधति प्रयांसि ॥ ३ ॥
अम्यक्। सा। ते। इंद्र। ऋष्टिः। अस्मे इति। सनेमि। अभ्वं। मरुतः। जुनंति।
अग्निः। चित्। हि। स्म। अतसे। शुशुक्वान्। आपः। न। द्वीपं। दधति। प्रयांसि ॥ ३ ॥

हे इंद्र ते तव सा प्रसिद्धा ऋष्टिर्वज्राख्यायुधविशेषोऽस्मे अस्मद्वृष्ट्यर्थमम्यक्। प्राप्नोति मेघसमीपे। एवं च सति मरुतोऽपि सनेमि। अह्नायेति षट् पुराणनामानीत्युक्तत्वात्सनेमीति पुराणनाम। पुराणं चिरकालं संगृहीतमभ्वमुदकं जुनंति। क्षिपंति। वर्षंतीत्यर्थः। वृष्ट्या सस्यादिसमृद्धौ सत्यामग्निश्चिद्धि ष्म। हि स्मेति पूरणे। अग्निरप्यतसे संतते कर्मणि निमित्तभूते सति

शुशुक्वान् दीप्यमानो वर्तते । पश्चात्प्रयांसि चरुपुरोडाशादिहवींषि दधति । धारयंति ददति वा यजमानाः । किमिव । आपो न द्वीपं । द्विपार्श्वस्थोदकवान्पर्वतादिर्द्वीपः । तं यथापो धारयंति तद्वत् । यद्वा आयुधमेवोच्यते । वज्राख्यायुधविशेषोऽतसे काष्ठसमूहे शुशुक्वान् दीपयन्नग्निश्चित् ॥ चिच्छब्द उपमार्थे दधि चिदित्युपमार्थे । नि० १. ४. । इति यास्केनोपमार्थस्योक्तत्वात् ॥ काष्ठे ज्वलन्नग्निरिव । तद्वद्दीप्तो वर्तते । एतदेव दीप्तत्वमपेक्ष्य सेत्युक्तं । एवं च सत्यापो द्वीपमिव वृष्ट्युदकानि प्रयांसि सस्याद्यन्नानि दधति । धारयंति । एतत्सर्वं महानुभावस्येंद्रस्य ऋष्टेः सामर्थ्यमितींद्रस्य स्तुतिः ॥

॥ अथ चतुर्थी ॥

त्वं तू न॑ इंद्र॒ तं र॒यिं दा॒ ओजि॑ष्ठया॒ दक्षि॑णयेव रा॒तिं ।
स्तुत॑श्च॒ यास्ते॑ च॒कनं॑त वा॒योः स्तनं॒ न मध्वः॑ पीपयंत॒ वाजैः॑ ॥ ४ ॥
त्वं । तु । नः॒ । इं॒द्र॒ । तं । र॒यिं । दाः॒ । ओजि॑ष्ठया । दक्षि॑णया ऽ इव । रा॒तिं ।
स्तुतः॑ । च॒ । याः । ते॒ । च॒कनं॑त । वा॒योः । स्तनं॑ । न । मध्वः॑ । पी॒प॒यं॒त॒ । वाजैः॑ ॥ ४ ॥

हे इंद्र त्वं तु ॥ तुरवधारणे ॥ त्वमेव तं रयिं त्वद्दानयोग्यं गवादिधनं दाः । देहि । यस्मादितरेभ्योऽपि त्वमेव बहुप्रदः अतोऽतिमहद्धनं देहीत्यर्थः । वयं त्वोजिष्ठया ओजस्वितमया परिक्रमणार्हया दक्षिणया समृद्धिसाधनया गवादिलक्षणया ऋत्विजमिव रातिं दातारं त्वां प्रीणयाम इति शेषः । यद्वा दक्षिणाशब्दो देयद्रव्यसामान्यवचनः । रातिशब्दो बंधुवचनः । हिरण्यादिसारवद्द्रव्यप्रदानेन बंधुं यथा वशीकुर्वंति तद्वत्त्वां वशीकुर्म इत्यर्थः । किंच वायोर्धौतयुवक्षेपिष्ठस्य शीघ्रवरप्रदस्य ते ॥ कर्मणि षष्ठी ॥ वायुं त्वां स्तुतो येऽस्मदीयाः स्तोतारश्चकनंत । कामयंतेऽस्तवन् । याः स्तुतयस्त्वामेवाकामयंतेति वा योजना ॥ कनतेर्ण्यंताल्लुङि चङि रूपं । चङ्यन्यतरस्यामिति चङः पूर्वमक्षरमुदात्तं ॥ त्वां होत्रादयो वाजैर्हविर्लक्षणैरन्नैः पीपयंत । आप्याययंति । तत्र दृष्टांतः । मध्वो मधुरस्य स्तन्यस्य लाभाय वाजैः सारवद्भिरन्नविशेषैः स्तनं न । तं यथाप्याययंति तद्वद्वयं त्वां बहुकृतप्रदानाय स्तुत्या हविषाप्याययामः । त्वं तु दातव्यत्वेन प्रसिद्धं धनं सर्वदा देहीत्यर्थः ॥

॥ अथ पंचमी ॥

त्वे रायं इंद्र तोशतमाः प्रणेतारः कस्य चिदृतायोः ।
ते षु णो मरुतो मृळयंतु ये स्मा पुरा गातूयंतीव देवाः ॥ ५ ॥
त्वे इति । रायः । इंद्र । तोशऽतमाः । प्रऽनेतारः । कस्य । चित् । ऋतऽयोः ।
ते । सु । नः । मरुतः । मृळयंतु । ये । स्म । पुरा । गातुयंतिऽइव । देवाः ॥ ५ ॥

हे इंद्र त्वे तव रायो धनविशेषास्तोशतमाः । अतिशयेन प्रीणयितारः ॥ तुष्यतेस्तोषः । छांदसं शत्वं ॥ यद्वा ते रायो रातयो बंधवो बंधुभूताः सखिभूता मरुतस्तोशतमाः ॥ तोशतिर्वधकर्मा नितोशयति निबर्हयतीति तन्नामसु पाठात् ॥ तोशतमा हिंसितृतमा अवर्षकाणां मेघानां । कस्यचिदृतायोः । ऋतमिति यज्ञनाम । कस्यापि यज्ञेच्छोर्यजमानस्य प्रणेतारः प्रकर्षेण निर्वोढारः । ते मरुतो नोऽस्मान् सुष्ठु मृळयंतु । के ते । ये स्म ये खलु देवा द्योतनशीला मरुतः पुरा पूर्वं गातुयंतीव । यज्ञगमनमिच्छंतीव । त आगत्य मृळयंतु ॥

॥ इति द्वितीयस्य चतुर्थेऽष्टमो वर्गः ॥

॥ अथ षष्ठी ॥

प्रति प्र याहीद्र मीळ्हुषो नृन्महः पार्थिवे सदने यतस्व ।
अध यदेषां पृथुबुध्नास एतास्तीर्थे नार्यः पौंस्यानि तस्थुः ॥ ६ ॥
प्रति । प्र । याहि । इंद्र । मीळ्हुषः । नृन् । महः । पार्थिवे । सदने । यतस्व ।
अध । यत् । एषां । पृथुऽबुध्नासः । एताः । तीर्थे । न । अर्यः । पौंस्यानि । तस्थुः ॥ ६ ॥

हे इंद्र त्वं मीळ्हुष उदकासेक्तॄन् नॄन् जगन्नेतॄन् नराकारान्वा महो महतो मेघान्प्रति प्रयाहि । अभिगच्छ । मेघानां वृत्ररूपेण नराकारत्वं युक्तं । गत्वा च पार्थिवे सदने । पृथिवीत्यंतरिक्षनाम । तत्संबंधिनि स्थाने यतस्व । प्रयत्नं कुरु । तैः सह युध्यस्वेत्यर्थः । यद्वा हविःप्रदातॄन् कर्मनिर्वाहकान्महतो यजमानान्प्रति गच्छ । गत्वा च पार्थिवे सदने देवयजने यतस्व । यत्नं कुरु हविर्भोजनाय । अध अपि यद्यदेषां त्वत्साहाय्यकारिणां मरुतां संबंधिनः पृथुबुध्नासो विस्तीर्णमूला एताः पृषद्वर्णा गंतारो वाश्वा अर्योऽरेः शत्रोः पौंस्यानि तीर्थे न युद्धमार्ग इव तस्थुः । तिष्ठंति । मेघानाक्रमंते । यद्वैषां मरुतां पृथुबुध्नासो बृहन्मूला एताः

कृष्णवर्णा मेघास्तिष्ठंति । तत्र दृष्टांतः । अर्योऽरणीयस्य स्वामिनः पौंस्यानि बलानि तीर्थे न । राजवीथ्यां यथा तिष्ठंति तद्वत् ॥

॥ अथ सप्तमी ॥

प्रति घोराणामेतानामयासां मरुतां शृण्व आयतामुपब्दिः ।
ये मर्त्यं पृतनायंतमूमैर्ऋणावानं न पतयंत सर्गैः ॥ ७ ॥
प्रति । घोराणां । एतानां । अयासां । मरुतां । शृण्वे । आऽयतां । उपब्दिः ।
ये । मर्त्यं । पृतनाऽयंतं । ऊमैः । ऋणऽवानं । न । पतयंत । सर्गैः ॥ ७ ॥

हे इंद्र ते संबंधिनां घोराणां भयानकानां शब्दाभिमानानां वैतानामेतवर्णानामयासामयमानानां गमनशीलानां मरुतामायतामागंतॄणां मरुतामुपब्दिः । उप गुर्वादिसमीपे गम्यते ज्ञायत उपपद्यत इति वोपब्दिर्वाक् । शृण्वे । श्रूयते ॥ कर्मणि कर्तृप्रत्ययः ॥ त एव विशिष्यंते । ये मरुतो मर्त्यं मरणधर्माणमूमैः स्वरक्षणैरुदकनिगमनसाधनैर्वा पृतनायंतं पृतनामात्मन इच्छंतं वैरिणं मेघं वा सर्गैः सृष्टैः स्वकीयप्रहारविशेषैः पतयंत । पातयंति । तेषामेव ध्वनिः श्रूयत इत्यर्थः । पातने दृष्टांतः । सर्गैर्ऋणावानं न ॥ छंदसीवनिपाविति वनिप् ॥ ऋणवंतमधमवैरिणमिव । तं यथा पीडयित्वा तदीयं धनमपहरंति तद्वत् । एवं महानुभावा मरुतस्तवानुगा इतींद्रस्य स्तुतिः ॥

॥ अथाष्टमी ॥

त्वं मानेभ्य इंद्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः ।
स्तवानेभिः स्तवसे देव देवैर्विद्यामेषं वृजनं जीरदानुं ॥ ८ ॥
त्वं । मानेभ्यः । इंद्र । विश्वऽजन्या । रद । मरुत्ऽभिः । शुरुधः । गोऽअग्राः ।
स्तवानेभिः । स्तवसे । देव । देवैः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ८ ॥

हे इंद्र त्वं मानेभ्यो मानार्थं । चित्तेनेत्यर्थः ॥ तादर्थ्ये चतुर्थी ॥ विश्वजन्या विश्वजन्यः ॥ सोराकारः ॥ विश्वे प्राणिन उत्पादनीया यस्य तादृशस्त्वं सर्वजनहितशक्त्या वा मरुद्भिः सह शुरुधः शोकस्य रोधयित्रीः शोषका गोअग्रा गर्जितमुदकं वाग्रे पुरतो यासां ता मेघपंक्ती रद । विलिख । विदारय । हे देव

द्योतमान त्वं स्तवानेभिः स्तूयमानैर्देवैरन्यैर्मरुदादिभिर्ऋत्विग्भिर्वा स्तवसे। स्तूयसे॥ उभयत्र कर्मणि कर्तृप्रत्ययः ॥ विद्यामेत्ययं व्याख्यातः ॥

॥ इति द्वितीयस्य चतुर्थे नवमो वर्गः ॥

न नूनमस्तीति पंचर्चं षष्ठं सूक्तमागस्त्यमैंद्रं ॥ अत्रानुक्रमणिका ॥ न नूनं पंचागस्त्यैनैंद्रे हविषि मरुतामुद्यत इंद्रागस्त्ययोः संवाद ऐंद्रस्त्वाद्या तृतीया चेंद्रवाक्यं चतुर्थी चादौ बृहती तिस्रोऽनुष्टुभ इति। सूक्तस्येंद्रागस्त्यसंवादरूपत्वादाद्या तृतीया चतुर्थी चेंद्रवाक्यं। अतस्तासां तस्य वाक्यन्यायेन स ऋषिः। शिष्टे अगस्त्यवाक्ये। अतस्तयोः स एवर्षिः। आद्या च बृहती ततस्तिस्रोऽनुष्टुभः। अंत्याविशेषात्त्रिष्टुप्॥ विशेषविनियोगो लैंगिकः ॥ अत्र यास्कः। अगस्त्य इंद्राय हविर्निरुप्य मरुद्भ्यः संप्रदित्सां चकार स इंद्र एत्य परिदेवयां चक्रे।नि० १.६.। इति॥

॥ तत्र प्रथमा ॥

न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतं ।
अन्यस्य चित्तमभि संचरेण्यमुताधीतं वि नश्यति ॥ १ ॥
न। नूनं। अस्ति। नो इति। श्वः। कः। तत्। वेद। यत्। अद्भुतं।
अन्यस्य। चित्तं। अभि। संऽचरेण्यं। उत। आऽधीतं। वि। नश्यति ॥ १ ॥

परिदेवनप्रकारः प्रतिपाद्यते। इंद्र आह। अद्यतनं यदस्ति तन्नूनमद्य नास्ति। नूनमत्र विचिकित्सार्थे। अत्राद्येति यद्यपि नास्ति तथाप्युत्तरवाक्ये श्व इति दर्शनादत्राद्येति गम्यते। तथा श्वोऽपि नूनं नो॥ उशब्दोऽवधारणे॥ श्वस्तनमपि नैव नास्ति। अद्य यथास्मदर्थंनिरुप्तमस्मभ्यं नास्ति किल श्वः कथं लप्स्यत इति भावः। यदद्भुतमन्यस्मै निरुप्यान्यस्मै दत्तमिति यदस्ति वैपरीत्यं तत्को वेद। यद्वा यदद्भुतं भावि कार्यं यदस्ति तत्को वेद। अद्य श्वो वा लभ्यत इत्याशा न कार्येत्युक्तं भवति। तदेवाह। अभि संचरेण्यं सर्वतः संचार्यंन्यस्य चित्तं मानसं जानातीति शेषः। उत अपि च आधीतमाध्यातं चिंतितमपि न दृश्यं किमु सकृत्स्मृतं नश्यतीति ॥

॥ अथ द्वितीया ॥

किं न इंद्र जिघांससि भ्रातरो मरुतस्तव ।
तेभिः कल्पस्व साधुया मा नः समरणे वधीः ॥ २ ॥

किं । नः । इंद्र । जिघांससि । भ्रातरः । मरुतः । तव ।
तेभिः । कल्पस्व । साधुऽया । मा । नः । संऽअरणे । वधीः ॥ २ ॥

इदमगस्त्यवाक्यं ॥ हे इंद्र नोऽस्माननपराधिनः किं जिघांससि । हंतुमिच्छसि । कथमवध्यत्वमिति अत आह । मरुतस्तव भ्रातरः । त्वया भोगप्रदानेन भरणीया इत्यर्थः । अतो वयमवध्या इत्युक्तं भवति । मरुतामिंद्रभ्रातृत्वमेकस्मिन्नेवादितिगर्भे उत्पन्नत्वात् । सा चोत्पत्तिः पुराणेषु प्रसिद्धा । संतु भ्रातरस्ततश्च किमित्यत आह । तेभिस्तैर्मरुद्भिः सह साधुया साधु त्वं कल्पस्व । कल्पय हविर्भागं तैः सह युद्धं वा । नोऽस्मान् समरणे संग्रामे मा वधीः । मा हिंसीः । यद्वा लुप्तो दृष्टांतः । संग्रामे यथा विरोधिनं हंसि न तथास्मानिति ॥

॥ अथ तृतीया ॥

किं नो भ्रातरगस्त्य सखा सन्नति मन्यसे ।
विद्मा हि ते यथा मनोऽस्मभ्यमिन्न दित्ससि ॥ ३ ॥
किं । नः । भ्रातः । अगस्त्य । सखा । सन् । अति । मन्यसे ।
विद्म । हि । ते । यथा । मनः । अस्मभ्यं । इत् । न । दित्ससि ॥ ३ ॥

इदमिंद्रवाक्यं । हे भ्रातः हे अगस्त्य । हविःप्रदानवरप्रदानाभ्यां परस्परोपकारत्वाद्भ्रातृत्वं । तादृशस्त्वं सखा सन् अस्मद्धितकार्यपि सन् नोऽस्मान्किमतिमन्यसे । कस्मादपराधादतिक्रम्य मनुषे । अपलपसि । नायमपलापः किंतु तथ्यमेवेति चेदुच्यते । गंतव्यं ते तव मनो मानसं यथा यथावस्तु विद्म । जानीमः । कथं जानीथेति उच्यते । अस्मभ्यमिन्न दित्ससि । अस्मदर्थं निरुप्तमस्मभ्यं दातुं नेच्छस्येव ॥ इदेवार्थे ॥

॥ अथ चतुर्थी ॥

अरं कृण्वंतु वेदिं समग्निमिंधतां पुरः ।
तत्रामृतस्य चेतनं यज्ञं ते तनवावहै ॥ ४ ॥
अरं । कृण्वंतु । वेदिं । सं । अग्निं । इंधतां । पुरः ।
तत्र । अमृतस्य । चेतनं । यज्ञं । ते । तनवावहै ॥ ४ ॥

इदमिंद्रवाक्यं। अपरेऽगस्त्यवाक्यमाहुः। हे ऋत्विजो यूयं। अगस्त्योऽंगीकृतवान्। तस्माद्वेदिमरंकृखंतु। संमार्जनपर्युक्षणादिना परिचरंतु। तथा पुरः पुरस्तादग्निमाहवनीयादिकं समिंधतां। इध्मप्रक्षेपेण प्रज्वालयंतु। तत्राग्नावमृतस्यामरणलक्षणस्य वेदत्वस्य चेतनं प्रज्ञापकं यज्ञं हे अगस्त्य ते त्वदीयं त्वं चाहं च तनवावहै॥ अगस्त्यवाक्यपक्षे शिष्टमविशिष्टं। तत्र वेद्याममृतस्य तत्साधनस्य हविषो वा चेतनं प्रज्ञापनमासादनं कुरुत। आवां पत्नीयजमानौ अध्वर्युयजमानौ वा हे इंद्र ते त्वदर्थं यज्ञं तनवावहै॥

॥ अथ पंचमी ॥

त्वमीशिषे वसुपते वसूनां त्वं मित्राणां मित्रपते धेष्ठः।

इंद्र त्वं मरुद्भिः सं वदस्वाध प्राशान ऋतुथा हवींषि॥५॥

त्वं। ईशिषे। वसुऽपते। वसूनां। त्वं। मित्राणां। मित्रऽपते। धेष्ठः।

इंद्र। त्वं। मरुत्ऽभिः। सं। वदस्व। अध। प्र। अशान। ऋतुऽथा। हवींषि॥५॥

इदमगस्त्यवाक्यं। हे वसूनां वसुपते। अतिप्रभूतानां पुरोडाशाज्यादिधनानां स्वामिन् हे इंद्र त्वमीशिषे। ईश्वरो भवसि। सर्वस्य वृत्त्यवृत्तिभ्यां बहुत्वं नित्यं संबंधश्च प्रतिपद्यते। यद्वा हे वसुपते वसूनामीशिष इति योजना। द्वितीयो वसुशब्दोऽनुवादो वा। तथा हे मित्राणां मित्रपते। अस्मदादिमित्रस्य नित्यं पालकेंद्र त्वं धेष्ठः। सर्वस्यातिशयेन धारकोऽसि॥ हे इंद्र त्वमुक्तमहिमस्त्वं मरुद्भिः संवदस्व। तैः साकं सम्यक्कृतमिति वदस्व। अध अपि च त्वमृतुथा ऋतावृतौ। उपलक्षणमेतत्कालस्य। तत्तद्यागकाले हवींष्याज्यचर्वादीनि प्राशान। प्रकर्षेण भुंक्ष्व॥

॥ इति द्वितीयस्य चतुर्थे दशमो वर्गः॥

प्रति व इति षडृचं सप्तमं सूक्तमागस्त्यं त्रैष्टुभं मारुतं। आद्ये द्वे केवलमारुते। शिष्टाश्चतस्रो मरुत्वदिंद्रदेवताकाः॥ प्रति वः षण्मारुतं तु चतस्रोऽंत्या मरुत्वतीया इत्युनुक्रमणिका। विशेषविनियोगो लैंगिकः॥

॥ तत्र प्रथमा ॥

प्रति व एना नमसाहमेमि सूक्तेन भिक्षे सुमतिं तुराणां।

रराणता मरुतो वेद्याभिर्नि हेळो धत्त वि मुंचध्वमश्वान्॥१॥

प्रति। वः। एना। नमसा। अहं। एमि। सुऽउक्तेन। भिक्षे। सुऽमतिं। तुराणां।
रराणता। मरुतः। वेद्याभिः। नि। हेळः। धत्त। वि। मुचध्वं। अश्वान् ॥ १ ॥

हे मरुतः वो युष्मानहं प्रत्येमि। अभिगच्छामि। केन साधनेन। नमसा। नमस्कारेण हविषा वा। नम इत्यन्ननाम। तथा सूक्तेन शोभनवचनेन स्तुतिरूपेण। तुराणां त्वरमाणानां शत्रूणां हिंसकानां वा युष्माकं सुमतिं शोभनमतिमनुग्रहबुद्धिं भिक्षे। याचे। इंद्रस्यैव पुनर्हविःप्रदानादिदं याच्यते। किंच हे मरुतो यूयं वेद्याभिर्वेदितव्याभिः स्तुतिभी रराणता रममाणेन मनसेत्थंभूताः संतो हेळः। क्रोधनामैतत्। क्रोधं युष्मदभिक्रमजनितं निधत्त। निकृष्टं धारयत। त्यजतेत्यर्थः। तथाश्वान् विमुचध्वं। रथेभ्यो वियोजयत। क्रोधात्पुनर्गमनं मा कुरुतेत्यर्थः॥

॥ अथ द्वितीया ॥

एष वः स्तोमो मरुतो नमस्वान्हृदा तष्टो मनसा धायि देवाः।
उपेमा यात मनसा जुषाणा यूयं हि ष्ठा नमस इद्वृधासः ॥ २ ॥

एषः। वः। स्तोमः। मरुतः। नमस्वान्। हृदा। तष्टः। मनसा। धायि। देवाः।
उप। ईं। आ। यात। मनसा। जुषाणाः। यूयं। हि। स्थ। नमसः। इत्। वृधासः ॥२॥

हे मरुतः एष वः स्तोम इदानीं क्रियमाणः प्रकारो वो युष्माकं। युष्मदर्थ इत्यर्थः। कीदृशोऽयं। नमस्वान्। नम इत्यन्ननाम। हविर्लक्षणान्नवान् न केवलं स्तुतिमात्रं। भक्षणाय हविरपि युष्माकमित्यर्थः। किंच हृदा तष्टः। युष्मन्निवेदनबुद्ध्या संपादितः। तादृशः स्तोमो हे देवा देवनशीला मनसास्मदनुग्रहवता चित्तेन धायि। धार्यतां। तदर्थं मनसादरया बुद्ध्या जुषाणा ईमेनां स्तुतिं तद्धविश्च सेवमाना उपायात। उपागच्छतैव। मा विलंबं कुरुत। यूयं नमसोऽन्नस्य हवीरूपस्य वृधासः स्थ ह। वर्धयितारो भवथ खलु। अतो गंतव्यमेव। इत्पूरणः॥

॥ अथ तृतीया ॥

स्तुतासो नो मरुतो मृळयंतूत स्तुतो मघवा शंभविष्ठः।
ऊर्ध्वा नः संतु कोम्या वनान्यहानि विश्वा मरुतो जिगीषा ॥ ३ ॥

स्तुतासः। नः। मरुतः। मृळयंतु। उत। स्तुतः। मघऽवा। शंऽभविष्ठः।
ऊर्ध्वा। नः। संतु। कोम्या। वनानि। अहानि। विश्वा। मरुतः। जिगीषा ॥ ३ ॥

ते मरुतः स्तुतासः स्तुताः संतो नोऽस्मान्मृळयंतु। सुखयंतु। उत अपि च मघवा। मघमिति धननाम। अस्मद्दातव्यबहुधनेन तद्वानिंद्रः स्तुतः शंभविष्ठः सुखस्य भावयितृतमः सन् अस्मान्मृळयतु। किंच हे मरुतो नोऽस्माकं जिगीषा ॥ जिगातेर्गतिकर्मणो जिगीषा ॥ जिगीषितव्यानि प्राप्तव्यान्युत्तरत्वानुभूयमानानि विश्वा सर्वाण्यहानि दिवसान्यूर्ध्वोन्नतान्युपर्युपरि श्रिया यशसा वोत्कृष्टानि कोम्या काम्यानि स्पृहणीयानि वनानि सर्वैः संभजनीयानि संतु। जिगीषा जेतुमिष्टानि जेतव्यानि च संत्विति वा योज्यं। एवं कृत्वा मरुत इंद्रश्च सुखयंत्वित्यर्थः ॥

॥ अथ चतुर्थी ॥

अस्मादहं तविषादीषमाण इंद्राद्भिया मरुतो रेजमानः।
युष्मभ्यं हव्या निशितान्यासन्तान्यारे चकृमा मृळता नः ॥ ४ ॥
अस्मात्। अहं। तविषात्। ईषमाणः। इंद्रात्। भिया। मरुतः। रेजमानः।
युष्मभ्यं। हव्या। निऽशितानि। आसन्। तानि। आरे। चकृम। मृळत। नः ॥ ४ ॥

हे मरुतः शृणुत। अहमस्मात्प्रसिद्धात्तविषाद्बलवत इंद्रात् तत्सकाशाद्भिया भीत्येषमाणः पलायमानः पुरतः स्थातुमशक्तः। तथा रेजमानो वेपमानश्चाभवं। ततश्च किमायातमित्यत आह। यानि युष्मभ्यं हव्या हवींषि निशितानि संस्कृतान्यासन् तानि तान्येवारे चकृम। दूरे कृतवंतो वयमिंद्रभयात्। अतो नोऽस्माननपराधिनो मृळत। मृळयत। सुखयत ॥

॥ अथ पंचमी ॥

येन मानासश्चितयंत उस्रा व्युष्टिषु शवसा शश्वतीनां।
स नो मरुद्भिर्वृषभ श्रवो धा उग्र उग्रेभिः स्थविरः सहोदाः ॥ ५ ॥
येन। मानासः। चितयंते। उस्राः। विऽउष्टिषु। शवसा। शश्वतीनां।
सः। नः। मरुत्ऽभिः। वृषभ। श्रवः। धाः। उग्रः। उग्रेभिः। स्थविरः। सहःऽदाः ॥ ५ ॥

हे इंद्र शवसा बलभूतेन त्वयानुगृहीता मानासो मान्यास्त्वयाभिमानिता वोस्रा रश्मयः शश्वतीनां नित्यानां बह्वीनामुषसां व्युष्टिषु सतीषु प्रकाशेषु सत्सु चितयंते। चेतयंते। प्राणिनां स्वस्वव्यवहाराय प्रज्ञापयंते। ऐंद्र्यां दिशि तेनैवानुगृहीता उषसो रश्मय उद्गच्छंतीति प्रसिद्धं। हे वृषभ वर्षितरिंद्र स तादृशस्त्वं मरुद्भिः सहितः श्रवो धाः। सर्वत्र श्रूयमाणमन्नं धेहि। स्थापय। देहीत्यर्थः। कीदृशस्त्वं। उग्र उद्गूर्णबलः। सहोदाः। पराभिभवसामर्थ्यं बलं सहः। तस्य दाता। स्थविरः पुरातनः। कीदृशैर्मरुद्भिः। उग्रेभिः क्रूरबलैः। एवं महानुभावोऽन्नं देहि॥

॥ अथ षष्ठी ॥

त्वं पाहींद्र सहीयसो नृन्भवा मरुद्भिरवयातहेळाः।
सुप्रकेतेभिः सासहिर्दधानो विद्यामेषं वृजनं जीरदानुं ॥ ६॥

त्वं। पाहि। इंद्र। सहीयसः। नृन्। भव। मरुत्ऽभिः। अवयातऽहेळाः।
सुऽप्रकेतेभिः। ससहिः। दधानः। विद्याम। इषं। वृजनं। जीरऽदानुं ॥ ६॥

हे इंद्र त्वं पाहि। रक्ष। कान्। सहीयसो नृन्। सहस्वितमान् त्वदनुग्रहेणातिप्रवृद्धबलान् नेतॄन्मनुष्यानस्मान् मरुतो वा। किंच मरुद्भिः साकमस्मास्ववयातहेळा भव। अपगतमन्युर्भव। मरुत्सु वा तथा भव। किंच सुप्रकेतेभिः शोभनप्रज्ञानैर्मरुद्भिः सह सासहिः शत्रूणामभिभविता सन् दधानोऽस्मदभिमतस्य धारयिता भवेति शेषः। शिष्टो व्याख्यातः॥

॥ इति द्वितीयस्य चतुर्थ एकादशो वर्गः ॥

चित्रो व इति तृचात्मकमष्टमं सूक्तमागस्त्यं मारुतं गायत्रं। चित्रस्तृचं गायत्रमित्यनुक्रमणिका। लैंगिको विशेषविनियोगः॥

॥ तत्र प्रथमा ॥

चित्रो वोऽस्तु यामश्चित्र ऊती सुदानवः। मरुतो अहिभानवः ॥ १॥

चित्रः। वः। अस्तु। यामः। चित्रः। ऊती। सुऽदानवः। मरुतः। अहिऽभानवः ॥ १॥

हे मरुतो वो युष्माकं यामोऽस्मद्यज्ञागमश्चित्रश्चायनीयः पूज्य आश्चर्यभूतो वास्तु। भवतु। न केवलमागमनमेव चित्रं किंतु हे सुदानवः शोभनदानाः।

हे अहिभानवोऽहीयमानप्रकाशाः । युष्माकं संबंधी चित्रः स आगम ऊती ऊत्यै रक्षणायेष्टतर्पणाय वा युक्तश्च भवतु । तदागमनं शीघ्रमस्तु अभिमतप्रदं चास्त्वित्यर्थः ॥

॥ अथ द्वितीया ॥

आरे सा वः सुदानवो मरुत ऋंजती शरुः । आरे अश्मा यमस्यथ ॥ २ ॥

आरे । सा । वः । सुऽदानवः । मरुतः । ऋंजती । शरुः । आरे । अश्मा । यं । अस्यथ ॥ २ ॥

हे सुदानवः शोभनदाना मरुतो वो युष्माकं संबंधिनी ऋंजती प्रसाधयंती स्वतेजसा स्वात्मानमलंकुर्वती प्रसिद्धिं प्राप्नुवाना वा सा प्रसिद्धा शरुर्हिंसका ऋष्टिरारे दूरे भवतु । तथा यमस्यथ क्षिपथ सोऽश्मा व्यापक आयुधविशेष आरे । दूरनामैतत् । दूरे भवतु । मां न प्राप्नोतु । यद्वा आरेशब्द आराच्छब्द-पर्यायः । स च दूरे समीपे च वर्तते । अत्र समीपवचनः । यमस्मत्तोऽन्यमस्यथ तं वैरिणमस्माकमुपलोपमः कठिन आयुधविशेष आरे समीपं प्राप्नोतु ॥

॥ अथ तृतीया ॥

तृणस्कंदस्य नु विशः परि वृंक्त सुदानवः । ऊर्ध्वान्नः कर्त जीवसे ॥ ३ ॥

तृणऽस्कंदस्य । नु । विशः । परि । वृंक्त । सुऽदानवः । ऊर्ध्वान् । नः । कर्त । जीवसे ॥ ३ ॥

हे मरुतः सुदानवः शोभनदाना यूयं तृणस्कंदस्य तृणवच्चलनस्वभावस्य शुष्यमाणस्य वा मम विशः पुत्रभृत्यादिरूपाः प्रजा नु क्षिप्रं परिवृंक्त । परि-वर्जयत । बाधापरिहारेण रक्षत । यद्वोक्तलक्षणकालस्यासुरविशेषस्य वा प्रजाः परिवर्जयत । किंच नोऽस्मानूर्ध्वान् कर्त । कुरुत । जीवसे चिरजीवनाय ॥

॥ इति द्वितीयस्य चतुर्थे द्वादशो वर्गः ॥

गायत्सामेति त्रयोदशर्चं नवमं सूक्तमागस्त्यं त्रैष्टुभमैंद्रं । गायत्सप्तोनेत्यनु-क्रांतं ॥ समूळ्हे दशरात्रे तृतीये छंदोमे मरुत्वतीयशस्त्र एतत्सूक्तं । विश्वजितोऽग्निं नर इति खंडे सूत्रितं । तृतीयस्यैंद्रः स्वाहा गायत्साम । आ॰ ८. ७. । इति ॥

॥ तत्र प्रथमा ॥

गायत्साम नभन्यं१ यथा वेरर्चाम तद्वावृधानं स्वर्वत् ।
गावो धेनवो बर्हिष्यदब्धा आ यत्सद्मानं दिव्यं विवासान् ॥ १ ॥

गार्यत्। साम॑। न॒भ॒न्य॑म्। यथा॑। वेः। अर्चा॑म। तत्। व॒वृ॒धान॑म्। स्वः॑ऽवत्।
गावः॑। धे॒नवः॑। ब॒र्हिषि॑। अद॑ब्धाः। आ। यत्। स॒द्मान॑म्। दि॒व्यम्। विवा॑सान्॥१॥

हे इंद्र नभन्यं नभस्यं नभसि भवं नभोव्यापिनं हिंसकं वा राक्षसादिकस्य ॥ नभतिर्वधकर्मा नभति अर्दतीति वधकर्मसु गणनात्॥ तादृशं साम हे इंद्र यथा वेः। येन प्रकारेण वेत्सि। तथा गायत्। गायत्युद्गाता। तत्तस्मात् यतः स्तौति ततः कारणाद्ववृधानं वर्धमानं स्ववंत् फलभूतेन स्वर्गेण तद्वत् शस्त्रं यथा वेत्सथाचाम। पूजयाम। शंसामेत्यर्थः। स्तुतमनुशंसतीति न्यायात्। यद्वा तदुक्तलक्षणं साम ववृधानं सर्वत्र यथा भवति तथार्चाम। किंच धेनवो दोग्ध्र्योऽदब्धा अहिंसिता गावो यत्सद्मानं सीदंतं दिव्यं दिवि भवमिंद्रं त्वाविवासान्॥ विवासतिः परिचरणकर्मा॥ आगत्य परिचरंति क्षीरं दुहंति। तथार्चाम॥

॥ अथ द्वितीया ॥

अर्च॒द्वृषा॒ वृष॑भिः॒ स्वेदु॑हव्यैर्मृ॒गो नाश्नो॒ अति॒ यज्जु॑गु॒र्यात्।
प्र म॑न्दु॒युर्म॒नां गू॑र्त॒ होता॒ भर॑ते॒ मर्यो॑ मिथु॒ना यज॑त्रः॥२॥

अर्च॑त्। वृषा॑। वृष॑ऽभिः। स्वऽइदु॑हव्यैः। मृगः। न। अश्नः॑। अति॑। यत्। जु॒गु॒र्यात्।
प्र। म॒न्दु॒युः। म॒नाम्। गू॒र्त॒। होता॑। भर॑ते। मर्यः॑। मि॒थु॒ना। यज॑त्रः॥२॥

वृषा हविषां वर्षितायं यजमानः स्वेदुहव्यैः स्वायत्तेद्धविष्कैः। यद्वा स्वयंप्राप्तेंधकं हव्यं येषां तादृशैर्वृषभिर्वर्षकैर्हविःप्रदातृभिरध्वर्य्वादिभिर्विशिष्टः सन् अर्चत्। अर्चयतींद्रं। यद्वा वृषा फलस्य वर्षितायमिंद्र उक्तलक्षणैरध्वर्य्वादिभिरर्च्यते। यद्यस्मादश्नो व्यापकः पानाद्यर्थं धावन् मृगो न हरिणादिरिवायमिंद्रोऽश्नोऽशनशीलः सन् अति जुगुर्यात्। अत्यर्थमुद्युंक्ते हविर्भक्षणाय। यथा मृगः क्षुत्पिपासार्दितः शीघ्रमुद्युंक्ते तथायमिंद्रोऽपि। यस्मादेवं तस्मादर्चेति। यद्वायमिंद्रो यत् यथाश्नो मृग इवातिजुगुर्यात् भक्षयेत् तथार्चतीत्यर्थः। किंच हे गूर्त उद्गूर्णेंद्र मनां मननं स्तोत्रमिच्छतां देवानां मंदयुः स्तुतियुक्तो मर्यो होता मानुष एतन्नामक ऋत्विक् यजत्रो यागनिष्पादकः सन् मियुना मिथुनानि युग्मरूपाणि याज्यापुरोनुवाक्यादीनि मिथुनौ वा जायापतिरूपः सन् प्रभरते। प्रकर्षेण संपादयति। तस्मादर्चतीत्यर्थः॥

॥ अथ तृतीया ॥

नक्षद्धोता परि सद्म मिता यन्भरद्गर्भमा शरदः पृथिव्याः ।

क्रंदद्श्वो नयमानो रुवद्गौरंतर्दूतो न रोदसी चरद्वाक् ॥ ३ ॥

नक्षत् । होता । परि । सद्म । मिता । यन् । भरत् । गर्भं । आ । शरदः । पृथिव्याः ।

क्रंदत् । अश्वः । नयमानः । रुवत् । गौः । अंतः । दूतः । न । रोदसी इति । चरत् । वाक् ॥ ३ ॥

होता होमनिष्पादकोऽयमग्निर्मिता परिमिता सद्म सदनानि गार्हपत्यादिस्थानानि परियन् परितो गच्छन् नक्षत् । व्याप्नोति । व्याप्य च शरदः संवत्सरसंबंधिनं पृथिव्या भूम्याश्च संबंधिनं गर्भं गर्भस्थानीयमन्नं हविर्लक्षणमाभरत् । आहरति । स्वीकरोति । संभरति वा संवत्सरपर्यंतं वर्धितं भूम्यामुत्पन्नमित्यर्थः । यद्वा संवत्सरसंबंधिनं वसंतादिकाले ज्योतिष्टोमादिषु दीयमानं पार्थिवं हविर्भरत् । वसंते वसंते ज्योतिषा यजेतेति श्रुतेः । तथा कृत्वा क्रंदद्श्वः । लुप्तोपममेतत् । अश्व इव क्रंदति हर्षातिशयात् । किं कुर्वन् । नयमानः । नयदिंद्राय हविर्भारं । किंच गौर्गंतोद्वृत्तो वृष इव रुवत् । रौति शब्दायते । किं कुर्वन् । दूतो न वार्ताहरो दूत इव रोदसी रोदस्योर्द्यावापृथिव्योरंतर्मध्ये रोदस्योरंतरा वाक् स्तूयमानः स्तुवन् वा देवान् चरत् । चरति गच्छति । हविःस्वीकाराय पृथिवीं तत्प्रापणाय द्युलोकं च परिभ्रमतीत्यर्थः ॥ वक्तेः कर्तरि कर्मणि वा क्विब्वचीत्यादिना क्विब्दीर्घौ संप्रसारणाभावश्च ॥

॥ अथ चतुर्थी ॥

ता कर्मार्षतरास्मै प्र च्यौत्नानि देवयंतो भरंते ।

जुजोषदिंद्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः ॥ ४ ॥

ता । कर्म । अर्षऽतरा । अस्मै । प्र । च्यौत्नानि । देवऽयंतः । भरंते ।

जुजोषत् । इंद्रः । दस्मऽवर्चाः । नासत्याऽइव । सुग्म्यः । रथेऽस्थाः ॥ ४ ॥

ता तान्यषतरार्षतराणि व्याप्ततराणि वा हवींष्यस्मा इंद्राय तदर्थं कर्म । कुर्मः । संपादयामः ॥ कृञश्छांदसे वर्तमानार्थे लुङि मंत्रे घसेति च्लेर्लुक् । छंदस्युभयथेत्यार्धधातुकत्वेन ङित्त्वाभावाद्गुणः ॥ च्यौत्नानि च्यावयित्रीणि दृढानि स्तोत्राणि कर्माणि स्वकीयानि सामर्थ्यानि वा देवयंतो देवानात्मन इच्छंतो यज-

मानाः प्रभरंते। प्रकर्षेण संपादयंति। तद्वद्वयमपि संपादयाम इत्यर्थः। दस्रवर्चा दर्शनीयतेजाः शत्रूपक्षयणबलो वा नासत्येव नासत्याविवाश्विनाविव। तौ हि द्यावापृथिव्यात्मानौ। ताविव सुग्म्यः सुगम्यः सुखेन गंतुं शक्यो रथेष्ठा रथे वर्तमानः। एवंभूतः सन् जुजोषत्। अस्मत्कृतं स्तोत्रादि कर्म सेवतां॥

॥ अथ पंचमी ॥

तमु ष्टुहींद्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः।
प्रतीचश्चिद्योधीयान्वृषण्वान्ववव्रुषश्चित्तमसो विहंता ॥ ५ ॥

तं। ऊं इति। स्तुहि। इंद्रं। यः। ह। सत्वा। यः। शूरः। मघऽवा। यः। रथेऽस्थाः।
प्रतीचः। चित्। योधीयान्। वृषण्ऽवान्। ववव्रुषः। चित्। तमसः। विऽहंता ॥ ५ ॥

तमु तमेवेंद्रं स्तुहि। हे होतः स्तुतिं कुरु। किमस्याधिक्यमिति उच्यते। यो ह यः खलु सत्वातिप्रभूतबलः। यद्वा सत्वा सादकः शत्रूणां। यश्च शूरः शौर्योपेतो मघवा बलवानन्नवान्वा। यश्च रथेष्ठा रथे वर्तमानः। किंच प्रतीचश्चित् प्रत्यभिमुखं योद्धुरपि योधीयान् योधृतमः॥ प्रतिपूर्वादंचतेः क्विनंतात्सुप्तनकाराच्छसि अच इत्यकारलोपे चाविति दीर्घः। अंचेश्छंदस्यसर्वनामस्थानमिति विभक्तिरुदात्ता॥ वृषण्वान्। वृषाणो वर्षितारो वज्रादयः। तद्वान्। वृषा ते वज्र उत ते वृषा रथ इति हि निगमः। तथा ववव्रुषश्चित्तमस आवरकस्यापि तमसो मेघादेर्विहंता विशेषेण घातकः। यस्मादेवं महानुभावः तस्मात्स्तुहि॥

॥ इति द्वितीयस्य चतुर्थे त्रयोदशो वर्गः ॥

॥ अथ षष्ठी ॥

प्र यदित्था महिना नृभ्यो अस्त्यरं रोदसी कक्ष्ये३नास्मै।
सं विव्य इंद्रो वृजनं न भूमा भर्ति स्वधावाँ ओपशमिव द्यां ॥ ६ ॥

प्र। यत्। इत्था। महिना। नृऽभ्यः। अस्ति। अरं। रोदसी इति। कक्ष्ये इति। न। अस्मै।
सं। विव्ये। इंद्रः। वृजनं। न। भूम। भर्ति। स्वधाऽवान्। ओपशंऽइव। द्यां ॥ ६ ॥

यत् य इंद्रो महिना महत्त्वेन स्वैश्वर्येण नृभ्यो नेतृभ्यः कर्मनिर्वाहकेभ्यो यजमानेभ्यः प्रास्ति प्रभवति। ईष्टे स्वर्गादिप्रदाने रक्षितुं। अस्मै रक्षकायेंद्राय रोदसी द्यावापृथिव्यौ कक्ष्ये कक्ष्यते सती संचाराय नालं। न पर्याप्ते।

जगतोऽधीशस्येंद्रस्य संचारायाल्पत्वाद्द्यावापृथिव्यौ न पर्याप्ते इत्यर्थः। सृष्टादपि स्रष्टुर्महिम्नोऽधिकत्वादिति भावः। अयमिंद्रो वृजनं न भूम। भूमिं भूतानि वा वृजनं न वृजनमिव। वृजतेः कर्तनार्थस्येदं रूपं। तदिव। तद्यथावृणोति तथायमपि स्वतेजसा संविव्ये। सम्यगावृणोति लोकत्रयं। किंचायं स्वधावानन्नवान् वृष्टिलक्षणोदकवान्वा द्यां दिवं भर्ति। बिभर्ति। धारणे दृष्टांतः। ओपशमिव। ईषदुपशेत इत्योपशं शृंगं। तद्वृषभ इव। यद्वा परस्परं समीपे वर्तमानं क्षित्यंतरिक्षाख्यं लोकद्वयमोपशं। तदिव द्यां बिभर्ति। लोकत्रयमपि बिभर्तीत्यर्थः॥ भृञो लटि छांदसः शपो लुक्॥

॥ अथ सप्तमी ॥

समत्सु त्वा शूर सतामुराणं प्रपथिंतमं परितंसयध्यै।
सजोषस इंद्रं मदे क्षोणीः सूरिं चिद्ये अनुमदंति वाजैः॥ ७॥
समत्ऽसु। त्वा। शूर। सतां। उराणं। प्रपथिन्ऽतमं। परिऽतंसयध्यै।
सऽजोषसः। इंद्रं। मदे। क्षोणीः। सूरिं। चित्। ये। अनुऽमदंति। वाजैः॥ ७॥

हे शूर शौर्योपेतेंद्र समत्सु संग्रामेषु सतां त्वामेवाश्रित्य वर्तमानानां प्राणिनामुराणं। उरूण्यतिप्रभूतानि बलादीनि कुर्वाणं। प्रपथिंतमं प्रकृष्टमार्गतमं सुकृतिनामुत्तममार्गभूतमिंद्रं शत्रूणां दारकं त्वा त्वां परितंसयध्यै अवतंसीकर्तुं भूषणीकर्तुं। भूषयितेर्वा निमित्तेऽर्थे। मदे तव मदार्थं च सजोषसः सह सेवमानाः समानप्रीतयो वा क्षोणीः क्षोण्यो विशः परिजना मरुतः प्रयतंते। कीदृशास्ते। ये वाजैर्बलैरनुमदंति। अनुकूलं मादयंति। संग्रामे मरुतस्त्वमेव स्वामिनं कृत्वा मादयंति। हर्षयंतीत्यर्थः। यद्वा ये यजमाना वाजैर्हविर्भिर्मादयंति ते समानप्रीतियुक्तास्तव मनुष्यभूता ऋत्विजो यजमानभूताः प्रजाः समत्सु सहमादनस्थानेषु यागेषूक्तलक्षणविशिष्टं त्वामेव पूजयितुं तव मादाय च प्रयतंते॥

॥ अथाष्टमी ॥

एवा हि ते शं सवना समुद्र आपो यत्त आसु मदंति देवीः।
विश्वा ते अनु जोष्या भूद्गौः सूरींश्चिद्यदि धिषा वेषि जनान्॥ ८॥

एव । हि । ते । शं । सर्वना । समुद्रे । आपः । यत् । ते । आसु । मदंति । देवीः ।

विश्वा । ते । अनु । जोष्या । भूत् । गौः । सूरीन् । चित् । यदि । धिषा । वेषि । जनान् ॥ ८ ॥

हे इंद्र एवा हि एवं हि सति ते तव संबंधीनि सवनानि । सूयते सोमोऽत्रेति सवनानि सोमयागाः । ते शं सुखकरा भवंति । कथं सति । यत् यदि देवीर्देव्यो द्योतमाना आपः समुद्र उदकसमुद्रवणापादानभूतेऽंतरिक्ष आसु प्रजासु निमित्तभूतासु ते त्वां मदंति । मादयंति ॥ अंतर्भावितण्यर्थोऽयं ॥ यदा प्राण्युपकारार्थं वर्षणाय त्वां प्रेरयंति वृष्ट्युदकानि तदा खलु तव सोमयागाः सुखकरा भवंति । यज्ञसाधनवृष्टिप्रदानेन यागान्निर्वर्तयेत्यर्थः । किंच हे इंद्र विश्वा गौः सर्वापि स्तोत्रशस्त्ररूपा वाक् ते त्वामनुक्रमेण जोष्या जोषणार्हा प्रीणयित्री भूत् । भवति । कदा । यदि सूरींश्चित् स्तोत्रादिप्रेरयितॄन् स्तोतृजनानपि धिषा धिषणया प्रज्ञया वृष्टिप्रदानरूपेण कर्मणा वा वेषि । कामयसे । तदा सर्वापि स्तुतिस्त्वदर्था भवति ॥

॥ अथ नवमी ॥

असाम यथा सुषखाय एन स्वभिष्टयो नरां न शंसैः ।

असद्यथा न इंद्रो वंदनेष्ठास्तुरो न कर्म नयमान उक्था ॥ ९ ॥

असाम । यथा । सुऽसखायः । एन । सुऽअभिष्टयः । नरां । न । शंसैः ।

असत् । यथा । नः । इंद्रः । वंदनेऽस्थाः । तुरः । न । कर्म । नयमानः । उक्था ॥ ९ ॥

हे एन इन ईश्वरेंद्र यथा सुसखायः शोभनत्वद्रूपसहायवंतोऽसाम । भूयास्म । किंच स्वभिष्टयः शोभनाभ्येषणाः शोभनाभीष्टाश्चासाम । किमिव । नरां न शंसैः । नराणां राजादीनां शंसैः शंसनैरिव । स्तुतिभिर्यथा मनुष्याः शोभनाभीष्टा भवंति तद्वत् ॥ इदानीं परोक्षेणाह । नोऽस्मभ्यमिंद्रो वंदनेष्ठा अस्मत्स्तुतौ वर्तमानः सन् तुरो न त्वरमाण इव नोऽस्माकं कर्मोक्था उक्थैः शस्त्रैर्नयमानः फलं प्रापयन् स्तुत्या तुष्टः सन् अस्मदीयेन कर्मणा फलप्रापयिता यथासत् । भवेत् । हे ऋत्विजस्तथा कुरुतेति शेषः ॥

॥ अथ दशमी ॥

विष्पर्धसो नरां न शंसैरस्माकासदिंद्रो वज्रहस्तः ।

मित्रायुवो न पूर्पतिं सुशिष्टौ मध्यायुव उप शिक्षंति यज्ञैः ॥ १० ॥

विऽस्पर्धसः। नराम्। न। शंसैः। अस्माक। असत्। इंद्रः। वज्रऽहस्तः।
मित्रऽयुवः। न। पूःऽपतिं। सुऽशिष्टौ। मध्यऽयुवः। उप। शिक्षंति। यज्ञैः॥१०॥

नरां नेतॄणां मध्ये सस्पर्धान्नरान्यथा विस्पर्धसः कुर्वंति सखिभूताः तद्वद्वयमपींद्रं शंसैः स्तुतिभिः। सखायो वयं तं तथा कुर्मः। स च वज्रहस्तो विरोधिशिक्षणाय सर्वदा वज्रधारींद्रोऽस्माकमसत्। विस्पर्धमनुकूलो भवतु। किंच मित्रायुवो न मित्रेच्छवो हितैषिण इव सुशिष्टौ सुशासने वर्तमानं पूर्पतिं पुरः स्वामिनं यथाभिमतदानेन पूजयंति तथा मध्यायुवोऽस्माकं श्रियां यशसां च मध्येऽवस्थितिं कामयमाना अध्वर्य्वादयो यज्ञैर्यज्ञसाधनैर्हविःस्तोत्रादिभिरुपशिक्षंति। उपेत्य यजंते। शिक्षतिर्दानकर्मा॥

॥ इति द्वितीयस्य चतुर्थे चतुर्दशो वर्गः ॥

॥ अथैकादशी ॥

यज्ञो हि ष्मेंद्रं कश्चिदृंधन् जुहुराणश्चिन्मनसा परियन्।
तीर्थे नाच्छा तातृषाणमोको दीर्घो न सिध्रमा कृणोत्यध्वा॥११॥
यज्ञः। हि। स्म। इंद्रं। कः। चित्। ऋंधन्। जुहुराणः। चित्। मनसा। परिऽयन्।
तीर्थे। न। अच्छ। ततृषाणं। ओकः। दीर्घः। न। सिध्रं। आ। कृणोति। अध्वा॥११॥

कश्चिद्यज्ञो यज्ञवान् यज्ञानुष्ठायी ऋंधन् वर्धयन्भवति। इंद्रं यज्ञेन वर्धयतीत्यर्थः। जुहुराणश्चित् कुटिलगतिस्तु कश्चिन्मनसा केवलेन परियन् परितो गच्छन् लौकिकविषयादिकं ध्यायन्वर्तते। यद्वा परि वर्जनार्थः। वर्जयित्वा गच्छन् नेदं प्राप्नोति। तत्र दृष्टांतः। तीर्थे प्रसिद्धे मार्गेऽच्छ आभिमुख्येन समीपे वर्तमानमोकः पानीयादिकं सवनं ततृषाणं पिपासायुक्तं यथाविलंबेन प्रीणाति। स यथा तत्सवन आगच्छतीत्यर्थः। तद्वद्यज्ञेन कश्चित्पुमानिंद्रमभिगच्छतीति। कुटिलस्य दृष्टांतः। दीर्घो न वक्रत्वेनातिदूरोऽध्वा मार्ग इव। स यथा सिध्रं फलं पानीयादिरूपं फलार्थिनं वा पुरुषमाकृणोति। अर्वाक्करोति। नीचैः करोति। वर्जयतीत्यर्थः। तस्माद्यज्ञमार्गमजानानो वक्रो दूरे परिभ्रमति नेंद्रं तर्पयति। तद्विलक्षणस्तु वर्जयत्येव॥

॥ अथ द्वादशी ॥

मो षू ण॑ इंद्रात्र॑ पृत्सु दे॒वैरस्ति॑ हि ष्मा॑ ते शुष्मिन्नव॒याः ।
म॒हश्चि॒द्यस्य॑ मी॒ळ्हुषो॑ य॒व्या ह॒विष्म॑तो म॒रुतो॒ वंद॑ते॒ गीः ॥ १२ ॥

मो इति॑ । सु । नः॒ । इं॒द्र॒ । अत्र॑ । पृ॒त्ऽसु । दे॒वैः । अस्ति॑ । हि । स्म॒ । ते॒ । शु॒ष्मि॒न् । अ॒व॒ऽयाः ।
म॒हः । चि॒त् । यस्य॑ । मी॒ळ्हुषः॑ । य॒व्या । ह॒विष्म॑तः । म॒रुतः॑ । वंद॑ते । गीः ॥ १२ ॥

हे इंद्रात्र पृत्सु एषूपस्थितेषु संग्रामेषु वृष्ट्यर्थं मेघजयेषु देवैर्मरुदादिभिः सह नोऽस्मान् मो षु । मैव त्याक्षीरिति शेषः । मरुत्सहितो युध्यस्वेत्यर्थः । हे शुष्मिन् बलवन्निंद्र अस्ति हि स्म ते । अस्ति हि स्म तव खलु । तव किमस्तीति उच्यते । अवयाः । अवयजनं अवयुज्य पृथक्कृत्य यजनं हविर्भागोऽस्ति । मरुद्भ्यः पृथगप्यस्ति हविर्भागः । केवलं मरुद्भ्य एव दीयते नास्मभ्यं अतः कथं योत्स्यामीति न मंतव्यमित्यर्थः । यद्वा अवयाः शत्रूणां वर्जनाय गंता वज्रोऽस्ति ते । किंच हविष्मतः प्रदेयहविर्युक्तस्य मीळ्हुषो हविःप्रदातुः । यद्वैतत्पदद्वयं मरुतां विशेषणं । यस्य मम यव्या फलेनेंद्रेण वा सह मिश्रयंती गीः स्तुतिशस्त्रादिरूपा वाक् महश्चित् महतोऽपि मीळ्हुषः सेक्तॄन् हविष्मतो दत्तहविषा तद्वतो मरुतो वंदते । स्तौति ॥

अथ त्रयोदश्या सूक्तादिमारभ्य कृतां स्तुतिं निगमय्य फलं प्रार्थयते ॥

ए॒षः स्तोम॑ इंद्र॒ तुभ्य॑म॒स्मे ए॒तेन॑ गा॒तुं ह॑रिवो विदो नः ।
आ नो॑ ववृत्याः सुवि॒ताय॑ देव वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुं ॥ १३ ॥

ए॒षः । स्तोमः॑ । इं॒द्र॒ । तुभ्यं॑ । अ॒स्मे इति॑ । ए॒तेन॑ । गा॒तुं । ह॒रि॒ऽवः॒ । वि॒दः॒ । नः॒ ।
आ । नः॒ । व॒वृ॒त्याः॒ । सु॒वि॒ताय॑ । दे॒व॒ । वि॒द्याम॑ । इ॒षं । वृ॒जनं॑ । जी॒रऽदा॑नुं ॥ १३ ॥

हे इंद्र एषः स्तोम इदानीं कारितप्रकारः स्तोत्रविशेषस्तुभ्यं त्वदर्थं । हे हरिवो हरिभ्यां तद्वन्निंद्र एतेन स्तोत्रेण गमनेन वा नोऽस्मदीयं गातुं देवयजनमार्गं विदः । विदस्व । विदित्वा च हे देव सुविताय सुहिताय शोभनगमनाय वा नोऽस्मानाववृत्याः । आवर्तस्व । अस्मद्यागं प्रत्यागच्छ । विद्यामेत्यादि व्याख्यातं ॥

॥ इति द्वितीयस्य चतुर्थे पंचदशो वर्गः ॥

त्वं राजेति दशर्चं दशमं सूक्तमागस्त्यमैंद्रं त्रैष्टुभं। त्वं राजा दशेत्यनुक्रांतं। पृष्ठ्ये षळहे स्तोमवृद्धौ स्तोमातिशंसनार्थं होत्रकैरेतच्छंस्तव्यं। ऐंद्राणि त्रैष्टुभान्यमरुच्छब्दान्यावपेरन्। आ॰ ७. १२.। इति सूत्रं ॥

॥ तत्र प्रथमा ॥

त्वं राजेंद्र ये च देवा रक्षा नृन्पाह्यसुर त्वमस्मान्।

त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवानः सहोदाः ॥ १ ॥

त्वं। राजा। इंद्र। ये। च। देवाः। रक्ष। नृन्। पाहि। असुर। त्वं। अस्मान्।

त्वं। सत्ऽपतिः। मघऽवा। नः। तरुत्रः। त्वं। सत्यः। वसवानः। सहःऽदाः ॥ १ ॥

हे इंद्र त्वं राजा अधिपतिः सर्वस्य जगतः। किंच ये देवा मरुदादयः संति तेषामपि विशेषेण। अतो हे असुर शत्रूणां निरसितस्त्वं नृनस्मान् कर्मनेतृन्यजमानान् रक्ष। पालय। विशेषतोऽस्मानपि रक्ष। त्वं च सत्पतिः सतां सतः कर्मफलस्य वा पाता मघवा धनवान् नोऽस्माकं तरुत्रस्तारयिता पापात्। किंच त्वं सत्योऽबाध्यः सत्यफलो वा वसवानः स्वतेजसा सर्वं छादयन् वसूनि वा कुर्वन् स्तोतृभ्यः सहोदाः सहसो बलस्य दाता भवेति शेषः ॥

॥ अथ द्वितीया ॥

दनो विश इंद्र मृध्रवाचः सप्त यत्पुरः शर्म शारदीर्दर्त्।

ऋणोरपो अनवद्यार्णा यूने वृत्रं पुरुकुत्साय रंधीः ॥ २ ॥

दनः। विशः। इंद्र। मृध्रऽवाचः। सप्त। यत्। पुरः। शर्म। शारदीः। दर्त्।

ऋणोः। अपः। अनवद्य। अर्णाः। यूने। वृत्रं। पुरुऽकुत्साय। रंधीः ॥ २ ॥

हे इंद्र त्वं वृत्रसंबंध्यसुराणां पुरभेदनसमये मृध्रवाचो मर्षणवचना विशस्तदीयाः प्रजाः शर्म सुखं यथा भवति तथा दनः। अदमयः ॥ दमेरिदं रूपं। यद्वा वर्णव्यत्ययः ॥ नदः। अनदः। अशब्दयोऽसुरप्रजाः। अतिभयंकरशब्दमकरोः। कदेत्याह। यत् यदा शारदीः प्रत्यग्राः। यद्वैतत्संवत्सरलक्षकः। संवत्सरपर्यंतं दृढीकृता अपि सप्त पुर एतत्संख्याकाः पुरीर्दर्त्। अदारयः ॥ पुरुषव्यत्ययः। दृणातेर्लङि छांदसो विकरणस्य लुक्। रात् सस्य। पा॰ ८. २. २४.। इति नियमात्

तलोपाभावः ॥ तथा कृत्वा हे अनवद्य कातरत्वानिंदावन् हे इंद्र अर्णा अरण-शीला अपस्तदीयदुर्गस्थानान्युदकाश्रयाणि तटाकादीन्यृणोः । अगमयः प्रावर्तयः । भग्नान्यकरोः । एवमुपद्रुत्य पुरुकुत्सायैतन्नाम्ने राज्ञे यूने नित्यतरुणाय तदर्थं वृत्रमेतन्नामकमसुरं रंधीः । असाधयः । अहनः । अयमैतिहासिकपक्षः ॥ निरुक्तरूप्या तु हे इंद्र मृध्रवाचो विशो मर्षणध्वनियुक्ता वृष्टिरूपाः प्रजा दनः । अदमयः अशब्दयो वा । अवर्षय इत्यर्थः । कदा । यत् यदा सप्त पुरः शारदीर्दर्त् । सर्पणस्वभावान्प्रत्यग्रान् वृष्ट्या जगत्पूरकान्मेघानदारयस्तदेत्यर्थः । तथा कृत्वा हे अनवद्य अर्णा अरणस्वभावा अप ऋणोः । अगमयः । प्रावर्तयः कुल्यादिरूपेण । अनंतरं यूने पुरुकुत्साय वृत्रं मुख्यं मेघं रंधीः । असाधयः । अहनः । अयमर्थस्त्वं ह त्यदिंद्र सप्त युध्यन्नित्यादिमंत्रांतरेषु प्रसिद्धः । यास्कस्त्वेवं व्याख्यात् । दनो दानमनसो मनुष्यानिंद्र मृदुवाचः कुरु । नि॰ ६. ३१. । इति ॥

॥ अथ तृतीया ॥

अजा वृत इंद्र शूरपत्नीर्द्यां च येभिः पुरुहूत नूनं ।
रक्षो अग्निमशुषं तूर्वयाणं सिंहो न दमे अपांसि वस्तोः ॥ ३ ॥

अजः । वृतः । इंद्र । शूरऽपत्नीः । द्यां । च । येभिः । पुरुऽहूत । नूनं ।
रक्षो इति । अग्निं । अशुषं । तूर्वयाणं । सिंहः । न । दमे । अपांसि । वस्तोः ॥ ३ ॥

हे इंद्र शूरपत्नीः शूरै रक्षोभिः पालयिता वृतः । वर्तंत आस्विति वृतोऽसुरपुरीः । यद्वा शूरा यजमानाः । तैः पालयिता वृतो वेदिभूमीरज । गच्छ जेतुं । तथा कृत्वा द्यां च नूनमवश्यमज । किं त्वमेक एव । न । हे पुरुहूत बहुभिर्बहुधा वाहूतेंद्र येभिर्मरुदादिभिरनुगतोऽसि तैः सहितः सन् । तथा कृत्वाशुषमशोषयितारमशांतं वा तूर्वयाणं तूर्णगमनमग्निं वैद्युतं होमाधारं वाग्निं रक्षो । रक्षस्वैव । किमर्थं रक्षणमिति उच्यते । दमे गृहेऽपांसि कर्माणि कुर्वन् वस्तोवस्तुं । यद्वा वासयितुं स्थापयितुं कारयितुमित्यर्थः । यज्ञद्विट्सु हतेष्वग्नौ सुस्थिरे सति यागाद्यनुष्ठानपरः स्यास्यामीत्यर्थः । रक्षणे दृष्टांतः । सिंह इव । स यथा स्वाश्रयभूतं वनं गजाद्युपद्रवपरिहारेण रक्षति तद्वत् । असुरपुरभंगगमने वा दृष्टांतः । सिंहो यथा निर्भयो विरोधिमृगान् हंतुं धावति तद्वत् ॥

॥ अथ चतुर्थी ॥

शेषन्नु त इंद्र सस्मिन्योनौ प्रशस्तये पवीरवस्य मह्ना ।
सृजदर्णांस्यव यद्युधा गास्तिष्ठद्धरी धृषता मृष्ट वाजान् ॥ ४ ॥

शेषन् । नु । ते । इंद्र । सस्मिन् । योनौ । प्रऽशस्तये । पवीरवस्य । मह्ना ।
सृजत् । अर्णांसि । अव । यत् । युधा । गाः । तिष्ठत् । हरी इति । धृषता । मृष्ट । वाजान् ॥ ४ ॥

हे इंद्र ते शत्रवः सस्मिन् सर्वस्मिन् समाने वा योनौ स्वकीये स्थानेऽंतरिक्षे वा । योनिरंतरिक्षं । नु क्षिप्रं शेषन् । शेरतां ॥ शीङो लेट्यडागमः । व्यत्ययेन परस्मैपदं । सिब्बहुलमिति सिप् ॥ किमर्थं । प्रशस्तये । प्रशंसनाय त्वत्स्तुतये । त्वन्महिमज्ञापनायेत्यर्थः । किं सेवनादिसाधनेनेत्याह । पवीरवस्य कुलिशस्य कुलिशशब्दस्य वा मह्ना महिम्ना । त्वद्वज्रप्रहारेण हता मेघाः शत्रवो वा तत्रैव शेरते निपातेन पलायंत इत्यर्थः । किंच यत् यदा युधा प्रहरणसाधनेनायुधेन युद्धेन वा गाः । गच्छसि । तदार्णांस्युदकान्यवसृजत् । अवासृजः । अवाङ्मुखमपातयः ॥ पुरुषव्यत्ययः ॥ तदर्थं हरी अश्वौ तिष्ठत् । अध्यतिष्ठः ॥ अत्रापि पुरुषव्यत्ययः ॥ यद्वा यदा हरी अधितिष्ठसि तदावासृजः । अथैवं कृत्वा वाजानन्नानि सस्यादिलक्षणानि धृषता धर्षकेण सामर्थ्येन मृष । शोधय । प्रवर्धयेत्यर्थः ॥

॥ अथ पंचमी ॥

वह कुत्समिंद्र यस्मिञ्चाकन्त्स्यूमन्यू ऋज्रा वातस्याश्वा ।
प्र सूरश्चक्रं वृहतादभीकेऽभि स्पृधो यासिषद्वज्रबाहुः ॥ ५ ॥

वह । कुत्सं । इंद्र । यस्मिन् । चाकन् । स्यूमन्यू इति । ऋज्रा । वातस्य । अश्वा ।
प्र । सूरः । चक्रं । वृहतात् । अभीके । अभि । स्पृधः । यासिषत् । वज्रऽबाहुः ॥ ५ ॥

हे इंद्र कुत्समेतन्नामानमृषिं प्राप्नं स्यूमन्यू । स्यूमकमिति सुखनाम । तदिच्छंतौ सततगामिनौ वा ऋज्रा ऋजुगामिनौ वातस्य वायोः समानवेगावश्वा तदीयावश्वौ वह । प्रस्थापय । यस्मिन् हविषि निमित्तभूते सति कुत्सं चाकन् । कामयसे । तर्पयसे वा हविरादिकं । तदर्थं सूरः प्रेरकः सूर्यश्चक्रं स्वमंडलं स्वरथचक्रं वाभीक आसन्ने देशे वृहतात् । ऊर्ध्वं गमयतु । प्रकाशयतु । अथ

परोक्षेणाह । वज्रबाहुरयमिंद्रः स्पृधः संग्रामं कुर्वतः शत्रूनभियासिषत् । अभियातु ॥

॥ इति द्वितीयस्य चतुर्थे षोडशो वर्गः ॥

॥ अथ षष्ठी ॥

जघन्वाँ इंद्र मित्रेरूञ्चोदप्रवृद्धो हरिवो अदाशून् ।
प्र ये पश्यन्नर्यमणं सचायोस्त्वया शूर्ता वहमाना अपत्यं ॥ ६ ॥

जघन्वान् । इंद्र । मित्रेरून् । चोदऽप्रवृद्धः । हरिऽवः । अदाशून् ।
प्र । ये । पश्यन् । अर्यमणं । सचा । आयोः । त्वया । शूर्ताः । वहमानाः । अपत्यं ॥ ६ ॥

हे इंद्र हरिवः हरिभ्यां तद्वन् । त्वं चोदप्रवृद्धश्चोदनैः स्तोत्रैः प्रवृद्धः सन् अदाशून् अदातॄन् मित्रेरून् मित्राणां यजमानानामीरयितॄन् बाधकान् तद्वैरिणां मित्रत्वं गच्छतो वा जघन्वान् । हतवानसि । किंच येऽर्यमणं दातारं त्वा त्वां प्रपश्यन् पश्यंति ते नरा आयोर्मनुष्यस्याध्वर्य्वादेर्हविर्लक्षणान्नस्य वा सचा सह शूर्ताः क्षिप्रा हविःप्रदानेन त्वयापत्यं कुलस्यापातयितारं पुत्रं वहमाना ये संति ते प्रपश्यन् । यद्वा येऽर्यमणं त्वां पश्यंति त एवं भवंति । यद्वा ये नरा अर्यमणं यं कंचिद्दातारं पश्यन् पश्यंतस्त्वामयजंत आयोर्मनुष्यस्य सचा सहायभूतास्त्वया शूर्ताः क्षिप्ता वर्जिता अपत्यं पुत्रं वहमाना ये संति तान् जघन्वान्भवेत्यर्थः ॥

॥ अथ सप्तमी ॥

रपत्कविरिंद्रार्कसातौ क्षां दासायोपबर्हणीं कः ।
करत्तिस्रो मघवा दानुचित्रा नि दुर्योणे कुयवाचं मृधि श्रेत् ॥ ७ ॥

रपत् । कविः । इंद्र । अर्कऽसातौ । क्षां । दासाय । उपऽबर्हणीं । करिति कः ।
करत् । तिस्रः । मघऽवा । दानुऽचित्राः । नि । दुर्योणे । कुयवाचं । मृधि । श्रेत् ॥ ७ ॥

हे इंद्र त्वां कविः क्रांतदर्शनूचानो वा होतार्कसातावर्चनीयस्यान्नस्य लाभे निमित्तभूते सति रपत् । स्तौति । यद्वा एतन्नामा ऋषी रपत् । अस्तौत् । अन्नार्थं । तस्यातिप्रभूतमन्नं प्रादा इत्यर्थः । तथा च दासाय प्राण्युपक्षपयित्रेऽसुराय क्षां भूमिमुपबर्हणीं शय्यां कः । अकरोः । हत्वा भूमावपातय इत्यर्थः ॥

करोतेर्लेङि मंत्रे घसेति च्लेर्लुक् ॥ अथ परोक्षकृतः । मघवा धनवानयमिंद्र-स्तिस्रो भूमीः । दार्शिकपाशुकसौमिकरूपा भूमीः क्षित्यंतरिक्षद्युरूपा वा भूमीर्दानुचित्रा दानेन देयैर्धनैर्वा चायनीयाः करत् । करोति । यद्वा तिस्रोऽयोरजत-हिरण्यमयाः पुरीर्दानुचित्राः खंडनेन चित्रा अकरोत् । तथा दुर्योने दुष्टयोनौ स्थाने एतन्नामकस्य राज्ञः प्रीत्यर्थं वा कुयवाचं कुत्सितं शब्दयंतमेतन्नामान-मसुरं मृधि संग्रामे निश्नेत् । हिंसितवान् ॥

॥ अथाष्टमी ॥

सना ता तं इंद्र नव्या आगुः सहो नभोऽविरणाय पूर्वीः ।
भिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य पीयोः ॥ ८ ॥
सना । ता । ते । इंद्र । नव्याः । आ । अगुः । सहः । नभः । अविऽरणाय । पूर्वीः ।
भिनत् । पुरः । न । भिदः । अदेवीः । ननमः । वधः । अदेवस्य । पीयोः ॥ ८ ॥

हे इंद्र ते तव संबंधीनि सना सदातनानि नित्यानि तानि शौर्याणि नव्या नवतरा इदानींतना ऋषय आगुः । आगच्छंति । स्तुतिव्याजेन प्राप्नुवंतीत्यर्थः । कानि तानीति उच्यते । पूर्वीर्बह्वीर्नभो हिंसाः ॥ नभेर्हिंसार्थात्क्विप् । तदंतस्येदं रूपं ॥ ता हिंसा अविरणायाविगतरणाय संग्रामनाशनाय सहः । अभ्यभवः । तदर्थं भिदो भेत्तॄर्घातिका अदेवीरासुरीः पुरो न पुरीरपि भिनत् । विदारितवा-नसि ॥ पुरुषव्यत्ययः । नशब्दश्चार्थे ॥ तथादेवस्यास्तुत्यस्य पीयोर्हिंसकस्यासुरस्य वधर्वज्रं ननमः । अनमयः । अनुकूलमकरोः ॥ यद्वा हे इंद्र सना नित्यं तत्तत्काले ते तव संबंधिन्यस्ता तानि ॥ लिंगव्यत्ययः ॥ ताः पूर्वीः पुरातन्य आपो नव्या नूत्नाः स्तुत्याः सत्य आगुः । आगच्छंति । किमर्थं । अविरणाय । अविरमणाय प्राणिनामविनाशाय । तदर्थं नभो हिंसकान्बंधकान्वा मेघान् सहः । मर्षणम-करोः । किंच अदेवीः पुरोऽवर्षणेनादेवनशीलानुदकपुटबंधान् भिनत् । भिन्ना-नकरोः । तथादेवस्यादेवनशीलस्य पीयोः प्रतिकूलस्य वृत्रस्य वधर्वज्रं ननमः । अनमयः ॥

॥ अथ नवमी ॥

त्वं धुनिरिंद्र धुनिमतीर्ऋणोरपः सीरा न स्रवंतीः ।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥ ९ ॥

त्वं। धुनिः। इंद्र। धुनिऽमतीः। ऋणोः। अपः। सीराः। न। स्रवंतीः।
प्र। यत्। समुद्रं। अति। शूर। पर्षि। पारय। तुर्वशं। यदुं। स्वस्ति ॥ ९॥

हे इंद्र त्वं धुनिः कंपयिता शत्रूणामसि। अतो धुनिमतीः कंपनोपेततरंगवतीः। अथवा धुनिर्नाम जलप्रतिरोधकार्यसुरः। स एव प्रतिबंधकतया यासां तादृशीरप ऋणोः। अगमयः। भूमावपातयः। तत्र दृष्टांतः। स्रवंतीः प्रवहंतीः सीरा न। नदीनामैतत्। सरणवतीर्नदीरिव। तद्वत्संतता इत्यर्थः। एवं कृत्वा हे शूर यत् यदा समुद्रमति पर्षि। अतिक्रम्य पूरयस्युदकं। तदानीं तुर्वशं यदुमुभावपि राजर्षी स्वस्त्यविनाशं पारय। अपालयः संपूर्णजलवर्षणेन। तथा च मंत्रांतरं त्वमपो यदवे तुर्वशायारमय इति ॥

॥ अथ दशमी ॥

त्वमस्माकमिंद्र विश्वध स्या अवृकतमो नरां नृपाता।
स नो विश्वासां स्पृधां सहोदा विद्यामेषं वृजनं जीरदानुं ॥ १०॥
त्वं। अस्माकं। इंद्र। विश्वध। स्याः। अवृकऽतमः। नरां। नृऽपाता।
सः। नः। विश्वासां। स्पृधां। सहःऽदाः। विद्याम। इषं। वृजनं। जीरऽदानुं ॥ १०॥

हे इंद्र त्वमस्माकं विश्वध विश्वस्मिन्नपि काले विश्वप्रकारैर्वावृकतमः। यद्वा दातृतम इत्यर्थः। स्याः। भव। तथा नरां नृपातास्मदीयानां पुत्रभृत्यादिरूपाणां बहूनां मनुष्याणां सर्वदा रक्षको भव। अपरो नृशब्दोऽनुवादः। किंच स त्वं विश्वासां स्पृधां सर्वासां स्पर्धानिमित्तानामस्मत्सेनानां सहोदास्तासामर्थाय बलस्य दाता भव। विद्यामेति गतं ॥

॥ इति द्वितीयस्य चतुर्थे सप्तदशो वर्गः ॥

मत्स्यपायीति षडृचमेकादशं सूक्तमागस्त्यमैंद्रं। आद्या स्कंधोग्रीवी बृहती द्वितीयपादस्य द्वादशाक्षरत्वादितरेषां त्रयाणामष्टाक्षरत्वाच्च। द्वितीयश्चेत्यंकुसारिण्युरोबृहती वा स्कंधोग्रीवी वेत्युक्तलक्षणसद्भावात्। अंत्या त्रिष्टुप्। शिष्टास्त्रिष्टुबंतपरिभाषाया आनुष्टुभं त्विति विशेषवचनेनापोदितत्वादनुष्टुभः। मत्स्य षळानुष्टुभं तु त्रिष्टुबंतं त्वाद्या स्कंधोग्रीवीत्यनुक्रांतं ॥ द्वितीये स्वरसाम्न्याद्यस्तृचः स्तोत्रियः। अभिजिद्बृहत्पृष्ठ इति खंडे सूचितं। मत्स्यपायि ते मह एमेनं प्रत्येतन। आ॰ ८. ५.। इति ॥

॥ तत्र प्रथमा ॥

मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः ।
वृषा ते वृष्ण इंदुर्वाजी सहस्रसातमः ॥ १ ॥
मत्सि । अपायि । ते । महः । पात्रस्यऽइव । हरिऽवः । मत्सरः । मदः ।
वृषा । ते । वृष्णे । इंदुः । वाजी । सहस्रऽसातमः ॥ १ ॥

हे हरिवः हरिभ्यां तद्वन्निंद्र महो महान् पूज्योऽयं सोमः पात्रस्येव तत्पात्रेणेव सोमपात्रेण यथा धार्यते । सोमस्तत्सदृशेन ते त्वया ॥ तृतीयार्थे षष्ठी ॥ यद्वा पात्रस्येव ते तव स्वभूतो महो महान् सोम इति वा योजना । अपायि । पीयते ॥ आशंसाया विवक्षितत्वाद्भूतवत्प्रयोगः । यतः पिबसि अतो मत्सि । माद्यसि मादयस्व वा । पात्रे यथा सोमः पूर्यते तथात्यधिकं पिब पीत्वा च मादयस्वेत्यर्थः । किंच वृष्णे तेऽभिमतवर्षित्रे तुभ्यं ॥ चतुर्थ्यर्थे षष्ठी ॥ मत्सरो मदसाधनो मदस्तर्पयिता वृषा वर्षितेंदुः क्लेदयिता । आह्लादकारीत्यर्थः । वाज्यन्नवान् । अन्नवार्यतृप्तिसद्भावादन्नवानित्युच्यते । सहस्रसातमोऽपरिमितदातृतमः सहस्रपुरुषसंभजनपर्याप्तशक्त्यतिशयो वा । एवं महानुभावः सोमः संपादितः । तं पिबेत्यर्थः ॥

॥ अथ द्वितीया ॥

आ नस्ते गंतु मत्सरो वृषा मदो वरेण्यः ।
सहावाँ इंद्र सानसिः पृतनाषाळमर्त्यः ॥ २ ॥
आ । नः । ते । गंतु । मत्सरः । वृषा । मदः । वरेण्यः ।
सहऽवान् । इंद्र । सानसिः । पृतनाषाट् । अमर्त्यः ॥ २ ॥

हे इंद्र ते त्वां नोऽस्मदीयो मत्सरो मर्षणसाधनः सोम आगंतु । आगच्छतु । कीदृशोऽयं । वृषा वर्षकः । मदस्तर्पयिता । वरेण्यो वरणीयः । सहावान् सहायवान् सहसा बलेन तद्वान्वा । सानसिः संभजनीयः । पृतनाषाट् शत्रुसेनाया अभिभविता । अमर्त्योऽविनाशी । ईदृशः सोमस्त्वामागच्छतु । यद्वा उत्तरार्द्ध इंद्रपरतया व्याख्येयः । हे इंद्र सहावान् अस्मद्दत्तसोमसहायवान् बलवान्वा सानसिरस्माभिः संभजनीयः पृतनाषाट् अमर्त्यश्च भवति ॥

॥ अथ तृतीया ॥

त्वं हि शूरः सनिता चोदयो मनुषो रथं।
सहावाँ दस्युमव्रतमोषः पात्रं न शोचिषा ॥ ३ ॥
त्वं। हि। शूरः। सनिता। चोदयः। मनुषः। रथं।
सहऽवान्। दस्युं। अव्रतं। ओषः। पात्रं। न। शोचिषा ॥ ३ ॥

हे इंद्र त्वं खलु शूरः शौर्योपेतः सनिता दातासि। अतो मनुषो मानुषस्य मे रथं रंहणं स्पंदनं मनोरथं वा स्वर्गगमनसाधनं यज्ञाख्यं रथं वा चोदयः। प्रेरय। किंच त्वं सहावान् सोमसहायवान् बलवान्वा भूत्वा दस्युमुपक्षपयितारमव्रतमकर्माणमननुष्ठायिनमोषः। दह। किमिव। शोचिषा दीप्त्या ज्वालयाग्निः पात्रं न। स्वाधारं पात्रविशेषमिव। यागाधिकारी सन् यो न यजते तं दहेत्यर्थः ॥

॥ अथ चतुर्थी ॥

मुषाय सूर्यं कवे चक्रमीशान ओजसा।
वह शुष्णाय वधं कुत्सं वातस्याश्वैः ॥ ४ ॥
मुषाय। सूर्यं। कवे। चक्रं। ईशानः। ओजसा।
वह। शुष्णाय। वधं। कुत्सं। वातस्य। अश्वैः ॥ ४ ॥

हे कवे क्रांतदर्शिन्निंद्र ईशानः समर्थः सन् सूर्यं सूर्यस्य ॥ सुपां सुपो भवंतीति षष्ठ्येकवचनस्य द्वितीयैकवचनादेशः ॥ तत्संबंधि चक्रमेकमोजसा बलेन सामर्थ्यातिशयेन मुषाय। अमुष्णाः ॥ छंदसि शायजपीति शायजादेशः ॥ पूर्वं सूर्यरथस्य चक्रद्वयमस्ति एकमिंद्रो मुमुषेतीतिहासः। तथा च मंत्रांतरं प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्यद्दिति। किंच शुष्णायैतन्नामकायासुराय तद्वधार्थं। द्वितीयार्थे वा चतुर्थी। शुष्णं हंतुमित्यर्थः। कुत्सं कर्तनसाधनं वधं वज्रं वातस्य वायोरश्वैर्वायुवेगैर्वाश्वैर्युक्तः सन् वह। अवहः। शुष्णं हंतुं वज्रमधारयः। यद्वा शुष्णवधाय वज्रमवहः। तं च हत्वा तदीयैर्वायुवेगैरश्वैस्तदुपलक्षितैस्तदीयैर्धनैः कुत्सं महर्षिमगमः। शुष्णासुरधनं कुत्सायादा इत्यर्थः। तथा चान्यत्र त्वं कुत्सं शुष्णहत्येष्वाविथ कुत्साय शुष्णमशुषमित्यादीति ॥

॥ अथ पंचमी ॥

शुष्मिंतमो हि ते मदो द्युम्निंतम उत क्रतुः ।
वृत्रघ्ना वरिवोविदा मंसीष्ठा अश्वसातमः ॥ ५ ॥
शुष्मिन्ऽतमः । हि । ते । मदः । द्युम्निन्ऽतमः । उत । क्रतुः ।
वृत्रऽघ्ना । वरिवःऽविदा । मंसीष्ठाः । अश्वऽसातमः ॥ ५ ॥

हे इंद्र ते तव मदः सोमपानजनितः शुष्मिंतमः । बलवत्तमः । उत अपि च ते क्रतुः कर्म व्यापारोऽस्मदर्थो द्युम्निंतमः । अतिशयेनान्नवान् यशोवान्वा ॥ उभयत्रायस्मयादीनि छंदसीति भसंज्ञाया बाधितत्वात् न लोपः ॥ हे इंद्र अश्वसातमोऽश्वोपलक्षितबहुधनदास्त्वं वृत्रघ्ना वृत्रघातिनौ वरिवोविदा धनस्य परिचरणस्य वा वेदयितारौ लंभयितारौ तव मदक्रतू मंसीष्ठाः । अनुज्ञातवानसि । शत्रुघातिनौ धनदातारौ च स्यातामित्यनुग्रहमकरोरित्यर्थः ॥

॥ अथ षष्ठी ॥

यथा पूर्वेभ्यो जरितृभ्य इंद्र मय इवापो न तृष्यते बभूथ ।
तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुं ॥ ६ ॥
यथा । पूर्वेभ्यः । जरितृऽभ्यः । इंद्र । मयःऽइव । आपः । न । तृष्यते । बभूथ ।
तां । अनु । त्वा । निऽविदं । जोहवीमि । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ६ ॥

हे इंद्र पूर्वेभ्यो जरितृभ्यः पुरातनेभ्यो गरितृभ्यः स्तोतृभ्यो मय इव बभूथ । मयः सुखं । सुखस्वरूपमिवाभवः । तद्वत् स्तोतृभ्योऽस्मभ्यं सुखो भव । तत्र दृष्टांतः । तृष्यत आपो न । तृषार्तस्योदकानि यथा सुखकराणीति तद्वत् । तस्मात्तां निविदं त्वत्प्रीतिकरीं प्रसिद्धां स्तुतिं त्वा तुभ्यमनुजोहवीमि । पुनःपुनः करोमि । यद्वा तां निविदमनु ॥ तृतीयार्थे । पा॰ १.४.८५. । इत्यनोः कर्मप्रवचनीयत्वं ॥ तया स्तुत्या त्वां जोहवीमि । पुनःपुनराह्वयामि । विद्यामेति व्याख्यातं ॥

॥ इति द्वितीयस्य चतुर्थेऽष्टादशो वर्गः ॥

मत्स्व न इति षडृचं द्वादशं सूक्तमागस्त्यमैंद्रमानुष्टुभं । पूर्वत्र तुशब्दात् त्रिष्टुबंतं त्वित्युक्तत्वादंत्या त्रिष्टुप् । मत्स्व न इत्यनुक्रांतं । विशेषविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

मत्सि नो वस्यइष्टय इंद्रमिंदो वृषा विश ।
ऋघायमाण इन्वसि शत्रुमंति न विंदसि ॥ १ ॥
मत्सि । नः । वस्यःऽइष्टये । इंद्रं । इंदो इति । वृषा । आ । विश ।
ऋघायमाणः । इन्वसि । शत्रुं । अंति । न । विंदसि ॥ १ ॥

हे इंदो क्लेदयितः सोम त्वं नो वस्यइष्टये वसीयसो धनस्य प्राप्तय उक्तलक्षणाय यागाय वेंद्रं मत्सि । मादयस्व । तदर्थं त्वमेवेंद्रं वृषा कामानां वर्षिताविश । अथ तथा पीतः सन् ऋघायमाणः शत्रून् हिंसयन् इन्वसि । व्याप्नोषि । अतोऽंति अंतिके शत्रुं न विंदसि । न लभसे । यतः शत्रवस्त्वत्सामर्थ्येन पलायिता अतो न विंदसि । यद्वोत्तरार्द्ध इंद्रपरतया व्याख्येयः । हे इंद्र त्वं तं सोमं पीत्वा ऋघायमाणः सन् इन्वसि । अंतिके शत्रुं न विंदसि ॥

॥ अथ द्वितीया ॥

तस्मिन्ना वेशया गिरो य एकश्चर्षणीनां ।
अनु स्वधा यमुप्यते यवं न चर्कृषद्वृषा ॥ २ ॥
तस्मिन् । आ । वेशय । गिरः । यः । एकः । चर्षणीनां ।
अनु । स्वधा । यं । उप्यते । यवं । न । चर्कृषत् । वृषा ॥ २ ॥

हे अंतरात्मन् होतर्वा तस्मिन्प्रसिद्ध इंद्रे गिरः स्तुतिरूपा वाच आवेशय । स्थापय । तं स्तुहीत्यर्थः । य इंद्रश्चर्षणीनां ज्ञानवतां मनुष्याणामेक एक एव स्थानीयः । यमनु यमेवेंद्रमनु स्वधा हविर्लक्षणमन्नमुप्यते । दीयत इत्यर्थः । स चेंद्रो वृषा वर्षकः सन् यवं न यवमिव पक्वं यवं यथा चर्कृषत् । क्रमेणाददते कर्षकाः तद्वदादत्ते । यद्वा अनु स्वधान्नसाधनं व्रीह्यादिकमुप्यते भूमौ यस्येंद्रस्य वृष्टिरूपमनुग्रहमपेक्ष्योप्यत इत्यर्थः । स च वृषा वृष्टेर्वर्षिता स इंद्रो यवं न यवमिव सर्ववीजमपि चर्कृषत् । पुनःपुनः करोति । अंकुरयति । हविःसाधनत्वप्राशस्त्यमपेक्ष्य यवशब्दः प्रयुक्तः । एवं महानुभाव इंद्रे गिर आवेशयेति ॥

॥ अथ तृतीया ॥

यस्य विश्वानि हस्तयोः पंच क्षितीनां वसु ।
स्पाशयस्व यो अस्मध्रुग्दिव्येवाशनिर्जहि ॥ ३ ॥
यस्य । विश्वानि । हस्तयोः । पंच । क्षितीनां । वसु ।
स्पाशयस्व । यः । अस्मऽध्रुक् । दिव्याऽइव । अशनिः । जहि ॥ ३ ॥

यस्येंद्रस्य हस्तयोः पंच क्षितीनां । क्षियंति निवसंति गच्छंति वा क्षितयो मनुष्याः । पंचानां मनुष्याणां प्रीणयितॄणि विश्वा सर्वाणि वसु वसूनि धृतानि भवंति । देवा मनुष्याः पितरः पशवः पक्षिणश्चेति पंच जनाः । चत्वारो वर्णा निषादपंचमाः पंच जना इत्यन्ये । स तादृशेंद्र त्वं स्पाशयस्व । बाधयस्व योऽस्मध्रुक् अस्मभ्यं द्रुह्यति तं । केन प्रकारेणेति स उच्यते । दिव्या दिवि भवाशनिरिव । अशनिर्भूत्वास्मद्द्विष्टॄन् जहि ॥

॥ अथ चतुर्थी ॥

असुन्वंतं समं जहि दूणाशं यो न ते मयः ।
अस्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते ॥ ४ ॥
असुन्वंतं । समं । जहि । दुःऽनशं । यः । न । ते । मयः ।
अस्मभ्यं । अस्य । वेदनं । दद्धि । सूरिः । चित् । ओहते ॥ ४ ॥

हे इंद्र असुन्वंतं सोमाभिषवमकुर्वाणं । त्वामयजंतमित्यर्थः । दूणाशं दुःखेन नाशनीयं समं । अयं सर्वानुदात्तः सर्वशब्दपर्यायः । अयष्टॄन् सर्वान् । यद्वा सममेकोद्योगेन अविशेषेण वा जहि । तेन किमपराद्धमित्यत आह । यस्ते तव मयः । मय इति सुखनाम । तव सुखहेतुर्न भवति । यो होमेन स्तुत्या वा न प्रीणाति तं जहि । किंचास्य वेदनं धनमस्मभ्यं दद्धि । देहि ॥ दद दान इत्यस्माद्व्यत्ययेन परस्मैपदं । छांदसः शपो लुक् ॥ सूरिश्चिदोहते । चिदेवार्थे । सूरिस्तव स्तोतैवोहते । वहति । प्राप्नोति धनं ॥

॥ अथ पंचमी ॥

आवो यस्य द्विबर्हसोऽर्केषु सानुषगसत् ।
आजाविंद्रस्येंदो प्रावो वाजेषु वाजिनं ॥ ५ ॥

आवः । यस्य । द्विऽबर्हसः । अर्केषु । सानुषक् । असत् ।

आजौ । इंद्रस्य । इंदो इति । प्र । आवः । वाजेषु । वाजिनं ॥ ५ ॥

हे इंदो सोम तव यस्य द्विबर्हसः स्तोत्रहवीरूपद्विविधपरिवृढकर्मवतो यजमानस्यार्केषु मंत्रेषु सानुषक् सानुषंगः सातत्यमसत् । भवेत् । तमावः । तं यजमानं रक्षसि तर्पयसि वा । यद्वा कर्मणि षष्ठी । यं द्वयोः स्थानयोः परिवृढं यमिंद्रं हे इंदो यदार्केषु सानुषगसत् भवेः तदावः । अरक्षः । अतर्पयो वा । तस्यैवेंद्रस्याजौ संग्रामे हे सोम वाजिनं तथान्नवंतं तमिंद्रं वाजेषु बलेष्वन्नेषु वा निमित्तभूतेषु प्रावः । प्रकर्षेणारक्षयः । पानसमये तर्पयित्वा संग्रामसमये बलवर्धनेन जयप्राप्तशत्रुधनतर्पणेन वारक्ष इत्यर्थः ॥

॥ अथ षष्ठी ॥

यथा पूर्वेभ्यो जरितृभ्य इंद्र मयं इवापो न तृष्यते बभूथ ।

तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुं ॥ ६ ॥

यथा । पूर्वेभ्यः । जरितृऽभ्यः । इंद्र । मयःऽइव । आपः । न । तृष्यते । बभूथ ।

तां । अनु । त्वा । निऽविदं । जोहवीमि । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ६ ॥

यथा पूर्वेभ्य इति षष्ठी व्याख्याता ॥

॥ इति द्वितीयस्य चतुर्थे एकोनविंशो वर्गः ॥

आ चर्षणिप्रा इति पंचर्चं त्रयोदशं सूक्तमागस्त्यमैंद्रं त्रैष्टुभं । आ चर्षणिप्राः पंचेत्यनुक्रमणिका । होत्रकशस्त्रेषु स्तोमवृद्धावस्य विशेषविनियोगः । ऐंद्राणि त्रैष्टुभान्यमरुच्छब्दान्यावपेरन् । आ॰ ७. १२. । इति सूत्रितत्वात् ॥

॥ तत्र प्रथमा ॥

आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां पुरुहूत इंद्रः ।

स्तुतः श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृषणा याह्यर्वाङ् ॥ १ ॥

आ । चर्षणिऽप्राः । वृषभः । जनानां । राजा । कृष्टीनां । पुरुऽहूतः । इंद्रः ।

स्तुतः । श्रवस्यन् । अवसा । उप । मद्रिक् । युक्त्वा । हरी इति । वृषणा । आ । याहि ।

अर्वाङ् ॥ १ ॥

अयमिंद्रश्चर्षणिप्राः। चर्षणयो मनुष्याः। तेषां धनादिना प्रीणयिता। जनानां सर्वेषां वृषभः कामानां वर्षिता। तथा कृष्टीनां। मनुष्यनामैतत्। मनुष्याणां राजा स्वामी पुरुहूतो बहुभिराहूतः। ईदृश इंद्रोऽस्मानाजानात्वागच्छतु वा। उत्तरार्द्धः परोक्षवादः। हे इंद्र स्तुतोऽस्माभिः श्रवस्यन् हविर्लक्षणान्नमिच्छन् अवसास्मद्रक्षणेन तर्पणेन वा युक्तः सन् मद्रिक् मदभिमुखमंचन्। वृषणा वर्षकौ युवानौ हरी अश्वौ युक्त्वा रथे योजयित्वार्वाङ् अस्मदभिमुखमायाहि। आगच्छ॥

॥ अथ द्वितीया ॥

ये ते वृषणो वृषभास इंद्र ब्रह्मयुजो वृषरथासो अत्याः।
ताँ आ तिष्ठ तेभिरा याह्यर्वाङ् हवामहे त्वा सुत इंद्र सोमे॥२॥

ये। ते। वृषणः। वृषभासः। इंद्र। ब्रह्मऽयुजः। वृषऽरथासः। अत्याः।
तान्। आ। तिष्ठ। तेभिः। आ। याहि। अर्वाङ्। हवामहे। त्वा। सुते। इंद्र। सोमे॥२॥

हे इंद्र ते तव संबंधिनो वृषणो वर्षका युवानो वर्षणवंतो वा वृषभासः श्रेष्ठा ब्रह्मयुजः परिवृढेन मंत्रेण युज्यमाना वृषरथासो वर्षणरथवंतः। तत्र नियुक्ता इत्यर्थः। ईदृशा अत्या अश्वा ये संति तानातिष्ठ। आश्रय। आरोह। तेभिस्तैरर्वाङस्मदभिमुखमायाहि। आगच्छ। वयं च हे इंद्र सोमे सुते सति त्वा त्वां हवामहे। आह्वयामः॥

॥ अथ तृतीया ॥

आ तिष्ठ रथं वृषणं वृषा ते सुतः सोमः परिषिक्ता मधूनि।
युक्त्वा वृषभ्यां वृषभ क्षितीनां हरिभ्यां याहि प्रवतोप मद्रिक्॥३॥

आ। तिष्ठ। रथं। वृषणं। वृषा। ते। सुतः। सोमः। परिऽसिक्ता। मधूनि।
युक्त्वा। वृषऽभ्यां। वृषभ। क्षितीनां। हरिऽभ्यां। याहि। प्रऽवता। उप। मद्रिक्॥३॥

हे इंद्र त्वं रथमातिष्ठ। आश्रय यज्ञगमनार्थं। कीदृशं रथं। वृषणं। वर्षकं कामानां। किमर्थमिति चेत् उच्यते। ते त्वदर्थं वृषा वर्षकः सोमः सुतः। अभिषुतः। तथा मधूनि मधुराणि घृतक्षीरादीनि परिषिक्ता। परितः सिक्तानि संपादितानि। यद्वा मधूनि मधुराः सोमरसाश्चमसेषु पूरिताः। आगमनप्रकार उच्यते। हे वृषभ वर्षकेंद्र वृषभ्यां वर्षकाभ्यां हरिभ्यां युक्त्वा रथं योजयित्वा

क्षितीनां कर्मसु निवसतां यजमानानामस्माकमनुग्रहाय। क्षितीनां वृषभेति वा योज्यं। प्रवता वेगवता रथेन मद्रिक् मदभिमुखमंचन्। मदाभिमुख्येनोपयाहि ॥

॥ अथ चतुर्थी ॥

अयं यज्ञो देवया अयं मियेध इमा ब्रह्माण्ययमिंद्र सोमः ।
स्तीर्णं बर्हिरा तु शक्र प्र याहि पिबा निषद्य वि मुचा हरी इह ॥४॥

अयं। यज्ञः। देवऽयाः। अयं। मियेधः। इमा। ब्रह्माणि। अयं। इंद्र। सोमः।
स्तीर्णं। बर्हिः। आ। तु। शक्र। प्र। याहि। पिब। निऽसद्य। वि। मुच। हरी इति। इह ॥४॥

अहर्गणेषु मध्येष्वहःसु हारियोजनग्रहस्य याज्या। अग्निष्टोमोऽत्यग्निष्टोम इति खंडे सूचितं। अयं यज्ञो देवया अयं मियेध इतीतरेषु। आ॰ ६.११.। इति ॥ हे इंद्र अयं यज्ञो देवया देवान् गच्छन्भवति। तथायं यज्ञो मियेधः। मेधः पशुः। पशुर्वै मेध इति हि श्रुतिः। इमा इमानि ब्रह्माणि मंत्राः। अयं सुतः सोमः। स्तीर्णं बर्हिः। आसनायास्तृता दर्भाः। एते पदार्थास्त्वदुचिता एवं संपादिताः। हे शक्र शक्तेंद्र तु पुनः किमित्युक्ते आ प्रयाहि। प्रकर्षेण शीघ्रमागच्छ। आगत्य च निषद्य बर्हिष्युपविश्य पिब सोमं। तदर्थमिहास्मिन्देवयजने हरी अश्वौ विमुच। वियोजय ॥ छांदसो नुमभावः ॥

॥ अथ पंचमी ॥

ओ सुष्टुत इंद्र याह्यर्वाङुप ब्रह्माणि मान्यस्य कारोः ।
विद्याम वस्तोरवसा गृणंतो विद्यामेषं वृजनं जीरदानुं ॥ ५ ॥

ओ इति। सुऽस्तुतः। इंद्र। याहि। अर्वाङ्। उप। ब्रह्माणि। मान्यस्य। कारोः।
विद्याम। वस्तोः। अवसा। गृणंतः। विद्याम। इषं। वृजनं। जीरऽदानुं ॥५॥

हे इंद्र सुष्टुतोऽस्माभिः सम्यक् स्तुतः सन् अर्वाङ् अस्मदभिमुखमायाहि। आगच्छैव। मा विलंबय। किमुद्दिश्य। मान्यस्य माननीयस्य कारोः स्तोतुर्होतुः कर्तुर्यजमानस्य वा ब्रह्माणि मंत्रानुप उपलक्ष्य। गृणंतः स्तुवंतोऽभिमतं शब्दयंतो वा वयमवसा त्वद्रक्षणेन रक्षिताः संतो वस्तोर्वस्तुं सुखेन संस्थातुमहनि वा सर्वेष्वहःस्वन्नादिकं विद्याम। लभेमहि। विद्यामेत्यादि व्याख्यातं ॥

॥ इति द्वितीयस्य चतुर्थे विंशो वर्गः ॥

यद्ध स्येति पंचर्चं चतुर्दशं सूक्तमागस्त्यमैंद्रं त्रैष्टुभं। यद्ध स्येत्यनुक्रमणिका। विशेषविनियोगः पूर्ववत् ॥

॥ तत्र प्रथमा ॥

यद्ध स्या त इंद्र श्रुष्टिरस्ति यया बभूथ जरितृभ्य ऊती।
मा नः कामं महयंतमा धग्विश्वा ते अश्यां पर्याप आयोः ॥ १ ॥

यत्। ह। स्या। ते। इंद्र। श्रुष्टिः। अस्ति। यया। बभूथ। जरितृऽभ्यः। ऊती।
मा। नः। कामं। महयंतं। आ। धक्। विश्वा। ते। अश्यां। परि। आपः। आयोः ॥ १ ॥

हे इंद्र यत् यस्यासौ प्रसिद्धा श्रुष्टिः सर्वत्र श्रूयमाणा समृद्धिस्ते तवास्ति यया जरितृभ्यः स्तोतृभ्य ऊती ऊत्यै रक्षणाय बभूथ। समर्थो भवसि। नोऽस्माकं महयंतमस्मान्महतः कुर्वाणं काममभीष्टं मा धक्। मा धाक्षीः। ते तव संबंधीनि विश्वा सर्वाणि भोगजातान्याप आप्तव्यानि। यद्वा विश्वा सर्वा आप आप्ताः श्रुतय आयोर्मनुष्यस्योचिताः। पर्यश्यां। परितो व्याप्नुयां ॥

॥ अथ द्वितीया ॥

न घा राजेंद्र आ दभन्नो या नु स्वसारा कृणवंत योनौ।
आपश्चिदस्मै सुतुका अवेषन्गमन्न इंद्रः सख्या वयश्च ॥ २ ॥

न। घ। राजा। इंद्रः। आ। दभत्। नः। या। नु। स्वसारा। कृणवंत। योनौ।
आपः। चित्। अस्मै। सुऽतुकाः। अवेषन्। गमत्। नः। इंद्रः। सख्या। वयः। च ॥ २ ॥

अयं राजा राजमान ईश्वरो वेंद्रो नोऽस्मदीयानि कर्माणि नादभत्। सर्वतो न हिंस्यात्। कानीति उच्यते। या यानि कर्माणि वृष्ट्यादिरूपाणि स्वसारा परस्परं स्वसृभूते स्वयंसरणभूते अहोरात्रे। नु पूरणः। योनौ स्वकीये स्थाने कृणवंत ॥ द्विवचनस्थाने बहुवचनं ॥ कुरुतः ॥ कृवि हिंसाकरणयोश्च। धिन्वि-कृण्व्योरच्चेत्युप्रत्ययः। बहुलग्रहणाच्छप् ॥ तानींद्रोऽप्यनुजानात्वित्यर्थः। स्वसृभू-तावध्वर्युयजमानौ वा कुरुतः। यद्वा स्वसारोऽंगुलयो योनौ फलोत्पादनस्थाने यज्ञे यानि कृतवंतस्तानीति योज्यं। किंच अस्मा इंद्राय सुतुकाः शोभनबलहे-तून्यापोऽप्कार्याणि हवींष्यवेषन्। व्याप्नुवंति। नोऽस्मभ्यमिंद्रः सख्या सख्यानि वयश्च प्रभूतमन्नं च गमत्। गमयतु ॥

॥ अथ तृतीया ॥

जेता नृभिरिंद्रः पृत्सु शूरः श्रोता हवं नाधमानस्य कारोः ।
प्रभर्ता रथं दाशुष उपाक उद्यंता गिरो यदि च त्मना भूत् ॥ ३ ॥
जेता । नृऽभिः । इंद्रः । पृत्ऽसु । शूरः । श्रोता । हवं । नाधमानस्य । कारोः ।
प्रऽभर्ता । रथं । दाशुषः । उपाके । उत्ऽयंता । गिरः । यदि । च । त्मना । भूत् ॥ ३ ॥

अयमिंद्रः शूरो विक्रांतः सन् नृभिः संग्रामनेतृभिर्मरुद्भिः सहितः सन् पृत्सु संग्रामेषु जेता जयशीलः शत्रूणां तथा नाधमानस्य त्वदनुग्रहं याचमानस्य कारोः स्तोतुर्हवमाह्वानं श्रोता भवति । किंच यदि च यदा च त्मना आत्मनानन्यप्रेरित एव गिरः स्तुतिरूपाणि वचांसि स्तोतॄन्वोद्यंतोच्छ्रयिता भूत् । भवेत् । तदा दाशुषो हविर्दत्तवतो यजमानस्योपाके । समीपनामैतत् । समीप एव यागदेशे रथं प्रभर्ता । सम्यक् प्रभरन्भवति ॥ जेतेत्यादिषु तृनंतेषु न लोकाव्ययेत्यादिना कर्मणि षष्ठीप्रतिषेधः ॥ यदा स्तुतिं श्रोतुमिच्छति तदा स्वयमेव शीघ्रं रथं धावयित्वा यागं प्राप्नोतीत्यर्थः ॥

॥ अथ चतुर्थी ॥

एवा नृभिरिंद्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्रिणो भूत् ।
समर्य इषः स्तवते विवाचि सत्राकरो यजमानस्य शंसः ॥ ४ ॥
एव । नृऽभिः । इंद्रः । सुऽश्रवस्या । प्रऽखादः । पृक्षः । अभि । मित्रिणः । भूत् ।
सऽमर्ये । इषः । स्तवते । विऽवाचि । सत्राऽकरः । यजमानस्य । शंसः ॥ ४ ॥

अयमिंद्रो नृभिः कर्मनिर्वाहकैर्यजमानैर्दत्तं पृक्षो हविर्लक्षणमन्नं सुश्रवस्या शोभनान्नेच्छयान्नेच्छुर्वा प्रखादः । प्रकर्षेण खादिता । एव एवं । एवमेव पूर्वं यथा तथैव मित्रिणः सहायवतोऽपि यजमानस्य शत्रूनभि भूत् । अभिभवति । यद्वा नृभिर्वृष्टिनेतृभिर्मरुद्भिः सहितोऽयमिंद्रः सुश्रवस्या प्रखादः सन्नेवमेव मित्रिण ऋत्विग्रूपमित्रवतो यजमानस्यार्थे तदभिमतायाभिभूत् । अभीत्यनर्थकः । भवति । आभिमुख्येन वा भवति । तस्य हविः स्वीकृत्य तदभिमताय भवतीत्यर्थः । अथ तथाभूः सन् विवाचि विविधपरस्पराह्वानध्वनियुक्ते समर्ये संग्रामे विविधस्तोत्रशस्त्रध्वनियुक्ते समर्ये मर्त्ययुक्ते यज्ञे वा तन्निमित्तं यजमानस्य शंसः

शंसकः सन् सत्राकरः फलानां सत्यकार्ययमिंद्र इषो हविर्लक्षणमन्नं स्तवते । स्तौति ॥

॥ अथ पंचमी ॥

त्वया वयं मघवन्निंद्र शत्रूनभि ष्याम महतो मन्यमानान् ।
त्वं त्राता त्वमु नो वृधे भूर्विद्यामेषं वृजनं जीरदानुं ॥ ५ ॥
त्वया । वयं । मघऽवन् । इंद्र । शत्रून् । अभि । स्याम । महतः । मन्यमानान् ।
त्वं । त्राता । त्वं । ऊं इति । नः । वृधे । भूः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ५ ॥

हे मघवन् धनवन्निंद्र त्वया सहायेन वयं यजमानाः महतो मन्यमानान् अतिबलानबध्यान् मन्यमानान् शत्रूनभिष्याम । अभिभवितारो भवेम । हे इंद्र त्वं त्राता त्वमेवास्माकं रक्षकः । अतस्त्वमु त्वमेव नोऽस्माकं वृधे धनादिवर्धनाय भूः । भव । विद्यामेत्यादि गतं ॥

॥ इति द्वितीयस्य चतुर्थे एकविंशो वर्गः ॥

पूर्वीरहमिति षडृचं पंचदशं सूक्तं त्रैष्टुभं । उपांत्या बृहती । अत्र त्रयाणां द्वृचानां लोपामुद्रागस्त्यतच्छिष्यैर्दृष्टत्वात्त एवर्षयः । सूक्तप्रतिपाद्योऽर्थो रतिर्देवता । अत्रानुक्रमणिका । पूर्वीः षट् जायापत्योर्लोपामुद्राया अगस्त्यस्य च द्वृचाभ्यां रत्यर्थं संवादं श्रुत्वांतेवासी ब्रह्मचर्यंत्ये बृहत्यादी अपश्यदिति । विशेषविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा । लोपमुद्राह ॥

पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयंतीः ।
मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः ॥ १ ॥
पूर्वीः । अहं । शरदः । शश्रमाणा । दोषाः । वस्तोः । उषसः । जरयंतीः ।
मिनाति । श्रियं । जरिमा । तनूनां । अपि । ऊं इति । नु । पत्नीः । वृषणः । जगम्युः ॥ १ ॥

हे अगस्त्य अहं लोपामुद्रा पूर्वीः शरदः पुरातनानसंख्यातान्संवत्सरान् दोषा रात्रीर्वस्तोरहानि तथा देहं जरयंतीरुषस उषःकालांश्च ॥ सर्वत्रात्यंतकालसंयोगे द्वितीया ॥ अद्यतनकालपर्यंतं बहुसंवत्सरं कार्त्स्न्येन त्वच्छुश्रूषया शश्रमाणा श्रांताभूवं । इदानीं तु जरिमा जरा तनूनामंगानां श्रियं सौंदर्यं मिनाति ।

हिनस्ति। एवमपि नानुगृह्णासीत्यर्थः। अप्यू नु। अपिः संभावनायां। उ इत्यवधारणे। नु इति वितर्के। इदानीमपि किं संभावनीयं। लोके हि पत्नीः स्त्रियो वृषणः सेक्तारः पुरुषा जगम्युः। गच्छेयुः। सभोगं कुर्युः। अतो मां किमित्यवमन्यसे। इदानीमपि वा संभावयेत्यर्थः ॥

॥ अथ द्वितीया। सा तमेवाह ॥

ये चिद्धि पूर्व ऋतसाप आसन्त्साकं देवेभिरवदन्नृतानि।
ते चिदवासुर्नह्यंतमापुः समू नु पत्नीर्वृषभिर्जगम्युः ॥२॥

ये। चित्। हि। पूर्वे। ऋतऽसापः। आसन्। साकं। देवेभिः। अवदन्। ऋतानि।
ते। चित्। अव। असुः। नहि। अंतं। आपुः। सं। ऊं इति। नु। पत्नीः। वृषऽभिः।
जगम्युः ॥२॥

हे पते अगस्त्य ये चिद्धि येऽपि तु पूर्वे पुरातना ऋतसापः सत्यस्यापयितारो व्याप्नुवाना महर्षय आसन् ते देवेभिर्देवैः साकं सह ऋतानि सत्यवाक्यान्यवदन्। वदंति। ये महत्तपो यज्ञं वानुतिष्ठंति ये च देववाक्यानि देवस्मृतिरूपाणि वदंति। ते चित्। चिदप्यर्थे। ते चिदवासुः। अवक्षिपंति रेतः ॥ स्यतिरुपसृष्टो विमोचने वर्तते ॥ ते नह्यंतमापुः। नहि ब्रह्मचर्यादेरंतं प्राप्नुवन्। ब्रह्मचर्यमनिषिद्धर्तुकालगमनमपि कुर्वंतीत्यर्थः। तथा पत्नीः पत्यश्च तपस्यमाना वृषभिर्भोगवर्षकैः पतिभिः सह समू नु जगम्युः। उ न्विति पूरणौ। संगच्छेरन्। अतस्त्वं कथं मां नानुभवसीत्यर्थः ॥

॥ अथ तृतीया। अगस्त्यस्तामाह ॥

न मृषा श्रांतं यदवंति देवा विश्वा इत्स्पृधो अभ्यश्नवाव।
जयावेदत्र शतनीथमाजिं यत्सम्यंचा मिथुनावभ्यजाव ॥३॥

न। मृषा। श्रांतं। यत्। अवंति। देवाः। विश्वाः। इत्। स्पृधः। अभि। अश्नवाव।
जयाव। इत्। अत्र। शतऽनीथं। आजिं। यत्। सम्यंचा। मिथुनौ। अभि। अजाव ॥३॥

भोः पत्नि त्वया मया न मृषा श्रांतं। व्यर्थं नैव खिन्नमावाभ्यां। यत् यस्माद्देवा अवंति। रक्षंति तपोभिः प्रीता देवाः। विश्वाः सर्वाः स्पृधोऽभ्यश्नवाव। अभितो व्याप्नुयाव। अत्रास्मिन्संसारे शतनीथमपरिमितभोगप्राप्तिसाध-

नमाजिं प्राप्तिं परस्परं जयाव । जयलक्षणं सुरतसंग्रामं वा जयाव । यत् यस्मात्सम्यंचा सम्यक् परस्परं गच्छंतौ प्रजयंतौ वा मिथुना मिथुनौ स्त्रीपुरुषरूपौ संतावभ्यजाव । त्वं चाहमपि परस्परमभिजयावेत्येवं तयोक्तं संभोगं संभावयामास ॥

॥ अथ चतुर्थ्यागस्त्य आह ॥

नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित् ।
लोपामुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसंतं ॥ ४ ॥

नदस्य । मा । रुधतः । कामः । आ । अगन् । इतः । आऽजातः । अमुतः । कुतः । चित् ।
लोपामुद्रा । वृषणं । निः । रिणाति । धीरं । अधीरा । धयति । श्वसंतं ॥ ४ ॥

हे जाये नदस्य नदनस्य जपशब्दयितुर्जपाध्ययनकर्तुः । रुधतो रेतो निरोद्धुर्ब्रह्मचर्यमास्थितस्य ॥ उभे कर्मणि षष्ठ्यौ ॥ उक्तलक्षणं मां काम आगन् । आगमत् ॥ नदस्य मा रुधतः काम आगमदिति निरुक्तं । ५. २.॥ कस्य हेतोरिति उच्यते । इतस्त्वत्संगमनिमित्तात् तथामुतो वसंतादिकालात् कुतश्चित्कारणादाजातः सर्वत उत्पन्नः । यद्वा इत एतल्लोकजनितादमुतो लोकांतरजनिताद्वा कुतश्चिन्निमित्तात्कामात् । कथमिति उच्यते । इयं लोपामुद्रा वृषणं रेतसः प्रवर्तकं मां नीरिणाति । नितरां गच्छतु । किंच धीरं धीमंतं नियमादविचालिनं श्वसंतं महाप्राणं महाबलमधीरा कातरैषा योषिद्धयति । उपभुंक्तां ॥

अथानयोर्दंपत्योः संभोगसंलापं श्रुत्वा तत्प्रायश्चित्तं चिकीर्षुरुत्तराभ्यामाह । अनयोर्विनियोगः शौनकेनोक्तः । इमं नु सोममित्येते द्वे ऋचौ प्रयतो जपन् । सर्वान्कामानवाप्नोति पापेभ्यश्च प्रमुच्यते । ऋग्वि॰ १. २६. । इति ॥

॥ तयोर्मध्ये प्रथमा सूक्ते पंचमी ॥

इमं नु सोममंतितो हृत्सु पीतमुप ब्रुवे ।
यत्सीमागश्चकृमा तत्सु मृळतु पुलुकामो हि मर्त्यः ॥ ५ ॥

इमं । नु । सोमं । अंतितः । हृत्ऽसु । पीतं । उप । ब्रुवे ।
यत् । सीं । आगः । चकृम । तत् । सु । मृळतु । पुलुऽकामः । हि । मर्त्यः ॥ ५ ॥

उपेत्य मनसा प्राप्य प्रार्थयते । किं ब्रवीति । उच्यते । यदागो गुर्वोः काम-

प्रलापश्रवणविषयं पापं चकृम कृतवंतो वयं तत् तस्मादागसः स सोमः सु सम्यक् मृळतु । सुखयतु । पापजनितदुःखं मा करोत्वित्यर्थः । महत्पापमनुभुज्यमानं प्रार्थनया कथं लुप्यत इत्यत आह । हि यस्मान्मर्त्यो मनुष्यः पुलुकामो बहुकामनावान् । अल्पेनैव कर्मणा बहुकामानाकालयति । यस्मादेवं तस्मात्परिहरेत्यर्थः । यद्वायमपवर्जनीयतया प्राप्यत इवेत्याह । पुरुकामो हि खलु मर्त्यः कामहतः सन् कामेन निरुद्ध एव वर्तते । अतस्तयोरुत्सेकोऽयुक्तः । तच्छब्दश्रवणदोषोऽपि प्रामादिकोऽस्माकं प्राप्तेन सोमेन परिहर्तव्य इत्यर्थः । यद्वायं मंत्रश्चंद्रपरो व्याख्येयो मनसोऽभिमानित्वाच्च तस्य पापस्यापि मनस्येव संभावितत्वात् । अस्मिन्पक्षे हृत्सु पीतं हृदयस्थितमित्यर्थः । शिष्टं स्पष्टं ॥

अथ विनियुक्तयोर्मध्ये द्वितीयया सूक्ते षष्ठ्यांतेवास्याह ॥

अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ।
उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥ ६ ॥

अगस्त्यः । खनमानः । खनित्रैः । प्रऽजां । अपत्यं । बलं । इच्छमानः ।
उभौ । वर्णौ । ऋषिः । उग्रः । पुपोष । सत्याः । देवेषु । आऽशिषः । जगाम ॥ ६ ॥

अयमगस्त्यो मद्गुरुः खनित्रैः फलस्योत्पादनसाधनैर्यज्ञस्तोत्रादिभिः खनमानः फलमभिमतमुत्पादयन् प्रजां प्रकर्षेण पुनःपुनर्जायमानमपत्यं कुलस्यापतनसाधनं पुत्रादिकं बलं चेच्छमानः सन् । यद्वा प्रजां भृत्यादिरूपां चेच्छन् ऋषिरतींद्रियद्रष्टा महानुभाव उग्र उद्गूर्णः संसारे संचरन्नप्यपापः सन्नुभौ वर्णौ वर्णौ वर्णनीयावाकारौ कामं च तपश्च पुपोष । सत्या आशिषो देवेषु देवेभ्यो जगाम । प्राप्तवान् । यतोऽयं महानुभावस्तस्मादस्मान्पातीत्यर्थः ॥

॥ इति द्वितीयस्य चतुर्थे द्वाविंशो वर्गः ॥

॥ इति प्रथमे मंडले त्रयोविंशोऽनुवाकः ॥

अथ चतुर्विंशेऽनुवाके द्वादश सूक्तानि । तत्र युवो रजांसीति दशर्चं प्रथमं सूक्तमागस्त्यं त्रैष्टुभं । तुह्यादिपरिभाषयेदमादिसूक्तपंचकमाश्विनं । युवोर्दशाश्विनं वेत्यनुक्रमणिका । एतदादीनि तृतीयवर्जितानि पंच सूक्तानि प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छंदसि विनियुक्तानि । अथाश्विन इति खंडे सूचितं । युवो रजांसीति पंचानां तृतीयमुद्धरेत् । आ॰ ४. १५. । इति ॥

॥ तत्र प्रथमा ॥

युवो रजांसि सुयमासो अश्वा रथो यद्वां पर्यर्णांसि दीयत् ।
हिरण्ययां वां पवयः प्रुषायन्मध्वः पिबंता उषसः सचेथे ॥ १ ॥

युवोः । रजांसि । सुऽयमासः । अश्वाः । रथः । यत् । वां । परि । अर्णांसि । दीयत् ।
हिरण्ययाः । वां । पवयः । प्रुषायन् । मध्वः । पिबंतौ । उषसः । सचेथे इति ॥ १ ॥

हे अश्विनौ युवोर्युवयोरश्वा रथवोढारो रजांसि रंजकान् लोकान् सुयमासः शोभननियमनाः । लोकत्रयसंचारिण इत्यर्थः । कदेत्याह । यत् यदा वां रथोऽर्णास्यरणीयानभिमतदेशान् परिदीयत् । परिगच्छेत् । परितो गच्छति वा । तदेत्यर्थः ॥ दीयतिर्गतिकर्मा दीयति तकतीति तत्कर्मसु पाठात् ॥ किंच त्वदागमनकाले वां युवयोः पवयो वज्रा रथनेमयो वा हिरण्ययाः हिरण्मयाः प्रुषायन् । प्रुष्णंत्यभिमतं । यद्वा हिरण्ययानि पवयो मधुपात्राणि वां युवाभ्यामर्थाय । यस्मादेवं तस्माद्युवां मध्वो मधुनो मधुसदृशस्य सोमरसस्य ॥ कर्मणि षष्ठी ॥ सोमरसं पिबंतावास्वादयंतावुषस उषःसंबंधिनि काले सचेथे । यज्ञं संगच्छेथे । अत्र क्रमो न विवक्षितः । उषःकाल एवागत्य मधुरं सोमरसं पिबतमित्यर्थः ॥

॥ अथ द्वितीया ॥

युवमत्यस्यावं नक्षथो यद्विपत्मनो नर्यस्य प्रयंज्योः ।
स्वसा यद्वां विश्वगूर्ती भराति वाजायेट्टे मधुपाविषे च ॥ २ ॥

युवं । अत्यस्य । अव । नक्षथः । यत् । विऽपत्मनः । नर्यस्य । प्रऽयंज्योः ।
स्वसा । यत् । वां । विश्वगूर्ती इति विश्वऽगूर्ती । भराति । वाजाय । ईट्टे । मधुऽपौ ।
इषे । च ॥ २ ॥

हे अश्विनौ युवं युवां यदत्यस्यातनशीलस्य सततसंचारिणो विपत्मनो विविधगमनस्य विचित्रगमनस्य वा नर्यस्य मनुष्याणां हितस्य प्रयज्योः प्रकर्षेण पूज्यस्य ॥ एतानि कर्मणि षष्ठ्यंतानि ॥ उक्तरूपं रथमव अवस्तात् तदुदयात्पूर्वं नक्षथः । व्याप्नुथो देवयजनं गंतुं । किंच यत् यदा हे विश्वगूर्ती सर्वस्तुत्यौ सर्वदोद्गूर्णौ वा वां युवयोः स्वसा स्वसृस्थानीया स्वयंसारिणी वोषा भराति । पोषते । त्वदागमनाय प्रभातं करोति । यदा हे मधुपौ मधुरस्य सोमरसस्य

पातारौ युवां यजमानो वाजाय बलाय गमनाय वा इषे प्रभूतान्नायेट्टे। स्तौति। तदा रथं प्राप्नुथ इत्यर्थः ॥

॥ अथ तृतीया ॥

युवं पयं उस्रियायामधत्तं पक्वमामायामव पूर्व्यं गोः।
अंतर्यद्वनिनों वामृतप्सू ह्वारो न शुचिर्यजते हविष्मान् ॥ ३ ॥

युवं। पयः। उस्रियायां। अधत्तं। पक्वं। आमायां। अव। पूर्व्यं। गोः। अंतः। यत्। वनिनः। वां। ऋतप्सू इत्यृतऽप्सू। ह्वारः। न। शुचिः। यजते। हविष्मान् ॥ ३ ॥

हे अश्विनौ युवं युवामुस्रियायां। गोनामैतत्। भोगोत्साविरण्यां गवि पयोऽधत्तं। अधारयतं। स्थापितवंतौ। तथामायामपक्वायां पक्वं परिपक्वं भोगयोग्यं गोसंबंधि दुग्धं पूर्व्यं पूर्वभवं तत्रैवोत्पन्नमव अवस्तादधारयतं। गवि क्षीरमुत्पाद्य पुनर्भोगाय पृथक्कृतवंतावित्यर्थः। यत् यस्मात् हे ऋतप्सू सत्यस्वरूपौ यज्ञियहविर्भक्षयितारौ वा हे अश्विनौ वां वनिन उदकवत उदकोपलक्षितहविष्मतो यज्ञस्यांतर्मध्ये हविष्मान् प्रदेयहविषा तद्वान् शुचिः शुद्धो यजमानो यजते। पूजयति युवां। तस्मादेवमकुरुतं। यद्वा यदेवं यजमानः करोति तदेत्यर्थः। तत्र दृष्टांतः। वनिनो वनसंबंधिवृक्षसमूहस्यांतर्मध्ये ह्वारो न। चोर इव। स यथा जागरूको वर्तते तथा यजमानोऽपीत्यर्थः ॥

॥ अथ चतुर्थी ॥

युवं हं घर्मं मधुमंतमत्रयेऽपो न क्षोदोऽवृणीतमेषे।
तद्वां नरावश्विना पश्वइष्टी रथ्येव चक्रा प्रति यंति मध्वः ॥ ४ ॥

युवं। ह। घर्मं। मधुऽमंतं। अत्रये। अपः। न। क्षोदः। अवृणीतं। एषे। तत्। वां। नरौ। अश्विना। पश्वःऽइष्टिः। रथ्याऽइव। चक्रा। प्रति। यंति। मध्वः ॥ ४ ॥

अत्रेतिहासमाहुः। प्रवर्ग्येण प्रचरंतमत्रिं राक्षसास्तप्ते घर्मेऽपातयन्। स च तप्यमानोऽश्विनौ तुष्टाव। तौ च स्तुत्या हृष्टमनसावरक्षतामिति। अपरेऽग्नौ क्षिप्तमपालयतामित्याहुरिति। हे अश्विनौ युवं युवां मधुमंतं पयोघृतरूपाभ्यां मधुभ्यां तद्वंतं घर्मं दीप्तं प्रवर्ग्यमेषे सौख्यमिच्छतेऽत्रय एतन्नाम्ने महर्षये क्षोदः

क्षोदांसि क्षोद्यमानान्यपो न उदकानीवावृणीतं। अवारयतं। औष्ण्यं शैत्यसुखं कृतवंतौ । तप्तघर्मसकाशाद्भक्षितवानित्यर्थः । यद्वा अत्रये क्षोदः । उदकनामैतत् । तत्स्थं शैत्यं लक्ष्यते। अपः क्षोदो न। अप इति षष्ठ्यर्थे द्वितीया। उदकानां शैत्यं यथा भवति तद्वत्। पक्षांतरे तु घर्मं दीप्तमग्निं मधुमंतं कृत्वावृणीतं। सुखयतमित्यर्थः। तथा च मंत्रांतरं। तप्तं घर्ममोम्यावंतमत्रय इति। तत्तस्मात् यस्मादेवं तस्मात् हे नरौ नेतारौ नराकारौ वाश्विना अश्विनौ वां युवाभ्यां पश्वइष्टिः । पशुरित्यग्नेर्नाम । अग्निः पशुरासीदित्यादिश्रुतेः । यद्वा पशुप्रियत्वात्पशुरित्युच्यते । तस्याग्नेरिष्टिर्भवति । अग्नौ यागः सर्वो युष्मदर्थं प्रवर्तत इत्यर्थः। यद्वा पशुसाध्यो यागो युवाभ्यां प्रवर्तत इति शेषः। आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेदित्यादिनाप्यश्विभ्यां पशुर्विहितः। तथा मध्वो मधुसदृशाः सोमरसा अपि युवाभ्यां प्रति यंति। अभिगच्छंति। तत्र दृष्टांतः। रथ्येव चक्रा । रथसंबंधीनि चक्रा चक्राणीव। तानि यथा प्रवणदेशमभिगच्छंति तद्वत् ॥

॥ अथ पंचमी ॥

आ वां दानायं ववृतीय दस्रा गोरोहेण तौग्र्यो न जिव्रिः ।
अपः क्षोणी सचते माहिना वां जूर्णो वामक्षुरंहसो यजत्रा ॥ ५ ॥
आ। वां। दानायं। ववृतीय। दस्रा। गोः। ओहेन। तौग्र्यः। न। जिव्रिः।
अपः। क्षोणी इति। सचते। माहिना। वां। जूर्णः। वां। अक्षुः। अंहसः। यजत्रा ॥ ५ ॥

हे दस्रा शत्रूणामुपक्षपयितारावश्विनौ वां युवयोर्दानायास्मदभिमताय युवाभ्यां वाहयितुमाववृतीय। आवर्तयामि यागदेशं ॥ वृतेरंतर्भावितण्यर्थस्येदं ॥ केन साधनेनेति तदुच्यते। गोः स्तुतिरूपाया वाच ओहेन वहनेन साधनेन। यद्वा आवर्तनकाल उच्यते। गोर्गंत्र्या उषसो वहनेन। जिव्रिर्जीर्णो जयशीलो वा तौग्र्यो न तुग्राख्यस्य राज्ञः पुत्रो भुज्युरिव। स यथा शत्रुभिः संताड्य समुद्रे पातितो युवां परितोष्य स्वोद्धाराय स्वसमीपमानयत तद्वदित्यर्थः। इयमाख्यायिका तुग्रो ह भुज्युमंहसः पिपृथो नासत्या भुज्युमित्यादिषु प्रसिद्धा च। किमाश्चर्यमहमावर्तयामीति। किंतु अपः क्षोणी। अप इत्यंतरिक्षनाम। क्षोणीति पृथिवीनाम। द्यावापृथिव्यावपि वां युवयोर्माहिना माहात्म्येन युवयोः प्रसादेन

सर्वोपकारिण्याविति ख्यातिं सर्वप्रदेशव्यापित्वं वा सचते। सेवते प्रत्येकं। यद्वा वां माहिम्ना यजमानो द्यावापृथिव्यौ सचते। किंच हे यजत्रा यष्टव्यौ प्रसादादयमृषिर्जूर्णो जरया जीर्णांगः सन्नंहसः पापाज्जरालक्षणात्प्रमुच्याक्षुश्चिरकालव्याप्तो दीर्घजीवी भूयात्। यद्वा हे यजत्रा वां प्रसादाज्जूर्णो जीर्णो यजमानोऽंहसो दुरितस्य हंत्रीरप उक्तलक्षणानि सोमरसरूपाण्युदकानि क्षोणी क्षोण्यां ॥ सप्तम्यर्थे प्रगृह्यं। भूम्यां चिरकालमक्षुर्व्याप्तः सन् महिना माहात्म्येन सचते। द्वितीयो वामित्ययमादरार्थः ॥

॥ इति द्वितीयस्य चतुर्थे त्रयोविंशो वर्गः ॥

॥ अथ षष्ठी ॥

नि यद्युवेथे नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिं।
प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजं ॥ ६॥

नि। यत्। युवेथे इति। निऽयुतः। सुदानू इति सुऽदानू। उप। स्वधाभिः। सृजथः। पुरंऽधिं।
प्रेषत्। वेषत्। वातः। न। सूरिः। आ। महे। ददे। सुऽव्रतः। न। वाजं ॥ ६॥

हे सुदानू शोभनदानावश्विनौ यत् यदा नियुतोऽश्वान् नियुवेथे। नियुंजाथे। नियोजयथः। ताभिरस्मद्यज्ञगमनाय संयुक्तौ भवथः। तदा स्वधाभिरन्नैस्तत्कारणैरुदकैर्वा पुरंधिं बहूनां धात्रीं पृथिवीमुपसृजथः। एवं च सति सूरिः स्तोतायं यजमानो वातो न वायुरिव तद्वत् क्षिप्रं युवां प्रेषत्। तर्पयतु। वेषत्। व्याप्नोतु। कामयतां वा ॥ प्रीणातेर्वेतेश्च लेटि रूपे ॥ अनंतरं सुव्रतो न अतिप्रशस्तोष्मादिकर्मवानिव वाजमन्नं महे महत्त्वायायं यजमान आददे। आदत्ते। स्वीकरोति ॥ आङो दो नास्यविहरण इत्यात्मनेपदं। लोपस्त आत्मनेपदेष्विति तलोपः। यद्वा छांदसे लिटि रूपं ॥ स्वीकृत्य स्वमहत्त्वाय युवामेव तर्पयत्वित्यर्थः ॥

॥ अथ सप्तमी ॥

वयं चिद्धि वां जरितारः सत्या विपन्यामहे वि पणिर्हितावान्।
अधा चिद्धि ष्माश्विनावनिंद्या पाथो हि ष्मा वृषणावंतिदेवं ॥ ७॥

वयं। चित्। हि। वां। जरितारः। सत्याः। विपन्यामहे। वि। पणिः। हितऽवान्।
अध। चित्। हि। स्म। अश्विनौ। अनिंद्या। पाथः। हि। स्म। वृषणौ। अंतिऽदेवं ॥ ७॥

वयं चिद्धि वयमपि जरितारस्तव स्तोतारः सत्याः सत्यफलाः संतो विपन्यामहे। विविधं स्तुमः। पणिः पणाधारो द्रोणकलशो विहितवान्। स्थापितरसवानासीत्। यद्वा पणिर्वणिक् लुब्धकोऽयष्टा हितवान् नियतधनो धनाढ्योऽप्ययष्टा वि। वियुज्यतां॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः॥ अथ अपि च चिद्धि ष्म। एते त्रयः पूरणाः। हे अश्विनौ अनिंद्या। प्रशस्यनामैतत्। हे प्रशस्यौ वृषणौ हे कामानां वर्षितारौ युवामंतिदेवं देवानामंतिके पाथः। सोमं पिबथः। यद्वा अंतिके वर्तमानं देवान्प्राप्नुवानं सोममिति योज्यं॥

॥ अथाष्टमी ॥

युवां चिद्धि ष्माश्विनावनु द्यून्विरुद्रस्य प्रस्रवणस्य सातौ।
अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत्सहस्रैः॥ ८॥

युवां। चित्। हि। स्म। अश्विनौ। अनु। द्यून्। विऽरुद्रस्य। प्रऽस्रवणस्य। सातौ।
अगस्त्यः। नरां। नृषु। प्रऽशस्तः। काराधुनीऽइव। चितयत्। सहस्रैः॥ ८॥

हे अश्विनौ युवां। चिद्धि ष्मेति त्रयः पूरणाः। अनु द्यून् प्रतिदिनं विरुद्रस्य विशिष्टोष्णरूपदुःखद्रावणस्य विविधरोरूयमाणद्रवणवतो वा प्रस्रवणस्य वृष्ट्युदकसंस्त्यायस्य सातौ लाभे निमित्तभूते सत्यगस्त्य एतन्नामा महर्षिर्नरां नेतॄणां कर्मनिर्वाहकानां मनुष्याणां नृषु येषु तादृशा मनुष्याः संति तेषु प्रशस्तः प्रशस्यतरोऽयं सहस्रैरपरिमितैः स्तोत्रैश्चितयत्। चेतयति स्तुत्या प्रबोधयति। तत्र दृष्टांतः। काराधुनीव। कारा शब्दः। तस्य धूनयितोत्पादयिता शंखादिः स इव। यद्वैतदप्यगस्त्यविशेषणं। कारः शब्दयिता होत्रादिः। तस्य धुनिः कंपयिता प्रेरक इव। इवेति संप्रत्यर्थे। अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोग इति निरुक्तं॥

॥ अथ नवमी ॥

प्र यद्वहेथे महिना रथस्य प्र स्यंद्रा याथो मनुषो न होता।
धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम॥ ९॥

प्र। यत्। वहेथे इति। महिना। रथस्य। प्र। स्यंद्रा। याथः। मनुषः। न। होता।
धत्तं। सूरिऽभ्यः। उत। वा। सुऽअश्व्यं। नासत्या। रयिऽसाचः। स्याम॥ ९॥

हे अश्विनौ युवां रथस्यागमनसाधनस्य महिना महत्त्वेन यत् यस्मात्प्रवहेथे।

धारयथो यज्ञं। यद्वा रथस्य स्वर्गगमनसाधनस्य यागस्य धुरं वहतः। तथा हे स्यंद्रा स्यंदनशीलौ युवां याथः। गच्छथः। स्वस्थानं यज्ञारंभ आगच्छथः यज्ञसमाप्तौ पुनर्गच्छथश्च। तत्र दृष्टांतः। मनुषो होता मनुष्यस्य यजमानस्य होता यथा यज्ञप्रारंभ आगच्छति कर्मणि निर्वृत्ते पुनरपगच्छति तद्वत्। आगमनसमये सूरिभ्यः स्तोतृभ्यो धत्तं। धारयतं फलं। उत वा स्वश्व्यं शोभनाश्वसमूहं धत्तं। नासत्या। सत्सु भवौ सत्यौ। न असत्यौ नासत्यौ। हे तादृशौ त्वदनुग्रहाद्रयिसाचो धनसमवायिनः स्याम। भवेम ॥

॥ अथ दशमी ॥

तं वां रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यं।
अरिष्टनेमिं परि द्यामियानं विद्यामेषं वृजनं जीरदानुं ॥ १० ॥

तं। वां। रथं। वयं। अद्य। हुवेम। स्तोमैः। अश्विना। सुविताय। नव्यं।
अरिष्टऽनेमिं। परि। द्यां। इयानं। विद्याम। इषं। वृजनं। जीरऽदानुं ॥ १० ॥

हे अश्विना हे अश्विनौ वां युवयोः संबंधिनं शीघ्रगमनेन स्तुत्यं रथं वयमगस्त्या अद्यास्मिन् सुत्येऽहनि हुवेम। आह्वयेम। केन साधनेनेति उच्यते। स्तोमैः स्तोत्रैः। किमर्थं। सुविताय। सुष्ठु प्राप्तये। कीदृशं। नव्यं। स्तुत्यं नूतनं वा। तथारिष्टनेमिं। अहिंसितचक्रवलयं द्यां परीयानं द्युलोकस्य परितो गच्छंतं। विद्यामेत्यादि गतं ॥

॥ इति द्वितीयस्य चतुर्थे चतुर्विंशो वर्गः ॥

कदु प्रेष्ठाविति नवर्चं द्वितीयं सूक्तमागस्त्यं त्रैष्टुभमाश्विनं। कदु नवेत्यनुक्रांतं। प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः पूर्वसूक्त एवोक्तः ॥

॥ तत्र प्रथमा ॥

कदु प्रेष्ठाविषां रयीणामध्वर्यंता यदुन्निनीथो अपां।
अयं वां यज्ञो अकृत प्रशस्तिं वसुधिती अवितारा जनानां ॥ १ ॥

कत्। ऊं इति। प्रेष्ठौ। इषां। रयीणां। अध्वर्यंता। यत्। उत्ऽनिनीथः। अपां।
अयं। वां। यज्ञः। अकृत। प्रऽशस्तिं। वसुधिती इति वसुऽधिती। अवितारा।
जनानां ॥ १ ॥

हे अश्विनौ प्रेष्ठौ प्रियतमौ वां युवां कदु कदा भविष्यति इषामिष्यमाणानामन्नानां । कर्मणि षष्ठ्यौ । अन्नानि धनानि चोन्निनीथः । ऊर्ध्वं प्रापयथः । अध्वर्यंताध्वरं पारयितुमिच्छंतौ युवामपां वृष्ट्युदकानां वृष्ट्युदकानि चोन्निनीथः । उत्कृष्टमधः प्रापयथ इति यत् तत् कदा । कस्मादेवमुच्यत इति उच्यते । अयं यज्ञोऽस्माभिरनुष्ठीयमानो वां युवयोरेव प्रशस्तिं प्रशंसां स्तुतिमकृत । करोति । यज्ञे शंसनीयानि शस्त्राणि युवामेव प्रशंसंतीत्यर्थः । यस्मादेवं तस्मात् हे वसुधिती वसुनो धनस्य धातारौ वस्तव्यकर्माणौ तथा हे जनानामवितारावुक्तलक्षणौ युवां कदान्नानां धनानां च दातारौ भवथ इति ॥

॥ अथ द्वितीया ॥

आ वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः ।
मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहंतु ॥ २ ॥

आ । वां । अश्वासः । शुचयः । पयःऽपाः । वातऽरंहसः । दिव्यासः । अत्याः ।
मनःऽजुवः । वृषणः । वीतऽपृष्ठाः । आ । इह । स्वऽराजः । अश्विना । वहंतु ॥ २ ॥

अश्विनौ शोभनाश्वयुक्तौ वां युवामश्वासो युष्मदीया इहास्मिन्यज्ञ आवहंतु । प्रापयंतु । अवशिष्टान्यश्वविशेषणानि । कीदृशास्ते । शुचयः शुद्धा दीप्ता वा । पयस्पा वृष्ट्युदकस्य पातारः । वातरंहसो वायुवेगाः । दिव्या दिविभवाः । अत्या अतनशीलाः । मनोजुवो मनोजवाः । वृषणो वर्षका युवान इत्यर्थः । वीतपृष्ठाः कांतपृष्ठा वपुष्मंत इत्यर्थः । स्वराजः स्वयमेव राजमानाः । ईदृशा भवंतु ॥

॥ अथ तृतीया ॥

आ वां रथोऽवनिर्न प्रवत्वान्त्सृप्रवंधुरः सुविताय गम्याः ।
वृष्णः स्थातारा मनसो जवीयानहंपूर्वो यजतो धिष्ण्या यः ॥ ३ ॥

आ । वां । रथः । अवनिः । न । प्रवत्वान् । सृप्रऽवंधुरः । सुविताय । गम्याः ।
वृष्णः । स्थातारा । मनसः । जवीयान् । अहंऽपूर्वः । यजतः । धिष्ण्या । यः ॥ ३ ॥

पूर्वमंत्रेऽश्वव्याजेनाश्विनोरागमनमुक्तं । अनेन रथव्याजेनोच्यते । हे धिष्ण्या उन्नतस्थानार्हौ स्थातारा स्वरथाधिष्ठानौ वां युवयोर्यो रथोऽस्ति स सुविताय शोभनफलायागम्याः । अस्मद्यज्ञमागच्छतु । पुरुषव्यत्ययः । कीदृशो रथ इति

स विशेष्यते । अवनिर्न प्रवत्वान् भूमिरिवात्यंतविस्तारवान् । सृप्रबंधुरो विस्तीर्णपुरोभागः । वृष्णो वर्षकस्याश्वस्य मनसोऽपि जवीयान् मनोवेगवानित्यर्थः । अहंपूर्वोऽहंकारपूर्वो मनस्वी वात्युदारः । यजतो यष्टव्यः । ईदृशो रथ आगच्छतु ॥

॥ अथ चतुर्थी ॥

इ॒हेह॑ जा॒ता सम॑वावशीताम॒रे॒पसा॑ त॒न्वा॒३॒॑ नाम॑भिः॒ स्वैः ।
जि॒ष्णुर्वा॑म॒न्यः सुम॑खस्य सू॒रिर्दि॒वो अ॒न्यः सु॒भगः॑ पु॒त्र ऊ॑हे ॥ ४ ॥
इ॒हऽइ॑ह । जा॒ता । सं । अ॒वा॒व॒शी॒ता॒ं । अ॒रे॒पसा॑ । त॒न्वा॑ । नाम॑ऽभिः । स्वैः ।
जि॒ष्णुः । वा॒ं । अ॒न्यः । सु॒ऽम॑खस्य । सू॒रिः । दि॒वः । अ॒न्यः । सु॒ऽभगः॑ । पु॒त्रः । ऊ॒हे॒ ॥ ४ ॥

हे अश्विनौ युवां समवावशीतां । सह सम्यग्वा पुनःपुनः स्तूयेथे कामयेथां वा यज्ञं ॥ पुरुषव्यत्ययः ॥ कीदृशौ युवां । इहेह जाता । उभाभ्यामिहशब्दाभ्यां मध्यमोत्तमस्थाने उच्येते । तयोः संभूतौ । चंद्रसूर्येणेति यावत् । सूर्याचंद्रमसावित्येक इति निरुक्तं । अरेपसा अपापौ । आथर्वणस्य गुरोः शिरश्छेदनादिना पापलेपरहिताविति भावः । आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतमित्यादिमंत्रवर्णात् । केन हेतुनेति उच्यते । तन्वा शरीरेण शरीरसौंदर्येण निमित्तेन स्वैर्नामभिः स्वीयैर्माहात्म्यविशिष्टैरश्विनौ नासत्यावित्यादिभिरपि । रमणीयशरीरवत्त्वान्महिमोपेतनामवत्त्वाच्च हेतोः संस्तूयेथे इत्यर्थः । यद्वा अरेपसा तन्वेति योज्यं । उक्तप्रकारेण गुरुशिरश्छेदादयपापेन शीर्षेण तादृङ्महत्त्वख्यापनेनेति यावत् । किंच वां युवयोरन्य एको मध्यमस्यांतरिक्षस्य पुत्रस्थानीयः सोमो जिष्णुर्जयशीलः सुमखस्य शोभनयज्ञस्य सूरिः प्रेरयिता सन् ऊहे । वहति विश्वं जगद्धारयति । चंद्रात्मनस्तस्योदये सति ह्योषधिवनस्पत्यादयो वर्धंते । अन्योऽपर उत्तमस्थानो दिवो द्युलोकस्य पुत्रः पुत्रस्थानीय आदित्यः सुभगः शोभनरश्मिरूपधन ऊहे । वहति । कृत्स्नमेवं पृथक् जगन्निर्वाहकौ महानुभावौ युवां सह स्तूयेथे । अत्र निरुक्तं । इहेह जातौ संस्तूयेथे पापेनालिप्यमानया तन्वा नामभिश्च स्वैर्जिष्णुर्वामन्यः सुमहतो बलस्येरयिता मध्यमो दिवोऽन्यः सुभगः पुत्र उह्यत आदित्यः । नि॰ १२. ३. । इति ॥

॥ अथ पंचमी ॥

प्र वां निचेरुः ककुहो वशाँ अनु पिशंगरूपः सदनानि गम्याः ।
हरी अन्यस्य पीपयंत वाजैर्मथ्ना रजांस्यश्विना वि घोषैः ॥ ५ ॥
प्र । वां । निऽचेरुः । ककुहः । वशान् । अनु । पिशंगऽरूपः । सदनानि । गम्याः ।
हरी इति । अन्यस्य । पीपयंत । वाजैः । मथ्ना । रजांसि । अश्विना । वि । घोषैः ॥ ५ ॥

हे अश्विना अश्विनौ वां युवयोर्मध्येऽन्यस्यैकस्य ककुहः श्रेष्ठः पिशंगरूपो हिरण्यरूपः पीतवर्णो वा बहुभिरक्षाद्यवयवैर्निरूप्यमाणो वा रथो वशाननु कामाननुलक्ष्य यथाकामं । अस्मद्यज्ञागमनेच्छयेत्यर्थः । यद्वा वशान् स्वधीनाः ककुहो दिशो दिगंतरालानुक्रमेण नीचैरुच्चैश्चरन् स्वस्थानाद्देवयजनमुखं गच्छन् सदनान्यस्मद्यागगृहाणि प्रगम्याः । प्रकर्षेण गच्छतु । पुरुषव्यत्ययः । अत्र यद्यप्यन्यस्येति नोक्तं तथाप्युत्तरवाक्ये तथोक्तत्वादत्रापि लभ्यते । अन्यस्य युवयोरन्यतमस्य हरी अश्वौ रजांसि लोकाः । अत्र लोकशब्दो जनवाचकः । ते यजमानरूपा जना इत्यर्थः । ते च मथ्ना प्रमाथनेन लोडनेन निष्पादितैर्वाजैरन्नैरामिक्षादिरूपैर्घोषैः स्तुतिभिश्चाह्वानादिशब्दविशिष्टैर्वा पीपयंत । आप्याययंति ॥

॥ इति द्वितीयस्य चतुर्थे पंचविंशो वर्गः ॥

॥ अथ षष्ठी ॥

प्र वां शरद्वान्वृषभो न निष्षाट् पूर्वीरिषश्चरति मध्व इष्णन् ।
एवैरन्यस्य पीपयंत वाजैर्वेषंतीरूर्ध्वा नद्यो न आगुः ॥ ६ ॥
प्र । वां । शरत्ऽवान् । वृषभः । न । निष्षाट् । पूर्वीः । इषः । चरति । मध्वः । इष्णन् ।
एवैः । अन्यस्य । पीपयंत । वाजैः । वेषंतीः । ऊर्ध्वाः । नद्यः । नः । आ । अगुः ॥ ६ ॥

हे अश्विनौ युवयोरन्यतमो मध्यमस्थानः शरद्वान् शरणवान् मेघवृक्षपर्णादीनां विशरणवान् । अथवा बहुसंवत्सरः पूर्वतनो नित्य इत्यर्थः । वृषभो न । वर्षितैवेंद्रः । स इव शत्रूणां निष्षाट् निःसारयिता सन् पूर्वीर्बह्वीः पुरातनीर्वेषोऽन्नानि सस्यादीन्युद्दिश्य प्रचरति । प्रकर्षेण गच्छति । मध्यमस्थानश्चंद्र इति पक्षे शरद्वान् शरत्कालवान् । तस्मिन् ऋतौ हि चंद्रः संनद्धो भवति । तेन च तृणगुल्मौषध्यादीनि वर्धंते । स किमर्थमेवं करोतीति उच्यते । मध्व इष्णन् मधुनो मधुस-

दृशस्य हविषः ॥ कर्मणि षष्ठी ॥ हविरिच्छन् । तदर्थमेवं करोति । तथान्यस्योत्तमादित्यस्यैवैः कामैर्गमनैर्वा निमित्तभूतैः पीपयंत । आप्याययंति हविर्भिर्यजमानाः । तुष्टेन तेन प्रेरिता वेषंतीर्व्यापयंतीरूर्ध्वा उन्नता उत्तीरा नद्यो न नदनशीला यथा नोऽस्मदर्थमागुः । आगच्छंति ॥

॥ अथ सप्तमी ॥

असर्जि वां स्थविरा वेधसा गीर्बाळ्हे अश्विना त्रेधा क्षरंती ।
उपस्तुताववतं नाधमानं यामन्नयामञ्छृणुतं हवं मे ॥ ७ ॥
असर्जि । वां । स्थविरा । वेधसा । गीः । बाळ्हे । अश्विना । त्रेधा । क्षरंती ।
उपऽस्तुतौ । अवतं । नाधमानं । यामन् । अयामन् । शृणुतं । हवं । मे ॥ ७ ॥

हे वेधसा विधातारावश्विनौ वां युवयोर्बाळ्हे दृढे स्थैर्ये निमित्तभूते सति गीः स्तुतिरूपा वाक् असर्जि । सृज्यते । कीदृशी सा । स्थविरा । अत्यंतं स्थिरा नित्या वेदमयी । त्रेधा मंत्रादिभेदेन त्रिप्रकारा क्षरंती युवां गच्छंती । ईदृशी स्तुतिः कृतेत्यर्थः । तथोपस्तुतौ संतौ नाधमानमभिमतफलं याचमानमवतं । रक्षतं तर्पयतं वा । किंच यामन् गमनेऽयामन् अगमने च हवमाह्वानं शृणुतं ॥

॥ अथाष्टमी ॥

उत स्या वां रुशतो वप्ससो गीस्त्रिबर्हिषि सदसि पिन्वते नॄन् ।
वृषा वां मेघो वृषणा पीपाय गोर्न सेके मनुषो दशस्यन् ॥ ८ ॥
उत । स्या । वां । रुशतः । वप्ससः । गीः । त्रिऽबर्हिषि । सदसि । पिन्वते । नॄन् ।
वृषा । वां । मेघः । वृषणा । पीपाय । गोः । न । सेके । मनुषः । दशस्यन् ॥ ८ ॥

हे अश्विनौ वां युवयो रुशतो दीप्तस्य वप्ससो रूपस्यैव वपुषो वा ख्यापयित्री गीः स्तुतिवाक् त्रिबर्हिषि त्रिधान्वास्तीर्णबर्हिष्के सदसि यागसदने नॄन् कर्मनेतॄनस्मान्पिन्वते । आप्याययति आप्याययतु वोचितप्रदानादिना । केन प्रकारेण उच्यते । हे वृषणा वर्षितारौ कामानां वां युवयोः स्वभूतो मेघः सेक्ता जलदः प्रदानविशेषो वा वृषा वर्षकः सन् मनुषो मनुष्यान् प्रति दशस्यन् प्रयच्छन् पीपाय । आप्याययति । आप्यायने दृष्टांतः । गोर्न सेके । उदकसेक

इव। शांतनात्सेक उदकस्येव। तद्यथाप्याययति तद्वदित्यर्थः। यद्वा नेति संप्रत्यर्थे। गोरुदकस्य सेके निमित्तभूते सति पीपायेति संबंधः ॥

॥ अथ नवमी ॥

युवां पूषेवाश्विना पुरंधिरग्निमुषां न जरते हविष्मान्।
हुवे यद्वां वरिवस्या गृणानो विद्यामेषं वृजनं जीरदानुं ॥ ९॥

युवां। पूषाऽइव। अश्विना। पुरंऽधिः। अग्निं। उषां। न। जरते। हविष्मान्।
हुवे। यत्। वां। वरिवस्या। गृणानः। विद्याम। इषं। वृजनं। जीरऽदानुं ॥ ९॥

हे अश्विनौ युवां पुरंधिर्बहुप्रज्ञः पूषेव पोषक इव हविष्मान् हविर्युक्तो जरते। स्तौति। यद्वा पुरंधिर्बहूनां धारयित्री पूषेव पृथिवीव ॥ द्वितीयार्थे प्रथमा ॥ तां यथा स्तौति तद्वत्। किमिव। अग्निमुषां न। अग्निमुषसं च यथा तथा युवामपि। प्रातरनुवाकाश्विनशस्त्रयोराश्विनक्रतुवदाग्नेयोषस्ययोरपि सद्भावादिति भावः। कदेत्याह। यत् यदा वरिवस्या वरिवस्यया परिचर्यया युक्तो गृणानः स्तोता स्तौति तदा यजमानोऽपि जरत इत्यर्थः। विद्यामेत्यादि गतं ॥

॥ इति द्वितीयस्य चतुर्थे षड्विंशो वर्गः ॥

अभूदिदमित्यष्टर्चं तृतीयं सूक्तमाश्विनं जागतं। अवविद्धमिति षष्ठी तद्वां नरा नासत्यावित्यष्टमी चोभे त्रिष्टुभौ। अभूदिदमष्टौ षष्ठ्यंत्ये त्रिष्टुभावित्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोर्जागते छंदस्यस्य विनियोगः। तथा च सूचितं। अभूदिदं यो वां परिज्मेति त्रीणि। आ॰ ४. १५.। इति ॥

॥ तत्र प्रथमा ॥

अभूदिदं वयुनमो षु भूषता रथो वृषण्वान्मदता मनीषिणः।
धियंजिन्वा धिष्ण्या विश्पलावसू दिवो नपाता सुकृते शुचिव्रता ॥ १॥

अभूत्। इदं। वयुनं। ओ इति। सु। भूषत। रथः। वृषण्ऽवान्। मदत। मनीषिणः।
धियंऽजिन्वा। धिष्ण्या। विश्पलावसू इति। दिवः। नपाता। सुऽकृते।
शुचिऽव्रता ॥ १॥

हे मनीषिणो मनस्विनो मेधाविन ऋत्विजः। अस्माकमिदं वयुनं प्रज्ञानमभूत्। उत्पन्नं। कीदृशं तदिति उच्यते। वृषण्वान् अभिमतवर्षणवान्

रथोऽश्विनोः संबंधी गमनसाधनो रथ आगत इति शेषः। तत्स्थावश्विनावो षु भूषत। ओ इति निपातद्वयसमुदायात्मक एको निपातः। सुष्ठ्वाभूषत। अभिमुखा भवत स्तोतुं। तादृशौ महानुभावावश्विनौ मदत॥ अंतर्भावितण्यर्थोऽयं॥ मदयत संभावयत। अश्विनौ विशेष्येते। सुकृते सुष्ठु कृतवते मह्यं धियंजिन्वा कर्मणो बुद्धेर्वा प्रीणयितारौ धिष्ण्या धिषणार्हौ स्तुत्यौ विश्पलावसू विशां प्रजानामस्माकं पालयितृधनौ। विश्पलाख्यायाश्छिन्नजंघाया हिरण्मयजंघाप्रदानेन तथाभूतौ। सद्यो जंघामायसीं विश्पलाया इत्यादिनिगमः। दिव आदित्यस्य नपाता नप्तारौ नपातयितारौ वा। शुचिव्रता दीप्तकर्माणौ। ईदृशावश्विनौ मदत॥

॥ अथ द्वितीया ॥

इंद्रतमा हि धिष्ण्या मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा।
पूर्णं रथं वहेथे मध्व आचितं तेन दाश्वांसमुप याथो अश्विना॥२॥
इंद्रऽतमा। हि। धिष्ण्या। मरुत्ऽतमा। दस्रा। दंसिष्ठा। रथ्या। रथिऽतमा।
पूर्णं। रथं। वहेथे इति। मध्वः। आऽचितं। तेन। दाश्वांसं। उप। याथः। अश्विना॥२॥

हे अश्विनौ युवामिंद्रतमा हि। ईश्वरतमौ खलु। एवं प्रतिविशेषणं हिः संबंध्यः। तथा धिष्ण्या स्तुत्यार्हौ मरुत्तमा मरुद्वद्वेगगामिनौ मितरागिणौ मितराविणौ वा। दस्रा उपक्षपयितारौ शत्रूणां। दंसिष्ठा अतिशयकर्माणौ। रथ्या रथार्हौ रथवंतौ। यथा रथिनो नेतारः। तेषां श्रेष्ठौ। रथीरध्वराणामिति नेतृपरतया व्याख्यातत्वात्। ईदृशौ युवां मध्वो मधुसदृशस्योदकस्यामृतस्य वा पूर्णं पूरितमाचितं सर्वतः संनद्धं रथं वहेथे। नयथः। तेनोक्तगुणविशिष्टेन रथेन हे अश्विना अश्विनौ उक्तगुणविशिष्टौ संतावुपयाथः। यज्ञमभिप्राप्नुथः॥

॥ अथ तृतीया ॥

किमत्र दस्रा कृणुथः किमासाथे जनो यः कश्चिदहविर्महीयते।
अति क्रमिष्टं जुरतं पणेरसुं ज्योतिर्विप्राय कृणुतं वचस्यवे॥३॥
किं। अत्र। दस्रा। कृणुथः। किं। आसाथे इति। जनः। यः। कः। चित्। अहविः। महीयते।
अति। क्रमिष्टं। जुरतं। पणेः। असुं। ज्योतिः। विप्राय। कृणुतं। वचस्यवे॥३॥

हे दस्रा उपक्षपयितारौ युवामत्रास्मिन्मनुष्ये किं कृणुथः । कुरुथः । हविषोऽभावादिति भावः । तत्रैव किमासाथे । किं तिष्ठथः । अत्रेत्युक्तं कुत्रेत्याह । यः कश्चिज्जनो जन्मवान् अहवियंज्ञार्थहवीरहितो महीयते पूज्यते । स्वयं न युष्मान् पूजयति । तं जनमतिक्रमिष्टं । पराभूय तिष्ठतं । न केवलमतिक्रममात्रं किंतु पणेर्वणिग्भूतस्य लुब्धकस्यायष्टुस्तस्यासुं प्राणं जुरतं । अहिंसिष्टं । अनीनशतं । विप्राय मेधाविने वचस्यवे वचसः स्तोत्ररूपस्य युवाभ्यामिच्छते मह्यं ज्योतिः कृणुतं । युष्मद्यजनविषयज्ञानं कुरुतं ॥

॥ अथ चतुर्थी ॥

जंभयतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यश्विना ।
वाचंवाचं जरितू रत्निनीं कृतमुभा शंसं नासत्यावतं मम ॥ ४ ॥

जंभयतं । अभितः । रायतः । शुनः । हतं । मृधः । विदथुः । तानि । अश्विना ।
वाचंऽवाचं । जरितुः । रत्निनीं । कृतं । उभा । शंसं । नासत्या । अवतं । मम ॥ ४ ॥

हे अश्विनौ रायतो निंदितं शब्दयतोऽस्मान् हंतुमागच्छतो वा शुनः श्वसदृशानभितो जंभयतं । नाशयतं । तथा मृधस्तेषां संग्रामान् संग्रामं कुर्वतो वा हतं । मारयतं । तानि हननोपायान्विदथुः । जानीथः । किंच जरितुर्युष्मान् स्तोतुर्वाचं वाचं तां तां स्तुतिलक्षणां वाचं रत्निनीं कृतं । सर्वामपि स्तुतिं रमणीयफलवतीं कुरुतं । हे नासत्या सत्यभूतौ युवामुभा उभौ मम मदीयां शंसं स्तुतिमवतं । रक्षतं ॥

॥ अथ पंचमी ॥

युवमेतं चक्रथुः सिंधुषु प्लवमात्मन्वंतं पक्षिणं तौग्र्याय कं ।
येन देवत्रा मनसा निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः ॥ ५ ॥

युवं । एतं । चक्रथुः । सिंधुषु । प्लवं । आत्मन्ऽवंतं । पक्षिणं । तौग्र्याय । कं ।
येन । देवऽत्रा । मनसा । निःऽऊहथुः । सुऽपप्तनि । पेतथुः । क्षोदसः । महः ॥ ५ ॥

हे अश्विनौ युवं युवां सिंधुषु समुद्रोदकेष्वेतं प्लवं प्रसिद्धं प्लुतिसाधनं प्लवं नावमात्मन्वंतं दार्ढ्यवंतं पक्षिणं पक्षवद्गतिसाधनरथवंतं तौग्र्याय तुग्रनाम्नो राज्ञः पुत्राय भुज्युनाम्ने राज्ञे कं सुखकरं चक्रथुः । तौग्र्यो भुज्यू राजा समुद्रवर्ती

ससेनः परचक्रं प्रमथितुं प्रस्थितः। तं प्रतीपबलान्यागत्यापातयन्। स च प्रसाद-फलकराश्विनौ स्तुत्वा स्वात्मानं ररक्षेत्ययमितिहासो बहुधा पूर्वं प्रपंचितः। यद्वा कमिति पूरणः । तस्य जलसंचारिरथस्य सहायभूतान्बहून् रथादीनकुरुतमि-त्यर्थः। अयमर्थस्तु तमूहथुर्नौभिश्चतस्रो नावस्त्रिभी रथैरित्यादिमंत्रांतरेषु प्रसिद्धः। येन युष्मद्दत्तेन प्लवेन देवत्रा देवेषु मध्ये मनसानुग्रहयुक्तया बुद्ध्या। येन मन-सेति वा योज्यं । निरूहथुः । निर्गमनं कुरुथः । तथा सुपप्तनि शोभनपतनं यथा भवति सुपतनौ वा युवां महो महतः क्षोदसः। उदकनामैतत् । उद-कात्पेतथुः । पतथ उत्तरीतुं ॥

॥ इति द्वितीयस्य चतुर्थे सप्तविंशो वर्गः ॥

॥ अथ षष्ठी ॥

अवविद्धं तौग्र्यमप्स्व१ंतरनारंभणे तमसि प्रविद्धं ।
चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयंति ॥ ६ ॥

अवऽविद्धं। तौग्र्यं। अप्ऽसु। अंतः। अनारंभणे। तमसि। प्रऽविद्धं।
चतस्रः। नावः। जठलस्य। जुष्टाः। उत्। अश्विऽभ्यां। इषिताः। पारयंति ॥ ६ ॥

अप्स्वंतर्मध्येऽवविद्धमवस्ताच्छत्रुभिः पातितमनारंभणेऽनालंबन आलंब-नरहिते तमसि। तमोवत्तमः। दृष्टिश्वासादिप्रतिबंधके जलमध्ये प्रविद्धं प्रकर्षेण पीडितं तौग्र्यं भुज्युं जठलस्य जठरवदुदकधारकस्य मध्ये जुष्टाः सेविताः। यद्वा कर्मणि षष्ठी। जठरं प्राप्ता अंतर्जलं प्रविष्टाः। अश्विभ्यामिषिताश्चतस्रो नाव उत्पारयंति। उत्तारयंति प्रापयंति ॥

॥ अथ सप्तमी ॥

कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत्।
पर्णा मृगस्य पतरोरिवारभ उदश्विना ऊहथुः श्रोमताय कं ॥ ७ ॥

कः। स्वित्। वृक्षः। निःऽस्थितः। मध्ये। अर्णसः। यं। तौग्र्यः। नाधितः। परिऽअसस्वजत्।
पर्णा। मृगस्य। पतरोःऽइव। आऽरभे। उत्। अश्विना। ऊहथुः। श्रोमताय। कं ॥ ७ ॥

कः स्वित् कश्चिदनुग्राहको वृक्षो वृक्षविकारो रथः। विकारे प्रकृतिशब्दः। यद्वा संस्तवाभिप्रायमेतत् स्तोत्राख्यो वृक्ष इत्यर्थः। कीदृशो रथः। निष्ठितः।

निश्चलं वर्तमानः। कुत्रेति उच्यते। अर्णस उदकस्य मध्ये। यं वृक्षं तौग्र्यस्तुग्र्यपुत्रो भुज्युर्नाधितो याचमानः पर्यषस्वजत्। परिष्वक्तमकरोत्। आलंबने दृष्टांतः। पतत्रोः पतनशीलस्य मृगस्य मार्जयितुः शोधयितुर्हिंसादेरारभ आलंबनाय पर्णानीव। तानि यथालंबनाय प्रभवंति तद्वत्। हे अश्विनौ श्रोमताय कीर्तिमत्त्वायोदूहथुः। ऊर्ध्वं प्रापयथः। स्तुतिपक्षे स्तोत्राख्यं वृक्षमाश्रितवंतं तमूहथुरित्यर्थः॥

॥ अथाष्टमी ॥

तद्वां नरा नासत्यावनु ष्याद्यद्वां मानास उचथमवोचन्।
अस्मादद्य सदसः सोम्यादा विद्यामेषं वृजनं जीरदानुं॥ ८॥

तत्। वां। नरा। नासत्यौ। अनु। स्यात्। यत्। वां। मानासः। उचथं। अवोचन्।
अस्मात्। अद्य। सदसः। सोम्यात्। आ। विद्याम। इषं। वृजनं। जीरऽदानुं॥ ८॥

हे नरा नेतारौ कर्मणो नराकारौ वा हे नासत्या असत्यरहितौ सत्यफलौ वा वां युवां तत् तादृशं स्तोत्रमनुस्यात्। अनुकूलं भवतु। अनुभवतु वा वां। तदित्युक्तं यदित्याह। वां प्रति मानासः पूजावंतोऽस्मदीया होत्रादयो यदुचथं स्तोत्रमवोचन्। अकुर्वन्। तद्वामनुष्यात्। हे अश्विनौ अद्यास्मिन्प्रधानयागदिने। अस्मादस्माभिः क्रियमाणात्सदसः संबंधिनः सोम्यात् सोमयागसंपादकात्। आ इत्यपर्थे। अस्माभिर्यजमानैरद्य क्रियमाणादपि स्तोत्रात् प्रीणयतमिति। विद्यामेति गतं॥

॥ इति द्वितीयस्य चतुर्थेऽष्टाविंशो वर्गः॥

तं युंजाथामिति षडृचं चतुर्थं सूक्तं त्रैष्टुभमागस्त्यमाश्विनं॥

॥ तत्र प्रथमा ॥

तं युंजाथां मनसो यो जवीयान् त्रिवंधुरो वृषणा यस्त्रिचक्रः।
येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः॥ १॥

तं। युंजाथां। मनसः। यः। जवीयान्। त्रिऽवंधुरः। वृषणा। यः। त्रिऽचक्रः।
येन। उपऽयाथः। सुऽकृतः। दुरोणं। त्रिऽधातुना। पतथः। विः। न। पर्णैः॥ १॥

हे वृषणा वर्षकौ कामानां युवां तं वक्ष्यमाणगुणविशिष्टं रथं युंजाथां।

योजयतं। तमित्युक्तं कमित्याह। यो रथस्त्रिवंधुरः त्रिप्रकारसारथिस्थानः। वंधुरं रथिनः स्थानमित्याहुः। आयाह्यर्वाङुप वंधुरेष्ठा इत्यादिमंत्रांतरात्। यश्च त्रिचक्रः चक्रत्रितयोपेतः। पुनः स एव विशेष्यते। येन रथेनोपयाथः। उपगच्छथः। किं। सुकृतः शोभनसोमाख्यकर्मवतो यजमानस्य दुरोणं। गृहनामैतत्। यागगृहं। येनेत्युक्तं केनेत्याह। त्रिधातुना त्रिप्रकारस्थानोपेतेन सुवर्णरजतताम्रधातुत्रयोपेतेन वा रथेन। गमने दृष्टांतः। विर्न पर्णैः। पक्षी पक्षैर्यथा शीघ्रमप्रयत्नेन गच्छति तद्वदुक्तलक्षणेन रथेन पतथः। गच्छथः॥

॥ अथ द्वितीया ॥

सुवृद्रथो वर्तते यन्नभि क्षां यत्तिष्ठथः क्रतुमंतानु पृक्षे।
वपुर्वपुष्या सचतामियं गीर्दिवो दुहित्रोषसा सचेथे ॥ २ ॥

सुऽवृत्। रथः। वर्तते। यन्। अभि। क्षां। यत्। तिष्ठथः। क्रतुऽमंता। अनु। पृक्षे। वपुः। वपुष्या। सचतां। इयं। गीः। दिवः। दुहित्रा। उषसा। सचेथे इति ॥ २ ॥

हे अश्विनौ युवयो रथः सुवृत् शोभनवर्तनः। शोभनचक्रपरिभ्रमणो यन् गच्छन् क्षामभि वर्तते। देवयजनभूमिं प्रति गच्छति। यत् यं रथं क्रतुमंता संकल्पवंतौ कर्मवंतौ वा पृक्षे॥ अन्ननामैतत्॥ हविषि निमित्तभूते सति॥ अनु अधीत्यर्थे॥ अधितिष्ठथः। आश्रयथः। तादृशो रथो देवयजनं प्रत्यागत इत्यर्थः। अनंतरं वपुष्या युष्मद्वपुषि हिता शरीरवर्धनीयं गीरिदानींक्रियमाणप्रकारा स्तुतिरूपा वाक् वपुः सचतां। युवां च दिवो द्युलोकस्यादित्यस्य वा दुहित्रा दुहितृस्थानीययोषसोषोदेवतया सचेथे। यज्ञ संगच्छेथे। उषस्याश्विनयोः समानकालत्वादिति भावः॥

॥ अथ तृतीया ॥

आ तिष्ठतं सुवृतं यो रथो वामनु व्रतानि वर्तते हविष्मान्।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥ ३ ॥

आ। तिष्ठतं। सुऽवृतं। यः। रथः। वां। अनु। व्रतानि। वर्तते। हविष्मान्। येन। नरा। नासत्या। इषयध्यै। वर्तिः। याथः। तनयाय। त्मने। च ॥ ३ ॥

हे अश्विनौ वां युवां सुवृतं शोभनवर्तनं रथमातिष्ठतं। आश्रयतं। यो रथो

हविष्मान्॥ षष्ठ्यर्थे प्रथमा॥ हविष्मतो यजमानस्य व्रतानि कर्माण्यनु वर्तेते। यद्वा यजमानाय दत्तहविषा तद्वान्। येन च रथेन हे नरा नेतारौ वा हे नासत्या असत्यरहितौ युवामिषयध्यै। यज्ञं प्राप्तुमिच्छतमिति शेषः। तेन रथेन वर्तिः। गृहनामैतत्। यजमानस्य यज्ञगृहं तनयाय पुत्रलाभाय त्मन आत्मन आत्महिताय च याथः॥

॥ अथ चतुर्थी ॥

मा वां वृको मा वृकीरा दधर्षीन्मा परि वर्क्तमुत माति धक्तं।
अयं वां भागो निहित इयं गीर्दस्राविमे वां निधयो मधूनां॥४॥

मा। वां। वृकः। मा। वृकीः। आ। दधर्षीत्। मा। परि। वर्क्तं। उत। मा। अति। धक्तं।
अयं। वां। भागः। निऽहितः। इयं। गीः। दस्रौ। इमे। वां। निऽधयः। मधूनां॥४॥

हे दस्रौ शत्रूणामुपक्षपयितारावश्विनौ वां युवयोरनुग्रहादिति शेषः। वृको हिंसकोऽरण्यश्वादिर्मादधर्षीन्मां। तथा वृकीर्वृक्यो हिंसका अन्या अपि मादधर्षीत्॥ वचनव्यत्ययः॥ धर्षणं मा कार्षुः। युवामेव वा मादधर्षीदिति योज्यं। तथा युवां मा परिवर्क्तं। परितो मा वर्जयतं मां। उत अपि च माति धक्तं। अस्मानतिक्रम्यान्यस्मै मा दत्तं। किमर्थमेवमिति उच्यते। वां युवयोरर्थाय भागो भजनीयो हविरंशो निहितः। तथेयं च गीः स्तुतिरूपा वागपि निहितेति शेषः। हे दस्रावश्विनौ वां युवाभ्यामिम इमानि मधूनां सोमरसानां निधयो निधानानि स्थापितानि॥

॥ अथ पंचमी ॥

युवां गोतमः पुरुमीळ्हो अत्रिर्दस्रा हवतेऽवसे हविष्मान्।
दिशं न दिष्टामृजूयेव यंता मे हवं नासत्योप यातं॥५॥

युवां। गोतमः। पुरुऽमीळ्हः। अत्रिः। दस्रा। हवते। अवसे। हविष्मान्।
दिशं। न। दिष्टां। ऋजुयाऽइव। यंता। आ। मे। हवं। नासत्या। उप। यातं॥५॥

हे दस्रा दस्रावश्विनौ युवां गोतमश्च पुरुमीळ्हश्चात्रिश्च महर्षयश्च एतेष्वेकैको हविष्मान् सन् अवसे युष्मत्तर्पणाय वा हवते। आह्वयति। एवमहमप्याह्वयामि। फलसाधनाह्वाने दृष्टांतः। यंतोपगंतोपगंतुकाम ऋजूयेव॥ द्विती-

याया आकारः ॥ ऋजुगामिनं मार्गज्ञं दिष्टां दिशं न गंतव्यामभिमतां दिशं प्रति यथा तथा वामपि । यथाध्वगामी स्वगंतव्यस्य शीघ्रगमनाय मार्गज्ञमृजुगामिनमाह्वयति तद्वत् । यद्वा ऋजूयेव ॥ इवशब्द एवार्थे ॥ गंता ऋजुनैव मार्गेणेष्टां दिशमिव तथा युष्मत्प्रीणनेन मार्गेण स्वाभिमतं फलं प्राप्नोति । हे नासत्यावश्विनौ मे मम हवमाह्वानमालक्ष्योप यातं । उपगच्छतं ॥

॥ अथ षष्ठी ॥

अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुं ॥ ६ ॥

अतारिष्म । तमसः । पारं । अस्य । प्रति । वां । स्तोमः । अश्विनौ । अधायि ।
आ । इह । यातं । पथिऽभिः । देवऽयानैः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ६ ॥

हे अश्विनौ युवयोः प्रसादादस्य तमसस्तमनहेतोः श्रेयःप्रतिबंधरूपस्य दुःखस्य पारं पर्यंतभूमिमतारिष्म । उत्तीर्णाः स्मः । हे अश्विनौ वां प्रति स्तोमः स्तोत्रमधायि । अकारीत्यर्थः । युवां देवयानैर्देवगंतव्यैर्मार्गैरिहास्मद्यज्ञ आयातं । आगच्छतं । शिष्टो व्याख्यातः ॥

॥ इति द्वितीयस्य चतुर्थ एकोनत्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके चतुर्थोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
द्वितीयाष्टकमध्यस्थश्चतुर्थोऽध्याय आदरात् ।
व्याख्यातः सायणाचार्येण पंचमो व्याकरिष्यते ॥

तत्र ता वामितीदं प्रथममंडलस्य चतुर्विंशेऽनुवाके पंचमं सूक्तं। पूर्वसूक्ते षडित्युक्तत्वात् सूक्तसंख्यानुवर्तत इति परिभाषितत्वात् षडृचं। ऋषिश्चान्यस्मादिति परिभाषयागस्त्यं। तथाश्विनं वेत्युक्तत्वात्तुह्यादिपरिभाषयेदमप्याश्विनं। अनादेश-परिभाषया त्रैष्टुभं। ता वामित्यनुक्रांतं। युवो रजांसीत्यादीनां पंच सूक्तानां तृतीयवर्जितानां प्रातरनुवाकाश्विनशस्त्रयोर्विनियोग उक्तः। तत्रेदं पंचमं ॥

॥ तत्र प्रथमा ॥

ता वा॒मद्य ताव॑प॒रं हु॑वेमो॒च्छंत्या॑मु॒षसि॒ वह्नि॑रु॒क्थैः ।
नास॑त्या॒ कुह॑ चि॒त्संता॑व॒र्यो दि॒वो नपा॑ता सु॒दास्त॑राय ॥ १ ॥

ता। वा॒म्। अ॒द्य। तौ। अ॒प॒रम्। हु॒वे॒म॒। उ॒च्छंत्या॑म्। उ॒षसि॑। वह्नि॑ः। उ॒क्थैः।
नास॑त्या। कुह॑। चि॒त्। संतौ॑। अ॒र्यः। दि॒वः। नपा॑ता। सु॒दाःऽत॑राय ॥ १ ॥

ता तौ रक्षकत्वेन प्रसिद्धौ वां युवामद्यास्मिन्यागदिने हुवेम। आह्वयाम इत्याशीः। तथापरमपरस्मिन्नपि दिने तौ युवां हुवेम। अपरमित्येतदपरस्मिन्नि-त्यर्थे समभिव्याहारात् अद्या च नो मृळयतापरं चेत्यादिमंत्रांतरे तथा दर्शनाच्च। अपरयागं प्रत्यपीति वा। कस्मिन्काले। उषस्युषोदेवतायामुच्छंत्यां तमो वि-वासयंत्यां सत्यां। उषःकाले हि प्रातरनुवाकाश्विनशस्त्रे प्रयुज्येते। उक्ते काले हे नासत्या असत्यरहितौ दिवो नपाता द्युलोकस्य नपातयितारौ नभ्रस्थानीयौ वा कुह चित्संतौ कुत्र चिद्देशे वर्तमानौ युवां वह्निः स्तुतेर्वोढार्य ईरयिता स्तुते-रीश्वरो वा ईदृशोऽहं होता सुदास्तरायात्यर्थं शोभनहविर्दात्रे यजमानाय तदर्थं तौ युवामुक्थैः शस्त्रैर्हुवेमेति संबंधः। अत्राख्यातं पदमेकवचनतया नेतव्यं। वह्नि-रर्यशब्दौ वा बहुवचनत्वेन नेतव्यौ। अथवा वाक्यद्वयं। यस्माद्वह्निरर्यो होतोक्त-गुणकौ युवां शंसति तस्माद्वयं यजमानास्तौ युवामाह्वयाम इति ॥

॥ अथ द्वितीया ॥

अस्मे ऊ षु वृषणा मादयेथामुत्पणीँर्हतमूर्म्या मदंता ।

श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः ॥ २ ॥

अस्मे इति । ऊं इति । सु । वृषणा । मादयेथां । उत् । पणीन् । हतं । ऊर्म्या । मदंता ।

श्रुतं । मे । अच्छोक्तिऽभिः । मतीनां । एष्टा । नरा । निऽचेतारा । च । कर्णैः ॥ २ ॥

हे वृषणा कामानां वर्षकावश्विनौ युवामस्मे उ अस्मास्वेव सु मादयेथां । सुष्ठु तृप्यतं । अस्मभ्यं तर्पयतमभिमतं । तथा पणीन् वणिजो लुब्धकानयष्टॄन् उत् उन्मूल्य हतं । नाशयतं । कीदृशौ युवां । ऊर्म्या । रात्रिनामैतत् । रात्रौ मदंता माद्यंतौ । यद्वा ऊर्मिरिति सोमनाम । ऊर्मिर्यस्ते पवित्र आ इत्यादिषु तथा प्रयोगात् । अस्मदीयेन सोमेन मदंतौ । तादृशौ युवां मे ममाच्छोक्तिभिराभिमुख्यकरैर्निर्मलवेदवाक्यैरंचिता मतीनां ॥ कर्मणि षष्ठी ॥ मननसाधनाः स्तुतीः कर्णैराकर्णनसाधनैः श्रोत्रैः श्रुतं । शृणुतं । हे नरा नेतारौ युवां खल्वेष्टा अन्वेष्टारावस्मत्स्तुतीनां । तथा निचेतारा लब्धानां तासां संचयकर्तारौ । निरित्येष समित्येतस्य स्थाने । यस्मादेवंविधौ तस्माच्छृणुतमिति ॥

॥ अथ तृतीया ॥

श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः ।

वच्यंते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः ॥ ३ ॥

श्रिये । पूषन् । इषुकृताऽइव । देवा । नासत्या । वहतुं । सूर्यायाः ।

वच्यंते । वां । ककुहाः । अप्ऽसु । जाताः । युगा । जूर्णाऽइव । वरुणस्य । भूरेः ॥ ३ ॥

सविता सूर्यो दुहितरं सूर्याख्यां प्रदातुमना देवानाहूय सामर्थ्यसमीक्षणायाजिं परिकल्प्य य इमं जेष्यति स एषां कन्यकामृक्सहस्रकॢप्तं स्तोत्रं च लभत इत्यकल्पयत् । तमग्निः प्रथममजयत् तमन्वश्विनावपि जित्वाग्निं प्रधृष्य ऋक्सहस्रं कन्यकां चालभेतां । तत इंद्र उषाश्चाजयतां । तौ च तैरग्न्यादिभिः प्रार्थितौ स्वशस्त्रस्य कंचित्कंचिद्भागं तेभ्यः परिकल्प्य सूर्यां स्वरथेऽधारयतामिति । अयमितिहासो ब्राह्मणे प्रजापतिर्वै सोमाय राज्ञ इत्यत्राम्नातोऽस्माभिः प्रथमाष्टमे । १. ८. २०. ५. । आ वां पतित्वं सख्यायेत्यत्र प्रपंचितः । तत्राह । हे पूषन् पोषक

सूर्ये। एतच्चंद्रस्याप्युपलक्षणं सूर्याचंद्रमसोरेवाश्वित्वात्। सूर्याचंद्रमसावित्येक इति यास्केनोक्तत्वात्। अतः पूषन्नित्युक्ते हे पोषकावश्विनावित्युक्तं भवति। हे पोषकौ हे नासत्या असत्यरहितौ देवा देवौ युवां श्रिये श्रेयसे शस्त्रस्य कन्यायाश्च लाभायेत्यर्थः। इषुकृतेव। इवशब्द एवार्थे। आजिधावनायेषुवच्छीघ्रमृजुगामिनौ कृतावेव संतौ सूर्याया एतन्नामिकायाः सवितुः पुत्र्यः ॥ कर्मणि षष्ठी ॥ सूर्यां वहतुं रथे धारयितुमाजिमुदजयतमित्यर्थः। यस्मादेवं तस्माद्प्सु जाताः कर्मसु संपादिताः ककुहाः शस्त्ररूपाः स्तुतयो भूरेरविच्छिन्नप्रवाहस्य वरुणस्य फलप्रतिबंधकपापनिवारकस्य यागस्य सिद्ध्यर्थं तत्संबंधिन्यो वां प्रति वच्यंते होत्रादिभिः। युवामेव शस्त्रगतमंत्रैर्यागकाले च स्तुवंतीत्यर्थः। युगा जूर्णेव। जीर्णानि युगानीव। इवशब्दः संप्रत्यर्थः। पुरातना यागकाला यथा तद्वदद्यतना अपीत्यर्थः। पूर्वकाले यथा युवामेव स्तुवंति तद्वदिदानीमपीति तात्पर्यं ॥

॥ अथ चतुर्थी ॥

अस्मे सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः।
अनु यद्वां श्रवस्या सुदानू सुवीर्याय चर्षणयो मदंति ॥४॥

अस्मे इति। सा। वां। माध्वी इति। रातिः। अस्तु। स्तोमं। हिनोतं। मान्यस्य। कारोः।
अनु। यत्। वां। श्रवस्या। सुदानू इति सुऽदानू। सुऽवीर्याय। चर्षणयः। मदंति ॥४॥

हे माध्वी मधुपूर्णपात्रयुक्तावश्विनौ वां युवयोः संबंधिनी सा प्रसिद्धा रातिर्दानमस्मे अस्माकमस्तु। भवतु। तदर्थं मान्यस्य मननीयस्य कारोः स्तोतुरगस्त्यस्य स्तोमं स्तुतिं हिनोतं। प्रीणयतं। हे सुदानू शोभनफलदानौ वां युवां श्रवस्या कीर्तेरन्नस्य वेच्छया यत् यस्मात्सुवीर्याय यजमानाय शोभनबलाय वा चर्षणयो मनुष्या ऋत्विग्रूपा अनुमदंति। अनुक्रमेण माद्यंति युवाभ्यां सह स्वयं वा ॥

॥ अथ पंचमी ॥

एष वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति।
यातं वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदंता ॥५॥

एषः। वां। स्तोमः। अश्विनौ। अकारि। मानेभिः। मघऽवाना। सुऽवृक्ति।
यातं। वर्तिः। तनयाय। त्मने। च। अगस्त्ये। नासत्या। मदंता ॥५॥

हे अश्विनौ हे मघवाना हविर्लक्षणान्नवंतौ वां युवाभ्यामेषः स्तोमः स्तोत्रं सुवृक्ति सुष्ठु पापवर्जनं यथा भवति तथा। यद्वा सुसमाप्तकारि। कृतः। कीदृशोऽयं। मानेभिर्मानैर्हविःप्रदानरूपैः सहितः। हे नासत्या असत्यरहितौ युवामगस्त्य एतन्नाम्नि महर्षौ मयि मदंता माद्यंतौ संतौ वर्तिर्गृहं यज्ञसंबंधि यातं। प्राप्नुतं। किमर्थं। तनयाय। पुत्रादिलाभाय। त्मने। आत्मने च हिताय॥

॥ अथ षष्ठी ॥

अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि।

एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुं॥६॥

अतारिष्म। तमसः। पारं। अस्य। प्रति। वां। स्तोमः। अश्विनौ। अधायि।

आ। इह। यातं। पथिऽभिः। देवऽयानैः। विद्याम। इषं। वृजनं। जीरऽदानुं॥६॥

अतारिष्मेति षष्ठी व्याख्याता॥

॥ इति द्वितीयस्य पंचमे प्रथमो वर्गः॥

कतरा पूर्वेत्येकादशर्चं षष्ठं सूक्तमागस्त्यं त्रैष्टुभं। कतरैकादश द्यावापृथिवीयमित्यनुक्रांतं। आभिप्लविके षष्ठेऽहनि वैश्वदेवशस्त्रे द्यावापृथिव्यनिविद्धानमिदं। तृतीयस्येति खंडे सूचितं। कतरा पूर्वोषासानक्तेति वैश्वदेवं। आ॰ ७.७.। इति॥ महाव्रतेऽपि वैश्वदेवशस्त्र इदमेव द्यावापृथिव्यनिविद्धानं। उक्तमादाभिप्लविकात्तृतीयसवनमित्यतिदेशात्॥

॥ तत्र प्रथमा॥

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद।

विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव॥१॥

कतरा। पूर्वा। कतरा। अपरा। अयोः। कथा। जाते इति। कवयः। कः। वि। वेद।

विश्वं। त्मना। बिभृतः। यत्। ह। नाम। वि। वर्तेते इति। अहनी इति।

चक्रियाऽइव॥१॥

अयोरेनयोर्द्यावापृथिव्योर्मध्ये कतरा पूर्वा। पूर्वमुत्पन्ना। कतरा वापरा। पश्चाद्भाविनी। एवं पौर्वापर्यप्रश्नः। उभयोरविनाभावेन सहैव वर्तमानत्वादिति

भावः। तथा कथा केन हेतुना जाते। किमनयोरुत्पादनमित्यर्थः। हे कवयः क्रांतदर्शिनोऽतींद्रियज्ञा यूयं वदत को वि वेद। पौर्वापर्यं कारणं च विशेषेण विविच्य वा जानाति। न केनापि ज्ञायत इत्यर्थः। अज्ञाने कारणमाह। यद्ध यस्मात्खलु हेतोर्नाम प्रसिद्धं विश्वं कृत्स्नमपि जगदविशेषेण त्मना आत्मनैव अन्यनैरपेक्ष्येणैव बिभृतः। धारयतः। यद्वा यद्ध नाम यत्किंचित्पदार्थजातमस्ति विश्वं तत्सर्वमात्मना बिभृतः। अनेन यत्कारणं ब्रूमस्तदयाभ्यामेव भ्रियत इति कारणाभावः प्रतिपादितः। उत्तरेण पौर्वापर्याभाव उच्यते। अहनी एते द्यावापृथिव्यौ चक्रियेव चक्रयुक्ते इव विवर्तेते। अत्र कतरा पूर्वा कतरापरैनयोरित्यादि निरुक्तं द्रष्टव्यं। नि॰ ३. २२.॥

॥ अथ द्वितीया ॥

भूरिं द्वे अचरंती चरंतं पद्वंतं गर्भमपदी दधाते।
नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात्॥२॥
भूरिं। द्वे इति। अचरंती इति। चरंतं। पत्ऽवंतं। गर्भं। अपदी इति। दधाते इति।
नित्यं। न। सूनुं। पित्रोः। उपऽस्थे। द्यावा। रक्षतं। पृथिवी इति। नः। अभ्वात्॥२॥

अचरंती अविचले द्वे एवैते द्यावापृथिव्यौ भूरिं बहुतरं चरंतं पद्वंतं पादयुक्तं गर्भं गर्भवदाश्रितं कृत्स्नं प्राणिजातमपदी स्वयं पादरहिते दधाते। धारयतः। अनयोर्मध्ये खलु सर्वं जगत्क्षेमेण वर्तते। धारणे दृष्टांतः। पित्रोर्मातापित्रोरुपस्थ उत्संगे वर्तमानं नित्यं ध्रुवमात्मजं सूनुं न। पुत्रमिव। यथा स्नेहेन वर्धयंतौ धारयंतौ मातापितरौ तद्वत्। अथ प्रत्यक्षेणाह। हे द्यावापृथिवी द्यावापृथिव्यौ। इतरेतरापेक्षया द्वित्वमुभयोः। नोऽस्मानभ्वात् महतो भयहेतोः पापाद्रक्षतं। पालयतं। यद्वा अभ्वात् अभ्वं महत् अत्यर्थमित्यर्थः। अभ्वेति महन्नाम। द्वंद्वे कृतद्यावादेशस्य द्यावापृथिवीशब्दस्य मध्ये रक्षितमिति पदप्रयोगश्छांदसः। आमंत्रितस्याविद्यमानत्वेन निघाताभावः॥

॥ अथ तृतीया ॥

अनेहो दात्रमदितेरनर्वं हुवे स्वर्वदवधं नमस्वत्।
तद्रोदसी जनयतं जरित्रे द्यावा रक्षतं पृथिवी नो अभ्वात्॥३॥

अनेहः। दात्रं। अदितेः। अनर्वं। हुवे। स्वः ऽवत्। अवधं। नमस्वत्।
तत्। रोदसी इति। जनयतं। जरित्रे। द्यावा। रक्षतं। पृथिवी इति। नः। अभ्वात्॥३॥

अदितेः। एतदंतरिक्षस्याप्युपलक्षणं। अखंडनीयायाः पृथिव्यास्तादृशस्यांतरिक्षस्य च संबंधि दात्रं धनमाह्वयामि। स्पृहयामीत्यर्थः। कीदृशं तद्धनं। अनेहः। अपापं दुःखरहितं सुखात्मकं। अनर्वं। अनरणं। अक्षीणमित्यर्थः। सर्वतः फलभूतेन स्वर्गेण तद्वत्। अवधं। अहिंसितं। नमस्वत्। अन्नवत्। ईदृशं धनं हुवे। तदस्माभिः कांक्षितमुक्तलक्षणं धनं हे रोदसी द्यावापृथिव्यौ जरित्रे स्तोत्रे यजमानाय जनयतं। उत्पादयतं। द्यावेत्यादि व्याख्यातं॥

॥ अथ चतुर्थी ॥

अतप्यमाने अवसावंती अनु ष्याम रोदसी देवपुत्रे।
उभे देवानामुभयेभिरह्नां द्यावा रक्षतं पृथिवी नो अभ्वात्॥४॥

अतप्यमाने इति। अवसा। अवंती इति। अनु। स्याम। रोदसी इति। देवपुत्रे इति देवऽपुत्रे।
उभे इति। देवानां। उभयेभिः। अह्नां। द्यावा। रक्षतं। पृथिवी इति। नः। अभ्वात्॥४॥

अवसा स्वतोऽधिकेन केनचित्कृतेनावनेन समृद्ध्यातप्यमाने अनीश्वरे॥ तप ऐश्वर्यकर्मण इदं रूपं॥ अतप्यमाने अन्यैरपीड्यमाने। अवसान्नेनावंती तर्पयंत्यौ देवपुत्रे। देवा व्यवहर्तारो मनुष्याः पुत्रस्थानीया ययोस्तादृश्यौ। लोकद्वयस्था मनुष्याश्च देवाश्च तदुपजीव्यत्वात्पुत्रा इत्युच्यंते। ईदृशावुभे रोदसी द्यावापृथिव्यौ देवानामह्नां। एतद्रात्रेरप्युपलक्षणं। द्योतमानानामह्नां रात्रीणां च संबंधिभिरुभयविधैः शीतोष्णादिरूपैर्विलक्षणैर्धनैर्निमित्तभूतैः। तेषां लाभायेत्यर्थः। तदर्थं युवामनु स्याम। अनुभवेम। शिष्टो व्याख्यातः॥

॥ अथ पंचमी ॥

संगच्छमाने युवती समंते स्वसारा जामी पित्रोरुपस्थे।
अभिजिघ्रंती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात्॥५॥

संगच्छमाने इति संऽगच्छमाने। युवती इति। समंते इति संऽअंते। स्वसारा। जामी इति। पित्रोः। उपऽस्थे।

अभिजिघ्रंती इत्यभिऽजिघ्रंती। भुवनस्य। नाभिं। द्यावा। रक्षतं। पृथिवी इति। नः। अभ्वात् ॥ ५ ॥

संगच्छमाने परस्परमुपकारित्वेन सह युज्यमाने। वृष्टिहविषोश्च परस्परमुपकार्योपकारकभावः। यद्वा पूर्वं संसृष्टे एव सत्यौ पश्चाद्वियुज्य वृष्टिहविषी अकुर्वंत्यौ पश्चान्मनुष्यैः प्रार्थितैर्देवैर्विवाहिते सत्यौ संगते अभूतामित्याहुः। अयमर्थो द्यावापृथिवी सहास्तामित्यादिब्राह्मणे समाम्नातः। युवती नित्यतरुण्यौ मिश्रयंत्यौ वा सर्वेषु भावेषु। समंते समानांतिके समानपर्यंते वा। स्वसारा परस्परं स्वसृभूते जामी बंधुभूते। प्रजापतेः सकाशात्सहोत्पन्नत्वात्परस्परं जामित्वं। तथा च निगमौ दिवं च पृथिवीं चांतरिक्षमथो स्वः यतो द्यावापृथिवी निष्टतक्षुरिति। पित्रोः सर्वस्य पितृस्थानीययोः पालकयोस्तयोरुपस्थ उत्संगे स्थितं भुवनस्य भूतजातस्य नाभिं बंधकमुदकमभिजिघ्रंती अभिघ्राणं कुर्वंत्यौ स्पृशंत्यौ। समानमेतदुदकमित्यादिमंत्रवर्णादुभयोरुदकप्रदत्वं प्रसिद्धं। ईदृश्यौ नो रक्षतं ॥

॥ इति द्वितीयस्य पंचमे द्वितीयो वर्गः ॥

॥ अथ षष्ठी ॥

उर्वी सद्मनी बृहती ऋतेन हुवे देवानामवसा जनित्री।
दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ६ ॥

उर्वी इति। सद्मनी इति। बृहती इति। ऋतेन। हुवे। देवानां। अवसा। जनित्री इति। दधाते इति। ये इति। अमृतं। सुप्रतीके इति सुऽप्रतीके। द्यावा। रक्षतं। पृथिवी इति। नः। अभ्वात् ॥ ६ ॥

उर्वी विस्तीर्णे सद्मनी सदनाधारभूते बृहती महत्यौ महानुभावे देवानां। उपलक्षणमेतत्। देवमनुष्यादीनामवसा प्रीत्या निमित्तेन जनित्री वृष्टिसस्ययोर्जनित्र्यौ। वृष्ट्यादेर्देवानामवसा तर्पणेन निमित्तेन ऋतेन यज्ञेन च निमित्तभूतेन हुवे। आह्वयामि। देवानां हविरर्थमस्मद्यज्ञायेत्यर्थः। ये सुप्रतीके शोभनरूपे अमृतमुदकं दधाते। धारयतः। ते युवामाह्वयामि। शिष्टं स्पष्टं ॥

॥ अथ सप्तमी ॥

उर्वी पृथ्वी बहुले दूरेअंते उप ब्रुवे नमसा यज्ञे अस्मिन्।
दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ७ ॥
उर्वी इति। पृथ्वी इति। बहुले इति। दूरेअंते इति दूरेऽअंते। उप। ब्रुवे। नमसा।
यज्ञे। अस्मिन्।
दधाते इति। ये इति। सुभगे इति सुऽभगे। सुप्रतूर्ती इति सुऽप्रतूर्ती। द्यावा।
रक्षतं। पृथिवी इति। नः। अभ्वात् ॥ ७ ॥

उर्वी उर्व्यौ महत्यौ पृथ्वी पृथिव्यौ बहुले अनेकप्रकारेण प्रथमाने बह्वाकारे दूरेअंते विप्रकृष्टांतदेशे। अपारे इत्यर्थः। ईदृश्यौ युवामस्मिन्यज्ञे नमसा नमःसाधनेन स्तोत्रेणोपब्रुवे। उपेत्य ब्रवीमि। स्तौमीत्यर्थः। पुनः कीदृश्यौ। ये सुभगे शोभनभाग्ये सुप्रतूर्ती सुप्रतरणे शोभनदाने दधाते विश्वं जगत् ते युवामुप ब्रुवे। स्तौमि ॥

॥ अथाष्टमी ॥

देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा।
इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ८ ॥
देवान्। वा। यत्। चकृम। कत्। चित्। आगः। सखायं। वा। सदं। इत्। जाःऽपतिं। वा।
इयं। धीः। भूयाः। अवऽयानं। एषां। द्यावा। रक्षतं। पृथिवी इति। नः। अभ्वात् ॥ ८ ॥

हे द्यावापृथिव्यौ वयं देवान् देवान्प्रति यत्कच्चिदागोऽपराधं तत्तद्यागकाले तेषां तेषामयागलक्षणं सदमित् सर्वदैव चकृम। कृतवंतो वयं। सखायं वा प्रियं मित्रं वा प्रति यच्चकृम। जास्पतिं। जाः पुत्र्यः। तासां पतिं जामातरं वा जायापतिं प्रति दोषारोपणकलहोत्पादनादिरूपं यत्सर्वदैव चकृम। एषामुक्तरूपाणां पापानामपगमं कर्तुमियं धीर्युष्मत्स्तुतिरूपमिदं कर्म भूयाः। भूयात् भवतु। द्यावेत्यादि गतं। अत्र सर्वत्र प्रकारांतरेण मंत्रमंतरेण रक्षतं रक्षतमिति प्रार्थनं तयोरश्विन्यादिबहुमननासंभवादुचितमेव। तस्मात्स्वस्थान एव स्थिते अनुकूले भवतमित्येवं प्रार्थ्यते ॥

॥ अथ नवमी ॥

उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेतां ।
भूरि चिदर्यः सुदास्तरायेषा मदंत इषयेम देवाः ॥ ९ ॥

उभा । शंसा । नर्या । मां । अविष्टां । उभे इति । मां । ऊती इति । अवसा । सचेतां ।
भूरि । चित् । अर्यः । सुदाःऽतराय । इषा । मदंतः । इषयेम । देवाः ॥ ९ ॥

उभा शंसा द्यावापृथिव्योरुभयोर्विषयावुभावपि शंसौ नर्या नरेभ्यो हितौ ईहश्यावुभयाश्रये स्तुती मामविष्टां । रक्षतां । यद्वा द्यावापृथिव्यभिमानिदेवयोरेव शंसशब्देनाभिधानात्पुल्लिंगता । तथोभे ऊती रक्षिके द्यावापृथिव्यौ मामवसा रक्षणेन सचेतां । यद्वा प्राणिभ्यो हितकरावुभावैहिकामुष्मिकविषयौ शंसौ मामविष्टां । प्राप्नुतां । तथोभे अप्यूती तयोः संबंधिन्योरभिमानिदेवतयोरवसास्मत्तर्पणेन निमित्तेन सचेतां । हे देवा द्यावापृथिव्योरंतर्भूताः सर्वेऽपि देवाः । अर्यः स्तोतारो वयं सुदास्तरायातिशयेन शोभनदातृत्वायेषान्नेन सोमलक्षणेन मदंतो मादयंतः संतो भूरि चित् । चित् पूजायां । अभिपूजितं धनमिषयेम । इच्छेम । यद्वा अर्य इति षष्ठ्या रूपं । ईश्वराद्राजादेरपि सुदास्तरायेत्यर्थः । शिष्टं समानं ॥

ऋतं दिव इति द्वे द्यावापृथिवीये पशौ पुरोडाशहविषोरनुवाक्ये । अग्नीषोमाविति खंडे सूचितं । ऋतं दिवे तदवोचं पृथिव्या इति द्वे । आ॰ ३. ८. । इति ॥

॥ अथ दशमी ॥

ऋतं दिवे तदवोचं पृथिव्या अभिश्रावाय प्रथमं सुमेधाः ।
पातामवद्याद्दुरितादभीके पिता माता च रक्षतामवोभिः ॥ १० ॥

ऋतं । दिवे । तत् । अवोचं । पृथिव्यै । अभिऽश्रावाय । प्रथमं । सुऽमेधाः ।
पातां । अवद्यात् । दुःऽइतात् । अभीके । पिता । माता । च । रक्षतां । अवःऽभिः ॥ १० ॥

सुमेधाः शोभनप्रज्ञोऽहं दिवे द्युदेवतायै पृथिव्यै पृथिवीदेवतायै तत्तत्प्रीतिकरमृतं स्तोत्रं प्रथमं । मुख्यनामैतत् । प्रतमं प्रकृष्टतममवोचं । ब्रवीमि । किमर्थं । अभिश्रावाय । अभितः सर्वतः श्रवणाय । किंच पिता पालको द्युलोको माता सस्यादेर्निर्मात्री पृथिवी चोभे अवद्यान्निंदिताद्दुःखप्रापकादंहसः

सकाशात्पातां। रक्षतां। तथाभीके। अंतिकनामैतत्। समीप एवावोभिरभिमततर्पणै रक्षतां। पालयतां॥

॥ अथैकादशी ॥

इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वां।
भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुं॥११॥

इदं। द्यावापृथिवी इति। सत्यं। अस्तु। पितः। मातः। यत्। इह। उपऽब्रुवे। वां।
भूतं। देवानां। अवमे इति। अवःऽभिः। विद्याम। इषं। वृजनं। जीरऽदानुं॥११॥

हे द्यावापृथिवी द्यावापृथिव्यौ इदमस्माभिः क्रियमाणं स्तोत्रं सत्यमस्तु। अवितथं भवतु। फलवद्भवत्वित्यर्थः। इदमित्युक्तं किं तदित्याह। हे पितर्द्यौः हे मातः पृथिवि वां युवां प्रतीहास्मिन्यज्ञे यत्स्तोत्रमुपब्रुवे। उपेत्य ब्रवीमि तत्सत्यमस्तु। देवानां स्तोतॄणामस्माकमवमे। अंतिकनामैतत्। नित्यसंनिहिते युवामवोभिस्तर्पणैर्युक्ते भूतं। भवतं। अवशिष्टं गतं॥

॥ इति द्वितीयस्य पंचमे तृतीयो वर्गः॥

आ न इळाभिरिति सप्तमं सूक्तमेकादशर्चमागस्त्यं त्रैष्टुभं वैश्वदेवं। आ नो वैश्वदेवमित्यनुक्रांतं। विनियोगो लैंगिकः॥

॥ तत्र प्रथमा॥

आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा॥१॥

आ। नः। इळाभिः। विदथे। सुऽशस्ति। विश्वानरः। सविता। देवः। एतु।
अपि। यथा। युवानः। मत्सथ। नः। विश्वं। जगत्। अभिऽपित्वे। मनीषा॥१॥

नो विदथेऽस्मदीये यज्ञे सुशस्ति॥ सुपो लुक्॥ सुशस्तिभिः शोभनशंसनैः स्तुतिभिः प्रदेयै रत्नैः सह। यद्वा इळाभिः। तदाश्रितेषु ताच्छब्द्यं। भूमिस्थानाभिर्देवताभिः सह विश्वानरः सर्वप्राणिहितकार्यग्निः सविता प्रेरक आदित्यश्च देव एतु। आगच्छतु। हे युवानो नित्यतरुणा यज्ञस्य मिश्रयितारो वा यूयं नोऽस्माभिपित्वेऽभिपतनीयेऽस्मद्यज्ञे मनीषा मनीषया मनस ईशितृत्वेन। स्वेच्छयेत्यर्थः। अपिः संभावनायां। अप्यस्मान्मत्सथ। मादयथ। यथा विश्वं जगत्।

एतत्स्थावरस्याप्युपलक्षणं । यद्वा कृत्स्नं प्रपंचं मत्सथ तथास्मानपि । यद्वा जगच्छब्दो यजमानरूपमनुष्यवाची। सर्वानपि यजमानान्यथा मत्सथ तथेत्यर्थः ॥

वैश्वदेवे पशावा नो विश्व इत्येषा हविषः पुरोनुवाक्या । आ नो देवानामुपवेतु शंस आ नो विश्व आस्क्रा गमंतु देवाः । आ॰ ३. ७.। इति ॥

॥ सैषा द्वितीया ॥

आ नो॒ विश्व॒ आस्क्रा॑ गमंतु दे॒वा मि॒त्रो अ॑र्य॒मा वरु॑णः स॒जोषाः॑ ।
भुव॒न्यथा॑ नो॒ विश्वे॑ वृधासः॒ कर॑न्त्सु॒षाहा॑ वि॒थुरं॑ न शवः॑ ॥ २॥

आ । नः॒ । विश्वे॑ । आस्क्राः॑ । ग॒मं॒तु॒ । दे॒वाः । मि॒त्रः । अ॒र्य॒मा । वरु॑णः । स॒ऽजोषाः॑ ।
भुव॑न् । यथा॑ । नः॒ । विश्वे॑ । वृ॒धासः॑ । कर॑न् । सु॒ऽसहा॑ । वि॒थु॒रं॑ । न । शवः॑ ॥ २॥

नोऽस्माकं यज्ञं विश्वे सर्वे देवा आस्क्राः शत्रूणामास्कंदयितार आक्रमितारो वागमंतु । आगच्छंतु । के ते । मित्रोऽर्यमा वरुणश्च त्रयोऽपि सजोषाः समानप्रीतयः संत आगच्छंतु। किंतु विश्वे देवा नोऽस्माकं वृधासो वर्धयितारो यथा भुवन् भवेयुः तथा सुषाहा सुष्ठु शत्रूणामभिभवेन नोऽस्मदीयं शवोऽन्नं विथुरं हीनं यथा न करन् । न कुर्युः । तथागच्छंतु ॥

॥ अथ तृतीया ॥

प्रेष्ठं॑ वो॒ अति॑थिं गृणीषे॒ऽग्निं श॒स्तिभि॑स्तु॒र्वणि॑ः स॒जोषाः॑ ।
अस॒द्यथा॑ नो॒ वरु॑णः सुकी॒र्त्तिरिषं॑श्च पर्षदरिगू॒र्तः सू॒रिः ॥ ३॥

प्रेष्ठं॑ । व॒ः । अति॑थिं । गृ॒णी॒षे॒ । अ॒ग्निं । श॒स्तिऽभिः॑ । तु॒र्वणि॑ः । स॒ऽजोषाः॑ ।
अस॑त् । यथा॑ । नः॒ । वरु॑णः । सु॒ऽकी॒र्त्तिः । इषः॑ । च॒ । प॒र्ष॒त् । अ॒रि॒ऽगू॒र्तः । सू॒रिः ॥ ३॥

हे देवा वो युष्माकं प्रेष्ठं प्रियतमं । सर्वेषामाह्वातृत्वात् हविर्वहनाच्चाग्निर्देवानां प्रियतमः । तमतिथिं गृणीषे । गृणे । स्तौमि ॥ व्यत्ययेन मध्यमः ॥ केन साधनेन । शस्तिभिः । शंसनैः स्तुतिभिः । कीदृशोऽहं । तुर्वणिः । तूर्णवनिः शीघ्रं संभक्ता । सजोषाः । युष्माभिः सह प्रीयमाणः । यद्वैते अग्निविशेषणे । यस्तुर्वणिः शीघ्रं यज्ञस्य संभक्ता सजोषा युष्माभिः सह प्रीयमाणः । तमग्निं गृणीषे। यथा येन प्रकारेण नोऽस्माकं वरुण एतन्नामको देवः सुकीर्त्तिः शोभनकीर्त्तिमानसत्। सुकीर्त्तिं भिक्षे वरुणस्य भूरेरित्यादिमंत्रवर्णेषु वरुणात्सुकीर्त्ति-

रेवेषणीया। अरिगूर्तोऽरिष्वदातृषु सदा शब्दितः। अरीणां हननायोद्युक्तो वा सूरिः प्रेरयितायं वरुण इषश्चान्नानि पर्षत्। पूरयेत्। तथा तमपि स्तुम इत्यर्थः॥

॥ अथ चतुर्थी ॥

उप॑ व ए॒षे नम॑सा जिगी॒षोषासा॒नक्ता॑ सु॒दुघे॑व धे॒नुः।
स॒मा॒ने अह॑न्वि॒मिमा॑नो अ॒र्कं विषु॑रूपे॒ पय॑सि स॒स्मि॒न्नूध॑न् ॥४॥

उप॑। वः॒। आ। ई॒षे॒। नम॑सा। जि॒गी॒षा। उ॒षसा॒नक्ता॑। सु॒दुघा॑ऽइव। धे॒नुः।
स॒मा॒ने। अह॑न्। वि॒ऽमिमा॑नः। अ॒र्कम्। विषु॑ऽरूपे। पय॑सि। स॒स्मिन्। ऊध॑न् ॥४॥

हे देवा वो युष्माकं नमसा हविषा नमस्कारेण वोप उपेत्य जिगीषा पापानां जिगीषया आ ईषे। इच्छामि॥ इष गताविल्यस्य वेषतेर्वा गत्याद्यर्थस्य लिड्युत्तमैकवचन इदं रूपं॥ भजामि। कस्मिन्काले। उषासानक्ता। अहनि रात्रौ च। यद्वा अहोरात्रदेवते अप्यभिगच्छामि। गतौ दृष्टांतः। सुदुघा धेनुरिव। सुदोग्ध्री धेनुर्यथा दोहाय दोग्धुर्गृहमागच्छति तद्वत्। किं कुर्वन्। सस्मिन् समाने ऊधन् ऊधस्युत्पन्ने विषुरूपे नानारूपे पयसि क्षीरघृतादिकेऽर्कमर्चनीयमन्नं चरुपुरोडाशादिकं विमिमानः। विविधं मिमानः। कस्मिन्काले। समानेऽहन्। षष्ठेऽहनि एकस्मिन्नेवाहनि सर्वदैव वेत्यर्थः। एकस्मिन्नेवाहनि समान ऊधस्युत्पन्ने नानारूपे पयसि त्वदर्थं हविर्मिमान उपगच्छामीत्यर्थः। यद्वा सस्मिन् सर्वस्मिन्नूधसि फलाख्यक्षीरोत्पादके यज्ञे निमित्तभूते सति विषुरूपे पयसि नानारूपे सोमलक्षणोदकेऽर्कमन्नसाधनं स्तोत्रं विमिमानोऽहं युष्मानभिगच्छामि॥

॥ अथ पंचमी ॥

उ॒त नोऽहि॑र्बु॒ध्न्यो॒३॒॑ मय॑स्कः॒ शिशुं॒ न पि॒प्युषी॑व वेति॒ सिंधुः॑।
येन॒ नपा॑तम॒पां जु॒नाम॑ मनो॒जुवो॒ वृष॑णो॒ यं वह॑न्ति ॥५॥

उ॒त। नः॒। अहि॑ः। बु॒ध्न्यः॑। मयः॑। क॒रि॒ति॒ कः॑। शिशुं॑। न। पि॒प्युषी॑ऽइव। वे॒ति॒। सिंधुः॑।
येन॑। नपा॑तं। अ॒पां। जु॒नाम॑। म॒नः॒ऽजुव॑ः। वृष॑णः। यं। वह॑न्ति ॥५॥

उत अपि च नोऽस्माकमहिरंतरिक्षगाम्यहंता वाहीनो वाहन्यमानो वैतन्नामको देवः। स एव बुध्न्यः। बुध्नं बन्धकमंतरिक्षं। तदर्हतीति बुध्न्योऽंतरिक्ष-

चार्येतन्नामको देवो मयः सुखं कः। करोतु ॥ करोतेर्लेडि रूपं ॥ किंच पिप्युषी। इवशब्द एवार्थः पूरणो वा। अस्मान्रसेनाप्याययंती सिन्धुर्नाम नदी वेतु। आगच्छतु। तत्र दृष्टांतः। शिश्वुं न। यथा शिश्वुं प्याययंती गौर्गच्छति तद्वत्। अपां नपातमुदकानामपातयितारं वर्षकमेतन्नामकं यद्वोदकानां नप्तारं तृतीयं पुत्रं। अद्भ्य ओषधिवनस्पतयः। तेभ्योऽग्निरिति नप्तृत्वं। तादृशमग्निं जुनाम। स्तुतिभिः संगच्छेम ॥ जु इति सौत्रो धातुर्गत्यर्थः ॥ यं देवं मनोजुवो मनोवेगा वृषणो वर्षका मेघा अश्वा वहंति। स सुखं करोतु ॥

॥ इति द्वितीयस्य पंचमे चतुर्थो वर्गः ॥

॥ अथ षष्ठी ॥

उत न ईं त्वष्टा गंत्वच्छा स्मत्सूरिभिरभिपित्वे सजोषाः।
आ वृत्रहेंद्रश्चर्षणिप्रास्तुविष्टमो नरां न इह गम्याः ॥ ६ ॥
उत। नः। ईं। त्वष्टा। आ। गंतु। अच्छ। स्मत्। सूरिऽभिः। अभिऽपित्वे। सऽजोषाः।
आ। वृत्रऽहा। इंद्रः। चर्षणिऽप्राः। तुविःऽतमः। नरां। नः। इह। गम्याः ॥ ६ ॥

त्वष्टा देवोऽपि नोऽस्मानच्छ अभिप्राप्तुमीमिदानीमिमं यज्ञं वागंतु। आगत्य च। स्मत्सहार्थे प्राशस्त्ये वा वर्तते। अत्र प्रशंसायां। प्रशस्तं यथा तथाभिपित्वेऽभिगंतव्ये यज्ञे निमित्तभूते सति सूरिभिः स्तोतृभिर्ऋत्विग्भिः सजोषाः समानप्रीतिर्भवत्विति शेषः। तथा वृत्रहा वृत्रघाती चर्षणिप्राः। चर्षणयो मनुष्या यजमानाः। कामैस्तेषां पूरकस्तुविष्टमो बहुतमो महत्तम इहास्मिन्कर्मणि नरां नृणां नोऽस्माकमुक्तगुणोपेतः सन्नागम्याः। आगच्छतु ॥

॥ अथ सप्तमी ॥

उत न ईं मतयोऽश्वयोगाः शिश्वुं न गावस्तरुणं रिहंति।
तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसंत ॥ ७ ॥
उत। नः। ईं। मतयः। अश्वऽयोगाः। शिश्वुं। न। गावः। तरुणं। रिहंति।
तं। ईं। गिरः। जनयः। न। पत्नीः। सुरभिःऽतमं। नरां। नसंत ॥ ७ ॥

उत अपि च ईमेनं तरुणं नित्ययुवानमिंद्रं मतयोऽस्मद्बुद्धयोऽश्वयोगा अश्वसमानप्राप्तयो रिहंति। आस्वादयंति। स्तुवंतीत्यर्थः। तत्र दृष्टांतः। गावो

दोग्ध्रो धेनवः शिश्वुं न। शिश्वुमिव वत्समिव। तं यथा लिहंति तद्वत्। तदेवाह। तमी तमेवैनं नरां नराणां यजमानानां सुरभिष्टममतिशयेन सुरभिं जनयः फलस्योत्पादयित्र्यो गिरः स्तुतयो नसंत। व्याप्नुवंति॥ नसतिर्व्याप्तिकर्मा॥ तत्र दृष्टांतः। जनयो न। उत्पादयित्र्यः पत्नीः पत्न्यः पतिमिव॥

॥ अथाष्टमी ॥

उत नं ईं मरुतों वृद्धसेनाः स्मद्रोदसी समनसः सदंतु।
पृषदश्वासोऽवनयो न रथां रिशादसो मित्रयुजो न देवाः॥ ८॥
उत। नः। ईं। मरुतः। वृद्धऽसेनाः। स्मत्। रोदसी इति। सऽमनसः। सदंतु।
पृषत्ऽअश्वासः। अवनयः। न। रथाः। रिशादसः। मित्रऽयुजः। न। देवाः॥ ८॥

उत अपि च नोऽस्मदीयमीमिदानीमेनं यागं वा मरुतः स्मत् सहापि सदंतु। गच्छंतु। कुतो देशात्। रोदसी। रोदस्योर्द्यावापृथिव्योः सकाशात्। यद्वा रोदस्यावपि गच्छतां। कीदृशास्ते मरुतः। वृद्धसेनाः प्रवृद्धबलाः। समनसः समानमनस्काः। पृषदश्वासः पृषद्वर्णाश्वाः। पृषत्यो मरुतामिति यास्कः। अवनयो न। यथैव नमनस्वभावा रथा रंहणस्वभावा रथवंतो वा॥ मत्वर्थो लुप्यते॥ यद्वा अवनयो रक्षका रथा इव स्थिताः। रिशादसः। रिशाः शत्रवः। तेषामत्तारो मित्रयुजो देवा नः। मैत्रीयुक्ता व्यवहर्तार ऋत्विज इव। यद्वा मैत्रीयुक्ता अन्ये देवा यथा गच्छंति तद्वत्॥

॥ अथ नवमी ॥

प्र नु यदेषां महिना चिकित्रे प्र युंजते प्रयुजस्ते सुवृक्ति।
अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायंत सेनाः॥ ९॥
प्र। नु। यत्। एषां। महिना। चिकित्रे। प्र। युंजते। प्रऽयुजः। ते। सुऽवृक्ति।
अध। यत्। एषां। सुऽदिने। न। शरुः। विश्वं। आ। इरिणं। प्रुषायंत। सेनाः॥ ९॥

एषां मरुतां महिना महिमा वृष्टिलक्षणो यत् यस्मात्प्रचिकित्रे। प्रज्ञायते। यद्वैषां महत्त्वेन युक्ता नराश्चिकित्रे। जानंत्यनुष्ठेयं। नु इति पूरणः। ततस्ते ज्ञातारः सुवृक्ति॥ सुपो लुक्॥ सुष्टुतीनां प्रयुजः प्रयोगान्प्रयुंजते। अध अथ प्रयोगानंतरं यत् यस्मादेषां सेना वृष्ट्युत्पादका विश्वं सर्वं भुवनमिरिणमूषर-

प्रदेशं यथा तथा सर्वतः प्रुषायंत। उत्पादयंति। तत्र दृष्टांतः। सुदिने मेघावरणादिरहिते दिने शर्वरंधकारहिंसकः प्रकाश इव। स यथा सर्वमावृणोति तथा मरुत्सेनावृष्ट्या सर्वमूषरं करोति। यद्वा मरुन्महिमा वृष्टिर्भवति। तदा सस्यादिसमृद्धौ सत्यां प्रयोगं कुर्वंति। यदा यजंति तदा मरुत्सेनाः सर्वां महीमुंदंतीत्येवं महानुभावा मरुत इति तेषां स्तुतिः ॥

॥ अथ दशमी ॥

प्रो अ॒श्विना॒वव॑से कृणु॒ध्वं॒ प्र पू॒षणं॒ स्वत॑वसो॒ हि संति॑।

अ॒द्वे॒षो विष्णु॒र्वात॑ ऋभु॒क्षा अच्छा॑ सु॒म्नाय॑ ववृतीय दे॒वान् ॥ १० ॥

प्रो इति॑। अ॒श्विनौ॑। अव॑से। कृ॒णु॒ध्वं॒। प्र। पू॒षणं॑। स्वऽत॑वसः। हि। संति॑।

अ॒द्वे॒षः। विष्णुः॑। वातः॑। ऋ॒भु॒क्षाः। अच्छ॑। सु॒म्नाय॑। व॒वृ॒ती॒य॒। दे॒वान् ॥ १० ॥

हे ऋत्विजः अश्विनावेतन्नामकौ देवावुद्दिश्यावसेऽस्मद्रक्षणाय प्रो कृणुध्वं। स्तुतिं प्रकर्षेण कृणुध्वं। पूषणं पोषकमेतन्नामकं देवमप्यवसे प्रकर्षेण स्तुतिं कृणुध्वं। किंच ये स्वतवसः स्वायत्तबलाः संति तानपि प्रकृणुध्वं। के ते। अद्वेषो द्वेषरहितो विष्णुर्व्याप्त एतन्नामको देवः। प्रथममनाहूतोऽपि न कुप्यतीति वक्तुमद्वेष इत्युक्तं। तथा वातः सर्वत्र संचारी वायुः। ऋभुक्षाः पतिरिंद्रश्च। एतानपि प्रकृणुध्वं। अतोऽहं स्वायत्तबलान् सर्वानपि देवान् सुम्नाय सुखायाच्छा आभिमुख्येन ववृतीय। स्तोत्रैरभिवर्तयेयं ॥

॥ अथैकादशी ॥

इ॒यं सा वो॑ अ॒स्मे दीधि॑तिर्यजत्रा अपि॒प्राणी॑ च॒ सद॑नी च भूयाः।

नि या दे॒वेषु॒ यत॑ते वसू॒युर्वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुं ॥ ११ ॥

इ॒यं। सा। वः॒। अ॒स्मे इति॑। दीधि॑तिः। य॒ज॒त्राः॒। अ॒पि॒ऽप्राणी॑। च॒। सद॑नी। च॒। भू॒याः॒।

नि। या। दे॒वेषु॑। यत॑ते। व॒सु॒ऽयुः। वि॒द्याम॑। इ॒षं। वृ॒जनं॑। जी॒रऽदा॑नुं ॥ ११ ॥

हे यजत्रा यष्टव्या देवा वो युष्मत्संबंधिनी सेयं प्रसिद्धा दीधितिर्दीप्तिरस्मे अस्माकमपिप्राणी सर्वदा चेष्टयित्री सदनी च निवासवती च भूयाः। भूयात्। भवतु। या दीधितिर्वसूयुर्वसुमती देवेषु नियतते। नियमेन प्रयत्नं करोति। तानपि प्रकाशितुं सैव भूयात्। विद्यामेति गतः ॥

॥ इति द्वितीयस्य पंचमे पंचमो वर्गः ॥

पितुं न्वित्येकादशर्चमष्टमं सूक्तमागस्त्यमन्नदेवताकं गायत्रं। आद्यानुष्टुप् गर्भोष्णिक्। आद्यः पंचकस्त्रयोऽष्टका अनुष्टुब्गर्भेत्युक्तत्वात्। तृतीया पंचमी षष्ठी सप्तम्येकादशी चेति पंचानुष्टुभः। तथा चानुक्रमणिका पितुं न्वन्नस्तुतिर्गायत्रं त्वाद्यानुष्टुब्गर्भा तृतीयांत्ये पंचम्याद्याश्च तिस्रोऽनुष्टुभ इति॥ विनियोगं शौनक आह। पितुं न्वित्युपतिष्ठेत नित्यमन्नमुपस्थितं। पूजयेदशनं नित्यं भुंजीत ह्यविकुत्सयन्॥ नास्य स्यादन्नजो व्याधिर्विषमप्यमृतं भवेत्। विषं च पीत्वैतत्सूक्तं जपेद्विषविनाशनं॥ नावाग्यतस्तु भुंजीत नाशुचिर्न जुगुप्सितं। दद्याच्च पूजयेच्चैव जुहुयाच्च हविस्तदा। क्षुद्भयं नास्य किंचित्स्यान्नान्नजं व्याधिमाप्नुयादिति॥

॥ तत्र प्रथमा ॥

पितुं नु स्तोषं महो धर्माणं तविषीं।
यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत्॥ १॥

पितुं। नु। स्तोषं। महः। धर्माणं। तविषीं।
यस्य। त्रितः। वि। ओजसा। वृत्रं। विऽपर्वं। अर्दयत्॥ १॥

अहमगस्त्यो नु क्षिप्रं पितुं पालकमन्नं स्तोषं। स्तौमि। महो महांतं धर्माणं सर्वस्य धारकं तविषीं बलात्मकं। यद्वा महतो लोकस्य धारकं। यस्यान्नस्यौजसा बलेन सामर्थ्येन त्रितो विस्तीर्णतमः प्रख्यातकीर्तिस्त्रिषु क्षित्यादिस्थानेषु तायमानोऽपींद्रो वृत्रं विपर्वं विच्छिन्नसंधिकं यथा तथार्दयत्। हिंसितवान्॥

॥ अथ द्वितीया ॥

स्वादो पितो मधो पितो वयं त्वा ववृमहे। अस्माकमविता भव॥ २॥

स्वादो इति। पितो इति। मधो इति। पितो इति। वयं। त्वा। ववृमहे। अस्माकं।
अविता। भव॥ २॥

हे स्वादो आस्वादनीय पितो पालक मधो माधुर्योपेत पितो हे पानसाधनान्न वयं त्वा त्वां ववृमहे। सेवामहे॥ अत्र सर्वत्रानुदात्तानां पूर्वस्यासामान्यवचनत्वेनानिघातत्वं। अनुदात्तानां तु विशेषवचनत्वान्निघातत्वं॥ असकृत्पितुशब्दश्रवणं तस्य प्राशस्त्यज्ञापनार्थं॥ हे पितो अस्माकमविता तर्पयिता भव॥

॥ अथ तृतीया ॥

उप॑ नः पितवा च॑र शि॒वः शि॒वाभि॑रू॒तिभि॑ः ।
म॒यो॒भुर॑द्विषे॒ण्यः सखा॑ सु॒शेवो॒ अद्व॑याः ॥ ३ ॥

उप॑ । नः॒ । पि॒तो॒ इति॑ । आ । च॒र॒ । शि॒वः । शि॒वाभि॑ः । ऊ॒तिऽभि॑ः ।
म॒यः॒ऽभुः । अ॒द्वि॒षे॒ण्यः॑ । सखा॑ । सु॒ऽशेवः॑ । अद्व॑याः ॥ ३ ॥

हे पितो यतस्त्वं शिवो मंगलः । अतः शिवाभिर्मंगलयुक्ताभिरूतिभी रक्षणैर्नोऽस्मानाचर । आगच्छ । आगत्य च मयोभुः सुखस्य भावयिताद्विषेण्योऽद्वेषरसः । प्रियरस इत्यर्थः । सखा सखिवत्प्रियकारी सुशेवोऽत एव सुष्ठु सुखकरोऽद्वया द्वयरहित उक्तगुण एव न तु तद्विपरीतो भवेत्यर्थः । अथवा दृष्टांतवादोऽयं । सुशेवोऽद्वया मनःकर्मविसंवादरहितः सखा यथा मयोभुरद्वेष्यश्च भवति तद्वत्त्वमपि भवेत्यर्थः ॥

॥ अथ चतुर्थी ॥

तव॒ त्ये पि॑तो॒ रसा॒ रजां॒स्यनु॒ विष्ठि॑ताः । दि॒वि वाता॑ इव श्रि॒ताः ॥ ४ ॥

तव॑ । त्ये । पि॒तो॒ इति॑ । रसा॑ः । रजां॑सि । अनु॑ । विऽस्थि॑ताः । दि॒वि । वाता॑ःऽइव ।
श्रि॒ताः ॥ ४ ॥

हे पितो तव त्वत्संबंधिनस्त्ये ते स्वाद्वम्लादिषड्रसा रजांसि लोकान् लोकस्थानादर्थाननु आनुकूल्येन विष्ठिताः । विविधं स्थिताः । विविधस्थितौ दृष्टांतः । दिवि द्युलोकेऽंतरिक्षे श्रिता वाता वायवः । ते यथा व्याप्तास्तद्वत् ॥

॥ अथ पंचमी ॥

तव॒ त्ये पि॑तो॒ दद॑त॒स्तव॑ स्वादि॒ष्ठ ते पि॑तो ।
प्र स्वा॒द्मानो॒ रसा॑नां तुवि॒ग्रीवा॑ इवेरते ॥ ५ ॥

तव॑ । त्ये । पि॒तो॒ इति॑ । दद॑तः । तव॑ । स्वा॒दि॒ष्ठ । ते । पि॒तो॒ इति॑ ।
प्र । स्वा॒द्मान॑ः । रसा॑नां । तु॒वि॒ग्रीवा॑ःऽइव । ई॒र॒ते॒ ॥ ५ ॥

हे पितो पालकान्न त्ये ते त्वदर्थिनो नरास्तव भोक्तारो भवंतीति शेषः । के ते नराः । हे स्वादिष्ठ स्वादुतम पितो पालक तव त्वदनुग्रहात्ते त्वां ददतः

प्रयच्छंतो भवंति। यद्वा ते पितो इत्यादरार्थं। अभ्यासे हि भूयांसमर्थं मन्यंते। किंच तव रसानां स्वाद्वम्लादीनां षण्णां स्वाद्मानः स्वादयितारो भक्षयितार एव तुविग्रीवा इव। तुवीति बहुनाम। प्रवृद्धग्रीवा एव प्रेरते। प्रकर्षेण गच्छंति। संचरंति॥ इवशब्द एवकारार्थः पूरणो वा॥ भूलोकेऽन्नार एव दृढांगा भवंतीति प्रसिद्धं। अनशने हि ग्रीवा अधो लंबंते। यद्वा तव रसानामन्नारोऽसंख्यातग्रीवा इव भवंति रसानां बाहुल्यादिति भावः। एवं बहुरसोपेतमन्नमिति तस्य स्तुतिः॥

॥ इति द्वितीयस्य पंचमे षष्ठो वर्गः॥

॥ अथ षष्ठी॥

त्वे पि॑तो म॒हानां॑ दे॒वानां॒ मनो॑ हि॒तं।

अका॑रि॒ चारु॑ के॒तुना॒ तवाहि॒मव॑सावधीत्॥ ६॥

त्वे इति॑। पि॒तो॒ इति॑। म॒हानां॑। दे॒वानां॑। मनः॑। हि॒तं।

अका॑रि। चारु॑। के॒तुना॑। तव॑। अहिं॑। अव॑सा। अ॒व॒धी॒त्॥ ६॥

हे पितो महानां पूज्यानां महतां वा देवानामिंद्रादीनां मनस्त्वे त्वयि हितं निहितमकारि। कृतं। अमृतमपि विहाय त्वय्येव वर्तते। हे पितो तव चारु समीचीनेन केतुना त्वत्कृतेन प्रज्ञानलक्षणेनावसा रक्षणेनाहिं मेघं वृत्रं वावधीत्। हतवानिंद्रः। अन्नमयं हि सोम्यं मन इति श्रुतेः। अथवा त्वत्केतुना जगद्रक्षणेन निमित्तेनेति योज्यं। जगद्रक्षणार्थं हींद्रेणाहिर्भिद्यते॥

॥ अथ सप्तमी॥

यद॒दो पि॑तो॒ अज॑गन्वि॒वस्व॒ पर्व॑तानां।

अत्रा॑ चिन्नो मधो पि॒तोऽरं॑ भ॒क्षाय॑ गम्याः॥ ७॥

यत्। अ॒दः। पि॒तो॒ इति॑। अज॑गन्। वि॒वस्व॑। पर्व॑तानां।

अत्र॑। चि॒त्। नः॒। म॒धो॒ इति॑। पितो॒ इति॑। अरं॑। भ॒क्षाय॑। ग॒म्याः॒॥ ७॥

हे पितो अन्न त्वां यद्यदा विवस्व॥ सुपो लुक्। अंत्यलोपश्छांदसः॥ विवासनवतां विद्युद्रूपप्रकाशनवतां। विवो धनमुदकलक्षणं। धनवतां वा पर्वतानां मेघानां संबंध्यदः प्रसिद्धं तदुदकमजगन्। अगमत्। गच्छेत्। अत्र चित् अस्मिन्काले

नोऽस्मान् हे मधो हे पितो माधुर्योपेतान्न त्वं नोऽस्मानरमलं संपूर्णं भक्षाय भक्षणाय गम्याः। गच्छ। संनिहितो भव ॥

॥ अथाष्टमी ॥

यदपामोषधीनां परिंशमारिशामहे। वातापे पीव इद्भव ॥ ८ ॥

यत्। अपां। ओषधीनां। परिंशं। आऽरिशामहे। वातापे। पीवः। इत्। भव ॥ ८ ॥

यत् येनापामोषधीनां संबंधि परिंशं परिलेशं परितः सुखकरमन्नमारिशामहे। आस्वादयामः। भक्षयामः। तेनान्नोदकसारेण हे वातापे। वातेन प्राणेनाप्नोति स्वनिर्वाहमिति वातेनाप्यायत इति वा वातापि शरीरं। हे शरीर त्वं पीव इत् आप्यायित एव भव। अन्नोदकाभ्यां शरीरवृद्धिः प्रसिद्धा। यद्वा यद्यप्यपामोषधीनां परिंशं लेशमास्वादयामः। तथापि हे वातापे वातवत्सर्वव्यापक पितो त्वमल्पमपि पीवः पीवानेव भव ॥

॥ अथ नवमी ॥

यत्ते सोम गवाशिरो यवाशिरो भजामहे। वातापे पीव इद्भव ॥ ९ ॥

यत्। ते। सोम। गोऽआशिरः। यवऽआशिरः। भजामहे। वातापे। पीवः। इत्। भव ॥ ९ ॥

पूर्वमन्नसामान्येन स्तुत्वेदानीं सोमलक्षणमन्नं स्तौति। हे सोम ते तव यत् यमंशं गवाशिरो गोविकारक्षीराद्याश्रपणद्रव्यं यवाशिरो यवविकाराश्रपणद्रव्यं भजामहे। सेवामहे। तेन हे वातापे शरीर पीवो भव ॥

॥ अथ दशमी ॥

करंभ ओषधे भव पीवो वृक्क उदारथिः। वातापे पीव इद्भव ॥ १० ॥

करंभः। ओषधे। भव। पीवः। वृक्कः। उदारथिः। वातापे। पीवः। इत्। भव ॥ १० ॥

करंभो यः करंभादिरूपः सक्तुपिंडोऽस्ति तदात्मक हे ओषधे त्वं पीवः स्थौल्यवान् वृक्को व्याधेर्वर्जयिता भव। उदारथिरूर्ध्वगम इंद्रियाणामुद्दीपयिता भव। शिष्टो गतः ॥

॥ अथैकादशी ॥

तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम।
देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादं ॥ ११ ॥

तं। त्वा। वयं। पितो इति। वचःऽभिः। गावः। न। हव्या। सुसूदिम।
देवेभ्यः। त्वा। सधऽमादं। अस्मभ्यं। त्वा। सधऽमादं॥ ११॥

हे पितो अन्न सोमरूप तं तादृशं स्तुतं त्वा त्वां महानुभावं वचोभिः स्तुतिवाग्भिर्वयं सुषूदिम। क्षारयामो रसान्। तत्र दृष्टांतः। गावो न हव्या। गाव इव हवींष्युत्पादयंति तथा त्वत्सकाशात्सोमं सुषूदिम। किमर्थं कीदृशं चेति चेत्। उच्यते। देवेभ्य इंद्रादिभ्यः। तदर्थं सधमादं तेषां सह मादयितारं। न केवलं देवेभ्य एव किंतु सधमादमस्माभिः सह मादयितारं हुतशेषरूपं त्वा त्वामस्मभ्यमस्मदर्थमपि॥

॥ इति द्वितीयस्य पंचमे सप्तमो वर्गः॥

समिद्धोऽद्येत्येकादशर्चं नवमं सूक्तमागस्त्यं सर्वं गायत्रं। समिद्धाग्नितनूनपादादय एकादश प्रत्यृचं देवता यास्केन किंदेवताः प्रयाजा इत्युपक्रम्याग्नेयाः प्रयाजा ऋतुदेवताश्छंदोदेवताः पशुदेवताः प्राणदेवता आत्मदेवता इत्यादिना बहून्पक्षानुपन्यस्य ब्राह्मणानि च प्रदर्श्याग्नेया एवेति सिद्धांतितं। समिद्ध आप्रिय इत्यनुक्रांतं। पशावगस्त्यानामेकादशप्रयाजरूपमिदमाप्रीसूक्तं॥

॥ तत्र प्रथमा॥

समिद्धो अद्य राजसि देवो देवैः सहस्रजित्। दूतो हव्या कविर्वह॥ १॥
संऽइद्धः। अद्य। राजसि। देवः। देवैः। सहस्रऽजित्। दूतः। हव्या। कविः। वह॥ १॥

हे अग्ने देवैर्व्यवहर्तृभिर्ऋत्विग्भिः समिद्धः सम्यग्दीपितो देवोऽत एव दीप्यमानः। समिद्धैर्वा देवैः सहितः समिद्धः सन् अद्यास्मिन्यागदिने राजसि। ईशिषे। हे सहस्रजित् सहस्रस्य धनस्यैतत्संख्याकानां शत्रूणां वा जेतः। ततो दूतो देवानां दूतस्तद्यज्ञादिवार्ताहर आह्वाता वां। अग्निर्देवानां दूत आसीदिति श्रुतेः। कविः क्रांतदर्शी। ईदृशस्त्वं हव्यास्मदीयानि हवींषि वह। देवेभ्यः प्रापय॥

॥ अथ द्वितीया॥

तनूनपादृतं यते मध्वा यज्ञः समज्यते। दधत्सहस्रिणीरिषः॥ २॥
तनूऽनपात्। ऋतं। यते। मध्वा। यज्ञः। सं। अज्यते। दधत्। सहस्रिणीः। इषः॥ २॥

तनूनपात् यज्ञशरीरस्य नपातयिता। यद्वा आपोऽत्र तन्व उच्यंत इत्युक्त-

त्वादपां नपातयिता तासां नप्ता वा। अप्स्व ओषधयः। ओषधीभ्योऽग्निरिति नभृत्वं। यज्ञः पूज्यः। यज्ञनिर्वाहकत्वाद्वा यज्ञः। ईदृशोऽग्निर्ऋतं यज्ञं यते। गच्छते। अनुतिष्ठते। यजमानाय तदभिमतार्थं। मध्वा मधुरेणाज्यसोमादिद्रव्येण समज्यते। किं कुर्वन्नयं। सहस्रिणीरेतत्संख्याकानीषोऽन्नानि दधत्। यजमानेभ्यो धारयन्॥

॥ अथ तृतीया ॥

आजुह्वा॑नो न॒ ईड्यो॑ दे॒वाँ आ व॑क्षि य॒ज्ञिया॑न्। अग्ने॑ सहस्र॒सा अ॑सि ॥ ३ ॥

आऽजुह्वा॑नः। नः॒। ईड्यः॑। दे॒वान्। आ। व॒क्षि॒। य॒ज्ञिया॑न्। अग्ने॑। स॒ह॒स्र॒ऽसाः। अ॒सि॒ ॥ ३ ॥

हे अग्ने आजुह्वानोऽस्माभिराहूयमानः सन् ईड्योऽस्माभिः स्तुत्य इड्नामकः। त्वं नोऽस्मदर्थं यज्ञियान् यज्ञभाजो देवानावक्षि। आवह। हे अग्ने त्वं सहस्रसा असि। अपरिमितधनस्य दातासि॥

॥ अथ चतुर्थी ॥

प्रा॒चीनं॑ ब॒र्हिरोज॑सा स॒हस्र॑वीरमस्तृणन्। यत्रा॑दित्या वि॒राज॑थ ॥ ४ ॥

प्रा॒चीन॑म्। ब॒र्हिः। ओज॑सा। स॒हस्र॑ऽवीरं। अ॒स्तृ॒ण॒न्। यत्र॑। आ॒दि॒त्याः॒। वि॒ऽराज॑थ ॥ ४ ॥

प्राचीनं प्रागग्रं सहस्रवीरं सहस्रसंख्याका वीराः शत्रूणां विशेषेणेरयितारो देवा यस्य तत्तादृक्। यद्वा अपरिमितवीराः पुत्रादयो येन तादृग्बर्हिरोजसा मंत्रलक्षणबलेनोपेता ऋत्विजोऽस्तृणन्। आच्छादयन्। यत्र यस्मिन्बर्हिष्यादित्या अदितेः पुत्रा यूयं विराजथ। विविधं राजध्वे। तद्बर्हिरस्तृणन्॥

॥ अथ पंचमी ॥

वि॒राट् स॒म्राड्वि॒भ्वीः प्र॒भ्वीर्ब॒ह्वीश्च॒ भूय॑सीश्च॒ याः। दुरो॑ घृ॒तान्य॑क्षरन् ॥ ५ ॥

वि॒ऽराट्। सं॒ऽराट्। वि॒ऽभ्वीः। प्र॒ऽभ्वीः। ब॒ह्वीः। च॒। भूय॑सीः। च॒। याः। दुरः॑।
घृ॒तानि॑। अ॒क्ष॒र॒न् ॥ ५ ॥

विराट् विशेषेण राजंत इति व्यत्ययेनैकवचनं। सम्राट् सम्यगिति पूज्यतरं राजमानाः। अत्रापि व्यत्ययेनैकवचनं। विभ्वीर्विभ्व्यो विविधं भवित्र्यः। प्रभ्वीः प्रभ्व्यः प्रकर्षेण भवित्र्यः। बह्वीर्बह्व्यः। भूयसीर्लोकप्रसिद्धसंख्याभिश्च भूयस्यश्च

या दुरो यज्ञगृहद्वारः संति ता घृतान्युदकानि प्राण्युपकारार्थमक्षरन्। क्षरंति। यद्वा बह्वीर्भूयसीरित्येते संख्यावचने। शिष्टानि तासां नामधेयानि ॥

॥ इति द्वितीयस्य पंचमेऽष्टमो वर्गः ॥

॥ अथ षष्ठी ॥

सुरुक्मे हि सुपेशसाधि श्रिया विराजतः। उषासावेह सीदतां ॥ ६ ॥

सुरुक्मे इति सुऽरुक्मे। हि। सुऽपेशसा। अधि। श्रिया। विऽराजतः। उषसौ। आ। इह। सीदतां ॥ ६ ॥

सुरुक्मे शोभनदीप्ताभरणे प्रसिद्धे सुपेशसा शोभनरूपे ईदृश्यावहोरात्रदेवते अधि अधिकं श्रिया सौंदर्येण विराजतः। विशेषेण दीप्येते ॥ हियोगादनिघातः ॥ तादृश्यावुषसौ। एतद्रात्रेरप्युपलक्षणं। उषःशब्दो दिवसस्योपलक्षकः। रात्रिरुषाश्चोभे इहास्मिन्दिन आसीदतां। आगत्य तिष्ठतां। आगच्छतां वा ॥

॥ अथ सप्तमी ॥

प्रथमा हि सुवाचसा होतारा दैव्या कवी। यज्ञं नो यक्षतामिमं ॥ ७ ॥

प्रथमा। हि। सुऽवाचसा। होतारा। दैव्या। कवी इति। यज्ञं। नः। यक्षतां। इमं ॥ ७ ॥

प्रथमा। मुख्यनामैतत्। प्रतमौ प्रकृष्टतमौ ॥ हिः प्रसिद्धौ ॥ सुवाचसा प्रियवचनौ दैव्या देवार्हौ होतारा देवानामाह्वातारौ होमनिष्पादकौ वा कवी मेधाविनावेतौ नोऽस्मदीयमिमं यज्ञं यक्षतां। यजतां गच्छतां वा ॥

॥ अथाष्टमी ॥

भारतीळे सरस्वति या वः सर्वा उपब्रुवे। ता नश्चोदयत श्रिये ॥ ८ ॥

भारति। इळे। सरस्वति। याः। वः। सर्वाः। उपऽब्रुवे। ताः। नः। चोदयत। श्रिये ॥ ८ ॥

हे भारति। भरत आदित्यः। तस्य संबंधिनी भारती। तादृशि द्युलोकदेवते। हे इळे भूदेवि। हे सरस्वति। सरो वागुदकं वा। तद्वत्यंतरिक्षदेवते। तादृशि देवि। एताः क्षित्यादिदेवताः। एतास्तिस्र आदित्यप्रभावविशेषरूपा इत्याहुः। यास्तिस्रः सर्वा वो युष्मानुपब्रुवे। उपेत्य स्तौमि। ता यूयं नोऽस्मान् श्रिये संपदे चोदयत। प्रेरयत ॥

॥ अथ नवमी ॥

त्वष्टा रूपाणि हि प्रभुः पशून्विश्वान्त्समानजे। तेषां नः स्फातिमा यज ॥ ९॥

त्वष्टा। रूपाणि। हि। प्रऽभुः। पशून्। विश्वान्। संऽआनजे। तेषां। नः। स्फातिं। आ। यज ॥ ९॥

त्वष्टा यज्ञसाधनपात्राभिमानी देवो रूपाणि योनौ सृष्टानि रेतांसि रूपाणि कर्तुं प्रभुर्हि। हिशब्दः श्रुत्यंतरप्रसिद्धिद्योतनार्थः। रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोतीति श्रुतेः। स देवो विश्वान् सर्वानपि पशूनस्मदीयान् गवादिकान् समानजे। सम्यगनक्ति। व्यक्तीकरोति॥ संपूर्वादनक्तेर्लिटि तस्मान्नुडिति नुट्॥ अथ प्रत्यक्षः। तेषामक्तानां पशूनां स्फातिं वृद्धिं नोऽस्मदर्थमायज। सर्वतः पूजय। कुर्वित्यर्थः॥

॥ अथ दशमी ॥

उप त्मन्या वनस्पते पाथो देवेभ्यः सृज। अग्निर्हव्यानि सिष्वदत्॥ १०॥

उप। त्मन्या। वनस्पते। पाथः। देवेभ्यः। सृज। अग्निः। हव्यानि। सिस्वदत्॥ १०॥

हे वनस्पते यूपाभिमानि देव त्मन्या आत्मनैव देवेभ्योऽग्न्यादिभ्यः पाथः पशुरूपमन्नमुपसृज। उत्पादय। यूपाभावे पशुनियोजनाभावेन हविषोऽभावात्। त्वय्येवं कृतवति सत्यग्निर्हव्यानि हवींषि सिस्वदत्। स्वदयतु। स्वादूकरोतु॥

॥ अथैकादशी ॥

पुरोगा अग्निर्देवानां गायत्रेण समज्यते। स्वाहाकृतीषु रोचते॥ ११॥

पुरःऽगाः। अग्निः। देवानां। गायत्रेण। सं। अज्यते। स्वाहाऽकृतीषु। रोचते॥ ११॥

अयमग्निर्देवानां पुरोगा असुरयुद्धं प्रति पुरोगामी। यद्वा देवानां मध्ये यज्ञं प्रत्यग्निरेव पुरोगामी। अत एवाग्रणीत्वादेवाग्निशब्दो निष्पन्नः। अग्निः कस्मादग्रणीर्भवतीति निरुक्तं। तादृशोऽयं गायत्रेणैतदुपलक्षितेन मंत्रेण समज्यते। सम्यक् लक्ष्यते। स्वाहाकृतीषु स्वाहाकारेषु सत्सु हविःषु दीयमानेषु रोचते। अत्यर्थं दीप्यते। एताः प्रयाजदेवता यज्ञावयवाभिमानिन्यः। तद्द्वारा यज्ञ एव स्तूयत इति केषांचिन्मतं। अग्नेरेव नामांतरमित्यन्ये॥

॥ इति द्वितीयस्य पंचमे नवमो वर्गः॥

अग्ने नयेति दशमं सूक्तमष्टर्चमागस्त्यं त्रैष्टुभमाग्नेयं। अग्ने नयाष्टावाग्नेयमित्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभच्छंदसि विनियोगः। अथैतस्या इत्यत्राग्ने नयाग्ने बृहन्नित्यष्टानामुत्तमादुत्तमास्तिस्र उद्धरेत्। आ० ४. १३.। इति सूचितत्वात्॥ अत्र शौनकः। उत्पथप्रतिपन्नो यो भ्रष्टो वापि पथः क्वचित्। पंथानं प्रतिपद्येत कृत्वा वा कर्म गर्हितं॥ अग्ने नयेति सूक्तेन प्रत्यृचं जुहुयाद्धृतं। जपेच्च प्रयतो नित्यमुपतिष्ठेत वानलं। ऋग्वि० १. २६.। इति॥ आद्यास्चतस्रः श्रावणाकर्मणि विनियुक्ताः। श्रावण्यां पौर्णमास्यामित्यत्र सूचितं। अग्ने नय सुपथा राये अस्मानिति चतसृभिः प्रत्यृचं हुत्वा। आ० गृ० २. १.। इति॥ आग्नेये पशौ वपापुरोडाशयोराद्ये द्वे अनुवाक्ये। तथा च सूचितं। अग्ने नय सुपथा राये अस्मान् पाहि नो अग्ने पायुभिरजस्रैः। आ० ३. ७.। इति॥ आद्या प्रायणीयेष्टावाग्नेयस्यानुवाक्या। सैवोदयनीये याज्या। तदहः प्रायणीयेष्टिरित्यत्र सूचितं। अग्ने नय सुपथा राये अस्माना देवानामपि पंथामगन्म। आ० ४. ३.। इति। विपरीताश्च याज्यानुवाक्या इति च॥

॥ तत्र सूक्ते प्रथमा ॥

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।
युयोध्य१स्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १॥

अग्ने। नय। सुऽपथा। राये। अस्मान्। विश्वानि। देव। वयुनानि। विद्वान्।
युयोधि। अस्मत्। जुहुराणं। एनः। भूयिष्ठां। ते। नमःऽउक्तिं। विधेम ॥ १॥

हे अग्ने अंगनादिगुणविशिष्ट देव द्योतमान विश्वानि वयुनानि सर्वाणि प्रज्ञानानि। अनेनैतदनुष्ठितमिदं प्रायणीयमिति यदेतज्ज्ञानमस्ति तद्विद्वानित्यर्थः। यतो विद्वान् अतस्त्वमस्मान् सुपथा शोभनेन मार्गेण राये गंतव्याय स्वर्गादिधनाय॥ द्वितीयार्थे वा चतुर्थी॥ प्रापणीयं रयिं प्रति नय। तदर्थं जुहुराणं कुटिलकार्येनः पापं फलप्रतिबंधरूपमस्मत् अस्मत्तो युयोधि। पृथक् कुरु। ते तव वयं भूयिष्ठामतिप्रवृद्धां नमउक्तिं नमस्कारोक्तिं स्तुतिं विधेम। परिचरेम। कुर्मः॥

आयुष्कामेष्ट्यामग्ने त्वं पारयेति द्वे स्विष्टकृतो याज्ये पाहि न इति चतुर्थ्यनुवाक्या। पाहि नो अग्ने पायुभिरजस्रैरग्ने त्वं पारया नव्यो अस्मानिति संयाज्ये। आ० २. १०.। इति सूचितं॥ एते एव स्वस्त्ययन्यामपि संयाज्ये इति सूचितत्वात्॥

॥ सैषा द्वितीया ॥

अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥ २ ॥
अग्ने । त्वं । पारय । नव्यः । अस्मान् । स्वस्तिऽभिः । अति । दुःऽगानि । विश्वा ।
पूः । च । पृथ्वी । बहुला । नः । उर्वी । भव । तोकाय । तनयाय । शं । योः ॥ २ ॥

हे अग्ने त्वं नव्यो नवतरः स्तुत्यो वा त्वमस्मान् यागानुष्ठातॄन्पारय । कर्म समापय्यातिपारय । अतिक्रामय । केन साधनेन । स्वस्तिभिः । अस्तिरभिपूजितः । सुशब्दः शोभनवचनः । अत्यंतं पूजितैर्यज्ञादिसाधनैः । कानि । दुर्गाणि । दुर्गमनानि पापानि । अनतिक्रमणीयानि दुरिताख्यान्यतिपारय । किंच नोऽस्माकं पृथ्वी पृथुतरा पूश्च पुर्यपि भवत्विति शेषः । चशब्दो वक्ष्यमाणेन सह समुच्चयार्थः । पूरिति जात्येकवचनं । पुराण्यपि भवंत्वित्यर्थः । तथा नोऽस्माकमुर्वी पृथ्व्यपि बहुतरा भवतु । त्वं तु तोकायापत्याय तनयाय पुत्राय । तोकशब्दोऽपत्यसामान्यवचनः । तनयशब्दः पुत्रवचनः । शं सुखं योर्मिश्रयिता भव । यद्वा रोगाणां शमनं भयानां यावनं च भव । कुर्वित्यर्थः ॥

॥ अथ तृतीया ॥

अग्ने त्वमस्मद्युयोध्यमीवा अनग्निना अभ्यमंत कृष्टीः ।
पुनरस्मभ्यं सुविताय देव क्षां विश्वेभिरमृतेभिर्यजत्र ॥ ३ ॥
अग्ने । त्वं । अस्मत् । युयोधि । अमीवाः । अनग्निऽत्राः । अभिऽअमंत । कृष्टीः ।
पुनः । अस्मभ्यं । सुविताय । देव । क्षां । विश्वेभिः । अमृतेभिः । यजत्र ॥ ३ ॥

हे अग्ने त्वममीवा रोगानस्मत् अस्मत्तो युयोधि । व्यावर्तय । या अनग्निना अग्निनापालयिताः कृष्टीः प्रजा अभ्यमंत । अभिमिमतेऽस्मान् ॥ यच्छब्दाध्याहारादनिघातः ॥ ता युयोधि । यद्वा ता अनग्नित्राः पापिन्यः कृष्टयः प्रजा अभ्यमंत । त्वयाभ्यमितुमभितो रोगैः प्रापयितुमर्हंति । वयं तु न तादृशाः । अतोऽस्मत्तो वियोजयेत्यर्थः । न केवलं वियोगमात्रं । अपि तु पुनःपुनरिदं कर्तव्यं । अस्मभ्यमस्मदर्थं सुविताय शोभनफलाय हे यजत्र यष्टव्य देव द्योत-

मानाग्ने विश्वेभिरमृतेभिः सर्वैरमरणधर्मभिरन्यैर्यष्टव्यैर्देवैः सह क्षां पृथिवीं देवयजनलक्षणामागच्छेति शेषः ॥

पाहि न इत्यस्या विनियोगद्वयमग्ने त्वं पारयेत्यत्रोक्तं । तथाग्नेयपशावेषैव हविषोऽनुवाक्या । तथा च सूचितं । पाहि नो अग्ने पायुभिरजस्रैः प्र वः शुक्राय भानवे भरध्वं । आ॰ ३. ७. । इति ॥

॥ सैषा चतुर्थी ॥

पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुक्वान् ।
मा ते भयं जरितारं यविष्ठ नूनं विदन्मापरं सहस्वः ॥ ४ ॥

पाहि । नः । अग्ने । पायुऽभिः । अजस्रैः । उत । प्रिये । सदने । आ । शुशुक्वान् ।
मा । ते । भयं । जरितारं । यविष्ठ । नूनं । विदत् । मा । अपरं । सहस्वः ॥ ४ ॥

हे अग्ने नोऽस्मानजस्रैरनवरतैरविच्छिन्नैः पायुभिः पालनप्रकारैः पाहि । पालय । उत अपि च प्रिये सदने तव प्रियभूते यागगृह आ सर्वतः शुशुक्वान् । दीप्यमानो भवेति शेषः । किंच हे यविष्ठ युवतम ते तव जरितारं गरितारं स्तोतारं मां नूनमद्य भयं मा विदत् । मा लभतां । माप्नोतु । हे सहस्वो बलवन्नग्नेऽपरमपरस्मिन्काले भयं मा विदत् । अपरं मदन्यं वा मा विदत् ॥

अच्युताय भौमायैककपालपुरोडाशहोमे मा नो अग्न इत्यनयाशयमभिजुहोति । तथा च सूचितं । मा नो अग्नेऽव सृजो अघायेत्येनमाशयेनाभिजुहोति । आ॰ गृ॰ २. १. । इति ॥

॥ सैषा पंचमी ॥

मा नो अग्नेऽव सृजो अघायाविष्यवे रिपवे दुच्छुनायै ।
मा दत्वते दशते मादते नो मा रीषते सहसावन्परा दाः ॥ ५ ॥

मा । नः । अग्ने । अव । सृजः । अघाय । अविष्यवे । रिपवे । दुच्छुनायै ।
मा । दत्वते । दशते । मा । अदते । नः । मा । रिषते । सहसाऽवन् । परा । दाः ॥ ५ ॥

हे अग्ने नोऽस्मानघाय हिंसकायाविष्यवे । अविष्यतिरत्तिकर्मा । अन्नेच्छवे दुच्छुनायै । शुनं सुखं । दुष्टसुखकारिणे । दुःखकारिण इत्यर्थः । तस्मै रिपवे मावसृजः । मा त्याक्षीः । तदधीनं मा कुर्वित्यर्थः । तथा नोऽस्मान्दत्वते दंतवते

दशते खादते सर्पादये मावसृजः। तथा नोऽस्मानदतेऽदंतकाय शृंगादिभिर्घातिने मावसृजः। तथा रिषते हिंसकाय तस्कराक्षसादये हे सहसावन् सहस्विन् मा परा दाः। पराभूतं मा देहि। सर्वथा न देहीत्यर्थः॥

॥ इति द्वितीयस्य पंचमे दशमो वर्गः॥

॥ अथ षष्ठी॥

वि घ त्वावाँ ऋतजात यंसद्गृणानो अग्ने तन्वे३ वरूथं।
विश्वाद्रिरिक्षोरुत वा निनित्सोरभिह्रुतामसि हि देव विष्पट्॥ ६॥
वि। घ। त्वाऽवान्। ऋतऽजात। यंसत्। गृणानः। अग्ने। तन्वे। वरूथं।
विश्वात्। रिरिक्षोः। उत। वा। निनित्सोः। अभिऽह्रुतां। असि। हि। देव। विष्पट्॥ ६॥

हे ऋतजात यज्ञार्थमुत्पन्नाग्ने वरूथं वरणीयं त्वां तन्वे शरीरपोषाय गृणानः स्तुवन् त्वावान् त्वया देवतया तद्वान् जनो वि घ यंसत्। विमुंचति खल्वात्मानं। कस्मात्सकाशात्। रिरिक्षोर्हिंसितुमिच्छोश्चोरादेः सकाशात्। उत वा अथवा निनित्सोर्निंदितुमिच्छतः। हे देव अभिह्रुतामाभिमुख्येन कुटिलं कुर्वतां द्विषां विष्पट् विशेषेण बाधकोऽसि हि। अतस्त्वदनुग्रहादयं जनो वियंसत्॥

॥ अथ सप्तमी॥

त्वं ताँ अग्न उभयान्वि विद्वान्वेषि प्रपित्वे मनुषो यजत्र।
अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भिर्नाक्रः॥ ७॥
त्वं। तान्। अग्ने। उभयान्। वि। विद्वान्। वेषि। प्रऽपित्वे। मनुषः। यजत्र।
अभिऽपित्वे। मनवे। शास्यः। भूः। मर्मृजेन्यः। उशिक्ऽभिः। न। अक्रः॥ ७॥

हे यजत्र यष्टव्याग्ने त्वं तान्यष्टृनयष्टृंश्चोभयान्मनुषो मनुष्यान्विविच्य विद्वान् जानन् प्रपित्वे संनिहित एव काले वेषि। कामयसे यष्टृन्। तथा कुर्वन् अक्र आक्रमिता त्वं मनवे॥ षष्ठ्यर्थे चतुर्थी॥ मनुष्यस्य यजमानस्याभिपित्वेऽभिप्राप्तकालेऽभिगमनवति यज्ञे वा शास्यो भूः। शिक्षणीयो भव। इदं कुर्विदं कुर्विति विधेयो भव। मर्मृजेन्यः शोधयिता यजमान उशिग्भिः कामयमानैर्ऋत्विग्भिरिव॥

॥ अथाष्टमी ॥

अवोचाम निवचनान्यस्मिन्मानस्य सूनुः सहसाने अग्नौ ।
वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुं ॥ ८ ॥
अवोचाम । निऽवचनानि । अस्मिन् । मानस्य । सूनुः । सहसाने । अग्नौ ।
वयं । सहस्रं । ऋषिऽभिः । सनेम । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ८ ॥

वयमस्मिन्नग्नौ निवचनानि नियमपूर्वकाणि वचांसि स्तोत्ररूपाण्यवोचाम । ब्रूमः । अग्निर्विशेष्यते । मानस्य सूनुः । मीयत इति मानो मंत्रः । तस्य सूनुरग्निर्मंत्रेणोत्पद्यमानत्वात् ॥ सप्तम्यर्थे प्रथमा ॥ मानस्य सूनौ । सहसाने शत्रूणामभिभवितर्यग्नाववोचाम । वयमेभिर्ऋषिभिरतींद्रियार्थप्रकाशकैर्मंत्रैः साधनैः सहस्रमपरिमितं धनं सनेम । संभजेमहि । विद्यामेति गतं ॥

॥ इति द्वितीयस्य पंचम एकादशो वर्गः ॥

अनर्वाणमित्यष्टर्चमेकादशं सूक्तमागस्त्यं बार्हस्पत्यं त्रैष्टुभं । अनर्वाणं बार्हस्पत्यमित्यनुक्रांतं । श्रौतविनियोगो लैंगिकः ॥ अत्र शौनकः । स्नात्वा जपेदनर्वाणं नमस्कृत्य बृहस्पतिं । वीरान्धनं च प्राप्नोति सोऽश्लोक्यं च नियच्छति । ऋग्वि॰ १. २७. । इति ॥

॥ तत्र प्रथमा ॥

अनर्वाणं वृषभं मंद्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः ।
गाथान्यः सुरुचो यस्य देवा आशृण्वंति नवमानस्य मर्ताः ॥ १ ॥
अनर्वाणं । वृषभं । मंद्रऽजिह्वं । बृहस्पतिं । वर्धय । नव्यं । अर्कैः ।
गाथान्यः । सुऽरुचः । यस्य । देवाः । आऽशृण्वंति । नवमानस्य । मर्ताः ॥ १ ॥

हे होतर्नव्यं नवतरं स्तुत्यं वा तमनर्वाणमगंतारं । स्तोतुरधीनमित्यर्थः । वृषभमपां फलानां वर्षितारं मंद्रजिह्वं मादकवाचं बृहस्पतिं मंत्रस्य पालयितारमेतन्नामकं देवमर्कैरर्चनसाधनैर्मंत्रैर्वर्धय । प्रवृद्धं कुरु । सुरुचः शोभनदीप्तेर्नवमानस्य स्तूयमानस्य ॥ कर्मणि कर्तृप्रत्ययः ॥ यस्य बृहस्पतेः ॥ कर्मणि षष्ठ्यः ॥ रोचमानं स्तूयमानं गाथान्यः । गाथेति वाङ्नाम । स्तुतिवचसो नेतारो देवा व्यवहर्तारो मर्ता मनुष्या होत्रादयः । यद्वा नवमानस्य स्तुवानस्य यज-

मानस्य संबंधिनस्ते। आगृणंति। आश्रावयंति पुरा। तं बृहस्पतिं वर्धय। अचानर्वाणमप्रत्यृतमन्यस्मिन्नित्यादि निरुक्तं द्रष्टव्यं। नि० ६. २३.॥

बार्हस्पत्ये पशौ तमृत्वियेत्येषा वपायाज्या। सूचितं च। बृहस्पते अति यदर्यो अर्हात्तमृत्विया उप वाचः सचंते। आ० ३. ७.। इति ॥

॥ सैषा द्वितीया ॥

तमृत्विया उप वाचः सचंते सर्गो न यो देवयतामसर्जि।

बृहस्पतिः स ह्यंजो वरांसि विभ्वाभवत्समृते मातरिश्वा ॥२॥

तं। ऋत्वियाः। उप। वाचः। सचंते। सर्गः। न। यः। देवऽयतां। असर्जि।

बृहस्पतिः। सः। हि। अंजः। वरांसि। विऽभ्वा। अभवत्। सं। ऋते। मातरिश्वा ॥२॥

तं बृहस्पतिमृत्विया वर्षर्तुसंबंधिन्यो वाचो माध्यमिका उप सचंते। समीपे सेवंते। यः सर्गो न। उदकस्य स्रष्टापि ॥ नशब्दोऽप्यर्थे ॥ देवयतां देवानिच्छतां यजमानानामसर्जि फलं। यद्वा देवत्वमिच्छतां मनुष्याणामसर्जि सृष्टवान्वृष्ट्युदकं। यद्वा ऋत्वियाः प्राप्तकालीना वाचो होत्रादिप्रेरिता वाच उप सचंते तं यः सर्गो न। उदकसृष्टिरिव। सः स एव बृहस्पतिरंजो हि। व्यंजकः खलु। तस्मिन्वर्षति सर्वे भवंति। अत एव विभ्वा विभुर्व्याप्तो मातरिश्वा वृष्टिनिर्मातर्यंतरिक्षे चेष्टमानो वायुसदृशो वा वरांसि वरणीयानि वृष्ट्यादिफलानि संपादयन् ऋत उदके निमित्तभूते सति समभवत्। संभूतः। अथवा अंजो यज्ञियानां व्यंजको मातरिश्वा फलस्य निर्मातरि यज्ञे श्वसिता वर्तमानः स बृहस्पतिर्ऋते यज्ञे निमित्तभूते सति वरांसि वरणीयाणि हवींषीच्छन् विभ्वा विभुः समभवत् ॥

॥ अथ तृतीया ॥

उपस्तुतिं नमस उद्यतिं च श्लोकं यंसत्सवितेव प्र बाहू।

अस्य क्रत्वाहन्यो३यो अस्ति मृगो न भीमो अरक्षसस्तुविष्मान् ॥३॥

उपऽस्तुतिं। नमसः। उत्ऽयतिं। च। श्लोकं। यंसत्। सविताऽइव। प्र। बाहू इति।

अस्य। क्रत्वा। अहन्यः। यः। अस्ति। मृगः। न। भीमः। अरक्षसः। तुविष्मान् ॥३॥

अयं बृहस्पतिरुपस्तुतिं यजमानेनोपेत्य क्रियमाणां स्तुतिं नमसो हविर्लक्ष-

णस्यान्नस्योद्यतिमुद्धारं च श्लोकं अन्यो यो मंत्रविशेषोऽस्ति तं च प्रयंसत् । प्रकर्षेण यतते स्वीकर्तुं । यजमानो वा तत्सर्वं प्रयच्छत्यस्मै । तत्र दृष्टांतः । सवितेव । सूर्य इव । स यथा स्तोत्रादिकं स्वीकरोति तद्वत् । यजमानप्रदानपक्षे सविता सर्वस्य प्रसविता सूर्य इव । स यथा बाहुभ्यः प्रकाशादि प्रयच्छति तद्वद्बाहू बाहुभ्यां यजमानोऽपीत्यर्थः । तस्य महत्त्वमाह । अरक्षसः स्वविरोधिरक्षोरहितस्यास्य बृहस्पतेः क्रत्वा कर्मणा सामर्थ्येनाहन्योऽह्नि साधुर्यः सूर्योऽस्ति स भीमो न मृग इव भयजनकः सिंहादिरिव भीमो भयहेतुस्तुविष्मान् बलवान् परिभ्रमतीति शेषः । यस्य माहात्म्येन मंत्राभिमानिनो बृहस्पतेः सामर्थ्यान्मंदेहाद्यसुराञ्जित्वातितेजस्वी भवति तादृशो महानुभावो यजमानदत्तं हविरादिकं स्वीकरोतीत्यर्थः ॥

॥ अथ चतुर्थी ॥

अस्य श्लोको दिवीयते पृथिव्यामत्यो न यंसद्यक्षभृद्विचेताः ।
मृगाणां न हेतयो यंति चेमा बृहस्पतेरहिमायाँ अभि द्यून् ॥ ४ ॥

अस्य । श्लोकः । दिवि । ईयते । पृथिव्यां । अत्यः । न । यंसत् । यक्षऽभृत् । विऽचेताः ।
मृगाणां । न । हेतयः । यंति । च । इमाः । बृहस्पतेः । अहिऽमायान् । अभि । द्यून् ॥ ४ ॥

अस्य बृहस्पतेः श्लोकः स्तुत्यात्मका कीर्तिर्गर्जितवाग्वा दिवि द्योतमाने द्युलोके पृथिव्यां चेयते । गच्छति । व्याप्नोति । यो बृहस्पतिरत्यो न अतनशील आदित्य इव यक्षभृत् पूजितं हविरादिकं दधानो विचेता विविधं चेतयिता प्राणिनां विशिष्टप्रज्ञायुक्तो वा यंसत् । नियच्छति फलं । किंच मृगाणां हंतुमन्विषतां हेतयो न आयुधानीवास्य बृहस्पतेरिमा हेतयो हिंसाख्यायुधानि यंति । गच्छंति च ॥ चवायोगे प्रथमेति न निघातः ॥ अहिमायान् आगत्य हंत्र्योऽतरिक्षचारिण्यो वा माया येषां वृत्रादीनां तानसुरान् द्यून् दिवसान् ॥ कालाध्वनोरिति द्वितीया ॥ तान्यायुधान्यभि लक्ष्यंति च । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥

॥ अथ पंचमी ॥

ये त्वा देवोस्रिकं मन्यमानाः पापा भद्रमुपजीवंति पज्राः ।
न दूढ्ये३ अनु ददासि वामं बृहस्पते चयस इत्पियारुं ॥ ५ ॥

ये। त्वा। देव। उस्रिकं। मन्यमानाः। पापाः। भद्रं। उपऽजीवंति। पज्राः।
न। दुःऽध्ये। अनु। ददासि। वामं। बृहस्पते। चयसे। इत्। पियारुं ॥ ५ ॥

हे देव बृहस्पते ये पापाः पापबुद्धयोऽल्पाः पज्रा हविर्लक्षणान्नवंतः पापेन जीर्णा वा नरा भद्रं कल्याणं त्वा त्वामुस्रिकं। उस्रियेति गोनाम। कुत्सितामल्पक्षीरोत्स्राविणीं गां जीर्णमनड्वाहं वा मन्यमाना उपजीवंति। उपेत्य प्राणंति। अल्पं याचंत इत्यर्थः। दूढ्ये दुर्धिये ॥ वचनव्यत्ययः ॥ दुर्बुद्धिभ्यस्तेभ्यो वामं वननीयं धनं नानुददासि। अनुकूलं न वितरसि। हे बृहस्पते देव पियारुं सोमपानशीलं सोमेन यष्टारं महाफलरिप्सुं तु चयस इत्। गच्छस्येवानुग्रहीतुं ॥ चय गतावित्यस्येदं रूपं ॥ यद्वा हे बृहस्पते पियारुं हिंसकं ॥ पीयतेर्हिंसाकर्मण इदं रूपं ॥ तं प्राणिहिंसकं चयस इत्। हंस्येव ॥ बृहस्पते यच्चातयसि देवपीयुमिति निरुक्तं। ४. २५. ॥

॥ इति द्वितीयस्य पंचमे द्वादशो वर्गः ॥

॥ अथ षष्ठी ॥

सुप्रैतुः सूयवसो न पंथा दुर्नियंतुः परिप्रीतो न मित्रः।
अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवंतो अस्थुः ॥ ६ ॥
सुऽप्रैतुः। सुऽयवसः। न। पंथाः। दुःऽनियंतुः। परिऽप्रीतः। न। मित्रः।
अनर्वाणः। अभि। ये। चक्षते। नः। अपिऽवृताः। अपऽऊर्णुवंतः। अस्थुः ॥ ६ ॥

हे बृहस्पते त्वं सुप्रैतुः सुष्ठु गंतुर्मनुष्यस्य सुयवसः शोभनान्नस्य पंथा न। मार्ग इव। सुष्ठु यज्ञमार्गगामिनो सुयवसः पंथा इव। सुखकारी भवेत्यर्थः। किंच दुर्नियंतुर्दुःखेन नियमितॄ राज्ञः परिप्रीतः सर्वप्रकारेण संतुष्टो द्वेषादिरहितो मित्रो न। सुहृन्मंत्रीव। स यथा दुर्नयान्निवर्तयति तद्वत् त्वमपि तथास्मभ्यं कुर्वित्यर्थः। सखिवदमार्गान्निवर्त्य मार्गे यज्ञादिरूपे योजयित्वा तत्रापि फलप्रदो भवेत्यर्थः। किंच अनर्वाणोऽपापा ये नरा नोऽस्मानभि आभिमुख्येन चक्षते बोधयंति तेऽपीवृता अज्ञानेनावृता अपपोर्णुवंतोऽपगतावरणवंतो ज्ञानवंतोऽस्थुः। तिष्ठंतु। यद्वा अनर्वाणस्त्वामप्राप्नुवंतो येऽस्मद्विरोधिनो नोऽस्मानभिचक्षते। अभिवदंति निंदंति तेऽपीवृता आच्छादिता रक्षिता अपपोर्णुवंतोऽपगतरक्षणा भवंति ॥

सं यं स्तुभ इत्येषा बार्हस्पत्ये पशौ पुरोडाशस्य याज्या। सूचितं च। सं यं स्तुभोऽवनयो न यंत्येवा पित्रे। आ० ३. ७.। इति ॥

॥ सैषा सप्तमी ॥

सं यं स्तुभोऽवनयो न यंति समुद्रं न स्रवतो रोधचक्राः।
स विद्वाँ उभयं चष्टे अंतर्बृहस्पतिस्तर आपश्च गृध्रः ॥ ७ ॥
सं। यं। स्तुभः। अवनयः। न। यंति। समुद्रं। न। स्रवतः। रोधऽचक्राः।
सः। विद्वान्। उभयं। चष्टे। अंतः। बृहस्पतिः। तरः। आपः। च। गृध्रः ॥ ७ ॥

यं बृहस्पतिं स्तुभः स्तोत्राण्यवनयो न। सर्वा अवनयो भूमयो मनुष्या यथा स्वामिनं कर्म प्रति वा संयंति संगच्छंति तद्वत्। तथा समुद्रं रोधचक्राः ॥ नदीनामैतत् ॥ रोधनशीलानि चक्राणि यासु तास्ताहश्यः कूलं क्रममाणा वा स्रवंतः स्रवंत्यो नद्यो यथा यंति तद्वत् सर्वा अपि स्तुतयस्त्वामेव प्राप्नुवंति। गृध्रो गर्धनशीलो वृष्टिमाकांक्षमाणः स बृहस्पतिर्विद्वान् वक्ष्यमाणाभिज्ञस्तरस्तरणं जलाभिवृद्धिमाप उदकानि चोभयमंतर्मध्ये स्थित्वा चष्टे। पश्यति। करोतीत्यर्थः ॥

॥ अथाष्टमी ॥

एवा महस्तुविजातस्तुविष्मान्बृहस्पतिर्वृषभो धायि देवः।
स नः स्तुतो वीरवद्धातु गोमद्विद्यामेषं वृजनं जीरदानुं ॥ ८ ॥
एव। महः। तुविऽजातः। तुविष्मान्। बृहस्पतिः। वृषभः। धायि। देवः।
सः। नः। स्तुतः। वीरऽवत्। धातु। गोऽमत्। विद्याम। इषं। वृजनं। जीरऽदानुं ॥ ८ ॥

महो महान् तुविजातो बह्वर्थमुत्पन्नस्तुविष्मान् बलवान् वृषभोऽपां वर्षिता देवो बृहस्पतिरेव एवं स्तुतिप्रकारेण धायि। धीयते। स्तूयत इत्यर्थः। स स्तुतो देवो नोऽस्माकं वीरवत्पुत्राद्युपेतं गोमद्गोभिर्युक्तं फलं धातु। करोत्वित्यर्थः। विद्यामेति गतं ॥

॥ इति द्वितीयस्य पंचमे त्रयोदशो वर्गः ॥

कंकत इति षोडशर्चं द्वादशं सूक्तं। ऋषिरगस्त्यः। अप्तृणसूर्यास्त्रयो देवताः। त्रिष्टुप् छंदः। सूर्ये विषमित्याद्यास्तिस्रो महापंक्तयः। अष्टकौ सप्तकः षट्को दशको

नवकश्चेत्युक्तलक्षणोपेतत्वात् । नवानामित्येषा त्रयोदशी महाबृहती । चत्वारोऽष्टका जागतश्च महाबृहतीति ह्युक्तं । अत्र यद्यप्यक्षराणि न्यूनानि तथापि व्यूहेन पूरणीयानि । अत्रानुक्रमणिका । कंकतः षोडशोपनिषदानुष्टुभमन्तृणसौर्ये विषशंकावानगस्त्यः प्राब्रवीद्दशम्याद्याश्च तिस्रो महापंक्तयो महाबृहती चेति । उपनिषदिति रहस्यमित्यर्थः । विषशंकायुक्तोऽगस्त्यस्तत्परिहारायेदमुक्तवान् ॥ श्रौतस्य विशेषविनियोगो लैंगिकः ॥ अत्र शौनकः । कंकतो नेति सूक्तं तु विषार्त्तः प्रयतो जपेत् । विषं न क्रमते चास्य सर्पादृष्टिविषादपि ॥ यत्कीटलूतासु विषं दंष्ट्रिवृश्चिकतश्च यत् । मूलं च कृत्रिमं चैव जपन् सर्वमपोहति । ऋग्वि॰ १. २७. । इति ॥

॥ तत्र प्रथमा ॥

कंकतो न कंकतोऽथो सतीनकंकतः ।
द्वाविति प्लुषी इति न्य१दृष्टा अलिप्सत ॥ १ ॥
कंकतः । न । कंकतः । अथो इति । सतीनऽकंकतः ।
द्वौ । इति । प्लुषी इति । इति । नि । अदृष्टाः । अलिप्सत ॥ १ ॥

कंकतोऽल्पविषः कश्चित् न कंकतस्तद्विपरीतोऽनल्पविषो महोरगादिः ॥ तकतेर्गत्यर्थस्य वर्णव्यत्ययेन कंकत इति सरन् भवति ॥ अथो अपि च सतीनकंकतः ॥ सतीनमित्युदकनाम । सतीनं गहनमिति तन्नामसु पाठात् ॥ उदकचार्यल्पविषवान् कश्चिद्दुंडुभादिः । एवं द्वाविति । अल्पविषमहाविषभेदेन जलस्थलभेदेन वा द्विप्रकाराविति । प्लुषी इति । प्लोषणाविति । प्रकारद्वैविध्यदाहकत्वयोः प्रतिपादनायेतिकारद्वयं । तथादृष्टा अदृश्यमानरूपा एतत्संज्ञकाश्च केचिद्विषधरा एवमुक्तप्रकारा ये संति ते नूनं मां न्यलिप्सत । विशेषेण लिंपंति । सर्वाण्यंगानि विषमावृणोति । केनैवं कृतमिति ज्ञायत इति भावः ॥

॥ अथ द्वितीया ॥

अदृष्टान्हंत्यायत्यथो हंति परायती ।
अथो अवघ्नती हंत्यथो पिनष्टि पिंषती ॥ २ ॥
अदृष्टान् । हंति । आऽयती । अथो इति । हंति । पराऽयती ।
अथो इति । अवऽघ्नती । हंति । अथो इति । पिनष्टि । पिंषती ॥ २ ॥

अनेन विषघ्योषधिः स्तूयते। आयती विषदष्टस्य सकाशमागच्छंती विषनिर्हरणसाधनौषधिरदृष्टान् अदृश्यमानान्विषधरान्हंति। हिनस्ति। अथो अपि च परायती परागच्छंती संमार्जनसमयेऽर्वाक्प्रवृत्ता हंति। नाशयति जलचरविषधरान्। अथो अपि चावघ्नती ॥ कर्मणि कर्तृप्रत्ययः ॥ अवहन्यमानौषधिः स्वगंधेन हंति बहुविषान्। यद्वा काचिदोषधिर्दंशकान्मारयत्येव। अथो अपि च पिंषती पेषणकर्त्री दृषत्पिष्यमाणा वौषधिः पिनष्टि। चूर्णीकरोत्यल्पविषान्। अथवा सर्वेषु वाक्येष्वविशेषेण सर्वविषकारिणां नाश उक्तः ॥

॥ अथ तृतीया ॥

शरासः कुशरासो दर्भासः सैर्या उत।
मौंजा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत ॥ ३ ॥
शरासः। कुशरासः। दर्भासः। सैर्याः। उत।
मौंजाः। अदृष्टाः। वैरिणाः। सर्वे। साकं। नि। अलिप्सत ॥ ३ ॥

अन्यांश्च विषहेतूनाह। शरासः शरा वेणुदंडसदृशा अंतश्छिद्रास्तृणविशेषाः। कुशरासः कुत्सितशरा अंतश्छिद्राः शरसदृशास्तृणविशेषाः। दर्भासो दर्भाः कुशाः सैर्यास्तटाकादिप्रांतोद्भवास्तृणविशेषा अश्वबाला इति प्रसिद्धाः। मौंजा मुंजाः प्रसिद्धाः। वैरिणा वीरणप्रकाराः। एतेषु वर्तमाना अदृष्टा उक्तरूपाः सर्वे विषधराः साकं मिलित्वा न्यलिप्सत। निलिंपंति स्म ॥

॥ अथ चतुर्थी ॥

नि गावो गोष्ठे असदन्नि मृगासो अविक्षत।
नि केतवो जनानां न्य१दृष्टा अलिप्सत ॥ ४ ॥
नि। गावः। गोऽस्थे। असदन्। नि। मृगासः। अविक्षत।
नि। केतवः। जनानां। नि। अदृष्टाः। अलिप्सत ॥ ४ ॥

गावो गोष्ठे न्यसदन्। निषीदंति। मृगासो मृगा न्यविक्षत। निविष्टाः। स्वस्वस्थान उपरताः। जनानां प्राणिनां केतवः प्रज्ञानानि नि। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ नीचान्यभवन्। एतेऽस्मिन्समयेऽदृष्टा अदृश्यमानरूपाः संतो न्यलिप्सत। निलिंपंति विशेषेण ॥

॥ अथ पंचमी ॥

एत उ त्ये प्रत्यदृश्रन्प्रदोषं तस्करा इव ।
अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन ॥ ५ ॥
एते । ऊं इति । त्ये । प्रति । अदृश्रन् । प्रऽदोषं । तस्कराःऽइव ।
अदृष्टाः । विश्वऽदृष्टाः । प्रतिऽबुद्धाः । अभूतन ॥ ५ ॥

त्ये त एते सर्पाः प्रत्यदृश्रन् । प्रतिदृश्यंते रात्रौ श्वासादिलिंगेन । यद्वा ते रात्रौ हंतारो दिवैते प्रतिदृश्यंते । तत्र दृष्टांतः । प्रदोषं । रात्रिर्दोषा । रात्रिं प्रति तमसाभिभूतासु रात्रिषु तस्करा इव हिंसकाश्चौरा दृश्यंते यथा तद्वत् । कीदृशास्ते । अदृष्टाः । अपरिदृश्यमानाः । विश्वदृष्टाः । विश्वं दृष्टं यैस्ते तादृशाः प्रतिदृश्यंते । अतो हे नराः प्रतिबुद्धा अभूतन । भवत ॥

॥ इति द्वितीयस्य पंचमे चतुर्दशो वर्गः ॥

॥ अथ षष्ठी ॥

द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा ।
अदृष्टा विश्वदृष्टास्तिष्ठतेळयता सु कं ॥ ६ ॥
द्यौः । वः । पिता । पृथिवी । माता । सोमः । भ्राता । अदितिः । स्वसा ।
अदृष्टाः । विश्वऽदृष्टाः । तिष्ठत । इळयत । सु । कं ॥ ६ ॥

अतः परं विषविचिकित्सा । तत्र तावत् हे सर्पा वो युष्माकं द्यौः पिता । पृथिवी माता । सोमो भ्राता । अदितिर्देवमाता स्वसा । एवं महानुभावा महोरगा अदृष्टा अन्यैरदृश्यमानरूपाः स्वयं तु विश्वदृष्टाः सर्वस्य द्रष्टारो यूयं तिष्ठत । स्वस्वस्थाने मां प्रति मा गच्छत । सु सुतरां कं सुखं यथा तथेळयत । ईरयत । गच्छत । सोमशब्देन सोमाधारो द्युलोक उच्यते । पृथिव्यंतरिक्षद्युस्थानस्थाः सर्पाः स्वस्वस्थानं प्राप्नुत । अस्मद्बाधं मा कुरुतेत्यर्थः ॥

॥ अथ सप्तमी ॥

ये अंस्या ये अंग्याः सूचीका ये प्रकंकताः ।
अदृष्टाः किं चनेह वः सर्वे साकं नि जस्यत ॥ ७ ॥

ये। अंस्याः। ये। अंग्याः। सूचीकाः। ये। प्रऽकंकताः।

अदृष्टाः। किं। चन। इह। वः। सर्वे। साकं। नि। जस्यत ॥ ७॥

येऽंस्या अंसार्हा अंसगा अंसे भवा अंसाभ्यां खादंतो वा। तथा येऽंग्या अंगगा अंगेन शरीरेण हंतारो वा लूतिकादयः। सूचीकाः सूचीसदृशपुच्छरोमाणो वृश्चिकाद्याः। ये च प्रकंकताः प्रकृष्टविषाः प्रकृष्टगामिनो वा महोरगा अदृष्टा अदृश्यमानाः किं चन यत्किंचित्सर्पजातमस्ति इहास्मिन् समीपे वो युष्माकं किमस्ति। अतो यूयं सर्वे साकं सह नितरां जस्यत। मुंचतास्मान् ॥ जसु मोक्षणे दैवादिकः ॥

॥ अथाष्टमी ॥

उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा।

अदृष्टान्सर्वाञ्जंभयन्त्सर्वाश्च यातुधान्यः ॥ ८॥

उत्। पुरस्तात्। सूर्यः। एति। विश्वऽदृष्टः। अदृष्टऽहा।

अदृष्टान्। सर्वान्। जंभयन्। सर्वाः। च। यातुऽधान्यः ॥ ८॥

असौ सूर्यः पुरस्तात्पूर्वस्यां दिश्युदेति। कीदृशः सः। विश्वदृष्टः। विश्वे द्रष्टव्या यस्य स तादृशः। अदृष्टहा। अदृष्टा विषविशेषा विषधरविशेषा वा। तेषां हंता। यद्वा अदृष्टमदर्शनमज्ञानमंधकारः। तस्य हंता। सूर्ये उदिते सति सर्वे विषधरा विषाणि वा पलायंते। किं कुर्वन्नुदेतीति चेत् उच्यते। सर्वानदृष्टानद्रष्टव्यान्विषराक्षसादीञ्जंभयन् हिंसयन्। तथा सर्वा यातुधान्यः। यातवो यातनास्तीव्रवेदनाः। तासां धात्रीरुत्पादयित्रीर्महोरगी राक्षसीर्वा जंभयन् पुरस्तादुदेति। अतोऽस्मत्तो निजस्यतेति संबंधः ॥

॥ अथ नवमी ॥

उदपप्तदसौ सूर्यः पुरु विश्वानि जूर्वन्।

आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ॥ ९॥

उत्। अपप्तत्। असौ। सूर्यः। पुरु। विश्वानि। जूर्वन्।

आदित्यः। पर्वतेभ्यः। विश्वऽदृष्टः। अदृष्टऽहा ॥ ९॥

असौ पुरस्ताद्दृश्यमानः सूर्यः सर्वस्य प्रेरक आदित्य उदपप्तत्। ऊर्ध्वं गच्छति ॥ पततेर्लुङि पुमागमे रूपं ॥ किं कुर्वन्। विश्वानि बहूनि विषाणि पुरु प्रभूतं जूर्वन्। हिंसन्। कीदृशोऽसौ। पर्वतेभ्यः पर्ववद्भ्यः प्राणिभ्यस्तेषामुपकारायादित्यो विषोदकादीनामदनशीलः। विश्वदृष्टः। विश्वं दृष्टं येन तादृशः। अदृष्टहा। अदृष्टानां विषविशेषाणां हंता। एवं महानुभावः सूर्य ऊर्ध्वमारोहति। अतो विषशंका न कार्या ॥

॥ अथ दशमी ॥

सूर्ये विषमा सजामि दृतिं सुरावतो गृहे।

सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १० ॥

सूर्ये। विषं। आ। सजामि। दृतिं। सुराऽवतः। गृहे।

सः। चित्। नु। न। मराति। नो इति। वयं। मराम। आरे। अस्य। योजनं। हरिऽस्थाः। मधु। त्वा। मधुला। चकार ॥ १० ॥

आदित्यमंडले चतुर्थेनांगुलिना विषमादाय मधुकृत्य योजयित्वा निर्विषो भवेदिति यदेतद्विषविद्यायामुक्तं तदिदमत्रोच्यते। अहं विषावृतोऽगस्त्यः सूर्ये सर्वस्य प्रेरयितरि मधुविद्यारूपे सूर्यमंडले विषमावृत्य वर्तमानं सूर्य आसजामि। आसक्तं करोमि। तत्र दृष्टांतः। सुरावतो गृहे सुरानिर्मातृसदने दृतिमिव चर्ममयं सुरापात्रमिव। यथा तत्कर्तुर्न दोषाय भवति तद्वद्विषमादित्यस्य न बाधकमित्यर्थः। सो चित्। चित् पूजायां। उः प्रसिद्धौ। पूज्यः स सूर्यः खलु न मराति। न म्रियते। नो वयं मराम। तदनुग्रहात्तत्रैव विषस्य योजितत्वाद्वयमपि न म्रियामहे। उभयोरमरणे कारणमाह। हरिष्ठाः। हरयोऽश्वाः। तेषु स्थित आदित्य आरे दूरेऽस्य विषस्य योजनं प्रापणं चकार। तदेवोच्यते। हे विष त्वा त्वां मध्वमृतं चकार। विषस्य विषभावं दूरेऽपनोद्यामृतीचकारेति। एषैव मधुला मधुदात्री निर्विषीकर्त्री मधुविद्या। यदेतदादित्यस्य विषयोजनं तेन चामृतीकरणं यदस्ति एषा मधुविद्या ॥

॥ इति द्वितीयस्य पंचमे पंचदशो वर्गः ॥

॥ अथैकादशी ॥

इयत्तिका शकुंतिका सका जघास ते विषं।
सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ ११ ॥

इयत्तिका। शकुंतिका। सका। जघास। ते। विषं।
सो इति। चित्। नु। न। मराति। नो इति। वयं। मराम। आरे। अस्य। योजनं। हरिऽस्थाः। मधु। त्वा। मधुला। चकार ॥ ११ ॥

इयत्तिका। इयत्तां कुर्वाणेयत्तावती वा वालेत्यर्थः। शकुंतिका। शकुंतः शकुनः। तस्य स्त्री। तां कपिंजलीमाहुः। सका सा ते तव विषं जघास। भक्षितवती। सा विषहर्त्रीति प्रसिद्धा। सो चित्॥ सा उ इति निपातसमुदाय एकं पदं॥ सापि शकुंतिका न म्रियते नित्यप्रतिपक्षत्वाद्विषस्य। शिष्टं व्याख्यातचरं। अनेन विद्यायां यद्देहावृत्तं विषं तस्य शकुनेभ्य आदित्याय च प्रदानमस्तीत्युक्तं भवति ॥

॥ अथ द्वादशी ॥

त्रिः सप्त विष्पुलिंगका विषस्य पुष्यमक्षन्।
ताश्चिन्नु न मरंति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १२ ॥

त्रिः। सप्त। विष्पुलिंगकाः। विषस्य। पुष्यं। अक्षन्।
ताः। चित्। नु। न। मरंति। नो इति। वयं। मराम। आरे। अस्य। योजनं। हरिऽस्थाः। मधु। त्वा। मधुला। चकार ॥ १२ ॥

त्रिः सप्त त्रिगुणिताः सप्तसंख्याका विष्पुलिंगका विविधाः विष्पुलिंगकाः। सप्तसु जिह्वासु लोहितशुक्लकृष्णभेदेनैकविंशतिर्यासां ताः। यद्वा त्रिः सप्त एकविंशतिभेदा विष्पुलिंगकाः सूक्ष्मचटिका विषप्रतिपक्षभूता विषस्यासदावरकस्य पुष्यं पोषमक्षन्। अदंतु। नाशयंतु। ताश्च न मरंति न वयमपि। शिष्टमविशिष्टं ॥

॥ अथ त्रयोदशी ॥

नवानां नवतीनां विषस्य रोपुषीणां।
सर्वासामग्रभं नामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १३ ॥

नवानां। नवतीनां। विषस्य। रोपुषीणां।
सर्वासां। अग्रभं। नाम। आरे। अस्य। योजनं। हरिऽस्थाः। मधु। त्वा। मधुला। चकार ॥ १३ ॥

नवानां नवतीनां नवाधिकानां नवतिसंख्याकानां नदीनां। पुनः कीदृशीनां। विषस्यास्मज्ज्ञापकस्य सर्वस्य विषस्य रोपुषीणां लोपयित्रीणां छेत्रीणां। सर्वासामुक्तानां गंगादिनदीनां नामाग्रभं। गृह्णामि। संकीर्त्तयामि ॥ गृहेश्छांदसे लुङि छांदसश्च्लेर्लुक्। हृग्रहोर्भः ॥ अस्य योजनमित्यादि गतं ॥

॥ अथ चतुर्दशी ॥

त्रिः सप्त मयूर्यः सप्त स्वसारो अग्रुवः।
तास्ते विषं वि जभ्रिर उदकं कुंभिनीरिव ॥ १४ ॥

त्रिः। सप्त। मयूर्यः। सप्त। स्वसारः। अग्रुवः।
ताः। ते। विषं। वि। जभ्रिरे। उदकं। कुंभिनीःऽइव ॥ १४ ॥

त्रिः सप्त एकविंशतिसंख्याका मयूर्यो मयूरस्त्रियः। ता विषकारिसर्पद्वेषिण्य इति प्रसिद्धा नागद्वेषिगरुडपक्षादुत्पन्नत्वात्। तथा सप्त एतत्संख्याकाः सर्पणस्वाभावाः स्वसारः स्वयमेव सरणा अग्रुवः ॥ नदीनामैतत् ॥ सुरगंगाद्याः प्रसिद्धाः सप्त नद्यः संति। तास्ते हे देह तव विषं विजभ्रिरे। विशेषेण हरंतु। तत्र दृष्टांतः। उदकं कुंभिनीः कुंभिन्यः कुंभवत्यः कुंभेन जलहारिण्य इव। ता यथा तद्धरंति तद्वन्नद्यो मयूर्यश्चातिप्रभूतं हरंतु ॥

॥ अथ पंचदशी ॥

इयत्तकः कुषुंभकस्तकं भिनद्म्यश्मना।
ततो विषं प्र वावृते परांचीरनु संवतः ॥ १५ ॥

इयत्तकः। कुषुंभकः। तकं। भिनद्मि। अश्मना।
ततः। विषं। प्र। ववृते। परांचीः। अनु। संऽवतः ॥ १५ ॥

इयत्तकः कुत्सितेयत्तः। अल्पप्रमाण इत्यर्थः। कुषुंभकः कुं पृथ्वीं सुंभति विलिखतीति सर्पाणां कुत्सितं सुंभयिता निग्रहीता कुषुंभको नकुलः। स ते विषं हरत्विति शेषः। यदि न तथा स करोति तकं कुत्सितं तं नकुलमश्मना भिनद्मि। विदारयामि। विषनिर्हरणप्रयोगे यावद्विषापगमं तं पाषाणानुघातमनुतिष्ठंति तद्विदः। तदिदमत्रोक्तं। तत एवं प्रयोगे सति विषं प्रवावृते। विषावृताद्देहाद्विषं प्रवर्तते। निर्गच्छतु। काः प्रति। उच्यते। पराचीः परागंचनवतीरतिदूरगाः संवतः संविभागवतो दिशोऽनु लक्षीकृत्य। दिगंतं प्रति गच्छतु। न मां प्रति गच्छत्वित्यर्थः॥

अध्यायोपाकरणोत्सर्गयोः कुषुंभकस्तदित्यंत्या विनियुक्ता। दधिसक्तूञ्जुहोतीत्युपक्रम्य कुषुंभकस्तदब्रवीत्। आ॰ गृ॰ ३. ४.। इति सूत्रितत्वात्॥

॥ सैषा षोडशी॥

कुषुंभकस्तदब्रवीद्गिरेः प्रवर्तमानकः।
वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषं ॥ १६॥
कुषुंभकः। तत्। अब्रवीत्। गिरेः। प्रऽवर्तमानकः।
वृश्चिकस्य। अरसं। विषं। अरसं। वृश्चिक। ते। विषं ॥ १६॥

एवं महानुभावेनागस्त्यमहर्षिणोच्यमाने सति गिरेः सकाशात्प्रवर्तमानकः प्रवर्तमानोऽतिशीघ्रमभिगच्छन् कुषुंभको नकुलस्तदब्रवीत्। तद्वाक्यमाचख्यौ। किं तदिति। उच्यते। वृश्चिकस्यैतद्विषमरसमसारं। बाधकं न भवतीत्यर्थः। तथा लोकेऽपि सर्पदष्टमपि क्रिम्यादिदंशनमेव। अतो न बाध इति हि वदंति। एवमभिवचनेन सोऽपि निर्विषोऽभवत्। अथ तं वृश्चिकं प्रति नकुल आह। हे वृश्चिक ते विषमरसं। अतस्त्वमृषिं किं करिष्यति। तस्मात्परिहरेति। यदेवमवादीत् तदा प्रभृति वृश्चिकविषमसारमभवत्। एषा विषनिर्हरण्युपनिषत्॥

॥ इति द्वितीयस्य पंचमे षोडशो वर्गः॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे द्वितीयाष्टके प्रथमे मंडले चतुर्विंशोऽनुवाकः प्रथमं मंडलं च॥

## ॥ अथ द्वितीयं मंडलं ॥

शतर्चिनां प्रथमं मंडलं व्याख्यातं । अथ गार्त्समदं द्वितीयं मंडलं व्याख्यायते । त्वमग्ने द्युभिरित्यादिकं द्वितीयं मंडलं । चत्वारोऽनुवाकाः । तेषु प्रथमेऽनुवाक एकादश सूक्तानि । तत्र त्वमग्ने द्युभिरिति षोडशर्चं प्रथमं सूक्तं । मंडलद्रष्टा गृत्समद ऋषिः । स च पूर्वमांगिरसकुले शुनहोत्रस्य पुत्रः सन् यज्ञकालेऽसुरैर्गृहीत इंद्रेण मोचितः । पश्चात्तद्वचनेनैव भृगुकुले शुनकपुत्रो गृत्समदनामाभूत् । तथा चानुक्रमणिका । य आंगिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत्स गृत्समदो द्वितीयं मंडलमपश्यदिति । तथा तस्यैव शौनकस्य वचनमृष्यनुक्रमणे । त्वमग्न इति गृत्समदः शौनको भृगुतां गतः । शौनहोत्रः प्रकृत्या तु य आंगिरस उच्यत इति । तस्मान्मंडलद्रष्टा शौनको गृत्समद ऋषिः । जगती छंदः । मंडलादिपरिभाषयाग्नेयं । अत्रानुक्रमणिका । त्वमग्ने जागतं त्विति ॥ प्रातरनुवाकाश्विनशस्त्रयोर्जागते छंदसीदमादिसूक्तद्वयस्य विनियोगः । त्वमग्ने द्युभिरिति सूक्ते । आ० ४. २३. । इति सूचितत्वात् ॥ उपाकरणोत्सर्जनयोरप्याद्या विनियुक्ता ॥

॥ तत्र प्रथमा ॥

त्वम॑ग्ने द्युभि॒स्त्वमा॑शुशु॒क्षणि॒स्त्वम॒द्भ्यस्त्वमश्म॑न॒स्परि॑ ।
त्वं वने॑भ्य॒स्त्वमोष॑धीभ्य॒स्त्वं नृ॒णां नृ॑पते जायसे॒ शुचि॑ः ॥ १ ॥

त्वं । अ॒ग्ने॒ । द्युऽभि॑ः । त्वं । आ॒ऽशु॒शु॒क्षणि॑ः । त्वं । अ॒त्ऽभ्यः । त्वं । अश्म॑नः । परि॑ ।
त्वं । वने॑भ्यः । त्वं । ओष॑धीभ्यः । त्वं । नृ॒णां । नृ॒ऽप॒ते॒ । जा॒य॒से॒ । शुचि॑ः ॥ १ ॥

हे अग्ने अग्रणीत्वादिगुणविशिष्ट हे नृणां नृपते । नृणां मनुष्याणां मध्ये ये नरा यष्टारः संति तेषां विशेषेण पालयितः । यद्वोभाभ्यां पदाभ्यां बहुत्वं नित्यस्वामित्वं च प्रतिपाद्यते । सर्वेषामपि नराणां नित्यपालकेत्यर्थः ॥ नृणामित्यस्य निघाताभावश्छांदसः ॥ तादृश हे देव त्वं द्युभिर्यागदिवसैर्निमित्तभू-

तैर्जायसे। यागार्थं मथनेनोत्पद्यस इत्यर्थः। यद्वा तादृशैर्दिवसैः सहितो जायसे। तत्तद्यागदिवसेषु प्रसिद्धो भवसीत्यर्थः। तथा त्वमाशुशुक्षणिर्जायसे। आ सर्वतो दीप्यमानो भवसि॥ आङ्युपपदे शुच दीप्तावित्येतस्य सनंतस्य छांदसमिदं रूपं। यद्वा आशु शीघ्रं शुच् दीप्तः सन् यतः स सेव्यत इति। आशु शुचं शोकं सनोति ददाति शत्रुभ्यो दाहादिनेत्याशुशुक्षणिः॥ तादृशो भवसि। एवं सर्वत्र प्रतिविशेषणं जायस इति योज्यं। हे अग्ने त्वमद्भ्यो वृष्ट्युदकेभ्यो जायसे वैद्युतरूपेण वाडवरूपेण वा समुद्रोदकेभ्यः। अश्मनो मेघात्पाषाणाद्वा परि जायसे। यो अश्मनोरंतरग्निं जजानेति हि मंत्रांतरं। त्वं वनेभ्यो वृक्षादिसमूहेभ्यो दावरूपेण। त्वमोषधीभ्यो वैश्वानररूपेण। एवं महानुभावस्त्वं मथनेनोत्पन्नः सन् सर्वात्मको भवसीत्यर्थः। शुचिरेव जायसे। यद्वा शुचिरादित्यरूपो जायस इत्यर्थः। अत्र त्वमग्ने द्युभिरहोभिरित्यादि निरुक्तमनुसंधेयं। नि॰ ६. १.॥

॥ अथ द्वितीया ॥

तवा॑ग्ने हो॒त्रं तव॑ पो॒त्रमृ॒त्वियं॒ तव॑ ने॒ष्ट्रं त्वम॒ग्निदृ॑ता॒यतः॑।

तव॑ प्रशा॒स्त्रं त्वम॑ध्वरीयसि ब्र॒ह्मा चासि॑ गृ॒हप॑तिश्च नो॒ दमे॑ ॥ २॥

तव॑। अ॒ग्ने॒। हो॒त्रं। तव॑। पो॒त्रं। ऋ॒त्विय॑ं। तव॑। ने॒ष्ट्रं। त्वं। अ॒ग्नित्। ऋ॒त॒ऽय॒तः।

तव॑। प्र॒ऽशा॒स्त्रं। त्वं। अ॒ध्व॒रि॒ऽय॒सि॒। ब्र॒ह्मा। च॒। अ॒सि॑। गृ॒हऽप॑तिः। च॒। नः॒। दमे॑ ॥ २॥

हे अग्ने होत्रं होतुः कर्म शस्त्रयाज्यादिलक्षणं यदस्ति तदपि तवैव। त्वदर्थमित्यर्थः। तथा पोत्रं पोतुः कर्म यदस्ति तदपि तवैव। तथा ऋत्वियं प्राप्तकालमार्त्विज्यं तवैव। नेष्ट्रं नेष्टुः कर्म प्रस्थितयाज्यादिरूपं तव। हे अग्ने त्वमग्नित् अग्नीध्रश्च त्वमेवासि। तथा ऋतायतो यज्ञमिच्छतस्तवैव प्रशास्त्रं यत्प्रशास्तुर्मैत्रावरुणस्य कर्म तत्। हे अग्ने त्वमध्वरीयसि। अध्वरं यज्ञं कामयसे। अध्वर्युर्भवसीत्यर्थः। तथाध्वर्युशब्दव्युत्पत्तेः। अध्वर्युरध्वरयुरध्वरं कामयत इति वेति हि निरुक्तं। १. ८.॥ तथा ब्रह्मा ब्राह्मणाच्छंस्यप्यसि। तथा नो दमेऽस्मद्यज्ञगृहे गृहपतिश्चासीति॥

॥ अथ तृतीया ॥

त्वम॑ग्न॒ इंद्रो॑ वृष॒भः स॒ताम॑सि॒ त्वं विष्णु॑रुरुगा॒यो न॑म॒स्यः॑।

त्वं ब्र॒ह्मा र॑यि॒विद्ब्र॑ह्मणस्पते॒ त्वं वि॑धर्तः सचसे॒ पुरं॑ध्या ॥ ३॥

त्वं। अग्ने। इंद्रः। वृषभः। सतां। असि। त्वं। विष्णुः। उरुऽगायः। नमस्यः।
त्वं। ब्रह्मा। रयिऽवित्। ब्रह्मणः। पते। त्वं। विधर्तरिति विऽधर्तः। सचसे। पुरंऽध्या ॥ ३॥

हे अग्ने त्वं यतः सतां वृषभो वर्षितासि अत इंद्रोऽसि। यद्वा सतां साधूनामिंद्रोऽसि। कामानां वर्षितासि। त्वं विष्णुरसि। यत उरुगायो बहुभिर्गीयमानो नमस्यो नमस्कार्यश्च भवसि। हे ब्रह्मणस्पते परिवृढस्य कर्मणो मंत्रस्य वा पालयितस्त्वं यतो रयिवित् गवादिधनस्य वेत्ता अतो ब्रह्मासि। हे विधर्तर्विविधकारक वैश्वानररूपाग्ने पुरंध्या बहुप्रकारया बुद्ध्या सचसे। सह वर्तसे। सर्वदा बुद्ध्या स्तूयस इत्यर्थः ॥

॥ अथ चतुर्थी ॥

त्वमंग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः।
त्वमर्यमा सत्पतिर्यस्य संभुजं त्वमंशो विदथे देव भाजयुः ॥ ४॥

त्वं। अग्ने। राजा। वरुणः। धृतऽव्रतः। त्वं। मित्रः। भवसि। दस्मः। ईड्यः।
त्वं। अर्यमा। सत्ऽपतिः। यस्य। संऽभुजं। त्वं। अंशः। विदथे। देव। भाजयुः ॥ ४॥

हे अग्ने त्वं यतो धृतव्रतो धारितकर्मासि अतो वरुणो राजासि। यतो दस्मः शत्रूणामुपक्षपयिता ईड्यः स्तुत्यश्च अतो मित्र एतन्नामको देवोऽसि। यतः सत्पतिः सतामभिमतप्रदानेन पालयिता अतोऽर्यमा भवसि। दातृत्वं चार्यम्णो लिंगं। अर्यमेति तमाहुर्यो ददातीति। यस्यार्यम्णो दानं संभुजं संततभुजं व्यापकं भवति। यद्वा यस्य धनं संभुजं सम्यक् भोगाय साधु ग्रहीतॄणां। तथा त्वमंशः सूर्यमूर्त्यंतरभूत एतन्नामको देवोऽसि। तादृश हे देव विदथेऽस्मदीये यज्ञे भाजयुः फलानां भाजयिता प्रापयितासि ॥

॥ अथ पंचमी ॥

त्वमंग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजात्यं।
त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः ॥ ५॥

त्वं। अग्ने। त्वष्टा। विधते। सुऽवीर्यं। तव। ग्नावः। मित्रऽमहः। सऽजात्यं।
त्वं। आशुऽहेमा। ररिषे। सुऽअश्व्यं। त्वं। नरां। शर्धः। असि। पुरुऽवसुः ॥ ५॥

हे अग्ने त्वष्टा फलस्य साधु संपादयिता त्वं विधते परिचरते जनाय सुवीर्यं

शोभनवीर्यं । वीर्यं धनं । तद्धेतुर्भवसि । ग्रावो याः स्तुतिवाचः संति तास्तव स्वभूताः । हे मित्रमहः हितकारितेजः सजात्यमस्माकं बांधवं भजस इत्यर्थः । हे अग्ने आशुहेमा आशु प्रेरयिता त्वं स्वश्व्यं शोभनाश्वसमूहोपेतं फलं ररिषे । ददासि । हे अग्ने पुरूवसुः प्रभूतधनस्त्वं नरां नराणां शर्धो बलस्थानीयोऽसि ॥

॥ इति द्वितीयस्य पंचमे सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे ।
त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना ॥ ६ ॥

त्वं । अग्ने । रुद्रः । असुरः । महः । दिवः । त्वं । शर्धः । मारुतं । पृक्षः । ईशिषे ।
त्वं । वातैः । अरुणैः । यासि । शंऽगयः । त्वं । पूषा । विधतः । पासि । नु । त्मना ॥ ६ ॥

हे अग्ने त्वं महो दिवो महतो द्युलोकात् । उपलक्षणमेतत् । लोकत्रयात् । असुरः शत्रूणां निरसिता रुद्रोऽसि । रुद्दुःखं दुःखहेतुर्वा पापादिः । तस्य द्रावयिता एतन्नामको देवोऽसि । रुद्रो वा एष यदग्निरित्यादिष्वग्ने रुद्रशब्देन व्यवहारात् । यद्वा त्वं रुद्रः । रौति मामनिष्ट्वा नरा दुःखे पतिष्यंतीति रुद्रः । तादृशोऽसि । रुद्रो रौतीति सत इति हि निरुक्तं । तथा महो महतो द्युलोकस्य संबंध्यसुरोऽसि । असुर्बलं । तस्य दातादित्यरूपश्च त्वमसि । अग्नेर्द्युलोकसंबंध्यसुरत्वमुत त्वा दिवो असुराय मन्मेत्यादिषु । तथा त्वं मारुतं शर्धो मरुत्समूहरूपं बलमसि । वायुरूपश्च त्वमसीत्यर्थः । एवमग्न्यादित्यवायुरूपस्त्वं । पृक्षोऽन्नस्य हविर्लक्षणस्य त्वमीशिषे । ईश्वरो भवसि । यस्मादेवं तस्मात्त्वं वातैर्वायुसदृशैररुणैररुणवर्णैरश्वैः शंगयः सुखस्य गृहरूप आवासभूतः सन् यासि । प्राप्नोषि यागगृहं । यद्वा अरुणैर्गमनशीलैर्वातैर्वायुभिरुत्पन्नः सन् यासि वने । तथा त्वं पूषा सर्वस्य पोषकः सन् नु क्षिप्रं त्मना आत्मनानुग्रहरूपया स्वबुद्ध्यैव विधतः परिचरतो यजमानान् पासि ॥

॥ अथ सप्तमी ॥

त्वमग्ने द्रविणोदा अरंकृते त्वं देवः सविता रत्नधा असि ।
त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेऽविधत् ॥ ७ ॥

त्वं। अग्ने। द्रविणःऽदाः। अरंऽकृते। त्वं। देवः। सविता। रत्नऽधाः। असि।
त्वं। भर्गः। नृऽपते। वस्वः। ईशिषे। त्वं। पायुः। दमे। यः। ते। अविधत् ॥ ७ ॥

हे अग्ने त्वमरंकृते त्वामलंकुर्वते यजमानाय द्रविणोदाः। हिरण्यस्य दातासि। देवो द्योतमानः सविता सर्वस्य सत्कर्मसु प्रेरकस्त्वं रत्नधा रमणीयानां धनानां मणिमुक्तादीनां धारयितासि। तथा हे नृपते नृणां पालकाग्ने त्वं भगो भजनीयः सन् वस्वो वसुनो धनस्येशिषे। समर्थो भवसि दातुं। यो यजमानो दमे यज्ञगृहे ते त्वामविधत् परिचरति तस्य पायुः पालकस्त्वमसि ॥

॥ अथाष्टमी ॥

त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृंजते।
त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति ॥ ८ ॥

त्वां। अग्ने। दमे। आ। विश्पतिं। विशः। त्वां। राजानं। सुऽविदत्रं। ऋंजते।
त्वं। विश्वानि। सुऽअनीक। पत्यसे। त्वं। सहस्राणि। शता। दश। प्रति ॥ ८ ॥

हे अग्ने विश्पतिं यजमानानां पालकं त्वां विशो यजमाना दमे स्वकीये यज्ञगृह आ। आसादयंति ॥ उपसर्गवशाद्योग्यक्रियाध्याहारः ॥ तथा कृत्वा राजानं दीप्यमानं सुविदत्रं शोभनज्ञानमस्मदनुकूलचेतस्कं सुधनं वा त्वामृंजते। प्रसाधयंति ॥ ऋंजतिः प्रसाधनकर्मेति यास्कः ॥ यत एवं ततो हे स्वनीक शोभनज्वालारूपसेन त्वं विश्वानि सर्वाणि। हवींषीति शेषः ॥ षष्ठ्यर्थे द्वितीया ॥ विश्वेषां हविषामाज्यसोमपुरोडाशादीनां पत्यसे। ईश्वरो भवसि ॥ ईश्वरनामैतत्। इरज्यति पत्यत इति तन्नामसु पाठात् ॥ यद्वा पतिभावमाचरसि। त्वं तु सहस्राणि शता शतानि दश एतत्संख्याकानि प्रति। एतत्संख्याकानामभिमतसाधनानां प्रतिनिधिरित्यर्थः ॥ प्रतिः प्रतिनिधिप्रतिदानयोरिति कर्मप्रवचनीयत्वं ॥ तैर्यत्फलं भवति तत्त्वया लभ्यत इत्यर्थः ॥

॥ अथ नवमी ॥

त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचं।
त्वं पुत्रो भवसि यस्तेऽविधत्त्वं सखा सुशेवः पास्याधृषः ॥ ९ ॥

त्वां । अग्ने । पितरं । इष्टिऽभिः । नरः । त्वां । भ्रात्राय । शम्या । तनूऽरुचं ।

त्वं । पुत्रः । भवसि । यः । ते । अविधत् । त्वं । सखा । सुऽशेवः । पासि । आऽधृषः ॥ ९ ॥

हे अग्ने पितरं पालकं त्वां नरो नेतारो यजमाना इष्टिभिरेषणसाधनैर्यागैर्यजंत इति शेषः । पितृवत्पालनाय यजंत इत्यर्थः । तथा तनूरुचं शरीराणां दीपकं शरीरेषु दीप्यमानं वैश्वानरात्मना त्वां भ्रात्राय भ्रातृत्वाय सौभ्रात्राय शम्या ॥ कर्मनामैतत् ॥ कर्मणा यजंत इति शेषः । यद्वोभयत्र वक्ष्यमानेनाविधदित्यनेन संबंधः । हे अग्ने यो नरस्ते त्वामविधत् परिचरति तस्य त्वं पुत्रो भवसि । पुत्रवत्पालयिता भवसि । तथा त्वं सखा समानख्यानः सखिवद्धितकारी सुशेवः ॥ शेवमिति सुखनाम ॥ सुष्ठु सुखकारी सन् आधृष आधर्षकात्मा पासि । रक्षसि । पितृत्वकामाय पितृत्वेन भ्रातृत्वकामाय भ्रातृत्वेन पुत्रत्वकामाय पुत्रस्थानीयो भवसि । त्रिप्रकारेण रक्षसीत्यर्थः ॥

॥ अथ दशमी ॥

त्वमग्न ऋभुराके नमस्य१स्त्वं वाजस्य क्षुमतो राय ईशिषे ।

त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः ॥ १० ॥

त्वं । अग्ने । ऋभुः । आके । नमस्यः । त्वं । वाजस्य । क्षुऽमतः । रायः । ईशिषे ।

त्वं । वि । भासि । अनु । धक्षि । दावने । त्वं । विऽशिक्षुः । असि । यज्ञं । आऽतनिः ॥ १० ॥

हे अग्ने त्वमृभुः । उरुभासमानो मेधावी वा । त्वमाकेऽंतिके संनिधावेव नमस्यो नमस्कार्यः । स्तुत्य इत्यर्थः । इतरदेवतावन्मंत्रप्रतिपाद्याकारेण स्तुत्यो न भवसि किंतु प्रत्यक्ष इत्यर्थः । तथा त्वं क्षुमतः शब्दवतः सर्वत्र श्रूयमानस्य वाजस्यान्नस्य रायो धनस्य चेशिषे । स्वामी भवसि । अतस्तद्देहीत्यर्थः । हे अग्ने त्वं विभासि । विशेषेण दीप्यसे । तदर्थमनुक्रमेणैव धक्षि । दहसि काष्ठादीन् ॥ दहेर्लेटि सिपि रूपं । संहितायां भष्भावाभावश्छांदसः ॥ किमर्थमेवं । दावने छेदनायांधकारस्य । यद्वा हविषो दानवते यजमानाय वा । किंच त्वं यज्ञं विशिक्षुर्विशेषेण शिक्षयिता साधयितासि ॥ न लोकाव्ययेति षष्ठ्या निषेधः ॥ तथातनिः । फलस्य सर्वतो विस्तारयिता ॥

॥ इति द्वितीयस्य पंचमेऽष्टादशो वर्गः ॥

॥ अथैकादशी ॥

त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा ।
त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती ॥ ११ ॥

त्वं । अग्ने । अदितिः । देव । दाशुषे । त्वं । होत्रा । भारती । वर्धसे । गिरा ।
त्वं । इळा । शतऽहिमा । असि । दक्षसे । त्वं । वृत्रऽहा । वसुऽपते । सरस्वती ॥ ११ ॥

हे अग्ने देव त्वं दाशुषे हविर्दत्तवते यजमानायादितिरखंडयिता परिपालयितासि । यद्वा अदीना भूमिरसि । किंच त्वं होत्रा होमनिष्पादका भारती भरतस्यादित्यस्यादित्यसंबंधिनी रश्मिरूपा सती गिरा स्तुत्या वर्धसे । प्रवृद्धो भवसि । किंच त्वं शतहिमा । हिमशब्दः कालोपलक्षकः । अपरिमितकाला नित्येळा भूमिरसि । तादृशी सती दक्षसे दानाय समर्था भवसि ॥ तिङ उत्तरत्वादनिघातः ॥ तथा हे वसुपते धनपालक वृत्रहा पापादेर्हंता त्वं सरस्वती । सरणवान्वायुः । तत्संबंधिन्येतन्नियामका माध्यमिकासि । आदित्याग्निवायूनां संबंधिन्यो भारतीळासरस्वत्याख्या यास्तिस्रो देव्यः संति ता अपि त्वमेवेत्यर्थः ॥

॥ अथ द्वादशी ॥

त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः ।
त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ॥ १२ ॥

त्वं । अग्ने । सुऽभृतः । उत्ऽतमं । वयः । तव । स्पार्हे । वर्णे । आ । संऽदृशि । श्रियः ।
त्वं । वाजः । प्रऽतरणः । बृहन् । असि । त्वं । रयिः । बहुलः । विश्वतः । पृथुः ॥ १२ ॥

हे अग्ने त्वं सुभृतः सुष्ठु पोषितः सन् उत्तमं निरतिशयं वयोऽन्नमायुष्यं वा त्वमसि । तत्संपादकोऽसीत्यर्थः । तथा तव स्पार्हे स्पृहणीये वर्णे लोहितशुक्लादिलक्षणे संदृशि सम्यग्दर्शनीये श्रिय ऐश्वर्याणि कांतयो वाश्रित्य वर्तंते ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ किंच त्वं वाजोऽन्नं । तत्साधकत्वात्ताच्छब्द्यं । अन्नसाधक इत्यर्थः । प्रतरणः प्रतारयिता पापात् । अत एव बृहन् महानसि । तथा त्वं रयिर्धनरूपोऽसि बहुलः सर्वविषयबाहुल्योपेतो विश्वतः पृथुर्विस्तीर्णः प्रख्यात इत्यर्थः ॥

॥ अथ त्रयोदशी ॥

त्वाम॑ग्न आदि॒त्यास॑ आ॒स्यं१॒॑ त्वां जि॒ह्वां शुच॑यश्चक्रिरे कवे ।
त्वां रा॑ति॒षाचो॑ अध्व॒रेषु॑ सश्चिरे॒ त्वे दे॒वा ह॒विर॑द॒न्त्याहु॑तं ॥ १३ ॥
त्वां । अ॒ग्ने॒ । आ॒दि॒त्यासः॑ । आ॒स्य॑ं । त्वां । जि॒ह्वां । शुच॑यः । च॒क्रि॒रे॒ । क॒वे॒ ।
त्वां । रा॒ति॒ऽसाचः॑ । अ॒ध्व॒रेषु॑ । स॒श्चि॒रे॒ । त्वे इति॑ । दे॒वाः । ह॒विः । अ॒द॒न्ति॒ । आऽहु॑तं ॥ १३ ॥

हे अग्ने त्वामादित्यासोऽदितेः पुत्रा इंद्रादय आस्यं स्वकीयं मुखं भक्षणपानादिसाधनं चक्रिर इति वक्ष्यमाणेन संबंधः । तथा हे कवे क्रांतप्रज्ञ त्वामेव शुचयः शुद्धा दीप्ता वा देवा जिह्वां स्वकीयजिह्वास्थानीयमास्वादनसाधनं चक्रिरे । त्वन्मुखेनैव भक्षयंति त्वज्जिह्वयैवास्वादयंतीत्यर्थः । तथा त्वामेव रातिषाचः । रातिर्दानं दत्तं हविरादि धनं वा । तेन समवेता देवा अध्वरेषु यज्ञेषु सश्चिरे । सेवंते त्वामेव प्रतीक्षंते विना त्वया स्वेषां हविर्भक्षणायोगात् । एवं कृत्वा त्वे त्वयि देवाः सर्वं आहुतं सर्वतो दत्तं हविरदंति । भक्षयंति । एवं सर्वदेवोपकारिणं महानुभावं स्तौमीत्यर्थः ॥

॥ अथ चतुर्दशी ॥

त्वे अ॑ग्ने॒ विश्वे॑ अ॒मृता॑सो अ॒द्रुह॑ आ॒सा दे॒वा ह॒विर॑द॒न्त्याहु॑तं ।
त्वया॒ मर्ता॑सः स्वदंत आसु॒तिं त्वं गर्भो॑ वी॒रुधां॑ जज्ञिषे॒ शुचिः॑ ॥ १४ ॥
त्वे इति॑ । अ॒ग्ने॒ । विश्वे॑ । अ॒मृता॑सः । अ॒द्रुहः॑ । आ॒सा । दे॒वाः । ह॒विः । अ॒द॒न्ति॒ । आऽहु॑तं ।
त्वया॑ । मर्ता॑सः । स्व॒द॒न्ते॒ । आ॒ऽसु॒तिं । त्वं । गर्भः॑ । वी॒रुधा॑ं । ज॒ज्ञि॒षे॒ । शुचिः॑ ॥ १४ ॥

हे अग्ने त्वे त्वयि विश्वे सर्वेऽमृतासोऽमरणधर्माणोऽद्रुहोऽद्रोग्धारो देवा आसा त्वदीयेनास्येनाहुतं हविरदंति । भक्षयंति ॥ आस्यशब्दस्य तृतीयैकवचने पद्दन्नोमासित्यादिनासन्नादेशः । ऊडिदंपदादीति विभक्तेरुदात्तत्वं ॥ तथा मर्तासो मनुष्या अपि त्वया साधनभूतेनासुतिं रसरूपमन्नादिकं स्वदंते । आस्वादयंति । त्वमेव वीरुधां लतादीनां गर्भो गर्भस्थानीयः तेषां मध्यावस्थानात् । वसुः सर्वेषां निवासभूतः सन् जज्ञिषे । उत्पादयसि सस्याद्यन्नं ॥

॥ अथ पंचदशी ॥

त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे ।
पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे ॥ १५ ॥
त्वं । तान् । सं । च । प्रति । च । असि । मज्मना । अग्ने । सुऽजात । प्र । च । देव । रिच्यसे ।
पृक्षः । यत् । अत्र । महिना । वि । ते । भुवत् । अनु । द्यावापृथिवी इति । रोदसी इति । उभे इति ॥ १५ ॥

हे अग्ने त्वं मज्मना बलेन तान् प्रसिद्धान्देवान् सं चासि । संगच्छसि । तैः सहितोऽपि भवसि । तथा सामर्थ्येन प्रति चासि । प्रत्येकं तैर्विभिन्नः प्रतिनिधिर्वा भवसि । प्रतिस्वीकारसमये तैः सहितो भवसि वियुक्तश्च भवसीत्यर्थः । हे सुजात शोभनजनन । मंत्रसहितमथनेनोत्पन्नत्वादग्नेः सुजन्मत्वं । तादृशाग्ने हे देव प्ररिच्यसे च । तैर्बलेन चाधिको भवसि । आधिक्ये कारणमाह । यत् यस्मादत्रास्मिन्यज्ञे पृक्षः सर्वमपन्नं ॥ व्यत्ययेन बहुवचनं ॥ ते तवैव विभुवत् । समर्थं भवति महिना माहात्म्येन । यतो महत्त्वमस्ति अत इत्यर्थः । कुत्रेति तदुच्यते । रोदसी सर्वनिरोदनस्वभावे उभे द्यावापृथिव्यावनु । ते प्रति । तयोर्मध्ये व्याप्तमित्यर्थः । त्वयि हुतमन्नं त्वन्महत्त्वेन लोकत्रये व्याप्तमित्यर्थः ॥

॥ अथ षोडशी ॥

ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजंति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥ १६ ॥
ये । स्तोतृऽभ्यः । गोऽअग्रां । अश्वऽपेशसं । अग्ने । रातिं । उपऽसृजंति । सूरयः ।
अस्मान् । च । तान् । च । प्र । हि । नेषि । वस्यः । आ । बृहत् । वदेम । विदथे ।
सुऽवीराः ॥ १६ ॥

अनया होता स्तुतिनिगमव्याजेनाभिमतमाशास्ते । हे अग्ने सूरयो मेधाविनः प्रेरयितारो वा यजमानाः स्तोतृभ्यः स्तुतिकर्तृभ्यो गोअग्रां गावोऽग्रगामिन्यो यस्यास्तादृशीं गोप्रमुखामश्वपेशसं ॥ पेश इति रूपनाम ॥ अश्वेन निरूपणीयां । एतद्द्वयप्राधान्याभिप्रायां । गौश्चाश्वश्चाजाश्चेति दक्षिणापरिगणनेषु गवाश्वयोः प्राथम्यात् । तादृशीं रातिमुपसृजंति । ददते । तान्यजमानानस्मांश्चर्त्विजो वस्यो

वसीयः श्रेष्ठं स्वर्गादिस्थानं आ सर्वतः प्र हि नेषि। प्रकर्षेण नयसि खलु। नयेत्यर्थः। हि प्रसिद्धौ। वयं च सुवीराः शोभनपुत्रादिसहिता विदथे यज्ञे बृहन्महन्मंत्रजातं वदेम। उच्चारयामः। स्तुम इत्यर्थः॥

॥ इति द्वितीयस्य पंचम एकोनविंशो वर्गः ॥

यज्ञेन वर्धतेति त्रयोदशर्चं द्वितीयं सूक्तं मंडलद्रष्टुर्गृत्समदस्यार्षं। मंडलादिष्वाग्नेयमिति परिभाषयाग्नेयं। तुशब्दानुकर्षादिदमपि जागतं। यज्ञेन सप्तोनेत्यनुक्रांतं॥ प्रातरनुवाकाश्विनशस्त्रयोर्जागते छंदस्यस्य विनियोगः। सूत्रं तु पूर्वसूक्त एवोक्तं॥ तथा चातुर्विंशिके तृतीयसवने जातवेदस्यनिविद्धानीयमिदं। यज्ञेन वर्धतेत्याग्निमारुतं। आ॰ ७.४.। इति सूचितत्वात्॥ पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहन्यपि जातवेदस्यनिविद्धानमिदं। चातुर्विंशिकं तृतीयसवनमिति चतुर्विंशादतिदिष्टत्वात्॥

॥ तत्र प्रथमा ॥

यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा तना गिरा।
समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदं॥१॥
यज्ञेन। वर्धत। जातऽवेदसं। अग्निं। यजध्वं। हविषा। तना। गिरा।
संऽइधानं। सुऽप्रयसं। स्वःऽनरं। द्युक्षं। होतारं। वृजनेषु। धूःऽसदं॥१॥

हे यजमाना ऋत्विजो वा यूयं जातवेदसं जातानां वेदितारं जातधनं जातप्रज्ञं वाग्निं यज्ञेन यागेन वर्धत। प्रवर्धत। सामान्येनोक्त्वा विशेषेणाह। हविषा चरुपुरोडाशादिना तना विस्तृतया गिरा स्तुत्या च यजध्वं। पूजयध्वं। कीदृशं तं। समिधानं। समिध्यमानं। सुप्रयसं। शोभनान्नं। स्वर्णरं। स्वर्गे नेतव्या यजमाना यस्य तादृशं। यद्वा स्वरिति सर्वपर्यायः। स्तुतीनां नेतारः स्तोतारः। बहुस्तोतारमित्यर्थः। द्युक्षं। दीप्तं द्युनिवासिनं वा। होतारं। होमसंपादकं। वृजनेषु बलेषु धूर्षदं। बलस्य कर्तारमित्यर्थः। अग्निपाटवे सति शरीरबलं भवतीति प्रसिद्धं॥

॥ अथ द्वितीया ॥

अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः।
दिव इवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार संयतः॥२॥

अभि। त्वा। नक्तीः। उषसः। ववाशिरे। अग्ने। वत्सं। न। स्वसरेषु। धेनवः।
दिवःऽइव। इत्। अरतिः। मानुषा। युगा। आ। क्षपः। भासि। पुरुऽवार। संऽयतः ॥ २ ॥

हे अग्ने त्वा त्वामभि प्रति नक्ती रात्रीरुषसोऽहानि। सर्वासु रात्रिषु सर्वेष्वप्यहःसु। यद्वा नक्तशब्दः सायंकालं लक्षयति सायं प्रातरग्निहोत्रस्य सद्भावात्। सर्वेषु कालेषु सायंप्रातःकालेषु वा ववाशिरे। आकांक्षते यजमाना यष्टुं। यद्वा अहानि रात्रयश्च त्वामेव कामयंते होतुं। काले कर्मणश्चोदनात् कालानां कामनमुपचर्यते। तत्र दृष्टांतः। स्वसरेषु स्वयंसरणशीलेष्वहःसु सरणाधिकरणेषु गोष्ठेषु वा धेनवो वत्सं न। वत्समिव। किंच हे पुरुवार बहुभिर्वरणीयाग्ने संयतो नियतस्त्वं दिव इव द्युलोकस्येवारतिः। व्याप्तो विस्तृतः। तत्रत्यानां देवानां हविःप्रदानायैव सर्वत्र व्याप्त इत्यर्थः। मानुषा मनुष्याणां यजमानानां संबंधीनि युगा युगानि। युगशब्दः कालोपलक्षकः। प्रातरादिसवनानि। सर्वेषु सवनेषु ॥ अत्यंतसंयोगे द्वितीया ॥ क्षपो रात्रीः। सर्वासु रात्रिष्वप्याभासि। समंताद्दीप्यसे ॥

॥ अथ तृतीया ॥

तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्येरिरे।
रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु प्रशंस्यं ॥ ३ ॥

तं। देवाः। बुध्ने। रजसः। सुऽदंससं। दिवःपृथिव्योः। अरतिं। नि। एरिरे।
रथंऽइव। वेद्यं। शुक्रऽशोचिषं। अग्निं। मित्रं। न। क्षितिषु। प्रऽशंस्यं ॥ ३ ॥

तं प्रसिद्धमुक्तगुणविशिष्टमग्निं देवाः प्रसिद्धा व्यवहर्तार ऋत्विजो वा रजसो रंजनात्मकस्य लोकस्य बुध्ने मूले। पृथिव्यां वेद्यामित्यर्थः। तत्र न्येरिरे। नितरामीरयंति। व्यापारयंति स्वस्वहविर्लाभाय। ऋत्विक्पक्षे स्तोत्रादिना नितरां गच्छंति। भजंते। कीदृशमित्याह। सुदंससं शोभनदर्शनं दिवस्पृथिव्योर्द्यावापृथिव्योररतिं। ईश्वरं गंतारं व्याप्तं वा। वेद्यं। वेदो धनं। तस्मै हितं रथमिव। रथं यथा स्वाभिमतलाभायाश्रयंते तद्वत्। यद्वा रथमिव प्राप्तिसाधनत्वेन वर्तमानं वेद्यं वेदितव्यं। शुक्रशोचिषं दीप्तवर्णमग्निं मित्रं न सखिवत्कार्यसाधकं। यद्वा आदित्यमिव। क्षितिषु यागभूमिषु मनुष्येषु वा प्रशंस्यं। प्रकर्षेण स्तुत्यं। एवं महानुभावमग्निं न्येरिर इति ॥

॥ अथ चतुर्थी ॥

तमुक्षमाणं रजसि स्व आ दमे चंद्रमिव सुरुचं ह्वार आ दधुः।
पृश्न्याः पतरं चितयंतमक्षभिः पाथो न पायुं जनसी उभे अनु ॥४॥
तं। उक्षमाणं। रजसि। स्वे। आ। दमे। चंद्रंऽइव। सुऽरुचं। ह्वारे। आ। दधुः।
पृश्न्याः। पतरं। चितयंतं। अक्षऽभिः। पाथः। न। पायुं। जनसी इति। उभे इति। अनु ॥४॥

तं स्तुत्यतरं रजस्यंतरिक्ष आ उक्षमाणं सर्वतः सिंचंतं वृष्टिजलं रजसि पृथिव्यां वेद्यां घृतादिनासिच्यमानं वा। स्वे स्वकीये ह्वारे विजने दमे यागगृह आदधुः। आदधते। कीदृशं तं। चंद्रमिव सुरुचं। चंद्रमिति हिरण्यनाम। हिरण्यमिव शोभनदीप्तिं। पश्चात्प्रवृद्धावस्थायां पृश्न्याः पतरं। द्युलोकस्यांतरिक्षस्य गंतारं। अक्षभिः स्वकीयैर्ज्वालारूपैरवयवैश्चितयंतं चेतयमानं। पाथो न पायुं। उदकमिव रक्षकं। उभे जनसी सर्वस्य जनयित्र्यौ द्यावापृथिव्यावनु व्याप्तं। भूम्यां होमाधारत्वेन स्थित्वा हविःप्रापणाय द्युलोकगामिनमिति भावः। एवंरूपमग्निमादधते ॥

॥ अथ पंचमी ॥

स होता विश्वं परि भूत्वध्वरं तमु हव्यैर्मनुष ऋंजते गिरा।
हिरिशिप्रो वृधसानासु जर्भुरद्द्यौर्न स्तृभिश्चितयद्रोदसी अनु ॥५॥
सः। होता। विश्वं। परि। भूतु। अध्वरं। तं। ऊं इति। हव्यैः। मनुषः। ऋंजते। गिरा।
हिरिऽशिप्रः। वृधसानासु। जर्भुरत्। द्यौः। न। स्तृऽभिः। चितयत्। रोदसी इति। अनु ॥५॥

सोऽग्निर्होता होमनिष्पादकः सन् विश्वं सर्वमध्वरं यागं परिभूतु। परितो भवतु। तमु तमेवाग्निं हव्यैर्हविर्भिर्गिरा स्तुत्या च मनुष्या ऋंजते। प्रसाधयंति॥ ऋंजतिः प्रसाधनकर्मा ॥ हिरिशिप्रो हरणशीलहनुर्दीप्तोष्णीषो वा। शिप्राः शीर्षसु वितता हिरण्ययीरित्यादिमंत्रांतरात्। वृधसानासु प्रवर्धमानास्वोषधीषु ज्वालासु वा जर्भुरत्। पूर्यमाणो यज्ञं गंता ॥ शचंतं पदं। यद्वा द्वितीयार्थे सप्तमी ॥ वर्धमाना ओषधीर्जर्भुरत्। पुनःपुनर्दहन्नित्यर्थः। द्यौर्द्युलोकांतरिक्षं

स्तृभिर्न नक्षत्रैरिव रोदसी अनु द्यावापृथिव्यावनु चितयत्। चेतयति। ज्वालाभिर्विस्फुलिंगैश्च भुवमंतरिक्षं च व्याप्नोतीत्यर्थः ॥

॥ इति द्वितीयस्य पंचमे विंशो वर्गः ॥

॥ अथ षष्ठी ॥

स नो रेवत्समिधानः स्वस्तये संददस्वान्रयिमस्मासु दीदिहि ।
आ नः कृणुष्व सुविताय रोदसी अग्ने हव्या मनुषो देव वीतये ॥ ६ ॥
सः। नः। रेवत्। सम्ऽइधानः। स्वस्तये। सम्ऽददस्वान्। रयिं। अस्मासु। दीदिहि।
आ। नः। कृणुष्व। सुविताय। रोदसी इति। अग्ने। हव्या। मनुषः। देव। वीतये ॥ ६ ॥

हे अग्ने स तादृशस्त्वं नोऽस्माकं स्वस्तये। स्वस्तीत्यविनाशनाम। क्षेमाय रेवद्रयिमद्रयिं धनं उपर्युपरिवृद्धिमद्दानयोग्यं वा धनमस्मासु संददस्वान् सम्यक् प्रयच्छन् समिधानोऽस्माभिः सम्यगिध्यमानः सन् दीदिहि । दीप्यस्व । यद्वा रेवदिति क्रियाविशेषणं। रा धनं समृद्धिमद्यथा तथा दीप्यस्वेति। तथाभूतः सन् नोऽस्मभ्यं सुविताय सुहिताय शोभनफलाय रोदसी द्यावापृथिव्यावाकृणुष्व । सर्वतः कुरुष्व । उभौ लोकौ भोगप्रदौ कुर्वित्यर्थः । किमर्थमिति तदुच्यते। हे देवाग्ने मनुषो मनुष्यस्य यजमानस्य मम संबंधीनि हव्या हवींषि वीतये देवेभ्यो भक्षणाय। पुनःपुनर्यागाद्यनुष्ठानायेत्यर्थः ॥

॥ अथ सप्तमी ॥

दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि ।
प्राची द्यावापृथिवी ब्रह्मणा कृधि स्व१र्ण शुक्रमुषसो वि दिद्युतः ॥ ७ ॥
दाः। नः। अग्ने। बृहतः। दाः। सहस्रिणः। दुरः। न। वाजं। श्रुत्यै। अप। वृधि।
प्राची इति। द्यावापृथिवी इति। ब्रह्मणा। कृधि। स्वः। न। शुक्रं। उषसः। वि।
दिद्युतः ॥ ७ ॥

हे अग्ने नोऽस्मभ्यं बृहतो महतः प्रभूतान् गवाश्वादिधनविशेषान् दाः । देहि। तथा सहस्रिणः सहस्रसंख्योपेतान्पुत्रभृत्यादीन्दाः । देहि ॥ ददातेश्छांदसे लुङि रूपं। वाक्यभेदादनिघातः ॥ श्रुत्यै कीर्त्यै वाजमन्नं दुरो न तस्य द्वारा-

ण्यपि ॥ नशब्दश्चार्थे ॥ अपावृधि । अपवृणु । प्रेरयेत्यर्थः । यद्वा द्वाराणीव । तत्प्राप्त्युपायान्विशदयति । तदर्थं द्यावापृथिवी ब्रह्मणा परिवृढेन कर्मणा प्राची प्रकृष्टांचने अस्मदनुकूले कृधि । कुरु । स्वर्ण । आदित्य इव । स यथा जगत्प्रकाशयति तद्वत् । शुक्रं दीप्तं त्वामुषस उषःकाला विदिद्युतः । विद्योतयंति । उषःकाले ह्यग्नयः प्रज्वाल्यंते ॥

॥ अथाष्टमी ॥

स इ॒धा॒न उ॒षसो॒ राम्या॒ अनु॒ स्व१॒॑र्ण दी॑दे॒दरु॒षेण॑ भा॒नुना॑ ।
होत्रा॑भिर॒ग्निर्मनु॑षः स्व॒ध्वरो॒ राजा॑ वि॒शामति॑थि॒श्चारु॑राय॒वे॑ ॥ ८ ॥

सः । इ॒धा॒नः । उ॒षसः॑ । राम्याः॑ । अनु॑ । स्वः॑ । न । दी॒दे॒त् । अ॒रु॒षेण॑ । भा॒नुना॑ ।
होत्रा॑भिः । अ॒ग्निः । मनु॑षः । सु॒ऽअ॒ध्व॒रः । राजा॑ । वि॒शाम् । अति॑थिः । चारुः॑ । आ॒यवे॑ ॥ ८ ॥

सोऽग्नी राम्या रमणहेतुभूता उषसोऽनु अनुलक्ष्येधान इध्यमानो दीपितः सन् अरुषेण रोचमानेन भानुना तेजसा स्वर्ण आदित्य इव दीप्यते । सोऽग्निर्मनुषो मनुष्यस्य होतुर्होत्राभिः । होत्रेति वाङ्नाम । होमसाधनभूताभिः स्तुतिभिः स्तूयमानः स्वध्वरः शोभनयागो विशां प्रजानां राजा राजमानः स्वाम्यायवे मनुष्याय यजमानाय तदर्थं चारुश्चरणशीलोऽतिथिरतिथिवत्पूज्यो भवति ॥

॥ अथ नवमी ॥

ए॒वा नो॑ अग्ने अ॒मृते॑षु पूर्व्य॒ धीष्पी॑पाय बृ॒हद्दि॑वेषु॒ मानु॑षा ।
दुहा॑ना धे॒नुर्वृ॒जने॑षु का॒रवे॒ त्मना॑ श॒तिनं॑ पुरु॒रूप॑मि॒षणि॑ ॥ ९ ॥

ए॒व । नः॒ । अ॒ग्ने॒ । अ॒मृते॑षु । पू॒र्व्य॒ । धीः । पी॒पा॒य॒ । बृ॒हत्ऽदि॑वेषु । मानु॑षा ।
दुहा॑ना । धे॒नुः । वृ॒जने॑षु । का॒रवे॑ । त्मना॑ । श॒तिन॑म् । पु॒रु॒ऽरूप॑म् । इ॒षणि॑ ॥ ९ ॥

बृहद्दिवेषु प्रभूतद्युतिष्वमृतेषु देवेषु मध्ये हे पूर्व्य पूर्वभाविन्नग्ने त्वां मानुषा मनुष्याणां मध्ये नोऽस्मदीया धीर्बुद्धिः स्तुतिः कर्म वा एव एवं पीपाय । प्याययति । यद्वा मानुषा मनुष्यान् धीस्त्वदीया बुद्धिः कर्म वा प्याययतु । तथा त्वदीया धीर्वृजनेषु यज्ञेषु कारवे स्तोत्रे दुहाना धेनुः । दोग्ध्री धेनुरिव । लुप्तोपममेतत् । त्मनात्मनैवेषण्येषणायां सत्यां शतिनमपरिमितसंख्याकं पुरुरूपं गवाश्वादिरूपेण नानारूपं धनसमूहं दुहाना भवति ॥

॥ अथ दशमी ॥

वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति ।
अस्माकं द्युम्नमधि पंच कृष्टिषूच्चा स्वर्ण शुशुचीत दुष्टरं ॥ १० ॥
वयं । अग्ने । अर्वता । वा । सुऽवीर्यं । ब्रह्मणा । वा । चितयेम । जनान् । अति ।
अस्माकं । द्युम्नं । अधि । पंच । कृष्टिषु । उच्चा । स्वः । न । शुशुचीत । दुस्तरं ॥ १० ॥

हे अग्ने वयं यजमानाः सुवीर्यं शोभनसामर्थ्योपेतं यथा तथार्वता वारण-कुशलेनाश्वेन ॥ वाशब्दश्चार्थे ॥ ब्रह्मणा वान्नेन च त्वद्दत्तेन जनानस्मत्समानाननति चितयेम । अतिक्रम्य ज्ञायेमहि ॥ कर्मणि कर्तृप्रत्ययः ॥ यद्वा त्वद्दत्तेनाश्वेनान्नेन च सुवीर्यं चितयेम । प्रकाशयेम । तदर्थमस्माकं पंच पंचसु कृष्टिषु जनेषु निषादपंचमेषु चतुर्षु वर्णेषूच्चा उच्चैरतिप्रभूतं दुस्तरमन्येनाप्राप्तं द्युम्नं धनं स्वर्ण सूर्य इवाधिकं शुशुचीत । दीप्यतां । अधीत्ययमनर्थको वा ॥

॥ अथैकादशी ॥

स नो बोधि सहस्य प्रशंस्यो यस्मिन्त्सुजाता इषयंत सूरयः ।
यमग्ने यज्ञमुपयंति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे ॥ ११ ॥
सः । नः । बोधि । सहस्य । प्रऽशंस्यः । यस्मिन् । सुऽजाताः । इषयंत । सूरयः ।
यं । अग्ने । यज्ञं । उपऽयंति । वाजिनः । नित्ये । तोके । दीदिऽवांसं । स्वे । दमे ॥ ११ ॥

हे अग्ने सहस्य शत्रूणामभिभवितर्बलप्रभव वा प्रशंस्यः स्तुत्यः स त्वं नोऽस्मदीयं स्तोत्रादिकं बोधि । बुध्यस्व । स इत्युक्तं क इत्याह । यस्मिन्नग्नौ सुजाताः शोभनजननाः सूरयः स्तोतार ऋत्विज इषयंत । गमयंति स्तोत्राणि । किंच हे अग्ने यज्ञं यजनीयं यं वाजिनो हविर्लक्षणान्नवंतो यजमाना नित्ये तोक औरसे पुत्रे निमित्तभूते सति । यद्वा तस्मिन्यथा दीप्यते । पुत्रगृहे यथा पिता दीप्यति तद्वत् । स्वे दमे स्वकीये यागगृहे सवनीयादिस्थाने दीदिवांसं दीप्यमानमुपयंति हविःस्तोत्रादिना । स बोधीत्यन्वयः ॥

॥ अथ द्वादशी ॥

उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश्च शर्मणि ।
वस्वो रायः पुरुश्चंद्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः ॥ १२ ॥

उभयासः। जातऽवेदः। स्याम। ते। स्तोतारः। अग्ने। सूरयः। च। शर्मणि।

वस्वः। रायः। पुरुऽचंद्रस्य। भूयसः। प्रजाऽवतः। सुऽअपत्यस्य। शग्धि। नः ॥ १२ ॥

हे जातवेदो जातानां वेदितरग्ने स्तोतारस्त्वां स्तुवंत ऋत्विजः सूरयो मेधाविनो यजमानाश्चेत्युभयासः। उभये वयं शर्मणि सुखे निमित्तभूते सति ते त्वत्संबंधिनः स्याम। भवेम। यद्वा ते शर्मणि स्याम। त्वं च नोऽस्माकं वस्वो निवासहेतोर्वसिष्ठस्य रायो गवादिधनस्य पुरुश्चंद्रस्यातिशयेनाह्लादकस्य बहुहिरण्योपेतस्य वा भूयसः प्रभूतस्य प्रजावतो भृत्याद्युपेतस्य पुत्रादिभोगपर्याप्तस्य वा स्वपत्यस्य शोभनपुत्रस्य। ईदृग्रूपं धनं नोऽस्मभ्यं शग्धि। देहि। दातुं शक्तो भवसि ॥

॥ अथ त्रयोदशी ॥

ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजंति सूरयः।

अस्मांच्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥ १३ ॥

ये। स्तोतृऽभ्यः। गोऽअग्रां। अश्वऽपेशसं। अग्ने। रातिं। उपऽसृजंति। सूरयः।

अस्मान्। च। तान्। च। प्र। हि। नेषि। वस्यः। आ। बृहत्। वदेम। विदथे।

सुऽवीराः ॥ १३ ॥

ये स्तोतृभ्य इति त्रयोदशी व्याख्याता ॥

॥ इति द्वितीयस्य पंचम एकविंशो वर्गः ॥

समिद्धो अग्निरित्येकादशर्चं तृतीयं सूक्तं गार्त्समदं त्रैष्टुभं। सप्तमी जगती। समिद्धोऽग्निरग्निना नराशंसतनूनपादादय एकादश प्रयाजदेवताः। समिद्ध एकादशाप्रं सप्तमी जगतीत्यनुक्रमणिका ॥ पशौ शुनकानामिदमाप्रीसूक्तं। गृत्समदस्यापि शुनकत्वात्। समिद्धो अग्निरिति शुनकानामिति हि सूचितं। आ० ३. २.॥

॥ तत्र प्रथमा ॥

समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् विश्वानि भुवनान्यस्थात्।

होता पावकः प्रदिवः सुमेधा देवो देवान्यजत्वग्निरर्हन् ॥ १ ॥

संऽइद्धः। अग्निः। निऽहितः। पृथिव्यां। प्रत्यङ्। विश्वानि। भुवनानि। अस्थात्।

होता। पावकः। प्रऽदिवः। सुऽमेधाः। देवः। देवान्। यजतु। अग्निः। अर्हन् ॥ १ ॥

पृथिव्यां वेदिलक्षणायां समिद्धः सम्यक् दीप्त एतन्नामकोऽग्निर्निहितः स्थापितः सन् विश्वानि सर्वाणि भुवनानि भूतजातानि प्रत्यङ् अभिमुखः सन् अस्थात्। तिष्ठति। यथा सर्वे जनाः पश्यंति तथा प्रवृद्धोऽभवदित्यर्थः। किंच सोऽग्निर्होता होमनिष्पादको देवानामाह्वाता वा पावकः शोधकः प्रदिवः पुराणः सुमेधाः शोभनप्रज्ञो देवो द्योतमानः। एवं महानुभावोऽग्निरर्हन् यागयोग्यः सन् देवान्यजतु। अत्र यष्टव्यानिंद्रादीन्पूजयतु॥

॥ अथ द्वितीया ॥

नराशंसः प्रति धामान्यंजन् तिस्रो दिवः प्रति मह्ना स्वर्चिः।
घृतप्रुषा मनसा हव्यमुंदन्मूर्द्धन्यज्ञस्य समनक्तु देवान्॥२॥
नराशंसः। प्रति। धामानि। अंजन्। तिस्रः। दिवः। प्रति। मह्ना। सुऽअर्चिः।
घृतऽप्रुषा। मनसा। हव्यं। उंदन्। मूर्द्धन्। यज्ञस्य। सं। अनक्तु। देवान्॥२॥

नराशंसो नरैर्नेतृभिर्ऋत्विग्भिः शंसनीय एतन्नामकोऽग्निः स्वर्चिः शोभनज्वालः सन् धामानि स्थानान्याहुत्यधिकरणानि तेजांसि प्रति प्रत्येकं मह्ना स्वमहिम्नांजन् व्यक्तीकुर्वन् तिस्रो दिवो द्योतमानांस्त्रीन् भूम्यादिलोकांश्च प्रति प्रत्येकमंजन्। स्थित्या भूमिं प्रकाशेनांतरिक्षं हविःप्रापणेन दिवमित्यभिप्रायः। यद्वा लोकानां प्रत्येकं त्रित्वोपेतत्वात् तिस्रो दिव इत्यविरुद्धं। तिस्रो दिवः पृथिवीस्तिस्र इत्यादिमंत्रवर्णात् त्रयो वा इमे त्रिवृतो लोका इति ब्राह्मणाच्च। तथा घृतप्रुषा घृतं सिंचता मनसा हव्यमुंदन् क्लेदयन् स्निग्धीकुर्वन् यज्ञस्य मूर्द्धन् मूर्द्धनि मुखे होमसमये देवान्यष्टव्यान् समनक्तु। सम्यक् व्यक्तीकरोतु। तर्पयत्वित्यर्थः॥

॥ अथ तृतीया ॥

ईळितो अग्ने मनसा नो अर्हन्देवान्यक्षि मानुषात्पूर्वो अद्य।
स आ वह मरुतां शर्धो अच्युतमिंद्रं नरो बर्हिषदं यजध्वं॥३॥
ईळितः। अग्ने। मनसा। नः। अर्हन्। देवान्। यक्षि। मानुषात्। पूर्वः। अद्य।
सः। आ। वह। मरुतां। शर्धः। अच्युतं। इंद्रं। नरः। बर्हिऽसदं। यजध्वं॥३॥

हे अग्ने ईळितोऽस्माभिः स्तुतः सन् मनसास्मदनुरक्तेन देवानां यागबुद्ध्या वार्हन् यागयोग्यः सन् मानुषाद्धोतुः पूर्वः पूर्वभावी नोऽस्मदर्थमद्यास्मिन्दिने

देवान् यष्टव्यान् यक्षि। त्वमेव यजसि। स तादृशो यष्टा त्वमावह। आकारय। कान्। मरुतां शर्धो गणं। अच्युतमक्षीणमिंद्रं तदविनाभूतमिंद्रमपि। यद्वा मरुद्बलोपेतमिंद्रं। अनंतरं हे नरो नेतार ऋत्विजो बर्हिषदं बर्हिषि सीदंतं तमिंद्रं यजध्वं। पूजयध्वं॥

॥ अथ चतुर्थी ॥

देवं बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्यां।
घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञियासः॥४॥

देवं। बर्हिः। वर्धमानं। सुऽवीरं। स्तीर्णं। राये। सुऽभरं। वेदी इति। अस्यां।
घृतेन। अक्तं। वसवः। सीदत। इदं। विश्वे। देवाः। आदित्याः। यज्ञियासः॥४॥

हे बर्हिर्देव एतदभिमानिन्नग्ने वर्धमानं सुवीरं शोभनवीरसंपादकं सुभरं सुपूर्णं स्तीर्णमस्मदीयैर्ऋत्विग्भिरास्तृतं भव। किमर्थं। राये धनाय। अस्यां वेदी वेद्यां॥ सप्तम्यर्थे प्रगृह्यसंज्ञा। संहितायां यणादेशश्छांदसः॥ घृतेनाज्येनाक्तमिदं स्निग्धं बर्हिः सीदत। के। हे वसव एतन्नामकाः। हे विश्वे सर्वे देवाः। हे आदित्याः। यज्ञियासो यज्ञार्हास्ते यूयमिदं बर्हिर्निषीदत। अस्मिन्बर्हिषि निषीदतेत्यर्थः॥

॥ अथ पंचमी ॥

वि श्रयंतामुर्विया हूयमाना द्वारो देवीः सुप्रायणा नमोभिः।
व्यचस्वतीर्वि प्रथंतामजुर्या वर्णं पुनाना यशसं सुवीरं॥५॥

वि। श्रयंतां। उर्विया। हूयमानाः। द्वारः। देवीः। सुप्रऽअयनाः। नमःऽभिः।
व्यचस्वतीः। वि। प्रथंतां। अजुर्याः। वर्णं। पुनानाः। यशसं। सुऽवीरं॥५॥

द्वारो देवीरग्नेर्द्वाराभिमानिन्यो देव्यो विश्रयंतां। विविच्य श्रयंतां। विवृतापिधाना भवंतु। कीदृश्यस्ताः। उर्विया। उर्व्यो महत्यः। नमोभिर्नमस्कारोपेतैः स्तोत्रैर्हूयमानाः। सुप्रायणाः। सुष्ठु प्रकर्षेण गंतव्याः। ईदृश्यो देव्यो विश्रयंतां। किंच व्यचस्वतीर्व्याप्तिमत्योऽजुर्या अहिंस्या अजनना वा सुवीरं शोभनपुत्राद्युपेतं यशसं यशोयुक्तं वर्णं वर्णनीयं रूपविशेषं पुनाना यजमानाय शोधयित्र्यः संपादयित्र्यो देव्यो विप्रथंतां। विशेषेण प्रख्याता भवंतु॥

॥ इति द्वितीयस्य पंचमे द्वाविंशो वर्गः॥

॥ अथ षष्ठी ॥

साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते ।
तंतुं ततं संवयंती समीची यज्ञस्य पेशः सुदुघे पयस्वती ॥ ६ ॥

साधु । अपांसि । सनता । नः । उक्षिते इति । उषसानक्ता । वय्याऽइव । रण्विते इति ।
तंतुं । ततं । संवयंती इति संऽवयंती । समीची इति संऽईची । यज्ञस्य । पेशः ।
सुदुघे इति सुऽदुघे । पयस्वती इति ॥ ६ ॥

साधु साधूनि नोऽस्मदीयान्यपांसि कर्माण्युद्दिश्य सनता सनातनेनाविच्छिन्नप्रवृत्तिकेन स्तोत्रादिनोक्षिते पूजिते । यद्वा पुराणवाची विभक्त्यंतः सनच्छब्दोऽस्ति । तस्य प्रथमाद्विवचनस्याकारः । सनातने नित्ये इत्यर्थः । अस्मिन्पक्ष उक्षिते फलस्य सेचयित्र्यौ ॥ कर्तरि निष्ठा ॥ उषासानक्ताहोरात्रदेवते वय्या इव वानकुशले इव रण्विते शब्दिते स्तुते परस्परं गच्छंत्यौ वा ततं विस्तृतं तंतुं तंतुस्थानीयं यज्ञावयवं संवयंती सम्यक् चित्रं सह वा वयंत्यावुत्पादयित्र्यौ समीची सम्यक्प्रवृत्तिके परस्परानुकूले । किमर्थं संवयंती । यज्ञस्यानुष्ठीयमानस्य पेशो रूपं निर्मातुमिति शेषः । यज्ञं निवर्तयितुं तदवयवानुक्रमेणानुष्ठापयित्र्यावित्यर्थः । अहोरात्राभ्यां हि यज्ञास्तन्यंते । सुदुघे सुष्ठु फलस्य दोग्ध्र्यौ पयस्वती उदकवत्यौ । अहोरात्राभ्यां खलु वृष्टिर्जायते । एवं महानुभावे अहोरात्रदेवते अस्मद्यज्ञं निर्वहतामित्यर्थः ॥

॥ अथ सप्तमी ॥

दैव्या होतारा प्रथमा विदुष्टर ऋजु यक्षतः समृचा वपुष्टरा ।
देवान्यजंतावृतुथा समंजतो नाभा पृथिव्या अधि सानुषु त्रिषु ॥ ७ ॥

दैव्या । होतारा । प्रथमा । विदुःऽतरा । ऋजु । यक्षतः । सं । ऋचा । वपुःऽतरा ।
देवान् । यजंतौ । ऋतुऽथा । सं । अंजतः । नाभा । पृथिव्याः । अधि । सानुषु । त्रिषु ॥ ७ ॥

दैव्या । दिवि भवो दिव्योऽग्निः । तस्माद्दिव्यादग्नेर्जातौ होताराह्वातारौ देवानां होमनिष्पादकौ वाग्नी पार्थिवांतरिक्ष्यौ प्रथमा प्रथमं यष्टव्यौ विदुष्टरा विद्वत्तमौ वपुष्टरा प्रकृष्टवपुषौ देवावृचा मंत्रेण ऋजु अविकलं यथा तथा सम्यक् यक्षतः । पूजयतः । ऋतुथा तत्तदृतौ तत्र तत्र काले देवान्यष्टव्यान् यजंतौ देवौ

पृथिव्या नाभा नाभावुत्तरवेद्यामधि उपरि त्रिषु सानुषु समुच्छ्रितेषु प्रदेशेषु गार्हपत्यादिषु समंजतः। समांक्तां ॥ अंजेर्लेट्यडागमः ॥

॥ अथाष्टमी ॥

सरस्वती साधयंती धियं न इळा देवी भारती विश्वतूर्तिः।

तिस्रो देवीः स्वधया बर्हिरेदमच्छिद्रं पांतु शरणं निषद्य ॥ ८ ॥

सरस्वती। साधयंती। धियं। नः। इळा। देवी। भारती। विश्वऽतूर्तिः।

तिस्रः। देवीः। स्वधया। बर्हिः। आ। इदं। अच्छिद्रं। पांतु। शरणं। निऽसद्य ॥ ८ ॥

नोऽस्मदीयां धियं बुद्धिं यागं वा साधयंती निवर्तयंती सरस्वती इळै-तन्नामिका देवी भारती च विश्वतूर्तिर्विश्वानि तूर्णानि यस्याः सा तादृशी सर्वविषयगता वाक्। एतदुभयविशेषणं। तिस्रो देवीरेतास्तिस्रो देव्यः स्वधया-स्मद्दत्तहविषा निमित्तेनेदं बर्हिर्यज्ञमच्छिद्रं यथा तथा पांतु। पालयंतु। किं कृत्वा। शरणं यागगृहमानिषद्य आश्रित्य। यद्वा स्वधयेदं बर्हिरिमं यज्ञमाग-त्यास्मदीयं शरणं गृहं निषद्याच्छिद्रं यथा तथा पांतु ॥

अथ पिशंगरूप इति नवमी त्वाष्ट्रे पशौ पुरोडाशस्य याज्या पिशंगरूपः सुभरो वयोधाः प्रथमभाजं यशसं वयोधां। आ० ३. ८.। इति सूचितत्वात्। पाठस्तु ॥

पिशंगरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः।

प्रजां त्वष्टा वि ष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः ॥ ९ ॥

पिशंगऽरूपः। सुऽभरः। वयःऽधाः। श्रुष्टी। वीरः। जायते। देवऽकामः।

प्रऽजां। त्वष्टा। वि। स्यतु। नाभिं। अस्मे इति। अथ। देवानां। अपि। एतु। पाथः ॥ ९ ॥

पिशंगरूपः सुवर्णवर्णो नानारूपो वा सुभरः शोभनयज्ञः शोभनभरणो वा वयोधा वयसोऽन्नस्य धारयिता दाता वा श्रुष्टी क्षिप्रगुणो वीरो विविधमीरयिता देवकामो देवाः काम्यंते येन तादृशः पुत्रो जायते। जायतामुत्पद्यतां त्वष्टुरनुग्र-हात्। स च त्वष्टैतन्नामको देवोऽस्मे अस्मभ्यं नाभिं कुलस्य बंधिकां प्रजां पुत्रादिरूपां विष्यतु। विमुंचतु। वितरत्वित्यर्थः। अथ अपि च देवानां संबंधि पाथोऽन्नमप्यस्मानेतु। गच्छतु। अपिः क्रियया वा संबध्यते। गच्छत्वित्यर्थः ॥

॥ अथ दशमी ॥

वनस्पतिरवसृजन्नुप स्थादग्निर्हविः सूदयाति प्र धीभिः ।
त्रिधा समक्तं नयतु प्रजानन्देवेभ्यो दैव्यः शमितोप हव्यं ॥ १० ॥
वनस्पतिः । अवऽसृजन् । उप । स्यात् । अग्निः । हविः । सूदयाति । प्र । धीभिः ।
त्रिधा । संऽअक्तं । नयतु । प्रऽजानन् । देवेभ्यः । दैव्यः । शमिता । उप । हव्यं ॥ १० ॥

वनस्पतिर्यूपाभिमान्येतन्नामकोऽग्निरवसृजन् अस्मदीयं कर्मानुजानन् उपास्मत्समीपे स्यात् । तिष्ठतु । अग्निः पाकाधारोऽग्निश्च हविः पशुरूपं धीभिः कर्मभिर्विशेषैः पाकसाधनैः प्रकर्षेण सूदयाति । क्षारयति । अपाकाधिकपाकादिराहित्येन हविः पचतीत्यर्थः । किंच दैव्यो देवसंबंध्याहुत्यधिकरणभूतोऽग्निः शमिता हविषः संस्कर्ता । यद्वा दैव्यः शमितैतन्नामकोऽग्निः । अग्निर्वै देवानां शमितेति श्रूयते । त्रिधा त्रिप्रकारमुपस्तरणावदनाभिघारणैः समक्तं सम्यक् सिक्तं हव्यं हविः प्रजानन् विद्वान् नयनप्रकाराभिज्ञः सन् देवेभ्य उपनयतु । समीपं प्रापयतु ॥

॥ अथैकादशी ॥

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यं ॥ ११ ॥
घृतं । मिमिक्षे । घृतं । अस्य । योनिः । घृते । श्रितः । घृतं । ऊं इति । अस्य । धाम ।
अनुऽस्वधं । आ । वह । मादयस्व । स्वाहाऽकृतं । वृषभ । वक्षि । हव्यं ॥ ११ ॥

अस्याग्नेर्घृतमाज्यं मिमिक्षे । सिंचामि । यतोऽस्य घृतं योनिः कारणं । उत्पन्नोऽपि घृते श्रितः । आश्रितः । अस्याग्नेर्घृतमेव धाम तेजः । घृतेन ह्ययं दीप्यते । इदानीं संबोध्योच्यते । हे अग्ने वृषभ फलस्य वर्षितस्त्वमनुष्वधं प्रतिहविः सर्वेष्वपि हविःषु दीयमानेष्वावह देवान् । आहूय तान्मादयस्व । प्रीणय । ततस्त्वं स्वाहाकृतं स्वाहाकारेण दत्तं वक्षि । वह ॥

॥ इति द्वितीयस्य पंचमे त्रयोविंशो वर्गः ॥

हुवे व इति नवर्चं चतुर्थं सूक्तं । भार्गवः सोमाहुतिनामक ऋषिः । अग्निर्देवता । त्रिष्टुप् छंदः । हुवे नव सोमाहुतिर्भार्गवो हेत्यनुक्रमणिका ॥ प्रातर-

नुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छंदसीदं। सूचितं च। हुवे वः सुद्योत्मानं नि होतृषदन इति सूक्ते। आ॰ ४. १३.। इति ॥

॥ तत्र प्रथमा ॥

हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसं।
मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदाः ॥ १ ॥
हुवे। वः। सुऽद्योत्मानं। सुऽवृक्तिं। विशां। अग्निं। अतिथिं। सुऽप्रयसं।
मित्रःऽइव। यः। दिधिषाय्यः। भूत्। देवः। आऽदेवे। जने। जातऽवेदाः ॥ १ ॥

हे यजमाना वो युष्मदर्थमग्निं हुवे। आह्वयामि। कीदृशं तं। सुद्योत्मानं सुष्ठु द्योतमानं। सुवृक्तिं सुवर्जितं पापैः शोभनस्तुतिं वा। विशां यजमानानामतिथिमतिथिवत्सदा पूज्यं। सुप्रयसं शोभनहविर्लक्षणान्नं। किंच जातवेदा जातानां वेदिता यो देवोऽग्निर्मित्र इव सखेव आदित्य इव वा दिधिषाय्यो धारयिता भूत्। भवति। कुत्रेति उच्यते। आदेवे देवपर्यंते जने। मनुष्यप्रभृतिदेवपर्यंतेषु। तेषां धारकोऽभवदित्यर्थः ॥

॥ अथ द्वितीया ॥

इमं विधंतो अपां सधस्थे द्वितादधुर्भृगवो विक्ष्वा३यो:।
एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः ॥ २ ॥
इमं। विधंतः। अपां। सधऽस्थे। द्विता। अदधुः। भृगवः। विक्षु। आयोः।
एषः। विश्वानि। अभि। अस्तु। भूम। देवानां। अग्निः। अरतिः। जीरऽअश्वः ॥ २ ॥

इममग्निं विधंतः परिचरंतो भृगवोऽस्मत्पूर्वे महर्षयोऽपां सधस्थे सहस्थानेऽतरिक्ष आयोर्मनुष्यस्य यजमानस्य स्वभूतासु विक्षु प्रजास्वृत्विक्षु तेषां मध्ये च द्विता द्वयोः स्थानाददधुः। अधारयन् ॥ दधातेर्लुङि रूपं ॥ एषोऽग्निर्भूम भूम्नात्यर्थं विश्वानि भूतजातान्यस्मद्विरोधीन्यभ्यस्तु। अभिभवतु। स कीदृशः। देवानामरतिरीश्वरः। तेषां मध्ये शीघ्रमरणशीलो वास्मद्यागं प्रति। तथा जीराश्वः क्षिप्राश्वः ॥

॥ अथ तृतीया ॥

अग्निं देवासो मानुषीषु विक्षु प्रियं धुः क्षेष्यंतो न मित्रं ।
स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दम आ ॥ ३ ॥
अग्निं । देवासः । मानुषीषु । विक्षु । प्रियं । धुः । क्षेष्यंतः । न । मित्रं ।
सः । दीदयत् । उशतीः । ऊर्म्याः । आ । दक्षाय्यः । यः । दास्वते । दमे । आ ॥ ३ ॥

देवासो देवाः क्षेष्यंतः स्वर्गं प्रति गच्छंतः संतः पूर्वं मानुषीषु मनुष्यसंबंधिनीषु विक्षु प्रजासु प्रियं देवानां प्रीणयितारमग्निं धुः । अधुः स्थापितवंतः । तत्र दृष्टांतः । क्षेष्यंतो मित्रं न । रायं प्रति गच्छंतो नरा मित्रं प्रियं सखायं स्वगृहरक्षार्थं स्थापयंति । तद्वत् । स एवं देवैः स्थापितो योऽग्निर्दास्वते हविर्दत्तवते यजमानाय तदर्थं दमे तदीये यागगृह आ आहितः स्थापितो दक्षाय्यः समर्धयिता दाता वा सोऽग्निरुशतीः कामयमाना ऊर्म्या रात्रीः सर्वासु रात्रिष्वादीदयत् । दीप्यते सर्वतः । सर्वरात्रीरादीपयति वा ॥

॥ अथ चतुर्थी ॥

अस्य रण्वा स्वस्येव पुष्टिः संदृष्टिरस्य हियानस्य दक्षोः ।
वि यो भरिभ्रदोषधीषु जिह्वामत्यो न रथ्यो दोधवीति वारान् ॥ ४ ॥
अस्य । रण्वा । स्वस्यऽइव । पुष्टिः । संऽदृष्टिः । अस्य । हियानस्य । धक्षोः ।
वि । यः । भरिभ्रत् । ओषधीषु । जिह्वां । अत्यः । न । रथ्यः । दोधवीति । वारान् ॥ ४ ॥

अस्याग्नेः पुष्टिः शरीरवृद्धी रण्वा रमणीया शब्दयुक्ता वा । तत्र दृष्टांतः । स्वस्य पुष्टिरिव । यथा लोके स्वकीया पुष्टिः स्वस्मै रमणीया भवति तद्वत् । यद्वास्याग्नेः संबंधिनी पुष्टिर्यथा यजमानविषया रण्वा तद्वत् । किंच हियानस्य समृद्धिं गच्छतो व्याप्नुवतो दक्षोः काष्ठान् दिधक्षोर्दग्धुमिच्छोरस्याग्नेः संदृष्टिः संदर्शनाविर्भावोऽपि रण्वा । योऽग्निरोषधीषु काष्ठेषु जिह्वां ज्वालां । जात्येकवचनं । ज्वाला विभरिभ्रत् । अत्यर्थं विहरति । कंपयतीत्यर्थः ॥ हरतेर्यङ्लुगंतत्वेन दाधर्त्यादिषु । पा॰ ७.४.६५. । निपातिताल्लेट्यडागमः । यद्योगादनिघातः ॥ तत्र दृष्टांतः । रथ्यो रथार्होऽत्यो न वाजी यथा वारान् दंशवारणसाधनान्वालान् दोधवीति । कंपयति तद्वत् । योऽग्निर्ज्वालाः कंपयति अस्याग्नेः पुष्टी रण्वेति ॥

॥ अथ पंचमी ॥

आ यन्मे अभ्वं वनदः पनंतोशिग्भ्यो नामिमीत वर्णं ।
स चित्रेण चिकिते रंसु भासा जुजुर्वाँ यो मुहुरा युवा भूत् ॥ ५ ॥

आ । यत् । मे । अभ्वं । वनदः । पनंत । उशिक्ऽभ्यः । न । अमिमीत । वर्णं ।
सः । चित्रेण । चिकिते । रंऽसु । भासा । जुजुर्वान् । यः । मुहुः । आ । युवा । भूत् ॥ ५ ॥

यत् यस्याभ्वं महत्त्वं मे मम संबंधिनो वनदो वनंतः संभक्तारः । यद्वा वनदोऽवनदो भृशं शब्दयंतः स्तोतारः ॥ अवशब्दो भृशार्थवाची । तत्पूर्वान्नदेः क्विप् । अवाप्योरित्यकारलोपः ॥ आपनंत । समंतात् स्तुवंति । सोऽग्निरुशिग्भ्योऽस्मदीयं रूपं कामयमानेभ्य ऋत्विग्भ्यो वर्णं स्वसदृशं रूपं नामिमीत ॥ नशब्दश्चार्थे ॥ निर्मिमीते च । स च रंसु रमणीयेष्वाज्यादिहविःषु निमित्तेषु चित्रेण भासा हिरण्यकनकादिनानावर्णया दीप्त्या चिकिते । विज्ञायते । किंच योऽग्निर्जुजुर्वान् जीर्णः सन् ज्वालोपशमे स एव मुहुः पुनःपुनरा युवा सर्वतो मिश्रयिता तरुणो वाभूत् । आभवति पुनराज्यादिसंयोगात् ॥

॥ इति द्वितीयस्य पंचमे चतुर्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

आ यो वना तातृषाणो न भाति वार्ण पथा रथ्येव स्वानीत् ।
कृष्णाध्वा तपू रण्वश्चिकेत द्यौरिव स्मयमानो नभोभिः ॥ ६ ॥

आ । यः । वना । ततृषाणः । न । भाति । वाः । न । पथा । रथ्याऽइव । स्वानीत् ।
कृष्णऽअध्वा । तपुः । रण्वः । चिकेत । द्यौःऽइव । स्मयमानः । नभःऽभिः ॥ ६ ॥

योऽग्निर्वना वनानि वृक्षसमूहान् ततृषाणो न तृषित इव । त्वरमाण इत्यर्थः । आभाति । आभासयति । दहतीत्यर्थः । यद्वा वना वने आभाति । किंच वार्ण उदकमिव पथा प्रवणेन मार्गेण गच्छति । तद्वत् इतस्ततो गच्छति । रथ्येव रथस्य वोढाश्व इव स्वानीत् । शब्दयति । यद्वा रथशब्दात् सोर्ड्यादेशः । यथा रथो युद्धमार्गेण गच्छन् स्वनति तद्वत् । किंच कृष्णाध्वा कृष्णवर्त्मा तपुस्तापको रण्वो रमणीय एवंभूतः सन् चिकेत । ज्ञायते । प्रकाशत इत्यर्थः । क इव । नभोभिर्नक्षत्रैः स्मयमानः प्रकाशमानो द्यौरिव द्युलोक इव । यद्वा नभोभिरंत-

रिक्षप्रदेशविशेषैः स्मयमानः शोभमानो द्यौरादित्य इव। नीलवर्णांतरिक्षचार्यादित्यो यथा ज्ञायते तद्वत् स्वसंचारेण कृष्णीभूते मार्गे ज्ञायते। प्रकाशयत इत्यर्थः॥

॥ अथ सप्तमी ॥

स यो व्यस्थादभि दक्षदुर्वीं पशुर्नैति स्वयुरगोपाः।
अग्निः शोचिष्माँ अतसान्युष्णन्कृष्णव्यथिरस्वदयन्न भूम ॥७॥

सः। यः। वि। अस्थात्। अभि। धक्षत्। उर्वीं। पशुः। न। एति। स्वऽयुः। अगोपाः।
अग्निः। शोचिष्मान्। अतसानि। उष्णन्। कृष्णऽव्यथिः। अस्वदयत्। न। भूम ॥७॥

योऽग्निर्व्यस्थात्। विविधं तिष्ठति। व्याप्नोति विश्वं। तथा योऽग्निरुर्वीं विस्तृतां पृथिवीं सर्वां। यश्चाभिदक्षत्। आभिमुख्येन प्रवर्धमानो भवति॥ उभे अपि यच्छब्दयोगान्न निहन्येते॥ सोऽग्निः पशुर्न पशुरिव। यथा जातः पशुः स्वच्छंदेन चरति तथा स्वयुः स्वयमेव गच्छन् अगोपा गोपरहितः। नियामकवर्जित इत्यर्थः। एति। गच्छति। किं कुर्वन्। शोचिष्मान् प्रकृष्टदीप्तिः कृष्णव्यथिः कृष्णवर्णं प्राप्ता दग्धा व्यथकराः कंटकादयो येन तादृशः सन् भूमात्यधिकमस्वदयन्न। आस्वादयतीव वृक्षगतान् रसान्। अतसानि सततानि नीरसानि वा तरुगुल्मादीन्युष्णन् दहन्निति॥

॥ अथाष्टमी ॥

नू ते पूर्वस्यावसो अधीतौ तृतीये विदथे मन्म शंसि।
अस्मे अग्ने संयद्वीरं बृहंतं क्षुमंतं वाजं स्वपत्यं रयिं दाः ॥८॥

नु। ते। पूर्वस्य। अवसः। अधिऽइतौ। तृतीये। विदथे। मन्म। शंसि।
अस्मे इति। अग्ने। संयत्ऽवीरं। बृहंतं। क्षुऽमंतं। वाजं। सुऽअपत्यं। रयिं। दाः ॥८॥

हे अग्ने ते तव संबंधिनः पूर्वस्य पूर्वं यागसमये कृतस्यावसोऽभिमततर्पणस्याधीतौ स्मरणे सति तत्स्मृत्या नु अद्यापि तृतीये विदथे यागे तृतीयसवने। यद्वा प्रातरनुवाकसंबंधिनामाग्नेयोषस्याश्विनानां मध्येऽन्यतमे तृतीये क्रतौ मन्म मननीयं स्तोत्रं शंसि। अशंसि। शस्यतेऽस्माभिः। हे अग्ने त्वं चास्मे अस्मभ्यं संयद्वीरं संयतो वीरा यस्मिन् तादृशं बृहंतं महांतं क्षुमंतं शब्दवंतं कीर्तिमंतं वाजमुक्तलक्षणमन्नं स्वपत्यं रयिं च दाः। देहि॥

॥ अथ नवमी ॥

त्वया यथा गृत्समदासो अग्ने गुहा वन्वंत उपराँ अभि ष्युः ।
सुवीरासो अभिमातिषाहः स्मत्सूरिभ्यो गृणते तद्वयो धाः ॥ ९ ॥
त्वया । यथा । गृत्सऽमदासः । अग्ने । गुहा । वन्वंतः । उपरान् । अभि । स्युरिति स्युः ।
सुऽवीरासः । अभिमातिऽसहः । स्मत् । सूरिऽभ्यः । गृणते । तत् । वयः । धाः ॥ ९ ॥

हे अग्ने त्वया रक्षकेन वन्वंतश्छांदसं भजंतो गृत्समदा ऋषयः । आत्मनि परोक्ष्येण वचनं । यथा गुहा गुहायां वर्तमानानुपरान् उपरमणसाधनान् उपरि उत्कृष्टे वर्तमानान्वा धनविशेषानभिस्युः । अभिभवेयुः । स्वाधीनान् कुर्युः । यद्वा गूढानुपरान् उपरेऽधिकत्वेन वर्तमानान्पापानभिस्युः । अभिभवेयुः । तथा कुर्वित्यर्थः । कीदृशाः । सुवीरासः । शोभनपुत्राद्युपेताः । अभिमातिसहः । वैरिणां पापादीनां सोढारः । किंच सूरिभ्यो मेधाविभ्यो यजमानेभ्यो गृणते ॥ व्यत्ययेनैकवचनं ॥ शब्दयद्भ्यः स्तोतृभ्यः । यद्वा सूरिभ्यो यजमानेभ्यो गृणते स्तोत्रे च स्मत् सुमत् अतिप्रभूतं तत् तादृशं प्रसिद्धं वयोऽन्नं धाः । धेहि ॥

॥ इति द्वितीयस्य पंचमे पंचविंशो वर्गः ॥

होताजनिष्टेत्यष्टर्चं पंचमं सूक्तं सोमाहुतेरार्षमाग्नेयमानुष्टुभं । होताष्टावानुष्टुभमित्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतावस्य विनियोगः । सूचितं च । अग्नायी होताजनिष्ट । आ॰ ४. १३. । इति ॥ चतुर्विंशेऽहन्यपीदमेवाज्यं । चतुर्विंशे होताजनिष्टेत्याज्यं । आ॰ ७. २. । इति ॥ आभिप्लविके द्वितीयेऽहनीदमेवाज्यं । द्वितीयस्य चतुर्विंशेनाज्यं । आ॰ ७. ६. । इत्यतिदिष्टत्वात् ॥

॥ तत्र प्रथमा ॥

होताजनिष्ट चेतनः पिता पितृभ्य ऊतये ।
प्रयक्षं जेन्यं वसु शकेम वाजिनो यमं ॥ १ ॥
होता । अजनिष्ट । चेतनः । पिता । पितृऽभ्यः । ऊतये ।
प्रऽयक्षन् । जेन्यं । वसु । शकेम । वाजिनः । यमं ॥ १ ॥

होता होमनिष्पादकश्चेतनश्चेतयितास्मदनुष्ठितस्य पिता पालकोऽस्मद्यज्ञस्य ईदृशोऽग्निरजनिष्ट । उत्पन्नः । किमर्थं । पितृभ्यः पालकेभ्यो यजमानेभ्यः ॥

षष्ठ्यर्थे चतुर्थी ॥ तेषामूतये रक्षणाय च। वयं च वाजिनो हविर्लक्षणान्नवंतः संतः प्रयक्षं प्रकर्षेण पूज्यं जेन्यं जेतव्यं यमं यमयितव्यं वसु धनं शकेम। शक्ता भूयास्म लब्धुमिति शेषः। यद्वा वाजिनोऽन्नस्य यमं यमनं कर्तुं शकेम। प्रयक्षं जेन्यं वसु धनमित्युपमानं। उक्तलक्षणं धनमिव। तद्यथावरोद्धुं शक्नुमस्तद्वत् ॥

॥ अथ द्वितीया ॥

आ यस्मिन्त्सप्त रश्मयस्तता यज्ञस्य नेतरि।
मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्वति ॥ २ ॥
आ। यस्मिन्। सप्त। रश्मयः। तताः। यज्ञस्य। नेतरि।
मनुष्वत्। दैव्यं। अष्टमं। पोता। विश्वं। तत्। इन्वति ॥ २ ॥

यज्ञस्य नेतरि यागस्य निर्वाहके यस्मिन्नग्नौ सप्त रश्मयः सप्तसंख्याका रश्मिवद्व्याप्ता होत्रका आतताः। स्वस्वकर्मभिः सर्वतो व्याप्ता भवंति। स पोता पावको देवानां पोत्राख्य ऋत्विग्रूपो वाग्निर्मनुष्वत् मनुषपोतृवत् दैव्यं। देवो यज्ञः। तत्संबंध्यष्टममष्टर्त्विक्संबंधि तद्विश्वं कर्तव्यजातं सप्तहोत्रकैः सह स्वयमष्टमः सन् इन्वति। व्याप्नोति। यद्वा तदित्यस्य लिंगव्यत्ययः। स पोतेति संबंधः। सप्तहोत्रकैः सहाष्टमो भूत्वा तद्वद्यज्ञं निर्वहतीत्यर्थः ॥

॥ अथ तृतीया ॥

दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत्।
परि विश्वानि काव्या नेमिश्चक्रमिवाभवत् ॥ ३ ॥
दधन्वे। वा। यत्। ईं। अनु। वोचत्। ब्रह्माणि। वेः। ऊं इति। तत्।
परि। विश्वानि। काव्या। नेमिः। चक्रंऽइव। अभवत् ॥ ३ ॥

पूर्वे मंत्रे होत्रादिवत् स्वयमपि यज्ञं निर्वहतीत्युक्तं। अत्र तु सर्वं तत्तदात्मना स्थित्वा स्वयमेव निर्वहतीत्याह। वा अथवा ईमेनं यज्ञमनु लक्षीकृत्य यद्धविरादिकं दधन्वे धारयत्यध्वर्य्वादिरूपः। यानि ब्रह्माणि शस्त्रादीन्यनुवोचत्। अनुवक्ति होत्रादिरूपः। अत्र वान्वित्येतद्योज्यं। तत्सर्वं वेरु। वेरेव। कामयते जानाति वा स्वयमनुष्ठातुं। अयमग्निर्विश्वानि सर्वाणि काव्यानि। कवयो मेधाविन ऋत्विजः। तत्संबंधीनि कर्माणि पर्यभवत्। परिभवति। स्वायत्तानि

करोति । व्याप्नोतीत्यर्थः । व्याप्तौ दृष्टांतः । नेमिः वहिर्वेष्टनवलयश्चक्रं रथांगं यथा कार्त्स्न्येन व्याप्नोति तद्वत् ॥

॥ अथ चतुर्थी ॥

साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि ।
विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते ॥४॥
साकं । हि । शुचिना । शुचिः । प्रऽशास्ता । क्रतुना । अजनि ।
विद्वान् । अस्य । व्रता । ध्रुवा । वयाःऽइव । अनु । रोहते ॥४॥

शुचिः स्वयं शोधकः प्रशास्ता देवानां एतन्नामक ऋत्विक् प्रशासिता वा यज्ञविघ्नानां शुचिना क्रतुना शोधकेनाग्निहोत्रादिकर्मणा साकं हि सहैवाजनि । उत्पन्नः । जातमात्र एव शुद्धः सर्वस्य प्रशास्ता च सन्नग्निहोत्रादिनिर्वोढाभवदित्यर्थः । अस्याग्नेर्ध्रुवा ध्रुवाणि फलपर्यवसायीनि व्रतानि कर्माणि विद्वान् जानन् यजमानो वया इव विस्तृताः शाखा इवानुरोहते । क्रमेणानुतिष्ठति ॥

॥ अथ पंचमी ॥

ता अस्य वर्णमायुवो नेष्टुः सचंत धेनवः ।
कुवित्तिसृभ्य आ वरं स्वसारो या इदं ययुः ॥५॥
ताः । अस्य । वर्णं । आयुवः । नेष्टुः । सचंत । धेनवः ।
कुवित् । तिसृऽभ्यः । आ । वरं । स्वसारः । याः । इदं । ययुः ॥५॥

या वक्ष्यमाणलक्षणा या अंगुलय इदमनुष्ठीयमानं कर्म ययुः । प्राप्नुवंति । अनुतिष्ठंति । ता आयुवो गंत्र्यो व्याप्ता धेनवः प्रीणयित्र्यः स्वसारः स्वयं सारिण्योऽगुलयो नेष्टुर्हविर्याचितुर्भक्षयितुः शोधयितुः पोषयितुर्नेतुर्वास्याग्नेः । यद्वैतन्नामकऋत्विग्रूपस्य तिसृभ्य आ गार्हपत्यादिमूर्तीनामपि वरं वर्णं कुवित् बहुकृत्वः सचंत । सेवंते । परिचरंति ॥

॥ अथ षष्ठी ॥

यदीं मातुरुप स्वसा घृतं भरंत्यस्थित ।
तासामध्वर्युरागतौ यवो वृष्टीव मोदते ॥६॥

यदि । मातुः । उप । स्वसा । घृतं । भरंती । अस्थित ।
तासां । अध्वर्युः । आऽगतौ । यवः । वृष्टीऽइव । मोदते ॥ ६ ॥

यदि यदा मातुः सर्वस्य निर्मातुर्भूम्या वेदिलक्षणायाः स्वसा स्वसृस्थानीया जुहूर्घृतं भरंती सत्युपास्थित । उपतिष्ठेदग्निं । एकवचनमविवक्षितं । जुहूपभृद्ध्रुवा घृतं भरंत्यस्तिष्ठंतीत्यर्थः । तदा तासां जुह्वादीनामागतौ यागाय प्राप्तौ सत्यामध्वर्युरेतन्नामक ऋत्विग्रूपोऽध्वरं कामयमानो वायमग्निर्मोदते । हृष्यति । यवो वृष्टीव वृष्ट्या यथा मोदते तद्वत् ॥

॥ अथ सप्तमी ॥

स्वः स्वाय धायसे कृणुतामृत्विगृत्विजं ।
स्तोमं यज्ञं चादरं वनेमा ररिमा वयं ॥ ७ ॥
स्वः । स्वाय । धायसे । कृणुतां । ऋत्विक् । ऋत्विजं ।
स्तोमं । यज्ञं । च । आत् । अरं । वनेम । ररिम । वयं ॥ ७ ॥

अयमग्निः स्वः स्वयमेव स्वाय स्वकीयाय धायसे कर्मणे हविषां धारणाय वा ऋत्विक् होताजनिष्टेत्यादिनोक्तलक्षणो होतृपोतृप्रशास्त्राद्यृत्विग्रूपः सन् ऋत्विजमार्त्विज्यं ॥ भावप्रधानोऽयं निर्देशः ॥ देवर्त्विग्रूपः सन् ऋत्विजं मानुषमार्त्विज्यं कृणुतां । करोतु । वयं च तदनुग्रहात् आदनंतरमेव स्तोमं स्तोत्रं यज्ञं च तदाश्रयं यागमपरमलमत्यर्थं वनेम । संभजेमहि । ररिम ददेमहि च हविः । यद्वा स्तोमं वनेम यज्ञं यज्ञयोग्यं हवी ररिम ॥

॥ अथाष्टमी ॥

यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः ।
अयमग्ने त्वे अपि यं यज्ञं चकृमा वयं ॥ ८ ॥
यथा । विद्वान् । अरं । करत् । विश्वेभ्यः । यजतेभ्यः ।
अयं । अग्ने । त्वे इति । अपि । यं । यज्ञं । चकृम । वयं ॥ ८ ॥

हे अग्ने विद्वान् त्वन्माहात्म्याभिज्ञः प्रयोगज्ञो वा यजमानो यथा विश्वेभ्यो यजतेभ्यः सर्वेभ्यो यजनीयेभ्यो देवेभ्योऽरं पर्याप्तं करत् कुर्यात् तथा त्वमनुगृ-

हाणेत्यर्थः। वयमपि यं यज्ञं यागविशेषं चकृम कुर्महे स यागस्त्वे अपि॥ अपिरेवार्थे॥ तवैव त्वत्प्रीत्यर्थः। त्वमेव तस्मात्तं सर्वदेवार्थयागं तत्तद्दत्विग्रूपः सन् निर्वहेत्यर्थः॥

॥ इति द्वितीयस्य पंचमे षड्विंशो वर्गः॥

इमां म इत्यष्टर्चं षष्ठं सूक्तं सोमाहुत्यार्षमाग्नेयं गायत्रं। इमां मे गायत्रं हीत्यनुक्रांतं॥ प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छंदस्यस्य विनियोगः। सूचितं च। इमां मे अग्ने समिधमिमामिति तृयाणामुत्तमामुद्धरेत्। आ॰ ४.१३.। इति॥ अपराह्णिक्यामुपसदीमां मे अग्ने समिधमिति तिस्र ऋचस्त्रिरभ्यस्ता नव सामिधेन्यः कृत्वा विनियोक्तव्याः। अथोपसदिति खंडे सूचितं। इमां मे अग्ने समिधमिमामिति तु सामिधेन्यः। आ॰ ३.८.। इति॥

॥ तत्र प्रथमा॥

इमां मे अग्ने समिधमिमामुपसदं वनेः। इमा ऊ षु श्रुधी गिरः॥१॥

इमां। मे। अग्ने। सम्ऽइधं। इमां। उपऽसदं। वनेरिति वनेः। इमाः। ऊं इति। सु। श्रुधि। गिरः॥१॥

हे अग्ने मदीयामिमामाधीयमानां समिधं इमामुपसदमुपसदनसाधनामाहुतिमुपसद्यागे क्रियमाणां वा वनेः। संभजेथाः। तथेमा उ इमा अपि गिरः स्तुतीः सु सुष्ठु श्रुधि। शृणु॥

॥ अथ द्वितीया॥

अया ते अग्ने विधेमोर्जो नपादश्वमिष्टे। एना सूक्तेन सुजात॥२॥

अया। ते। अग्ने। विधेम। ऊर्जः। नपात्। अश्वम्ऽइष्टे। एना। सुऽउक्तेन। सुऽजात॥२॥

हे अग्ने ते त्वामयानयाहुत्या विधेम। परिचरेम। हे ऊर्जो नपात् बलस्य नप्त्रः तस्य नपातयितर्वा हे अश्वमिष्टे व्यापकयज्ञ। यद्वा आशु क्रियमाणं कर्माश्वं। तदिच्छतीत्यश्वमिष्टिः। संत्वरमाणा ह्युपसदाचरंति। ते कर्मभिः समत्वरंत ते तिस्रः सामिधेनीरनूच्य तिस्रो देवता अयजन्निति ब्राह्मणं। तादृशाग्ने ते त्वामयानयाहुत्या विधेम। परिचरेम। तथा हे सुजात शोभनजनन एना एतेन सूक्तेन स्तोत्रेण प्रीणयेमेति शेषः। यद्वा स्तुत्युपबृंहितेन विधेम॥

॥ अथ तृतीया ॥

तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः । सपर्येम सपर्यवः ॥ ३ ॥

तं । त्वा । गीःऽभिः । गिर्वणसं । द्रविणस्युं । द्रविणःऽदः । सपर्येम । सपर्यवः ॥ ३ ॥

हे द्रविणोदो धनस्य दातरग्ने तं तादृशं गिर्वणसं गीर्भिः स्तुतिभिर्वननीयं द्रविणस्युं हविर्लक्षणधनेच्छुं त्वा त्वां सपर्यवः परिचरणकर्तारो वयं गीर्भिः स्तुतिभिः सपर्येम । परिचरेम ॥

॥ अथ चतुर्थी ॥

स बोधि सूरिर्मघवा वसुपते वसुदावन् । युयोध्य१स्मद्द्वेषांसि ॥ ४ ॥

सः । बोधि । सूरिः । मघऽवा । वसुऽपते । वसुऽदावन् । युयोधि । अस्मत् । द्वेषांसि ॥ ४ ॥

मघवान्नवान् सूरिर्विद्वान् प्रेरको वा स उक्तलक्षणकस्त्वं बोधि । बुध्यस्वास्मदीयं स्तोत्रं । किंच हे अग्ने द्वेषांसि द्वेष्टॄनस्मदस्मत्तो युयोधि । पृथक्कुरु ॥

॥ अथ पंचमी ॥

स नो वृष्टिं दिवस्परि स नो वाजमनर्वाणं । स नः सहस्रिणीरिषः ॥ ५ ॥

सः । नः । वृष्टिं । दिवः । परि । सः । नः । वाजं । अनर्वाणं । सः । नः । सहस्रिणीः । इषः ॥ ५ ॥

सः स एवाग्निर्नोऽस्मदर्थं दिवस्परि द्युलोकादंतरिक्षात् ॥ परीति पंचम्यर्थानुवादी ॥ वृष्टिं करोतीति च शेषः । स एव नोऽस्मदर्थमनर्वाणमविचलमनल्पं वाजं बलं ददातु । तथा सहस्रिणीरपरिमितप्रकाराणीषोऽन्नानि स एवाग्निर्ददातु ॥

॥ अथ षष्ठी ॥

ईळानायावस्यवे यविष्ठ दूत नो गिरा । यजिष्ठ होतरा गहि ॥ ६ ॥

ईळानाय । अवस्यवे । यविष्ठ । दूत । नः । गिरा । यजिष्ठ । होतः । आ । गहि ॥ ६ ॥

हे यविष्ठ युवतम दूत देवानां यज्ञादिसूचक यजिष्ठातिशयेन यष्टव्य होतर्देवानामाह्वातरग्ने नो गिरास्मदीयया स्तुत्येळानाय पूजयित्रेऽवस्यवे स्वरक्षणमिच्छते मदर्थमागहि । आगच्छ ॥

॥ अथ सप्तमी ॥

अंतर्ह्यग्न ईयसे विद्वान् जन्मोभया कवे । दूतो जन्येव मित्र्यः ॥ ७ ॥

अंतः । हि । अग्ने । ईयसे । विद्वान् । जन्म । उभया । कवे । दूतः । जन्याऽइव । मित्र्यः ॥ ७ ॥

हे कवे मेधाविन्नग्ने अंतर्जनानां हृदय ईयसे हि । गच्छसि जानासि वा । हिः स होता सेदु दूत्यं चिकित्वाँ अंतरीयस इत्यादिमंत्रांतरप्रसिद्धिद्योतनार्थः । कीदृशस्त्वं । उभया उभयविधानि जन्म जन्मानि यष्टॄणां यजमानानां यष्टव्यानां देवानां च संबंधीनि विद्वान् जानन् सन् । ईयस इति संबंधः । तत्र दृष्टांतः । जन्यो जनेभ्यो हितो मित्र्यो विशेषेण मित्रेभ्यो हितो दूत इव । स यथा प्रजानां चित्तवृत्तिज्ञानाय राज्ञा प्रेरितस्तासां मनो जानाति तद्वत् त्वमप्यस्माकमंतरीयस इत्यर्थः ॥

॥ अथाष्टमी ॥

स विद्वाँ आ च पिप्रयो यक्षि चिकित्व आनुषक् । आ चास्मिन्त्सत्सि बर्हिषि ॥ ८ ॥

सः । विद्वान् । आ । च । पिप्रयः । यक्षि । चिकित्वः । आनुषक् । आ । च । अस्मिन् । सत्सि । बर्हिषि ॥ ८ ॥

हे अग्ने स त्वं विद्वान् विशेषाभिज्ञः सन् आ च पिप्रयः । सर्वतोऽस्मान्पूरय च कामैः । हे चिकित्वश्चेतनावन् आनुषक् अनुक्रमेण यक्षि । यज देवान् । आसत्सि । आसीद चास्मिन् स्तीर्णे बर्हिषि ॥

॥ इति द्वितीयस्य पंचमे सप्तविंशो वर्गः ॥

श्रेष्ठं यविष्ठेति षडृचं सप्तमं सूक्तं सोमाहुत्यार्षमाग्नेयं गायत्रं ॥ प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छंदस्यस्य विनियोगः पूर्वसूक्त एवोक्तः ॥ ग्रावणाकर्मण्याद्या विनियुक्ता ॥

॥ सैषा सूक्ते प्रथमा ॥

श्रेष्ठं यविष्ठ भारताग्ने द्युमंतमा भर । वसो पुरुस्पृहं रयिं ॥ १ ॥

श्रेष्ठं । यविष्ठ । भारत । अग्ने । द्युऽमंतं । आ । भर । वसो इति । पुरुऽस्पृहं । रयिं ॥ १ ॥

हे अग्ने यविष्ठ युवतम हे भारत । भरता ऋत्विजः । तेषां संबंधी भारतः । तेऽध्वर्य्वादिभिर्मंथनहविःस्तोत्रादिना व्याप्रियमाणत्वात् । तादृश हे वसो वासक

व्याप्न वा एवंरूपाग्ने श्रेष्ठमतिप्रशस्यं द्युमंतं दीप्तिमंतं पुरुस्पृहं बहुभिरर्थिभिः स्पृहणीयं रयिमाभर। आहर॥

॥ अथ द्वितीया ॥

मा नो अरातिरीशत देवस्य मर्त्यस्य च। पर्षि तस्या उत द्विषः ॥ २॥

मा। नः। अरातिः। ईशत। देवस्य। मर्त्यस्य। च। पर्षि। तस्याः। उत। द्विषः ॥ २॥

हे अग्ने त्वदनुग्रहान्नोऽस्मानरातिरदानं शत्रुत्वं। यद्वा छंदस्यरातिशब्दः शत्रुवाची स्त्रीलिंगो भवति। अदाता शत्रुर्मेशत। पराभवितुं शक्तो मा भूत्। मा विषयीकुर्यात्। अरातिर्विशेष्यते। देवस्य च मर्त्यस्य च संबंधिनी तैः कारिता। उत अपि च तस्या उभयविधाया द्विषोऽस्मदरातेः पर्षि। पूरय॥

॥ अथ तृतीया ॥

विश्वा उत त्वया वयं धारा उदन्या इव। अति गाहेमहि द्विषः ॥ ३॥

विश्वाः। उत। त्वया। वयं। धाराः। उदन्याःऽइव। अति। गाहेमहि। द्विषः ॥ ३॥

उत अपि च हे अग्ने वयं त्वदनुग्रहाद्विश्वा द्विषः सर्वानपि द्वेष्टॄन् उदन्या धारा इव उदकसंबंधिनीर्धारा अल्पस्रुतीरिव त्मनात्मनैवान्यनिरपेक्षेणातिगाहेमहि। अभिक्रम्य गच्छेम॥

॥ अथ चतुर्थी ॥

शुचिः पावक वंद्योऽग्ने बृहद्वि रोचसे। त्वं घृतेभिराहुतः ॥ ४॥

शुचिः। पावक। वंद्यः। अग्ने। बृहत्। वि। रोचसे। त्वं। घृतेभिः। आऽहुतः ॥ ४॥

हे पावक शोधकाग्ने शुचिः शुद्धो वंद्यो नमस्कार्यः सन् बृहत् महत् अत्यधिकं विरोचसे। विविधं दीप्यसे। यतस्त्वं घृतेभिर्घृतैराहुतः। समंतात्सिक्तः अतो विरोचसे॥

॥ अथ पंचमी ॥

त्वं नो असि भारताग्ने वशाभिरुक्षभिः। अष्टापदीभिराहुतः ॥ ५॥

त्वं। नः। असि। भारत। अग्ने। वशाभिः। उक्षऽभिः। अष्टाऽपदीभिः। आऽहुतः ॥ ५॥

हे भारत ऋत्विजां पुत्रस्थानीयाग्ने नोऽस्मदीयस्त्वं वशाभिर्वंध्याभिर्गोभिः उक्षभिः सेक्तृभिर्बलीवर्दैः अष्टापदीभिर्गर्भिणीभिश्चाहुत आराधितोऽसि॥

॥ अथ षष्ठी ॥

द्रन्वन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः ॥ ६ ॥

द्रुऽअन्नः । सर्पिःऽआसुतिः । प्रत्नः । होता । वरेण्यः । सहसः । पुत्रः । अद्भुतः ॥ ६ ॥

द्रन्वन्नः समिद्रूपान्नः सर्पिरासुतिः सर्पिरासूयत आसिच्यते यस्मिन् तादृशः प्रत्नः पुरातनो होता होमनिष्पादको वरेण्यो वरणीयः सहसस्पुत्रः सहसो बलस्य पुत्रस्थानीयः । बलेनोत्पन्नत्वात् । अद्भुत आश्चर्यभूतः । रमणीय इत्यर्थः । एवंमहानुभावोऽग्निर्मामनुजानात्वित्यर्थः ॥

॥ इति द्वितीयस्य पंचमेऽष्टाविंशो वर्गः ॥

वाजयन्निवेति षडृचमष्टमं सूक्तं । सोमाहुतेर्हशब्दानुवृत्तस्याभवान्मंडलद्रष्टा गृत्समद ऋषिः । अग्निर्देवता । हिशब्दाद्गायत्री छंदः । अंत्यानुष्टुप् । वाजयन्निवांत्यानुष्टुबित्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोस्तृतीयसूक्तत्वेनास्योत्तमावर्जितस्य विनियोग उक्तः ॥

॥ तत्र प्रथमा ॥

वाजयन्निव नू रथान्योगाँ अग्नेरुप स्तुहि । यशस्तमस्य मीळ्हुषः ॥ १ ॥

वाजयन्ऽइव । नु । रथान् । योगान् । अग्नेः । उप । स्तुहि । यशःऽतमस्य । मीळ्हुषः ॥ १ ॥

हे अंतरात्मन् नु क्षिप्रमग्नेर्योगानश्वानुपस्तुहि । कीदृशस्याग्नेः । यशस्तमस्य प्रवृद्धयशसः ॥ मत्वर्थो लुप्यते ॥ मीळ्हुषः सेक्तुः फलस्य । ईदृशस्य योगान् स्तुहि होतरिति वा संबोध्यं । स्तुतौ दृष्टांतः । वाजयन्निव । अन्नमिच्छन् पुरुष इव । स यथाश्वान् गमनाय स्तौति तद्वत् । यद्वोक्तलक्षणस्याग्नेर्गमनसाधनान्रथान् स्तुहि ॥

॥ अथ द्वितीया ॥

यः सुनीथो ददाशुषेऽजुर्यो जरयन्नरिं । चारुप्रतीक आहुतः ॥ २ ॥

यः । सुऽनीथः । ददाशुषे । अजुर्यः । जरयन् । अरिं । चारुऽप्रतीकः । आऽहुतः ॥ २ ॥

सुनीथः शोभननयनोऽजुर्योऽजरणीयोऽनभिभाव्यः चारुप्रतीकः शोभनोपक्रमो योऽस्ति सोऽग्निर्ददाशुषे हविर्दत्तवते यजमानाय तदर्थमरिं तस्य शत्रुं जरयन् नाशयन् आहुतः । समंतादाराधितो भवति ॥

॥ अथ तृतीया ॥

य उं श्रिया दमेष्वा दोषोषसि प्रशस्यते । यस्य व्रतं न मीयते ॥ ३ ॥

यः । ऊं इति । श्रिया । दमेषु । आ । दोषा । उषसि । प्रऽशस्यते । यस्य । व्रतं । न । मीयते ॥ ३ ॥

योऽग्निरु श्रिया ज्वालया युक्तः सन् दमेषु आ आगत्य दोषा रात्रिषु उषस्यहःसु च प्रशस्यते । स्तूयते । यस्याग्नेर्व्रतं कर्म न मीयते । न हिंस्यते न क्षीयते वा ॥

॥ अथ चतुर्थी ॥

आ यः स्व१र्ण भानुना चित्रो विभात्यर्चिषा । अंजानो अजरैरभि ॥ ४ ॥

आ । यः । स्वः । न । भानुना । चित्रः । विऽभाति । अर्चिषा । अंजानः । अजरैः । अभि ॥ ४ ॥

योऽग्निश्चित्रश्चायनीयो नानावर्णो वार्चिषा ज्वालया रश्मिसमूहेनाविभाति । सर्वतो भासते । तत्र दृष्टांतः । स्वर्भानुना । किरणेन सूर्य इव । स यथा विभाति तद्वत् । किं कुर्वन् । अजरैर्नित्यैर्ज्वालासमूहैरभि सर्वतोऽंजानो व्यंजयन् प्रकाशयन् ॥

॥ अथ पंचमी ॥

अत्रिमनु स्वराज्यमग्निमुक्थानि वावृधुः । विश्वा अधि श्रियो दधे ॥ ५ ॥

अत्रिं । अनु । स्वऽराज्यं । अग्निं । उक्थानि । ववृधुः । विश्वाः । अधि । श्रियः । दधे ॥ ५ ॥

अत्रिं शत्रूणामन्नानां वा भक्षकं स्वराज्यं स्वयमेव राजमानं स्वराज्यमनु अभिलक्ष्य वाग्निमुक्थानि शस्त्राणि ववृधुः । वर्धयंति । स चाग्निर्विश्वाः सर्वाः श्रियोऽधि दधे । धारयति ॥

॥ अथ षष्ठी ॥

अग्नेरिंद्रस्य सोमस्य देवानामूतिभिर्वयं ।
अरिष्यंतः सचेमह्यभि ष्याम पृतन्यतः ॥ ६ ॥

अग्नेः । इंद्रस्य । सोमस्य । देवानां । ऊतिऽभिः । वयं ।
अरिष्यंतः । सचेमहि । अभि । स्याम । पृतन्यतः ॥ ६ ॥

अरिष्यंतः केनाप्यहिंस्यमाना वयमग्नेरिंद्रस्य सोमस्य देवानामन्येषामप्यूतिभी

रक्षणाभिः सचेमहि । युक्ता भवेम । तथा रक्षायुक्ता वयं पृतन्यतः पृतनामात्मन इच्छतः शत्रूनभिष्याम । अभिभवेम ॥ पृतनाशब्दात्क्यचि कव्यध्वरपृतनस्यर्चि लोप इत्यवर्णलोपः ॥

॥ इति द्वितीयस्य पंचम एकोनत्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके पंचमोऽध्यायः समाप्तः ॥

---

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

नि होतेति षडृचं नवमं सूक्तं गृत्समदस्यार्षं नि होतेत्यनुक्रांतत्वात् । अनुक्तत्वात् त्रिष्टुप् । मंडलादिपरिभाषयाग्निर्देवता ॥ प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छंदस्यस्य विनियोगः । अथैतस्या इति खंडे सूचितं । नि होता होतृषदन इति सूक्ते । आ° ४. १३. । इति ॥ अग्निप्रणयन आद्ये ऋचौ विनियुक्ते । पंचम्यां पौर्णमास्यामिति खंडे सूचितं । नि होता होतृषदन इति द्वे । आ° २. १७. ॥

॥ तस्मिन् सूक्ते प्रथमा ॥

नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असदत्सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः ॥ १ ॥

नि । होता । होतृऽसदने । विदानः । त्वेषः । दीदिऽवान् । असदत् । सुऽदक्षः ।
अदब्धव्रतऽप्रमतिः । वसिष्ठः । सहस्रंऽभरः । शुचिऽजिह्वः । अग्निः ॥ १ ॥

गृत्समदः स्तौति । होता देवानामाह्वाता विदानो विद्वान् त्वेषः प्रवृद्धो दीदिवान् दीप्यमानः सुदक्षः शोभनबलोऽदब्धव्रतप्रमतिः । अदब्धान्यहिंसितानि व्रतानि कर्माणि यस्याः सादब्धव्रता प्रमतिः प्रकृष्टा बुद्धिर्यस्य स तथोक्तः । वसिष्ठः सर्वस्य वासयितृतमः ॥ वासयतेस्तृजंतस्येष्ठनि रूपं ॥ सहस्रंभरः सहस्रस्यानेकविधस्य भर्ता । विहरणेन नानाविधरूपस्य धारक इत्यर्थ । यद्वा सहस्रस्य सर्वस्य भर्ता । तथा च वाजसनेयं । सर्वं वै सहस्रं सर्वंभर इत्येव तदाहेति । शुचिजिह्वः । शुचिर्दीप्ता जिह्वा ज्वाला यस्य स तथोक्तः । एवंभूतोऽग्निर्होतृषदने । होतात्र सीदतीति होतृषदनमुत्तरा वेदी ॥ अधिकरणे ल्युट् ॥ तत्र न्यसदत् । नितरां सीदतु ॥ उक्तार्थे ब्राह्मणं । नि होता होतृषदने विदान इत्यग्निर्वै देवानां होता तस्यैतद्धोतृषदनं यदुत्तरवेदीनाभिस्त्वेषो दीदिवाँ असदत्सुदक्ष इत्यासन्नो हि स तर्हि भवत्यदब्धव्रतप्रमतिर्वसिष्ठ इत्यग्निर्वै देवानां वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निरित्येषा ह वा अस्य सहस्रंभरता यदेनमेकं संतं बहुधा विहरंतीति ॥

॥ अथ द्वितीया ॥

त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः ॥ २॥
त्वं । दूतः । त्वं । ऊं इति । नः । परःऽपाः । त्वं । वस्यः । आ । वृषभ । प्रऽनेता ।
अग्ने । तोकस्य । नः । तने । तनूनां । अप्रऽयुच्छन् । दीद्यत् । बोधि । गोपाः ॥ २॥

हे वृषभ अभिमतफलवर्षक हे अग्ने त्वं दूतोऽस्मदीये यज्ञे देवाह्वानार्थं दूतो भव । त्वमु त्वमेव नोऽस्माकं परस्पा आपद्भ्यः पारयिता पाता च भव । किंच त्वं वस्यो वसुनो धनस्य आ प्रणेतास्मदभिमुख्येन प्रापयिता भव । अप्रयुच्छन् अप्रमाद्यन् । दीद्यन् ॥ दीदयतिर्दीप्तिकर्मा ॥ शोभमानः । त्वं नोऽस्माकं तोकस्य पुत्रस्य तने । तनोति विस्तारयति कुलमिति तनः पौत्रः । तस्मिन् अस्मदीयानां तनूनां गोपा गोपायिता । तथा च ब्राह्मणं । अग्निर्वै देवानां गोपा अग्निमेतत्सर्वतो गोप्तारं परिदत्त आत्मने च यजमानाय चेति । तादृशस्त्वं च गोपायिता भवामीति बोधि । बुध्यस्व ॥

॥ अथ तृतीया ॥

विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ॥ ३ ॥
विधेम । ते । परमे । जन्मन् । अग्ने । विधेम । स्तोमैः । अवरे । सधऽस्थे ।
यस्मात् । योनेः । उत्ऽआरिथ । यजे । तं । प्र । त्वे इति । हवींषि । जुहुरे । संऽइद्धे ॥ ३ ॥

हे अग्ने परम उत्कृष्टे जन्मन् । जायते प्रादुर्भवत्यस्मिन्निति जन्मस्थानं द्यौः । तस्मिन् द्युलोकेऽवस्थिताय ते तुभ्यं विधेम । स्तुतिभिः परिचरेम । अवरे द्युलोकादधस्तने सधस्थेऽन्तरिक्षे स्थिताय तुभ्यं स्तोमैः स्तोत्रैर्विधेम । परिचरेम । यस्माद्योनेः पृथिवीरूपात्स्थानात् त्वमुदारिथ उद्गतोऽसि प्रादुर्भूतोऽसि तं पृथिवीप्रदेशं यजे । पूजयामि । तत्र हि समिद्धे समिद्भिः समिध्यमाने त्वयि हवींषि पुरोडाशादीनि प्रजुहुरे । अध्वर्य्वादयः प्रजुह्वति ॥ जुहोतेर्लिटि रूपं ॥

॥ अथ चतुर्थी ॥

अग्ने यजस्व हविषा यजीयाञ्छ्रुष्टी देष्णमभि गृणीहि राधः ।
त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ॥ ४ ॥
अग्ने । यजस्व । हविषा । यजीयान् । श्रुष्टी । देष्णं । अभि । गृणीहि । राधः ।
त्वं । हि । असि । रयिऽपतिः । रयीणां । त्वं । शुक्रस्य । वचसः । मनोता ॥ ४ ॥

हे अग्ने यजीयान् यष्टृतमस्त्वं हविषास्मद्दत्तेन यजस्व । देवान् संयोजय । देष्णं देयं राधोऽन्नं श्रुष्टी ॥ श्रुष्टीति क्षिप्रनाम ॥ क्षिप्रमभिगृणीहि । देवानां पुरत इदं स्वादुतरमिदं स्वादुतरमिति ब्रूहि । यद्वा श्रुष्टी क्षिप्रकारी त्वं देष्णं देयं राधो धनमभिगृणीहि । अस्मदाभिमुख्येन ब्रूहि । प्रयच्छेत्यर्थः । दानसामर्थ्यं दर्शयति । त्वं रयीणां धनानां मध्ये रयिपतिरुत्तमस्य धनस्य पतिरसि हि । यद्वा रयीणां रयीपतिरित्यैको रयिशब्दोऽनुवादः । त्वं शुक्रस्य दीप्तस्य वचसोऽस्मदीयस्य स्तोत्रस्य मनोता प्रज्ञाता भवसि । यद्वा मानयिता ॥

॥ अथ पंचमी ॥

उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म ।
कृधि क्षुमंतं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः ॥ ५ ॥

उभयं । ते । न । क्षीयते । वसव्यं । दिवेऽदिवे । जायमानस्य । दस्म ।
कृधि । क्षुऽमंतं । जरितारं । अग्ने । कृधि । पतिं । सुऽअपत्यस्य । रायः ॥ ५ ॥

दस्म दर्शनीय हे अग्ने दिवेदिवे प्रतिदिनमग्निहोत्रकाले जायमानस्य ते तवोभयं वसव्यं दिव्यं भौमं च वसु ॥ वस्वादित्वात्स्वार्थिको यत्प्रत्ययः । पा॰ ५. ४. ३०. ४. ॥ तादृशमुभयं वसु न क्षीयते । न हीयते । अस्योभयविधधनसद्भावे मंत्रवर्णः त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्येत्यत्रोक्तः । अतस्त्वं जरितारं तव स्तोत्रं कुर्वाणमिमं यजमानं क्षुमंतमन्नवंतं कीर्तिमंतं वा कृधि । कुरु । किंच स्वपत्यस्य शोभनापत्ययुक्तस्य रायो धनस्य पतिं स्वामिनं कुरु ॥

साकमेधे पर्वणि पूर्वेद्युरनुसवनं तिस्र इष्टयः कर्तव्याः । प्रथमायामग्नेरनीकवतः सैनानीकेनेति याज्या । तथा ततः साकमेधा इति खंडे सूचितं । सैनानीकेन सुविदत्रो अस्मे । आ॰ २. १८. । इति ॥

॥ सैषा सूक्ते षष्ठी ॥

सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि ॥ ६ ॥
सः । एना । अनीकेन । सुऽविदत्रः । अस्मे इति । यष्टा । देवान् । आऽयजिष्ठः । स्वस्ति ।
अदब्धः । गोपाः । उत । नः । परःऽपाः । अग्ने । द्युऽमत् । उत । रेवत् । दिदीहि ॥ ६ ॥

हे अग्ने स तादृशस्त्वमेनानेनानीकेन युक्तस्त्वं सुविदत्रः सुप्रतिज्ञः सुधनो वास्मे अस्माकं भव । देवान्यष्टा देवानां हविःप्रदानेन पूजक आयजिष्ठो यष्टृतमोऽदब्धः केनाप्यतिरस्कृतो गोपा देवानां गोपायिता । उत अपि च नोऽस्माकं परस्पा दुरितेभ्यः पारयिता पाता च त्वं द्युमत् कांतियुक्तं उत अपि च रेवत् धनयुक्तं यथा भवति तथा स्वस्ति दिदीहि । क्षेमेण सर्वतो दिदीहि । क्षेमेण सर्वतो दीप्यस्व ॥

॥ इति द्वितीयस्य षष्ठे प्रथमो वर्गः ॥

जोहूत्र इति षड्टचं दशमं सूक्तं गार्त्समदं त्रैष्टुभमाग्नेयं जोहूत्र इत्यनुक्रांतत्वात् । सूक्तविनियोगः पूर्वेण सहोक्तः ॥

॥ अथ तस्मिन्सूक्ते प्रथमा ॥

जोहूत्रो अग्निः प्रथमः पितेवेळस्पदे मनुषा यत्समिद्धः ।
श्रियं वसानो अमृतो विचेता मर्मृजेन्यः श्रवस्य१ःस वाजी ॥ १ ॥

जोहूत्रः । अग्निः । प्रथमः । पिताऽइव । इळः । पदे । मनुषा । यत् । संऽइद्धः ।
श्रियं । वसानः । अमृतः । विऽचेताः । मर्मृजेन्यः । श्रवस्यः । सः । वाजी ॥ १ ॥

जोहूत्रः सर्वैर्यज्ञार्थं ह्वातव्यो होतव्यो वा ॥ ह्वयतेर्जुहोतेर्वा रूपं ॥ तादृशः प्रथमः । अग्निर्वै देवानामवम इत्याम्नानात् । मुख्यो योऽग्निः । यत् यदेळ इळायाः पद उत्तरवेद्यात्मके स्थाने मनुषा मनुष्येण यजमानेन समिद्धः सोऽग्निः पितेव देवानां हविःप्रापणेन पालको भवति। श्रियं दीप्तिं वसान आच्छादयन् अमृतो मरणधर्मरहितो विचेता विविधप्रज्ञः श्रवस्यः । श्रव इत्यन्ननाम । तस्मै हितः। वाजी बलवान् । सोऽग्निर्मर्मृजेन्यः सर्वैः परिचरणीयो भवति ॥ यङ्लुगंतात्केन्यप्रत्ययः ॥

॥ अथ द्वितीया ॥

श्रूया अग्निश्चित्रभानुर्हवं मे विश्वाभिर्गीर्भिरमृतो विचेताः ।
श्यावा रथं वहतो रोहिता वोतारुषाह चक्रे विभृत्रः ॥ २ ॥

श्रूयाः। अग्निः। चित्रऽभानुः। हवं। मे। विश्वाभिः। गीःऽभिः। अमृतः। विऽचेताः।
श्यावा। रथं। वहतः। रोहिता। वा। उत। अरुषा। अह। चक्रे। विऽभृत्रः ॥ २ ॥

अमृतो मरणधर्मरहितो विचेता विशिष्टप्रज्ञश्चित्रभानुर्विचित्रदीप्तिश्चायनीयदीप्तिर्वा सोऽग्निर्विश्वाभिर्गीर्भिः स्तुतिसाधनभूतैः सर्वैर्वाक्यैः क्रियमाणं मे मम हवं स्तोत्रं श्रूयाः । शृणोतु । तस्याग्ने रथं श्यावा श्याववर्णावश्वौ वहतः । वा अपि वा रोहिता रोहिद्वर्णावश्वौ रथं वहतः। रोहिद्वर्णयोरश्वयोः श्यावादिवर्णपरिग्रहः स्वेच्छया भवति। विभृत्रो नानास्थानेषु विहृतश्चक्रे। ऋत्विग्भिरकारि खलु ॥ करोतेः कर्मणि लिट् ॥

॥ अथ तृतीया ॥

उत्तानायामजनयन्त्सुषूतं भुवदग्निः पुरुपेशासु गर्भः ।
शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचेताः ॥ ३ ॥

उत्तानायां। अजनयन्। सुऽसूतं। भुवत्। अग्निः। पुरुऽपेशासु। गर्भः।
शिरिणायां। चित्। अक्तुना। महःऽभिः। अपरिऽवृतः। वसति। प्रऽचेताः ॥ ३ ॥

उत्तानायामुत्तानशयायामरण्यां सुषूतमग्निहोत्रार्थं सुष्ठु प्रेरितमग्निमजनयन्। अध्वर्य्वादय उदपादयन्। सोऽग्निः पुरुपेशासु। पेश इति रूपनाम। बहुरूपास्वोषधीषु गर्भो भुवत्। अंतर्वर्तमानतया गर्भ इव भवेत् ॥ भवतेर्लिङि रूपं ॥ शिरिणायां। शीर्यंते ऽस्यां भूतानीति शिरिणा रात्रिः। तस्यामप्यक्तुना। अंजनादक्तुस्तमः। तेन तमसापरीवृतोऽसंस्पृष्टः अत एव महोभिस्तेजोभिर्युक्तः प्रचेताः प्रकृष्टप्रज्ञः सन् वसति। दीप्यमानो वर्तते ॥

॥ अथ चतुर्थी ॥

जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियंतं भुवनानि विश्वा।
पृथुं तिरश्चा वयसा बृहंतं व्यचिष्ठमन्नै रभसं दृशानं ॥ ४ ॥
जिघर्मि। अग्निं। हविषा। घृतेन। प्रतिऽक्षियंतं। भुवनानि। विश्वा।
पृथुं। तिरश्चा। वयसा। बृहंतं। व्यचिष्ठं। अन्नैः। रभसं। दृशानं ॥ ४ ॥

विश्वा सर्वाणि भुवनानि प्रतिक्षियंतं वैश्वानरात्मनाधितिष्ठंतं पृथुं महांतं तिरश्चा सर्वतः प्रवर्तमानेन वयसा पेशसा बृहंतं प्रवृद्धमन्नैर्हविर्लक्षणैर्व्यचिष्ठं व्याप्तं रभसं बलवंतं दृशानमेवंगुणवत्तया दृश्यमानमग्निं पुरोडाशादिलक्षणेन हविषा घृतेन च जिघर्मि ॥ प्रति ह्येष सर्वाणि भूतानि क्षेति पृथुं तिरश्चा वयसा धूमेन बृहंतं व्यचिष्ठमन्नै रभसं दृशानमित्यवकाशनवंतमन्नैरन्नादं दीप्यमानमित्येतदा विश्वत इत्या सर्वतः प्रत्यंचं जुहोमीत्येतदरक्षसेत्यहेळमानेन मनसेदं जुषेतेत्येतन्मर्यश्रीरिति मर्यश्रीरित्येष स्पृहयद्वर्णो अग्निर्नाभिमृश इति न ह्येष मृशेत दीप्यमानो भवतीति ॥

॥ अथ पंचमी ॥

आ विश्वतः प्रत्यंचं जिघर्म्यरक्षसा मनसा तज्जुषेत।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा३ जर्भुराणः ॥ ५ ॥
आ। विश्वतः। प्रत्यंचं। जिघर्मि। अरक्षसा। मनसा। तत्। जुषेत।
मर्यऽश्रीः। स्पृहयत्ऽवर्णः। अग्निः। न। अभिऽमृशे। तन्वा। जर्भुराणः ॥ ५ ॥

विश्वतः सर्वत्र व्याप्य वर्तमानं प्रत्यंचं यज्ञं प्रत्यागच्छंतमग्निं येन घृतेनाजिघर्मि। आसिंचामि। अरक्षसा बाधकरहितेन मनसा स्तोत्रेण सह तदाज्यं जुषेत। भवान् सेवेत। मर्यश्रीः। मर्त्यैर्मर्त्यैः श्रयणीयो भजनीयः। स्पृहयद्वर्णः। यादृशं वर्णं यजमानः स्पृहयति तादृशवर्णोपेतः। तन्वा तेजसा जर्भुराणः पूर्यमाणोऽग्निर्नाभिमृशे। अतितेजस्वितयाभिमर्शनीयो न भवति ॥ अभिपूर्वान्मृशेः कृत्यार्थे केन्प्रत्ययः ॥

॥ अथ षष्ठी ॥

ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम।
अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि ॥ ६ ॥
ज्ञेयाः। भागं। सहसानः। वरेण। त्वाऽदूतासः। मनुऽवत्। वदेम।
अनूनं। अग्निं। जुह्वा। वचस्या। मधुऽपृचं। धनऽसाः। जोहवीमि ॥ ६ ॥

वरेण। वारयत्यनेन शत्रूनिति वरं तेजः। तेन सहसानः शत्रूनभिभवन् त्वं भागं भजनीयं स्तोत्रं ज्ञेयाः। जानीहि ॥ आशीर्लिङि वान्यस्य संयोगादेः। पा० ६. ४. ६८.। इत्येत्वं ॥ त्वादूतासः। त्वं दूतो येषामसि ते त्वादूतासः। यद्वा त्वया प्रेरिता वयं मनुवत् मनुरिव वदेम। स्तोत्रं ब्रूयामः। जुह्वा। हूयतेऽस्यामिति जुहूर्ज्वाला पात्रविशेषो वा। तयानूनं संपूर्णं मधुपृचं मधुना कर्मफलेन यजमानं संयोजयंतमग्निं धनसा धनस्य संभक्ताहं वचस्या स्तुतिकामनया जोहवीमि। आह्वयामि ॥

॥ इति द्वितीयस्य षष्ठे द्वितीयो वर्गः ॥

श्रुधी हवमित्येकविंशत्यृचमेकादशं सूक्तं गार्त्समदं। अत्रानुक्रमणिका। श्रुधि सैकेंद्रं विराट्स्थानमृते ऽंत्यामिति। विराट्स्थाना त्रिष्टुप्। तल्लक्षणमनुक्रमण्यामुक्तं। नवकौ वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थानेति। अंत्या त्रिष्टुप्। विशेषस्यानुक्तत्वादिंद्रो देवता ॥ पृष्ठ्यस्य चतुर्थेऽहनि मरुत्वतीयशस्त्रे द्वे सूक्ते निविद्धाने। तत्रेदं तृतीयं सूक्तं। चतुर्थेऽहनीति खंडे सूचितं। श्रुधी हवमिंद्र मरुत्वाँ इंद्रेति मरुत्वतीयं। आ० ७. ११.। इति ॥

॥ अथ तस्मिन्सूक्ते प्रथमा ॥

श्रुधी हवमिंद्र मा रिषण्यः स्याम ते दावने वसूनां ।
इमा हि त्वामूर्जो वर्धयंति वसूयवः सिंधवो न क्षरंतः ॥ १ ॥
श्रुधि । हवं । इंद्र । मा । रिषण्यः । स्याम । ते । दावने । वसूनां ।
इमाः । हि । त्वां । ऊर्जः । वर्धयंति । वसुऽयवः । सिंधवः । न । क्षरंतः ॥ १ ॥

गृत्समदः स्तौति । हे इंद्र मे हवं मदीयमिदं स्तोत्रं श्रुधि । शृणु । मा रिषण्यः । मा हिंसीः । इदमल्पं न साधीय इति मा निराकार्षीः ॥ दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यतीति निपातितः ॥ वयं ते तव वसूनां दावने दानाय स्याम । पात्रभूता भवेम । इमा अस्माभिर्दत्तानि वसूयवो दातुर्यजमानस्य धनमिच्छंति ॥ छंदसि परेच्छायां क्यच् ॥ तादृशानि क्षरंतः स्रवंतः सिंधव इव घृतक्षरणोपेतान्यूर्जो हविर्लक्षणान्यन्नानि त्वां वर्धयंति हि ॥

॥ अथ द्वितीया ॥

सृजो महीरिंद्र या अपिन्वः परिष्ठिता अहिना शूर पूर्वीः ।
अमर्त्यं चिद्दासं मन्यमानमवाभिनदुक्थैर्वावृधानः ॥ २ ॥
सृजः । महीः । इंद्र । याः । अपिन्वः । परिऽस्थिताः । अहिना । शूर । पूर्वीः ।
अमर्त्यं । चित् । दासं । मन्यमानं । अव । अभिनत् । उक्थैः । ववृधानः ॥ २ ॥

शूर शत्रूणां हिंसक हे इंद्र या अपोऽपिन्वः । अवर्धयः । पूर्वीः प्रभूतास्ता अहिना मेघेन वृत्रेण वा परिष्ठिताः । अधिष्ठिता आक्रांताः । ततस्त्वं तस्मादहेः सकाशात् महीर्महतीरपः सृजः । व्यसृजः । उक्थैः शस्त्रैर्वावृधानो वर्धमानस्त्वं दासं सर्वस्योपक्षपयितारममर्त्यं चित् मरणधर्मरहितमेवात्मानं मन्यमानं तमसुरमवाभिनत् । अवाङ्मुखं यथा भवति तथा ॥ भिदिर् विदारणे । लङि सिपि रूपं ॥

॥ अथ तृतीया ॥

उक्थेष्विन्नु शूर येषु चाकन्स्तोमेष्विंद्र रुद्रियेषु च ।
तुभ्येदेता यासु मंदसानः प्र वायवे सिस्रते न शुभ्राः ॥ ३ ॥

उक्थेषु। इत्। नु। शूर। येषु। चाकन्। स्तोमेषु। इंद्र। रुद्रियेषु। च।

तुभ्यं। इत्। एताः। यासु। मंदसानः। प्र। वायवे। सिस्रते। न। शुभ्राः ॥३॥

हे शूरेंद्र येषूक्थेषु होत्रादिभिः क्रियमाणेषु शस्त्रेषु रुद्रियेषु। रुद्रियं सुखं। तत्साधनभूतेषु। यद्वा रुद्राः स्तोतारः। तत्कृतेषु उद्गातॄणां स्तोमेषु च नु क्षिप्रं चाकन्। स्तुतीः कामयसे॥ कमतेः कनतेर्वा यङ्लुकि रूपं॥ यासु स्तोत्रशस्त्ररूपासु स्तुतिषु मंदसानो हृष्यन् भवसि ता एताः शुभ्रा दीप्यमानाः स्तुतयो वायवेऽस्मदीयं यज्ञं प्रत्यागच्छते तुभ्येत् तुभ्यमेव प्रसिस्रते। त्वदर्थमेव प्रसरंति। न संप्रत्यर्थे। ता अधुना सेवस्व॥

॥ अथ चतुर्थी ॥

शुभ्रं नु ते शुष्मं वर्धयंतः शुभ्रं वज्रं बाह्वोर्दधानाः।

शुभ्रस्त्वमिंद्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः ॥४॥

शुभ्रं। नु। ते। शुष्मं। वर्धयंतः। शुभ्रं। वज्रं। बाह्वोः। दधानाः।

शुभ्रः। त्वं। इंद्र। ववृधानः। अस्मे इति। दासीः। विशः। सूर्येण। सह्याः ॥४॥

हे इंद्र ते तव शुभ्रं शोभनं शुष्मं बलं स्तोत्रैर्वर्धयंतः शुभ्रं दीप्तं वज्रमायुधं नु क्षिप्रं तव बाह्वोर्दधाना निदधानाः। स्तूयमानो हींद्रोऽसुरवधाय वज्रमादत्त इतीत्थंरूपेणायुधं निदधाना भवामः। वावृधानः स्तोत्रैर्वर्धमानः शुभ्रस्तेजसा युक्तस्त्वमस्मे अस्माकं दासीरुपक्षपयित्रीर्विश आसुरीः प्रजाः सूर्येण सुष्ठु प्रेरकेण। आयुधं हि प्रेरयति त्वं युध्यस्वेति। एवंरूपेण बाह्वोर्निहितेन वज्रेण सह्याः। अभिभव॥ सहतेर्व्यत्ययेन लिङि परस्मैपदं॥

॥ अथ पंचमी ॥

गुहा हितं गुह्यं गूळ्हमप्स्वपीवृतं मायिनं क्षियंतं।

उतो अपो द्यां तस्तभ्वांसमहन्नहिं शूर वीर्येण ॥५॥

गुहा। हितं। गुह्यं। गूळ्हं। अप्ऽसु। अपिऽवृतं। मायिनं। क्षियंतं।

उतो इति। अपः। द्यां। तस्तभ्वांसं। अहन्। अहिं। शूर। वीर्येण ॥५॥

हे शूरेंद्र गुहा गुहायां हितं निहितं अत एव गुह्यमप्रकाश्यं गूळ्हं गूढम-

पीवृतं तिरोहितं। अत्रैकस्मिन्तिरोधानरूपेऽर्थे पुनरुक्तयस्तिरोधानभूयस्त्वप्रतिपादनपराः। अभ्यासे हि भूयानर्थो भवति। यथाहो दर्शनीयाहो दर्शनीयेति। तादृशं मायिनं मायाविनमसुरं क्षियंतं निवसंतं उतो अपि चापो द्यां दिवं च तस्तभ्वांसं स्वसामर्थ्येन स्तंभयंतं इत्थंभूतमहिमसुरं मेघं वा वीर्येण सामर्थ्यभूतेन वज्रेणाहन्। हतवानसि॥ हन हिंसागत्योरित्यस्य लङि रूपं॥

॥ इति द्वितीयस्य षष्ठे तृतीयो वर्गः॥

॥ अथ षष्ठी॥

स्तवा नु त इंद्र पूर्व्या महान्युत स्तवाम नूतना कृतानि।
स्तवा वज्रं बाह्वोरुशंतं स्तवा हरी सूर्यस्य केतू॥६॥

स्तव। नु। ते। इंद्र। पूर्व्या। महानि। उत। स्तवाम। नूतना। कृतानि।
स्तव। वज्रं। बाह्वोः। उशंतं। स्तव। हरी इति। सूर्यस्य। केतू इति॥६॥

हे इंद्र पूर्व्या पुरातनानि महानि महांति ते तव कर्माणि नु क्षिप्रं स्तव। स्तवाम। उत अपि च नूतनाधुनातनानि कृतानि कर्माणि स्तवाम। बाह्वोरुशंतं दीप्यमानं वज्रं स्तव। स्तवाम। किंच सूर्यस्य सुष्ठु प्रेरकस्य सुवीर्यस्य वा सूर्यात्मनो वेंद्रस्य केतू प्रज्ञापकौ हरी एतन्नामकावश्वौ स्तव। स्तवाम॥ ष्टुञ् स्तुतौ। तिङां तिङो भवंतीत्युत्तमबहुवचनस्य मध्यमैकवचनादेशः। बहुलं छंदसीति शपो लुगभावः॥

॥ अथ सप्तमी॥

हरी नु त इंद्र वाजयंता घृतश्चुतं स्वारमस्वार्ष्टां।
वि समना भूमिरप्रथिष्टारंस्त पर्वतश्चित्सरिष्यन्॥७॥

हरी इति। नु। ते। इंद्र। वाजयंता। घृतऽश्चुतं। स्वारं। अस्वार्ष्टां।
वि। समना। भूमिः। अप्रथिष्ट। अरंस्त। पर्वतः। चित्। सरिष्यन्॥७॥

हे इंद्र वाजयंता वेगं कुर्वंतौ॥ तत्करोतीति णिच्॥ ते तव हरी एतन्नामकावश्वौ घृतश्चुतं घृतस्योदकस्य च्यावयितारं स्वारं मेघध्वनिं नु क्षिप्रमस्वार्ष्टां॥ स्वरतिः शब्दकर्मा। पाकं पचतीतिवदेकधातोरनुवादः। लङि रूपं॥ समना समस्थला यद्वा समना सर्वतो व्यप्रथिष्ट। गर्जनं श्रुत्वा ममोपरि वृष्टिर्भवतीति

प्रथिताभूत्। तथा पर्वतश्चित् मेघोऽपि सरिष्यन् वर्षणार्थमितस्ततो गमिष्यन् अरंस्त। अरमत ॥ रमतेर्लुङि रूपं ॥

॥ अथाष्टमी ॥

नि पर्वतः साद्यप्रयुच्छन्त्सं मातृभिर्वावशानो अक्रान्।

दूरे पारे वाणीं वर्धयंत इंद्रेषितां धमनिं पप्रथन्नि ॥८॥

नि। पर्वतः। सादि। अप्रऽयुच्छन्। सं। मातृऽभिः। वावशानः। अक्रान्।

दूरे। पारे। वाणीं। वर्धयंतः। इंद्रऽइषितां। धमनिं। पप्रथन्। नि ॥८॥

अप्रयुच्छन् अप्रमाद्यन् वर्षणे सावधानः पर्वतो मेघो निषादि। नभसि निषण्ण आसीत्। मातृभिरद्भिर्माध्यमिकाभिर्वाग्भिर्वा संवावशानः सह शब्दं कुर्वाणोऽक्रान्। अक्रमीत्। इतस्ततः संचारमकरोत् ॥ क्रमतेर्लेङि बहुलं छंदसीति विकरणस्य लुक् ॥ दूरे पारेऽतिदूरेंऽतरिक्षे स्थितां वाणीं माध्यमिकां वाचं वर्धयंतः स्तोत्रैः समृद्धां कुर्वंतः स्तोतारो मरुतो वेंद्रेषितामिंद्रेण प्रेरितां धमनिं शब्दं कुर्वाणां तां वाचं नितरां पप्रथन्। अप्रथयन् ॥

॥ अथ नवमी ॥

इंद्रो महां सिंधुमाशयानं मायाविनं वृत्रमस्फुरन्निः।

अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात् ॥९॥

इंद्रः। महां। सिंधुं। आऽशयानं। मायाऽविनं। वृत्रं। अस्फुरत्। निः।

अरेजेतां। रोदसी इति। भियाने इति। कनिक्रदतः। वृष्णः। अस्य। वज्रात् ॥९॥

बलवानिंद्रो महां सिंधुं। स्यंदत इतस्ततः संचरतीति सिंधुर्मेघः। तमाशयानं तमधिष्ठाय शयानं मायाविनं वृत्रमसुरं। यद्वा सिंधुरुदकं। तदधिष्ठाय शयानं वृत्रं। वृणोत्याकाशमिति वृत्रो मेघः। तं निरस्फुरत्। निरहन्। वृष्णो वर्षकस्यास्येंद्रस्य कनिक्रदतः शब्दं कुर्वाणाद्वज्राद्भियाने भयं प्राप्ते रोदसी द्यावापृथिव्यावरेजेतां। अकंपेतां ॥ दाधर्तिदर्धर्तीत्यादिना कनिक्रदत्शब्दो निपातितः ॥

॥ अथ दशमी ॥

अरोरवीद्वृष्णो अस्य वज्रोऽमानुषं यन्मानुषो निजूर्वीत्।

नि मायिनो दानवस्य माया अपादयत्पपिवान्त्सुतस्य ॥१०॥

अरोरवीत्। वृष्णः। अस्य। वज्रः। अमानुषं। यत्। मानुषः। निऽजूर्वात्।
नि। मायिनः। दानवस्य। मायाः। अपादयत्। पपिऽवान्। सुतस्य ॥१०॥

वृष्णः कामानां वर्षकस्येंद्रस्य वज्रोऽरोरवीत्। भृशं शब्दमकरोत्। कदेत्यपेक्षायामाह। यद्यदा अमानुषं मनुष्याणां रहितं। यद्वा मानुषोऽहं न भवामीत्येवं मन्यमानं तमसुरं मानुषो मनुष्याणां हितकारी यद्वा मतिमानिंद्रो निजूर्वात्। नितरां हिंस्यात्। जिघांसतीत्यर्थः ॥ जूर्वतेर्हिंसाकर्मणो लेटि रूपं ॥ सुतस्याभिषुतं सोमं पपिवान् पीतवान् मायिनो मायाविनो दानवस्य। दानुर्नाम वृत्रमाता दानुः शय इत्यादिषु दृष्टत्वात्। तस्याः पुत्रस्य वृत्रस्य माया वचनानि न्यपादयत्। न्यपातयत्। बबाधेति यावत् ॥

॥ इति द्वितीयस्य षष्ठे चतुर्थो वर्गः ॥

॥ अथैतस्मिन्सूक्त एकादशी ॥

पिबापिबेदिंद्र शूर सोमं मंदंतु त्वा मंदिनः सुतासः।
पृणंतस्ते कुक्षी वर्धयंत्वित्था सुतः पौर इंद्रमाव ॥११॥
पिबऽपिब। इत्। इंद्र। शूर। सोमं। मंदंतु। त्वा। मंदिनः। सुतासः।
पृणंतः। ते। कुक्षी इति। वर्धयंतु। इत्था। सुतः। पौरः। इंद्रं। आव ॥११॥

शूर बलवन् हे इंद्र पिब पिबेत्। अभिषुतमिमं सोमं पिबैव। आदरार्थैषा वीप्सा। मंदिनो मदकराः सुतास्तेऽभिषुताः सोमास्त्वा मदंतु। त्वां मादयंतु ॥ मदि स्तुत्यादिषु। व्यत्ययेन परस्मैपदं ॥ ते सोमास्ते तव कुक्षी उदरस्योभौ पार्श्वौ पृणंतः पूरयंतः संतस्त्वां वर्धयंतु। इत्थानेन प्रकारेण पौर उदरपूरकः सुतोऽभिषुतः सोम इंद्रं त्वामाव। तर्पयतु ॥ अवतेस्तर्पणार्थस्य लिटि रूपं ॥

॥ अथ द्वादशी ॥

त्वे इंद्राप्यभूम विप्रा धियं वनेम ऋतया सपंतः।
अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम ॥१२॥
त्वे इति। इंद्र। अपि। अभूम। विप्राः। धियं। वनेम। ऋतऽया। सपंतः।
अवस्यवः। धीमहि। प्रऽशस्तिं। सद्यः। ते। रायः। दावने। स्याम ॥१२॥

हे इंद्र विप्रा मेधाविनो वयं त्वे त्वयि त्वद्धृदयेऽभूम। अपि सानुनयप्रश्ने वर्तते। ते तव हृदये किं वर्तामह इति। ऋतया। ऋतं कर्मफलं। तत्कामनया सपंतस्त्वां परिचरणाख्येन कर्मणा स्पृशंतो वयं धियं त्वदुद्देशेन क्रियमाणं कर्म वनेम। संभजेमहि॥ वन षण संभक्तौ। आशीर्लिङि लिङ्याशिषङ्गित्यङ्प्रत्ययः॥ किंच अवस्यवस्त्वत्तो रक्षणमिच्छंतः प्रशस्तिं। शस्तिः शंसनं। प्रकृष्टशंसनं स्तोत्रं धीमहि। त्वयि निदधीमहि। ततस्ते त्वदीयस्य रायो धनस्य दावने दानाय पात्रभूताः सद्यः स्याम। इदानीं भवेम॥

॥ अथ त्रयोदशी ॥

स्याम॒ ते त॑ इंद्र॒ ये त॑ ऊ॒ती अ॑व॒स्यव॒ ऊर्जं॑ व॒र्धयं॑तः।
शु॒ष्मिंत॑मं॒ यं चा॒कना॑म देवा॒स्मे र॒यिं रा॑सि वी॒रवं॑तं॥ १३॥
स्याम॑। ते। ते॒। इं॒द्र॒। ये। ते॒। ऊ॒ती। अ॒व॒स्यवः॑। ऊर्जं॑। व॒र्धयं॑तः।
शु॒ष्मिन्ऽत॑मं। यं। चा॒कना॑म। दे॒व॒। अ॒स्मे इति॑। र॒यिं। रा॒सि॒। वी॒रऽवं॑तं॥ १३॥

हे इंद्र ते तवोती ऊत्या प्रणयनेन॥ अवतेः प्राप्त्यर्थस्य क्तिनि रूपं॥ ये ते तवावस्यवो रक्षाकामा ऊर्जं हविर्लक्षणमन्नं वर्धयंतो भवंति ते तव वयं ते स्याम। त्वदधीना भवेम। देव द्योतमान हे इंद्र शुष्मिंतमं दानभागायार्हतया बलवत्तमं यद्वा शत्रूणां शोषयितृतमं यं रयिं चाकनाम। कामयामहे॥ कनतेः कांत्यर्थस्य यङ्लुगंतस्य लोटि रूपं॥ वीरवंतं पुत्रपौत्रैः सहितं तादृशं रयिमस्मे अस्मभ्यं रासि। देहि॥

॥ अथ चतुर्दशी ॥

रासि॒ क्षयं॒ रासि॑ मि॒त्रम॒स्मे रासि॒ शर्धं॑ इंद्र॒ मारु॑तं नः।
स॒जोष॑सो॒ ये च॑ मंद॒सा॒नाः प्र वा॒यवः॑ पा॒त्यग्र॑णीतिं॥ १४॥
रासि॑। क्षयं॑। रासि॑। मि॒त्रं। अ॒स्मे इति॑। रासि॑। शर्धः॑। इं॒द्र॒। मारु॑तं। नः॒।
स॒ऽजोष॑सः। ये। च॒। मं॒द॒सा॒नाः। प्र। वा॒यवः॑। पां॒ति॒। अग्र॑ऽनीतिं॥ १४॥

हे इंद्र क्षयं। क्षियंति निवसंत्यत्रेति क्षयो गृहं। तदस्मभ्यं रासि। देहि। तथा मित्रं सखायमस्मे अस्मभ्यं रासि॥ वाक्यभेदादनिघातः॥ मारुतं मरुतां देवविशां संबंधि शर्धो बलं नोऽस्मभ्यं रासि। एतेन मरुतामप्यागमनं प्रार्थ्यते।

ये मरुतः सजोषसः सह प्रीयमाणा मदंतो मोदमाना वायवो यज्ञं प्रति गंतारः संतोऽग्रणीतिमग्रे नीयमानं सोमं प्रपांति। प्रकर्षेण पिबंति तेषां शर्ध इति समन्वयः। यद्वा ये च वायवोऽग्रे नीयमानं सोमं पिबंति तेषां वायूनां बलं रासि ॥ वायव इति पूजायां बहुवचनं। वायुर्हि सोमस्याग्रपातेति ॥

॥ अथ पंचदशी ॥

व्यंत्विन्नु येषु मंदसानस्तृपत्सोमं पाहि द्रह्यदिंद्र।
अस्मान्त्सु पृत्स्वा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः ॥ १५ ॥

व्यंतु। इत्। नु। येषु। मंदसानः। तृपत्। सोमं। पाहि। द्रह्यत्। इंद्र।
अस्मान्। सु। पृत्ऽसु। आ। तरुत्र। अवर्धयः। द्यां। बृहत्ऽभिः। अर्कैः ॥ १५ ॥

हे इंद्र येषु तव सहायभूतेषु मरुत्सु मंदसानो माद्यन्भवसि ते मरुतो नु क्षिप्रं व्यंतु। सोमं भक्षयंतु। इत् एवार्थे। द्रह्यत् ॥ दृंहतेरिदं रूपं ॥ आत्मानं दृढीकुर्वन् त्वं तृपत् तर्पयंतमिमं सोमं पाहि। पिब। तरुत्र शत्रूणां हिंसक हे इंद्र बृहद्भिर्बलवद्भिरर्कैरर्चनीयैर्मरुद्भिः सहितस्त्वं। आ इति चार्थे। तेनास्मान् द्यां च सु सुष्ठु पृत्सु पशुपुत्रादिभिरस्मान् अस्मत्पालनेन च दिवमवर्धयः। यद्वा येषु सोमेषु मंदसानो मोदमानो भवसि ते सोमा व्यंतु। त्वां गच्छंतु। शेषं पूर्ववत् ॥

॥ इति द्वितीयस्य षष्ठे पंचमो वर्गः ॥

॥ अथ षोडशी ॥

बृहंत इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान्।
स्तृणानासो बर्हिः पस्त्यावत्त्वोता इदिंद्र वाजमग्मन् ॥ १६ ॥

बृहंतः। इत्। नु। ये। ते। तरुत्र। उक्थेभिः। वा। सुम्नं। आऽविवासान्।
स्तृणानासः। बर्हिः। पस्त्यऽवत्। त्वाऽऊताः। इत्। इंद्र। वाजं। अग्मन् ॥ १६ ॥

तरुत्र आपद्भिस्तारक हे इंद्र ये पुमांसः सुम्नं सुखकरं त्वामुक्थैः शस्त्रैराविवासान्। परिचरेयुः ॥ विवासतेर्लेट्याडागमः ॥ त एव पुमांसो नु क्षिप्रमविलंबेन बृहंतो महांतो भवंतीति पूरणः। किंच बर्हिः स्तृणानासो वेद्यां बर्हिराच्छादयंतो ये त्वां परिचरंति ते त्वोता इत् त्वया रक्षिताः संत एव पस्त्यावत् गृहसहितं वाजमन्नमग्मन्। गच्छंति ॥

॥ अथ सप्तदशी ॥

उग्रेष्विन्नु शूर मंदसानस्त्रिकद्रुकेषु पाहि सोममिंद्र।
प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिं ॥ १७ ॥

उग्रेषु। इत्। नु। शूर। मंदसानः। त्रिऽकद्रुकेषु। पाहि। सोमं। इंद्र।
प्रऽदोधुवत्। श्मश्रुषु। प्रीणानः। याहि। हरिऽभ्यां। सुतस्य। पीतिं ॥ १७ ॥

हे शूर बलवन्निंद्र उग्रेषूद्गूर्णेषु बहुस्तोत्रशस्त्रवत्सु त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येतन्नामकेष्वाभिप्लविकेष्वहःसु मंदसानो हृष्यन् सोमं पाहि। पिब। ततः प्रीणानः सोमपानेन प्रीतो भवन् श्मश्रुषु लिप्तं सोमं प्रदोधुवत्॥ धूञ् कंपने। यङ्लुगंतस्य शतरि रूपं॥ पुनःपुनर्धुन्वन् सुतस्याभिषुतस्य पीतिं पानमुद्दिश्य हरिभ्यामश्वाभ्यां युक्तः सन् याहि। गच्छ॥

॥ अथाष्टादशी ॥

धिष्वा शवः शूर येन वृत्रमवाभिनद्दानुमौर्णवाभं।
अपावृणोर्ज्योतिरार्याय नि सव्यतः सादि दस्युरिंद्र ॥ १८ ॥

धिष्व। शवः। शूर। येन। वृत्रं। अवऽअभिनत्। दानुं। और्णऽवाभं।
अप। अवृणोः। ज्योतिः। आर्याय। नि। सव्यतः। सादि। दस्युः। इंद्र ॥ १८ ॥

शूर हे इंद्र शवस्तादृशं बलं धिष्व। धारय॥ दधातेर्लोटि बहुलं छंदसीति शपो लुक्। छंदस्युभयथेति वा स आर्धधातुकत्वादिडागमः॥ येन बलेन दानुं दानोः पुत्रं वृत्रमौर्णवाभं। ऊर्णनाभिः कीटविशेष और्णवाभ इत्युच्यते। तमिवावाभिनत्। विभेदिथ। यद्वा और्णं ऊर्णनाभिः। तदाभं तत्सदृशमित्यर्थः। ततस्तमोरूपस्य हननादार्याय कर्मणामनुष्ठात्रे जनाय कृत्साय राजर्षये वा ज्योतिः प्रकाशकमादित्यमपावृणोः। उद्घाटितवानसि। दस्युः कर्मणामुपक्षपयिता स वृत्रः सव्यतस्तव सव्यपार्श्वे निषादि। त्वया नितरां सन्नो बाधितो वर्तते॥

॥ अथैकोनविंशी ॥

सनेम ये त ऊतिभिस्तरंतो विश्वाः स्पृध आर्येण दस्यून्।
अस्मभ्यं तत्त्वाष्ट्रं विश्वरूपमरंधयः साख्यस्य त्रिताय ॥ १९ ॥

सनेम। ये। ते। ऊतिऽभिः। तरंतः। विश्वाः। स्पृधः। आर्येण। दस्यून्।
अस्मभ्यं। तत्। त्वाष्ट्रं। विश्वऽरूपं। अरंधयः। साख्यस्य। त्रिताय ॥ १९ ॥

सनेम तान्पुरुषान् संभजेम ये ते तवोतिभिः पालनैर्विश्वाः स्पृधः स्पर्धमानाः सर्वा विशस्तरंतो हिंसंतः तथार्येणार्यभावेन दस्यूनुपक्षपयितॄन् हिंसंतो भवंति। तदस्मभ्यं वशमानय। किं तत् तदाह। त्वाष्ट्रं त्वष्टुः सुतं विश्वरूपमेतन्नामकमसुरमरंधयः ॥ रध्यतिर्वशगमने ॥ वशमानयः। यद्वा तमसुरमवधीः ॥ रध हिंसासंराद्ध्योः। रधिजभोरचीति नुम् ॥ इंद्रस्त्वाष्ट्रमवधीदित्ययमर्थस्तैत्तिरीयके विश्वरूपो वै त्वाष्ट्र इत्यत्र महता प्रबंधेन प्रपंचितः। किंच साख्यस्य सखिभावस्यानुपालनाय त्रिताय महर्षये वशमानयः। यद्वा सनेम ते वयं प्रवृद्धा भवेम ये वयं तव रक्षाभिः स्पर्धमानाः प्रजा दस्यूंश्च तरंतोऽतिक्रामंतो भवेम ॥ सनेमेति वृद्ध्यर्थ आद्युदात्तः। यथा सनेम मित्रावरुणा सनंत इति। सकर्मकश्चेत् मध्योदात्तः। सनेम वाजं तवेति। तरंतः। तॄ प्लवनतरणयोः। शतरि रूपं। संज्ञावचनश्चेदंतोदात्तः। यथा तरंत इव मंहनेति ॥

॥ अथ विंशी ॥

अस्य सुवानस्य मंदिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः।
अवर्तयत्सूर्यो न चक्रं भिनद्वलमिंद्रो अंगिरस्वान् ॥ २० ॥
अस्य। सुवानस्य। मंदिनः। त्रितस्य। नि। अर्बुदं। ववृधानः। अस्तरित्यस्तः।
अवर्तयत्। सूर्यः। न। चक्रं। भिनत्। वलं। इंद्रः। अंगिरस्वान् ॥ २० ॥

मंदिनोऽस्य मदकरमिमं सुवानस्य सुतवतस्त्रितस्य तीर्णनमस्कस्य महर्षेरर्थे वावृधानः सोमेन वर्धमान इंद्रोऽर्बुदं। अंबूनि ददातीत्यर्बुदो मेघः। अनुस्वारस्य रेफश्छांदसः। यद्वा नामैतत्। अर्बुदाख्यमसुरं न्यस्तः ॥ स्तॄ हिंसायामित्यस्य लङि तिपि बहुलं छंदसीति विकरणस्य लुक्। गुणे कृते हल्ङ्यादिना तिलोपः ॥ नितरामवधीत्। महांतं चिदर्बुदं निक्रमीः पदेत्यादिष्वर्बुदवधः स्पष्टमुक्तः। किंच अंगिरस्वान् अंगिरोभिः सहित इंद्रोऽवर्तयत्। असुरहननार्थं वज्रमभ्रामयत्। सूर्यो न। यथा सूर्यश्चक्रं भ्रामयति तद्वत्। यद्वा यस्मादसुराद्भिया सूर्यः स्वकीयं रथचक्रं नावर्तयत्। निषेधार्थीयोऽत्र नकारः। वर्तयितुं

नाशकत् तं वलं पणीनां प्रभुमसुरं भिनत्। वज्रेणाभिनत्। यद्वा द्विचक्रो हि पूर्वं सूर्यस्य रथः। तस्यैकं चक्रमिंद्रेणापहृतं। सूर्ये इति सुपां सुलुगिति षष्ठ्येकवचनस्य सुः। सूर्यस्य संबंध्यपहृतं तदेकं चक्रमवर्तयत्। रक्षोहननार्थमभ्रामयत्। तेन चक्रेण वलमभिनच्च। नश्चार्थे॥

अहर्गणेषु माध्यंदिनसवनेषु तायमानरूपेष्वच्छावाकस्याहरहः शस्यसंज्ञकमभितष्टेवेति सूक्तं। नूनं सा त इत्येषा तस्यांते शंसनीया। सूचितं च। नूनं सा त इत्यंतमुत्तमं। आ॰ ७. ४.। इति॥

॥ सैषा सूक्त एकविंशी॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः॥२१॥

नूनं। सा। ते। प्रति। वरं। जरित्रे। दुहीयत्। इंद्र। दक्षिणा। मघोनी।
शिक्ष। स्तोतृऽभ्यः। मा। अति। धक्। भगः। नः। बृहत्। वदेम। विदथे। सुवीराः॥२१॥

हे इंद्र या दक्षिणा दक्षमुत्साहनं करोतीति दक्षिणा स्तोतृभ्यो देया ते त्वत्संबंधिनी मघोनी धनवती जरित्रे स्तोत्रे वरं श्रेष्ठमभिमतमर्थं नूनं प्रतिदुहीयत्। इदानीं प्रतिदोग्धि। संपादयतीत्यर्थः। तादृशीं दक्षिणां स्तोतृभ्योऽस्मभ्यं शिक्ष। प्रयच्छ। किंच भगो भजनीयस्त्वं माति धक्॥ दहेर्दानार्थस्य लुङि मंत्रे घसेत्यादिना च्लेर्लुक्॥ नोऽस्माननतिक्रम्यान्येभ्यो दक्षिणां मा दाः। प्रथममस्मभ्यं दत्वा पश्चादन्येभ्यो दीयतामित्यर्थः। यद्वा नोऽस्माकं कामान् मा धक्। मा धाक्षीः। अपेक्षितफलदानेन पूरयेत्यर्थः। सुवीराः शोभनपुत्रपौत्राः संतो वयं विदथेऽस्मिन्यज्ञे बृहत् प्रभूतं स्तोत्रं वदेम। त्वामुद्दिश्य ब्रवाम॥ अत्र सा ते प्रतिदुग्धामिति प्रकृत्य वीरो वीरयत्यमित्रान् वेतेर्वा स्याद्गतिकर्मणो वीरयतेर्वेत्यंतं निरुक्तमनुसंधेयं। नि॰ १. ७.॥

॥ इति द्वितीयस्य षष्ठे षष्ठो वर्गः॥

॥ इति गार्त्समदमंडले प्रथमोऽनुवाकः॥

द्वितीयेऽनुवाक एकादश सूक्तानि। तत्र यो जात इति पंचदशर्चं प्रथमं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं॥ संसवे निष्केवल्ये निविद्धानीयस्य पुरस्ताद्यो जात एवेति

शंस्येत्। यदि पर्यायानिति खंडे सूचितं। यो जात एवेति निष्केवल्ये। आ० ६. ६.। इति ॥ आभिप्लविके तृतीयेऽहनि निष्केवल्ये यो जात एवेति निविद्धानीयं। सूचितं च। तृतीयस्य अर्यमा यो जात एवेति मध्यंदिनः। आ० ७. ७.। इति ॥ विश्वजिति माध्यंदिनसवने मैत्रावरुणः स्वशस्त्रे प्राकृतात्सूक्तात्पूर्वं यो जात इति साममूक्तं शंसेत्। विश्वजितोऽग्निं नर इति खंडे सूचितं। सत्रामदासो यो जात एवाभूरेक इति साममूक्तानि। आ० ८. ७.। इति ॥ अग्निष्टुन्निष्केवल्ये निविद्धानमिदं। श्येनाजिरानामिति खंडे सूचितं। तिष्ठा हरी इति यो जात एवेति मध्यंदिनः। आ० ९. ७.। इति ॥ महाव्रते निष्केवल्ये यो जात एवेति सूक्तं। उरू इति खंडे सूचितं। वने न वा यो न्यधायि चाकन् यो जात एव प्रथमो मनस्वान् । ऐ० आ० ५. १२.। इति ॥ अत्रेतिहासो बृहद्देवतायामुक्तः। संयुज्य तपसात्मनमिंद्रं बिभ्रन्महद्वपुः। अदृश्यत मुहूर्तेन दिवि च व्योम्नि चेह च ॥ तमिंद्र इति मत्वा तु दैत्यौ भीमपराक्रमौ। धुनिश्च चुमुरिश्चोभौ सायुधावभिपेततुः ॥ विदित्वा स तयोर्भावमृषिः पापं चिकीर्षतोः। यो जात इति सूक्तेन कर्माण्यैंद्राण्यकीर्तयत् ॥ अन्ये त्वन्यथा वर्णयंति। पुरा किलेंद्रादयो वैन्ययज्ञं समाजग्मुः। गृत्समदोऽपि तत्रागत्य सदस्यासीत्। दैत्याश्चेंद्रजिघांसया तत्र समागमन्। तान् दृष्ट्वा निर्जगामेंद्रो यज्ञाद्गृत्समदाकृतिः। स च गृत्समदो वैन्येन पूजितो यज्ञवाटान्निरगच्छत्। निर्गच्छंतं तमृषिं दृष्ट्वा अयमेवेंद्र इति मन्यमानास्तमसुराः परिवव्रुः। नाहमिंद्रस्तुच्छः किंत्वेवंगुणोपेतः स इत्यनेन सूक्तेन तान्प्रत्युवाच ॥ अपरे त्वेवं कथयंति। गृत्समदस्य यज्ञे प्रविष्टमेकाकिनमिंद्रं ज्ञात्वासुराः परिवव्रुः। स इंद्रो गृत्समदरूपेण यज्ञवाटान्निर्गत्य स्वर्गं जगाम। ततोऽसुरा इंद्रो विलंबित इत्यंतःप्रविश्य गृत्समदं दृष्ट्वा पूर्वमेव गृत्समदो गतः अयं त्विंद्रोऽस्मद्भयाद्गृत्समदरूपेणास्त इति तं जगृहुः। स तान् नाहमिंद्रोऽयमित्यनेन सूक्तेन प्रत्युवाच। अयमेवार्थो महाभारते प्रपंचितः ॥

॥ तत्रैषा सूक्ते प्रथमा ॥

यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत्।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इंद्रः ॥ १ ॥

यः। जातः। एव। प्रथमः। मनस्वान्। देवः। देवान्। क्रतुना। परिऽअभूषत्।
यस्य। शुष्मात्। रोदसी इति। अभ्यसेतां। नृम्णस्य। मह्ना। सः। जनासः। इंद्रः ॥ १ ॥

गृत्समदो ब्रूते। जनासो जना हे असुराः यो जात एव जायमान एव सन् प्रथमो देवानां प्रधानभूतो मनस्वान् मनस्विनामग्रगण्यो देवो द्योतमानः सन् क्रतुना वृत्रवधादिलक्षणेन स्वकीयेन कर्मणा देवान् सर्वान्यागदेवान्पर्यभूषत्। रक्षकत्वेन पर्यग्रहीत्॥ भूष अलंकारे भूवादिः। लङि रूपं॥ यद्वा सर्वानन्यान्देवान्पर्यभूषत् पर्यभवत्। अत्यक्रामत्॥ अस्मिन्पक्षे भवतेर्व्यत्ययेन क्सः। श्र्युकः कितीतीट्प्रतिषेधः॥ यस्येंद्रस्य शुष्मात् शरीरात् बलात् रोदसी द्यावापृथिव्यावभ्यसेतां। अबिभीतां॥ भ्यस भये। अनुदात्तेत्। भ्यस भयवेपनयोरिति नैरुक्ताः। नि॰ ३. २१.॥ अभ्यसेतामवेपेतां वा। तथा च मंत्रांतरं। इमे चित्तव मन्यवे वेपेते भियसा मही इति। नृम्णस्य सेनालक्षणस्य बलस्य मह्ना महत्त्वेन युक्तः स इंद्रो नाहमिति॥ अत्र निरुक्तं। यो जात एव प्रथमो मनस्वी देवो देवान्क्रतुना कर्मणा पर्यभवत्पर्यगृह्णात्पर्यरक्षदत्यक्रामदिति वा यस्य बलाद्यावापृथिव्यावप्यबिभीतां नृम्णस्य मह्ना बलस्य महत्त्वेन स जनास इंद्र इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता। नि॰ १०. १०.। इति॥

॥ अथ द्वितीया ॥

यः पृ॒थि॒वीं व्यथ॑माना॒मदृं॑ह॒द्यः पर्व॑ता॒न्प्रकु॑पिताँ॒ अर॑म्णात्।
यो अं॒तरि॑क्षं विम॒मे वरी॑यो॒ यो द्यामस्त॑भ्ना॒त्स जना॑स॒ इंद्रः॑ ॥ २ ॥

यः। पृ॒थि॒वीं। व्यथ॑मानां। अदृं॑हत्। यः। पर्व॑तान्। प्रऽकु॑पितान्। अर॑म्णात्।
यः। अं॒तरि॑क्षं। वि॒ऽम॒मे। वरी॑यः। यः। द्यां। अस्त॑भ्नात्। सः। ज॒ना॒सः॒। इंद्रः॑ ॥ २ ॥

हे जनाः य इंद्रो व्यथमानां चलंतीं पृथिवीमदृंहत्। शर्करादिभिर्दृढामकरोत्॥ दृह दृहि वृद्धौ॥ यश्च प्रकुपितान् इतस्ततश्चलितान्पक्षयुक्तान्पर्वतानरम्णात्। नियमितवान्। स्वे स्वे स्थाने स्थापितवान्॥ अरम्णात् रमु क्रीडायां। अंतर्भावितण्यर्थस्य व्यत्ययेन श्नाप्रत्ययः॥ यश्च वरीय उरुतममंतरिक्षं विममे। निर्ममे। विस्तीर्णं चकारेत्यर्थः। यश्च द्यां दिवमस्तभ्नात्। स्तंभनिरुद्धामकरोत्॥ स्तंभु रोधन इति सौत्रो धातुः॥ स एवेंद्रो नाहमिति॥

॥ अथ तृतीया ॥

यो ह॒त्वाहि॒मरि॑णात्स॒प्त सिंधू॒न्यो गा उ॒दाज॑दप॒धा व॒लस्य॑।
यो अश्म॑नोर॒न्तर॒ग्निं ज॒जान॑ सं॒वृक्स॒मत्सु॒ स जना॑स॒ इंद्रः॑ ॥ ३ ॥

यः। हत्वा। अहिं। अरिणात्। सप्त। सिंधून्। यः। गाः। उत्ऽआजत्। अपऽधा। वलस्य।
यः। अश्मनोः। अंतः। अग्निं। जजान। संऽवृक्। समत्ऽसु। सः। जनासः। इंद्रः ॥३॥

योऽहिं मेघं हत्वा मेघहननं कृत्वा सप्त सर्पणशीलाः सिंधून् स्यंदनशीला अपोऽरिणात्। प्रैरयत्। यद्वा सप्त गंगायमुनाद्या मुख्या नदीररिणात्॥ रीङ् श्रवणे क्र्यादिः॥ यश्च वलस्य वलनामकस्यासुरस्यापधा तत्कर्तृकान्निरोधान्निरुद्धा गा उदाजत्। निरगमयत्॥ अपधा। अपपूर्वाद्धातेरातश्चोपसर्गे। पा० ३. ३. १०६.। इति भावेऽङ्प्रत्ययः। सुपां सुलुगिति पंचम्या आकारः॥ यश्चाश्मनोः। अश्नुते व्याप्नोत्यंतरिक्षमित्यश्मा मेघः। अत्यंतमृदुरूपयोर्मेघयोरंतर्मध्ये वैद्युतमग्निं जजान। उत्पादयामास। यश्च समत्सु। संभक्षयंति योद्धॄणामायूंषीति समदः संग्रामाः। तेषु संवृक् भवति॥ वृणक्तेर्हिंसार्थस्य क्विपि रूपं॥ स इंद्रो नाहमिति॥

॥ अथ चतुर्थी ॥

येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः।
श्वघ्नीव यो जिगीवां लक्षमाददर्यः पुष्टानि स जनास इंद्रः ॥४॥

येन। इमा। विश्वा। च्यवना। कृतानि। यः। दासं। वर्णं। अधरं। गुहा। अकरित्यकः।
श्वघ्नीऽइव। यः। जिगीवान्। लक्षं। आदत्। अर्यः। पुष्टानि। सः। जनासः। इंद्रः ॥४॥

येनेंद्रेणेमेमानि विश्वा च्यवना नश्वराणि भुवनानि कृतानि। स्थिरीकृतानि। यश्च दासं वर्णं शूद्रादिकं। यद्वा दासमुपक्षपयितारमधरं निकृष्टमसुरं गुहा गुहायां गूढस्थाने नरके वाकः। अकार्षीत्॥ करोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुकि रूपं॥ लक्षं लक्ष्यं जिगीवान्॥ जि जये। क्वसौ सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कुत्वं। दीर्घश्छांदसः॥ जितवान् योऽर्योऽरेः॥ षष्ठ्येकवचने छांदसो यणादेशः॥ शत्रोः संबंधीनि पुष्टानि समृद्धान्यादत् आदत्ते। तत्र दृष्टांतः। श्वघ्नीव। श्वभिर्मृगान् हंतीति श्वघ्नी व्याधः। यथा व्याधो जिघृक्षंतं मृगं परिगृह्णाति तद्वत्॥

॥ अथ पंचमी ॥

यं स्मा पृच्छंति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनं।
सो अर्यः पुष्टीर्विज इवामिनाति श्रदस्मै धत्त स जनास इंद्रः ॥५॥

यं। स्म। पृच्छंति। कुह। सः। इति। घोरं। उत। ई। आहुः। न। एषः। अस्ति। इति। एनं। सः। अर्यः। पुष्टीः। विजःऽइव। आ। मिनाति। श्रत्। अस्मै। धत्त। सः। जनासः। इंद्रः ॥५॥

अपश्यंतो जना घोरं शत्रूणां घातकं यं पृच्छंति स्म कुह सेति। स इंद्रः कुत्र वर्तत इति ॥ सेति। सोऽचि लोपे चेत्पादपूरणमिति सोर्लोपे गुणः ॥ न क्वचिदसौ तिष्ठतीति मन्यमाना जना एनमिंद्रमाहुः एष इंद्रो नास्तीति। तथा च मंत्रेनेंद्रो अस्तीति नेम उ त्व आहेति। ईमिति पूरणः। स इंद्रो विज इव। इवशब्द एवार्थे। उद्वेजक एव सन् अर्योऽरेः संबंधीनि पुष्टीः पोषकानि गवाश्वादीनि धनान्यामिनाति। सर्वतो हिनस्ति ॥ मीङ् हिंसायां। मीनातेर्निगम इति ह्रस्वः ॥ तस्मात् श्रदस्मा इंद्राय धत्त। स इंद्रोऽस्तीति विश्वासमत्र कुरुत। यद्यप्यसौ विशेषतोऽस्माभिर्न दृश्यते तथापि अस्तीति विश्वासं कुरुत। एवं निर्द्धारणमहिमोपेतः स इंद्रो नाहमिति ॥

॥ इति द्वितीयस्य षष्ठे सप्तमो वर्गः ॥

॥ अथ तस्मिन्सूक्ते षष्ठी ॥

यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः।
युक्तग्राव्णो योऽविता सुशिप्रः सुतसोमस्य स जनास इंद्रः ॥६॥
यः। रध्रस्य। चोदिता। यः। कृशस्य। यः। ब्रह्मणः। नाधमानस्य। कीरेः।
युक्तऽग्राव्णः। यः। अविता। सुऽशिप्रः। सुतऽसोमस्य। सः। जनासः। इंद्रः ॥६॥

यो रध्रस्य ॥ रध हिंसासंराद्ध्योः ॥ समृद्धस्य चोदिता धनानां प्रेरयिता भवति। यश्च कृशस्य च दरिद्रस्य च यश्च नाधमानस्य ॥ नाधृ णाधृ याच्ञोपतापैश्वर्याशीःषु ॥ याचमानस्य कीरेः ॥ करोतेः कीर्तयतेर्वा ॥ स्तोतुर्ब्रह्मणो ब्राह्मणस्य च धनानां प्रेरयिता। यश्च सुशिप्रः शोभनहनुः सुशीर्षको वा सन् युक्तग्राव्णोऽभिषवार्थमुद्यतग्राव्णः सुतसोमस्याभिषुतसोमस्य यजमानस्याविता रक्षिता भवति स एवेंद्रो नाहमिति। ब्रह्मशब्दस्य त्वन्नपरत्वे ह्याद्युदात्तता स्यात् यथा ब्रह्म वन्वानो अजरं सुवीरमिति। अयं त्वंतोदात्तः पठ्यत इति नान्नपरः ॥

॥ अथ सप्तमी ॥

यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः ।
यः सूर्यं य उषसं जजान यो अपां नेता स जनास इंद्रः ॥७॥
यस्य । अश्वासः । प्रऽदिशि । यस्य । गावः । यस्य । ग्रामाः । यस्य । विश्वे । रथासः ।
यः । सूर्यं । यः । उषसं । जजान । यः । अपां । नेता । सः । जनासः । इंद्रः ॥७॥

यस्य सर्वांतर्यामितया वर्तमानस्य प्रदिशि प्रदेशनेऽनुशासनेऽश्वासोऽश्वा वर्तते । यस्यानुशासने गावः । यस्यानुशासने ग्रामाः । ग्रसंतेऽत्रेति ग्रामा जनपदाः । यस्याज्ञायां विश्वे सर्वे रथासो रथा वर्तंते । यश्च वृत्रं हत्वा सूर्यं जजान । जनयामास । यश्चोषसं । तथा मंत्रः जजान सूर्यमुषसं सुदंसा इति । यश्च मेघभेदनद्वारापां नेता प्रेरकः स इंद्र इत्यादि प्रसिद्धं ॥

॥ अथाष्टमी ॥

यं क्रंदसी संयती विह्वयेते परेऽवर उभया अमित्राः ।
समानं चिद्रथमातस्थिवांसा नाना हवेते स जनास इंद्रः ॥८॥
यं । क्रंदसी इति । संयती इति संऽयती । विह्वयेते इति विऽह्वयेते । परे । अवरे ।
उभयाः । अमित्राः ।
समानं । चित् । रथं । आतस्थिऽवांसा । नाना । हवेते इति । सः । जनासः । इंद्रः ॥८॥

यं क्रंदसी रोदसी शब्दं कुर्वाणे मानुषी देवी च द्वे सेने वा संयती परस्परं संगच्छंत्यौ यमिंद्रं विह्वयेते । स्वरक्षार्थं विविधमाह्वयतः । पर उत्कृष्टा अवरेऽधमाश्चोभया उभयविधा उभयमाह्वयंति । समानमिंद्ररथसदृशं रथमातस्थिवांसा आस्थितौ द्वौ रथिनौ तमेवेंद्रं नाना पृथक् पृथक् हवेते । आह्वयेते । यद्वा समानमेकरथमारूढाविंद्राग्नी हवेते । यज्ञार्थं यजमानैः पृथगाहूयेते । तयोरन्यतरः स इंद्रो नाहमिति ॥

॥ अथ नवमी ॥

यस्मान्न ऋते विजयंते जनासो यं युध्यमाना अवसे हवंते ।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत्स जनास इंद्रः ॥९॥

यस्मात्। न। ऋते। वि॒ऽजयंते। जनासः। यं। युध्यमानाः। अवसे। हवंते।
यः। विश्वस्य। प्र॒ति॒ऽमानं। ब॒भूव। यः। अ॒च्यु॒त॒ऽच्युत्। सः। ज॒ना॒सः॒। इंद्रः ॥ ९ ॥

यस्मादृते जनासो जना न विजयंते। विजयं न प्राप्नुवंति। अतो युध्यमाना युद्धं कुर्वाणा जना अवसे स्वरक्षणाय यमिंद्रं हवंते। आह्वयंति। यश्च विश्वस्य सर्वस्य जगतः प्रतिमानं प्रतिनिधिर्बभूव। यश्चाच्युतच्युत् अच्युतानां क्षयरहितानां पर्वतादीनां च्यावयिता स इंद्र इत्यादि प्रसिद्धं ॥

॥ अथ दशमी ॥

यः शश्वतो॒ मह्येनो॒ दधाना॒नमन्यमाना॒ञ्छर्वा ज॒घान।
यः शर्धते॒ नानु॒ददाति शृध्यां यो दस्योर्ह॒न्ता स जनास॒ इंद्रः ॥ १० ॥

यः। शश्वतः। महि। एनः। दधानान्। अमन्यमानान्। शर्वा। ज॒घान।
यः। शर्धते। न। अ॒नु॒ऽददाति। शृध्यां। यः। दस्योः। ह॒न्ता। सः। ज॒ना॒सः॒। इंद्रः ॥ १० ॥

यो महि महदेनः पापं दधानान् शश्वतो बहूनमन्यमानान् आत्मानमजानत इंद्रमपूजयतो वा जनान् शर्वा। शृणाति शत्रूननेनेति शरुर्वज्रः। तेनायुधेन जघान ॥ हंतेर्लिटि रूपं ॥ यश्च शर्धत उत्साहं कुर्वतेऽनात्मज्ञाय जनाय शृध्यामुत्साहनीयं कर्म नानुददाति। न प्रयच्छति ॥ अनुपूर्वात् डुदाञ् दाने जौहोत्यादिकः। अभ्यस्तानामादिरिति तिङि चोदात्तवतीति गतेर्निघातः ॥ यश्च दस्योरुपक्षपयितुः शत्रोर्हंता घातकः स इंद्र इत्यादि पूर्ववत् ॥

॥ इति द्वितीयस्य षष्ठेऽष्टमो वर्गः ॥

॥ अथैकादशी ॥

यः शंबर॒ं पर्वतेषु क्षियंतं चत्वारि॒श्यां श॒रद्य॒न्वविंदत्।
ओ॒जायमा॒नं यो अहिं ज॒घान॒ दानुं शया॒नं स जनास॒ इंद्रः ॥ ११ ॥

यः। शंबरं। पर्वतेषु। क्षियंतं। च॒त्वा॒रि॒श्यां। शरदि। अ॒नु॒ऽअविंदत्।
ओ॒जा॒यमानं। यः। अहिं। ज॒घानं। दानुं। शयानं। सः। ज॒ना॒सः॒। इंद्रः ॥ ११ ॥

यः पर्वतेषु क्षियंतमिंद्रभिया बहून् संवत्सरान्प्रच्छन्नो भूत्वा पर्वतगुहासु निवसंतं शंबरमेतन्नामकं मायाविनमसुरं चत्वारिंश्यां शरदि चत्वारिंशे संवत्स-

रेऽन्वविंदत्। अन्विष्यालभत। लब्ध्वा च य ओजायमानं ॥ कर्तुः क्यङ् सलोपश्च ओजसोऽप्सरसो नित्यं। पा० ३. १. ११. २। इति सकारलोपः ॥ बलमाचरंतमहिमाहंतारं दानुं दानवं शयानं शंबरमसुरं जघान हतवान् स इंद्रो नाहमिति ॥

॥ अथ द्वादशी ॥

यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिंधून्।
यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहंतं स जनास इंद्रः ॥ १२॥
यः। सप्तऽरश्मिः। वृषभः। तुविष्मान्। अवऽअसृजत्। सर्तवे। सप्त। सिंधून्।
यः। रौहिणं। अस्फुरत्। वज्रऽबाहुः। द्यां। आऽरोहंतं। सः। जनासः। इंद्रः ॥ १२॥

यः सप्तरश्मिः सप्तसंख्याकाः पर्जन्या रश्मयो यस्य। ते च रश्मयो वराहवः स्वतपसो विद्युन्महसो धूपयः श्वापयो गृहमेधाश्चेत्येते ये च मेऽशिमिविद्विषः पर्जन्याः सप्त पृथिवीमभिवर्षंति वृष्टिभिरिति तैत्तिरीयारण्यके ह्याम्नाताः। वृषभो वर्षकस्तुविष्मान् वृद्धिमान्बलवान्वा सप्त सर्पणस्वभावान्सिंधूनपः सर्तवे सरणायावासृजत्। अवसृष्टवान्। यद्वा गंगाद्याः सप्त मुख्या नदीरसृजत्। यश्च वज्रबाहुः सन् द्यां दिवमारोहंतं रौहिणमसुरमस्फुरत्। जघान ॥ स्फुर स्फुरणे तुदादिः ॥

॥ अथ त्रयोदशी ॥

द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयंते।
यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इंद्रः ॥ १३॥
द्यावा। चित्। अस्मै। पृथिवी इति। नमेते इति। शुष्मात्। चित्। अस्य। पर्वताः। भयंते।
यः। सोमऽपाः। निऽचितः। वज्रऽबाहुः। यः। वज्रऽहस्तः। सः। जनासः। इंद्रः ॥ १३॥

अस्मा इंद्राय द्यावा पृथिवी ॥ इतरेतरापेक्षया द्विवचनं प्र मित्रयोर्वरुणयोरितिवत् ॥ नमेते। स्वयमेव प्रह्वीभवतः ॥ णमु प्रह्वत्वे। कर्मकर्तरि न दुहस्नुनमां यक्चिणाविति यकः प्रतिषेधः ॥ चिदपि च अस्येंद्रस्य शुष्माद्बलात्पर्वता भयंते। बिभ्यति। यः सोमपाः सोमस्य पाता निचितः सर्वैः। यद्वा अन्येभ्योऽपि देवेभ्यो दृढांगः। वज्रबाहुर्वज्रसदृशबाहुः। यश्च वज्रहस्तो वज्रयुक्तः स इंद्र इत्यादि प्रसिद्धं ॥

॥ अथ चतुर्दशी ॥

यः सुन्वंतमवति यः पचंतं यः शंसंतं यः शसमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इंद्रः ॥ १४ ॥
यः । सुन्वंतं । अवति । यः । पचंतं । यः । शंसंतं । यः । शसमानं । ऊती ।
यस्य । ब्रह्म । वर्धनं । यस्य । सोमः । यस्य । इदं । राधः । सः । जनासः । इंद्रः ॥ १४ ॥

यः सुन्वंतं सोमाभिषवं कुर्वंतं यजमानमवति । रक्षति । यश्च पुरोडाशादीनि हवींषि पचंतं । यश्चोती ऊतये ॥ सुपां सुलुगिति चतुर्थ्याः पूर्वसवर्णदीर्घः ॥ स्वरक्षायै शस्त्राणि शंसंतं यश्च शसमानमवति । स्तोत्रं कुर्वाणं रक्षति । ब्रह्म परिवृढं स्तोत्रं यस्य वर्धनं वृद्धिकरं भवति । तथा यस्य सोमो वृद्धिहेतुर्भवति । यस्य चेदमस्मदीयं राधः पुरोडाशादिलक्षणमन्नं वृद्धिकरं भवति । स इंद्र इत्यादि प्रसिद्धं ॥

॥ अथ पंचदशी ॥

यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इंद्र विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥ १५ ॥
यः । सुन्वते । पचते । दुध्रः । आ । चित् । वाजं । दर्दर्षि । सः । किल । असि । सत्यः ।
वयं । ते । इंद्र । विश्वह । प्रियासः । सुऽवीरासः । विदथं । आ । वदेम ॥ १५ ॥

इदानीमृषिः साक्षात्कृतमिंद्रं प्रति प्रब्रूते । हे इंद्र यो दुध्रो दुर्धरः सन् सुन्वते सोमाभिषवं कुर्वते पुरोडाशादिहवींषि पचते यजमानाय वाजमन्नं बलं वा-दर्दर्षि । भृशं प्रापयसि स तादृशस्त्वं सत्यो यथार्थभूतोऽसि । न पुनर्नास्तीति बुद्धियोग्योऽसि । किलेति प्रसिद्धौ । ते तव प्रियासः सुवीरासः कल्याणपुत्र-पौत्राः संतो वयं विश्वह सर्वेष्वहःसु विदथं स्तोत्रमावदेम । ब्रूयाम ॥

॥ इति द्वितीयस्य षष्ठे नवमो वर्गः ॥

ऋतुर्जनित्रीति त्रयोदशर्चं द्वितीयं सूक्तं गार्त्समदं । ऋतुः सप्तोनांत्या त्रिष्टु-बित्यनुक्रमणिका । अस्मभ्यं तद्वसो इति त्रयोदशी त्रिष्टुप् । शिष्टास्त्रिष्टुबंतपरि-भाषया जगत्यः । इंद्रो देवता ॥ उक्थ्ये तृतीयसवनेऽच्छावाकशस्त्रेऽस्य सूक्तस्य विनियोगः । सूचितं च । ऋतुर्जनित्री नू मर्तो भवा मित्रः । आ॰ ६. १. । इति ॥

दशरात्रे षष्ठेऽहन्यपि तृतीयसवनेऽच्छावाकशस्त्र एतत्सूक्तं। ऋतुर्जनित्रीति नित्यान्यैकाहिकानि। आ० ८.४.। इति सूचितं॥

॥ अथ तस्मिन्सूक्ते प्रथमा ॥

ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते।
तदाहना अभवत्पिप्युषी पयोंऽशोः पीयूषं प्रथमं तदुक्थ्यं ॥१॥

ऋतुः। जनित्री। तस्याः। अपः। परि। मक्षु। जातः। आ। अविशत्। यासु। वर्धते।
तत्। आहनाः। अभवत्। पिप्युषी। पयः। अंशोः। पीयुषं। प्रथमं। तत्। उक्थ्यं ॥१॥

ऋतुर्वर्षाख्यः कालो जनित्री सोमस्य जनयित्री जननी भवति। तस्याः परि तस्या जनन्याः सकाशाज्जातः सोमोऽप उदकानि मक्षु शीघ्रमाविशत्। यास्वप्सु सोमो वर्धते ता अविशदित्यन्वयः। तस्मादप्सु प्रविष्टत्वात् सोम आहना आहंतव्योऽभिषोतव्यो भवति। आहना इति सकारांतमिदं पदं। तथा च मंत्रवर्णः। ये ते मदा आहनसो विहायस इति। या चांशुरूपा सोमलता पयः सारभूतं पिप्युषी वर्धयंत्यभवत्॥ प्यायतेर्लिटि क्वसौ लिड्यङोश्चेति पीभावः। वसोः संप्रसारणं। उगितश्चेति ङीप्॥ अंशोस्तस्याः सोमलतायाः पीयूषं रसभूतं पय उक्थ्यं प्रशस्यं हविरिंद्रस्य भवति॥

॥ अथ द्वितीया ॥

सध्रीमा यंति परि बिभ्रतीः पयो विश्वप्स्न्याय प्र भरंत भोजनं।
समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥२॥

सध्री। ईं। आ। यंति। परि। बिभ्रतीः। पयः। विश्वऽप्स्न्याय। प्र। भरंत। भोजनं।
समानः। अध्वा। प्रऽवतां। अनुऽस्यदे। यः। ता। अकृणोः। प्रथमं। सः। असि।
उक्थ्यः ॥२॥

सध्री। अंचतेर्लुक् छांदसः। सहस्य सध्रिरिति सध्र्यादेशोंऽतोदात्तत्वेन निपातितः। सध्रीचीनाः पय उदकं परि परितो बिभ्रतीर्बिभ्राणा ईमेता नद्य आयंति। सर्वतो गच्छंति। ता नद्यो विश्वप्स्न्याय विश्वासामपामाश्रयभूताय समुद्राय भोजनं॥ भुज्यत इति भोजनं पयः॥ प्रभरंत। प्रकर्षेण संपादयंति। कुत एतत् तदाह। प्रवतां प्रवणवतां निम्नगानां पयसामनुष्यदे॥ कृत्यार्थे

तवैकेन्केन्यत्वन इति केन्प्रत्ययः ॥ अनुषंदनीयोऽध्वा मार्गः समान एको हि । यस्त्वा तानि सोमोत्पादननदीप्रवर्तनादीनि कर्माणि प्रथमं पूर्वमकृणोः । अकरोः । स तादृङ्महिमोपेतस्त्वमुक्थ्योऽसि । सर्वैः प्रशस्यो भवसि ॥

॥ अथ तृतीया ॥

अन्वेको॑ वदति॒ यद्ददा॑ति॒ तद्रू॒पा मि॒नन्तद॑पा॒ एक॑ ईयते ।
विश्वा॒ एक॑स्य वि॒नुद॑स्तितिक्षते॒ यस्ताकृ॑णोः प्रथ॒मं सास्यु॒क्थ्यः॑ ॥ ३ ॥

अनु॑ । एकः॑ । व॒द॒ति॒ । यत् । ददा॑ति । तत् । रू॒पा । मि॒नन् । तत्ऽअ॑पाः । एकः॑ । ई॒य॒ते॒ ।
विश्वाः॑ । एक॑स्य । वि॒ऽनुदः॑ । ति॒ति॒क्ष॒ते॒ । यः । ता । अकृ॑णोः । प्र॒थ॒मं । सः । अ॒सि॒ ।
उ॒क्थ्यः॑ ॥ ३ ॥

यजमानो यद्धविर्देवेभ्यो ददाति तदेको होतानुवदति । याज्यापुरोनुवाक्याभ्यां देवताः स्मारयति । एकोऽध्वर्यू रूपा पश्वादीनां रूपाणि मिनन् हिंसन् तदपास्तद्विशसनाख्यमपः कर्म यस्य तादृशः सन् ईयते । देवयजने सर्वत्र गच्छति । एकस्याध्वर्योर्विश्वा विनुदः सर्वाणि तत्कर्तृकाणि विक्षेपणरूपाणि कर्मवैगुण्यानि तितिक्षते । तद्योग्यप्रायश्चित्तकरणेन ब्रह्मा सहते ॥ गुप्तिज्किद्भ्यः सन् क्षमायामिष्यते ॥ तानि हविःप्रदानादीनि कर्माणि यस्त्वमकृणोः । अकारयः सः त्वमुक्थ्योऽसि ॥

॥ अथ चतुर्थी ॥

प्र॒जाभ्यः॑ पु॒ष्टिं वि॒भजं॑त आसते र॒यिमि॑व पृ॒ष्ठं प्र॒भवं॑तमाय॒ते ।
अ॒सिन्व॒न्दंष्ट्रैः॑ पि॒तुर॑त्ति॒ भोज॑नं॒ यस्ताकृ॑णोः प्रथ॒मं सास्यु॒क्थ्यः॑ ॥ ४ ॥

प्र॒ऽजाभ्यः॑ । पु॒ष्टिं । वि॒ऽभजं॑तः । आ॒स॒ते॒ । र॒यिंऽइ॑व । पृ॒ष्ठं । प्र॒ऽभवं॑तं । आ॒ऽय॒ते ।
असि॑न्वन् । दंष्ट्रैः॑ । पि॒तुः । अ॒त्ति॒ । भोज॑नं । यः । ता । अकृ॑णोः । प्र॒थ॒मं । सः । अ॒सि॒ ।
उ॒क्थ्यः॑ ॥ ४ ॥

हे इंद्र पुष्टिं त्वया दत्तं पोषकं धनं स्वकीयाभ्यः प्रजाभ्यो विभजंतोऽस्यैतावदस्यैतावदिति विभागं कुर्वंतो गृहमेधिन आसते । स्वस्वगृहेषु निवसंति । तत्र दृष्टांतः । आयते गृहं प्रत्यागच्छतेऽतिथये पृष्ठं धारकं प्रभवंतं बहुभरणसमर्थं रयिं धनं यथा विभज्य प्रयच्छंति तद्वत् । असिन्वन् सेतुबंधादिकं कर्म कुर्वन्

लोकः पितुः पालयित्र्या दिवः सकाशादागतं भोजनमुदकं तत्कार्या ओषधीर्दंष्ट्रैर्दंतैरत्ति। भक्षयति। यद्वा असिन्वन् अव्याप्रियमाणोऽग्निः पितुः पालकस्य यजमानस्य संबंधि भोजनं हविर्लक्षणमन्नं दंष्ट्रैर्दंतरूपैर्ज्वालैरत्ति। यस्ताकृणोरित्यादि सिद्धं ॥

॥ अथ पंचमी ॥

अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक्पथः।
तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्त्सास्युक्थ्यः ॥५॥

अध। अकृणोः। पृथिवीं। संऽदृशे। दिवे। यः। धौतीनां। अहिऽहन्। अरिणक्। पथः।
तं। त्वा। स्तोमेभिः। उदऽभिः। न। वाजिनं। देवं। देवाः। अजनन्। सः। असि।
उक्थ्यः ॥५॥

हे इंद्र अध अपि च त्वं दिवे द्योतमानाय सूर्याय पृथिवीं चलितां सतीं दृढीकृत्य संदृशे संदर्शनीयामकृणोः। अकरोः॥ दृशे विख्ये चेति केन्प्रत्ययांतत्वेन निपातितः॥ यश्च त्वं धौतीनां चलंतीनां नदीनां पथो मार्गानरिणक्। अरेचयः। गंतुं योग्यानकरोरित्यर्थः॥ रिचिर् विरेचने। लङि सिप्। तस्य हल्ङ्यादिना लोपः॥ अहिहन् अहेर्वृत्रस्य मेघस्य वा हंतर्हे इंद्र देवाः स्तोतारस्तं तादृशं देवं त्वां स्तोमेभिः स्तोत्रैरजनन्। तत्र दृष्टांतः। उदभिर्न वाजिनं। यथा वाजिनमश्वमुदभिरुदकैर्वर्धयंति तद्वत्॥ पद्दन्नोमासित्यादिनोदकस्योदन्भावः॥ शेषं सिद्धं॥

॥ इति द्वितीयस्य षष्ठे दशमो वर्गः ॥

॥ अथ षष्ठी ॥

यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद्दुदोहिथ।
सः शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः ॥६॥

यः। भोजनं। च। दयसे। च। वर्धनं। आर्द्रात्। आ। शुष्कं। मधुऽमत्। दुदोहिथ।
सः। शेवऽधिं। नि। दधिषे। विवस्वति। विश्वस्य। एकः। ईशिषे। सः। असि।
उक्थ्यः ॥६॥

हे इंद्र यस्त्वं भोजनं। भुज्यत इति भोजनमन्नादि। च दयसे। यजमानेभ्यः प्रयच्छसि॥ दय दानगतिरक्षणहिंसाग्रहणेषु आत्मनेपदी॥ किंच वर्धनं वृद्धिकरं

धनं बलं वा दयसे। तथार्द्रात्कांडात् शुष्कमनार्द्रं व्रीह्यादिकं मधुमत् मधुररसोपेतं दुदोहिथ। दुग्धवानसि॥ दुहेर्लिटि क्रादिनियमादिडागमः॥ स तादृशस्त्वं विवस्वति ते परिचरणं कुर्वाणे यजमाने शेवधिं धनसदनं निदधिषे। निदधासि। किं बहुना। विश्वस्य सर्वस्य जगत एकोऽद्वितीय एव सन् ईशिषे। स्वामी भवसि॥ ईश ऐश्वर्ये। ईशः स इतीडागमः॥ स इत्यादि सिद्धं॥

॥ अथ सप्तमी ॥

यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्य१वनीरधारयः।
यश्चासमा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः॥७॥

यः। पुष्पिणीः। च। प्रऽस्वः। च। धर्मणा। अधि। दाने। वि। अवनीः। अधारयः।
यः। च। असमाः। अजनः। दिद्युतः। दिवः। उरुः। ऊर्वान्। अभितः। सः।
असि। उक्थ्यः॥७॥

हे इंद्र यस्त्वं पुष्पिणीः पुष्पवतीश्च प्रस्वः प्रसूताः प्रसूयमाना वावनीरविचीरोषधीर्दानेऽधि॥ उपलूयंते सस्यान्यत्रेति दानं क्षेत्रं। अधिकरणे ल्युट्॥ तस्मिन् क्षेत्रे धर्मणा सकललक्षणेन कर्मणा व्यधारयः। न्यदधाः। यश्च त्वं दिवो द्योतमानस्य सूर्यस्यासमा विषमा नानाप्रकारा दिद्युतो दीप्तीरजनः। अजनयः। यद्वा दिवो नक्षत्राणि॥ जनेर्लेङि व्यत्ययेन शप्॥ यश्चोरुर्महांस्त्वमभितः सर्वत ऊर्वान् महतः प्राणिनिकायान् पर्वतान्वाजनयः। शिष्टं स्पष्टं॥

॥ अथाष्टमी ॥

यो नार्मरं सहवसुं निहंतवे पृक्षाय च दासवेशाय चावहः।
ऊर्जयंत्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः॥८॥

यः। नार्मरं। सहऽवसुं। निऽहंतवे। पृक्षाय। च। दासऽवेशाय। च। अवहः।
ऊर्जयंत्याः। अपरिऽविष्टं। आस्यं। उत। एव। अद्य। पुरुऽकृत्। सः। असि। उक्थ्यः॥८॥

पुरुकृत् पुरूणां कर्मणां कर्ता हे इंद्र यस्त्वं नार्मरं। नॄन् मनुष्यान्मारयतीति नृमरः कश्चिदसुरः। तस्यापत्यं नार्मरः। तं सहवसुं। वसुना सह वर्तत इति सहवसुः। असुरनामैतत्। एतन्नामकमसुरं निहंतवे॥ हंतेस्तुमर्थे तवेन्प्रत्ययः। तादौ च नितीति गतेः प्रकृतिस्वरत्वं॥ निहंतुं ऊर्जयंत्या बलवत्या वज्रधाराया

अपरिविष्टं मलादिभिरव्याप्तमास्यमद्यैवावहः। तमसुरं प्रापयः। यद्वा ऊर्जयंत्याः पिशाचिकाया आस्यं प्रापयः। किमर्थं। पृक्षाय। तव हविर्लक्षणान्नलाभाय। दासवेशाय। दासानां दस्यूनां वेशाय विनाशाय च। यद्वा अस्माकमन्नलाभाय दस्युविनाशाय च॥

॥ अथ नवमी ॥

शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ।
अरज्जौ दस्यून्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः॥९॥
शतं। वा। यस्य। दश। साकं। आ। अद्यः। एकस्य। श्रुष्टौ। यत्। ह। चोदं। आविथ।
अरज्जौ। दस्यून्। सं। उनप्। दभीतये। सुप्रऽअव्यः। अभवः। सः। असि। उक्थ्यः॥९॥

हे इंद्र एकस्यैकाकिनः श्रेष्ठस्य वा यस्य ते श्रुष्टौ सुखनिमित्ते तदर्थं शतं दश दश शतानि हरयो वाहनार्थं भवंति। तथा च मंत्रवर्णः। इंद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेति। अपि च यश्च आ अद्यः सर्वेषां सर्वत उपजीव्यः। न तस्येशे यं नाद्याद्यद्वैनं नाद्युरिति हि श्रुतिः। यद्ध यश्च त्वं चोदं स्तोत्राणां प्रेरकं यजमानमाविथ। रक्षितवानसि। किंच यस्त्वमरज्जौ रज्जुवर्जिते बंधनागारे दस्यूनुपक्षपयितृन् दभीतये। दभीतिर्नाम कश्चिदृषिः। तदर्थं समुनप्। हिंसितवानसि॥ उभतेर्हिंसाकर्मणो लङि व्यत्ययेन श्नम्। हल्ङ्यादिना सिपो लोपः। अडभावश्छांदसः॥ किंच सुप्राव्यः सुखेन सर्वैरुपसर्पणीयोऽभवः। शिष्टं सिद्धं॥

॥ अथ दशमी ॥

विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनं।
षळस्तभ्ना विष्टिरः पंच संदृशः परि परो अभवः सास्युक्थ्यः॥१०॥
विश्वाः। इत्। अनु। रोधनाः। अस्य। पौंस्यं। ददुः। अस्मै। दधिरे। कृत्नवे। धनं।
षट्। अस्तभ्नाः। विऽस्तिरः। पंच। संऽदृशः। परि। परः। अभवः। सः। असि।
उक्थ्यः॥१०॥

विश्वेत्॥ सुपां सुलुगिति जस आकारः॥ सर्वा एव रोधना रोधस्वत्यो नद्योऽस्येंद्रस्य पौंस्यं। पुंसो भावः पौंस्यं। वीर्यमिति यावत्। अनु तद्वीर्यमनु वर्तंते। अस्मा इंद्राय ददुः। हविर्लक्षणमन्नं यजमानाः प्रयच्छंति। किंच कृत्नवे

कर्मणां कर्त्रे इंद्राय धनं दधिरे। सर्वे जना धारयंति। तथा च मंत्रः। इंद्राय द्याव ओषधीरुतापो रयिं रक्षंति जीरयो वनानीति। विष्टिरो विस्तीर्णाः षट् षट्संख्याका उर्वीः। ताश्च द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधय इत्येवंरूपाः। ता अस्तभ्नाः। नियमितवानसि। संदृशः। सम्यक् पश्यंतीति संदृशो जनाः। पंच संदृशः पंच जनान् परि सर्वतः परः पारयिता पालयिता वाभवः। भवसि। गतमन्यत् ॥

॥ इति द्वितीयस्य षष्ठ एकादशो वर्गः ॥

॥ अथैकादशी ॥

सुप्रवाचनं तव वीर वीर्यं१ यदेकेन क्रतुना विंदसे वसु।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेंद्र विश्वास्युक्थ्यः ॥ ११॥

सुऽप्रवाचनं। तव। वीर। वीर्यं। यत्। एकेन। क्रतुना। विंदसे। वसु।
जातुऽस्थिरस्य। प्र। वयः। सहस्वतः। या। चकर्थ। सः। इंद्र। विश्वा। असि। उक्थ्यः ॥ ११॥

वीर बलवन् हे इंद्र तव वीर्यं सामर्थ्यं सुप्रवाचनं। सुष्ठु प्रवचनीयं। सर्वैः श्लाघनीयमित्यर्थः। किं तत्। एकेन क्रतुना कर्मणा वसु विंदसे। शत्रूणां धनं लभसे ॥ विद्लृ लाभे। तुदादिः स्वरितेत् ॥ यद्वा तदीयं धनं स्तोतॄन्प्रापयसीति यत् तत्प्रशस्यमित्यर्थः। सहस्वतो बलवतो जातूष्ठिरस्य। एतन्नामकः कश्चित्। तस्य वयोऽन्नं प्रादाः। यद्वा जातुष्ठिरस्य। जातु कदाचित् सर्वदा स्थिरस्य सहस्वतो बलवतो यज्ञादेः कर्मणः संबंधि वयो हविर्लक्षणमन्नं प्र विंदस इति समन्वयः। या यानीमान्यन्यानि विश्वा सर्वाणि कर्माणि चकर्थ कृतवानसि। स तादृशस्त्वमुक्थ्यः। सर्वैः प्रशंसनीयो भवसि ॥

॥ अथ द्वादशी ॥

अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय च स्रुतिं।
नीचा संतमुदनयः परावृजं प्रांधं श्रोणं श्रवयन्त्सास्युक्थ्यः ॥ १२॥

अरमयः। सरःऽअपसः। तराय। कं। तुर्वीतये। च। वय्याय। च। स्रुतिं।
नीचा। संतं। उत्। अनयः। पराऽवृजं। प्र। अंधं। श्रोणं। श्रवयन्। सः। असि।
उक्थ्यः ॥ १२॥

हे इंद्र सरपसः। सरणमपः कर्म यासां ताः सरपसः॥ शकंध्वादित्वात्पररूपत्वं॥ ता अपः कं सुखेन तराय तरणायारमयः। अक्रीडयः। किंच तुर्वीतये। तुर्वीतिर्नाम कश्चिद्राजर्षिः। तस्मै वय्याय च। वय्यो नाम कश्चित् तस्मै। ताभ्यां सुतिं सरणं प्रत्यरमयः। तौ हि जलपूर्णां महानदीं दृष्ट्वा तरीतुमसमर्थावास्तां। तौ च त्वया तारितौ। परावृजं। परितः पापानि वृणक्ति दहतीति परावृक् कश्चिदृषिः। तमप्सु मग्नं तथा नीचा नीचं संतमुदनयः। आपद्भ्य ऊर्ध्वं नीतवानसि। किंच अंधं संतं श्रोणं पंगुं संतं चक्षुर्दानादपंगुकरणाच्चोदनयः। किं कुर्वन्। प्रकर्षेण श्रवयन्। आत्मानं कीर्त्तिमंतं कुर्वन्। उदनय इति समन्वयः। स इत्यादि सिद्धं॥

॥ अथ त्रयोदशी ॥

अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यं।
इंद्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः॥१३॥

अस्मभ्यं। तत्। वसो इति। दानाय। राधः। सं। अर्थयस्व। बहु। ते। वसव्यं।
इंद्र। यत्। चित्रं। श्रवस्याः। अनु। द्यून्। बृहत्। वदेम। विदथे। सुऽवीराः॥१३॥

वसो सर्वस्य वासक वसुमन्वा हे इंद्र स्तोतृभ्योऽस्मभ्यं तद्राधो धनं दानाय। उपलक्षणमेतत्। भोगाय च समर्थयस्व। देहि। अस्मान् संगमयेत्यर्थः॥ अर्थ याचने चुरादिरदंत आत्मनेपदी॥ ते तव तद्बहु प्रभूतं वसव्यं॥ वस्वेव वसव्यं। वस्वादित्वात् स्वार्थिको यत्॥ तादृशं प्रभूतं धनमस्ति खलु। चित्रं चायनीयं यद्धनमनु द्यून् अन्वहं॥ कालाध्वनोरिति द्वितीया॥ श्रवस्याः। भोग्यमिच्छेः॥ अंतर्णीतण्यर्थत्वादकर्मकत्वं। यथा रोदितीति। स त्वन्यः। द्वे ह्यत्र कर्मणी उद्देश्यकर्म च विधेयकर्मांतर्भूतं। उद्देश्यकर्मणा सकर्मको भविष्यति। यथा माणवकं पुत्रीयतीति भाष्य उदाहृतं। श्रवःशब्दाच्छंदसि परेच्छायां क्यच्। तदंतस्य लेट्यडागमे रूपं॥ सुवीराः कल्याणपुत्रपौत्राः संतो वयं विदथेऽस्मिन्यज्ञे बृहत् प्रभूतं शस्त्रादिकं वाक्यं वदेम॥

॥ इति द्वितीयस्य षष्ठे द्वादशो वर्गः॥

अध्वर्यवो भरतेति द्वादशर्चं तृतीयं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं। अध्वर्यवो द्वादशेत्यनुक्रांतं॥ सूक्तविनियोगो लैंगिकः। अतिरात्रे प्रथमे पर्याये होतुः

शस्त्रयाज्याध्वर्यव इत्येषा। अध्वर्यवो भरतेंद्राय सोममिति याज्या। आ॰ ६. ४.। इति सूचितं ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

अध्वर्यवो भरतेंद्राय सोममामत्रेभिः सिंचता मद्यमंधः।
कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि ॥ १॥

अध्वर्यवः। भरत। इंद्राय। सोमं। आ। अमत्रेभिः। सिंचत। मद्यं। अंधः।
कामी। हि। वीरः। सदं। अस्य। पीतिं। जुहोत। वृष्णे। तत्। इत्। एषः। वष्टि ॥ १॥

गृत्समदो ब्रूते। अध्वर्यवः अध्वरस्य नेतारः। अध्वरं यजमानायेच्छंतः॥ कव्यध्वरपृतनस्यर्चि लोप इत्यकारलोपः। अत्र यास्कः। अध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेताध्वरं कामयत इति। नि॰ १. ८.॥ हे अध्वर्यवः इंद्राय देवाय सोमं हविर्धानादुत्तरवेदिं प्रति भरत। हरत॥ आमंत्रितस्याविद्यमानत्वादनिघातः॥ हत्वामत्रेभिः। अमा सहादंत्यत्र होत्रादय इत्यमत्राणि चमसाः। तैर्मद्यं मदकरमंधः सोमलक्षणमन्नमासिंचत। अग्नौ प्रक्षिपत। अत्र यास्कः। आ सिंचतामत्रैर्मदनीयमंधोऽमत्रं पात्रममा अस्मिन्नदंति। नि॰ ५. १.। इति। वीरः स इंद्रोऽस्य सोमस्य पीतिं पानं प्रति सदं सदैव कामी हि। कामयमानो हि। तस्माद्वृष्णे वर्षित्र इंद्राय सोमं जुहोत। जुहुत॥ हु दानादनयोः। लोटि तप्तनप्तनथनाश्चेति तबादेशः॥ एष इंद्रस्तदित् तदेव सोमद्रव्यं वष्टि। कामयते॥

॥ अथ द्वितीया ॥

अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षं।
तस्मा एतं भरत तद्वशायँ एष इंद्रो अर्हति पीतिमस्य ॥ २॥

अध्वर्यवः। यः। अपः। वव्रिऽवांसं। वृत्रं। जघान। अशन्याऽइव। वृक्षं।
तस्मै। एतं। भरत। तत्ऽवशाय। एषः। इंद्रः। अर्हति। पीतिं। अस्य ॥ २॥

हे अध्वर्यवः य इंद्रोऽप उदकानि वव्रिवांसमावृत्य स्थितं वृत्रं। वृणोत्याकाशमिति वृत्रो मेघः। तं मेघं वज्रेण जघान। हतवान्। अशन्येव। यथाशन्या वैद्युताग्निना वृक्षं दहति तद्वत्। तस्मै तद्वशाय सोमकामाय तस्मा इंद्रायैतं सोमं भरत। उत्तरवेदिं प्रति हरत। एष इंद्रोऽस्य सोमस्य पीतिं पानमर्हति ॥

॥ अथ तृतीया ॥

अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः ।
तस्मा एतमंतरिक्षे न वातमिंद्रं सोमैरोर्णुत जूर्न वस्त्रैः ॥ ३ ॥

अध्वर्यवः । यः । दृभीकं । जघान । यः । गाः । उत्ऽआजत् । अप । हि । वलं । वरिति वः ।
तस्मै । एतं । अंतरिक्षे । न । वातं । इंद्रं । सोमैः । आ । ऊर्णुत । जूः । न । वस्त्रैः ॥ ३ ॥

हे अध्वर्यवः य इंद्रो दृभीकं । सर्वान्विदारयति भियं करोतीति दृभीको नामासुरः । तमसुरं जघान । यश्च वलासुरेण निरुद्धा गा उदाजत् । निरगमयत् । ततश्च तमेव वलमसुरं अपवः । अपावृणोत् । हिंसितवानित्यर्थः ॥ वृणोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक् । हल्ङ्यादिना तिपो लोपः ॥ तस्मा इंद्रायैतं सोममंतरिक्षे वातं न वातमिव धाराभिर्व्याप्तं कुरुत । तदेवाह सोमैरिंद्रमा ऊर्णुत । सर्वत आच्छादयत ॥ ऊर्णुञ् आच्छादने । अदादिकः । लोटि रूपं ॥ तत्र दृष्टांतः । जूर्न जीर्णो यथा वस्त्रैरंगमाच्छादयति तद्वत् ॥

॥ अथ चतुर्थी ॥

अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून् ।
यो अर्बुदमव नीचा बबाधे तमिंद्रं सोमस्य भृथे हिनोत ॥ ४ ॥

अध्वर्यवः । यः । उरणं । जघान । नव । चख्वांसं । नवतिं । च । बाहून् ।
यः । अर्बुदं । अव । नीचा । बबाधे । तं । इंद्रं । सोमस्य । भृथे । हिनोत ॥ ४ ॥

हे अध्वर्यवः य इंद्रो नव नवतिं च एकोनशतं बाहून् चख्वांसं ॥ चष्टेरिदं रूपं । यद्वा खनतेः क्वसौ रूपं । जने लोपः । छांदसं रूपं ॥ सर्वस्य दर्शयंतं । यद्वा आत्मनो देहे निखातवंतमुरणमेतन्नामकमसुरं जघान । यश्चार्बुदमेतन्नामकमसुरं च नीचाधोमुखं कृत्वावबबाधे । तमेनमिंद्रं सोमस्य भृथे सोमं बिभ्रति पात्रे हिनोत । वर्धयत । यद्वा सोमस्य भृथे भरणे संपादने सति हिनोत । स्तोत्रैः प्रीणयत ॥ हि गतिवृद्ध्योः ॥

॥ अथ पंचमी ॥

अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसं ।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इंद्रायांधसो जुहोत ॥ ५ ॥

अध्वर्यवः । यः । सु । अश्नं । जघान । यः । शुष्णं । अशुषं । यः । विऽअंसं ।
यः । पिप्रुं । नमुचिं । यः । रुधिऽक्रां । तस्मै । इंद्राय । अंधसः । जुहोत ॥ ५ ॥

हे अध्वर्यवः य इंद्रोऽश्नं । अश्नाति भक्षयति प्राणिजातमिति । यद्वा अश्नुते स्वतेजसा सर्वं व्याप्नोतीत्यश्नः कश्चिदसुरः । तमसुरं सु सुष्ठु जघान । अशुषं केनाप्यशोषणीयं शुष्णमसुरं यश्च तमसुरं व्यंसमंसहीनं कृत्वा जघान । यश्च पिप्रुं तेजसा जगद्व्याप्य वर्तमानमेतन्नामकमसुरं नमुचिमसुरं जघान यश्च । तैत्तिरीयके नमुचिमसुरं नालभतेति प्रकृत्य फेनेन शिर उदवर्तयदित्यंतेन वाक्यसंदर्भेण नमुचिवधः प्रपंचितः । तथा मंत्रश्च । अपां फेनेन नमुचेः शिर इंद्रोदवर्तयदिति । रुधिक्रामेतन्नामकमसुरं यश्च जघान । तस्मा इंद्रायांधसो हविर्लक्षणान्यन्नानि जुहोत । जुहुत ॥

॥ अथ षष्ठी ॥

अध्वर्यवो यः शतं शंबरस्य पुरो बिभेदाश्मनेव पूर्वीः ।
यो वर्चिनः शतमिंद्रः सहस्रमपावपद्भरता सोममस्मै ॥ ६ ॥

अध्वर्यवः । यः । शतं । शंबरस्य । पुरः । बिभेद । अश्मनाऽइव । पूर्वीः ।
यः । वर्चिनः । शतं । इंद्रः । सहस्रं । अपऽअवपत् । भरत । सोमं । अस्मै ॥ ६ ॥

हे अध्वर्यवः य इंद्रः शंबरस्य मायाविनोऽसुरस्य पूर्वीः पुरातनीः शतं पुरः पुरीरश्मनेव अश्मसदृशेन वज्रेण बिभेद । यश्चेंद्रो वर्चिनः ॥ वर्च दीप्तौ । गमेरिनिः । उ॰ ४. ६. । इति विधीयमान इनिर्बहुलवचनादस्माद्भवति ॥ यद्वा नामैतत् । तस्यासुरस्य शतं सहस्रमेतत्संख्याकानपरिमितान्वीरान् पुत्रानपावपत् । युगपदेव भूम्यामपातयत् । तथा च मंत्रवर्णः । शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरानिति । अस्मा इंद्राय सोमं भरत ॥

॥ इति द्वितीयस्य षष्ठे त्रयोदशो वर्गः ॥

॥ अथ सप्तमी ॥

अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान् ।
कुत्सस्यायोरतिथिग्वस्य वीरान्न्यवृणग्भरता सोममस्मै ॥ ७ ॥

अध्वर्यवः। यः। शतं। आ। सहस्रं। भूम्याः। उपऽस्थे। अवपत्। जघन्वान्।
कुत्सस्य। आयोः। अतिथिऽग्वस्य। वीरान्। नि। अवृणक्। भरत। सोमं। अस्मै ॥७॥

हे अध्वर्यवो जघन्वान् पूर्वं शत्रून् हतवान् य इंद्रः शतं सहस्रमसुरान् भूम्या उपस्थ उत्संगेऽवपत्। एकैकेन प्रकारेणापातयत्। किंच यः कुत्सस्यैतन्नामकस्य राजर्षेः। आयोः पौरूरवस्य राजर्षेः। अतिथिग्वस्य दिवोदासस्य। एतेषां त्रयाणां वीरानभिगंतॄन्प्रति द्वेष्टिनः शुष्णादीनसुरान् न्यावृणक्। वृणक्तिर्हिंसाकर्मा। अवधीत्। तथा च मंत्रवर्णः। त्वं कुत्सं शुष्णहत्येष्वाविथारंधयोऽतिथिग्वाय शंबरमिति। तादृशायेंद्राय सोमं भरत ॥

॥ अथाष्टमी ॥

अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहंतो नशथा तदिंद्रे।
गभस्तिपूतं भरत श्रुतायेंद्राय सोमं यज्यवो जुहोत ॥८॥

अध्वर्यवः। यत्। नरः। कामयाध्वे। श्रुष्टी। वहंतः। नशथ। तत्। इंद्रे।
गभस्तिऽपूतं। भरत। श्रुताय। इंद्राय। सोमं। यज्यवः। जुहोत ॥८॥

नरः कर्मणां नेतारो हे अध्वर्यवः यदभिलषितमर्थं कामयाध्वे ॥ कामयतेर्लेट्यडागमः ॥ श्रुष्टी क्षिप्रमिंद्रे सोमं वहंतः प्रापयंतो यूयं तदभिलषितं फलं नशथ। प्राप्नुत। श्रुताय लोके प्रसिद्धायेंद्राय गभस्तिपूतं हस्ताभ्यां मंजनदोहनादिभिः शोधितं सोमं भरत। उत्तरवेदिं प्रति हरत। ततो यज्यवो यागं कुर्वाणा हे अध्वर्यव आहृतं सोममिंद्राय जुहोत। जुहुत। अग्नौ प्रक्षिपत ॥

॥ अथ नवमी ॥

अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वं।
जुषाणो हस्त्यमभि वावशे व इंद्राय सोमं मदिरं जुहोत ॥९॥

अध्वर्यवः। कर्तन। श्रुष्टिं। अस्मै। वने। निऽपूतं। वने। उत्। नयध्वं।
जुषाणः। हस्त्यं। अभि। वावशे। वः। इंद्राय। सोमं। मदिरं। जुहोत ॥९॥

हे अध्वर्यवः अस्मा इंद्राय सोमं श्रुष्टिं सुखकरं कर्तन। कुरुत ॥ करोतेर्लोटि बहुलं छंदसीति विकरणस्य लुक्। तप्तनप्तनथनाश्चेति तनबादेशः। आमंत्रि-

तस्याविद्यमानत्वान्न निघातः ॥ किंच वने संभजनीये वन उदके निपूतमाप्यायनेन शोधितं सोममुन्नयध्वं। ऊर्ध्वं नयत। यद्वा वने तद्विकारे चमसे निपूतं दशापवित्रेण शोधितं सोमं वने चमस उन्नयध्वं। जुषाणः प्रीयमाणः स इंद्रो वो युष्माकं हस्त्यं हस्ताभ्यामभिषुतं सोममभिवावशे। कामयते ॥ वश कांतौ। यङ्लुगंतस्य लटि व्यत्ययेनात्मनेपदं। लोपस्त आत्मनेपदेष्विति तलोपः ॥ मदिरं मदकरमिमं सोममिंद्राय जुहोत। इंद्रोद्देशेनाग्नौ प्रक्षिपत ॥

॥ अथ दशमी ॥

अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमिंद्रं।
वेदाहमस्य निभृतं म एतद्दित्संतं भूयो यजतश्चिकेत ॥ १० ॥
अध्वर्यवः। पयसा। ऊधः। यथा। गोः। सोमेभिः। ईं। पृणत। भोजं। इंद्रं।
वेद। अहं। अस्य। निऽभृतं। मे। एतत्। दित्संतं। भूयः। यजतः। चिकेत ॥ १० ॥

हे अध्वर्यवः यथा गोरूधः पयसा पूर्णं तद्वदीमेनं भोजं फलस्य दातारं रक्षितारं चेंद्रं सोमेभिः सोमैः पृणत। पूरयत। मे मदीयस्य सोमस्य निभृतं गूढं सुखसाधनस्वभावमहमेव वेद। जानामि। इति पूर्वं न परस्मै कथितं। तथापि युष्मभ्यं ब्रवीमीत्येवं। दित्संतं सोमं दातुमिच्छंतं यजमानं यजतो यष्टव्य इंद्रो भूयोऽतिशयेन चिकेत ॥ दित्संतं। डुदाञ् दाने। इच्छायां सन्। सनि मीमाघुरभलभशकपतपदामच इसिति त्याकारस्य इसादेशः। अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः। सः स्यार्धधातुक इति सकारस्य तत्वं ॥

॥ अथैकादशी ॥

अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा।
तमूर्दरं न पृणता यवेनेंद्रं सोमेभिस्तदपो वो अस्तु ॥ ११ ॥
अध्वर्यवः। यः। दिव्यस्य। वस्वः। यः। पार्थिवस्य। क्षम्यस्य। राजा।
तं। ऊर्दरं। न। पृणत। यवेन। इंद्रं। सोमेभिः। तत्। अपः। वः। अस्तु ॥ ११ ॥

हे अध्वर्यवः य इंद्रो दिव्यस्य द्युलोकार्हस्य वस्वो वसुनो राजा भवति। यश्च पार्थिवस्य। पृथिवीशब्देन विस्तीर्णमंतरिक्षमुच्यते। तत्रत्यं धनं पार्थिवं। तस्य राजा। यश्च क्षम्यस्य। क्षमा भूमिः। तत्रत्यं धनं क्षम्यं। तस्य च राजा भवति।

तमेवंविधमिंद्रं सोमेभिः सोमैः पृणत। पूरयत। तत्र दृष्टांतः। ऊर्दरं न। ऊर्ध्वं दीर्णमूर्दरं कुसूलं। यथा यवेन तत्पूर्णं तद्वदिंद्रं पूरयतेति। तादृशं सोमादिनेंद्रोदरपूरणलक्षणमपः कर्म वो युष्माकमस्तु ॥

॥ अथ द्वादशी ॥

अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यं।

इंद्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥ १२ ॥

अस्मभ्यं। तत्। वसो इति। दानाय। राधः। सं। अर्थयस्व। बहु। ते। वसव्यं।

इंद्र। यत्। चित्रं। श्रवस्याः। अनु। द्यून्। बृहत्। वदेम। विदथे। सुऽवीराः ॥ १२ ॥

एषा ऋग्व्याख्याता ॥

॥ इति द्वितीयस्य षष्ठे चतुर्दशो वर्गः ॥

प्र घा न्वस्येति दशर्चं चतुर्थं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं। अत्रानुक्रमणिका प्र घ दशेति ॥ दशरात्रे षष्ठेऽहनि निष्केवल्ये त्रीणि सूक्तानि। तत्रेदं द्वितीयं। षष्ठस्येति खंडे सूचितं। ऐंद्र याह्युप नः प्र घा न्वस्याभूरेक इति निष्केवल्यं। आ० ८. १.। इति ॥ त्र्येकमामके निष्केवल्ये प्र घा न्वस्येत्येषा सूक्तमुखीया। उशनःस्तोमे सूचितं। त्र्यर्यमा मनुषो देवताता प्र घा न्वस्य महतो महानि। आ० ९. ५.। इति ॥

॥ सैषा सूक्ते प्रथमा ॥

प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचं।

त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिंद्रो जघान ॥ १ ॥

प्र। घ। नु। अस्य। महतः। महानि। सत्या। सत्यस्य। करणानि। वोचं।

त्रिऽकद्रुकेषु। अपिबत्। सुतस्य। अस्य। मदे। अहिं। इंद्रः। जघान ॥ १ ॥

गृत्समदो ब्रूते। महतो बलवतः सत्यस्य सत्यसंकल्पस्यास्येंद्रस्य सत्यानि यथार्थानि महानि महांति करणान्यस्मिन् सूक्ते वक्ष्यमाणानि कर्माणि नु अद्य प्रवोचं। प्रकर्षेण ब्रवीमि ॥ वच परिभाषणे। छंदसि लुङ्लङ्लिट इति वर्तमाने लुङि अस्यतिवक्तिख्यातिभ्योऽङ्। वच उम् ॥ घेति प्रसिद्धौ। कानि तानि उच्यंते। त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येवंरूपेष्वाभिप्लविकेष्वहःसु सुतस्याभिषुतं

सोममिंद्रोऽपिबत् । ततः पीतस्यास्य सोमस्य मदे हर्षे संजाते सतींद्रोऽहिं वृत्रमसुरं जघान । हतवान् ॥

॥ अथ द्वितीया ॥

अवंशे द्यामस्तभायद्बृहंतमा रोदसी अपृणदंतरिक्षं ।
स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इंद्रश्चकार ॥ २ ॥
अवंशे । द्यां । अस्तभायत् । बृहंतं । आ । रोदसी इति । अपृणत् । अंतरिक्षं ।
सः । धारयत् । पृथिवीं । पप्रथत् । च । सोमस्य । ता । मदे । इंद्रः । चकार ॥ २ ॥

अवंश आकाशे द्यां द्योतमानं सूर्यं द्युलोकं वास्तभायत् । इंद्रोऽस्तभ्नात् । अनवलंबनस्य तस्यावस्थापनमकरोदित्यर्थः ॥ स्तंभु इति सौत्रो धातुः क्र्यादिः । लङि व्यत्ययो बहुलमित्यहावपि शायजादेशः ॥ बृहंतं महदंतरिक्षं रोदसी द्यावापृथिव्यौ चापृणत् । तेजसा पूरितवान् । किंच स इंद्रः पृथिवीं विस्तीर्णां भूमिं धारयत् । अधारयत् । तथा पप्रथच्च । एनां भूमिमप्रथयत् ॥ प्रथ प्रख्याने । णयंतस्य लुङि चङि रूपं । चङ्यन्यतरस्यामिति मध्योदात्तत्वं ॥ सोमस्य मदे हर्षे संजाते सति तानीमानि कर्माणींद्रश्चकार ॥

॥ अथ तृतीया ॥

सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनां ।
वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इंद्रश्चकार ॥ ३ ॥
सद्मऽइव । प्राचः । वि । मिमाय । मानैः । वज्रेण । खानि । अतृणत् । नदीनां ।
वृथा । असृजत् । पथिऽभिः । दीर्घऽयाथैः । सोमस्य । ता । मदे । इंद्रः । चकार ॥ ३ ॥

सद्मेव यथा यज्ञगृहान्मानैः षट्त्रिंशत्प्रक्रमप्राचीत्येवंरूपैः परिमाणैः प्राक्प्रवणान् कुर्वंति तद्वत् सिंधून् लोकान्वानृजून्वा मानैः परिमाणैः प्राचः प्राङ्मुखान्विमिमाय । इंद्रो विशेषेण निर्मितवान् । तथा नदीनां खानि निर्गमनद्वाराणि वज्रेण चातृणत् । अखनत् ॥ तृदि हिंसानादरयोः । रुधादि । लङ् ॥ तथा च मंत्रः । इंद्रो अस्मां अरदद्वज्रबाहुरिति । तथा दीर्घयाथैर्बहुकालं गंतव्यैः पथिभिर्मार्गैर्वृथासृजत् । अनायासेन ता नदीः सृष्टवान् । सोमस्येति सिद्धार्थ इति ॥

॥ अथ चतुर्थी ॥

स प्रवोळ्हॄन्परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ ।
सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इंद्रश्चकार ॥४॥

सः । प्रऽवोळ्हॄन् । परिऽगत्य । दभीतेः । विश्वं । अधाक् । आयुधं । इद्धे । अग्नौ ।
सं । गोभिः । अश्वैः । असृजत् । रथेभिः । सोमस्य । ता । मदे । इंद्रः । चकार ॥४॥

प्राक्किल चुमुरिधुनिप्रभृतयोऽसुरा दभीतेः पुरं संरुध्य परिगृह्य तस्मात्पुरान्निरगुरिति कथा । स इंद्रो दभीतेः । दभीतिर्नाम कश्चिद्राजर्षिः । तस्य प्रवोळ्हॄन् प्रवोढॄन् ॥ सहिवहोरोदवर्णस्येत्योत्वं ॥ प्रकर्षेण तं दभीतिं वहतस्तानसुरान् मध्ये मार्गे परिगत्य तेषां विश्वं सर्वमायुधमिद्धेऽग्नौ दीप्यमाने वह्नावधाक् । अधाक्षीत् ॥ दहेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक् ॥ पश्चात्तं दभीतिं गोभिरश्वै रथेभी रथैश्च समसृजत् । संयोजितवान् । सोमस्यादि सिद्धमिति ॥

॥ अथ पंचमी ॥

अतिमूर्त्तिनाम्न्येकाहे मरुत्वतीये सूक्तमुखीया । अतिमूर्त्तिनेति खंडे सूचितं । स ईं महीं धुनिमेतोररम्णात् । आ० ९. ८. । इति ॥

स ईं महीं धुनिमेतोररम्णात्सो अस्नातॄनपारयत्स्वस्ति ।
त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इंद्रश्चकार ॥५॥

सः । ईं । महीं । धुनिं । एतोः । अरम्णात् । सः । अस्नातॄन् । अपारयत् । स्वस्ति ।
ते । उत्ऽस्नाय । रयिं । अभि । प्र । तस्थुः । सोमस्य । ता । मदे । इंद्रः । चकार ॥५॥

स इंद्र ईमेनां महीं महतीं धुनिं । धुनोति स्तोतॄणां पापानीति धुनिः परुष्णी नदी । तामेतोः ॥ ईश्वरपदासंनिधानेऽपि तोसुन्प्रत्ययः । पा० ३.४.१३. ॥ ऋषीणां गमनार्थमरम्णात् । उपाशमयत् । महाजलां नदीमल्पोदकामकरोदित्यर्थः । ततः स इंद्रोऽस्नातॄन् स्नातुमशक्तान् तरणासमर्थानृषीन् स्वस्ति क्षेमेणापारयत् । ते महर्षय उत्स्नाय तां नदीमुत्तीर्य यं रयिमपेक्ष्य गच्छंति तं रयिमभिलक्ष्य प्रतस्थुः । प्रतस्थिरे । शिष्टं सिद्धं ॥

॥ इति द्वितीयस्य षष्ठे पंचदशो वर्गः ॥

॥ अथ षष्ठी ॥

सोदंचं सिंधुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष ।
अजवसो जविनीभिर्विवृश्चन्त्सोमस्य ता मद इंद्रश्चकार ॥ ६ ॥

सः । उदंचं । सिंधुं । अरिणात् । महिऽत्वा । वज्रेण । अनः । उषसः । सं । पिपेष ।
अजवसः । जविनीभिः । विऽवृश्चन् । सोमस्य । ता । मदे । इंद्रः । चकार ॥ ६ ॥

स इंद्रः सिंधुं प्रांचं संतं महित्वा स्वकीयेन महिम्नोदंचमरिणात् । उदङ्मुखमकरोत् ॥ सिंधुशब्दश्छंदसि पुल्लिंगः ॥ उषस उषोदेव्या अनः शकटं वज्रेण संपिपेष । चूर्णीचकार । एतच्च दिवश्चिद्वा दुहितरमित्यत्र स्पष्टं वक्ष्यते । किं कुर्वन् । अजवसो जवहीना दुर्बलाः सेना जविनीभिर्जवयुक्ताभिः सेनाभिर्विवृश्चन् । विशेषेण भिंदन् । पिपेषेति समन्वयः ॥ ओव्रश्चू छेदने । शतरि ग्रहिज्यादिना संप्रसारणं । शिष्टं स्पष्टं ॥

॥ अथ सप्तमी ॥

स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक् ।
प्रति श्रोणः स्थाद्व्य१नगचष्ट सोमस्य ता मद इंद्रश्चकार ॥ ७ ॥

सः । विद्वान् । अपऽगोहं । कनीनां । आविः । भवन् । उत् । अतिष्ठत् । पराऽवृक् ।
प्रति । श्रोणः । स्थात् । वि । अनक् । अचष्ट । सोमस्य । ता । मदे । इंद्रः । चकार ॥ ७ ॥

पुरा किल कन्यकाश्चक्षुर्हीनं पादहीनं परावृजं जिघृक्षुमृषिं दृष्ट्वाभिदुद्रुवुः । ततः स ऋषिरिंद्रं स्तुत्वा चक्षुः पादं च लेभे । तदेतदाह । कनीनां कन्यकानामपगोहमपगोहनं तिरोभावं विद्वान् परावृगृषिराविर्भवन् सर्वेषां प्रत्यक्षो भवन् उदतिष्ठत् । श्रोणः पूर्वं पंगुरिदानीमिंद्रस्य प्रसादाद्विभग्नजानुस्ताः कन्याः प्रतिस्थात् । पूर्वमंधोऽधुना चक्षुर्लाभाद्व्यचष्ट । ताः कन्यका विशेषेण पश्यति स्म । तानीमानि कर्माणि स इंद्रश्चकार ॥

॥ अथाष्टमी ॥

भिनद्वलमंगिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यैरत् ।
रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इंद्रश्चकार ॥ ८ ॥

भिनत्। वलं। अंगिरःऽभिः। गृणानः। वि। पर्वतस्य। दृंहितानि। ऐरत्।
रिणक्। रोधांसि। कृत्रिमाणि। एषां। सोमस्य। ता। मदे। इंद्रः। चकार ॥ ८॥

अंगिरोभिर्गृणानः स्तूयमानः स इंद्रो वलं वलनामकमसुरं भिनत्। अभिनत्। तथा गवां निरोधकस्य पर्वतस्य दृंहितानि शिलाभिर्दृढीकृतानि द्वाराणि व्यैरत्। उद्घाटितवान्। तदेवाह। एषां पर्वतानां कृत्रिमाणि क्रियया निर्वृत्तानि रोधांसि निरुद्धानि द्वाराणि रिणक्। उदघाटयत्। गतमन्यत् ॥

अतिमूर्त्तिनाम्न्येकाहे निष्केवल्ये सूक्तमुखीया स्वप्नेनेत्येषा। सूचितं। स्वप्नेनाभ्युप्या चुमुरिं धुनिं चेति सूक्तमुखीया। आ० ९. ८.। इति ॥

॥ सैषा सूक्ते नवमी ॥

स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघंथ दस्युं प्र दभीतिमावः।
रंभी चिदत्र विविदे हिरण्यं सोमस्य ता मद इंद्रश्चकार ॥ ९॥

स्वप्नेन। अभिऽउप्य। चुमुरिं। धुनिं। च। जघंथ। दस्युं। प्र। दभीतिं। आवः।
रंभी। चित्। अत्र। विविदे। हिरण्यं। सोमस्य। ता। मदे। इंद्रः। चकार ॥ ९॥

स त्वं दस्युं सर्वस्योपक्षपयितारं चुमुरिं धुनिं च एतन्नामानावसुरौ स्वप्नेन दीर्घनिद्रयाभ्युप्य संयोज्य जघंथ। हतवानसि। ततस्ताभ्यां युध्यमानं दभीतिं राजर्षिं प्रावः। रक्षितवानसि। तथा च मंत्रवर्णः। त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहंत्विति ॥ आवः। अवते रक्षणार्थस्य लङि सिपि रूपं ॥ रंभी चित् वेत्रधारी चास्य दौवारिकोऽत्रास्मिन्युद्धे तयोरसुरयोर्हिरण्यं धनं विविदे। लेभे ॥ विद्लृ लाभे स्वरितेत्। तानीमानि कर्माणि सोमस्य मदे सति चकारेति ॥

॥ अथ दशमी ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ १०॥

नूनं। सा। ते। प्रति। वरं। जरित्रे। दुहीयत्। इंद्र। दक्षिणा। मघोनी।
शिक्ष। स्तोतृऽभ्यः। मा। अति। धक्। भगः। नः। बृहत्। वदेम। विदथे। सुवीराः ॥ १०॥

एषा ऋग्व्याख्याता ॥

॥ इति द्वितीयस्य षष्ठे षोडशो वर्गः ॥

प्र वः सतामिति नवर्चं पंचमं सूक्तं गार्त्समदमैंद्रं। अत्रानुक्रमणिका। प्र वो नवांत्या त्रिष्टुबिति। नवमी त्रिष्टुप् शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः॥ तृतीये पर्यायेऽच्छावाकशस्त्रे प्र वः सतामिति सूक्तं। अतिरात्र इति खंडे सूचितं। प्र वः सतां प्रो द्रोणे हरयः कर्मोग्मन्निति याज्या। आ॰ ६. ४.। इति॥

॥ तस्मिन्सूक्ते प्रथमा॥

प्र वः सतां ज्येष्ठतमाय सुष्टुतिमग्नाविव समिधाने हविर्भरे।
इंद्रमजुर्यं जरयंतमुक्षितं सनाद्युवानमवसे हवामहे॥१॥

प्र। वः। सतां। ज्येष्ठऽतमाय। सुऽस्तुतिं। अग्नौऽइव। संऽइधाने। हविः। भरे।
इंद्रं। अजुर्यं। जरयंतं। उक्षितं। सनात्। युवानं। अवसे। हवामहे॥१॥

गृत्समदो ब्रूते। हे यजमाना वो युष्मदर्थं सतां महतां देवानां ज्येष्ठतमायातिशयेन श्रेष्ठायेंद्राय तदर्थं। अग्नाविव समिधाने। इवशब्द एवार्थः। दीप्यमान एवाग्नौ हविः प्रभरे। संपादयामि। ततः परं सुष्टुतिं शोभनां स्तुतिं करोमि॥ भर इति भृञ् भरणे जित्वादुभयपदी। लटि रूपं॥ अजुर्यमजरणीयं जरयंतं सर्वमन्यज्जरयंतमुक्षितं सोमेन सिक्तं सनात्सनातनं युवानं नित्यतरुणं तादृशमिंद्रमवसेऽस्माकं रक्षणाय तस्य तर्पणाय वा हवामहे। आह्वयामः॥

॥ अथ द्वितीया॥

यस्मादिंद्राद्बृहतः किं चनेमृते विश्वान्यस्मिन्त्संभृताधि वीर्या।
जठरे सोमं तन्वी३सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुं॥२॥

यस्मात्। इंद्रात्। बृहतः। किं। चन। ईं। ऋते। विश्वानि। अस्मिन्। संऽभृता। अधि। वीर्या।
जठरे। सोमं। तन्वि। सहः। महः। हस्ते। वज्रं। भरति। शीर्षणि। क्रतुं॥२॥

बृहतो महतो यस्मादिंद्रादृते किमपीमिदं जगच्चन। नास्तीत्यर्थः॥ चेति नेति निपातद्वयसमुदायश्चनेति। चेति चिदित्यर्थे नेति निषेधार्थे। एकपद्यं तु सांप्रदायिकं॥ उक्तार्थे मंत्रः। नेंद्रादृते पवते धाम किं चनेति। यद्वा इंद्रादृत ईमिदं जगत् किं। न क्षुद्रमत्यल्पमित्यर्थः। कुत एतत् तदेवोच्यते। अस्मिन्निंद्रे विश्वानि सर्वाणि वीर्याणि सामर्थ्यान्यधि संभृता। अधिकं संभृतान्यासते। यश्चेंद्रो जठरे स्वोदरे सोममभिषुतं सोमरसं भरति। बिभर्ति। किंच तन्वि तन्वां

स्वकीये सर्वस्मिन् शरीरे सहो बलं महस्तेजश्च बिभर्ति। हस्ते वज्रमायुधं बिभर्ति। शीर्षणि शिरसि क्रतुं विज्ञानं भरति। बिभर्ति॥ यद्वृत्तयोगादनिघातः। वाक्यभेदाद्वा निघाताभावः। शीर्षणि। शीर्षन् छंदसीति॥

॥ अथ तृतीया ॥

न क्षोणीभ्यां परिभ्वे त इंद्रियं न समुद्रैः पर्वतैरिंद्र ते रथः।
न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु॥३॥
न। क्षोणीभ्यां। परिऽभ्वे। ते। इंद्रियं। न। समुद्रैः। पर्वतैः। इंद्र। ते। रथः।
न। ते। वज्रं। अनु। अश्नोति। कः। चन। यत्। आशुऽभिः। पतसि। योजना। पुरु॥३॥

हे इंद्र ते तवेंद्रियं बलं क्षोणीभ्यां द्यावापृथिवीभ्यां न परिभ्वे। न परिभवनीयं॥ कृत्यार्थे तवैकेन्केन्यत्वन इति केन्प्रत्ययः। उदात्तस्वरितयोरिति स्वरितत्वं॥ किंच ते रथः समुद्रैः पर्वतैश्च न परिभवनीयः। ते वज्रमायुधं कश्चन पुमान् नान्वश्नोति। न व्याप्नोति परिभवितुं॥ अशू व्याप्तौ। व्यत्ययेन परस्मैपदं॥ यद्यदासुरवधार्थं दिग्विजयकाले पुरु पुरूणि बहूनि योजना योजनानि पतसि। गच्छसि। तदा तव बलादि न परिभवनीयमिति समन्वयः॥

॥ अथ चतुर्थी ॥

विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरंति वृषभाय सश्चते।
वृषा यजस्व हविषा विदुष्टरः पिबेंद्र सोमं वृषभेण भानुना॥४॥
विश्वे। हि। अस्मै। यजताय। धृष्णवे। क्रतुं। भरंति। वृषभाय। सश्चते।
वृषा। यजस्व। हविषा। विदुःऽतरः। पिब। इंद्र। सोमं। वृषभेण। भानुना॥४॥

हे यजमान विश्वे सर्वे जना यजताय सर्वैर्यजनीयाय धृष्णवे शत्रूणां धर्षणशीलाय वृषभाय कामानां वर्षित्रे सश्चते सज्जमानाय स्तुत्यादिकर्मवत्सु स्तोतृषु एतादृशायेंद्राय क्रतुं यज्ञादिलक्षणं कर्म भरंति हि। हरंति खलु। प्रणयंतीत्यर्थः॥ भरंति। हियोगादनिघातः॥ यस्मादेवं तस्माद्वृषा सोमरससेचनसमर्थो विदुष्टरः॥ विद्वच्छब्दात्तरपि छांदसं संप्रसारणं। शासिवसिघसीनां चेति संहितायां षत्वं॥ विद्वत्तरस्त्वं हविषा तमिंद्रं यजस्व। इदानीमिंद्रं संबोध्याह। हे इंद्र वृषभेण कामानां वर्षकेण भानुना दीप्यमानेनाग्निना सह सोमं पिब॥

॥ अथ पंचमी ॥

वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृषभाय पातवे ।
वृषणाध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति ॥ ५ ॥
वृष्णः । कोशः । पवते । मध्वः । ऊर्मिः । वृषभऽअन्नाय । वृषभाय । पातवे ।
वृषणा । अध्वर्यू इति । वृषभासः । अद्रयः । वृषणं । सोमं । वृषभाय । सुस्वति ॥ ५ ॥

हे इंद्र वृष्णः फलस्य वर्षितुर्मध्वो मदकरस्य सोमस्य कोशो रस ऊर्मिरनुष्ठातॄणां पातॄणां च प्रेरकः सन् पवते । गच्छति ॥ पव गतौ । अनुदात्तेत् ॥ किमर्थं । वृषभान्नाय । बलवर्षकान्यन्नानि यस्य स तथोक्तः । तादृशाय वृषभाय कामानां वर्षित्र इंद्राय पातवे । पानार्थं पवत इति समन्वयः । किंच वृषणा सोमरससेचनसमर्थावध्वर्यू अध्वर्युप्रतिप्रस्थातारौ वृषभासो वर्षका अद्रयोऽभिषवग्रावाणश्च वृषणं स्वर्गादिफलस्य सेक्तारं सोमं वृषभाय देवानां श्रेष्ठाय तुभ्यं सुष्वति । सुन्वंति ॥ सुनोतेर्लटि बहुलं छंदसीति विकरणस्य श्लुः । अदभ्यस्तादिति झोऽदादेशः ॥

॥ इति द्वितीयस्य षष्ठे सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा ।
वृष्णो मदस्य वृषभ त्वमीशिष इंद्र सोमस्य वृषभस्य तृप्णुहि ॥ ६ ॥
वृषा । ते । वज्रः । उत । ते । वृषा । रथः । वृषणा । हरी इति । वृषभाणि । आयुधा ।
वृष्णः । मदस्य । वृषभ । त्वं । ईशिषे । इंद्र । सोमस्य । वृषभस्य । तृप्णुहि ॥ ६ ॥

वृषभ कामानां वर्षक हे इंद्र ते तव वज्रो वृषा कामवर्षकः । तथा ते रथोऽपि वृषा । ते हरी एतन्नामकावश्वौ वृषणा वर्षकौ । तवायुधा वज्रव्यतिरिक्तान्यायुधान्यपि वृषभाणि । वृष्णो वर्षकस्य मदस्य मदकरस्य सोमस्य त्वमेवेशिषे । स्वामी भवसि । हे इंद्र वृषभस्य वर्षकेण सोमस्य सोमेन तृप्णुहि । तृप्तो भव ॥ तृप प्रीणने स्वादिः ॥ क्षुभ्नादिषु । पा० ८. ४. ३९. । नृमनतृप्नोतीति पठितं । तथापि सर्वविधीनां छंदसि विकल्पितत्वाच्च णत्वप्रतिषेधो न भवति ॥

॥ अथ सप्तमी ॥

प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः ।
कुविन्नो अस्य वचसो निबोधिषदिंद्रमुत्सं न वसुनः सिचामहे ॥७॥
प्र । ते । नावं । न । समने । वचस्युवं । ब्रह्मणा । यामि । सवनेषु । दधृषिः ।
कुवित् । नः । अस्य । वचसः । निऽबोधिषत् । इंद्रं । उत्सं । न । वसुनः । सिचामहे ॥७॥

दाधृषिस्त्वत्प्रसादाच्छत्रूणां धर्षकोऽहं समने संग्रामे वचस्युवं ॥ अमि तन्वादित्वादुवङादेशः ॥ स्तोत्रमिच्छंतं नावं न नावमिवापद्भ्यस्तारकं ते त्वां सवनेषु त्रिषु ब्रह्मणा स्तोत्रेण प्रयामि । प्राप्नोमि । किंच अस्य वचसः स्तुतिलक्षणमेतद्वाक्यं कुविद्बहु निबोधिषत् । इंद्रो नितरां बुध्यतां ॥ बुध अवगमने । लेटि सिप् बहुलमिति सिप् । कुविद्योगादनिघातः । तिङि चोदात्तवतीति गतेर्निघातः ॥ वयं चोत्सं न जलस्य निधानभूतं कूपमिव वसुनो निधानभूतमिंद्रं सिचामहे । सोमेन सिंचामः ॥ सिचिर् क्षरणे स्वरितेत् । आगमानुशासनस्यानित्यत्वान्नुमभावः ॥

॥ अथाष्टमी ॥

पुरा संबाधादभ्या ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी ।
सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ॥८॥
पुरा । संऽबाधात् । अभि । आ । ववृत्स्व । नः । धेनुः । न । वत्सं । यवसस्य । पिप्युषी ।
सकृत् । सु । ते । सुमतिऽभिः । शतक्रतो इति शतऽक्रतो । सं । पत्नीभिः । न । वृषणः । नसीमहि ॥८॥

हे इंद्र संबाधात् शत्रुजन्यात्संबाधात् पुरा नोऽस्मानभ्याववृत्स्व । आवर्तय । यथा संबाधोऽस्मान् न स्पृशति तथा कुर्वित्यर्थः । तत्र दृष्टांतः । धेनुर्न वत्सं । यथा यवसस्य घासेन पिप्युषाप्यायिता धेनुर्वत्सं क्षुद्बाधात्परावर्तयति तद्वत् । हे शतक्रतो वयं सुमतिभिस्त्वद्विषयैः शोभनैः स्तोत्रैः सकृत् सकृदपि सु नसीमहि । सुष्ठु व्याप्येमहि । तत्र दृष्टांतः । वृषणो न । सेक्तारो युवानो यथा पत्नीभिर्व्याप्यंते तद्वत् ॥

॥ अथ नवमी ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥

नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥

नूनं सा त इति व्याख्याता ॥

॥ इति द्वितीयस्य षष्ठेऽष्टादशो वर्गः ॥

तदस्मा इति नवर्चं षष्ठं सूक्तं गार्त्समदमैंद्रं । अत्रानुक्रमणिका । तदस्मै द्वित्रिष्टुबंतमिति । अंत्ये द्वे त्रिष्टुभे शिष्टाः सप्त जगत्यः ॥ अतिरात्रे द्वितीये पर्यायेऽच्छावाकशस्त्रे तदस्मा इति सूक्तं । अतिरात्रे पर्यायाणामिति खंडे सूचितं । तदस्मै नव्यमस्य पिब यस्य जज्ञान इंद्रेति याज्या । आ० ६. ४. । इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

तदस्मै नव्यमंगिरस्वदर्चत शुष्मा यदस्य प्रत्नथोदीरते ।
विश्वा यद्गोत्रा सहसा परीवृता मदे सोमस्य दृंहितान्यैरयत् ॥ १ ॥

तत् । अस्मै । नव्यं । अंगिरस्वत् । अर्चत । शुष्माः । यत् । अस्य । प्रत्नऽथा । उत्ऽईरते ।
विश्वा । यत् । गोत्रा । सहसा । परिऽवृता । मदे । सोमस्य । दृंहितानि । ऐरयत् ॥ १ ॥

गृत्समदो ब्रूते । हे स्तोतारः नव्यं नवतरमन्येष्वदृष्टपूर्वं तत्तादृशं स्तोत्रमंगिरस्वदंगिरस इवास्मा इंद्रायार्चत । ब्रूत । यद्यस्माज्जातमात्रस्यास्येंद्रस्य शुष्माः शत्रूणां शोषकाणि तेजांसि प्रत्नथा ॥ प्रत्नपूर्वविश्वेमात्थाल् छंदसीतीवार्थे थाल्प्रत्ययः ॥ प्रत्नानि पुरातनानीवोदीरते । उद्गच्छंति ॥ ईर गतौ अनुदात्तेत् । तिङि चोदात्तवतीति गतेर्निघातः ॥ यद्यस्माच्च विश्वा सर्वान् गोत्रा मेघान् । गा उदकानि त्रायंते रक्षंतीति गोत्रा मेघाः । परीवृता वृत्रेणाक्रांतान् ॥ सर्वत्र सुपो डादेशः ॥ तान् दृंहितानि तेन दृढीकृतान् मेघान् सोमस्य मदे हर्षे संजाते सति सहसा बलेनैरयत् । उदघाटयत् । मेघभेदनेनापः प्रेरयामासेत्यर्थः । यद्वा विश्वा सर्वाणि परीवृता वलासुरेणाक्रांतानि दृंहितानि

पर्वतविले निरुद्धानि गोत्रा ॥ इनित्रकट्यचश्चेति समूहार्थे त्रप्रत्ययः ॥ गवां वृंदानि सहसैरयत्। तस्माद्विलान्निरगमयत्। तस्मादर्चतेति समन्वयः ॥ ऐरयत्। ईर गतौ। ण्यंतस्य लङि रूपं। यद्वृत्तयोगादनिघातः ॥

॥ अथ द्वितीया ॥

स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत्।

शूरो यो युत्सु तन्वं परिव्यत शीर्षणि द्यां महिना प्रत्यमुंचत ॥ २ ॥

सः। भूतु। यः। ह। प्रथमाय। धायसे। ओजः। मिमानः। महिमानं। आ। अतिरत्।

शूरः। यः। युत्ऽसु। तन्वं। परिऽव्यत। शीर्षणि। द्यां। महिना। प्रति। अमुंचत ॥ २ ॥

स इंद्रो भूतु। भवतु। वर्धतामित्यर्थः। य इंद्र ओजस्तेजो बलं मिमानः कुर्वाणः सन् प्रथमाय प्राथमिकाय धायसे ॥ धेट् पाने ॥ सोमपानाय महिमानमातिरत्। अवर्धयत् ॥ तिरतेर्व्यत्ययेन शः। यद्योगादनिघातः ॥ शूरः शत्रूणां शातयिता य इंद्रो युत्सु युद्धेषु तन्वं स्वकीयं शरीरं परिव्यत। कर्मणा परिवीतमकरोत्। स इंद्रो महिना स्वकीयेन महिम्ना शीर्षणि स्वशिरसि द्यां प्रत्यमुंचत। अधारयत् ॥

॥ अथ तृतीया ॥

अधाकृणोः प्रथमं वीर्यं महद्यदस्याग्रे ब्रह्मणा शुष्ममैरयः।

रथेष्ठेन हर्यश्वेन विच्युताः प्र जीरयः सिस्रते सध्र्यक् पृथक् ॥ ३ ॥

अध। अकृणोः। प्रथमं। वीर्यं। महत्। यत्। अस्य। अग्रे। ब्रह्मणा। शुष्मं। ऐरयः।

रथेऽस्थेन। हरिऽअश्वेन। विऽच्युताः। प्र। जीरयः। सिस्रते। सध्र्यक्। पृथक् ॥ ३ ॥

अध अपि च हे इंद्र त्वं प्रथमं मुख्यं तद्वीर्यं सामर्थ्यमकृणोः। अकरोः। किं तत्। ब्रह्मणा स्तोत्रेण स्तुतिसाधनभूतेन वेदवाक्येनास्य वीर्यस्य स्तोतुर्जनस्याग्रे पुरतो यच्छुष्मं शत्रूणां शोषकं बलमैरयः। उदगमयः। जीरयो जरयितारो बाधका असुरा रथेष्ठेन रथस्थितेन हर्यश्वेन त्वया विच्युताः स्वस्थानाच्च्याविताः संतः सध्र्यक् सध्रीचीनाः परस्परं संगताः पृथक् भीत्या वियुक्ताः संतः प्रसिस्रते। प्रकर्षेण धावंति ॥ सृ गतौ। जुहोत्यादिः। बहुलं छंदसीत्यभ्यासस्येत्वं ॥ सध्र्यगिति सहस्य सध्रिरिति सध्र्यादेशः। अद्रिसध्र्योरंतोदात्तत्वेन निपातनादुदात्तस्वरितयोरिति यणः स्वरितत्वं ॥

॥ अथ चतुर्थी ॥

अधा यो विश्वा भुवनाभि मज्मनेशानकृत्प्रवया अभ्यवर्धत ।
आद्रोदसी ज्योतिषा वह्निरातनोत्सीव्यन्तमांसि दुधिता समव्ययत् ॥ ४ ॥

अध । यः । विश्वा । भुवना । अभि । मज्मना । ईशानऽकृत् । प्रऽवयाः । अभि । अवर्धत ।
आत् । रोदसी इति । ज्योतिषा । वह्निः । आ । अतनोत् । सीव्यन् । तमांसि । दुधिता ।
सं । अव्ययत् ॥ ४ ॥

अध अपि च प्रवयाः प्रवृद्धान्नः पुरातनो वा य इंद्रो विश्वा भुवना सर्वान् लोकान् मज्मना बलेनाभिभूयेशानकृत् आत्मानं सर्वस्याधिपतिं कुर्वन् । यद्वा अग्न्यादीन्देवान् तत्तल्लोकाधिपतीन्कुर्वन् अभ्यवर्धत । सर्वतः प्रवृद्धोऽभवत् । आदनंतरं वह्निर्जगतां वोढा स इंद्रो ज्योतिषा स्वीयेन तेजसा रोदसी द्यावापृथिव्यावातनोत् । व्याप्नोत् । किंच तमांसि तमोरूपाणि रक्षांसि दुधिता दुःस्थितानि दुर्गतानि सीव्यन् विस्तारयन् समव्ययत् । आवृणोत् । जगद्व्याप्य वर्तत इत्यर्थः ॥

॥ अथ पंचमी ॥

स प्राचीनान्पर्वताँ दृंहदोजसाधराचीनमकृणोदपामपः ।
अधारयत्पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः ॥ ५ ॥

सः । प्राचीनान् । पर्वतान् । दृंहत् । ओजसा । अधराचीनं । अकृणोत् । अपां । अपः ।
अधारयत् । पृथिवीं । विश्वऽधायसं । अस्तभ्नात् । मायया । द्यां । अवऽस्रसः ॥ ५ ॥

स इंद्रः प्राचीनान् इतस्ततः प्रकर्षेणांचतो गच्छतः सपक्षान् पर्वतान् ओजसा बलेन दृंहत् । पक्षच्छेदं कृत्वा भूमौ दृढीचकार । अचलानकरोदित्यर्थः । अपां मेघस्थितानामुदकानामपः स्यंदनलक्षणं कर्माधराचीनं । अधःप्रदेशमंचति गच्छतीत्यधराचीनं । तादृशमकृणोत् । मेघभेदनं कृत्वापो भूमावपातयदित्यर्थः । किंच विश्वधायसं विश्वस्य धात्रीं पृथिवीं बलेनाधारयत् । मायया प्रज्ञयोपायेन द्यां द्युलोकमवस्रसः ॥ स्रंसु गतौ । संपदादिलक्षणो भावे क्विप् ॥ अवपतनादस्तभ्नात् ॥

॥ इति द्वितीयस्य षष्ठ एकोनविंशो वर्गः ॥

॥ अथ षष्ठी ॥

सास्मा अरं बाहुभ्यां यं पिताकृणोद्विश्वस्मादा जनुषो वेदसस्परि ।
येना पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्व्यवृणक्तुविष्वणिः ॥ ६ ॥

सः। अस्मै। अरं। बाहुऽभ्यां। यं। पिता। अकृणोत्। विश्वस्मात्। आ। जनुषः। वेदसः। परि।
येन। पृथिव्यां। नि। क्रिविं। शयध्यै। वज्रेण। हत्वी। अवृणक्। तुविऽस्वनिः ॥ ६ ॥

स तादृश इंद्रोऽस्मै जगतेऽरमलं पर्याप्तो बभूव। रक्षकत्वेन स्वामी बभूवेत्यर्थः। पिता सर्वस्य पालकः प्रजापतिर्विश्वस्मात्सर्वस्माज्जनुषो जनात् परि ततोऽप्युत्कृष्टाद्वेदसो ज्ञानात् तद्विशिष्टं बाहुभ्यां स्वकीयाभ्यां बाहुभ्यां यमाकृणोत्। तुविष्वणिर्बहुकीर्त्तिर्महास्वनो वा स इंद्रो येन ज्ञानेन क्रिविमेतन्नामानमसुरं वज्रेण हत्वी ॥ स्नात्व्यादयश्चेति त्वी ॥ हत्वा ताडयित्वा पृथिव्यां शयध्यै शयनाय दीर्घनिद्रायै न्यवृणक् ॥ वृणक्तिर्हिंसाकर्मा ॥ न्यवधीत् ॥

॥ अथ सप्तमी ॥

अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगं ।
कृधि प्रकेतमुप मास्या भर दद्धि भागं तन्वो३ येन मामहः ॥ ७ ॥

अमाजूःऽइव। पित्रोः। सचा। सती। समानात्। आ। सदसः। त्वां। इये। भगं।
कृधि। प्रऽकेतं। उप। मासि। आ। भर। दद्धि। भागं। तन्वः। येन। ममहः ॥ ७ ॥

हे इंद्र अमाजूर्यावज्जीवं गृह एव जीर्यंती पित्रोः सचा मातापितृभ्यां सह भवंती तयोः शुश्रूषणपरा पतिमलभमाना सती दुहिता समानादात्मनः पित्रोश्च साधारणात्सदसो गृहात् ॥ अधिकरणे चोपसंख्यानमिति पंचमी ॥ गृह उपस्थायैव यथा भागं याचति तथा स्तोताहं भगं भजनीयं धनं त्वामिये ॥ ई गत्यादिषु। लिट्युत्तम इति व्यत्ययेनात्मनेपदं। इयङादेशः ॥ त्वां याचे। तच्च देयं धनं प्रकेतं प्रकर्षेण ज्ञातव्यं विश्वजनीयं कृधि। कुरु। तच्चोपमासि। एतावदिदं धनमिति कुरु। आभार। तच्च धनं संपादय। भागं भजनीयं धनं तन्वः शरीराय मह्यमिति यावत् दद्धि। देहि। येन धनेन ममहः। स्तोतृनिमान् आ पूजयसि ॥

॥ अथाष्टमी ॥

भोजं त्वामिंद्र वयं हुवेम ददिष्ट्वमिंद्रापांसि वाजान्।

अविड्ढींद्र चित्रया न ऊती कृधि वृषन्निंद्र वस्यसो नः ॥ ८ ॥

भोजं। त्वां। इंद्र। वयं। हुवेम। ददिः। त्वं। इंद्र। अपांसि। वाजान्।

अविड्ढि। इंद्र। चित्रया। नः। ऊती। कृधि। वृषन्। इंद्र। वस्यसः। नः ॥ ८ ॥

हे इंद्र भोजं पालयितारं भोजयितारं वा त्वां वयं हुवेम॥ ह्वयतेर्लिङि बहुलं छंदसीति संप्रसारणं ॥ हे इंद्र त्वमपांसि कर्माणि वाजानन्नानि ददिः ॥ दाण् दाने। आदृगमहनजन इति किप्रत्ययः। लिड्वद्भावादभ्यासादिकार्यं। न लोकाव्ययनिष्ठेति षष्ठीप्रतिषेधः॥ दाता खलु। हे इंद्र चित्रया नानाप्रकारयोती ऊत्या पालनेन नोऽस्मानविड्ढि। रक्ष। वृषन् कामानां वर्षक हे इंद्र नोऽस्मान्वस्यसोऽतिशयेन वसुमतः कृधि। कुरु॥

॥ अथ नवमी ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी।

शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥

नूनं। सा। ते। प्रति। वरं। जरित्रे। दुहीयत्। इंद्र। दक्षिणा। मघोनी।

शिक्ष। स्तोतृऽभ्यः। मा। अति। धक्। भगः। नः। बृहत्। वदेम। विदथे। सुवीराः ॥ ९ ॥

नूनं सा त इति व्याख्याता ॥

॥ इति द्वितीयस्य षष्ठे विंशो वर्गः ॥

प्राता रथ इति नवर्चं सप्तमं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं। प्रातरित्यनुक्रांतं। लैंगिको विनियोगः ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः।

दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत् ॥ १ ॥

प्रातरिति। रथः। नवः। योजि। सस्निः। चतुःऽयुगः। त्रिऽकशः। सप्तऽरश्मिः।

दशऽअरित्रः। मनुष्यः। स्वःऽसाः। सः। इष्टिऽभिः। मतिऽभिः। रंह्यः। भूत् ॥ १ ॥

रथो रंहणाद्रथो यज्ञः । स च नवः । नूयते स्तूयतेऽचेति नवः स्तुतिमान् । सस्निः ॥ स्ना शौचे । आदृगमहनेति किन्प्रत्ययः ॥ शुद्धः । एवंविधो यज्ञः प्रातः प्रातःकाले योजि । अयोज्यस्माभिः । चतुर्युगः । युज्यंत इति युगानि ग्रावाणः । चत्वारि युगानि यस्य स तथोक्तः । अध्वर्य्वाद्यृत्विगभिप्रायं वा । त्रिकशः । तिस्रः कशा वाचो मंद्रमध्यमोत्कृष्टरूपा यस्य स तथोक्तः । सवनत्रयाभिप्रायं वा । सप्तरश्मिः । अश्नुवते व्याप्नुवंति कर्माणीति रश्मयश्छंदांसि । सप्तसंख्याकानि गायत्र्यादीनि छंदांसि यस्य स तथोक्तः । दशारित्रः । अरिभ्यः पापेभ्यस्त्रायंत इत्यरित्रा ग्रहाः । दशसंख्याका ग्रहा यस्य स तादृशः । चमसाध्वर्य्वभिप्रायं वा । मनुष्यो मनुष्याणां हितः । स्वर्षाः स्वर्गस्य दाता । एवंविधो यज्ञ इष्टिभिः प्रायणीयातिथ्यादिभिर्मतिभिर्मननीयैः स्तोत्रै रंह्यः शब्दनीयो भूत् । अभूत् । यद्वा नवोऽभिनवः सस्निः ॥ सनोतेर्द्विवचनादि ॥ कामानां दाता रथो ॥ रमंतेऽस्मिन्निति रथः स्यंदनः प्रातःसवने च सोमपानार्थं योजि । अश्वैरयोजि । कीदृशः । चतुर्युगः त्रिकशः । तिस्रः कशा यस्य स तथोक्तः । सप्तरश्मिः सप्तरज्जुः । दशारित्रो दशचक्रः । मनुष्यो मनुष्यहितः स्वर्षाः स्वर्गस्य संगमयितेंद्ररथ इष्टिभिर्यागैर्मतिभिः स्तोत्रैश्च व्याप्तव्यो भवति ॥

॥ अथ द्वितीया ॥

सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता ।
अन्यस्या गर्भमन्य ऊं जनंत सो अन्येभिः सचते जेन्यो वृषा ॥ २ ॥
सः । अस्मै । अरं । प्रथमं । सः । द्वितीयं । उतो इति । तृतीयं । मनुषः । सः । होता ।
अन्यस्याः । गर्भं । अन्ये । ऊं इति । जनंत । सः । अन्येभिः । सचते । जेन्यः । वृषा ॥ २ ॥

स यज्ञः सोमो वास्मा इंद्राय प्रथमं प्रातःसवनेऽरं । पर्याप्तोऽभूत् । स च द्वितीयं माध्यंदिने सवने पर्याप्तोऽभूत् । उतो अपि च स तृतीयं तृतीये सवने पर्याप्तोऽभूत् ॥ सर्वत्र कालाध्वनोरिति द्वितीया ॥ स यज्ञः सोमो वा मनुषो मनुष्यस्य होता शुभानां वोढा भवति । किंच अन्ये ऋत्विजोऽन्यस्याः पृथिव्या वेदात्मिकाया वाचो वा गर्भं संतं सोमं यज्ञं वा जनंत । अजनयंत ॥ उ प्रसिद्ध्यर्थः ॥ वृषाभिमतफलवर्षको जेन्यो जयसमर्थः स यज्ञः सोमो वान्येभिरन्यैरिंद्रादिभिर्देवैः सचते । संगच्छते ॥ सच समवाये । अनुदात्तेत् ॥

॥ अथ तृतीया ॥

हरी नु कं रथ इंद्रस्य योजमायै सूक्तेन वचसा नवेन ।
मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्यजमानासो अन्ये ॥ ३ ॥
हरी इति । नु । कं । रथे । इंद्रस्य । योजं । आऽयै । सुऽउक्तेन । वचसा । नवेन ।
मो इति । सु । त्वां । अत्र । बहवः । हि । विप्राः । नि । रीरमन् । यजमानासः । अन्ये ॥ ३ ॥

इंद्रस्य संबंधिनि रथे हरी एतन्नामकावश्वौ नु क्षिप्रं कं सुखेनायै गमनाय नवेनान्यैरकृतपूर्वेण वचसा वेदात्मकेन सूक्तेन साधनेन योजं । युनज्मि ॥ युजिर् योगे । लुङि इरितो वेति च्लेरङादेशः ॥ अत्रास्मिन्यज्ञे बहवो विप्रा मेधाविनः स्तोतारो भवंति हि । तथाप्यन्ये मद्व्यतिरिक्ता यजमानासो यजमानास्त्वां सु सुष्ठु मो निरीरमन् । नितरां मा रमयंतु । अतोऽस्मदीयं यज्ञमागत्य सोमं पिबेति भावः ॥ रीरमन् । रमतेर्ण्यंतस्य लुङि चङि सन्वद्भावादभ्यासस्येत्वदीर्घौ । वाक्यभेदादत्र हियोगाभावेन निघातः ॥

॥ अथ चतुर्थी ॥

आ द्वाभ्यां हरिभ्यामिंद्र याह्या चतुर्भिरा षड्भिर्हूयमानः ।
आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥ ४ ॥
आ । द्वाभ्यां । हरिऽभ्यां । इंद्र । याहि । आ । चतुःऽभिः । आ । षट्ऽभिः । हूयमानः ।
आ । अष्टाभिः । दशऽभिः । सोमऽपेयं । अयं । सुतः । सुऽमख । मा । मृधः । करिति कः ॥ ४ ॥

हे इंद्र होतृभिराहूयमानस्त्वं द्वाभ्यां हरिभ्यामश्वाभ्यामिमं यज्ञं प्रति सोमपानार्थमायाहि । चतुर्भिर्हरिभिरायाहि । तथा षड्भिरागच्छ सोमपेयं ॥ पा पाने । कर्मण्यचो यत् । ईद्यतीतीत्वं ॥ पातव्यं सोमं प्रत्यष्टाभिरश्वैरायाहि ॥ अष्टनो दीर्घात् । आ० ६. १. १७२. । इति विभक्तेरुदात्तत्वं ॥ दशभिर्हरिभिरागच्छ । सुमख सुयज्ञ सुधन वा हे इंद्र अयं सोमस्त्वदर्थमभिषुतः । अतो यज्ञस्य मृधो हिंसा मा कः । मा कार्षीः ॥ करोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक् । गुणे कृते हल्ङ्यादिना सिपो लोपः ॥ यद्यपींद्रस्य द्वावेव हरी तथापि तयोर्विभूतिभेदान्नानात्वं । अतोऽश्वबहुत्वमविरुद्धं ॥

॥ अथ पंचमी ॥

आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिंशता हरिभिर्युजानः ।
आ पंचाशता सुरथेभिरिंद्रा षष्ट्या सप्तत्या सोमपेयं ॥५॥

आ। विंशत्या। त्रिंशता। याहि। अर्वाङ्। आ। चत्वारिंशता। हरिऽभिः। युजानः।
आ। पंचाशता। सुऽरथेभिः। इंद्र। आ। षष्ट्या। सप्तत्या। सोमऽपेयं ॥५॥

हे इंद्र सोमपेयं पातव्यं सोमं प्रत्यर्वाङ् अस्मदभिमुखः सन् विंशत्या विंशतिसंख्याकैरश्वैरायाहि । त्रिंशता त्रिंशत्संख्याकैर्हरिभिरागच्छ । चत्वारिंशता चत्वारिंशत्संख्याकैर्हरिभिर्युजानो युज्यमानस्त्वं सोमपानं प्रत्यायाहि सुरथेभिः सुरहणैः सुगमनैः पंचाशता हरिभिरायाहि । तथा षष्ट्या षष्टिसंख्याकैर्हरिभिः सप्तत्या एतत्संख्याकैर्हरिभिः सोमपानं प्रत्यागच्छ ॥

॥ इति द्वितीयस्य षष्ठ एकविंशो वर्गः ॥

॥ अथ षष्ठी ॥

आशीत्या नवत्या याह्यर्वाङा शतेन हरिभिरुह्यमानः ।
अयं हि ते शुनहोत्रेषु सोम इंद्र त्वाया परिषिक्तो मदाय ॥६॥

आ। अशीत्या। नवत्या। याहि। अर्वाङ्। आ। शतेन। हरिऽभिः। उह्यमानः।
अयं। हि। ते। शुनऽहोत्रेषु। सोमः। इंद्र। त्वाऽया। परिऽसिक्तः। मदाय ॥६॥

अशीत्याशीतिसंख्याकैरश्वैः सोमपानार्थमर्वाङ् अस्मदभिमुखः सन् आयाहि । नवत्या एतत्संख्याकैरश्वैरागच्छ । शतेन शतसंख्याकैर्हरिभिरुह्यमानो धार्यमाणस्त्वमायाहि । हे इंद्र हि यस्मात्ते मदाय हर्षाय शुनहोत्रेषु । सुखेन हूयते सोमो येभिरिति शुनहोत्राः पात्रविशेषाः । तेष्वयं सोमस्त्वाया त्वत्कामनया परिषिक्तः ॥

॥ अथ सप्तमी ॥

मम ब्रह्मेंद्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य ।
पुरुत्रा हि विहव्यो बभूथास्मिञ्छूर सवने मादयस्व ॥७॥

मम। ब्रह्म। इंद्र। याहि। अच्छ। विश्वा। हरी इति। धुरि। धिष्व। रथस्य।
पुरुऽत्रा। हि। विऽहव्यः। बभूथ। अस्मिन्। शूर। सवने। मादयस्व ॥७॥

हे इंद्र मम ब्रह्मास्मदीयामेव स्तुतिमच्छाभिलक्ष्य याहि। विश्वा व्याप्नौ हरी रथस्य धुरि युगप्रांते धिष्व। संयोजय। पुरुत्रा पुरुभिर्बहुभिर्यजमानैस्त्वं विहव्यो विविधं ह्वातव्यो बभूथ। बभूविथ॥ बभूथाततंथ जगृभ्म ववर्थेति निपातनादिडभावः॥ हे शूर अस्मिन्सवने यज्ञे मादयस्व। सोमपानेन हृष्टो भव॥

॥ अथाष्टमी ॥

न म॒ इंद्रे॑ण स॒ख्यं वि यो॑षद॒स्मभ्य॑मस्य॒ दक्षि॑णा दुहीत।
उप॑ ज्येष्ठे॒ वरू॑थे॒ गभ॑स्तौ प्रा॒येप्रा॑ये जिगी॒वांस॑ः स्याम॥८॥
न। मे॒। इंद्रे॑ण। स॒ख्यं। वि। यो॒ष॒त्। अ॒स्मभ्यं॑। अ॒स्य॒। दक्षि॑णा। दु॒ही॒त॒।
उप॑। ज्येष्ठे॑। वरू॑थे। गभ॑स्तौ। प्रा॒येऽप्रा॑ये। जि॒गी॒वांस॑ः। स्या॒म॒॥८॥

इंद्रेण सह मे मम सख्यं यष्टव्यं यष्टव्यलक्षणं सख्यं न वि योषत्। कदाचिदपि न वियुज्यतां॥ यौतेर्लेटि सिबहुलमिति सिप्। अडागमः॥ अस्येंद्रस्य दक्षिणेंद्रकर्तृकं दानमस्मभ्यं दुहीत। अभिमतफलं दुग्धां॥ दुहेर्लिङि रूपं॥ ज्येष्ठेऽतिशयेन प्रशस्ये वरूथ आपदां वारके वरणीये वा गभस्तौ बाहावुप समीपे वर्तिनः स्याम। इंद्रस्य हस्तस्पर्शयोग्या भवेमेत्यर्थः। किंच प्राये प्राये सोमपानार्थमिंद्रस्य यज्ञशालायां प्रवेशे प्रवेशे जिगीवांसः शत्रूणां जेतारो भवेम। यद्वा प्राये प्राये। प्रकर्षेणेयते गम्यते योद्धृभिरिति प्रायं युद्धं। तस्मिन्युद्धे जिगीवांसः शत्रून् जितवंतो भवेम॥

॥ अथ नवमी ॥

नू॒नं सा ते॒ प्रति॒ वरं॑ जरि॒त्रे दु॑ही॒यदिं॑द्र॒ दक्षि॑णा म॒घोनी॑।
शिक्षा॑ स्तो॒तृभ्यो॒ माति॑ ध॒ग्भगो॑ नो बृ॒हद्व॑देम वि॒दथे॑ सु॒वीरा॑ः॥९॥
नू॒नं। सा। ते॒। प्रति॑। वरं॑। ज॒रि॒त्रे। दु॒ही॒यत्। इं॒द्र॒। दक्षि॑णा। म॒घोनी॑।
शिक्ष॑। स्तो॒तृऽभ्यः॑। मा। अति॑। ध॒क्। भगः॑। न॒ः। बृ॒ह॒त्। व॒दे॒म॒। वि॒दथे॑। सु॒वीरा॑ः॥९॥

नूनं सा त इति व्याख्याता॥

॥ इति द्वितीयस्य षष्ठे द्वाविंशो वर्गः॥

अपाय्यस्येति नवर्चमष्टमं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं। अपायीत्यनुक्रांतं। लैंगिकः सूक्तविनियोगः। द्वितीये पर्याये होतृशस्त्रयाज्यापायीत्येषा। आ० ६. ४.॥

॥ सैषा सूक्ते प्रथमा ॥

अपाय्यस्यांधसो मदाय मनीषिणः सुवानस्य प्रयसः ।
यस्मिन्निंद्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यंतश्च नरः ॥ १ ॥
अपायि । अस्य । अंधसः । मदाय । मनीषिणः । सुवानस्य । प्रयसः ।
यस्मिन् । इंद्रः । प्रऽदिवि । ववृधानः । ओकः । दधे । ब्रह्मण्यंतः । च । नरः ॥ १ ॥

सुवानस्य सोमाभिषवं कुर्वाणस्य मनीषिणः प्राज्ञस्य यजमानस्य संबंधिनः प्रयसः ॥ प्रीङ् तर्पणे । असुन् ॥ प्रीतिकरस्यास्य सोमलक्षणस्यांधसो मदायापायि । एतदन्नमिंद्रेण पीतमित्यर्थः ॥ यद्वा अपायीति पातेर्व्यत्ययो बहुलमिति चिण् कर्तरि भवति । छंदसि लुङ्लङ्लिट इति लोडर्थे लुङ् ॥ प्रीतिकरस्यांधसो मदायापायि ॥ शेषविवक्षया कर्मणि षष्ठी ॥ इंद्रः सोमं पिबतु । प्रदिवि पुराणे यस्मिन्सोमलक्षणेऽधसि वावृधानो वर्धमान इंद्र ओको दधे । सेव्यतया निवासं चकार । किंच ब्रह्मण्यंत इंद्राय स्तोत्रमिच्छंतो नरः कर्मणां नेतार ऋत्विजो यस्मिन्निवासं दधिरे । तदेतदपायीति पूर्वेणान्वयः ॥

॥ अथ द्वितीया ॥

अस्य मंदानो मध्वो वज्रहस्तोऽहिमिंद्रो अर्णोवृतं वि वृश्चत् ।
प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमंत ॥ २ ॥
अस्य । मंदानः । मध्वः । वज्रऽहस्तः । अहिं । इंद्रः । अर्णःऽवृतं । वि । वृश्चत् ।
प्र । यत् । वयः । न । स्वसराणि । अच्छ । प्रयांसि । च । नदीनां । चक्रमंत ॥ २ ॥

अस्य मध्वः ॥ तृतीयार्थे षष्ठी ॥ अनेन मदकरेण सोमेन मंदानो हृष्यन् वज्रहस्तो वज्रयुक्तो हस्तो यस्य स इंद्रोऽर्णोवृतमुदकस्यावरकमुदकेनावृतं वाहिं वृत्रं मेघं वा विवृश्चत् । विशेषेणाच्छिनत् ॥ ओव्रश्चू छेदने । तौदादिकः । लङि ग्रहिज्यादिना संप्रसारणं ॥ यद्यदाहिभेदने जाते नदीनां प्रयांसि प्रीणयितॄणि जलान्यच्छ समुद्रमभिलक्ष्य प्रचक्रमंत । गंतुमुपाक्रमन् । तत्र दृष्टांतः । वयो न । यथा पक्षिणः स्वसराणि । सुष्ठु अर्यंते प्राप्यंत इति स्वराणि स्वसराणि कुलायाः । तानभिलक्ष्य गच्छंति तद्वत् ॥

॥ अथ तृतीया ॥

स माहिन इंद्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रं ।
अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत् ॥३॥

सः । माहिनः । इंद्रः । अर्णः । अपां । प्र । ऐरयत् । अहिऽहा । अच्छ । समुद्रं ।
अजनयत् । सूर्यं । विदत् । गाः । अक्तुना । अह्नां । वयुनानि । साधत् ॥३॥

माहिनो महनीयः पूजनीयो यद्वा महिमोपेतः । अहिहाहिं मेघं हतवानिंद्रः ॥ ब्रह्मभ्रूणवृत्रेषु क्विप् । बहुलं छंदसीति भूतकाले क्विप् ॥ स इंद्रोऽपामर्णः ॥ ऋ गतौ ॥ स्रोतोलक्षणं प्रवाहं समुद्रमच्छाभिलक्ष्य प्रैरयत् । किंच स इंद्रोऽगिरसां विलांतर्वर्तिनामावृतानां गवां लाभाय सूर्यमजनयत् । ततो गाः पणिभिरपहृता गा विदत् । अलभत ॥ विदिर् लाभे । लुङीरितो वेति च्लेरङादेशः । वाक्यभेदादनिघातः ॥ तथाक्तुना तेजसाह्नां दिवसानां वयुनानि प्रज्ञानानि प्रकाशान् साधत् । असाधयत् ॥

॥ अथ चतुर्थी ॥

सो अप्रतीनि मनवे पुरूणींद्रो दाशद्दाशुषे हंति वृत्रं ।
सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य सातौ ॥४॥

सः । अप्रतीनि । मनवे । पुरूणि । इंद्रः । दाशत् । दाशुषे । हंति । वृत्रं ।
सद्यः । यः । नृऽभ्यः । अतसाय्यः । भूत् । पस्पृधानेभ्यः । सूर्यस्य । सातौ ॥४॥

स इंद्रो दाशुषे हविर्दत्तवते मनवे मनुष्याय यजमानाय पुरूणि बहून्यप्रतीन्युत्कृष्टानि धनानि दाशत् । ददाति । किंच वृत्रमसुरं हंति । कीदृशः । य इंद्रः सूर्यस्य सातौ । सातिः संभजनं । सूर्यसंभजनविषये भूते पस्पृधानेभ्यः अहमेव प्रथमं सूर्यं प्राप्नुयामहमेव प्रथमं सूर्यं प्राप्नुयामिति स्पर्धमानेभ्यः स्तोतृभ्यः सद्यस्तदानीमेवातसाय्यस्तत्प्राप्तिहेतुभूतः सन् समाश्रयणीयो भूत् । अभूत् । यद्वा सूर्यस्य सातौ ॥ षोऽंतकर्मणि । अधिकरणे क्तिन् ॥ सूर्यस्य संबंधिनि युद्धे पस्पृधानेभ्यः सूर्येण सह स्पर्धमानेभ्योऽतसाय्योऽभूत् ॥

॥ अथ पंचमी ॥

स सुन्वत इंद्रः सूर्यमा देवो रिणङ्मर्त्याय स्तवान्।
आ यद्रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन् ॥ ५ ॥
सः। सुन्वते। इंद्रः। सूर्यं। आ। देवः। रिणक्। मर्त्याय। स्तवान्।
आ। यत्। रयिं। गुहत्ऽअवद्यं। अस्मै। भरत्। अंशं। न। एतशः। दशस्यन् ॥ ५ ॥

स्तवान् एतशेन स्तूयमानो देवो द्योतमानः स इंद्रः सुन्वते सोमाभिषवं कुर्वते मर्त्याय मनुष्यायैतशाय सूर्यमारिणक्। एतशेन स्पर्धमानं सूर्यं बलेनारेचयत्। तथा च निगमः। प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिंद्र इति। यद्यस्मादेतशः सौवश्व्यो राजा दशस्यन् यजमानोऽस्मा इंद्राय गुहदवद्यं प्रच्छन्नावद्यं रयिं सोमरूपमभरत्। संपादयामास। तत्र दृष्टांतः। अंशं न। यथा पितांशं भागं पुत्राय भरति तद्वत् ॥

॥ इति द्वितीयस्य षष्ठे त्रयोविंशो वर्गः ॥

॥ अथ षष्ठी ॥

स रंधयत्सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय।
दिवोदासाय नवतिं च नवेंद्रः पुरो व्यैरच्छंबरस्य ॥ ६ ॥
सः। रंधयत्। सऽदिवः। सारथये। शुष्णं। अशुषं। कुयवं। कुत्साय।
दिवःऽदासाय। नवतिं। च। नव। इंद्रः। पुरः। वि। ऐरत्। शंबरस्य ॥ ६ ॥

सदिवो दीप्तियुक्तः स इंद्रः सारथय आत्मनः सारथ्यं कुर्वते कुत्साय राजर्षये शुष्णं। शोषयति सर्वमिति शुष्णः कश्चिदसुरः। तमशुषं न केनापि शोषणीयमेतन्नामानमसुरं रंधयत्॥ रध्यतिर्वशगमने॥ वशमनयत्॥ यद्वा रध हिंसासंराद्ध्योरित्यस्य एयंतस्य रधिजभोरचीति नुम्॥ अवधीत्। किंच स इंद्रो दिवोदासायैतन्नामकाय राज्ञे शंबरस्यासुरस्य नव नवतिं पुरो व्यैरत्। विदारितवान् ॥

॥ अथ सप्तमी ॥

एवा त इंद्रोचथमहेम श्रवस्या न त्मना वाजयंतः।
अश्याम तत्साप्तमाशुषाणा ननमो वधरदेवस्य पीयोः ॥ ७ ॥

एव। ते। इंद्र। उचथं। अहेम। श्रवस्या। न। त्मना। वाजयंतः।
अश्याम। तत्। साप्तं। आशुषाणाः। ननमः। वधः। अदेवस्य। पीयोः ॥ ७ ॥

हे इंद्र श्रवस्या ॥ सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घः ॥ अन्नेच्छया वाजयंतस्त्वां बलिनं कुर्वंतः । यद्वा श्रवस्या यशःकामनया वाजयंतोऽन्नमिच्छंतः ॥ इच्छायामपि णिच् दृश्यते । अश्वायंतो गव्यंतो वाजयंत इति क्यजंतत्वे चित्प्रातिपदिकस्यांतोदात्तत्वं स्यात् वाजयंतः शतक्रतुमिति यथा ॥ तादृशा वयं ते तुभ्यमेवोचथं स्तोत्रं त्मना आत्मना स्वयमेव नाहेम । इदानीं प्रापयेम ॥ अहि गतौ । न संप्रत्यर्थे ॥ आशुषाणाः ॥ अश्नोतेः कानचि व्यत्ययो बहुलमिति लिट्यपि विकरणद्वय उप्रत्ययः स च ॥ त्वामश्नुवाना वयं यदभिलषितं तत्साप्तं सप्तपुरुषसंबंधि साप्तपदीनं सख्यमश्याम । व्याप्नुयाम । अदेवस्य देवानिंद्रादीनजानतः पीयोः ॥ पीयतिर्हिंसाकर्मा ॥ हिंसकस्यासुरस्य वधः ॥ वध्यंते शत्रवोऽनेनेति वधरायुधं ॥ ननमः । तद्धो नमय ॥ ननमः । णमु प्रह्वत्वे । ण्यंतस्य लुङि चङि रूपं । मितां ह्रस्व इति ह्रस्वः ॥

॥ अथाष्टमी ॥

एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः ।
ब्रह्मण्यंत इंद्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः ॥ ८ ॥
एव। ते। गृत्सऽमदाः। शूर। मन्म। अवस्यवः। न। वयुनानि। तक्षुः।
ब्रह्मण्यंतः। इंद्र। ते। नवीयः। इषं। ऊर्जं। सुऽक्षितिं। सुम्नं। अश्युः ॥ ८ ॥

शूर बलवन् हे इंद्र ते तुभ्यं गृत्समदाः । अत्र यास्कः । गृत्समदो गृत्समदनो गृत्स इति मेधाविनाम गृणातेः स्तुतिकर्मणः । नि० ९. ५. । इति । तथाविधा मन्म मननीयं स्तोत्रं ते तुभ्यमेव तक्षुः । ततक्षुः । चक्रुः । तत्र दृष्टांतः । अवस्यवो न ॥ अवः । गत्यर्थादवतेरसुनि रूपमव इति ॥ अवो गमनमिच्छंतः पुमांसो वयुनानि मार्गान् यथा कुर्वंति तद्वत् । किंच नवीयः ॥ सुपां सुलुगिति षष्ठ्या लुक् ॥ नवीयसो नवतरस्य ते तव ब्रह्मण्यंतः स्तोत्रं कर्तुमिच्छंतो गृत्समदाः सुक्षितिमिषं शोभननिवासोपेतमन्नमूर्जं बलं सुम्नं सुखं चाश्युः । प्राप्नुयुः । एकस्मिन् गृत्समदे बहुवचनं परोक्षनिर्देशश्च ॥

॥ अथ नवमी ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥
नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥

नूनं सा त इति सिद्धार्थेति ॥

॥ इति द्वितीयस्य षष्ठे चतुर्विंशो वर्गः ॥

वयं ते वय इति नवर्चं नवमं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं । वयं त इत्यनुक्रांतं । सूक्तविनियोगो लिंगादवधार्यतां ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

वयं ते वय इंद्र विद्धि षु णः प्र भरामहे वाजयुर्न रथं ।
विपन्यवो दीध्यतो मनीषा सुम्नमियक्षंतस्त्वावतो नॄन् ॥ १ ॥
वयं । ते । वयः । इंद्र । विद्धि । सु । नः । प्र । भरामहे । वाजऽयुः । न । रथं ।
विपन्यवः । दीध्यतः । मनीषा । सुम्नं । इयक्षंतः । त्वाऽवतः । नॄन् ॥ १ ॥

हे इंद्र ते तुभ्यं वयं वयः सोमलक्षणमन्नं प्रभरामहे । प्रकर्षेण संपादयामः । तत्र दृष्टांतः । वाजयुर्न । यथान्नमात्मन इच्छन् पुमान् रथं शकटं संपादयति तद्वत् । एवं हविःसंपादकान् नोऽस्मान् सु सुष्ठु विद्धि । जानीहि ॥ विदेर्ज्ञानार्थस्य लोटि रूपं । वाक्यादित्वादनिघातः ॥ किं कुर्वंतो वयं । विपन्यवः । तव स्तोत्रं कुर्वाणाः । मनीषा मनस इषया स्तुत्या दीध्यतो दीप्यमानाः ॥ दीधीङ् दीप्तिदेवनयोः । व्यत्ययेन शतृ ॥ त्वावतः ॥ युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप् ॥ त्वत्सदृशान् नॄन् नेतॄन् अग्न्यादीन् सुम्नं सुखमियक्षंतः । याचमानाः । यद्वा सुम्नं सुखेन नॄन् नेतॄन् अग्न्यादीन्देवानियक्षंतः ॥ इयक्षतिर्गतिकर्मा ॥ हविषा तान् प्राप्नुवंतो वयं भरामह इति समन्वयः ॥

॥ अथ द्वितीया ॥

त्वं न इंद्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान् ।

त्वमिनो दाशुषो वरूतेत्थाधीरभि यो नक्षति त्वा ॥ २ ॥

त्वं । नः । इंद्र । त्वाभिः । ऊती । त्वाऽयतः । अभिष्टिऽपा । असि । जनान् ।

त्वं । इनः । दाशुषः । वरूता । इत्थाऽधीः । अभि । यः । नक्षति । त्वा ॥ २ ॥

हे इंद्र त्वं ताभिस्त्वदीयाभिरूती ऊतिभिः पालनादिभिर्नोऽस्मान् पाहि । किंच त्वायतः ॥ सुप आत्मनः क्यच् । शतुरनुम इति विभक्तेरुदात्तत्वं ॥ त्वत्कामान् जनान् अभिष्टिपा ॥ सुपां सुलुगिति सोराकारः ॥ अभिष्टयोऽभिगंतारः शत्रवः । तेभ्यः पाता रक्षकोऽसि । भवसि । दाशुषो हविर्दत्तवतो यजमानस्य त्वमिनः । ईश्वरः खलु । वरूता ॥ ग्रसितस्कभितस्तभितेति निपातनादीकारस्य ऊकारः ॥ बाधकानां निवारकोऽसि । किंच त्वं तस्य स्तोतुरित्थाधीरेवंविधोपद्रवोपशमरूपकर्मासि । यस्त्वा त्वामभिनक्षति हविषा परिचरति ॥

॥ अथ तृतीया ॥

स नो युवेंद्रो जोहूत्रः सखा शिवो नरामस्तु पाता ।

यः शंसंतं यः शशमानमूती पचंतं च स्तुवंतं च प्रणेषत् ॥ ३ ॥

सः । नः । युवा । इंद्रः । जोहूत्रः । सखा । शिवः । नरां । अस्तु । पाता ।

यः । शंसंतं । यः । शशमानं । ऊती । पचंतं । च । स्तुवंतं । च । प्रऽनेषत् ॥ ३ ॥

युवा तरुणो यष्टॄणां फलस्य शमयिता वा जोहूत्रः स्तोतृभिराह्वातव्यो होतव्यो वा सखा सखिभूतः शिवः सुखकरः स इंद्रो नरां ॥ नृशब्दस्यामि छांदसो गुणः नरशब्दस्य वाम्यागमानुशासनस्यानित्यत्वान्नुडभावः ॥ कर्मनेतॄणामस्माकं पाता पालको भवति । यः शस्त्राणि शंसंतं यश्च शशमानं ॥ शश प्लुतगतौ ॥ क्रियाः कुर्वाणं पुरोडाशादिकं हवींषि पचंतं स्तुवंतं सामभिः स्तोत्रं कुर्वाणं । स्तुतशस्त्रयोः प्रगीताप्रगीतमंत्रसाध्यत्वेन भेदस्य प्रतिपादितत्वात् अत्र पृथङ्निर्देशः । एवमयं यजमानमूती ऊत्या रक्षणेन प्रनेषत् ॥ नयतेर्लेटि सिब्बहुलमिति सिप् । अडागमः । तिङि चोदात्तवतीति गतेर्निघातः ॥ कर्मणां पारं प्रापयेत् ॥

॥ अथ चतुर्थी ॥

तमु स्तुष इंद्रं तं गृणीषे यस्मिन्पुरा वावृधुः शाशदुश्च ।
स वस्वः कामं पीपरदियानो ब्रह्मण्यतो नूतनस्यायोः ॥४॥

तं । ऊं इति । स्तुषे । इंद्रं । तं । गृणीषे । यस्मिन् । पुरा । ववृधुः । शाशदुः । च ।
सः । वस्वः । कामं । पीपरत् । इयानः । ब्रह्मण्यतः । नूतनस्य । आयोः ॥४॥

तमु तमेवेंद्रं स्तुषे । स्तौमि । तथा तमिंद्रं गृणीषे । शंसामि ॥ उभयत्र पुरुषव्यत्ययः ॥ यस्मिन्निंद्रे पुरा पूर्वं स्तोतारो वावृधुः । प्रवृद्धा अभवन् । शाशदुश्च । शत्रून् हिंसितवंतश्च ॥ शद्लृ शातने । लिटि तुजादीनामित्यभ्यासस्य दीर्घः ॥ इयानः स्तोतृभिर्याच्यमानः स इंद्रो ब्रह्मण्यतः स्तोत्रमिच्छतो नूतनस्यायोर्मनुष्यस्य यजमानस्य वस्वो वसुनः काममभिलाषं पीपरत् । अभिलषितफलदानेन पूरयतु ॥

॥ अथ पंचमी ॥

सो अंगिरसामुचथा जुजुष्वान्ब्रह्मा तूतोदिंद्रो गातुमिष्णन् ।
मुष्णन्नुषसः सूर्येण स्तवानश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥५॥

सः । अंगिरसां । उचथा । जुजुष्वान् । ब्रह्म । तूतोत् । इंद्रः । गातुं । इष्णन् ।
मुष्णन् । उषसः । सूर्येण । स्तवान् । अश्नस्य । चित् । शिश्नथत् । पूर्व्याणि ॥५॥

अंगिरसां संबंधीन्युचथोक्थानि जुजुष्वान् ॥ जुषी प्रीतिसेवनयोरित्यस्य लिटि क्वसौ रूपं ॥ सेवमानः स इंद्रो गातुं पणिभिरुपद्रुतानामंगिरसां मार्गमिष्णन् प्रेरयन् ब्रह्म तेषां स्तोत्रं कामप्रदानेन तूतोत् ॥ तु वृद्धावित्यस्य लङि बहुलं छंदसीति विकरणस्य श्लुः ॥ अवर्धयत् । किंच स्तवान् स्तोतृभिः स्तूयमानः सूर्येण स्वात्मभूतेनोषसो मुष्णन् अपहरन् । उदिते हि सूर्ये उषसो व्यावर्तंते । तादृशः स इंद्रोऽश्नस्य । अश्नुते स्वतेजसा सर्वं जगदित्यश्नः कश्चिदसुरः । तस्य पूर्व्याणि पुरातनानि पुराणि बलानि वा शिश्नथत् । अश्नथयत् । शिथिलीचकार ॥

॥ इति द्वितीयस्य षष्ठे पंचविंशो वर्गः ॥

॥ अथ षष्ठी ॥

स ह श्रुत इंद्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः ।
अव प्रियमर्शसानस्य साह्वाञ्छिरो भरद्दासस्य स्वधावान् ॥ ६ ॥
सः । ह । श्रुतः । इंद्रः । नाम । देवः । ऊर्ध्वः । भुवत् । मनुषे । दस्मऽतमः ।
अव । प्रियं । अर्शसानस्य । सह्वान् । शिरः । भरत् । दासस्य । स्वधाऽवान् ॥ ६ ॥

देवो द्योतमानः श्रुतः कीर्त्तिमान् अत एव दस्मतमः सर्वैरतिशयेन दर्शनीयः स इंद्रो मनुषे मनोरर्थमूर्ध्वो भुवत् । कामप्रदाने प्रवृत्त उन्मुखो भवतु ॥ नाम प्रसिद्धौ । हेति पूरणः ॥ तदुच्यते । साह्वान् शत्रूनभिभवन् स्वधावान् बलवानिंद्रोऽर्शसानस्य लोकं बाधमानस्य दासस्यैतन्नामकस्यासुरस्य प्रियं शिरोऽवभरत् । अधः पातयतु ॥ हरतेर्लेट्यडागमः । हृग्रहोर्भः ॥

॥ अथ सप्तमी ॥

स वृत्रहेंद्रः कृष्णयोनीः पुरंदरो दासीरैरयद्वि ।
अजनयन्मनवे क्षामपश्च सत्रा शंसं यजमानस्य तूतोत् ॥ ७ ॥
सः । वृत्रऽहा । इंद्रः । कृष्णऽयोनीः । पुरंऽदरः । दासीः । ऐरयत् । वि ।
अजनयत् । मनवे । क्षां । अपः । च । सत्रा । शंसं । यजमानस्य । तूतोत् ॥ ७ ॥

वृत्रहा वृत्रस्य हंता पुरंदरः शंबरपुरां दारयिता स इंद्रः कृष्णयोनीर्निकृष्टजातीर्दासीरुपक्षपयित्रीरासुरीः सेना व्यैरयत् । व्यनुदत् । किंच मनवे मनोरर्थं क्षां पृथिवीमप उदकानि चाजनयत् । यजमानस्य सत्रा महांतं शंसमभिलाषं तूतोत् । कामप्रदानेन पूरयतु ॥ तु वृद्धाविति सौत्रो धातुः । शपः श्लुः । तुजादित्वाद्दीर्घः ॥ यद्वा सत्रा महत् शंसं शंसनीयं शस्त्रं कामप्रदानेन वर्धयतु । यद्वा कृष्णयोनीः कृष्णाख्येनासुरेण निषिक्तरेतस्का दासीर्भार्या व्यैरयत् । व्यनुदत् । तथा मंत्रः । यः कृष्णगर्भा निरहन्नृजिश्वनेति ॥

॥ अथाष्टमी ॥

तस्मै तवस्य१मनु दायि सत्रेंद्राय देवेभिरर्णसातौ ।
प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून्पुर आयसीर्नि तारीत् ॥ ८ ॥

तस्मै॑ । त॒व॒स्य॑म् । अनु॑ । दा॒यि॒ । स॒त्रा । इंद्रा॑य । दे॒वेभिः॑ । अर्ण॑ऽसातौ ।
प्रति॑ । यत् । अ॒स्य॒ । वज्र॑म् । बा॒ह्वोः । धुः । ह॒त्वी । दस्यू॑न् । पुरः॑ । आय॑सीः । नि । ता॒री॒त् ॥ ८ ॥

देवेभिर्देवनशीलैः स्तोतृभिरर्णसातावुदकलाभे निमित्ते तस्मा इंद्राय तवस्यं तवसे बलाय हितं बलवर्धनं हविः सत्रा संततं सर्वेष्वहःसु अनु अनुक्रमेण सवनत्रये दायि । अदायि । यद्वा तवस्यं । यद्बलं प्रवृद्धाय दीयते तत्तवस्यं । देवेभिर्देवैरुदकभजनेऽनुक्रमेण तद्बलं तस्मा इंद्रायादायि । तथा मंत्रः । अनु ते दायि मह इंद्रियायेति । यद्यदास्येंद्रस्य बाह्वोर्वज्रं प्रति धुः । स्तोतारोऽसुरवधसूचकेन स्तोत्रेण प्रतिनिदधुः । स्तूयमानो हींद्रो दस्युवधार्थं वज्रमादत्ते ॥ दधुः । दधातेर्लुङि गातिस्थेति सिचो लुक् । आत इति झेर्जुस् ॥ ततस्तेन वज्रेण दस्यूनसुरान् हत्वी हत्वा तदीया आयसीरयोमयीः पुरो नितारीत् । नितरामनाशयत् ॥

॥ अथ नवमी ॥

नू॒नं सा ते॒ प्रति॒ वरं॑ जरि॒त्रे दु॑हीयदिंद्र॒ दक्षि॑णा म॒घोनी॑ ।
शिक्षा॑ स्तो॒तृभ्यो॒ माति॑ ध॒ग्भगो॑ नो बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ ९ ॥

नू॒नम् । सा । ते॒ । प्रति॑ । वर॑म् । ज॒रि॒त्रे । दु॒ही॒यत् । इं॒द्र॒ । दक्षि॑णा । म॒घोनी॑ ।
शिक्ष॑ । स्तो॒तृऽभ्यः॑ । मा । अति॑ । ध॒क् । भगः॑ । नः॒ । बृ॒हत् । व॒दे॒म॒ । वि॒दथे॑ । सु॒वीराः॑ ॥ ९ ॥

नूनं सा त इति व्याख्याता ॥

॥ इति द्वितीयस्य षष्ठे षड्विंशो वर्गः ॥

विश्वजित इति षडृचं दशमं सूक्तं गार्त्समदमैंद्रं । अंत्या त्रिष्टुप् । शिष्टाः पंच जगत्यः ॥ तृतीये पर्याये होतुः शस्त्र एतत्सूक्तं । सूत्रितं च । विश्वजिते तिष्ठा हरी रथ आयुज्यमानेति याज्या । आ॰ ६. ४. । इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

वि॒श्व॒जिते॑ धन॒जिते॑ स्व॒र्जिते॑ सत्रा॒जिते॑ नृ॒जित॑ उर्व॒रा॒जिते॑ ।
अ॒श्व॒जिते॑ गो॒जिते॑ अ॒ब्जिते॑ भ॒रेंद्रा॑य॒ सोम॑ं यजता॒य ह॒र्यत॑म् ॥ १ ॥

वि॒श्व॒ऽजिते॑ । ध॒न॒ऽजिते॑ । स्वः॒ऽजिते॑ । स॒त्रा॒ऽजिते॑ । नृ॒ऽजिते॑ । उ॒र्व॒रा॒ऽजिते॑ ।
अ॒श्व॒ऽजिते॑ । गो॒ऽजिते॑ । अ॒प्ऽजिते॑ । भ॒र॒ । इंद्रा॑य । सोम॑म् । य॒ज॒ता॒य॑ । ह॒र्यत॑म् ॥ १ ॥

हे अध्वर्यो इंद्राय सोमं भर। संपादय। कीदृशाय। विश्वजिते। सर्वस्य जेत्रे। तदेव प्रपंचयति। धनजिते शत्रुविजयेन तदीयधनानां जेत्रे। स्वर्जिते स्वर्गस्य जेत्रेऽधिपतये। सत्राजिते सत्रा संततं जयशीलाय महतो जेत्रे वा। नृजिते नृणां नायकानां जेत्रे। उर्वराजिते। उर्वरा सर्वसस्याढ्या भूः। तस्या जेत्रे। अश्वजिते गोजिते बलेनापहृतानां गवां जेत्रे। अब्जिते वृत्रेणाक्रांतानामपां जेत्रे। यजताय यजनीयाय। तस्मा इंद्राय हर्यतं॥ हर्य गतिकांत्योः। भृमृदृशी- त्यादिना कर्मण्यतच्॥ कमनीयं स्पृहणीयं वा सोमं भरतेति समन्वयः॥

॥ अथ द्वितीया ॥

अभिभुवेऽभिभंगाय वन्वतेऽषाळ्हाय सहमानाय वेधसे।
तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इंद्राय वोचत ॥२॥
अभिऽभुवे। अभिऽभंगाय। वन्वते। अषाळ्हाय। सहमानाय। वेधसे।
तुविऽग्रये। वह्नये। दुस्तरीतवे। सत्राऽसहे। नमः। इंद्राय। वोचत ॥२॥

अभिभुवे सर्वस्याभिभवित्रेऽभिभंगायासुराणां भंजकाय वन्वते॥ वन षण संभक्तौ। व्यत्ययेन उप्रत्ययः॥ शत्रूणां धनानां संभजकाय। अषाळ्हाय॥ सहेः कर्मणि निष्ठा। उत्वाभावश्छांदसः॥ शत्रुभिरनभिभूताय। सहमानाय सर्वसहाय वेधसे सर्वस्य विधात्रे। तुविग्रये पूर्णग्रीवाय॥ यद्वा गॄ शब्दे। औणादिकः कर्मणि कप्रत्ययः॥ तुविभिर्बहुभिः स्तोतव्याय। वह्नये सर्वस्य वोढ्रे दुष्टरीत- वेऽन्यैर्दुस्तराय दुर्हिंसाय। सत्रासहे सर्वदाभिभवित्रे महतोऽभिभवित्रे वा एवं- विधायेंद्राय नमो नमःशब्दपूर्वकं स्तोत्रं वोचत। हे स्तोतारो यूयं ब्रूत॥ ब्रूञो लुङि ब्रुवो वचिः। अस्यतिवक्तिख्यातिभ्योऽङित्यङादेशः। वच उमित्युम्। गुणः॥

॥ अथ तृतीया ॥

सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः।
वृतंचयः सहुरिर्विक्ष्वारित इंद्रस्य वोचं प्र कृतानि वीर्या ॥३॥
सत्राऽसहः। जनऽभक्षः। जनंऽसहः। च्यवनः। युध्मः। अनु। जोषं। उक्षितः।
वृतंऽचयः। सहुरिः। विक्षु। आरितः। इंद्रस्य। वोचं। प्र। कृतानि। वीर्या ॥३॥

सत्रासहो बहूनामभिभविता जनभक्षो जनानां यजमानानां कामप्रदानेन संभक्ता तैः संभजनीय इति वा। जनंसहो बलिनां जनानामभिभविता च्यवनः शत्रूणां च्यावयिता स्वस्थानात्। युध्मो योद्धा जोषमनु प्रीतिमनु उक्षितः सिक्तः सोमेन। वृतंचयो वृतस्याभीष्टस्याचेता संचेता दातेत्यर्थः। यद्वा वर्तते पुनःपुनरभिमुखमागच्छतीति वृत् शत्रुः। तं चयते हिनस्तीति वृतंचयः। चयतिर्हिंसाकर्मा। तथा च ब्राह्मणं यो वै भागिनं भागान्नुदते चयते वैनं स यदि वैनं न चयतेऽथ पुत्रमथ पौत्रं चयते त्वेवैनमिति। सहुरिः॥ जसिसहोरुरिन्नित्युरिन्प्रत्ययः॥ अभिभविता शत्रूणां विक्षु प्रजास्वारितः पालकत्वेन प्रापितो भवति। तादृशस्येंद्रस्य कृतानि वृत्रहननादिरूपाणि वीर्या सामर्थ्यानि प्रवोचं। प्रकर्षेण वदामि॥

॥ अथ चतुर्थी ॥

अनानुदो वृषभो दोधतो वधो गंभीर ऋष्वो असंमष्टकाव्यः।

रध्रचोदः श्नथनो वीळितस्पृथुरिंद्रः सुयज्ञ उषसः स्वर्जनत्॥४॥

अनानुऽदः। वृषभः। दोधतः। वधः। गंभीरः। ऋष्वः। असंमष्टऽकाव्यः।

रध्रऽचोदः। श्नथनः। वीळितः। पृथुः। इंद्रः। सुऽयज्ञः। उषसः। स्वः। जनत्॥४॥

अनानुदः। अनु पश्चाद्ददातीत्यनुदः। आतश्चोपसर्ग इति कर्तरि कः। स नास्ति यस्य स तथोक्तः। प्रभूतधनदानेन समानो नास्तीत्यर्थः। अत एव वृषभः कामानां वर्षिता। दोधतः॥ दुधिर्हिंसाकर्मा॥ हिंसकस्यासुरस्य वधो हंता गंभीरो महत्त्वेन गांभीर्योपेतः। ऋष्वो महान् यद्वा दर्शनीयः सर्वैः। असमष्टकाव्यः॥ अशू व्याप्तौ। कर्मणि निष्ठा। ऊदित्त्वादिड्विकल्पः। नञ्समासः॥ अन्यैरव्याप्तकर्मा। रध्रचोदः॥ रध हिंसासंराद्ध्योः॥ रध्राणां समृद्धानां प्रेरकः। यद्वा हिंसकानां शत्रूणां चोदकः। श्नथनः शत्रूणां बलापहारेण शातयिता। वीळितो दृढांगः पृथुः स्वतेजसा जगद्व्याप्य वर्तमानः सुयज्ञः सुकर्मा। एतादृश इंद्र उषसः स्वः सूर्यं ज्योतिः। स्वः सूर्य इति हि ब्राह्मणं। सूर्यं च जनत्। प्रादुश्चकार॥

॥ अथ पंचमी ॥

यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः।

अभिस्वरा निषदा गा अवस्यव इंद्रे हिन्वाना द्रविणान्याशत॥५॥

यज्ञेन । गातुं । अप्ऽतुरः । विविद्रिरे । धियः । हिन्वानाः । उशिजः । मनीषिणः ।
अभिऽस्वरा । निऽसदा । गाः । अवस्यवः । इंद्रे । हिन्वानाः । द्रविणानि । आशत ॥ ५ ॥

धियो हिन्वानाः स्तुतीरिंद्रे प्रेरयंत उशिज इंद्रं कामयमाना मनीषिणो मेधाविनोऽगिरसोऽप्तुरोऽपां प्रेरकादिंद्राज्ञातुं गवां मार्गं यज्ञेन तपसा विविद्रिरे । लेभिरे । ततोऽवस्यवो रक्षणमिच्छंत इंद्रे गाः स्तुतीर्हिन्वानाः ॥ हि गतिवृद्ध्योः स्वादिः ॥ प्रेरयंतस्तेऽगिरसोऽभिस्वरा अभितः स्वरः स्वरणं शब्दनं यस्य तेन स्तोत्रेण निषदोपसदेन च द्रविणानि गोधनान्याशत । प्राप्नुवन् ॥ अश्नोतेर्लुङि बहुलं छंदसीति विकरणस्य लुक् ॥

॥ अथ षष्ठी ॥

इंद्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नां ॥ ६ ॥

इंद्र । श्रेष्ठानि । द्रविणानि । धेहि । चित्तिं । दक्षस्य । सुभगऽत्वं । अस्मे इति ।
पोषं । रयीणां । अरिष्टिं । तनूनां । स्वाद्मानं । वाचः । सुदिनऽत्वं । अह्नां ॥ ६ ॥

हे इंद्र श्रेष्ठान्युत्तमानि द्रविणानि धनान्यस्मभ्यं धेहि । निधेहि । दक्षस्य ॥ दक्षेर्भावे घञ् ॥ कर्मकरणसामर्थ्यस्य चित्तिं ख्यातिं धेहि । अस्मे अस्मभ्यं सुभगत्वं शोभनधनवत्त्वं सौभाग्यं वा निधेहि । रयीणां त्वया दत्तानां धनानां पोषं समृद्धिं धेहि । तनूनामंगानां । यद्वा तायत एभिः कुलमिति तन्वः पुत्राः । तनोतेः करण उप्रत्ययः ॥ तेषामरिष्टिमहिंसां धेहि । तथास्मदीयाया वाचः स्वाद्मानं स्वादुतां । अह्नां सुदिनत्वं शोभनदिनत्वं च धेहि । येषु हींद्रादयो देवा इज्यंते तानि सुदिनानि । तेषां भावः सुदिनत्वं ॥

॥ इति द्वितीयस्य षष्ठे सप्तविंशो वर्गः ॥

त्रिकद्रुकेष्विति चतुर्ऋचमेकादशं सूक्तं गार्त्समदमैंद्रं । अत्रेयमनुक्रमणिका । त्रिकद्रुकेषु चतुष्कमष्ट्याद्यतिशाक्वरमंत्याष्टिर्वेति । आद्यायामष्टिश्छंदश्चतुःषष्ट्यक्षरा । अवशिष्टाः षष्ट्यक्षरा अतिशक्वर्यः । अंत्याष्टिर्वा ॥ षोडशिशस्त्रे त्रिकद्रुकेष्विति तृचः । सूचितं । त्रिकद्रुकेषु महिषो यवाशिरं प्रो ष्वस्मै पुरोरथमिति तृचावातिछंदसौ । आ॰ ६. २. । इति ॥ अविवाक्येऽहनि मरुत्वतीये प्रतिपत्तृचस्य त्रिकद्रुकेष्विति प्रथमा । दशमेऽहनीति खंडे सूचितं । आ त्वा रथं यथोतय इत्येतस्याः

स्थाने चिकद्रुकेषु महिषो यवाशिरमिति । आ० ८. १२. । इति ॥ आश्वमेधिके मध्यमेऽहनि मरुत्वतीय आद्या । तस्य विशेषान्वक्ष्याम इति खंडे सूचितं । चिकद्रुकेषु महिषो यवाशिरमिति मरुत्वतीयस्य प्रतिपत् । आ० १०. १०. । इति ॥ महाव्रतेऽपि माध्यंदिने सवने ब्राह्मणाच्छंसिनः स्तोत्रियस्तृचः । चिकद्रुकेषु महिषो यवाशिरमिति स्तोत्रियः । ऐ० आ० ५. १. । इति सूचितं ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत् ।
स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिंद्रं सत्य इंदुः ॥ १ ॥

त्रिऽकद्रुकेषु । महिषः । यवऽआशिरं । तुविऽशुष्मः । तृपत् । सोमं । अपिबत् । विष्णुना । सुतं । यथा । अवशत् ।
सः । ईं । ममाद । महि । कर्म । कर्तवे । महां । उरुं । सः । एनं । सश्चत् । देवः । देवं । सत्यं । इंद्रं । सत्यः । इंदुः ॥ १ ॥

गृत्समदो ब्रूते । महिषो महान् पूज्यस्तुविशुष्मो बहुबलस्तृपत् ॥ तृप प्रीणने तुदादिः । आगमानुशासनस्यानित्यत्वान्नुमभावः ॥ तृप्यन् इंद्रस्त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येतन्नामकेष्वाभिप्लविकेष्वहःसु सुतमभिषुतं यवाशिरं यवमयैः सक्तुभिर्मिश्रितं ॥ आङ्पूर्वस्य श्रीणातेः क्विपि अपस्पृधेथामित्यादिना शिर इत्यादेशः ॥ तं सोमं विष्णुना सहापिबत् । यथावशत् । पूर्वं यथा तं सोममकामयत तथापिबत् ॥ वश कांतौ । बहुलं छंदसीति शपो लुगभावः ॥ पीतः स सोमो महां महांतमुरुं तेजसा विस्तीर्णमीमेनमिंद्रं ममाद । अमादयत् । किमर्थं । महि महद्वृत्रहननादिलक्षणं कर्म कर्तवे कर्तुं । सत्य इंदुः स्रवन् देवो दीप्यमानः स सोमः सत्यं यथार्थभूतं देवं सोमं कामयमानमिंद्रं सश्चत् ॥ सश्चतिर्व्याप्तिकर्मा ॥ व्याप्नोतु ॥

॥ अथ द्वितीया ॥

अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे ।
अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो देवं सत्यमिंद्रं सत्य इंदुः ॥ २ ॥

गणानां। त्वा। गणऽपतिं। हवामहे। कविं। कवीनां। उपमश्रवःऽतमं।

ज्येष्ठऽराजं। ब्रह्मणां। ब्रह्मणः। पते। आ। नः। शृण्वन्। ऊतिऽभिः। सीद। सदनं ॥ १॥

हे ब्रह्मणस्पते ब्रह्मणोऽन्नस्य परिवृढस्य कर्मणो वा पते पालयितः गणानां देवादिगणानां संबंधिनं गणपतिं स्वीयानां पतिं। कवीनां क्रांतदर्शिनां कविं। उपमश्रवस्तमं। उपमीयतेऽनयेत्युपमा। सर्वेषामन्नानामुपमानं श्रवोऽन्नं यस्य स तथोक्तः। अतिशयेनोपमश्रवा उपमश्रवस्तमः ॥ माङ् माने। आतश्चोपसर्गे करणेऽङ्प्रत्ययः। ङ्यापोः संज्ञाछंदसोरिति ह्रस्वत्वं ॥ ज्येष्ठराजं। ज्येष्ठाः प्रशस्यतमाः। तेषां मध्ये राजंतं ब्रह्मणां मंत्राणां स्वामिनं त्वा त्वां हवामहे। अस्मिन्कर्मण्याह्वयामः। किंच नोऽस्माकं स्तुतीः शृण्वन् त्वमूतिभिः पालनैर्हेतुभूतैः सादनं। सीदंत्यस्मिन्निति सदनं। यज्ञगृहमासीद। उपविश ॥

॥ अथ द्वितीया ॥

देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः।

उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥ २॥

देवाः। चित्। ते। असुर्य। प्रऽचेतसः। बृहस्पते। यज्ञियं। भागं। आनशुः।

उस्राःऽइव। सूर्यः। ज्योतिषा। महः। विश्वेषां। इत्। जनिता। ब्रह्मणां। असि ॥ २॥

असुर्य असुराणां हंतः हे बृहस्पते प्रचेतसः प्रकृष्टज्ञानास्ते त्वदीया देवाश्चित् देवा अपि यज्ञियं यज्ञार्हं भागमानशुः। प्राप्नुवन्। यद्वा प्रचेतस इति बृहस्पतेर्विशेषणं। प्रकृष्टज्ञानवतस्ते तव संबंधिनो देवा इति योजनीयं। यद्वा प्रचेतसः। विभक्तिपरिणामः। प्रचेतसि त्वयि सति देवा यज्ञियं भागमानशिरे। कर्मविघ्नकारिणामसुराणां रक्षोघ्नमंत्रैरपाकरणात्। न वै ब्रह्मण्वद्रिष्यतीति श्रवणात्। ज्योतिषा तेजसा महो मंहनीयः सूर्य उस्रा इव। उस्राः किरणाः ॥ स्फायितंचीत्यादिना रक्प्रत्ययः ॥ यथा किरणान् जनयति तथा विश्वेषां सर्वेषां ब्रह्मणां मंत्राणां जनिता जनयितैवासि ॥ जनिता मंत्र इति निपातनाण्णिलोपः ॥

॥ अथ तृतीया ॥

आ विबाध्या परिरापस्तमांसि च ज्योतिष्मंतं रथमृतस्य तिष्ठसि।

बृहस्पते भीमममित्रदंभनं रक्षोहणं गोत्रभिदं स्वर्विदं ॥ ३॥

आ। विऽबाध्य। परिऽरपः। तमांसि। च। ज्योतिष्मंतं। रथं। ऋतस्य। तिष्ठसि। बृहस्पते। भीमं। अमित्रऽदंभनं। रक्षःऽहनं। गोत्रऽभिदं। स्वःऽविदं ॥ ३॥

हे बृहस्पते परिरपः। परितो रपः पापरूपं रक्षः॥ यद्वा रप लप व्यक्तायां वाचि। क्विप्॥ परिवदतो निंदकान् तमांसि च विबाध्य तेजसा निराकृत्य ज्योतिष्मंतं ज्योतिषा तद्वंतमृतस्य यज्ञस्य प्रापकं भीमं शत्रूणां भयंकरममित्रदंभनं शत्रूणां हिंसकं। तदेवाह रक्षोहणं रक्षसां हंतारं गोत्रभिदं मेघानां भेत्तारं स्वर्विदं स्वर्गस्य लंभकं रथमातिष्ठसि। अधितिष्ठसि॥

॥ अथ चतुर्थी ॥

सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत्।
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनं ॥ ४॥

सुनीतिऽभिः। नयसि। त्रायसे। जनं। यः। तुभ्यं। दाशात्। न। तं। अंहः। अश्नवत्। ब्रह्मऽद्विषः। तपनः। मन्युऽमीः। असि। बृहस्पते। महि। तत्। ते। महिऽत्वनं ॥ ४॥

हे बृहस्पते सुनीतिभिः। शोभनं नीतयो येषु ते सुनीतयः सन्मार्गाः। तैर्जनं नयसि। अपेक्षितफलं प्रापयसि। त्रायसे। जनमापद्भ्यो रक्षसि च। यो यजमानस्तुभ्यं हविर्लक्षणमन्नं दाशात् प्रयच्छेत्॥ दाशृ दाने। लेट्याडागमः॥ तमंहः पापं पापरूपं दारिद्र्यं वा नाश्नवत्। न प्राप्नुयात्॥ अश्नोतेर्लेटि व्यत्ययेन परस्मैपदं। अडागमः॥ ब्रह्मद्विषो ब्राह्मणानां मंत्राणां वा द्वेष्टुस्तपनस्तापकोऽसि। किंच मन्युमीर्मन्योः क्रोधस्य परेषां ज्ञानस्य वा हिंसकोऽसि॥ मीङ् हिंसायां। क्विप्॥ ते तव तत्तादृशं महि महत् प्रभूतं महित्वनं माहात्म्यमस्ति॥

॥ अथ पंचमी ॥

न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः।
विश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते ॥ ५॥

न। तं। अंहः। न। दुःऽइतं। कुतः। चन। न। अरातयः। तितिरुः। न। द्वयाविनः। विश्वाः। इत्। अस्मात्। ध्वरसः। वि। बाधसे। यं। सुऽगोपाः। रक्षसि। ब्रह्मणः। पते ॥ ५॥

हे ब्रह्मणस्पते सुगोपाः सुष्ठु पालयिता त्वं यं जनं रक्षसि पालयसि तं

जनमंह आहंतव्यं दुःखं न बाधते। दुरितं तत्कारणं पापं च न बाधते। अरातयो हिंसकास्तं जनं कुतश्चन सर्वासु दिक्षु न तितिरुः ॥ तिरतिर्हिंसाकर्मा । लिट् ॥ न हिंसंति । तथा द्वयाविनः । मनस्यन्यत्क्रियायां चान्यदित्येतद्द्वयं येषामस्ति ते द्वयाविनो वंचकाः । तेऽपि तं जनं न बाधंते। किंच ध्वरसो वा हिंसिका विश्वाः सर्वाः सेनास्तदर्थं विबाधसे। विशेषेण बाधस एव ॥

॥ इति द्वितीयस्य षष्ठ एकोनत्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

त्वं नो॑ गो॒पाः प॑थि॒कृद्वि॑चक्ष॒णस्तव॑ व्र॒ताय॑ म॒तिभि॑र्जरामहे ।
बृह॑स्पते॒ यो नो॑ अ॒भि ह्वरो॑ द॒धे स्वा तं म॑र्मर्तु दु॒च्छुना॒ हर॑स्वती ॥ ६॥

त्वं। नः॒। गो॒पाः। प॒थि॒ऽकृत्। वि॒ऽच॒क्ष॒णः। तव॑। व्र॒ताय॑। म॒तिऽभिः॑। ज॒रा॒म॒हे॒।
बृह॑स्पते। यः। नः॒। अ॒भि। ह्वरः॑। द॒धे। स्वा। तं। म॒र्म॒र्तु॒। दु॒च्छुना॑। हर॑स्वती ॥ ६॥

हे बृहस्पते त्वं नोऽस्माकं गोपाः पालयिता पथिकृत् सन्मार्गश्च भवसि । विचक्षणो विशेषेण द्रष्टा सर्वज्ञस्त्वं। तव व्रताय त्वत्संबंधिने यज्ञाय मतिभिः स्तोत्रैर्जरामहे। स्तुमः ॥ जरतिः स्तुतिकर्मा ॥ यः पुमान् नोऽस्मानभि अभिलक्ष्य ह्वरः ॥ ह्वृ कौटिल्ये । भावेऽसुन् ॥ कौटिल्यं दधे विदधाति तं स्वा स्वीया दुच्छुना दुर्बुद्धिर्हरस्वती वेगवती सती मर्मर्तु । मोचयतु ॥ मृङ् प्राणत्यागे। अंतर्भावितण्यर्थस्य यङ्लुकि लोटि रूपं ॥

॥ अथ सप्तमी ॥

उ॒त वा॒ यो नो॑ म॒र्चया॒दना॑गसोऽराती॒वा मर्तः॑ सानु॒को वृकः॑ ।
बृह॑स्पते॒ अप॒ तं व॑र्तया प॒थः सु॒गं नो॑ अ॒स्यै दे॒ववी॑तये कृधि ॥ ७॥

उ॒त। वा॒। यः। नः॒। म॒र्चया॑त्। अना॑गसः। अ॒रा॒ति॒ऽवा। मर्तः॑। सा॒नु॒कः। वृकः॑।
बृह॑स्पते। अप॑। तं। व॒र्त॒य॒। प॒थः। सु॒ऽगं। नः॒। अ॒स्यै। दे॒व॒ऽवी॑तये। कृ॒धि॒ ॥ ७॥

उत वा अपि च हे बृहस्पते अरातीवाभिमुखमागमनवान् सानुकः समुच्छ्रितः ॥ सानु समुच्छ्रितमिति यास्कः । नि॰ २. २४. ॥ वृकः ॥ वृक आदाने ॥ धनादीनामादाता यो मर्त्यो मनुष्योऽनागसोऽपराधहीनान्नोऽस्मान् मर्चयात् ॥ मर्चयतिर्हिंसाकर्मा ॥ हिंस्यात् । तं मर्तं पथो वैदिकान्मार्गादपवर्तय । निवर्तय ।

नोऽस्माकमस्यै देववीतये। देवानां वीतिं सोमभक्षणमर्चयतीति देववीतिर्यज्ञः। अस्यै देववीतयेऽस्मै यज्ञाय नोऽस्माकं सुगं सुष्ठु गंतव्यं मार्गं कृधि। कुरु। यज्ञानुष्ठानाय सुमतिं देहीत्यर्थः ॥

॥ अथाष्टमी ॥

त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुं।
बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥ ८॥

त्रातारं। त्वा। तनूनां। हवामहे। अवऽस्पर्तः। अधिऽवक्तारं। अस्मऽयुं।
बृहस्पते। देवऽनिदः। नि। बर्हय। मा। दुःऽएवाः। उत्ऽतरं। सुम्नं। उत्। नशन् ॥ ८॥

अवस्पर्तः उपद्रवेभ्यः पारयितः। यद्वा अवसा रक्षणेनापद्भ्यः पारयितः हे ब्रह्मणस्पते तनूनामंगानां पुत्रादीनां वा त्रातारं पालयितारमधिवक्तारमस्मासु पक्षपातेनाधिकं वक्तारमस्मयुं हविःप्रदानस्मान् कामयमानं त्वां हवामहे। अस्मिन्कर्मण्याह्वयामः। किंच देवनिदो देवनिंदकानसुरान् निबर्हय। विनाशय। दुरेवा दुष्टगमना दुर्बुद्धयः शत्रव उत्तरमुत्कृष्टतरं सुम्नं सुखं मा उन्नशन्। मा व्याप्नुवंतु ॥

॥ अथ नवमी ॥

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि।
या नो दूरे तळितो या अरातयोऽभि संति जंभया ता अनप्नसः ॥ ९॥

त्वया। वयं। सुऽवृधा। ब्रह्मणः। पते। स्पार्हा। वसु। मनुष्या। आ। ददीमहि।
याः। नः। दूरे। तळितः। याः। अरातयः। अभि। संति। जंभय। ताः। अनप्नसः ॥ ९॥

हे ब्रह्मणस्पते सुवृधा सुष्ठु वर्धयित्रा त्वया हेतुना वयं स्पार्हा स्पृहणीयानि वसु धनानि मनुष्या ॥ सुपां सुलुगिति चतुर्थीबहुवचनस्याकारः ॥ मनुष्येभ्यो दातृभ्य आददीमहि। गृह्णीमहि ॥ आङो दोऽनास्यविहरण इत्यात्मनेपदं ॥ दूरे दूरदेशे या अरातयः याश्च तळितोऽतिकेऽरातयो नोऽस्मानभिसंति। अभिभवंति अनप्नसः कर्महीनान् ता अरातीस्तान् शत्रून् जंभय। नाशय ॥ जभि नाशने चुरादिः ॥ अत्र निरुक्तं। त्वया वयं सुवर्धयित्रा ब्रह्मणस्पते स्पृहणीयानि वसूनि मनुष्येभ्य आददीमहि याश्च नो दूरे तळितो याश्चांतिकेऽरात-

योऽदानकर्माणो वादानप्रज्ञा वा जंभय ता अनप्नसोऽप्न इति रूपनाम। नि° ३. ११.। इति ॥

॥ अथ दशमी ॥

त्वया॑ व॒यमु॑त्त॒मं धी॑महे॒ वयो॒ बृह॑स्पते॒ पप्रि॑णा॒ सस्नि॑ना यु॒जा।

मा नो॑ दुः॒शंसो॑ अभिदि॒प्सुरी॑शत॒ प्र सु॒शंसा॑ म॒तिभि॑स्तारिषीमहि ॥ १० ॥

त्वया॑। व॒यं। उ॒त्ऽत॒मं। धी॒म॒हे॒। वयः॑। बृह॑स्पते। पप्रि॑णा। सस्नि॑ना। यु॒जा।

मा। नः॒। दुः॒ऽशंसः॑। अ॒भि॒ऽदि॒प्सुः। ई॒श॒त॒। प्र। सु॒ऽशंसाः॑। म॒तिऽभिः॑। ता॒रि॒षी॒म॒हि॒ ॥ १० ॥

हे बृहस्पते पप्रिणा ॥ पॄ पालनपूरणयोः। आदृगमहनेति किन्प्रत्ययः। छांदसो यणादेशः ॥ कामानां पूरकेन सस्निना शुद्धेन युजा सहायेन त्वया हेतुनोत्तमं वयो हविर्लक्षणमन्नं वयं धीमहे। धारयामः ॥ धी धारणे। दैवादिकः ॥ दुःशंसो दुःशंसनीयोऽभिदिप्सुरभिदंभितुमभिभवितुमिच्छुः पुरुषो नोऽस्माकं मा ईशत। मा ईशिष्ट। ईश्वरो मा भवतु ॥ ईश ऐश्वर्ये। लेट्यडागमः ॥ वयं मतिभिः स्तोत्रैः सुशंसाः शोभनशंसनोपेताः संतः प्रतारिषीमहि। प्रकर्षेण वर्धमहि ॥

॥ इति द्वितीयस्य षष्ठे त्रिंशो वर्गः ॥

॥ अथैकादशी ॥

अ॒ना॒नु॒दो वृ॑ष॒भो जग्मि॑राह॒वं निष्ट॑प्ता॒ शत्रुं॒ पृत॑नासु सास॒हिः।

असि॑ स॒त्य ऋ॑ण॒या ब्र॑ह्मणस्पत उ॒ग्रस्य॑ चिद्द॒मि॒ता वी॑ळुह॒र्षिणः॑ ॥ ११ ॥

अ॒न॒नु॒ऽदः। वृ॒ष॒भः। जग्मिः॑। आ॒ऽह॒वं। निःऽत॑प्ता। शत्रुं॑। पृत॑नासु। स॒स॒हिः।

असि॑। स॒त्यः। ऋ॒ण॒ऽयाः। ब्रह्म॑णः। प॒ते॒। उ॒ग्रस्य॑। चि॒त्। द॒मि॒ता। वी॒ळु॒ऽह॒र्षिणः॑ ॥ ११ ॥

हे ब्रह्मणस्पते अनानुदः। अनु पश्चाद्ददातीत्यनुदः। स यस्य नास्तीत्यननुदः। दात्रंतरशून्य इत्यर्थः। अत एव वृषभः कामानां वर्षिता। आहवं ॥ आहूयतेऽत्रेत्याहवो युद्धं। आङि युद्धे। पा° ३. ३. ७३.। इत्यप्प्रत्ययः संप्रसारणं च ॥ तद्युद्धं जग्मिर्गंता ॥ आदृगमहनेति किन्प्रत्ययः। लिड्वद्भावादाहवमित्यत्र षष्ठीप्रतिषेधः ॥ शत्रुं शातयितारं निष्टप्ता। नितरां तस्य तापकः ॥ तृन्नंतत्वात्षष्ठीप्रतिषेधः। निसस्तपतावनासेवने। पा° ८. ३. १०२.। इति षत्वं। तादौ च नितीति गतेः स्वरः ॥ पृतनासु संग्रामेषु सासहिः शत्रूणामभिभविता। एतादृशस्त्वं सत्यः

सत्यपराक्रमः सत्यप्रज्ञो वासि। ऋणया ऋणस्य यावयितासि ॥ यु मिश्रणामिश्रयोः। ण्यंतस्य क्विपि णिलोपे लोपो व्योर्वलीति वलोपः ॥ किंच उग्रस्य चित् ओजस्विनोऽपि दमितोपशमयिता वीळुहर्षिणो दृढहर्षस्य कामुकस्य नास्तिकस्य चिद्दमितासि ॥

॥ अथ द्वादशी ॥

अदेवेन मनसा यो रिषण्यति शासामुग्रो मन्यमानो जिघांसति।
बृहस्पते मा प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतः ॥ १२ ॥
अदेवेन। मनसा। यः। रिषण्यति। शासां। उग्रः। मन्यमानः। जिघांसति।
बृहस्पते। मा। प्रणक्। तस्य। नः। वधः। नि। कर्म। मन्युं। दुःऽएवस्य। शर्धतः ॥ १२ ॥

यः पुमान् अदेवेन देवानमन्यमानेन यद्वा आसुरवृत्तिविशिष्टेन मनसास्मान् रिषण्यति। हिनस्ति ॥ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यतीति निपातितः ॥ यश्चोग्रः पापचित्तो मन्यमान आत्मानं बहुमन्यमानः पुमान् शासामुक्थस्य शंसितारं। यद्वा अस्माकमाशंसां। शासितॄणामुग्र इति वा योजनीयं। अस्मान् जिघांसति। हंतुमिच्छति ॥ हंतेः सन्यज्झनगमां सनीति दीर्घः ॥ हे बृहस्पते तस्य वधः ॥ वध्यतेऽनेनेति वध आयुधं ॥ नोऽस्मान्मा प्रणक् ॥ पृची संपर्के श्नम्विकरणी। व्यत्ययेनामागमः। चादिलोप इति न निघातः। व्यत्ययेनाद्युदात्तः ॥ किंच दुरेवस्य दुष्टगमनस्य शर्धतो बलवतः। यद्वा दुष्टाभिसंधेर्वेगं कुर्वतस्तस्य मन्युं क्रोधं ज्ञानं वा नि कर्म। त्वत्प्रसादान्निराकुर्मश्च ॥

॥ अथ त्रयोदशी ॥

भरेषु हव्यो नमसोपसद्यो गंता वाजेषु सनिता धनंधनं।
विश्वा इदर्यो अभिदिप्स्वो३ मृधो बृहस्पतिर्वि ववर्हा रथाँ इव ॥ १३ ॥
भरेषु। हव्यः। नमसा। उपऽसद्यः। गंता। वाजेषु। सनिता। धनंऽधनं।
विश्वाः। इत्। अर्यः। अभिऽदिप्स्वः। मृधः। बृहस्पतिः। वि। ववर्ह। रथान्ऽइव ॥ १३ ॥

स बृहस्पतिर्भरेषु संग्रामेषु हव्यो योद्धृभिः स्वरक्षणार्थमाह्वातव्यो नमसोपसद्यः सर्वैर्नमसोपसदनीयः। किंच वाजेषु गंता। संग्रामेषु रक्षार्थं गमनशीलः। तथा धनं धनं सनिता संभक्ता दाता ॥ तृनंतत्वात्षष्ठीप्रतिषेधः ॥ तथार्यः

स्वामी बृहस्पतिरभिदिप्स्वोऽभिभवनेच्छावतीर्विश्वा इत् सर्वा एव मृधो हिंसिकाः सेना रथानिव युद्धे वेगेन परकीयान्रथानिव विववर्ह। विशेषेण शिथिलीचकार। यद्वा इवशब्दश्चार्थे। रथांश्च विववर्ह ॥ लडर्थे लिट् ॥

॥ अथ चतुर्दशी ॥

तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृष्टवीर्यं।

आविस्तत्कृष्व यदसंत उक्थ्यं१ बृहस्पते वि परिरापो अर्दय ॥ १४ ॥

तेजिष्ठया। तपनी। रक्षसः। तप। ये। त्वा। निदे। दधिरे। दृष्टऽवीर्यं।

आविः। तत्। कृष्व। यत्। असत्। ते। उक्थ्यं। बृहस्पते। वि। परिऽरपः। अर्दय ॥ १४ ॥

हे बृहस्पते तेजिष्ठयातिशयेन तिग्मया तपनी तापकारिण्या हेत्या रक्षसो राक्षसांस्तप। तापय। ये राक्षसा दृष्टवीर्यं युद्धेषु दृष्टपराक्रमं त्वा निदे निंदाया विषयं दधिरे। कृतवंतः। तान् तापयेति समन्वयः। ते तवोक्थ्यं सर्वैः प्रशंसनीयं यद्वीर्यमसत् पूर्वमासीत् तदधुनाविष्कृष्व। प्रकटीकुरु। तेन च वीर्येण परिरापः परिवदतो निंदकानसुरान् व्यर्दय। विशेषेण बाधस्व ॥

बार्हस्पत्ये पशावेषा हविषोऽनुवाक्या। प्रदानानामिति खंडे सूचितं। बृहस्पते अति यदर्यो अर्हात्तमूतिया उप वाचः सचंते। आ० ३. ७.। इति ॥ एषैवाश्विनशस्त्रे परिधानीया। सूचितं। बृहस्पते अति यदर्यो अर्हादिति परिधानीया। आ० ६. ५.। इति ॥

॥ सैषा सूक्ते पंचदशी ॥

बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु।

यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं ॥ १५ ॥

बृहस्पते। अति। यत्। अर्यः। अर्हात्। द्युऽमत्। विऽभाति। क्रतुऽमत्। जनेषु।

यत्। दीदयत्। शवसा। ऋतऽप्रजात। तत्। अस्मासु। द्रविणं। धेहि। चित्रं ॥ १५ ॥

ऋतप्रजात सत्येनोत्पन्न हे बृहस्पते अर्यः श्रेष्ठो ब्राह्मणः सर्वान् कामानतीत्य यद्ब्रह्मवर्चसं तेजोऽर्हात्। पूजयेत् ॥ अर्ह पूजायां। लेट्यडागमः ॥ जनेषु ब्राह्मणेषु द्युमत् दीप्तियुक्तं क्रतुमत् ज्ञानोपेतं यद्ब्रह्मवर्चसं विभाति। विशेषेण दीप्यते। यच्च शवसा बलेन स्वाश्रयं जनं दीदयत् ॥ दीदयतिर्दीप्तिकर्मा ॥ दीपयति।

चित्रं चायनीयं तद्ब्रह्मवर्चसरूपं द्रविणमस्मासु धेहि। निधेहि ॥ यद्वा अर्य उदारोऽपि त्वया दत्तं धनमतीवार्हात्। अर्हधीत। यच्च त्वद्दत्तं धनं जनेषु तव स्तोत्रं कुर्वाणेषु दीप्तियुक्तं कर्मसाधनं च विभाति यच्च धनं शवसान्नादिसमृद्ध्या दीदयत् स्वाश्रयं दीपयति तादृशं धनमस्मासु धेहि॥ तथा च ब्राह्मणं। बृहस्पते अति यदर्यो अर्हादित्येतया परिदध्यात्तेजस्कामो ब्रह्मवर्चसकामोऽतीवान्यान्ब्रह्मवर्चसमर्हति द्युमदिति द्युमदिव वै ब्रह्मवर्चसं विभातीति वीव वै ब्रह्मवर्चसं भाति यद्दीदयच्छवस ऋतप्रजातेति दीदायेव वै ब्रह्मवर्चसं तदस्मासु द्रविणं धेहि चित्रमिति चित्रमिव वै ब्रह्मवर्चसं ब्रह्मवर्चसी ब्रह्मयशसी भवतीति।४.११.॥

॥ इति द्वितीयस्य षष्ठ एकत्रिंशो वर्गः ॥

॥ अथ षोडशी ॥

मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥१६॥

मा। नः। स्तेनेभ्यः। ये। अभि। द्रुहः। पदे। निरामिणः। रिपवः। अन्नेषु। जगृधुः।
आ। देवानां। ओहते। वि। व्रयः। हृदि। बृहस्पते। न। परः। साम्नः। विदुः ॥१६॥

हे बृहस्पते नोऽस्मान् स्तेनेभ्यः। स्त्यानमस्ति येष्विति स्तेनाश्चौराः। तेभ्यो मा दाः। तान् दर्शयति। ये चौरा द्रुहः प्राणद्रोहस्य पदे स्थाने निरामिणो नितरां रमणशीला रिपवो हिंसकाः संतोऽन्नेषु परकीयेष्वभिजागृधुः। अभिकांक्षंति ॥ गृधु अभिकांक्षायां। लिटि रूपं ॥ ये च देवानां वि व्रयो विशेषेण वर्जनं ॥ व्री व्ली इति धातू वर्जने वर्तेते। य एवं विद्वान् दक्षिणां प्रतिगृह्णाति नैनं दक्षिणा व्लीनातीत्येकस्य वर्जनार्थे दृष्टस्यापि वर्जनार्थत्वं॥ तत् हृदि स्वकीये हृदय आ ओहते। आवहंति। देवानां यागान् स्तुतीश्च न करवामेति मन्यंत इति यावत्। तेभ्योऽस्मान् मा दा इति समन्वयः। ये पुमांसः साम्नः साममयात्त्वत्तः परः परस्तादन्यदुत्कृष्टं साम यद्रक्षोघ्नं। साम वै रक्षोहेति। न विदुः। न जानंति। किंतु सर्वसाधकं साम त्वामेव विदुषोऽस्मान् स्तेनेभ्यो मा दाः ॥

॥ अथ सप्तदशी ॥

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हंता मह ऋतस्य धर्तरि ॥१७॥

विश्वेभ्यः। हि। त्वा। भुवनेभ्यः। परि। त्वष्टा। अजनत्। साम्नःऽसाम्नः। कविः।
सः। ऋणऽचित्। ऋणऽयाः। ब्रह्मणः। पतिः। द्रुहः। हंता। महः। ऋतस्य। धर्तरि ॥१७॥

हे ब्रह्मणस्पते त्वष्टा प्रजापतिर्विश्वेभ्यो भुवनेभ्यस्परि सर्वेभ्यो भूतजातेभ्य उत्कृष्टं त्वामजनद्धि। अजीजनत् खलु। ततस्त्वं साम्नः साम्नः सर्वस्यापि साम्नः कविः ॥ कु शब्दे। अच इरिति इप्रत्ययः ॥ उच्चारयिता कर्तासि। यद्वा कविः क्रांतदर्शी त्वष्टा साम्नः साम्नः सर्वस्यापि साम्नः सारेण त्वामजीजनत्। किंच स ब्रह्मणस्पतिर्महो महत ऋतस्य यज्ञस्य धर्तरि धारके यजमाने ऋणचित् स्तोतृकाममृणमिव चिनोतीति ऋणचित्। किंच ऋणयाः पापरूपस्य ऋणस्य यावयिता पृथक्कर्ता च द्रुहः कर्मणो द्रोग्धुरसुरस्य हंता भवेति ॥

॥ अथाष्टादशी ॥

तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदंगिरः।
इंद्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवं ॥१८॥

तव। श्रिये। वि। अजिहीत। पर्वतः। गवां। गोत्रं। उत्ऽअसृजः। यत्। अंगिरः।
इंद्रेण। युजा। तमसा। परिऽवृतं। बृहस्पते। निः। अपां। औब्जः। अर्णवं ॥१८॥

अंगिर आंगिरस हे बृहस्पते गवामावारको वलेनाधिष्ठितः पर्वतस्तव श्रिय आश्रयणार्थं व्यजिहीत। विवृतद्वारतामगच्छत्। ततस्त्वं यद्यदा गोत्रं ॥ इनित्रकट्यचश्चेति समूहार्थे त्रप्रत्ययः ॥ गवां समूहमुदसृजः। निरगमयः। तदेंद्रेण युजा सहायेन युक्तस्त्वं तमसा वृत्रासुरेण परीवृतं परित आक्रांतमपामर्णवं स्थानभूतं मेघं निरौब्जः। नितरामधोमुखमकार्षीः ॥

॥ अथैकोनविंशी ॥

ब्रह्मणस्पते त्वमस्य यंता सूक्तस्य बोधि तनयं च जिन्व।
विश्वं तद्भद्रं यदवंति देवा बृहद्वदेम विदथे सुवीराः ॥१९॥

ब्रह्मणः। पते। त्वं। अस्य। यंता। सुऽउक्तस्य। बोधि। तनयं। च। जिन्व।
विश्वं। तत्। भद्रं। यत्। अवंति। देवाः। बृहत्। वदेम। विदथे। सुवीराः ॥१९॥

हे ब्रह्मणस्पते ब्रह्मणां स्तोत्राणामधिपते अस्य जगतो यंता नियामकस्त्वं

सूक्तस्यास्मदीयमिदं ब्राह्मणस्पत्यं सूक्तं बोधि। बुध्यस्व। त्वं तनयं पुत्रपौत्रादिलक्षणं संतानं जिन्व ॥ जिविः प्रीणनार्थः। लोटि रूपं ॥ प्रीणय। भवादृशा देवा यदवंति रक्षंति तत्तादृशं विश्वं सर्वं भद्रं कल्याणं भवति। अतो वयं विदथेऽस्मिन्यज्ञे सुवीराः शोभनपुत्रपौत्राः संतो बृहत्प्रभूतमिदं स्तोत्रं वदेम। ब्रूयाम ॥

॥ इति द्वितीयस्य षष्ठे द्वात्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके षष्ठोऽध्यायः समाप्तः ॥

---

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ ऋषिच्छंदोदेवताविनियोगपुरःसरं सप्तमो व्याख्यायते ॥ गार्त्समदस्य द्वितीयमंडलस्य तृतीयेऽनुवाके दश सूक्तानि। तत्रैकं सूक्तं व्याकृतं। सेमामिति षोडशर्चं द्वितीयं सूक्तं। अत्रानुक्रम्यते। सेमां षोडशांत्या त्रिष्टुप् द्वादशी च सैंद्री चेति। मंडलद्रष्टा गृत्समद ऋषिः। द्वादशीषोडश्यौ त्रिष्टुभौ। शिष्टाश्चतुर्दश जगत्यः। ब्राह्मणस्पत्यं हेत्युक्तत्वात् तुह्यादिपरिभाषयेदमादीनि त्रीणि सूक्तानि ब्राह्मणस्पत्यानि। अस्य सूक्तस्य द्वादश्यैंद्री इंद्रदेवत्या। चशब्दाद्ब्राह्मणस्पत्या च ॥ सामान्यविनियोगः पूर्वमेवोक्तः। विशेषतस्तु लिंगादवगंतव्यः ॥

॥ तत्रैषा प्रथमा ॥

सेमामविड्ढि प्रभृतिं य ईशिषेऽया विधेम नवया महा गिरा।
यथा नो मीढ्वान्स्तवते सखा तव बृहस्पते सीषधः सोत नो मतिं ॥ १ ॥

सः। इमां। अविड्ढि। प्रऽभृतिं। यः। ईशिषे। अया। विधेम। नवया। महा। गिरा।
यथा। नः। मीढ्वान्। स्तवते। सखा। तव। बृहस्पते। सीसधः। सः। उत। नः। मतिं॥१॥

हे ब्रह्मणस्पते यस्त्वमीशिषे सर्वस्य जगत ईश्वरो भवसि स त्वमिमामस्मदीयां प्रभृतिं प्रकर्षेण भृतां स्तुतिमविड्ढि। प्राप्नुहि॥ अवतेः प्राप्त्यर्थस्य लोट्येतद्रूपं॥ वयं च त्वामया अनया॥ छांदसो वर्णलोपः॥ नवया नूतनया प्रत्यग्रया महा महत्या गिरा वेदरूपया स्तुतिलक्षणया वाचा विधेम। परिचरेम॥ विधतिः परिचरणकर्मा॥ उत अपि च नोऽस्माकं मध्ये मीढ्वान् सेक्ता स्तुतेर्वर्षिता। कर्तेति यावत्। तव सखा मित्रभूतः सन् यथा येन प्रकारेण यत्कामनया स्तवते। त्वां स्तौति। हे बृहस्पते बृहतो ब्रह्मणो मंत्रस्य स्वामिन् स त्वं नोऽस्माकं मतिं तदभिमतं फलं सीषधः। साधय॥ छांदसे लुङि चङ्येतद्रूपं॥

॥ अथ द्वितीया॥

यो नंत्वान्यनमन्न्योजसोतादर्दर्मन्युना शंबराणि वि।
प्राच्यावयदच्युता ब्रह्मणस्पतिरा चाविशद्वसुमंतं वि पर्वतं॥२॥

यः। नंत्वानि। अनमत्। नि। ओजसा। उत। अदर्दः। मन्युना। शंबराणि। वि।
प्र। अच्यवयत्। अच्युता। ब्रह्मणः। पतिः। आ। च। अविशत्। वसुऽमंतं। वि। पर्वतं॥२॥

यो ब्रह्मणस्पतिर्नंत्वानि नमनीयानि राक्षसादीन्योजसा बलेन न्यनमत्। नितरामनमयत्। प्रह्वीभूतान्यकरोत्। उत अपि च स ब्रह्मणस्पतिर्मन्युना मनुना क्रोधेन वा॥ मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वधकर्मणो वा। नि॰ १०.२९.। इति यास्कः॥ शंबराणि॥ मेघनामैतत्॥ मेघान् व्यदर्दः। वर्षणार्थं विदारितवान्॥ दॄ विदारण इत्यस्माद्यङ्लुगंताल्लङ्येतद्रूपं॥ तदनंतरमच्युता अच्युतानि नैश्चल्येन मेघेऽवस्थितान्युदकानि प्राच्यावयत्। प्रकर्षेणागमयत्। मेघान्निरगमयदित्यर्थः। तथा वसुमंतं गोरूपधनवंतं पर्वतं वलनाम्नासुरेण विलद्वारे पिधानार्थं निहितं शिलोच्चयं आ च आभिमुख्येन चेत्॥ चशब्दश्चेदर्थः। समुच्चयार्थत्वे तु चवायोगे प्रथमेति पूर्वस्याच्यावयदित्यस्याद्युदात्तत्वं स्यात् अस्य च सर्वानुदात्तत्वं। चेदर्थे तु निपातैर्यद्यदिहंतेति निघातप्रतिषेधः सिध्यति॥ व्यविशत्। विशेषेण प्रविशति। तदानीं तद्गोरूपं धनं प्राप्नोदित्यर्थः॥

॥ अथ तृतीया ॥

तद्देवानां देवतमाय कर्त्वमश्रथ्नन्दृळ्हाव्रदंत वीळिता।
उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः ॥ ३ ॥

तत्। देवानां। देवऽतमाय। कर्त्वं। अश्रथ्नन्। दृळ्हा। अव्रदंत। वीळिता। उत्। गाः। आजत्। अभिनत्। ब्रह्मणा। वलं। अगूहत्। तमः। वि। अचक्षयत्। स्व१रिति स्वः ॥ ३ ॥

देवानामिंद्रादीनां मध्ये देवतमायातिशयेन दानादिगुणयुक्ताय ॥ षष्ठ्यार्थे चतुर्थी ॥ ईदृशस्य ब्रह्मणस्पतेस्तत्कर्त्वं कर्तव्यं कर्म। किं पुनस्तदिति चेदुच्यते। दृळ्हा दृढानि पर्वतादीन्यश्रथ्नन् ॥ श्रंथ विमोचनप्रतिहर्षणयोः ॥ अस्य बलेन श्रथितानि विश्लिष्टान्यभवन्। तथा वीळिता संस्तंभितानि दृढीकृतानि वृक्षादीनि ॥ वीळयतिश्च व्रीळयतिश्च संस्तंभकर्माणाविति यास्कः। नि॰ ५. १६. ॥ अव्रदंत। मृदून्यभवन् ॥ व्रदतिर्मृदूभावकर्मा ॥ अपि च स ब्रह्मणस्पतिर्वलेनापहृता गा उदाजत् ॥ अज गतिक्षेपणयोः ॥ देवान्प्रत्युदगमयत्। तथा ब्रह्मणात्मीयेन मंत्रेण वलं सर्वस्यावरकमसुरमभिनत्। मंत्रस्य सामर्थ्येनाभैत्सीत्। तदनंतरं वलेनोत्पादितं तमो ध्वांतमगूहत् ॥ गुह संवरणे ॥ गूढमदृश्यमकरोत्। तदनंतरं स्वरादित्यं व्यचक्षयत्। तमसो निराकरणेन तत्स्थमदर्शयत् ॥ चष्टिः पश्यतिकर्मा ॥

॥ अथ चतुर्थी ॥

अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत्।
तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणं ॥ ४ ॥

अश्मऽआस्यं। अवतं। ब्रह्मणः। पतिः। मधुऽधारं। अभि। यं। ओजसा। अतृणत्। तं। एव। विश्वे। पपिरे। स्वःऽदृशः। बहु। साकं। सिसिचुः। उत्सं। उद्रिणं ॥ ४ ॥

ब्रह्मणस्पतिर्ब्रह्मणो मंत्रस्य पतिः पालयिता देवोऽश्मास्यमश्मवद्दृढतरास्यं। यास्कस्त्वाह। अशनवंतमास्यंदनवंतं। नि॰ १०. १३.। इति व्यापनवंतमासेचनवंतमिति तस्यार्थः। मधुधारं मधुमादयित्री उदकधारा यस्य तादृशमवतमवतातं विस्तृतं यं मेघमोजसा बलेनाभ्यतृणत् ॥ उतृदिर् हिंसानादरयोः ॥ अहिंसीत्। वर्षणार्थमवधीदित्यर्थः। तमेव मेघं विश्वे सर्वे स्वर्दृशः। स्वरा-

दित्यः । तस्य संबंधिनो द्रष्टारो रश्मयः पपिरे । घर्मकाले पिबंति । मेघेन वृष्टस्योदकस्य पानान्नमेव पिबंतीत्युच्यते । ते च रश्मयो वर्षासूत्समुत्सेचनवंतमुद्रिणमुदकवंतं मेघं साकं सह युगपदेव बहु सिसिचुः । घर्मकाले यत्पीतं ततोऽपि बहुतरं सहस्रगुणितं सिंचंतीत्यर्थः ॥

॥ अथ पंचमी ॥

सना ता का चिद्भुवना भवीत्वा माद्भिः शरद्भिर्दुरो वरंत वः ।
अयतंता चरतो अन्यदन्यदिद्या चकार वयुना ब्रह्मणस्पतिः ॥ ५ ॥

सना । ता । का । चित् । भुवना । भवीत्वा । मात्ऽभिः । शरत्ऽभिः । दुरः । वरंत । वः ।
अयतंता । चरतः । अन्यत्ऽअन्यत् । इत् । या । चकार । वयुना । ब्रह्मणः । पतिः ॥ ५ ॥

हे ऋत्विग्यजमाना वो युष्मदर्थं सना सनातनानि ता तानि का चित् कानि चित् ब्रह्मणस्पतेः प्रज्ञानानि भुवना भुवनानां ॥ सुपां सुलुगिति षष्ठ्या लुक् ॥ भुवनानामुदकानां भवीत्वा भाव्यानां दुरो द्वाराणि माद्भिर्मासैः ॥ पद्दन्नित्यादिना मासशब्दस्य मास्भावः । स्वतवस्पासोषसां च त इष्यते । पा॰ ७. ४. ४८. २. । इति तत्वं ॥ शरद्भिः संवत्सरैश्च वरंत । विवृण्वंति । तत्काले वर्षणार्थं मेघद्वाराण्युद्घाटयंतीत्यर्थः । कानि पुनस्तानि । ब्रह्मणस्पतिर्या यानि वयुना ॥ ज्ञाननामैतत् ॥ ज्ञानानि मंत्रविषयाणि चकार । कृतवान् । तदनंतरमयतंता अयतमानावप्रयत्नावुभौ लोकौ द्यौश्च पृथिवी च अन्यदन्यदित् अन्यदन्यदेव पृथिवी वृष्टिजलं दिव्यमुदकं द्यौरुदककार्यं हविर्लक्षणं पार्थिवमन्नं एवं परस्परव्यतिहारेण चरतः । भुंजाते ॥ चर गतिभक्षणयोः ॥

॥ इति द्वितीयस्य सप्तमे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

अभिनक्षंतो अभि ये तमानशुर्निधिं पणीनां परमं गुहा हितं ।
ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन्तदुदीयुराविशं ॥ ६ ॥

अभिऽनक्षंतः । अभि । ये । तं । आनशुः । निऽधिं । पणीनां । परमं । गुहा । हितं ।
ते । विद्वांसः । प्रतिऽचक्ष्य । अनृता । पुनः । यतः । ऊं इति । आयन् । तत् । उत् ।
ईयुः । आऽविशं ॥ ६ ॥

गोसमूहे पणिभिरसुरैरपहृते सति पणीनां स्थानं सरमाख्यया देवशुन्या ज्ञात्वा ब्रह्मणस्पतिना सृष्टा अंगिरसस्तत्स्थानं प्राप्य गोसमूहं पणिभिर्निर्मिता मायाश्च दृष्ट्वा असुरनिवासस्थानं स्वहस्तोद्भूतेनाग्निना दग्ध्वा प्रत्यागच्छन् । तदेतदृचेनोच्यते । अभिनक्षंतोऽभितो गच्छंतो येऽंगिरसस्तं निधिं गोसमूहरूपं निधानं धनं परममुत्कृष्टं पणीनां ॥ तृतीयार्थे षष्ठी ॥ पणिभिर्गुहायां निहितं स्थापितमभ्यानशुः । अभिलक्ष्यानशिरे । प्राप्नवंतः । विद्वांसोऽभिज्ञास्तेऽंगिरसोऽनृता अनृतान्यसुरैः कृता मायाः प्रतिचक्ष्य दृष्ट्वा आविशमावेष्टुं प्रवेष्टुं यत उ यत एव स्थानादायन् अगच्छन् तत्स्थानं पुनरुदीयुः । उदगच्छन् । उत्कर्षेण प्राप्ताः ॥

॥ अथ सप्तमी ॥

ऋतावानः प्रतिचक्ष्यानृता पुनरात आ तस्थुः कवयो महस्पथः ।
ते बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि तं ॥ ७ ॥

ऋतऽवानः । प्रतिऽचक्ष्य । अनृता । पुनः । आ । अतः । आ । तस्थुः । कवयः । महः । पथः ।
ते । बाहुऽभ्यां । धमितं । अग्निं । अश्मनि । नकिः । सः । अस्ति । अरणः । जहुः । हि । तं ॥ ७ ॥

ऋतावानः । ऋतमिति सत्यनामधेयं । तद्वंतः कवयः क्रांतदर्शिनः सर्वज्ञा अंगिरसोऽनृता अनृतानि प्रतिचक्ष्य पूर्वोक्तप्रकारेण दृष्ट्वा अतोऽस्मात्स्थानात् पुनराजिगमिषवो महस्पथो महतो मार्गान् प्रति आतस्थुः । अवतस्थिरे । अवतिष्ठमानाश्च ते बाहुभ्यां हस्ताभ्यां धमितं मंथनोत्पादितं प्रज्वालितमग्निमश्मनि पणीनां निवासभूते शिलोच्चये जहुर्हि । दग्धुं त्यक्तवंतः खलु । अरणोऽरमयिता दाहेन दुःखकारी सोऽग्निः पूर्वं तत्र नकिरस्ति । न विद्यते । अविद्यमानमग्निं स्वसामर्थ्यादुत्पाद्य तत्र प्रचिक्षिपुरित्यर्थः ॥

॥ अथाष्टमी ॥

ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति धन्वना ।
तस्य साध्वीरिषवो याभिरस्यति नृचक्षसो दृशये कर्णयोनयः ॥ ८ ॥

ऋतऽज्येन । क्षिप्रेण । ब्रह्मणः । पतिः । यत्र । वष्टि । प्र । तत् । अश्नोति । धन्वना ।
तस्य । साध्वीः । इषवः । याभिः । अस्यति । नृऽचक्षसः । दृशये । कर्णऽयोनयः ॥ ८ ॥

ऋतं सत्यमेव ज्या यस्य तेन क्षिप्रेणेषूणां क्षेपकेन धन्वना धरणभूतेन धनुषा ब्रह्मणस्पतिर्ब्रह्मणो मंत्रस्य पालयिता देवो यत्र यस्मिन्विषये वष्टि कामयते तत्प्राश्नोति। प्रकर्षेण व्याप्नोति॥ अश्नोतेर्व्यत्ययेन परस्मैपदं॥ तस्य धनुषः साध्वीः साधिकास्ता इषवो भवंति याभिरिषुभिर्ब्रह्मणस्पतिरस्यति। राक्षसादीन् क्षिपति। कीदृश्यस्ताः। नृचक्षसो नॄन् पश्यतः। उपलक्षणमेतत्। सर्वज्ञस्य ब्रह्मणस्पतेर्दृशये दर्शनाय ज्ञानाय जाताः कर्णयोनयः श्रोत्रेंद्रियेण ग्राह्या मंत्रभूता आकर्णकृष्टा वा बाणाः। ब्रह्मणस्पतिर्मंत्रैरेव सर्वं साधयतीति भावः॥

॥ अथ नवमी ॥

स सं॒न॒यः स वि॑न॒यः पु॒रोहि॑तः॒ स सुष्टु॑तः॒ स यु॒धि ब्रह्म॑ण॒स्पतिः॑।
चा॒क्ष्मो यद्वाजं॒ भर॑ते म॒ती धनादित्सूर्य॑स्तपति तप्य॒तुर्वृथा॑ ॥ ९ ॥

सः। सं॒ऽन॒यः। सः। वि॒ऽन॒यः। पु॒रःऽहि॑तः। सः। सुऽस्तु॑तः। सः। यु॒धि। ब्रह्म॑णः। पतिः॑।
चा॒क्ष्मः। यत्। वाजं॑। भर॑ते। म॒ती। धना॑। आत्। इत्। सूर्यः॑। त॒प॒ति॒। त॒प्य॒तुः। वृथा॑ ॥ ९ ॥

पुरोहितो देवैः पुरतोऽत्र स्थापितः स ब्रह्मणस्पतिः संनयः विश्लिष्टानां मंत्रैः संगमयिता भवति। विनयः संगतानां विविधं नेता पृथक्कर्तापि स एव। तथा सुष्टुतः शोभनं स्तोतृभिः स्तुतश्च भवति। तथा युधि संग्रामे स स्तोतॄणामनुग्रहाय प्रादुर्भवतीति शेषः। यद्यदा चाक्ष्मः॥ चष्टेः क्षमतेर्वा॥ सर्वस्य द्रष्टा सर्वसहो वा ब्रह्मणस्पतिर्वाजमन्नं मती मननीयं प्रशस्तं धना धनं च स्तोतॄणामर्थाय भरते। बिभर्ति। वृष्टिद्वारा पोषयति। आदित् अनंतरमेव तप्यतुस्तापकः सूर्यो वृथा। अनायासवचनमेतत्। अनायासेन तपति। दीप्यते। ब्रह्मणस्पतिना दत्तैरन्नैर्धनैश्च यज्ञस्य सिद्धत्वात् स्वयं केवलं हवींषि भुंजान एव वर्तत इत्यर्थः॥

॥ अथ दशमी ॥

वि॒भु प्र॒भु प्र॑थ॒मं मे॒हना॑वतो॒ बृह॒स्पतेः॑ सुवि॒दत्रा॑णि॒ राध्या॑।
इ॒मा सा॒तानि॑ वे॒न्यस्य॑ वा॒जिनो॒ येन॒ जना॑ उ॒भये॑ भुंजते॒ विशः॑ ॥ १० ॥

वि॒ऽभु। प्र॒ऽभु। प्र॒थ॒मं। मे॒हना॑ऽवतः। बृह॒स्पतेः॑। सु॒ऽवि॒दत्रा॑णि। राध्या॑।
इ॒मा। सा॒तानि॑। वे॒न्यस्य॑। वा॒जिनः॑। येन॑। जनाः॑। उ॒भये॑। भुं॒ज॒ते। विशः॑ ॥ १० ॥

विभु विभूनि व्याप्तानि प्रभु प्रभूणि प्रौढानि प्रथमं प्रथमानि मुख्यानि।

एवंभूतानि मेहनावतो वर्षणवतो वृष्टिप्रदस्य बृहस्पतेर्बृहतो मंत्रस्य पालयितुः संबंधीनि सुविदत्राणि ॥ विद्लृ लाभे। सुविदेः कत्रन्। उ॰ ३. १०७.॥ सुष्ठु लब्धव्यानि ॥ सुविदत्रं धनं भवतीति यास्कः ॥ राध्या राध्यानि सम्यक् साधनीयानि। प्राप्तव्यानीति यावत्। इमा सातानीमानि धनानि वेन्यस्य कमनीयस्य वाजिनोऽन्नवतो ब्रह्मणस्पतेः ॥ तृतीयार्थे षष्ठी ॥ ब्रह्मणस्पतिना दत्तानि। येन धनेनोभय उभयविधा जनाः स्तोतारो यजमानाश्च देवा मनुष्याश्च वा विशो निविष्टाः संतो भुंजते। भोगान् लभंते। तत्सर्वं ब्रह्मणस्पतिना दत्तमित्यर्थः ॥

॥ इति द्वितीयस्य सप्तमे द्वितीयो वर्गः ॥

॥ अथैकादशी ॥

योऽवरे वृजने विश्वथा विभुर्महामु रण्वः शवसा ववक्षिथ।
स देवो देवान्प्रति पप्रथे पृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः ॥ ११ ॥

यः। अवरे। वृजने। विश्वऽथा। विऽभुः। महां। ऊं इति। रण्वः। शवसा। ववक्षिथ।
सः। देवः। देवान्। प्रति। पप्रथे। पृथु। विश्वा। इत्। ऊं इति। ता। परिऽभूः।
ब्रह्मणः। पतिः ॥ ११ ॥

विश्वथा सर्वप्रकारेण विभुर्व्याप्तो रण्वो रमयिता स्तोतव्यो वा यो ब्रह्मणस्पतिरवरे निकृष्टे वृजने वर्जनहेतुभूते बले वर्तमानं। दुर्बलमिति यावत्। महामु महांतं च ॥ छांदसो वर्णलोपः ॥ उभयविधं स्तोतारं शवसात्मीयेन बलेन ववक्षिथ। वोढुमिच्छति। सर्वदा वहतीति यावत् ॥ वहतेः सनंतस्य लिट्येतद्रूपं। पुरुषव्यत्ययः ॥ स देवो दानादिगुणयुक्तो देवान् प्रति सर्वेषां देवानां प्रतिनिधिः सन् पृथु पप्रथे। अत्यंतं प्रथते। यशसा विस्तीर्णो भवतीति यावत्। यस्मादेवं तस्माद्विश्वेदु सर्वाण्येव ता तानि सर्वाणि भूतजातानि परिभूः परिभवन् अभिभवन् वर्तत इति शेषः ॥

॥ अथ द्वादशी ॥

विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनंति व्रतं वां।
अच्छेंद्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातं ॥ १२ ॥

विश्वं। सत्यं। मघऽवाना। युवोः। इत्। आपः। चन। प्र। मिनंति। व्रतं। वां।
अच्छ। इंद्राब्रह्मणस्पती इति। हविः। नः। अन्नं। युजाऽइव। वाजिना। जिगातं ॥ १२ ॥

हे मघवाना । मघमिति धननाम । तद्वंताविंद्राब्रह्मणस्पती युवोरित् युवयोरेव विश्वं सर्वं स्तोत्रं सत्यं यथार्थं । स्तुत्या यद्यद्गुणजातं प्रतिपाद्यते तत्सर्वं युवयोर्विद्यमानमेव न त्वारोपितमित्यर्थः । तथा चनेत्येतत्पदद्वयसमुदायः । एकपद्यं त्वध्यापकसांप्रदायिकं यद्येव शब्दस्य पूर्वपदे न । आपश्च आपोऽपि । उपलक्षणमेतत् । एतदुपलक्षितानि सर्वाण्यपि भूतानि वां युवयोर्व्रतं कर्म न प्रमिनंति । न हिंसंति ॥ मीङ् हिंसायां क्र्यादिकः । मीनातेर्निगम इति ह्रस्वत्वं ॥ हे इंद्राब्रह्मणस्पती नोऽस्माकं हविरच्छाभिमुख्येन जिगातं । गच्छतं । आगच्छतमिति यावत् ॥ जिगातिर्गतिकर्मा । जौहोत्यादिकः ॥ तत्र दृष्टांतः । युजेव वाजिना । युजा रथे नियुक्तौ वाजिनौ वेजनवंतावश्वावन्नं घासं प्रति यथा स्वयमेव शीघ्रं गच्छतस्तद्वत् शीघ्रमागच्छतमित्यर्थः ॥ युजेवेत्यत्र सुपां सुलुगिति प्रथमाद्विवचनस्याकारः । तृतीयायां हि सावेकाच इति विभक्तेरुदात्तत्वं ॥

॥ अथ त्रयोदशी ॥

उताशिष्ठा अनु शृण्वंति वह्नयः सभेयो विप्रो भरते मती धना ।
वीळुद्वेषा अनु वश ऋणमाददिः स ह वाजी समिथे ब्रह्मणस्पतिः ॥ १३ ॥
उत । आशिष्ठाः । अनु । शृण्वंति । वह्नयः । सभेयः । विप्रः । भरते । मती । धना ।
वीळुऽद्वेषाः । अनु । वशा । ऋणं । आऽददिः । सः । ह । वाजी । संऽइथे । ब्रह्मणः ।
पतिः ॥ १३ ॥

उत अपि च आशिष्ठा आशुतराः शीघ्रगामिनो वह्नयः ॥ अश्वनामैतत् ॥ वोढारो ब्रह्मणस्पतेरश्वा अनु शृण्वंति । अस्माभिः कृतं स्तोत्रमनुक्रमेण शृण्वंति । यद्वा ब्रह्मणस्पतिना कृतमनुशासनं शृण्वंति । अतस्ते तमस्मदीयं यज्ञं प्रापयंत्विति शेषः । सभेयः सभायां साधुः ॥ ढश्छंदसीति ढः ॥ विप्रो मेधावी अध्वर्युर्होता वा मती मत्या मननीयेन स्तोत्रेण ॥ सुपां सुलुगिति पूर्वसवर्णदीर्घः ॥ धना हविर्लक्षणानि धनानि तस्मै ब्रह्मणस्पतये भरते । बिभर्ति । संपादयतीति यावत् । यद्वा स्तोत्रेण धनानि भरते । बिभर्ति पोषयति । अतो वीळुद्वेषाः । वीळून् दृढान् प्रबलान् राक्षसादीन् द्वेष्टीति तादृशो ब्रह्मणस्पतिर्वशा वशाया गोः ॥ सुपां सुलुगिति षष्ठ्या लुक् । ऋत्यक इति प्रकृतिभावः ॥ ऋणमस्माभिर्यज्वभिः प्रदेयमवदानात्मकमनुक्रमेणाददिरादाता भवत्विति शेषः ।

अवदानस्य ऋणत्वं च तैत्तिरीये त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्य इत्यादिना स्पष्टमाम्नातं। यद्वा अनुरानुगुण्ये। वशा वशस्य कामस्याभिलाषस्यानुगुणमादाता भवत्विति योज्यं। हशब्दः प्रसिद्धौ। स खलु ब्रह्मणस्पतिः समिथे। संयंति संगच्छंतेऽस्मिन्नाहुतिभिर्देवा इति समिथो यज्ञः। तस्मिन्वाजी अन्नवान्। तस्माद्धविष आदाता भवत्वित्यर्थः ॥

॥ अथ चतुर्दशी ॥

ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः।
यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक् ॥ १४ ॥
ब्रह्मणः। पतेः। अभवत्। यथाऽवशं। सत्यः। मन्युः। महि। कर्म। करिष्यतः।
यः। गाः। उत्ऽआजत्। सः। दिवे। वि। च। अभजत्। महीऽइव। रीतिः।
शवसा। असरत्। पृथक् ॥ १४ ॥

महि महत्कर्म करिष्यतो ब्रह्मणस्पतेर्मन्युर्मननसाधनो मंत्रः क्रोधो वा यथावशं यथाकामं सत्योऽवितथोऽभवत्। स यथा कामयते तथा करोतीत्यर्थः। यो ब्रह्मणस्पतिः पणिभिरपहृता गा उदाजत्। उद्गमयत् गुहाया निरगमयदित्यर्थः। स ब्रह्मणस्पतिर्दिवे द्युलोकाय तत्रत्येभ्यो देवेभ्य इत्यर्थः। व्यभजच्च। ता गा विभक्ताश्चाकरोत्। स च गोसमूहो महीव रीतिः। महती स्रुतिरिव ॥ रीङ् स्रवणे ॥ यथा गंगादीनां स्रोतो विभक्तं सत् निम्नदेशाभिमुखं प्रसरति तथा शवसात्मीयेन बलेन तत्तद्देवगृहं पृथक् विभिन्नोऽसरत्। अगच्छत् ॥

॥ अथ पंचदशी ॥

ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो३ वयस्वतः।
वीरेषु वीराँ उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवं ॥ १५ ॥
ब्रह्मणः। पते। सुऽयमस्य। विश्वहा। रायः। स्याम। रथ्यः। वयस्वतः।
वीरेषु। वीरान्। उप। पृङ्धि। नः। त्वं। यत्। ईशानः। ब्रह्मणा। वेषि। मे। हवं ॥ १५ ॥

हे ब्रह्मणस्पते मंत्राधिपते सुयमस्य सुष्ठु नियंतव्यस्य वयस्वतोऽन्नयुक्तस्य रायो धनस्य विश्वहा विश्वेषु सर्वेष्वहःसु रथ्योऽधिपतयः स्याम। भूयास्म। रथा एषां संतीति रथ्यः ॥ छंदसीवनिपाविति मत्वर्थीय ईकारः ॥ अपि च नोऽस्माकं

वीरेषु वीर्याज्जातेष्वस्मदीयेषु पुत्रेषु वीरान् पुत्रान् त्वमुप पृङ्धि। संपृक्तान् कुरु। उत्पादय ॥ पृची संपर्के। रौधादिकः ॥ वयं पौत्रानपि लभेमहीति यावत्। ईशानः सर्वस्येश्वरस्त्वं ब्रह्मणा ॥ अन्ननामैतत् ॥ हविर्लक्षणेनान्नेन सह मे हवं मदीयं स्तुतिलक्षणमाह्वानं वेषि। कामयसे ॥ वी गतिप्रजननकांत्यसनखादनेषु ॥ अतो मयोक्तं कुर्वित्यर्थः ॥

॥ अथ षोडशी ॥

ब्रह्मणस्पते त्वमस्य यंता सूक्तस्य बोधि तनयं च जिन्व।
विश्वं तद्भद्रं यदवंति देवा बृहद्वदेम विदथे सुवीराः ॥ १६ ॥

ब्रह्मणः। पते। त्वं। अस्य। यंता। सुऽउक्तस्य। बोधि। तनयं। च। जिन्व।
विश्वं। तत्। भद्रं। यत्। अवंति। देवाः। बृहत्। वदेम। विदथे। सुऽवीराः ॥ १६ ॥

हे ब्रह्मणस्पते यंता सर्वस्य जगतो नियंता त्वमस्य सूक्तस्येदं सूक्तं ॥ क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥ बोधि। बुध्यस्व। बुद्धा तनयं पुत्रं चास्मभ्यं जिन्व। प्रेरय ॥ जिविः प्रीणनार्थः। अत्र प्रेरणे वर्तते धातूनामनेकार्थत्वात् ॥ यद्भद्रं कल्याणं देवाः सर्वेऽवंति रक्षंति विश्वं सर्वं तद्भद्रं च जिन्वेति शेषः। वयं च सुवीराः शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेताः संतो बृहत् प्रौढं स्तोत्रं विदथे। विदंति यष्टव्यतयास्मिन्देवान् जानंतीति विदथो यज्ञः। तस्मिन् वदेम। ब्रूयाम ॥

॥ इति द्वितीयस्य सप्तमे तृतीयो वर्गः ॥

इंधान इति पंचर्चं तृतीयं सूक्तं गार्त्समदं जागतं ब्राह्मणस्पत्यं। तथा चानुक्रांतं। इंधानः पंच जागतं त्विति। लैंगिको विनियोगः ॥

॥ तत्र प्रथमा ॥

इंधानो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत्।
जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ १ ॥

इंधानः। अग्निं। वनवत्। वनुष्यतः। कृतऽब्रह्मा। शूशुवत्। रातऽहव्यः। इत्।
जातेन। जातं। अति। सः। प्र। सर्सृते। यंऽयं। युजं। कृणुते। ब्रह्मणः। पतिः ॥ १ ॥

अग्निमिंधानो ब्रह्मणस्पतेर्योगार्थमग्निं प्रज्वलयन्यजमानो वनुष्यतो हिंसि-

ष्यतो हिंसां कुर्वतो वा शत्रून्वनवत्। वनुयात् हिंस्यात्॥ वनुष्यतिर्हंतिकर्मेति यास्कः। इदिति चार्थे॥ कृतब्रह्मा। ब्रह्म स्तोत्रं कृतं येन स तथोक्तः। रातहव्यः। रातं दत्तं हव्यं हविर्येन। एवंभूतः सन् शूशुवत्। वर्धते॥ टुओश्वि गतिवृद्ध्योः। अस्माण्ण्यंताल्लुङि रूपं॥ तथा यजमानो जातेन पुत्रेण जातं जनितमुत्पादितं स्वस्य पौत्रमति प्रसर्सृते। अतीत्य भृशं प्रसरति। पौत्रमपि पश्यन् चिरकालं जीवेदित्यर्थः॥ सर्तेर्यङ्लुगंताद्व्यत्ययेनात्मनेपदं॥ यंयं यजमानं ब्रह्मणस्पतिः स्तोत्रहविषोः स्वीकरणेन युजं सखायं कृणुते। कुरुते। स समान एव भवतीत्यर्थः॥

॥ अथ द्वितीया ॥

वीरेभिर्वीरान्वनवद्वनुष्यतो गोभी रयिं पप्रथद्बोधति त्मना।
तोकं च तस्य तनयं च वर्धते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥२॥

वीरेभिः। वीरान्। वनवत्। वनुष्यतः। गोभिः। रयिं। पप्रथत्। बोधति। त्मना।
तोकं। च। तस्य। तनयं। च। वर्धते। यंऽयं। युजं। कृणुते। ब्रह्मणः। पतिः ॥२॥

स यजमानो वीरेभिर्वीरैरात्मीयैः पुत्रैर्वनुष्यतो हिंसतो वीरान् शत्रुपुत्रान् वनवत्। वनुयात् हिंस्यात्। अपि च गोभिः सहितं धनं पप्रथत्। प्रथयति विस्तारयति॥ प्रथयतेर्लुङि चङ्येतद्रूपं॥ तथा त्मना आत्मनैव बोधति। सर्वं जानाति। अनन्याधीनज्ञानो भवतीत्यर्थः। किंच तस्य यजमानस्य तोकं पुत्रस्तनयं॥ विभक्तिव्यत्ययः॥ तनयस्तत्पुत्रश्च वर्धते। प्रवृद्धो भवति। यद्वा तोकं तनयं पुत्रं पौत्रं च ब्रह्मणस्पतिर्वर्धयति॥ वृधिरंतर्भावितण्यर्थो द्रष्टव्यः। अन्यद्गतं॥

॥ अथ तृतीया ॥

सिंधुर्न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रीँरभि वष्ट्योजसा।
अग्नेरिव प्रसितिर्नाह वर्तवे यंयं युजं कृणुते ब्रह्मणस्पतिः ॥३॥

सिंधुः। न। क्षोदः। शिमीऽवान्। ऋघायतः। वृषाऽइव। वध्रीन्। अभि। वष्टि। ओजसा।
अग्नेःऽइव। प्रऽसितिः। न। अह। वर्तवे। यंऽयं। युजं। कृणुते। ब्रह्मणः। पतिः ॥३॥

सिंधुः स्यंदनशीला नदी क्षोदो न क्षुद्यमानं कूलं यथा भिनत्ति तथा शिमीवान्। शिमीति कर्मनाम। ब्रह्मणस्पतेः परिचरणात्मना कर्मणा युक्तो यजमान ऋघायतो हिंसतः शत्रून् ओजसा बलेनाभिवष्टि। हंतुमभितः कामयते॥

वश कांतौ ॥ इदमपरं निदर्शनं। वृषेव वध्रीन्। वध्रयो निष्पिष्टमुष्का निर्वीर्या बलीवर्दाः। तान् यथा वृषा सेचनसमर्थः सवीर्यो वृषभोऽभिभवति तद्वच्छत्रूनभिभवतीत्यर्थः। अपि चासावग्नेरिव प्रसितिः। प्रसीयते बध्यतेऽनयेति प्रसितिर्ज्वाला ॥ षिञ् बंधने। करणे क्तिन् ॥ यथाग्नेर्ज्वालाप्रतिहतप्रसरा एवमपि न वर्तवे। वारयितुं निवर्तयितुं वा नैव शक्यते ॥ अहशब्दोऽवधारणे। वृणोतेरंतर्भावितण्यर्थात् वर्ततेर्वा तुमर्थे तवेन्प्रत्ययः। अन्यद्गतं ॥

॥ अथ चतुर्थी ॥

तस्मा अर्षंति दिव्या असश्चतः स सत्वभिः प्रथमो गोषु गच्छति।
अनिभृष्टतविषिर्हंत्योजसा यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ ४ ॥
तस्मै। अर्षंति। दिव्याः। असश्चतः। सः। सत्वऽभिः। प्रथमः। गोषु। गच्छति।
अनिभृष्टऽतविषिः। हंति। ओजसा। यंऽयं। युजं। कृणुते। ब्रह्मणः। पतिः ॥ ४ ॥

तस्मै यजमानाय दिव्या दिवि भवा वृष्टिलक्षणा आपोऽसश्चतोऽसज्यमाना अनिरुद्धाः सत्योऽर्षंति। गच्छंति प्राप्नुवंति ॥ अर्तेर्लेटि रूपं ॥ तथा स यजमानः सत्वभिः। सत्वानः साधकाः परिचारकाः। तैः सहितः प्रथमोऽन्येभ्यो यजमानेभ्योः पूर्वभावी सन् गोषु गच्छति। गवादिधनं प्राप्नोतीत्यर्थः। किंच अनिभृष्टतविषिः। तविषीति बलनाम। अनिभृष्टा परैरबाधिता तविषी बलं यस्य तादृशः सन् ओजसा बलेन हंति शत्रून् ॥

॥ अथ पंचमी ॥

तस्मा इद्विश्वे धुनयंत सिंधवोऽच्छिद्रा शर्म दधिरे पुरूणि।
देवानां सुम्ने सुभगः स एधते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ ५ ॥
तस्मै। इत्। विश्वे। धुनयंत। सिंधवः। अच्छिद्रा। शर्म। दधिरे। पुरूणि।
देवानां। सुम्ने। सुऽभगः। सः। एधते। यंऽयं। युजं। कृणुते। ब्रह्मणः। पतिः ॥ ५ ॥

तस्मा इत् तस्मा एव यजमानाय विश्वे सिंधवः सर्वाः स्यंदनशीला नद्यो धुनयंत। चलयंति। एतदभीष्टफलसिद्ध्यर्थं प्रवहंतीत्यर्थः। तथा अच्छिद्रा अच्छिद्राणि छिद्ररहितानि संततानि पुरूणि बहूनि शर्म शर्माणि सुखानि

दधिरे। तस्मा एव धार्यते। सुभगः शोभनधनो देवानां सुम्ने देवैः प्रत्ते सुखे वर्तमानः सन् एधते। वर्धते। शिष्टं स्पष्टं॥

॥ इति द्वितीयस्य सप्तमे चतुर्थो वर्गः॥

ऋजुरिति चतुर्ऋचं चतुर्थं सूक्तं गृत्समदस्यार्षं जागतं ब्राह्मणस्पत्यं। तथा चानुक्रांतं। ऋजुश्चतुष्कमिति। गतो विनियोगः॥

॥ तत्र प्रथमा॥

ऋ॒जुरिच्छंसो॑ वनव॒द्वनुष्य॒तो दे॑व॒यन्निददे॑वयंतम॒भ्य॑सत्।

सु॒प्रा॒वीरिद्व॑नवत्पृ॒त्सु दु॒ष्टरं॒ यज्वेदय॑ज्योर्वि भ॑जाति भोज॑नं॥१॥

ऋ॒जुः। इत्। शंसः॑। व॒न॒व॒त्। व॒नु॒ष्य॒तः। दे॒व॒ऽयन्। इत्। अदे॑वऽयंतं। अ॒भि। अ॒स॒त्।

सु॒प्र॒ऽअ॒वीः। इत्। व॒न॒व॒त्। पृ॒त्ऽसु। दु॒स्तरं॑। यज्वा॑। इत्। अय॑ज्योः। वि। भ॒जा॒ति॒। भोज॑नं॥१॥

ऋजुरित् आर्जवयुक्त एव। यद्वा ऋंजतिः प्रसाधनकर्मा। स्तोत्राणां प्रसाधक एव शंसो ब्रह्मणस्पतेः स्तोता वनुष्यतो हिंसतः शत्रून् वनवत्। वनुयात् हिंस्यात्॥ वनोतेर्हंतिकर्मण एतद्रूपं॥ तथा देवयन्नित् देवं दानादिगुणयुक्तं ब्रह्मणस्पतिमात्मन इच्छन्नेव अदेवयंतं तद्विपरीतं पुरुषमभ्यसत्। अभिभवेत्॥ अस्तेर्लेट्येतद्रूपं॥ तथा सुप्रावीरित्॥ अवतेस्तृप्त्यर्थादौणादिक ईकारप्रत्ययः॥ सुष्ठु प्रकर्षेण ब्रह्मणस्पतेस्तर्पयितैव पृत्सु पृतनासु संग्रामेषु दुस्तरं तरीतुमशक्यं वनवत्। हिंस्यात्। तथा यज्वेत् ब्रह्मणस्पतिं हविषेष्टवानेव अयज्योरयज्वनो भोजनं भोगसाधनं विभजाति। विशेषेण भजेतेत्यर्थः॥

॥ अथ द्वितीया॥

यज॑स्व वीर॒ प्र वि॑हि मनाय॒तो भ॒द्रं मनः॑ कृणुष्व वृत्र॒तूर्ये॑।

ह॒विष्कृ॑णुष्व सु॒भगो॒ यथास॑सि॒ ब्रह्म॑ण॒स्पते॒रव॒ आ वृ॑णीमहे॥२॥

यज॑स्व। वी॒र॒। प्र। वि॒हि॒। म॒ना॒य॒तः। भ॒द्रं। मनः॑। कृ॒णु॒ष्व॒। वृ॒त्र॒ऽतूर्ये॑।

ह॒विः। कृ॒णु॒ष्व॒। सु॒ऽभगः॑। यथा॑। अस॑सि। ब्रह्म॑णः। पतेः॑। अवः॑। आ। वृ॒णी॒म॒हे॒॥२॥

ऋषिरात्मीयं पुरुषं शास्ति। हे वीर विशेषेण स्तुतीनां प्रेरक सखे यजस्व। ब्रह्मणस्पतिं स्तुत्या पूजय। मनायतो मन इव शीघ्रं प्रवर्तमानान् हिंसकान्

यद्वा अभिमन्यमानान् शत्रून्प्रति प्रविहि। प्रकर्षेण युद्धार्थं गच्छ॥ वी गत्यादिषु। छांदसो ह्रस्वः॥ वृत्रतूर्ये वृत्राणामावरकाणां शत्रूणां हिंसाहेतुभूते संग्रामे भद्रं कल्याणं धार्ष्ट्योपेतं मनः कृणुष्व। कुरुष्व। ब्रह्मणस्पतेरनुग्रहात्तवैव जयो भविष्यति। तथा ब्रह्मणस्पतये हविश्चरुपुरोडाशादिकं कृणुष्व। कुरु। यथा त्वं सुभगः शोभनधनोऽससि। भवेः॥ अस्तेर्लेट्यडागमः॥ ब्रह्मणस्पतेर्योगेन त्वं शोभनधनो भविष्यसीति यावत्। अपि च वयं ब्रह्मणस्पतेरवो रक्षणमाभिमुख्येन वृणीमहे। प्रार्थयामहे॥

॥ अथ तृतीया ॥

स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः।
देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिं ॥३॥

सः। इत्। जनेन। सः। विशा। सः। जन्मना। सः। पुत्रैः। वाजं। भरते। धना। नृऽभिः।
देवानां। यः। पितरं। आऽविवासति। श्रद्धाऽमनाः। हविषा। ब्रह्मणः। पतिं ॥३॥

यो यजमानः श्रद्धामनाः श्रद्धा मनसि यस्य तादृशः सन् देवानां पितरं पालयितारं ब्रह्मणस्पतिं हविषा चरुपुरोडाशादिनाविवासति। परिचरति॥ विवासतिः परिचरणकर्मा॥ स इत् स एव यजमानो जनेन जातेन सर्वेण लोकेन वाजमन्नं भरते। बिभर्ति संभरति वा। स एव विशा प्रजयात्मीयेन बंधुजनेन वाजं भरते। स एव पुत्रैरात्मीयैरपत्यैर्वाजं भरते। तथा नृभिर्नेतृभिरन्यैः परिचारकैर्धना धनानि भरते। बिभर्ति संपादयति वा। ब्रह्मणस्पतिमिष्टवतो यजमानस्य सर्वतो जना अन्नधनयोः साधका भवंतीति यावत्॥

॥ अथ चतुर्थी ॥

यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः।
उरुष्यतीमंहसो रक्षती रिषोऽंहोश्चिदस्मा उरुचक्रिरद्भुतः ॥४॥

यः। अस्मै। हव्यैः। घृतवत्ऽभिः। अविधत्। प्र। तं। प्राचा। नयति। ब्रह्मणः। पतिः।
उरुष्यति। ईं। अंहसः। रक्षति। रिषः। अंहोः। चित्। अस्मै। उरुऽचक्रिः। अद्भुतः ॥४॥

यो यजमानोऽस्मै ब्रह्मणस्पतये॥ क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी॥ इमं ब्रह्मणस्पतिं घृतवद्भिरुपस्तरणाभिघारणात्मकेनाज्येनोपेतैर्ह-

व्यैहंविभिरविधत्। परिचरति ॥ विध विधाने तौदादिकः। अयं परिचरणकर्मसु पठितः ॥ तं यजमानं ब्रह्मणस्पतिः प्राचा प्राचीनेन ऋजुना मार्गेण प्रणयति। प्रकृष्टफलं प्रापयति। अपि च ईमेनमंहसः पापादुरुष्यति। रक्षति ॥ उरुष्यती रक्षाकर्मेति यास्कः ॥ तथा रिषो हिंसकादेनं रक्षति। अंहोश्चित्। अवृत्तेर्दारिद्र्यात्। यद्वा आगत्य हंतुरपि रक्षति। अपि चास्मै यजमानायाद्भुतः। महन्नामैतत्। आश्चार्यभूतो महान् ब्रह्मणस्पतिरुरुचक्रिरुरोर्विस्तीर्णस्योपकारस्य कर्ता भवति ॥

॥ इति द्वितीयस्य सप्तमे पंचमो वर्गः ॥

इमा गिर इति सप्तदशर्चं पंचमं सूक्तं गृत्समदपुत्रस्य कूर्मस्यार्षं गृत्समदस्यैव वा त्रैष्टुभमादित्यदेवताकं। तथा चानुक्रांतं। इमा गिरस्त्र्यूना कूर्मो गार्त्समदो हि वादित्यमिति ॥ सूक्तविनियोगो लैंगिकः। आदित्यदेवताके पशौ पुरोडाशस्येमा गिर इत्येषानुवाक्या। अग्नीषोमाविति खंडे सूचितं। इमा गिर आदित्येभ्यो घृतस्नूस्त आदित्यास उरवो गभीराः। आ॰ ३. ८.। इति ॥

॥ सैषा सूक्ते प्रथमा ॥

इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः ॥१॥

इमाः। गिरः। आदित्येभ्यः। घृतऽस्नूः। सनात्। राजऽभ्यः। जुह्वा। जुहोमि।
शृणोतु। मित्रः। अर्यमा। भगः। नः। तुविऽजातः। वरुणः। दक्षः। अंशः ॥१॥

आदित्येभ्योऽदितेः पुत्रेभ्यो राजभ्यो राजमानेभ्य ईश्वरेभ्यो वा मित्रादिभ्यो घृतस्नूर्घृतप्रस्राविनीर्घृतं क्षरंतीरिमा गिरः स्तुतिलक्षणा वाचः सनात्सर्वदा जुह्वा। वाङ्नामैतत्। वागिंद्रियेण जुहोमि। प्रयच्छामि। करोमीति यावत्। यद्वा जुहूस्थानीयेन घृतं क्षरंति वाग्रूपाणि हवींषि जुहोमि। आदित्यानुद्दिश्य त्यजामि। मंत्राणां पयोघृतादिक्षरणहेतुत्वं च य ऋचोऽधीते पयसः कूल्या अस्येत्यादिना तैत्तिरीये स्पष्टमाम्नातं। नोऽस्मदीयास्ता गिरो मित्रादयः प्रत्येकं शृणोतु। ते च तैत्तिरीयेऽष्टौ पुत्रासो अदितेरित्युपक्रम्य स्पष्टमनुक्रांताः। मित्रश्च वरुणश्च धाता चार्यमा च अंशुश्च भगश्च इंद्रश्च विवस्वाँश्चेत्येत इति। मित्रः प्रमीतेस्त्रायकः। यद्वा सर्वेषां स्निग्धः। अरीन् यच्छति नियच्छतीत्यर्यमा।

भगो भजनीयो देवः । तुवीति बहुनाम । बहुषु देशेष्वनुग्रहार्थं प्रादुर्भूतः । वरुणविशेषणमेतत् । पापस्य निवारणाद्वरुणः । दक्षः समर्थः । एतच्चांशस्य विशेषणं । एते प्रत्येकं शृणोतु ॥

पूर्वोक्त एव पशाविमं स्तोममित्येषा वपाया याज्या । सूत्रितं च । इमं स्तोमं सक्रतवो मे अद्य तिस्रो भूमीर्धारयन् त्रीरुत द्यून् । आ॰ ३. ८. । इति ॥

॥ सैषा सूक्ते द्वितीया ॥

इ॒मं स्तोमं॒ स॒क्रतवो मे अ॒द्य मि॒त्रो अ॑र्य॒मा वरु॑णो जुषंत ।

आ॒दि॒त्यास॒ः शुच॑यो॒ धार॑पूता॒ अवृ॑जिना अनव॒द्या अरि॑ष्टाः ॥२॥

इ॒मं । स्तोमं॑ । सऽक्र॑तवः । मे॒ । अ॒द्य । मि॒त्रः । अ॒र्य॒मा । वरु॑णः । जु॒ष॒न्त॒ ।

आ॒दि॒त्यास॑ः । शुच॑यः । धार॑ऽपूताः । अवृ॑जिनाः । अ॒न॒व॒द्याः । अरि॑ष्टाः ॥२॥

इमं मेऽस्मदीयं स्तोमं स्तोत्रं सक्रतवः समानकर्माणः समानप्रज्ञा वा मित्रादयोऽद्येदानीं जुषंत । जुषंतां सेवंतां । कीदृशास्ते । आदित्यासोऽदितेः पुत्राः शुचयो दीप्यमानाः । धारपूता उदकधाराभिरिव पूताः । निर्मला इत्यर्थः । अवृजिनाः । वृजी वर्जने । अवर्जितारः । सर्वानुग्राहका इत्यर्थः । अनवद्याः । अवद्येन गर्ह्येण पापेन रहिताः । अरिष्टाः केनाप्यहिंसिताः ॥

तस्मिन्नेव पशौ त आदित्यास इति हविषोऽनुवाक्या । सूत्रं तु पूर्वमेवोदाहृतं ॥

॥ सैषा तृतीया ॥

त आ॑दि॒त्यास॑ उ॒रवो॑ गभी॒रा अद॑ब्धासो॒ दिप्स॑न्तो भूर्य॒क्षाः ।

अ॒न्तः प॑श्यन्ति वृ॒जि॒नोत सा॒धु सर्वं॒ राज॑भ्यः प॒र॒मा चि॒दन्ति॑ ॥३॥

ते । आ॒दि॒त्यास॑ः । उ॒रव॑ः । ग॒भी॒राः । अद॑ब्धासः । दिप्स॑न्तः । भू॒रि॒ऽअ॒क्षाः ।

अ॒न्तरिति॑ । प॒श्य॒न्ति॒ । वृ॒जि॒ना । उ॒त । सा॒धु । सर्वं॑ । राज॑ऽभ्यः । प॒र॒मा । चि॒त् । अन्ति॑ ॥३॥

त आदित्यासोऽदितेः पुत्रा उरवो महांतो गभीरा गांभीर्योपेता अदब्धासः शत्रुभिरहिंसिताः संतो दिप्संतः शत्रून्दंभितुं हिंसितुमिच्छंतः ॥ दंभु दंभे । अस्मादिच्छासनि सनीवंतर्धेतीडभावपक्षे दंभ इच्चेतीकारः । दंभेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धमिति सनः कित्त्वेऽनुनासिकलोपः ॥ तथा भूर्यक्षाः । भूरीणि बहून्यक्षीणि चक्षूंषि येषां ते तथोक्ताः । बहुतेजसो वा ॥ बहुव्रीहौ सक्थ्यक्ष्णोरिति

षच्समासांतः ॥ एवंभूता आदित्या अंतर्मध्ये प्राणिनां हृदि प्रेरकतया वर्तमानाः संतो वृजिना वृजिनानि पापानि उत अपि च साधु साधूनि पुण्यानि च प्राणिभिः कृतानि पश्यंति । जानंति । परमा चित् परमाणि दूरदेशावस्थितान्यपि सर्वं सर्वाणि दृश्यमानानि राजभ्यो राज्ञामीश्वराणामादित्यानामंति । अंतिके समीपे वर्तंत इति शेषः ॥ कादिलोपो बहुलमित्यंतिकशब्दस्य कादिलोपः ॥

साग्निचित्ये क्रतौ दीक्षणीयायामादित्ययागस्य धारयंत इत्यादिके द्वे याज्यानुवाक्ये । अत एव भुवद्वद्भुवनपतिविशेषणविशिष्टादित्ययागेऽपि । तथा च दीक्षणीयायामिति खंडे सूचितं । धारयंत आदित्यासो जगत्स्था इति द्वे एते एव भुवद्वद्भ्यो भुवनपतिभ्यो वा । आ॰ ४. २. । इति ॥

॥ तयोराद्या सूक्ते चतुर्थ्येषा ॥

धा॒रयं॑त आ॒दि॒त्यासो॒ जग॒त्स्था दे॒वा विश्व॑स्य॒ भुव॑नस्य गो॒पाः ।
दी॒र्घाधि॑यो॒ रक्ष॑माणा असु॒र्य॑मृ॒तावा॑न॒श्चय॑माना ऋ॒णानि॑ ॥४॥

धा॒रयं॑तः । आ॒दि॒त्यासः॑ । जग॑त् । स्थाः । दे॒वाः । विश्व॑स्य । भुव॑नस्य । गो॒पाः ।
दी॒र्घऽधि॑यः । रक्ष॑माणाः । अ॒सु॒र्य॑ । ऋ॒तऽवा॑नः । चय॑मानाः । ऋ॒णानि॑ ॥४॥

जगज्जंगमं स्थाः स्थावरं च ॥ तिष्ठतेः कर्तर्यसुन् ॥ एतदुभयविधं भूतजातं धारयंतोऽवस्थापयंतो देवा दानादिगुणयुक्ता विश्वस्य भुवनस्य सर्वस्य लोकस्य गोपा गोपयितारो रक्षका दीर्घाधियो दीर्घाणि धियः कर्माणि वा येषां तादृशाः ॥ अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घः ॥ असुर्यं । असवः प्राणाः । तेन च तद्धेतुभूता आपो लक्ष्यंते । अपां तद्धेतुत्वं च छांदोग्ये स्पष्टमाम्नातं । आपोमयः प्राण इति । असुमुदकं ददातीत्यसुरो मेघः । तत्र भवं मेघांतर्वर्तमानमुदकं रक्षमाणाः । तत्तत्काले वृष्ट्युत्पादनाय रक्षंतः ॥ असुरशब्दाद्भवे छंदसीति यत् ॥ ऋतावानः सत्यवंतो यज्ञवंतो वा ॥ छंदसीवनिपाविति मत्वर्थीयो वनिप् । पूर्ववद्दीर्घः ॥ ऋणानि स्तोतृभिरन्येभ्यः प्रदेयानि चयमाना अपगमयंतः ॥ चय गतौ । भौवादिकोऽनुदात्तेत् ॥ एवंगुणविशिष्टानुग्रहा वा अस्मदधीना भवंत्विति शेषः ॥

॥ अथ पंचमी ॥

विद्यामादित्या अवसो वो अस्य यदर्यमन्भय आ चिन्मयोभु ।
युष्माकं मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्यां ॥५॥
विद्यां। आदित्याः। अवसः। वः। अस्य। यत्। अर्यमन्। भये। आ। चित्। मयःऽभु।
युष्माकं। मित्रावरुणा। प्रऽनीतौ। परि। श्वभ्राऽइव। दुःऽइतानि। वृज्यां ॥५॥

हे आदित्याः अदितेः पुत्रा वो युष्माकमस्यावसः ॥ कर्मणि षष्ठी ॥ इदं रक्षणं विद्यां। लभेय। भये राक्षसादिभ्य आगते सति यद्युष्मदीयं रक्षणं। चिच्छब्दश्चार्थे। मयोभु मयसः सुखस्य भावयितृ च तदिदं लभेयेत्यन्वयः। हे अर्यमन् हे मित्रावरुणा युष्माकं प्रणीतावस्मद्विषये प्रकृष्टे नयने सति श्वभ्रेव श्वभ्राणीव स्यातुमयोग्यानि गर्तवंति स्थलानीव दुरितानि पापानि परिवृज्यां। परित्यजेयं ॥ वृजी वर्जने। बहुलं छंदसीति विकरणस्य लुक् ॥

॥ इति द्वितीयस्य सप्तमे षष्ठो वर्गः ॥

॥ अथ षष्ठी ॥

सुगो हि वो अर्यमन्मित्र पंथा अनृक्षरो वरुण साधुरस्ति ।
तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहंतु शर्म ॥६॥
सुऽगः। हि। वः। अर्यमन्। मित्र। पंथाः। अनृक्षरः। वरुण। साधुः। अस्ति।
तेन। आदित्याः। अधि। वोचत। नः। यच्छत। नः। दुःऽपरिहंतु। शर्म ॥६॥

हे अर्यमन् मित्र वरुण वो युष्माकं सुगः सुखेन गंतव्योऽनृक्षरः। ऋक्षरः कंटक ऋच्छतेरिति। तद्रहितः साधुः साधकः शोभनो वा। एवंगुणविशिष्टः पंथा मार्गोऽस्ति। विद्यते खलु। अतस्तेन पथास्मान् शोभनं नयतेति शेषः। हे आदित्या नोऽस्माकमधिवोचत। अधिवचनं पक्षपातेन वचनं कुरुत। अपि च नोऽस्मभ्यं दुष्परिहंतु परिहंतुं विनाशयितुमशक्यं शर्म सुखं यच्छत। दत्त॥ दाण् दाने। शपि पाघ्रेत्यादिना यच्छादेशः ॥

॥ अथ सप्तमी ॥

पिपर्तु नो अदिती राजपुत्राति द्वेषांस्यर्यमा सुगेभिः ।
बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः ॥७॥
पिपर्तु । नः । अदितिः । राजऽपुत्रा । अति । द्वेषांसि । अर्यमा । सुऽगेभिः ।
बृहत् । मित्रस्य । वरुणस्य । शर्म । उप । स्याम । पुरुऽवीराः । अरिष्टाः ॥७॥

राजपुत्रा राजानो राजमाना मित्रादयः पुत्रा यस्यास्ताहश्यदितिरदीना अखंडनीया वा देवी नोऽस्मान् द्वेषांसि द्वेष्टॄणि रक्षांस्यति पिपर्तु । अति पारयतु । अतिक्रम्य तद्रहितं देशं प्रापयत्वित्यर्थः । अर्यमा च सुगेभिः सुष्ठु गंतव्यैर्मार्गैरस्मान्पारयतु । अपि च वयं पुरुवीरा बहुभिर्वीरैः पुत्रादिभिरुपेता अरिष्टाः केनाप्यहिंसिताश्च संतो मित्रस्य वरुणस्य च बृहत्परिवृढं शर्म सुखमुपस्याम । उपगता भवेम ॥

पूर्वोक्ते पशौ तिस्रो भूमीरिति पुरोडाशस्य याज्या । सूत्रं पूर्वमेवोदाहृतं ॥

॥ सैषा सूक्तेऽष्टमी ॥

तिस्रो भूमीर्धारयन् त्रीरुत द्यून्त्रीणि व्रता विदथे अंतरेषां ।
ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ॥८॥
तिस्रः । भूमीः । धारयन् । त्रीन् । उत । द्यून् । त्रीणि । व्रता । विदथे । अंतः । एषां ।
ऋतेन । आदित्याः । महि । वः । महिऽत्वं । तत् । अर्यमन् । वरुण । मित्र । चारु ॥८॥

तिस्रो भूमीः । अत्र भूमीशब्दो लोकत्रये वर्तते । यो द्वितीयस्यां तृतीयस्यां पृथिव्यामित्यत्र यथा पृथिवीशब्दः । भूम्यंतरिक्षस्वर्गास्त्रीन् लोकान् आदित्या धारयन् । वृष्टिप्रदानादिना धारयंति । उत अपि च द्यून् दीप्तान् तत उपरितनान् महरादिकानपि त्रीन् लोकान् धारयंति । यद्वा दीप्तान् अग्निं वायुं सूर्यं च धारयंति । अपि चैषामादित्यानां विदथे यज्ञेऽंतर्मध्ये त्रीणि व्रता सवनत्रयनिष्पाद्यानि त्रीणि कर्माणि संति । यद्वा एषां लोकानामंतर्मध्ये विदथे यज्ञे निमित्तभूते सति एषामादित्यानां त्रीणि कर्माणि रसादानधारणविसर्जनलक्षणानि संति । उत्तरोऽर्धर्चः प्रत्यक्षकृतः । हे आदित्याः ऋतेन सत्येन यज्ञेन वा

महि महत् प्रभूतं वो युष्माकं महित्वं महत्त्वं यन्महाभाग्यं हे अर्यमन् वरुण मित्र तन्महाभाग्यं चारु। शोभनं सर्वोत्कृष्टमित्यर्थः ॥

॥ अथ नवमी ॥

त्री रोचना दिव्या धारयंत हिरण्ययाः शुचयो धारपूताः।
अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥९॥
त्री। रोचना। दिव्या। धारयंत। हिरण्ययाः। शुचयः। धारऽपूताः।
अस्वप्नऽजः। अनिऽमिषाः। अदब्धाः। उरुऽशंसाः। ऋजवे। मर्त्याय ॥९॥

त्री रोचना त्रीणि रोचनानि रोचमानाग्न्यादीनि तेजांसि दिव्या दिव्यानि दिविभवानि धारयंत। आदित्या अवास्थापयन्। किमर्थं। ऋजवे ऋजीकाय स्तोत्राणां मर्त्याय मनुष्याय भोगसिद्ध्यर्थमिति यावत्। कीदृशा आदित्याः। हिरण्ययाः। हिरण्मया हिरण्यालंकृतसर्वांगाः। यद्वा हितरमणीयवेषाः। शुचयो दीप्यमानाः। धारपूता उदकधारया क्षालिता इव निर्मलाः। अस्वप्नजोऽसंजातस्वप्नाः॥ सुपां सुलुगिति जसः सुः॥ अपर आह। अस्वप्नजोऽस्वपंतो विगतनिद्राः॥ स्वपितृषोर्नजिङ्गिति नजिङ्प्रत्यय इति तदेतत्पदकारस्यानभिमतं॥ अनिमिषा निमेषरहिताः। अदब्धा असुरादिभिरहिंसिताः। उरुशंसा उरुभिर्बहुभिः शंसनीयाः स्तोतव्याः। एवंगुणविशिष्टा अधारयंतेत्यन्वयः॥

॥ अथ दशमी ॥

त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः।
शतं नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा ॥१०॥
त्वं। विश्वेषां। वरुण। असि। राजा। ये। च। देवाः। असुर। ये। च। मर्ताः।
शतं। नः। रास्व। शरदः। विऽचक्षे। अश्याम। आयूंषि। सुऽधितानि। पूर्वा ॥१०॥

हे असुर शत्रूणां क्षेपक वरुण त्वं विश्वेषां सर्वेषां राजासि। केषां। ये च देवा देवजनाः ये च मर्ता मरणधर्माणो मनुष्याः। तेषामित्यर्थः। अतस्त्वं नोऽस्मभ्यं शतं शरदः शतसंख्याकान् संवत्सरान् विचक्षे विशेषेण दर्शनाय रास्व। प्रयच्छ॥ रा दाने। व्यत्ययेनात्मनेपदं॥ वयं च पूर्वा पूर्वैर्देवैः सुधितानि सुष्ठु हितानि शतसंवत्सरलक्षणान्यायूंष्यश्याम। व्याप्नुयाम॥ सुधितवसुधितने-

मधितधिष्वधिषीय चेति निपात्यते । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । पूर्वा । सुपां सुलुगिति तृतीयाया डादेशः ॥

॥ इति द्वितीयस्य सप्तमे सप्तमो वर्गः ॥

आदित्यदेवताके पशौ न दक्षिणेत्येषा हविषो याज्या । तिस्रो भूमीर्धारयन्नीरुत द्यून् न दक्षिणा वि चिकिते न सव्या । आ० ३. ८. । इति ॥

॥ सैषा सूक्त एकादशी ॥

न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्यां ॥११॥

न । दक्षिणा । वि । चिकिते । न । सव्या । न । प्राचीनं । आदित्याः । न । उत । पश्चा ।
पाक्या । चित् । वसवः । धीर्या । चित् । युष्माऽनीतः । अभयं । ज्योतिः । अश्यां ॥११॥

हे आदित्याः दक्षिणा दक्षिणो भागो न विचिकिते । मया न विज्ञायते । सव्या सव्यो वामभागोऽपि न ज्ञायते ॥ उभयत्र सुपां सुलुगिति सोराजादेशः । तथा प्राचीनं पुरस्तादपि न ज्ञायते ॥ विभाषांचेरदिक्स्त्रियामिति स्वार्थे खः ॥ उत अपि च पश्चा पश्चात् पृष्ठभागेऽपि न ज्ञायते । नैशेन तमसावृतत्वात् आंतरादज्ञानाद्वा ॥ पश्च पश्चा च छंदसि । पा० ५. ३. ३३. । इति निपात्यते ॥ किं बहुना । पाक्या चित् । पाक्यः पक्तव्योऽपरिपक्वज्ञानोऽपि ॥ डुपचष् पाके । ऋहलोर्ण्यत् । तित्स्वरितः ॥ धीर्या चित् धीरे नेतव्यत्वेन भवो धीर्यः कातरः ॥ भवे छंदसीति यत् ॥ कातरोऽपि ॥ उभयत्र सुपां सुलुगित्याकारः ॥ हे वसवो वासयितार आदित्या युष्मानीतो युष्माभिर्नीतः शोभनेन मार्गेण प्रापितः सन् अभयं भयरहितं ज्योतिः सौरं तेज आंतरं वा ज्ञानात्मकमश्यां । प्राप्नुयां ॥

॥ अथ द्वादशी ॥

यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयंति पुष्टयश्च नित्याः ॥
स रेवान्याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः ॥१२॥

यः । राजऽभ्यः । ऋतनिऽभ्यः । ददाश । यं । वर्धयंति । पुष्टयः । च । नित्याः ।
सः । रेवान् । याति । प्रथमः । रथेन । वसुऽदावा । विदथेषु । प्रऽशस्तः ॥१२॥

यो यजमानो राजभ्यो राजमानेभ्य ऋतनिभ्य ऋतस्य सत्यस्य वा नेतृभ्य आदित्येभ्यो ददाश । चरुपुरोडाशादिकं ददाति । यं यजमानं पुष्टयः पोषका नित्याः शाश्वता आदित्याश्च वर्धयंति । स यजमानो रेवान्धनवान् प्रथमः प्रथितः प्रख्यातः वसुदावा वसूनां धनानां दावा सन् प्रशस्तः सर्वैः प्रशस्यमानो विदथेषु वेद्येषु लब्धव्येषु गृहेषु रथेन वाहनेन याति । गच्छति ॥

॥ अथ त्रयोदशी ॥

शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।
नकिष्टं घ्नंत्यंतितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥ १३ ॥

शुचिः । अपः । सुऽयवसाः । अदब्धः । उप । क्षेति । वृद्धऽवयाः । सुऽवीरः ।
नकिः । तं । घ्नंति । अंतितः । न । दूरात् । यः । आदित्यानां । भवति । प्रऽनीतौ ॥ १३ ॥

स यजमानः शुचिर्दीप्यमानः शुद्धो वा अदब्धः सपत्नैरबाधितो वृद्धवयाः प्रभूतान्नः सुवीरः शोभनपुत्रश्च सन् सूयवसाः शोभनसस्यान्यपो वृष्टिलक्षणान्युदकान्युपक्षेति । उपनिवसति । सर्वदा सुसस्यानामपां समीपे निवसतीत्यर्थः । तथा नकिर्नच तं घ्नंति हिंसंत्यंतितो न अंतिकात्समीपदेशाच्च दूराद्विप्रकृष्टाच्च देशादागता बाधकाः ॥ अंतिकस्य तसिलादिलोप इति लोपः ॥ यो यजमान आदित्यानामदितेः पुत्राणां मित्रादीनां प्रणीतौ प्रकृष्टे नयने प्रापणे भवति वर्तते स इति पूर्वत्र संबंधः ॥

॥ अथ चतुर्दशी ॥

अदिते मित्र वरुणोत मृळ यद्वो वयं चकृमा कच्चिदागः ।
उर्वश्यामभयं ज्योतिरिंद्र मा नो दीर्घा अभि नशन्तमिस्राः ॥ १४ ॥

अदिते । मित्र । वरुण । उत । मृळ । यत् । वः । वयं । चकृम । कत् । चित् । आगः ।
उरु । अश्यां । अभयं । ज्योतिः । इंद्र । मा । नः । दीर्घाः । अभि । नशन् । तमिस्राः ॥ १४ ॥

उत अपि च हे अदिते मित्र वरुण ॥ आमंत्रितं पूर्वमविद्यमानवदिति पूर्वपूर्वस्यामंत्रितस्याविद्यमानवद्भावात् सर्वेषां षाष्ठिकमामंत्रितस्येत्याद्युदात्तत्वं ॥ यूयं प्रत्येकं मृळ । अस्माकमुपरि दयां कुरु । रक्षेत्यर्थः । यत् यद्यपि वयं वो युष्माकं कच्चित् किंचिदागोऽपराधं चकृम । अकर्म । तथापि मृळेत्यर्थः । हे इंद्र

परमैश्वर्योपेतादित्य उरु विस्तीर्णमभयं भयरहितं ज्योतिस्त्वदीयं प्रकाशं ज्ञानात्मकं वाश्यां । अहं प्राप्नुयां । दीर्घा विस्तृतास्तमिस्रास्तमसा युक्ता निशाः ॥ ज्योत्स्नातमिस्राशृंगिणा । पा॰ ५. २. ११४. । इति निपात्यते ॥ ता नोऽस्मान् माभिनशन् । माभिमुख्येन व्याप्नुवंतु ॥

॥ अथ पंचदशी ॥

उ॒भे अ॑स्मै पीपयतः समी॒ची दि॒वो वृ॒ष्टिं सु॒भगो॒ नाम॒ पुष्य॑न् ।
उ॒भा क्षया॑वा॒जय॑न्याति पृ॒त्सूभाव॑र्द्धौ भवतः सा॒धू अ॑स्मै ॥ १५ ॥

उ॒भे इति॑ । अ॒स्मै॒ । पी॒प॒य॒तः॒ । स॒मी॒ची इति॑ सं॒ऽई॒ची । दि॒वः । वृ॒ष्टिं । सु॒ऽभगः॑ । नाम॑ । पुष्य॑न् ।
उ॒भा । क्षयौ॑ । आ॒ऽजय॑न् । या॒ति॒ । पृ॒त्ऽसु । उ॒भौ । अर्द्धौ॑ । भ॒व॒तः॒ । सा॒धू इति॑ । अ॒स्मै॒ ॥ १५ ॥

य आदित्यानां भवति प्रणीताविति व्यवहितोऽप्यचेदंशब्देन परामृश्यते । अस्मै यजमानाय समीची संगच्छमाने उभे द्यावापृथिव्यौ पीपयतः । प्याययतः । कामान्वर्धयतः ॥ प्यायी वृद्धौ । अस्माण्यंताच्छांदसो लुङ् । व्यत्ययेन तसस्तामादेशाभवो धातोः पीभावश्च ॥ स च सुभगः शोभनधनो दिवो द्युलोकादागतां वृष्टिं पुष्यन् वर्धयन् भवति । नामेति प्रसिद्धिर्द्योत्यते । किंच पृत्सु पृतनासु संग्रामेष्वाजयन् शत्रूनाभिमुख्येनाभिभवन् उभा क्षयावुभौ निवासौ ॥ क्षियंति निवसंत्यस्मिन्निति क्षयो निवासस्थानं । पुंसि संज्ञायां घः प्रायेणेत्यधिकरणे घः । क्षयो निवास इत्याद्युदात्तत्वं ॥ तौ परैरनाक्रांतं स्वकीयं निवासस्थानं आत्मनापहृतं परकीयं निवासस्थानं च याति । गच्छति । तथास्मै यजमानायोभावर्द्धौ जगतो भागौ चराचरात्मकौ मर्त्यामर्त्यात्मकौ वा साधू साधकौ भवतः ॥

॥ अथ षोडशी ॥

या वो॑ मा॒या अ॑भि॒द्रुहे॑ यजत्राः पाशा॑ आदित्या रि॒पवे॒ विचृ॑त्ताः ।
अश्वी॑व॒ ताँ अति॑ येषं॒ रथे॒नारि॑ष्टा उ॒रावा शर्म॑न्त्स्याम ॥ १६ ॥

याः । वः॒ । मा॒याः । अ॒भि॒ऽद्रुहे॑ । य॒ज॒त्राः॒ । पाशाः॑ । आ॒दि॒त्याः॒ । रि॒पवे॑ । विऽचृ॑त्ताः ।
अ॒श्वीऽइ॑व । तान् । अति॑ । ये॒षं॒ । रथे॑न । अरि॑ष्टाः । उ॒रौ । आ । शर्म॑न् । स्या॒म॒ ॥ १६ ॥

हे यजत्रा यष्टव्या आदित्या वो युष्माकं या माया अभिद्रुहेऽभिद्रोहं कुर्वते राक्षसादये निर्मिताः ये च पाशा रिपवे शत्रवे विचृत्ताः ॥ चृती हिंसाग्रंथनयोः ।

प्रसारिता इत्यर्थः। तान्पाशान् मायाश्च रथेनातियेषं। अतीत्य प्रयतेयं। अतितरेयमित्यर्थः। तत्र दृष्टांतः। अश्वीव। यथा शोभनाश्वः कश्चित्पुरुषो दुस्तरान्मार्गान् शीघ्रमतिक्रामति तद्वत्॥ येषृ प्रयत्ने भौवादिकोऽनुदात्तेत्। छांदसो लङ्। व्यत्ययेन परस्मैपदं॥ तथा वयमरिष्टाः शत्रुभिरहिंसिताः संत उरौ विस्तीर्णे शर्मन्॥ शर्मेति गृहनाम॥ त्वया दत्ते सुखे गृहे वा आ समंतात् स्याम। वर्तमाना भवेम॥

॥ सप्तदशी ॥

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः॥१७॥
मा। अहं। मघोनः। वरुण। प्रियस्य। भूरिऽदाव्नः। आ। विदं। शूनं। आपेः।
मा। रायः। राजन्। सुऽयमात्। अव। स्थां। बृहत्। वदेम। विदथे। सुऽवीराः॥१७॥

हे वरुण मघोनो धनवतः प्रियस्यानुकूलस्य भूरिदाव्नो भूरेर्बहुलस्य दातुराप्यस्याहं मा आविदं। मावेदयानि। आवेदनं विज्ञापनं मा करवाणि। किं तदनावेद्यं। आपेर्ज्ञातेः शूनं शून्यं दारिद्र्यं॥ वर्णलोपश्छांदसः॥ यद्वा शूनं गतं प्राप्तं दारिद्र्यं॥ टुओश्वि गतिवृद्ध्योः। श्वीदितो निष्ठायामितीट्प्रतिषेधः। यजादित्वात्संप्रसारणं। ओदितश्चेति नकारः। वृषादित्वादाद्युदात्तत्वं॥ एतदुक्तं भवति अस्मदीयाः पुत्रादयः क्षुधिता इति प्रभुप्रभुसमीपेऽभिधाय याचमानो मा भूवमिति। हे राजन् सुयमात्। सुष्ठु नियम्यतेऽनेन पुरुषो गृह इति सुयमः॥ ईषद्दुःसुष्विति खल्॥ तादृशाद्रायो धनान्मावस्थां। अवयुत्य स्थितो मा भूवं। वयं सुवीराः शोभनपुत्रा विदथे यज्ञे गृहे वर्तमानाः संतो बृहत् प्रौढं स्तोत्रं वदेम। उच्चारयाम॥

॥ इति द्वितीयस्य सप्तमेऽष्टमो वर्गः॥

इदमित्येकादशर्चं षष्ठं सूक्तं। अत्रानुक्रम्यते। इदमेकादश वारुणमिति। पूर्वसूक्ते कूर्मो गार्त्समदो हि वेत्युक्तत्वादस्योत्तरस्य च कूर्मो गृत्समदो वा ऋषिः। त्रिष्टुप् छंदः। वरुणो देवता। विनियोगो लैंगिकः। अत्र केचिदाहुः। इदमेकादशर्चं तु वारुणं भयपापनुत्। ऋणदारिद्र्यदुःस्वप्ननाशनं चेति शुश्रुमेति॥

॥ तत्र प्रथमा ॥

इ॒दं क॒वेरा॑दि॒त्यस्य॑ स्व॒राजो॒ विश्वा॑नि॒ सांत्य॒भ्य॑स्तु म॒ह्ना ।
अति॒ यो मं॒द्रो य॒जथा॑य दे॒वः सु॑की॒र्तिं भि॑क्षे॒ वरु॑णस्य॒ भूरेः॑ ॥१॥

इ॒दं । क॒वेः । आ॒दि॒त्यस्य॑ । स्व॒ऽराजः॑ । विश्वा॑नि । संति॑ । अ॒भि । अ॒स्तु । म॒ह्ना ।
अति॑ । यः । मं॒द्रः । य॒जथा॑य । दे॒वः । सु॒ऽकी॒र्तिं । भि॒क्षे॒ । वरु॑णस्य । भूरेः॑ ॥१॥

कवेः क्रांतदर्शिन आदित्यस्यादितेः पुत्रस्य स्वराजः स्वयमेव राजमानस्येश्वरस्य वा वरुणस्येदं हविः स्तोत्रं वा यजमानः करोतीति शेषः । स च विश्वानि सर्वाणि सांति द्वितीयभावविकारभांजि भूतजातानि मह्ना महिम्ना वरुणप्रसादाल्लब्धेनाभ्यस्तु । अभिभवतु । यो देवो द्योतमानो वरुणो यजथाय यष्ट्रे पुरुषाय अति अतिशयेन मंद्रः स्तुत्यो हर्षयिता वा भवति तस्य भूरेर्भर्तुर्वरुणस्य सुकीर्त्तिं शोभनां स्तुतिं भिक्षे । प्रार्थये । यद्वा वरुणस्येति तृतीयार्थे षष्ठी । तेन वरुणेन दातव्यां शोभनां कीर्त्तिमहं याचे ॥

॥ अथ द्वितीया ॥

तव॑ व्र॒ते सु॒भगा॑सः स्याम स्वा॒ध्यो॑ वरुण तुष्टु॒वांसः॑ ।
उ॒पाय॑न उ॒षसां॒ गोम॑तीनाम॒ग्नयो॒ न जर॑माणा॒ अनु॒ द्यून् ॥२॥

तव॑ । व्र॒ते । सु॒ऽभगा॑सः । स्या॒म॒ । सु॒ऽआ॒ध्यः॑ । व॒रु॒ण॒ । तु॒स्तु॒ऽवांसः॑ ।
उ॒प॒ऽअय॑ने । उ॒षसां॑ । गोऽम॑तीनां । अ॒ग्नयः॑ । न । जर॑माणाः । अनु॑ । द्यून् ॥२॥

हे वरुण स्वाध्यः शोभनाध्यानास्तुष्टुवांसः स्तुतवंतो वयं तव व्रते त्वदीये परिचरणाख्ये कर्मणि वर्तमानाः सुभागासः स्याम । शोभनधना भवेम । अपि च गोमतीनां रश्मिभिर्युक्तानामुषसामुपायन उपागमने सत्यग्नयो न यथाग्नयोऽग्निहोत्रादिकर्मार्थं समिध्यंते एवमनु द्यून् अनुदिनं जरमाणास्त्वां स्तुवंतो वयं दीप्यमाना भवेम ॥

॥ अथ तृतीया ॥

तव॑ स्याम पुरु॒वीर॑स्य॒ शर्म॑न्नुरु॒शंस॑स्य वरुण प्रणेतः ।
यू॒यं नः॑ पुत्रा अदितेरदब्धा अ॒भि क्ष॑मध्वं॒ युज्या॑य देवाः ॥३॥

तव। स्याम। पुरुऽवीरस्य। शर्मन्। उरुऽशंसस्य। वरुण। प्रनेतरिति प्रऽनेतः।
यूयं। नः। पुत्राः। अदितेः। अदब्धाः। अभि। क्षमध्वं। युज्याय। देवाः ॥३॥

हे प्रणेतः सर्वस्य जगतः प्रकर्षेण नेतर्वरुण पुरुवीरस्य पुरुभिर्बहुभिर्वीरैरुपेतस्य यद्वा पुरूणां बहूनां शत्रूणां विशेषेण प्रेरकस्योरुशंसस्योरुभिर्बहुभिः स्तूयमानस्य तव शर्मन् शर्मणि सुखे गृहे वा स्याम। अदितेः पुत्रा मित्रादयः ॥ परमपि छंदसीति परस्य षष्ठ्यंतस्य पूर्वामंत्रितांगवद्भावेनानुप्रवेशात् पदद्वयसमुदायस्याष्टमिकं सर्वानुदात्तत्वं ॥ अदब्धाः शत्रुभिरहिंसिताः। एवंभूता हे देवा यूयं नोऽस्मान् कृतापराधान् युज्याय सख्यायाभिक्षमध्वं। अस्माभिः कृतमपराधं सहध्वं ॥

॥ अथ चतुर्थी ॥

प्र सीमादित्यो असृजद्विधर्ताँ ऋतं सिंधवो वरुणस्य यंति।
न श्राम्यंति न वि मुंचंत्येते वयो न पप्तू रघुया परिज्मन् ॥४॥
प्र। सीं। आदित्यः। असृजत्। विऽधर्ता। ऋतं। सिंधवः। वरुणस्य। यंति।
न। श्राम्यंति। न। वि। मुचंति। एते। वयः। न। पप्तुः। रघुऽया। परिऽज्मन् ॥४॥

विधर्ता सेतुरिव जलस्य विधारयितादित्योऽदितेः पुत्रो वरुण ऋतं विधारणहेतुभूतं सत्यं यद्वा नदीनामुपादानभूतमुदकं सीं सर्वतः प्रासृजत्। प्रकर्षेण सृष्टवान् ॥ अणोऽप्रगृह्यस्यानुनासिक इत्याकारः सानुनासिकः ॥ तेन वरुणस्यर्तेन सिंधवः स्यंदनशीला नद्यो यंति। गच्छंति प्रवहंति। एते सिंधवो न श्राम्यंति। श्रांतिं न प्राप्नुवंति। न विमुचंति। उपरता न भवंति। अनलसाः सर्वदैकरूप्येण प्रवहंतीत्यर्थः। एतदेवोच्यते। वयो न। वयः पक्षिण इव रघुया रघवः शीघ्रगामिनः परिज्मन् परिज्मनि भूम्यां पप्तुः। पतंति गच्छंति ॥ पत्लृ गतौ। लिट्युसि तनिपत्योश्छंदसीत्युपधालोपः। स्थानिवद्भावाद्द्विर्वचनादि। रघुया इत्यत्र सुपां सुलुगिति जसो याजादेशः ॥

॥ अथ पंचमी ॥

वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य।
मा तंतुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः ॥५॥

वि। मत्। श्रथय। रशनांऽइव। आगः। ऋध्याम। ते। वरुण। खां। ऋतस्य।
मा। तंतुः। छेदि। वयतः। धियं। मे। मा। मात्रा। शारि। अपसः। पुरा। ऋतोः ॥५॥

हे वरुण मत् मत्सकाशात् रशनामिव रज्जुमिवागो विहिताननुष्ठानजनितं पापं विश्रथय। शिथिलीकुरु। विमोचयेत्यर्थः। ते त्वत्संबंधिन ऋतस्योदकस्य पूर्णां खां नदीं ॥ खा इति नदीनाम ॥ तामृध्याम। लभेमहि। अपि च धियं कर्म वयतः संतन्वतो मे मम तंतुः कर्मसंततिर्मा छेदि। छिन्नो मा भूत्। नैरंतर्येणेत्यर्थः। तथा ऋतोः समाप्तिकालात्पुरा पूर्वमपसः कर्मणो मात्रा शरीरं प्राच्योदीच्यांगलक्षणं मा शारि। शीर्णं विकलं मा भूत्॥ शॄ हिंसायां। कर्मणि लुङ् ॥ पुर ऋतोरित्यत्र ऋत्यक इति प्रकृतिभावः ॥

॥ इति द्वितीयस्य सप्तमे नवमो वर्गः ॥

॥ अथ षष्ठी ॥

अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय।
दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे ॥६॥

अपो इति। सु। म्यक्ष। वरुण। भियसं। मत्। संऽराट्। ऋतऽवः। अनु। मा। गृभाय।
दामऽइव। वत्सात्। वि। मुमुग्धि। अंहः। नहि। त्वत्। आरे। निऽमिषः। चन। ईशे ॥६॥

हे वरुण भियसं भयं मत् मत्तः सु सुष्ठु अपो म्यक्ष। अपगमय। हे सम्राट् सम्यग्राजमान हे ऋतावः सत्यवन् यज्ञवन्वा वरुण मा मामनुगृभाय। अनुगृहाण ॥ छंदसि शायजपीति श्नः शायजादेशः। हृग्रहोर्भ इति भत्वं ॥ अपि च दामेव वत्सात् यथा दोग्धा वत्ससकाशाद्बंधनीं रज्जुं विमुंचति तथांहः पापं मत्सकाशाद्विमुमुग्धि। विमुंच ॥ छांदसः शपः श्लुः ॥ पृथक्कुरु। त्वदारे त्वत्तो दूरदेशे वर्तमानः। त्वदन्य इत्यर्थः। त्वत्तोऽन्यः कश्चित् निमिषश्चन निमेषस्यापि अक्षिपक्ष्मचलनस्यापि नहीशे। नेष्टे। त्वमेवेश्वर इत्यर्थः ॥ लोपस्त आत्मनेपदेष्विति तलोपः ॥

॥ अथ सप्तमी ॥

मा नो वधैर्वरुण ये त इष्टावेनः कृण्वंतमसुर भ्रीणंति।
मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्रथो जीवसे नः ॥७॥

मा। नः। वधैः। वरुण। ये। ते। इष्टौ। एनः। कृण्वंतं। असुर। भ्रीणंति।
मा। ज्योतिषः। प्रऽवसथानि। गन्म। वि। सु। मृधः। शिश्रथः। जीवसे। नः ॥७॥

हे वरुण नोऽस्मान् वधैर्हननसाधनैरायुधैर्मा हिंसीरिति शेषः। हे असुर पापकृतां निरसितः ते त्वदीय इष्टौ यज्ञ एनो विहिताननुष्ठानेन जनितं पापं कृण्वंतं कुर्वंतं पुरुषं ये वधा भ्रीणंति हिंसंति तैरिति पूर्वत्र संबंधः ॥ भ्रीष् हिंसायां क्र्यादिकः ॥ अपि च ज्योतिषो गृहे वर्तमानादग्नेः सौरप्रकाशाद्वा प्रवसथानि प्रवासान्मा गन्म। मा गच्छाम। सर्वदा गृहे वर्तमानः सूर्यं पश्यंश्चिरकालं जीवेयमित्यर्थः ॥ गमेर्लुङि मंत्रे घसेति च्लेर्लुक् ॥ तथा नोऽस्माकं जीवसे जीवनाय मृधो हिंसकान् सुष्ठु विशिश्रथः। विश्लेषय। बाधस्वेत्यर्थः ॥

॥ अथाष्टमी ॥

नमः पुरा ते वरुणोत नूनमुतापरं तुविजात ब्रवाम।
त्वे हि कं पर्वते न श्रितान्यप्रच्युतानि दूळभ व्रतानि ॥८॥

नमः। पुरा। ते। वरुण। उत। नूनं। उत। अपरं। तुविऽजात। ब्रवाम।
त्वे इति। हि। कं। पर्वते। न। श्रितानि। अप्रऽच्युतानि। दुःऽदभ। व्रतानि ॥८॥

हे वरुण पुरा पूर्वस्मिन्काले ते तुभ्यं नमो नमस्कारप्रतिपादकं नम इति शब्दमवादिष्म। उत अपि च नूनमद्यापि ब्रवाम। उत अपि च हे तुविजात बहुषु प्रदेशेषु प्रादुर्भूत वरुणापरमागामिन्यपि काले नमःशब्दं ब्रवाम। उच्चारयाम। कस्मादिति चेदुच्यते। दूळभ दुर्दभ दंभितुं हिंसितुमशक्य ॥ दुरो दशनाशध्यादभेषु। पा॰ ६. ३. १०९. ५.। इति रेफस्योत्वमुत्तरपदादेः ष्टुत्वं च। कमित्येतत्पादपूरणं॥ हि यस्मात् त्वे त्वयि पर्वते न शिलोच्चय इवाप्रच्युतान्यन्यैः प्रच्यावयितुमशक्यानि व्रतानि कर्माणि विधरणानि श्रितानि। आश्रितानि। तस्मादित्यर्थः ॥

॥ अथ नवमी ॥

परं ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजं।
अव्युंष्टा इन्नु भूयसीरुषास आ नो जीवान्वरुण तासु शाधि ॥९॥

परा। ऋणा। सावीः। अधं। मत्ऽकृतानि। मा। अहं। राजन्। अन्यऽकृतेन। भोजं।
अविंऽउष्टाः। इत्। नु। भूयसीः। उषसः। आ। नः। जीवान्। वरुण। तासु। शाधि ॥९॥

हे वरुण ऋणा ऋणानि पित्रादिभिः कृतान्यस्माभिर्देयानि परा सावीः। परा सुव। पराचीनं प्रेरय ॥ षू प्रेरणे। छांदसो लुङ् ॥ अध अधुना मत्कृतानि मया निष्पादितानि ऋणानि परा सुव। अपि च हे राजन् स्वामिन् वरुण अहमन्यकृतेनान्यैरर्जितेन धनेन मा भोजं। भोगं मा लभेयं। किं कारणमिति चेदुच्यते। भूयसीर्भूयस्यो बहुतरा उषसोऽव्युष्टा इन्नु। सत्यमव्युष्टा एव। अपररात्रेषूत्थाय ऋणानि चिंतयतो जाग्रतो मम व्युष्टा अप्यव्युष्टकल्पा आसन्। हे वरुण तासूषःसु नोऽस्मान् जीवान् जीवनवत आशाधि। आ समंतादनुशिष्टान् कुरु। ऋणान्यपकृत्य भोगपर्याप्तं धनं प्रयच्छेत्यर्थः ॥

॥ अथ दशमी ॥

यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह।
स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ॥१०॥

यः। मे। राजन्। युज्यः। वा। सखा। वा। स्वप्ने। भयं। भीरवे। मह्यं। आह।
स्तेनः। वा। यः। दिप्सति। नः। वृकः। वा। त्वं। तस्मात्। वरुण। पाहि। अस्मान् ॥१०॥

हे राजन् वरुण मे मदीयो युज्यो योजनसमर्थः पित्रादिर्वा सखा समानख्यानो बांधवो वा स्वप्ने दृष्टं त्वद्विषयं भयं भीरवे भयशीलाय मह्यं य आह ब्रूते। तथा स्तेनश्चौरो वा वृकोऽरण्यश्वा वा यो नोऽस्मान् दिप्सति। जिघांसति ॥ सनीवंतर्धेति विकल्पनादिडभावः। दंभ इच्चेतीत्वं ॥ हे वरुण त्वं तस्मात्सर्वस्मादस्मान्पाहि। रक्ष ॥

॥ अथैकादशी ॥

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥११॥

मा। अहं। मघोनः। वरुण। प्रियस्य। भूरिऽदाव्नः। आ। विदं। शूनं। आपेः।
मा। रायः। राजन्। सुऽयमात्। अव। स्थां। बृहत्। वदेम। विदथे। सुऽवीराः ॥११॥

हे वरुण प्रियस्य भूरिदाव्नो भूरेर्धनस्य दातुर्धनवत आढ्यस्य पुरतः पुत्रादेर्दारिद्र्यमहं मा आविदं। आवेदयानि ज्ञापयानि। हे राजन् सुष्ठु नियामकाद्धनादवयुत्य स्थितो मा भूवं। शोभनपुत्रा यज्ञे गृहे वा वर्तमानाः प्रौढं स्तोत्रमुच्चारयाम ॥

॥ इति द्वितीयस्य सप्तमे दशमो वर्गः ॥

धृतव्रता इति सप्तर्चं सप्तमं सूक्तं गार्त्समदस्य कूर्मस्य गृत्समदस्य वार्षं त्रैष्टुभं वैश्वदेवं। तथा चानुक्रांतं धृतव्रताः सप्त वैश्वदेवमिति। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः।
शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ॥१॥

धृतऽव्रताः। आदित्याः। इषिराः। आरे। मत्। कर्त। रहसूःऽइव। आगः।
शृण्वतः। वः। वरुण। मित्र। देवाः। भद्रस्य। विद्वान्। अवसे। हुवे। वः ॥१॥

हे धृतव्रता धृतकर्माण आदित्या अदितेः पुत्रा इषिरा गमनशीलाः सर्वैरभ्येषणीयाः प्रार्थनीया वा हे विश्वे देवा मदारे मत्तो दूरदेश आगो विहितानानुष्ठानादिजनितं पापं कर्त। कुरुत ॥ करोतेश्छांदसो विकरणस्य लुक्। तप्तनप्तनथनाश्चेति तबादेशः ॥ तत्र दृष्टांतः। रहसूरिव। रहस्यन्यैरज्ञाते प्रदेशे सूयत इति रहसूर्व्यभिचारिणी। सा यथा गर्भं पातयित्वा दूरदेशे परित्यजति तद्वत्। हे वरुण मित्र देवाश्च वो युष्मदीयस्य भद्रस्य युष्माभिः करणीयं श्रेयो विद्वान् जानन्नहं शृण्वतो मत्कृतानि स्तोत्राणि श्रोत्रेण जानतो वो युष्मान् अवसे रक्षणार्थं हुवे। आह्वयामि ॥

॥ अथ द्वितीया ॥

यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत।
अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च ॥२॥

यूयं। देवाः। प्रऽमतिः। यूयं। ओजः। यूयं। द्वेषांसि। सनुतः। युयोत।
अभिऽक्षत्तारः। अभि। च। क्षमध्वं। अद्य। च। नः। मृळयत। अपरं। च ॥२॥

हे देवाः प्रमतिः प्रकृष्टा मतिर्यस्य मित्रादेस्तादृशा अपि यूयमेव। तथौजो बलमपि यूयमेव। अपि च यूयं द्वेषांसि द्वेष्टॄणि रक्षःपिशाचादीनि। सनुतरित्यव्ययं। अंतर्हितनामैतत्। अंतर्हिते प्रदेशे युयोत। पृथक्कुरुत ॥ यु मिश्रणामिश्रयोः। छांदसः शपः श्लुः। पूर्ववत्तस्य तबादेशः ॥ अभिक्षत्तारोऽभितः शत्रूणां हिंसितारो युयमभि च क्षमध्वं। अभिभवत च शत्रून्। अद्यास्मिन्दिने नोऽस्मान् मृळयत। सुखयत। अपरं च अपरमपि कालं। आगामिन्यपि कालेऽस्मान् मृळयत ॥

॥ अथ तृतीया ॥

किमू नु वः कृणवामापरेण किं सनेन वसव आप्येन ।
यूयं नो मित्रावरुणादिते च स्वस्तिमिंद्रामरुतो दधात ॥३॥

किं । ऊं इति । नु । वः । कृणवाम । अपरेण । किं । सनेन । वसवः । आप्येन ।
यूयं । नः । मित्रावरुणा । अदिते । च । स्वस्तिं । इंद्रामरुतः । दधात ॥३॥

हे देवा वो युष्माकं नु अद्येदानीं किमु कृणवाम । किं खलु कर्तुं शक्नवाम । न किमपीत्यर्थः । तथापरेणापरकालभाविना कर्मणा किं कर्तुं शक्ताः । तथा हे वसवो वासयितारो देवाः सनेन सनातनेनाप्येनाप्तव्येन कर्मणा युष्माकं किं कर्तुं शक्ताः । सर्वदापि युष्मदनुगुणं परिचरणं कर्तुं न शक्ता इत्यर्थः । हे मित्रावरुणौ हे अदिते हे इंद्रामरुतः ॥ देवताद्वंद्वे चेति पूर्वपदस्यानङ् ॥ ते च सर्वे यूयं स्वस्तिमविनाशं नोऽस्मभ्यं दधात । धत्त । प्रयच्छत ॥ लोटि तस्य तबादेशे ङित्त्वाभावेनातोलोपाभावः ॥

॥ अथ चतुर्थी ॥

हये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यं ।
मा वो रथो मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म ॥४॥

हये । देवाः । यूयं । इत् । आपयः । स्थ । ते । मृळत । नाधमानाय । मह्यं ।
मा । वः । रथः । मध्यमऽवाट् । ऋते । भूत् । मा । युष्मावत्ऽसु । आपिषु । श्रमिष्म ॥४॥

हये देवाः ॥ छांदसो वर्णोपजनः ॥ हे देवाः यूयमित् यूयमेवापयो धनस्य प्रापयितारो बंधवः स्थ । भवथ । ते यूयं नाधमानायाभिमतं फलं याचमानाय मह्यं स्तोत्रे मृळत । सुखयत । तथा वो युष्माकं रथ ऋतेऽस्मदीये यज्ञे निमित्तभूते मध्यमवाट् मा भूत् । मध्यमेन मंदगमनेन वाहको मा भूत् । शीघ्रं युष्मान्वहत्वित्यर्थः । वयं युष्मावत्सु युष्मत्सदृशेष्वापिषु बंधुषु सत्सु मा श्रमिष्म । श्रांता मा भूम ॥ वतुप्प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप् । आ सर्वनाम्न इत्यात्वं ॥

॥ अथ पंचमी ॥

प्र व एको मिमय भूर्यागो यन्मा पितेव कितवं शशास ।
आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट ॥५॥
प्र । वः । एकः । मिमय । भूरि । आगः । यत् । मा । पिताऽइव । कितवं । शशास ।
आरे । पाशाः । आरे । अघानि । देवाः । मा । मा । अधि । पुत्रे । विंऽइव । ग्रभीष्ट ॥५॥

हे देवा वो युष्माकं मध्येऽहमेकः सन् भूरि बहुलमागः पापं प्रमिमय । अहं प्रकर्षेणाहिंसिषं । कथमस्माकं मध्ये त्वमेव इति चेदुच्यते । यद्यस्मान्मां पितेव कितवं यथापथप्रवृत्तं पुत्रं पितानुशास्ति तथा शशास । अनुशिष्टं चकृद्वे ॥ शासु अनुशिष्टावित्यस्माल्लिटि मध्यमस्य रूपं ॥ अपि च हे देवा युष्मदीयाः पाशा आरेऽस्मत्तो दूरदेशे संतु । अघानि पापानि चारे संतु । मा माधि पुत्रे ॥ अधिः सप्तम्यर्थानुवादी ॥ पुत्रे पश्यति सति पितरं संतं विमिव पक्षिणमिव व्याधो मा ग्रभीष्ट । मा गृह्णीध्वं ॥ माङि लुङि ह्यग्रहोर्भ इति भत्वं ॥

॥ अथ षष्ठी ॥

अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयं ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥६॥
अर्वाञ्चः । अद्य । भवत । यजत्राः । आ । वः । हार्दि । भयमानः । व्ययेयं ।
त्राध्वं । नः । देवाः । निऽजुरः । वृकस्य । त्राध्वं । कर्तात् । अवऽपदः । यजत्राः ॥६॥

हे यजत्रा यष्टव्या देवा अद्येदानीमर्वाञ्चोऽस्मदभिमुखा भवत । यो युष्माकं हार्दि हृद्यवस्थितं रक्षणं भयमानो बिभ्यदहमाव्ययेयं । आभिमुख्येन प्राप्नुयां ॥ व्यय गतौ भौवादिकः ॥ हे देवा वृकस्य तस्करस्यारण्यश्वुनो वा संबंधिनो निजुरो निहननात् ॥ जूरी हिंसार्थः । अस्मात्संपदादिलक्षणो भावे क्विप् । छांदसो ह्रस्वः ॥ नोऽस्मान् त्राध्वं । त्रायध्वं ॥ तथा हे यजत्रा अवपद आपदः कर्तात्कर्तुः सकाशात् त्राध्वं । त्रायध्वं ॥

॥ अथ सप्तमी ॥

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥७॥

मा। अहं। मघोनः। वरुण। प्रियस्य। भूरिऽदाव्नः। आ। विदं। शूनं। आपेः।
मा। रायः। राजन्। सुऽयमात्। अवं। स्थां। बृहत्। वदेम। विदथे। सुऽवीराः ॥७॥

व्याख्यातेयं ॥

॥ इति द्वितीयस्य सप्तम एकादशो वर्गः ॥

ऋतं देवायेत्येकादशर्चमष्टमं सूक्तं गार्त्समदं। अंत्या जगती शिष्टास्त्रिष्टुभः। प्र हि क्रतुमित्येषेंद्रासोमदेवताका। सरस्वति त्वमस्मानित्यर्धर्चः सारस्वतः। यो नः सनुत्य इत्येषा बार्हस्पत्या। अंत्या मारुती। शिष्टा ऐंद्र्यः। तथा चानुक्रांतं। ऋतमेकादश जगत्यंतं षष्ठ्यैंद्रासोमी सरस्वति त्वमिति सारस्वतोऽर्धर्चो यो नो बार्हस्पत्या तं वो मारुतीति ॥ गतो विनियोगः ॥

॥ तत्रैषा प्रथमा ॥

ऋतं देवाय कृण्वते सवित्र इंद्रायाहिघ्ने न रमंत आपः।
अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसां ॥१॥

ऋतं। देवाय। कृण्वते। सवित्रे। इंद्राय। अहिऽघ्ने। न। रमंते। आपः।
अहःऽअहः। याति। अक्तुः। अपां। कियति। आ। प्रथमः। सर्गः। आसां ॥१॥

ऋतमुदकं वृष्टिलक्षणं कृण्वते कुर्वते देवाय द्योतमानाय सवित्रे सर्वस्य प्रेरकायाहिघ्नेऽहिं वृत्रं हतवत इंद्राय यागार्थमापो न रमंते। तस्माद्वेतोर्भीत्या नोपरता भवंति॥ तस्माद्व्यत्ययेन चतुर्थी॥ अपि तु तासामपामक्तुः सेचकं स्रोतोऽहरहः प्रत्यहं याति। गच्छति। आसां प्रथमः सर्गः प्राथमिकं जन्म कियात्या। कियति काले निष्पन्नं। आकारः प्रश्ने। किंशब्द आक्षेपे। यावति काले ता अजायंत स कालः कियान्। किं परिमाणं तस्य कालस्य। न किमपि। नित्या एव हि ता इत्यर्थः ॥

॥ अथ द्वितीया ॥

यो वृत्राय सिनमत्राभरिष्यत्प्र तं जनित्री विदुष उवाच।
पथो रदंतीरनु जोषमस्मै दिवेदिवे धुनयो यंत्यर्थं ॥२॥

यः। वृत्राय। सिनं। अत्र। अभरिष्यत्। प्र। तं। जनित्री। विदुषे। उवाच।
पथः। रदंतीः। अनु। जोषं। अस्मै। दिवेऽदिवे। धुनयः। यंति। अर्थं ॥२॥

यः पुरुषो वृत्रायासुराय सिनमन्नमत्र पाकस्थान आहर्तुमभरिष्यत् संपादितवान् तं पुरुषं जनित्री जनयित्रींद्रस्य मातादितिर्विदुषेऽभिज्ञायेंद्राय प्रोवाच। प्रोक्तवती। प्रवचनस्य हननार्थत्वात् तं वृत्रं हतवानिति शेषः। अपि चास्मा अस्येंद्रस्यानुजोषमनुकाममिच्छामनुसृत्य पथो मार्गान् रदंतीर्विलिखंत्यो धुनयो नद्यो दिवेदिवे प्रतिदिवसमर्थमर्तव्यं गंतव्यं समुद्रं प्रति यंति। गच्छंति ॥

॥ अथ तृतीया ॥

ऊर्ध्वो ह्यस्थादध्यंतरिक्षेऽधा वृत्राय प्र वधं जभार।
मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिंद्रः ॥३॥
ऊर्ध्वः। हि। अस्थात्। अधि। अंतरिक्षे। अध। वृत्राय। प्र। वधं। जभार।
मिहं। वसानः। उप। हि। ईं। अदुद्रोत्। तिग्मऽआयुधः। अजयत्। शत्रुं। इंद्रः ॥३॥

हिर्हेतौ। यस्मादयं वृत्रोऽंतरिक्ष ऊर्ध्वः सन् सर्वमावृत्याध्यस्थात्। अधिष्ठितोऽभूत्। अध अतः कारणात् वृत्राय वृत्रं प्रति वधं हननसाधनं वज्रमिंद्रो जभार। प्रचिक्षेप ॥ हृग्रहोर्भः ॥ स हि स खलु वृत्रो मिहं वृष्टेः सेक्तारं मेघं वसान आच्छादयन् ईमेनमिंद्रमुपादुद्रोत्। उपागमत् ॥ दु द्रु गतौ। लङि छांदसः शपः श्लुः ॥ तिग्मायुधस्तीक्ष्णायुध इंद्रः शत्रुं शातयितारं तं वृत्रमजयत्। जितवान् ॥

॥ अथ चतुर्थी ॥

बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुरस्य वीरान्।
यथा जघंथ धृषता पुरा चिदेवा जहि शत्रुमस्माकमिंद्र ॥४॥
बृहस्पते। तपुषा। अश्नाऽइव। विध्य। वृकऽद्वरसः। असुरस्य। वीरान्।
यथा। जघंथ। धृषता। पुरा। चित्। एव। जहि। शत्रुं। अस्माकं। इंद्र ॥४॥

हे बृहस्पते बृहतां परिवृढानां पालयितरिंद्र तपुषा तापकेन दीप्तेन वज्रेणाश्नेव अशन्येव वृकद्वरसः संवृतद्वारस्यासुरस्य वीरान् पुत्रान्। यद्वा संवृतद्वारानसुरस्य वीरान् विध्य। ताडय॥ वृणोतेः सृवृभूशुषिमुषिभ्यः किदिति कर्मणि कन्प्रत्ययः। द्रु गतौ। अस्मादौणादिकोऽसन्प्रत्ययः। वृकाणि संवृतानि द्वरांसि द्वाराणि येषां। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ हे इंद्र पुरा चित् पुरापि धृषता धर्षकेण बलेन यथा जघंथ त्वं हतवान् एवमेवास्माकं शत्रुं जहि। नाशय॥ हंतेर्ज इति हौ जादेशः॥

॥ अथ पंचमी ॥

अव क्षिप दिवो अश्मानमुच्चा येन शत्रुं मंदसानो निजूर्वाः ।
तोकस्य सातौ तनयस्य भूरेरस्माँ अर्द्धं कृणुतादिंद्र गोनां ॥५॥

अव । क्षिप । दिवः । अश्मानं । उच्चा । येन । शत्रुं । मंदसानः । निऽजूर्वाः ।
तोकस्य । सातौ । तनयस्य । भूरेः । अस्मान् । अर्द्धं । कृणुतात् । इंद्र । गोनां ॥५॥

हे इंद्र दिवो नभसः सकाशादश्मानमश्मवत्कठिनं वज्रमुच्चा उच्चैर्वर्तमानस्त्वमवक्षिप । अस्मदीयान् शत्रूनुद्दिश्यावस्तात्क्षिप । येन वज्रेण मंदसानः स्तोतृभिः स्तूयमानः सन् शत्रून् निजूर्वाः । न्यहिंसीः ॥ जुर्वी हिंसार्थः । लेट्यडागमः ॥ तथा तोकस्य भूरेर्भर्तव्यस्य तनयस्य पौत्रस्य सातौ संभजने ॥ निमित्ते सप्तम्येषा ॥ संभजनार्थं । तथा हे इंद्र गोनां गवां संभजनार्थं चास्मान् अस्माकं ॥ विभक्तिव्यत्ययः ॥ अर्द्धं समृद्धिं कृणुतात् । कुरु ॥ गोः पादांत इति गोशब्दस्यामो नुडागमः ॥

॥ इति द्वितीयस्य सप्तमे द्वादशो वर्गः ॥

॥ अथ षष्ठी ॥

प्र हि क्रतुं वृहथो यं वनुथो रध्रस्य स्थो यजमानस्य चोदौ ।
इंद्रासोमा युवमस्माँ अविष्टमस्मिन्भयस्थे कृणुतमु लोकं ॥६॥

प्र । हि । क्रतुं । वृहथः । यं । वनुथः । रध्रस्य । स्थः । यजमानस्य । चोदौ ।
इंद्रासोमा । युवं । अस्मान् । अविष्टं । अस्मिन् । भयऽस्थे । कृणुतं । ऊं इति । लोकं ॥६॥

हे इंद्रासोमौ यं वैरिणं वनुथो हिंसथः ॥ वनुष्यतिर्हंतिकर्मेति यास्कः ॥ तं क्रतुं द्वेषस्य कर्तारं प्र हि वृहथः । प्रकर्षेणोद्यच्छथः खलु । उन्मूलयथ इत्यर्थः ॥ वृहू उद्यमने तौदादिकः ॥ तथा रध्रस्य राधकस्य यजमानस्य चोदौ शत्रूणां प्रेरकौ स्थः । भवथः । तथा हे इंद्रासोमौ युवं युवामस्मानविष्टं । अवतं । अस्मिन्भयस्थे भयस्थाने युद्धे ॥ घजर्थे कविधानमित्यधिकरणे कप्रत्ययः । मरुवृधादित्वात्पूर्वपदांतोदात्तत्वं ॥ तस्मिन्युद्धे लोकं भयरहितं स्थानं कृणुतं । कुरुतं । उ इति पादपूरणः ॥

॥ अथ सप्तमी ॥

न मा तमन्न श्रमन्नोत तंद्रन्न वोचाम मा सुनोतेति सोमं ।
यो मे पृणाद्यो दद्यो निबोधाद्यो मा सुन्वंतमुप गोभिरायत् ॥७॥

न। मा। तमत्। न। श्रमत्। न। उत। तंद्रत्। न। वोचाम। मा। सुनोत। इति। सोमं।
यः। मे। पृणात्। यः। ददत्। यः। निऽबोधात्। यः। मा। सुन्वंतं। उप। गोभिः।
आ। अयत् ॥७॥

स इंद्रो मां न तमत्। न तमयतु। न ग्लपयतु। तथा न श्रमत्। श्रांतं मा करोतु ॥ तमु ग्लानौ श्रमु तपसि खेदे च। अनयोर्हेतुमण्यंतयोर्लेट्यडागमः। छंदस्युभयथेति शप आर्द्धधातुकत्वाखेरनिटीति णिलोपः ॥ उत अपि च मां न तंद्रत्। न तंद्रयेत्। तंद्र्यालस्येन युक्तं मा करोतु ॥ तंद्रीशब्दात्तत्करोतीति णिच्। णाविष्ठवत्प्रातिपदिकस्येति टिलोपः। अन्यत् पूर्ववत् ॥ इंद्रयागाय सोमं मा सुनोत माभिषुणुतेत्यन्यान्यजमानान् प्रति न वोचाम। न ब्रवाम ॥ वक्तेश्छांदसो लुङ्। सुनोतेत्यत्र तप्तनप्तनथनाश्चेति तस्य तबादेशः। तस्य पित्त्वेन ङित्त्वाभावाद्गुणः ॥ य इंद्रो मे मम पृणात् कामान् पूरयेत् यश्च ददत् अभीष्टं फलं दद्यात् यश्च निबोधात् अस्मदीयं स्तोत्रं यागं वावगच्छेत् य इंद्रः सुन्वंतं सोममभिषुखंतं मामस्मभ्यं दातव्यैर्गोभिः सहोपायत् उपगच्छेत्। स इंद्र इति पूर्वत्रान्वयः ॥ पृणादित्यादिषु लेट्यडागमः ॥

॥ अथाष्टमी ॥

सरस्वति त्वमस्माँ अविड्ढि मरुत्वंती धृषती जेषि शत्रून् ।
त्यं चिच्छर्धंतं तविषीयमाणमिंद्रो हंति वृषभं शंडिकानां ॥८॥

सरस्वति। त्वं। अस्मान्। अविड्ढि। मरुत्वंती। धृषती। जेषि। शत्रून्।
त्यं। चित्। शर्धंतं। तविषीऽयमाणं। इंद्रः। हंति। वृषभं। शंडिकानां ॥८॥

हे सरस्वति सरणवति देवि त्वमस्मान् स्तोतॄन् अविड्ढि। रक्ष ॥ रक्षार्थस्यावतेर्लेट्येतद्रूपं ॥ तथा मरुत्वती मरुद्भिर्युक्ता। मध्यमस्थाना हि वाक् सरस्वती मरुतश्च मध्यमस्थानस्थाः। अतस्तद्वती सती धृषती धर्षयंती शत्रून् शातयितॄन् वैरिणो जेषि। जय ॥ जयतेश्छांदसः शपः श्लुः ॥ किंचायमिंद्रस्त्यं चित् तमप्यसुरं

हंति। हतवान् ॥ व्यत्ययेन भूतार्थे लट् ॥ कीदृशं। शर्धंतं। प्रसहनशीलं ॥ शृधु प्रसहने ॥ तविषीयमाणं। तविषी बलमिवाचरंतं सर्वस्य भंजने शक्तं। शंडिकानां। शंडामर्कावसुरपुरोहितौ। शंडवंश्यानां मध्ये वृषभं प्रधानं ॥

॥ अथ नवमी ॥

यो नः सनुत्य उत वा जिघत्नुरभिख्याय तं तिगितेन विध्य।
बृहस्पत आयुधैर्जेषि शत्रून्द्रुहे रीषंतं परि धेहि राजन् ॥९॥

यः। नः। सनुत्यः। उत। वा। जिघत्नुः। अभिऽख्याय। तं। तिगितेन। विध्य।
बृहस्पते। आयुधैः। जेषि। शत्रून्। द्रुहे। रिषंतं। परि। धेहि। राजन् ॥९॥

हे बृहस्पते यो नोऽस्माकं सनुत्यः। सनुतरित्यंतर्हितनाम। अंतर्हिते देशे भवश्चोरः॥ सगर्भसयूथसनुताद्यत्॥ उत वा अपि वा यो जिघत्नुर्जिघांसुर्भवति। तमभिख्याय संवीक्ष्य तिगितेन तीक्ष्णेनायुधेन विध्य। ताडय। तथास्मदीयान् शत्रून् आयुधैरायोधनसाधनैरिष्वादिभिर्जेषि। जय। तथा हे राजन् राजमान बृहस्पते द्रुहे द्रोग्ध्रे शत्रवे रिषंतं हिंसंतं वज्रं परिधेहि। परितो धारय। प्रक्षिपेत्यर्थः॥

॥ अथ दशमी ॥

अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि।
ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि ॥१०॥

अस्माकेभिः। सत्वऽभिः। शूर। शूरैः। वीर्या। कृधि। यानि। ते। कर्त्वानि।
ज्योक्। अभूवन्। अनुऽधूपितासः। हत्वी। तेषां। आ। भर। नः। वसूनि ॥१०॥

हे शूर शौर्यवन्निंद्र अस्माकेभिरास्माकीनैः सत्वभिः परेषां सादकैः शूरैः शौर्योपेतैर्भटैस्तानि वीर्या वीरकर्माणि कृधि कुरु यानि ते त्वया कर्त्वानि करणीयानि॥ कृत्यार्थे तवैकेनिति करोतेस्त्वन्प्रत्ययः॥ ज्योक् चिरकालमनुधूपितासो धूपायमानहृदया मदीयाः शत्रवोऽभूवन्। आसन्। हत्वी तान् हत्वा॥ स्नात्व्यादयश्चेतीकारः॥ तेषां शत्रूणां वसूनि धनानि नोऽस्मभ्यमाभर। आहर॥

॥ अथैकादशी ॥

तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनं।
यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे ॥११॥

तं । वः । शर्धं । मारुतं । सुम्नऽयुः । गिरा । उप । ब्रुवे । नमसा । दैव्यं । जनं ।
यथा । रयिं । सर्वऽवीरं । नशामहै । अपत्यऽसाचं । श्रुत्यं । दिवेऽदिवे ॥११॥

हे मरुतो वो युष्माकं शर्धं बलं मारुतं मरुत्समूहरूपं दैव्यं देवेनेंद्रेण संबद्धं जनं प्रादुर्भूतं एवंगुणविशिष्टं बलं नमसा नमस्कारेण हविषा वा गिरा स्तोत्रेणोपब्रुवे । स्तौमि । यथा येन प्रकारेण वयं सर्ववीरं सर्वैर्वीरैर्विशेषेण शत्रूणां प्रेरकैर्भटैरुपेतमपत्यसाचमपत्यैरपतनहेतुभूतैः पुत्रादिभिरुपेतं श्रुत्यं श्रवणीयं प्रशस्यभूतं रयिं दिवेदिवे प्रतिदिवसं नशामहै । व्याप्नवाम ॥ नशतिर्व्याप्तिकर्मा । लेट्याडागमः । वैतोऽन्यत्रेत्यैकारः ॥

॥ इति द्वितीयस्य सप्तमे त्रयोदशो वर्गः ॥

अस्माकमिति सप्तर्चं नवमं सूक्तं गृत्समदस्यार्षं वैश्वदेवं । अंत्या त्रिष्टुप् । शिष्टा जगत्यः । तथा चानुक्रांतं । अस्माकं सप्त वैश्वदेवं त्रिष्टुबंतमिति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा ।
प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवंतो वनर्षदः ॥१॥

अस्माकं । मित्रावरुणा । अवतं । रथं । आदित्यैः । रुद्रैः । वसुऽभिः । सचाऽभुवा ।
प्र । यत् । वयः । न । पप्तन् । वस्मनः । परि । श्रवस्यवः । हृषीऽवंतः । वनऽसदः ॥१॥

मित्रावरुणा हे मित्रावरुणौ आदित्यैर्धात्रर्यमादिभिर्द्वादशभिः रुद्रैरेकादशसंख्याकैः वसुभिर्धरो ध्रुव इत्यादिभिरष्टसंख्याकैः एवं त्रिभिर्देवगणैः सचाभुवा सह भवंतौ सह वर्तमानौ युवामस्माकं रथमन्नलाभाय प्रवृत्तमवतं । यद्यदास्मदीया रथा वस्मनस्परि ॥ वसंत्यस्मिन्निति वस्म निवासस्थानं । औणादिको मनिन् ॥ तस्मात्स्थानात्परि उपरि देशांतरे ॥ पंचम्याः परावध्यर्थ इति सत्वं । अध्यर्थ उपर्यर्थ इति वृत्तिः ॥ वयो न पक्षिण इव प्रपप्तन् । प्रपतंति । प्रकर्षेण गच्छंति ॥ पतेश्छांदसे लुङि लृदित्वात् च्लेरङादेशः । पतः पुमिति पुमागमः ॥ कीदृशा वयः । श्रवस्यवोऽन्नकामाः । हृषीवंतः प्राप्तहर्षाः । वनर्षदो वने वृक्षादौ निषण्णाः ॥ सांहितिकश्छांदसो रेफोपजनः ॥

॥ अथ द्वितीया ॥

अध स्मा न उदवता सजोषसो रथं देवासो अभि विक्षु वाजयुं ।
यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जंघनंत पाणिभिः ॥२॥

अध । स्म । नः । उत् । अवत । सऽजोषसः । रथं । देवासः । अभि । विक्षु । वाजऽयुं ।
यत् । आशवः । पद्याभिः । तित्रतः । रजः । पृथिव्याः । सानौ । जंघनंत । पाणिऽभिः ॥२॥

हे सजोषसः समानं प्रीयमाणा देवासो देवा अध अधुना नोऽस्माकं वाजयुं वाजमन्नं कामयमानं गतिविशेषयुक्तं वा रथं विक्षु प्रजासु जनपदेष्वभिमुखमुदवत । उदगमयत ॥ अवतिरत्र गत्यर्थः ॥ यद्यदास्मिन्नथे युक्ता आशवो व्यापनशीला अश्वाः पद्याभिः पादसाध्याभिर्गतिभी रजो रंजकं मार्गं तित्रतस्तरंतः ॥ तरतेः शतरि बहुलं छंदसीति शपः श्लुः । बहुलं छंदसीत्यभ्यासस्येत्वं । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ पृथिव्याः प्रथिताया भूमेः सानौ समुच्छ्रिते प्रदेशे पाणिभिः पाण्युपलक्षितैः पादैर्जंघनंत । अत्यर्थं गच्छंति ॥ हंतेर्यङ्लुगंताच्छांदसो लङ् । व्यत्ययेनात्मनेपदं । बहुलं छंदसीति शपो लुगभावः ॥

॥ अथ तृतीया ॥

उत स्य न इंद्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः ।
अनु नु स्थात्यवृकाभिरूतिभी रथं महे सनये वाजसातये ॥३॥

उत । स्यः । नः । इंद्रः । विश्वऽचर्षणिः । दिवः । शर्धेन । मारुतेन । सुऽक्रतुः ।
अनु । नु । स्थाति । अवृकाभिः । ऊतिऽभिः । रथं । महे । सनये । वाजऽसातये ॥३॥

उत अपि च विश्वचर्षणिर्विश्वस्य सर्वस्य द्रष्टा यद्वा विश्वे चर्षणयो मनुष्या यस्य परिचारकाः । अथवा विश्वे सर्वे लोकाश्चर्षणयो द्रष्टव्या येन ॥ बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं ॥ मारुतेन मरुत्समूहरूपेण शर्धेन बलेन सह सुक्रतुः शोभनकर्मा शोभनप्रज्ञो वा स्यः स इंद्रोऽवृकाभिर्हिंसकरहिताभिरूतिभी रक्षाभिः सहितः सन् दिवो द्युलोकादागत्य नु अद्य नोऽस्माकं रथमनुस्थाति । आनुगुण्येनाधितिष्ठतु ॥ छांदसः शपो लुक् ॥ किमर्थं । महे सनये महते धनाय । तथा वाजसातये वाजस्यान्नस्य सातये संभजनार्थं ॥

॥ अथ चतुर्थी ॥

उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथं ।
इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती ॥ ४ ॥

उत । स्यः । देवः । भुवनस्य । सक्षणिः । त्वष्टा । ग्नाभिः । सऽजोषाः । जूजुवत् । रथं ।
इळा । भगः । बृहत्ऽदिवा । उत । रोदसी इति । पूषा । पुरंऽधिः । अश्विनौ । अध ।
पती इति ॥ ४ ॥

उत अपि च स्य स देवो दानादिगुणयुक्तो भुवनस्य भूतजातस्य सक्षणिः सचनीयः सेव्यो ग्नाभिर्देवपत्नीभिः । छंदांसि वै ग्ना इति तैत्तिरीयकं । गायत्र्यादीनि छंदांसि च देवपत्न्य इत्युक्तं । सजोषाः समानप्रीतिः । एवंगुणविशिष्टस्त्वष्टास्मदीयं रथं जूजुवत् । प्रेरयतु ॥ जु इति सौत्रो धातुर्गत्यर्थः । अस्माण्ण्यंताल्लुङि रूपं ॥ तथेळा तिसृणां देवीनामाद्येडाख्या देवी च रथं प्रेरयतु । बृहद्दिवा बृहन्महद्दीव्यति द्योतत इति बृहद्दिवः ॥ इगुपधलक्षणः कः । सुपां सुलुगिति विभक्तेराकारः ॥ तादृशो भगश्च प्रेरयतु । उत अपि च रोदसी द्यावापृथिव्यौ पुरंधिर्बहुधीः पूषा पोषको देवश्च ॥ अधशब्दश्चार्थे ॥ पती सूर्याया भर्तारावश्विनौ च एते सर्वेऽस्मदीयं रथं प्रेरयंत्वित्यर्थः ॥

॥ अथ पंचमी ॥

उत त्ये देवी सुभगे मिथूदृशोषासानक्ता जगतामपीजुवा ।
स्तुषे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे ॥ ५ ॥

उत । त्ये इति । देवी इति । सुभगे इति सुऽभगे । मिथुऽदृशा । उषसानक्ता । जगतां ।
अपिऽजुवा ।
स्तुषे । यत् । वां । पृथिवि । नव्यसा । वचः । स्थातुः । च । वयः । त्रिऽवयाः । उपऽस्तिरे ॥ ५ ॥

उत अपि च त्ये ते प्रसिद्धे देवी देव्यौ देवनशीले सुभगे शोभनधने मिथूदृशा मिथः परस्परं पश्यंत्यौ एवंभूते उषासानक्ता उषाश्च रात्रिश्च जगतां जंगमानामपीजुवा प्रेरयित्र्यौ भवतः । तस्मादस्मदीयमपि रथं प्रेरयतां । उत्तरोऽर्धर्चो द्यावापृथिव्यः प्रत्यक्षकृतः । हे पृथिवि वां युवां त्वां दिवं च नव्यसी नवीयसा नवतरेण प्रशस्येन वचो वचसा ॥ सुपां सुलुगिति तृतीयाया लुक् ॥ यद्यदा स्तुषे

स्तुवे ॥ उत्तमस्य व्यत्ययेन मध्यमः ॥ तदानीं स्थातुः स्थावरस्य व्रीह्यादेः संबंधि वयोऽन्नं चरुपुरोडाशादिलक्षणं त्रिवयाः। वय इत्यन्ननाम। ओषधिपशुसोमात्मकानि हविर्लक्षणान्यन्नानि यस्य तादृशोऽहमुपस्तिरे। उपस्तृणामि। आज्येनोपस्तरणाभिघारणपूर्वकं प्रयच्छामीत्यर्थः ॥ स्तृञ् आच्छादने। लट्युत्तमे छांदसो विकरणस्य लुक्। अत्रत्यश्चशब्दश्चेति निपातांतरं पादपूरणं। ऋत इद्धातोरितीत्वं। निपातैर्यद्यदिहंतेति निघातप्रतिषेधः ॥

॥ अथ षष्ठी ॥

उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्योऽज एकपादुत।
त्रित ऋभुक्षाः सविता चनो दधेऽपां नपादाशुहेमा धिया शमि ॥ ६ ॥

उत। वः। शंसं। उशिजांऽइव। श्मसि। अहिः। बुध्न्यः। अजः। एकऽपात्। उत।
त्रितः। ऋभुक्षाः। सविता। चनः। दधे। अपां। नपात्। आशुऽहेमा। धिया। शमि॥ ६॥

उत अपि च हे देवा उशिजामिव। इवेति संप्रत्यर्थीयः। अस्मत्तः स्तुतिं कामयमानानां वो युष्माकं शंसं स्तुतिं संप्रति श्मसि। उश्मसि कामयामहे॥ वश कांतौ। इदंतो मसिः। ग्रहिज्यादिना संप्रसारणं। छांदसो वर्णलोपः॥ उत अपि च अहिर्बुध्न्यः। बुध्नमंतरिक्षं। तत्र भवोऽहिनामा देवः। अज एकपात्। न जायत इत्यजः। एक एव पद्यते गच्छतीत्येकपात्। अज एकपात्संज्ञकः सूर्यः। त्रितस्तीर्णतम ऋभुक्षा उरुक्षय उरुनिवास ऋभूणां निवासयिता वेंद्रश्च सविता सर्वस्य प्रसविता चनोऽन्नं दधे। विदधातु। अस्मभ्यं करोतु। तथाशुहेमा शीघ्रगामी॥ हि गतावित्यस्मादन्येभ्योऽपि दृश्यंत इति मनिन्॥ तादृशोऽपां नपात् अपां पौत्रीयस्थानीयोऽग्निः॥ अद्भ्य ओषधिवनस्पतयो जायंते। ओषधिवनस्पतिभ्यश्चायमग्निर्जायत इत्यग्नेरपां पौत्रत्वं। स च धिया स्तुत्या शमि। शमीति कर्मनाम। यज्ञकर्मणि प्रीतो भवत्विति शेषः॥

॥ अथ सप्तमी ॥

एता वो वश्म्युद्यता यजत्रा अतक्षन्नायवो नव्यसे सं।
श्रवस्यवो वाजं चकानाः सप्तिर्न रथ्यो अह धीतिमश्याः ॥७॥

एता। वः। वश्मि। उत्ऽयता। यजत्राः। अतक्षन्। आयवः। नव्यसे। सं।
श्रवस्यवः। वाजं। चकानाः। सप्तिः। न। रथ्यः। अह। धीतिं। अश्याः ॥७॥

हे यजत्रा यजनीया विश्वे देवा वो युष्मदीयान्येतैतान्युद्यतोद्यतानि वचांसि वश्मि । कामये । नव्यसे नवतराय स्तुत्यतमाय युष्मद्गणायायवो मत्प्रभृतयो मनुष्याः कमितानि स्तोत्राणि समतक्षन् । समस्कुर्वन् । किमिच्छंतः । श्रवस्यवः श्रवणीयं यशोऽन्नं वात्मन इच्छंतः । वाजं बलं चकानाः कामयमानाः ॥ कन दीप्तिकांतिगतिषु । लिटः कानच् ॥ रथ्यो रथसंबंधी सप्तिर्न सर्पणशीलोऽश्व इव युष्मद्गणो धीतिमस्मदीयं कर्माश्याः । प्राप्नोतु ॥ अशू व्याप्तौ । व्यत्ययेन परस्मैपदमध्यमौ । बहुलं छंदसीति विकरणस्य लुक् ॥

॥ इति द्वितीयस्य सप्तमे चतुर्दशो वर्गः ॥

अस्य म इत्यष्टर्चं दशमं सूक्तं गृत्समदस्यार्षं षष्ठ्याद्यास्तिस्रोऽनुष्टुभः । शिष्टाः पंच जगत्यः । प्रथमा द्यावापृथिवीया ततो द्वे ऐंद्र्यौ त्वाष्ट्र्यौ वा । ततो द्वे राकादेवत्ये द्वे सिनीवालीदेवत्ये अंत्या गुंग्वादिषड्देवताका । तथा चानुक्रांतं । अस्य मेऽष्टौ जागतं त्र्यनष्टुबंतं । द्यावापृथिव्यैका द्वे ऐंद्र्यौ त्वाष्ट्र्यौ वा द्वे द्वे राकासिनीवाल्योरंत्या लिंगोक्तदेवतेति ॥ आभिप्लविके चतुर्थेऽहनि वैश्वदेवशस्त्र आद्यस्तृचो द्यावापृथिवीयनिविद्धानः । तथा च सूचितं । अस्य मे द्यावापृथिवी इति तिस्रस्ततं मे अप इति वैश्वदेवं । आ० ७.७. । इति ॥

॥ तत्रैषा प्रथमा ॥

अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वचसः सिषासतः ।
ययोरायुः प्रतरं ते इदं पुर उपस्तुते वसूयुर्वां महो दधे ॥१॥

अस्य । मे । द्यावापृथिवी इति । ऋतऽयतः । भूतं । अवित्री इति । वचसः । सिसासतः ।
ययोः । आयुः । प्रऽतरं । ते इति । इदं । पुरः । उपस्तुते इत्युपऽस्तुते । वसुऽयुः । वां ।
महः । दधे ॥१॥

द्यावापृथिवी हे द्यावापृथिव्यौ ऋतायत ऋतं यज्ञमात्मन इच्छतः सिषासतो युवां संभक्तुमिच्छतोऽस्य वचसः ॥ वक्तीति वचाः स्तोता । असुन् ॥ स्तोतुरस्य मे ममावित्री अवित्र्यौ पालयित्र्यौ भूतं । भवतं । ययोर्द्यावापृथिव्योरायुरन्नं प्रतरं प्रकृष्टतरमुत्पद्यत इति शेषः । इदमिदानीं ते द्यावापृथिव्यावुपस्तुते तत्र तत्र स्थितैः स्तोतृभिः स्तुते वां युवां वसूयुर्धनकामोऽहं महो महतः ॥ विभक्तिव्यत्ययः ॥ महता स्तोत्रेण पुरो दधे । पुरस्करोमि ॥

॥ अथ द्वितीया ॥

मा नो गुह्या रिप आयोरहन्दभन्मा न आभ्यो रीरधो दुच्छुनाभ्यः ।
मा नो वि यौः सख्या विद्धि तस्य नः सुम्नायता मनसा तत्त्वेमहे ॥२॥
मा। नः। गुह्याः। रिपः। आयोः। अहन्। दभन्। मा। नः। आभ्यः। रीरधः। दुच्छुनाभ्यः।
मा। नः। वि। यौः। सख्या। विद्धि। तस्य। नः। सुम्नऽयता। मनसा। तत्। त्वा। ईमहे॥२॥

हे इंद्र त्वष्टर्वा आयोर्मनुष्यस्य शत्रुभूतस्य गुह्या गोप्या ज्ञातुमशक्या रिपो हिंसारूपा माया नोऽस्मान् अहन्। उपलक्षणमेतत्। अहनि रात्रौ च मा दभन्। मा हिंसिषुः। तथा नोऽस्मानाभ्यो दुच्छुनाभ्यः। शुनमिति सुखनाम। दुःशुना दुच्छुनाः। दुःखकारिणीभ्यः शत्रुसेनाभ्यो मा रीरधः। वशं मा नैषीः॥ रध्यतिर्वशगमन इति यास्कः। रध हिंसासंराद्ध्योः। अस्मयंताल्लुङि चङि रूपं॥ अपि च नोऽस्माकं सख्या सख्यानि सखित्वानि मा वि यौः। त्वया वियुक्तानि मा कार्षीः। अपि तु नोऽस्माकं तस्य तत् सखित्वं सुम्नायता सुखमस्माकमिच्छता मनसा विद्धि। जानीहि॥ क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी॥ तत् त्वा तादृशं त्वामीमहे। अभिमतफलं याचामहे॥ सुपां सुलुगिति तच्छब्दादुत्तरस्या विभक्तेर्लुक्॥

॥ अथ तृतीया ॥

अहेळता मनसा श्रुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतं ।
पद्याभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा ॥३॥
अहेळता। मनसा। श्रुष्टिं। आ। वह। दुहानां। धेनुं। पिप्युषीं। असश्चतं।
पद्याभिः। आशुं। वचसा। च। वाजिनं। त्वां। हिनोमि। पुरुऽहूत। विश्वहा॥३॥

हे इंद्र त्वष्टर्वा अहेळता अक्रुध्यता मनसा श्रुष्टिं सुखकरीं दुहानां दोग्ध्रीं पिप्युषीं प्रवृद्धां पीनां॥ प्यायी वृद्धौ। लिटः क्वसुः। लिड्यङोश्चेति पीभावः। उगितश्चेति ङीप्। संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं॥ असश्चतमसक्तावयवां एवंभूतां धेनुं गामावह। आभिमुख्येन प्रापय। अपि च हे पुरुहूत बहुभिराहूतेंद्र त्वष्टर्वा पद्याभिः पादगतिभिराशुं व्यापनशीलं वचसा वाचा च वाजिनं वेगवंतं त्वां विश्वहा सर्वेष्वहःसु हिनोमि। स्तुतिभिः प्रेरयामि॥ हि गतौ वृद्धौ च॥

पत्नीसंयाजेषु गृहपतेः प्राक् राकासिनीवाल्यौ यष्टव्ये । तत्र राकायागस्य राकामहमित्यादिके याज्यानुवाक्ये । सूचितं च । राकामहं सिनीवालि कुहूमहमिति द्वे द्वे याज्यानुवाक्ये । आ॰ १.१०. । इति ॥ तथाग्निमारुतेष्वेते धाय्ये । सूचितं च । राकामहमिति द्वे । आ॰ ५.२०. । इति ॥

॥ तयोराद्यात्र चतुर्थी ॥

राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यं ॥४॥

राकां । अहं । सुऽहवां । सुऽस्तुती । हुवे । शृणोतु । नः । सुऽभगा । बोधतु । त्मना ।
सीव्यतु । अपः । सूच्या । अच्छिद्यमानया । ददातु । वीरं । शतऽदायं । उक्थ्यं ॥४॥

संपूर्णचंद्रा पौर्णमासी राका । तां देवीं सुहवां स्वाह्वानामाह्वानप्रयोजनकारिणीं सुष्टुती शोभनया स्तुत्याहं हुवे । आह्वयामि ॥ सुष्टुतिशब्दात्तृतीयैकवचनस्य सुपां सुलुगिति पूर्वसवर्ण ईकारः ॥ सा च सुभगा शोभनधना नोऽस्माकमाह्वानं शृणोतु । श्रुत्वा च त्मना आत्मना स्वयमेव बोधतु । अस्मदभिप्रायं बुध्यतां । बुद्ध्वा चापः कर्म पुत्रोत्पादनलक्षणं सूच्या सूचीस्थानीययाच्छिद्यमानयाविच्छिन्नयानुग्रहबुद्ध्या सीव्यतु । संतनोतु । यथा वस्त्रादिकं सूच्या स्यूतं चिरं तिष्ठति एवमिदं करोतु । कृत्वा च वीरं विक्रांतं शतदायं बहुधनं बहुप्रदं वोक्थ्यं प्रशस्यं पुत्रं ददातु ॥

॥ अथ पंचमी ॥

यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥५॥

याः । ते । राके । सुऽमतयः । सुऽपेशसः । याभिः । ददासि । दाशुषे । वसूनि ।
ताभिः । नः । अद्य । सुऽमनाः । उपऽआगहि । सहस्रऽपोषं । सुऽभगे । रराणा ॥५॥

हे राके देवि सुपेशसः शोभनरूपास्ते तव याः सुमतयः शोभनबुद्धयः याभिर्मतिभिर्दाशुषे हविर्दत्तवते यजमानाय वसूनि धनानि ददासि । प्रयच्छसि । अद्येदानीं ताभिर्मतिभिः सहिता त्वं सुमनाः शोभनमना भूत्वोपागहि । उपागच्छ ॥ गमेश्छांदसः शपो लुक् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ।

असिद्धवदत्रा भादित्यस्यासिद्धत्वाड्डेर्लुगभावः ॥ किं कुर्वती । हे सुभगे शोभनधने सहस्रपोषं सहस्रसंख्याकस्य धनस्य पुष्टिं रराणा ददती ॥ रा दाने । व्यत्ययेन शानच् । छांदसः शपः श्लुः । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥

सिनीवाल्या यागे सिनीवालीत्यादिके द्वे याज्यानुवाक्ये । सूत्रं पूर्वमुदाहृतं ॥

॥ तत्रानुवाक्या सूक्ते षष्ठी ॥

सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥ ६ ॥

सिनीवालि । पृथुऽस्तुके । या । देवानां । असि । स्वसा ।
जुषस्व । हव्यं । आऽहुतं । प्रऽजां । देवि । दिदिड्ढि । नः ॥ ६ ॥

दृष्टचंद्रामावास्या सिनीवाली । हे सिनीवालि पृथुष्टुके पृथुजघने पृथुसंहते वा या त्वं देवानां स्वसासि स्वयंसंचारिणी भगिनी वा भवसि सा त्वमाहुतमाभिमुख्येनाग्नौ प्रक्षिप्तं हव्यमस्मदीयं हविर्जुषस्व । सेवस्व । किंच हे देवि सिनीवालि नोऽस्माकं प्रजां पुत्रादिकां दिदिड्ढि । उपचिनु अतिसर्जय वा । देहीत्यर्थः ॥ दिह उपचये । लोटि छांदसः शपः श्लुः । दिश अतिसर्जन इत्यस्माद्वा ॥

॥ अथ सप्तमी ॥

या सुबाहुः स्वंगुरिः सुषूमा बहुसूवरी ।
तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥ ७ ॥

या । सुऽबाहुः । सुऽअंगुरिः । सुऽसूमा । बहुऽसूवरी ।
तस्यै । विश्पत्न्यै । हविः । सिनीवाल्यै । जुहोतन ॥ ७ ॥

या सिनीवाली सुबाहुः शोभनबाहुः स्वंगुरिः शोभनांगुलिः सुषूमा सुष्ठु प्रसविती ॥ षूङ् प्राणिप्रसवे । अन्येभ्योऽपि दृश्यंत इति मनिन् । कृदुत्तरपदप्रकृतिस्वरत्वं ॥ बहुसूवरी बह्वीनां प्रजानां सवित्री ॥ तेनैव सूत्रेण क्वनिप् । वनो र चेति ङीब्रेफौ । कृदुत्तरपदप्रकृतिस्वरत्वं ॥ तस्यै सिनीवाल्यै विश्पत्न्यै विशां पालयित्र्यै ॥ विभाषा सपूर्वस्येति पत्युर्नकारांतादेशः । अयस्मयादित्वेन भत्वाद्विशो जश्त्वाभावः । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं ॥ हे ऋत्विग्यजमाना हविर्जुहोतन । जुहुत ॥ तप्तनप्तनथनाश्चेति तनबादेशः ॥

॥ अथाष्टमी ॥

या गुंगूर्या सिनीवाली या राका या सरस्वती ।
इंद्राणीमह्व ऊतये वरुणानीं स्वस्तये ॥ ८ ॥
या । गुंगूः । या । सिनीवाली । या । राका । या । सरस्वती ।
इंद्राणीं । अह्वे । ऊतये । वरुणानीं । स्वस्तये ॥ ८ ॥

अत्र गुंगूशब्देन राकासिनीवाल्योः साहचर्यात्कुहूरुच्यते । या गुंगूः कुहूस्तामह्वे । आह्वयामि । एवमुत्तरत्रापि योज्यं । इंद्राणीमिंद्रस्य पत्नीमूतये रक्षणार्थमह्वे । आह्वयामि । तथा वरुणानीं वरुणस्य पत्नीं स्वस्तयेऽविनाशायाह्वयामि ॥ इंद्रवरुणेत्यादिना ङीष् आनुगागमश्च ॥

॥ इति द्वितीयस्य सप्तमे पंचदशो वर्गः ॥
॥ इति द्वितीये मंडले तृतीयोऽनुवाकः ॥

चतुर्थेऽनुवाक एकादश सूक्तानि । तत्रा ते पितरिति पंचदशर्चं प्रथमं सूक्तं गृत्समदस्यार्षं त्रैष्टुभं रौद्रं । अनुक्रांतं च । आ ते पंचोना रौद्रमिति ॥ शूलगवादिरुद्रयज्ञेष्वनेन सूक्तेन प्रतीची दिगुपस्थेया । सूचितं च । कद्रुद्रायेमा रुद्राया ते पितरिमा रुद्राय स्थिरधन्वन इति सर्वरुद्रयज्ञेषु दिशामुपस्थान इति ॥ रुद्रदेवत्ये पशौ आ ते पितरिति हविषोऽनुवाक्या । सूचितं च । आ ते पितर्मरुतां सुम्नमेतु प्र बभ्रवे वृषभाय श्वितीच इति तिस्रः । आ० ३. ८. । इति ॥ अत्र शौनकः । चतुर्दशीमुपोष्यैकां कृष्णस्य जुहुयाच्चरुं । आतेसूक्तेन रौद्रेण प्रत्यृचं वाग्यतः शुचिः ॥ पूर्वमाज्याहुतीर्हुत्वाथोपस्थाय च शंकरं । हविःशेषेण वर्तेतैकांतरमतंद्रितः । पूर्णमासे जयेन्मृत्युं रोगैश्च परिमुच्यते । ऋग्वि० १. ३०. । इति ॥

॥ सैषा सूक्ते प्रथमा ॥

आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः ।
अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ॥ १ ॥
आ । ते । पितः । मरुतां । सुम्नं । एतु । मा । नः । सूर्यस्य । संऽदृशः । युयोथाः ।
अभि । नः । वीरः । अर्वति । क्षमेत । प्र । जायेमहि । रुद्र । प्रऽजाभिः ॥ १ ॥

हे मरुतां पितः मरुत्संज्ञानां देवानामुत्पादक रुद्र ॥ परमपि छंदसीति षष्ठ्यंतस्य पूर्वामंत्रितांगवद्भावात्सर्वानुदात्तत्वं ॥ ते त्वदीयमस्मभ्यं दातव्यं सुम्नं सुखमेतु। आगच्छतु। रुद्रस्य च मरुतां पितृत्वमिदं पित्रे मरुतामाख्यायिकामुखेनावादिष्म। ऋग्वे० १. ११४. ६.। तथा त्वं नोऽस्मान् सूर्यस्य संदृशः संदर्शनान्मा युयोथाः। मा पृथक्कार्षीः॥ यु मिश्रणामिश्रयोः। लङि छांदसः शपः श्लुः। छंदस्युभयथेत्यार्द्धधातुकत्वेन ङित्त्वाभावाद्गुणः ॥ अर्वति शत्रौ । भ्रातृव्यो वा अर्वेति श्रुतेः । नोऽस्माकं वीरो वीर्यवान् पुत्रादिरभिक्षमेत। अभिभवतु। यद्वा वीरस्त्वं नोऽस्मानभिक्षमेथाः । अस्मान् कृतापराधानभिक्षमस्व । हे रुद्र प्रजाभिः पुत्रपौत्रादिभिः प्रजायेमहि । प्रभूताः स्याम ॥

॥ अथ द्वितीया ॥

त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।

व्य१स्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ॥२॥

त्वाऽदत्तेभिः। रुद्र। शंऽतमेभिः। शतं। हिमाः। अशीय। भेषजेभिः।

वि। अस्मत्। द्वेषः। विऽतरं। वि। अंहः। वि। अमीवाः। चातयस्व। विषूचीः ॥२॥

हे रुद्र त्वादत्तेभिस्त्वया दत्तैः शंतमेभिरतिशयेन सुखकरैर्भेषजेभिर्भेषजैरोषधैः शतं हिमाः शतं हेमंतान् शतं संवत्सरानशीय। व्याप्नुयां ॥ अश्नोतेर्लिङि छांदसो विकरणस्य लुक्॥ अपि च अस्मदस्मत्तो द्वेषो द्वेष्टॄन् विचातयस्व। विनाशय। तथांहः पापं वितरमत्यंतं विचातयस्व। अमीवा रोगान्विषूचीर्विषु नानांचतीः कृत्स्नशरीरव्यापकान् रोगान्विचातयस्व। अस्मत्तः पृथक्कृत्य विनाशय॥

॥ अथ तृतीया ॥

श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।

पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ॥३॥

श्रेष्ठः। जातस्य। रुद्र। श्रिया। असि। तवःऽतमः। तवसां। वज्रबाहो इति वज्रऽबाहो।

पर्षि। नः। पारं। अंहसः। स्वस्ति। विश्वाः। अभिऽइतीः। रपसः। युयोधि ॥३॥

हे रुद्र जातस्योत्पन्नस्य सर्वस्य जगतो मध्ये श्रियैश्वर्येण श्रेष्ठः प्रशस्यतमोऽसि। भवसि। तथा हे वज्रबाहो आयुधहस्त रुद्र तवसां प्रवृद्धानां मध्ये

तवस्तमोऽतिशयेन प्रवृद्धोऽसि। स त्वं नोऽस्मानंहसः पापस्य पारं तीरं स्वस्ति क्षेमेण पर्षि। पारय। तथा रपसः पापस्य विश्वाः सर्वा अभीतीरभिगमनानि युयोधि। पृथक्कुरु॥ यौतेश्छांदसः शपः श्लुः। वा छंदसीत्यपित्त्वस्य विकल्पनात् ङित्त्वाभावेऽङितश्चेति हेर्धिः॥

॥ अथ चतुर्थी ॥

मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ॥४॥
मा। त्वा। रुद्र। चुक्रुधाम। नमःऽभिः। मा। दुःऽस्तुती। वृषभ। मा। सऽहूती।
उत्। नः। वीरान्। अर्पय। भेषजेभिः। भिषक्ऽतमं। त्वा। भिषजां। शृणोमि ॥४॥

हे रुद्र त्वा त्वां नमोभिरयथाक्रियमाणैर्नमस्कारैर्हविर्भिर्वा मा चुक्रुधाम। मा क्रोधयाम। क्रुद्धं मा कार्ष्म॥ क्रुध कोपे। अस्माण्ण्यंताल्लुङि चङि रूपं॥ हे वृषभ कामानां वर्षितर्दुष्टुती दुःस्तुत्याशोभनया स्तुत्या मा चुक्रुधामेत्येव। तथा सहूती सहूत्या विसदृशैरन्यैर्देवैः सहाह्वानेन मा क्रोधयाम। श्रेष्ठो हि स्वस्मान्न्यूनेन सहाह्वाने क्रुद्धो भवति। स त्वं नोऽस्माकं वीरान् पुत्रान्भेषजेभिस्त्वदीयैर्भेषजैरोषधैरुदर्पय। उत्कृष्टं संयोजय। हे रुद्र त्वा त्वां भिषजां चिकित्साभिज्ञानां मध्ये भिषक्तममतिशयेन भैषज्यस्य कर्तारं शृणोमि। प्रथमो दैव्यो भिषगिति च मंत्रांतरेऽप्युक्तं॥

॥ अथ पंचमी ॥

हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ॥५॥
हवीमऽभिः। हवंते। यः। हविःऽभिः। अव। स्तोमेभिः। रुद्रं। दिषीय।
ऋदूदरः। सुऽहवः। मा। नः। अस्यै। बभ्रुः। सुऽशिप्रः। रीरधत्। मनायै ॥५॥

यो रुद्रो हविर्भिश्चरुपुरोडाशादिभिः सहितैर्हवीमभिराह्वानैः स्तुतिलक्षणैर्हवते। आहूयते स्तूयते॥ व्यत्ययेन कर्मणि कर्तृप्रत्ययः। बहुलं छंदसीति ह्वयतेः संप्रसारणं॥ तं रुद्रं स्तोमेभिः स्तोत्रैरवदिषीय। अवखंडयामि। पृथक्करोमि। अपगतक्रोधं करोमीति यावत्॥ दो अवखंडने। व्यत्ययेनात्मनेपदं। बहुलं छंदसीतीत्वं॥

ऋदूदरः । ऋदूदरो मृदूदर इति यास्कः । नि॰ ६. ४.। सुहवः शोभनाह्वानो बभ्रुर्भर्ता सर्वस्य बभ्रुवर्णो वा। सुशिप्रः। शिप्रे हनू नासिके वा। शोभनशिप्रः। एवंगुणविशिष्टः स रुद्रोऽस्मै मनायै। हन्मीति मन्यमाना बुद्धिर्मेना। तस्मै नोऽस्मान्मा रीरधत्। मा वशं नैषीत्॥ रध हिंसासंराद्धोः। अस्माण्ण्यंताल्लुङि चङि रूपं। रध्यतिर्वशगमन इति यास्कः॥

॥ इति द्वितीयस्य सप्तमे षोडशो वर्गः ॥

॥ अथ षष्ठी ॥

उन्मा॑ ममंद वृष॒भो म॒रुत्वा॒न्त्वक्षी॑यसा॒ वय॑सा॒ नाध॑मानं।
घृणी॑व छा॒याम॑र॒पा अ॑शी॒या वि॑वासेयं रु॒द्रस्य॑ सु॒म्नं ॥६॥

उत्। मा॒। म॒मं॒द्। वृ॒ष॒भः। म॒रुत्वा॑न्। त्वक्षी॑यसा। वय॑सा। नाध॑मानं।
घृणि॑ऽइव। छा॒यां। अ॒र॒पाः। अ॒शी॒य॒। आ। वि॒वा॒से॒यं॒। रु॒द्रस्य॑। सु॒म्नं ॥६॥

वृषभः कामानां वर्षिता मरुत्वान् मरुद्भिः पुत्रैर्युक्तो रुद्रो नाधमानं याचमानं मा मां त्वक्षीयसा दीप्तेन वयसान्नेनोन्ममंद। उत्कर्षेण तर्पयतु। अपि चाहं घृणीव छायां यथा सूर्यकिरणसंतप्तश्छायां प्रविशति एवं रुद्रस्य सुम्नं सुखमरपा अपापः सन् अशीय। व्याप्नुयां। तदर्थं तं रुद्रमाविवासेयं। परिचरेयं॥ विवासतिः परिचरणकर्मा॥

॥ अथ सप्तमी ॥

क्व१॒स्य ते॑ रुद्र मृळ॒याकु॒र्हस्तो॒ यो अस्ति॑ भेष॒जो जला॑षः।
अ॒प॒भ॒र्ता रप॑सो॒ दैव्य॑स्या॒भी नु मा॑ वृषभ चक्षमीथाः ॥७॥

क्व॑। स्यः। ते॒। रु॒द्र॒। मृ॒ळ॒याकुः॑। हस्तः॑। यः। अस्ति॑। भे॒ष॒जः। जला॑षः।
अ॒प॒ऽभ॒र्ता। रप॑सः। दैव्य॑स्य। अ॒भि। नु। मा॒। वृ॒ष॒भ॒। च॒क्ष॒मी॒थाः॒ ॥७॥

हे रुद्र ते तव मृळयाकुः सुखयिता स्यः स हस्तः क्व कुत्र वर्तते। यो हस्तो भेषजो भेषज्यकृत् जलाषः सर्वेषां सुखकरोऽस्ति। भवति। स हस्तो विद्यत एव। तेन हस्तेन मां रक्षेति भावः। अपि च हे वृषभ कामानां वर्षितः दैव्यस्य देवकृतस्य रपसः पापस्यापभर्तापहर्ता विनाशयिता भूत्वा कृतापराधं मां नु

क्षिप्रमभिचक्षमीथाः । अभिक्षमस्व ॥ क्षमूष् सहने । लङि छांदसः शपः श्लुः । बहुलं छंदसीतीडागमः ॥

रुद्रदेवत्ये पशौ वपापुरोडाशहविषां क्रमेण प्र बभ्रव इत्याद्यास्तिस्रो याज्याः प्र बभ्रवे वृषभाय श्वितीच इति तिस्र आपश्चातान्नासत्या पुरस्तात् । आ॰ ३. ८. । इति ॥

॥ तत्राद्या सूक्तेऽष्टमी ॥

प्र ब॒भ्रवे॑ वृष॒भाय॑ श्विती॒चे म॒हो म॒हीं सु॑ष्टु॒तिमी॑रयामि ।
न॒म॒स्या क॑ल्मली॒कि॒नं॒ नमो॑भिर्गृणी॒मसि॑ त्वे॒षं रु॒द्रस्य॒ नाम॑ ॥ ८ ॥

प्र । ब॒भ्रवे॑ । वृ॒ष॒भाय॑ । श्वि॒ती॒चे । म॒हः । म॒हीं । सु॒ऽस्तु॒तिं । ई॒र॒या॒मि॒ ।
न॒म॒स्य । क॒ल्म॒ली॒कि॒नं॑ । नमः॑ऽभिः । गृ॒णी॒मसि॑ । त्वे॒षं । रु॒द्रस्य॑ । नाम॑ ॥ ८ ॥

बभ्रवे विश्वस्य भर्त्रे बभ्रुवर्णाय वा वृषभाय कामानां वर्षित्रे तद्वत्प्रसह्यकारिणे वा श्वितीचे श्वैत्यमंचते ॥ श्विता वर्णे । औणादिक इन्प्रत्ययः । श्वितिमंचतीत्यंचतेर्ऋत्विगित्यादिना क्विन् । चतुर्थ्येकवचनेऽच इत्यकारलोपे चाविति दीर्घत्वं । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं ॥ एवंगुणविशिष्टाय रुद्राय महो मही महतोऽपि महतीं सुष्टुतिं शोभनस्तुतिं प्रेरयामि । प्रकर्षेणोच्चारयामि । हे स्तोतः कल्मलीकिनं । ज्वलतो नामधेयमेतत् । नि॰ १. १७. । ज्वलंतं । कलयत्यपगमयति मलमिति कल्मलीकं तेजः । तद्वंतं रुद्रं नमोभिर्नमस्कारैर्हविर्भिर्वा नमस्य । पूजय । वयं च रुद्रस्य महादेवस्य त्वेषं दीप्तं नाम गृणीमसि । गृणीमः संकीर्तयामः ॥ गॄ शब्दे । क्र्यादिकः । इदंतो मसिः । प्वादीनां ह्रस्वः ॥

॥ अथ नवमी ॥

स्थि॒रेभि॒रङ्गैः॑ पु॒रु॒रूप॑ उ॒ग्रो ब॒भ्रुः शु॒क्रेभिः॑ पिपिशे॒ हिर॑ण्यैः ।
ईशा॑नाद॒स्य भुव॑नस्य॒ भूरे॒र्न वा उ॑ योषद्रु॒द्राद॑सु॒र्य॑म् ॥ ९ ॥

स्थि॒रेभिः॑ । अङ्गैः॑ । पु॒रु॒ऽरूपः॑ । उ॒ग्रः । ब॒भ्रुः । शु॒क्रेभिः॑ । पि॒पि॒शे॒ । हिर॑ण्यैः ।
ईशा॑नात् । अ॒स्य । भुव॑नस्य । भूरेः॑ । न । वै । ऊं॒ इति॑ । यो॒ष॒त् । रु॒द्रात् । अ॒सु॒र्य॑म् ॥ ९ ॥

स्थिरेभिः स्थिरैर्दृढैरंगैरवयवैर्युक्तः पुरुरूपोऽष्टमूर्त्यात्मकैर्बहुभी रूपैरुपेत उग्र उद्गूर्णस्तेजस्वी बभ्रुर्भर्ता बभ्रुवर्णो वा रुद्रः शुक्रेभिर्दीप्तैर्हिरण्यैर्हिरण्मयैर्हितरम-

णीयैर्वालंकारैः पिपिशे। दीप्यते ॥ पिश अवयवे। कर्मणि लिट् ॥ ईशानादीश्वरादस्य भुवनस्य भूतजातस्य भूरेर्भर्तू रुद्रादसुर्यं ॥ असु क्षेपणे। असेरुरन्। असुरः क्षेप्ता। तत्र साधुः ॥ असुर्यं बलं न वा उ योषत्। नैव पृथग्भवति ॥ यौतेर्लेट्यडागमः। सिब्बहुलं लेटीति सिप् ॥

॥ अथ दशमी ॥

अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपं।

अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥१०॥

अर्हन्। बिभर्षि। सायकानि। धन्व। अर्हन्। निष्कं। यजतं। विश्वऽरूपं।

अर्हन्। इदं। दयसे। विश्वं। अभ्वं। न। वै। ओजीयः। रुद्र। त्वत्। अस्ति ॥१०॥

हे रुद्र त्वमर्हन् अर्हो योग्य एव सन् सायकानि शरान् धन्व धनुश्च बिभर्षि। धारयसि। तथार्हन्नेव यजतं यजनीयं पूजनीयं विश्वरूपं बहुविधरूपयुक्तं निष्कं हारं बिभर्षि। तथार्हन्नेवेदं विश्वं सर्वमभ्वं। महन्नामैतत्। अतिविस्तृतं जगद्दयसे। रक्षसि। देङ् रक्षणे। हे रुद्र त्वत् त्वत्तोऽन्यत् किंचिदोजीय ओजस्वितरं बलवत्तरं न वा अस्ति। न खलु विद्यते। अतस्त्वमेवोक्तव्यापारेषु योज्य इत्यर्थः ॥ ओजस्शब्दान्मत्वर्थीयो विनिः। तत आतिशायनिक इष्ठन्। विन्मतोर्लुक्। टेरिति टिलोपः ॥

॥ इति द्वितीयस्य सप्तमे सप्तदशो वर्गः ॥

प्रयाणे मृगस्यामनोज्ञवचः श्रुत्वा स्तुहि श्रुतमित्येतां जपेत्। सूचितं च स्तुहि श्रुतं गर्तसदं युवानमिति मृगस्येति ॥

॥ सैषाचैकादशी ॥

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रं।

मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपंतु सेनाः ॥११॥

स्तुहि। श्रुतं। गर्तऽसदं। युवानं। मृगं। न। भीमं। उपऽहत्नुं। उग्रं।

मृळ। जरित्रे। रुद्र। स्तवानः। अन्यं। ते। अस्मत्। नि। वपंतु। सेनाः ॥११॥

हे स्तोतः श्रुतं विश्रुतं प्रख्यातं रुद्रं स्तुहि। कीदृशं। गर्तसदं। गर्तो रथः। तत्र सीदंतं युवानं नित्यतरुणं मृगं न भीमं मृगं सिंहमिव भयंकरं। उपहत्नु-

मुपहंतारं शत्रूणामुग्रमुद्गूर्णं। हे रुद्र त्वं स्तवानोऽस्माभिः स्तूयमानः सन् जरित्रे स्तोत्रे मह्यं मृळ। सुखय। ते त्वदीयाः सेना अस्मदन्यमस्मद्यतिरिक्तं पुरुषं नि-वपंतु। निघ्नंतु ॥

॥ अथ द्वादशी ॥

कुमारश्चित्पितरं वंदमानं प्रति नानाम रुद्रोपयंतं ।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ॥१२॥
कुमारः। चित्। पितरं। वंदमानं। प्रति। ननाम। रुद्र। उपऽयंतं।
भूरेः। दातारं। सत्ऽपतिं। गृणीषे। स्तुतः। त्वं। भेषजा। रासि। अस्मे इति ॥१२॥

वंदमानं आयुष्मान् भव सौम्येति स्तुवंतं पितरं कुमारश्चित् यथा कुमारः॥ चिदित्येतदुपमार्थे ॥ हे रुद्र उपयंतमस्मत्समीपे गच्छंतं त्वां प्रतिननाम। प्रति-नतोऽस्मि। अपि च भूरेर्बहुनो धनस्य दातारं सत्पतिं सतां पालयितारं॥ पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरत्वं॥ हे रुद्र एवंभूतं त्वां गृणीषे। स्तौमि॥ मिपस्तिङां तिङो भवंतीति से आदेशः॥ स्तुतश्च त्वमस्मभ्यं भेषजा भेषजानि रासि। देहि॥

॥ अथ त्रयोदशी ॥

या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि ॥१३॥
या। वः। भेषजा। मरुतः। शुचीनि। या। शंऽतमा। वृषणः। या। मयःऽभु।
यानि। मनुः। अवृणीत। पिता। नः। ता। शं। च। योः। च। रुद्रस्य। वश्मि ॥१३॥

हे मरुतो रुद्रपुत्रा वो युष्माकं या यानि भेषजा भेषजान्यस्मदारोग्यहेतुभूता-न्यौषधानि शुचीनि शुद्धानि निर्मलानि संति। हे वृषणः कामानां वर्षितारो मरुतो या यानि च युष्मदीयानि भेषजानि शंतमा अतिशयेन सुखकराणि। या यानि च भेषजानि मयोभु मयोभूनि मयसः सुखस्य भावयितृणि नोऽस्मत्पिता मनुर्यानि भेषजानि युष्मदीयान्यवृणीत वृतवान् ता तानि भेषजानि रुद्रस्य महादेवस्य संबंधि शं च योश्च यच्छमनीयानां रोगाणामुपशमनं यावनीयानां भयानां यद्यावनमस्मत्तः पृथक्करणं तदुभयं च वश्मि। कामये॥ वश कांतौ। आदादिकः॥

॥ अथ चतुर्दशी ॥

परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात्।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥१४॥

परि। नः। हेतिः। रुद्रस्य। वृज्याः। परि। त्वेषस्य। दुःऽमतिः। मही। गात्।
अव। स्थिरा। मघवत्ऽभ्यः। तनुष्व। मीढ्वः। तोकाय। तनयाय। मृळ ॥१४॥

रुद्रस्य महादेवस्य हेतिरायुधं नोऽस्मान्परिवृज्याः। परिवर्जयतु। तथा त्वेषस्य दीप्तस्य रुद्रस्य मही महती दुर्मतिर्दुःखकारिणी बुद्धिश्च परिगात्। अस्मान्वर्जयित्वान्यच गच्छतु॥ अप परि वर्जने॥ हे मीढ्वः सेचनसमर्थ रुद्र स्थिरा स्थिराणि त्वदीयानि धनूंषि मघवद्भ्यो हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्योऽवतनुष्व। अवततज्यानि कुरु। तथा तोकायास्मत्पुत्राय तनयाय तत्पुत्राय च मृळ। सुखं कुरु॥

॥ अथ पंचदशी ॥

एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ॥१५॥

एव। बभ्रो इति। वृषभ। चेकितान। यथा। देव। न। हृणीषे। न। हंसि।
हवनऽश्रुत्। नः। रुद्र। इह। बोधि। बृहत्। वदेम। विदथे। सुऽवीराः ॥१५॥

हे बभ्रो जगतो भर्तर्बभ्रुवर्ण वा वृषभ कामानां वर्षितः चेकितान सर्वं जानन् हे देव द्योतमान रुद्र यथा येन प्रकारेण न हृणीषे न क्रुध्यसि न च हंसि॥ हृणीङ् लज्जायां अयं क्रुध्यतिकर्मा च॥ एवं हवनश्रुत् अस्मदीयमाह्वानं शृण्वन् नोऽस्मान् हे रुद्र इहास्मिन्देशे बोधि। बुध्यस्व। विदथे यज्ञे गृहे वा सुवीराः शोभनपुत्राः संतो बृहत् प्रौढं त्वदीयं स्तोत्रं वदेम। उच्चारयाम॥

॥ इति द्वितीयस्य सप्तमेऽष्टादशो वर्गः ॥

धारावरा इति पंचदशर्चं द्वितीयं सूक्तं गार्त्समदं मारुतं। अंत्या त्रिष्टुप् शिष्टा जगत्यः। तथा चानुक्रांतं। धारावरा मारुतं त्रिष्टुबंतमिति॥ पृष्ठ्याभिप्लवषडहयोस्तृतीयेऽहन्याग्निमारुतशस्त्रस्येदं मारुतनिविद्धानं। सूचितं च। वैश्वानराय धिषणां धारावरा मरुतस्त्वमग्ने प्रथमो अंगिरा इत्याग्निमारुतं। आ° ७.७.। इति॥

॥ तत्रैषा प्रथमा ॥

धारावरा मरुतो धृष्ण्वोजसो मृगा न भीमास्तविषीभिरर्चिनः ।
अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमंतो अप गा अवृण्वत ॥१॥
धाराऽवराः । मरुतः । धृष्णुऽओजसः । मृगाः । न । भीमाः । तविषीभिः । अर्चिनः ।
अग्नयः । न । शुशुचानाः । ऋजीषिणः । भृमिं । धमंतः । अप । गाः । अवृण्वत ॥१॥

धारावरा उदकधारयांतरिक्षमावृण्वंतः । यद्वा धाराणां धृतानां स्थिराणां वृक्षादीनां निवारयितारश्चालयितारः । धृष्णोजसः परेषां धर्षकेण बलेन युक्ताः । अत एव मृगा न भीमाः । सिंहा इव भयंकराः । तविषीभिरात्मीयैर्बलैर्वृष्टिप्रदानादिनार्चिनः सर्वं जगत्पूजयंतः । अग्नयो न शुशुचाना दीप्ता वह्नय इव दीप्यमानाः ॥ शुच दीप्तौ । लटः कानच् ॥ ऋजीषिणः । ऋजीषमुदकं तद्वंतः । यद्वा ऋजीषोऽपगतसारः सोमः । तेन युक्ताः । तृतीयसवने ह्याग्निमारुते मरुतः स्तूयंते । तत्र च सवनद्वयेऽभिषुतं गतसारं सोममभिषुण्वंति । अतस्तेषां तद्युक्तत्वं । एवंभूता मरुतो भृमिं भ्राम्यंतं मेघं धमंतो वर्षणार्थमितस्ततः प्रेरयंतो गास्तदंतर्गता वर्ष्या आपोऽपावृण्वत । अपावृताः कुर्वंति । यथा सर्वैर्दृश्यंते तथा प्रवर्षंतीत्यर्थः । यद्वा भृम्याख्यो वीणाविशेषः । तं धमंतो वादयंतो गा वलनाम्नासुरेणापिहिता अपावृण्वत । अपगतावरणा अकुर्वन् ॥

॥ अथ द्वितीया ॥

द्यावो न स्तृभिश्चितयंत खादिनो व्य१भ्रिया न द्युतयंत वृष्टयः ।
रुद्रो यद्वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊधनि ॥२॥
द्यावः । न । स्तृऽभिः । चितयंत । खादिनः । वि । अभ्रियाः । न । द्युतयंत । वृष्टयः ।
रुद्रः । यत् । वः । मरुतः । रुक्मऽवक्षसः । वृषा । अजनि । पृश्न्याः । शुक्रे । ऊधनि ॥२॥

स्तृभिः । नक्षत्रनामैतत् । यदाह यास्कः । ऋक्षाः स्तृभिरिति नक्षत्राणां । नि॰ ३.२०. । इति । नक्षत्रैर्द्यावो न यथा द्युलोकाश्चितयंत चेतयंति स्वात्मानं ज्ञापयंति ॥ चिती संज्ञाने ॥ प्रकाशंत इत्यर्थः । तथा खादिनः शत्रूणां खादका मरुतः स्वकीयैराभरणैर्ज्ञायंते । यद्वा खादः कटकं । तद्युक्ताः संतः प्रकाशंते । तथा वृष्टयो

वर्षका मरुतोऽभ्रिया न। अभ्रेषु भवा विद्युत इव वि द्युतयंत। सर्वं जगद्विद्योतयंति। प्रकाशयंति॥ अभ्रशब्दाद्भवार्थे समुद्राभ्राद्घ इति घप्रत्ययः॥ शेषः प्रत्यक्षकृतः। रुक्मवक्षसः। रुक्मं रोचमानाभरणं वक्षस्युरसि येषां तादृशा हे मरुतो यद्यदा वो युष्मान् वृषा सेचनसमर्थो रुद्रो महादेवः पृश्न्याः। पृश्निर्माध्यमिका वाक्। तस्याः संबंधिनि शुक्रे निर्मल ऊधन्युद्वते प्रदेशेऽजनि। अजनयत्। तदानीमिति पूर्वत्र संबंधः। यद्वा पृश्निर्नानावर्णेयं भूमिः पुरा गोरूपधरासीत् तस्यां महेशो वृषो भूत्वा मरुत उत्पादयामासेत्याचक्षते। तदत्रोच्यते। हे मरुतो यद्यस्माद्वो युष्मान् वृषा वृषरूपो रुद्रः पृश्न्या गोः शुक्रे निर्मल ऊधन्युधसि पयस उत्पत्तिस्थानेऽजीजनत्तस्माद्यूयमेवंमहानुभावा जाता इत्यर्थः। तथा च तैत्तिरीयकं। पृश्नियै वै पयसो मरुतो जाता इति॥

॥ अथ तृतीया ॥

उक्षंते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयंत आशुभिः।
हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः॥३॥

उक्षंते। अश्वान्। अत्यान्ऽइव। आजिषु। नदस्य। कर्णैः। तुरयंते। आशुऽभिः।
हिरण्यऽशिप्राः। मरुतः। दविध्वतः। पृक्षं। याथ। पृषतीभिः। सऽमन्यवः॥३॥

मरुतोऽश्वान् व्याप्तान् लोकानुक्षंते। सिंचंति॥ अशू व्याप्तौ। औणादिकः क्वन्प्रत्ययः॥ आजिषु संग्रामेष्वत्यानिव सततगामिनस्तुरगान् यथा स्वेदापनोदायोदकैः सिंचंति तद्वत्। अपि च ते मरुत आशुभिः शीघ्रगमनैरश्वैर्नदस्य शब्दवतो मेघस्य कर्णैः कृतैर्मध्यप्रदेशैस्तुरयंते। वर्षणार्थं वृष्ट्युत्पादनाय त्वरितं गच्छंति॥ तुर त्वरणे॥ शेषः प्रत्यक्षकृतः। हे हिरण्यशिप्राः। शिप्रं शिरस्त्राणं। सुवर्णमयशिरस्त्राणाः समन्यवः समानवयस्काः समानक्रोधा वा हे मरुतो दविध्वतो महीरुहादिकं कंपयंतो यूयं॥ धूञ् कंपन इत्यस्माद्दाधर्त्यादावेतद्रूपं निपात्यते॥ पृषतीभिर्युष्मद्रथे योजिताभिः श्वेतबिंद्वंकिताभिर्मृगीभिर्वडवाभिर्वा पृक्षं। अन्ननामैतत्। हविर्लक्षणान्नवंतं यजमानं॥ अर्शआदित्वादच्॥ याथ। गच्छथ॥

॥ अथ चतुर्थी ॥

पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः।
पृषदश्वासो अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः॥४॥

पृक्षे। ता। विश्वा। भुवना। ववक्षिरे। मित्राय। वा। सदं। आ। जीरऽदानवः।
पृषत्ऽअश्वासः। अनवभ्रऽराधसः। ऋजिप्यासः। न। वयुनेषु। धूःऽसदः ॥४॥

पृक्षे पृक्षवते हविर्लक्षणान्नयुक्ताय यजमानाय ता तानि विश्वा सर्वाणि भुवनान्युदकानि मित्राय। वाशब्द उपमार्थः। मित्रायेव सदं सदा आ ववक्षिरे। मरुत आवहंति। यद्वा वाशब्दोऽवधारणे। मित्रभूताय यजमानायैव पृक्षेऽन्ने निमित्तभूते सति वृष्ट्युदकान्यावहंति। कीदृशा मरुतः। जीरदानवः। क्षिप्रदानाः। पृषदश्वासः पृषद्भिः श्वेतविंदुभिर्युक्ता अश्वा येषां ते तथोक्ताः। अनवभ्रराधसः॥ भृंशु भ्रंशु अधःपतने। अवभ्रंशनमवभ्रः। डोऽन्यत्रापि दृश्यत इति डप्रत्ययः। नास्त्यवभ्रो यस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। अनवभ्रं भ्रंशनरहितं राधो धनं येषां ते। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ऋजिप्यासो न। ऋजु अकुटिलं प्राप्नुवंतो गच्छंतोऽश्वा इव वयुनेषु गंतृषु मध्ये धूर्षदो धुरि मेघस्य वहने सीदंतो निषण्णा इत्यर्थः ॥

॥ अथ पंचमी ॥

इंधन्वभिर्धेनुभी रप्शदूधभिरध्वस्मभिः पथिभिर्भ्राजदृष्टयः।
आ हंसासो न स्वसराणि गंतन मधोर्मदाय मरुतः समन्यवः ॥५॥

इंधन्वऽभिः। धेनुऽभिः। रप्शदूधऽभिः। अध्वस्मऽभिः। पथिऽभिः। भ्राजत्ऽऋष्टयः।
आ। हंसासः। न। स्वसराणि। गंतन। मधोः। मदाय। मरुतः। सऽमन्यवः ॥५॥

समन्यवः समानमनस्काः समानक्रोधाः समानतेजसो वा हे मरुतो भ्राजदृष्टयो दीप्यमानायुधा यूयमिंधन्वभिः समिंधनवद्भिः ॥ इंधनशब्दाच्छंदसीवनिपाविति मत्वर्थीयो वनिप्। छांदसो वर्णलोपः ॥ धेनुभिः प्रीणयितृभिश्च रप्शदूधभिः। विरप्शीति महन्नाम। महोधस्कैः। ऊधांसि जलस्रोतोमार्गः। यद्वा रप लप व्यक्तायां वाचि। शब्दायमानोच्छ्रितप्रदेशैरध्वस्मभिर्ध्वंसनरहितैः पथिभिः। पतंति गच्छंतीति पंथानो मेघाः। एवंभूतैर्मेघैः सह मार्गैरेव वागंतन। आगच्छत। किमर्थं। मधोर्मदाय। सोमस्य मदार्थं। तत्र दृष्टांतः। हंसासो न। यथा हंसाः स्वसराणि स्वकीयानि निवासस्थानानि प्राप्नुवंति तद्वत् ॥

॥ इति द्वितीयस्य सप्तम एकोनविंशो वर्गः ॥

॥ अथ षष्ठी ॥

आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गंतन ।
अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसं ॥ ६ ॥

आ । नः । ब्रह्माणि । मरुतः । सऽमन्यवः । नरां । न । शंसः । सवनानि । गंतन ।
अश्वांऽइव । पिप्यत । धेनुं । ऊधनि । कर्त । धियं । जरित्रे । वाजऽपेशसं ॥ ६ ॥

समन्यवः समानमनसः समानक्रोधा वा हे मरुतो नोऽस्माकं ब्रह्माणि ॥ अन्ननामैतत् ॥ अन्नानि सवनान्यभिषुतसोमलक्षणानि हवींष्यागंतन । आगच्छत ॥ गमेर्लोटि छांदसः शपो लुक् । तप्तनप्तनथनाश्चेति तस्य तनबादेशः । अत एव ङित्त्वाभावादनुनासिकलोपाभावः ॥ तत्र दृष्टांतः । नरां न शंसः । नरामस्माकं शंसः शंसनीयं स्तोत्रं यथागच्छथ तद्वत् ॥ नरशब्दात् षष्ठीबहुवचनस्यानित्यमागमशासनमिति नुडभावः । शंसः कर्मणि घञंत आद्युदात्तः । सुपां सुलुगित्यमः सुआदेशः ॥ आगत्य च धेनुमुदकदानेन प्रीणयितारमश्वामिवोधनि पिप्यत । यथाश्वाः पीनावयवा भवंति तद्वन्मेघं वर्षणसमर्थमाप्यायितं कुरुतेत्यर्थः । अपि च जरित्रे स्तोत्रे वाजपेशसं वाजैरन्नैराश्लिष्टं ॥ पिश अवयवे ॥ धियं कर्म कर्त । कुरुत ॥ करोतेश्छांदसः शपो लुक् । पूर्ववत्तशब्दस्य तबादेशः ॥

॥ अथ सप्तमी ॥

तं नो दात मरुतो वाजिनं रथ आपानं ब्रह्म चितयद्दिवेदिवे ।
इषं स्तोतृभ्यो वृजनेषु कारवे सनिं मेधामरिष्टं दुष्टरं सहः ॥ ७ ॥

तं । नः । दात । मरुतः । वाजिनं । रथे । आपानं । ब्रह्म । चितयत् । दिवेऽदिवे ।
इषं । स्तोतृऽभ्यः । वृजनेषु । कारवे । सनिं । मेधां । अरिष्टं । दुस्तरं । सहः ॥ ७ ॥

हे मरुतः तं पुत्रं नोऽस्मभ्यं दात । दत्त प्रयच्छत ॥ छांदसः शपो लुक् ॥ कीदृशं । वाजिनमन्नवंतं बलवंतं वा । रथे रंहणे युष्मदीय आगमने निमित्तभूते सति दिवेदिवे प्रतिदिवसं चितयत् प्रज्ञापयत् युष्मद्गुणप्रख्यापकं । ब्रह्म स्तोत्रमापानमाप्नुवंतं । अपि च इषमन्नं स्तोतृभ्योऽस्मभ्यं दात । प्रयच्छत । तथा वृजनेषु संग्रामेषु कारवे स्तोत्रे ॥ वचनव्यत्ययः ॥ मेधां युद्धप्रज्ञानं सनिं धनदातृत्वं चारिष्टं शत्रुभिरहिंसितं दुस्तरं शत्रुभिस्तरीतुमशक्यं सहो बलं च प्रयच्छत ॥

॥ अथाष्टमी ॥

यद्युंजते मरुतो रुक्मवक्षसोऽश्वान्रथेषु भग आ सुदानवः ।
धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषं ॥८॥
यत् । युंजते । मरुतः । रुक्मऽवक्षसः । अश्वान् । रथेषु । भगे । आ । सुऽदानवः ।
धेनुः । न । शिश्वे । स्वसरेषु । पिन्वते । जनाय । रातऽहविषे । मही । इषं ॥८॥

रुक्मवक्षसो रोचमानाभरणोरस्काः सुदानवः शोभनदाना मरुतो यद्यदा रथेषु भगे भजनीये स्थाने । धुरीत्यर्थः । अश्वानायुंजते । आभिमुख्येन युक्तान्कुर्वंति । तदानीमेव रातहविषे दत्तहविष्काय यजमानाय महीं महतीमिषमन्नं तत्कारणभूतमुदकं वा स्वसरेषु स्वकीयेषु गृहेषु पिन्वते । सिंचंति किरंति ॥ पिवि सेचने ॥ तत्र दृष्टांतः । धेनुर्न शिश्वे । यथा धेनुः प्रस्नुतस्तनी सती स्वकीयाय वत्साय क्षीरं प्रयच्छति तद्वत् ॥

॥ अथ नवमी ॥

यो नो मरुतो वृकताति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः ।
वर्तयत तपुषा चक्रियाभि तमव रुद्रा अशसो हंतना वधः ॥९॥
यः । नः । मरुतः । वृकऽताति । मर्त्यः । रिपुः । दधे । वसवः । रक्षत । रिषः ।
वर्तयत । तपुषा । चक्रिया । अभि । तं । अव । रुद्राः । अशसः । हंतन । वधरिति ॥९॥

हे मरुतः यो मर्त्यो मनुष्यो वृकताति आदाता वृकः ॥ वृक आदाने । वृकज्येष्ठाभ्यां तिल्तातिलौ च छंदसि । पा० ५.४.४१.। इति स्वार्थिकस्तातिल्प्रत्ययः ॥ तादृशः सन् नोऽस्माकं रिपुर्दधे । रिपुतयात्मानं धारयति । हे वसवो वासयितारो मरुतो रिषो हिंसकादस्मान्रक्षत । पालयत । अस्माकं शत्रुभूतं मर्त्यं तपुषा तापयित्र्या चक्रिया ऋष्ट्याख्यया शक्त्याभिवर्तयत । अभितो निवर्तयत । हे रुद्रा रुद्रपुत्राः । यद्वा रोरूयमाणा द्रवंतः अशसो भक्षकस्य ॥ अश भोजन इत्यस्मादौणादिकोऽसिप्रत्ययः ॥ तादृशस्य राक्षसादेर्वधर्हननसाधनमायुधमवहंतन । अवयुत्यास्मत्तः पृथक्कृत्य नाशयत ॥ हंतेर्लोटि तप्तनप्तनथनाश्चेति तनप् ॥

॥ अथ दशमी ॥

चित्रं तद्वो मरुतो याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः ।
यद्वा निदे नवमानस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः ॥१०॥

चित्रं । तत् । वः । मरुतः । याम । चेकिते । पृश्न्याः । यत् । ऊधः । अपि । आपयः । दुहुः ।
यत् । वा । निदे । नवमानस्य । रुद्रियाः । त्रितं । जराय । जुरतां । अदाभ्याः ॥१०॥

हे मरुतो वो युष्माकं चित्रं चायनीयं याम प्रापणं चेकिते । सर्वैर्ज्ञायते । इदानीं परोक्षवदाह । अपिशब्दः प्रसिद्धौ । यद्यदा खलु पृश्न्या माध्यमिकाया वाचः संबंधिनमूधरुद्धतं मेघमापयः प्रापयितारो मरुतो दुहुः । दुहंति ॥ दुहेश्छांदसो लिट् । छंदसि चेति वक्तव्यमिति द्विर्वचनाभावः ॥ यद्वा यदा च नवमानस्य स्तुवतस्त्रितस्य निदे निंदकाय शत्रवे हिंसां कृतवंत इति शेषः ॥ निदि कुत्सायां । क्विप् चेति क्विप् ॥ तदानीं हे अदाभ्या अहिंस्या रुद्रिया रुद्रस्य पुत्रा मरुतस्त्रितमृषिं जुरतां हिंसतां शत्रूणां जराय जरणाय विनाशाय अभूतेति शेषः ॥

॥ इति द्वितीयस्य सप्तमे विंशो वर्गः ॥

॥ अथैकादशी ॥

तान्वो महो मरुत एवयाव्नो विष्णोरेषस्य प्रभृथे हवामहे ।
हिरण्यवर्णान्ककुहान्यतस्रुचो ब्रह्मण्यंतः शंस्यं राध ईमहे ॥११॥

तान् । वः । महः । मरुतः । एवऽयाव्नः । विष्णोः । एषस्य । प्रऽभृथे । हवामहे ।
हिरण्यऽवर्णान् । ककुहान् । यतऽस्रुचः । ब्रह्मण्यंतः । शंस्यं । राधः । ईमहे ॥११॥

हे मरुत एवयाव्न् एवं गंतव्यं स्तोत्रं यज्ञं वा गंतॄन् महो महतो महानुभावांस्तान्वो युष्मान्विष्णोर्व्यापकस्य ग्रहचमसादिषु सर्वत्र व्याप्य वर्तमानस्यैषस्यैषणीयस्य प्रार्थनीयस्य सोमस्य प्रभृथे प्रभरणेऽभिषवादिभिः प्रकर्षेण संपादने सति हवामहे । आह्वयामहे । आहूय च हिरण्यवर्णान् हितरमणीयवर्णान्वा ककुहान् श्रेष्ठान् स्तुत्यान्वा एवंभूतांस्तान् यतस्रुचो यागायोद्यतस्रुचो ब्रह्मण्यंतः । ब्रह्म स्तोत्रं । तदिच्छंतो वयं शंस्यं प्रशंसनीयं राधो धनमीमहे । याचामहे ॥

॥ अथ द्वादशी ॥

ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वंतूषसो व्युष्टिषु ।
उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा ॥१२॥
ते । दशऽग्वाः । प्रथमाः । यज्ञं । ऊहिरे । ते । नः । हिन्वंतु । उषसः । विऽउष्टिषु ।
उषाः । न । रामीः । अरुणैः । अप । ऊर्णुते । महः । ज्योतिषा । शुचता । गोऽअर्णसा ॥१२॥

ते मरुतो दशग्वाः । ये दशभिर्मासैः सिद्धिं गता अंगिरसस्तद्रूपा भूत्वा प्रथमा आदित्येभ्यः प्रथमभाविनः संतो यज्ञमूहिरे । अवहन् । आदित्यानामंगिरसां च स्वर्गगमनं प्रतिस्पर्धमानानां मध्ये पूर्वमेवांगिरसो यागाननुष्ठाय स्वर्गं प्राप्ताः । तथा च श्रूयते । आदित्याश्चैवेहासन्नंगिरसश्च तेऽग्रेऽग्निनाग्निमयजंतेति । तादृशास्त उषसो व्युष्टिषु विवासेषु प्रभातेषु सत्सु नोऽस्मान् हिन्वंतु । प्रेरयंतु ॥ हि गतौ वृद्धौ च ॥ रामीः कृष्णवर्णा रात्रीरुषा न यथोषा अरुणैरारोचमानैः स्वतेजोभिरपोर्णुते । अपवृणोत्यपसारयति । तथा महो महता शुचता दीप्यमानेन गोअर्णसा गच्छदुदकेन ज्योतिषा सूर्याख्येन तमो निवारयंति । सूर्यमंडलमावृखतो वृत्रादीन् हत्वा सर्वं जगत्प्रकाशयंतीत्यर्थः ॥

॥ अथ त्रयोदशी ॥

ते क्षोणीभिररुणेभिर्नांजिभी रुद्रा ऋतस्य सदनेषु वावृधुः ।
निमेघमाना अत्येन पाजसा सुश्चंद्रं वर्णं दधिरे सुपेशसं ॥१३॥
ते । क्षोणीभिः । अरुणेभिः । न । अंजिऽभिः । रुद्राः । ऋतस्य । सदनेषु । ववृधुः ।
निऽमेघमानाः । अत्येन । पाजसा । सुऽचंद्रं । वर्णं । दधिरे । सुऽपेशसं ॥१३॥

रुद्रा रुद्रपुत्रास्ते मरुतः क्षोणीभिः शब्दकारिभिर्वीणाख्यैर्वीणाविशेषैररुणेभिर्नांजिभिः ॥ नशब्दः समुच्चये ॥ आरोचमानैररुणवर्णैर्वा रूपाभिव्यंजकैरलंकारैश्च समन्विताः संत ऋतस्योदकस्य सदनेषु निवासभूतेषु मेघेषु वावृधुः । वर्धते । अपि च अत्येन सततगामिना शीघ्रं व्याप्नुवता पाजसात्मीयेन बलेन निमेघमाना नितरां मेघादुदकं चिंतयंतस्ते सुश्चंद्रं शोभनाह्लादनं सुपेशसं ॥ पेश इति रूपनाम ॥ शोभनरूपं वर्णं दधिरे । कांतिं धारयंति ॥

॥ अथ चतुर्दशी ॥

ताँ इ॒यानो महि॒ वरू॑थमू॒तय॒ उप॒ घेदे॒ना नम॑सा गृ॒णीम॑सि ।
त्रि॒तो न यान्पंच॒ होतॄ॑न॒भिष्ट॑य आव॒वर्त॒दव॑रांच॒क्रियाव॑से ॥ १४ ॥

तान् । इ॒यानः॑ । महि॑ । वरू॑थं । ऊ॒तये॑ । उप॑ । घ॒ । इ॒त् । ए॒ना । नम॑सा । गृ॒णी॒म॒सि॒ ।
त्रि॒तः । न । यान् । पंच॑ । होतॄ॑न् । अ॒भिष्ट॑ये । आ॒ऽव॒वर्त॑त् । अव॑रान् । च॒क्रिया॑ । अव॑से ॥ १४ ॥

तान् मरुतो महि महद्वरूथं वरणीयं प्रशस्तं धनं तन्मरुत ऊतये रक्षणार्थमियान इयाना याचमाना वयं ॥ सुपां सुलुगिति जसः सुः ॥ एनानेन नमसा नमस्कारेण स्तोत्रेण वोपेत् उपेत्य गृणीमसि । स्तुमः ॥ घेति पादपूरणः । एनेत्यत्र सुपां सुलुगिति तृतीयाया आजादेशः । नशब्दः समुच्चये ॥ त्रित ऋषिश्च यानेतान् मरुतः पंच होतॄन् अध्यात्मप्राणापानादिपंचवृत्त्यात्मना वर्तमानान् अत एव होमनिष्पादकान् अवरान् मुख्यानभिष्टयेऽभिलषितसिद्ध्यर्थं चक्रिया नाभिचक्रेणावसेऽवतुं संगंतुमाववर्तत् । स्वस्मान्निर्जिगमिषून्प्राणान् स्वात्माभिमुखमावर्तयत् । यद्वा चक्रिया ऋष्याख्येनायुधेन युक्तान् अवसे स्तुत्यादिभिस्तर्पयितुमावर्तयत् । तान् स्तुम इति संबंधः ॥ ववर्तदिति वृतेर्ण्यंताल्लुङि चङि रूपं ॥

॥ अथ पंचदशी ॥

यया॑ र॒ध्रं पा॒रय॒थात्यंहो॒ यया॑ नि॒दो मुं॒चथ॑ वंदि॒तारं॑ ।
अ॒र्वाची॒ सा म॑रुतो॒ या व॑ ऊ॒तिरो॒ षु वा॒श्रेव॑ सु॒म॒तिर्जि॑गातु ॥ १५ ॥

यया॑ । र॒ध्रं । पा॒रय॑थ । अति॑ । अंहः॑ । यया॑ । नि॒दः । मुं॒चथ॑ । वं॒दि॒तारं॑ ।
अ॒र्वाची॑ । सा । म॒रु॒तः॒ । या । वः॒ । ऊ॒तिः । ओ इति॑ । सु । वा॒श्राऽइ॑व । सु॒ऽम॒तिः ।
जि॒गा॒तु॒ ॥ १५ ॥

हे मरुतो ययोत्या रध्रमाराधकं यजमानमंहः पापमति पारयथ । अतिक्रमयथ । ययोत्या वंदितारं स्तोतारं निदो निंदितुः शत्रोः सकाशान्मुंचथ । मोचयथ । हे मरुतो वो युष्मदीया योतिः सार्वाच्यस्मदभिमुखा भवतु । तथा सुमतिर्युष्मदीया शोभना मतिरनुग्रहात्मिका बुद्धिश्च वाश्रेव हंभारवं कुर्वती धेनुरिव वत्सं सुष्ठु ओ जिगातु । एवं गच्छतु । अस्मान् प्रति सर्वथागच्छत्वित्यर्थः ॥

॥ इति द्वितीयस्य सप्तम एकविंशो वर्गः ॥

उपेमिति पंचदशर्चं तृतीयं सूक्तं गार्त्समदं त्रैष्टुभमपांनपाद्देवताकं। तथा चानुक्रांतं। उपेमपोनप्त्रीयमिति ॥ सूक्तविनियोगो लैंगिकः ॥

॥ तत्रैषा प्रथमा ॥

उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे।
अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोजिषद्धि ॥१॥

उप। ई। असृक्षि। वाजऽयुः। वचस्यां। चनः। दधीत। नाद्यः। गिरः। मे।
अपां। नपात्। आशुऽहेमा। कुवित्। सः। सुऽपेशसः। करति। जोजिषत्। हि ॥१॥

वाजयुर्वाजमन्नमात्मन इच्छन्नहमीमेनां वचस्यां वचसः स्तोत्रस्येच्छामुपासृक्षि। उपासृजामि। उत्पादयामि। अपां नपातं स्तोतुं प्रवृत्तोऽस्मीत्यर्थः ॥ सृजेश्छांदसो लुङ्। लिङ्सिचावात्मनेपदेष्विति सिचः कित्त्वाद्गुणाभावः ॥ स च नाद्यो नदीनां शब्दकारिणीनां मेघस्थानामपां संबंधी आशुहेमा आशु शीघ्रं गंता ॥ हि गतावित्यस्मादन्येभ्योऽपि दृश्यंत इति मनिन् ॥ एवंभूतोऽपां नपात् अपां पौत्रस्थानीयः। अद्भ्य ओषधिवनस्पतयो जायंते ओषधिवनस्पतिभ्य एषोऽग्निर्जायत इति तत्पौत्रत्वं। एतत्संज्ञको देवो गिरः। गृणातीति गीः स्तोता। तस्य मे मम कुवित्। बहुनामैतत्। बहुलं चनोऽन्नं दधीत। दधातु। विदधातु। प्रयच्छत्वित्यर्थः। अपि चास्मान् सुपेशसः शोभनरूपान् शोभनालंकारान्वा करति। करोतु ॥ करोतेर्व्यत्ययेन शप्। कःकरत्करतिकृधिकृतेष्वनदितेः। पा॰ ८. ३. ५०.। इति विसर्जनीयस्य सत्वं ॥ हि यस्मादयं देवो जोजिषत्। स्तोत्राणि सेवते तस्मादस्मानेवमनुगृह्णात्वित्यर्थः ॥ जुषी प्रीतिसेवनयोः। लेट्यडागमः। विकरणः सिप्। इडागमश्च। हि चेति निघातप्रतिषेधः ॥

॥ अथ द्वितीया ॥

इमं स्वस्मै हृद आ सुतष्टं मंत्रं वोचेम कुविदस्य वेदत्।
अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान ॥२॥

इमं। सु। अस्मै। हृदः। आ। सुऽतष्टं। मंत्रं। वोचेम। कुवित्। अस्य। वेदत्।
अपां। नपात्। असुर्यस्य। मह्ना। विश्वानि। अर्यः। भुवना। जजान ॥२॥

अस्मा अपांनपात्संज्ञकाय देवाय हृदो हृदयात् सुतष्टं सुष्ठु निर्मितमिमं मंत्रं

सुष्ठु आभिमुख्येन वोचेम । ब्रवाम । अस्यास्माभिरुक्तमिमं मंत्रं कुविद्वेदत् । बहुलं जानातु ॥ वेत्तेर्लेट्यडागमः । निपातैर्यद्यदिहंतेति निघातप्रतिषेधः ॥ किं स्तोत्रमिति चेदुच्यते । अर्यः स्वाम्यपांनपात्संज्ञको वैद्युतोऽग्निरसुर्यस्य । असुरः शत्रून् क्षेप्ता । तस्य स्वभूतस्य बलस्य मह्ना महिम्ना महत्त्वेन विश्वा सर्वाणि भुवना भुवनानि वृष्ट्युदकानि वृष्ट्युत्पादनेन भूतजातानि वा जजान । जनयामास ॥

अपोनप्त्रीये वसतीवरीसमीप एकधनासु प्राप्तासु समन्या यंतीत्येषानुवक्तव्या । सूत्रितं च । समन्या यंत्युप यंत्यन्या इति तीर्थदेशे । आ॰ ५. १. । इति ॥ सारस्वते च शस्त्रे यद्यप्सु शम्या निपतेत् तदानीमपोनप्त्रीयश्चरुः । तत्रैषैव याज्या । सूत्रितं च । समन्या यंत्युपयंत्यन्या इत्यातःसमानं सर्वेषां । आ॰ १२. ६. । इति ॥

॥ सैषा सूक्ते तृतीया ॥

सम॒न्या यं॒त्युप॑ यंत्य॒न्याः स॑मा॒नमू॒र्वं न॒द्यः॑ पृणंति ।
तमू॒ शुचिं॒ शुच॑यो दीदि॒वांस॑मपां नपा॑तं॒ परि॑ तस्थु॒राप॑ः ॥३॥

सं । अ॒न्याः । यंति॑ । उप॑ । यं॒ति॒ । अ॒न्याः । स॒मा॒नं । ऊ॒र्वं । न॒द्यः॑ । पृ॒णं॒ति॒ ।
तं । ऊं॒ इति॑ । शुचिं॑ । शुच॑यः । दी॒दि॒ऽवांसं॑ । अ॒पां । नपा॑तं । परि॑ । त॒स्थुः॒ । आप॑ः ॥३॥

अन्या वर्ष्या आपो सं यंति । भूम्या संगच्छंते । अन्याश्च पूर्वं तत्रावस्थिता उपयंति । उपगच्छंति । ताः सर्वा आपः समानं सह नद्यो नदीभूता ऊर्वं समुद्रमध्ये वर्तमानं वडवानलं पृणंति ॥ पृण प्रीणने तौदादिकः ॥ तमु तमेवापां नपातं शुचिं निर्मलं दीदिवांसं दीप्यमानं ॥ दीदेतिश्छांदसो दीप्तिकर्मा । लिटः क्वसुः । वस्वेकाजाद्घसामिति नियमादिडभावः । छंदसि वेति वक्तव्यमिति वचनाद्द्विर्वचनाभावः ॥ एवंभूतं शुचयः शुद्धा आपः परितस्थुः । परिवृत्य तिष्ठंति । एष हि वैद्युताग्निरूपेण मेघे वर्तमानोऽस्मानजीजनदिति बुद्ध्या वडवानलरूपेण वर्तमानं तं पर्युपासत इत्यर्थः । यद्वा अन्या एकधनाख्या आपः संयंति । चात्वालोत्करयोर्मध्ये वसतीवरीभिः संगच्छंते । अन्या वसतीवर्याख्या आपश्चोपयंति । उपगच्छंति । ऐकमत्यं प्राप्ता भवंति । एताश्च मिलित्वा यज्ञं साधयंत्यस्तत्साध्यवृष्टिद्वारा नद्यो भूत्वोर्वं पृणंतीत्यादि समानं । एवं हि आपो वा अस्पर्धंत वयं पूर्वं यज्ञं वक्ष्याम इत्यादिकं ब्राह्मणविनियोगश्चानुगृह्यते ॥

॥ अथ चतुर्थी ॥

तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यंत्यापः ।
स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो घृतनिर्णिगप्सु ॥४॥
तं । अस्मेराः । युवतयः । युवानं । मर्मृज्यमानाः । परि । यंति । आपः ।
सः । शुक्रेभिः । शिक्वऽभिः । रेवत् । अस्मे इति । दीदाय । अनिध्मः । घृतऽनिर्निक् ।
अप्ऽसु ॥४॥

तमपां नपातमग्निमस्मेरा अस्मयमाना दर्परहिता युवतयो युवानं युवराजमिव मर्मृज्यमाना अत्यर्थमलंकुर्वाणा आपः ॥ मृजू शौचालंकारयोः ॥ परि यंति । परितो गच्छंति प्राप्नुवंति । घृतनिर्निक् क्षरणशीलोदकनिर्नेजनः । यद्वा निर्निगिति रूपनाम । दीप्तरूपः सोऽपां नपादग्निरप्सु मेघांतर्गतासु समुद्रगतासु वा मध्येऽनिध्म इंधनरहित एव सन् अस्मे अस्माकं रेवद्धनयुक्तमन्नं यथा भवति तथा शुक्रेभिः शुभ्रैर्निर्मलैः शिक्वभिस्तेजोभिर्दीदाय । दीप्यते ॥

॥ अथ पंचमी ॥

अस्मै तिस्रो अव्यथ्याय नारीर्देवाय देवीर्दिधिषंत्यन्नं ।
कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनां ॥५॥
अस्मै । तिस्रः । अव्यथ्याय । नारीः । देवाय । देवीः । दिधिषंति । अन्नं ।
कृताःऽइव । उप । हि । प्रऽसर्स्रे । अप्ऽसु । सः । पीयूषं । धयति । पूर्वऽसूनां ॥५॥

नारीर्नेत्र्यस्तिस्रो देवीर्देव्य इळासरस्वतीभारत्याख्या अव्यथ्यायाव्यथनायास्मै देवायापां नपातेऽन्नं सोमाख्यं दिधिषंति । धारयंति ॥ धिष शब्दे जौहोत्यादिकः । व्यत्ययेनांतादेशः । धातूनामनेकार्थत्वादत्र धारणार्थः ॥ अप्सूदकेषु कृता इवोपप्रसर्स्रे । प्रसरंति ॥ सृ गतौ । लिटीरयो रे इति रेआदेशः । छांदसो हलादिशेषाभावः ॥ यस्मादेवं तस्मात्पूर्वसूनां पूर्वं ब्रह्मणः सकाशादुत्पन्नानामपां पीयूषं सारभूतं सोमाख्यममृतं सोऽपांनपादग्निर्धयति । पिबति ॥

॥ इति द्वितीयस्य सप्तमे द्वाविंशो वर्गः ॥

॥ अथ षष्ठी ॥

अश्वस्यात्र जनिमास्य च स्वर्द्रुहो रिषः संपृचः पाहि सूरीन् ।
आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि ॥ ६ ॥

अश्वस्य । अत्र । जनिम । अस्य । च । स्वः । द्रुहः । रिषः । संऽपृचः । पाहि । सूरीन् ।
आमासु । पूर्षु । परः । अप्रऽमृष्यं । न । अरातयः । वि । नशन् । न । अनृतानि ॥ ६ ॥

अत्रास्मिन्नपांनपात्संज्ञके देवेऽश्वस्य जनिम जन्म भवति । अपांनप्त्रधिष्ठितात्समुद्रादुच्चैःश्रवसो जातत्वात् । किं बहुना । अस्य च स्वः सुष्ठ्वरणीयस्य सर्वस्य जगतो जन्मास्मिन्नेव भवति । अयं हि मेघमध्ये वर्तमानो वृष्टिद्वारेण सर्वं जगज्जनयति । तादृशोऽपांनपात्त्वं द्रुहो द्रोग्धुरपहर्तू रिषो हिंसकस्य च संपृचः संपर्कात्सूरीन् स्तोतॄनस्मान्पाहि । रक्ष । आमास्वपरिपक्वासु पूर्षु पूरयितव्यास्वप्सु परः परस्ताद्वर्तमानमप्रमृष्यमप्रधृष्यमाणं देवमरातयोऽदातारः पुरुषा न विनशन् । न प्राप्नुवंति ॥ नशतिर्व्याप्तिकर्मा । लेट्यडागमः ॥ अनृतानि मायाविनो रक्षांसि च न प्राप्नुवंति ॥

॥ अथ सप्तमी ॥

स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति ।
सो अपां नपादूर्जयन्नप्स्व१ंतर्वसुदेयाय विधते वि भाति ॥ ७ ॥

स्वे । आ । दमे । सुऽदुघा । यस्य । धेनुः । स्वधां । पीपाय । सुऽभु । अन्नं । अत्ति ।
सः । अपां । नपात् । ऊर्जयन् । अप्ऽसु । अंतः । वसुऽदेयाय । विधते । वि । भाति ॥ ७ ॥

योऽपांनपात् स्वे दमे स्वकीये गृहेऽतरिक्षलक्षण आसीदति । यस्य च धेनुर्माध्यमिका वाक् सुदुघा सुखेन दोग्धव्या भवति । स देवः स्वधां वृष्ट्युदकं पीपाय । वर्धयति ॥ प्यायी वृद्धौ । लिड्यङोश्चेति पीभावः ॥ सुभु सुष्ठु भूतं वृष्टेः सकाशादुत्पन्नं हविर्लक्षणमन्नं चात्ति । भक्षयति । सोऽपांनपात्संज्ञको देव ऊर्जयन् बलं कुर्वन् अप्स्वंतर्मेघस्यास्वप्सु मध्ये विधते परिचरते यजमानाय वसुदेयाय धनदानार्थं विभाति । विशेषेण दीप्यते ॥

॥ अथाष्टमी ॥

यो अप्स्वा शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति ।
वया इदन्या भुवनान्यस्य प्र जायंते वीरुधश्च प्रजाभिः ॥ ८ ॥

यः । अप्ऽसु । आ । शुचिना । दैव्येन । ऋतऽवा । अजस्रः । उर्विया । विऽभाति ।
वयाः । इत् । अन्या । भुवनानि । अस्य । प्र । जायंते । वीरुधः । च । प्रऽजाभिः ॥ ८ ॥

योऽपांनपादृतावा । ऋतमित्युदकनाम । तद्वान् सत्यवान्वा अजस्रो नित्य एकरूपेण सदा वर्तमान उर्विया उरुर्विस्तीर्णोऽप्सु मेघस्थासु मध्ये शुचिना शोचकेन दैव्येन देवसंबंधिना तेजसा आ समंताद्विभाति । विशेषेण प्रकाशते । अस्यापांनपातोऽन्या अन्यानि भुवनानि सर्वाणि भूतजातानि वया इत् शाखा एव । वीरुध ओषधयः प्रजाभिः स्वकीयाभिः पुष्पफलादिभिः सहास्मादेव प्रजायंते ॥

पूर्वोक्ते सारस्वतसत्रस्यापोनप्त्रीये चरावपां नपादा हीत्येषानुवाक्या । सूचितं च । अपां नप्त्रे चरुमपां नपादा ह्यस्थादुपस्थं । आ॰ १२. ६. । इति ॥

॥ सैषा सूक्ते नवमी ॥

अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः ।
तस्य ज्येष्ठं महिमानं वहंतीर्हिरण्यवर्णाः परि यंति यह्वीः ॥ ९ ॥

अपां । नपात् । आ । हि । अस्थात् । उपऽस्थं । जिह्मानां । ऊर्ध्वः । विऽद्युतं । वसानः ।
तस्य । ज्येष्ठं । महिमानं । वहंतीः । हिरण्यऽवर्णाः । परि । यंति । यह्वीः ॥ ९ ॥

अपांनपात्संज्ञकोऽग्निरुपस्थमपामुपस्थानमंतरिक्षमाह्यस्थात् । आस्थितवान् आरूढवान् खलु । किं कुर्वन् । जिह्मानां कुटिलगतीनामपां मध्य ऊर्ध्वः स्वयमूर्ध्वं ज्वलन् विद्युतं विद्योतमानं मेघं वसान आच्छादयन् । अंतरिक्षमास्थाय वर्षणं कृतवान् । तस्य वर्षितुरपांनपातो ज्येष्ठं प्रशस्यतमं महिमानं माहात्म्यं वहंतीर्वहंत्यः सर्वत्र प्रापयंत्यो यह्वीर्यह्व्यो महत्यो हिरण्यवर्णाः । नदीनामैतत् । हिरण्यवन्निर्मलरूपा नद्यः परियंति । परितो गच्छंति । अपांनप्त्रा महती वृष्टिरस्माकं प्रवाहनायोत्पादितेति कृतज्ञतया तदीयं माहात्म्यं सर्वत्र प्रकटयंत्य इव नद्यः प्रवहंतीत्यर्थः ॥

॥ अथ दशमी ॥

हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः ।
हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥१०॥

हिरण्यऽरूपः । सः । हिरण्यऽसंदृक् । अपां । नपात् । सः । इत् । ऊं इति । हिरण्यऽवर्णः ।
हिरण्ययात् । परि । योनेः । निऽसद्य । हिरण्यऽदाः । ददति । अन्नं । अस्मै ॥१०॥

सोऽपांनपात् हिरण्यरूपः । रूप्यत इति रूपं शरीरं । सुवर्णमयशरीरो हितरमणीयशरीरो वा । तथा हिरण्यसंदृक् । सम्यक् पश्यंतीति संदृश इंद्रियाणि । सुवर्णमयेंद्रियो हितरमणीयेंद्रियो वा । सेदु स एवापांनपात् हिरण्यवर्णो हिरण्यसदृशकांतियुक्तः । एवंभूतः सन् हिरण्ययात्सुवर्णमयाद्योनेः स्थानात् पर्युपरि निषद्योपविश्य राजत इति शेषः । अस्मा ईदृग्विधायापां नपाते हिरण्यदा दक्षिणारूपस्य सुवर्णस्य दातारो यजमाना अन्नं हविर्लक्षणं ददति । प्रयच्छंति ॥

॥ इति द्वितीयस्य सप्तमे त्रयोविंशो वर्गः ॥

॥ अथैकादशी ॥

तदस्यानीकमुत चारु नामापीच्यं वर्धते नप्तुरपां ।
यमिंधते युवतयः समित्था हिरण्यवर्णं घृतमन्नमस्य ॥११॥

तत् । अस्य । अनीकं । उत । चारु । नाम । अपीच्यं । वर्धते । नप्तुः । अपां ।
यं । इंधते । युवतयः । सं । इत्था । हिरण्यऽवर्णं । घृतं । अन्नं । अस्य ॥११॥

अस्यापांनप्तुर्देवस्यानीकं रश्मिसमूहरूपं शरीरं चारु शोभनं । उत अपि च अस्य नाम संज्ञा च चारु शोभनं न पातयति न विनाशयतीति नपादिति तद्युत्पत्तेः । तदुभयमपीच्यं । अंतर्हितनामैतत् । मेघांतर्हितं सद्वर्धते । युवतयः संगमनस्वभावा आपो हिरण्यवर्णं हिरण्यसमानतेजसं यमपांनपातमित्थामुत्रांतरिक्षे समिंधते । सम्यक् दीपयंति । अस्य च देवस्य घृतं क्षरणशीलमुदकमन्नं भक्ष्यं । अबिंधनो ह्यसौ वैद्युतोऽग्निः ॥

॥ अथ द्वादशी ॥

अस्मै बहूनामवमाय सख्ये यज्ञैर्विधेम नमसा हविर्भिः ।
सं सानु मार्ज्मि दिधिषामि बिल्मैर्दधाम्यन्नैः परि वंद ऋग्भिः ॥१२॥

अस्मै। बहूनां। अवमाय। सख्ये। यज्ञैः। विधेम। नमसा। हविःऽभिः।
सं। सानु। मार्ज्मि। दिधिषामि। बिल्मैः। दधामि। अन्नैः। परि। वंदे। ऋक्ऽभिः ॥१२॥

अस्मै पुरोवर्तिने बहूनां देवानामवमायाद्याय सख्येऽस्माभिः समानाख्यानायापां नपाते यज्ञैर्यागसाधनैर्हविर्भिश्चरुपुरोडाशादिभिर्नमसा नमस्कारेण च विधेम। परिचरेम। अस्यापांनपातः सानु समुच्छ्रितप्रदेशं संमार्ज्मि। सम्यक् शोधयामि अलंकरोमि वा॥ मृजू शौचालंकारयोः। चादिलोपे विभाषेत्यस्य निघातप्रतिषेधः॥ दिधिषामि धारयामि च बिल्मैर्भासनैः काष्ठैरेनं॥ धिष शब्दे। अयं धारणार्थोऽपि। जुहोत्यादित्वात् शपः श्लुः। मिपो व्यत्ययेनाडागमः। अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ दधामि धारयामि चैनं गार्हपत्यादिरूपेणान्नैर्हविर्लक्षणैः। तथा ऋग्भिर्मंत्रैः परिवंदे। परितः स्तौमि॥

॥ अथ त्रयोदशी ॥

स ईं वृषाजनयत्तासु गर्भं स ईं शिशुर्धयति तं रिहंति।
सो अपां नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष ॥१३॥
सः। ईं। वृषा। अजनयत्। तासु। गर्भं। सः। ईं। शिशुः। धयति। तं। रिहंति।
सः। अपां। नपात्। अनभिम्लातऽवर्णः। अन्यस्यऽइव। इह। तन्वा। विवेष ॥१३॥

स ईं सोऽयमपांनपात्संज्ञको देवो वृषा सेक्ता भूत्वा तासु मेघस्थास्वप्सु गर्भमजनयत्। स्वात्मानमेव गर्भरूपेण वर्षणार्थं कृतवानित्यर्थः। गर्भो भूत्वा च स ईं सोऽयं माध्यमिको वैद्युतोऽग्निस्तासां शिशुः पुत्रः सन् धयति। मेघस्थास्ताः पिबति। अबिंधनो ह्यसौ। तं पुत्रस्थानीयमग्निरापश्च रिहंति। लिहंति॥ लिह आस्वादने। कपिलकादित्वाल्लत्वविकल्पः॥ सोऽयमपांनपात् वृष्ट्या सह भूमौ निपतितोऽनभिम्लातवर्णः। अभितो म्लातो म्लानः क्षीणो वर्णो यस्य तद्विपरीतोऽत्यर्थं दीप्यमानः सन् इहास्मिन् लोकेऽन्यस्येव। इवशब्दोऽवधारणे। अन्यस्य पार्थिवस्यैवाग्नेस्तन्वा शरीरेण काष्ठेंधनलक्षणेन विवेष। व्याप्तो बभूव॥ विष्लृ व्याप्तौ॥

॥ अथ चतुर्दशी ॥

अस्मिन्पदे परमे तस्थिवांसमध्वस्मभिर्विश्वहा दीदिवांसं।
आपो नप्त्रे घृतमन्नं वहंतीः स्वयमत्कैः परि दीयंति यह्वीः ॥१४॥

अस्मिन्। पदे। परमे। तस्थिऽवांसं। अध्वस्मऽभिः। विश्वहा। दीदिऽवांसं।
आपः। नप्त्रे। घृतं। अन्नं। वहंतीः। स्वयं। अत्कैः। परि। दीयंति। यह्वीः ॥१४॥

परम उत्कृष्टेऽस्मिन्पदेऽंतरिक्षलक्षणे स्थाने तस्थिवांसं स्थितवंतमध्वस्मभिर्ध्वंसनरहितैस्तेजोभिर्विश्वहा सर्वाण्यहानि दीदिवांसं दीप्यमानमपां नपातं यह्वीर्यह्वो महत्य आपः स्वयमात्मनैवात्कैरतनशीलैः सततगंतृभिः स्वकीयै रूपैः परिदीयंति। परिगच्छंति ॥ दीयतिर्गतिकर्मा। दीङ् क्षये। व्यत्ययेन परस्मैपदं ॥ किं कुर्वत्यः। नप्त्रेऽपां नपाते घृतं क्षरणशीलोदकात्मकमन्नं वहंतीर्वहंत्यः ॥

॥ अथ पंचदशी ॥

अयांसमग्ने सुक्षितिं जनायायांसमु मघवद्भ्यः सुवृक्तिं।
विश्वं तद्भद्रं यदवंति देवा बृहद्वदेम विदथे सुवीराः ॥१५॥

अयांसं। अग्ने। सुऽक्षितिं। जनाय। अयांसं। ऊं इति। मघवत्ऽभ्यः। सुऽवृक्तिं।
विश्वं। तत्। भद्रं। यत्। अवंति। देवाः। बृहत्। वदेम। विदथे। सुऽवीराः ॥१५॥

हे अग्ने सुक्षितिं शोभननिवासं त्वामयांसं। उपागच्छं। किमर्थं। जनाय। अस्मदीयपुत्रादिजननार्थं। तथा मघवद्भ्यो हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यश्च सुवृक्तिं शोभनावर्जकं त्वद्विषयं स्तोत्रमयांसं। उपागच्छं ॥ यम उपरमे ॥ अतः कारणाद्यद्भद्रं सर्वे देवा अवंति रक्षंति विश्वं सर्वं तद्भद्रमस्माकं भवतु। सुवीराः सुपुत्रा वयं विदथे यज्ञे गृहे वा बृहत् प्रौढं स्तोत्रं वदेम। उच्चारयाम ॥

॥ इति द्वितीयस्य सप्तमे चतुर्विंशो वर्गः ॥

तुभ्यमिति षडृचं चतुर्थं सूक्तं गार्त्समदं जागतं। प्रथमाया इंद्रो मधुश्च देवता। द्वितीयाया मरुतो माधवश्च। तृतीयायास्त्वष्टा शुक्रश्च। चतुर्थ्या अग्निः शुचिश्च। पंचम्या इंद्रो नभश्च। षष्ठ्या मित्रावरुणौ नभस्यश्च ॥ तथा चानुक्रांतं। तुभ्यं षडृतव्यं तु जागतं त्विति ॥ दशरात्रे षष्ठेऽहनि ऋतुयाजेषु ऋक्शिरस्कैः प्रैषैः प्रेषितव्यं यष्टव्यं च। तत्राद्यानां षण्णां प्रैषाणामुपरिष्टादेव ताः षडृचोऽहोरात्रादिभिः क्रमेणावपनीयाः। तथा च सूत्रितं। उपरिष्टादृच ऋतुयाजानामित्युपक्रम्य तुभ्यं हिन्वानो वसिष्ट गा अप इति द्वादशेत्यंतेन। आ॰ ८.१.॥

॥ तत्रैषा प्रथमा ॥

तुभ्यं हिन्वानो वसिष्ट गा अपोऽधुक्षन्त्सीमविभिरद्रिभिर्नरः ।
पिबेंद्र स्वाहा प्रहुतं वषट्कृतं होत्रादा सोमं प्रथमो य ईशिषे ॥ १ ॥
तुभ्यं । हिन्वानः । वसिष्ट । गाः । अपः । अधुक्षन् । सीं । अविऽभिः । अद्रिऽभिः । नरः ।
पिब । इंद्र । स्वाहा । प्रऽहुतं । वषट्ऽकृतं । होत्रात् । आ । सोमं । प्रथमः । यः । इशिषे ॥ १ ॥

हे इंद्र तुभ्यं त्वदर्थं हिन्वानः प्रेर्यमाणः सोमो गा गोविकाराणि दधिपयःप्रभृतीनि श्रपणद्रव्याणि वसतीवर्याख्या आपश्च वसिष्ट । वस्ते । आच्छादयति । तैः संयुज्यत इत्यर्थः । नरो यज्ञस्य नेतारोऽध्वर्यवश्च सीमेनं सोममविभिरवेर्बालमयैर्दशापवित्रैरद्रिभिर्ग्रावभिश्चाधुक्षन् । अक्षारयन् । ग्रावभिरभिषुत्य दशापवित्रेण पुनंतीत्यर्थः । हे इंद्र यस्त्वमीशिषे । सर्वस्य जगत ईश्वरो भवसि त्वं प्रथमोऽन्येभ्यो देवेभ्यः पूर्वभावी सन् स्वाहा स्वाहाकारेण प्रहुतं प्रकर्षेणाग्नौ क्षिप्तं वषट्कृतं वषट्कारेण च त्यक्तं तं सोमं होत्राद्धोतुर्यागादा समंतात्पिब ॥

॥ अथ द्वितीया ॥

यज्ञैः संमिश्लाः पृषतीभिर्ऋष्टिभिर्यामंञ्छुभ्रासो अंजिषु प्रिया उत ।
आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबत दिवो नरः ॥ २ ॥
यज्ञैः । संऽमिश्लाः । पृषतीभिः । ऋष्टिऽभिः । यामन् । शुभ्रासः । अंजिषु । प्रियाः । उत ।
आऽसद्य । बर्हिः । भरतस्य । सूनवः । पोत्रात् । आ । सोमं । पिबत । दिवः । नरः ॥ २ ॥

हे मरुतो यज्ञैर्यागैः संमिश्लाः संयुक्ताः पृषतीभिः स्ववाहनभूताभिः पृषद्वतीभिर्वडवाभिर्युक्ते यामन् यामनि गमनसाधने रथेऽवस्थिता ऋष्टिभिः स्वकीयैरायुधैः शुभ्रासः शुभ्राः शोभमानाः । उतशब्दश्चार्थे । अंजिष्वाभरणेषु प्रियाश्च हे भरतस्य सूनवः सर्वस्य जगतो भर्तू रुद्रस्य पुत्रा दिवो नरो दिवोऽंतरिक्षस्य नेतारः एवंभूता हे मरुतः ते यूयं बर्हिरास्तीर्णे बर्हिष्यासद्योपविश्य पोत्रात् पोतुर्यागात् सोममापिबत ॥

तृतीयसवनेऽमेव न इत्येषा नेष्टुः प्रस्थितयाज्या च । तथा च सूचितं । अमेव नः सुहवा आ हि गंतनेंद्राविष्णू पिबतं मध्वो अस्य । आ° ५.५. । इति ॥

॥ सैषा तृतीया ॥

अमेव नः सुहवा आ हि गंतन नि बर्हिषि सदतना रणिष्टन ।
अथा मंदस्व जुजुषाणो अंधसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥३॥
अमाऽइव । नः । सुऽहवाः । आ । हि । गंतन । नि । बर्हिषि । सदतन । रणिष्टन ।
अथ । मंदस्व । जुजुषाणः । अंधसः । त्वष्टः । देवेभिः । जनिऽभिः । सुमत्ऽगणः ॥३॥

इवशब्दोऽवधारणे। हे सुहवाः शोभनाह्वानास्त्वष्टृप्रभृतयो नोऽस्मान् अमेव सहैवागंतन। आगच्छत ॥ गमेश्छांदसः शपो लुक्। तप्तनप्तनथनाश्चेति तनबादेशः। हिशब्दः पूरणः ॥ आगत्य च बर्हिषि वेद्यामास्तीर्णे निषदतन। निषण्णा भवत ॥ सदेश्छांदसः सीदादेशाभावः ॥ उपविश्य च रणिष्टन। रमध्वं ॥ रण शब्दार्थः। अत्र क्रीडायां वर्तते धातूनामनेकार्थत्वात्। अस्माच्छांदसो लुङ्। पूर्ववत्तनबादेशः ॥ अथानंतरं हे त्वष्टः देवेभिरन्यैर्देवैर्जनिभिर्देवपत्नीभिश्च सुमद्गणः शोभनगणस्त्वमंधसः सोमलक्षणस्यान्नस्य ॥ द्वितीयार्थे षष्ठी ॥ सोमलक्षणमन्नं जुषाणः सेवमानो मंदस्व। तृप्तो भव ॥

॥ अथ चतुर्थी ॥

आ वक्षि देवाँ इह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु ।
प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्तव भागस्य तृप्णुहि ॥४॥
आ । वक्षि । देवान् । इह । विप्र । यक्षि । च । उशन् । होतः । नि । सद । योनिषु । त्रिषु ।
प्रति । वीहि । प्रऽस्थितं । सोम्यं । मधु । पिब । आग्नीध्रात् । तव । भागस्य । तृप्णुहि ॥४॥

हे विप्र मेधाविन्नग्ने देवान् यष्टव्यानिंद्रादीनावक्षि। आवह। यक्षि च। तान्यज च। हे होतर्देवानामाह्वातस्त्वं चोशन्नस्मदीयं कामयमानः सन् त्रिषु योनिषु स्थानेषु गार्हपत्यादिलक्षणेषु निषीद। उपविश। उपविश्य च प्रस्थितं होमार्थमुत्तरवेदिं प्रत्यानीतं सोम्यं सोममयं मधु प्रतिवीहि। प्रतिकामयस्व। कामयित्वा चाग्नीध्रादग्नीध्रयागात्सोमं पिब। पीत्वा च तव भागस्य त्वदीयेन भागेन तृप्णुहि। तृप्तो भव ॥

॥ अथ पंचमी ॥

एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः ।
तुभ्यं सुतो मघवन्तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृपत्पिब ॥ ५ ॥
एषः । स्यः । ते । तन्वः । नृम्णऽवर्धनः । सहः । ओजः । प्रऽदिवि । बाह्वोः । हितः ।
तुभ्यं । सुतः । मघऽवन् । तुभ्यं । आऽभृतः । त्वं । अस्य । ब्राह्मणात् । आ । तृपत् । पिब ॥ ५ ॥

हे इंद्र स्यः स एष सोमस्ते तव तन्वः शरीरस्य नृम्णवर्धनः । बलस्य वर्धकः । तुभ्यं सुत इत्युत्तरत्र संबंधः । येन सोमेन प्रदिवि पुराणे त्वयि बाह्वोर्हस्तयोः सहः परेषामभिभवनलक्षणं सामर्थ्यमोजस्तत्कारणभूतं बलं च हितः । निहितं भवति ॥ लिंगव्यत्ययः ॥ हे मघवन् धनवन्निंद्र तुभ्यं त्वदर्थं तादृशः सोमः सुतोऽध्वर्युभिरभिषुतः । तुभ्यं होतुमाभृतः । उत्तरवेद्यां प्रत्याहृतश्च । अस्येमं सोमं ब्राह्मणात् ब्राह्मणाच्छंसिनो यागात्तृपत् तृप्यंस्त्वमापिब । आभिमुख्येन पिब ॥ क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वादस्येति चतुर्थ्यर्थे षष्ठी ॥

॥ अथ षष्ठी ॥

जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु ।
अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु ॥ ६ ॥
जुषेथां । यज्ञं । बोधतं । हवस्य । मे । सत्तः । होता । निऽविदः । पूर्व्याः । अनु ।
अच्छ । राजाना । नमः । एति । आऽवृतं । प्रऽशास्त्रात् । आ । पिबतं । सोम्यं । मधु ॥ ६ ॥

हे मित्रावरुणौ मदीयमिमं यज्ञं जुषेथां । सेवेथां । मे मम हवस्य हवमाह्वानं ॥ पूर्ववत्कर्मणि षष्ठी ॥ बोधतं । अवगच्छतं । तथा सत्तो निषण्णोऽस्मदीयो होता पूर्व्याश्चिरंतनीर्निविदः ॥ वाङ्नामैतत् ॥ शस्त्रलक्षणा वाचोऽनु शंसतीति शेषः । उद्गातृभिः कृतस्य स्तोत्रस्यानुगुण्येनाज्यादीनि शस्त्राणि शंसतीत्यर्थः । अपि च नमः सोमलक्षणमन्नमावृतमृत्विग्भिर्वेष्टितं राजाना राजमानौ युवामच्छाभिमुख्येनैति । गच्छति प्राप्नोति । तादृशं सोम्यं सोममयं मधु मादकं हविः प्रशास्त्रात् प्रशास्तुर्यागादापिबतं । आभिमुख्येन पिबतं ॥

॥ इति द्वितीयस्य सप्तमे पंचविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके सप्तमोऽध्यायः समाप्तः ॥

---

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ द्वितीयाष्टकस्याष्टमोऽध्याय आरभ्यते । द्वितीयमंडलस्य चतुर्थानुवाके मंदस्वेति षडृचं पंचमं सूक्तं गार्त्समदं । मंदस्वेत्यनुक्रांतं । पूर्वत्र ऋतव्यं तु जागतं त्विति तुशब्दप्रयोगादिदमपि जागतमृतव्यं । तत्राद्याश्चतस्र ऋचो द्रविणोदोदेवताकाः पंचम्याश्विनी षष्ठ्याग्नेयी ॥ दशरात्रे षष्ठेऽहनि ऋतुयाजेषु प्रैषानृक्शिरस्कान् कृत्वा तैः प्रैषैः प्रेषितव्यं यष्टव्यं च । तत्र सप्तमादीनां प्रैषाणामुपरिष्टात् मंदस्वेत्याद्याः षडृचः क्रमेण प्रक्षेपणीयाः । सूत्रं तु पूर्वमेवोदाहृतं ॥

॥ तत्र प्रथमा ॥

मंदस्व होत्रादनु जोषमंधसोऽध्वर्यवः स पूर्णां वष्ट्यासिचं ।
तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥१॥

मंदस्व । होत्रात् । अनु । जोषं । अंधसः । अध्वर्यवः । सः । पूर्णां । वष्टि । आऽसिचं ।
तस्मै । एतं । भरत । तत्ऽवशः । ददिः । होत्रात् । सोमं । द्रविणःऽदः । पिब । ऋतुऽभिः ॥१॥

हे द्रविणोदो द्रविणसो धनस्य दातरेतन्नामक देव अंधसो देवानामन्नरूपस्य सोमस्य सोमेन होत्रात् होतृकर्तृकाद्यागादनु जोषं प्रीतिमनु मंदस्व । हे अध्वर्यवः स द्रविणोदाः पूर्णां संपूर्णामासिचं सिच्यमानामाहुतिं वष्टि । कामयते । अतस्तस्मै द्रविणोदसेऽग्नय एतं सोमं भरत । प्रापयत । तद्वशस्तत्कामो द्रविणोदा

ददिर्दाता युष्माकमभीष्टफलस्य दाता भवतीति शेषः। किंच हे द्रविणोदो होत्रात् होतुर्यागात् ऋतुभिरिषमासाभिमानिभिर्ऋतुदेवैः सह सोमं पिब ॥

॥ अथ द्वितीया ॥

यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते ।
अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥२॥

यं। ऊं इति। पूर्वं। अहुवे। तं। इदं। हुवे। सः। इत्। ऊं इति। हव्यः। ददिः। यः। नाम। पत्यते।
अध्वर्युऽभिः। प्रऽस्थितं। सोम्यं। मधु। पोत्रात्। सोमं। द्रविणःऽदः। पिब। ऋतुऽभिः ॥२॥

हे द्रविणोदो यमु यं त्वामेव पूर्वं होतृकर्तृके सोमयागेऽहुवे। आहुतवानस्मि इदं संप्रति तं तमेव पोतृकर्तृके सोमयागे हुवे। आह्वयामि। सेत् स एव द्रविणोदा हव्यो ह्वातव्यः ॥ उ इति पूरणे ॥ ददिरभीष्टफलस्य दाता यो नाम यः खलु पत्यते देवतात्वेनेष्टे तस्मै द्रविणोदसे सोम्यं सोमात्मकं मध्वध्वर्युभिः प्रस्थितं प्रणीतमासीत्। हे द्रविणोदः पोत्रात् पोतुर्यागादृतुभिरूर्जसंज्ञकैः सह सोमं पिब ॥

॥ अथ तृतीया ॥

मेद्यंतु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते ।
आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥३॥

मेद्यंतु। ते। वह्नयः। येभिः। ईयसे। अरिषण्यन्। वीळयस्व। वनस्पते।
आऽयूय। धृष्णो इति। अभिऽगूर्य। त्वं। नेष्ट्रात्। सोमं। द्रविणःऽदः। पिब। ऋतुऽभिः ॥३॥

हे द्रविणोदो येभिर्यैर्वाहैरीयसे प्राप्नोषि ॥ ते तव वह्नयो वोढार इति यास्केनोक्तत्वात्। नि० ८. ३. ॥ ते मेद्यंतु। तृप्यंतु। हे वनस्पते वनानां पते अरिषण्यन् अहिंसन् वीळयस्व। दृढीभव। हे धृष्णो धर्षक त्वमायूयागत्य अभिगूर्योद्यम्य नेष्ट्रात् नेष्टुर्यागादृतुभिः सहःसंज्ञकैः सह सोमं पिब ॥

॥ अथ चतुर्थी ॥

अपाद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितं ।
तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्रविणोदसः ॥४॥

अपात्। होत्रात्। उत। पोत्रात्। अमत्त। उत। नेष्ट्रात्। अजुषत। प्रयः। हितं। तुरीयं। पात्रं। अमृक्तं। अमर्त्यं। द्रविणःऽदाः। पिबतु। द्रविणःऽदसः ॥४॥

अच्छावाकस्येयं। यो द्रविणोदा होत्राद्धोतुर्यागात् सोममपात् पीतवान् उत किंच पोत्रात्पोतुर्यागादमत्त सोमं पीत्वामाद्यत्। उत अपि च नेष्ट्रात् नेष्टुर्यागाद्धितं दत्तं प्रयो देवानामन्नरूपं सोममजुषत। असेविष्ट। स द्रविणोदसो हवीरूपद्रविणस्य प्रदातृभ्य ऋत्विग्भ्यो हितः॥ ऋत्विजोऽत्र द्रविणोदस उच्यंते हविषो दातारस्ते चैनं जनयंति। नि० ८. २.। इति यास्केनोक्तत्वात्॥ तादृशो द्रविणोदा अमृक्तं दशापवित्रेणामृष्टममर्त्यममरणसाधनं तुरीयं पात्रं चतुर्थपात्रस्थं सोमं पिबतु ॥

॥ अथ पंचमी ॥

अर्वांचमद्य यय्यं नृवाहणं रथं युंजाथामिह वां विमोचनं।
पृंक्तं हवींषि मधुना हि कं गतमथा सोमं पिबतं वाजिनीवसू ॥५॥

अर्वांचं। अद्य। यय्यं। नृऽवाहनं। रथं। युंजाथां। इह। वां। विऽमोचनं।
पृंक्तं। हवींषि। मधुना। हि। कं। गतं। अथ। सोमं। पिबतं। वाजिनीवसू इति वाजिनीऽवसू ॥५॥

हे अश्विनौ अद्यास्मिन्नहनि यय्यं ययिं गंतारं नृवाहणं नेत्रोर्युवयोर्वोढारमिह यज्ञे वां युवयोर्विमोचनं विमोचयितारं रथमर्वाचं यथार्वाग्भवति तथा युंजाथां। किंच मधुना स्वादुरसेन हवींषि पृंक्तं। संयोजयतं। अथ च गतं। आगच्छतं॥ हि कमिति पूरणे॥ अथानंतरं हे वाजिनीवसू। वाज एव वाजिनी। अन्नेन वासयितारौ बलवर्धनौ वा सोमं पिबतं॥

॥ अथ षष्ठी ॥

जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिं।
विश्वेभिर्विश्वाँ ऋतुना वसो मह उशन्देवाँ उशतः पायया हविः ॥६॥

जोषि। अग्ने। संऽइधं। जोषि। आऽहुतिं। जोषि। ब्रह्म। जन्यं। जोषि। सुऽस्तुतिं।
विश्वेभिः। विश्वान्। ऋतुना। वसो इति। महः। उशन्। देवान्। उशतः। पायय। हविः ॥६॥

हे अग्ने समिधं जोषि। जुषस्व। आहुतिं जोषि। जुषस्व। ब्रह्म शस्त्रं जन्यं जनेभ्यो हितं जोषि। जुषस्व। सुष्टुतिं शोभनस्तोत्रं जोषि। जुषस्व। किंच वसो सर्वेषामावासभूत हे अग्ने उशतः कामयमानान् महो महतो विश्वान् सर्वान्देवान् उशन् कामयमानस्त्वमृतुना तपस्यसंज्ञकेन सह तथा विश्वेभिः सर्वैर्देवैः सह हविर्हवीरूपं सोमं पायय ॥

॥ इति द्वितीयस्याष्टमे प्रथमो वर्गः ॥

उदु ष्य इत्येकादशर्चं षष्ठं सूक्तं गार्त्समदं त्रैष्टुभं सवितृदेवताकं। अत्रानुक्रमणिका। उदु ष्य एकादश सावित्रमिति ॥ व्यूढे दशरात्रे षष्ठेऽहनि वैश्वदेवशस्त्र एतत्सूक्तं सावित्रनिविद्धानीयं। व्यूळ्हश्चेदिति खंडे सूचितं। षष्ठस्योदु ष्य देव इति गार्त्समदं। आ॰ ८.८.। इति ॥

॥ तत्र प्रथमा ॥

उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात्।
नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ ॥१॥

उत्। ऊं इति। स्यः। देवः। सविता। सवाय। शश्वत्ऽतमं। तत्ऽअपाः। वह्निः। अस्थात्।
नूनं। देवेभ्यः। वि। हि। धाति। रत्नं। अथ। आ। अभजत्। वीतिऽहोत्रं। स्वस्तौ ॥१॥

स्यः स देवो द्योतमानः सविता सवाय लोकानां प्रसवायानुज्ञायै शश्वत्तमं प्रतिदिनमुदस्थात्। उत्तिष्ठति। कीदृशः सविता। तदपाः तत्प्रसवकर्मा ॥ अप अप्न इति कर्मनामसु पाठात् ॥ वह्निर्वोढा जगतां। किंच नूनं संप्रति देवेभ्यः स्तोतृभ्यो रत्नं धनं वि हि धाति। प्रयच्छति ॥ हीति पूरणे ॥ अथ अपि च वीतिहोत्रं कांतयज्ञं यजमानं स्वस्तावविनाशे क्षेमेऽभजत्। भागिनं करोतु। यद्यपि स्वस्तिशब्दो विभक्त्यंतनिर्दिष्टशब्दपरस्तथाप्यपर्यवसानादर्थपरो भवति ॥

॥ अथ द्वितीया ॥

विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति।
आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन् ॥२॥

विश्वस्य। हि। श्रुष्टये। देवः। ऊर्ध्वः। प्र। बाहवा। पृथुऽपाणिः। सिसर्ति।
आपः। चित्। अस्य। व्रते। आ। निऽमृग्राः। अयं। चित्। वातः। रमते। परिऽज्मन् ॥२॥

देवो द्योतमानः सविता पृथुपाणिर्महत्करो विश्वस्य श्रुष्टये जगतः सुखायोर्ध्व उन्नतः सन् बाहवा बाहू प्रसिसर्ति । प्रसारयति । आपश्चित् आपोऽप्यस्य व्रते प्रसवाख्ये कर्मणि सति ॥ व्रतं कर्वरमिति तन्नामसु पाठात् ॥ आ स्यंदंत इति शेषः । ताश्च निमृग्रा नितरां शोधयित्र्यो गंगादिरूपेण जगत्पावयंतीत्यर्थः । अयं चिद्वातोऽयमपि वायुः परिज्मन् परितो गते व्याप्तेऽंतरिक्षे रमते ॥

॥ अथ तृतीया ॥

आशुभिश्चिद्यान्वि मुंचाति नूनमरीरमदतमानं चिदेतोः ।
अह्यर्षूणां चिन्न्ययाँ अविष्यामनु व्रतं सवितुर्मोक्यागात् ॥ ३ ॥
आशुऽभिः । चित् । यान् । वि । मुचाति । नूनं । अरीरमत् । अतमानं । चित् । एतोः ।
अहिऽषूणां । चित् । नि । अयान् । अविष्यां । अनु । व्रतं । सवितुः । मोकी । आ । अगात् ॥ ३ ॥

यान् गच्छन् सविताशुभिश्चिच्छीघ्रगामिभिरपि रश्मिभिर्विमुचाति । विमुच्यते । नूनमिति पूरणः । अतमानं चित्सततं गच्छंतमपि जनमेतोर्गमनादरीरमत् । उपरमयति । किंच अह्यर्षूणां । अहिमाहंतारं शत्रुमभिगच्छंतीत्यह्यर्षवः । तेषामप्यविष्यां गमनेच्छां न्ययान् । नियच्छति । सवितुः प्रेरकस्य सूर्यस्य व्रतं कर्मानु पश्चान्मोकी रात्रिः । मोकी शोकीति रात्रिनामसु पाठात् ॥ आगात् । आगच्छति । सवितुश्चेष्टोपरतौ रात्रिरागच्छतीति यावत् ॥

॥ अथ चतुर्थी ॥

पुनः समव्यद्वितंतं वयंती मध्या कर्तोर्न्यधाच्छक्म धीरः ।
उत्संहायास्थाद्व्यृ१तूँरदर्धररमतिः सविता देव आगात् ॥ ४ ॥
पुनरिति । सं । अव्यत् । विऽततं । वयंती । मध्या । कर्तोः । नि । अधात् । शक्म । धीरः ।
उत् । संऽहाय । अस्थात् । वि । ऋतून् । अदर्धः । अरमतिः । सविता । देवः । आ ।
अगात् ॥ ४ ॥

वयंती वस्त्रं वयंती नारीव रात्रिर्विततमालोकं पुनः समव्यत् । संवेष्टयते । पुनःशब्दः पूर्वेद्युरप्येवमकार्षीदिति द्योतयति । धीरः प्रज्ञोऽपि सर्वो लोकः कर्तोः क्रियमाणं कर्म ॥ कर्तोः कर्तवा इति तन्नामसु पाठात् ॥ शक्म कर्तुं शक्यमपि मध्या मध्य उपक्रांतं कर्मापरिसमाप्येत्यर्थः । न्यधात् । निहितवान् ।

सवितर्युपरत इति शेषः। सर्वो लोकः संहाय शय्यां विहायोदस्थात्। अवशिष्टं कर्म कर्तुं पुनरुत्तिष्ठति॥ संपूर्वो जहातिः शय्यापरित्यागे वर्तते। तथा च श्रूयते। कलिः शयानो भवति संजिहानस्तु द्वापर इति। सविता सर्वस्य प्रसविता सूर्योऽरमतिरनुपरतिर्देवो द्योतमान आगात्। आगच्छति। उदेतीति यावत्। ऋतून् कालविशेषांश्च व्यदर्दः। विदारयति॥

॥ अथ पंचमी ॥

नानौकांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः।
ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा ॥५॥

नाना। ओकांसि। दुर्यः। विश्वं। आयुः। वि। तिष्ठते। प्रऽभवः। शोकः। अग्नेः।
ज्येष्ठं। माता। सूनवे। भागं। आ। अधात्। अनु। अस्य। केतं। इषितं। सवित्रा ॥५॥

प्रभवः प्रभूतोऽग्नेः शोकस्तेजो दुर्यो गृह्यो गृहे भवो नानौकांसि यजमानानां पृथग्भूतान्गृहान्वितिष्ठते। अधितिष्ठति। विश्वमायुः सर्वमन्नं चाधितिष्ठति॥ आयुः सूनृतेत्यन्ननामसु पाठात्॥ मातोषाः सवित्रान्विषितं प्रेषितमस्य केतं प्रज्ञापकमग्नेर्ज्येष्ठं प्रथममग्निहोत्राख्यं भागं सूनवेऽग्नय आधात्। आदधाति॥

॥ इति द्वितीयस्याष्टमे द्वितीयो वर्गः ॥

॥ अथ षष्ठी ॥

समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरताममाभूत्।
शश्वाँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य ॥६॥

संऽआववर्ति। विऽस्थितः। जिगीषुः। विश्वेषां। कामः। चरतां। अमा। अभूत्।
शश्वान्। अपः। विऽकृतं। हित्वी। आ। अगात्। अनु। व्रतं। सवितुः। दैव्यस्य ॥६॥

जिगीषुर्विजयेच्छुर्योद्धा विष्ठितो युद्धार्थं प्रस्थितः समाववर्ति। समावर्तयति। विश्वेषां सर्वेषां चरतां जंगमानाममा। अमा दम इति गृहनामसु पाठात्। गृहं प्रति कामोऽभूत्। भवति। शश्वान् नित्यं कर्मरतोऽपः कर्म विकृतमर्द्धकृतं हित्वी हित्वागात्। गृहमागच्छति। एतत्सर्वं दैव्यस्य दिवि भवस्य सवितुः प्रेरकस्य सूर्यस्य व्रतमस्तमयाख्यं कर्मानु जायत इत्यर्थः॥

॥ अथ सप्तमी ॥

त्वया हितमप्यमप्सु भागं धन्वान्वा मृगयसो वि तस्थुः ।
वनानि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनंति ॥७॥
त्वया । हितं । अप्यं । अप्ऽसु । भागं । धन्वं । अनु । आ । मृगयसः । वि । तस्थुः ।
वनानि । विऽभ्यः । नकिः । अस्य । तानि । व्रता । देवस्य । सवितुः । मिनंति ॥७॥

हे सवितस्त्वयाप्स्वंतरिक्षे ॥ आपः पृथिवीत्यंतरिक्षनामसु पाठात् ॥ जलाधारे वा हितं निहितमप्यमपां संबंधिनं भागं धन्वानु निर्जलप्रदेशेष्वरण्येषु मृगयसो मृगयमाणा मृगा आ समंताद्वितस्थुः । अधितिष्ठंति । किंच वनानि वृक्षा विभ्यः पक्षिभ्य आवासादिरूपेण त्वया भागो दत्तः । अस्य देवस्य सवितुस्तानि तादृशानि व्रतानि कर्माणि नकिर्मिनंति । केऽपि न हिंसंति ॥

॥ अथाष्टमी ॥

याद्राध्यं१ वरुणो योनिमप्यमनिशितं निमिषि जर्भुराणः ।
विश्वो मार्तांडो व्रजमा पशुर्गात्स्थशो जन्मानि सविता व्याकः ॥८॥
यात्ऽराध्यं । वरुणः । योनिं । अप्यं । अनिऽशितं । निऽमिषि । जर्भुराणः ।
विश्वः । मार्तांडः । व्रजं । आ । पशुः । गात् । स्थऽशः । जन्मानि । सविता । वि ।
आ । अकरित्यकः ॥८॥

वरुणो याद्राध्यं यातां गच्छतां राध्यं राधनीयमप्यमाप्तुं योग्यमनिशितमतीक्ष्णं । सुखकरमिति यावत् । योनिं स्थानं निमिषि निमेषे सवितुरस्तमये सति विश्रमार्थं प्राणिभ्यः प्रयच्छति । वरुणस्य रात्रेर्निर्वाहकत्वात् । जर्भुराणो भृशं गच्छन् विश्वः सर्वो मार्तांडो मृताङ्गिन्नादंडादुत्पद्यमानः पक्ष्यागात् । आगच्छति । विश्वः पशुरपि व्रजं गोष्ठमागात् । सविता प्रेरकः स्थशः स्थाने स्थाने जन्मानि जातानि भूतानि व्याकः । पृथगकार्षीत् ॥

॥ अथ नवमी ॥

न यस्येंद्रो वरुणो न मित्रो व्रतमर्यमा न मिनंति रुद्रः ।
नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः ॥९॥

न । यस्य॑ । इंद्रः॑ । वरु॑णः । न । मि॒त्रः । व्र॒तं । अ॒र्य॒मा । न । मिनं॑ति । रु॒द्रः ।

न । अरा॑तयः । तं । इ॒दं । स्व॒स्ति । हु॒वे । दे॒वं । स॒वि॒तारं॑ । नमः॑ऽभिः ॥९॥

यस्य सवितुर्देवस्य व्रतं प्रसवाख्यं कर्मेंद्रो न मिनाति । न हिनस्ति । वरुणश्च न मिनाति मित्रश्चार्यमा च न मिनाति रुद्रश्च न मिनाति । अरातयोऽसुराश्च न मिनंति ॥ मिनातीति श्रुतमाख्यातं यथायोगं विपरिणामेन प्रत्येकमभिसंबध्यते ॥ तं सवितारं सर्वस्य प्रेरकं देवं द्योतमानमिदमिदानीं नमोभिरन्नरूपैर्हविर्भिः सह ॥ नम आयुरित्यन्ननामसु पाठात् ॥ स्वस्ति क्षेमाय हुवे । स्तौमि ॥

॥ अथ दशमी ॥

भगं॒ धियं॑ वा॒जयं॑तः पुरं॑धिं॒ नरा॒शंसो॒ ग्नास्पति॑र्नो अव्याः ।

आ॒ये वा॒मस्य॑ संग॒थे र॑यी॒णां प्रि॒या दे॒वस्य॑ सवि॒तुः स्या॑म ॥१०॥

भगं॑ । धियं॑ । वा॒जयं॑तः । पुरं॑ऽधिं । नरा॒शंसः॑ । ग्नाः । पतिः॑ । नः॒ । अ॒व्याः॒ ।

आ॒ऽअ॒ये । वा॒मस्य॑ । सं॒ऽग॒थे । र॒यी॒णां । प्रि॒याः । दे॒वस्य॑ । स॒वि॒तुः । स्या॒म॒ ॥१०॥

भगं भजनीयं धियं ध्यातव्यं पुरंधिं पुरस्य धारयितारं बहुप्रज्ञं वा सवितारं ॥ पुरंधिर्बहुधिरिति यास्कः ॥ वाजयंतो वाजिनं बलिनं कुर्वंतः ॥ विभक्तिव्यत्ययः ॥ नः स्तुवतोऽस्मान् नराशंसो नरैः शंसनीयो ग्नास्पतिर्देवपत्नीनां पतिश्छंदसां पतिर्वा ॥ तथा च श्रूयते छंदांसि वै ग्ना इति उत ग्ना व्यंतु देवपत्नीरिति च ॥ सविताव्याः । अव्यात् । किंच वामस्य धनस्य रयीणां पशूनां च ॥ तथा च श्रूयते पशवो वै रयिरिति ॥ आये आगमने संगथे संगमने च निमित्ते देवस्य द्योतमानस्य सवितुः प्रेरकस्य वयं प्रियाः स्याम । भवेम ॥

॥ अथैकादशी ॥

अ॒स्मभ्यं॒ तद्दि॒वो अ॒द्भ्यः पृ॑थि॒व्यास्त्वया॑ द॒त्तं काम्यं॒ राध॒ आ गा॑त् ।

शं यत्स्तो॒तृभ्य॑ आ॒पये॒ भवा॑त्युरु॒शंसा॑य सवितर्जरि॒त्रे ॥११॥

अ॒स्मभ्यं॑ । तत् । दि॒वः । अ॒त्ऽभ्यः । पृ॒थि॒व्याः । त्वया॑ । द॒त्तं । काम्यं॑ । राधः॑ । आ । गा॒त् ।

शं । यत् । स्तो॒तृऽभ्यः॑ । आ॒पये॑ । भवा॑ति । उ॒रु॒ऽशंसा॑य । स॒वि॒त॒रिति॑ । ज॒रि॒त्रे ॥११॥

हे सवितः अस्मभ्यं त्वया दत्तं तत् प्रसिद्धं काम्यं कमनीयं राधो धनं दिवो

द्युलोकात् अद्भ्योऽंतरिक्षलोकात् पृथिव्या भूमेश्चा गात्। आगच्छतु। किंच स्तोतृभ्यः स्तोतॄणामापये बंधवे तद्वंशजाय यद्धनं शं सुखकरं भवाति भवेत् उरुशंसाय बहुस्तुतये जरित्रे स्तोत्रे मह्यं॥ जरिता कारुरिति स्तोतृनामसु पाठात्॥ हे सवितः तत्प्रयच्छ॥

॥ इति द्वितीयस्याष्टमे तृतीयो वर्गः ॥

ग्रावाणेवेत्यष्टर्चं सप्तमं सूक्तं गार्त्समदं त्रैष्टुभमाश्विनं ग्रावाणेवाष्टावाश्विनमित्यनुक्रांतत्वात्॥ प्रवर्ग्येऽभिष्टवे पूर्वे पटलेऽस्य विनियोगः। सूत्रितं च ग्रावाणेवेळे द्यावापृथिवी। आ॰ ४. ६.। इति॥ प्रातरनुवाकाश्विनशस्त्रयोरपीदं सूक्तं। सूत्रितं च ग्रावाणेव नासत्याभ्यामिति त्रीणि। आ॰ ४. १५.। इति॥

॥ तत्र प्रथमा ॥

ग्रावा॑णेव॒ तदिद॑र्थं॑ जरे॑थे॒ गृध्रे॑व वृ॒क्षं नि॑धि॒मंत॒मच्छ॑।

ब्र॒ह्माणे॑व वि॒दथ॑ उक्थ॒शासा॑ दू॒तेव॒ हव्या॒ जन्या॑ पुरु॒त्रा॥१॥

ग्रावा॑णाऽइव। तत्। इत्। अर्थं॑। जरे॑थे॒ इति॑। गृध्रा॑ऽइव। वृ॒क्षं। नि॒धिऽमंतं॑। अच्छ॑।

ब्र॒ह्माणा॑ऽइव। वि॒दथे॑। उ॒क्थ॒ऽशसा॑। दू॒ताऽइ॑व। हव्या॑। जन्या॑। पु॒रु॒ऽत्रा॥१॥

हे अश्विनौ ग्रावाणेव अरातिं प्रति प्रेषितौ पाषाणाविव तदर्थं॥ अर्तेर्धातोरर्थशब्दः। अर्थोऽर्तेरिति यास्कः। नि॰ १. १८.॥ तमरातिमित्यर्थः। इदिति पूरणः। जरेथे। जरयेथे। अरातिं बाधेथां। यद्वा यथा गुरू ग्रावाणौ क्षिप्तौ तदानीमेव शीघ्रं गच्छतस्तथा तत् तमर्थं गंतारं जरेथे। शीघ्रं गत्वा स्तुतमित्यर्थः॥ जरतिः स्तुतिकर्मा॥ किंच गृध्रेव गृध्राविव पक्षिणाविव वृक्षं फलितं वृक्षं निधिमंतं धनवंतं यजमानमच्छ। आगच्छतमिति शेषः। विदथे यज्ञे॥ विदथः सवनमिति यज्ञनामसु पाठात्॥ उक्थशासोक्थशंसितारौ ब्रह्माणेव ब्राह्मणाविव। जन्या जनपदेषु दूतेव राज्ञा प्रेषितौ दूताविव पुरुत्रा बहुभिः पुरुषैर्हव्या ह्वातव्यौ युवां। अत्रोपमेयद्वित्वानुसारेणोपमानद्वित्वं॥

॥ अथ द्वितीया ॥

प्रा॒त॒र्यावा॑णा र॒थ्ये॑व वी॒राजेव॑ य॒मा वर॒मा सं॑चेथे।

मेने॑ इव त॒न्वा॒३॒॑ शुंभ॑माने॒ दंप॑तीव क्रतु॒विदा॒ जने॑षु॥२॥

प्रातःऽयावाना। रथ्याऽइव। वीरा। अजाऽइव। यमा। वरं। आ। सचेथे इति।
मेने इवेति मेनेऽइव। तन्वा। शुंभमाने इति। दंपती इवेति दंपतीऽइव।
क्रतुऽविदा। जनेषु ॥२॥

हे अश्विनौ प्रातर्यावाणा प्रातरेव यज्ञार्थं गंतारौ रथ्येव रथिनाविव वीरौ स्वकर्मणि शूरौ। अजेवाजाविव छागाविव यमा यमलौ। मेने इव नार्याविव तन्वा शरीरेण शुंभमाने शोभमानौ। दंपतीव जायापती इव संगतौ जनेषु विषयेषु क्रतुविदा कर्मविदौ युवां वरं संभक्तारमासचेथे। आगच्छथ ॥

॥ अथ तृतीया ॥

शृंगेव नः प्रथमं गंतमर्वाक् शफाविव जर्भुराणा तरोभिः।
चक्रवाकेव प्रति वस्तोरुस्रार्वाचा यातं रथ्येव शक्रा ॥३॥

शृंगाऽइव। नः। प्रथमं। गंतं। अर्वाक्। शफौऽइव। जर्भुराणा। तरःऽभिः।
चक्रवाकाऽइव। प्रति। वस्तोः। उस्रा। अर्वाचा। यातं। रथ्याऽइव। शक्रा ॥३॥

हे अश्विनौ शृंगेव पशोः शृंग इव प्रथमा देवानां प्रथमौ शफाविवाश्वादेः खुराविव तरोभिर्वेगैर्जर्भुराणा भृशं गच्छंतौ युवां नोऽस्मान्प्रत्यर्वागभिमुखमागंतं। आगच्छतं। किंच हे अश्विनौ वस्तोः प्रति अहः प्रति चक्रवाकेव चक्रवाकाविव हे उस्रा शत्रूणामुत्सारकौ गमनशीलौ वा रथ्येव रथिनाविव हे शक्रा स्वकर्मणि शक्तावर्वाचास्मदभिमुखौ यातं। गच्छतं ॥

॥ अथ चतुर्थी ॥

नावेव नः पारयतं युगेव नभ्येव न उपधीव प्रधीव।
श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान् ॥४॥

नावाऽइव। नः। पारयतं। युगाऽइव। नभ्याऽइव। नः। उपधी इवेत्युपधीऽइव।
प्रधी इवेति प्रधीऽइव।
श्वानाऽइव। नः। अरिषण्या। तनूनां। खृगलाऽइव। विऽस्रसः। पातं। अस्मान् ॥४॥

हे अश्विनौ नावेव नावाविव सिंधून् नोऽस्मान् दुर्गाणि पारयतं। युगेव यथा रथस्य युगे नभ्येव यथा च रथचक्रनाभिफलके। उपधी इव यथा

तत्पार्श्वस्थे फलके प्रधी इव यथा वा चक्रबाह्यवलयौ रथं पारयतः तथा नोऽस्मान्दुर्गाणि पारयतं । किंच श्वानेव श्वानाविव यथा श्वानौ बाधकेभ्यो रक्षंतौ तनोर्हिंसामपनयतः तथा नोऽस्माकं तनूनामंगानामरिषण्यावहिंसकौ भवतं । क्लृगलेव यथा तनुत्राणे तनुहिंसाया रक्षतः तथा विस्रसो जराया अस्मान्युवां पातं ॥

॥ अथ पंचमी ॥

वातेवाजुर्या नद्येव रीतिरक्षी इव चक्षुषा यातमर्वाक् ।
हस्ताविव तन्वे३ शंभविष्ठा पादेव नो नयतं वस्यो अच्छ ॥ ५ ॥
वाताऽइव । अजुर्या । नद्याऽइव । रीतिः । अक्षी इवेत्यक्षी इव । चक्षुषा । आ । यातं । अर्वाक् ।
हस्तौऽइव । तन्वे । शंऽभविष्ठा । पदाऽइव । नः । नयतं । वस्यः । अच्छ ॥ ५ ॥

हे अश्विनौ वातेव वाताविवाजुर्या जरितुमशक्यौ नद्येव नद्याविव रीतिः ॥ व्यत्ययेनैकवचनं ॥ शीघ्रं गंतारौ युवां । अक्षी इव अक्षिणी इव चक्षुषा दर्शनेनार्वागस्मदभिमुखमायातं । आगच्छतं । किंच हस्तेव हस्ताविव पादेव पादाविव तन्वे शरीराय शंभविष्ठा सुखस्य भावयितृतमौ युवां नोऽस्मान् वस्यो वसीयः श्रेष्ठं धनमच्छ प्रति नयतं । प्रापयतं ॥

॥ इति द्वितीयस्याष्टमे चतुर्थो वर्गः ॥

॥ अथ षष्ठी ॥

ओष्ठाविव मध्वास्ने वदंता स्तनाविव पिप्यतं जीवसे नः ।
नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे ॥ ६ ॥
ओष्ठौऽइव । मधु । आस्ने । वदंता । स्तनौऽइव । पिप्यतं । जीवसे । नः ।
नासाऽइव । नः । तन्वः । रक्षितारा । कर्णौऽइव । सुऽश्रुता । भूतं । अस्मे इति ॥ ६ ॥

हे अश्विनौ ओष्ठाविवास्न आस्याय मधुररसवद्वचनं वदंतौ स्तनाविव नोऽस्मान् जीवसे जीवनाय पिप्यतं । प्याययतं । किंच नासेव नासिके इव नोऽस्माकं तन्वस्तनो रक्षितारा रक्षितारौ भूतं । भवतं । अपि च कर्णाविवास्मे अस्माकं सुश्रुता सुश्रवणे युवां भूतं । भवतं ॥

॥ अथ सप्तमी ॥

हस्तेव शक्तिमभि संददी नः क्षामेव नः समजतं रजांसि ।
इमा गिरो अश्विना युष्मयंतीः क्ष्णोत्रेणेव स्वधितिं सं शिशीतं ॥७॥
हस्ताऽइव । शक्तिं । अभि । संददी इति संऽददी । नः । क्षामऽइव । नः । सं । अजतं । रजांसि ।
इमाः । गिरः । अश्विना । युष्मऽयंतीः । क्ष्णोत्रेणऽइव । स्वऽधितिं । सं । शिशीतं ॥७॥

हे अश्विनौ हस्तेव हस्ताविव शक्तिं सामर्थ्यं नोऽस्माकमभिसंददी आभिमुख्येन सम्यक् प्रयच्छंतौ भवतं । किंच क्षामेव रोदसी इव रजांसि स्थानान्युदकानि वा ॥ उदकं रज उच्यत इति यास्कः ॥ नोऽस्माकं संभजतं । प्रेरयतं । अपि च अश्विना हे अश्विनौ इमा गिरोऽस्माभिः कृताः स्तुतीर्युष्मयंतीर्युवामिच्छंतीः स्वधितिमसिं क्ष्णोत्रेणेव तेजनशाणवत् संशिशीतं । सम्यक् तीक्ष्णीकुरुतं ॥

॥ अथाष्टमी ॥

एतानि वामश्विना वर्धनानि ब्रह्म स्तोमं गृत्समदासो अक्रन् ।
तानि नरा जुजुषाणोप यातं बृहद्वदेम विदथे सुवीराः ॥८॥
एतानि । वां । अश्विना । वर्धनानि । ब्रह्म । स्तोमं । गृत्सऽमदासः । अक्रन् ।
तानि । नरा । जुजुषाणा । उप । यातं । बृहत् । वदेम । विदथे । सुऽवीराः ॥८॥

अश्विना हे अश्विनौ वां युवयोरेतानि वर्धनानि वृद्धिसाधनानि ब्रह्म ब्रह्माणि मंत्रान् स्तोमं स्तोत्रं च गृत्समदासो गृत्समदा अक्रन् । अकुर्वन् । तानि ब्रह्माणि नरा नेतारौ जुजुषाणा भृशं प्रीयमाणौ युवामुपयातं । उपगच्छतं । किंच सुवीराः शोभनपुत्रा वयं विदथे यज्ञे युवां बृहद्वदेम । प्रभूतं स्तुमः ॥

॥ इति द्वितीयस्याष्टमे पंचमो वर्गः ॥

सोमापूषणेति षडृचमष्टमं सूक्तं गार्त्समदं त्रैष्टुभं सोमापूषदेवताकं । तथा चानुक्रांतं । सोमापूषणा षट् सोमापौष्णमंत्योऽर्धर्चोऽप्यदितेरिति । अवतु देव्यदितिरित्यस्यार्धर्चस्यादितिर्देवता ॥ सोमापौष्णे पशौ वपापुरोडाशहविषामाद्यास्तिस्रः क्रमेणानुवाक्या उत्तरास्तिस्रो याज्याः । अग्नीषोमाविति खंडे सूत्रितं । सोमापूषणा जनना रयीणां । आ॰ ३.८. । इति ॥

॥ तत्र प्रथमा ॥

सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः ।
जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिं ॥१॥
सोमापूषणा । जनना । रयीणां । जनना । दिवः । जनना । पृथिव्याः ।
जातौ । विश्वस्य । भुवनस्य । गोपौ । देवाः । अकृण्वन् । अमृतस्य । नाभिं ॥१॥

सोमापूषणा हे सोमापूषणौ युवां रयीणां धनानां जनना जनयितारौ दिवो द्युलोकस्यापि जनना जनयितारौ पृथिव्याः प्रथितायाश्च जनयितारौ भवथः । किंच जातौ जातमात्रावेव युवां विश्वस्य भुवनस्य कृत्स्नस्य जगतो गोपौ गोप्तारौ देवा अमृतस्यामरणस्य नाभिं हेतुमकृण्वन् । अकार्षुः ॥

॥ अथ द्वितीया ॥

इमौ देवौ जायमानौ जुषंतेमौ तमांसि गूहतामजुष्टा ।
आभ्यामिंद्रः पक्वमामास्वंतः सोमापूषभ्यां जनदुस्रियासु ॥२॥
इमौ । देवौ । जायमानौ । जुषंत । इमौ । तमांसि । गूहतां । अजुष्टा ।
आभ्यां । इंद्रः । पक्वं । आमासु । अंतरिति । सोमापूषऽभ्यां । जनत् । उस्रियासु ॥२॥

इमौ सोमापूषणौ देवौ द्योतमानौ जायमानावुत्पन्नमात्रावेव जुषंत । सर्वे देवा अजुषंत । सेवितवंत इति यावत् । किंच इमौ सोमापूषणावजुष्टासेव्यानि तमांसि सर्वस्य गूहतां । नाशयतः । किंच आभ्यामेताभ्यां सोमापूषभ्यां सहेंद्र आमासु तरुणीषूस्रियासु गोष्वंतर्मध्य ऊधःप्रदेशे पक्वं पयो जनत् । जनयति ॥

॥ अथ तृतीया ॥

सोमापूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वं ।
विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पंचरश्मिं ॥३॥
सोमापूषणा । रजसः । विऽमानं । सप्तऽचक्रं । रथं । अविश्वऽमिन्वं ।
विषुऽवृतं । मनसा । युज्यमानं । तं । जिन्वथः । वृषणा । पंचऽरश्मिं ॥३॥

वृषणा वृषणौ कामानां वर्षितारौ सोमापूषणा हे सोमापूषणौ रजसो लोकस्य । लोका रजांस्युच्यंत इति यास्कः । विमानं परिच्छेदकं । सर्वमान-

मित्यर्थः। सप्तचक्रं सप्तर्तुचक्रं। त्रयोदशो मासः सप्तम ऋतुः। अस्ति त्रयोदशो मास इति श्रुतेः। अविश्वमिन्वं विश्वस्यापरिच्छेद्यं विषुवृतं विष्वक् सर्वत्र परिवर्तमानं पंचरश्मिं पंचर्तुरश्मिं। हेमंतशिशिरयोः समासेनर्तवः पंच। तथा च श्रूयते। द्वादश वै मासाः पंचर्तवो हेमंतशिशिरयोः समासेनेति। मनसा युज्यमानं मनोमात्रेण युज्यमानं। तं प्रसिद्धं रथं जिन्वथः। अस्मान्प्रति प्रेरयथः॥

॥ अथ चतुर्थी ॥

दिव्य१न्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यंतरिक्षे।
तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे ॥४॥

दिवि। अन्यः। सदनं। चक्रे। उच्चा। पृथिव्यां। अन्यः। अधि। अंतरिक्षे।
तौ। अस्मभ्यं। पुरुऽवारं। पुरुऽक्षुं। रायः। पोषं। वि। स्यतां। नाभिं। अस्मे इति ॥४॥

अन्यस्तयोरेकः पूषोच्चा उच्चैरुच्छ्रिते दिवि द्युलोके सदनं स्थानं चक्रे। चकार। अन्योऽपरः सोमः पृथिव्यामोषधिरूपेण अध्यंतरिक्षेऽतरिक्षे च चंद्ररूपेण सदनं चक्रे। तौ सोमापूषणौ युवां पुरुवारं बहुभिर्वरणीयं पुरुक्षुं बहुकीर्त्तिं रायस्पोषं धनस्य पुष्टिं। पश्वात्मकं धनमित्यर्थः। तथा च ब्राह्मणं पशवो वै रायस्पोष इति। अस्मे अस्माकं नाभिं विश्वस्य भोगस्य हेतुभूतमस्मभ्यं विष्यतां। विमुंचतां। प्रयच्छतामित्यर्थः॥

॥ अथ पंचमी ॥

विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति।
सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना जयेम ॥५॥

विश्वानि। अन्यः। भुवना। जजान। विश्वं। अन्यः। अभिऽचक्षाणः। एति।
सोमापूषणौ। अवतं। धियं। मे। युवाभ्यां। विश्वाः। पृतनाः। जयेम ॥५॥

हे सोमापूषणौ अन्यो युवयोरेकः सोमो विश्वानि भुवना भुवनानि भूतानि जजान। अजनयत्। तथा च मंत्रः। सोमः पवते जनिता मतीनां। ऋग्वे॰ ९.९६.५. इति। अन्योऽपरः पूषादित्यो विश्वमभिचक्षाणोऽभिपश्यन्नेति। गच्छति। तौ युवां सोमापूषणौ मे धियं कर्म॥ धीः शचीति कर्मनामसु पाठात्॥ अवतं। रक्षतं। किंच वयं युवाभ्यां हेतुभ्यां विश्वाः पृतनाः सर्वा शत्रुसेना जयेम। अभिभवेम॥

॥ अथ षष्ठी ॥

धियं॑ पू॒षा जि॑न्वतु विश्व॒मि॒न्वो र॒यिं सोमो॑ रयि॒पति॑र्दधातु ।
अव॑तु दे॒व्यदि॑तिरन॒र्वा बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ ६ ॥

धियं॑ । पू॒षा । जि॒न्व॒तु॒ । वि॒श्व॒ऽइ॒न्वः । र॒यिं । सोमः॑ । र॒यि॒ऽपतिः॑ । द॒धा॒तु॒ ।
अव॑तु । दे॒वी । अदि॑तिः । अ॒न॒र्वा । बृ॒हत् । व॒दे॒म॒ । वि॒दथे॑ । सु॒ऽवीराः॑ ॥ ६ ॥

पूषादित्यो विश्वमिन्वो विश्वस्य प्रीणयिता धियमस्माकं कर्म जिन्वतु । तर्पयतु । रयिपतिर्धनपतिः सोमो रयिं धनं दधातु । अस्मभ्यं ददातु । किंच देवी द्योतमानानर्वाप्रत्यृता केनापि प्रातिकूल्यमप्रापितादितिरवतु । अस्मान् रक्षतु । अन्यत् सिद्धं ॥

॥ इति द्वितीयस्याष्टमे षष्ठो वर्गः ॥

वायो ये त इत्येकविंशत्यृचं नवमं सूक्तं गार्त्समदं गायत्रं । अंबितम इति षष्ठस्य तृचस्यादितो द्वे अनुष्टुभौ तृतीया बृहती । वायो ये त इत्यादिके द्वे ऋचौ वायव्यौ । शुक्रस्याद्येत्यैषैंद्रवायवी । अयं वां मित्रावरुणेति पंचानां मित्रावरुणावश्विनाविंद्रो विश्वे देवाः सरस्वतीति क्रमेण देवताः । प्रेतां यज्ञस्येत्यंत्यस्तृचो ब्राह्मणसूत्रयोर्हविर्धानप्रवर्तने द्यावापृथिव्यनिविज्ञानत्वेन च विनियुक्तत्वात् द्यावापृथिव्यो हविर्धानदेवत्यो वा । अग्निं च हव्यवाहनमिति पादोऽग्निदेवत्यो वा । तथा चानुक्रांतं । वायो सैका गायत्रमुक्ता देवताः प्रउगेणाद्ये तु तृचेऽत्यैंद्रवायवी द्यावापृथिव्योऽत्यस्तृचो हाविर्धानो वा तृतीयः पादो वाग्नेयोऽबितमेऽनुष्टुभौ बृहती चेति ॥ पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहनि प्रउगेऽत्यतृचवर्जमेतत्सूक्तं । वायव्यतृचस्य वायो ये ते सहस्रिण इत्याद्ये द्वे ऋचौ ऐंद्रवायवतृचस्य शुक्रस्याद्येत्येषा तृतीया । तथा च सूचितं । वायो ये ते सहस्रिण इति द्वे तीव्राः सोमास आगहीत्येकोभा देवा दिविस्पृशेति द्वे शुक्रस्याद्य गवाशिर इत्येकायं वां मित्रावरुणेति पंच तृचाः । आ॰ ७. ६. । इति ॥ चातुर्विंशकेऽहनि प्रातःसवने मैत्रावरुणशस्त्रेऽयं वां मित्रावरुणेति षळहस्तोत्रियसंज्ञकः । चतुर्विंशे होताजनिष्टेति खंडे सूचितं अयं वां मित्रावरुणा पुरूरुणा चिद्धस्ति । आ॰ ७. २. । इति ॥ आभिप्लविकेष्वहःसु प्रातःसवने मैत्रावरुणशस्त्रेऽयमेव तृचः पंचदशादिस्तोमनिमित्तमावापनीयः । अयं वां मित्रावरुणानो मित्रावरुणेति तृचाः । आ॰ ७. ५. ।

इति सूचितत्वात् ॥ आद्या मैत्रावरुणग्रहस्यानुवाक्या । सूचितं च । मैत्रावरुणस्य अयं वां मित्रावरुणेति ॥ प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छंदसि गोमदूष्विति तृचो विनियुक्तः । गोमदू षु नासत्येति तृचाः । आ॰ ४.१५. । इति सूचितत्वात् ॥ अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्र इंद्रो अंग महद्भयमिति तृचः । अतिरात्रे पर्यायाणामिति खंडे सूचितं । इंद्रो अंग महद्भयमभि न्यू षू वाचं । आ॰ ६.४. । इति ॥ आग्रयणे वैश्वदेवस्य हविषो विश्वे देवास इत्यनुवाक्या । आग्रयणमिति खंडे सूचितं । विश्वे देवास आगत ये के च ज्मा महिनो अहिमायाः । आ॰ २.९. । इति ॥ दशरात्रे प्रथमेऽहनि प्रउगशस्त्रेऽंबितमे नदीतम इति सारस्वतः सप्तमस्तृचः । चतुर्थेऽहनीति खंडे सूचितं । अंबितमे नदीतम इत्यानुष्टुभं प्रउगं । आ॰ ७.११. । इति ॥ व्यूढे दशरात्रे प्रथमे छंदोमे वैश्वदेवशस्त्रे प्रेतां यज्ञस्य शंभुवेति द्यावापृथिव्यनिविद्धानीयस्तृचः । अथ छंदोमा इति खंडे सूचितं । प्रेतां यज्ञस्य शंभुवायं देवाय जन्मन इति तृचाः । आ॰ ८.९. । इति ॥ हविर्धानप्रवर्तनेऽप्ययं तृचो विनियुक्तः । सूचितं च । प्रेतां यज्ञस्य शंभुवा यमे इव यतमाने यदैतं । आ॰ ४.९. । इति ॥

॥ तत्र प्रथमा ॥

वायो ये ते सहस्रिणो रथासस्तेभिरा गहि । नियुत्वान्सोमपीतये ॥ १ ॥

वायो इति । ये । ते । सहस्रिणः । रथासः । तेभिः । आ । गहि । नियुत्वान् । सोमऽपीतये ॥ १ ॥

हे वायो ते त्वदीया ये सहस्रिणः सहस्रसंख्याका रथासो रथाः तेभिस्तैर्नियुत्वान् नियुद्भिर्युक्तस्त्वं सोमपीतये सोमपानार्थमागहि । आगच्छ । नानारूपत्वाद्वायोः सर्वाभिर्विभूतिभिः सहागमनं प्रार्थ्यत इति भावः ॥

॥ अथ द्वितीया ॥

नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते । गंतासि सुन्वतो गृहं ॥ २ ॥

नियुत्वान् । वायो इति । आ । गहि । अयं । शुक्रः । अयामि । ते । गंता । असि । सुन्वतः । गृहं ॥ २ ॥

हे वायो नियुत्वान् । नियुतो वाहनानि वायोः । तैर्युक्तस्त्वमागहि । आगच्छ । अयं शुक्रो दीप्यमानः सोमस्ते तुभ्यमयामि । नियतो गृहीत आसीत् ॥ यमेः

कर्मणि लुङ् ॥ सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य गृहं गंतासि । याता भवसि ॥

॥ अथ तृतीया ॥

शुक्रस्याद्य गवाशिर इंद्रवायू नियुत्वतः । आ यातं पिबतं नरा ॥३॥

शुक्रस्य । अद्य । गोऽआशिरः । इंद्रवायू इति । नियुत्वतः । आ । यातं । पिबतं । नरा ॥३॥

हे नरा नेतारौ हे इंद्रवायू अद्यास्मिन्नहनि नियुत्वतः ॥ विभक्तिव्यत्ययः ॥ नियुत्वंतौ युवां गवाशिरः । गव्यं पय आशीराश्रयणसाधनं यस्य तस्य शुक्रस्य दीप्तस्य सोमस्य पानार्थमायातं । आगच्छतं । आगत्य सोमं पिबतं ॥

॥ अथ चतुर्थी ॥

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतं हवं ॥४॥

अयं । वां । मित्रावरुणा । सुतः । सोमः । ऋतऽवृधा । मम । इत् । इह । श्रुतं । हवं ॥४॥

मित्रावरुणा हे मित्रावरुणौ युवाभ्यामयं सोमः सुतः । अभिषुतः । ऋतावृधा हे सत्यस्य यज्ञस्य वा वर्धकौ ममेत् ममैव हवमाह्वानं श्रुतं । शृणुतं ॥

॥ अथ पंचमी ॥

राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे । सहस्रस्थूण आसाते ॥५॥

राजानौ । अनभिऽद्रुहा । ध्रुवे । सदसि । उत्ऽतमे । सहस्रऽस्थूणे । आसाते इति ॥५॥

राजानावीश्वरौ दीप्यमानौ वा अनभिद्रुहानभिद्रोग्धारौ यौ मित्रावरुणौ ध्रुवे स्थिर उत्तम उत्कृष्टे सहस्रस्थूणे सदसि स्थान आसाते उपविशतः तावागच्छतमिति शेषः ॥

॥ इति द्वितीयस्याष्टमे सप्तमो वर्गः ॥

॥ अथ षष्ठी ॥

ता सम्राजा घृतासुती आदित्या दानुनस्पती । सचेते अनवह्वरं ॥६॥

ता । संऽराजा । घृतासुती इति घृतऽआसुती । आदित्याः । दानुनः । पती इति । सचेते इति । अनवऽह्वरं ॥६॥

सम्राजावाज्ञयैव सर्वेषां शास्तारौ घृतासुती घृतान्नौ । तद्वां महित्वं घृतान्ना-

वस्त्विति मंत्रांतरात् । ऋग्वे॰ ६. ६७. ८. । आदित्यादितेः पुत्रौ दानुनस्पती दानुनो दानस्य वा धनस्य पती स्वामिनौ । ता तौ मित्रावरुणावनवह्वरमकुटिलं यजमानं सचेते । सेवेते ॥

॥ अथ सप्तमी ॥

गोमंदू षु नासत्याश्वावद्यातमश्विना । वर्ती रुद्रा नृपाय्यं ॥७॥

गोऽमंत् । ऊं इति । सु । नासत्या । अश्वऽवत् । यातं । अश्विना । वर्तिः । रुद्रा । नृऽपाय्यं ॥७॥

अश्विना हे अश्विनौ हे नासत्यानृतभाषणरहितौ हे रुद्रा रोरूयमाणौ द्रवंतौ युवां वर्तिर्मार्गः । तेन मार्गेण रथेन वा नृपाय्यं नृभिर्नेतृभिर्देवैः पातव्यं सोमं गोमत् गोमद्यथा भवति तथा अश्ववत् अश्ववच्च यथा भवति तथा यातं । गच्छतं । ऊ ष्विति पूरणौ ॥

॥ अथाष्टमी ॥

न यत्परो नांतर आदधर्षद्वृषण्वसू । दुःशंसो मर्त्यो रिपुः ॥८॥

न । यत् । परः । न । अंतरः । आऽदधर्षत् । वृषण्वसू इति वृषण्ऽवसू । दुःऽशंसः । मर्त्यः । रिपुः ॥८॥

वृषण्वसू हे धनस्य वर्षितारौ यद्धनं परो दूरस्थो दुःशंसः शंसनायोग्यो मर्त्यो रिपुर्यन्नादधर्षत् तथोक्तलक्षणेतरोऽतरः समीपवर्ती मर्त्यो रिपुरपि यन्नादधर्षत् तद्धनमावोळ्हमिति शेषः ॥

॥ अथ नवमी ॥

ता न आ वोळ्हमश्विना रयिं पिशंगसंदृशं । धिष्ण्या वरिवोविदं ॥९॥

ता । नः । आ । वोळ्हं । अश्विना । रयिं । पिशंगऽसंदृशं । धिष्ण्या । वरिवःऽविदं ॥९॥

हे धिष्ण्या धिषणार्हावश्विना हे अश्विनौ ता तौ युवां पिशंगसंदृशं नानारूपं वरिवोविदं धनस्य लंभकं रयिं पशुं नोऽस्मभ्यमावोळ्हं । आवहतं ॥

॥ अथ दशमी ॥

इंद्रो अंग महद्भयमभी षदप चुच्यवत् । स हि स्थिरो विचर्षणिः ॥१०॥

इंद्रः । अंग । महत् । भयं । अभि । सत् । अप । चुच्यवत् । सः । हि । स्थिरः । विऽचर्षणिः ॥१०॥

इंद्रो महदधिकमभीषदभिभवद्भयं भयकारणमपचुच्यवत्। अपच्यावयेत्। हि यस्मात्कारणात् स स्थिरः केनापि चालयितुमशक्यो विचर्षणिर्विश्वस्य द्रष्टा ॥

॥ इति द्वितीयस्याष्टमेऽष्टमो वर्गः ॥

॥ अथैकादशी ॥

इंद्रश्च मृळयाति नो न नः पश्चादघं नशत्। भद्रं भवाति नः पुरः ॥११॥

इंद्रः। च। मृळयाति। नः। न। नः। पश्चात्। अघं। नशत्। भद्रं। भवाति। नः। पुरः ॥११॥

इंद्रश्च परमैश्वर्यवानिंद्रश्चेत् नोऽस्मान् मृळयाति सुखयेत्। पश्चात् पृष्ठतो नोऽस्मानघं दुरितं न नशत्। न प्राप्नोति। नोऽस्माकं पुरः पुरस्ताद्भद्रं कल्याणं च भवाति। भवति ॥

॥ अथ द्वादशी ॥

इंद्र आशाभ्यस्परि सर्वाभ्यो अभयं करत्। जेता शत्रून्विचर्षणिः ॥१२॥

इंद्रः। आशाभ्यः। परि। सर्वाभ्यः। अभयं। करत्। जेता। शत्रून्। विऽचर्षणिः ॥१२॥

विचर्षणिर्विविधं द्रष्टा जेता शत्रूनसुरान् जेता ॥ तृनंतत्वात् षष्ठ्यभावः ॥ इंद्रः परमैश्वर्यवान् सर्वाभ्य आशाभ्यो दिग्भ्योऽस्माकमभयं करत्। करोतु ॥ परीति पंचमीद्योतकः ॥

॥ अथ त्रयोदशी ॥

विश्वे देवास आ गत शृणुता म इमं हवं। एदं बर्हिर्नि षीदत ॥१३॥

विश्वे। देवासः। आ। गत। शृणुत। मे। इमं। हवं। आ। इदं। बर्हिः। नि। सीदत ॥१३॥

हे विश्वे देवा आ गत। इहागच्छत। मे मदीयमिमं हवमाह्वानं शृणुत। इदं बर्हिरस्मिन्बर्हिष्यानिषीदत। उपविशत ॥

॥ अथ चतुर्दशी ॥

तीव्रो वो मधुमाँ अयं शुनहोत्रेषु मत्सरः। एतं पिबत काम्यं ॥१४॥

तीव्रः। वः। मधुऽमान्। अयं। शुनऽहोत्रेषु। मत्सरः। एतं। पिबत। काम्यं ॥१४॥

हे विश्वे देवाः तीव्रस्तीव्रमदो मधुमान् रसवान् मत्सरो मदकरः सोमोऽयं युष्मदर्थं शुनहोत्रेषु गृत्समदेष्वस्मासु स्थितः। काम्यं कमनीयमेतं सोमं पिबत ॥

॥ अथ पंचदशी ॥

इंद्रज्येष्ठा मरुद्गणा देवासः पूषरातयः । विश्वे मम श्रुता हवं ॥१५॥

इंद्रऽज्येष्ठाः । मरुत्ऽगणाः । देवासः । पूषऽरातयः । विश्वे । मम । श्रुत । हवं ॥१५॥

हे इंद्रज्येष्ठा इंद्रपुरोगमा मरुद्गणा मरुत्समूहरूपाः पूषरातयः पूषाख्यो देवो रातिर्दाता येषां ते पूषरातयो देवास हे द्योतमाना देवा विश्वे सर्वे यूयं मम मदीयं हवमाह्वानं श्रुत । शृणुत ॥ इंद्रज्येष्ठादयः संबोधनांताः । ऋग्वे० १. २३. ८. ॥

॥ इति द्वितीयस्याष्टमे नवमो वर्गः ॥

॥ अथ षोडशी ॥

अंबितमे नदीतमे देवितमे सरस्वति ।

अप्रशस्ता इव स्मसि प्रशस्तिमंब नस्कृधि ॥१६॥

अंबिऽतमे । नदीऽतमे । देविऽतमे । सरस्वति ।

अप्रशस्ताःऽइव । स्मसि । प्रऽशस्तिं । अंब । नः । कृधि ॥१६॥

अंबितमे मातॄणां श्रेष्ठे नदीतमे नदीनां श्रेष्ठे देवितमे देवीनां श्रेष्ठे हे सरस्वति अप्रशस्ता इव धनाभावादसमृद्धा इव वयं स्मसि । भवामः । अंब हे मातः सरस्वति नोऽस्मभ्यं प्रशस्तिं धनसमृद्धिं कृधि । कुरु । प्रयच्छेत्यर्थः ॥

॥ अथ सप्तदशी ॥

त्वे विश्वा सरस्वति श्रितायूंषि देव्यां ।

शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः ॥१७॥

त्वे इति । विश्वा । सरस्वति । श्रिता । आयूंषि । देव्यां ।

शुनऽहोत्रेषु । मत्स्व । प्रऽजां । देवि । दिदिड्ढि । नः ॥१७॥

हे सरस्वति देव्यां द्योतमानायां त्वे त्वयि विश्वा विश्वानि सर्वाण्यायूंष्यन्नानि । आयुः सूनृतेत्यन्ननामसु पाठात् । श्रिता । आश्रितानि । सा त्वं शुनहोत्रेषु गृत्समदेष्वस्मासु विषयेषु मत्स्व । सोमपानेन तृप्य । किंच हे देवि सरस्वति नोऽस्मभ्यं प्रजां दिदिड्ढि । पुत्रान्देहि ॥

॥ अथाष्टदशी ॥

इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति ।
या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति ॥ १८ ॥

इमा । ब्रह्म । सरस्वति । जुषस्व । वाजिनीऽवति ।
या । ते । मन्म । गृत्सऽमदाः । ऋतऽवरि । प्रिया । देवेषु । जुह्वति ॥ १८ ॥

वाजिनीवत्यन्नवति ऋतावर्युदकवति हे सरस्वति इमेमानि ब्रह्म ब्रह्माणि हवींषि जुषस्व । स्वीकुरु । या यानि मन्म मननीयानि देवेषु प्रिया देवानां मध्ये तुभ्यं प्रियाणि देवेषु प्रियाणि वा ते त्वदर्थं गृत्समदा जुह्वति ॥

॥ अथैकोनविंशी ॥

प्रेतां यज्ञस्य शंभुवा युवामिदा वृणीमहे । अग्निं च हव्यवाहनं ॥ १९ ॥

प्र । इतां । यज्ञस्य । शंऽभुवा । युवां । इत् । आ । वृणीमहे । अग्निं । च । हव्यऽवाहनं ॥ १९ ॥

यज्ञस्य यागस्य शंभुवा सुखसंपादके हविर्धाने अनसी तद्रूपे द्यावापृथिव्यौ वा प्रेतां । उत्तरवेदेः पश्चिमभागं प्रति प्रगच्छतां । अथ प्रत्यक्षकृतः । युवामित् युवामेवावृणीमहे । प्रार्थयामहे । हव्यवाहनमग्निं चावृणीमहे । अग्निरत्र निपातभागिति ॥

॥ अथ विंशी ॥

द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशं । यज्ञं देवेषु यच्छतां ॥ २० ॥

द्यावा । नः । पृथिवी इति । इमं । सिध्रं । अद्य । दिविऽस्पृशं । यज्ञं । देवेषु । यच्छतां ॥ २० ॥

द्यावा द्यौः पृथिवी चोभे सिध्रं स्वर्गादेः साधकं दिविस्पृशं देवान् गच्छंतं नोऽस्माकमिमं यज्ञं देवेषु यच्छतां । नियच्छतां ॥

॥ अथैकविंशी ॥

आ वामुपस्थमद्रुहा देवाः सीदंतु यज्ञियाः । इहाद्य सोमपीतये ॥ २१ ॥

आ । वां । उपऽस्थं । अद्रुहा । देवाः । सीदंतु । यज्ञियाः । इह । अद्य । सोमऽपीतये ॥ २१ ॥

अद्रुहा द्रोहवर्जिते हे हविर्धाने तद्रूपे द्यावापृथिव्यौ वा वां युवयोरुपस्थं समीपं यज्ञिया यज्ञार्हा देवा इह यज्ञेऽद्यास्मिन्नहनि सोमपीतये सोमपानायासीदंतु ॥

॥ इति द्वितीयस्याष्टमे दशमो वर्गः ॥

कनिक्रददिति तृचं दशमं सूक्तं । अत्रैवमनुक्रमणिका । कनिक्रदत्तृचमिति । मंडलद्रष्टा गृत्समदोऽस्य ऋषिः । त्रिष्टुप् छंदः । कपिंजलरूपींद्रो देवता ॥ वयसाममनोज्ञां वाचं श्रुत्वैतत्सूक्तं जपेत् । सूत्रितं च । वयसाममनोज्ञा वाचः श्रुत्वा कनिक्रदज्जनुषं प्रब्रुवाण इति सूक्ते जपेत् । आ॰ गृ॰ ३. ९. । इति ॥

॥ तत्र प्रथमा ॥

कनि॑क्रदज्ज॒नुषं॑ प्रब्रुवा॒ण इय॑र्ति॒ वाच॑मरि॒तेव॒ नावं॑ ।

सु॒मं॒ग॒लश्च॑ शकुने॒ भवा॑सि॒ मा त्वा॒ का चि॑दभि॒भा विश्व्या॑ विदत् ॥ १ ॥

कनि॑क्रदत् । ज॒नुषं॑ । प्र॒ऽब्रु॒वा॒णः । इय॑र्ति । वाचं॑ । अ॒रि॒ताऽइ॑व । नावं॑ ।

सु॒ऽमं॒ग॒लः॑ । च॒ । श॒कु॒ने॒ । भवा॑सि । मा । त्वा॒ । का । चि॒त् । अ॒भि॒ऽभा । विश्व्या॑ । वि॒द॒त् ॥ १ ॥

कनिक्रदत् पुनःपुनः शब्दायमानो जनुषं जनिष्यमाणमर्थं प्रब्रुवाणः सूचयन् कपिंजलोऽरितेव कर्णधार इव नावं वाचमियर्ति । प्रेरयति । अथ प्रत्यक्षकृतः । हे शकुने कपिंजल त्वं सुमंगलः प्रकृष्टकल्याणश्च भवासि । भव । किंच काचिदभिभा कोऽप्यभिभवस्त्वा त्वां विश्व्या विश्वतः सर्वासु दिक्षु मा विदत् । मा प्रापत् । शकुनिः शक्नोत्युन्नेतुमात्मानं । न्यक्रंदीज्जन्म प्रब्रुवाणो यथास्य शब्दस्तथा नामेरयति वाचमीरयितेव नावं । सुमंगलश्च शकुने भव कल्याणमंगलो मंगलं गिरतेर्गृणात्यर्थे गिरत्यनर्थानिति वेति यास्कः । नि॰ ९. ३. ॥

॥ अथ द्वितीया ॥

मा त्वा॑ श्ये॒न उद्व॑धी॒न्मा सु॑प॒र्णो मा त्वा॑ विद॒दिषु॑मान्वी॒रो अस्ता॑ ।

पित्र्या॒मनु॑ प्र॒दिशं॒ कनि॑क्रदत्सुमं॒गलो॑ भद्रवा॒दी व॑दे॒ह ॥ २ ॥

मा । त्वा॒ । श्ये॒नः । उत् । व॒धी॒त् । मा । सु॒ऽप॒र्णः । मा । त्वा॒ । वि॒द॒त् । इषु॑ऽमान् । वी॒रः । अस्ता॑ ।

पित्र्यां॑ । अनु॑ । प्र॒ऽदिशं॑ । कनि॑क्रदत् । सु॒ऽमं॒ग॒लः॑ । भ॒द्र॒ऽवा॒दी । व॒द॒ । इ॒ह ॥ २ ॥

हे शकुने त्वा त्वां श्येनः प्रबलः पक्षिविशेषो मा वधीत् । मा हिंसीत् । उत अपि च सुपर्णो गरुडः पक्षी मा वधीत् । तथेषुमान् बाणवान्वीरोऽस्ता शराणां क्षेप्ता धन्वी त्वा त्वां मा विदत् । मा प्रापत् । किंच पित्र्यां प्रदिशं दक्षिणां दिशमनु । दक्षिणस्यां दिशीत्यर्थः । कनिक्रदत् पुनःपुनः शब्दं कुर्वन् सुमंगलः कल्याणमंगलो भद्रवादी शोभनवादीहास्मद्विषये वद । मंगलं सूचय ॥

॥ अथ तृतीया ॥

अव॑ क्रंद दक्षिण॒तो गृ॒हाणां॑ सु॒मं॒गलो॑ भद्रवा॒दी श॑कुंते ।
मा नः॑ स्ते॒न ई॑शत॒ माघशं॑सो बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑ ॥३॥

अव॑ । क्रं॒द॒ । द॒क्षि॒ण॒तः । गृ॒हाणा॑म् । सु॒ऽमं॒ग॒लः । भ॒द्र॒ऽवा॒दी । श॒कुं॒ते॒ ।
मा । नः॒ । स्ते॒नः । ई॒श॒त॒ । मा । अ॒घऽशं॑सः । बृ॒हत् । व॒दे॒म॒ । वि॒दथे॑ । सु॒ऽवीराः॑ ॥३॥

शकुंते हे कपिंजल त्वं सुमंगलो भद्रवादी च सन् गृहाणां दक्षिणतो दक्षिणस्यां दिश्यवक्रंद । शब्दं कुरु । दक्षिणतः शब्दायमानः शकुंतो मंगलसूचको हि । नोऽस्माकं स्तेनस्तस्करो मेशत । मेशिष्ट । अघशंसोऽनर्थकानां शंसकोऽपि मेशिष्ट । उत्तमः पादो व्याख्यातचरः ॥

॥ इति द्वितीयस्याष्टम एकादशो वर्गः ॥

प्रदक्षिणिदिति तृचमेकादशं सूक्तं गार्त्समदं जागतं । तथा चानुक्रांतं । प्रदक्षिणिज्जागतं मध्येऽतिशक्वर्यष्टिर्वेति । द्वितीयातिशक्वरी अष्टिर्वा । इतरे जगत्यौ । कपिंजलरूपींद्रो देवता । वयसाममनोज्ञां वाचं श्रुत्वा प्रदक्षिणिदिति सूक्तं जपेत् । सूत्रं प्रागेवोदाहृतं ॥

॥ तत्र प्रथमा ॥

प्र॒द॒क्षि॒णिद॒भि गृ॑णंति का॒रवो॒ वयो॒ वदं॑त ऋतु॒था श॒कुंत॑यः ।
उ॒भे वाचौ॑ वदति साम॒गा इ॑व गाय॒त्रं च॒ त्रैष्टु॑भं॒ चानु॑ राजति ॥१॥

प्र॒ऽद॒क्षि॒णित् । अ॒भि । गृ॒णं॑ति॒ । का॒रवः॑ । वयः॑ । वदं॑तः । ऋ॒तु॒ऽथा । श॒कुंत॑यः ।
उ॒भे इति॑ । वाचौ॑ । व॒द॒ति॒ । सा॒म॒गाःऽइ॑व । गा॒य॒त्रम् । च॒ । त्रैस्तु॑भम् । च॒ । अनु॑ । रा॒ज॒ति॒ ॥१॥

शकुंतयः कपिंजला ऋतुथा काले काले वयोऽन्नं वदंतः सूचयंतः कारवः स्तोतार इव प्रदक्षिणित् प्रदक्षिणमभिगृणंति । अभिवदंतु ॥ बहुवचनं पूजार्थं ॥ किंच उभे वाचौ गानं च श्रौतं च सामगा गायत्रं त्रैष्टुभं च सामनी इव शकुंतिर्वदति । अनुराजति च । शृखतोऽनुरक्तान्करोतीत्यर्थः ॥

॥ अथ द्वितीया ॥

उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ।
वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने
पुण्यमा वद ॥२॥
उद्गाताऽइव । शकुने । साम । गायसि । ब्रह्मऽपुत्रःऽइव । सवनेषु । शंससि ।
वृषाऽइव । वाजी । शिशुऽमतीः । अपिऽइत्य । सर्वतः । नः । शकुने । भद्रं । आ ।
वद । विश्वतः । नः । शकुने । पुण्यं । आ । वद ॥२॥

शकुने हे कपिंजल उद्गातेव साम यथोद्गाता साम गायति तथा त्वं गायसि । गानस्वनं करोषि । ब्रह्मपुत्र इव यथा ब्राह्मणाच्छंसी सवनेषु शस्त्राणि शंसति तथा त्वं कालेषु शंससि । श्रौतस्वरं करोषि । वृषेव वाजी सेचनसमर्थोऽश्वः शिशुमतीर्वडवा अपीत्याभिगत्य यथा शब्दं करोति तथा त्वमपि वद । शिष्टं स्पष्टं ॥

॥ अथ तृतीया ॥

आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः ।
यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥३॥
आऽवदन् । त्वं । शकुने । भद्रं । आ । वद । तूष्णीं । आसीनः । सुऽमतिं । चिकिद्धि । नः ।
यत् । उत्ऽपतन् । वदसि । कर्करिः । यथा । बृहत् । वदेम । विदथे । सुऽवीराः ॥३॥

शकुने हे कपिंजल आवदन् शब्दं कुर्वस्त्वं भद्रमावद । मंगलं वद । तूष्णीमासीनस्तूष्णीं तिष्ठन्नपि नोऽस्माकं सुमतिं चिकिद्धि । बुध्यस्व । यद्यदोत्पतन् वदसि तदा कर्करिर्यथा कर्करिरिव वदसि । कर्करिर्वाद्यविशेषः । अन्यद्व्याख्यातचरं ॥

॥ इति द्वितीयस्याष्टमे द्वादशो वर्गः ॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे द्वितीयाष्टके द्वितीये मंडले चतुर्थोऽनुवाकः समाप्तं च द्वितीयं मंडलं ॥

## ॥ अथ तृतीयं मंडलं ॥

वैश्वामित्रे तृतीये पंचानुवाकाः । तत्र प्रथमेऽनुवाके द्वादश सूक्तानि । तत्र सोमस्य मेति त्रयोविंशत्यृचं प्रथमं सूक्तं । तथा चानुक्रांतं । सोमस्य त्र्यधिकेति । अस्य मंडलद्रष्टा विश्वामित्र ऋषिः । अनुक्तत्वात् त्रिष्टुप् छंदः । मंडलादिष्वाग्नेयमिति परिभाषयाग्निर्देवता ॥ प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छंदसि विनियोगः । तथा च सूत्रं । सोमस्य मा तवसं प्रत्यग्निरिति त्रीणि । आ॰ ४. १३. । इति ॥

॥ तत्र प्रथमा ॥

सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै ।
देवाँ अच्छा दीद्यद्युंजे अद्रिं शमाये अग्ने तन्वं जुषस्व ॥१॥
सोमस्य । मा । तवसं । वक्षि । अग्ने । वह्निं । चकर्थ । विदथे । यजध्यै ।
देवान् । अच्छ । दीद्यत् । युंजे । अद्रिं । शंऽआये । अग्ने । तन्वं । जुषस्व ॥१॥

हे अग्ने त्वं विदथे यज्ञे यजध्यै यष्टुं सोमस्य वह्निं वोढारं यं मां चकर्थ कृतवानसि । तं मां तवसं तवस्विनं बलिनं वक्षि । कामयस्व । किंच हे अग्ने देवानच्छाभिदीद्यत् दीप्यमानोऽहमद्रिं ग्रावाणं युंजे । अभिषवणाय युनज्मि । शमाये । शाम्यामि च । तथा च मंत्रांतरं । ऋतेन देवः सविता शमायते । ऋग्वे॰ ८. ८६. ५. । इति । यद्वा शमाये । स्तौमि । शशमानो जरतीति स्तुतिकर्मसु पाठात् । तथा च मंत्रांतरं । सो अग्न ईजे शशमे च मर्तः । ऋग्वे॰ ६. १. ९. । इति । किंच हे अग्ने तन्वं शरीरं जुषस्व । रक्षायै सेवस्व । यद्वा कर्माणि तन्वंतं मां सेवस्वेत्यर्थः ॥

॥ अथ द्वितीया ॥

प्रांचं यज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन् ।
दिवः शशासुर्विदथा कवीनां गृत्साय चित्तवसे गातुमीषुः ॥२॥

प्रांचं। यज्ञं। चकृम। वर्धतां। गीः। समित्ऽभिः। अग्निं। नमसा। दुवस्यन्।

दिवः। शशासुः। विदथा। कवीनां। गृत्साय। चित्। तवसे। गातुं। ईषुः ॥२॥

हे अग्ने वयं यज्ञं प्रांचं प्रकर्षेण गच्छंतं चकृम। अकार्ष्म। गीर्मदीया स्तुतिर्वर्धतां। एधतां। अग्निं समिद्भिर्नमसा हविषा च दुवस्यन्। अस्मदीयाः परिचरेयुः। किंच दिवो द्युलोकादागत्य देवाः कवीनां स्तोतॄणां विदथा ज्ञानानि स्तोत्राणि वा शशासुः। अन्वशिषन्। अपि च गृत्साय। गृणातेरिदं रूपं। स्तोतव्यायाग्नये तवसे वृद्धाय गातुं स्तोतुमीषुश्चित्। स्तोतार इच्छंति च। चिदिति चार्थे ॥

॥ अथ तृतीया ॥

मयो दधे मेधिरः पूतदक्षो दिवः सुबंधुर्जनुषा पृथिव्याः।

अविंदन्नु दर्शतमप्स्व१ंतर्देवासो अग्निमपसि स्वसॄणां ॥३॥

मयः। दधे। मेधिरः। पूतऽदक्षः। दिवः। सुऽबंधुः। जनुषा। पृथिव्याः।

अविंदन्। ऊं इति। दर्शतं। अप्ऽसु। अंतः। देवासः। अग्निं। अपसि। स्वसॄणां ॥३॥

मेधिरो मेधावान् प्राज्ञः पूतदक्षः शुद्धबलो जनुषा जन्ममात्रेण सुबंधुः शोभनबंधुः। स्वत एव बंधुरिति यावत्। योऽग्निर्दिवो द्युलोकस्य पृथिव्या भूमेश्च मयः सुखं दधे विदधाति। देवानां मनुष्याणां च सुखं करोतीति यावत्। तं दर्शतं दर्शनीयमग्निं देवासो देवाः स्वसॄणां सरणशीलानां नदीनामप्स्वंतर्गूढं स्थितमपसि यज्ञवहनरूपे कर्मणि निमित्ते॥ उ इति पूरणः॥ अविंदन्। लब्धवंतः॥

॥ अथ चतुर्थी ॥

अवर्धयन्त्सुभगं सप्त यह्वीः श्वेतं जज्ञानमरुषं महित्वा।

शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन्वपुष्यन् ॥४॥

अवर्धयन्। सुऽभगं। सप्त। यह्वीः। श्वेतं। जज्ञानं। अरुषं। महिऽत्वा।

शिशुं। न। जातं। अभि। आरुः। अश्वाः। देवासः। अग्निं। जनिमन्। वपुष्यन् ॥४॥

सप्त सर्पणशीला यह्वीर्यह्व्यो महत्यो नद्यः सुभगं शोभनधनं श्वेतं शुभ्रं जज्ञानं जातं महित्वा महत्त्वेनारुषमारोचमानमप्सु स्थितमग्निमवर्धयन्। स्वकार्यभूताभिरोषधीभिर्वृद्धिं प्रापितवत्यः। यद्वा दिव्यमग्निमापो वर्धयंत्यबिंधनत्वात्तस्य।

किंच शिशुं न जातं यथा जातं शिशुमश्वा वडवा अभ्यारुः । अभिगच्छंति । तथा नद्य उत्पन्नमग्निमभ्यारुः । अभिजग्मुः । अपि च देवासो देवा अग्निं जनिमन् जन्मन्युदके वा वपुष्यन् । वपुर्दीप्तिमकुर्वन् ॥

॥ अथ पंचमी ॥

शुक्रेभिरंगै रज आततन्वान् क्रतुं पुनानः कविभिः पवित्रैः ।
शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः ॥ ५ ॥

शुक्रेभिः । अंगैः । रजः । आऽततन्वान् । क्रतुं । पुनानः । कविऽभिः । पवित्रैः ।
शोचिः । वसानः । परि । आयुः । अपां । श्रियः । मिमीते । बृहतीः । अनूनाः ॥ ५ ॥

अग्निः शुक्रेभिः शुक्रैरंगैस्तेजोभी रजोऽतरिक्षमाततन्वान् आतन्वन् व्याप्नुवन् क्रतुं कर्मणां कर्तारं यजमानं कविभिः क्रांतप्रज्ञैः स्तोतव्यैर्वा पवित्रैः शोधकैस्तेजोभिः पुनानः शोधयन् शोचिर्दीप्तिं वस्त्रस्थानीयं परि परितो वसान आच्छादयन् अपामपस्यतां कर्मवतामायुरन्नं बृहतीः प्रभूता अनूनाः संपूर्णाः श्रियः संपदश्च मिमीते । करोति ॥

॥ इति द्वितीयस्याष्टमे त्रयोदशो वर्गः ॥

॥ अथ षष्ठी ॥

वव्राजा सीमनदतीरदब्धा दिवो यह्वीरवसाना अनग्नाः ।
सना अत्र युवतयः सयोनीरेकं गर्भं दधिरे सप्त वाणीः ॥ ६ ॥

वव्राज । सीं । अनदतीः । अदब्धाः । दिवः । यह्वीः । अवसानाः । अनग्नाः ।
सनाः । अत्र । युवतयः । सऽयोनीः । एकं । गर्भं । दधिरे । सप्त । वाणीः ॥ ६ ॥

अनदतीरभक्षयंतीरदब्धा अहिंसिता मातृभूता अपोऽग्निः सीं सर्वतो वव्राज । व्रजति । अग्निरपां शोषकः तं चापः शमयंति तदुभयमिह नास्तीत्युक्तं भवति । कीदृश्यस्ताः । दिवो यह्वीः । अंतरिक्षस्यापत्यभूताः । अवसानाः । वस्त्रमनाच्छादयंत्यः । वस्त्रस्थानीयस्य जलस्य विद्यमानत्वात् । अत एवानग्नाः । किंच ता अपि सनाः सनातन्यो युवतयो नित्यतरुण्यः । नित्यवृद्धा इत्यर्थः । सयोनीः समानमंतरिक्षं स्थानं यासां ताः सप्त वाणीर्नद्य एकमग्निं गर्भं गर्भस्थं दधिरे । दधते ॥

॥ अथ सप्तमी ॥

स्तीर्णा अस्य संहतो विश्वरूपा घृतस्य योनौ स्रवथे मधूनां ।
अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची ॥७॥
स्तीर्णाः । अस्य । संऽहतः । विश्वऽरूपाः । घृतस्य । योनौ । स्रवथे । मधूनां ।
अस्थुः । अत्र । धेनवः । पिन्वमानाः । मही इति । दस्मस्य । मातरा । समीची इति संऽईची ॥७॥

घृतस्योदकस्य योनौ गर्भस्थानेऽंतरिक्षे संहतः पुंजीभूताः ॥ हंतेर्क्विप् ॥ विश्वरूपा नानारूपाः स्तीर्णाः सर्वत्र प्रसृता अस्याग्ने रश्मयो मधूनामुदकानां स्रवथे स्रवणे सत्यस्थुः । तिष्ठंति । पिन्वमानाः पूर्यमाणा अत्राग्नावापो धेनवः सर्वेषां प्रीणयित्र्योऽभवन् । समीची समंचत्यौ शोभमाने मही महत्यौ द्यावापृथिव्यौ दस्मस्य दर्शनीयस्याग्नेर्मातरा मातरौ भवतः ॥

॥ अथाष्टमी ॥

बभ्राणः सूनो सहसो व्यद्यौद्दधानः शुक्रा रभसा वपूंषि ।
श्चोतंति धारा मधुनो घृतस्य वृषा यत्र वावृधे काव्येन ॥८॥
बभ्राणः । सूनो इति । सहसः । वि । अद्यौत् । दधानः । शुक्रा । रभसा । वपूंषि ।
श्चोतंति । धाराः । मधुनः । घृतस्य । वृषा । यत्र । ववृधे । काव्येन ॥८॥

हे सहसः सूनो सहसस्पुत्र बभ्राणः सर्वैर्धार्यमाणस्त्वं शुक्रा शुक्राणि भास्वराणि रभसा वेगवंति वपूंष्यर्चींषि दधानः धारयंस्त्वं व्यद्यौत् । विद्योतसे । वृषाग्निर्यत्र यस्मिन्यजमाने काव्येन स्तोत्रेण ववृधे वृद्धिं प्राप्नोति तदानीं मधुनोऽत्यंतं मधुरस्य घृतस्योदकस्य धाराः श्चोतंति । स्रवंते । यदा यजमानस्तोत्रेणाग्निस्तुष्टो भवति तदानीं वृष्टिर्भवतीत्यर्थः ॥

॥ अथ नवमी ॥

पितुश्चिदूधर्जनुषा विवेद व्यस्य धारा असृजद्वि धेनाः ।
गुहा चरंतं सखिभिः शिवेभिर्दिवो यह्वीभिर्न गुहा बभूव ॥९॥

पितुः। चित्। ऊधः। जनुषा। विवेद। वि। अस्य। धाराः। असृजत्। वि। धेनाः।
गुहा। चरंतं। सखिऽभिः। शिवेभिः। दिवः। यह्वीभिः। न। गुहा। बभूव ॥९॥

पितुरंतरिक्षस्योधरूधःस्थानीयं जलप्रदेशमयमग्निर्जनुषा स्वयमेव विवेद। जानाति। किंचायमग्निरस्योधसः संबंधिन्यो धारा व्यसृजत्। धेना माध्यमिका वाचश्च विसृजति। शिवेभिः शिवंकरैः सखिभिरात्मनः सखिभूतैर्वायुभिर्दिवो यह्वीभिरंतरिक्षस्यापत्यभूताभिरद्भिश्च सह गुहा गुहायां चरंतं वर्तमानमेनमग्निं गुहा चित् गुहायां स्थितः कोऽपि न बभूव। प्राप्तुं समर्थो नाभवत्॥

॥ अथ दशमी ॥

पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेको अधयत्पीप्यानाः।
वृष्णे सपत्नी शुचये सबंधू उभे अस्मै मनुष्ये३नि पाहि ॥१०॥

पितुः। च। गर्भं। जनितुः। च। बभ्रे। पूर्वीः। एकः। अधयत्। पीप्यानाः।
वृष्णे। सपत्नी इति सऽपत्नी। शुचये। सबंधू इति सऽबंधू। उभे इति। अस्मै।
मनुष्ये३इति। नि। पाहि ॥१०॥

अयमग्निः पितुश्चांतरिक्षस्य गर्भं वृष्टिद्वारा गर्भभूतं जनितुः सर्वस्य लोकस्य जनयितुश्च ब्राह्मणस्य लोकमोषध्यादिकं बभ्रे। बिभर्ति। एक एवाग्निः पूर्वीर्बह्वीः पीप्यानाः प्यायमाना वृद्धिं प्राप्ता ओषधीरधयत्। धयति। भक्षयति। सपत्नी समान एकः सूर्यः पतिर्ययोस्ते मनुष्ये मनुष्येभ्यो हिते उभे द्यावापृथिव्यौ वृष्णे वर्षित्रेऽस्मै शुचयेऽग्नये सबंधू भवतः। अनयोरग्निरेव बंधुरित्यर्थः। हे अग्ने त्वं ते द्यावापृथिवी नि पाहि। नितरां रक्ष॥

॥ इति द्वितीयस्याष्टमे चतुर्दशो वर्गः ॥

॥ अथैकादशी ॥

उरौ महाँ अनिबाधे ववर्धापो अग्निं यशसः सं हि पूर्वीः।
ऋतस्य योनावशयद्दमूना जामीनामग्निरपसि स्वसॄणां ॥११॥

उरौ। महान्। अनिऽबाधे। ववर्ध। आपः। अग्निं। यशसः। सं। हि। पूर्वीः।
ऋतस्य। योनौ। अशयत्। दमूनाः। जामीनां। अग्निः। अपसि। स्वसॄणां ॥११॥

महानयमग्निरनिबाधेऽसंबाध उरौ विस्तीर्णेऽतरिक्षे ववर्ध। वर्धते। अस्य वर्धने कारणमाह। हि यस्मात्कारणात्पूर्वीर्बह्वो यशसो। यशोऽन्नं। तद्वत्य आप अग्निं संवर्धयंति। एवमद्भिर्वृद्धिं प्राप्तोऽग्निर्ऋतस्योदकस्य योनौ स्थानेऽतरिक्षे स्थितः स्वसृणां स्वतः सरंतीनां जामीनां भगिनीस्थानीयानां हेतुभूतेऽपसि पयसि दमूना दांतमनाः सन् अशयत्। शेते ॥

॥ अथ द्वादशी ॥

अक्रो न बभ्रिः समिथे महीनां दिदृक्षेयः सूनवे भाऋजीकः।
उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अग्निः ॥१२॥

अक्रः। न। बभ्रिः। संऽइथे। महीनां। दिदृक्षेयः। सूनवे। भाःऽऋजीकः।
उत्। उस्रियाः। जनिता। यः। जजान। अपां। गर्भः। नृऽतमः। यह्वः। अग्निः ॥१२॥

जनिता सर्वस्य लोकस्य जनयिता अपामुदकानां गर्भो गर्भरूपो नृतमो नेतृतमोऽतिशयेन मनुष्याणां रक्षिता यह्वो महान् योऽग्निरक्रः परेषामाक्रमिता परैरनाक्रमणीयो वा ॥ नेति पादपूरणः ॥ समिथे संग्रामे महीनां महतीनां स्वसेनानां बभ्रिर्भर्ता दिदृक्षेयः सर्वैर्दर्शनीयो भाऋजीकः स्वदीप्त्या प्रकाशमानः सोऽग्निः सूनवे हविषां प्रदात्रे यजमानाय तदर्थमुस्रिया अप उज्जजान। उदजनयत् ॥ सूनवे। षू प्रेरणे इत्यस्माद्धातोरौणादिको नुप्रत्ययः ॥

॥ अथ त्रयोदशी ॥

अपां गर्भं दर्शतमोषधीनां वना जजान सुभगा विरूपं।
देवासश्चिन्मनसा सं हि जग्मुः पनिष्ठं जातं तवसं दुवस्यन् ॥१३॥

अपां। गर्भं। दर्शतं। ओषधीनां। वना। जजान। सुऽभगा। विऽरूपं।
देवासः। चित्। मनसा। सं। हि। जग्मुः। पनिष्ठं। जातं। तवसं। दुवस्यन् ॥१३॥

सुभगा सुभाग्या वना सर्वैर्वननीयारणिर्दर्शतं दर्शनीयं विरूपं नानाविधरूपमपामोषधीनां च गर्भमग्निं जजान। अजनयत्। देवासश्चित् सर्वे देवा अपि पनिष्ठं स्तुत्यं तवसं वृद्धं जातं जातमात्रं तमग्निं मनसा स्तुत्या संजग्मुः। उपागच्छन्। हीति पूरणः। त एव दुवस्यन्। पर्यचरन् ॥

॥ अथ चतुर्दशी ॥

बृहंत इद्भानवो भाऋजीकमग्निं सचंत विद्युतो न शुक्राः ।
गुहेव वृद्धं सदसि स्वे अंतरपार ऊर्वे अमृतं दुहानाः ॥१४॥

बृहंतः । इत् । भानवः । भाःऽऋजीकं । अग्निं । सचंत । विऽद्युतः । न । शुक्राः ।
गुहाऽइव । वृद्धं । सदसि । स्वे । अंतः । अपारे । ऊर्वे । अमृतं । दुहानाः ॥१४॥

अपारेऽगाध ऊर्वे समुद्रेऽंतर्मध्येऽमृतमुदकं दुहानाः क्षरंतो बृहंत इद्भानवो महांतः सूर्या एव शुक्रा दीप्यमाना विद्युतो न विद्युत इव स्वे स्वकीये सदसि सदनेऽंतरिक्षे गुहेव गुहायामिव वृद्धं प्रवृद्धं भाऋजीकं प्रभया दीप्यमानमग्निं सचंत । आश्रयंति ॥

॥ अथ पंचदशी ॥

ईळे च त्वा यजमानो हविर्भिरीळे सखित्वं सुमतिं निकामः ।
देवैरवो मिमीहि सं जरित्रे रक्षा च नो दम्येभिरनीकैः ॥१५॥

ईळे । च । त्वा । यजमानः । हविःऽभिः । ईळे । सखिऽत्वं । सुऽमतिं । निऽकामः ।
देवैः । अवः । मिमीहि । सं । जरित्रे । रक्ष । च । नः । दम्येभिः । अनीकैः ॥१५॥

यजमानोऽहं हविर्भिः साधनैस्त्वा त्वामीळे च । पश्वादिलक्षणं धनं च याचे । सुमतिं शोभनां मतिं धर्मविषयां बुद्धिं निकामो नितरां कामयमानस्त्वया सह सखित्वमीळे । याचे । त्वं देवैः सह जरित्रे स्तोत्रे स्तोत्रं कुर्वते मह्यमस्मदर्थमवः पश्वादिविषयां रक्षां मिमीहि । कुरु । दम्येभिर्दमनीयैर्नियंतव्यैः । प्रयत्ननियंतव्यतयोच्छृंखलतोक्ता । अनीकैस्तेजोभिर्नोऽस्मान् रक्ष च ॥

॥ इति द्वितीयस्याष्टमे पंचदशो वर्गः ॥

॥ अथ षोडशी ॥

उपक्षेतारस्तव सुप्रणीतेऽग्ने विश्वानि धन्या दधानाः ।
सुरेतसा श्रवसा तुंजमाना अभि ष्याम पृतनायूँरदेवान् ॥१६॥

उपऽक्षेतारः । तव । सुऽप्रनीते । अग्ने । विश्वानि । धन्या । दधानाः ।
सुऽरेतसा । श्रवसा । तुंजमानाः । अभि । स्याम । पृतनाऽयून् । अदेवान् ॥१६॥

हे सुप्रणीते शोभनप्रणयन हे अग्ने तवोपक्षेतार उपगंतारः ॥ अत्र क्षितिर्गत्यर्थे वर्तते ॥ विश्वानि सर्वाणि धन्या धन्यानि पश्वादिधनप्राप्तिहेतुभूतानि कर्माणि दधाना विदधानाः कुर्वंतस्तुंजमाना हवींषि प्रयच्छंतो वयं सुरेतसा शोभनवीर्येण श्रवसा त्वत्कृतेनान्नेनादेवान् देवेभ्योऽन्यान् । वटिवयुक्तन्यायेन राक्षसा एव गृह्यंते । यज्ञविघ्नकारिणस्तान्पृतनायूंश्च शरीराद्युपद्रवकारिणः शत्रूंश्चाभिष्याम । अभिभवेम । यद्वा देवानपूजयतः शत्रूनिति वा योज्यं ॥

॥ अथ सप्तदशी ॥

आ देवानामभवः केतुरग्ने मंद्रो विश्वानि काव्यानि विद्वान् ।
प्रति मर्ताँ अवासयो दमूना अनु देवान्रथिरो यासि साधन् ॥१७॥

आ । देवानां । अभवः । केतुः । अग्ने । मंद्रः । विश्वानि । काव्यानि । विद्वान् ।
प्रति । मर्तान् । अवासयः । दमूनाः । अनु । देवान् । रथिरः । यासि । साधन् ॥१७॥

हे अग्ने मंद्रः स्तुत्यः केतुर्यज्ञेषु देवानां प्रज्ञापकस्त्वमाभवः । आ समंताद्भवसि । सर्वव्यापको भवसीत्यर्थः । किंच विश्वानि सर्वाणि काव्यानि यजमानादिभिः कृतानि स्तोत्राणि विद्वान् जानन् त्वं मर्तान् मर्त्यान् स्तोतॄन् स्वाभिलषितवस्तुसंपादनेन प्रीतान् विधाय गृहेषु प्रत्यवासयः । प्रतिवासयसि । रथिरो रथी साधन् देवानां हितानि कर्माणि साधयन् देवान् अनु यासि च । अनुगच्छसि च ॥

॥ अथाष्टादशी ॥

नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन् ।
घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान् ॥१८॥

नि । दुरोणे । अमृतः । मर्त्यानां । राजा । ससाद । विदथानि । साधन् ।
घृतऽप्रतीकः । उर्विया । वि । अद्यौत् । अग्निः । विश्वानि । काव्यानि । विद्वान् ॥१८॥

अमृतो नित्यो राजा राजमानो योऽग्निर्विदथानि यज्ञान् साधन् साधयन् मर्त्यानामग्निहोत्रिणां दुरोणे गृहे निषसाद । निषीदति । विश्वानि काव्यानि विद्वान् जानन् घृतप्रतीको घृतेन संधुक्षितावयव उर्विया विस्तीर्णः सोऽग्निर्व्यद्यौत् । विद्योतते ॥

॥ अथैकोनविंशी ॥

आ नो॑ गहि स॒ख्येभिः॑ शि॒वेभि॑र्म॒हान्म॒हीभि॑रू॒तिभिः॑ सर॒ण्यन् ।
अ॒स्मे र॒यिं ब॑हु॒लं संत॑रुत्रं सु॒वाचं॑ भा॒गं य॒शसं॑ कृधी नः ॥१९॥

आ । नः॒ । ग॒हि॒ । स॒ख्येभिः॑ । शि॒वेभिः॑ । म॒हान् । म॒हीभिः॑ । ऊ॒तिऽभिः॑ । स॒र॒ण्यन् ।
अ॒स्मे इति॑ । र॒यिं । ब॒हु॒लं । सम्ऽत॑रुत्रं । सु॒ऽवाचं॑ । भा॒गं । य॒शसं॑ । कृ॒धि॒ । नः॒ ॥१९॥

सरण्यन् सर्वत्र सरणं गमनमिच्छन् महांस्त्वं शिवेभिः शिवंकरैः सख्येभिः सख्यैः सखिकर्मभिर्महीभिर्महतीभिरूतिभी रक्षाभिश्च नोऽस्मान्प्रति आ गहि । आगच्छ । अस्मे अस्मभ्यं बहुलं विस्तीर्णं संतरुत्रं सर्वेषामुपद्रवाणां संतारकं सुवाचं शोभनवाचं भागं सर्वैर्भजनीयं यशसं यशसा कीर्त्या संयुक्तं रयिं धनं नोऽस्मभ्यं कृधि । देहि । अस्मभ्यमिति पुनर्वचनमादरातिशयार्थं ॥

॥ अथ विंशी ॥

ए॒ता ते॑ अग्ने॒ जनि॑मा॒ सना॑नि॒ प्र पू॒र्व्याय॒ नूत॑नानि वोचं ।
म॒हांति॒ वृष्णे॒ सव॑ना कृ॒तेमा जन्मं॑जन्म॒न् निहि॑तो जा॒तवे॑दाः ॥२०॥

ए॒ता । ते॒ । अ॒ग्ने॒ । जनि॑म । सना॑नि । प्र । पू॒र्व्याय॑ । नूत॑नानि । वो॒चं॒ ।
म॒हांति॑ । वृष्णे॑ । सव॑ना । कृ॒ता । इ॒मा । जन्म॑न्ऽजन्मन् । निऽहि॑तः । जा॒तऽवे॑दाः ॥२०॥

हे अग्ने पूर्व्याय पुरातनाय ते तुभ्यं सनानि सनातनानि महद्भिः संभजनीयानि वा नूतनान्यन्येष्वविद्यमानान्यद्यतनानि वैतेतानि जनिम जन्मानि कर्माणि स्तोत्राणि वा प्रवोचं । जातवेदा जातप्रज्ञो जातधनो वा जन्मन् जन्मन् । जायंत इति जन्मानः । तेषु सर्वेषु मनुष्येषु निहितो यागार्थं । तस्मै वृष्णे संपदां वर्षित्रेऽग्नय इमेमानि सवना सवनानि कृता । कृतानि ॥

॥ अथैकविंशी ॥

जन्मं॑जन्म॒न् निहि॑तो जा॒तवे॑दा वि॒श्वामि॑त्रेभिरिध्यते॒ अज॑स्रः ।
तस्य॑ व॒यं सु॑म॒तौ य॒ज्ञिय॒स्यापि॑ भ॒द्रे सौ॑मन॒से स्या॑म ॥२१॥

जन्म॑न्ऽजन्मन् । निऽहि॑तः । जा॒तऽवे॑दाः । वि॒श्वामि॑त्रेभिः । इ॒ध्य॒ते॒ । अ॒ज॑स्रः ।
तस्य॑ । व॒यं । सु॒ऽम॒तौ । य॒ज्ञिय॑स्य । अपि॑ । भ॒द्रे । सौ॒म॒न॒से । स्या॒म॒ ॥२१॥

जन्मन् जन्मन् सर्वेषु मनुष्येषु निहितो जातवेदा विश्वामित्रेभिर्विश्वामित्रैः। पूजायां बहुवचनं। महर्षिणा विश्वामित्रेण यो जातवेदा अजस्रोऽजस्रमनवरतमिध्यते। दीप्यते। सुमतौ वर्तमाना वयं तस्य यज्ञियस्य यज्ञार्हस्याग्नेर्भद्रे भजनीये सौमनसे सुमनोभावेऽनुग्रहबुद्धावपि स्याम। अपि भवेम। प्रार्थनायां लिङ्॥

॥ अथ द्वाविंशी ॥

इ॒मं य॒ज्ञं स॑हसाव॒न् त्वं नो॑ देव॒त्रा धे॑हि सुक्रतो॒ ररा॑णः।
प्र यं॑सि होतर्बृह॒तीरिषो॒ नोऽग्ने॒ महि॒ द्रवि॑ण॒मा य॑जस्व ॥२२॥

इ॒मम्। य॒ज्ञम्। स॒ह॒सा॒ऽव॒न्। त्वम्। नः॒। दे॒व॒ऽत्रा। धे॒हि॒। सु॒क्र॒तो॒ इति॑ सुऽक्रतो। ररा॑णः।
प्र। यं॒सि॒। हो॒त॒रिति॑। बृ॒ह॒तीः। इषः॑। नः॒। अग्ने॑। महि॑। द्रवि॑णम्। आ। य॒ज॒स्व॒ ॥२२॥

हे सहसावन् सहस्वन् बलवन् सुक्रतो शोभनकर्मन् हे अग्ने रराणः सर्वदा रममाणः शब्दं कुर्वाणो वा त्वं नोऽस्मदीयमिमं यज्ञं देवत्रा देवेषु धेहि। निधेहि। हे होतर्देवानामाह्वातः बृहतीरिषोऽन्नानि नोऽस्मभ्यं प्रयंसि। प्रयच्छ। हे अग्ने महि महत् द्रविणं पश्वादिलक्षणं धनमायजस्व। प्रयच्छ। अत्र यजिर्दानकर्मा॥

॥ अथ त्रयोविंशी ॥

इळा॑मग्ने पुरु॒दंसं॑ स॒निं गोः श॑श्वत्त॒मं हव॑मानाय साध।
स्यान्नः॑ सू॒नुस्तन॑यो वि॒जावाग्ने॒ सा ते॑ सुम॒तिर्भू॑त्व॒स्मे ॥२३॥

इळा॑म्। अ॒ग्ने॒। पु॒रु॒ऽदंस॑म्। स॒निम्। गोः। श॒श्व॒त्ऽत॒मम्। हव॑मानाय। सा॒ध॒।
स्यात्। नः॒। सू॒नुः। तन॑यः। वि॒जाऽवा॑। अग्ने॑। सा। ते॒। सु॒ऽम॒तिः। भू॒तु॒। अ॒स्मे इति॑ ॥२३॥

इयं सर्वेषां पशूनां पशुपुरोडाशस्य स्विष्टकृतः पुरोनुवाक्या। सूत्र्यते हि। इळामग्ने पुरुदंसं सनिं गोर्होता यक्षदग्निं पुरोळाशस्य स्वदस्व हव्या समिषो दिदीहीति पुरोळाशस्विष्टकृत इति। आ॰ ३. ५.॥

हे अग्ने पुरुदंसं बहुकर्माणं गोर्गवां सनिं प्रदात्रीमिळां भूमिं हवमानाय स्तुवते मह्यं शश्वत्तमं चिरकालं यथा भवति तथा साध। साधय। नोऽस्माकं सूनुः पुत्रस्तनयः संतानस्य विस्तारयिता विजावा पुत्रपौत्रादिरूपेण स्वयं वि-

जायत इति विजावा स्यात्। हे अग्ने सा प्रसिद्धा ते सुमतिस्त्वदीयानुग्रहबुद्धिरस्मे अस्मासु भूतु। भवतु ॥

॥ इति द्वितीयस्याष्टमे षोडशो वर्गः ॥

वैश्वानरायेति पंचदशर्चं द्वितीयं सूक्तं। तथा चानुक्रमणिका वैश्वानराय पंचोना वैश्वानरीयं तु जागतं त्विति। विश्वामित्र ऋषिः। जगती छंदः। वैश्वानरोऽग्निर्देवता ॥ पृष्ठ्याभिप्लविकयोस्तृतीयेऽहन्याग्निमारुते वैश्वानराय धिषणामिति वैश्वानरनिविद्धानीयं सूक्तं। तृतीयस्येति खंडे सूत्रितं। वैश्वानराय धिषणां धारावरा मरुतः। आ॰ ७. ७.। इति ॥

॥ तत्र प्रथमा ॥

वैश्वानराय धिषणामृतावृधे घृतं न पूतमग्नये जनामसि।
द्विता होतारं मनुषश्च वाघतो धिया रथं न कुलिशः समृण्वति ॥१॥

वैश्वानराय। धिषणां। ऋतऽवृधे। घृतं। न। पूतं। अग्नये। जनामसि।
द्विता। होतारं। मनुषः। च। वाघतः। धिया। रथं। न। कुलिशः। सं। ऋण्वति ॥१॥

ऋतावृधे ऋतस्योदकस्य यज्ञस्य वा वर्धयित्रे वैश्वानराय। वैश्वानरशब्दो यास्केन व्याख्यातः। वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयंतीति वा। अपि वा विश्वानर एव स्यात् प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरस्तस्यैषा भवति। नि॰ ७. २१.। इति। तस्मै पूतं घृतं न घृतमिव धिषणां स्तुतिं जनामसि। जनयामः। यथा घृतं प्रीतिं जनयति तथा प्रीतिं करोमीत्यर्थः। द्विता द्विधा गार्हपत्याहवनीयरूपाभ्यां युक्तं होतारं देवानामाह्वातारमग्निं मनुषो मनुष्या वाघतश्च ऋत्विजश्च धिया कर्मणा कुलिशो वास्यादी रथं न रथमिव समृण्वति। संस्कुर्वंति ॥

॥ अथ द्वितीया ॥

स रोचयज्जनुषा रोदसी उभे स मात्रोरभवत्पुत्र ईड्यः।
हव्यवाळग्निरजरश्चनोहितो दूळभो विशामतिथिर्विभावसुः ॥२॥

सः। रोचयत्। जनुषा। रोदसी इति। उभे इति। सः। मात्रोः। अभवत्। पुत्रः। ईड्यः।
हव्यऽवाट्। अग्निः। अजरः। चनःऽहितः। दुःऽदभः। विशां। अतिथिः। विभाऽवसुः ॥२॥

सोऽग्निर्जनुषा जन्मनोभे रोदसी द्यावापृथिव्यौ रोचयत्। अरोचयत्। प्रकाशयति। स मात्रोर्द्यावापृथिव्योरीड्यः स्तुत्यः पुत्रोऽभवत्। हव्यवाट् हव्यानां वोढाग्निरंगनादिगुणयुक्तोऽजरो जरारहितः। चनोऽन्नं हितं यजमाने निहितं येनासौ चनोहितः। दूळभो हिंसितुमशक्यः सोऽयं विभावसुः प्रभाधनो विशां मनुष्याणामतिथिरिव पूज्यो भवति ॥

॥ अथ तृतीया ॥

क्रत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्निं जनयंत चित्तिभिः।
रुरुचानं भानुना ज्योतिषा महामत्यं न वाजं सनिष्यन्नुप ब्रुवे ॥३॥

क्रत्वा। दक्षस्य। तरुषः। विऽधर्मणि। देवासः। अग्निं। जनयंत। चित्तिऽभिः।
रुरुचानं। भानुना। ज्योतिषा। महां। अत्यं। न। वाजं। सनिष्यन्। उप। ब्रुवे ॥३॥

चित्तिभिर्ज्ञानैरुपलक्षिता देवासो देवास्तरुषो व्यसनेभ्यस्तारकस्य दक्षस्य बलस्य क्रत्वा कर्मणा विधर्मणि विधारके यज्ञेऽग्निं जनयंत। अजनयन्। भानुना भासमानेन ज्योतिषा रुरुचानं रोचमानं महां महांतमग्निमत्यं न भारसहमश्वमिव वाजमन्नं सनिष्यन् लिप्समानोऽहमुप ब्रुवे। स्तौमि ॥

॥ अथ चतुर्थी ॥

आ मंद्रस्य सनिष्यंतो वरेण्यं वृणीमहे अह्रयं वाजमृग्मियं।
रातिं भृगूणामुशिजं कविक्रतुमग्निं राजंतं दिव्येन शोचिषा ॥४॥

आ। मंद्रस्य। सनिष्यंतः। वरेण्यं। वृणीमहे। अह्रयं। वाजं। ऋग्मियं।
रातिं। भृगूणां। उशिजं। कविऽक्रतुं। अग्निं। राजंतं। दिव्येन। शोचिषा ॥४॥

मंद्रस्य स्तुत्यस्य वैश्वानरस्य संबंधिनं वरेण्यं वरणीयमह्रयमलज्जावहं ऋग्मियं प्रशस्यं वाजमन्नं सनिष्यंतो लिप्समाना वयं भृगूणामृषीणां रातिमभिलषितार्थप्रदातारमुशिजमाभिलष्यं तं कविक्रतुं क्रांतप्रज्ञं दिव्येन दिविभवेन शोचिषा रोचिषा राजंतं भ्राजमानमग्निमावृणीमहे। संभजामहे ॥

॥ अथ पंचमी ॥

अग्निं सुम्नाय दधिरे पुरो जना वाजश्रवसमिह वृक्तबर्हिषः।
यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसां ॥५॥

अग्निं। सुम्नाय। दधिरे। पुरः। जनाः। वाजऽश्रवसं। इह। वृक्तऽबर्हिषः।
यतऽस्रुचः। सुऽरुचं। विश्वऽदेव्यं। रुद्रं। यज्ञानां। साधत्ऽइष्टिं। अपसां ॥५॥

वृक्तबर्हिषः स्तीर्णबर्हिषो यतस्रुचः प्राप्तस्रुच ऋत्विजः सुम्नाय सुखार्थं वाजश्रवसं मनुष्येभ्यः प्रेरितान्नं सुरुचं प्रशस्तदीप्तिमंतं विश्वदेव्यं विश्वेभ्यो देवेभ्यो हितं रुद्रं दुःखानां द्रावकमपसां कर्मवतां यज्ञानां। यजंतीति यज्ञा यजमानाः। तेषां साधदिष्टिं साधितयज्ञमग्निमिह यज्ञे पुरो दधिरे। स्तुवंति ॥

॥ इति द्वितीयस्याष्टमे सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्तबर्हिषो नरः।
अग्ने दुव इच्छमानास आप्यमुपासते द्रविणं धेहि तेभ्यः ॥६॥

पावकऽशोचे। तव। हि। क्षयं। परि। होतः। यज्ञेषु। वृक्तऽबर्हिषः। नरः।
अग्ने। दुवः। इच्छमानासः। आप्यं। उप। आसते। द्रविणं। धेहि। तेभ्यः ॥६॥

हे पावकशोचे शोधकदीप्ते हे होतर्देवानामाह्वातः यज्ञेषु परि परितो वृक्तबर्हिषः स्तीर्णबर्हिषो दुवः परिचरणमिच्छमानास इच्छंतो नरो नेतारो यजमाना आप्यमाप्तुं योग्यं तव त्वत्संबंधिनं क्षयं निवासं यागगृहमुपासते। सेवंते। तेभ्यो द्रविणं धनं धेहि। विधेहि ॥

॥ अथ सप्तमी ॥

आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन्।
सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥७॥

आ। रोदसी इति। अपृणत्। आ। स्वः। महत्। जातं। यत्। एनं। अपसः। अधारयन्।
सः। अध्वराय। परि। नीयते। कविः। अत्यः। न। वाजऽसातये। चनःऽहितः ॥७॥

रोदसी द्यावापृथिव्यावपृणत्। अपूरयत्। तथा महत्प्रभूतं स्वरंतरिक्षमापृणच्च। अपसः कर्मवंतो यजमाना जातं यद्यमेनमग्निमधारयन् अत्यो न अश्व इव कविः क्रांतः सर्वत्र व्याप्तश्चनोहितो निहितान्नः सोऽयमग्निर्वाजसातये वाजस्यान्नस्य कीर्तेर्वा सातये लाभाय परिणीयते। यज्ञार्थं नीयते ॥

॥ अथाष्टमी ॥

नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसं ।
रथीर्ऋतस्य बृहतो विचर्षणिरग्निर्देवानामभवत्पुरोहितः ॥८॥
नमस्यत । हव्यऽदातिं । सुऽअध्वरं । दुवस्यत । दम्यं । जातऽवेदसं ।
रथीः । ऋतस्य । बृहतः । विऽचर्षणिः । अग्निः । देवानां । अभवत् । पुरःऽहितः ॥८॥

रथीर्नेता बृहतो महत ऋतस्य यज्ञस्य विचर्षणिर्द्रष्टा योऽग्निर्देवानां पुरोहितः पुरस्ताद्दृष्टव्यतया स्थापितोऽभवत् हव्यदातिं देवेभ्यो हविषां दातारं स्वध्वरं शोभनयज्ञं दम्यं दमेभ्यो गृहेभ्यो हितं जातवेदसं जातप्रज्ञं तमग्निं नमस्यत । पूजयत । दुवस्यत । परिचरत ॥

॥ अथ नवमी ॥

तिस्रो यह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजो अमृत्यवः ।
तासामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः ॥९॥
तिस्रः । यह्वस्य । संऽइधः । परिऽज्मनः । अग्नेः । अपुनन् । उशिजः । अमृत्यवः ।
तासां । एकां । अदधुः । मर्त्ये । भुजं । ऊं इति । लोकं । ऊं इति । द्वे इति । उप ।
जामिं । ईयतुः ॥९॥

उशिजः कामयमाना अमृत्यवो मृत्युरहिता देवा यह्वस्य महतः परिज्मनः परितो गंतुः समिधः समिंधिकाः प्रकाशिकास्तिस्रः पार्थिववैद्युतसूर्यरूपास्तिस्रस्तनूरपुनन् । अशोधयन् । ते देवा भुजं सर्वेषां पालयित्रीं तासां तनूनां मध्य एकां पार्थिवीं तनुं मर्त्ये मर्त्यलोकेऽदधुः । न्यदधुः । उ इति पादपूरणः । इतरे द्वे तनू जामिं लोकमासन्नमंतरिक्षमुपेयतुः । गच्छतः । अथवा तिस्रः समिध आघारसमिधौ द्वे अनूयाजसमिच्चैकेति । तासां समिधामेकामनूयाजसमिधं मर्त्ये इह लोके भोगहेतुमनूयाजपर्यंतमदधुः । धारयंति । प्रजा वा अनूयाज इति प्रजात्वेनानूयाजानां संस्तवात् तदाश्रयत्वाच्चानूयाजसमिधः । इतरे द्वे समिधौ अंतरिक्षे दिव्यभोगहेतू उपेयतुः । उपगच्छतः । त्रीन्परिधींस्तिस्रः समिध इति हि निगमः ॥

॥ अथ दशमी ॥

विशां कविं विश्पतिं मानुषीरिषः सं सीमकृण्वन्स्वधितिं न तेजसे ।
स उद्वतो निवतो याति वेविषत्स गर्भमेषु भुवनेषु दीधरत् ॥१०॥

विशां । कविं । विश्पतिं । मानुषीः । इषः । सं । सीं । अकृण्वन् । स्वऽधितिं । न । तेजसे ।
सः । उत्ऽवतः । निऽवतः । याति । वेविषत् । सः । गर्भं । एषु । भुवनेषु । दीधरत् ॥१०॥

इषः पश्वादिलक्षणं धनमिच्छंत्यो मानुषीर्मनुष्यप्रजा विशां प्रजानां विश्पतिं प्रभुं कविं मेधाविनं सीमेनं स्वधितिं न असिमिव तेजसे तैक्ष्ण्यार्थं समकृण्वन् । समस्कुर्वन् । सोऽग्निरुद्वत उच्छ्रायवतो निवतो नीचैर्भाववतश्च प्रदेशान्वेविषत् व्याप्नुवन् याति । गच्छति । स एषु भुवनेषु गर्भमरण्या दीधरत् । अधारयत् ॥

॥ इति द्वितीयस्याष्टमेऽष्टादशो वर्गः ॥

॥ अथैकादशी ॥

स जिन्वते जठरेषु प्रजज्ञिवान्वृषा चित्रेषु नानदन्न सिंहः ।
वैश्वानरः पृथुपाजा अमर्त्यो वसु रत्ना दयमानो वि दाशुषे ॥११॥

सः । जिन्वते । जठरेषु । प्रजज्ञिऽवान् । वृषा । चित्रेषु । नानदत् । न । सिंहः ।
वैश्वानरः । पृथुऽपाजाः । अमर्त्यः । वसु । रत्ना । दयमानः । वि । दाशुषे ॥११॥

प्रजज्ञिवान् जातो वृषा वर्षकः स वैश्वानरश्चित्रेषु नानाप्रकारेषु जठरेषु । प्राणिनां भेदाज्जठराणां भेदः । तेषु जिन्वते । वर्धते । चित्रेषु नानाविधेष्वरण्येषु नानदत् अत्यर्थं शब्दं कुर्वन् सिंहो न । सिंह इव । किंविधो वैश्वानरः । पृथुपाजाः पृथुतेजाः । अथवा पृथुवेगः । अमर्त्यो मरणधर्मरहितो दाशुषे हविषां प्रदात्रे यजमानाय रत्ना रमणीयानि वसु वसूनि धनानि वि विशेषेण दयमानः प्रयच्छन् ॥

॥ अथ द्वादशी ॥

वैश्वानरः प्रत्नथा नाकमारुहद्दिवस्पृष्ठं भंदमानः सुमन्मभिः ।
स पूर्ववज्जनयन् जंतवे धनं समानमज्मं पर्येति जागृविः ॥१२॥

वैश्वानरः । प्रत्नऽथा । नाकं । आ । अरुहत् । दिवः । पृष्ठं । भंदमानः । सुमन्मऽभिः ।
सः । पूर्वऽवत् । जनयन् । जंतवे । धनं । समानं । अज्मं । परि । एति । जागृविः ॥१२॥

सुमन्मभिः स्तोतृभिर्भंदमानः स्तूयमानो वैश्वानरो जातमात्र एव प्रत्नथा प्रत्न इव चिरंतन इव नाकं। कं सुखं। अकं दुःखं। न विद्यतेऽकं यस्मिन् तन्नाकं। दिवोऽंतरिक्षस्य पृष्ठमुपरितनप्रदेशं स्वरोहिद्भिरारुहत्। आरोहति। स वैश्वानरः पूर्ववत् पूर्वेभ्य ऋषिभ्य इव जंतवे स्तोत्रे यजमानाय धनं पश्वादिलक्षणं जनयन् संपादयन् जागृविः सदा प्रबुद्धः समानं सर्वेषां देवानां साधारणमज्ममाकाशमार्गं पर्येति। सूर्यरूपेण गच्छति ॥

॥ अथ त्रयोदशी ॥

ऋतावानं यज्ञियं विप्रमुक्थ्यमा यं दधे मातरिश्वा दिवि क्षयं।
तं चित्रयामं हरिकेशमीमहे सुदीतिमग्निं सुविताय नव्यसे ॥१३॥
ऋतऽवानं। यज्ञियं। विप्रं। उक्थ्यं। आ। यं। दधे। मातरिश्वा। दिवि। क्षयं।
तं। चित्रऽयामं। हरिऽकेशं। ईमहे। सुऽदीतिं। अग्निं। सुविताय। नव्यसे ॥१३॥

ऋतावानं बलवंतं यज्ञियं यज्ञार्हं विप्रं मेधाविनमुक्थ्यं स्तुत्यं दिवि द्युलोके क्षयं निवसंतं यमग्निं मातरिश्वा वायुर्द्युलोकादाहृत्य पृथिव्यामादधे। आहितवान्। चित्रयामं नानाविधगमनं हरिकेशं पिंगलार्चिषं सुदीतिं शोभनदीप्तिं तमग्निं नव्यसे नवतराय सुविताय सुष्ठु प्राप्तव्याय धनाय तदर्थमीमहे। याचामहे ॥

॥ अथ चतुर्दशी ॥

शुचिं न यामन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधं।
अग्निं मूर्धानं दिवो अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत् ॥१४॥
शुचिं। न। यामन्। इषिरं। स्वःऽदृशं। केतुं। दिवः। रोचनऽस्थां। उषःऽबुधं।
अग्निं। मूर्धानं। दिवः। अप्रतिऽस्कुतं। तं। ईमहे। नमसा। वाजिनं। बृहत् ॥१४॥

नेति संप्रत्यर्थे। शुचिं दीप्तं यामन् यामनि यज्ञ इषिरमेषणीयं स्वर्दृशं सर्वदृशं सर्वपदार्थविज्ञानयुक्तं दिवो द्युलोकस्य केतुं प्रज्ञापकं रोचनस्थां रोचनस्थं। रोचनः सूर्यः। तस्मिन् तिष्ठंतं। उषर्बुधमग्निहोत्रिकरूपेणोषसि प्रबुध्यमानं दिवः स्वर्गस्य मूर्धानं प्रधानमप्रतिष्कुतमप्रतिहतशब्दं वाजिनमन्नवंतं महत् महांतं तमग्निं नमसा स्तोत्रेणेमहे। याचामहे ॥

॥ अथ पंचदशी ॥

मंद्रं होतारं शुचिमद्वयाविनं दमूनसमुक्थ्यं विश्वचर्षणिं ।
रथं न चित्रं वपुषाय दर्शतं मनुर्हितं सदमिद्राय ईमहे ॥१५॥
मंद्रं। होतारं। शुचिं। अद्वयाविनं। दमूनसं। उक्थ्यं। विश्वऽचर्षणिं।
रथं। न। चित्रं। वपुषाय। दर्शतं। मनुःऽहितं। सदं। इत्। रायः। ईमहे ॥१५॥

मंद्रं स्तुत्यं होतारं देवानामाह्वातारं शुचिं सर्वदा शुद्धमद्वयाविनमकुटिलं दमूनसं दानमनसमुक्थ्यं श्रेष्ठं विश्वचर्षणिं विश्वस्य द्रष्टारं चित्रं नानाविधवर्णं रथं न रथमिव वपुषाय रूपार्थं दर्शतं दर्शनीयं सदमित् सदैव मनुर्हितं सर्वेभ्यो मनुष्येभ्यो हितं तमग्निं रायो धनानीमहे। याचामहे। अत्र याच्ञार्थत्वादस्य द्विकर्मकत्वं ॥

॥ इति द्वितीयस्याष्टम एकोनविंशो वर्गः ॥

वैश्वानरायेत्येकादशर्चं तृतीयं सूक्तं वैश्वामित्रं। अत्रेयमनुक्रमणिका। वैश्वानरायैकादशेति। पूर्वसूक्ते वैश्वानरीयं तु जागतं त्वित्युक्तत्वादस्यापि सूक्तस्य जगती छंदो वैश्वानरोऽग्निर्देवता॥ अस्य सूक्तस्याग्निष्टोम आग्निमारुते शस्त्रे विनियोगः। सूत्र्यते हि। वैश्वानराय पृथुपाजसे शं नः करत्यर्वते। आ॰ ५.२०.। इति॥

॥ तत्र प्रथमा ॥

वैश्वानराय पृथुपाजसे विपो रत्ना विधंत धरुणेषु गातवे ।
अग्निर्हि देवाँ अमृतो दुवस्यत्यथा धर्माणि सनता न दूदुषत् ॥१॥
वैश्वानराय। पृथुऽपाजसे। विपः। रत्ना। विधंत। धरुणेषु। गातवे।
अग्निः। हि। देवान्। अमृतः। दुवस्यति। अथ। धर्माणि। सनता। न। दूदुषत् ॥१॥

विपो मेधाविनः स्तोतारः पृथुपाजसे बहुबलाय बह्वन्नाय वा। पाजःशब्दस्य बलान्ननाम्नोः पाठात्। वैश्वानरायाग्नये धरुणेषु धर्मेषु यज्ञेषु रत्ना रमणीयानि स्तोत्राणि गातवे सन्मार्गलाभाय विधंत। परिचरंति। कुर्वंति। अमृतो मरणरहितोऽग्निर्देवान् दुवस्यति। हविषां प्रदानेन परिचरति। हिः प्रसिद्धौ। अथ अतः कारणात्कोऽपि सनता सनातनानि धर्माणि यज्ञान् न दूदुषत्। न दूषयति॥

॥ अथ द्वितीया ॥

अंतर्दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः ।
क्षयं बृहंतं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः ॥२॥
अंतः । दूतः । रोदसी इति । दस्मः । ईयते । होता । निऽसत्तः । मनुषः । पुरःऽहितः ।
क्षयं । बृहंतं । परि । भूषति । द्युऽभिः । देवेभिः । अग्निः । इषितः । धियाऽवसुः ॥२॥

दस्मो दर्शनीयो होताग्निर्दूतो देवानां दूतः सन् रोदस्योर्द्यावापृथिव्योरंतर्मध्य ईयते । गच्छति । मनुषो मनोर्जातस्य मनुष्यस्य पुरोहित आहवनीयादिरूपेण पुरतः स्थापितो निषत्तो निषण्णः सन् अग्निर्द्युभिर्दीप्तिभिर्बृहंतं महांतं क्षयं यज्ञगृहं परिभूषति । अलंकुरुते । देवेभिर्देवैरिषितः प्रेषितो धियावसुः प्रज्ञया व्याप्तः । एते द्वे अग्निविशेषणे ॥

॥ अथ तृतीया ॥

केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयंत चित्तिभिः ।
अपांसि यस्मिन्नधि संदधुर्गिरस्तस्मिन्त्सुम्नानि यजमान आ चके ॥३॥
केतुं । यज्ञानां । विदथस्य । साधनं । विप्रासः । अग्निं । महयंत । चित्तिऽभिः ।
अपांसि । यस्मिन् । अधि । संऽदधुः । गिरः । तस्मिन् । सुम्नानि । यजमानः । आ । चके ॥३॥

यज्ञानां केतुं प्रज्ञापकं विदथस्य यज्ञस्य गृहस्य वा साधनं प्राप्तिसाधनमसाधारणकारणं संतमग्निं विप्रासो विप्राश्चित्तिभिः स्वकर्मभिर्महयंत । पूजयंति । किंच गिरः स्तोतारो यस्मिन्नग्नावपांसि स्वानुष्ठेयानि कर्माण्यधिसंदधुः संदधते यजमानस्तस्मिन्नग्नौ सुम्नानि सुखानि प्राप्याचके । कामयते ॥

॥ अथ चतुर्थी ॥

पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघतां ।
आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भंदते धामभिः कविः ॥४॥
पिता । यज्ञानां । असुरः । विपःऽचितां । विऽमानं । अग्निः । वयुनं । च । वाघतां ।
आ । विवेश । रोदसी इति । भूरिऽवर्पसा । पुरुऽप्रियः । भंदते । धामऽभिः । कविः ॥४॥

यज्ञानां पिता पालयिता विपश्चितां विदुषां स्तोतृणामसुरो बलप्रदः ।

वाघतामृत्विजां वयुनं ज्ञानसाधनं। विमानं। विमीयते फलमिति विमानं यज्ञादिकर्मसाधनं। सोऽग्निर्भूरिवर्पसा पार्थिववैद्युतादिबहुविधरूपेण रोदसी द्यावापृथिव्यावाविवेश। प्रविशति। पुरुप्रियो मनुष्येष्वधिकं प्रियः। अथवा पुरूणां श्रेष्ठानां प्रियः पुरुप्रियः। धामभिस्तेजोभिर्युक्तः कविरग्निर्मंदते। यजमानेन स्तूयते॥

॥ अथ पंचमी ॥

चंद्रमग्निं चंद्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदं।
विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः ॥५॥

चंद्रं। अग्निं। चंद्रऽरथं। हरिऽव्रतं। वैश्वानरं। अप्सुऽसदं। स्वःऽविदं।
विऽगाहं। तूर्णिं। तविषीभिः। आऽवृतं। भूर्णिं। देवासः। इह। सुऽश्रियं। दधुः ॥५॥

देवासो देवाश्चंद्रमाह्लादकरं चंद्ररथं। चंद्र आह्लादको रथो यस्येति वा तं हरिव्रतं पिंगलवर्णं हरित्वचं वा। हरित्वचमिति शाखांतरं। अप्सुषदमप्सु सीदंतं स्वर्विदं सर्वज्ञं विगाहं विगाहमानं सर्वत्र व्याप्तं तूर्णिं क्षिप्रगामिनं शत्रूणां हिंसितारं वा तविषीभिर्बलैरावृतं भूर्णिं भर्तारं सुश्रियं शोभनदीप्तिं वैश्वानरमिह इहलोके दधुः। आदधुः॥

॥ इति द्वितीयस्याष्टमे विंशो वर्गः ॥

॥ अथ षष्ठी ॥

अग्निर्देवेभिर्मनुषश्च जंतुभिस्तन्वानो यज्ञं पुरुपेशसं धिया।
रथीरंतरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः ॥६॥

अग्निः। देवेभिः। मनुषः। च। जंतुऽभिः। तन्वानः। यज्ञं। पुरुऽपेशसं। धिया।
रथीः। अंतः। ईयते। साधदिष्टिऽभिः। जीरः। दमूनाः। अभिशस्तिऽचातनः ॥६॥

देवैः साधदिष्टिभिः साधितयज्ञैर्जंतुभिर्ऋत्विग्भिश्च धिया कर्मणा मनुषो यजमानस्य पुरुपेशसं बहुरूपं। पेश इति रूपनाम। पुरोडाशपशुसोमहविर्भेदैरेकाहाहीनसत्रात्मकभेदैश्च नानाविधरूपं यज्ञं तन्वानः कुर्वन् रथीः सर्वस्य लोकस्य नेता जीरः क्षिप्रकारी दमूना दांतमना दानमना वाभिशस्तिचातनोऽभिशस्तीनामरातीनां यज्ञविघ्नकारिणां रक्षसां चातयिता नाशयिताग्निरंतर्द्यावापृथिव्योर्मध्य ईयते। गच्छति॥

॥ अथ सप्तमी ॥

अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः ।
वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सुक्रतुर्विपां ॥७॥
अग्ने । जरस्व । सुऽअपत्ये । आयुनि । ऊर्जा । पिन्वस्व । सं । इषः । दिदीहि । नः ।
वयांसि । जिन्व । बृहतः । च । जागृवे । उशिक् । देवानां । असि । सुऽक्रतुः । विपां ॥७॥

हे अग्ने स्वपत्ये सुपुत्र आयुन्यायुषि ॥ निमित्तसप्तम्येषा ॥ आयुषि निमित्ते जरस्व । देवान् स्तुहि । होतारमधिष्ठायोर्जा रसेनान्नेन वा पिन्वस्व । देवान्प्रीणय । नोऽस्माकमिषः सस्यार्थं वृष्टीः संदिदीहि । संदीपय । वयांस्यन्नानि च ॥ वयः क्षद्मेत्यन्ननामसु पाठात् ॥ जिन्व । देहि । हे जागृवे सर्वदा जागरणशील बृहतो महतो यजमानस्य जिन्वेति संबंधः । सुक्रतुः शोभनकर्मा शोभनयज्ञो वा त्वं विपां मेधाविनां देवानामुशिक् कांतोऽसि ॥

॥ अथाष्टमी ॥

विश्पतिं यह्वमतिथिं नरः सदा यंतारं धीनामुशिजं च वाघतां ।
अध्वराणां चेतनं जातवेदसं प्र शंसंति नमसा जूतिभिर्वृधे ॥८॥
विश्पतिं । यह्वं । अतिथिं । नरः । सदा । यंतारं । धीनां । उशिजं । च । वाघतां ।
अध्वराणां । चेतनं । जातऽवेदसं । प्र । शंसंति । नमसा । जूतिऽभिः । वृधे ॥८॥

नरो नेतारः स्तोतारो वा विश्पतिं विशां मनुष्याणां पतिं विश्वस्य पतिमिति वा यह्वं महांतमतिथिं सर्वस्यातिथिभूतं धीनां बुद्धीनां कर्मणां वा यंतारं नियंतारं वाघतामृत्विजां चोशिजं कांतं मनोज्ञमध्वराणां यागानां चेतनं प्रज्ञापकं जूतिभिर्वेगैर्युक्तं जातवेदसमग्निं वृधे वृद्धये समृद्धये नमसा नमस्कारेण स्तुतिभिश्च प्रशंसंति । प्रशंसां कुर्वंति ॥

॥ अथ नवमी ॥

विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः ।
तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः ॥९॥
विभाऽवा । देवः । सुऽरणः । परि । क्षितीः । अग्निः । बभूव । शवसा । सुमत्ऽरथः ।
तस्य । व्रतानि । भूरिऽपोषिणः । वयं । उप । भूषेम । दमे । आ । सुवृक्तिऽभिः ॥९॥

विभावा दीप्तिमान् देवः स्तूयमानः सुरणः। अत्र वर्णलोपश्छांदसः। शोभनं रमयतीति सुरमणः। सुमद्रथः शोभनरथोऽग्निः शवसा बलेन क्षितीः सर्वाः प्रजाः परि बभूव। परितो गृह्णाति। अत्र भवतेरुपसर्गवशात् परिग्रहार्थत्वं। भूरिपोषिणो बहूनां पोषयितुः पालयितुर्दमे यज्ञगृहे। दम इति गृहनामसु पाठात्। निवसतस्तस्याग्नेर्व्रतानि कर्माणि वयं सुवृक्तिभिः स्तोत्रैरुपभूषेम। उपभूषयामः। प्रकाशयामः॥

॥ अथ दशमी ॥

वैश्वा॑नर॒ तव॒ धामा॒न्या च॑क्रे॒ येभि॑ः स्व॒र्विद॒भ॑वो विचक्षण।

जा॒त आपृ॑णो॒ भुव॑नानि॒ रोद॑सी॒ अग्ने॒ ता विश्वा॑ परि॒भूर॑सि॒ त्मना॑ ॥१०॥

वैश्वा॑नर। तव॑। धामा॑नि। आ। च॒क्रे॒। येभि॑ः। स्वः॑ऽवित्। अभ॑वः। वि॒ऽच॒क्ष॒ण।

जा॒तः। आ। अ॒पृ॒णः॒। भुव॑नानि। रोद॑सी॒ इति॑। अग्ने॑। ता। विश्वा॑। परि॒ऽभूः॒।

अ॒सि॒। त्मना॑ ॥१०॥

हे वैश्वानर तव धामानि त्वत्संबंधीनि तेजांस्याचक्रे। अभिष्टौमि। हे विचक्षण प्राज्ञ त्वं येभिर्यैस्तेजोभिः स्वर्वित् सर्ववित् सर्वज्ञोऽभवः। भवसि। जातमात्रस्त्वं भुवनानि भूतजातानि रोदसी द्यावापृथिव्यावापृणः। आपूरयः। हे अग्ने विश्वा विश्वानि सर्वाणि ता तानि भूतजातानि त्मना आत्मना परिभूरसि। परिग्रहीतासि॥

॥ अथैकादशी ॥

वै॒श्वा॒न॒रस्य॑ दं॒सना॑भ्यो बृ॒हदरि॑णा॒देक॑ः स्वप॒स्यया॑ क॒विः।

उ॒भा पि॒तरा॑ म॒हय॑न्नजायता॒ग्निर्द्यावा॑पृथि॒वी भूरि॑रेतसा ॥११॥

वै॒श्वा॒न॒रस्य॑। दं॒सना॑भ्यः। बृ॒हत्। अरि॑णात्। एक॑ः। सु॒ऽअ॒प॒स्यया॑। क॒विः।

उ॒भा। पि॒तरा॑। म॒हय॑न्। अ॒जा॒य॒त॒। अ॒ग्निः। द्यावा॑पृथि॒वी इति॑। भूरि॑ऽरेतसा ॥११॥

वैश्वानरस्याग्नेर्दंसनाभ्यस्तोषकारीभ्यः क्रियाभ्यो बृहन्महद्धनं भवतीति यत् तदवितथं। यतः कारणादेको मुख्यः कविरग्निः स्वपस्यया शोभनयज्ञादिकर्मेच्छया यजमानादिभ्यो धनमरिणात्। ददाति। सोऽयमग्निर्भूरिरेतसा बहुरेतस्कावुभोभौ पितरा पितरौ मातापितरौ द्यावापृथिव्यौ महयन्पूजयन् अजायत॥

॥ इति द्वितीयस्याष्टम एकविंशो वर्गः ॥

समित्समिदित्येकादशर्चं चतुर्थं सूक्तं वैश्वामित्रं त्रैष्टुभं। अत्रानुक्रमणिका। समित्समिदाप्रिय इति। इध्मादिस्वाहाकृत्यंताः पूर्वोक्ताः प्रत्यृचं देवताः। पशौ वैश्वामित्राणामाप्रीसूक्तं। दर्शपूर्णमासयोः पत्नीसंयाजेषु त्वष्टुर्याज्या तन्न इत्येषा। सूचितं च। इह त्वष्टारमग्रियं तन्नस्तुरीयमध पोषयित्नु। आ॰ १. १०.। इति॥ त्वाष्ट्रे पशौ पुरोडाशस्यानुवाक्या। सूचितं च। तन्नस्तुरीयमध पोषयित्नु देवस्त्वष्टा सविता विश्वरूपः। आ॰ ३. ८.। इति॥

॥ तत्र प्रथमा ॥

समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः।
आ देव देवान्यजथाय वक्षि सखा सखीन्त्सुमना यक्ष्यग्ने॥१॥
समित्ऽसमित्। सुऽमनाः। बोधि। अस्मे इति। शुचाऽशुचा। सुऽमतिं। रासि। वस्वः।
आ। देव। देवान्। यजथाय। वक्षि। सखा। सखीन्। सुऽमनाः। यक्षि। अग्ने॥१॥

समित्समित् अत्यर्थं समिद्धस्त्वं सुमना बोधि। बुध्यस्व। शुचा शुचात्यर्थं प्रसर्पकेण ज्योतिषा युक्तस्त्वं वस्वो वसुनो धनस्य तद्विषयां सुमतिं शोभनां बुद्धिमस्मे अस्मभ्यं रासि। देहि। हे देव द्योतमान देवान्यजनीयान्यजथाय यज्ञाय तदर्थमावक्षि। आवहसि। हे अग्ने सखा देवानां सखा त्वं सुमनाः सन् सखीन्देवान्यक्षि। यजस्व॥

॥ अथ द्वितीया ॥

यं देवासस्त्रिरहन्नायजंते दिवेदिवे वरुणो मित्रो अग्निः।
सेमं यज्ञं मधुमंतं कृधी नस्तनूनपाद्घृतयोनिं विधंतं॥२॥
यं। देवासः। त्रिः। अहन्। आऽयजंते। दिवेऽदिवे। वरुणः। मित्रः। अग्निः।
सः। इमं। यज्ञं। मधुऽमंतं। कृधि। नः। तनूऽनपात्। घृतऽयोनिं। विधंतं॥२॥

वरुणो मित्रोऽग्निः एते त्रयो देवा यमग्निं दिवेदिवे प्रतिदिवसं अहन् अहनि त्रिः प्रातर्मध्याह्नसायंतनेषु सवनेषु त्रिवारमायजंते हे तनूनपात् तनूनां शरीराणां न पातयितः स त्वं घृतयोनिं घृतस्योदकस्य कारणं विधंतं विधीयमानं क्रियमाणं नोऽस्मदीयं यज्ञं मधुमंतं। मध्वित्युदकनाम। वृष्ट्यादिफलयुक्तं कृधि। कुरु॥

॥ अथ तृतीया ॥

प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै ।
अच्छा नमोभिर्वृषभं वंदध्यै स देवान्यक्षदिषितो यजीयान् ॥३॥

प्र । दीधितिः । विश्वऽवारा । जिगाति । होतारं । इळः । प्रथमं । यजध्यै ।
अच्छ । नमःऽभिः । वृषभं । वंदध्यै । सः । देवान् । यक्षत् । इषितः । यजीयान् ॥३॥

विश्ववारा विश्वैर्जनैर्वरणीया दीधितिः स्तुतिर्दीप्तिर्वा होतारं देवानामाह्वातारमग्निं प्रजिगाति । जिगातु । प्रकर्षेण गच्छतु । प्रथमं मुख्यमच्छाभिमुख्येन वृषभं संपदां वर्षितारं वंदध्यै वंदितुं योग्यमिति शेषः । अग्निं नमोभिर्नमस्कारैः सहेळ इषो हवीरूपाण्यन्नानि यजध्यै यष्टुं प्रीणयितुं प्रजिगातु । इषितोऽस्माभिः प्रेरितो यजीयान् यष्टृतमः सोऽग्निर्देवान् यक्षत् । यजतु ॥

॥ अथ चतुर्थी ॥

ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि ।
दिवो वा नाभा न्यसादि होता स्तृणीमहि देवव्यचा वि बर्हिः ॥४॥

ऊर्ध्वः । वां । गातुः । अध्वरे । अकारि । ऊर्ध्वा । शोचींषि । प्रऽस्थिता । रजांसि ।
दिवः । वा । नाभा । नि । असादि । होता । स्तृणीमहि । देवऽव्यचाः । वि । बर्हिः ॥४॥

वां युवयोः । अग्निश्च बर्हिश्चोभौ वामित्युच्येते । समिदादिभिः सहितस्यैवाग्नेर्देवतात्वात् । ऊर्ध्व उन्नतो गातुर्यज्ञमार्गोऽध्वरे यज्ञेऽकारि । आश्रयः क्रियते । शोचींष्यर्चिष्मंति रजांसि हवींष्यूर्ध्वोर्ध्व प्रस्थिता । होताग्निर्दिवो दीप्यमानस्य यागगृहस्य नाभा नाभौ मध्यप्रदेशे न्यसादि । निषीदति । देवव्यचा देवैर्व्याप्तं बर्हिश्च । चार्थे वाशब्दः । विस्तृणीमहि । विशेषेण स्तृणीमः ॥

॥ अथ पंचमी ॥

सप्त होत्राणि मनसा वृणाना इन्वंतो विश्वं प्रति यन्नृतेन ।
नृपेशसो विदथेषु प्र जाता अभीइमं यज्ञं वि चरंत पूर्वीः ॥५॥

सप्त । होत्राणि । मनसा । वृणानाः । इन्वंतः । विश्वं । प्रति । यन् । ऋतेन ।
नृऽपेशसः । विदथेषु । प्र । जाताः । अभि । इमं । यज्ञं । वि । चरंत । पूर्वीः ॥५॥

मनसा वृणानाः प्रार्थ्यमाना ऋतेनोदकेन विश्वमिन्वंतः प्रीणयंतो देवाः सप्त होत्राणि होतॄणां वषट्कर्तॄणां कर्माणि प्रतियन्। प्रतिगच्छंति। अतः परं द्वारां स्तुतिः। नृपेशसो नररूपा विदथेषु यागेषु जाता उत्पन्नाः पूर्वीर्बह्व्यो विग्रहवत्यो यज्ञद्वाराभिमानिदेवता इममस्मदीयं यज्ञं प्र विचरंत। प्रविचरंतु ॥

॥ इति द्वितीयस्याष्टमे द्वाविंशो वर्गः ॥

॥ अथ षष्ठी ॥

आ भंदमाने उषसा उपाके उत स्मयेते तन्वा३ विरूपे।
यथा नो मित्रो वरुणो जुजोषदिंद्रो मरुत्वाँ उत वा महोभिः ॥६॥

आ। भंदमाने इति। उषसौ। उपाके इति। उत। स्मयेते इति। तन्वा। विरूपे इति विऽरूपे।
यथा। नः। मित्रः। वरुणः। जुजोषत्। इंद्रः। मरुत्वान्। उत। वा। महःऽभिः ॥६॥

आ भंदमाने स्तूयमाने उपाके परस्परं संगते॥ उषसानक्तापेक्षया द्विवचनं॥ नक्तोषसौ रात्र्यहनी आगच्छतां। उत अपि च विरूपे पृथग्रूपे तन्वा प्रकाशरूपेण शरीरेण स्मयेते। प्रकाशेते। मित्रो वरुण उत वा अपि चेंद्रो मरुत्वांश्च नोऽस्मान्यथा जुजोषत् यथा सेवेत तथा महोभिस्तेजोभिर्युक्ते इमे द्यावापृथिव्यौ कुरुतां ॥

॥ अथ सप्तमी ॥

दैव्या होतारा प्रथमा न्यृंजे सप्त पृक्षासः स्वधया मदंति।
ऋतं शंसंत ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥७॥

दैव्या। होतारा। प्रथमा। नि। ऋंजे। सप्त। पृक्षासः। स्वधया। मदंति।
ऋतं। शंसंतः। ऋतं। इत्। ते। आहुः। अनु। व्रतं। व्रतऽपाः। दीध्यानाः ॥७॥

दैव्या दिव्यौ प्रथमा प्रथमौ मुख्यौ होताराह्वातारावग्नी न्यृंजे। प्रसाधयामि। ऋतमुदकं शंसंत आशंसमानाः सप्त पृक्षासः। पृक्षमन्नं। तद्वंत ऋत्विजस्तमग्निं स्वधया सोमेन हविषा मदंति। मादयंति। व्रतपा व्रतानां कर्मणां रक्षितारो दीध्याना दीप्यमानाः अथवा स्वकर्मभिरग्निं दीपयंत ऋत्विजोऽनु व्रतं व्रतेषु ऋतमित् अग्निमेवमाहुः। अग्निमेव ऋतभूतमाहुरित्यर्थः। एवकारार्थे इच्छब्दः ॥

॥ अथाष्टमी ॥

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदंतु ॥८॥

आ । भारती । भारतीभिः । सऽजोषाः । इळा । देवैः । मनुष्येभिः । अग्निः ।
सरस्वती । सारस्वतेभिः । अर्वाक् । तिस्रः । देवीः । बर्हिः । आ । इदं । सदंतु ॥८॥

भारतीभिर्भरतस्य सूर्यस्य संबंधिनीभिः सजोषाः संगता भारती वाक् आगच्छतु । देवैर्मनुष्येभिर्मनुष्यैश्च संगत्येळा च भूमिश्चागच्छतु अग्निश्च । सारस्वतेभिः सरस्वतीसंबंधिभिर्मध्यमस्थानैः सह सरस्वती माध्यमिका वाक् आगच्छतु । तिस्रो देव्यो वागिळाभारत्य आगच्छंतु । अर्वागाभिमुख्यमेतद्बर्हिः सदंतु । आसीदंतु ॥

॥ अथ नवमी ॥

तन्नस्तुरीयमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥९॥

तत् । नः । तुरीयं । अध । पोषयित्नु । देव । त्वष्टः । वि । रराणः । स्यस्वेति स्यस्व ।
यतः । वीरः । कर्मण्यः । सुऽदक्षः । युक्तऽग्रावा । जायते । देवऽकामः ॥९॥

हे देव त्वष्टः सृष्टिकर्तः वि रराणो रममाणस्त्वमध अनंतरं नोऽस्मान् तुरीयं तारकं पोषयित्नु पोषकं तत्प्रसिद्धं रेतो विष्यस्व । मोचय । यतो विमोचनाद्वीरः सत्ववान् कर्मण्यः कर्मसु कुशलः सुदक्षः सुबलो युक्तग्रावाभिषवार्थग्रावयुक्तः । सोमसुदित्यर्थः । देवकामो देवान् कामयमानः पुत्रो जायते । जायेत ॥

॥ अथ दशमी ॥

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥१०॥

वनस्पते । अव । सृज । उप । देवान् । अग्निः । हविः । शमिता । सूदयाति ।
सः । इत् । ऊं इति । होता । सत्यऽतरः । यजाति । यथा । देवानां । जनिमानि । वेद ॥१०॥

हे वनस्पते देवानुपावसृज। समीपे कुरु। शमिता पशोः संस्कर्ताग्निर्वनस्पतिश्च हविः सूदयाति। देवान्प्रति प्रेरयतु। सत्यतरोऽत्यर्थं सत्यः सत्यस्वरूपः स इत् स एव होता यजाति। यजतु। यथा यतः कारणात्स एवाग्निर्देवानां जनिमानि जन्मानि वेद वेत्ति अतः स एव यजत्वित्यर्थः॥

॥ अथैकादशी ॥

आ याह्यग्ने समिधानो अर्वाङिंद्रेण देवैः सरथं तुरेभिः।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयंतां ॥११॥

आ। याहि। अग्ने। संऽइधानः। अर्वाङ्। इंद्रेण। देवैः। सऽरथं। तुरेभिः।
बर्हिः। नः। आस्तां। अदितिः। सुऽपुत्रा। स्वाहा। देवाः। अमृताः। मादयंतां ॥११॥

हे अग्ने अर्वाक् अस्मदभिमुखं समिधानः समिध्यमानो ज्वालारूपेण दीप्यमानस्त्वमायाहि। देवतारूपेणागच्छ। कथमिति उच्यते। नोऽस्माकं यज्ञमिंद्रेण देवैश्च तुरेभिस्त्वरमाणैर्देवैः सरथं समानरथं यथा तथायाहि। किंच सुपुत्रादितिरपि नो बर्हिरास्तां। अध्यास्तां। स्वाहाकारेण युक्ता अमृता नित्या देवा मादयंतां। तृप्यंतु॥

॥ इति द्वितीयस्याष्टमे त्रयोविंशो वर्गः ॥

प्रत्यग्निरुषस इत्येकादशर्चं पंचमं सूक्तं वैश्वामित्रं त्रैष्टुभमाग्नेयं। अत्रानुक्रमणिका। प्रत्यग्निरिति॥ प्रातरनुवाकाश्विनशस्त्रयोरिदमादिसूक्तत्रयस्य विनियोगः। सूत्रितं च। प्रत्यग्निरुषस इति त्रीणि। आ॰ ४. १३.। इति॥ इळामग्न इत्यस्योक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

प्रत्यग्निरुषसश्चेकितानोऽबोधि विप्रः पदवीः कवीनां।
पृथुपाजा देवयद्भिः समिद्धोऽप द्वारा तमसो वह्निरावः ॥१॥

प्रति। अग्निः। उषसः। चेकितानः। अबोधि। विप्रः। पदऽवीः। कवीनां।
पृथुऽपाजाः। देवयत्ऽभिः। संऽइद्धः। अप। द्वारा। तमसः। वह्निः। आवरित्यावः ॥१॥

उषसश्चेकितानो जानन् विप्रो मेधावी कवीनां क्रांतदृशां पदवीर्मार्गान् गच्छन् योऽग्निः प्रत्यबोधि प्रतिबुध्यते पृथुपाजाः पृथुतेजा देवयद्भिर्देवकामैः

समिद्धः सम्यक् दीप्तः स वह्निस्तमसोऽज्ञानस्य द्वारागमनद्वाराण्यपावः। अपावृणोति ॥

॥ अथ द्वितीया ॥

प्रेद्वग्निर्वावृधे स्तोमेभिर्गीर्भिः स्तोतॄणां नमस्य उक्थैः।
पूर्वीर्ऋतस्य संदृशश्चकानः सं दूतो अद्यौदुषसो विरोके ॥२॥

प्र। इत्। ऊं इति। अग्निः। ववृधे। स्तोमेभिः। गीःऽभिः। स्तोतॄणां। नमस्यः। उक्थैः।
पूर्वीः। ऋतस्य। संऽदृशः। चकानः। सं। दूतः। अद्यौत्। उषसः। विऽरोके ॥२॥

नमस्यः पूज्यो योऽग्निः स्तोतॄणां स्तोत्रैर्गीर्भिर्वाग्भिरुक्थैः शस्त्रैश्च प्रववृधे वृद्धिं प्राप्नोति दूतो देवानां दूतः सः पूर्वीर्बह्वीर्ऋतस्यादित्यस्य संदृशो दीप्तीश्चकानः कामयमानः सन् उषसो विरोके विरोचने प्रातःकाले समद्यौत्। द्योतते। इत् उ पूरणौ ॥

॥ अथ तृतीया ॥

अधाय्यग्निर्मानुषीषु विक्ष्व१पां गर्भो मित्र ऋतेन साधन्।
आ हर्यतो यजतः सान्वस्थादभूदु विप्रो हव्यो मतीनां ॥३॥

अधायि। अग्निः। मानुषीषु। विक्षु। अपां। गर्भः। मित्रः। ऋतेन। साधन्।
आ। हर्यतः। यजतः। सानु। अस्थात्। अभूत्। ऊं इति। विप्रः। हव्यः। मतीनां ॥३॥

मित्रो यजमानानां मित्रभूत ऋतेन सत्येन साधन् कामान् साधयन् अपां गर्भोऽग्निर्मानुषीषु मनोः संबंधिनीषु विक्षु प्रजास्वधायि। देवैराहितः। किंच हर्यतः स्पृहणीयो यजतो यष्टव्यः स सानूच्छ्रितं धिष्ण्यमुत्तरवेद्याख्यमास्थात्। अध्यतिष्ठत्। विप्रः प्राज्ञोऽग्निर्मतीनां मातॄणां स्तोतॄणां हव्यः स्तुत्योऽभूत् ॥

॥ अथ चतुर्थी ॥

मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः।
मित्रो अध्वर्युरिषिरो दमूना मित्रः सिंधूनामुत पर्वतानां ॥४॥

मित्रः। अग्निः। भवति। यत्। संऽइद्धः। मित्रः। होता। वरुणः। जातऽवेदाः।
मित्रः। अध्वर्युः। इषिरः। दमूनाः। मित्रः। सिंधूनां। उत। पर्वतानां ॥४॥

इयमृक् अग्निं सर्वात्मकत्वेन स्तौति। यद्यदा समिद्धोऽग्निः तदा मित्रो भवति।

सूर्यो भवति। मित्र एव सन् होता भवति। वरुणो भवति जातवेदा जातप्रज्ञः। स मित्रोऽध्वर्युर्भवति दमूना दानमना दांतमना वा। स एवेषिरः प्रेरको वायुर्भवति। उत अपि च सिंधूनां नदीनां पर्वतानां च मित्रः सहायो भवति॥

॥ अथ पंचमी ॥

पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य।
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः॥५॥
पाति। प्रियं। रिपः। अग्रं। पदं। वेः। पाति। यह्वः। चरणं। सूर्यस्य।
पाति। नाभा। सप्तऽशीर्षाणं। अग्निः। पाति। देवानां। उपऽमादं। ऋष्वः॥५॥

ऋष्वो दर्शनीयोऽग्निर्वेर्गंत्र्याः सर्वव्याप्तायाः रिपो भूम्याः प्रियमग्रं प्रथमं पदं स्थानं पाति। रक्षति। यह्वो महान् सूर्यस्य चरणं। चरत्यत्रेति चरणमंतरिक्षं। पाति। नाभा नाभावंतरिक्षस्य मध्ये सप्तशीर्षाणं मरुद्गणं पाति। देवानामुपमादमुपमादकं यज्ञं पाति। रक्षति॥

॥ इति द्वितीयस्याष्टमे चतुर्विंशो वर्गः॥

॥ अथ षष्ठी ॥

ऋभुश्चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान्।
ससस्य चर्म घृतवत्पदं वेस्तदिदग्नी रक्षत्यप्रयुच्छन्॥६॥
ऋभुः। चक्रे। ईड्यं। चारु। नाम। विश्वानि। देवः। वयुनानि। विद्वान्।
ससस्य। चर्म। घृतऽवत्। पदं। वेः। तत्। इत्। अग्निः। रक्षति। अप्रऽयुच्छन्॥६॥

ऋभुर्महान् विश्वानि सर्वाणि वयुनानि ज्ञातव्यानि पदार्थानि विद्वान् जानन् देवोऽग्निरीड्यं स्तुत्यं चारु मनोज्ञं नाम जलं चक्रे। करोति। नामेत्युदकनामसु पाठात्। वेर्व्याप्तस्य ससस्य स्वपतः शांतज्वालस्याप्यग्नेश्चर्म रूपं घृतवद्दीप्तिमद्भवति। सोऽग्निस्तज्जलमप्रयुच्छन् अप्रमाद्यन् रक्षति। पालयति॥

॥ अथ सप्तमी ॥

आ योनिमग्निर्घृतवंतमस्थात्पृथुप्रगाणमुशंतमुशानः।
दीद्यानः शुचिर्ऋष्वः पावकः पुनःपुनर्मातरा नव्यसी कः॥७॥

आ। योनिं। अग्निः। घृतऽवंतं। अस्थात्। पृथुऽप्रगानं। उशंतं। उशानः। दीद्यानः। शुचिः। ऋष्वः। पावकः। पुनःऽपुनः। मातरा। नव्यसी इति। करिति कः ॥ ७ ॥

उशानः कामयमानोऽग्निर्घृतवंतं दीप्तिमंतं पृथुप्रगाणं पृथुगीतिमुशंतं कामयमानं योनिं स्थानमायतनं आ अस्थात्। आतिष्ठति। दीद्यानो द्योतमानः शुचिर्दर्शनीयः शुद्धो वा ऋष्वो महान् पावकोऽन्येषां शोधयिताग्निर्मातरा मातरौ द्यावापृथिव्यौ पुनःपुनर्नव्यसी नवतरे कः। करोति ॥

॥ अथाष्टमी ॥

सद्यो जात ओषधीभिर्ववक्षे यदी वर्धंति प्रस्वो घृतेन।
आप इव प्रवता शुंभमाना उरुष्यदग्निः पित्रोरुपस्थे ॥ ८ ॥

सद्यः। जातः। ओषधीभिः। ववक्षे। यदि। वर्धंति। प्रऽस्वः। घृतेन। आपःऽइव। प्रऽवता। शुंभमानाः। उरुष्यत्। अग्निः। पित्रोः। उपऽस्थे ॥ ८ ॥

सद्यो जातोऽग्निर्यदि यदौषधीभिर्ववक्षे उह्यते तदा प्रवता प्रवणेन मार्गेण गच्छंत्य आप इव शुंभमानाः शोभमानास्ता ओषध्यः प्रस्वः फलानि प्रसुवाना घृतेनोदकेन वर्धंति। वर्धयंति। पित्रोर्द्यावापृथिव्योरुपस्थे मध्यप्रदेशे वर्धमानोऽग्निरुरुष्यत्। अस्मान्रक्षतु ॥

॥ अथ नवमी ॥

उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्मन्दिवो अधि नाभा पृथिव्याः।
मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद्यजथाय देवान् ॥ ९ ॥

उत्। ऊं इति। स्तुतः। संऽइधा। यह्वः। अद्यौत्। वर्ष्मन्। दिवः। अधि। नाभा। पृथिव्याः। मित्रः। अग्निः। ईड्यः। मातरिश्वा। आ। दूतः। वक्षत्। यजथाय। देवान् ॥ ९ ॥

उ इति पादपूरणः। स्तुतोऽस्माभिः स्तुतः समिधा समिंधनेन यह्वो महान् अग्निः पृथिव्या उत्तरवेद्या नाभा नाभौ मध्यप्रदेशे स्थितः सन् दिवोऽतरिक्षस्य वर्ष्मन् वर्ष्मणि रूपे उदद्यौत्। द्योतते। मित्रः सर्वेषां मित्रभूत ईड्यः स्तुत्यो मातरिश्वा। मातर्यंतरिक्षे श्वसिति प्राणिति सूर्यरूपेण चेष्टत इति मातरिश्वा।

अथवा मातर्यरण्यां श्वसिति निवसतीति मातरिश्वा । तथाह यास्कः । मातर्यंतरिक्षे श्वसिति मातर्याश्वनितीति वा । नि॰ ७. २६.। दूतो देवानां दूतः सन् यजथाय यज्ञाय देवानावक्षत् । आवहतु ॥

॥ अथ दशमी ॥

उदस्तंभीत्समिधा नाकमृष्वो३ग्निर्भवन्नुत्तमो रोचनानां ।
यदी भृगुभ्यः परि मातरिश्वा गुहा संतं हव्यवाहं समीधे ॥१०॥
उत् । अस्तंभीत् । सम्ऽइधा । नाकं । ऋष्वः । अग्निः । भवन् । उत्ऽतमः । रोचनानां ।
यदि । भृगुऽभ्यः । परि । मातरिश्वा । गुहा । संतं । हव्यऽवाहं । सम्ऽईधे ॥१०॥

ऋष्वो महानग्निः समिधा तेजसा नाकं स्वर्गमुदस्तंभीत् । उदस्तभ्नात् । रोचनानां शोभनानां तेजसां मध्य उत्तमो भवन् उत्कृष्टतमो भवन् मातरिश्वा वायुर्भृगुभ्य आदित्यस्य रश्मिभ्यो गुहा गुहायां संतं हव्यवाहं हव्यानां वोढारमग्निं यदि यदा समीधे समेधत तदा नाकमस्तभ्नादिति संबंधः ॥

॥ अथैकादशी ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥११॥
इळां । अग्ने । पुरुऽदंसं । सनिं । गोः । शश्वत्ऽतमं । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥११॥

पूर्वं व्याख्याता ॥

॥ इति द्वितीयस्याष्टमे पंचविंशो वर्गः ॥

प्र कारव इत्येकादशर्चं षष्ठं सूक्तं वैश्वामित्रमाग्नेयं प्र कारव इत्यनुक्रांतत्वात् ॥ प्रातरनुवाकाश्विनशस्त्रयोः सूक्तविनियोगः पूर्वसूक्त एव प्रत्यग्निरुषसस्तीर्णीत्यनेनोक्तः ॥ आद्याग्नेये पशौ हविषो याज्या । सूचितं च । प्र कारवो मनना वच्यमाना एका चेत्सरस्वती नदीनां । आ॰ ३. ७.। इति ॥ ऐभिरग्न इति पात्नीवतग्रहस्य याज्या । सूचितं च । आग्नीध्रः पात्नीवतस्य यजत्यैभिरग्ने सरथं याह्यर्वाङिति । आ॰ ६. १९.। इति ॥

॥ तत्र प्रथमा ॥

प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयंतः ।
दक्षिणावाड्वाजिनी प्राच्येति हविर्भरंत्यग्नये घृताची ॥१॥

प्र । कारवः । मनना । वच्यमानाः । देवद्रीचीं । नयत । देवऽयंतः ।
दक्षिणाऽवाट् । वाजिनी । प्राची । एति । हविः । भरंती । अग्नये । घृताची ॥१॥

हे कारवः कर्तारो देवयंतो देवकामा यूयं मनना मननेन मंत्रेण वच्यमानाः प्रेर्यमाणाः संतो देवद्रीचीं देवानंचंतीं स्रुचं प्रणयत । प्रकर्षेण नयत । प्रापयत । दक्षिणावाट् आहवनीयस्य दक्षिणत उह्यमाना वाजिन्यन्नवती प्राची प्रागग्राग्नयेऽग्न्यर्थं हविर्भरंती हविर्धारयंती घृताची घृतेनाक्ता स्रुक् एति । गच्छति ॥

॥ अथ द्वितीया ॥

आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो ।
दिवश्चिदग्ने महिना पृथिव्या वच्यंतां ते वह्नयः सप्तजिह्वाः ॥२॥

आ । रोदसी इति । अपृणाः । जायमानः । उत । प्र । रिक्थाः । अध । नु । प्रयज्यो इति प्रऽयज्यो ।
दिवः । चित् । अग्ने । महिना । पृथिव्याः । वच्यंतां । ते । वह्नयः । सप्तऽजिह्वाः ॥२॥

हे अग्ने जायमानस्त्वं रोदसी द्यावापृथिव्यौ आ अपृणाः । आपूरय । किंच हे प्रयज्यो यष्टव्य दिवश्चित् दिवश्चांतरिक्षात्पृथिव्याश्च महिना महिम्ना प्ररिक्थाः । अतिरिक्तश्चासि । अनेन वह्नेरतिशय उक्तः । एवंविधस्य ते तव वह्नयोऽग्नयोंऽशभूता वह्नय आहवनीयादयो वच्यंतां । किंविधास्ते । सप्तजिह्वाः । सप्तजिह्वात्मकाः ॥

॥ अथ तृतीया ॥

द्यौश्च त्वा पृथिवी यज्ञियासो नि होतारं सादयंते दमाय ।
यदी विशो मानुषीर्देवयंतीः प्रयस्वतीरीळते शुक्रमर्चिः ॥३॥

द्यौः । च । त्वा । पृथिवी । यज्ञियासः । नि । होतारं । सादयंते । दमाय ।
यदि । विशः । मानुषीः । देवऽयंतीः । प्रयस्वतीः । ईळते । शुक्रं । अर्चिः ॥३॥

द्यौश्चांतरिक्षं पृथिवी च यज्ञियासो यज्ञार्हा देवाश्च होतारं त्वा त्वां दमाय। दमो यज्ञः। तस्मा अर्थं निषादयंते। उपशमयंति। यदि यदा मानुषीर्मनोः संबंधिन्यो देवयंतीर्देवकामाः प्रयस्वतीर्हविष्मत्यो विशः प्रजा होतारः शुक्रं दीप्तमर्चिरीळते। स्तुवंति॥

॥ अथ चतुर्थी ॥

महान्त्सधस्थे ध्रुव आ निषत्तोऽंतर्द्यावा माहिने हर्यमाणः।
आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ॥४॥

महान्। सधऽस्थे। ध्रुवः। आ। निऽसत्तः। अंतः। द्यावा। माहिने इति। हर्यमाणः। आस्क्रे इति। सपत्नी इति सऽपत्नी। अजरे इति। अमृक्ते इति। सबर्दुघे इति सबःऽदुघे। उरुऽगायस्य। धेनू इति ॥४॥

महान् अधिको हर्यमाणो यजमानादिभिः काम्यमानः। यद्वा यजमानाय धनं कामयमानोऽग्निर्द्यावांतर्द्युभूम्योर्मध्ये माहिने महिम्ना युक्ते सधस्थे स्वकीये स्थाने ध्रुवोऽचलः सन् निषत्तो निषण्णो भवति। आस्क्रे आक्रमणशीले सपत्नी समान एकः सूर्यः पतिर्ययोस्ते सपत्न्यौ अजरे जरारहिते अमृक्ते अन्येनाहिंसिते सबर्दुघे। सबरित्यमृतमुदकं। तस्य दोग्ध्र्यौ द्यावापृथिव्यावुरुगायस्य पृथुगमनस्याधिकस्तुतेर्वाग्नेर्धेनू प्रीणयित्र्यौ भवतः॥

॥ अथ पंचमी ॥

व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततंथ।
त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनां ॥५॥

व्रता। ते। अग्ने। महतः। महानि। तव। क्रत्वा। रोदसी इति। आ। ततंथ। त्वं। दूतः। अभवः। जायमानः। त्वं। नेता। वृषभ। चर्षणीनां ॥५॥

हे अग्ने महतः सर्वोत्कृष्टस्य ते तव व्रता व्रतानि त्वत्संबंधीनि कर्माणि महानि महांति भवंति। तव क्रत्वा क्रतुना प्रकाशेन रोदसी द्यावापृथिव्यावाततंथ। विस्तृतवानसि। त्वं दूतोऽभवः। भव। हे वृषभ वर्षणशील त्वं जायमानः सन् चर्षणीनां यजमानानां नेतासि। फलप्रापकोऽसि॥

॥ इति द्वितीयस्याष्टमे षड्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रोहिता धुरि धिष्व ।
अथा वह देवान्देव विश्वान्स्वध्वरा कृणुहि जातवेदः ॥ ६ ॥
ऋतस्य । वा । केशिना । योग्याभिः । घृतऽस्नुवा । रोहिता । धुरि । धिष्व ।
अथ । आ । वह । देवान् । देव । विश्वान् । सुऽअध्वरा । कृणुहि । जातऽवेदः ॥ ६ ॥

हे देव केशिना प्रशस्तकेशवंतौ योग्याभिर्योजनसाधनभूताभी रज्जुभिर्युक्तौ घृतस्नुवा घृतं क्षरंतौ रोहितावश्वौ ऋतस्य यज्ञस्य ॥ वाशब्दश्चार्थे ॥ धुरि च धिष्व । धेहि । योजयेत्यर्थः । अथानंतरं विश्वान् सर्वान्देवान् रथे समारोप्य आ वह । हे जातवेदः तान् स्वधरा स्वध्वरान् शोभनाध्वरान् कृणुहि । कुरु ॥

॥ अथ सप्तमी ॥

दिवश्चिदा ते रुचयंत रोका उषो विभातीरनु भासि पूर्वीः ।
अपो यदग्न उशधग्वनेषु होतुर्मंद्रस्य पनयंत देवाः ॥ ७ ॥
दिवः । चित् । आ । ते । रुचयंत । रोकाः । उषः । विऽभातीः । अनु । भासि । पूर्वीः ।
अपः । यत् । अग्ने । उशधक् । वनेषु । होतुः । मंद्रस्य । पनयंत । देवाः ॥ ७ ॥

हे अग्ने यत् यदा वनेष्वरण्येष्वप उशधक् कामयमानो दहंश्च वर्तसे तदा ते रोकाश्च त्वदीया दीप्तयो दिवश्चित् सूर्यादप्यारुचयंत । आरोचंते । विभातीर्विशेषेण भातीः प्रकाशमानाः पूर्वीः पुराणीरुष उषसोऽनु भासि । मंद्रस्य स्तुत्यस्य होतुस्तव रोकान् देवाः स्तोतारः पनयंत । स्तुवंति ॥

॥ अथाष्टमी ॥

उरौ वा ये अंतरिक्षे मदंति दिवो वा ये रोचने संति देवाः ।
ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः ॥ ८ ॥
उरौ । वा । ये । अंतरिक्षे । मदंति । दिवः । वा । ये । रोचने । संति । देवाः ।
ऊमाः । वा । ये । सुऽहवासः । यजत्राः । आऽयेमिरे । रथ्यः । अग्ने । अश्वाः ॥ ८ ॥

उरौ विस्तीर्णेऽतरिक्षे ये देवा मदंति । हृष्यंति । दिवः सूर्यस्य रोचने प्रकाशन आलोके ये देवाः संति । ऊमाः । ऊमसंज्ञकाः पितरः संति । यजत्रा यष्टव्या

ये देवाः सुहवासः शोभनाह्वाना आयेमिरे । आयच्छंति । रथ्यो रथिनस्तव येऽश्वाः संति हे अग्ने तैः सर्वैः सार्धमायाहीत्युत्तरयर्चा संबंधः ॥

॥ अथ नवमी ॥

ऐभि॑रग्ने स॒रथं॑ याह्य॒र्वाङ् नाना॒रथं॑ वा॒ वि॒भवो॑ ह्यश्वाः॑ ।

पत्नी॑वतस्त्रिं॒शतं॒ त्रीँश्च॑ दे॒वान॑नुष्व॒धमा व॑ह मा॒दय॑स्व ॥९॥

आ । ए॒भिः॒ । अ॒ग्ने॒ । स॒ऽरथं॑ । या॒हि॒ । अ॒र्वाङ् । ना॒ना॒ऽर॒थं । वा॒ । वि॒ऽभवः॑ । हि । अश्वाः॑ ।

पत्नी॑ऽवतः । त्रिं॒शतं॑ । त्रीन् । च॒ । दे॒वान् । अ॒नु॒ऽस्व॒धं । आ । व॒ह॒ । मा॒दय॑स्व ॥९॥

हे अग्ने एभिः पूर्वोक्तैर्देवगणैः सार्धं सरथं समानरथं नानारथं वा त्वद्रथे समारोप्यार्वाङ् अस्मदभिमुखमायाहि । यतः कारणात्तेऽश्वा विभवः प्रभवः समर्थाः ॥ हिः प्रसिद्धौ ॥ पत्नीवतः पत्नीभिः सहितान् त्रिंशतं त्रींश्च त्रयस्त्रिंशतं देवांश्चानुष्वधं बलार्थमन्नार्थं वा आवह । मादयस्व सोमेनेति विशेषः ॥

॥ अथ दशमी ॥

स होता॒ यस्य॒ रोद॑सी चिदु॒र्वी य॒ज्ञंय॑ज्ञम॒भि वृ॒धे गृ॑णी॒तः ।

प्राची॑ अ॒ध्वरे॑व तस्थतुः सु॒मेके॑ ऋ॒ताव॑री ऋ॒तजा॑तस्य स॒त्ये ॥१०॥

सः । होता॑ । यस्य॑ । रोद॑सी॒ इति॑ । चि॒त् । उ॒र्वी इति॑ । य॒ज्ञंऽय॑ज्ञं । अ॒भि । वृ॒धे । गृ॒णी॒तः ।

प्राची॒ इति॑ । अ॒ध्व॒राऽइ॑व । त॒स्थ॒तुः॒ । सु॒मेके॒ इति॑ सु॒ऽमेके॑ । ऋ॒तव॑री॒ इत्यृ॒तऽव॑री ।

ऋ॒तऽजा॑तस्य । स॒त्ये इति॑ ॥१०॥

स एव होता भवति उर्वी विस्तीर्णे रोदसी चित् द्यावापृथिव्यावपि यस्याग्नेर्यज्ञंयज्ञं सर्वं यज्ञं वृधे समृद्धयेऽभिगृणीतः । प्रशंसतः । ऋतजातस्य जातसत्यस्य होतुः सुमेके सुरूपे ऋतावरी उदकवत्यौ सत्ये सत्यस्वरूपे प्राची अनुकूले तस्थतुः । तिष्ठतः । कथमिव । अध्वराविव । यज्ञाविव ॥

॥ अथैकादशी ॥

इळा॑मग्ने पुरु॒दंसं॑ स॒निं गोः श॑श्वत्त॒मं हव॑मानाय साध ।

स्यान्नः॑ सू॒नुस्तन॑यो वि॒जावा॑ग्ने॒ सा ते॑ सुम॒तिर्भू॑त्व॒स्मे ॥११॥

इळां। अग्ने। पुरुऽदंसं। सनिं। गोः। शश्वत्ऽतमं। हवमानाय। साध। स्यात्। नः। सूनुः। तनयः। विजाऽवा। अग्ने। सा। ते। सुऽमतिः। भूतु। अस्मे इति ॥११॥

इळामग्न इतीयं पूर्वं व्याख्याता ॥

॥ इति द्वितीयस्याष्टमे सप्तविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टकेऽष्टमोऽध्यायः समाप्तः ॥

ओं

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

सोमस्येत्यनुवाके द्वादश सूक्तानि। तत्र प्र य आरुरित्येकादशर्चं सप्तमं सूक्तं। मंडलद्रष्टा विश्वामित्र ऋषिः। अनुक्तत्वात् त्रिष्टुप्। मंडलादिपरिभाषयाग्निर्देवता ॥ प्रातरनुवाकाश्विनशस्त्रयोः सूक्तत्रयस्य प्रत्यग्निरुषसस्त्रीणीति विनियोग उक्तः। तत्रेदं तृतीयं सूक्तं ॥

॥ तस्मिन्नियमृक् प्रथमा ॥

प्र य आरुः शितिपृष्ठस्य धासेरा मातरा विविशुः सप्त वाणीः ।
परिक्षिता पितरा सं चरेते प्र सर्स्राते दीर्घमायुः प्रयक्षे ॥१॥

प्र। ये। आरुः। शितिऽपृष्ठस्य। धासेः। आ। मातरा। विविशुः। सप्त। वाणीः।
परिऽक्षिता। पितरा। सं। चरेते इति। प्र। सर्स्राते इति। दीर्घं। आयुः। प्रऽयक्षे ॥१॥

शितिपृष्ठस्य नीलपृष्ठस्य धासेः सर्वस्य धारयितुरग्नेर्ये रश्मयः प्रारुः प्रकर्षेणाग्नच्छंति ते रश्मयो मातरा मातरौ द्यावापृथिव्यावाविविशुः। सर्वतः प्रविष्टाः। सप्त सर्पणस्वभावा वाणीर्वननीया नदीश्चाविविशुः। परिक्षिता परितो वर्तमाने पितरा पितरौ द्यावापृथिव्यौ तेनाग्निना संचरेते। सम्यक् व्यवहरतः। तथा प्रयक्षे प्रकर्षेण यष्टुं दीर्घमायुरग्नेश्चिरं जीवनं प्रभूतमन्नं वा प्रसर्स्राते। सारयतः। संपादयत इत्यर्थः। यद्वा द्यावापृथिव्यौ प्रयक्षे प्रकर्षेण सततं यष्टुं

यजमानस्य दीर्घमायुः संपादयतः ॥ प्र । निपातत्वेनाद्युदात्तः । तस्य छंदसि व्यवहिताश्चेति आरुरित्यनेन संबंधः । आरुः । ऋ गतौ । लिट्युसि रूपं । यद्वृत्तयोगादनिघातः । प्रत्ययस्वरः । शितिपृष्ठस्य । पृष्ठशब्दस्थक्प्रत्ययांतोऽंतोदात्तः । शितेर्नित्याबह्वच् बहुव्रीहावभसदित्युत्तरपदप्रकृतिस्वरत्वं । धासेः । डुधाञ् धारणपोषणयोः । धेट् पाने वा । तस्मात्कर्तर्यौणादिकः सिः । प्रत्ययस्वरः । मातरा । नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृमातृपितृजामातृदुहितृ । उ॰ २. ९१. । इति तृजंतत्वेन निपातनादंतोदात्तः । ऋतो ङीति गुणः । सुपां सुलुगिति सुपो डादेशः । विविशुः । विश प्रवेशने । लिटि असंयोगाल्लिट् किदिति किद्वद्भावाद्गुणाभावः । निघातः । सप्न । सृप्लृ गतौ । सप्यशूभ्यां तुट् च । उ॰ १. १५६. । इति सपेर्विधीयमानः कनिन् तुडागमश्च बाहुलकादेतस्यापि भवति । ऋकारस्याकारश्च । नित्त्वेऽपि व्यत्ययेनांतोदात्तत्वं । परिक्षिता । क्षि निवासगत्योः । क्विप् चेति क्विप् । पित्त्वात्तुगागमः । प्रादिसमासः । कृदुत्तरपदप्रकृतिस्वरत्वं । सुपां सुलुगिति सुपो डादेशः । चरेते । चर गतिभक्षणयोः । संपूर्वाच्चरतेः समस्तृतीयायुक्तात् । पा॰ १. ३. ५४. । इत्यात्मनेपदं । सस्राते । सृ गतौ । अयमंतर्भावितण्यर्थः । रेफश्छांदसः । ईदूदेदिति प्रगृह्यसंज्ञा । निघातः । आयुः । इण् गतौ । उसिन्नित्यनुवृत्तौ एतेर्णिच्चेत्युसिन् । णित्त्वाद्वृद्धिः । नित्त्वादाद्युदात्तः । प्रयक्षे । यज देवपूजासंगतिकरणदानेष्वित्यस्मात्तुमर्थे सेन्प्रत्ययः । प्रादिसमासः । कृदुत्तरपदप्रकृतिस्वरत्वं । कृन्मेजंत इत्यव्ययसंज्ञायां अव्ययादाप्सुप इति सुपो लुक् ॥

॥ अथ द्वितीया ॥

दिवक्षसो धेनवो वृष्णो अश्वा देवीरा तस्थौ मधुमद्वहंतीः ।
ऋतस्य त्वा सदसि क्षेमयंतं पर्येका चरति वर्तनिं गौः ॥२॥

दिवक्षसः । धेनवः । वृष्णः । अश्वाः । देवीः । आ । तस्थौ । मधुऽमत् । वहंतीः ।
ऋतस्य । त्वा । सदसि । क्षेमऽयंतं । परि । एका । चरति । वर्तनिं । गौः ॥२॥

वृष्णः कामानां वर्षितुरग्नेरश्वा वाहनरूपा रोहिता दिवक्षसो दिवं व्याप्य वर्तमाना धेनवोऽग्नेः प्रीणयित्र्यो भवंति । सोऽयमग्निर्मधुमत् माधुर्योपेतमुदकं वहंतीर्देवीर्द्योतनशीला नदीरातस्थौ । आतिष्ठति । प्राप्नोतीत्यर्थः । गोशब्दो माध्यमिकवाग्वाची माध्यमिकां वाचमिति नैरुक्ता इत्यभिधानात् । एका गौः

काचिदुक्तविधा वाक् ऋतस्योदकस्य सदसि स्थानेऽंतरिक्षे क्षेमयंतं क्षेममावासमिच्छंतं वर्तनिं ज्वालाः प्रवर्तयंतं त्वा हे अग्ने त्वां परिचरति। सेवते॥ दिवक्षसः। अक्षू व्याप्तौ। दिवं व्याप्नुवंतीति दिवक्षसः। वक्ष रोषे। रोषार्थोऽप्ययं धातुरत्र व्याप्तौ वर्तते। दिवं वक्षंति व्याप्नुवंति। असुन्नित्यसुन्प्रत्ययः। लोपो व्योर्वलीति वलोपः। कृदुत्तरपदप्रकृतिस्वरत्वं। धेनवः। नुरित्यनुवृत्तौ धेट इच्चेति नुप्रत्ययः। इकारस्य गुणः। प्रत्ययस्वरः। वृष्णः। वृष सेचने। कनिन्युवृषितक्षिराजीत्यादिना कनिन्। कित्त्वाद्गुणाभावः। नित्त्वादाद्युदात्तः। अश्वाः। अशू व्याप्तौ। अशिप्रुषिलटिकणीत्यादिना क्वन्। नित्त्वादाद्युदात्तः। तस्थौ। ष्ठा गतिनिवृत्तौ। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। आत औ णल इत्यौकारः। निघातः। मधुमत्। निदित्यनुवृत्तौ फलिपाटिनमिमनिजनामित्यादिना मनेरुप्रत्ययः। तत्संनियोगेन नकारस्य धकारः। नित्त्वादाद्युदात्तः। त्वा। युष्मच्छब्दस्य द्वितीयैकवचनांतस्य त्वामाविति त्वा आदेशः। अनुदात्तश्च। क्षेमयंतं। क्षि निवासगत्योः। अर्तिस्तुसुहुसृधृक्षीत्यादिना मन्। क्षेममावासमात्मन इच्छंतं। सुप आत्मनः क्यजिति क्यच्। क्यचि चेतीत्वं अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घत्वं च न छंदस्यपुत्रस्येति प्रतिषिध्यते। क्यचश्चित्त्वादंतोदात्तः। तदंताच्छतृप्रत्ययः। शप्। शपः पित्त्वादनुदात्तत्वं। शतुश्च सार्वधातुकस्वरेण तयोः क्यचा सहैकादेशे कृते एकादेश उदात्तेनोदात्त इत्येकादेश उदात्तः। अम्। सुप्त्वादनुदात्तः। उदात्तादनुदात्तस्येत्यमः स्वरितत्वं। एका। इण् गतौ। इण्भीकापेत्यादिना कन्। तदंतादाप्। नित्स्वरः। वर्तनिं। वृतु वर्तने। अंतर्भावितण्यर्थः। वृतेश्च। उ° २. १०२.। इत्यनिः। गुणः। व्यत्ययेनांतोदात्तत्वं। गौः। गम्लृ गतौ। गमेर्डोः। उ° २. ६६.। इति डोप्रत्ययः। डित्त्वाट्टिलोपः। गोतो णिदिति सुपो णित्त्वाद्वृद्धिः। प्रत्ययस्वरः॥

॥ अथ तृतीया ॥

आ सीमरोहत्सुयमा भवंतीः पतिश्चिकित्वान्रयिविद्रयीणां।
प्र नीलपृष्ठो अतसस्य धासेस्ता अवासयत्पुरुधप्रतीकः ॥३॥

आ। सीं। अरोहत्। सुऽयमाः। भवंतीः। पतिः। चिकित्वान्। रयिऽवित्। रयीणां।
प्र। नीलऽपृष्ठः। अतसस्य। धासेः। ताः। अवासयत्। पुरुधऽप्रतीकः ॥३॥

रयीणां रयिवित् धनानां मध्ये विशिष्टधनस्य लंभयिता चिकित्वान् ज्ञानवान्

पतिरश्वानां पतिरग्निः सीं सर्वतः सुयमाः सुखेन नियंतुं शक्या भवंतीर्या वाडवा आरोहत् आरोहयति स्म नीलपृष्ठः पुरुधप्रतीको बहुधाविक्षिप्तांगः सोऽग्निरतसस्य सततगमनस्य धासेः पोषणार्थं ता अश्वाः प्रवासयत्। प्रकर्षेण वासयति स्म। निवासेन श्रमेऽपनीते सततगमनं पोषयितुं शक्यमित्यर्थः॥-सीं। चादयोऽनुदात्ता इत्यनुदात्तः। अरोहत्। रुह प्रादुर्भावे। लङि रूपं। निघातः। सुयमाः। यम उपरमे। अस्माच्छक्यार्थ ईषद्दुःसुषुिति खल्। कृदुत्तरपदप्रकृतिस्वरत्वं। पतिः। पा रक्षणे। पातेर्डतिरिति डित्वाट्टिलोपः। प्रत्ययस्वरः। चिकित्वान्। चित ज्ञाने। क्वसौ रूपं। रयिवित्। विद्लृ लाभे। क्विप्। रयीणां। नामन्यतरस्यामिति विभक्तेरुदात्तत्वं। नीलपृष्ठः। नीलशब्दो वृषादित्वादाद्युदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अतसस्य। अत सातत्यगमन इत्यस्मादत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्यः। उ॰ ३.११६.। इत्यसच्। चित्स्वरः। अवासयत्। वस निवासे। हेतुमतीति णिच् लुङ्लङ्लृङ्क्ष्वडित्यडागमः। तिङ्ङतिङ इति निघातः। पुरुधप्रतीकः। पुरुशब्द इह संख्यावाची। संख्याया विधार्थे धेति धाप्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। ह्रस्वश्छांदसः॥

॥ अथ चतुर्थी ॥

महिं त्वाष्ट्रमूर्जयंतीरजुर्यं स्तभूयमानं वहतो वहंति।
व्यंगेभिर्दिद्युतानः सधस्थ एकामिव रोदसी आ विवेश ॥४॥
महिं। त्वाष्ट्रं। ऊर्जयंतीः। अजुर्यं। स्तभुऽयमानं। वहतः। वहंति।
वि। अंगेभिः। दिद्युतानः। सधऽस्थे। एकांऽइव। रोदसी इति। आ। विवेश ॥४॥

ऊर्जयंतीरबलं बलिनं कुर्वंत्यो वहतो वहनपरा नद्यो महि महांतं त्वाष्ट्रं त्वष्टुः सुतमजुर्यं जरयितुमनर्हं स्तभूयमानं लोकानां स्तंभनं धारणमिच्छंतमग्निं वहंति। धारयंति। सधस्थेऽपां समीपेऽंगेभिरवयवैर्दिद्युतानो दीप्यमानः सन् अग्नी रोदसी द्यावापृथिव्यौ व्याविवेश। प्रविष्टवान्। रोदस्योर्दृष्टांतः। एकामिव। यथा पुमानेकां स्त्रियं प्रविशति। तद्वत्॥ त्वाष्ट्रं। त्वष्टुरपत्यमित्यर्थे तस्यापत्यमित्यण्। प्रत्ययस्वरः। स्तभूयमानं। स्तभु स्तंभनं। तदिच्छंतं। सुप आत्मनः क्यच्। अकृत्सार्वधातुकयोरिति दीर्घः। तदंताद्व्यत्ययेन शानच्। अकारांतत्वादाने मुक्। शानचो लसार्वधातुकस्वरेणानुदात्तत्वे कृते क्यजंताद्धातुस्वरः शिष्यते। अंगेभिः।

बहुलं छंदसीति भिस ऐसादेशाभावः । बहुवचने झल्येदित्येत्वं । दिद्युतानः । द्युत दीप्तौ । छंदसि लिट् । तस्य कानजादेशः । द्विर्वचनं । हलादिशेषे कृते द्यु इत्यस्याभ्यासस्य द्युतिस्वाप्योः संप्रसारणं । पा॰ ७. ४. ६७. । इति संप्रसारणं । संप्रसारणाच्चेति पूर्वरूपत्वं । चित्त्वादंतोदात्तः । एकामिव । इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति वचनात्पूर्वपदप्रकृतिस्वरः । विवेश । विश प्रवेशन इत्यस्माल्लिटि रूपं । निघातः ॥

## ॥ अथ पंचमी ॥

जानंति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणंति ।
दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः ॥ ५ ॥

जानंति । वृष्णः । अरुषस्य । शेवं । उत । ब्रध्नस्य । शासने । रणंति ।
दिवःऽरुचः । सुऽरुचः । रोचमानाः । इळा । येषां । गण्या । माहिना । गीः ॥ ५ ॥

वृष्णः कामानां वर्षितुररुषस्य । रुषा हिंसकाः । तद्रहितस्य । शत्रुराहित्येन रोचमानस्येत्यर्थः । तथाविधस्याग्नेः शेवमाश्रयविषयं सुखं जना जानंति । उत अपि च जानंतस्ते ब्रध्नस्य महतोऽग्नेः शासन आज्ञायां सर्वे जना रणंति । रमंते । तथा च मंत्रः । म॰ १. ६०. २. । अस्य शासुरुभयासः सचंते हविष्मंत उशिजो ये च मर्ता इति । अपि च । येषां मनुष्याणामग्निविषया माहिना महतीळा गीः स्तुतिरूपा वाक् गण्या गणनीया पूज्या ते दिवोरुचो द्युलोकस्य रोचकाः सुरुचः शोभनदीप्तयो रोचमाना देदीप्यमाना भवंति ॥ जानंति । ज्ञा अवबोधने । क्र्यादित्वात्तस्य ज्ञाजनोर्जेति जादेशः । प्रत्ययस्वरः । अरुषस्य । रुष रिष हिंसार्थाः । रोषंतीति रुषा हिंसकाः । इगुपधज्ञेति कः । न संति रुषा यस्यासावरुषः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । शेवं । शीङ् स्वप्ने । इण्शीङ्भ्यां वन्निति वन् । नित्स्वरः । शासने । शासु अनुशिष्टौ । अस्माद्भावे ल्युट् । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । रणंति । निघातः । दिवोरुचः । रुच दीप्तौ । अस्मात्क्विप् । तत्पुरुषे कृति बहुलमिति षष्ठ्या अलुक् । कृदुत्तरपदप्रकृतिस्वरत्वं । सुरुचः । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । इळा । ईळ स्तुतौ । ह्रस्वश्छांदसः । यथा वाक्शब्दष्टाबंतस्तद्वत् । पित्त्वादनुदात्तत्वे धातुस्वरः । गण्या । गण संख्याने । अर्थाण्यंतादचो यत् । यतोऽनाव इत्याद्युदात्तत्वं । माहिना । महेरिनण् चेति

इनण्। णित्वादुपधावृद्धिः। व्यत्ययेनाद्युदात्तः। गीः। गॄ शब्दे। अस्मात्क्विप्। ऋत इद्धातोरितीत्वं। र्वोरुपधाया इति दीर्घः। प्रातिपदिकस्वरः॥

॥ इति तृतीयस्य प्रथमे प्रथमो वर्गः ॥

॥ तस्मिन्सूक्ते षष्ठी ॥

उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयंत शूषं।
उक्षा ह यत्र परि धानमक्तोरनु स्वं धाम जरितुर्ववक्ष ॥६॥
उतो इति। पितृऽभ्यां। प्रऽविदा। अनु। घोषं। महः। महत्ऽभ्यां। अनयंत। शूषं।
उक्षा। ह। यत्र। परि। धानं। अक्तोः। अनु। स्वं। धाम। जरितुः। ववक्ष ॥६॥

उतो अपि च महो महद्भ्यां महतो महद्भ्यां पितृभ्यां द्यावापृथिवीभ्यां प्रविदा प्रवेदनेनानु घोषमनु घुष्यमाणं शूषं सुखं। शूषं शुनमिति सुखनामसु पाठात्। तत्सुखं यजमाना अग्निमनयंत। अग्निं प्रापितवंतः। सोऽग्निर्यत्र यजमानेषूक्षा वृष्ट्युत्पादनेनोदकस्य सेक्ताक्तोः। अक्तुशब्दो रात्रिमाचष्टे। शर्वरी अक्तुरिति तन्नामसु पाठात् अज्यते सिच्यते नीहारेण जगदस्यामिति व्युत्पत्तेश्च। तस्या रात्रेः परि धानं परितो धारकं स्वमात्मीयं धाम तेजो जरितुः स्तोतुः स्तुतिश्रवणार्थमनु ववक्ष ह। समीपे वहति खलु। संनिहितं करोतीत्यर्थः॥ उतो। ऊदिति प्रगृह्यसंज्ञा। एवमादित्वादंतोदात्तः। घोषं। घुषि शब्दे। अस्मात्कर्मणि घञ्। लघूपधगुणः। ञित्स्वरः। महः। अकारतकारयोर्लोपश्छांदसः। बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं। अनयंत। णीञ् प्रापण इत्यस्य लङि रूपं। निघातः। उक्षा। उक्ष सेचने। श्वन्नुक्षन्नित्यादिना कनिन्प्रत्ययांतत्वेनोक्षन्शब्दो निपातितः। व्यत्ययेनांतोदात्तः। ह। चादित्वादनुदात्तः। यत्र। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। अक्तोः। अंजू व्यक्तिगतिम्रक्षणेष्वित्यस्मात् व्याज्यर्तिभ्यः क्तुरिति क्तुः। कित्वादनिदितामिति नलोपः। प्रत्ययस्वरः। ववक्ष। वह प्रापणे। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। सकारश्छांदसः। तिपो णलादेशः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं॥

॥ अथ सप्तमी ॥

अध्वर्युभिः पंचभिः सप्त विप्राः प्रियं रक्षंते निहितं पदं वेः।
प्रांचो मदंत्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः ॥७॥

अध्वर्युऽभिः। पंचऽभिः। सप्त। विप्राः। प्रियं। रक्षंते। निऽहितं। पदं। वेरिति वेः।
प्रांचः। मदंति। उक्षणः। अजुर्याः। देवाः। देवानां। अनु। हि। व्रता। गुरिति गुः ॥७॥

उद्गातृवर्गव्यतिरिक्ता द्वादशर्त्विजो भवंति। तत्र सप्त वषट्कर्तारः। पंचान्येऽध्वरं नयंति। तैः पंचभिरध्वर्युभिः सह सप्त विप्रा मेधाविनो होत्रका वेर्गमनस्वभावस्याग्नेः प्रियं निहितमाहवनीयाख्यं पदं रक्षंते। पालयंति। प्रांचः सोमपानार्थं प्राङ्मुखा गच्छंतोऽजुर्या जरयितुमशक्या उक्षणः सोमरसस्य सेक्तारो देवाः स्तोतारो मदंति। हृष्यंति। किंच ते देवा देवानां व्रता व्रतानि यज्ञाननुगुः। अन्वगच्छन्। हि प्रसिद्धौ। अग्नेः प्रसादाद्देवा यज्ञान् लब्धवंत इत्यर्थः ॥ रक्षंते। रक्ष पालने। व्यत्ययेनात्मनेपदं। निघातः। निहितं। डुधाञ् धारणपोषणयोरित्यस्य कर्मणि निष्ठायां दधातेर्हिरिति हिरादेशः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। वेः। वी कांतिगत्यादिषु। अस्माद्विच्। सार्वधातुकार्द्धधातुकयोः। पा० ७. ३. ८४. इति गुणः। ङसिङसोश्चेति पूर्वरूपत्वं। प्रांचः। अनिगंतोऽंचताविति पूर्वपदप्रकृतिस्वरत्वं। मदंति। मदी हर्षे। निघातः। गुः। इण् गतावित्यस्माल्लुङि रूपं। इणो गा लुङीति गादेशः। आत इति झेर्जुसादेशः। बहुलं छंदसीत्यडभावः। हिशब्दयोगान्न निहन्यते ॥

॥ अथाष्टमी ॥

दैव्या होतारा प्रथमा न्यृंजे सप्त पृक्षासः स्वधया मदंति।
ऋतं शंसंत ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥८॥

दैव्या। होतारा। प्रथमा। नि। ऋंजे। सप्त। पृक्षासः। स्वधया। मदंति।
ऋतं। शंसंतः। ऋतं। इत्। ते। आहुः। अनु। व्रतं। व्रतऽपाः। दीध्यानाः ॥८॥

दैव्या दैव्यौ देवतारूपौ होतारा होतारौ होमनिष्पादकौ प्रथमा प्रथमौ मुख्याविमं चामुं चाग्नी न्यृंजे। ऋंजतिः प्रसाधनकर्मेति यास्कः। मंत्रद्रष्टा विश्वामित्रोऽहं प्रसाधयामि। सप्त पृक्षासः सप्त होत्रकाः स्वधया सोमेन मदंति। हृष्यंति। ऋतं स्तोत्रं शंसंतो व्रतपा व्रतस्य यज्ञकर्मणो रक्षितारो दीध्याना दीप्यमानास्ते होत्रका अनु व्रतं यज्ञे कर्मणि ऋतमित् सत्यमेवाग्निमाहुः। वदंति ॥ ऋंजे। ऋजि भृजि वर्जने। निपूर्वोऽयं धातुः प्रसाधने वर्तते। निघातः। स्वधया। स्वं लोकं यजमानस्य दधाति विदधातीति स्वधा सोमः। आतोऽनुपसर्गे क

इति कः । कृदुत्तरपदप्रकृतिस्वरत्वं । आहुः । ब्रूञ् व्यक्तायां वाचीत्यस्य लटि ब्रुवः पंचानामादित आहो ब्रुव इति झेरुसादेशो ब्रुवश्च आहादेशः । निघातः । दीध्यानाः । दीधीङ् दीप्तिदेवनयोरित्यस्माच्छानच् । तस्य चित्त्वादंतोदात्तत्वे प्राप्तेऽभ्यस्तानामादिरित्याद्युदात्तत्वं ॥

॥ अथ नवमी ॥

वृषायंते महे अत्याय पूर्वीर्वृष्णे चित्राय रश्मयः सुयामाः ।
देव होतर्मंद्रतरश्चिकित्वान्महो देवान्रोदसी एह वक्षि ॥९॥

वृषऽयंते । महे । अत्याय । पूर्वीः । वृष्णे । चित्राय । रश्मयः । सुऽयामाः ।
देव । होतः । मंद्रऽतरः । चिकित्वान् । महः । देवान् । रोदसी इति । आ । इह । वक्षि ॥९॥

देव देदीप्यमान होतर्देवानामाह्वातः हे अग्ने महे महतेऽत्याय सर्वानत्यतिक्रम्य वर्तमानाय चित्राय नानाविधवर्णाय । यद्वा चित्राय देवैश्चायनीयाय पूज्याय । वृष्णे कामानां वर्षित्रे तुभ्यं त्वदर्थं पूर्वीः प्रभूताः सुयामा अतिशयेन विस्तृता रश्मयः सर्वतो व्याप्ता ज्वाला वृषयंते । वृषेवाचरंति । सेचका इव भवंति । होतारो ज्वालाभिः समिद्धमग्निं दृष्ट्वा सोमाज्यपयःप्रभृतीनि हवींषि तत्र प्रक्षिपंतीति ज्वालानां वृषत्वं । यद्वा षष्ठ्यर्थे चतुर्थी । तथा च महतोऽत्यस्य चित्रस्य वृष्णोऽग्नेर्बहवो रश्मयो वृषेवाचरंति । वृष्ट्युत्पादनद्वारा पर्जन्यवदाचरंतीत्यर्थः । अपि च । मंद्रतरो यजमानस्य मादयितृतमश्चिकित्वाञ्ज्ञानोपेतः स त्वं महो महतः पूज्यान् यष्टव्यान् देवान् रोदसी द्यावापृथिव्यौ चेह वैदिकेऽस्मिन्कर्मण्यावक्षि । आवह ॥ वृषायंते । उपमानादित्यनुवृत्तौ कर्तुः क्यङ् सलोपश्चेति क्यङ् । अकृत्सार्वधातुकयोरिति दीर्घः । पादादित्वान्न निघातः । धातुस्वरः । महे । अकारतकारयोर्लोपश्छांदसः । बृहन्महतोरिति विभक्तेरुदात्तत्वं । पूर्वीः । पॄ पालनपूरणयोरित्यस्मात् कुरित्यनुवृत्तौ पॄभिदिव्यधिगृधीत्यादिना कुप्रत्ययः । कित्त्वाद्गुणप्रतिषेधे उदोष्ठ्यपूर्वस्येत्युत्वं । उरण् रपरः । तस्माद्वोतो गुणवचनादिति ङीष् । यणादेशे कृते हलि चेति दीर्घः । वा छंदसीति सवर्णदीर्घः । रश्मयः । अशू व्याप्तौ । अश्नुवते सर्वं जगदिति निदित्यनुवृत्तौ अशे रश च । उ॰ ४.४७. । इति मिप्रत्ययो रशादेशश्च । प्रत्ययस्वरः । सुयामाः । यमनं यामः । भावे घञ् । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । देव । अपादादाविति पर्युदासात्षाष्ठिकमाद्युदात्तत्वं । होतः । ह्वयतेस्ताच्छीलिकस्तृन् । बहुलं छंदसीति संप्रसारणं । अपादा-

द्यामंत्रितत्वान्निघातः । मंद्रतरः । मदि स्तुत्यादिषु । स्फायितंचिवंचीत्यादिना रक् । इदित्वान्नुम् । तरपः पित्त्वादनुदात्तत्वे रक्प्रत्ययस्वरः । वक्षि । वह प्रापणे इत्यस्य बहुलं छंदसीति शपो लुक् । ढत्वकत्वषत्वानि । निघातः ॥

॥ अथ दशमी ॥

पृक्षप्रयजो द्रविणः सुवाचः सुकेतव उषसो रेवदूषुः ।
उतो चिदग्ने महिना पृथिव्याः कृतं चिदेनः सं महे दशस्य ॥ १० ॥
पृक्षऽप्रयजः । द्रविणः । सुऽवाचः । सुऽकेतवः । उषसः । रेवत् । ऊषुः ।
उतो इति । चित् । अग्ने । महिना । पृथिव्याः । कृतं । चित् । एनः । सं । महे । दशस्य ॥ १० ॥

द्रविणः । द्रवति सततं गच्छतीति द्रविणःशब्देनाग्निरभिधीयते । द्रविणः सततगमनस्वभाव हे अग्ने पृक्षप्रयजः पृक्षाणि हविर्लक्षणान्यन्नानि प्रकर्षेण यष्टुं प्रक्रम्यते यासूषःसु ताः पृक्षप्रयजः । सुवाचः प्रातरनुवाकादिशोभना वाचो यासां ताः । सुकेतवो वयसां मनुष्याणां च शब्दैः सुप्रज्ञानाः । एवंविधा उषसो रेवत् अस्माकं धनयुक्तं यथा भवति तथोषुः । व्युच्छंति । उतो चित् अपि च हे अग्ने पृथिव्या विस्तीर्णाया ज्वालाया महिना महत्त्वेन कृतं संपादितं चित् यत्किंचिदेनः प्राण्युपघातादिलक्षणं पापं महे महते यजमानाय मह्यं मदर्थं संदशस्य । संक्षपय ॥ पृक्षप्रयजः । अन्येभ्योऽपि दृश्यंत इति कर्मणि विच् दृशि- ग्रहणादधिकृतो भवतीत्युक्तं । बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरत्वं । द्रविणः । द्रु ग- तावित्यस्मात् द्रुदक्षिभ्यामिनन्निनीनप्रत्ययः । गुणावादेशौ । संबुद्धौ सोर्लोपा- भावश्छांदसः । आमंत्रितत्वान्निघातः । सुवाचः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । वत् । रयिर्धनमस्मिन्विद्यत इति मतुप् । ह्रस्वनुड्भ्यामिति मतुबुदात्तः । छंदसीर ति वत्वं । रयेर्मतौ बहुलं छंदसीति संप्रसारणं । परपूर्वत्वे गुणः । ऊषुः । उष हे । दाहार्थोऽप्ययं धातुरत्र प्रकाशने वर्तते । छंदसि लुङ्ङिति वर्तमाने लिट् । उसि रूपं । निघातः । पृथिव्याः । प्रथ प्रख्याने इत्यस्मात्प्रथेः षिवन् प्रसारणं चेति षिवन्प्रत्ययः । तत्संनियोगेन धातोः संप्रसारणं । षिद्गौरादिभ्य- ति ङीष् । प्रत्ययस्वरेणांतोदात्तः । उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं । शस्य । निघातः ॥

॥ अथैकादशी ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ११ ॥

इळां । अग्ने । पुरुऽदंसं । सनिं । गोः । शश्वत्ऽतमं । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ११ ॥

हे अग्ने पुरुदंसं । अपोऽप्नो दंसो वेष इति कर्मनामसु पठितत्वाद्दंसःशब्दः कर्मवाची । पुरूणि बहूनि दंसांसि कर्माणि यस्याः सा । तां बहुकर्माणं गोः सनिं गवादिपशून्संपादयित्रीमिळामेतन्नामिकां गोरूपां देवतां शश्वत्तमं निरंतरं हवमानाय यजमानाय मह्यं साध । साधय । किंच नोऽस्माकं सूनुः पुत्रस्तनयः पौत्रः स्याद्भवत्विति ते तव या सुमतिः शोभना बुद्धिः सा विजावाबंध्या सत्यस्मे अस्माकं भूतु । भवतु ॥ शश्वत्तमं । उच्छादिषुपाठादंतोदात्तत्वं । साध । राध साध संसिद्धौ । अंतर्भावितण्यर्थोऽयं । लोटि व्यत्ययेन शप् । सेर्ह्यपिच्चेति हिरादेशः । तस्यातो हेरिति लुक् । निघातः । विजावा । जनी प्रादुर्भावे । अस्मादन्येभ्योऽपि दृश्यंत इति वनिप् । विड्वनोरनुनासिकस्यादित्यात्वं । कृदुत्तरपदप्रकृतिस्वरत्वं । लिंगव्यत्ययः । भूतु । भू सत्तायां । बहुलं छंदसीति शपो लुक् । भूसुवोस्तिङीति गुणप्रतिषेधः ॥

॥ इति तृतीयस्य प्रथमे द्वितीयो वर्गः ॥

अंजंतीत्यष्टमं वैश्वामित्रमेकादशर्चं सूक्तं । अत्रानुक्रमणिका । अंजंति यूपस्तुतिः षष्ठ्याद्याभिर्बहवोऽंत्या त्रिश्विन्यष्टमी वैश्वदेवी वा तृतीयासप्तम्यावनुष्टुभाविति । उच्छ्रयस्व वनस्पते ये वृक्णास इत्येते तृतीयासप्तम्यावनुष्टुभौ शिष्टास्त्रिष्टुभः । कृत्स्नस्य सूक्तस्य यूपो देवता । वनस्पते शतवल्श इत्यस्याश्छिन्नयूपस्य मूलभूतः स्थाणुर्देवता । आदित्या रुद्रा वसव इत्यष्टमी वैश्वदेवी यौपी वा । अत्र षष्ठ्यादीनां बहवो यूपा देवता बहूनां स्तूयमानत्वात् । शिष्टा एकयूपदेवत्याः ॥ यूपांजनेऽंजंति त्वामित्येषा । प्रेषितो यूपायाज्यमानायांजंति त्वामध्वरे देवयंतः । आ॰ ३. १. । इति ॥ यूपोच्छ्रयणे समिद्धस्येति द्वे ऋचौ । उच्छ्रयस्व वनस्पते समिद्धस्य श्रयमाणः पुरस्तात् । आ॰ ३. १. । इति सूचितत्वात् ॥ यूपपरिव्ययणे युवा सुवासाः परिवीत आगादिति परिदध्यात् । आ॰ ३. १. । इति सूचितत्वात् ॥ यूपोच्छ्र-

यणे जातो जायते सुदिनत्वे अह्नामित्यर्द्धर्चं आरभेदिति सूचितं। यूपैकादशिन्यामन्यत्रापि बहुयूपयुक्ते कर्मणि यान्वो नर इत्याभिः षड्भिः पंचभिर्वा संस्तुयात्। संस्तुयादनभिहिंकृत्य यान्वो नरो देवयंतो नि मिम्युरिति षड्भिः पंचभिर्वा। आ० ३.१.। इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

अं॒जंति॑ त्वाम॑ध्व॒रे दे॑व॒यंतो॒ वन॑स्पते॒ मधु॑ना॒ दैव्ये॑न।
यदू॒र्ध्वस्तिष्ठा॒ द्रवि॑णे॒ह ध॑त्ता॒द्यद्वा॒ क्षयो॑ मा॒तुर॒स्या उ॒पस्थे॑ ॥१॥
अं॒जंति॑। त्वां। अ॒ध्व॒रे। दे॒व॒ऽयंतः॑। वन॑स्पते। मधु॑ना। दैव्ये॑न।
यत्। ऊ॒र्ध्वः। तिष्ठाः॑। द्रवि॑णा। इ॒ह। ध॒त्ता॒त्। यत्। वा॒। क्षयः॑। मा॒तुः॑। अ॒स्याः॑। उ॒पऽस्थे॑ ॥१॥

वनस्पते खदिरपलाशादिलक्षण हे यूप अध्वरे यज्ञे देवयंतो देवान् कामयमाना अध्वर्य्वादयो दैव्येन मधुना देवसंबंधिना मधुना घृतेन। एतद्वै दैव्यं मधु यदाज्यमित्याम्नानात्। ऐ० ब्रा० २.२.। तेन घृतेन त्वामंजंति। त्वयि घृतं सिंचंतीत्यर्थः। यत् यदि त्वमूर्द्ध्वस्तिष्ठाः। उन्नतस्तिष्ठसि। यद्वा यदि वा मातुरस्या मातृभूतायाः पृथिव्या उपस्थ उत्संगे ते क्षयो निवासः। यद्यूर्द्ध्वस्तिष्ठसि यदि वा भूमौ शयानो वर्तसे उभयथापि त्वमिहास्मासु द्रविणा धनानि धत्तात्। धेहि ॥ ब्राह्मणेनेयमृग्व्याख्याता। अंजंति त्वामध्वरे देवयंत इत्यन्वाहाध्वरे ह्येनं देवयंतोऽजंति वनस्पते मधुना दैव्येनेत्येतद्वै मधु दैव्यं यदाज्यं यदूर्द्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थ इति यदि च तिष्ठासि यदि च शयासै द्रविणमेवास्मासु धत्तादित्येव तदाह। ऐ० ब्रा० २.२.। इति ॥ तथा च निरुक्तमपि। अंजंति त्वामध्वरे देवान्कामयमाना वनस्पते मधुना दैव्येन घृतेन च यदूर्द्ध्वः स्थास्यसि द्रविणानि च नो दास्यसि यद्वा ते कृतः क्षयो मातुरस्या उपस्थ उपस्थाने। नि० ८.१८.। इति ॥ अंजंति। अंजू व्यक्तिकांतिगतिम्रक्षणेषु। रुधादित्वात् श्नम्। तस्य लटि श्नसोरल्लोपः। ... ऋङ्क्त्वादनिदितामित्युपधालोपः। श्नसोरल्लोप इत्यल्लोपः। प्रत्ययस्वरेण मध्योदात्तः। त्वां। अमि युष्मच्छब्दस्य त्वमावेकवचन इति त्वादेशः। द्वितीयायां चेत्याकारः। एकादेश उदात्तेनोदात्त इत्येकादेशस्योदात्तत्वं। अध्वरे। न विद्यते ध्वरो हिंसा यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। देवयंतः। देवानात्मन इच्छंतः। सुप आत्मन इति क्यच्। क्यचि चेतीत्वं अकृत्सार्वधातुकयोरिति दीर्घत्वं च। न

छंदस्यपुत्रस्येत्यनेन प्रतिषिध्यते। तदंताच्छतृप्रत्ययः। शपः पित्त्वाल्लसार्वधातुकस्वरेण चानुदात्तत्वे कृते तयोरेकादेश उदात्तेनोदात्त इति कचच एव स्वरः। वनस्पते। आमंत्रितस्य चेत्याद्युदात्तत्वं। मधुना। फलिपाटिनमिमनीत्यादिना उप्रत्ययः। निदित्यनुवृत्तेराद्युदात्तत्वं। दैव्येन। देवाद्यञञाविति यञ्। ञित्त्वाद्वृद्धिः। यस्येति लोपः। ञित्त्वादाद्युदात्तः। तिष्ठाः। ष्ठा गतिनिवृत्तौ। लेटि सिप्। इतश्च लोप इतीकारलोपः। शपः शित्त्वात् पाघ्रेत्यादिना तिष्ठादेशः। लेटोऽडाटावित्यडागमः। यच्छब्दयोगान्निघाताभावः। तिष्ठादेशस्याद्युदात्तत्वेन निपातितत्वादाद्युदात्तः। द्रविणा। द्रुदक्षिभ्यामिनन्नितीनन्प्रत्ययः। सुपां सुलुगिति सुपो डादेशः। नित्त्वादाद्युदात्तः। इह। इदम्शब्दात्सप्तम्यर्थ इदमो ह इति हः। इदम इशितीशादेशः। शित्त्वात्सर्वादेशः। प्रत्ययस्वरः। धत्तात्। डुधाञ् धारणपोषणयोरित्यस्य प्रार्थने लोट्। सिप्। तस्य सेर्ह्यपिच्चेति हिरादेशः। तुह्योः। पा॰ ७. १. ३५.। इति तातङादेशः। श्नाभ्यस्तयोरात इत्याकारलोपः। दधस्तथोश्च। पा॰ ८. २. ३८.। इति भष्भावः। जश्त्वचर्त्वे। निघातः। वा। चादित्वादनुदात्तः। क्षयः। क्षियंति निवसंत्यस्मिन्नित्यधिकरणे घः। क्षयो निवास इत्याद्युदात्तत्वं। मातुः। नप्तृनेष्ट्र इत्यादिना तृजंतत्वेन निपातनादंतोदात्तः। ऋत उदिति ङसः पूर्वपरयोरुकारः। अस्याः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। उपस्थे। ष्ठा गतिनिवृत्तौ। आतश्चोपसर्ग इति कः। तत्पुरुषे तुल्यार्थेति मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं॥

॥ अथ द्वितीया ॥

समिद्धस्य श्रयमाणः पुरस्ताद्ब्रह्म वन्वानो अजरं सुवीरं।

आरे अस्मदमतिं बाधमान उच्छ्रयस्व महते सौभगाय॥२॥

संऽइद्धस्य। श्रयमाणः। पुरस्तात्। ब्रह्म। वन्वानः। अजरं। सुऽवीरं।

आरे। अस्मत्। अमतिं। बाधमानः। उत्। श्रयस्व। महते। सौभगाय॥२॥

हे यूप समिद्धस्य दीप्यमानस्याहवनीयाख्यस्याग्नेः पुरस्तात् प्राच्यां दिशि श्रयमाणस्तत्र वर्तमानो ब्रह्मान्नं। ब्रह्म वर्च इत्यन्ननामसु पाठात्। अजरं जरारहितं समृद्धं सुवीरं शोभनापत्ययुक्तं ब्रह्मान्नं वन्वानः प्रयच्छन् अस्मदमतिमस्माकं शत्रुभूतामशनायां। अशनाया वै पाप्मामतिरिति श्रवणात्। तादृशं शत्रुमारे दूरे बाधमानोऽपनुदंस्त्वं महते सौभगाय धनादिसंपत्त्यर्थमुच्छ्रयस्व। उच्छ्रितो

भव। उक्तार्थेयं ब्राह्मणे। समिद्धस्य श्रयमाणः पुरस्तादिति समिद्धस्य ह्येष एतत्पुरस्ताच्छ्रयते ब्रह्म वन्वानो अजरं सुवीरमित्याशिषमेवाशास्त आरे अस्मदमतिं बाधमान इत्यशनाया वै पाप्मामतिस्तामेव तदारानुदते यज्ञाच्च यजमानाच्चोच्छ्रयस्व महते सौभगायेत्याशिषमेवाशास्ते। ऐ॰ ब्रा॰ २.२.। इति॥ समिद्धस्य। ञिइंधी दीप्तौ। कर्मणि निष्ठायां श्वीदितो निष्ठायामितीट्प्रतिषेधः। सम्यगिद्ध इति गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं। श्रयमाणः। श्रिञ् सेवायामित्यस्य लटः शानच्। तस्य लसार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः शिष्यते। पुरस्तात्। पूर्वशब्दस्य दिक्शब्देभ्यः सप्तमीपंचमीत्यादिना। पा॰ ५.३.२७.। अस्तातिप्रत्ययः। अस्ताति च। पा॰ ५.३.४०.। इति पूर्वस्य पुरादेशः। प्रत्ययस्वरः। ब्रह्म। नब्विषयस्यानिसंतस्येत्याद्युदात्तः। वन्वानः। वनु याचने। अत्रायं धातुर्दानार्थे वर्तते। लटः शानच्प्रत्ययः। चित्त्वादंतोदात्तः। अजरं। नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं। सुवीरं। वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। आरे। एवमादित्वादंतोदात्तः। अस्मत्। युष्मसिभ्यां मदिगिति मदिक्प्रत्ययः। सुपां सुलुगिति सुपो लुक्। मदिक्प्रत्ययस्वरः। अमतिं। तत्पुरुष इति पूर्वपदप्रकृतिस्वरत्वं। उत्। निपातत्वेनाद्युदात्तः। श्रयस्व। श्रिञ् सेवायामित्यस्य लोण्मध्यमैकवचने थास्। थासः स इत्यादेशः। सवाभ्यां वामावित्येकारस्य वकारः। निघातः। महते। वर्तमाने पृषद्बृहन्महदिति निपातनादंतोदात्तः। बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं। सौभगाय। प्राणभृज्जातिवयोवचन इत्यञ्। हृद्भगसिंध्वंते पूर्वपदस्य चेति वृद्धिः। सर्वविधीनां छंदसि विकल्पितत्वादित्युत्तरपदस्य वृद्धिर्न भवति। ञित्स्वरः॥

॥ अथ तृतीया ॥

उच्छ्र॑यस्व वनस्पते॒ वर्ष्म॑न्पृथि॒व्या अधि॑।
सुमि॑ती मी॒यमा॑नो॒ वर्चो॑ धा य॒ज्ञवा॑हसे ॥३॥
उत्। श्र॒य॒स्व॒। व॒न॒स्प॒ते॒। वर्ष्म॑न्। पृ॒थि॒व्याः। अधि॑।
सुऽमि॑ती। मी॒यमा॑नः। वर्चः॑। धाः॒। य॒ज्ञऽवा॑हसे ॥३॥

हे वनस्पते यूप पृथिव्या अधि पृथिव्यां वर्ष्मन् उत्कृष्टे देवयजनाख्ये देश उच्छ्रयस्व। उच्छ्रितो भव। सुमिती शोभमानया बुद्ध्या अथवा शोभनेन परि-

माणेन मीयमान इत्यनया परिच्छिद्यमानस्त्वं यज्ञवाहसे यज्ञनिर्वाहकाय यजमानाय वर्चो धाः। अन्नं धेहि। अयमेवार्थो ब्राह्मणेन दर्शितः। उच्छ्रयस्व वनस्पत इत्युच्छ्रीयमाणायाभिरूपा यद्यज्ञेऽभिरूपं तत्समृद्धं। वर्ष्मन्पृथिव्या अधीत्येतद्वै वर्ष्म पृथिव्यै यत्र यूपमुन्मिन्वंति सुमिती मीयमानो वर्चो धा यज्ञवाहस इत्याशिषमाशास्ते। ऐ० ब्रा० २. २.॥ वनस्पते। अपादादित्वादाष्टमिकमनुदात्तत्वं। पृथिव्याः। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं। सुमिती। माङ् मान इत्यस्य क्तिनि द्यतिस्यतिमास्थेतीकारादेशः। शोभनया मित्या। तादौ च निति कृत्यताविति गतेः प्रकृतिस्वरत्वं। सुपां सुलुगिति सवर्णदीर्घः। मीयमानः। माङ् मान इत्यस्य कर्मणि यक्। घुमास्थेतीत्वं। प्रत्ययस्वरः। धाः। धाञो लोडर्थे छंदसि लुङ्लङ्लिटि लुङ्। इतश्चेति सिप इकारलोपः। गातिस्थेति सिचो लोपः। बहुलं छंदसीत्यडभावः। निघातः। यज्ञवाहसे। यज्ञं वहति प्राप्नोति। वह प्रापण इत्यस्य वहिहाधाञ्भ्यश्छंदसीत्यसुन्। णिदित्यनुवृत्तेरुपधावृद्धिः। गतिकारकयोरिति पूर्वपदप्रकृतिस्वरत्वं चेति पूर्वपदप्रकृतिस्वरः॥

॥ अथ चतुर्थी ॥

युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः।
तं धीरासः कवय उन्नयंति स्वाध्यो३ मनसा देवयंतः॥४॥
युवा। सुऽवासाः। परिऽवीतः। आ। अगात्। सः। ऊं इति। श्रेयान्। भवति। जायमानः।
तं। धीरासः। कवयः। उत्। नयंति। सुऽआध्यः। मनसा। देवऽयंतः॥४॥

युवा दृढांगोऽष्टाश्र्यादिलक्षणलक्षित इत्यर्थः। सुवासाः शोभनेन वाससा रशनया युक्तः। परिवीतस्तया रशनया वेष्टितः। एवंविधो यूप आगात्। आगच्छति। स उ स एव यूपः श्रेयान् जायमानः सर्वेभ्यो वनस्पतिभ्य उत्कृष्टतया संपद्यमानो भवति। तमेवंविधं यूपं धीरासः प्रज्ञा मनसा देवयंतो देवान् कामयमानाः स्वाध्यः सुष्ठु सर्वतो ध्यानयुक्ताः कवयः क्रांतदर्शिनोऽध्वर्य्वादय उन्नयंति। उन्नतं कुर्वंति। एतस्मिन्नर्थे ब्राह्मणं। युवा सुवासाः परिवीत आगादित्युत्तमया परिदधाति प्राणो वै युवा सुवासाः सोऽयं शरीरैः परिवृतः स उ श्रेयान्भवति जायमान इति श्रेयाञ्छ्रेयान्ह्येष एतद्भवति जायमानस्तं धीरासः कवय उन्नयंति स्वाध्यो३ मनसा देवयंत इति ये वा अनूचानास्ते कवयस्त एवैनं

तदुन्नयंति। ऐ॰ ब्रा॰ २. २.। इति ॥ युवा। यौतेः कनिन्युवृषितक्षीत्यादिना कनिन्प्रत्ययः। कित्त्वाद्गुणाभावः। उवङादेशः। नित्त्वादाद्युदात्तत्वं। सुवासाः। वस आच्छादने। असुन्नित्यनुवृत्तौ वसेर्णिदित्यसुन्प्रत्ययः। णित्त्वादुपधावृद्धिः। सोर्मनसी इत्युत्तरपदाद्युदात्तत्वं। परिवीतः। व्येञ् संवरणे। कर्मणि क्तः। यजादित्वात्संप्रसारणं। गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं। अगात्। इण् गतावित्यस्य लुङि इणो गा लुङीति गादेशः। गातिस्थेति सिचो लोपः। अडागमः। श्रेयान्। प्रशस्यस्य द्विवचनविभज्योपपद इतीयसुन्प्रत्ययः। तस्मिन्प्रशस्यस्य श्र इति श्रादेशः। गुणः। नित्त्वादाद्युदात्तत्वं। एकादेश आद्युदात्तः। स्वाध्यः। ध्यै चिंतायां। स्वाङोरुपसर्गयोः प्राक्प्रयोगः। अन्येभ्योऽपि दृश्यंत इति क्विप्। दृशिग्रहणात्संप्रसारणं। संप्रसारणाच्चेति पूर्वरूपत्वं। हल इति दीर्घः। जसि एरनेकाच इति यणादेशः। कृदुत्तरपदप्रकृतिस्वरत्वं। उदात्तस्वरितयोर्यण इति जसः स्वरितत्वं। देवयंतः। सुप आत्मनः क्यजिति क्यच्। चित्त्वादंतोदात्तः ॥

॥ अथ पंचमी ॥

जा॒तो जाय॑ते सुदि॒न॒त्वे अह्नां॑ सम॒र्ये आ वि॒द॒थे वर्ध॑मानः ।
पु॒नंति॒ धीरा॑ अ॒पसो॑ मनी॒षा दे॑व॒या विप्र॒ उदि॑यर्ति॒ वाचं॑ ॥५॥
जा॒तः। जा॒य॒ते॒। सु॒दि॒न॒ऽत्वे। अह्नां॑। स॒ऽम॒र्ये॑। आ। वि॒दथे॑। वर्ध॑मानः।
पु॒नंति॑। धीराः॑। अ॒पसः॑। म॒नी॒षा। दे॒व॒ऽयाः। विप्रः॑। उत्। इ॒य॒र्ति॒। वाचं॑ ॥५॥

जातः पृथिव्यां प्रथममुत्पन्नो यूपः समर्ये। मर्य इति मनुष्यनाम। तैः सहिते विदथे वर्धमानः। विदथ इति यज्ञनाम विदथः सवनमिति यज्ञनामसु पाठात्। तस्मिन्यज्ञ आ वर्धमानो घृतांजनरशनापरिव्ययणादिना सर्वतः शोभमानः सन् अह्नां सुदिनत्वे जायते। पशुनियोजनादिद्वारेण यज्ञनिर्वाहकतयाहानि सुदिनानि करोतीत्यर्थः। अपसः कर्मवंतो धीराः सुप्रज्ञा अध्वर्य्वादयो मनीषा बुद्ध्या तं यूपं पुनंति। प्रक्षालनादिभिः शोधयंति। देवया देवानां यष्टा देवानां हवींषि प्रापयिता वा विप्रो मेधावी होता च वाचं यूपविषयां स्तुतिलक्षणां वाचमुदियर्ति। प्रेरयति। उच्चारयतीत्यर्थः ॥ उक्तार्थे ब्राह्मणं। जातो जायते सुदिनत्वे अह्नामिति जातो ह्येष एतज्जायते समर्य आ विदथे वर्धमान इति वर्धयंत्येवैनं तत्पुनंति धीरा अपसो मनीषेति पुनंत्येवैनं तद्देवया विप्र उदियर्ति वाचमिति देवेभ्य एवैनं

तन्निवेदयति । ऐ॰ ब्रा॰ २. २. ॥ सुदिनत्वे । सुदिनानां भाव इति तस्य भावस्त्वतलाविति त्वः । प्रत्ययस्वरः । समर्ये । मृङ् प्राणत्याग इत्यस्माच्छंदसि निष्टर्क्येति क्यप्रत्ययांतत्वेन निपातनाद्गुणः । समासस्येत्यंतोदात्तत्वं । पुनंति । पूञ् पवने । क्र्यादित्वाच्छ्ना । प्वादित्वाद्ध्रस्वः । प्रत्ययस्वरः । देवयाः । या प्रापणे । आतो मनिन्निति विच्प्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वं । इयर्ति । ऋ गतौ । जुहोत्यादिः । अभ्यासस्यार्तिपिपर्त्योश्चेतीत्वं । अभ्यासस्यासवर्णे इतीयङादेशः । निघातः ॥

॥ इति तृतीयस्य प्रथमे तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

यान्वो नरो देवयंतो निमिम्युर्वनस्पते स्वधितिर्वा ततक्ष ।

ते देवासः स्वरवस्तस्थिवांसः प्रजावदस्मे दिधिषंतु रत्नं ॥ ६ ॥

यान् । वः । नरः । देवऽयंतः । निऽमिम्युः । वनस्पते । स्वऽधितिः । वा । ततक्ष ।

ते । देवासः । स्वरवः । तस्थिऽवांसः । प्रजाऽवत् । अस्मे इति । दिधिषंतु । रत्नं ॥ ६ ॥

हे यूपा देवयंतो देवान्कामयमाना नरः कर्मणां नेतारोऽध्वर्य्वादयो यान्वो यान्युष्मान्निमिम्युः । अवटेषु प्रचिक्षिपुः । वा अपि च हे वनस्पते स्वधितिः परशुस्त्वदीयान्यूपांस्ततक्ष चिच्छेद देवासो दीप्यमानाः स्वरवः । स्वरुशब्दः स्वशकलवाची । तद्वंतः । लुप्तमत्वर्थीयः । तस्थिवांसस्तिष्ठंतस्ते तादृशा यूपा अस्मे अस्मै यजमानाय प्रजावत् अपत्यसहितं रत्नमुत्तमं धनं दिधिषंतु । धारयंतु । प्रयच्छंत्वित्यर्थः ॥ निमिम्युः । डुमिञ् प्रक्षेपण इत्यस्य लिट्युसि असंयोगाल्लिट् किदिति किद्वद्भावाद्गुणाभावः । यद्वृत्तयोगादनिघातः । सति शिष्टः स्वरो बलीयानिति वचनात्प्रत्ययस्वरः । स्वधितिः । स्वशब्दोपपदाद्धा धारण इत्यस्मात् क्तिन् । स्वा स्वकीया निशितधारा धीयते प्रक्षिप्यतेऽनेनेति स्वधितिः खड्गः । ततक्ष । तक्षू त्वक्षू तनूकरण इत्यस्माल्लिटि णलि रूपादनिघातः । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । स्वरवः । स्वृ शब्दोपतापयोरित्यस्मान्निदित्यनुवृत्तौ शृस्वृस्निहित्रपीत्यादिना उप्रत्ययः । नित्त्वादाद्युदात्तः । तस्थिवांसः । ष्ठा गतिनिवृत्तावित्यस्माच्छंदसि लिट् । तस्य क्वसुः । वस्वेकाजाद्घसामितीडागमः । प्रत्ययस्वरः । प्रजावत् । जनी प्रादुर्भाव इत्यस्मादुपसर्गे च संज्ञायामिति डः । ततष्टाप् । तदस्यास्तीति मतुप् । तस्य पित्त्वादनुदात्तत्वं । एकादेशस्वरः । अस्मे ।

अस्मच्छन्दस्य सुपां सुलुगिति शे आदेशः। दिधिषंतु। धिष धारणे। जुहोत्यादिः। निघातः॥

॥ अथ सप्तमी ॥

ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः।
ते नो व्यंतु वार्यं देवत्रा क्षेत्रसाधसः॥७॥
ये। वृक्णासः। अधि। क्षमि। निऽमितासः। यतऽस्रुचः।
ते। नः। व्यंतु। वार्यं। देवऽत्रा। क्षेत्रऽसाधसः॥७॥

अधि क्षमि क्षमायां भूमौ वृक्णासः परशुना छिन्ना ये यूपाः। यतस्रुच इति ऋत्विग्वाची यतस्रुचो मरुत इति ऋत्विङ्नामसु पठितत्वात्। यताः स्रुचो यैस्ते यतस्रुचः। तैर्ऋत्विग्भिर्निमितासोऽवटेषु नितरां प्रक्षिप्ताः क्षेत्रसाधसः क्षेत्रस्य यज्ञस्य साधकाः। यथा क्षेत्रं सस्यादिद्वारा फलं प्रयच्छति तथा यज्ञोऽप्यपूर्वद्वारा स्वर्गादिफलं ददातीति क्षेत्रं यज्ञः। एवंविधास्ते यूपा नोऽस्मदीयं वार्यं वारणीयं संभजनीयं हविर्देवत्रा देवेषु व्यंतु। गमयंतु। अस्मदीयं हविर्देवाधीनं कुर्वंत्वित्यर्थः॥ वृक्णासः। ओव्रश्चू छेदन इत्यस्य निष्ठायां यस्य विभाषेतीट्प्रतिषेधः। ग्रहिज्यावयीत्यादिना संप्रसारणं। ओदितश्चेति निष्ठानत्वं। क्षमि। आतो धातोरित्यत्र आत इति योगविभागादाकारलोपः। निमितासः। डुमिञ् प्रक्षेपणे। कर्मणि क्तः। गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं। यतस्रुचः। बहुव्रीहौ पूर्वपदस्वरः। व्यंतु। इण् गतावित्यस्य लोटि रूपं। इकारलोपश्छांदसः। अयमंतर्भावितण्यर्थः। वार्यं। वृङ् संभक्तावित्यस्मादृहलोर्ण्यदिति कर्मणि ण्यत्। ईडवंदवृशंसदुहेत्यादिनाद्युदात्तत्वं। देवत्रा। चेत्यनुवृत्तौ देवमनुष्यपुरुषपुरुमर्त्येभ्य इत्यादिनाधिकरणे त्राप्रत्ययः। क्षेत्रसाधसः। राध साध संसिद्धावित्यस्मादौणादिकोऽसुन्। कृदुत्तरपदप्रकृतिस्वरः॥

॥ अथाष्टमी ॥

आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अंतरिक्षं।
सजोषसो यज्ञमवंतु देवा ऊर्ध्वं कृण्वंत्वध्वरस्य केतुं॥८॥
आदित्याः। रुद्राः। वसवः। सुऽनीथाः। द्यावाक्षामा। पृथिवी। अंतरिक्षं।
सऽजोषसः। यज्ञं। अवंतु। देवाः। ऊर्ध्वं। कृण्वंतु। अध्वरस्य। केतुं॥८॥

सुनीथा यज्ञस्य सुष्ठु नेतार आदित्या द्वादशादित्या रुद्रा एकादश रुद्रा वसवोऽष्टौ वसवः। यद्वा सुष्ठुनीथाः सुष्टुतयः। स्तुतशस्त्राणि नीथानि चोक्थामदानि चेति हि श्रूयते। द्यावाक्षामा द्यावापृथिव्यौ। पृथिवी। सुप्व्यत्ययः। पृथु विस्तीर्णमंतरिक्षं च। सजोषस एते सर्वे देवा ऐकमत्येन परस्परं संगता भूत्वेमं मस्मदीयं यज्ञमवंतु। रक्षंतु। किंच। अध्वरस्य यज्ञस्य केतुं ध्वजभूतं प्रज्ञापकं वेमं यूपमूर्ध्वं कृखंतु। उच्छ्रितं कुर्वंतु॥ आदित्याः। अदितेरपत्यानि। दित्यदित्यादित्यपत्युत्तरपदादिति ण्यः। णित्वादादिवृद्धिः। प्रत्ययस्वरः। रुद्राः। रोदयंति सर्वानंतकाले। रोदेर्णिलुक् चेति रक्प्रत्ययः। तत्संनियोगे णिलोपः। प्रत्ययस्वरः। जसः सुप्त्वादनुदात्तत्वे एकादेश उदात्तेनोदात्त इत्येकादेशस्याप्युदात्तत्वं। वसवः। वस निवासे। निदित्यनुवृत्तौ शृस्वृस्निहित्रप्यसिवसीत्यादिनोप्रत्ययः। नित्वादाद्युदात्तः। सुनीथाः। णीञ् प्रापणे। हनिकुषिनीरमिकाशिभ्य इति क्थन्। कित्वादगुणः। थाथघञ्क्तेत्युत्तरपदांतोदात्तत्वं। द्यावाक्षामा। द्यौश्च क्षामा च। दिवो द्यावेति द्यावादेशः। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। पृथिवी। प्रथ प्रख्याने। प्रथेः षिवन् संप्रसारणं चेति षिवन् संप्रसारणं च। षिद्गौरादिभ्यश्चेति ङीष्। प्रत्ययस्वरेणांतोदात्तः। अवंतु। अव रक्षणे। निघातः। कृखंतु। कृवि हिंसाकरणयोरित्यस्माल्लोटि धिन्विकृण्व्योरच्चेत्युप्रत्ययः। अकारश्चांतादेशः। निघातः॥

॥ अथ नवमी ॥

हं॒सा इ॑व श्रेणि॒शो यता॑नाः शु॒क्रा वसा॑नाः॒ स्वर॑वो न॒ आगुः॑।
उ॒न्नी॒यमा॑नाः क॒विभिः॑ पु॒रस्ता॑द्दे॒वा दे॒वाना॒मपि॑ यंति॒ पाथः॑॥९॥
हं॒साःऽइ॑व। श्रे॒णि॒ऽशः। यता॑नाः। शु॒क्राः। वसा॑नाः। स्वर॑वः। नः॒। आ। अ॒गुः॒।
उ॒त्ऽनी॒यमा॑नाः। क॒विऽभिः॑। पु॒रस्ता॑त्। दे॒वाः। दे॒वानां॑। अपि॑। यं॒ति॒। पाथः॑॥९॥

शुक्रा शुक्राणि दीप्तानि वासांसि वसाना आच्छादयंतः स्वरवः स्वरुमंतः श्रेणिशः पंक्तिशो यतानाः प्रवर्तमानाः। अत्र दृष्टांतः। हंसा इवेति। यथा नभसि पंक्तिशः पतंतो हंसाः शोभंते तद्वत् शोभमानास्ते यूपा नोऽस्मानागुः। प्रापुः। अपि च कविभिर्मेधाविभिरध्वर्य्वादिभिः पुरस्तादाहवनीयस्य पूर्वभाग उन्नीयमाना उच्छ्रीयमाणा देवा दीप्यमानास्ते यूपा देवानां पाथो देवानां स्थानमंतरिक्षं। पाथोऽंतरिक्षं पथा व्याख्यातमिति यास्कः। पाथोनदीभ्यां ड्यण्

। पा॰ ४.४.१११.। इति सूत्रे पाथोऽंतरिक्षमिति वृत्तिकारोऽप्यवादीत्। तादृशमंतरिक्षमपियंति। प्राप्नुवंति। अध्वर्य्वादिभिरुच्छ्रीयमाणा यूपा अतिदैर्घ्यादंतरिक्षं व्याप्य वर्तंत इत्यर्थः॥ हंसा इव। इवेन विभक्त्यलोप इति वचनात्पूर्वपदस्वरः। श्रेणिशः। बह्वल्पादिति शस्। प्रत्ययस्वरः। शुक्राः। शुच दीप्तावित्यस्माहजेंद्राग्रेत्यादिना रन्प्रत्ययांतत्वेन निपातनादंतोदात्तः। अगुः। इण् गतौ। अस्माल्लुङि रूपं। निघातः॥

॥ अथ दशमी ॥

शृंगा॑णीवेच्छृ॒ंगिणां॒ सं द॑दृश्रे च॒षाल॑वंतः॒ स्वर॑वः पृथि॒व्यां।
वा॒घद्भि॑र्वा विह॒वे श्रोष॑माणा अ॒स्माँ अ॑वंतु पृत॒नाज्ये॑षु॥१०॥

शृंगा॑णिऽइव। इत्। शृं॒गिणां॑। सं। द॒दृ॒श्रे॒। च॒षाल॑ऽवंतः। स्वर॑वः। पृ॒थि॒व्यां।
वा॒घत्ऽभिः॑। वा॒। वि॒ऽह॒वे। श्रोष॑माणाः। अ॒स्मान्। अ॒वं॒तु॒। पृ॒त॒नाज्ये॑षु॥१०॥

स्वरवः स्वरुमंतश्चषालवंतः प्रतिमुक्तकटकाः। एवंविधा यूपाः पृथिव्यां शृंगिणां महिषादीनां शृंगाणीवेत् विषाणानीव संददृश्रे। सम्यक् दृश्यंत एव। वा अपि च विहवे। विविधं हूयंते हवींष्यत्रेति विहवो यज्ञः। तस्मिन्यज्ञे वाघद्भिर्ऋत्विग्भिः। वाघतो वृक्तबर्हिष इत्यृत्विङ्नामसु पाठात्। श्रोषमाणास्तैः क्रियमाणं स्तुतिलक्षणं शब्दं शृण्वंतः। तादृशा यूपाः पृतनाज्येषु। पृतनाज्यशब्दः संग्रामवाची। आजौ पृतनाज्यमिति संग्रामनामसु पठितत्वात्। पृतनाज्येषु संग्रामेषु। वधस्थलेष्विति यावत्। अस्मान्यजमानानवंतु। रक्षंतु॥ शृंगाणि। शॄ हिंसायामित्यस्माच्छृणातेर्ह्रस्वश्च। उ॰ १.१२५.। इति गन् नुडागमो धातोर्ह्रस्वश्च। नित्स्वरः। ददृश्रे। छंदसि लुङ्लङ्लिट इति लङर्थे लिट्। इरयो रे इतीरेचो रे इत्यादेशः॥

॥ अथैकादशी ॥

वन॑स्पते श॒तव॑ल्शो॒ वि रो॑ह स॒हस्र॑वल्शा॒ वि व॒यं रु॑हेम।
यं त्वाम॒यं स्वधि॑ति॒स्तेज॑मानः प्रणि॒नाय॑ मह॒ते सौभ॑गाय॥११॥

वन॑स्पते। श॒तऽव॑ल्शः। वि। रो॒ह॒। स॒ह॒स्र॑ऽवल्शाः। वि। व॒यं। रु॒हे॒म॒।
यं। त्वां। अ॒यं। स्वऽधि॑तिः। तेज॑मानः। प्रऽनि॒नाय॑। म॒ह॒ते। सौभ॑गाय॥११॥

हे वनस्पते छिन्नमूल स्थाणो शतवल्शः शतशाखः सन् विरोह। विशेषेण

प्रादुर्भूतो भव। वयमपि सहस्रवल्शाः सहस्रशाखाः संतो विरुहेम। विशेषेण प्रादुर्भूता भवेम। तेजमानो निशितधारोऽयं स्वधितिः परशुः हे स्थाणो यं त्वां महते सौभगाय महत्सौभाग्यं बहुशाखत्वलक्षणं प्रणिनाय। प्रकर्षेण प्रापयामास ॥ सहस्रवल्शाः। सहस्रशब्दः कर्दमादित्वान्मध्योदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। रुहेम। रुह प्रादुर्भाव इत्यस्मादाशीर्लिङि किदाशिषीति यासुडागमः। स्कोः संयोगाद्योरंते चेति सलोपः। लिङ्याशिष्यङित्यङ्प्रत्ययः। अतो येय इति इयादेशः। लोपो व्योर्वलीति यलोपः। गुणः। प्रणिनाय। णीञ् प्रापण इत्यस्मात् लिटि णलि रूपं। पादादित्वादनिघातः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं॥

॥ इति तृतीयस्य प्रथमे चतुर्थो वर्गः ॥

सखायस्त्वेति नवर्चं नवमं सूक्तं वैश्वामित्रं। अत्रेयमनुक्रमणिका। सखायो नव बार्हतं त्रिष्टुबंतमिति। अंत्या त्रिष्टुप्। शिष्टा अष्टौ बृहत्यः॥ प्रातरनुवाकाश्विनशस्त्रयोर्बार्हते छंदस्यस्य सूक्तस्य विनियोगः। अथैतस्या इति खंडे सूचितं। सखायस्त्वायमग्निरग्न आयाहि। आ० ४.१३.। इति॥

॥ तस्मिन्सूक्ते प्रथमा ॥

सखायस्त्वा ववृमहे देवं मर्तास ऊतये।
अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसं ॥१॥

सखायः। त्वा। ववृमहे। देवं। मर्तासः। ऊतये।
अपां। नपातं। सुऽभगं। सुऽदीदितिं। सुऽप्रतूर्तिं। अनेहसं ॥१॥

विश्वामित्रः स्तौति। हे अग्ने सखायः सोमाज्यादिहविःप्रदानेनोपकारकत्वान्मित्राणि मर्तासो मनुष्या ऋत्विजो वयमपां नपातमपां नप्तारं सुभगं शोभनधनयुक्तं सुदीदितिं शोभनदीप्तिं सुप्रतूर्तिं शोभनप्रतरणं कर्मानुष्ठातृभिः सुखेन गंतव्यमनेहसमुपद्रवरहितमेतादृशं देवं त्वामूतये रक्षणाय ववृमहे। वृणीमहे॥ सखायः। ख्या प्रकथने। समाने ख्यश्चोदात्त इति समान उपपदे डिदित्यनुवृत्तौ ख्यातेरिण्। तस्य डित्त्वाट्टिलोपः। तत्संनियोगेन यलोपः। समानस्य छंदस्यमूर्द्धेति सभावः। उपपदस्योदात्तत्वं। णिदित्यनुवृत्तौ सख्युरसंबुद्धौ। पा० ७.२.५२.। इति णिद्भावः। वृद्ध्यायादेशौ। आद्युदात्तः। ववृमहे। वृङ् संभक्तौ। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। क्रादित्वादिडभावः। निघातः। ऊतये। अव रक्षण इत्यस्य

उदात्त इत्यनुवृत्तावूतियूतीत्यादिना क्तिनंतत्वेन निपातनादंतोदात्तः । अपां । ऊडिदमिति विभक्तेरुदात्तत्वं । सुभगं । आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं । सुप्रतूर्तिं । क्त्वादयश्चेत्युत्तरपदाद्युदात्तत्वं ॥

॥ अथ द्वितीया ॥

कायमानो वना त्वं यन्मातॄरजगन्नपः ।

न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः ॥२॥

कायमानः । वना । त्वं । यत् । मातॄः । अजगन् । अपः ।

न । तत् । ते । अग्ने । प्रऽमृषे । निऽवर्तनं । यत् । दूरे । सन् । इह । अभवः ॥२॥

हे अग्ने वना काननानि कायमानः कामयमानस्त्वं यद्यस्मात्कारणात्तानि विहाय मातॄरपो मातृभूता अपोऽजगन् । अगमः । गतवानसि । अप्सु प्रविष्टत्वाच्छांतो वर्तसे । तत्तस्मात्ते तव निवर्तनं । नितरां तत्रैव वर्तनं । तेन च विनाशो लक्ष्यते । स विनाशो न प्रमृषे । न प्रमृष्यते । न सह्यते । कुत इत्यत आह । यद्यस्मात्कारणाद्दूरे सन् अदृश्यतया वर्तमानस्त्वमिहास्मत्संबंधिष्वरणिरूपेषु काष्ठेष्वभवः । मंथनात् क्षणमात्रेणास्माकं समीपे भवसि । तस्मात्तव दूरतो वर्तनमस्मभ्यं न रोचते । अस्मिन्नर्थे यास्कः । कायमानश्चायमानः कामयमान इति वा । वनानि त्वं यन्मातॄरपोऽगम उपशाम्यन् । न तत्ते अग्ने प्रमृष्यते निवर्तनं दूरे यत्सन्निह भवसि जायमानः । नि° ४. १४. । इति ॥ कायमानः । कमु कांतौ । कमेर्णिङ् । लटः शानच् । मकारलोपश्छांदसः । अजगन् । गम्लृ गतावित्यस्य लङि बहुलं छंदसीति शपः श्लुः । हल्ङ्यादिना सिलोपः । मो नो धातोरिति नकारः । यच्छब्दयोगादनिघातः । अडागमस्वरः । प्रमृषे । मृष तितिक्षायां । व्यत्ययेन कर्मणि तप्रत्ययः । लोपस्त आत्मनेपदेष्विति तलोपः । धातुस्वरः । अभवः । छंदसि लुङ्लङ्लिट इति लङर्थे लङ् । यद्योगादनिघातः ॥

॥ अथ तृतीया ॥

अतिं तृष्टं ववक्षिथाथैव सुमना असि ।

प्रप्रान्ये यंति पर्यन्य आसते येषां सख्ये असि श्रितः ॥३॥

अतिं । तृष्टं । ववक्षिथ । अथ । एव । सुऽमनाः । असि ।

प्रऽप्र । अन्ये । यंति । परि । अन्ये । आसते । येषां । सख्ये । असि । श्रितः ॥३॥

हे अग्ने तृष्टं स्तोतुस्तृष्णाभिलाषं तदुचितफलप्रदानेन सफलं कर्तुमतिववक्षिथ। अतिशयेन वोढुमिच्छसि। अथैव अद्यापि त्वं सुमना असि। संतुष्टमनस्को वर्तसे। किंच। त्वं येषां षोडशानामृत्विजां सख्ये मैत्रे श्रितोऽसि वर्तसे तेषां मध्येऽन्येऽध्वर्युप्रभृतयो द्वादशर्त्विजः प्रयंति। प्रकर्षेण होतुं गच्छंति। अन्य उद्गातृप्रभृतयश्चत्वारः पर्यासते। परित आसीना वर्तंते॥ ववक्षिथ। वह प्रापण इत्यस्य सनि रूपं। अभ्यासस्य सन्यत इतीत्वाभावश्छांदसः। तदंताद्वर्तमाने लिट्। थल आर्द्धधातुकस्येड्वलादेरितीट्। कास्प्रत्ययादामित्याम् न भवति मंत्रत्वात्। निघातः। प्रप्र। प्रसमुपोद इति द्विर्वचनं। यंति। इण् गतावित्यस्य लटि रूपं। एकान्याभ्यां समर्थाभ्यामित्यन्यशब्दयोगात्पूर्वस्य निघाताभावः। आसते। आस उपवेशने। उत्तरत्वान्निघातः। असि। अस भुवि। तासस्त्योर्लोप इति सकारलोपः। यद्वृत्तयोगान्न निहन्यते॥

॥ अथ चतुर्थी ॥

ईयिवांसमति स्रिधः शश्वतीरति सश्चतः।
अन्वीमविंदन्निचिरासो अद्रुहो अप्सु सिंहमिव श्रितं॥४॥
ईयिऽवांसं। अति। स्रिधः। शश्वतीः। अति। सश्चतः।
अनु। ईं। अविंदन्। निऽचिरासः। अद्रुहः। अप्ऽसु। सिंहंऽइव। श्रितं॥४॥

हे अग्ने अद्रुहोऽद्रोग्धारो निचिरासो नितरां चिरासश्चिरंतना विश्वे देवाः स्रिधः शोषकाञ्छत्रून्बलेनातिक्रम्येयिवांसं गच्छंतं शश्वतीर्बह्वीः सश्चतः संगतिकारिणीः सेनाश्चात्यतिक्रम्य गच्छंतमप्सु श्रितं तिरोहितमत एव सिंहमिव गुहाप्रविष्टं सिंहमिव भीममीमेनं त्वामन्वविंदन्। अनुगम्यालभंत॥ ईयिवांसं। इण् गताविन्यस्य क्वसावुपेयिवाननाश्वाननूचानश्च। पा० ३. २. १०९.। इति निपातितः। प्रत्ययस्वरः। स्रिधः। स्रिधेः क्षयार्थस्य शोषणार्थस्य वा क्विप् चेति क्विप्। धातुस्वरः। सश्चतः। षस्ज गतौ। जकारस्य व्यत्ययेन चकारः। लटः शत्रादेशः। प्रत्ययस्वरः। अविंदन्। विदॢ लाभ इत्यस्य लङि रूपं। निचिरासः। नितरां चिराः। आज्जसेरसुगित्यसुक्। समासस्वरः। अद्रुहः। द्रुह जिघांसायां। संपदादित्वाद्भावे क्विप्। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। श्रितं। श्रिञ् सेवायामित्यस्य श्युकः कितीतीट्प्रतिषेधः। प्रत्ययस्वरः॥

॥ अथ पंचमी ॥

ससृवांसमिव त्मनाग्निमित्था तिरोहितं ।
ऐनं नयन्मातरिश्वा परावतो देवेभ्यो मथितं परि ॥५॥

ससृवांसंऽइव । त्मना । अग्निं । इत्था । तिरःऽहितं ।
आ । एनं । नयत् । मातरिश्वा । पराऽवतः । देवेभ्यः । मथितं । परि ॥५॥

मातरिश्वा वायुरित्थेत्थं त्मना स्वेच्छयाप्सु प्रवेशेन तिरोहितं निलीनं परि परितो मथितं मंथनेन निष्पादितमेनमग्निं देवेभ्यः । तादर्थ्ये चतुर्थी । देवार्थं परावतो दूरदेशादानयत् । आनीतवान् । तत्र दृष्टांतः । ससृवांसमिव । यथा स्वाच्छंद्येन ससृवांसं सरंतं गच्छंतं पुत्रं पिता बलादानयति तद्वत् ॥ ससृवांसमिव । सृ गतावित्यस्माल्लिट् । तस्य क्वसुः । इवेन विभक्त्यलोप इत्युक्तत्वात्प्रत्ययस्वरः । त्मना । आत्मन्शब्दस्य मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः । इत्था । था हेतौ च छंदसीति व्यत्ययेन थाप्रत्ययः । प्रत्ययस्वरः । एनं । अन्वादेशे द्वितीयाटौःस्वेन इत्येनादेशः । अनुदात्तश्च । नयत् । णीञ् प्रापण इत्यस्य लङि रूपं । अडभावश्छांदसः । मातरिश्वा । मातर्यंतरिक्षे श्वसितीति श्वन्नुक्षन्नित्यादिना निपातितः ॥

॥ इति तृतीयस्य प्रथमे पंचमो वर्गः ॥

॥ अथ षष्ठी ॥

तं त्वा मर्ता अगृभ्णत देवेभ्यो हव्यवाहन ।
विश्वान्यद्यज्ञाँ अभिपासि मानुष तव क्रत्वा यविष्ठ्य ॥६॥

तं । त्वा । मर्ताः । अगृभ्णत । देवेभ्यः । हव्यऽवाहन ।
विश्वान् । यत् । यज्ञान् । अभिऽपासि । मानुष । तव । क्रत्वा । यविष्ठ्य ॥६॥

हे हव्यवाहन हव्यानां वोढर्हे अग्ने मर्ता मनुष्या अध्वर्युप्रभृतयस्तं तादृशमप्सु तिरोहितं त्वा त्वां देवेभ्यो यष्टव्यदेवतार्थमगृभ्णत । अगृह्णत । मानुष मनुष्याणां हितकारिन्यविष्ठ्य युवतम हे अग्ने तव क्रत्वा तव कर्मणा माहात्म्येन विश्वान्सर्वानस्माभिः क्रियमाणान्यज्ञान्यद्यस्मात्कारणादभिपासि सर्वतः पालयसि तस्मात्त्वामगृभ्णतेति पूर्वत्रान्वयः ॥ अगृभ्णत । ग्रह उपादाने । क्र्यादित्वाच्छ्ना । ग्रहिज्या-

वयीति संप्रसारणं । हृग्रहोर्भश्छंदसीति हकारस्य भकारः । तिङ्ङतिङ इति निघातः । हव्यवाहन । वह प्रापण इति धातोर्ल्युडित्यनुवृत्तौ हव्येऽनंतःपादमिति ल्युट् । उपधावृद्धिः । योरनादेशः । अपादादित्वादाष्टमिकमनुदात्तत्वं । विश्वान् । विश प्रवेशन इत्यस्मादशिप्रुषिलटिरणिकणिखदिविशिभ्यः क्वन्निति क्वन् । कित्त्वाद्गुणाभावः । नित्त्वादाद्युदात्तत्वं । अभिपासि । पा रक्षणे । अस्य धातो रक्षणार्थत्वान्न पिबादेशः । यच्छब्दयोगान्न निघातः । धातुस्वरः । ऋत्वा । टा । जसादयश्छंदसि विकल्प्यंत इत्यत्र नादेशाभावः । यणादेशः । प्रत्ययस्वरः । यविष्ठ्य । युवशब्दादतिशायने तमबिष्ठनावितीष्ठन् । स्थूलदूरयुवेति यणादि परं लुप्यते पूर्वस्य च गुणः । वस्वादित्वात्स्वार्थिको यप्रत्ययः ॥

॥ अथ सप्तमी ॥

तद्भद्रं तव दंसना पाकाय चिच्छदयति ।
त्वां यदग्ने पशवः समासते समिद्धमपिशर्वरे ॥७॥
तत् । भद्रं । तव । दंसना । पाकाय । चित् । छदयति ।
त्वां । यत् । अग्ने । पशवः । संऽआसते । संऽइद्धं । अपिऽशर्वरे ॥७॥

हे अग्ने तव संबंधि तदिदं भद्रं शोभनं दंसनाग्निहोत्रादिकं कर्म पाकाय चित् । चिच्छब्दोऽप्यर्थे । पाकायेति कर्मणि चतुर्थी । पाकोऽर्भकः । तद्वदज्ञमपि यजमानं छदयति । स्वफलप्रदानेन पूजयति । पशुपुत्रादिभिः परिवृतं करोतीत्यर्थः । छदयतिशब्दोऽर्चतिकर्मा छंदयति छदयतीति तन्नामसु पाठात् । यद्वा । पाकशब्दः प्रशस्यं वक्ति पाको वाम इति प्रशस्यनामसु पठितत्वात् । तद्भद्रं प्रशस्यं यजमानमभिमतफलप्रदानेन पूजयतीत्यर्थः । यद्यस्मात्कारणादपिशर्वरे शर्वरीमुखेऽग्निविहरणकाल एव समिद्धं दीप्यमानं त्वां पशवो द्विपदाश्चतुष्पदाश्चोभये पशवः समासते । सम्यगासते । पर्युपासत इत्यर्थः । तदिदं पश्वादिलक्षणं फलं यजमानाय प्रयच्छतीत्यर्थः ॥ भद्रं । भदि कल्याणे इत्यस्माद्धातोरुपरि रक्प्रत्ययेन निपातनादंतोदात्तत्वं । पाकाय । पा रक्षण इत्यस्मादिण्भीकापाशलेत्यादिना कन् । पायते रक्ष्यते राजादिनेति पाकः । नित्त्वादाद्युदात्तः । छदयति । छद अपावरणे । स्वार्थे णिच् । अदंतत्वाद्वृद्ध्यभावः । निघातः । समासते । आस उपवेशने । अदादित्वाच्छपो लुक् । अनकारांतत्वाज् झस्यादादेशः । यद्योगादनिघातः । तिङि चोदात्तवतीति गतेर्निघातः । धातुस्वरः ॥

॥ अथाष्टमी ॥

आ जुहोता स्वध्वरं शीरं पावकशोचिषं ।
आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत ॥८॥

आ । जुहोत । सुऽअध्वरं । शीरं । पावकऽशोचिषं ।
आशुं । दूतं । अजिरं । प्रत्नं । ईड्यं । श्रुष्टी । देवं । सपर्यत ॥८॥

ऋत्विजो यजमानः प्रेरयति । हे ऋत्विजः पावकशोचिषं शोधकदीप्तिं शीरं काष्ठेष्वोषधीषु चानुशायिनं स्वध्वरं शोभनयज्ञोपेतमिममग्निमा जुहोत । आहुतिभिरा समंतात्तर्पयत । अपि च । आशुं कर्मणि व्याप्तं दूतमाह्वानकारित्वेन देवानां दूतमजिरं क्षिप्रं गंतारं प्रत्नं पुरातनमीड्यं स्तोतव्यं देवं द्योतमानमिममग्निं श्रुष्टी सपर्यत । श्रुष्टीति क्षिप्रनामेति यास्कः । क्षिप्रं पूजयत ॥ जुहोत । हु दानादनयोः । अस्माद्धातोर्लोट् । जुहोत्यादिभ्यः श्लुरिति शपः श्लुः । श्लाविति द्विर्वचनं । लोटो लङ्वद्भावे तस्थस्थमिपामिति थस्य तादेशः । छंदसीत्यनुवृत्तौ तस्य तप्तनप्तनथनाश्चेति तबादेशः । पित्त्वाद्गुणः । निघातः । स्वध्वरं । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । शीरं । शीङ् स्वप्ने । अस्माद्धातोः स्फायितंचिवंचीत्यादिना रक्प्रत्ययः । कित्त्वाद्गुणाभावः । प्रत्ययस्वरः । पावकशोचिषमित्यत्र पवनं पावः शुद्धिः । तं कायतीति पावकः । आतोऽनुपसर्गे कः । प्रत्ययस्वरः । बहुव्रीहौ प्रकृत्या पूर्वपदमिति पूर्वपदप्रकृतिस्वरत्वं । आशुं । अशू व्याप्तौ । अस्माद्धातोः कृवापाजिमीत्यादिना उण् । उपधावृद्धिः । प्रत्ययस्वरः । अजिरं । अज गतिक्षेपणयोरित्यस्माद्धातोरजिरशिशिरशिथिलेति किरच्प्रत्ययांतत्वेन निपातनादंतोदात्तत्वं । प्रत्नं । प्रगस्य छंदसि गलोपश्च । पा॰ ४. ३. २३. २. । इति गलोपः । चकारात् त्नप्रत्ययः । प्रत्ययस्वरः । ईड्यं । ईड स्तुतौ । अस्माण्ण्यत् । ईडवंदेत्यादिनाद्युदात्तत्वं । सपर्यत । सपरशब्दात्कंड्वादिभ्यो यक् पूजायां वर्तते । लोण्मध्यमपुरुषबहुवचनं । शप् । अतो गुण इति पूर्वरूपत्वं । निघातः ॥

॥ अथ नवमी ॥

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयंत ॥९॥

त्रीणि॑। श॒ता। त्री। स॒हस्रा॑णि। अ॒ग्निं। त्रिं॒शत्। च॒। दे॒वाः। नव॑। च॒। अ॒सप॒र्य॒न्।
औक्ष॑न्। घृ॒तैः। अस्तृ॑णन्। ब॒र्हिः। अ॒स्मै॒। आत्। इत्। होता॑रं। नि। अ॒सा॒द॒यं॒त ॥ ९॥

त्रीणि शता त्रीणि शतानि त्री सहस्राणि त्रीणि सहस्राणि त्रिंशच्च नव चैकोनचत्वारिंशदधिकशतत्रयोपेतत्रिसहस्रसंख्याका देवा इममग्निमसपर्यन् । अपूजयन् । किंच ते देवा घृतैरिममग्निमौक्षन् । असिंचन् । तथास्मा अग्नये तदर्थं बर्हिरस्तृणन् । बर्हिषास्तरणं वेद्याच्छादनमकुर्वन् । आदिदनंतरमेव ते देवास्तस्मिन्बर्हिष्येनमग्निं होतारं कृत्वा न्यसादयंत । उपावेशयन् । देवैः पूज्यमिममग्निं सपर्यतेति पूर्वेणान्वयः । देवसंख्या च बृहदारण्यकेऽभिहिता । महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति । कतमे ते त्रयस्त्रिंशदष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशदिंद्रश्चैव प्रजापतिश्च त्रयस्त्रिंशौ । बृ॰ आ॰ ३.९.। इति ॥ शता । दशानां दशतां शभावस्तश्च प्रत्ययः । दश दशतः परिमाणमेषां शतानि । सुपां सुलुगित्यादिना सुपो डादेशः । प्रत्ययस्वरः । त्री । सुपां सुलुगिति पूर्वसवर्णदीर्घः । फिट्स्वरः । सहस्राणि । कर्दमादित्वान्मध्योदात्तः । त्रिंशत् । त्रयाणां दशतां त्रिन्भावः शच्च प्रत्ययः । त्रयो दशतः परिमाणमस्य त्रिंशत् । प्रत्ययस्वरः । नव । कनिन्नित्यनुवृत्तौ णु स्तुतावित्यस्माद्धातोर्णुदंशोर्नुदश्चेति कनिन् । गुणश्च । नित्त्वादाद्युदात्तः । असपर्यन् । लङि रूपं । निघातः । औक्षन् । उक्ष सेचने । आडजादीनामित्याडागमः । वृद्धिः । पादादित्वान्न निहन्यते । आगमस्वरः । अस्तृणन् । स्तृञ् आच्छादने । लङ्बहुवचने क्र्यादित्वाच्छ्ना । झेरंतादेशः । नित्यं ङित इतीकारलोपः । संयोगांतलोपः । श्नाभ्यस्तयोरात इत्याकारलोपः । लुङ्लङ्लृङ्क्ष्वडित्यडागमः । स चोदात्तः । आगमस्वरः । वाक्येत्यनुवृत्तौ चादित्वान्निघाताभावः । बर्हिः । इसिरित्यनुवृत्तौ बृंहेर्नलोपश्चेतीसिः । तत्संनियोगेन नलोपः । प्रत्ययस्वरः । असादयंत । षद्लृ विशरणगत्यवसादनेषु । अस्माद्धेतुमति चेति णिच् । उपधावृद्धिः । णिचश्चेत्यात्मनेपदं । लङि बहुवचने रूपं । निघातः ॥

॥ इति तृतीयस्य प्रथमे षष्ठो वर्गः ॥

त्वामग्न इति नवर्चं दशमं सूक्तं वैश्वामित्रमौष्णिहमाग्नेयं । त्वामग्न औष्णिहमित्यनुक्रांतत्वात् ॥ प्रातरनुवाकाश्विनशस्त्रयोरौष्णिहे छंदस्यस्य सूक्तस्य विनियोगः । अथैतस्या इति खंडे सूचितं पुरु त्वा त्वामग्ने । आ॰ ४.१४.। इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

त्वाम॑ग्ने मनी॒षिण॑ः स॒म्राजं॑ चर्षणी॒नां ।
दे॒वं मर्ता॑स इंधते॒ सम॑ध्व॒रे ॥१॥
त्वां । अ॒ग्ने॒ । म॒नी॒षिण॑ः । सं॒ऽराजं॑ । च॒र्ष॒णी॒नां ।
दे॒वं । मर्ता॑सः । इं॒ध॒ते॒ । सं । अ॒ध्व॒रे ॥१॥

हे अग्ने मनीषिणो धीमंतोऽध्वर्युप्रभृतयो मर्तासो मनुष्याश्चर्षणीनां प्रजानां सम्राजमधिपतिं देवं द्योतमानं त्वामध्वरे यज्ञे समिंधते। सोमाज्यपयःप्रभृतिभिराहुतिभिः सम्यग्दीपयंति ॥ मनीषिणः। मनीषामस्तीति व्रीह्यादिभ्यश्चेति इनिः। यस्येति चेत्यवर्णलोपः। प्रत्ययस्वरः। सम्राजं। राजृ दीप्तौ। संपूर्वादस्माद्धातोः सत्सूद्विषेति क्विप्। क्विलोपः। समो मकारस्य मोऽनुस्वार इत्यनुस्वारे प्राप्ते मो राजि समः क्वाविति समो मकारः। कृदुत्तरपदप्रकृतिस्वरत्वं। चर्षणीनां। नामन्यतरस्यामिति विभक्तेरुदात्तत्वं। इंधते। ञिइंधी दीप्तौ। अस्माद्धातोर्हेतुमति चेति णिच्। लटि ऋस्यात्मनेपदेष्वनत इत्यदादेशः। छंदस्युभयथेति ऋस्यार्द्धधातुकत्वाण्णेरनिटीति णिलोपः। निघातः ॥

॥ अथ द्वितीया ॥

त्वां य॒ज्ञेष्वृ॒त्विज॒मग्ने॒ होता॑रमीळते ।
गो॒पा ऋ॒तस्य॑ दीदिहि॒ स्वे दमे॑ ॥२॥
त्वां । य॒ज्ञेषु॑ । ऋ॒त्विजं॑ । अग्ने॑ । होता॑रं । ई॒ळ॒ते॒ ।
गो॒पाः । ऋ॒तस्य॑ । दी॒दि॒हि॒ । स्वे । दमे॑ ॥२॥

हे अग्नेऽध्वर्य्वादयो यज्ञेष्वग्निष्टोमादिषु त्वां होतारमृत्विजं होतृनामकमृत्विजमीळते। स्तुवंति। तादृशस्त्वमृतस्य सत्यस्य यज्ञस्य गोपा गोपायिता सन् स्वे दमे स्वकीये गृहे यज्ञशालायां दीदिहि। दीप्यस्व ॥ दीदिहि। दिवु क्रीडादौ। यङ्लुक्। लोट्। तुजादित्वादभ्यासदीर्घत्वं। संज्ञापूर्वको विधिरनित्य इत्यभ्यासस्य गुणाभावे लोपो व्योर्वलीति वलोपः ॥

॥ अथ तृतीया ॥

स घा यस्ते ददाशति समिधा जातवेदसे।
सो अग्ने धत्ते सुवीर्यं स पुष्यति ॥३॥
सः। घ। यः। ते। ददाशति। सम्ऽइधा। जातऽवेदसे।
सः। अग्ने। धत्ते। सुऽवीर्यं। सः। पुष्यति ॥३॥

हे अग्ने यो यजमानो जातवेदसे जातप्रज्ञाय ते तुभ्यं समिधा समिंधनकारीण्याज्यपुरोडाशादिहवींषि ददाशति ददाति स घ स खलु सुवीर्यं शोभनसामर्थ्योपेतं पुत्रं धत्ते। धारयति। अपि च सः स एव पुष्यति। पशुपुत्रादिभिः समृद्धो भवति ॥ घ। चादयोऽनुदात्ता इत्यनुदात्तः। ददाशति। दाशृ दान इत्यस्माद्धातोः कर्तरि शप्। द्विर्वचनं छांदसं। यद्वृत्तयोगादनिघातः। अभ्यस्तानामादिरित्युदात्तः। समिधा। ञिइंधी दीप्तौ। अस्मात् क्विप् चेति क्विप्। उपधालोपः। सुपां सुलुगिति शसो डादेशः। कृदुत्तरपदप्रकृतिस्वरत्वं। जातवेदसे। बहुव्रीहौ प्रकृत्या पूर्वपदमिति प्रकृतिस्वरत्वं। सुवीर्यं। वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। पुष्यति। पुष पुष्टौ। अस्मात् श्यन्। ङित्त्वाद्गुणाभावः। निघातः ॥

॥ अथ चतुर्थी ॥

स केतुरध्वराणामग्निर्देवेभिरा गमत्।
अंजानः सप्त होतृभिर्हविष्मते ॥४॥
सः। केतुः। अध्वराणां। अग्निः। देवेभिः। आ। गमत्।
अंजानः। सप्त। होतृऽभिः। हविष्मते ॥४॥

अध्वराणां यज्ञानां केतुः प्रज्ञापकः सोऽग्निः सप्त सप्तभिर्होतृभिर्वषट्कर्तृभिरंजानः सोमाज्याहुतिभिरज्यमानः सन् हविष्मते यजमानार्थं देवेभिर्यष्टव्यदेवैः सहागमत्। आगच्छतु ॥ गमत्। लोडर्थे छंदसि लुङ्लङ्लिट इति लुङ्। लृदित्त्वादङ्। बहुलं छंदस्यमाङ्योग इत्यडभावः। निघातः। अंजानः। अंजू व्यक्तिम्रक्षणगतिषु। व्यत्ययेन कर्मणि शानच्। चित्त्वादंतोदात्तत्वं। हविष्मते। जुहोतेरर्चिशुचीत्यादिना इसिप्रत्ययांतो हविःशब्दोऽंतोदात्तः। स्वरविधौ व्यंजनमविद्यमानवदिति परिभाषानाश्रयणान्मतुप उदात्तत्वाभावः। इसिप्रत्ययस्वरः ॥

॥ अथ पंचमी ॥

प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत् ।
विपां ज्योतींषि बिभ्रते न वेधसे ॥ ५ ॥
प्र । होत्रे । पूर्व्यं । वचः । अग्नये । भरत । बृहत् ।
विपां । ज्योतींषि । बिभ्रते । न । वेधसे ॥ ५ ॥

यजमानो होत्रादीन्प्रति ब्रूते। हे होत्रादयो विपां विप्राणां मेधाविनामध्वर्य्वादीनां ज्योतींषि सत्कर्मानुष्ठानसंपाद्यानि तेजांसि बिभ्रते निमित्ततया कुर्वाणाय वेधसे जगतो विधात्रे होत्रे देवानामाह्वात्रेऽग्नये बृहन्महत्पूर्व्यं पूर्वैः कृतं पुरातनं वचः स्तोत्रशस्त्रादिकं वाक्यं प्रभरत । संपादयत । नेत्ययं पादपूरणोऽन्वयाभावात् । यद्वा वेधसे न। यथा वेधा जगद्विधाता परमेश्वर आदित्यादीनि ज्योतींषि करोति तद्वदिति ॥ प्रशब्दस्य छंदसि व्यवहिताश्चेति भरतेत्यनेन संबंधः । पूर्व्यं पूर्वैः कृतमित्यर्थः। पूर्वैः कृतमिनियौ चेति यप्रत्ययः। भसंज्ञकत्वादवर्णलोपः। प्रत्ययस्वरः। भरत । भृञ् भरणे भौवादिकः। निघातः। बृहत् । वर्तमाने पृषद्बृहदिति निपातनादंतोदात्तः। बिभ्रते । भृञ् भरणे। जुहोत्यादिभ्यः श्लुः। भृञामिदितीत्वं । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥

॥ इति तृतीयस्य प्रथमे सप्तमो वर्गः ॥

॥ अथ षष्ठी ॥

अग्निं वर्धंतु नो गिरो यतो जायत उक्थ्यः ।
महे वाजाय द्रविणाय दर्शतः ॥ ६ ॥
अग्निं । वर्धंतु । नः । गिरः । यतः । जायते । उक्थ्यः ।
महे । वाजाय । द्रविणाय । दर्शतः ॥ ६ ॥

योऽयमग्निर्यतो याभिः स्तुतिरूपाभिर्गीर्भिरुक्थ्यो जायते । उक्थ्यशब्दः प्रशस्यवाची। अनभिशस्त्य उक्थ्य इति तन्नामसु पाठात्। अतिशयेन स्तुत्यो भवतीत्यर्थः। यश्चायमग्निर्महे महते वाजायान्नाय द्रविणाय धनाय च दर्शतो दर्शनीयो भवति तमिममग्निं नो गिरोऽस्माकं स्तुतिरूपास्ता वाचो वर्धंतु। वर्धयंतु। पूजयंत्वित्यर्थः ॥ वर्धंतु । वृधु वर्धने। अस्माण्णिच्। लघूपधगुणः। छंदस्युभयथे-

त्यार्द्धधातुकत्वाखिलोपः। फ्रेरंतादेशः। एरुः। पा० ३.४.८६.। इत्युकारः। निघातः। उक्थ्यः। वच परिभाषणे। अस्मात्पातृतुदिवचिरिचीत्यादिना थक्। किच्चाद्वचिस्वपीत्यादिना संप्रसारणं। उक्थ्यं शस्त्रं। तेन स्तुत्यत्वेन तत्र भव उक्थ्यः। भवे छंदसीति यत्। यस्येति लोपः। तित्स्वरितमिति स्वरितः। दर्शतः। भृमृदृशियजीत्यतच्प्रत्ययः। चित्त्वादंतोदात्तः॥

॥ अथ सप्तमी ॥

अग्ने यजिष्ठो अध्वरे देवान्देवयते यज।
होता मंद्रो वि राजस्यति स्रिधः॥७॥
अग्ने। यजिष्ठः। अध्वरे। देवान्। देवऽयते। यज।
होता। मंद्रः। वि। राजसि। अति। स्रिधः॥७॥

हे अग्ने यजिष्ठो यष्टृतमस्त्वमध्वरे यज्ञे देवयते देवानात्मन इच्छते यजमानाय देवान्यज। तदर्थं यष्टव्याग्न्यादीन्पूजय। किंच। होता देवानामाह्वाता मंद्रो यजमानस्य मादयिता स त्वं स्रिधः क्षपयितॄञ्छत्रूनति अतिक्रम्य वि राजसि। विशेषेण शोभसे॥ यजिष्ठः। तुश्छंदसीतीष्ठन्। तुरिष्ठेमेयःस्विति तृचो लोपः। नित्त्वाद्युदात्तः। देवयते। क्यचश्चित्त्वादंतोदात्तत्वं। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण तयोः क्यचा सहैकादेश एकादेश उदात्तेनोदात्त इत्यंतोदात्तो देवयच्छब्दः। ततः शतुरनुम इति विभक्तेरुदात्तत्वं। यज। यज देवपूजासंगतिकरणदानेषु। अस्माल्लोट्। सिप्। सिपो हिरादेशः। अतो हेरिति हेर्लुक्। निघातः। राजसि। राजृ दीप्तौ। निघातः॥

॥ अथाष्टमी ॥

स नः पावक दीदिहि द्युमदस्मे सुवीर्यं।
भवा स्तोतृभ्यो अंतमः स्वस्तये॥८॥
सः। नः। पावक। दीदिहि। द्युऽमत्। अस्मे इति। सुऽवीर्यं।
भव। स्तोतृऽभ्यः। अंतमः। स्वस्तये॥८॥

नः पावकास्मत्संबंधिनः पापस्य शोधक हे अग्ने स पूर्वमंत्रे प्रतिपादितस्त्वं द्युमत्कांतियुक्तं सुवीर्यं शोभनसामर्थ्योपेतं दानभोगार्हं धनमस्मे अस्मभ्यं दीदिहि।

यद्वा द्युमत्तेजोयुक्तं सुवीर्यं शोभनवीर्योपेतं च यथा भवति तथास्मे अस्मदर्थं त्वं दीदिहि । दीप्यस्व । किंच स्तोतृभ्यः । षष्ठ्यर्थे चतुर्थी । त्वद्विषयस्तुतिकारिणां होत्रादीनां स्वस्तयेऽविनाशनाय क्षेमायांतमोऽंतिकतमस्तेषामतिशयेन समीपवर्ती भव ॥ पावक । पूञ् पवने । अस्माद्धातोर्ण्वुच् । णित्त्वाद्वृद्धिः । वोरकादेशः । आमंत्रितत्वादाष्टमिकमनुदात्तत्वं । दीदिहि । दिवु क्रीडादौ । अस्माद्यङ् । तुजादीनामित्यभ्यासस्य दीर्घत्वं । संज्ञापूर्वको विधिरनित्य इत्यभ्यासस्य गुणाभावः । बहुलं छंदसीति यङो लुक् । लोटि सिप् । चर्करीतं परस्मैपदमदादिवच्चेति वचनाच्छपो लुक् । सिपो हिरादेशः । लोपो व्योर्वलीति वलोपः । हेरपित्त्वादगुणः । निघातः । द्युमत् । दिव उदित्युकारः । ह्रस्वनुड्भ्यामिति मतुप उदात्तत्वं । सुवीर्यं । वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं । अंतमः । अंतोऽस्यास्तीत्यंतिकः । अत इनिठनाविति ठन् । अतिशयेनांतिक इत्यतिशायने तमबिति तमप् । तमे तादेश्चेति तादिलोपः । नित्त्वादाद्युदात्तः । स्वस्तये । प्रातिपदिकस्वरः ॥

॥ अथ नवमी ॥

तं त्वा विप्रा विपन्यवो जागृवांसः समिंधते ।
हव्यवाहममर्त्यं सहोवृधं ॥ ९ ॥
तं । त्वा । विप्राः । विपन्यवः । जागृऽवांसः । सं । इंधते ।
हव्यऽवाहं । अमर्त्यं । सहःऽवृधं ॥ ९ ॥

हे अग्ने विप्राः स्तुतीनां प्रेरका जागृवांसोऽग्निहोत्रादिकर्मण्यप्रमत्ततया प्रबुद्धा विपन्यवः । विपन्युशब्दो मेधाविनमाचष्टे । विपश्चिद्विपन्युरिति तन्नामसु पाठात् । विपन्यवो मेधाविनः स्तोतारो हव्यवाहं हव्यानां वोढारममर्त्यं मरणधर्मरहितं सहोवृधं सहसा मथनरूपेण बलेन वर्धमानं तादृशं त्वा त्वां समिंधते । सोमाद्याहुतिभिः सम्यग्दीपयंति ॥ विप्राः । टुवप् बीजसंताने । अस्माद्धातोर्ऋज्रेंद्राग्रवज्रविप्रेति रन्प्रत्ययेत्वयोर्निपातनादाद्युदात्तत्वं । विपन्यवः । विविधं पनं पननं स्तुतिं यातीति विपन्युः । मृगय्वादयश्चेति कुः । अकारलोपश्छांदसः । प्रत्ययस्वरः । जागृवांसः । जागृ निद्राक्षये । अस्माल्लिट् । तस्य क्वसुः । उगिदचामिति नुम् । द्विर्वचनाभावश्छांदसः । वस्वेकाजाद्घसामिति नियमादिडभावः । जाग्रोऽविचिण्णल्ङित्सु । पा० ७. ३. ८५. । इति गुणो न भवति तत्र विरित्यत्र क्वसोरपि गृहीतत्वात् । प्रत्ययस्वरः । इंधते । ञिइंधी दीप्तौ । अंतर्भावितण्यर्थोऽयं ।

निघातः । हव्यवाहं । वह प्रापणे । वहश्चेति खिः । उपधावृद्धिः । कृदुत्तरपदप्रकृतिस्वरत्वं । सहोवृधं । वृधु वर्धने । क्विप् चेति क्विप् ॥

॥ इति तृतीयस्य प्रथमेऽष्टमो वर्गः ॥

अग्निर्होतेति नवर्चमेकादशं सूक्तं वैश्वामित्रं गायत्रमाग्नेयं। अग्निर्होता गायत्रमित्यनुक्रांतत्वात् ॥ प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छंदसीदं सूक्तं। सूचितं हि अग्निर्होताग्न इळेति चतस्रः। आ० ४.१३.। इति ॥ आधाने प्रथमायां पवमानेष्टौ स्विष्टकृतो याज्याग्निर्होतेत्येषा स हव्यवाळमर्त्यमिति पुरोनुवाक्या। द्वितीयपवमानेष्टौ स्विष्टकृतोऽनुवाक्या साह्वानिति । सूचितं च साह्वान्विश्वा अभियुजोऽग्निमीळे पुरोहितमिति संयाज्ये। आ० २.१.। इति ॥ आभिप्लविकेषूक्थ्येषु तृतीयसवने मैत्रावरुणशस्त्रेऽभि प्रयांसीति वैकल्पिकोऽनुरूपस्तृचः। अत्र सूत्रं। प्र वो वाजा अभिद्यवोऽभि प्रयांसि वाहसा। आ० ७.८.। इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

अग्निर्होता पुरोहितोऽध्वरस्य विचर्षणिः ।
स वेद यज्ञमानुषक् ॥ १ ॥
अग्निः । होता । पुरःऽहितः । अध्वरस्य । विऽचर्षणिः ।
सः । वेद । यज्ञं । आनुषक् ॥ १ ॥

विश्वामित्रः स्तौति । होता देवानामाह्वाता पुरोहितः पुरत एवाभिमतफलसंपादकत्वेन हितकारी । यद्वा पुरः पूर्वभाग आहवनीयरूपेण हितो निहित इति पुरोहितः। अध्वरस्य यज्ञस्य विचर्षणिर्विशेषेण द्रष्टा विचर्षणिर्विश्वचर्षणिरिति तन्नामसु पाठात्। स तथाविधोऽग्निरानुषगानुपूर्व्येण सक्तं यज्ञमग्निष्टोमादिकं वेद । जानाति ॥ वेद। विद ज्ञाने। विदो लटो वेति तिपो णलादेशः। लघूपधगुणः। निघातः। आनुषक्। आ समंतादनुषजतीत्यानुषक्। षन्ज संगे। धातुषकारस्य सकारः। क्विप् चेति क्विप्। अनिदितामित्युपधालोपः। उपसर्गात्सुनोतीति षत्वं ॥

॥ अथ द्वितीया ॥

स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः ।
अग्निर्धिया समृण्वति ॥ २ ॥

सः । हृव्यऽवाट् । अमर्त्यः । उशिक् । दूतः । चनःऽहितः ।
अग्निः । धिया । सं । ऋण्वति ॥ २ ॥

हव्यवाट् हविषो वोढामर्त्यो मरणधर्मरहित उशिक् हविः कामयमानो दूतो देवानां दूतश्चनसे हविर्लक्षणायान्नाय हितो निहितः । यद्वा चनोहितः । चनोऽन्नं हविर्लक्षणं हितमस्येति चनोहितः । स तथाविधोऽग्निर्धिया प्रज्ञया समृण्वति । संगच्छते । कर्मविषयप्रज्ञान्वितोऽग्निरस्मानपि तादृक्प्रज्ञान्वितान्करोत्वित्याशास्ते ॥ हव्यवाट् । वह प्रापणे । वहश्चेति ण्विः । ढत्वजश्त्वचर्त्वानि । कृदुत्तरपदप्रकृतिस्वरत्वं । उशिक् । वश कांतौ । इजिरित्यनुवृत्तौ वशेः किच्चेतीजिप्रत्ययः । तस्य कित्वात् ग्रहिज्येति संप्रसारणं । प्रत्ययस्वरः । चनोहितः । चनःशब्दश्चायतेरन्ने ह्रस्वश्चेत्यसुनंतः । चकारान्नुडागमः । तस्मिन्यलोपः । नित्त्वादाद्युदात्तः । पुनश्चनसोश्छंदसि गतिसंज्ञा वक्तव्या । पा॰ १.४.६०.२. । इति गतिसंज्ञायां गतिरनंतर इति प्रकृतिस्वरत्वं । बहुव्रीहौ तु पूर्वपदप्रकृतिस्वरत्वं । धिया । सावेकाच इति विभक्तेरुदात्तत्वं । ऋण्वति । ऋणु गतौ । लेटि तनादित्वादुप्रत्ययः । लेटोऽडाटावित्यडागमः ॥

॥ अथ तृतीया ॥

अग्निर्धिया स चेतति केतुर्यज्ञस्य पूर्व्यः ।
अर्थं ह्यस्य तरणि ॥ ३ ॥

अग्निः । धिया । सः । चेतति । केतुः । यज्ञस्य । पूर्व्यः ।
अर्थं । हि । अस्य । तरणि ॥ ३ ॥

यज्ञस्याग्निष्टोमादेः केतुः प्रज्ञापकः पूर्व्यः पूर्वे भवश्चिरंतनः स तथाविधोऽग्निर्धिया प्रज्ञया चेतति । सर्वं जानीते । अस्यैतादृशस्याग्नेरर्थं गमनस्वभावं तेजोऽस्याकाशे दृश्यमानस्य तमसस्तरणि हि । तारकं खलु । निवर्तकमिति यावत् ॥ चेतति । चिती संज्ञाने । निघातः । अर्थं । ऋ गतौ । उषिकुषिगार्तिभ्यस्थन्निति थन् । गुणः । नित्त्वादाद्युदात्तः । तरणि । तॄ प्लवनतरणयोः । अर्तिसृभृधृधमीत्यादिनानिप्रत्ययः । गुणः । प्रत्ययस्वरः ॥

॥ अथ चतुर्थी ॥

अग्निं सूनुं सनश्रुतं सहसो जातवेदसं ।
वह्निं देवा अकृण्वत ॥ ४ ॥

अग्निं । सूनुं । सनंऽश्रुतं । सहसः । जातऽवेदसं ।

वह्निं । देवाः । अकृण्वत ॥४॥

सहसः सूनुं बलस्य पुत्रं मथनरूपेण बलेन निष्पाद्यमानत्वात् सनश्रुतं सनातनत्वेन प्रसिद्धं जातवेदसं जातप्रज्ञं तमिममग्निं देवा हविर्भुजो देवा वह्निं हविषां वोढारमकृण्वत । अकुर्वत ॥ सनश्रुतं । श्रु श्रवणे । कर्मणि क्तः । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं । वह्निं । वह प्रापणे । निरित्यनुवृत्तौ वहिश्रीत्यादिना निप्रत्ययः । अकृण्वत । कृवि हिंसाकरणयोः । इदित्त्वान्नुम् । धिन्विकृण्व्योरच्चेत्युप्रत्ययः । अकारश्चांतादेशः । लङि व्यत्ययेनात्मनेपदं । निघातः ॥

॥ अथ पंचमी ॥

अदाभ्यः पुरएता विशामग्निर्मानुषीणां ।

तूर्णी रथः सदा नवः ॥५॥

अदाभ्यः । पुरःऽएता । विशां । अग्निः । मानुषीणां ।

तूर्णिः । रथः । सदा । नवः ॥५॥

मानुषीणां मनोर्जातानां विशां प्रजानां पुरएता सन्मार्गप्रदर्शनेनाग्रतो गंतात एव तूर्णिस्ताः प्रजा वैदिककर्मप्रवर्तकत्वेनानुग्रहीतुं त्वरायुक्त आलस्यरहितो रथो हविषां वहनाद्रथसदृशः सदा सर्वदा तत्कर्मणि नवो नूतनः पुनर्मथनादभिनव एवंविधोऽग्निरदाभ्यः । अहिंस्यः । न केनापि तिरस्कार्य इत्यर्थः ॥ अदाभ्यः । दंभु दंभने । दभेश्चेति वक्तव्यमिति कर्मणि ण्यत् । उपधावृद्धिः । न दाभ्यः । नञ्समासे तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरत्वं । पुरएता । इण् गतौ । ण्वुल्तृचाविति तृच् । गुणः । चित्त्वादंतोदात्तः । मानुषीणां । मनोर्जातावञ्यतौ षुक् चेत्यञ् । टिड्ढाणञिति ङीप् । ञित्त्वादाद्युदात्तः । तूर्णिः । ञित्वरा संभ्रम इति धातोर्निरित्यनुवृत्तौ वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो निदिति निप्रत्ययः । ज्वरत्वरेत्यादिना ऊठ् । तस्य नित्त्वादाद्युदात्तः । संहितायां ढ्रलोपे पूर्वस्येति दीर्घः । रथः । हनिकुषिनीरमिकाशिभ्य इति क्थन्प्रत्ययः । किच्चादनुदात्तोपदेशेत्यादिनानुनासिकलोपः । नित्त्वादाद्युदात्तः । सदा । स्वरादिष्वाद्युदात्तत्वेन पठितत्वादाद्युदात्तः ॥

॥ इति तृतीयस्य प्रथमे नवमो वर्गः ॥

॥ तस्मिन्सूक्ते षष्ठी ॥

साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः ।
अग्निस्तुविश्रवस्तमः ॥ ६ ॥

सह्वान् । विश्वाः । अभिऽयुजः । क्रतुः । देवानां । अमृक्तः ।
अग्निः । तुविश्रवःऽतमः ॥ ६ ॥

अभियुजोऽभियोक्त्रीर्विश्वाः सर्वाः सेनाः साह्वान्सहमानः स्वबलेन तिरस्कुर्वाणोऽमृक्तः शत्रुभिरहिंसितो देवानां क्रतुः कर्ता हविःप्रदानेन पोषक एवंभूतोऽग्निस्तुविश्रवस्तमः। तुविशब्दो बहुवाची। तुवि पुरु इति तन्नामसु पाठात्। श्रवःशब्दोऽन्नवाची। श्रव इत्यन्ननाम श्रूयते। नि॰ १०. ३.। इति निरुक्तेऽभिधानात्। अतिशयेन बहुविधान्नोपेतो वर्तते। यस्मादेवं तस्मादस्मानपि बहुविधान्नोपेतान्करोत्विति भावः ॥ साह्वान्। षह मर्षण इत्यस्य क्वसौ दाश्वान्साह्वान्मीढ्वांश्चेति निपातनाद्द्विर्वचनमिडागमश्च न भवति परस्मैपदं च भवति। क्वसुस्वरः। क्रतुः। कृञः कतुः। कित्त्वाद्गुणाभावः। प्रत्ययस्वरः। तुविश्रवस्तमः। तु वृत्तिहिंसापूर्तिषु। अस्मादौणादिकः किप्रत्ययः। कित्त्वाद्गुणाभावः। उवङादेशः। अंतोदात्तः। श्रवः। श्रु श्रवणे। श्रूयतेऽन्नमिति कर्मण्यसुन्प्रत्ययः। अतिशयेन तुविश्रवा इत्यतिशायने तमबिति तमप्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

॥ अथ सप्तमी ॥

अभि प्रयांसि वाहसा दाश्वाँ अश्नोति मर्त्यः ।
क्षयं पावकशोचिषः ॥ ७ ॥

अभि । प्रयांसि । वाहसा । दाश्वान् । अश्नोति । मर्त्यः ।
क्षयं । पावकऽशोचिषः ॥ ७ ॥

दाश्वान् हविषां दाता मर्त्यो मनुष्यो यजमानो वाहसा हविषां वाहकेनाग्निना प्रयांस्यन्नान्यभ्यश्नोति। अभितः सर्वतः प्राप्नोति। किंच पावकशोचिषः शोधकदीप्तेरग्नेः सकाशात् क्षयं गृहं चाभ्यश्नोति ॥ प्रयांसि। प्रीञ् प्रीणने। अस्माद्धातोरंतर्भावितण्यर्थादसुन्प्रत्ययः। प्रीणयंति भक्षमिति प्रयांस्यन्नानि। नित्त्वादाद्युदात्तः। वाहसा। णिदित्यनुवृत्तौ वहिहाधाञ्भ्यश्छंदसीत्यसुन्। णित्त्वादुपधा-

वृद्धिः । नित्स्वरः । दाश्वान् । दाशृ दान इत्यस्य क्वसौ दाश्वान्साह्वानिति निपातनादिडागमो द्विर्वचनं च न भवति । क्वसुन्प्रत्ययस्वरः । अश्नोति । अशू व्याप्तौ । व्यत्ययेन परस्मैपदं । निघातः ॥

॥ अथाष्टमी ॥

परि विश्वानि सुधिताग्नेरश्याम मन्मभिः ।

विप्रासो जातवेदसः ॥ ८ ॥

परि । विश्वानि । सुऽधिता । अग्नेः । अश्याम । मन्मऽभिः ।

विप्रासः । जातऽवेदसः ॥ ८ ॥

जातवेदसो जातप्रज्ञा विप्रासो मेधाविनो होत्रादयो वयमग्नेस्तव संबंधिभिर्मन्मभिर्मननीयैः स्तोमैर्विश्वानि सर्वाणि सुधिता सुहितानि सुष्ठु हितान्यभिलषितानि वसूनि पर्यश्याम । सर्वतः प्राप्नुयाम । जातवेदस इत्यग्नेर्वा विशेषणं । जातानि सर्वाणि वेत्तीति जातवेदाः सर्वज्ञ इत्यर्थः । एतादृशं जातवेदस्त्वमग्नेरेवोचितमिति तद्विशेषणत्वं युक्तं ॥ सुधिता । डुधाञ् धारणपोषणयोरित्यस्माद्धातोर्निष्ठायां छंदसीत्यनुवृत्तौ सुधितवसुधितेत्यादिना निपातितः । शेश्छंदसि बहुलमिति शेर्लुक् । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । अश्याम । अशू व्याप्तौ । बहुलं छंदसीति श्नुप्रत्ययस्य लुक् । व्यत्ययेन परस्मैपदं । यासुट् परस्मैपदेषूदात्त इति यासुट् । लिङः सलोप इति सलोपः । अदंतत्वाभावादियादेशो न भवति । मसः सकारस्य नित्यं ङित इति लोपः । निघातः । मन्मभिः । मनु अवबोधने । अन्येभ्योऽपि दृश्यंत इति मनिन् । नित्स्वरः ॥

॥ अथ नवमी ॥

अग्ने विश्वानि वार्या वाजेषु सनिषामहे ।

त्वे देवास एरिरे ॥ ९ ॥

अग्ने । विश्वानि । वार्या । वाजेषु । सनिषामहे ।

त्वे इति । देवासः । आ । ईरिरे ॥ ९ ॥

हे अग्ने वार्या वरणीयानि संभजनीयानि विश्वानि सर्वाणि धनानि वाजेषु युद्धेषु सनिषामहे । वयं संभजामहे । यतः कारणाद्देवासः पूर्वमस्माभिरिष्टा देवा

अस्मदभिमतफलप्रदानाय त्वे त्वय्येरिरे । आ समंतादगमन् । त्वयि प्रविष्टा इत्यर्थः । सर्वथापि त्वत्सकाशात् फलं लभेमहीति भावः ॥ वार्या । वृङ् संभक्तौ । ऋहलोर्ण्यदिति ण्यत् । शेश्छंदसि बहुलमिति शेर्लुक् । ईडवंदेत्यादिनाद्युदात्तः । वाजेषु । वृषादित्वादाद्युदात्तः । सनिषामहे । वन षण संभक्तौ । धात्वादेः षः सः । लेटि सिब्बहुलमिति सिप् । सिप आर्द्धधातुकत्वादिडागमः । लेटोऽडाटावित्यडागमः । व्यत्ययेनात्मनेपदं । निघातः । त्वे । युष्मच्छब्दस्य सप्तम्यां त्वादेशः । सुपामिति शेआदेशः । शे । पा० १.१.१३. । इति प्रगृह्यसंज्ञा । ईरिरे । ईर गतावित्यस्मात्परस्य लिटो झस्य इरेजादेशः । इजादेश्च गुरुमत इत्याम्न भवति मंत्रत्वात् । निघातः ॥

॥ इति तृतीयस्य प्रथमे दशमो वर्गः ॥

इंद्राग्नी इति नवर्चं द्वादशं सूक्तं वैश्वामित्रमैंद्राग्नं । तथा चानुक्रम्यते । इंद्राग्नी ऐंद्राग्नमिति । गायत्रं त्विति तुशब्दादिदमपि सूक्तं गायत्रं । इंद्राग्नी देवता ॥ अभिप्लविकेष्वहःसु प्रातःसवनेऽच्छावाकशस्त्र आवापार्थमिदं सूक्तं । अभिप्लवपृष्ठ्याहानीति खंडे सूचितं । इंद्राग्नी आगतं ता हुवे ययोरिदं । आ० ७.५. । इति ॥ अग्निष्टोमेऽच्छावाकशस्त्र इंद्राग्नी आगतमिति स्तोतृयस्तृचः । तस्यैवाच्छावाकस्याद्या शस्त्रयाज्या । इंद्राग्नी आगतं सुतमिति याज्ये । आ० ५.१०. । इति सूचितत्वात् ॥ चतुर्विंशेऽहनि प्रातःसवनेऽच्छावाकशस्त्र इंद्राग्नी आगतं सुतमिति षळहस्तोत्रियः । इंद्राग्नी आगतमिंद्रे अग्ना नमो बृहत् । आ० ७.२. । इति सूचितं ॥ अग्निष्टोमाच्छावाकशस्त्रे तोशा वृत्रहणा हुव इत्याद्यास्तिस्रः । सूचितं च । तोशा वृत्रहणा हुव इत्याद्यास्तिस्रः । आ० ५.१०. । इति ॥ अग्निष्टोमेऽच्छावाकशस्त्र इंद्राग्नी अपसस्परीत्यनुरूपः । सूचितं च । इंद्राग्नी आगतं सुतमिंद्राग्नी अपसस्परि । आ० ५.१०. । इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

इंद्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यं ।
अस्य पातं धियेषिता ॥ १ ॥

इंद्राग्नी इति । आ । गतं । सुतं । गीःऽभिः । नभः । वरेण्यं ।
अस्य । पातं । धिया । इषिता ॥ १ ॥

इंद्रश्चाग्निश्चेंद्राग्नी हे इंद्राग्नी देवौ सुतमभिषवादिसंस्कारैः संस्कृतमत एव

वरेण्यं वरणीयं संभजनीयमिमं सोमं प्रति गीर्भिरस्मदीयाभिः स्तुतिरूपाभिर्वाग्भिराहुतौ संतौ नभो नभसः स्वर्गस्थानादागतं। आगच्छतं। आगत्य च धियास्माभिः क्रियमाणे कर्मणीषिता प्रेरितौ युवामस्य पातं। इमं सोमं पिबतं। यद्वा धियास्मदीयया बुद्ध्येषितौ प्राप्नावस्मद्भक्त्या प्रेरितौ युवामिमं सोमं पिबतं॥ इंद्राग्नी। इंद्रश्चाग्निश्च द्वंद्वे घि। पा॰ २. २. ३२.। इत्यग्निशब्दस्य पूर्वनिपाते प्राप्ते अजाद्यदंतं। पा॰ २. २. ३३.। इतींद्रशब्दस्य पूर्वनिपातः। पादादित्वान्निघातप्रतिषेधः। षाष्ठिकस्वरः। गतं। गम्लृ सृप्लृ गतौ। बहुलं छंदसीति शपो लुकि सत्यनुदात्तोपदेशेत्यादिना मकारलोपः। निघातः। वरेण्यं। वृङ् संभक्तौ। वृङ एण्यः। वृषादित्वादाद्युदात्तः। पातं। पा पाने। सर्वे विधयश्छंदसि विकल्प्यंत इति न पिबादेशः। इषिता। इष गतावित्यस्माद्धातोर्निष्ठायां तीषसहेतीडागमः। आगमा अनुदात्ता इतीटोऽनुदात्तत्वात् क्तस्वरः शिष्यते॥

॥ अथ द्वितीया॥

इंद्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः।
अया पातमिमं सुतं॥ २॥
इंद्राग्नी इति। जरितुः। सचा। यज्ञः। जिगाति। चेतनः।
अया। पातं। इमं। सुतं॥ २॥

हे इंद्राग्नी जरितुः स्तोतुः सचा स्वर्गादिलक्षणफलप्राप्तौ सहायभूतो यज्ञो ज्योतिष्टोमादियज्ञसाधनभूतश्चेतन इंद्रियाणां चेतयितायायनकारी सन् असौ सोमो जिगाति। युवामभिगच्छति। अयास्मदीयया स्तुतिलक्षणयानया वाचाहूतौ संतौ सुतमभिषवादिसंस्कारोपेतमिमं सोमं पातं। पिबतं॥ जिगाति। गा स्तुतावित्ययं धातुरत्र गमने वर्तते। छंदसि जुहोत्यादिः। बहुलं छंदसीत्यभ्यासस्येत्वं। निघातः। चेतनः। चिती संज्ञाने। कर्तरि बहुलवचनाल्ल्युट्। लितीत्याद्युदात्तत्वं। अया। इदंशब्दस्य तृतीयायाः सुपां सुलुगिति याजादेशः। अनादेशप्राप्तौ हलि लोपः। पातं। पा पाने। निघातः॥

॥ अथ तृतीया॥

इंद्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे।
ता सोमस्येह तृंपतां॥ ३॥

इंद्रं । अग्निं । कविऽछदा । यज्ञस्य । जूत्या । वृणे ।
ता । सोमस्य । इह । तृंपतां ॥ ३ ॥

अस्य यज्ञस्य साधनभूतस्य सोमस्य जूत्या। जूतिः प्रेरणं। सोमस्तावद्यजमानं प्रेरयति। साधनमुपलभ्य तत्साध्यक्रतौ यजमानः प्रवर्तत इति हि तस्य प्रेरकत्वं। तया प्रेरणरूपया जूत्या प्रेरितोऽहं कविच्छदा कवीनां स्तोतॄणामुचितफलप्रदानेनोपच्छंदकाविंद्रमग्निं च युवां वृणे। सोमपानार्थमिह कर्मण्यागच्छतमिति संभजे। ता आगतौ च ताविंद्राग्नी इह कर्मणि सोमस्य सोमपानेन तृंपतां। तृप्यतां॥ इंद्रं। इदि परमैश्वर्ये इत्यस्माद्धातोर्ऋज्रेंद्राग्रेति रन्प्रत्ययांतत्वेन निपातनादाद्युदात्तत्वं। कविच्छदा। छदि अपवारणे। अस्मात्क्विप्। सुपां सुलुगिति सुपो डादेशः। कृदुत्तरपदप्रकृतिस्वरत्वं। जूत्या। जू इति सौत्रो धातुः। अस्मादुदात्त इत्यनुवृत्तावूतियूतिजूतीत्यादिना निपातनादंतोदात्तत्वं। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं। वृणे। वृङ् संभक्तौ। श्नाप्रत्ययः। टित आत्मनेपदानामिति टेरेत्वं। निघातः। ता। सुपां सुलुगिति डादेशः। सोमस्य। षुञ् अभिषवे। अस्मादर्तिस्तुसुहुसृधृक्षीत्यादिना मन्प्रत्ययः। नित्स्वरः। तृंपतां। तृप प्रीणने। लोटि मुचादित्वान्नुमागमः। निघातः॥

॥ अथ चतुर्थी ॥

तोशा वृत्रहणा हुवे सजित्वानापराजिता ।
इंद्राग्नी वाजसातमा ॥ ४ ॥
तोशा । वृत्रऽहना । हुवे । सऽजित्वाना । अपराऽजिता ।
इंद्राग्नी इति । वाजऽसातमा ॥ ४ ॥

तोशा शत्रूणां बाधकौ वृत्रहणा वृत्रस्य पापस्य हंतारौ सजित्वाना समानजेतारौ परस्यापेक्षया जयशीलावपराजिता केनाप्यतिरस्कृतौ वाजसातमान्नस्यातिशयेन दाताराविंद्राग्नी युवां हुवे। इह कर्मणि सोमपानार्थमहमाह्वयामि॥ वृत्रहणा। हन हिंसागत्योः। ब्रह्मभ्रूणवृत्रेषु क्विबिति क्विप्। एकाजुत्तरपदे णः पा॰ ८.४.१२.। इति णत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं। हुवे। ह्वयतेर्बहुलं छंदसीति लुकि सति ह्वः संप्रसारणमित्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं। उवङादेशः। व्यत्ययेनात्मनेपदं। निघातः। सजित्वाना। जि जये। शीङ्क्रुशिरुहिजिक्षिसृधृभ्यः

। उ॰ ४.११५.। इति क्वनिप्। कित्त्वाद्गुणाभावः। पित्त्वात्तुगागमः। समानस्य छंदस्यमूर्धेति समानस्य सभावः। कृदुत्तरपदप्रकृतिस्वरत्वं। अपराजिता। नञ्समासे तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरत्वं। इंद्राग्नी। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वे प्राप्ते नोत्तरपदेऽनुदात्तादाविति प्रतिषेधात्समासस्वरः। वाजसातमा। षणु दाने। अस्माज्जनसनखनक्रमगम इति विट्। विड्वनोरनुनासिकस्यादित्याकारः। अतिशायने तमबिति तमप्। कृदुत्तरपदप्रकृतिस्वरत्वं॥

॥ अथ पंचमी॥

प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः।
इंद्राग्नी इष आ वृणे ॥५॥
प्र। वां। अर्चंति। उक्थिनः। नीथऽविदः। जरितारः।
इंद्राग्नी इति। इषः। आ। वृणे ॥५॥

हे इंद्राग्नी उक्थिनः। उक्थं शस्त्रं। तद्वंतः शस्त्रिणो होत्रादयो वां युवां प्रार्चंति। इह कर्मणि स्तुतिरूपाभिर्वाग्भिः पूजयंति। तथा नीथाविदः स्तोत्राभिज्ञाः सामगानकुशला जरितारः स्तोतार उद्गात्रादयोऽभिलषितफलावाप्तये युवामर्चंति। अहमपीषेऽन्नस्य लाभार्थमिंद्राग्नी युवामा वृणे। सर्वतः संभजे। पूजयामीत्यर्थः॥ वां। युष्मच्छब्दस्य द्वितीयायां पदात्परत्वाद्युष्मदस्मदोः षष्ठीचतुर्थीद्वितीया इत्यादिना वामित्यादेशोऽनुदात्तश्च। अर्चंति। अर्च पूजायां। निघातः। उक्थिनः। वच परिभाषणे। पातॄतुदिवचिरिचीति कर्मणि थक्। वचिस्वपीत्यादिना संप्रसारणं। उक्थं शस्त्रं। उक्थं येषां ते। अत इनिठनाविनीनिः। यस्येति लोपः। प्रत्ययस्वरः। नीथाविदः। णीञ् प्रापणे। हनिकुषिनीरमीत्यादिना क्थन्। कित्त्वाद्गुणाभावः। विद ज्ञाने। क्विप् चेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। इंद्राग्नी। आमंत्रितत्वादाद्युदात्तत्वं। वृणे। वृङ् संभक्तौ। निघातः॥

॥ इति तृतीयस्य प्रथम एकादशो वर्गः॥

॥ अथ तस्मिन्सूक्ते षष्ठी॥

इंद्राग्नी नवतिं पुरो दासपत्नीरधूनुतं।
साकमेकेन कर्मणा ॥६॥

इंद्राग्नी इति । नवतिं । पुरः । दासऽपत्नीः । अधूनुतं ।
साकं । एकेन । कर्मणा ॥ ६ ॥

हे इंद्राग्नी दासपत्नीः । दासयंत्युपक्षपयंतीति दासा उपक्षपयितारः शत्रवः । ते पतयः पालका यासां ता दासपत्नीः । नवतिं नवतिसंख्याकाः पुर एवंविधाः शत्रूणां पुरीरेकेन कर्मणैकेनैवोद्योगेन युवां साकं सह युगपत् अधूनुतं । अकंपयतं । ताविंद्राग्नी आह्वयामीति शेषः ॥ नवतिं । नवानां दशतां नवभावः तिश्च प्रत्ययः । प्रत्ययस्वरेणांतोदात्तः । दासपत्नीः । दसु उपक्षये । दासयतीति दासः । पचाद्यजंतः । चित्त्वादंतोदात्तः । ते पतयो यासां नित्यं सपत्न्यादिषु दासाच्च । पा॰ ४.१.३५.१. । इत्युक्त्वाद्विभाषा सपूर्वस्येति ङीप् । इकारस्य नकारः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अधूनुतं । धूञ् कंपने । लङि स्वादिभ्यः श्नुः । निघातः । एकेन । इण् गतौ । इण्भीकापाशल्यतिमर्चिभ्यः कन्निति कन् । नित्त्वादाद्युदात्तः ॥

॥ अथ सप्तमी ॥

इंद्राग्नी अपसस्पर्युप प्र यंति धीतयः ।
ऋतस्य पथ्या३ अनु ॥ ७ ॥
इंद्राग्नी इति । अपसः । परि । उप । प्र । यंति । धीतयः ।
ऋतस्य । पथ्याः । अनु ॥ ७ ॥

हे इंद्राग्नी धीतयः सोमस्य धातारः पातारो होत्रादय ऋतस्य कर्मफलस्य पथ्याः पथो मार्गाननु लक्षीकृत्यापसोऽस्माभिः क्रियमाणस्य कर्मणः परि सर्वत उप प्र यंति । समीपे प्रकर्षेण वर्तंते । अतः सोमपानार्थं युवामागच्छतमिति भावः । यद्वा । धीतयः स्तुतय ऋतस्य यज्ञस्य मार्गान् लक्षीकृत्य कर्मणः परितः प्रवर्तंते । अतः स्तोतव्यतया युवामागतमिति ॥ यंति । इण् गतौ । यणादेशः । निघातः । धीतयः । धेट् पान इत्यस्मात्कर्तरि क्तिच्क्तौ च संज्ञायामिति क्तिच् । घुमास्थेतीत्वं । चित्त्वादंतोदात्तः ॥

॥ अथाष्टमी ॥

इंद्राग्नी तविषाणि वां सधस्थानि प्रयांसि च ।
युवोरप्तूर्यं हितं ॥ ८ ॥

इंद्राग्नी इति । तविषाणि । वां । सधऽस्थानि । प्रयांसि । च ।
युवोः । अप्ऽतूर्यं । हितं ॥ ८ ॥

हे इंद्राग्नी वां युवयोस्तविषाणि बलानि प्रयांस्यन्नानि च सधस्थानि परस्परमवियुज्य वर्तंते । तथाप्तूर्यं वृष्टिद्वारा प्रेरकत्वं युवोर्युवयोरेव हितं निहितं वर्तते । तस्मात्सोमपानप्रभृतिषु सर्वकर्मस्विंद्राग्न्योः सहैव वर्तमानत्वमिति भावः ॥ वां । षष्ठीद्विवचने वामित्यादेशः । सधस्थानि । ष्ठा गतिनिवृत्तौ । आतोऽनुपसर्गे कः । सध मादस्थयोश्छंदसीति सहस्य सधादेशः ॥

॥ अथ नवमी ॥

इंद्राग्नी रोचना दिवः परि वाजेषु भूषथः ।
तद्वां चेति प्र वीर्यं ॥ ९ ॥
इंद्राग्नी इति । रोचना । दिवः । परि । वाजेषु । भूषथः ।
तत् । वां । चेति । प्र । वीर्यं ॥ ९ ॥

हे इंद्राग्नी दिवो रोचना स्वर्गस्य रोचकौ प्रकाशकौ युवां वाजेषु संग्रामेषु परि भूषथः । परितः सर्वतोऽलंकृतौ भवथः । शत्रून्पराजित्य सर्वतो विजयमानौ वर्तेथे । वां युवयोर्वीर्यं सामर्थ्यमेव तत्तादृशं संग्रामविजयं प्र चेति । प्रकर्षेण ज्ञापयति । यद्वा युवां वाजेषु संग्रामेषु परिभूषथः । शत्रून्परिभवथः । शेषं पूर्ववत् ॥ रोचना । रुच दीप्तावित्यस्य अनुदात्तेतश्च हलादेरिति युच् । चित्त्वादंतोदात्तः । भूषथः । भूष भूषणे । निघातः । चेति । चिती संज्ञाने । अयमंतर्भावितण्यर्थः । बहुलं छंदसीति शपो लुक् । तकारलोपश्छांदसः ॥

॥ इति तृतीयस्य प्रथमे द्वादशो वर्गः ॥

॥ तृतीयमंडले प्रथमोऽनुवाकः ॥

द्वितीयेऽनुवाके सप्तदश सूक्तानि । तत्र प्र वो देवायेति सप्तर्चमाद्यं सूक्तं वैश्वामित्रऋषभस्यार्षमग्निदेवताकमानुष्टुभं । अत्रानुक्रमणिका । प्र वः सप्त ऋषभस्त्वानुष्टुभमिति । विश्वामित्रपुत्र ऋषभ ऋषिः । मंडलादिपरिभाषयाग्निर्देवता ॥ अग्निष्टोम इदं सूक्तमाज्यशस्त्रं । पराङ्ध्वर्यावावृत्त इति खंडे सूचितं । प्र वो देवायेत्याज्यमुपसंतनुयात् । आ॰ ५. ९. । इति ॥ इदमेव सूक्तं प्रातरनुवाक आश्विनशस्त्रे

च विनियुक्तं । सूक्तं च प्र वो देवायाग्नये कदा त इति पंच । आ॰ ४. १३. । इति ॥ अभ्युदयेष्टौ स यंतेत्यग्नेः प्रदातुर्याज्या । सूचितं च । स यंता विप्र एषां दीर्घस्ते अस्त्वंकुशः । आ॰ ३. १३. । इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै ।
गमद्देवेभिरा स नो यजिष्ठो बर्हिरा सदत् ॥ १ ॥
प्र । वः । देवाय । अग्नये । बर्हिष्ठं । अर्च । अस्मै ।
गमत् । देवेभिः । आ । सः । नः । यजिष्ठः । बर्हिः । आ । सदत् ॥ १ ॥

यजमानो होत्रादीन्प्रति ब्रूते । हे होत्रादयो वो युष्मत्संबंधिने देवाय द्योतमानायास्मै अस्मिन्कर्मणि स्तुत्यायाग्नये बर्हिष्ठं वृद्धतमं प्रभूतमिदं स्तुतिरूपं स्तोत्रशस्त्रादि वोक्थ्यजातं प्रार्च । उच्चारयत । एवं स्तुतः सोऽग्निर्देवेभिर्यष्टव्यदेवैः सहितः सन् नोऽस्मान्प्रति आगमत् । आगच्छतु । आगत्य च यजिष्ठो यष्टृतमः सोऽग्निर्बर्हिरस्माभिर्वेद्यां स्तीर्णे बर्हिषासदत् । आसीदतु । उपविशतु ॥ बर्हिष्ठं । बर्हितृशब्दात्तुश्छंदसीत्यतिशायन इष्ठन् । अर्च । अर्च पूजायां । भौवादिकः । बहुवचनस्यैकवचनं । निघातः । गमत् । गम्लृ गतौ । अस्य छंदसि लुङ्लिङ्लिट इति लोडर्थे लुङ् । लृदित्वात् च्लेरङ् । नित्यं ङित इतीकारलोपः । पादादित्वान्न निघातः । यजिष्ठः । यष्टृशब्दात्तुश्छंदसीतीष्ठन् । तुरिष्ठेमेयःस्विति तृचो लोपः । नित्स्वरः । सदत् । पूर्ववल्लोडर्थे लुङ् । षद्लृ विशरणगत्यवसादनेष्वित्यस्य लृदित्वादङ् । निघातः ॥

॥ अथ द्वितीया ॥

ऋतावा यस्य रोदसी दक्षं सचंत ऊतयः ।
हविष्मंतस्तमीळते तं सनिष्यंतोऽवसे ॥ २ ॥
ऋतऽवा । यस्य । रोदसी इति । दक्षं । सचंते । ऊतयः ।
हविष्मंतः । तं । ईळते । तं । सनिष्यंतः । अवसे ॥ २ ॥

यस्य पूर्वमंत्रे प्रतिपादितस्याग्ने रोदसी इमे द्यावापृथिव्यौ वशे भवतः । अग्नेः प्रकाशकत्वेन तदधीनप्रकाशके भवत इत्यर्थः । किंच ऊतयो यजमानस्य फलप्रदानेन रक्षितारो देवा दक्षं यस्याग्नेर्बलं सचंते सेवंते । सचंते सेवंते । नि॰ ७. २३. ।

इति यास्कः। अग्नेर्यजमानदत्तहविषां प्रदातृत्वेन तदधीना इत्यर्थः। एवंभूतः सोऽग्निर्ऋतावा सत्यकर्मा। सत्यसंकल्प इत्यर्थः। किंच हविष्मंतः संभृतहविष्का यजमाना हविर्वहनार्थं तमेवाग्निमीळते। स्तुतिरूपाभिर्वाग्भिः पूजयंति। किंच सनिषंतो धनादिलाभमिच्छंतस्तमवसे रक्षणाय तमेवाग्निमाश्रयंते ॥ ऋतावा। ऋतशब्दात्तदस्यास्तीति छंदसीवनिपौ वक्तव्याविति वनिप्। अन्येषामपि दृश्यत इति दीर्घः। वनिपः पित्त्वादनुदात्तत्वे प्रातिपदिकस्वरः। सचंते। सच समवाये। व्यत्ययेनात्मनेपदं। यद्वृत्तयोगादनिघातः। सनिषंतः। सनिर्लाभः। तमिच्छंतः। सुप आत्मनः क्यच्। सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्य इति क्यचि परतः सुगागमः। क्यचः स्वरः ॥

॥ अथ तृतीया ॥

स यं॒ता विप्र॑ ए॒षां स य॒ज्ञाना॒मथा॒ हि षः।
अ॒ग्निं तं वो॑ दुवस्यत॒ दाता॒ यो वनि॑ता म॒घं ॥३॥
सः। यं॒ता। विप्रः॑। ए॒षां॒। सः। य॒ज्ञानां॑। अथ॑। हि। सः।
अ॒ग्निं। तं। वः॒। दु॒व॒स्य॒त॒। दाता॑। यः। वनि॑ता। म॒घं ॥३॥

विप्रो मेधावी कर्माभिज्ञः सोऽग्निरेषां कालापराधेन हविर्निर्वापं कृतवतां यजमानानां यथोक्तकर्मप्रदर्शनेन तत्र प्रवर्तकः। अथ किंच यज्ञानां ज्योतिष्टोमादीनां सोऽग्निर्नियंता फलप्रदानेन नियामकः। हि प्रसिद्धौ। अत एव सर्वस्य नियंता खलु। किंच सोऽग्निर्दाता ज्योतिष्टोमादिकर्मफलदाता मघं महनीयं धनं। मघं रेक्ण इति तन्नामसु पाठात्। तद्धनं वनिता प्रयच्छंश्च भवति। वो युष्मत्संबंधिनं तादृशमग्निं हे ऋत्विजो यूयं दुवस्यत। आहुतिप्रदानेन परिचरत। दुवस्यतिः परिचरणकर्मा नमस्यति दुवस्यतीति तन्नामसु पाठात् ॥ यंता। यम उपरम इत्यस्य तृचि रूपं। ऋदुशनसित्यादिना अनङादेशः। चित्स्वरः। अथा। निपातस्येति दीर्घः। दुवस्यत। दुवः परिचरणं। तदिच्छंतः। सुपः क्यच्। तदंतस्य धातोर्लोटि रूपं। दाता। डुदाञ् दाने। ताच्छीलिकस्तृन्। नित्त्वादाद्युदात्तः ॥

॥ अथ चतुर्थी ॥

स नः॒ शर्मा॑णि वी॒तये॒ऽग्निर्य॑च्छतु॒ शंत॑मा।
यतो॑ नः प्रु॒ष्णव॒द्वसु॒ दि॒वि क्षि॒तिभ्यो॑ अ॒प्स्वा ॥४॥

सः। नः। शर्माणि। वीतये। अग्निः। यच्छतु। शंऽतमा।
यतः। नः। प्रुष्णवत्। वसु। दिवि। क्षितिऽभ्यः। अप्ऽसु। आ ॥४॥

सोऽग्निर्नो हविःप्रदातृभ्योऽस्मभ्यं शंतमा पशुपुत्रादिसमृद्ध्यातिशयेन सुखकराणि। शर्मशब्दो गृहवाची छाया शर्म वर्मेति तन्नामसु पाठात्। तथाविधानि गृहाणि वीतये संभजनायाग्निहोत्रादिकर्मप्राप्त्यर्थं यच्छतु। ददातु। यतो यस्मादग्नेः सकाशात् प्रुष्णवत्समृद्धिमद्दानभोगादिना व्यये सत्यप्यतिशयेन वर्धमानं दिवि द्युलोके क्षितिभ्यो भूलोकादप्स्वंतरिक्षे च समुत्पन्नं वसु तत्तल्लोके असाधारण्येन वर्तमानं धनमा समंतादुपनमति। यतोऽग्नेः प्रसादात् त्रिषु लोकेषु विद्यमानं धनमस्मानागच्छति सोऽग्निरिति पूर्वेणान्वयः ॥ वीतये। वी गतिकांत्यादिषु। मंत्रे वृषेषपचेत्यादिना क्तिन्। उदात्तत्वेन निपातनादुदात्तः। यच्छतु। यम उपरमे। इषुगमियमां छ इति मकारस्य छः। प्रुष्णवत्। प्रुष स्नेहनसेचनपूरणेषु। अस्मादौणादिको नक्प्रत्ययः। तदस्यास्तीति मतुप्। तस्योदात्तताभावश्छांदसः ॥

॥ अथ पंचमी ॥

दीदिवांसमपूर्व्यं वस्वीभिरस्य धीतिभिः।
ऋक्वाणो अग्निमिंधते होतारं विश्पतिं विशां ॥५॥
दीदिऽवांसं। अपूर्व्यं। वस्वीभिः। अस्य। धीतिऽभिः।
ऋक्वाणः। अग्निं। इंधते। होतारं। विश्पतिं। विशां ॥५॥

ऋक्वाणः स्तुतिं कुर्वाणाः शस्त्रिणो होत्रादयो दीदिवांसं दीप्यमानमपूर्व्यं तेजस्वितया प्रतिक्षणमभिनवं होतारं देवानामाह्वातारं विशां विश्पतिं प्रजानामतिशयेन पालयितारं तमग्निं वस्वीभिः प्रशस्ताभिरस्य धीतिभिरग्निविषयस्तुतिलक्षणाभिर्वाग्भिः। यद्वा वस्वीभिर्वसुमद्भिरस्य धीतिभिरेतदुद्देशेन क्रियमाणैः कर्मभिरिंधते। दीपयंति। स्तोत्रकरणहविःप्रदानादिव्यापारेण समृद्धिं कुर्वंति ॥ दीदिवांसं। दिवु क्रीडादावित्यस्य क्वसौ रूपं। तुजादीनामित्यभ्यासस्य दीर्घः। लोपो व्योरिति लोपः। वस्वीभिः। वसुशब्दाद्व्यत्ययेन ङीन्। नित्स्वरः। धीतिभिः। धेट् पाने। क्तिच्क्तौ च संज्ञायामिति क्तिच्। कित्वाद् घुमास्थेतीत्वं। चित्स्वरः। ऋक्वाणः। ऋच्शब्दान्मतुबर्थे वनिप्। अयस्मयादित्वाद्भसंज्ञत्वात्कुत्वं।

पदसंज्ञाभावाज्जश्त्वाभावः । इंधते । ञिइंधी दीप्तौ । विश्पतिं । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । विशां । सावेकाच इति विभक्तेरुदात्तत्वं ॥

॥ अथ षष्ठी ॥

उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः ।
शं नः शोचा मरुद्वृधोऽग्ने सहस्रसातमः ॥ ६ ॥
उत । नः । ब्रह्मन् । अविषः । उक्थेषु । देवऽहूतमः ।
शं । नः । शोच । मरुत्ऽवृधः । अग्ने । सहस्रऽसातमः ॥ ६ ॥

उत अपि च हे अग्ने नो यज्ञकारिणोऽस्मान् ब्रह्मन् ब्रह्मण्यस्माभिः क्रियमाणे स्तोत्रेऽविषः । स्तोत्रविषयन्यूनातिरेकदोषो यथा न भवति तथा पालय । किंच देवहूतमो देवानामाह्वातृतमस्त्वमुक्थेष्वस्माभिः क्रियमाणेष्वाज्यप्रउगादिशस्त्रेष्वविषो । गोपाय । किंच मरुद्वृधो मरुद्भिर्वर्धमानः सहस्रसातमः सहस्रसंख्याकस्य धनस्यातिशयेन दाता त्वं नोऽस्माकं शं ऐहिकमामुष्मिकं च सुखं शोच । दीपय । वर्धयेत्यर्थः ॥ अविषः । अव रक्षणादिष्वित्यस्माल्लेटि सिब्बहुलमिति सिप् । अस्यार्धधातुकत्वादिट् । इतश्च लोप इति सिप इकारलोपः । लेटोऽडाटावित्यडागमः । निघातः । उक्थेषु । वच परिभाषणे । अस्मात्कर्मणि पातॄतुदिवचिरिचीत्यादिना थक् । कित्वात्संप्रसारणं । प्रत्ययस्वरः । देवहूतमः । ह्वयतेः क्विप् । बहुलं छंदसीति संप्रसारणपररूपत्वे । हल इति दीर्घः । कृदुत्तरपदप्रकृतिस्वरत्वं । शोच । शुच दीप्तौ । अयमंतर्भावितण्यर्थः । निघातः । मरुद्वृधः । वृधु वर्धने । इगुपधलक्षणः कः । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । सहस्रसातमः । षणु दाने । अस्य जनसनखनक्रमगमो विडिति विट् । विड्वनोरनुनासिकस्येत्याकारः । कृदुत्तरपदप्रकृतिस्वरः ॥

॥ अथ सप्तमी ॥

नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु ।
द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितं ॥ ७ ॥
नु । नः । रास्व । सहस्रऽवत् । तोकऽवत् । पुष्टिऽमत् । वसु ।
द्युऽमत् । अग्ने । सुऽवीर्यं । वर्षिष्ठं । अनुपऽक्षितं ॥ ७ ॥

अस्मिन्सूक्ते स्तूयमान हे अग्ने सहस्रवत्सहस्रसंख्योपेतं तोकवत्पुत्रपौत्रादिसहितं पुष्टिमत्पोषकृत्। अनेन शरीरस्य क्षीरादिद्वारा बलारोग्यप्रदं गवादिकमुपलक्ष्यते। द्युमत् दीप्तिमत्। अनेन रत्नकनकादिकं परिगृह्यते। सुवीर्यं शोभनसामर्थ्योपेतं तत्तत्कार्येषु व्यवहारयोग्यं वर्षिष्ठमतिशयेन वृद्धं प्रभूतमत एवानुपक्षितं व्यये क्रियमाणेऽप्यनुपक्षीणं। एवंभूतं वसुरत्नकनकपश्वादिलक्षणं धनं नोऽस्मभ्यं नु क्षिप्रमविलंबेन रास्व। दत्स्व॥ नू नः। ऋचि तुनुघमक्ष्विति दीर्घः। रास्व। रा दाने। अस्य लोटि रूपं। व्यत्ययेनात्मनेपदं। अदादित्वाच्छपो लुक्। निघातः। सहस्रवत्। मादुपधाया इति मतुपो वत्वं। कर्दमादित्वान्मध्योदात्तः सहस्रशब्दः। पुष्टिमत्। पुष पुष्टौ। अस्मात् क्तिच्। प्रत्ययस्वरेणांतोदात्तः। ह्रस्वनुड्भ्यामिति मतुप उदात्तत्वं। वर्षिष्ठं। प्रियस्थिरेत्यादिना वृद्धस्य वर्षि इत्यादेशः। नित्स्वरः। अनुपक्षितं। क्षि क्षय इत्यस्य दीर्घाभावान्निष्ठानत्वं न भवति। तत्पुरुषत्वादव्ययपूर्वपदप्रकृतिस्वरः॥

॥ इति तृतीयस्य प्रथमे त्रयोदशो वर्गः॥

आ होतेति सप्तर्चं द्वितीयं सूक्तं। आ होतेत्यनुक्रमणिका। ऋषभस्त्विति तुशब्दप्रयोगादस्यापि सूक्तस्य ऋषभ ऋषिः। अनुक्तत्वात् त्रिष्टुप्। अग्निर्देवता॥ एतदादीनि दश सूक्तानि तृतीयाष्टमवर्जितानि प्रातरनुवाक आश्विनशस्त्रे त्रैष्टुभे छंदसि विनियुक्तानि। अथैतस्या इति खंडे सूचितं। आ होतेति दशानां तृतीयाष्टमे उद्धरेदिति त्रैष्टुभं। आ० ४. १३.। इति॥

॥ तस्मिन्सूक्ते प्रथमा॥

आ होता मंद्रो विदथान्यस्थात्सत्यो यज्वा कवितमः स वेधाः।
विद्युद्रथः सहसस्पुत्रो अग्निः शोचिष्केशः पृथिव्यां पाजो अश्रेत्॥१॥

आ। होता। मंद्रः। विदथानि। अस्थात्। सत्यः। यज्वा। कविऽतमः। सः। वेधाः।
विद्युत्ऽरथः। सहसः। पुत्रः। अग्निः। शोचिःऽकेशः। पृथिव्यां। पाजः। अश्रेत्॥१॥

ऋषभोऽग्निं स्तौति। होता देवानामाह्वाता मंद्रः स्तोतुर्मादयिता सत्यः सत्यकर्मा कवितमोऽतिशयेन मेधावी यज्वा देवानां यष्टा वेधाः सर्वस्य जगतो विधाता। एवंविधमहिमोपेतः सोऽग्निर्विदथान्यस्माभिः क्रियमाणान्यज्ञानास्थात्। आतिष्ठति। प्राप्नोति। किंच विद्युद्रथो विद्योतमानयानोपेतः शोचिष्केशः। शो-

चींषि ज्वालाः केशा यस्य सः। ज्वालामयकेशोपेतः सहसः सूनुर्बलस्य पुत्र एवंभूतः सोऽग्निः पृथिव्यां विस्तीर्णेऽतरिक्षे पाजस्तेजः स्वकीयां प्रभामश्रेत्। श्रयते। प्रापयति। यद्वा पृथिव्यां भूमौ वर्तमानः पाजो बलं सेवते ॥ मंद्रः। मदि स्तुतिमोदमदस्वप्नकांतिगतिषु। अस्मात्स्फायितंचीत्यादिना रक्। इदित्त्वान्नुम्। अस्थात्। ष्ठा गतिनिवृत्तौ। छंदसि लुङ्लङ्लिट इति वर्तमाने लुङ्। गातिस्थेति सिचो लोपः। निघातः। यज्वा। यज देवपूजासंगतिकरणदानेषु। सुयजोर्ङ्वनिबिति ङ्वनिप्। तस्य पित्त्वादनुदात्तत्वे धातुस्वरः। कवितमः। कु शब्दे। कौति कूयते वा। अच इरिति कर्तरि भावे वा इप्रत्ययः। तमपः पित्त्वादनुदात्तत्वे प्रत्ययस्वरः। शोचिष्केशः। शुच दीप्तौ। अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिरितीसिः। प्रत्ययस्वरेणांतोदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। अश्रेत्। श्रिञ् सेवायामित्यस्य छंदसि वर्तमाने लङ्। बहुलं छंदसीति शपो लुक्। सार्वधातुकगुणः। निघातः॥

॥ अथ द्वितीया ॥

अया॑मि ते॒ नम॑उक्तिं जुषस्व॒ ऋता॑व॒स्तुभ्यं॒ चेत॑ते सहस्वः।
वि॒द्वाँ आ व॑क्षि वि॒दुषो॒ नि ष॑त्सि॒ मध्य॒ आ ब॒र्हिरू॒तये॑ यजत्र ॥ २॥

अया॑मि। ते॒। नम॑ःऽउक्तिं। जु॒ष॒स्व॒। ऋत॑ऽवः। तुभ्य॑ं। चेत॑ते। स॒ह॒स्व॒ः।
वि॒द्वान्। आ। व॒क्षि॒। वि॒दुष॑ः। नि। स॒त्सि॒। मध्ये॑। आ। ब॒र्हिः। ऊ॒तये॑। य॒ज॒त्र॒ ॥ २॥

ऋतावः। ऋतं सत्यभूतो यज्ञः। तद्वन् हे अग्ने ते त्वद्विषयां नमउक्तिं नमस्कारवाक्यमहमयामि। प्रेरयामि। उच्चारयामि। हे सहस्वः। सहो बलं। तद्वन्नग्ने चेतते चेतयित्रे कर्मणः प्रज्ञापकाय तुभ्यं नमउक्तिः क्रियते। तां जुषस्व। अस्माभिः क्रियमाणां नमस्कारोक्तिं सेवस्व। किंच विद्वानानुपूर्व्येण देवाह्वानाभिज्ञो विदुषः कर्माभिज्ञानावक्षि। आवह। किंच यजत्र यष्टव्य हे अग्न ऊतयेऽस्माकं रक्षणाय मध्ये बर्हिः स्तीर्णस्य बर्हिषो मध्य आ निषत्सि। आ समंतान्निषीद॥ अयामि। इण् गतौ। भौवादिकः। पादादित्वादनिघातः। जुषस्व। जुषी प्रीतिसेवनयोः। तुदादिः। लोटि रूपं। निघातः। चेतते। चिती संज्ञाने। शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे ततोऽंतोदात्तताभावाच्छतुरनुम इति विभक्तेरुदात्तताभावः। धातुस्वरः। सहस्वः। सहोऽस्येति मतुप्। सकारस्य तसौ मत्वर्थे इति भसंज्ञकत्वाद्रुर्न भवति। मादुपधाया इति मतुपो वत्वं। उगिदचामिति नुम्। हल्ङ्यादिलोपे

नकारस्य मतुवसो रुरिति रुत्वं। आमंत्रितनिघातः। विदुषः। विद ज्ञान इत्येतस्मादुत्तरस्य शतुर्विदेः शतुर्वसुरिति वस्वादेशः। भसंज्ञायां वसोः संप्रसारणं। प्रत्ययस्वरः। सत्सि। षद्लृ विशरणादिषु। लटि बहुलं छंदसीति शपो लुक्। शित्प्रत्ययपरत्वाभावात्सीदादेशाभावः। सदेरप्रतेरिति षत्वं। यजत्र। यज देवपूजादिषु। अमिनक्षियजीत्यादिनात्रन्प्रत्ययः। आमंत्रितनिघातः॥

॥ अथ तृतीया ॥

द्रवतां त उषसा वाजयंती अग्ने वातस्य पथ्याभिरच्छ।
यत्सीमंजंति पूर्व्यं हविर्भिरा वंधुरेव तस्थतुर्दुरोणे ॥३॥

द्रवतां। ते। उषसा। वाजयंती इति। अग्ने। वातस्य। पथ्याभिः। अच्छ।
यत्। सीं। अंजंति। पूर्व्यं। हविःऽभिः। आ। वंधुराऽइव। तस्थतुः। दुरोणे ॥३॥

हे अग्ने वाजयंती वाजमन्नं कुर्वाणे उषसा उषासानक्ते अहोरात्रौ तौ त्वां द्रवतां। अभिगच्छतां। त्वमपि वातस्य वायोः पथ्याभिर्मार्गैरच्छ तावहोरात्रौ शीघ्रमभिगच्छ। यद्यस्मात्कारणादहोरात्राग्न्योः परस्पराभिगमनेनान्योन्यसंबंधस्तस्मादहोरात्रयोः सायंप्रातःकालयोः पूर्व्यं पुरातनं त्वामृत्विजो हविर्भिराज्यादिभिः सीं सर्वतोऽजंति। सिंचंति। किंच वंधुरेव। यथा कूवरस्थानं परस्परसंसक्तेषाद्वयोपेतं तद्वत्संसक्तौ तावहोरात्रौ दुरोणेऽस्माकं गृहेऽग्निहोत्रादिकर्मसिद्ध्यर्थमा आवृत्य पुनःपुनरावर्तमानौ संतौ तस्थतुः। तिष्ठतां॥ द्रवतां। द्रु गतावित्यस्य लोटि रूपं। पथ्याभिः। पथिषु साधव इत्यर्थे तत्र साधुः। पा॰ ४.४.९८.। इति यत्। नस्तद्धित इति टिलोपः। तित्स्वरित इति स्वरितः। तस्थतुः। तिष्ठतेर्लिट्यतुसि रूपं। निघातः॥

॥ अथ चतुर्थी ॥

मित्रश्च तुभ्यं वरुणः सहस्वोऽग्ने विश्वे मरुतः सुम्नमर्चन्।
यच्छोचिषा सहसस्पुत्र तिष्ठा अभि क्षितीः प्रथयंत्सूर्यो नॄन् ॥४॥

मित्रः। च। तुभ्यं। वरुणः। सहस्वः। अग्ने। विश्वे। मरुतः। सुम्नं। अर्चन्।
यत्। शोचिषा। सहसः। पुत्र। तिष्ठाः। अभि। क्षितीः। प्रथयन्। सूर्यः। नॄन् ॥४॥

सहस्वो बलवन् हे अग्ने मित्रश्च वरुणश्च मित्रावरुणौ विश्वे मरुतः सर्वे

देवाश्च तुभ्यं त्वदर्थं सुम्नं स्तोत्रमर्चन्। वहंति। यद्वा सर्वे देवास्तुभ्यं त्वां सुम्नं सुखेनार्चन्। पूजयंति। यद्यस्मात्कारणात्सहसस्पुत्र हे अग्ने सूर्यः सुष्ठु अर्यः स्वामी यद्वा सर्वांतर्यामितया सुष्ठु प्रेरको यद्वा सूर्यः शोभनवीर्योऽभि क्षितीः। क्षितिशब्दो मनुष्यवाची विशः क्षितय इति तन्नामसु पाठात्। मनुष्यानभिलक्ष्य नॄन् मार्गप्रदर्शकत्वेन नेतॄन् आत्मनो रश्मीन् प्रथयन्सर्वतो विस्तारयंस्त्वं शोचिषा दीप्त्या समानः सन् तिष्ठाः। तिष्ठसि। तस्मादेते देवाः पूजयंतीति॥ अर्चन्। अर्च पूजायामित्यस्य लङि रूपं। अडभावश्छांदसः। तिष्ठाः। ष्ठा गतिनिवृत्तावित्यस्य लेटि रूपं। यद्योगादनिघातः। पाघ्रेत्यादिना तिष्ठादेशस्याद्युदात्तत्वेन निपातनादाद्युदात्तः। सूर्यः। राजसूयसूर्येति क्यबंतत्वेन निपातनात्सर्वार्थाः सिद्धा भवंति॥

॥ अथ पंचमी ॥

वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ॥ ५॥

वयं। ते। अद्य। ररिम। हि। कामं। उत्तानऽहस्ताः। नमसा। उपऽसद्य।
यजिष्ठेन। मनसा। यक्षि। देवान्। अस्रेधता। मन्मना। विप्रः। अग्ने ॥ ५॥

हे अग्ने उत्तानहस्ता हविःस्वीकरणादुत्तानपाणयो वयं कामं कमनीयं पुरोडाशादिहविस्ते तुभ्यमद्येदानीमस्मिन्कर्मणि ररिम। दद्मः। नमसा नमस्कारेणोपसद्य प्रसन्नो भूत्वा यजिष्ठेन यष्टृतमेन यागेच्छावता मनसांतःकरणेन देवान्यक्षि। यजनीयान्देवान्यज। पूजय। किंच विप्रो मेधावी कर्माभिज्ञस्त्वमस्रेधताक्षीणेन प्रभूतेन मन्मना मंतव्येन स्तोत्रेण देवान्पूजय॥ अद्य। सद्यः परुत्परार्यैषम इत्यादिना निपातितः। अंतोदात्तश्च। ररिम। रा दान इत्यस्य वर्तमाने लिटि परस्मैपदानां णलतुः। पा॰ ३.४.८२.। इत्यादिना मसो मादेशः। क्रादिनियमादिडागमः। आतो लोप इटि चेत्याकारलोपः। हियोगादनिघातः। आगमा अनुदात्ता इतीटोऽनुदात्तत्वात्प्रत्ययस्वरः। उपसद्य। षद्लृ विशरणगत्यवसादनेषु। अस्य क्त्वा। समासेऽनञ्पूर्वे ल्यबिति ल्यप्। लित्स्वरः। यक्षि। यज देवपूजासंगतिकरणदानेषु। लोटि बहुलं छंदसीति शपो लुक्। षत्वकत्वे। सिपो ह्यादेशाभावश्छांदसः। अस्रेधता। स्रिधिः क्षयार्थः। तत्पुरुषेति नञ्स्वरः॥

॥ अथ षष्ठी ॥

त्वद्धि पुत्र सहसो वि पूर्वीर्देवस्य यंत्यूतयो वि वाजाः ।
त्वं देहि सहस्रिणं रयिं नोऽद्रोघेण वचसा सत्यमग्ने ॥ ६ ॥
त्वत् । हि । पुत्र । सहसः । वि । पूर्वीः । देवस्य । यंति । ऊतयः । वि । वाजाः ।
त्वं । देहि । सहस्रिणं । रयिं । नः । अद्रोघेण । वचसा । सत्यं । अग्ने ॥ ६ ॥

सहसः पुत्र बलस्य पुत्र हे अग्ने देवस्य देवनशीलस्य कर्मकरणप्रवृत्तस्य यजमानस्य त्वत् त्वत्तः सकाशात्पूर्वीः प्रभूता ऊतयो विघ्नपरिहारेण कर्मपरिपालनादिरूपा रक्षा वि यंति हि। विविधं गच्छंति खलु । तमिमं यजमानं प्राप्नुवंति । तथा वाजा अन्नानि वियंति । एनं यजमानं प्राप्नुवंति । किंच हे अग्ने त्वं सहस्रिणं सहस्रसंख्याकं रयिं धनं नोऽस्मभ्यं देहि । तथाद्रोघेण द्रोहरहितेन पापशून्येन वचसा वाक्येन युक्तं सत्यं सत्यशीलं सन्मार्गे प्रवर्तमानं पुत्रं च देहि । प्रयच्छ ॥ त्वत् । युष्मच्छब्दस्य पंचम्येकवचने त्वादेशः । ङसेरेकवचनस्य च । पा॰ ७.१.३२. । इत्यदादेशः । एकादेशस्वरः । पुत्र सहसः । परमपि छंदसीति परांगवद्भावाद्द्वयोः सर्वानुदात्तत्वं । देहि । डुदाञ् दान इत्यस्य लोटि घ्वसोरेद्धाविति धातोरेत्वमभ्यासलोपश्च । निघातः । अद्रोघेण । द्रुह जिघांसायां । घञ् । द्रोघः । घकारश्छांदसः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥

॥ अथ सप्तमी ॥

तुभ्यं दक्ष कविक्रतो यानीमा देव मर्तासो अध्वरे अकर्म ।
त्वं विश्वस्य सुरथस्य बोधि सर्वं तदग्ने अमृत स्वदेह ॥ ७ ॥
तुभ्यं । दक्ष । कविक्रतो इति कविऽक्रतो । यानि । इमा । देव । मर्तासः । अध्वरे । अकर्म ।
त्वं । विश्वस्य । सुऽरथस्य । बोधि । सर्वं । तत् । अग्ने । अमृत । स्वद । इह ॥ ७ ॥

दक्ष समृद्धतया सामर्थ्योपेत कविक्रतोऽतींद्रियविषयप्रज्ञोपेत सर्वज्ञ देव दीप्यमान हे अग्ने मर्तासो यजमाना वयं तुभ्यं त्वदर्थं यानीमा यानीमानि हवींष्यध्वरे यज्ञेऽकर्म। हविस्त्यागमकार्ष्म। त्वं च सुरथस्य शोभनयानोपेतस्य विश्वस्य सर्वस्य यजमानस्य बोधि । गोपायिता भवामीति बुध्यस्व । अमृत मरणधर्मरहिताग्न इहास्मिन्कर्मण्यस्माभिर्दत्तं तत्सर्वं हविः स्वद । आस्वादय ॥ अकर्म ।

डुकृञ् करण इत्यस्य लङि छंदस्युभयथेति मस आर्द्धधातुकत्वेन ङित्त्वाभावाद्गुणः । यद्वृत्तयोगादनिघातः । बोधि । बुध अवगमने । छंदसि लुङ्किति लोडर्थे लुङ् । तिङां तिङो भवंतीति सिपस्त्रादेशः । दीपजनबुधेत्यादिना कर्तरि चिण् । चिणो लुगिति तप्रत्ययस्य लोपः । अडभावश्छांदसः । स्वद आस्वादने । अंतर्भावितण्यर्थः । लोटि रूपं । निघातः ॥

॥ इति तृतीयस्य प्रथमे चतुर्दशो वर्गः ॥

वि पाजसा पृथुनेति सप्तर्चं तृतीयं सूक्तं त्रैष्टुभमाग्नेयं । अत्रेयमनुक्रमणिका । वि पाजसा कात्योत्कीलस्त्विति । कतगोत्रोत्पन्नोत्कीलो नाम ऋषिः ॥ प्रातरनुवाकाश्विनशस्त्रयोराहोतेत्यादिसूक्तदशकं विनियुक्तं तत्रेदं च द्वितीयं सूक्तं ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ ॥ १ ॥

वि । पाजसा । पृथुना । शोशुचानः । बाधस्व । द्विषः । रक्षसः । अमीवाः ।
सुऽशर्मणः । बृहतः । शर्मणि । स्यां । अग्नेः । अहं । सुऽहवस्य । प्रऽनीतौ ॥ १ ॥

उत्कीलः स्तौति । हे अग्ने पृथुना विस्तीर्णेन पाजसा तेजसा शोशुचानोऽत्यर्थं दीप्यमानस्त्वं द्विषः कर्मानुष्ठानविघ्नकारिणः शत्रून् वि बाधस्व । विशेषेण नाशय । तथामीवा रोगराहित्येन सामर्थ्योपेतानि रक्षसः । उभयत्र सुब्व्यत्ययः । तानि रक्षांसि बाधस्व । कर्मविघ्नकारीणि तान्यपनुदस्व । यद्वामीवा आभिमुख्येनागमनपरागमनपराः पिशाचिकाश्च बाधस्व । सुशर्मणः स्वर्गादिलक्षणशोभनसुखहेतोर्बृहतो महतः शत्रुविजयेन प्राप्तमहिम्नः सुहवस्य सुष्ठ्वाह्वानोपेतस्याग्नेः शर्मण्यस्माकं सुखहेतौ प्रणीतावुत्तरवेद्यादिस्थानेषु प्रणयने । प्रकर्षेण नयनं तत्र तत्रानीय प्रक्षेपः । एवंभूते तव प्रणयनेऽहं स्यां । अग्निप्रणयनपूर्वके ऋत्वनुष्ठाने भवेयं ॥ पाजसा । पा रक्षणे । असुन्नित्यनुवृत्तौ पातेर्बले जुट् चेत्यसुन् । जुडागमः । नित्त्वादाद्युदात्तः । पृथुना । प्रथ प्रख्याने । उदित्यनुवृत्तौ प्रथिम्रदिभ्रस्जां संप्रसारणमित्युप्रत्ययः । तत्संनियोगेन संप्रसारणं । प्रत्ययस्वरः । शोशुचानः । शुच दीप्तावित्यस्य यङ्लुकि गुणो यङ्लुकोरित्यभ्यासस्य गुणः । व्यत्ययेन शानच् । चर्करीतस्यादादिवद्भावाच्छपो लुक् । चित्त्वादंतोदात्तत्वे प्राप्तेऽभ्यस्तानामादिरि-

त्याद्युदात्तत्वं। बाधस्व। बाधृ लोडन इत्यस्य लोटि रूपं। पादादित्वान्निघाताभावः। सुशर्मणः। शृ हिंसायां। दुःखं शृणातीत्यौणादिको मनिन्। सोर्मनसी इत्युत्तरपदाद्युदात्तत्वं। स्यां। अस भुवीत्यस्य लिङि यासुट् परस्मैपदेष्वित्यादिना यासुट्। लिङः सलोप इति सलोपः। यासुटो ङित्त्वात् श्नसोरल्लोपः। निघातः॥

॥ अथ द्वितीया ॥

त्वं नो॑ अ॒स्या उ॒षसो॒ व्यु॑ष्टौ॒ त्वं सूर॒ उदि॑ते बोधि गो॒पाः।

जन्मे॑व॒ नित्यं॒ तन॑यं जुषस्व॒ स्तोमं॑ मे अग्ने त॒न्वा॑ सुजात ॥२॥

त्वं। नः॒। अ॒स्याः। उ॒षसः॑। वि॒ऽउ॑ष्टौ। त्वं। सूरे॑। उदि॑ते। बो॒धि॒। गो॒पाः।

जन्म॑ऽइव। नित्यं॑। तन॑यं। जु॒ष॒स्व॒। स्तोमं॑। मे॒। अ॒ग्ने॒। त॒न्वा॑। सु॒जा॒त॒ ॥२॥

हे अग्ने त्वमस्या अद्य वर्तमानाया उषसो व्युष्टौ व्युच्छने प्रकाशने सूरे सूर्य उदिते च सति नोऽग्निहोत्रादिकर्मणि प्रवृत्तानामस्माकं गोपा गोपायिता भवामीति बोधि। बुध्यस्व। केचित्सूर्योदयात्प्रागग्निहोत्रं जुह्वति केचिदुदिते तस्मिञ्जुह्वति। तेषामुभयेषां पालयिता भवेत्यर्थः। तन्वा सुजात ज्वालापरिवृतेन शरीरेण सुष्ठु जात देदीप्यमान। अथवा तन्वा सुजात आत्मनैव सुजातः स्वयंभूरित्यर्थः। तादृशस्त्वं मे मदीयं स्तोमं त्रिवृत्पंचदशादिलक्षणं स्तोत्रं नित्यं जुषस्व। तत्र दृष्टांतः। जन्मेवेति। यथा जन्म जनकः पितौरसं तनयं पुत्रं परिष्वंगादिभिः सेवते तद्वदस्माभिः क्रियमाणमिमं सेवस्व॥ व्युष्टौ। उच्छी विवासे। तमो विवास्यतेऽनयेति करणे क्तिन्। व्रश्चादिना षत्वं। तादौ च निति कृत्यताविति गतेः प्रकृतिस्वरत्वं। गोपाः। गुपू रक्षणे। गुपूधूपविच्छिपणिपनिभ्य इत्यायप्रत्ययः। तदंताद्धातोः क्विप्। अतो लोप इत्यकारलोपः। लोपो व्योरिति यलोपः। धातुस्वरः। जुषस्व। जुषी प्रीतिसेवनयोरित्यस्य लोटि रूपं। निघातः॥

॥ अथ तृतीया ॥

त्वं नृ॒चक्षा॑ वृष॒भानु॑ पू॒र्वीः कृ॒ष्णास्व॑ग्ने अरु॒षो वि भा॑हि।

वसो॒ नेषि॑ च॒ पर्षि॒ चात्यंहः॑ कृ॒धी नो॑ रा॒य उ॒शिजो॑ यविष्ठ ॥३॥

त्वं। नृ॒ऽचक्षाः॑। वृ॒ष॒भ॒। अनु॑। पू॒र्वीः। कृ॒ष्णासु॑। अ॒ग्ने॒। अ॒रु॒षः। वि। भा॒हि॒।

वसो॒ इति॑। नेषि॑। च॒। पर्षि॑। च॒। अति॑। अंहः॑। कृ॒धि। नः॒। रा॒ये। उ॒शिजः॑। य॒वि॒ष्ठ॒ ॥३॥

वृषभ कामानां वर्षितर्हे अग्ने नृचक्षा नृणां मनुष्याणां शुभाशुभकर्मणोर्द्रष्टा कृष्णासु रात्रिष्वरुष आरोचमानस्त्वमनु अनुक्रमेण पूर्वीर्बह्वीर्ज्वाला वि भाहि। विशेषेण प्रकाशय। वसो सर्वस्य प्रकाशप्रदानेन स्वस्वस्थानेषु वासयितरग्ने त्वं नोऽस्मान्नेषि। कर्मानुरूपफलानि च प्रापय। अंहोऽस्माकं दारिद्र्यलक्षणं पापमतिपर्षि च। अतिपारय। निवारयेति यावत्। किंच यविष्ठ युवतम हे अग्ने नोऽस्मान्राये धनायोशिजः कामयमानान्कृधि। कुरु। अभिलषितफलप्रदानेन प्राप्तकामान्कुर्वित्यर्थः॥ नृचक्षाः। चक्षिङ् व्यक्तायां वाचि। अयमत्र दर्शने वर्तते। असुन्नित्यनुवृत्तौ चक्षेर्बहुलं शिच्चेत्यसुन्। शित्त्वाभावात् ख्याञादेशाभावः। कृदुत्तरपदप्रकृतिस्वरः। वृषभ। वृष सेचने। अभजित्यनुवृत्तौ ऋषिवृषिभ्यां किदित्यभच्। कित्त्वाद्गुणाभावः। अपादादित्वान्निघातः। पूर्वीः। पुरुशब्दस्य वोतो गुणवचनादिति ङीष्। आद्यस्योकारस्य दीर्घश्छांदसः। प्रत्ययस्वरेणांतोदात्तः। भाहि। भा दीप्तौ। अंतर्भावितण्यर्थः। लोटि रूपं। वसो। वस निवासे। उरित्यनुवृत्तौ शृस्वृस्निहित्रप्यसिवसीत्यादिना उप्रत्ययः। पादादित्वान्न निघातः। षाष्ठिकमाद्युदात्तत्वं। नेषि। णीञ् प्रापणे। छंदसि लोडर्थे लट्। बहुलं छंदसीति शपो लुक्। आमंत्रितं पूर्वमविद्यमानवदित्यामंत्रितस्याविद्यमानवत्त्वेन पादादित्वान्न निघातः। पर्षि। पॄ पालनपूरणयोः। चादिषु चेति न निघातः। कृधि। डुकृञ् करण इत्यस्य लोटि सेर्ह्यपिच्चेति हिरादेशः। तस्य श्रुशृणुपृकृवृभ्यश्छंदसीति धिरादेशः। बहुलं छंदसीत्युप्रत्ययस्य लुक्। पादादित्वान्न निघातः। राये। रा दाने। रातेर्डैरिति डैप्रत्ययः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। उशिजः। वश कांतौ। वशेः किच्चेतीजिप्रत्ययः। कित्त्वात्संप्रसारणं। प्रत्ययस्वरः। यविष्ठ। युवशब्दादतिशायन इष्ठन्प्रत्ययः। स्थूलदूरयुवेत्यादिना यणादेः परस्य लोपः पूर्वस्य च गुणः। आमंत्रितत्वान्निघातः॥

॥ अथ चतुर्थी ॥

अषा॑ळ्हो अग्ने वृष॒भो दि॑दीहि॒ पुरो॒ विश्वाः॒ सौभ॑गा सं॒जिगी॒वान्।
य॒ज्ञस्य॑ ने॒ता प्र॑थ॒मस्य॑ पा॒योर्जात॑वेदो बृ॒ह॒तः सु॑प्रणीते॥४॥

अषा॑ळ्हः। अ॒ग्ने॒। वृ॒ष॒भः। दि॒दी॒हि॒। पुरः॑। विश्वाः॑। सौभ॑गा। सं॒ऽजि॒गी॒वान्।
य॒ज्ञस्य॑। ने॒ता। प्र॒थ॒मस्य॑। पा॒योः। जात॑ऽवेदः। बृ॒ह॒तः। सु॒ऽप्र॒णी॒ते॒॥४॥

हे अग्ने अषाळ्हः शत्रुभिरसोढोऽपराजितः। स्वयं शत्रूञ्जयतीत्यर्थः। वृषभः

कामानां वर्षयिता एवंभूतस्त्वं विश्वाः सर्वाः पुरः शत्रूणां पुरीः सौभगा तत्त्यानि शोभनान्युत्तमानि धनानि च संजिगीवान् सम्यग्जयन् दीदिहि । सर्वतो ज्वालाभिर्दीप्यस्व । सुप्रणीते शोभनप्रणयन जातवेदो जातप्रज्ञ हे अग्ने बृहत उपदिष्टातिदिष्टद्विविधेतिकर्तव्यताकलापेन महतः पायोस्तत्फलप्रदानेन रक्षकस्य प्रथमस्य मुख्यतया प्रथमं क्रियमाणस्य। एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम इति श्रुतेः । तादृशस्य ज्योतिष्टोमाख्यस्य नेता हविर्वहनदेवताह्वानादिक्रियाया निर्वाहको भव ॥ अषाळ्हः । षह मर्षण इत्यस्य निष्ठायां हो ढ इति ढकारः । झषस्तथोर्धोऽध इति क्तस्य धकारः । ष्टुत्वेन ढः । ढलोपे कृते ढ्रलोपे पूर्वस्य दीर्घ इति दीर्घः । ओत्वाभावश्छांदसः । सहेः साडः स इति सकारस्य मूर्धन्यादेशः । अव्ययपूर्वपदप्रकृतिस्वरे नञ्स्वरः । वृषभः । वृष सेचने । ऋषिवृषिभ्यां किदित्यभच् । चित्स्वरः । दीदिहि । दिवु क्रीडादावित्यस्य यङ्लुकि लोटो मध्यमैकवचने संज्ञापूर्वको विधिरनित्य इत्यभ्यासस्य गुणाभावः । सर्वे विधयश्छंदसि विकल्प्यंत इति पूर्वत्रासिद्धमित्यस्याप्रवृत्तौ परत्वाद्धलि चेति दीर्घत्वं । पश्चाद्वलोपः । सौभगा । सुभगान्मंत्र इत्युद्गात्रादिषु पाठाद्भावार्थेऽञ् । हृद्भगसिंध्वंत इति पूर्वपदस्य वृद्धिः । उत्तरपदस्य वृद्धिर्न भवति सर्वविधीनां छंदसि विकल्पितत्वात्। सुपां सुलुगिति सुपो डादेशः। तेन च सौभाग्येन धनान्युपलक्ष्यंते । जित्त्वादाद्युदात्तः । संजिगीवान् । जि जये । छंदसि लिट् । तस्य क्वसुः । सन्लिटोर्जेरिति कवर्गादेशः । प्रत्ययस्वरः । दीर्घश्छांदसः । पायोः । पा रक्षणे। कृवापाजिमीत्यादिना उण्प्रत्ययः। आतो युक् चिण्कृतोरिति युगागमः । प्रत्ययस्वरः ॥

॥ अथ पंचमी ॥

अच्छिद्रा शर्म जरितः पुरूणि देवाँ अच्छा दीद्यानः सुमेधाः ।
रथो न सस्निरभि वक्षि वाजमग्ने त्वं रोदसी नः सुमेके ॥ ५ ॥

अच्छिद्रा । शर्म । जरितरिति । पुरूणि । देवान् । अच्छ । दीद्यानः । सुऽमेधाः ।
रथः । न । सस्निः । अभि । वक्षि । वाजं । अग्ने । त्वं । रोदसी इति । नः । सुमेके इति सुऽमेके ॥ ५ ॥

जरितः सर्वस्य जगतोऽंतकाले जरयितर्हे अग्ने सुमेधाः शोभनप्रज्ञोपेतो दीद्यानः स्वतेजसा प्रकाशमानस्त्वं देवान् यष्टव्यान्देवान् अच्छाभिलक्ष्य तदुद्देशेन क्रियमाणानि पुरूणि शर्म स्वर्गादिसुखसाधनभूतान्यग्निहोत्रादीनि कर्मा-

ण्यच्छिद्रा अच्छिद्राणि कुरु। कर्तृकर्मसाधनवैकल्यराहित्येन संपूर्णानि कुरु। किंच हे अग्ने त्वं सस्निः संनिरुद्धः स्वकीयं सततगमनं संनिरुध्य हविःप्रक्षेपपर्यंतमत्र वर्तमानस्त्वं वाजं नोऽस्माभिर्दीयमानं हविर्लक्षणमन्नमभि देवानभिलक्ष्य वक्षि। वह। प्रापय। तत्र दृष्टांतः। रथो न रथ इव। यथा रथो धान्यादिकमूढ्वा तत्स्वामिनं प्रापयति तद्वत्। किंच त्वमिमे रोदसी द्यावापृथिव्यौ सुमेके शोभनरूपोपेते स्वकीयप्रभाभिः प्रकाशयुक्ते कुरु॥ दीद्यानः। दीदेतिः दीप्तिकर्मा। तस्माच्छानच्। अभ्यस्तानामादिरित्याद्युदात्तत्वं। सुमेधाः। नित्यमसिच् प्रजामेधयोरित्यसिच्प्रत्ययः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। सस्निः। षस स्वप्ने। अस्मादौणादिको निन्। निन्वादाद्युदात्तः। वक्षि। वह प्रापणे। अस्य लोटः सिपि बहुलं छंदसीति शपो लुक्। ढत्वकत्वे। हिरादेशश्छांदसत्वान्न भवति। निघातः॥

॥ अथ षष्ठी ॥

प्र पी॑पय वृषभ जिन्व वाजा॒नग्ने॒ त्वं रोद॑सी नः सु॒दोघे॑।

दे॒वेभि॑र्देव सु॒रुचा॑ रुचा॒नो मा नो॒ मर्त॑स्य दुर्म॒तिः परि॑ ष्ठात्॥६॥

प्र। पी॒प॒य॒। वृ॒ष॒भ॒। जिन्व॑। वाजा॑न्। अग्ने॑। त्वं। रोद॑सी॒ इति॑। नः॒। सु॒दोघे॒ इति॑ सु॒ऽदोघे॑।

दे॒वेभिः॑। दे॒व॒। सु॒ऽरुचा॑। रु॒चा॒नः। मा। नः॒। मर्त॑स्य। दुः॒ऽम॒तिः। परि॑। स्था॒त्॥६॥

वृषभ कामानां वर्षितर्हे अग्ने त्वं नोऽस्माकं प्रपीपय। अभिलषितफलानि वर्धय। वाजानन्नानि च जिन्व। प्रयच्छ। किंच देव दीप्यमान हे अग्ने सुरुचा शोभनदीप्त्या रुचानः शोभमानस्त्वं देवेभिर्यजनीयदेवैः सहितोऽस्माकं रोदसी इमे द्यावापृथिव्यौ सुदोघे वृष्टिद्वाराभिमतफलप्रदानेन सुष्ठु दोग्ध्यौ कुरु। तथा मर्तस्य शत्रोर्दुर्मतिर्दुष्टबुद्धिप्रयुक्तोऽभिभवो नोऽस्मान् मा परि ष्ठात्। परितो मा गच्छतु॥ पीपय। पा पान इत्येतस्य ण्यंतस्य लुङि चङि द्विर्वचनाभ्यासदीर्घौ। सिपो लोपश्छांदसः। जिन्व। अवि जिवि धिवि प्रीणनार्थाः। एतस्य लोटि इदित्त्वान्नुम्। शप्। अतो हेरिति हेर्लुक्। आमंत्रितस्याविद्यमानवत्त्वेन अतिङ उत्तरत्वाभावान्न निघातः। सुदोघे। दोहनं दोघः। भावे घञ्। कुत्वं छांदसं। आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं। दुर्मतिः। मनु अवबोधने। मन्यत इति मतिर्बुद्धिः। कर्तरि क्तिच्। दुष्टा बुद्धिः। अव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते कृदुत्तरपदप्रकृतिस्वरत्वं॥

॥ अथ सप्तमी ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ७ ॥

इळां। अग्ने। पुरुऽदंसं। सनिं। गोः। शश्वत्ऽतमं। हवमानाय। साध।
स्यात्। नः। सूनुः। तनयः। विजाऽवा। अग्ने। सा। ते। सुऽमतिः। भूतु। अस्मे इति ॥ ७ ॥

उतो पितृभ्यामित्यस्मिन्वर्गे व्याख्यातेयमृक् ॥

॥ इति तृतीयस्य प्रथमे पंचदशो वर्गः ॥

अयमग्निरिति चतुर्थं षडृचं सूक्तमाग्नेयं। अत्रानुक्रमणिका। अयमग्निः षट् प्रगाथमिति। उत्कीलस्त्विति तुशब्दप्रयोगादस्यापि सूक्तस्य स एव ऋषिः। अत्र विषमसंख्यानामृचां बृहती छंदस्तृतीयपादस्य द्वादशाक्षरत्वात्। समसंख्यानां तु सतोबृहती प्रथमतृतीयपादयोर्द्वादशाक्षरत्वात्। उक्तं च। अयुजौ जागतौ सतोबृहतीति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

अयमग्निः सुवीर्यस्येशे महः सौभगस्य।
राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानां ॥ १ ॥

अयं। अग्निः। सुऽवीर्यस्य। ईशे। महः। सौभगस्य।
रायः। ईशे। सुऽअपत्यस्य। गोऽमतः। ईशे। वृत्रऽहथानां ॥ १ ॥

उत्कीलः स्तौति। अयं यजनीयत्वेनांगुल्या निर्दिश्यमानोऽग्निः सुवीर्यस्य शोभनसामर्थ्योपेतस्य महो महतः सौभगस्य सौभाग्यस्येशे। ईष्टे। ईश्वरो भवति। सर्वस्य बलारोग्यहेतुतया सौभाग्यकारित्वात्। तथा गोमतो गवादिपशुयुक्तस्य स्वपत्यस्य शोभनापत्यस्य रायो धनस्येशे। ईष्टे। पुत्रपश्वाद्युद्देशेन क्रियमाणकर्मफलसंपादकत्वेन तत्स्वामित्वात्। तथैवंभूतोऽग्निर्वृत्रहथानां। हननं हथः। शत्रुभूतपापविनाशनानामपीशे। ईष्टे। त्वयि समर्पितकर्मणामस्माकं त्वत्प्रसादात्पापक्षयो भवतीति तस्यापि स्वामी ॥ ईशे। ईश ऐश्वर्ये। अदादित्वाच्छपो लुक्। लोपस्त आत्मनेपदेष्विति तलोपः। पादादित्वादनिघातः। सौभगस्य। सुभगस्य भावः सौभगं। उद्गात्रादित्वादञ्। सर्वविधीनां छंदसि विकल्पितत्वादत्र हृद्भगेत्या-

दिना प्राप्नाया उत्तरपदवृद्धेरभावः। रायः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। ईशे। निघातः। स्वपत्यस्य। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। वृत्रहथानां। वृतु वर्तने। अस्मात् स्फायितंचिवंचीत्यादिना रक्प्रत्ययः। कित्त्वादगुणः। हन हिंसागत्योरित्यस्मात् हनिकुषीनीरमिकाशिभ्य इति क्थन्। कित्त्वादनुनासिकलोपः। कृदुत्तरपदप्रकृतिस्वरः॥

॥ अथ द्वितीया ॥

इमं नरो मरुतः सश्चता वृधं यस्मिन्रायः शेवृधासः।

अभि ये संति पृतनासु दूढ्यो विश्वाहा शत्रुमादभुः॥२॥

इमं। नरः। मरुतः। सश्चत। वृधं। यस्मिन्। रायः। शेऽवृधासः।

अभि। ये। संति। पृतनासु। दुःऽध्यः। विश्वाहा। शत्रुं। आऽदभुः॥२॥

नरः कर्मणां नेतारो हे मरुतो देवा यूयं वृधं पशुपुत्रादिवर्धकमिममस्माभिः स्तूयमानमिममग्निं सश्चत। हविरानयनार्थं सेवध्वं। कीदृशोऽग्निरित्याकांक्षायामाह। यस्मिन्देवे रायो धनानि शेवृधासो दानभोगाद्युपयोगेन सुखस्य वर्धकानि संति। ये च देवाः पृतनासु सेनासु तदुपलक्षितेषु संग्रामेषु दूढ्यो दुष्टध्यानोपेतानात्मनो हिंसकाञ्छत्रूनभिसंति। अभिभवंति। ये च विश्वाहा विश्वान्यहानि यस्मिन्नखंडे काले तस्मिन्सर्वदा शत्रुमात्मनो द्वेष्टारमादभुः। आदभ्नुवंति। हिंसंति। एवंभूतास्ते सर्वे मरुतो यूयं तमिममग्निं सेवध्वमिति पूर्वेणान्वयः॥ सश्चत। षस्ज संग इत्यस्माल्लोटि रूपं। जकारस्य व्यत्ययेन चकारः। निघातः। शेवृधासः। वर्णव्यत्ययः। शं सुखं वर्धयतीति। असुन्नित्यसुन्। गुणाभावश्छांदसः। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यौणादिकसूत्रात् पूर्वपदप्रकृतिस्वरः। संति। असु भुवि। दूढ्यः। ध्यै चिंतायां। अन्येभ्योऽपि दृश्यत इति क्विप्। दृशिग्रहणात्संप्रसारणं। दुरो दाशनाशदभध्येषूत्वं वक्तव्यमुत्तरपदादेश्च ष्टुत्वं चेति ऊत्वटत्वे। छंदस्युभयथेति शसीयङादेशं बाधित्वा यणादेशः। कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तः। शसः सुप्त्वादनुदात्तत्वे कृते उदात्तस्वरितयोर्यण इति शसः स्वरितत्वं। आदभुः। दन्भु दंभे। अस्माल्लिट्युसि रूपं। श्रंथिग्रंथिदंभिस्वंजीनामुपसंख्यानमिति किद्वद्भावादनुनासिकलोपः। द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः। यद्वृत्तयोगादनिघातः। सति शिष्टस्वरो बलीयानिति प्रत्ययस्वरः॥

॥ अथ तृतीया ॥

स त्वं नो॑ रा॒यः शि॑शीहि॒ मीढ्वो॑ अग्ने सु॒वीर्य॑स्य ।
तुवि॑द्युम्न॒ वर्षि॑ष्ठस्य प्र॒जाव॑तोऽनमी॒वस्य॑ शु॒ष्मिणः॑ ॥ ३ ॥
सः । त्वं । न॒ः । रा॒यः । शि॒शी॒हि॒ । मीढ्वः॒ । अ॒ग्ने॒ । सु॒ऽवीर्य॑स्य ।
तुवि॑ऽद्युम्न । वर्षि॑ष्ठस्य । प्र॒जाऽव॑तः । अ॒न॒मी॒वस्य॑ । शु॒ष्मिणः॑ ॥ ३ ॥

हे अग्ने स तथाविधस्त्वं नोऽस्मान्रायः । तृतीयार्थे षष्ठी । धनेन शिशीहि । तीक्ष्णान्कुरु । अस्मान्धनसमृद्धान्कुरु । किंच तुविद्युम्न बहुधनोपेत अत एव मीढ्वो मीढ्वन् कामानां सेक्तः हे अग्ने त्वं वर्षिष्ठस्य वृद्धतमस्य प्रभूतस्य प्रजावतोऽपत्ययुक्तस्यानमीवस्यारोग्यहेतोरत एव शुष्मिणो बलहेतोः सुवीर्यस्य शोभनसामर्थ्ययुक्तस्यान्नस्य संबंधिनोऽस्मान्कुरु । यद्वा । एतत्सर्वं विशेषणतया योजनीयं । एताः षष्ठ्यस्तृतीयार्थे । एतदुक्तं भवति । धनेनापत्यारोग्यशरीरबलोपेतेनान्नेनास्मान्समृद्धान्कुर्विति ॥ शिशीहि । शिञ् निशान इत्यस्य लोटि बहुलं छंदसीति विकरणस्य श्लुः । वा छंदसीति विकल्पेन ङित्त्वादङितश्चेति हेर्धिरादेशो न भवति । दीर्घश्छांदसः । निघातः । मीढ्वः । मिह सेचन इत्यस्य क्वसौ दाश्वान् साह्वान् मीढ्वांश्चेति निपातनात् ढत्वं उपधादीर्घश्च । संबुद्धौ नुमि कृते हल्ङ्यादिलोपे संयोगांतलोपे च कृते मतुवसो रुः संबुद्धौ छंदसीति रुः । पादादित्वादाद्युदात्तः ॥

॥ अथ चतुर्थी ॥

च॒क्रिर्यो विश्वा॒ भुव॑ना॒भि सा॑स॒हिश्च॒क्रिर्दे॒वेष्वा दुवः॑ ।
आ दे॒वेषु॒ यत॑त॒ आ सु॒वीर्य॒ आ शंस॑ उ॒त नृ॒णां ॥ ४ ॥
च॒क्रिः । यः । विश्वा॑ । भुव॑ना । अ॒भि । स॒स॒हिः । च॒क्रिः । दे॒वेषु॑ । आ । दुवः॑ ।
आ । दे॒वेषु॑ । यत॑ते । आ । सु॒ऽवीर्ये॑ । आ । शंसे॑ । उ॒त । नृ॒णां ॥ ४ ॥

योऽयमग्निश्चक्रिः सर्वस्य जगतः कर्ता स च विश्वा भुवना विश्वानि भुवनान्यभि अभिविशति । तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः । चक्रिः कर्ता सोऽग्निः सासहिः पुरोडाशादिहविर्भारसहनशीलः सन् दुवोऽस्माभिर्दत्तं हविर्देवेषु यजनीयदेवेष्वा । आनयति । स चाग्निर्देवेषु देवनशीलेषु स्तोतृष्वा यतते । आभि-

मुख्येन गच्छति। यद्वा विश्वानि भुवनानि चक्रिरभिसासहिरभिभवनशीलः। आकारश्चार्थे। देवेषु च दुवः परिचरणं चक्रिः कर्ता। य एवंभूतः स आयतत इत्यादि पूर्ववत्। उत अपि च नृणां यज्ञस्य नेतॄणां शस्त्रिणां शंसे। शंसनं शंसः शस्त्रं। तस्मिन् सोऽग्निरागच्छति। तथा नृणां मनुष्याणां सुवीर्ये शोभनवीर्योपेतयुद्धे तद्रक्षणार्थमागच्छति। अनेनाग्नेः सर्वव्यापकता प्रतिपादिता भवति॥ चक्रिः। डुकृञ् करणे। आदृगमहनजनः किकिनौ लिट् चेति किन्प्रत्ययः। लिड्वद्भावाद्द्विर्वचनं। कित्वाद्गुणाभावः। नित्स्वरः। सासहिः। षह मर्षण इत्यस्माद्यङंतात्सहिवहिचलिपतिभ्यो यङंतेभ्यः किकिनौ। पा॰ ३. २. १७१. ४.। इति किः। प्रत्ययस्वरः। यतते। यती प्रयत्ने। यद्वृत्तयोगादनिघातः। शंसे। भावे घञ्। ञित्स्वरः। नृणां। नृ चेति विकल्पेन दीर्घाभावः। नामन्यतरस्यामिति विभक्तेरुदात्तत्वं। विश्वेत्यादिषु न लोकाव्ययेति षष्ठीप्रतिषेधः॥

॥ अथ पंचमी ॥

मा नो॑ अग्ने॒ऽम॑तये॒ मावीर॑तायै रीरधः।
मागोता॑यै सहसस्पुत्र॒ मा नि॒देऽप॒ द्वेषां॒स्या कृ॑धि॥५॥

मा। नः॒। अ॒ग्ने॒। अम॑तये। मा। अ॒वीर॑तायै। री॒र॒धः॒।
मा। अ॒गोता॑यै। स॒ह॒सः॒। पु॒त्र॒। मा। नि॒दे। अप॑। द्वेषां॑सि। आ। कृ॒धि॒॥५॥

सहसस्पुत्र बलस्य पुत्र हे अग्ने त्वं नोऽस्मान् अमतये शत्रुभूताय दारिद्र्याय मा रीरधः। संसिद्धान्विषयभूतान्मा कुरु। तथावीरतायै। अवीरशब्देन तद्वान् लक्ष्यते। वीरस्य भावो वीरता। न वीरता अवीरता। तस्यै। अस्मानपुत्रताया विषयभूतान्मा कुरु। तथा त्वमस्मानगोतायै गवादिपशुसंपत्त्यभावस्य विषयभूतान्मा कुरु। किंचास्मान्निदे निंदाया विषयभूतान्मा कुरु। मा विधेहि। तथा त्वं द्वेषांसि कर्मापराधनिमित्तान् द्वेषांश्चापाकृधि। अपाकुरु। निवारय॥ अवीरतायै। वीरा अस्य संतीति वीरः। अर्श आदित्वादच्। तस्य भावो वीरता। तस्य भावस्त्वतलाविति तल्। न वीरता अवीरता। नञः स्वरे प्राप्ते परादिश्छंदसि बहुलमिति नञुत्तरस्यादेरुदात्तता। रीरधः। राध साध संसिद्धौ। अस्माण्ण्यंताच्छांदसे लुङि णिश्रिद्रुस्रुभ्य इति च्लेश्चङादेशः। णेरनिटीति णिलोपः। णौ चङ्युपधाया इत्युपधाह्रस्वः। चङीति द्विर्वचनं। सन्वल्लघुनि चङ्पर इति सन्वद्भावः। सन्यत

इत्यभ्यासस्येत्वं। तस्य दीर्घो लघोरिति दीर्घः। न माङ्योग इत्यडभावः। निघातः। अगोतायै। गोशब्देन गोमान् लक्ष्यते। न गौरगौः। अगोर्भावोऽगोता। तस्य भाव इति तल्। लित्स्वरः। सहसस्पुत्र। सुबामंत्रिते परांगवत्स्वर इति परांगवद्भावात्सहसस्पुत्र इत्येतयोः सर्वानुदात्तत्वं। निदे। णिदि कुत्सायां। अस्मात्संपदादित्वाद्भावे क्विप्। अनित्यमागमशासनमिति नुमभावः। सावेकाच इति विभक्तेरुदात्तता॥

॥ अथ षष्ठी ॥

शग्धि वाजस्य सुभग प्रजावतोऽग्ने बृहतो अध्वरे।
सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता॥६॥

शग्धि। वाजस्य। सुऽभग। प्रजाऽवतः। अग्ने। बृहतः। अध्वरे।
सं। राया। भूयसा। सृज। मयःऽभुना। तुविऽद्युम्न। यशस्वता॥६॥

सुभग शोभनधनोपेत हे अग्ने त्वमध्वरेऽस्माभिः क्रियमाणेऽस्मिन्नग्निष्टोमादिकर्मणि बृहतो महतः प्रभूतस्य प्रजावतोऽपत्योपेतस्य वाजस्यान्नस्य शग्धि। ईशिषे। तादृशमन्नमस्मिन्नध्वरेऽस्मभ्यं देहि। किंच तुविद्युम्न बहुधनयुक्त हे अग्ने मयोभुना। मय इति सुखनाम शेवृधं मय इति तन्नामसु पाठात्। तद्दानाद्युपयोगहेतुतया सुखस्य भावकेनात एव यशस्वता कीर्तिमता भूयसातिप्रभूतेन रायैवंविधेन धनेनास्मान्संसृज। संयोजय॥ शग्धि। शक्लृ शक्तावित्यस्य लोटि बहुलं छंदसीति विकरणस्य लुक्। हुझल्भ्यो हेर्धिरिति धिरादेशः। हेरपित्त्वादुदात्तता। राया। ऊडिदमिति विभक्तेरुदात्तत्वं। भूयसा। बहुशब्दात् द्विवचनविभज्योपपद इतीयसुन्। बहोर्लोपो भू च बहोरितीयसुनः सर्वस्य लोपे प्राप्त आदेः परस्य। पा॰ १.१.५४.। इति प्रत्ययस्यादेर्लोपो बहोर्भूरादेशश्च। नित्स्वरः। सृज। सृज विसर्गे। तुदादिः। लोटि रूपं। निघातः। मयोभुना। भू सत्तायामित्यस्मादौणादिको डुप्रत्ययः। तुविद्युम्न। पादादित्वादनिघातः॥

॥ इति तृतीयस्य प्रथमे षोडशो वर्गः॥

समिध्यमान इति पंचर्चं पंचमं सूक्तमाग्नेयं त्रैष्टुभं वैश्वामित्रस्य कतस्यार्षं। तदुक्तं। समिध्यमानः पंच कतो वैश्वामित्रस्त्विति॥ आ होतेत्यादिसूक्तदशकस्य विनियोग उक्तः प्रातरनुवाकाश्विनशस्त्रयोरिति। तत्रेदं चतुर्थं। वाजपेये बार्हस्पत्ये

चरावग्निं सुदीतिमिति स्विष्टकृतो याज्या । वाजपेयेनेत्यादिखंडे सूचितं । अग्निं सुदीतिं सुदृशं गृणंत इति संयाज्ये । आ॰ ९. ९. । इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

समिध्यमानः प्रथमानु धर्मा समक्तुभिरज्यते विश्ववारः ।
शोचिष्केशो घृतनिर्णिक्पावकः सुयज्ञो अग्निर्यजथाय देवान् ॥ १ ॥

संऽइध्यमानः । प्रथमा । अनु । धर्म । सं । अक्तुऽभिः । अज्यते । विश्वऽवारः ।
शोचिःऽकेशः । घृतऽनिर्निक् । पावकः । सुऽयज्ञः । अग्निः । यजथाय । देवान् ॥ १ ॥

कतः स्तौति । धर्म । धारणाद्धर्म । अग्नेर्यज्ञनिर्वाहकतया तद्धारकत्वाद्धर्मोऽग्निः । तथा च मंत्रः । धर्माणमग्निं विदथस्य साधनं । ऋग्वे॰ १०.९२.२. । इति । तादृशोऽग्निः प्रथमा प्रथमं यज्ञोपक्रमे अनु अग्न्यायतनेष्वनुक्रमेण समिध्यमानः सम्यक् प्रज्वाल्यमानः । यद्वा । अनु धर्म धर्मसाधनभूतेषु यज्ञेषु प्रथमं समिध्यमानो विश्ववारो विश्वैः सर्वैर्यजमानैर्यष्टव्यतया वरणीयः शोचिष्केशः । शोचींषि ज्वालाः केशा यस्य स तथोक्तः । घृतनिर्णिक् । घृतस्य तापनद्वारा विलपनेन शोधकः पावकोऽस्मदीयपापशोधकः सुयज्ञः शोभनयज्ञोपेतः । एवंभूतोऽग्निर्देवानस्माभिर्यजनीयान्देवान्यजथाय यष्टुमक्तुभिरंजनसाधनैर्घृतादिभिः समज्यते । सम्यक् सिच्यते ॥ प्रथमा । सुपां सुलुगिति सुपो डादेशः । धर्म । धृ धारण इत्यस्मादन्येभ्योऽपि दृश्यंत इति मनिन् । ह्रस्वत्वं छांदसं । नित्स्वरः । अक्तुभिः । अंजू व्यक्तिगतिम्रक्षणेषु । अज्यत एभिरिति बाहुलकत्वात् क्तुः करणे । कित्त्वादुपधालोपः । प्रत्ययस्वरः । अज्यते । स एव धातुः । कर्मणि यक् । अनिदितामित्युपधालोपः । विश्ववारः । विश्वैर्यजमानैर्होतृद्वारा वारो वारणं यस्येत्यत्र वृञ् वरण इत्यस्य ण्यंतस्य रूपं वारः । बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं । घृतनिर्णिक् । णिजिर् शौचपोषणयोः । क्विप् । घृतं नेनेक्तीति द्वितीयातत्पुरुषत्वात्पूर्वपदस्वरः । यजथाय । यज देवपूजासंगतिकरणदानेषु । अस्मादौणादिकोऽथप्रत्ययः । तादर्थ्ये चतुर्थी । प्रत्ययस्वरः ॥

॥ अथ द्वितीया ॥

यथायजो होत्रमग्ने पृथिव्या यथा दिवो जातवेदश्चिकित्वान् ।
एवानेन हविषा यक्षि देवान्मनुष्वद्यज्ञं प्र तिरेममद्य ॥ २ ॥

यथा। अयजः। होत्रं। अग्ने। पृथिव्याः। यथा। दिवः। जातऽवेदः। चिकित्वान्।
एव। अनेन। हविषा। यक्षि। देवान्। मनुष्वत्। यज्ञं। प्र। तिर। इमं। अद्य ॥२॥

हे अग्ने त्वं यथा पृथिव्या यजमानभूतायाः पृथिवीदेवतायाः पूर्वं होता सन् होत्रं होमसाधनं हविरयजोऽयाजीः जातवेदो जातप्रज्ञ हे अग्ने चिकित्वान् कर्मविषयज्ञानवान् त्वं यथा च दिवो यजमानभूताया द्युदेवताया होता भूत्वा हविरयजः। एव एवं त्वमस्मिन्कर्मणि होता सन् अनेनास्माभिर्दीयमानेन हविषा देवान्यक्षि। यज। किंच त्वमद्येदानीमस्माभिः क्रियमाणमिमं यज्ञं प्र तिर। अनुष्ठानसंपूर्त्या पारं गमय। तत्र दृष्टांतो मनुष्वदिति। यथा मनोर्यज्ञमनुष्ठानसंपूर्त्या पारमनैषीस्तद्वदिमं यज्ञं पारं नयेत्यर्थः ॥ यथा। प्रकारवचने थालिति थाल्। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। अयजः। यजेर्लङि रूपं। यच्छब्दयोगादनिघातः। होत्रं। हु दानादनयोः। हुयामाश्रुभसिभ्यस्त्रन्निति त्रन्प्रत्ययेनांतोदात्तः। दिवः। ऊडिदमिति विभक्तेरुदात्तत्वं। चिकित्वान्। कित ज्ञान इत्यस्य क्वसौ रूपं। प्रत्ययस्वरः। अनेन। इदंशब्दस्य तृतीयैकवचन अन्नाप्यकः। पा॰ ७. २.११२.। इत्यनादेशः। यक्षि। यजेर्लेटि रूपं। मनुष्वत्। तत्र तस्येवेति वतिः। नभोऽंगिरोमनुषां वत्युपसंख्यानमिति भसंज्ञात्वाद्रुत्वाभावः। प्रत्ययस्वरः। तिर। तरतेर्लोटि व्यत्ययेन शः। ॠत इद्धातोरितीत्वं। निघातः ॥

॥ अथ तृतीया ॥

त्रीण्यायूंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने।
ताभिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं योः ॥३॥
त्रीणि। आयूंषि। तव। जातऽवेदः। तिस्रः। आऽजानीः। उषसः। ते। अग्ने।
ताभिः। देवानां। अवः। यक्षि। विद्वान्। अथ। भव। यजमानाय। शं। योः ॥३॥

हे जातवेदो जातप्रज्ञ तव त्रीण्यायूंषि त्रिविधान्याज्यौषधिसोमात्मकान्यन्नान्याहारतया कल्पितानि हे अग्ने तिस्र उषस एकाहाहीनसत्रगता उषोऽभिमानिन्यस्तिस्रो देवतास्ते तवाजानीर्जनयित्र्यो मातरः। यद्वा। उषोऽभिमानिन्यो देवतास्तवाजानीस्त्वामनुजातास्तिस्रः स्वसारः। तथा च स्वसृः प्रकृत्य मंत्रः। प्रजामेका रक्षत्यूर्जमेका राष्ट्रमेका रक्षतीति। ताभिरुषोऽभिमानिनीभिर्देवताभिः सहितस्त्वमवोऽस्माभिर्दीयमानं हविर्लक्षणमन्नं देवानां यक्षि।

यष्टव्यदेवानां प्रयच्छ। अथ अनंतरं विद्वान् जानंस्त्वं यजमानाय शं भव। सुखहेतुर्भव। योश्च सुखस्य मिश्रयिता च भव॥ तव। युष्मदस्मदोर्ङसीत्याद्युदात्तः। तिस्रः। त्रिशब्दस्य स्त्र्यर्थे त्रिचतुरोः स्त्रियामिति तिसृ इत्यादेशः। अचि र ऋत इति रेफादेशः। तिसृभ्यो जस इति विभक्तेरुदात्तत्वं। आजानीः। जन जनने। जनिघसिभ्यामिण् इति कर्तरि इण्। णित्त्वादुपधावृद्धिः। वा छंदसीति वर्णदीर्घः। कृदुत्तरपदप्रकृतिस्वरः। अवः। अव रक्षणे। असुन्नित्यसुन्। नित्स्वरः। यक्षि। यजेर्दानार्थस्य लेटि रूपं। यजमानाय। पूङ्यजोः शानन्। पा॰ ३.२.१२८.। इति यजेः शानन्। नित्स्वरः। योः। यु मिश्रण इत्यस्मादन्येभ्योऽपि दृश्यंत इति विच्। आर्द्धधातुकलक्षणो गुणः। कृदुत्तरपदप्रकृतिस्वरः॥

॥ अथ चतुर्थी ॥

अ॒ग्निं सु॒दीतिं सु॒दृशं॒ गृणंतो॑ नम॒स्याम॒स्त्वेड्यं॑ जातवेदः।
त्वां दू॒तम॑र॒तिं ह॒व्यवा॑हं दे॒वा अ॑कृण्वन्न॒मृत॑स्य॒ नाभिं॑॥४॥

अ॒ग्निं। सु॒ऽदी॒तिं। सु॒ऽदृशं॑। गृ॒णंतः॑। न॒म॒स्यामः॑। त्वा॒। ईड्यं॑। जा॒त॒ऽवे॒दः॒।
त्वां। दू॒तं। अ॒र॒तिं। ह॒व्य॒ऽवाहं॑। दे॒वाः। अ॒कृ॒ण्व॒न्। अ॒मृत॑स्य। नाभिं॑॥४॥

जातवेदो जातस्य सर्वस्य वेदितर्हे अग्ने गृणंतस्त्वद्विषयां स्तुतिं कुर्वाणा वयमग्निमंगनादिगुणोपेतं सुदीतिं शोभनदीप्तिं अत एव सुदृशं सर्वैः सुदर्शनमीड्यं स्तुत्यं एवंविधं त्वा त्वां नमस्यामः। हविर्भिः पूजयामः। किंच देवा अस्माभिर्यजनीया इंद्रादयो देवा अरतिं। न विद्यते विषयेषु रतिः प्रीतिर्यस्यासावरतिः। विषयेष्वसक्तं अत एवामृतस्य देवान्नभूतायाः सुधाया नाभिं नाभिस्थानं त्वां तादृशं हव्यवाहं दूतमकृण्वन्। हविषां वोढारं दूतमकुर्वन्। दूतो हि द्विविधो वार्त्ताहारी कार्यकारी चेति। तत्र त्वां कार्यकारिणमकार्षुरिति भावः॥ सुदीतिं। दी क्षये। दीयते विनाश्यत आभिस्तम इति करणे क्तिन्। दीतयो दीप्तयः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। सुदृशं। दृशिर् प्रेक्षणे। तस्माच्छक्यार्थे खल्। संज्ञापूर्वको विधिरनित्य इति गुणाभावः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। गृणंतः। गृणातिरर्चतिकर्मा। नमस्यामः। नमस् पूजायां। नमो वरिवश्चित्रङः क्यजिति क्यच्। तदंताल्लटि रूपं। पादादित्वान्न निघातः। दूतं। टुदु उपतापे। दुतनिभ्यां दीर्घश्च। उ॰ ३.८९.। इति क्तः। तत्संनियोगेन धातोर्दीर्घः। दूत इतस्ततः

संचारीत्यर्थः । प्रत्ययस्वरः । अरतिं । रमु क्रीडायां । भावे क्तिन् । अकृखन् । कृवि हिंसाकरणयोरित्यस्य लङि धिन्विकृण्व्योरच्चेत्युप्रत्ययोऽकारश्चांतादेशः । निघातः ॥

॥ अथ पंचमी ॥

यस्त्वद्धोता पूर्वो अग्ने यजीयान्द्विता च सत्ता स्वधया च शंभुः ।
तस्यानु धर्म प्र यजा चिकित्वोऽथा नो धा अध्वरं देववीतौ ॥ ५ ॥

यः । त्वत् । होता । पूर्वः । अग्ने । यजीयान् । द्विता । च । सत्ता । स्वधया । च । शंऽभुः ।
तस्य । अनु । धर्म । प्र । यज । चिकित्वः । अथ । नः । धाः । अध्वरं । देवऽवीतौ ॥ ५ ॥

हे अग्ने त्वत् त्वत्तोऽपि पूर्वः प्रथमभावी यजीयान् अतिशयेन यष्टा यो यः कश्चिद्धोता होमनिष्पादको द्विता द्वैधं मध्यमे चोत्तमे च स्थाने स्वधया सोमाख्येनान्नेन सह सत्ता निषण्णः सन् शंभुर्यष्टॄणां सुखभूरभूत् । द्वितीयपादमेवं यास्को व्याचख्यौ । द्विता च सत्ता स्वधया च शंभुः । द्वैधं सत्ता मध्यमे च स्थान उत्तमे च शंभुः सुखभूः । नि॰ ५. ३. । इति । चिकित्वो धर्मविषयचेतनावन् हे अग्ने तस्य यस्त्वत्तोऽपि पूर्वभावी होता निरूपितस्तस्य होतुरनु धर्म धर्माननु तेनानुष्ठितधर्मानुपलक्ष्य प्र यज । प्रकर्षेण देवान्पूजय । अथ अनंतरं हे अग्ने त्वं नोऽस्माकं संबंधिनमध्वरमिमं यज्ञं देववीतौ देवानां प्रीत्यर्थं धाः । विधेहि ॥ यजीयान् । यष्टृशब्दस्य तुश्छंदसीतीयसुन् । तस्मिन् तुरिष्ठेमेयःस्विति तृचो लोपः । नित्त्वादाद्युदात्तः । द्विता । द्विशब्दात्संख्याया विधार्थे धेति धाप्रत्ययः । धकारस्य तकारश्छांदसः । प्रत्ययस्वरः । सत्ता । षद्लृ विशरणगत्यवसादनेषु । अस्य ताच्छीलिकस्तृन् । नित्स्वरः । स्वधया । स्वर्गं लोकं दधाति यजमानस्येति स्वधा । आतोऽनुपसर्गे क इति कप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वं । शंभुः । शं सुखमस्माद्भवतीति भू सत्तायां विप्रसंभ्यो ड्वसंज्ञायामित्यत्र मितद्र्वादेरुपसंख्यानात् डुप्रत्ययः । डित्त्वाट्टिलोपः । यज । यजेर्लोटि रूपं । चिकित्वः । कित ज्ञान इत्यस्य क्वसौ रूपं । मतुवसो रुः संबुद्धौ छंदसीति नकारस्य रुः । अथा नः । निपातस्येति दीर्घः । धाः । डुधाञ् धारणपोषणयोरित्यस्य छांदसे लुङि रूपं । अडभावश्छांदसः । देववीतौ । देवानां वीतिरशनं यत्र प्रीतौ सा प्रीतिर्देववीतिः । वी कांत्यादिष्वित्यस्माद्भावे क्तिन् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः ॥

॥ इति तृतीयस्य प्रथमे सप्तदशो वर्गः ॥

भवा नो अग्न इति पंचर्चं षष्ठं सूक्तं। भवा न इत्यनुक्रमणिका। कतो वैश्वामित्रस्त्विति तुशब्दप्रयोगादस्यापि वैश्वामित्रः कत ऋषिः। अग्निर्देवता॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तः सूक्तविनियोगः। प्रवर्ग्येऽभिष्टवे भवा नो अग्न इति तृचो विनियुक्तः। सूत्रितं च। भवा नो अग्ने सुमना उपेताविति तृचाः। आ॰ ४. ६.। इति॥

॥ तस्मिन्सूक्ते प्रथमा॥

भवा नो अग्ने सुमना उपेतौ सखेव सख्ये पितरेव साधुः।
पुरुद्रुहो हि क्षितयो जनानां प्रति प्रतीचीर्दहतादरातीः॥१॥

भव। नः। अग्ने। सुऽमनाः। उपऽइतौ। सखाऽइव। सख्ये। पितराऽइव। साधुः।
पुरुऽद्रुहः। हि। क्षितयः। जनानां। प्रति। प्रतीचीः। दहतात्। अरातीः॥१॥

हे अग्ने त्वमुपेतावस्माभिः क्रियमाणस्य प्रवर्ग्याख्यकर्मण आभिमुख्येनागमने सुमनास्तत्कर्मसिद्ध्यर्थमनुकूलमनस्को भूत्वा नः साधुर्भव। अस्मत्संबंधिकर्मसाधको भव। तत्र दृष्टांतद्वयं। सखेव सख्ये पितरेवेति। यथा सखा सुहृत् सख्ये मित्राय हितोपदेशेन साधुर्भवति यथा च पितरा मातापितरौ पुत्राय सन्मार्गोपदेशेन साधकौ भवतः। तद्वत्। किंच। जनानां मनुष्याणां क्षितयो मनुष्याः पुरुद्रुहो हि नानाविधद्रोहयुक्ताः। हिशब्दः कारणपरः। यस्माल्लोके परस्परमात्सर्यादिनान्योन्यमसहमाना जना वर्तंते तस्मात्त्वं प्रतीचीः प्रतीचः प्रतिकूलतयास्मदाभिमुख्येनागच्छतोऽरातीररातीन् शत्रून्प्रति दहतात्। त्वं प्रतिकूलः सन् भस्मसात्कुरु॥ भवा नः। द्व्यचोऽतस्तिङ इति संहितायां दीर्घः। उपेतौ। इण् गतौ। अयनामति भावे क्तिन्। प्रादिसमासः। तादौ च निति कृत्यताविति गतेः प्रकृतिस्वरत्वं। सख्ये। समाने ख्यश्चोदात्त इति इण्। डित्त्वाट्टिलोपः। तत्संनियोगेन यलोपः। समानस्य छंदसीत्यादिना सभावः। उदात्त इत्युक्तत्वादुपपदस्योदात्तता। साधुः। राध साध संसिद्धौ। कृवापाजीत्यादिना उण्प्रत्ययः। प्रत्ययस्वरः। प्रतीचीः। अंचु गतिपूजनयोः। ऋत्विग्दधृगित्यादिना क्विन्। स्त्रियामुगितश्चेति ङीपि प्राप्ते पुनर्धातोरुगितः प्रतिषेध इति प्रतिषिद्धेऽचतेश्चोपसंख्यानमिति प्रतिप्रसवात् ङीष्। तस्मिन्भसंज्ञायामच इत्यकारलोपः। चाविति दीर्घः। दहतात्। दह भस्मीकरण इत्यस्य लोण्मध्यमैकवचने हेस्तुह्योस्तातङ्ङाशिषीति तातङादेशः। निघातः। अरातीः प्रतीचीः। उभयत्र लिंगव्यत्ययः॥

॥ अथ द्वितीया ॥

तपो ष्वग्ने अंतराँ अमित्राँ तपा शंसमररुषः परस्य।
तपो वसो चिकितानो अचित्तान्वि ते तिष्ठंतामजरा अयासः ॥ २ ॥

तपो इति। सु। अग्ने। अंतरान्। अमित्रान्। तप। शंसं। अररुषः। परस्य।
तपो इति। वसो इति। चिकितानः। अचित्तान्। वि। ते। तिष्ठंतां। अजराः। अयासः ॥२॥

हे अग्ने अंतरान् अभिभावकानमित्रांश्छत्रून् सु सुष्ठु यथा भवति तथा तपो। तपैव। बाधस्व। किंच। अररुषस्तुभ्यं हविरप्रयच्छतोऽत एव परस्य शत्रुभूतस्य स्वं शंसमभिलाषं तप। क्षपय। वसो सर्वस्य वासयितर्हे अग्ने चिकितानः कर्माभिज्ञस्त्वमचित्तान् सत्कर्मण्यनासक्तमनस्कान्पुरुषान् तपो। संतप। यस्मादेवं तस्मात्ते तव रश्मयोऽजरा जरारहिताः प्रतिबंधरहिता अत एव अयासः सर्वत्रगमनस्वभावाः संतो वि तिष्ठंतां। विशेषेण तिष्ठंतु ॥ तपो। तप उ। गुणः। उञमवलंब्य उञ इति प्रगृह्यसंज्ञा। पादादित्वादनिघातः। तपा। तप संताप इत्यस्य लोटि रूपं। द्व्यचोऽतस्तिङ इति संहितायां दीर्घः। अररुषः। रा दान इत्यस्य क्वसौ वस्वेकाजिति प्राप्तस्येटः संप्रसारणं। संप्रसारणाश्रयं च बलीय इति संप्रसारणबलीयस्त्वान्निवृत्तिः। वसोः संप्रसारणमिति संप्रसारणं। समासे नञ्स्वरः। चिकितानः। कित ज्ञान इत्यस्य छंदसि लिट्। तस्य लिटः कानज्वेति कानजादेशः। द्विर्वचनं। कित्त्वाद्गुणाभावः। चित्त्वादंतोदात्तः। तिष्ठंतां। ष्ठा गतिनिवृत्तौ। विपूर्वात्तिष्ठतेः समवप्रविभ्यः स्थ इत्यात्मनेपदं। निघातः। अयासः। अय गतौ। पचाद्यच्। चित्स्वरः ॥

॥ अथ तृतीया ॥

इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय।
यावदीशे ब्रह्मणा वंदमान इमां धियं शतसेयाय देवीं ॥ ३ ॥

इध्मेन। अग्ने। इच्छमानः। घृतेन। जुहोमि। हव्यं। तरसे। बलाय।
यावत्। ईशे। ब्रह्मणा। वंदमानः। इमां। धियं। शतऽसेयाय। देवीं ॥ ३ ॥

हे अग्ने इच्छमानो धनं कामयमानोऽहं यजमान इध्मेन समिंधनकारिसमित्समूहेन घृतेनाज्येन सह हव्यं हवनयोग्यं हविः पुरोडाशादिकं जुहोमि।

किमर्थं। तरसे वेगाय तव सततगमनसिद्ध्यर्थं बलाय सामर्थ्याय। पुरोडाशादिहविर्भारवहनसिद्ध्यर्थं त्वयि हविः प्रक्षिपामि। किंच ब्रह्मणा स्तोत्रेण वंदमानस्त्वां स्तुवन्नहं यावदीशे यावद्वंदनं वोढुं शक्नोमि तावद्देहि। त्वं चेमामस्माभिः क्रियमाणां धियं त्वद्विषयां स्तुतिं शतसेयायापरिमितधनपर्यवसानाय देवीं दीप्तामतिप्रभूतां कुरु ॥ इध्मेन। ञि इंधी दीप्तौ। इध्यतेऽनेनाग्निरितीध्मः काष्ठविशेषः। इषियुधींधिदसिश्याधूसूभ्यो मगिति करणे मक्। कित्त्वादनुनासिकलोपः। प्रत्ययस्वरः। इच्छमानः। इषु इच्छायां। व्यत्ययेन शानच्। इषुगमियमां छ इति छकारः। जुहोमि। हु दानादनयोरित्यस्य लटि रूपं। पादादित्वादनिघातः। हव्यं। हवमर्हतीति छंदसि चेति यप्रत्ययः। भसंज्ञायां यस्येति लोपः। प्रत्ययस्वरः। यावत्। यच्छब्दात् यत्तदेतेभ्यः परिमाणे वतुबिति वतुप्। आ सर्वनाम्न इत्याकारः। आद्युदात्तः। ईशे। ईश ऐश्वर्ये इत्यस्य लडुत्तमैकवचन इटष्टेरेत्वं। अदादित्वाच्छपो लुक्। शतसेयाय। षो अंतकर्मणि। आदेच उपदेशेऽशितीत्यात्वं। अचो यदिति भावे यत्। ईद्यतीतीत्वं। आर्द्धधातुकलक्षणो गुणः। कृदुत्तरपदप्रकृतिस्वरः॥

॥ अथ चतुर्थी ॥

उच्छोचिषा सहसस्पुत्र स्तुतो बृहद्वयः शशमानेषु धेहि।
रेवदग्ने विश्वामित्रेषु शं योर्मर्मृज्मा ते तन्वं१ भूरि कृत्वः ॥४॥

उत्। शोचिषा। सहसः। पुत्र। स्तुतः। बृहत्। वयः। शशमानेषु। धेहि।
रेवत्। अग्ने। विश्वामित्रेषु। शं। योः। मर्मृज्म। ते। तन्वं। भूरि। कृत्वः ॥४॥

सहसस्पुत्र हे अग्ने शोचिषा स्वकीयया दीप्त्या उत्। उद्दीप्यस्व। स्तुतः स्तोत्रशस्त्रसाधनभूतैर्मंत्रैः स्तुतस्त्वं शशमानेषु। शशमानः शंसमानः। नि० ६.८.। इति यास्कः। त्वद्विषयशंसनं कुर्वाणेषु विश्वामित्रेषु विश्वामित्रोत्पन्नेषु। विश्वं मित्रमस्येति विश्वामित्र एकः। एकस्मिन्बहुवचनं पूजार्थं। तथाविधेष्वस्मासु रेवद्धनयुक्तं बृहत्प्रभूतं वयः। वयःशब्दोऽन्नवाची। अर्को वयः क्षद्मेत्यन्ननामसु पठितत्वात्। तादृशं प्रभूतमन्नं धेहि। विधेहि। किंच शं रोगाणां शमनं चास्मासु धेहि। योर्भयानां यावनममिश्रणं च धेहि। शमनं च रोगाणां यावनं च भयानाममिति यास्कः। कृत्वोऽस्माभिः क्रियमाणस्य कर्मणः प्रयोजकत्वेन कर्तर्हे अग्ने ते तव तन्वं तनुं भूरि बहुवारं मर्मृज्म। पुनःपुनः सोमाज्यपयःप्रभृतिभिर्वयं सिंचामः॥

शशमानेषु। शश ह्रुतगताविति यं धातुरत्र स्तुत्यर्थः। ताच्छील्यवयोवचनशक्तिष्विति चानश्। चित इत्यंतोदात्तत्वं। धेहि। डुधाञ् धारणपोषणयोरित्यस्य लोटि रूपं। रेवत्। रयिरस्यास्तीति मतुप्। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। छंदसीर इति तस्य वत्वं। रयेर्मतौ बहुलं छंदसीति संप्रसारणं। परपूर्वत्वं। गुणः। विश्वामित्रेषु। मित्रे चर्षौ। पा॰ ६. ३. १३०.। इति पूर्वपदस्य दीर्घत्वं। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। मर्मृज्म। मृजूष् शुद्धावित्यस्य वर्तमाने लिड्युत्तमबहुवचने मसो मादेशः। अनित्यमागमशासनमितीडभावः। रेफश्छांदसः। पादादित्वादनिघातः। प्रत्ययस्वरः। भूरि। भू सत्तायां। अदिशदिभूशुभिभ्यः क्रिन्निति क्रिन्। कित्त्वाद्गुणाभावः। नित्स्वरः। कृत्वः। डुकृञ् करणे। संपदादित्वाद्भावे क्विप्। तदस्यास्तीति मतुप्। झय इति तस्य वत्वं। तसौ मत्वर्थ इति भसंज्ञायां तकारस्य जश्त्वाभावः। मतुवसो रुरिति तकारस्य रुत्वं॥

॥ अथ पंचमी ॥

कृधि रत्नं सुसनितर्धनानां स घेदग्ने भवसि यत्समिद्धः।
स्तोतुर्दुरोणे सुभगस्य रेवत्सृप्रा करस्ना दधिषे वपूंषि ॥५॥

कृधि। रत्नं। सुऽसनितः। धनानां। सः। घ। इत्। अग्ने। भवसि। यत्। संऽइद्धः।
स्तोतुः। दुरोणे। सुऽभगस्य। रेवत्। सृप्रा। करस्ना। दधिषे। वपूंषि ॥५॥

सुसनितरभिलषितधनानां सुष्ठु दातर्हे अग्ने धनानां कनकपश्वादीनां मध्ये रत्नमुत्तमं धनं कृधि। विधेहि। मह्यं दत्स्व। यद्यदा त्वं समिद्धः सोमाज्यादिभिः सम्यगिद्धो दीप्तो वर्तसे तदा स घेत् स तादृश एव त्वं धनस्य दाता खलु भवसि। किंच सुभगस्य त्वद्विषयस्तुत्या शोभनधनयुक्तस्य स्तोतुर्यजमानस्य दुरोणे गृहे सृप्रा प्रसर्पणशीलौ कर्मकरणार्थं प्रसृतौ करस्ना कर्मणां प्रस्नातारौ बाहू। करस्नौ बाहू कर्मणां प्रस्नातारौ। नि॰ ६. १६.। इति यास्कः। वपूंषि रूपाणि। वर्पो वपुरिति रूपनामसु पठितत्वात्। तादृशौ बाहू भास्वराणि ज्योतींषि च रेवत् धनयुक्तं यथा भवति तथा दधिषे। धारयसि॥ सुसनितः। षणु दान इत्यस्य तृचि रूपं। आमंत्रितनिघातः। सृप्रा। सृप्लृ गतौ। अस्मात्स्फायितंचिवंचीत्यादिना रक्। कित्त्वादगुणः। प्रत्ययस्वरः। करस्ना। करोति फलमिति करः कर्म। पचाद्यजंतः। कर्मणि स्ना शोधनं ययोस्तौ। यद्वा कर्मणां शोधनं

याभ्यामिति बहुव्रीहौ पूर्वपदस्वरः। दधिषे। डुधाञ् धारणपोषणयोरित्यस्य लटि छंदस्युभयथेति थास आर्द्धधातुकत्वादिट्। आतो लोपः। निघातः॥

॥ इति तृतीयस्य प्रथमेऽष्टादशो वर्गः ॥

अग्निं होतारमिति पंचर्चं सप्तमं सूक्तं त्रैष्टुभमाग्नेयं गाथिन आर्षं। तथा चानुक्रांतं। अग्निं होतारं गाथी हेति॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

॥ तस्मिन्सूक्ते प्रथमा ॥

अग्निं होतारं प्र वृणे मियेधे गृत्सं कविं विश्वविदममूरं।
स नो यक्षद्देवताता यजीयान्राये वाजाय वनते मघानि ॥ १ ॥

अग्निं। होतारं। प्र। वृणे। मियेधे। गृत्सं। कविं। विश्वऽविदं। अमूरं।
सः। नः। यक्षत्। देवऽताता। यजीयान्। राये। वाजाय। वनते। मघानि ॥ १ ॥

गाथी स्तौति। हे अग्ने गृत्सं गृणंतं देवानां स्तुतिं कुर्वंतं कविं मेधाविनं विश्वविदं सर्वविषयज्ञानोपेतममूरममूढमग्निमंगनादिगुणोपेतं त्वां मियेधेऽस्माभिः क्रियमाणेऽस्मिन्यज्ञे होतारं होमनिष्पादकं देवानामाह्वातारं वाहं प्र वृणे। प्रकर्षेण संभजे। स तथाविधोऽग्निर्यजीयान् यष्टृतमः सन् नोऽस्माकं देवताता यष्टव्यतया संबंधिनो देवान्यक्षत्। यजतु। किंच सोऽग्नी राये धनाय वाजायान्नाय च मघानि मंहनीयान्यस्माभिर्दीयमानानि हवींषि वनते। संभजतां॥ वृणे। वृङ् संभक्तौ। निघातः। मियेधे। मकारैकारयोर्मध्य इयागमश्छांदसः। गृत्सं। गृधु अभिकांक्षायां। गृधिपण्योर्दकौ च। उ° ३. ६८.। इति सप्रत्ययः। अंत्यस्य दकारः। व्यत्ययेनाद्युदात्तत्वं। अमूरं। मुह वैचित्य इत्यस्य निष्ठायां रूपं। रेफश्छांदसः। नञा समासे तस्य नञ्स्वरः। यक्षत्। यजेर्लेटि सिब्बहुलं लेटीति सिप्। लेटोऽडाटावित्यडागमः। इतश्च लोप इतीकारलोपः। देवताता। देवशब्दात्स्वार्थे सर्वदेवात्तातिलिति तातिल्। सुपां सुलुगिति सुपो डादेशः। लित्स्वरः। वनते। वन षण संभक्तावित्यस्य लटि व्यत्ययेनात्मनेपदं। निघातः॥

॥ अथ द्वितीया ॥

प्र ते अग्ने हविष्मंतीमियर्म्यच्छा सुद्युम्नां रातिनीं घृताचीं।
प्रदक्षिणिद्देवतातिमुराणः सं रातिभिर्वसुभिर्यज्ञमश्रेत् ॥ २ ॥

प्र। ते। अग्ने। हविष्मंती। इयर्मि। अच्छं। सुऽद्युम्नां। रातिनीं। घृताचीं।
प्रऽदक्षिणित्। देवऽतातिं। उराणः। सं। रातिऽभिः। वसुऽभिः। यज्ञं। अश्रेत् ॥२॥

हे अग्ने सुद्युम्नां सुतेजसं हविष्मतीं पुरोडाशादिहविर्युक्तां रातिनीं हविर्दात्रीं घृताचीं घृतान्वितां जहूमुपभृतं वा ते तवाच्छ त्वदाभिमुख्येन प्रेयर्मि। प्रेरयामि। देवतातिं देवान् उराण उरु बहु कुर्वाणः। उराण उरु कुर्वाणः। नि० ३. १७.। इति यास्कः। तादृशो भवान् रातिभिर्वसुभिरस्मभ्यं देयतया प्राप्तैर्धनैः सह सन् प्रदक्षिणित् प्रादक्षिण्येन समश्रेत्। तमिमं यज्ञं सम्यक् सेवतां ॥ हविष्मती। हविरस्यास्तीति मतुप्। तसौ मत्वर्थ इति भसंज्ञायां सकारस्य रुत्वं न भवति। उगितश्चेति ङीप्। स्वरविधौ व्यंजनमविद्यमानवदिति परिभाषानाश्रयणान्मतुप उदात्तताभावः। इयर्मि। ऋ गतौ। जुहोत्यादिः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। अभ्यासस्यासवर्णे इतीयङादेशः। मिपः पित्त्वाद्गुणः। निघातः। अच्छ। निपातस्येति संहितायां दीर्घः। रातिनी। रा दान इत्यस्य नपुंसके भावे क्तः। रातमस्यास्तीत्यत इनिठनाविति इनिः। प्रत्ययस्वरः। घृताची। घृतपूर्वादंचतेर्ऋत्विग्दधृगित्यादिना क्विन्। अंचतेश्चोपसंख्यानमिति ङीप्। भसंज्ञायामच इत्यकारलोपः। चाविति दीर्घः। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वे प्राप्ते चाविति पूर्वपदांतोदात्तः। प्रदक्षिणित्। प्रदक्षिणं करोतीति तत्करोतीति णिजुत्पद्यमानो दक्षिणशब्दाद्भवति। संग्रामयतेरेव सोपसर्गाण्णिजुत्पत्तिर्नान्यस्मादिति तदंतात् क्विप्। ह्रस्वस्य पिति। पा० ६. १. ७१.। इति तुक्। णिचो लोपाभावश्छांदसः। णिच्स्वरः। देवतातिं। देवशब्दात्सर्वदेवात्तातिलिति तातिल्। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। उराणः। उरु करोतीति तत्करोतीति णिच्। तदंताच्छंदसि लिट्। मंत्रत्वादाम्न भवति। तस्य कानच्। णेरनिटीति णिलोपः। वरादेशाभावश्छांदसः। चित्त्वादंतोदात्तः। अश्रेत्। श्रिञ् सेवायामित्यस्य छांदसे लङि बहुलं छंदसीति शपो लुक्। निघातः ॥

॥ अथ तृतीया ॥

स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः।
अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः ॥३॥

सः। तेजीयसा। मनसा। त्वाऽऊतः। उत। शिक्ष। सुऽअपत्यस्य। शिक्षोः।
अग्ने। रायः। नृऽतमस्य। प्रऽभूतौ। भूयाम। ते। सुऽस्तुतयः। च। वस्वः ॥३॥

हे अग्ने त्वोतो यस्त्वया रक्ष्यमाणः स तेजीयसातिशयेन तीक्ष्णेन सत्कर्मविषयतीक्ष्णबुद्धियुक्तेन मनसांतःकरणेन युक्तो भवति। उत अपि च तस्मै स्वपत्यस्य। द्वितीयार्थे षष्ठी। शोभनापत्योपेतं धनं शिक्ष। प्रयच्छ। शिक्षतिर्दानकर्मा दात्यादिषु दानकर्मसु पठितत्वात्। हे अग्ने शिक्षोरभिमतफलप्रदाने शक्तुमिच्छो रायो नृतमस्य धनस्यातिशयेन नेतुर्दातुस्ते तव प्रभूतौ प्रभावे महिम्नि वयं स्याम। किंच सुष्टुतयस्त्वद्विषयशोभनस्तुतिमंतो वयं वस्वो वसुनो भाजनं भूयाम। भूयास्म॥ तेजीयसा। तेजितृशब्दादतिशायन ईयसुन्। तुरिष्ठेमेयःस्विति तृचो लोपः। नित्स्वरः। त्वोतः। अव रक्षणादिषु। निष्ठायां ज्वरत्वरस्त्रिव्यविमवामुपधाया इत्यूट्। अल्लोपः। त्वया ऊतः। तृतीयेति योगविभागात्समासः। टेर्लोपश्छांदसः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः। शिक्ष। शिक्ष विद्योपादान इत्ययमत्र दानार्थः। अस्माल्लोटि व्यत्ययेन परस्मैपदं। शिक्षोः। शक्लृ शक्तावित्यस्य सन्येकाच उपदेश इति इट्प्रतिषेधः। सनि मीमाघुरभलभशकपतपदामच इसिति धातोरच इसादेशः। अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः। सनाशंसभिक्ष उरित्युप्रत्ययः। प्रत्ययस्वरः। प्रभूतौ। भू सत्तायामित्यस्य भावे क्तिन्। तादौ च निति कृत्यताविति गतेः प्रकृतिस्वरत्वं। भूयाम। भू सत्तायामित्यस्याशीर्लिङि किदाशिषीति यासुट्। छंदस्युभयथेति तस्य सार्वधातुकत्वात्सलोपः। आगमस्वरः। यद्वा तस्मात्प्रार्थनायां लिङि यासुट्। बहुलं छंदसीति शपो लुक्। अनदंतत्वादियादेशो न भवति। सुष्टुतयः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। वस्वः। आगमानुशासनस्यानित्यत्वान्नुमभावः। संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः। यणादेशः॥

॥ अथ चतुर्थी ॥

भूरी॑णि॒ हि त्वे द॑धि॒रे अनी॒काग्ने॑ दे॒वस्य॒ यज्य॑वो॒ जना॑सः।
स आ व॑ह दे॒वता॑तिं यविष्ठ॒ शर्धो॒ यद॒द्य दि॒व्यं यजा॑सि॥४॥

भूरी॑णि। हि। त्वे इति॑। द॒धि॒रे। अनी॑का। अग्ने॑। दे॒वस्य॑। यज्य॑वः। जना॑सः।
सः। आ। व॒ह॒। दे॒वऽता॑तिं। य॒वि॒ष्ठ॒। शर्धः॑। यत्। अ॒द्य। दि॒व्यं। यजा॑सि॥४॥

हे अग्ने देवस्य द्योतमानस्य तव संबंधिनो यज्यवो यष्टारोऽध्वर्युप्रभृतयो जनासो जना भूरीणि बहून्यनीका अनीकानि सेनारूपतया सर्वत्र प्रसृतानि ज्वालारूपाणि तेजांस्याहुतिप्रक्षेपेण त्वे त्वयि दधिरे हि। विदधिरे खलु।

चक्षुरिति यावत्। स तादृशस्त्वं देवतातिं यष्टव्यदेवानिह कर्मण्यावह। आह्वय। हे यविष्ठ युवतम यद्यस्मात्कारणाद्यास्मिन्कर्मणि दिव्यं दिवि भवं देवसंबंधि शर्धस्तेजस्त्वं यजासि यजसि तस्माद्देवानाह्वयेति शेषः ॥ दधिरे। दधातेर्लिटि रूपं। हियोगादनिघातः। चित्वादंतोदात्तः। यज्यवः। यज देवपूजादिषु। यजिमनिशुंधिदसिजनिभ्यो युजिति युच्। व्यत्ययेनाद्युदात्तत्वं। देवतातिं। देवशब्दात्स्वार्थे सर्वदेवात्तातिलिति तातिल्। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। यजासि। यजेर्लेट्याडागमः। यद्योगादनिघातः ॥

॥ अथ पंचमी ॥

यत्त्वा होतारमनजन्मियेधे निषादयंतो यजथाय देवाः।
स त्वं नो अग्नेऽवितेह बोध्यधि श्रवांसि धेहि नस्तनूषु ॥५॥

यत्। त्वा। होतारं। अनजन्। मियेधे। निऽसादयंतः। यजथाय। देवाः।
सः। त्वं। नः। अग्ने। अविता। इह। बोधि। अधि। श्रवांसि। धेहि। नः। तनूषु ॥५॥

हे अग्ने यजथाय यजनार्थं निषादयंतो निवसंतो देवा दीप्यमाना ऋत्विजो मियेधे मेधे यज्ञे होतारं देवानामाह्वातारं त्वा त्वां यद्यस्मादनजन् घृताहुतिभिरौक्षन्। यद्वा निषादयंतो होतारं होमनिष्पादकं त्वां बर्हिष्युपवेशयंत ऋत्विजो घृतैरसिंचन् तस्मात्स तथाविधस्त्वमिहास्मिन्कर्मणि नोऽस्माकमविता पालयिता भवामीति बोधि। बुध्यस्व। किंच नस्तनूष्वस्माकं तनुजेष्वपत्येषु श्रवांस्यन्नान्यधि धेहि। अधिकं निधेहि ॥ अनजन्। अंजू व्यक्तिगतिम्रक्षणेषु। अस्माल्लङि रुधादित्वात् श्नम्। छांदसत्वादल्लोपाभावः। अनिदितामित्युपधालोपः। निषादयंतः। षद्लृ विशरणगत्यवसादनेषु। चुरादिः। सदेरप्रतेरिति षत्वं। यद्वा। हेतुमति णिच्। शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे कृते णिच्स्वरः। बोधि। बुध अवगमने। लोटि बहुलं छंदसीति शपो लुक्। सेर्ह्यपिच्चेति सिपो हिरादेशः। वा छंदसीति विकल्पेन पित्त्वाद्गुणः। हुझल्भ्यो हेर्धिरिति हेर्धिरादेशः। धकारलोपश्छांदसः। निघातः। धेहि। दधातेर्लोटि रूपं ॥

॥ इति तृतीयस्य प्रथम एकोनविंशो वर्गः ॥

अग्निमुषसमिति पंचर्चमष्टमं सूक्तं त्रैष्टुभं। अत्रेयमनुक्रमणिका। अग्निमुषसमाद्यांते वैश्वदेव्याविति। गाथी हेति हशब्दप्रयोगादस्यापि सूक्तस्य गाथी

ऋषिः । प्रथमापंचम्यौ वैश्वदेवताके शिष्टास्तिस्र आग्नेय्यः ॥ अस्य सूक्तस्योक्तो विनियोगः ॥ मरुत्वतीयशस्त्रेऽग्निर्नेतेत्येषा धाय्या । सूचितं च अग्निर्नेता त्वं सोम ऋतुभिः पिन्वंत्यप इति धाय्या । आ॰ ५.१४. । इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः ।
सुज्योतिषो नः शृण्वंतु देवाः सजोषसो अध्वरं वावशानाः ॥ १ ॥

अग्निं । उषसं । अश्विना । दधिऽक्रां । विऽउष्टिषु । हवते । वह्निः । उक्थैः ।
सुऽज्योतिषः । नः । शृण्वंतु । देवाः । सऽजोषसः । अध्वरं । वावशानाः ॥ १ ॥

गाथी ब्रूते । वह्निर्हविषां प्रापयिताग्निर्व्युष्टिषूषसां व्युच्छनेष्वग्निं यजनीयं देवमुषसमुषोऽभिमानिनीं देवतामश्विना अश्विनौ देवौ दधिक्रां । दधिक्रावा नाम कश्चिद्देवः तं दधिक्रावाणं । एतान्देवानुक्थैः शस्त्रैः शंसनसाधनैरप्रगीतमंत्रात्मकैः सूक्तैर्हवते । आह्वयति । सुज्योतिषः सुष्ठु द्योतमाना नोऽध्वरमस्मत्संबंधिनमिमं यज्ञं वावशानाः कामयमानाः सजोषसः परस्परं संगता भूत्वा सर्वे देवास्तदाह्वानं शृण्वंतु ॥ दधिक्रां । क्रमु पादविक्षेपे । दधीत्युपपदे जनसनखनक्रमगम इति विट् । विड्वनोरनुनासिकस्यादित्याकारः । कृदुत्तरपदप्रकृतिस्वरत्वं । व्युष्टिषु । उच्छी विवासने । भावे क्तिन् । व्रश्चादिना षत्वं । तादौ च निति कृत्यताविति गतेः प्रकृतिस्वरत्वं । हवते । ह्वयतेर्बहुलं छंदसीति संप्रसारणं । सुज्योतिषः । सुष्ठु द्योतमाना इति विग्रहे द्युत दीप्तावित्यस्य द्युतेरिसिन्नादेश्च जः । उ॰ २.१०६. । इतीसिन्प्रत्ययो दकारस्य जकारः । कृदुत्तरपदप्रकृतिस्वरत्वं । बहुव्रीहिपक्षे तु नञ्सुभ्यामित्युत्तरपदांतोदात्तता स्यात् । यथा सुज्योतिषो अक्तवस्ताँ अभि ष्युः । ऋग्वे॰ १०.८९.१५. । इत्यत्रांतोदात्तता तस्मादत्र नायं समासः किंतु तत्पुरुष एव । शृण्वंतु । श्रु श्रवण इत्यस्माच्छ्रुवः शृ चेति श्नुस्तत्संनियोगेन धातोः शृ इत्यादेशः । निघातः । वावशानाः । वश कांतावित्यस्य यङ्लुकि रूपं । अभ्यासस्य दीर्घोऽकित इति दीर्घः । व्यत्ययेन शानच् । चित्स्वरः ॥

॥ अथ द्वितीया ॥

अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥ २ ॥

अग्ने॑। त्री। ते॒। वाजि॑ना। त्री। स॒धऽस्था॑। ति॒स्रः। ते॒। जि॒ह्वाः। ऋ॒त॒ऽजा॒त॒। पू॒र्वीः।
ति॒स्रः। ऊं॒ इति॑। ते॒। त॒न्वः॑। दे॒वऽवा॑ताः। ताभिः॑। नः॒। पा॒हि॒। गिरः॑। अप्र॑ऽयुच्छन्॒॥२॥

हे अग्ने ते तव त्री वाजिना आज्यौषधिसोमात्मकानि त्रीण्यन्नानि त्री षधस्था त्रीण्याग्नीध्रीयादीनि धिष्ण्यानि स्थानानि। यद्वैकाहाहीनसत्राख्यानि त्रीणि स्थानानि। यद्वा त्रयो लोकाः। ऋतजात ऋतेषु सत्यभूतेषु यज्ञेषु समुत्पन्न हे अग्ने ते तव पूर्वीर्देवानामुदरपूरयित्र्यस्तिस्रो गार्हपत्याद्या जिह्वाः। हे अग्ने ते तव देववाता देवैरभिलषितास्तिस्रस्तन्वः पवमानपावकशुच्यात्मकानि त्रीणि शरीराणि। एवंभूतस्त्वमप्रयुच्छन् अप्रमाद्यन् सावधानो भूत्वा ताभिस्तनूभिर्नोऽस्माकं स्तोतृणां गिरः स्तोत्रशस्त्रादीनि वाक्यानि पाहि। पालय॥ तिस्रः। तिसृभ्यो जस इति जस उदात्तत्वं। जिह्वाः। लिह आस्वादने। लिहंत्याभी रसानिति शेवयह्वजिह्वाग्रीवाप्वामीवा इति निपातनाद्वन्। लकारस्य जकारः। गुणाभावः। व्यत्ययेनांतोदात्तत्वं। देववाताः। वा गतिगंधनयोः। अस्मात्कर्मणि क्तः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। पाहि। पा रक्षण इत्यस्य लोटि रूपं। निघातः। अप्रयुच्छन्। युच्छ प्रमादे। नञ्स्वरः॥

॥ अथ तृतीया ॥

अग्ने॒ भूरी॑णि॒ तव॑ जातवेदो॒ देव॑ स्वधावो॒ऽमृत॑स्य॒ नाम॑।
याश्च॑ मा॒या मा॒यिनां॑ विश्वमिन्व॒ त्वे पू॒र्वीः सं॑द॒धुः पृ॑ष्टबंधो॥३॥

अग्ने॑। भूरी॑णि। तव॑। जा॒त॒ऽवे॒दः॒। देव॑। स्व॒धा॒ऽव॒ः॒। अ॒मृत॑स्य। नाम॑।
याः। च॒। मा॒याः। मा॒यिना॑म्। वि॒श्व॒म्ऽइ॒न्व॒। त्वे इति॑। पू॒र्वीः। सं॒ऽद॒धुः। पृ॒ष्ट॒बं॒धो॒ इति॑ पृष्टऽबंधो॥३॥

देव द्योतमान जातवेदो जातप्रज्ञ स्वधावोऽन्नवन्हे अग्नेऽमृतस्य मरणधर्मरहितस्य तव संबंधिनो देवा भूरीणि बहूनि नाम नामानि तेजांसि त्वे त्वयि संदधुः। संदधिरे। किंच। विश्वमिन्व विश्वस्य संतर्पक पृष्टबंधो अपेक्षितफलप्रश्नविषयाणां स्तोतृणां बंधो हे अग्ने मायिनामसुराणां पूर्वीर्भूयसीर्या माया देवास्त्वयि संदधुः संप्रयुयुजिरे तास्त्वयि संति। तस्माद्यज्ञविघ्नकारिणां मायिनां मायाः परिहृत्यास्मदीयं यज्ञं पालयेति भावः। स्वधावः। स्वधास्यास्तीति मतुप्। मतुवसो रुरिति नकारस्य रुः। अमृतस्य। नञो जरमरमित्रमृता इत्युत्तरपदा-

द्युदात्तत्वं। नाम। णमु प्रह्वत्वे। नामन् सीमन् व्योमन्नित्यादिना मनिन्प्रत्ययांतत्वेन निपातनान्मकारलोपो दीर्घश्च। नमयंति सर्वानपि स्वाश्रयभूतान्पुरुषानिति नामानि तेजांसि। सुपां सुलुगिति सुपो लुक्। नित्त्वादाद्युदात्तः। मायिनां। माया एषां संतीति व्रीह्यादित्वादिनिः। यस्येति लोपः। प्रत्ययस्वरः। विश्वमिन्व। इवि व्याप्तिप्रीणनयोरित्यस्माद्विश्वशब्द उपपदे कर्मण्यणित्यण्प्रत्ययः। धातूपदेशावस्थायामिदितो नुमिति नुमि प्राप्ते लघूपधगुणो न भवति। विश्वमिन्वति प्रीणयतीति विश्वमिन्वः। तत्पुरुषे कृति बहुलमिति द्वितीयाया अलुक्। आमंत्रितत्वान्निघातः। संदधुः। डुधाञ् धारणपोषणयोरित्यस्य लिट्युसि रूपं। यद्वृत्तयोगादनिघातः। प्रत्ययस्वरः। पृष्टबंधो। प्रच्छ ज्ञीप्सायामित्यस्य कर्मणि निष्ठायां ग्रहिज्यावयीत्यादिना संप्रसारणं। व्रश्चादिना षत्वं। बंध बंधन इत्यस्मात् शृस्वृस्निहीत्यादिना उप्रत्ययः। षष्ठीसमासः। आमंत्रितत्वान्निघातः॥

॥ अथ चतुर्थी ॥

अग्निर्नेता भग इव क्षितीनां दैवीनां देव ऋतुपा ऋतावा।
स वृत्रहा सनयो विश्ववेदाः पर्षद्विश्वाति दुरिता गृणंतं॥४॥

अग्निः। नेता। भगःऽइव। क्षितीनां। दैवीनां। देवः। ऋतुऽपाः। ऋतऽवा।
सः। वृत्रऽहा। सनयः। विश्वऽवेदाः। पर्षत्। विश्वा। अति। दुःऽइता। गृणंतं॥४॥

योऽयमग्निः क्षितीनां मनुष्याणां दैवीनां देवसंबंधिनीनां विशां नेतांतर्यामितया नियामकः। तत्र दृष्टांतः। ऋतुपा भग इव। यथा वसंताद्यृतूनां पालकः सूर्यः सर्वस्य स्वप्रकाशप्रदानेन प्रवर्तकः। तद्वत्। यश्चाग्निर्ऋतावा सत्यकर्मा वृत्रहा वृत्रस्य हंता सनयः सनातनः पुराणो विश्ववेदाः सर्वविषयज्ञानवान्सर्वज्ञो देवो द्योतमानः स तथाविधोऽग्निर्गृणंतं तद्विषयां स्तुतिं कुर्वंतं स्तोतारं विश्वा दुरिता सर्वाणि दुरितान्यति अतिक्रम्य पर्षत्। पारं नयतु॥ नेता। णीञ् प्रापण इत्यस्य तृचि रूपं। चित्स्वरः। क्षितीनां। क्षि निवासगत्योः। क्तिच्क्तौ च संज्ञायामिति क्तिच्। नामन्यतरस्यामित्यंतोदात्तत्वं। दैवीनां। देवशब्दात्संबंधार्थे देवाद्यञञावित्यञ्। अञि टिड्ढाणञिति ङीप्। ञित्त्वादाद्युदात्तः। ऋतुपाः। पा रक्षण इत्यस्मादन्येभ्योऽपि दृश्यंत इति विच्। ऋतून्पातीत्युपपदमतिङ्। पा० २.२.१९.। इति समासः। कृदुत्तरपदप्रकृतिस्वरः। वृत्रहा। हन हिंसागत्योः। ब्रह्मभ्रूणवृत्रेषु

क्विबिति क्विप्। विश्ववेदाः। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। पर्षत्। पॄ पालनपूरणयोरित्यस्य लेटि सिब्बहुलमिति सिप्। अडागमः। इतश्च लोप इतीकारलोपः। पादादित्वादनिघातः। गृणंतं। गॄ शब्दे। लटः शतृ। क्र्यादित्वात् श्ना। श्नंतत्वात् श्नाभ्यस्तयोरात इत्याकारलोपः। शतृप्रत्ययस्वरः॥

॥ अथ पंचमी ॥

दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सवितारं च देवं।
अश्विना मित्रावरुणा भगं च वसून्रुद्राँ आदित्याँ इह हुवे ॥५॥

दधिऽक्रां। अग्निं। उषसं। च। देवीं। बृहस्पतिं। सवितारं। च। देवं।
अश्विना। मित्रावरुणा। भगं। च। वसून्। रुद्रान्। आदित्यान्। इह। हुवे ॥५॥

हे दधिक्रावादयः सर्वे देवा होताहं दधिक्रां दधिक्रावाणमग्निमुषसं च देवीमुषोऽभिमानिनीं देवतां च बृहस्पतिं देवं द्योतमानं सवितारं सर्वस्य जगतः प्रेरकं देवं च अश्विना अश्विनौ देवौ मित्रावरुणौ भगं सूर्यं च वसूनष्टौ वसून् रुद्रानेकादश रुद्रान् आदित्यान् द्वादशादित्यान् एतान्सर्वान् हविर्भुजो युष्मानिहास्मदीये कर्मणि हुवे। हविःस्वीकरणार्थमाह्वयामि॥ दधिक्रां। दधातीति दधिः। आदृगमहनेत्यादिना किप्रत्ययः। दधीत्युपपदे क्रमेर्जनसनेत्यादिना विट्। विड्वनोरित्यात्वं। देवीं। देवस्य पत्नी देवी। पुंयोगादाख्यायामिति ङीष्। यस्येति लोपः। प्रत्ययस्वरेणांतोदात्तः। बृहस्पतिं। तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्चेति पतिशब्दे परतो बृहच्छब्दस्य तलोपः सुडागमश्च। उभे वनस्पत्यादिषु युगपदित्युभयपदाद्युदात्तत्वं। सवितारं। षू प्रेरण इत्यस्य तृचि आर्धधातुकस्येड्वलादेरितीडागमः। चित्त्वादंतोदात्तत्वं। रुद्राँ आदित्याँ इत्यत्र संहितायां शसो नकारस्य दीर्घादटि समानपाद इति रुत्वं। ततः पूर्वस्यावर्णस्य आतोऽटि नित्यमित्यनुनासिकत्वं। भो भगो अघो अपूर्वस्य योऽशीति रोर्यादेशः। लोपः शाकल्यस्येति तस्य लोपः। यलोपस्यासिद्धत्वात्स्वरसंधिर्न भवति। अतो रुद्राँ आदित्याँ इति भवति। एवमेकस्मिन्पाद आकारादटि परतो नकारस्य रुत्वयत्वपूर्वसवर्णानुनासिकादेशा उन्नेयाः। हुवे। ह्वयतेर्लेटि बहुलं छंदसीति संप्रसारणं। इटष्टित आत्मनेपदानामित्येत्वं। उवङादेशः। निघातः॥

॥ इति तृतीयस्य प्रथमे विंशो वर्गः॥

इमं न इति पंचर्चं नवमं सूक्तं। अत्रेयमनुक्रमणिका। इमं न उपाद्ये अनुष्टुभौ विराड्रूपा सतोबृहती चांत्येति। द्वितीयातृतीये अनुष्टुभौ पंचमी विराड्रूपा सतोबृहती च। अनुक्तत्वात्प्रथमाचतुर्थ्यौ त्रिष्टुभौ। अस्यापि गाथी ऋषिः॥ पशौ स्तोकानुवचन इदं सूक्तं। सूचितं च जुषस्व सप्रथस्तममिमं नो यज्ञं। आ॰ ३. ४.। इति॥

॥ तस्मिन्सूक्ते प्रथमा ॥

इमं नो यज्ञममृतेषु धेहीमा हव्या जातवेदो जुषस्व।
स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य॥१॥
इमं। नः। यज्ञं। अमृतेषु। धेहि। इमा। हव्या। जातऽवेदः। जुषस्व।
स्तोकानां। अग्ने। मेदसः। घृतस्य। होतरिति। प्र। अशान। प्रथमः। निऽसद्य॥१॥

गाथी प्रार्थयते। हे जातवेदो जातप्रज्ञाग्ने नोऽस्माकं संबंधिनमिमं यज्ञं पशुयागममृतेषु मरणधर्मरहितेषु यष्टव्यदेवेषु धेहि। तदधीनतया समर्पय। त्वं चेमा इमान्यस्माभिर्दीयमानानि हव्या हव्यानि हवींषि जुषस्व। सेवस्व। किंच होतर्देवानामाह्वातः। अग्निर्वै देवानां होतेत्याम्नानात्। तादृश हे अग्ने निषद्य वेद्यामुपविश्य प्रथमः सर्वेषामृत्विजामादिमः सन् मेदसो वपाख्यस्य हविषो घृतस्याज्यस्य च स्तोकानां। द्वितीयार्थे षष्ठी। मेदोघृतयोर्ये स्तोका विंदवो विद्यंते तान्प्रकर्षेणाशान। भक्षय। पिबेत्यर्थः॥ धेहि। दधातेर्लोटि रूपं। जुषस्व। जुषी प्रीतिसेवनयोरित्यस्य लोट्यात्मनेपदिनो रूपं। अशान। अश भोजन इत्यस्य लोटि हलः श्नः शानज्झौ। पा॰ ३. १. ८३.। इति शानजादेशः। पश्चादतो हेरिति हेर्लुक्। निघातः। प्रथमः। प्रथ प्रख्याने। प्रथमः प्रथंतेऽस्माद्द्वितीयादय इति। प्रथेरमच्। उ॰ ५. ६८.। इत्यमच्। चित्त्वादंतोदात्तः। निषद्य। षद्लृ विशरणगत्यवसादनेष्वित्यस्य ल्यपि रूपं। सदेरप्रतेरिति षत्वं। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं॥

॥ अथ द्वितीया ॥

घृतवंतः पावक ते स्तोकाः श्चोतंति मेदसः।
स्वधर्मन्देववीतये श्रेष्ठं नो धेहि वार्यं॥२॥
घृतऽवंतः। पावक। ते। स्तोकाः। श्चोतंति। मेदसः।
स्वऽधर्मन्। देवऽवीतये। श्रेष्ठं। नः। धेहि। वार्यं॥२॥

पावक पापशोधक हे अग्ने स्वधर्मन् स्वायत्तधर्मके सांगेऽस्मिन्यज्ञे ते तव भक्षणार्थं देववीतये यजनीयदेवानां भक्षणार्थं च घृतवंतो घृतोपेता मेदसो मेदोरूपस्य हविषः स्तोका विंदवः श्चोतंति। क्षरंति। अथवा देववीतये देवस्य तव वीतय इति योजनीयं। तस्माद्वार्यं वरणीयं संभजनीयं श्रेष्ठमुत्तमं धनं नोऽस्मभ्यं धेहि। प्रयच्छ॥ श्चोतंति। श्चुतिर् क्षरण इत्यस्य लटि रूपं। स्वधर्मन्। स्वेऽंगभूता धर्माणो यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। सुपां सुलुगिति सप्तम्या लुक्। देववीतये। देवानां वीतिः प्रीतिर्यस्यां भक्षणक्रियायां सा देववीतिः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। श्रेष्ठं। प्रशस्यशब्दादतिशायन इष्ठन्। प्रशस्यस्य श्र इति श्रादेशः। गुणः। एकादेशस्वरः। धेहि। दधातेर्लोट्। वार्यं। वृङ् संभक्तौ। ऋहलोर्ण्यदिति ण्यत्। ईडवंदेत्यादिनाद्युदात्तत्वं। एतिस्तुशासित्यादिना क्यप् वृणोतेरेव न वृङः॥

॥ अथ तृतीया ॥

तुभ्यं॑ स्तो॒का घृ॑त॒श्चुतोऽग्ने॒ विप्रा॑य संत्य।
ऋषि॒ः श्रेष्ठ॒ः समि॑ध्यसे य॒ज्ञस्य॑ प्रावि॒ता भ॑व॥३॥
तुभ्यं॑। स्तो॒काः। घृ॒त॒ऽश्चुतः॑। अग्ने॑। विप्रा॑य। सं॒त्य॒।
ऋषिः॑। श्रेष्ठः॑। सं। इ॒ध्य॒से॒। य॒ज्ञस्य॑। प्र॒ऽअ॒वि॒ता। भ॒व॒॥३॥

संत्य यष्टृभिः संभजनीय यद्वा यष्टृभ्यः फलप्रद हे अग्ने विप्राय मेधाविने तुभ्यं त्वदर्थं घृतश्चुतः घृतक्षरणयुक्ताः स्तोकाः संति। ऋषिरतींद्रियार्थदर्शी अत एव श्रेष्ठः सर्वातिशायी त्वं समिध्यसे। घृतयुक्तमेदोविंदुभिः सम्यक् प्रज्वाल्यसे। स त्वं यज्ञस्यास्माभिः क्रियमाणस्य पशुयागस्य प्राविता प्रकर्षेण पालको भव॥ तुभ्यं। युष्मच्छब्दस्य ङयि तुभ्यमह्यौ ङयि। पा॰ ७. २. ९५.। इति तुभ्यादेशः। ङेप्रथमयोरमिति ङेरमादेशः। ङयि चेत्याद्युदात्तत्वं। संत्य। षण संभक्तौ षणु दाने वा। क्तिच्क्तौ च संज्ञायामिति क्तिच्। न क्तिचि दीर्घश्चेति दीर्घनलोपाभावः। संतौ भवो भवे छंदसीति तत्र साधुरिति वा यत्प्रत्ययः। यस्येति लोपः। आमंत्रितत्वान्निघातः। इध्यसे। ञिइंधी दीप्तौ। कर्मणि यक्। किद्वादनुनासिकलोपः। निघातः। प्राविता। अव रक्षणादिषु। तृचि रूपं। समासस्वरः। भव। निघातः॥

॥ अथ चतुर्थी ॥

तुभ्यं॑ श्चोतं॒त्यध्रिगो शचीवः स्तो॒कासो॑ अग्ने॒ मेद॑सो घृ॒तस्य॑ ।

क॒वि॒श॒स्तो बृ॑ह॒ता भा॒नुना आगा॑ ह॒व्या जु॑षस्व मेधिर ॥४॥

तुभ्यं॑ । श्चो॒तं॒ति॒ । अ॒ध्रि॒गो॒ इत्य॑ध्रिऽगो । श॒ची॒ऽव॒ः । स्तो॒कास॑ः । अ॒ग्ने॒ । मेद॑सः । घृ॒तस्य॑ ।

क॒वि॒ऽश॒स्तः । बृ॒ह॒ता । भा॒नुना॑ । आ । अ॒गा॒ः । ह॒व्या । जु॒ष॒स्व॒ । मे॒धि॒र॒ ॥४॥

अध्रिगो अधृतगमन सततगमनस्वभाव । अत एव शचीवः शक्तिमन् हे अग्ने तुभ्यं त्वदर्थं मेदसो मेदोरूपस्य हविषो घृतस्य स्तोकासो विंदवः श्चोतंति । स्रवंति । तस्मात्कविशस्तः कविभिः कर्माभिज्ञैर्होत्रादिभिः स्तुतस्त्वं बृहता प्रभूतेन भानुना तेजसा सहितः सन् आगाः । अस्मदीयं पशुयागमभ्यागच्छ । आगत्य च मेधिर प्रज्ञावन्नग्ने हव्या अस्माभिर्दीयमानानि वपादीनि हवींषि जुषस्व । सेवस्व ॥ अध्रिगो । गमनं गौरिति गम्लृ सृप्लृ गतावित्यस्य भावे गमेर्डोरिति डोः । अधृता गौर्येनेत्यत्र गोस्त्रियोरुपसर्जनस्येति गोशब्दस्य ह्रस्वत्वं । धृतशब्दस्य पृषोदरादित्वात् ध्रिभावः । संबोधने संबुद्धौ च । पा॰ ७. ३. १०६. । इति गुणः । अपादादित्वान्निघातः । शचीवः । मतुपो मतुवसो रुरिति रुत्वं । कविशस्तः । शन्सु स्तुतावित्यस्य निष्ठायामनुनासिकलोपः । यस्य विभाषेतीट्प्रतिषेधः । थाथघञ्क्ताजबित्रकाणामित्यंतोदात्तत्वं । भानुना । भा दीप्तौ । दाभाभ्यां नुरिति कर्तरि नुः । प्रत्ययस्वरः । अगाः । इण् गतावित्यस्य छांदसे लुङि इणो गेति गादेशः । गातिस्थेति सिचो लोपः । निघातः । मेधिर । मेधारथाभ्यामिरनिरचौ वक्तव्यावितीरन् । आमंत्रितत्वान्निघातः ॥

॥ अथ पंचमी ॥

ओजि॑ष्ठं ते मध्य॒तो मेद॒ उद्भृ॑तं॒ प्र ते॑ व॒यं द॑दामहे ।

श्चोतं॑ति ते वसो स्तो॒का अधि॑ त्व॒चि प्रति॒ तान्दे॑व॒शो वि॑हि ॥५॥

ओजि॑ष्ठं । ते॒ । म॒ध्य॒तः । मेद॑ः । उत्ऽभृ॑तं । प्र । ते॒ । व॒यं । द॒दा॒म॒हे॒ ।

श्चोतं॑ति । ते॒ । व॒सो॒ऽइति॑ । स्तो॒काः । अधि॑ । त्व॒चि । प्रति॑ । तान् । दे॒व॒ऽशः । वि॒हि॒ ॥५॥

हे अग्ने ओजिष्ठं अतिशयेन सारयुक्तं मेदो वपाख्यं हविर्मध्यतः पशोर्मध्यभागात्ते त्वदर्थमुद्भृतमुद्धृतमध्वर्य्वादयो वयमस्मिन्पशौ ते तुभ्यं प्रददामहे । उद्भृतं

तद्वपाख्यं हविः प्रयच्छामः। वसो सर्वस्य जगतो वासयितर्हे अग्ने त्वच्यधि वपायामुपरि ये स्तोका घृतमिश्रा विंदवस्ते ते त्वदर्थं श्चोतंति। स्रवंति। यद्वा ते तव त्वच्यधि ज्वालाख्यशरीरस्योपरि श्चोतंति। तान् स्तोकान्देवशो देवेषु प्रति विहि। प्रत्येकं विभजस्व॥ मध्यतः। मध्यशब्दात् पंचम्यास्तसिः। पा० ५.४.४४.१.। इति तसिः। प्रत्ययस्वरः। उद्भृतं। हृञ् हरणे। कर्मणि क्तः। हृग्रहोर्भश्छंदसीति हकारस्य भकारः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। ददामहे। दद दान इत्यस्य लटि ङित्त्वादात्मनेपदं। अतो दीर्घो यञीति दीर्घः। निघातः। श्चोतंति। श्चुतिर् क्षरणे। पादादित्वादनिघातः। अंतेर्लसार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः। त्वचि। तनु विस्तारे। तनोतेरनश्च वः। उ० २.६३.। इति कर्तरि कर्मणि वा चिक्। अकारनकारयोर्वकारादेशः। तनोति तायते वा त्वक्। सावेकाच इति विभक्तेरुदात्तत्वं। विहि। वी कांतिगत्यादिष्वित्यस्य लोट्यदादित्वाच्छपो लुक्। ह्रस्वश्छांदसः। निघातः। खिलं॥

॥ इति तृतीयस्य प्रथम एकविंशो वर्गः॥

अयं स इति पंचर्चं दशमं सूक्तं। अत्रेयमनुक्रमणिका। अयं स उपांत्यानुष्टुप् पुरीष्येभ्योऽग्निभ्य इति। ऋषिः कौशिको गाथी। पंचचितिरूपा अग्नयो देवता। चतुर्थ्यनुष्टुप् शिष्टास्त्रिष्टुभः॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तः सूक्तविनियोगः। अग्निचयन इष्टकाप्रणयने पुरीष्यास इत्येषानुवचनीया। प्रेषितः पुरीष्यचितयेऽन्वाहेत्युपक्रम्य पुरीष्यासो अग्नय इति त्रिरुपांशु सप्रणवमिति सूत्रितं॥

॥ तस्मिन्सूक्ते प्रथमा॥

अयं सो अग्निर्यस्मिन्त्सोममिंद्रः सुतं दधे जठरे वावशानः।
सहस्रिणं वाजमत्यं न सप्तिं ससवान्त्सन्त्स्तूयसे जातवेदः॥१॥

अयं। सः। अग्निः। यस्मिन्। सोमं। इंद्रः। सुतं। दधे। जठरे। वावशानः।
सहस्रिणं। वाजं। अत्यं। न। सप्तिं। ससऽवान्। सन्। स्तूयसे। जातऽवेदः॥१॥

गाथी ब्रूते। अयमुत्तरवेद्यामाहुत्यधिकरणभूताहवनीयरूपतया दृश्यमानोऽग्निः स तथाविधः खलु वावशानः सोमं कामयमान इंद्रो यस्मिन्नग्नौ सुतमभिषवादिसंस्कारोपेतं सोमं जठरे स्वोदरे दधे दधार। तस्मात्तादृशमहिमोपेतः सोऽग्निरिति पूर्वेणान्वयः। किंच। हे जातवेदः सहस्रिणं। सहस्रं नानारूपतां

युद्धे यो भजति स सहस्री । तमत्यं वेगवशादतनशीलं सप्तिं न अश्वमिव वाजं आज्यौषधिसोमाद्यनेकप्रकारं हविर्लक्षणमन्नं ससवान् भेजिवान् सन् त्वं स्तूयसे। स्तोतृभिरस्माभिः स्तूयमानो वर्तसे ॥ दधे । दधातेर्लिटि लिटस्तझयोरेशिरेजिति तप्रत्ययस्य एशित्यादेशः । यद्वृत्तयोगादनिघातः । प्रत्ययस्वरः । वावशानः । वश कांतावित्यस्य यङ्लुकि दीर्घोऽकित इत्यभ्यासस्य दीर्घः । व्यत्ययेन शानच् । चित्स्वरः । ससवान् । षण संभक्तौ । क्वसाविडभावः । नलोपः । प्रत्ययस्वरः । स्तूयसे । ष्टुञ् स्तुतौ । कर्मणि यक् । अकृत्सार्वधातुकयोरिति दीर्घः । निघातः ॥

॥ अथ द्वितीया ॥

अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।
येनांतरिक्षमुर्वाततंथ त्वेषः स भानुरर्णवो नृचक्षाः ॥ २ ॥

अग्ने । यत् । ते । दिवि । वर्चः । पृथिव्यां । यत् । ओषधीषु । अप्ऽसु । आ । यजत्र ।
येन । अंतरिक्षं । उरु । आऽततंथ । त्वेषः । सः । भानुः । अर्णवः । नृऽचक्षाः ॥ २ ॥

यजत्र यजनीय हे अग्ने दिवि द्युलोके यद्वर्च आदित्याख्यं यज्ज्योतिस्तत्ते तवैव ज्योतिः । पृथिव्यामाहवनीयादिरूपतया वर्तमानं यत्तेजस्तत्त्वदीयमेव। प्रसिद्धं तेजोऽभिधाय गूढं ज्योतिरभिधत्ते। यदोषधीष्वप्स्विति। ओषधीष्वरणिप्रभृतिषु काष्ठेषु यत्तेजः । यद्वा । ओषधीषु वनस्पत्यादिषु सोमाख्यं यत्तेजोऽप्सु जलेषु यदौर्वाख्यं तेजस्तत्सर्वं आ सर्वत्र वर्तमानं तेजस्तावकमेव । किंच येन वायुरूपेण तेजसांतरिक्षमाकाशमुर्वाततंथ आतेनिथ विस्तीर्णं कृतवानसि । त्वेषो दीप्तिमान् अत एव भानुर्भासमानो नृचक्षा नृणां साक्षितया द्रष्टार्णवः समुद्रवन्महान् । स तादृशस्त्वमंतरिक्षमातेनिथेति पूर्वेणान्वयः । उक्तार्थे वाजसनेयकं । अग्ने यत्ते दिवि वर्च इत्यादित्यो वा अस्य दिवि वर्चः पृथिव्यामित्ययमग्निः पृथिव्यां यदोषधीष्वप्स्वा यजत्रेति य एवौषधिषु चाप्सु चाग्निस्तमेतदाह येनांतरिक्षमुर्वाततंथेति वायुः स त्वेषः स भानुरर्णवो नृचक्षा इति महांस्त भानुरर्णवो नृचक्षा इत्येतत् । शत॰ ब्रा॰ ७. १. २३. । इति ॥ पृथिव्यां । उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं । ओषधीषु । ओषधेश्च विभक्तावप्रथमायामिति दीर्घत्वं। अप्सु। सावेकाच इति विभक्तेरुदात्तत्वं। आततंथ। तनु विस्तार इत्यस्य लिटि थलि बभूथाततंथ जगृभ्म ववर्थेति निपातनादिडेत्वाभ्यासलोपा न

भवंति। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। यद्वृत्तयोगादनिघातः। अर्णवः। अर्णांस्यस्मिन्संतीति मतुबर्थे वप्रकरणेऽन्येभ्योऽपि दृश्यत इति वप्रत्ययः। अर्णसः सलोपश्चेति सलोपः। प्रत्ययस्वरः। नृचक्षाः। चक्षिङ् व्यक्तायां वाचि। अभिव्यक्तवाग्वाच्ययं धातुरत्राभिव्यक्तिमात्रे वर्तते। चक्षेर्बहुलं शिच्चेत्यसुन्। कृदुत्तरपदप्रकृतिस्वरः॥

॥ अथ तृतीया ॥

अग्ने॑ दि॒वो अर्ण॒मच्छा॑ जिगा॒स्यच्छा॑ दे॒वाँ ऊ॑चिषे॒ धिष्ण्या॒ ये।
या रो॑च॒ने प॒रस्ता॒त्सूर्य॑स्य॒ याश्चा॒वस्ता॑दुप॒तिष्ठ॑न्त॒ आपः॑॥३॥

अग्ने॑। दि॒वः। अर्णं॑। अच्छ॑। जि॒गा॒सि॒। अच्छ॑। दे॒वान्। ऊ॒चि॒षे॒। धिष्ण्याः॑। ये।
याः। रो॒च॒ने। प॒रस्ता॑त्। सूर्य॑स्य। याः। च॒। अ॒वस्ता॑त्। उ॒प॒ऽतिष्ठ॑न्ते। आपः॑॥३॥

हे अग्ने त्वं दिवोऽर्णं द्युलोके वर्तमानमर्णोऽंभोऽच्छाभिलक्ष्य जिगासि। धूमद्वारा प्राप्नोषि। किंच। धिष्ण्याः। धियं बुद्ध्युपहितं देहमुष्णंत्युष्णीकुर्वंतीति धिष्ण्याः प्राणाभिमानिनो देवाः। तान्प्राणाख्यान्देवानच्छानुक्रमेणोचिषे। समवेतान्करोषि। समवेता भवतेत्युक्तवानसीत्यर्थः। सूर्यस्य सूर्यलोकस्य परस्तादुपरि रोचने। रोचनो नामायं लोको यत्राग्नेयं ज्योतिस्तपति। तस्मिन्भासमाने रोचनाख्ये लोके या आपो विद्यंते अवस्तात्सूर्यलोकादधस्तादंतरिक्षलोके याश्चाप उपतिष्ठंते वर्तंते ता उभयीरपस्त्वं प्रेरयसि। उक्तार्थो वाजसनेयिभिः स्पष्टमभिहितः। आपो वा अस्य दिवोऽर्णस्ता एष धूमेनाच्छैत्यच्छा देवाँ ऊचिषे धिष्ण्या य इति प्राणा वै देवा धिष्ण्यास्ते हि सर्वा धिय इष्णंति या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपतिष्ठंत आप इति रोचनो ह नामैष लोको यत्रैष एतत्तपति तद्याश्चैतं परेणापो याश्चावरेण ता एतदाह। शत० ब्रा० ७.१.२४.। इति। ता उभयीरपस्त्वं प्रेरयसीति॥ अर्णं। ऋ गतावित्यस्मादुदके नुट् चेत्यसुन्नुडागमश्च। अर्यते प्रार्थ्यते तत्पिपासुभिरित्यर्णः। सकारलोपश्छांदसः। नित्त्वादाद्युदात्तः। जिगासि। गा स्तुतौ च छंदसीत्ययं धातुश्चकाराद्गमने वर्तमानो जुहोत्यादिः। बहुलं छंदसीत्यभ्यासस्येत्वं। निघातः। ऊचिषे। ब्रूञ् व्यक्तायां वाचीत्येतस्य लिट आर्धधातुकत्वाद्ब्रुवो वचिः। पा० २.४.५३.। इति वच्यादेशः। असंयोगाल्लिट् किदिति किद्वद्भावाद्वचिस्वपीत्यादिना संप्रसारणं। अभ्यासस्य लिट्यभ्यासस्योभयेषामिति संप्रसारणं। आर्धधातुक इट्। निघातः। धिष्ण्याः। उष प्लुष दाहे। धिय

उष्णंतीति सानसिधर्णसिपर्णसितंडुलांकुशचषालेल्वलपल्वलधिष्ण्यशल्या इति निपातनात् यन्नुडागमधात्वादिलोपोपपदह्रस्वादयः सर्वे सिद्धा भवंति । नित्त्वादाद्युदात्तः । अवस्तात् । अवरशब्दात् दिक्छब्देभ्यः सप्तमीपंचमीत्यादिना अस्तातिः । तस्मिन्विभाषावरस्य । पा० ५. ३. ४१. । इत्यवादेशः । प्रत्ययस्वरः । उपतिष्ठंते । ष्ठा गतिनिवृत्तौ । उपपूर्वात्तिष्ठतेरकर्मकाच्च । पा० १. ३. २६. । इत्यात्मनेपदं । यद्वृत्तयोगादनिघातः ॥

॥ अथ चतुर्थी ॥

पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः ।
जुषंतां यज्ञमद्रुहोऽनमीवा इषो महीः ॥ ४ ॥
पुरीष्यासः । अग्नयः । प्रवणेभिः । सऽजोषसः ।
जुषंतां । यज्ञं । अद्रुहः । अनमीवाः । इषः । महीः ॥ ४ ॥

पुरीष्यासः सिकतासंमिश्रा अग्नयश्चित्या अग्नयः प्रवणेभिर्मृत्खननसाधनभूतैरभ्र्यादिभिः सहिताः सजोषसः परस्परसंगताः संतो यज्ञमस्माभिः क्रियमाणमग्निचयनपूर्वकमिमं सोमयागं जुषंतां । सेवंतां । किंच । अद्रुहोऽद्रोग्धारो यूयमनमीवा रोगादिवर्जिता महीर्महत्य इष ऊर्जो रोगादिरहितान्यन्नान्यस्मभ्यं प्रयच्छतां ॥ पुरीष्यासः । पॄ पालनपूरणयोः । ईषन्नित्यनुवृत्तौ शॄपॄभ्यां कित् । उ० ४. २७. । इतीषन्प्रत्ययः किच्च । कित्त्वाद्गुणे प्रतिषिद्ध उदोष्ठ्यपूर्वस्येत्युत्वं । रपरः । पृणाति पूर्यते वेति पुरीषं । पुरीषं पृणातेः पूरयतेर्वा । नि० २. २२. । इति यास्कः । तदर्हतीति पुरीष्याः । छंदसि चेति यप्रत्ययः । यचि भमिति भसंज्ञायां यस्येति लोपः । प्रत्ययस्वरः । प्रावणेभिः । वन षण संभक्तावित्यस्मात्पुंसि संज्ञायां घः प्रायेणेति करणे घप्रत्ययः । प्रकर्षेण वन्यते संभज्यते संश्लिष्यते मृदेभिरिति प्रावणानि खनित्राणि । प्रनिरंतः । पा० ८. ४. ५. । इत्यादिना णत्वं । वनं समासे । पा० ६. २. १७८. । इत्यंतोदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरः । यद्वा । प्रुङ् गतौ । प्रवंते गच्छंति मृत्खननं प्रतीति चलनशब्दार्थादकर्मकाद्युच् । पा० ३. २. १४८. । इति युच् । चित्स्वरः । पूर्वस्मिन्पक्षेऽवग्रहाभावश्छांदस इति वक्तव्यं । जुषंतां । जुषी प्रीतिसेवनयोरित्यस्य लोटि रूपं । पादादित्वादनिघातः । महीः । महच्छब्दादुगितश्चेति ङीप् । तकारलोपश्छांदसः । प्रत्ययस्वरेणांतोदात्तः ॥

॥ अथ पंचमी ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ५ ॥

इळां । अग्ने । पुरुऽदंसं । सनिं । गोः । शश्वत्ऽतमं । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ५ ॥

एषा ऋक् पूर्वमेव व्याख्याता ॥

॥ इति तृतीयस्य प्रथमे द्वाविंशो वर्गः ॥

निर्मथितः सुधित इति पंचर्चमेकादशं सूक्तं । अत्रानुक्रमणिका । निर्मथितो देवश्रवा देववातश्च भारतौ तृतीया सतोबृहतीति । भरतस्य पुत्रौ देवश्रवा देववातश्चेत्युभावस्य ऋषी । तृतीया सतोबृहती । शिष्टास्त्रिष्टुभः । अग्निर्देवता । आ होतेत्यादिसूक्तदशकस्योक्तो विनियोगः प्रातरनुवाकाश्विनशस्त्रयोः । इळामग्न इत्यस्या विनियोगोऽसकृदुपदिष्टः ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

निर्मथितः सुधित आ सधस्थे युवा कविरध्वरस्य प्रणेता ।
जूर्यत्स्वग्निरजरो वनेष्वत्रा दधे अमृतं जातवेदः ॥ १ ॥

निःऽमथितः । सुऽधितः । आ । सधऽस्थे । युवा । कविः । अध्वरस्य । प्रऽनेता ।
जूर्यत्ऽसु । अग्निः । अजरः । वनेषु । अत्र । दधे । अमृतं । जातऽवेदः ॥ १ ॥

भारतावृषी स्तोत्रं कुर्वाते । योऽग्निर्निर्मथितोऽग्निष्टोमादिकर्मस्वरण्योर्नितरां मथितः सन् सधस्थे यजमानगृहे सुधितो गार्हपत्यादिषु त्रिषु कुंडेषु सुष्ठु निहितः निधाय च काष्ठप्रक्षेपेण प्रज्वाल्यमानो युवा प्रबुद्धः अत एवाध्वरस्य ज्योतिष्टोमादेः प्रणेता प्रकर्षेणानेता निर्वाहको नेतृत्वादेव कविः क्रांतदर्शी । तथाविधो जातवेदाः सर्वविषयाभिज्ञानवान् सोऽग्निर्वनेषु महारण्येषु जूर्यत्सु दावाग्निसंबंधाज्जूर्यमाणेषु जरां नाशं प्राप्नुवत्स्वपि स्वयमजरो जरारहितः प्रत्युत दीप्यमानः सन् अत्र एवं स्तुतिं कुर्वाणेषु यजमानेष्वमृतं क्षयरहितं प्रभूतमन्नमादधे । निदधाति ॥ सुधितः । दधातेः कर्मणि निष्ठायां सुधितवसुधितनेमधितेत्यादिना निपातनाद्धि इत्यादेशः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । जूर्यत्सु । जूरी घूरी

हिंसावयोहान्योः । व्यत्ययेन शतृप्रत्ययः । दिवादित्वाच्छ्यन् । नित्त्वादाद्युदात्तः । अजरः । जॄ वयोहानावित्यस्माद्भाव ऋदोरबित्यप्प्रत्ययः । गुणः । नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं । दधे । दधातेर्वर्तमाने लिटि रूपं । जातवेदाः । जनी प्रादुर्भाव इत्यस्य क्ते जनसनखनां सञ्झलोरित्याकारः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

॥ अथ द्वितीया ॥

अमंथिष्टां भारता रेवदग्निं देवश्रवा देववातः सुदक्षं ।
अग्ने वि पश्य बृहताभि रायेषां नो नेता भवतादनु द्यून् ॥ २॥

अमंथिष्टां । भारता । रेवत् । अग्निं । देवऽश्रवाः । देवऽवातः । सुऽदक्षं ।
अग्ने । वि । पश्य । बृहता । अभि । राया । इषां । नः । नेता । भवतात् । अनु । द्यून् ॥ २॥

हे अग्ने भारता भारतौ भरतस्य पुत्रौ देवश्रवा देववातश्चेत्युभौ सुदक्षं शोभनसामर्थ्योपेतं रेवत् रयिमंतमग्निमंगनादिगुणोपेतं त्वाममंथिष्टां । अग्निष्टोमादिकर्मप्राप्त्यर्थमलूलुडतां । मथनेन त्वामुत्पादितवंतावित्यर्थः । तादृशस्त्वं बृहता प्रभूतेन राया धनेन सहितः सन् अभि अभिमुखो भूत्वा वि पश्य । अस्मान्विशेषेणानुग्रहदृष्ट्या वीक्षस्व । किंच । अनु द्यून् । द्युशब्दोऽहर्वाची वस्तोर्द्युरिति तन्नामसु पाठात् । द्यूननु सर्वेषु दिवसेषु नोऽस्माकमिषामन्नानां नेता आनेता भवतात् । भव ॥ अमंथिष्टां । मन्थ विलोडन इत्यस्माल्लुङि सिच् । वदव्रजहलंतस्याचः । पा॰ ७. २. ३. । इति वृद्धौ प्राप्तायां नेटीति प्रतिषेधः । तस्थस्थमिपामित्यादिना तसस्तामादेशः । पादादित्वादनिघातः । अट्स्वरः । भारता । भरतस्यापत्यमित्यर्थ उत्सादित्वादञ् । तद्धितेष्वचामादेरित्यादिवृद्धिः । ञित्स्वरः । रेवत् । रयिशब्दान्मतुप् । वत्वोदात्तत्वसंप्रसारणपरपूर्वत्वगुणसुब्लोपाः । देवश्रवाः । श्रु श्रवणे । असुन्निति कर्मण्यसुन् । देवैः श्रूयते प्रख्याप्यतेऽसाविति देवश्रवा ऋषिः । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यौणादिकसूत्रात्पूर्वपदस्वरः । देववातः । वा गतिगंधनयोः । अस्मात्कर्मणि क्तः । देवैरिष्यमाणतया प्राप्तो देववात ऋषिः । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः । द्यून् । द्यु अभिगमने द्युत दीप्तौ वा । ङिच्चेत्यनुवृत्तौ द्युयुभ्यां चेति भोजसूत्रेण डुप्रत्ययो ङिच्च । द्युतेरश्वादयश्च । उ॰ ५. २९. । इति डुन्प्रत्ययः । अभिगच्छंत्यस्मिन् स्वं स्वमभिमतं देशं प्राणिन इति द्योतते किरणसंबंधादिति वा द्युर्दिवसः । प्रथमयोरिति सवर्ण-

दीर्घः । तस्माच्छसो नः पुंसि । पा° ६. १. १०३. । इति सकारस्य नकारः । एकादेशस्वरः ॥

॥ अथ तृतीया ॥

दश क्षिपः पूर्व्यं सीमजीजनन्त्सुजातं मातृषु प्रियं ।
अग्निं स्तुहि दैववातं देवश्रवो यो जनानामसद्वशी ॥ ३ ॥
दश । क्षिपः । पूर्व्यं । सीं । अजीजनन् । सुऽजातं । मातृषु । प्रियं ।
अग्निं । स्तुहि । दैवऽवातं । देवऽश्रवः । यः । जनानां । असत् । वशी ॥ ३ ॥

हे अग्ने देववातस्य क्षिपः । क्षिप्यंते कर्मकरणार्थमिति क्षिपोऽंगुलयः । ताश्च दश । बाहुद्वयस्य मथनसाधनत्वेन तत्रत्या अंगुलयो दशसंख्याकाः । तादृश्योऽंगुलयः पूर्व्यं पुरातनं सीमेनं त्वामजीजनन् । उदपीपदन् । हे देवश्रवो मातृषु मातृभूतारण्योः सुजातं सुष्ठूत्पन्नं अत एव प्रियं कमनीयं दैववातं देववातेन मथितमेनमग्निं स्तुहि । योऽग्निर्जनानां स्तोतॄणां यजमानानां वशी वशवर्ती कर्मणां स्वातंत्र्येण प्रवर्तकोऽसत् भवति तं स्तुहीति पूर्वेणान्वयः ॥ दश । दन्श दशने । कनिन्नित्यनुवृत्तौ नुदशोर्गुणश्चेति कनिन् । नित्स्वरः । क्षिपः । क्षिप प्रेरणे । औणादिकः कर्मणि क्विप् । क्षिप्यंते प्रेर्यंते कर्मस्विति क्षिपोऽंगुलयः । धातुस्वरः । अजीजनन् । जनी प्रादुर्भावे । हेतुमण्ण्यंतस्य लुङि चङ्द्विर्वचनसन्वद्भावाभ्यासेत्वदीर्घाः । निघातः । स्तुहि । ष्टुञ् स्तुतावित्यस्य लोटि रूपं । अदादित्वाच्छपो लुक् । निघातः । दैववातं । देववातेन निर्वृत्तमित्यर्थे तेन निर्वृत्तं पा° ४. २. ६८. । इत्यण् । प्रत्ययस्वरः । असत् । अस भुवि । अस्य लेट्यडागमः । यद्वृत्तयोगादनिघातः ॥

॥ अथ चतुर्थी ॥

नि त्वा दधे वर आ पृथिव्या इळायास्पदे सुदिनत्वे अह्नां ।
दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि ॥ ४ ॥
नि । त्वा । दधे । वरे । आ । पृथिव्याः । इळायाः । पदे । सुदिनऽत्वे । अह्नां ।
दृषत्ऽवत्यां । मानुषे । आपयायां । सरस्वत्यां । रेवत् । अग्ने । दिदीहि ॥ ४ ॥

हे अग्ने इलाया गोरूपधारिण्याः पृथिव्या भूमेर्वरे वरिष्ठे पद उत्तरवेद्यां अह्नां सुदिनत्वे यजनीयदिवसानां शोभनदिनत्वार्थं । येषु दिनेष्विंद्रादयो वरी-

यांसो देवा इज्यंते तानि सुदिनानि। तदर्थं त्वा त्वामा निदधे। आ समंतान्निदधामि। उत्तमानि स्थानानि दर्शयति। दृषद्वत्यां। दृषद्वती नाम काचिन्नदी तस्यां। मानुषे मनुष्यसंचारविषये तीरे। आपयायां। आपया नाम काचिन्नदी तस्यां। सरस्वत्यां नद्यां। एतेषु स्थानेषु त्वं रेवत् धनयुक्तं यथा भवति तथा दिदीहि। दीप्यस्व। महर्षयः सरस्वतीतीरे खलु यज्ञादिकर्माण्यकार्षुः। तथा च ब्राह्मणं ऋषयो वै सरस्वत्यां सत्रमासत। ऐ० ब्रा० २. १९.। इति ॥ दधे। दधातेर्लिंट्युत्तमैकवचने रूपं। वरे। वृञ् वरणे। ग्रहवृदृनिश्चिगमश्चेत्यप्। पित्वादनुदात्तत्वे धातुस्वरः। दृषद्वत्यां। दॄ विदारणे। दृणातेः षुग्घ्रस्वश्च। उ० १. १२९.। इत्यादिना षुगागमो धातोर्ह्रस्वश्च। दृषद् उपला यस्यां संतीति मतुप्। झय इति तस्य वत्वं। स्वरविधौ व्यंजनमविद्यमानवदित्यस्याः परिभाषाया अत्राश्रयणाभावान्मतुप उदात्तताभावः। अदिप्रत्ययस्वरः। सरस्वत्यां। सरःशब्दोऽसुनंतत्वादाद्युदात्तः। तदस्यास्तीति मतुप्। अदुपधत्वान्मस्य वत्वं। उगित्वात् ङीप्। दिदीहि। दिवु क्रीडादावित्यस्य यङ्लुकि रूपं ॥

॥ अथ पंचमी ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ५ ॥
इळां। अग्ने। पुरुऽदंसं। सनिं। गोः। शश्वत्ऽतमं। हवमानाय। साध।
स्यात्। नः। सूनुः। तनयः। विजाऽवा। अग्ने। सा। ते। सुऽमतिः। भूतु। अस्मे इति ॥ ५ ॥

व्याख्यातेयमित्युपेक्षिता ॥

॥ इति तृतीयस्य प्रथमे त्रयोविंशो वर्गः ॥

अग्ने सहस्वेति पंचर्चं द्वादशं सूक्तं। अत्रानुक्रमणिका। अग्ने सहस्व गायत्रमाद्यानुष्टुबिति। ऋषिर्गाथिनो विश्वामित्रः। अग्निर्देवता। आद्यानुष्टुप् शिष्टा गायत्र्यः ॥ सूक्तविनियोगो लैंगिकः ॥ प्रातरनुवाक आश्विनशस्त्रे च प्रथमावर्जितस्य सूक्तस्य विनियोगः। अथैतस्या इति खंडे सूचितं। अग्न इळेति चतस्रः। आ० ४. १३.। इति ॥ अभ्युदयेष्टावग्नेर्दातुरनुवाक्याग्ने दा दाशुष इत्येषा। अथाग्नेय्य इति खंडे सूचितं। अग्ने दा दाशुषे रयिं स यंता विप्र एषां। आ० ३. १३.। इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

अग्ने सहस्व पृतना अभिमातीरपास्य ।

दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसे ॥ १ ॥

अग्ने । सहस्व । पृतनाः । अभिऽमातीः । अप । अस्य ।

दुस्तरः । तरन् । अरातीः । वर्चः । धाः । यज्ञऽवाहसे ॥ १ ॥

विश्वामित्रः स्तौति । हे अग्ने पृतना अभियोक्त्रीः सेनाः सहस्व । अभिभव । अभिमातीरभिमानिनः कर्मविघ्नकारिणः शत्रून् अपास्य । अपनुद । किंच दुष्टरो न केनापि तरितुं शक्यः अत एव अरातीररातीन् शत्रून् तरन् स्वतेजसा तिरस्कुर्वंस्त्वं यज्ञवाहसे यज्ञनिर्वाहकाय यजमानाय वर्चो धाः । अन्नं धेहि । कुरु ॥ सहस्व । षह मर्षणे इत्यस्य लोटि रूपं । आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः । अभिमातीः । माङ् माने । मानं मातिः । भावे क्तिन् । अस्यालुग्विकरणत्वादीत्वेत्वे न भवतः । अभितो मानं येषां त इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अस्य । असु क्षेपणे । दिवादिः । लोटि रूपं । दुष्टरः । तॄ प्लवनतरणयोः । अस्मादकृच्छ्रार्थे खल् । सुषामादित्वाद्विसर्जनीयस्य सकारस्य षत्वं । लित्स्वरः । तरन् । तरतेः शतरि रूपं । अदुपदेशाल्लसार्वधातुकस्वरेण शतुरनुदात्तत्वे कृते धातुस्वरः । धाः । दधातेश्छंदसि लुङि रूपं । निघातः ॥

॥ अथ द्वितीया ॥

अग्न इळा समिध्यसे वीतिहोत्रो अमर्त्यः ।

जुषस्व सू नो अध्वरं ॥ २ ॥

अग्ने । इळा । सं । इध्यसे । वीतिऽहोत्रः । अमर्त्यः ।

जुषस्व । सु । नः । अध्वरं ॥ २ ॥

हे अग्ने वीतिहोत्रः । वीतिः प्रीतिविषयं होत्रमग्निहोत्रादिकं यस्यासौ वीतिहोत्रः । यज्ञेषु प्रीतिमानित्यर्थः । अमर्त्यो मरणधर्मरहितस्त्वमिळायामीड्यायामुत्तरवेद्यां समिध्यसे । आज्याहुतिप्रक्षेपेण सम्यक् प्रज्वाल्यसे । तादृशस्त्वं नोऽस्माकमध्वरमिमं यज्ञं सु सुष्ठु जुषस्व । आहुतिस्वीकरणेन सेवस्व ॥ वीतिहोत्रः । वी कांत्यादिषु । अस्मात्कर्मणि मंत्रे वृषेषपचेत्यादिना क्तिनुदात्तः ।

बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। जुषस्व। जुषतेर्लोटि रूपं। शस्वरः। सु। निपातस्य चेति संहितायां दीर्घः ॥

॥ अथ तृतीया ॥

अग्ने द्युम्नेन जागृवे सहसः सूनवाहुत।
एदं बर्हिः सदो मम ॥ ३ ॥
अग्ने। द्युम्नेन। जागृवे। सहसः। सूनो इति। आऽहुत।
आ। इदं। बर्हिः। सदः। मम ॥ ३ ॥

द्युम्नेन स्वतेजसा सह जागृवे। जागर्तीति जागृविः। तस्य संबुद्धिः। लोकरक्षार्थं स्वतेजसा सह सर्वदा जागरणोपेत आहुत देवताह्वानार्थमस्माभिराहुत सहसः सूनो बलस्य पुत्र हे अग्ने मम मत्संबंधिन्यस्मिन्यज्ञे यज्ञेद्यामास्तीर्णमिदं बर्हिस्तत्रासदः। आसीद ॥ जागृवे। जागृ निद्राक्षये। जॄशॄस्तॄजागृभ्यः क्विन्निति क्विन्। किद्वादगुणः। जागर्तीति जागृविः। जागृविर्जागरणात्। नि॰ ९. ८.। इति यास्कः। संबुद्धौ चेति गुणः। एङ्ह्रस्वात्। पा॰ ६.१.६९.। इति सोर्लोपः। निघातः। सहसः सूनो। सुप आमंत्रिते परांगवद्भावादनुदात्तत्वे पादादित्वादनिघातः। सदः। षद्लृ विशरणगत्यवसादनेष्वित्यस्य छांदसे लुङि लृदित्वादङ्। निघातः। मम। अस्मच्छब्दस्य षष्ठ्येकवचने ममादेशः। युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं ॥

॥ अथ चतुर्थी ॥

अग्ने विश्वेभिरग्निभिर्देवेभिर्महया गिरः।
यज्ञेषु य उ चायवः ॥ ४ ॥
अग्ने। विश्वेभिः। अग्निऽभिः। देवेभिः। महय। गिरः।
यज्ञेषु। ये। ऊं इति। चायवः ॥ ४ ॥

हे अग्ने देवेभिर्द्योतमानैर्विश्वेभिः सर्वैरग्निभिर्यष्टव्यतया स्थितैरग्निभिः सहितस्त्वं चायव उक्तविषयस्तुतिरूपाभिर्वाग्भिरनन्यमनस्कतया पूजका ये विद्यंते तेषां यज्ञेषु ज्योतिष्टोमादिषु गिरः स्तोत्रशस्त्रादिलक्षणानि वाक्यानि महय। पूजय ॥ महय। मह पूजायां। चुरादिः। अदंतत्वादुपधावृद्ध्यभावः। निघातः। चायवः। चायृ पूजानिशामनयोः। मृगय्वादयश्चेति कुप्रत्ययः। प्रत्ययस्वरः ॥

॥ अथ पंचमी ॥

अग्ने दा दाशुषे रयिं वीरवंतं परीणसं ।
शिशीहि नः सूनुमतः ॥५॥

अग्ने । दाः । दाशुषे । रयिं । वीरऽवंतं । परीणसं ।
शिशीहि । नः । सूनुऽमतः ॥५॥

हे अग्ने दाशुषे तुभ्यं हविर्दत्तवते यजमानाय वीरवंतं पुत्रयुक्तं परीणसं प्रभूतं रयिं धनं दाः । देहि । सूनुमतः पुत्रपौत्रादिसहितान्नोऽस्मान् शिशीहि । धनप्रदानेन तीक्ष्णीकुरु ॥ दाः । डुदाञ् दान इत्यस्य छांदसे लुङि रूपं । आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः । दाशुषे । दाशृ दान इत्यस्य क्वसौ दाश्वान्साह्वान्मीढ्वांश्चेति निपातनात् द्विर्वचनाभाव इडभावश्च । भसंज्ञायां संप्रसारणं । प्रत्ययस्वरः । परीणसं । परिपूर्वान्नसतेर्व्याप्त्यर्थात् क्विप् । अन्येषामपि दृश्यत इति दीर्घः । शिशीहि । शिङ् निशाने । व्यत्ययेन श्लुः । दीर्घश्छांदसः । हेरपित्त्वादंतोदात्तत्वं ॥

॥ इति तृतीयस्य प्रथमे चतुर्विंशो वर्गः ॥

अग्ने दिव इति पंचर्चं त्रयोदशं सूक्तं वैश्वामित्रं । अत्रेयमनुक्रमणिका । अग्ने दिवो वैराजमुपांत्याग्नेंद्रीति । विराट् छंदः । अग्न इंद्रश्चेत्येषेंद्राग्नीदेवताका । शिष्टा आग्नेय्यः ॥ अग्निष्टोम आज्यशास्त्रेऽग्न इंद्रश्चेति याज्या । अग्न इंद्रश्च दाशुषो दुरोण इति याज्या । आ० ५.९. । इति सूचितत्वात् ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

अग्ने दिवः सूनुरसि प्रचेतास्तना पृथिव्या उत विश्ववेदाः ।
ऋधग्देवाँ इह यजा चिकित्वः ॥१॥

अग्ने । दिवः । सूनुः । असि । प्रऽचेताः । तना । पृथिव्याः । उत । विश्वऽवेदाः ।
ऋधक् । देवान् । इह । यज । चिकित्वः ॥१॥

विश्वामित्रः स्तौति । हे अग्ने विश्ववेदाः सर्वविषयज्ञानवान् प्रचेताः कर्मविषयज्ञानवांस्त्वं दिवो द्युलोकाभिमानिदेवतायाः सूनुरसि । पुत्रो भवसि । उत अपि च पृथिव्याः पृथिव्यभिमानिदेवतायास्तना तनयोऽसि । किंच चिकित्वश्चे-

तनावन् हे अग्ने इहास्माभिः क्रियमाणेऽस्मिन्कर्मणि देवान् यजनीयानिंद्रादिदेवान् ऋधक् पृथक् क्रमेण यज। हविःप्रदानेन पूजय ॥ असि। अस भुवीत्यस्य लटि तासस्त्योर्लोप इति सलोपः। निघातः। विश्ववेदाः। बहुव्रीहौ विश्वं संज्ञायामिति विश्वस्यांतोदात्तत्वं ॥

॥ अथ द्वितीया ॥

अग्निः सनोति वीर्याणि विद्वान्त्सनोति वाजममृताय भूषन्।
स नो देवाँ एह वह पुरुक्षो ॥२॥

अग्निः। सनोति। वीर्याणि। विद्वान्। सनोति। वाजं। अमृताय। भूषन्।
सः। नः। देवान्। आ। इह। वह। पुरुक्षो इति पुरुऽक्षो ॥२॥

विद्वान् कर्माभिज्ञो योऽग्निर्वीर्याणि पशुपुत्रादिसंपद्रूपाणि सामर्थ्याणि सनोति यजमानाय ददाति यश्चाग्निर्भूषन् स्वतेजसा सर्वं जगद्भूषयन् अलंकुर्वन्नमृताय मरणधर्मरहितायेंद्रादिदेवाय वाजं हविर्लक्षणमन्नं सनोति प्रयच्छति पुरुक्षो पुरोडाशादिबहुविधान्नोपेत हे अग्ने स तादृशस्त्वं नोऽस्माकं संबंधिनीहास्मिन्यज्ञे देवान्यजनीयान्देवानावह। आह्वय ॥ सनोति। षणु दाने। तनादित्वादुप्रत्ययः। प्रत्ययस्वरः। पादादित्वादनिघातः। भूषन्। भूष अलंकारे। अंतर्भावितण्यर्थः। शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः शिष्यते। वह। वहेर्लोटि रूपं। पुरुक्षो। पुरवः क्षुधोऽन्नानि यस्येति पुरुक्षुः। अंत्यलोपश्छांदसः। संबुद्धौ चेति गुणः ॥

॥ अथ तृतीया ॥

अग्निर्द्यावापृथिवी विश्वजन्ये आ भाति देवी अमृते अमूरः।
क्षयन्वाजैः पुरुश्चंद्रो नमोभिः ॥३॥

अग्निः। द्यावापृथिवी इति। विश्वजन्ये इति विश्वऽजन्ये। आ। भाति। देवी इति। अमृते इति। अमूरः।
क्षयन्। वाजैः। पुरुऽचंद्रः। नमःऽभिः ॥३॥

अमूरोऽमूढः सर्वज्ञः क्षयन् ईशानः सर्वस्य जगतः अत एव पुरुश्चंद्रः पुरुचंद्रो बहुहिरण्योपेतः। यद्वा बहुदीप्तिस्वरूपः। वाजैर्बलैर्नमोभिरन्नैश्च सहितः

सोऽग्निर्विश्वजन्ये विश्वस्य जनयित्र्यौ। यद्वा विश्वं जन्यमुत्पाद्यं याभ्यां ते। देवी द्योतमाने अमृते मरणधर्मरहिते द्यावापृथिवी द्यावापृथिव्यावाभाति। आ समंतात्प्रकाशयति ॥ द्यावापृथिवी। दिवःशब्दस्य दिवो द्यावेति द्यावादेश आद्युदात्तः। पृथिवीशब्दो ङीषंतत्वेनांतोदात्तः। देवताद्वंद्वे चेत्युभयोः प्रकृतिस्वरत्वं। विश्वजन्ये। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तः। तत्पुरुषे तु स्वरश्चिंतनीयः। आ भाति। भा दीप्तौ। अंतर्भावितण्यर्थः। क्षयन्। क्षि ऐश्वर्ये। शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः। पुरुश्चंद्रः। ह्रस्वाच्चंद्रोत्तरपदे मंत्र इति सुडागमः। श्चुत्वेन शकारः। उत्तरपदांतोदात्तप्रकरणे चिचक्रादीनां छंदस्युपसंख्यानमित्युत्तरपदांतोदात्तत्वं। यद्वा समासस्येत्यंतोदात्तत्वं ॥

॥ अथ चतुर्थी ॥

अग्न इंद्रश्च दाशुषो दुरोणे सुतावंतो यज्ञमिहोप यातं।
अमर्धंता सोमपेयाय देवा ॥४॥

अग्ने। इंद्रः। च। दाशुषः। दुरोणे। सुतऽवंतः। यज्ञं। इह। उप। यातं।
अमर्धंता। सोमऽपेयाय। देवा ॥४॥

हे अग्ने त्वमिंद्रश्चोभौ देवा देवौ युवाममर्धंता अनागमनेन यज्ञहिंसामकुर्वंतौ संतौ सुतवतः सोमाभिषवं कुर्वतो दाशुषो हविर्दत्तवतो यजमानस्येह दुरोणे गृहे क्रियमाणमिमं यज्ञमभिलक्ष्य सोमपेयाय सोमपानार्थमुप यातं। उप समीप आगच्छतं ॥ यातं। या प्रापण इत्यस्य लोटि रूपं। निघातः। अमर्धंता। मृधु हिंसायामित्यस्य शतरि रूपं। नञा समासः। सुपो डादेशः। तत्पुरुषे नञ्स्वरः। सोमपेयाय। पा पाने। अचो यदिति यत्। ईद्यतीतीकारादेशः। आर्द्धधातुकलक्षणो गुणः। कृदुत्तरपदप्रकृतिस्वरः ॥

॥ अथ पंचमी ॥

अग्ने अपां समिध्यसे दुरोणे नित्यः सूनो सहसो जातवेदः।
सधस्थानि महयमान ऊती ॥५॥

अग्ने। अपां। सं। इध्यसे। दुरोणे। नित्यः। सूनो इति। सहसः। जातऽवेदः।
सधऽस्थानि। महयमानः। ऊती ॥५॥

सहसः सूनो बलस्य पुत्र जातवेदो जातप्रज्ञ हे अग्ने नित्योऽविनाशी ऊती ऊत्या रक्षणेन सधस्थानि प्राणिनां निवासभूतांल्लोकान्महयमानः परिचरंस्त्वमपां दुरोणेऽपां स्थानेऽंतरिक्षे समिध्यसे। सम्यग्दीप्यसे ॥ दुरोणे। अव रक्षण इत्यस्मादौणादिको नक्प्रत्ययः। ज्वरत्वरेत्यादिना ऊट्। गुणः। दुरोण इति गृहनाम। दुरवा भवंति। नि॰ ४.५.। इति यास्कः। प्रत्ययस्वरः। महयमानः। मह पूजायां। व्यत्ययेन शानच्। शानचो लसार्वधातुकस्वरेणानुदात्तत्वे णिच्स्वरः। ऊती। अव रक्षणादिषु। ऊतियूतिजूतीत्यादिना निपातनादंतोदात्तः। सुपां सुलुगिति तृतीयायाः सवर्णदीर्घः ॥

॥ इति तृतीयस्य प्रथमे पंचविंशो वर्गः ॥

वैश्वानरं मनसेति नवर्चं चतुर्दशं सूक्तं। तचानुक्रमणिका। वैश्वानरं नव तृचौ वैश्वानरीयमारुतौ जागतौ द्वृच आत्मस्तुतिर्वा पूर्वात्मगीतांत्योपाध्यायस्तुतिरिति। वैश्वानरं मनसेत्याद्यौ तृचौ जागतौ। प्रथमस्य वैश्वानरोऽग्निर्देवता। सप्तम्याद्यास्तिस्रस्त्रिष्टुभः। अग्निरस्मीति द्वृचस्याग्निः परं ब्रह्म वा देवता। नवम्यास्तु विश्वामित्रोपाध्यायस्य स्तुत्यत्वात्स एव देवता। सप्तमीवर्जितस्य सूक्तस्य विश्वामित्र ऋषिः। सप्तम्या ब्रह्मवाक्यत्वाद्यस्य वाक्यं स ऋषिरिति न्यायेन ब्रह्म ऋषिः॥ वैश्वानरं मनसेत्याद्यस्तृच आभिप्लविके चतुर्थेऽहनि आग्निमारुते वैश्वानरीयनिविद्धाने विनियुक्तः। तृतीयस्येति खंडे सूचितं। वैश्वानरं मनसेति तिस्रः। आ॰ ७.७.। इति॥ अयमेव तृचो बृहस्पतिसवेऽप्याग्निमारुते वैश्वानरीयनिविद्धानीयः॥ प्रयंतु वाजा इति द्वितीयतृचो बृहस्पतिसवे मारुतनिविद्धानीयः। उभयमप्युशनःस्तोमेनेति खंडे सूचितं। वैश्वानरं मनसाग्निं निचाय्य प्रयंतु वाजास्तविषीभिरग्नयः। आ॰ ९.५.। इति॥ अग्निचयने संचिताग्न्यनुशंसनेऽग्निरस्मीत्येषा। अथाग्निं संचितमनुगीतमनुशंसेदित्युपक्रम्य सूचितं। अग्निरस्मि जन्मना जातवेदा इति त्रिर्मध्यमया वाचेति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

वैश्वानरं मनसाग्निं निचाय्या हविष्मंतो अनुषत्यं स्वर्विदं।
सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं कुशिकासो हवामहे ॥१॥
वैश्वानरं। मनसा। अग्निं। निऽचाय्य। हविष्मंतः। अनुऽसत्यं। स्वःऽविदं।
सुऽदानुं। देवं। रथिरं। वसुऽयवः। गीःऽभिः। रण्वं। कुशिकासः। हवामहे ॥१॥

विश्वामित्रः स्तौति। हे अग्ने हविष्मंतः संभृतहविष्का वसूयवो धनमात्मन इच्छंतः कुशिकासः कुशिकगोत्रोत्पन्ना वयं वैश्वानरं। विश्वे नरा अग्निप्रणयनादिक्रियाया नेतारो यस्येति विश्वानरोऽग्निः। तस्य संबंधी वैश्वानरः। अपत्यमिति यावत्। यद्वा विश्वानर एव वैश्वानरः। तद्धितोऽनन्यार्थो राक्षसवायसादिवत्। तमनुषत्यं सत्येनानुगतं कर्मानुरूपफलप्रदाने सत्यप्रतिज्ञं स्वर्विदं स्वर्गादिलक्षणफलस्य ज्ञातारं अत एव सुदानुं सुष्ठु फलस्य दातारं रथिरं रथवंतं अत एव रखं यज्ञान्गच्छंतं देवं द्योतमानं तमिममग्निं मनसा निचाय्य अंतःकरणेनैवंविधगुणविशिष्टस्त्वमिति ज्ञात्वा गीर्भिः स्तुतिलक्षणाभिर्वाग्भिर्हवामहे। इह कर्मणि त्वामाह्वयामः॥ वैश्वानरं। नरे संज्ञायामिति पूर्वपदस्य दीर्घत्वं। विश्वानरस्येदमित्यर्थे तस्येदमित्यण्। प्रत्ययस्वरः। निचाय्य। चायृ पूजानिशामनयोरित्यस्य ल्यपि रूपं। लित्स्वरः। अनुषत्यं। अनुगतं सत्येन। अवादयः कुष्टाद्यर्थे तृतीययेति समासः। सुषामादित्वात्षत्वं। निरुदकादित्वादंतोदात्तत्वं। सुदानुं। डुदाञ् दाने। दाभाभ्यां नुरिति कर्तरि नुप्रत्ययः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। रथिरं। रथशब्दान्मतुबर्थे मेधारथाभ्यामिरन्निरचौ वक्तव्याविति इरच्। चित्स्वरः। वसूयवः। वस्वात्मन इच्छंत इति सुप आत्मनः क्यच्। अकृत्सार्वधातुकयोरिति दीर्घः। क्याच्छंदसीत्युप्रत्ययः। अतो लोपः। प्रत्ययस्वरः। रखं। रखिर्गत्यर्थः। रखति यज्ञान्गच्छतीति रखः। पचाद्यजंतः। चित्स्वरः। कुशिकासः। कुशिकशब्दाद्गोत्रमित्यर्थे विदादित्वादञ्। तस्य बहुषु यञञोश्च। पा॰ २. ४. ६४.। इति लुक्। हवामहे। ह्वयतेर्बहुलं छंदसीति संप्रसारणं। निघातः॥

॥ अथ द्वितीया॥

तं शुभ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यं।
बृहस्पतिं मनुषो देवतातये विप्रं श्रोतारमतिथिं रघुष्यदं॥२॥
तं। शुभ्रं। अग्निं। अवसे। हवामहे। वैश्वानरं। मातरिश्वानं। उक्थ्यं।
बृहस्पतिं। मनुषः। देवऽतातये। विप्रं। श्रोतारं। अतिथिं। रघुऽस्यदं॥२॥

योऽग्निः पूर्वमंत्रे प्रतिपादितस्तं शुभ्रं द्योतमानं वैश्वानरं विश्वानरसंबंधिनं मातरिश्वानं। मातर्यंतरिक्षे श्वसिति विद्युदादिरूपतया चेष्टत इति मातरिश्वाग्निः। तमुक्थ्यमुक्थैः शस्त्रैः शंसनीयं बृहस्पतिं बृहतो यज्ञस्य पतिं पालकतया स्वा-

मिनं विप्रं मेधाविनं श्रोतारं स्तोत्रशस्त्रादिमंत्रवाक्यं शृण्वंतमतिथिमातिथेयपूजार्हतया यदृच्छया प्राप्तं रघुस्यदं लघुस्यदं। रघुर्लघुः स्यदो वेगो यस्येति क्षिप्रगंतारं। यद्वा स्यदशब्देनाध्वा लक्ष्यते रघुस्यदः क्षिप्रगंतेत्यर्थः। तमेवंविधगुणयुक्तमग्निमवसेऽस्माकं रक्षणाय हवामहे। कुशिकगोत्रजा वयमाह्वयामः। किंच। मनुषो मनुष्यस्य देवतातये यज्ञार्थं त्वामाह्वयामः ॥ शुभ्रं। शुभ दीप्तौ। अस्मात् स्फायितंचीत्यादिना कर्तरि रक्। किच्वाद्गुणाभावः। प्रत्ययस्वरः। मातरिश्वानं। निर्माणहेतुत्वान्मातांतरिक्षं। तत्र श्वसिति प्राणितीति मातरिश्वाग्निः। श्वन्नुक्षन्नित्यादिना मातरिश्वञ्छब्दस्य कन्प्रत्ययांतत्वेन निपातनात्पूर्वपदांतोदात्तत्वं। उक्थ्यं। उक्थेन स्तोत्रेण स्तुत्यः। तत्र भव इत्यर्थे भवे छंदसीति यत्। तित्स्वरितमिति स्वरितः। देवतातये। देव एव देवतातिः। स्वार्थिकस्तातिल्। देवतातिशब्देन यज्ञो लक्ष्यते तत्संप्रदानकत्वाद्यज्ञस्य। लित्स्वरः। रघुष्यदं। स्यन्दू प्रस्रवण इत्यस्माद्घञंतः स्यदशब्दः। स्यदो जव इति निपातनादनुनासिकलोपः। कृदुत्तरपदप्रकृतिस्वरत्वं ॥

॥ अथ तृतीया ॥

अश्वो न क्रंदञ्जनिभिः समिध्यते वैश्वानरः कुशिकेभिर्युगेयुगे।
स नो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नममृतेषु जागृविः ॥ ३ ॥

अश्वः। न। क्रंदन्। जनिऽभिः। सं। इध्यते। वैश्वानरः। कुशिकेभिः। युगेऽयुगे।
सः। नः। अग्निः। सुऽवीर्यं। सुऽअश्व्यं। दधातु। रत्नं। अमृतेषु। जागृविः ॥ ३ ॥

यो वैश्वानरोऽग्निः कुशिकेभिः स्तोत्रं कुर्वाणैर्होत्रादिभिर्युगेयुगे प्रतिदिनं समिध्यत आज्याहुतिप्रक्षेपेण सम्यक् दीप्यते। तत्र दृष्टांतः। अश्वो नेति। यथा जातोऽश्वः क्रंदन् हेषारवं कुर्वन् जनिभिर्जनयित्रीभिर्वडवाभिः स्तन्यप्रदानेन प्रतिदिनं सम्यक् पोष्यते तद्वत्। अमृतेषु मरणधर्मरहितेषु देवेषु मध्ये जागृविर्ज्वालया जाग्रत् दीप्यमानः सोऽग्निः सुवीर्यं शोभनापत्ययुक्तं स्वश्व्यं शोभनाश्वादिपशुयुक्तं रत्नमुत्तमं धनं नोऽस्माकं दधातु। विदधातु। प्रयच्छतु ॥ युगेयुगे। नित्यवीप्सयोरिति द्विर्वचनं। परस्याम्रेडितत्वादनुदात्तत्वे पूर्वपदप्रकृतिस्वरः। स्वश्व्यं। अश्वशब्दः क्वन्प्रत्ययांत आद्युदात्तः। बहुव्रीहावाद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं। यकारोपजनश्छांदसः। यद्वा। अश्वेषु साधवोऽश्व्याः। तत्र साधुरिति यत्। यतोऽनाव इत्याद्युदात्तत्वं। बहुव्रीहौ पूर्वोक्तस्वरः। दधातु।

दधातेर्लोटि रूपं। रत्नं। रमु क्रीडायां। रमेस्त चेत्यधिकरणे नप्रत्ययस्तकारश्चांतादेशः। रमंतेऽस्मिन्निति रत्नं। निदित्यनुवृत्तावाद्युदात्तः। जागृविः। क्विन्प्रत्ययांतः। नित्त्वादाद्युदात्तः ॥

॥ अथ चतुर्थी ॥

प्र यंतु वाजास्तविषीभिरग्नयः शुभे संमिश्लाः पृषतीरयुक्षत।
बृहदुक्षो मरुतो विश्ववेदसः प्र वेपयंति पर्वताँ अदाभ्याः ॥४॥

प्र। यंतु। वाजाः। तविषीभिः। अग्नयः। शुभे। संऽमिश्लाः। पृषतीः। अयुक्षत।
बृहत्ऽउक्षः। मरुतः। विश्वऽवेदसः। प्र। वेपयंति। पर्वतान्। अदाभ्याः ॥४॥

वाजा वेगवंतोऽग्नयः प्रयंतु। जलमभिलक्ष्य गच्छंतु। गताश्च तेऽग्नयस्तविषीभिर्बलयुक्तैर्मरुद्भिः शुभे जले संमिश्लाः परस्परं संगताः संतः पृषतीर्विंदूनयुक्षत। अयुंजन्। जले विंदूनकुर्वन्। यद्वा वाजा वेगवंतोऽग्नयस्तविषीभिर्बलयुक्तैर्मरुद्भिर्जलमनुलक्ष्य प्रयंतु। गच्छंतु। ते च मरुतः शुभे जले संमिश्ला अग्निभिः संगताः संतः पृषतीश्चित्रवर्णा वाहनरूपा वडवा अयुक्षत। रथे मेघभेदनार्थं ता अयौक्षुः। रथारूढास्ते विश्ववेदसः प्राणिकृतकर्माभिज्ञानयुक्ता अदाभ्याः केनाप्यतिरस्कार्या मरुत एवंविधा वायवो बृहदुक्षः प्रभूतसेक्तॄन्पर्वतान्मेघान् प्रवेपयंति। यथा प्रभूता वृष्टिर्भवति तथा मेघान् चालयंति ॥ तविषीभिः। तव गताविति सौत्रो धातुः। अस्मात्तवेर्णिद्वेति टिषच् निच्च। तवंति संचरंत्याकाश इति तविषा वायवः। टिड्ढाणञिति ङीप्। लिंगव्यत्ययः। नित्त्वादाद्युदात्तः। पृषतीः। पृषु सेचने पृ पालनपूरणयोरिति वा। अस्माद्वर्तमाने पृषद्बृहन्महदिति निपातनादतिप्रत्ययः शतृवद्भवति। उगितश्चेति ङीप्। पर्षंतीति पृषत्यः शीकराः। पृणंति पालयंतीति पृषत्यो वडवाः। अयुक्षत। युजिर् योग इत्यस्य लुङि सिचि रूपं। निघातः। बृहदुक्षः। उक्ष सेचन इत्यस्मात्क्विप्। कृदुत्तरपदप्रकृतिस्वरः। वेपयंति। टुवेपृ कंपने। निघातः। पर्वतान्। पर्व पूरण इत्यस्मात् भृमृदृशीत्यादिना अतच्। पर्वति पूरयति भूमिमुदकेनेति पर्वतो मेघः। व्यत्ययेनाद्युदात्तः ॥

॥ अथ पंचमी ॥

अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषमुग्रमव ईमहे वयं।
ते स्वानिनो रुद्रिया वर्षनिर्णिजः सिंहा न हेषक्रतवः सुदानवः ॥५॥

अग्निऽश्रियः। मरुतः। विश्वऽकृष्टयः। आ। त्वेषं। उग्रं। अवः। ईमहे। वयं।
ते। स्वानिनः। रुद्रियाः। वर्षऽनिर्निजः। सिंहाः। न। हेषऽक्रतवः। सुऽदानवः॥५॥

अग्निश्रियो वैद्युतमग्निं श्रयंतो विश्वकृष्टयः। विश्वस्य वृक्षादेः कृष्टिराकर्षणं नमनोन्नमनादिलक्षणं कर्म येभ्यो भवति ते विश्वकृष्टयः। एवंविधा ये मरुतो विद्यंते तेषां च मरुतां त्वेषं दीप्तमुग्रमुद्गूर्णमवो रक्षणमेमहे। कुशिका वयमा समंताद्याचामहे। ते मरुतो रुद्रिया रुद्रपुत्रा वर्षनिर्णिजः। निर्णिक्शब्दो रूपवाची निर्णिग्वव्रिरिति तन्नामसु पाठात्। वर्षणं रूपं स्वभावो येषां ते वर्षनिर्णिजो वर्षकाः। हेषक्रतवः। हेषारवस्य क्रतुः करणं येषां ते कृतहेषारवाः सिंहा न सिंहा इव स्वानिनः शब्दवंतः। एवंविधास्ते मरुतः सुदानवः सुष्ठु जलस्य दातारो भवंति॥ अग्निश्रियः। श्रिञ् सेवायां। वचिप्रच्छीत्यादिना क्विप् संप्रसारणाभावो धातोर्दीर्घश्च। जसि इयङादेशः। कृत्स्वरः। उग्रं। गमॢ गतौ। उत्पूर्वः। ऋज्रेंद्राग्रेति निपातनाद्रन्प्रत्ययो मकारलोप उपसर्गस्यांतलोपश्च। उद्गच्छतीत्युग्रः। प्रत्ययस्वरः। ईमहे। ई कांतिगत्यादिषु। व्यत्ययेनात्मनेपदं। अदादित्वाच्छपो लुक्। निघातः। स्वानिनः। स्वानो घञंतः। तद्वंतः। अत इनिठनाविनीनिः। प्रत्ययस्वरः। रुद्रियाः। रुद्रशब्दाच्छांदसो घः। तस्येयादेशः। प्रत्ययस्वरः॥

॥ इति तृतीयस्य प्रथमे षड्विंशो वर्गः ॥

॥ अस्मिन्सूक्ते षष्ठीमृचमाह ॥

व्रातंव्रातं गणंगणं सुशस्तिभिरग्नेर्भामं मरुतामोज ईमहे।
पृषदश्वासो अनवभ्रराधसो गंतारो यज्ञं विदथेषु धीराः॥६॥

व्रातंऽव्रातं। गणंऽगणं। सुशस्तिऽभिः। अग्नेः। भामं। मरुतां। ओजः। ईमहे।
पृषत्ऽअश्वासः। अनवभ्रऽराधसः। गंतारः। यज्ञं। विदथेषु। धीराः॥६॥

कुशिका वयमग्नेर्भामं भासकं मरुतामोजस्तेजो व्रातं व्रातं व्राते व्राते प्रतिसमूहं गणं गणं गणे गणे महति समूहे क्रियमाणाभिः सुशस्तिभिः। शोभनाः शस्तयः स्तुतयो यैर्मंत्रैः क्रियंते ते सुशस्तयः। तैर्मंत्रैरीमहे। तादृशं मारुतं तेजो याचामहे। पृषदश्वासः। पृषत्यश्चित्रवर्णा अश्वा येषां ते तादृशाः। अनवभ्रराधसः। न विद्यतेऽवभ्रंशो यस्य तदनवभ्रं। अनवभ्रं राधो धनं येषां तेऽनवभ्रष्टधनाः। संपूर्णधना इति यावत्। धीराः कर्माभिज्ञास्ते मरुतो विदथेषु यज्ञेषु

यज्ञं यजनीयं हविरभिलक्ष्य गंतारो गमनशीला भवंति ॥ गणं गणं । गण संख्याने । पचाद्यच् । नित्यवीप्सयोरिति द्विर्वचनं । परस्याम्रेडितत्वादनुदात्तत्वे पूर्वपदस्वरः । सुशस्तिभिः । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । भामं । भा दीप्तौ । अर्तिस्तुस्वित्यादिना मन् । नित्स्वरः । ओजः । उब्ज आर्जवे । उब्जेर्बले बलोपश्च । उ॰ ४. १९३. । इत्यसुन् । तत्संनियोगेन बकारलोपः । आर्द्धधातुकलक्षणो गुणः । नित्स्वरः । ईमहे । ई कांत्यादिषु । निघातः । अनवभ्रराधसः । अनवभ्रं । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । उत्तरबहुव्रीहौ पूर्वपदस्वरः । गंतारः । ताच्छीलिकस्तृन् । विदथेषु । विद ज्ञाने । रुदिविदिभ्यां ङिदित्यथप्रत्ययः । ङित्वादगुणः । विदंत्यस्मिन्कर्मजातमध्वर्य्वादय इति विदथो यज्ञः । प्रत्ययस्वरः ॥

॥ अथ सप्तमी ॥

अ॒ग्निर॑स्मि॒ जन्म॑ना जा॒तवे॑दा घृ॒तं मे॒ चक्षु॑र॒मृतं॑ म आ॒सन् ।
अ॒र्कस्त्रि॒धातू॒ रज॑सो वि॒मानो॑ऽजस्रो घ॒र्मो ह॒विर॑स्मि॒ नाम॑ ॥ ७ ॥

अ॒ग्निः । अ॒स्मि॒ । जन्म॑ना । जा॒तऽवे॑दाः । घृ॒तं । मे॒ । चक्षुः॑ । अ॒मृतं॑ । मे॒ । आ॒सन् ।
अ॒र्कः । त्रि॒ऽधातुः॑ । रज॑सः । वि॒ऽमानः॑ । अज॑स्रः । घ॒र्मः । ह॒विः । अ॒स्मि॒ । नाम॑ ॥ ७ ॥

साक्षात्कृतपरतत्त्वरूपोऽग्निर्वचेन स्वात्मनः सर्वात्मकत्वानुभवमाविष्करोति । हे कुशिकाः । भोक्तृभोग्यभावेन द्विविधं हीदं सर्वं जगत् । एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद इति श्रुतेः । तत्र सकलभोक्तृवर्गरूपेणान्नादोऽग्निः । स चाग्निवाय्वादित्यभेदेन त्रेधा भूत्वा पृथिव्यंतरिक्षद्युलोकानधितिष्ठति । तदुक्तं वाजसनेयके । स त्रेधात्मानं व्यभजत् । आदित्यं तृतीयं वायुं तृतीयमिति । तत्र सोऽग्निरहं जन्मनैव जातवेदा अस्मि । श्रवणमननादिसाधननिरपेक्षेण स्वभावत एव साक्षात्कृतपरतत्त्वस्वरूपोऽस्मि । घृतं मे चक्षुः । यदेतद्विश्वस्य विभासकं मम स्वभावभूतप्रकाशात्मकं चक्षुस्तद्घृतं । इदानीमत्यंतं दीप्तं । यदेतदमृतं कर्मफलं दिव्यादिव्यविविधविषयोपभोगात्मकं तन्मे ममासन् । आस्ये वर्तते । सकलभोक्तृवर्गात्मना स्वयमेवावस्थानात् । एवं स्वात्मनः पृथिव्यधिष्ठातृरूपतामभिधाय वाय्वात्मनांतरिक्षाधिष्ठातृतामाह । अर्को जगत्स्रष्टा प्राणः । सोऽर्चन्नचरत्तस्यार्चत आपोऽजायंत अर्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वमिति श्रुतेः । स प्राणोऽहं त्रिधातुः । त्रेधात्मानं विभज्य तत्र वाय्वात्मना रजसोऽतरिक्षस्य विमानो

विमाताधिष्ठातास्मि । तथादित्यरूपेण द्युलोकाधिष्ठातृतामाह । अजस्रो घर्म इति । अजस्रोऽनुपक्षीणो घर्मः प्रकाशात्मा द्युलोकाधिष्ठातादित्योऽहमस्मि । एवं भोक्तृरूपमात्मनोऽनुसंधाय भोग्यरूपतामप्यनुसंधत्ते । यद्धविर्भोग्यं प्रसिद्धमस्ति तदप्यहमेवास्मि । यद्वा । अहमग्निरस्मि । देवानां हविःप्रापणादंगनादिगुणयुक्तोऽस्मि । किंच जन्मनोत्पत्त्या जातवेदा जातप्रज्ञोऽस्मि । उत्पत्तिक्षण एव सर्वज्ञोऽहमस्मि । अथवा जातं सर्वं स्वात्मरूपतया वेत्तीति जातवेदाः । सर्वात्मक इत्यर्थः । तत्कथमित्युच्यते । घृतं मे चक्षुः । यदेतद्घृतं प्रसिद्धमस्ति तन्मे चक्षुःस्थानीयं । यथा लोके चक्षुर्भासकं एवं घृतं मयि प्रक्षिप्तं ज्वालामुत्पादयन्मम भासकं । अमृतं प्रभारूपं यदमृतमविनाशि ज्योतिर्मे ममासन् । आस्ये वर्तते । त्रिधातुः प्राणापानव्यानात्मना त्रिधा वर्तमानोऽर्कोऽर्चनीयो यो प्राणोऽस्ति सोऽप्यहमेवास्मि । तथा च रजसोऽंतरिक्षस्य विमानो विशेषेण माता परिच्छेत्ता वायुश्चाहमस्मि । किंच । अजस्रो घर्मो नैरंतर्येण संतापकारी सूर्यश्चाहमस्मि । किं बहुना आज्यपुरोडाशादिरूपं यदेतद्धविरस्ति तदुपलक्षितं सर्वमप्यहमस्मि । सर्वं खल्विदं ब्रह्मेति श्रुतेः । नामशब्दः प्रसिद्धौ । तदनेनाग्नेः सर्वात्मकत्वप्रतिपादनेन परब्रह्मत्वमुक्तं भवति ॥ चक्षुः । चक्षिङ् व्यक्तायां वाचि । उसिन्नित्यनुवृत्तौ चक्षेः शिच्चेत्युसिन् । शिद्वद्भावात् ख्याञादेशाभावः । नित्स्वरः । आसन् । आस्यशब्दस्य पद्दन्नोमासित्यादिना आसनादेशः । सुपां सुलुगिति सप्तम्या लुक् । विमानः । माङ् माने । कृत्यल्युटो बहुलमिति कर्तरि ल्युट् । लित्स्वरः । अजस्रः । जसु मोक्षणे । नञ्पूर्वः । नमिकंपिस्म्यजसकमहिंसदीपो रः । पा॰ ३. २. १६७. । इति ताच्छीलिको रप्रत्ययः । नञ्पूर्वो जसिर्नैरंतर्ये वर्तते । नञ्स्वरः । जस उपक्षये वा ॥

॥ अथाष्टमी ॥

त्रिभिः पवित्रैरपुपोद्ध्य१र्कं हृदा मतिं ज्योतिरनु प्रजानन् ।
वर्षिष्ठं रत्नमकृत स्वधाभिरादिद्द्यावापृथिवी पर्यपश्यत् ॥ ८ ॥

त्रिऽभिः । पवित्रैः । अपुपोत् । हि । अर्कं । हृदा । मतिं । ज्योतिः । अनु । प्रऽजानन् ।
वर्षिष्ठं । रत्नं । अकृत । स्वधाभिः । आत् । इत् । द्यावापृथिवी इति । परि । अपश्यत् ॥ ८ ॥

सर्वात्मकोऽग्निर्हृदांतःकरणवृत्त्या मतिं मननीयं ज्योतिः स्वप्रकाशरूपं परब्रह्माख्यं तेजोऽनु प्रजानन् श्रवणमननादिक्रमेण प्रकर्षेण संशयविपर्यास-

भावनाबुद्धिनिरासेन स्वात्मरूपतया जानानः सन् पवित्रैः पावनैस्त्रिभिरग्निवायुसूर्यैरर्कमर्चनीयं स्वात्मानमपुपोद्धि। तेभ्योऽपि निर्मलतया पावनं परिचिच्छेद खलु। यथा दशापवित्रेण सोमं पावयति तद्वत्। एवं जानानोऽग्निर्वर्षिष्ठं स्वात्मानमुत्तमं स्वधाभिः। स्वेन लोकान्दधातीति स्वधा। तैरग्निवायुसूर्यैं रत्नं रमणीयमकृत। अकार्षीत्। आदित् अनंतरमेवमात्मनि ज्ञाते सति द्यावापृथिवी तत्र परिकल्पिते द्यावापृथिव्यौ तदुपलक्षितं सर्वं जगच्च पर्यपश्यत्। परितः सर्वतः स्वात्मतयादर्शत्। आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीति श्रुतेः॥ पवित्रैः। पूञ् पवने। अस्मात्कर्तरि चर्षिदेवतयोः। पा० ३. २. १८६.। इति देवतायामभिधेयायां कर्तरि इत्रप्रत्ययः। पुनंतीति पवित्रा अग्निवायुसूर्याः। प्रत्ययस्वरः। अपुपोत्। पूञ् पवन इत्यस्य यङ्लुगंतस्य रूपं। संज्ञापूर्वकस्य विधेरनित्यत्वादभ्यासस्य गुणाभावः। यद्वितुपरं छंदसि। पा० ८. १. ५६.। इति न निघातः। अर्कं। अर्च पूजायां। कृदाधारार्चिकलिभ्यः क इति कप्रत्ययः। हृदा। हृदयशब्दस्य पद्दन्नोमासित्यादिना हृदादेशः। मतिं। मन ज्ञाने। मंत्रे वृषेषपचेत्यादिना कर्मणि क्तिन् उदात्तः। अकृत। करोतेर्लुङि सिच्। तस्य ह्रस्वादंगादिति लोपः। द्यावापृथिवी। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरः॥

॥ अथ नवमी ॥

शतधा॑रमुत्स॒मक्षी॑यमाणं विप॒श्चितं॑ पि॒तरं॒ वक्त्वा॑नां।
मेळिं॒ मदं॑तं पि॒त्रोरु॒पस्थे॒ तं रो॑दसी पिपृतं स॒त्यवाचं॑ ॥९॥
श॒तऽधा॑रं। उत्सं॑। अक्षी॑यमाणं। वि॒पः॒ऽचितं॑। पि॒तरं॑। वक्त्वा॑नां।
मे॒ळिं। मदं॑तं। पि॒त्रोः। उ॒पऽस्थे॑। तं। रो॒द॒सी॒ इति॑। पि॒पृ॒तं। स॒त्य॒ऽवाचं॑ ॥९॥

यस्मादुपाध्यायाद्विश्वामित्रो वैश्वानराख्यं परं ब्रह्माज्ञासीत्तमिममुपाध्यायमनयर्चा स्तौति। हे रोदसी द्यावापृथिव्यौ शतधारमपरिमितजलधारायुक्तमक्षीयमाणं न कदापि विच्छिन्नप्रवाहमुत्सं उत्समिव शतप्रवाहोपेतं स्रोत इवाविच्छिन्नवाक्सरणीसमेतं विपश्चितं मेधाविनं सकलशास्त्राभिज्ञं पितरं शिष्याणां विद्योपदेशेन पालकं वक्त्वानां वक्तव्यानां वेदवाक्यानां मेळिं मेलकं नानाशाखागतानां वाक्यानामेकस्मिन्नर्थे संकलस्य वक्तारं पित्रोर्द्यावापृथिव्योरुपस्थे समीपे मदंतं ज्ञानातिशयेन हृष्यंतं अत एव सत्यवाचमज्ञातार्थाभावात्परम-

तारणे च कारणाभावात्सत्यवादिनं। तमिममुपाध्यायं पिपृतं। अपेक्षितफलप्रदानेन संपूर्णं कुरुतं। यद्वा पालयतं॥ उत्तं। उन्दी क्लेदने। अस्मादुन्दिमिगुधिकुषिभ्यः कित्। उ॰ ३. ६७.। इति सप्रत्ययः। कित्वान्नकारलोपः। उनत्तीत्युत्सः। व्यत्ययेनाद्युदात्तः। विपश्चितं। विशेषेण पातीति विपा वाक्। विपो वाचश्चिनोतीति क्विप्। ह्रस्वस्य पितीति तुक्। तत्पुरुषे कृति बहुलमिति बहुलवचनात् द्वितीयाया अपलुक्। कृदुत्तरपदस्वरः। वक्वानां। वच परिभाषणे। अस्मात्कृत्यार्थे तवैकेन्केन्यत्वन इति त्वन्प्रत्ययः। चोः कुरिति कुत्वं। नित्स्वरः। मेळिं। मिलिः संपर्कार्थो धातुः। अस्मादौणादिक इप्रत्ययः। रोदसी। आमंत्रितत्वान्निघातः। पिपृतं। पृ पालनपूरणयोः। छांदसो जुहोत्यादिः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। निघातः॥

॥ इति तृतीयस्य प्रथमे सप्तविंशो वर्गः॥

प्र वो वाजा इति पंचदशर्चं पंचदशं सूक्तं। अत्रानुक्रमणिका। प्र वः पंचोना गायत्रं त्वृतव्या वाद्येति। विश्वामित्र ऋषिः। गायत्री छंदः। अग्निर्देवता। आद्या ऋतुदेवत्या वा॥ प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छंदस्यस्य सूक्तस्य विनियोगः। प्र वो वाजा उपसद्याय। आ॰ ४.१३.। इति॥ आभिप्लविकेषूक्थ्येषु प्र वो वाजा इति वैकल्पिकः स्तोत्रियस्तृचः। सूत्रितं च प्र वो वाजा अभिद्यवोऽभि प्रयांसि वाहसा। आ॰ ७.८.। इति॥ सूक्तस्याद्या सामिधेनी। सूत्रितं च प्र वो वाजा अभिद्यवोऽग्न आ याहि वीतये। आ॰ १.२.। इति॥ सामिधेनीषु समिध्यमान इत्येका। सूत्रितं च समिध्यमानो अध्वरे समिद्धो अग्न आहुतेति द्वे। आ॰ १.२.। इति॥ आधाने तृतीयायामिष्टौ सामिधेनीष्विध्यमानेद्धवत्योर्मध्ये पृथुपाजा इति द्वे धाय्ये। सूत्रितं च प्रागुपोत्तमायाः पृथुपाजा अमर्त्य इति द्वे। आ॰ २.१.। इति॥ एवमन्यत्रापि यत्र यत्र सप्तदश सामिधेन्यस्तत्र तत्रैते धाय्ये इति द्रष्टव्यं॥ विषुवत्येकविंशतिः सामिधेन्यः। तत्र पृथुपाजा अमर्त्य इति षड़ृचो धाय्याः। पृथुपाजा अमर्त्य इति षट् धाय्याः सामिधेनीनां। आ॰ ८.६.। इति सूत्रितं॥ महाव्रतेऽपि पंचविंशतिसंख्याकाः सामिधेन्यः। तत्राप्येताः षड़ृचो द्रष्टव्याः॥ अग्नीषोमप्रणयने होता देवो अमर्त्य इति तृचः। सूत्रितं च होता देवो अमर्त्यः पुरस्तादुप त्वाग्ने दिवे दिवे। आ॰ ४.१०.। इति॥ ईळेन्यो नमस्यस्तिर इति तिस्रः सामिधेन्यः। सूत्रितं च ईळेन्यो नमस्यस्तिरोऽग्निं दूतं वृणीमहे। आ॰ १.२.। इति॥

॥ तस्मिन्सूक्ते प्रथमामृचमाह ॥

प्र वो वाजा अभिद्यवो हविष्मंतो घृताच्या ।
देवाञ्जिगाति सुम्नयुः ॥१॥

प्र । वः । वाजाः । अभिऽद्यवः । हविष्मंतः । घृताच्या ।
देवान् । जिगाति । सुम्नयुः ॥१॥

हे ऋतवो वाजाः । वजंति गच्छंतीति वाजा मासाः । अभिद्यवः । अभितो द्यवो दिवसा येष्वित्यभिद्यवोऽर्धमासाश्च । हविष्मंतो हविर्भाजो देवाः । घृताच्या । घृतमंचतीति घृताची गौः । तथा च तैत्तिरीयकं देवा हविष्मंतो गौर्घृताचीति । यद्वा हविष्मंतो हविषः क्षीरादेः प्रदातारः पशवो घृताच्या । घृतमंचति प्राप्नोतीति घृताची स्रुक् । तथा च वाजसनेयकं । पशवो हविष्मंतः स्रुग्घृताचीति । तया घृताच्या सहिता हविष्मंतो देवाः पशवश्च मासाश्चार्धमासाश्चेति सर्वे वो युष्माकं यजनार्थं प्रभवंति । तेषु वाजादिषु प्रभवत्सु सत्सु सुम्नयुः सुखमात्मन इच्छन्यजमानो देवाञ्जिगाति । यज्ञद्वारा देवान्प्राप्नोति । उक्तार्थे तैत्तिरीयब्राह्मणं । प्र वो वाजा इत्यन्वाह मासा वै वाजा अर्धमासा अभिद्यवो देवा हविष्मंतो गौर्घृताची यज्ञो देवाञ्जिगाति यजमानः सुम्नयुरिति ॥ अभिद्यवः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । घृताच्या । घृ क्षरणदीप्त्योः । अस्मादंजिघृषिभ्यः क्तः । उ॰ ३. ८८. । इति कर्मणि क्तः । घृतमाज्यमंचतीत्यृत्विग्दधृगित्यादिना क्विन् । अनिदितामित्युपधालोपः । अंचतेश्चोपसंख्यानमिति ङीप् । चाविति पूर्वपदांतोदात्तत्वं । जिगाति । गातिर्गत्यर्थः । छांदसो जुहोत्यादिः । निघातः । सुम्नयुः । सुम्नं सुखमात्मन इच्छन्निति सुप आत्मनः क्यच् । क्याच्छंदसीत्युः । प्रत्ययस्वरः ॥

॥ अथ द्वितीया ॥

ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनं ।
श्रुष्टीवानं धितावानं ॥२॥

ईळे । अग्निं । विपःऽचितं । गिरा । यज्ञस्य । साधनं ।
श्रुष्टीऽवानं । धितऽवानं ॥२॥

विपश्चितं मेधाविनं यज्ञस्य साधनं यज्ञस्य निर्वाहकं श्रुष्टीवानं सुखवंतं यद्वा

वेगवंतं धितावानं। वानं वननीयं धनं धितं निहितं यस्य तं निहितधनं। तमिममग्निं गिरा स्तुतिलक्षणया वाचेळे। विश्वामित्रोऽहं स्तौमि ॥ ईळे। ईड स्तुतौ। श्रुष्टीवानं। वन षण संभक्तावित्यस्माड्विच्। श्रुष्टी वनतीति श्रुष्टीवा। कृदुत्तरपदस्वरः। धितावानं। दधातेर्निष्ठायां धिरादेशश्छांदसः। वन संभक्तौ। कर्मणि घञ्। बहुव्रीहौ निष्ठेति धितशब्दस्य पूर्वनिपातः। पूर्वपदप्रकृतिस्वरः ॥

॥ अथ तृतीया ॥

अग्ने शकेम ते वयं यमं देवस्य वाजिनः।
अति द्वेषांसि तरेम ॥ ३ ॥

अग्ने। शकेम। ते। वयं। यमं। देवस्य। वाजिनः।
अति। द्वेषांसि। तरेम ॥ ३ ॥

हे अग्ने वाजिनः संभृतहविष्का वयं देवस्य द्योतमानस्य ते तव यमं यमनमा यज्ञसमाप्तेरत्रावस्थानं कर्तुं शकेम। शक्तास्म। वाजिनो वेगवतो देवस्येति वा योजनीयं। ततः कारणात् द्वेषांस्यस्मदीयानि पापान्यतितरेम। पापेभ्य उत्तीर्णा भवेम ॥ शकेम। शक्ल शक्तावित्यस्याशीर्लिङि लिङ्याशिष्यङित्यङ्प्रत्ययः। किदाशिषीति यासुट्। सलोपेयादेशयलोपगुणसलोपाः। आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः। उदात्तनिवृत्तिस्वरः। यमं। यम उपरम इत्यस्माड्भावे घञ्। यम उपरम इति निपातनाद्वृद्ध्यभावः। ञित्स्वरः। तरेम। तॄ प्लवनतरणयोः। प्रार्थने लिङि रूपं। निघातः ॥

॥ अथ चतुर्थी ॥

समिध्यमानो अध्वरे३ग्निः पावक ईड्यः।
शोचिष्केशस्तमीमहे ॥ ४ ॥

सम्ऽइध्यमानः। अध्वरे। अग्निः। पावकः। ईड्यः।
शोचिःऽकेशः। तं। ईमहे ॥ ४ ॥

योऽग्निरध्वरे यज्ञे समिध्यमानो घृताज्याहुतिभिः सम्यक् प्रज्वाल्यमानोऽत एव शोचिष्केशो ज्वालाकेशः पावकः शोधक ईड्यः स्तोतृभिः प्रशस्यो भवति तमिममभिमतफलार्थमीमहे। वयं याचामहे ॥ ईड्यः। ईड स्तुतावित्यस्माण्यत्।

अस्य तित्स्वरितमिति स्वरितत्वे प्राप्त ईडवंदेत्यादिनाद्युदात्तत्वं। ईमहे। ई कांत्यादिषु। अयं धातुरत्र याच्ञार्थः। निघातः॥

॥ अथ पंचमी ॥

पृथुपाजा अमर्त्यो घृतनिर्णिक्स्वाहुतः।

अग्निर्यज्ञस्य हव्यवाट् ॥५॥

पृथुऽपाजाः। अमर्त्यः। घृतऽनिर्निक्। सुऽआहुतः।

अग्निः। यज्ञस्य। हव्यऽवाट् ॥५॥

पृथुपाजाः प्रभूततेजोरूपोऽमर्त्यो मरणधर्मरहितो घृतनिर्णिक्। घृतस्य विलयनद्वारा शोधनं येनेति घृतनिर्णिक्। स्वाहुतः सुष्ठु होत्रादिभिः सम्यगिष्टः। एवंभूतोऽग्निर्यज्ञस्य ज्योतिष्टोमादेर्हव्यवाट् हव्यानां वोढा भवति॥ पृथुपाजाः। कृदुत्तरपदस्वरः। स्वाहुतः। जुहोतेः कर्मणि क्तः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। हव्यवाट्। वहश्चेति ण्विः॥

॥ इति तृतीयस्य प्रथमेऽष्टाविंशो वर्गः ॥

॥ अथ तस्मिन्सूक्ते षष्ठी ॥

तं सबाधो यतस्रुच इत्था धिया यज्ञवंतः।

आ चक्रुरग्निमूतये ॥६॥

तं। सऽबाधः। यतऽस्रुचः। इत्था। धिया। यज्ञऽवंतः।

आ। चक्रुः। अग्निं। ऊतये ॥६॥

सबाधो रक्षोघ्नमंत्रोच्चारणेन तद्विषयबाधा सह वर्तत इति सबाधः। यज्ञवंतो यजनीयहविर्युक्ता यतस्रुचः। यताः संयताः स्रुचो जुह्वाद्या यैस्ते यतस्रुचः। ऋत्विजः। इत्थेत्थमनेन प्रकारेण क्रियमाणया धिया स्तुत्या तमेवंभूतमग्निमूतये राक्षसबाधाद्रक्षणाय आ अभिमुखं चक्रुः। कुर्वंति॥ सबाधः। बाधृ विलोडन इत्यस्मात् क्विप्। कृदुत्तरपदस्वरः। इत्था। इदंशब्दात्प्रकारार्थ इदमस्थमुः। तस्य सुपां सुलुगिति डादेशः। उदात्तनिवृत्तिस्वरेणांतोदात्तः। चक्रुः। डुकृञ् करण इत्यस्य लिट्युसि यणादेशे कृते तस्य द्विर्वचनेऽचीति स्थानिवद्भावाद्विर्वचनं। निघातः॥

॥ अथ सप्तमी ॥

होता देवो अमर्त्यः पुरस्तादेति मायया ।
विदथानि प्रचोदयन् ॥ ७ ॥
होता । देवः । अमर्त्यः । पुरस्तात् । एति । मायया ।
विदथानि । प्रऽचोदयन् ॥ ७ ॥

होता होमनिष्पादकोऽमर्त्यो मरणधर्मरहितो देवो द्योतमानो विदथानि वेदितव्यानि कर्माणि प्रचोदयन् प्रकर्षेण प्रेरयन् सोऽग्निर्मायया कर्मविषयाभिज्ञानेन युक्तः सन् पुरस्तात्कर्मप्रारंभकाल एवैति। अस्मानागच्छति॥ मायया। माङ् माने शब्दे चेत्यस्मान्माच्छाससिसूभ्यो य इति कर्तरि कर्मणि वा यप्रत्ययः। मिमीते जानीते कर्म मीयतेऽनयेति वा माया कर्मविषयज्ञानं। प्रत्ययस्वरः। विदथानि। विद ज्ञान इत्यस्माद्रुदिविदिभ्यां किदिति कर्मण्यथप्रत्ययः। कित्त्वादगुणः। प्रत्ययस्वरः॥

॥ अथाष्टमी ॥

वाजी वाजेषु धीयतेऽध्वरेषु प्र णीयते ।
विप्रो यज्ञस्य साधनः ॥ ८ ॥
वाजी । वाजेषु । धीयते । अध्वरेषु । प्र । नीयते ।
विप्रः । यज्ञस्य । साधनः ॥ ८ ॥

वाजी बलवानग्निर्वाजेषु युद्धेषु धीयते। देवैः शत्रुहननार्थं निधीयते। किंच। अध्वरेष्वग्निहोत्रादिषु प्र णीयते। अध्वर्य्वादिभिः प्रकर्षेणाहवनीयादिस्थानेषु प्रक्षिप्यते। अत एव विप्रो मेधावी सन्नग्निर्यज्ञस्याग्निहोत्रादेः साधनः साधको भवति॥ धीयते। दधातेः कर्मणि यक्। घुमास्थागापेत्यादिना ईत्वं। निघातः। नीयते। नीञ् प्रापण इत्यस्य कर्मणि यकि रूपं। उपसर्गादसमासेऽपि णोपदेशस्येति णत्वं। साधनः। साध संसिद्धौ। नंद्यादित्वात्कर्तरि ल्युः। लित्स्वरः॥

॥ अथ नवमी ॥

धिया चक्रे वरेण्यो भूतानां गर्भमा दधे ।
दक्षस्य पितरं तना ॥ ९ ॥

धिया । चक्रे । वरेण्यः । भूतानां । गर्भं । आ । दधे ।
दक्षस्य । पितरं । तना ॥ ९ ॥

योऽग्निर्धियाधानपवमानेष्टिरूपेण कर्मणा चक्र आहवनीयरूपतया कृतोऽभूत् अत एव वरेण्यः सर्वैर्यजमानैः कर्मांगत्वेन वरणीयः यश्चाग्निर्भूतानां स्थावरजंगमात्मकानां भूतजातानामंतर्गर्भं स्वात्मानमेव गर्भरूपतया आदधे सर्वत्र दधार पितरं सर्वस्य जगतः पालकं तमिमममग्निं दक्षस्य दक्षप्रजापतेस्तना तनया वेदिरूपा भूमिर्दर्शपूर्णमासाग्निहोत्रादिकर्मसिद्ध्यर्थं धारयति । भूमेर्दक्षदुहितृत्वेन मंत्रवर्णः । अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव । ऋग्वे॰ १०.७२.५. । इति ॥ चक्रे । करोतेः कर्मणि लिटि रूपं । गर्भं । गॄ निगरण इत्यस्मादर्तिगृभ्यां भन्निति भन् । गिरति गीर्यते वा गर्भः । नित्त्वादाद्युदात्तः । दधे । दधातेर्लिटि रूपं । पितरं । पा रक्षणे । नप्तृनेष्टृ इत्यादिना तृजंतत्वेन निपातनादित्वं । पाति पालयतीति पिता पालकः । चित्स्वरः । तना । यलोपश्छांदसः ॥

॥ अथ दशमी ॥

नि त्वा दधे वरेण्यं दक्षस्येळा सहस्कृत ।
अग्ने सुदीतिमुशिजं ॥ १० ॥
नि । त्वा । दधे । वरेण्यं । दक्षस्य । इळा । सहःऽकृत ।
अग्ने । सुऽदीतिं । उशिजं ॥ १० ॥

उक्तार्थोऽनयर्चा विव्रियते । सहस्कृत मथनाख्येन बलेन निष्पन्न हे अग्ने सुदीतिं शोभनदीप्तियुक्तमुशिजं पुरोडाशादिहविः कामयमानं । यद्वा कर्मार्थिभिः काम्यमानं । अत एव वरेण्यं तैर्वरणीयं त्वा एवंविधं त्वां दक्षस्य दुहितेळा वेद्यादिलक्षणा भूमिर्नि दधे । अग्निहोत्रादिकर्मसमृद्ध्यर्थं नितरां दधार ॥ इळा । ईड स्तुतौ । पुंसि संज्ञायामित्यत्र प्रायिकवचनात् स्त्र्यर्थेऽपि घप्रत्ययः । ह्रस्वश्छांदसः । संज्ञापूर्वकस्य विधेरनित्यत्वादगुणः । ईड्यंते स्तूयंतेऽस्यां यजमानैर्देवा इतीळा भूमिः । उदात्तनिवृत्तिस्वरेणांतोदात्तः । प्रत्ययस्वरः । उशिजं । वश कांतावित्यस्माद्वशः किच्चेतीजिप्रत्ययः । कित्त्वात्संप्रसारणं । वष्टि हविः कामयते उश्यते काम्यते कर्मार्थिभिरिति वा उशिक् अग्निः । प्रत्ययस्वरः ॥

॥ इति तृतीयस्य प्रथम एकोनत्रिंशो वर्गः ॥

॥ अथ तस्मिन्सूक्त एकादशी ॥

अग्निं यंतुरमप्तुरमृतस्य योगे वनुषः ।
विप्रा वाजैः समिंधते ॥ ११ ॥
अग्निं । यंतुरं । अप्ऽतुरं । ऋतस्य । योगे । वनुषः ।
विप्राः । वाजैः । सं । इंधते ॥ ११ ॥

वनुषः कर्मसिद्ध्यर्थं संभजमाना विप्रा मेधाविनोऽध्वर्य्वादयो यंतुरं सर्वस्य नियंतारं । यद्वा क्षिप्रं गंतारं । अप्तुरमपां प्रेरकं तमिममग्निमृतस्य सत्यभूतस्य ज्योतिष्टोमादेर्योगे प्रयोगार्थं वाजैर्हविर्लक्षणैरन्नैः समिंधते । सम्यग्दीपयंति ॥ यंतुरं । वर्णव्यत्ययः । यंतारमित्यर्थः । अप्तुरं । तुर त्वरणे । अपस्तुतोर्ति त्वरयतीति क्विप् । कृदुत्तरपदप्रकृतिस्वरः । योगे । युजिर् योगे । भावे घञ् । चजोः कु घिण्यतोरिति कुत्वं । ञित्स्वरः । वनुषः । वन षण संभक्तौ । जनेरुसिरित्यधिकारे बहुलवचनादस्मादप्युसिः । प्रत्ययस्वरः । इंधते । ञि इंधी दीप्तौ । निघातः ॥

॥ अथ द्वादशी ॥

ऊर्जो नपातमध्वरे दीदिवांसमुप द्यवि ।
अग्निमीळे कविक्रतुं ॥ १२ ॥
ऊर्जः । नपातं । अध्वरे । दीदिऽवांसं । उप । द्यवि ।
अग्निं । ईळे । कविऽक्रतुं ॥ १२ ॥

ऊर्जो नपातं हविर्लक्षणैरन्नैः समिध्यमानत्वेनान्नस्य पुत्रं । यद्वान्नस्य चतुर्थं । यथान्नादाहुतिराहुतेरादित्य आदित्यादग्निरिति । उप द्यव्यंतरिक्षस्य समीपे दीदिवांसमतिशयेन दीप्यमानं कविक्रतुं । कवयो मेधाविनोऽध्वर्य्वादयो मथनेन क्रतवः कर्तारो यस्येति । अध्वर्य्वादिभिर्निष्पाद्यमानं तमिममग्निमध्वरेऽस्मिन्यज्ञ ईळे । स्तुतिलक्षणाभिर्गीर्भिरहं स्तौमि ॥ ऊर्जः । ऊर्ज बल इत्यस्माद्भ्राजभासेत्यादिना ताच्छीलिकः क्विप् । ऊर्जयति शरीरमित्यूर्क् अन्नं । सावेकाच इति विभक्तेरुदात्तत्वं । द्यवि । द्युत दीप्तावित्यस्मादौणादिको डुञ्प्रत्ययः । द्योतते किरणसंबंधादिति द्युरंतरिक्षं । ञित्स्वरः । ईळे । लटि रूपं ॥

॥ अथ त्रयोदशी ॥

ईळेन्यो नमस्यस्तिरस्तमांसि दर्शतः ।
समग्निरिध्यते वृषा ॥ १३ ॥
ईळेन्यः । नमस्यः । तिरः । तमांसि । दर्शतः ।
सं । अग्निः । इध्यते । वृषा ॥ १३ ॥

ईळेन्यः स्तोतृभिरीड्योऽत एव नमस्यः सर्वैर्नमस्कार्यस्तमांसि तिरो ध्वांतानि स्वप्रभाभिस्तिरस्कुर्वन् दर्शतः कमनीयतया सर्वैर्दर्शनीयः। तादृशोऽग्निर्वृषा यजमानस्य कामानां वर्षिता समिध्यते। आहुतिप्रक्षेपेण प्रज्वाल्यते। उक्तार्थे वाजसनेयकं ईडेन्यो ह्येष नमस्यो ह्येष तिरस्तमांसि ददृशे समिद्ध इति ॥ ईळेन्यः। ईड स्तुतौ। कृत्यार्थे तवैकेन्केन्यत्वन इति केन्यः। प्रत्ययस्वरः। नमस्यः। नमस्यतेरचो यदिति यत्। अतोलोपयलोपौ। तित्स्वरितमिति स्वरितः। दर्शतः। दृशिर् प्रेक्षणे। असस्माद्भृमृदृशीत्यादिना कर्मण्यतच्प्रत्ययः। चित्स्वरः। वृषा। वृषु सेचन इत्यस्मात्कनिन्युवृषीत्यादिना कनिन्। कित्वादगुणः। नित्वादाद्युदात्तः ॥

॥ अथ चतुर्दशी ॥

वृषो अग्निः समिध्यतेऽश्वो न देववाहनः ।
तं हविष्मंत ईळते ॥ १४ ॥
वृषो इति । अग्निः । सं । इध्यते । अश्वः । न । देवऽवाहनः ।
तं । हविष्मंतः । ईळते ॥ १४ ॥

वृषो वृषैव कामानां वर्षिता देववाहनः। देवान्हवींषि वाहयति प्रापयतीति देववाहनः । तत्र दृष्टांतः । अश्वो नेति । यथाश्वो राजानं वाहयति स्वपुरं प्रापयतीति। वाहनमश्वः। तद्वत् वाहनभूतो योऽग्निः समिध्यते आहुतिप्रदानेन सम्यग्दीप्यते तं तादृशमग्निं हविष्मंतः संभृतहविष्का यजमाना ईळते। कर्मसिद्ध्यर्थं स्तुवंति ॥ वृषा उ। गुणः। उञमवलंब्य प्रगृह्यसंज्ञा। देववाहनः। वह प्रापण इत्यस्माण्यंतात्कर्तरि ल्युः। लित्स्वरः। समासे कृदुत्तरपदस्वरः ॥

॥ अथ पंचदशी ॥

वृषणं त्वा वयं वृषन्वृषणः समिधीमहि ।
अग्ने दीद्यतं बृहत् ॥ १५ ॥
वृषणं । त्वा । वयं । वृषन् । वृषणः । सं । इधीमहि ।
अग्ने । दीद्यतं । बृहत् ॥ १५ ॥

वृषन् कामानां वर्षितर्हे अग्ने वृषणो वृषाणो घृताज्याहुतीनां सेक्तारो वयं वृषणमाहुतिद्वारोदकस्य सेक्तारं । तथा च स्मृतिः । अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः । मनु॰ ३.७६. । इति । दीद्यतं दीप्यमानं बृहदत एव महांतं तमिममग्निं समिधीमहि । सम्यग्दीपयामः ॥ इधीमहि । ञि इंधी दीप्तावित्यस्य प्रार्थने लिङि नकारलोपश्छांदसः । दीद्यतं । दीदेतिर्दीप्तिकर्मा । तस्य शतरि रूपं । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥

॥ इति तृतीयस्य प्रथमे त्रिंशो वर्गः ॥

अग्ने जुषस्वेति षड्‌चं षोडशं सूक्तं वैश्वामित्रमाग्नेयं । अत्रानुक्रमणिका । अग्ने जुषस्व षट् तृतीयाद्युष्णिक्त्रिष्टुब्जगत्य इति । पूर्वसूक्ते गायत्रं त्वित्युक्तत्वादेतदपि गायत्रं । तृतीया तूष्णिक् चतुर्थी त्रिष्टुप् पंचमी जगती ॥ अग्ने जुषस्वेति सवनीयपुरोडाशे स्विष्टकृतः प्रातःसवनीयानुवाक्या । सूत्रितं च अथ स्विष्टकृतोऽग्ने जुषस्व नो हविः । आ॰ ५.४. । इति ॥ अतिरात्र आश्विनशस्त्रे परिहिते सति चमसगणैः सहाश्विनोर्द्विकपालः पुरोडाशः सर्वहुतो होतव्यः । यदि पुरोडाशमवशेष्य स्विष्टकृतं कुर्युस्तस्य स्विष्टकृतः पुरोळा अग्न इत्येषा याज्या । यद्येतस्य पुरोडाशस्य स्विष्टकृतं चरेयुः पुरोळा अग्ने पचतः । आ॰ ६.५. । इति सूत्रितं ॥ माध्यंदिने सवने सवनीयपुरोडाशे स्विष्टकृतोऽनुवाक्या माध्यंदिने सवन इत्येषा । सूत्रितं च अग्ने जुषस्व नो हविर्माध्यंदिने सवने जातवेदः । आ॰ ५.४. । इति ॥ तृतीयसवने सवनीयपुरोडाशस्य स्विष्टकृतोऽनुवाक्याग्ने तृतीये सवन इत्येषा । सूत्रितं च अग्ने तृतीये सवने हि कानिष इत्यनुसवनमनुवाक्या । आ॰ ५.४. । इति ॥ आश्विनपुरोडाशस्य स्विष्टकृतो याज्याग्ने वृधान इत्येषा । सूत्रितं च अग्ने वृधान आहुतिमिति संयाज्या । आ॰ ६.५. । इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

अग्ने जुषस्व नो हविः पुरोळाशं जातवेदः । प्रातःसावे धियावसो ॥ १ ॥

अग्ने । जुषस्व । नः । हविः । पुरोळाशं । जातऽवेदः । प्रातःऽसावे । धियावसो इति धियाऽवसो ॥ १ ॥

विश्वामित्रः स्तौति । जातवेदः जातप्रज्ञ धियावसो । धिया स्तोत्रेण वसु धनं यस्माद्भवति सोऽयं धियावसुः । तस्य संबुद्धिः । कर्मानुरूपधनप्रद हे अग्ने प्रातःसावेऽग्निष्टोमे प्रातःसवने नोऽस्मत्संबंधि पुरोडाशं पुरोडाशाख्यं हविर्जुषस्व । सेवस्व ॥ जुषस्व । जुषी प्रीतिसेवनयोरित्यस्माल्लोटि रूपं । आमंत्रितस्याविद्यमानवत्त्वेन पादादित्वादनिघातः । प्रातःसावे । षुञ् अभिषवे । सवनं सावः । भावे घञ् । थाथघञ्क्ताजबित्रकाणामित्यंतोदात्तत्वं । धियावसो । विभक्त्यलोपश्छांदसः । आमंत्रितत्वान्निघातः ॥

॥ अथ द्वितीया ॥

पुरोळा अग्ने पचतस्तुभ्यं वा घा परिष्कृतः । तं जुषस्व यविष्ठ्य ॥ २ ॥

पुरोळाः । अग्ने । पचतः । तुभ्यं । वा । घ । परिऽकृतः । तं । जुषस्व । यविष्ठ्य ॥ २ ॥

यविष्ठ्य युवतम हे अग्ने यः पुरोळाः । पुरोडाशंतेऽध्वर्य्वादय एनमिति पुरोडाः पुरोडाशः । पचतः कपालयोः पक्वोऽस्ति । स च तुभ्यं त्वदर्थं परिष्कृतो वा घ पर्यग्निकरणादिभिरलंकृतः खलु । तमिमं पुरोडाशं जुषस्व । सेवस्व ॥ पुरोडाः । दाशृ दान इत्यस्मात्पुरस्पूर्वान्मंत्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् । पा॰ ३. २. ७१. । इति कर्मणि ण्विनि कृते श्वेतवहादीनां डस्पदस्य । पा॰ ३. २. ७१. १. । इति डस्प्रत्यये च कृते अवयाः श्वेतवाः पुरोडाश्चेति निपातनाद्दकारस्य डत्वं । पुरोडाशंत एनमिति पुरोडाः पुरोडाशः । डकारस्य ळकारो बह्वृचसांप्रदायिकः । कृदुत्तरपदस्वरः । पचतः । डुपचष् पाक इत्यस्माद्भृमृदृशीत्यादिना कर्मण्यतच्प्रत्ययः । पच्यतेऽसाविति पचतः पक्वः । चित्स्वरः । घा । ऋचि तुनुघेत्यादिना संहितायां दीर्घः । परिष्कृतः । संपर्युपेभ्यः करोतौ भूषण इति करोतेः सुडागमः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । यविष्ठ्य । यविष्ठ एव यविष्ठ्यः । पादार्घाभ्यां च । पा॰ ५. ४. २५. । इत्यत्र चकारेण वस्वादीनां स्वार्थे यत्प्रत्ययस्योपादानाद्यविष्ठ्येत्यत्र स्वार्थिको यत्प्रत्ययः । आमंत्रितत्वान्निघातः ॥

॥ अथ तृतीया ॥

अग्ने वीहि पुरोळाशमाहुतं तिरोअह्न्यं। सहसः सूनुरस्यध्वरे हितः ॥३॥

अग्ने। वीहि। पुरोळाशं। आऽहुतं। तिरःऽअह्न्यं। सहसः। सूनुः। असि। अध्वरे। हितः ॥३॥

हे अग्ने तिरोअह्न्यं अह्नि तिरोहिते सत्याहुतमा समंताद्धुतं पुरोडाशं पुरोडाशाख्यं हविर्वीहि। भक्षय। अध्वरेऽस्मिन्यज्ञे सहसः सूनुर्बलस्य पुत्रस्त्वं हितोऽसि। आहवनीयादिस्थानेष्वस्माभिर्निहितोऽसि। तस्माद्वीहीति शेषः॥ वीहि। वी कांतिगत्यादिषु। लोटि रूपं। हेरपित्त्वादंतोदात्तत्वं। आहुतं। जुहोतेः कर्मणि क्ते गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। तिरोअह्न्यं। अह्नि भवमह्न्यं। भवे छंदसीति यत्। तिरोभूतमह्न्यं यस्मिन् काले स तिरोअह्न्यः। रात्रिकाल इत्यर्थः। कालाध्वनोरत्यंतसंयोग इति द्वितीया। प्रकृत्यांतःपादमित्येङः प्रकृतिभावः। बहुव्रीहौ पूर्वपदस्वरः॥

॥ अथ चतुर्थी ॥

माध्यंदिने सवने जातवेदः पुरोळाशमिह कवे जुषस्व।

अग्ने यह्वस्य तव भागधेयं न प्र मिनंति विदथेषु धीराः ॥४॥

माध्यंदिने। सवने। जातऽवेदः। पुरोळाशं। इह। कवे। जुषस्व।

अग्ने। यह्वस्य। तव। भागऽधेयं। न। प्र। मिनंति। विदथेषु। धीराः ॥४॥

कवे मेधाविन् हे जातवेद इहास्मिन्नग्निष्टोमाख्ये कर्मणि तत्र च माध्यंदिने मध्यंदिनसंबंधिनि सवने पुरोडाशं माध्यंदिनसवनीयपुरोडाशं जुषस्व। सेवस्व। हे अग्ने विदथेषु यज्ञेषु धीराः कर्मकुशला अध्वर्य्वादयो यह्वस्य। यांति प्राप्नुवंति देवा हवींष्यनेनेति यह्वो महानग्निः। यह्वस्य महतस्तव भागधेयं भागतया परिकल्पितमिमं पुरोडाशं न प्रमिनंति। न हिंसंति। किंतु तुभ्यं प्रयच्छंति। तं जुषस्वेति शेषः॥ माध्यंदिने। मध्यंदिनस्येदमित्यर्थ उत्सादित्वादञ्। ञित्त्वादादिवृद्धिः। ञित्त्वादेवाद्युदात्तत्वं। यह्वस्य। या प्रापण इत्यस्मात् शेवयह्वजिह्वेति निपातनात्करणे वन्प्रत्ययः। हुगागमधातुह्रस्वौ। यांत्यनेनेति यह्वोऽग्निः। व्यत्ययेनांतोदात्तः। भागधेयं। भागशब्दात्स्वार्थे भागरूपनामभ्यो धेयप्रत्ययो वक्तव्यः। पा॰ ५. ४. ३६. २.। इति धेयः। प्रत्ययस्वरः। मिनंति। मीञ् हिंसायामित्यस्य

क्र्यादित्वात् श्ना। तस्मिन् मीनातेर्निगम इति ह्रस्वत्वं। हिनु मीन। पा॰ ८.४.१५.। इति णत्वं न भवति सर्वविधीनां छंदसि विकल्पितत्वादिति ॥

॥ अथ पंचमी ॥

अग्ने॑ तृतीये॒ सव॑ने॒ हि कानि॑षः पुरो॒ळाशं॑ सहसः सून॒वाहु॑तं।
अथा॑ दे॒वेष्व॑ध्व॒रं वि॑प॒न्यया॒ धा रत्न॑वंतम॒मृते॑षु॒ जागृ॑विं ॥५॥

अग्ने॑। तृतीये॑। सव॑ने। हि। कानि॑षः। पु॒रो॒ळाशं॑। स॒ह॒सः॒। सू॒नो॒ इति॑। आऽहु॑तं।
अथ॑। दे॒वेषु॑। अ॒ध्व॒रं। वि॒प॒न्यया॑। धाः। रत्न॑ऽवंतं। अ॒मृते॑षु। जागृ॑विं ॥५॥

सहसः सूनो बलस्य पुत्र हे अग्ने त्वं तृतीये सवन आहुतं हूयमानं पुरोडाशं कानिषः। कामयसे। अथ अनंतरमध्वरमविनाशिनं रत्नवंतं। रत्नशब्देन स्वर्गादिलक्षणमुत्तमं फलमभिधीयते। तद्वंतं फलप्रदं जागृविं जागरणकारिणं। प्रातः सोमो जागृविर्भवति स्वप्ननिवारक इति। तमिमं सोमं विपन्यया स्तुतिलक्षणया वाचा स्तुतस्त्वममृतेषु मरणधर्मरहितेषु देवेष्विंद्रादिषु धाः। धेहि॥ तृतीये। त्रिशब्दात्पूरणार्थे त्रेः संप्रसारणं। पा॰ ५.२.५५.। इति तीयप्रत्ययः। तत्संनियोगेन संप्रसारणं। हल इति दीर्घो न भवति। अन्निति तत्र नानुवर्तनात् प्रत्ययस्वरः। कानिषः। कनी कांत्यादिषु। लेटि सिब्बहुलमिति सिप्। तस्यार्द्धधातुकत्वादिडागमः। कांतिरभिलाषः। अकारस्य आकारो व्यत्ययेन। हियोगादनिघातः। धातुस्वरः। विपन्यया। पन स्तुतौ। भावे क्विप्। विपनं यातीति कप्रत्ययः। प्रत्ययस्वरः। धाः। दधातेर्धातोश्छांदसे लुङि रूपं। पादादित्वादनिघातः। जागृविं। क्विन्प्रत्ययांतो जागृविशब्दः। नित्स्वरः॥

॥ अथ षष्ठी ॥

अग्ने॑ वृधा॒न आहु॑तिं पुरो॒ळाशं॑ जातवेदः। जुषस्व॑ ति॒रोअ॑ह्न्यं ॥६॥

अग्ने॑। वृधा॒नः। आऽहु॑तिं। पुरो॒ळाशं॑। जा॒त॒ऽवे॒दः॒। जु॒षस्व॑। ति॒रः॒ऽअ॑ह्न्यं ॥६॥

जातवेदो जातप्रज्ञ हे अग्ने वृधान आहुतिभिर्वर्धमानस्त्वं तिरोअह्न्यं। अह्नि भवमह्न्यं दिवसकृत्यं। तिरोभूतमह्न्यं यस्मिन्काले स तिरोअह्न्यो रात्रिकालः। तस्मिन्काल आहुतिं पुरोडाशाख्यं हविर्जुषस्व। सेवस्व॥ आहुतिं। जुहोतेः कर्मणि क्तिन्। तादौ च निति कृत्यताविति गतेः प्रकृतिस्वरत्वं॥

॥ इति तृतीयस्य प्रथम एकत्रिंशो वर्गः॥

अस्तीदमिति षोडशर्चं सप्तदशं सूक्तं वैश्वामित्रं। अत्रानुक्रमणिका। अस्तीदं षोळशाद्याचतुर्थीदशमीद्वादश्योऽनुष्टुभः षष्ठ्येकादश्युपांत्ये च जगत्यः पंचम्यृत्विग्भ्यो वेति। आद्याचतुर्थीदशमीद्वादश्योऽनुष्टुभः षष्ठ्येकादश्युपांत्ये च जगत्यः षष्ठ्येकादशी चतुर्दशी पंचदशी च जगत्यः शिष्टा अष्टौ त्रिष्टुभः। पंचमी मंथता नर इत्येषा ऋत्विग्देवताकाग्निदेवताका वा शिष्टा अग्निदेवताकाः॥ सूक्तविनियोगो लैंगिकः। वरुणप्रघासेष्वग्निप्रणयन इळायास्त्वा पद इत्येषा। सूचितं च इळायास्त्वा पदे वयमग्ने विश्वेभिः स्वनीक देवैरित्यर्द्धर्चं आरमेत्। आ॰ २.१७.। इति॥ तत्रैवाग्निप्रणयन उत्तरवेद्यामग्नौ स्थापिते सति सीद होतरित्येषा। निहितेऽग्नौ सीद होतः स्व उ लोके चिकित्वान्। आ॰ २.१७.। इति सूचितं॥ अरण्यामग्निसमारोपणेऽयं ते योनिरित्येषा। सूचितं च अयं ते योनिर्ऋत्विय इत्यरणीर्गार्हपत्ये प्रतितपेत्पाणी वा। आ॰ ३.१०.। इति॥

॥ तस्मिन्सूक्ते प्रथमा ॥

अस्तीदमधिमंथनमस्ति प्रजननं कृतं।
एतां विश्पत्नीमा भराग्निं मंथाम पूर्वथा॥१॥
अस्ति। इदं। अधिऽमंथनं। अस्ति। प्रऽजननं। कृतं।
एतां। विश्पत्नीं। आ। भर। अग्निं। मंथाम। पूर्वऽथा॥१॥

यजमानोऽध्वर्य्वादीन्प्रति ब्रूते। इदमग्न्यर्थं यूपशकलमस्त्यधिमंथनं। अरण्या उपरि निधेयं मंथनसाधनभूतं दंडरज्ज्वादिकमस्ति। प्रजननमग्निजननसाधनभूतं दर्भपिंजूलं कृतं संपादितमस्ति। यद्वा। प्रजननं मंथनदंडस्य विन्यासविशेषः। यस्मादेतानि यूपशकलादीन्यग्निमंथनसाधनान्याहृतानि संति तस्माद्विश्पत्नीं विशां प्रजानामग्निसाध्याग्निहोत्रद्वारा स्वर्गादिफलसंपादनेन पालयित्रीमेतामरणीमाभर। हे अध्वर्यो आहर। तस्यामाहृतायां पूर्वथा यथा वयमाधानकालेऽग्निममथ्नीम यथा वा पूर्वे महर्षयोऽग्निममंथिषुस्तद्वद्वयमेनमग्निमस्मिन्कर्मणि मंथाम। मंथनेन निष्पन्नं करवाम॥ अस्तीति पदद्वयस्य पादादित्वादनिघातः। विश्पत्नी। पतिशब्दस्य विभाषा सपूर्वस्येति ङीप् नकारश्चांतादेशः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। भर। हृञ् हरण इत्यस्य लोटि हृग्रहोर्भश्छंदसीति भकारः। मंथाम। मंथ विलोडने। लोटि रूपं। निघातः। पूर्वथा। पूर्वशब्दादिवार्थे प्रत्नपूर्वविश्वेमात्थाल् छंदसीति थाल्प्रत्ययः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं॥

॥ अथ द्वितीया ॥

अरण्योर्निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु ।
दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ २ ॥

अरण्योः । निऽहितः । जातऽवेदाः । गर्भःऽइव । सुऽधितः । गर्भिणीषु ।
दिवेऽदिवे । ईड्यः । जागृवत्ऽभिः । हविष्मत्ऽभिः । मनुष्येभिः । अग्निः ॥ २ ॥

जातवेदाः सर्वविषयज्ञानवानयमग्निररण्योर्निहितः । देवैर्यज्ञार्थं नितरां स्थापितोऽस्ति । अत्र दृष्टांतः । गर्भ इवेति । यथा गर्भो गर्भिणीषु स्त्रीषु सुधितः सुष्ठु निहितो वर्तते तद्वत् । स तादृशोऽग्निर्हविष्मद्भिः संभृतहविष्कैरत एव जागृवद्भिः कर्मणि जागरूकैर्मनुष्येभिर्मनुष्यैरस्माभिर्दिवे दिवे प्रत्यहमुत्पत्त्यर्थमीड्यः । स्तुतिरूपाभिर्गीर्भिः स्तोतव्यः ॥ अरण्योः । ऋ गतौ । अर्तिसृधृधमीत्यादिना अनिः । प्रत्ययस्वरः । निहितः । दधातेः कर्मणि निष्ठायां दधातेर्हिरिति हिरादेशः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । सुधितः । दधातेः कर्मणि निष्ठा । तस्मिन् सुधित वसुधितेत्यादिना निपातनाद्धिरादेशः । दिवे दिवे । दिवु क्रीडादौ । इगुपधलक्षणः कः । नित्यवीप्सयोरिति द्विर्वचनं । तस्याम्रेडितत्वादनुदात्तत्वे पूर्वपदस्वरः । जागृवद्भिः । जागृ निद्राक्षय इत्यस्य क्वसौ रूपं । द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति विकल्पितत्वाद्द्विर्वचनाभावः । वसुस्रंसुध्वंस्वनडुहां दः । पा॰ ८. २. ७२. । इति वसोः सकारस्य दत्वं । प्रत्ययस्वरः ॥

॥ अथ तृतीया ॥

उत्तानायामव भरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान ।
अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट ॥ ३ ॥

उत्तानायां । अव । भर । चिकित्वान् । सद्यः । प्रऽवीता । वृषणं । जजान ।
अरुषऽस्तूपः । रुशत् । अस्य । पाजः । इळायाः । पुत्रः । वयुने । अजनिष्ट ॥ ३ ॥

चिकित्वान् ज्ञानवानध्वर्युस्त्वमुत्तानायामधरारण्यामुत्तानशयायामुत्तरारणिमव भर । अधोमुखां धारय । अनंतरं साधरारणिः सद्यः प्रवीता तदानीमेव निषिक्तरेतस्का सती वृषणं कामानां वर्षकमग्निं जजान । जनयतु । अथास्याग्ने रुशत्तमो विनाशयत् पाजस्तेजोमात्रं तत्राभूत् । अनंतरमरुषस्तूप आरोचमानते-

जःसंघोपेत इळायास्पुत्र उत्तरवेद्या उत्पन्नोऽग्निर्वयुनेऽरण्यां योनिस्थानेऽजनिष्ट। अजनि ॥ जजान। जन जनने। लोडर्थे लिटि बहुलमन्यत्रापि संज्ञाछंदसोरिति णिलोपः। प्रत्ययांतत्वाभावादाम्न भवति। निघातः। अरुषस्तूपः। न विद्यते रुषः क्रोधो यस्येत्यरुषः। क्रोधराहित्येन रोचमान इत्यर्थः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। ष्टुञ् स्तुतौ। स्तौतेर्दीर्घश्च। उ० ३.२५.। इति पप्रत्ययः किच्च धातोर्दीर्घश्च। स्तूयत इति स्तूपस्तेजःसंघः। अरुष आरोचमानस्तेजःसंघो यस्येति बहुव्रीहौ पूर्वपदस्वरः। रुशत्। रुश हिंसायां। शतरि रूपं। वयुने। अज गतिक्षेपणयोः। अजियमिशीङ्भ्यश्चेत्युनन् चित्संज्ञकः। अजति वीयते वा वयुनमंगं। प्रत्ययस्य व्यत्ययेनाद्युदात्तत्वं। अजनिष्ट। जनी प्रादुर्भावे। लुङि सिचि रूपं। निघातः ॥

॥ अथ चतुर्थी ॥

इळायास्त्वा पदे वयं नाभा पृथिव्या अधि।
जातवेदो नि धीमह्यग्ने हव्याय वोळ्हवे ॥४॥
इळायाः। त्वा। पदे। वयं। नाभा। पृथिव्याः। अधि।
जातऽवेदः। नि। धीमहि। अग्ने। हव्याय। वोळ्हवे ॥४॥

जातवेदो जातप्रज्ञ हे अग्ने अध्वर्य्वादयो वयं पृथिव्या अधि भूमेरुपर्युत्तरवेद्यां नाभा नाभौ तस्या नाभिस्थाने मध्यप्रदेशे। तदेव स्थानं विशेष्यते। इळायाः पदे मानव्या इडाया गोः पद इडापदरूप उत्तरवेद्यात्मके स्थाने त्वा त्वां हव्याय वोळ्हवे पुरोडाशादिलक्षणं हविर्वोढुं निधीमहि। निदधीमहि। उक्तार्थे ब्राह्मणं इळायास्त्वा पदे वयं नाभा पृथिव्या अधीत्येतद्वा इळायास्पदं यदुत्तरवेदीनाभिर्जातवेदो निधीमहीति निधास्यंतो ह्येनं भवंत्यग्ने हव्याय वोळ्हव इति हव्यं हि वक्ष्यन्भवति। ऐ० ब्रा० १.२८.। इति ॥ नाभा। णह बंधने। इञित्यनुवृत्तौ नहो भश्चेतीञ् भकारश्चांतादेशः। ञित्त्वादुपधावृद्धिः। नह्यतीति नाभिर्मध्यस्थानं। सुपां सुलुगिति सप्तम्या डादेशः। ञित्स्वरः। धीमहि। दधातेर्लिङि रूपं। लिङः सीयुट्। पा० ३.४.१०२.। इति सीयुट्। द्विर्वचनाभावश्छांदसः। निघातः। वोळ्हवे। वह प्रापणे। तुमर्थे तवेन्। सहिवहोरोदवर्णस्येति धात्वकारस्यौत्वं। ढत्वधत्वष्टुत्वढलोपाः। नित्त्वादाद्युदात्तः ॥

॥ अथ पंचमी ॥

मंथता नरः कविमद्वयंतं प्रचेतसममृतं सुप्रतीकं।
यज्ञस्य केतुं प्रथमं पुरस्तादग्निं नरो जनयता सुशेवं ॥५॥
मंथत। नरः। कविं। अद्वयंतं। प्रऽचेतसं। अमृतं। सुऽप्रतीकं।
यज्ञस्य। केतुं। प्रथमं। पुरस्तात्। अग्निं। नरः। जनयत। सुऽशेवं ॥५॥

नरः कर्मणां नेतारो हे अध्वर्य्वादयः कविं क्रांतदर्शिनमद्वयंतं द्वयमनाचरंतमद्वैतं कुर्वाणं मनसा वाचा चैकविधमेव कर्म कुर्वाणमत एव प्रचेतसं प्रकृष्टज्ञानोपेतममृतं मरणधर्मरहितं सुप्रतीकं शोभनैरंगैर्ज्वालाभिः समेतं तमिममग्निं मंथत। मंथनेन निष्पादयत। किंच। हे नरः कर्मणां नेतारोऽध्वर्य्वादयो यूयं यज्ञस्य ज्योतिष्टोमादेः केतुं प्रज्ञापकं प्रथमं मुख्यांगभूतं। अग्निपूर्वकत्वात्सर्वेषामुत्तरक्रतूनां। सुशेवं शोभनसुखोपेतं तादृशमग्निं पुरस्तात्कर्मणः प्रारंभे जनयत। तमिममग्निमेवंविधगुणयुक्तं कुरुतेति भावः॥ मंथत। मन्थ विलोडने। लोटि रूपं। पादादित्वादनिघातः। नरः। णीञ् प्रापणे। नयतेर्डिच्च। उ० २.९६.। इति ऋप्रत्ययः। डित्वाट्टिलोपः। नयंति कर्माणि नीयंते कर्माण्येभिरिति वा नरः। आमंत्रितत्वान्निघातः। अद्वयंतं। द्वयमिवाचरतीत्यर्थे सर्वप्रातिपदिकेभ्यः क्विप् वक्तव्य इत्याचारार्थे क्विप्। द्वयति। तस्य शतरि रूपं द्वयन्निति। न द्वयन्नद्वयन्। तं। तत्पुरुषे नञ्स्वरः। सुप्रतीकं। बहुव्रीहौ क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं। जनयत। जनी प्रादुर्भावे। णिच्। अत उपधाया इति वृद्धौ प्राप्तायां जनीजृष्क्नसुरञ्जोऽमंताश्चेति मित्त्वान्मितां ह्रस्व इति ह्रस्वः। निघातः। सुशेवं। शेवशब्दो वन्प्रत्ययांत आद्युदात्तः। बहुव्रीहावाद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं॥

॥ इति तृतीयस्य प्रथमे द्वात्रिंशो वर्गः॥

॥ तस्मिन्सूक्ते षष्ठी॥

यदी मंथंति बाहुभिर्वि रोचतेऽश्वो न वाज्यरुषो वनेष्वा।
चित्रो न यामन्नश्विनोरनिवृतः परि वृणक्त्यश्मनस्तृणा दहन् ॥६॥
यदि। मंथंति। बाहुऽभिः। वि। रोचते। अश्वः। न। वाजी। अरुषः। वनेषु। आ।
चित्रः। न। यामन्। अश्विनोः। अनिवृतः। परि। वृणक्ति। अश्मनः। तृणा। दहन् ॥६॥

यद्यध्वर्य्वादयो बाहुभिः स्वकीयैर्हस्तैरग्निं मंथंति मथ्नंति ततः स जातोऽग्निर्वनेषु काष्ठेषु वाजी शीघ्रगमनवान् अरुष आरोचमानः सर्वेषां प्रीतिकरः सन् आ वि रोचते। आ संमताद्विशेषेण दीप्यते। तत्र दृष्टांतः। अश्वो नेति। यथाश्वो वनेषु वननीयेषु वाह्यालीस्थानेषु वेगवानारोचमानो वर्तते तद्वत्। तत्रैव दृष्टांतांतरं। चित्रो नेति। यथा यामन् यामनि वेगगमनेऽश्विनोर्देवभिषजोश्चित्रो नानाविधवर्णो रथ आरोचमानो वर्तते तद्वत्। अनिवृतः केनाप्यप्रतिबद्धगमनः सोऽयमग्निरश्मन उपलान् तृणा तृणानि च दहन् भस्मसात्कुर्वन् परि वृणक्ति। दग्धस्थानानि परितो वर्जयति। तादृशोऽग्निरारोचत इति पूर्वेणान्वयः॥ मंथंति। मन्थ विलोडने। लटि रूपं। यद्योगादनिघातः। रोचते। रुच दीप्तौ भौवादिकः। लटि रूपं। निघातः। यामन्। या प्रापणे। आतो मनिन्क्वनिब्वनिपश्चेति मनिन्। सुपां सुलुगित्यादिना सप्तम्या लुक्। नित्स्वरः। अनिवृतः। वृञ् वरणे। निष्ठायां यस्य विभाषेतीट्प्रतिषेधः। निपूर्वो वृणोतिर्निवारणे वर्तते। न निवृतोऽनिवृतः। नञ्स्वरः। वृणक्ति। वृजी वर्जने रुधादिः। चोः कुरिति कुत्वं। निघातः। तृणा। तृह हिंसायां। तृहेः क्नो हलोपश्चेति क्नः। कित्त्वादगुणः। हलोपश्च। तृह्यते तज्ञवादिभिरिति तृणं। नित्स्वरः॥

॥ अथ सप्तमी ॥

जातो अग्नी रोचते चेकितानो वाजी विप्रः कविशस्तः सुदानुः।
यं देवास ईड्यं विश्वविदं हव्यवाहमदधुरध्वरेषु ॥ ७॥

जातः। अग्निः। रोचते। चेकितानः। वाजी। विप्रः। कविऽशस्तः। सुऽदानुः।
यं। देवासः। ईड्यं। विश्वऽविदं। हव्यऽवाहं। अदधुः। अध्वरेषु ॥ ७॥

जातो मंथनानंतरमुत्पन्नः स च चेकितानो सर्वं जानानः सन् वाजी सततगमनस्वभावो विप्रो कर्माभिज्ञोऽत एव कविशस्तः कविभिर्मेधाविभिर्होतृभिः स्तुतः सुदानुः सुष्ठु कर्मफलस्य दाता एवंविधोऽग्नी रोचते। दीप्यते। देवासो देवा इंद्रादय ईड्यं होत्रादिभिः स्तुत्यं विश्वविदं सर्वस्य जगतो वेदितारं यमग्निमध्वरेषु ज्योतिष्टोमादियज्ञेषु हव्यवाहं हव्यानां वोढारमदधुर्व्यदधुः सोऽग्निर्दीप्यत इति पूर्वेणान्वयः॥ चेकितानः। कित ज्ञान इत्यस्य यङ्लुकि गुणो यङ्लुकोरित्यभ्यासस्य गुणः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। कविशस्तः। थाथघञ्क्ता-

जबिचकाणामित्यंतोदात्तत्वं । अदधुः । दधातेर्लेङि झेः सिजभ्यस्तविदिभ्यश्चेति जुस् । यद्वृत्तयोगादनिघातः । अडागमस्वरः ॥

॥ अथाष्टमी ॥

सीद होतः स्व उ लोके चिकित्वान्सादया यज्ञं सुकृतस्य योनौ ।
देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥ ८ ॥

सीद । होतः । स्वे । ऊं इति । लोके । चिकित्वान् । सादय । यज्ञं । सुऽकृतस्य । योनौ ।
देवऽअवीः । देवान् । हविषा । यजासि । अग्ने । बृहत् । यजमाने । वयः । धाः ॥ ८ ॥

यजमानो ब्रूते । होतर्होमनिष्पादक हे अग्ने स्वे स्वकीये लोक उत्तरवेद्या नाभौ सीदो । त्वं होमनिमित्तमुपविशेव । तथा चिकित्वान् ज्ञानवांस्त्वं सुकृतस्य सुकृतजन्योपभोगस्य योनौ स्थान उत्तमलोके यज्ञं यज्ञस्य कर्तारं यजमानं सादय । स्थापय । किंच देवावीः । देवान् हविःप्रदानेनावतीति देवावीः । तादृशस्त्वं हविषा पुरोडाशादिलक्षणेन हव्येन देवान् यजासि । यज । अथ त्वं यजमाने यागं कुर्वाणे मयि बृहत्प्रभूतं पशुपुत्रादिसमेतं वयोऽन्नं धाः । विधेहि ॥ सीद । सदेर्लोटि रूपं । सादय । सदेर्ण्यंतस्य लोटि रूपं । णिच्स्वरः । देवावीः । अव रक्षणादिषु । अवितृस्तृतंत्रिभ्य ईरितीप्रत्ययः । कृदुत्तरपदस्वरः । यजासि । यजेर्लेट्याडागमः । धाः । दधातेश्छांदसे लुङि रूपं ॥

॥ अथ नवमी ॥

कृणोत धूमं वृषणं सखायोऽस्रेधंत इतन वाजमच्छ ।
अयमग्निः पृतनाषाट् सुवीरो येन देवासो असहंत दस्यून् ॥ ९ ॥

कृणोत । धूमं । वृषणं । सखायः । अस्रेधंतः । इतन । वाजं । अच्छ ।
अयं । अग्निः । पृतनाषाट् । सुऽवीरः । येन । देवासः । असहंत । दस्यून् ॥ ९ ॥

यजमानोऽध्वर्य्वादीन्प्रति ब्रूते । हे सखायः कर्मसहकारिणो यूयं वृषणं कामानां वर्षितारं धूमं । धुनोति कंपयतीति धूमोऽग्निः । एवंविधमग्निं कृणोत । कुरुत । मंथनेनोत्पादयत । यद्यग्निर्न जायते तदानीमाह । अस्रेधंतोऽक्षीणा अनुपरतसामर्थ्याः संतो यूयं वाजं मंथनलक्षणं युद्धमच्छाग्न्याभिमुख्येनेतन । प्राप्नुत । सुवीरः शोभनसामर्थ्योपेतोऽयमग्निः पृतनाषाट् पृतनोपलक्षितं युद्धं सहमानो

भवति । येन युद्धं सहमानेनाग्निना देवासो देवा दस्यूनुपक्षपयितॄनसुरानसहंत अभ्यभवन् । तस्मादक्षीणबला यूयं मंथनं कुरुतेति भावः ॥ कृणोत । कृवि हिंसाकरणयोः । लोटि तप्रत्ययस्य तप्तनप्तनथनाश्चेति तबादेशः । पित्त्वाद्गुणः । पादादित्वादनिघातः । उप्रत्ययस्वरः । धूमं । धूञ् कंपने । इषियुधीधिदसीत्यादिना मक् । किच्चाद्गुणाभावः । धुनोति कंपयति दाह्यानीति धूमोऽग्निः । प्रत्ययस्वरः । इतन । इण् गतावित्यस्य लोटि तप्रत्ययस्य तनादेशः । निघातः । पृतनाषाट् । षह मर्षणे । छंदसि सह इति ण्विः । णित्त्वादुपधावृद्धिः । सहेः साडः स इति षत्वं । कृदुत्तरपदप्रकृतिस्वरः । असहंत । षह मर्षण इत्यस्य लङि रूपं । यद्योगोदनिघातः । दस्यून् । दसु उपक्षये । यजिमनिशुंधिदसिजनिभ्यो युजिति युच् । दस्यंतीति दस्यवः शत्रवः । व्यत्ययेनाद्युदात्तत्वं ॥

॥ अथ दशमी ॥

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आ सीदाथा नो वर्धया गिरः ॥१०॥

अयं । ते । योनिः । ऋत्वियः । यतः । जातः । अरोचथाः ।
तं । जानन् । अग्ने । आ । सीद । अथ । नः । वर्धय । गिरः ॥१०॥

हे अग्ने ऋत्वियो वसंताद्यृतौ भवोऽयमंगुल्या निर्दिश्यमानः पलाशाश्वत्थादिमयः काष्ठविशेषोऽरणिस्ते तव योनिरुत्पत्तिस्थानं यतोऽरणेर्जातस्त्वमरोचथाः । अशोभथाः । जानंस्त्वं तमरणिरूपं काष्ठविशेषमासीद । तस्यामरण्यामारोपितः सन् नैरंतर्येण तिष्ठ । अथानंतरं नोऽस्माकं गिरः स्तुतिलक्षणा वाचो वर्धय । यद्वा गीःशब्देन तद्वंतो लक्ष्यंते । तथा स्तोतॄनस्मान् वर्धय । पशुपुत्रादिभिः समृद्धान् कुरु ॥ योनिः । यु मिश्रणे । वहिश्रीत्यादिना निप्रत्ययः । निदित्युक्तत्वादाद्युदात्तः । ऋत्वियः । छंदसि घसित्यृतुशब्दात्प्राप्तार्थे घस्प्रत्ययः । घस्य इयादेशः । सितीति पदसंज्ञायां ओर्गुणः । पा॰ ६.४.१४६. । इति संज्ञाधीनो गुणो न भवति । प्रत्ययस्वरः । अरोचथाः । रुच दीप्तावित्यस्य लङि रूपं । यद्वृत्तयोगादनिघातः । सीद । सदेर्लोटि पाघ्रेत्यादिना सीदादेशः । निघातः । अथा । निपातस्य चेति सांहितिको दीर्घः । वर्धय । वृधु वर्धने । हेतुमति णिच् । निघातः ॥

॥ इति तृतीयस्य प्रथमे त्रयस्त्रिंशो वर्गः ॥

॥ अथ तस्मिन्सूक्त एकादशी ॥

तनूनपादुच्यते गर्भं आसुरो नराशंसो भवति यद्विजायते ।
मातरिश्वा यदमिमीत मातरि वातस्य सर्गो अभवत्सरीमणि ॥ ११ ॥
तनूऽनपात् । उच्यते । गर्भः । आसुरः । नराशंसः । भवति । यत् । विऽजायते ।
मातरिश्वा । यत् । अमिमीत । मातरि । वातस्य । सर्गः । अभवत् । सरीमणि ॥ ११ ॥

योऽग्निर्यदा गर्भोऽरणीषु गर्भरूपतया वर्तते तदा सोऽग्निस्तनूनपादुच्यते । यष्टृणां तनूः शरीराणि न पातयति न दहतीति व्युत्पत्तेः । यद्वा तनूशब्देनापोऽभिधीयंते नपाच्छब्देनैकांतरिताः प्रजाः । तथा चापां नप्ता । कथमेतत् । आपस्तता अंतरिक्षे । ताभ्य ओषधिवनस्पतयो जायंते । तेभ्यो ह्येष इति । यद्यदा विजायते विशेषेण प्रत्यक्षतया जायते तदासुरः कर्मविघ्नकारिणामसुराणां हंतात एव नराशंसः नरैः कर्मणां नेतृभिरध्वर्य्वादिभिः शंसनीयो भवति । यद्यदा मातर्यंतरिक्षे स्वं तेजोऽमिमीत निर्मिमीते तदा मातरिश्वा भवति । मातर्यंतरिक्षे श्वसिति चेष्टत इति व्युत्पत्तेः । एवंविधस्याग्नेः सरीमणि सरणे शीघ्रगमने वातस्य वायोः सर्गः सृष्टिरभवत् । भवति । यदाग्निररणीषु गर्भरूपतया वर्तते तदा तनूनपान्नामको भवति । यदा जायते तदा नराशंसनामको भवति । यदांतरिक्षे विद्योतते तदा मातरिश्वनामको भवतीति ॥ तनूनपात् । तनु विस्तारे । कृषिचमितनिधनिसर्जिखर्जिभ्य ऊरित्यूप्रत्ययः । व्यत्ययेनाद्युदात्तः । नपात् । पा रक्षणे पतॢ गतौ वा णयंतः । क्विप् । न पाति न पातयतीति वा नपात् । नभ्राणनपान्नवेदा इत्यादिना निपातनान्नञः प्रकृतिभावः । नञ्स्वरः । तनूनं पातीति तनूनपात् । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्त उभे वनस्पत्यादिषु युगपदित्युभयपदप्रकृतिस्वरत्वं । आसुरः । असुरस्यायमासुरः । अहितकारित्वेन संबंधी । तस्येदमित्यण् । प्रत्ययस्वरः । नराशंसः । नॄ नये । ॠदोरबित्यप् । प्रत्ययस्य पित्त्वान्नरशब्द आद्युदात्तः । शन्सु स्तुतावित्यस्माद्घञंत आद्युदात्तः । नरशब्दस्यान्येषामपि दृश्यत इति दीर्घः । वनस्पत्यादित्वादुभयोः प्रकृतिस्वरत्वं । विजायते । जनी प्रादुर्भावे । दिवादित्वात् श्यन् । धातुस्वरः । अमिमीत । माङ् माने शब्दे च । जुहोत्यादिः । भृञामिदित्यभ्यासस्येत्वं । यद्योगादनिघातः । सरीमणि । सृ गतौ । हृभृसृस्तृसृभ्य इतीमनिन्प्रत्ययः । नित्स्वरः ॥

॥ अथ द्वादशी ॥

सुनिर्मथा निर्मथितः सुनिधा निहितः कविः ।
अग्ने स्वध्वरा कृणु देवान्देवयते यज ॥ १२ ॥
सुनिःऽमथा । निःऽमथितः । सुऽनिधा । निऽहितः । कविः ।
अग्ने । सुऽअध्वरा । कृणु । देवान् । देवऽयते । यज ॥ १२ ॥

हे अग्ने कविर्मेधावी सुनिर्मथा शोभनेन मंथनेन निर्मथितः । नितरां मथितोऽसि । तथा सुनिधा शोभनेन निधानेन निहितोऽसि । उत्तरवेद्यादिस्थानेषु नितरां प्रक्षिप्तोऽसि । किंच स्वध्वरास्माभिः क्रियमाणानि कर्माणि सुष्ठु हिंसारहितानि कृणु । कुरु । तथा देवयते देवान्कामयमानाय यजमानाय देवान्यजनीयानिंद्रादीन् यज । पूजय ॥ सुनिर्मथा । मथे विलोडने । अस्मात्संपदादिलक्षणो भावे क्विप् । प्रादिसमासः । कृदुत्तरपदस्वरः । निर्मथितः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । सुनिधा । निपूर्वस्य दधातेर्भाव आतश्चोपसर्ग इत्यङ् । सुपां सुलुगिति तृतीयाया लुक् । कृदुत्तरपदस्वरः । कृणु । कृवि हिंसाकरणयोरित्यस्य लोटि धिन्विकृण्व्योरच्चेत्युप्रत्ययः । उतश्च प्रत्ययादिति हेर्लुक् । निघातः ॥

॥ अथ त्रयोदशी ॥

अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं तरणिं वीळुजंभं ।
दश स्वसारो अग्रुवः समीचीः पुमांसं जातमभि सं रभंते ॥ १३ ॥
अजीजनन् । अमृतं । मर्त्यासः । अस्रेमाणं । तरणिं । वीळुऽजंभं ।
दश । स्वसारः । अग्रुवः । संऽईचीः । पुमांसं । जातं । अभि । सं । रभंते ॥ १३ ॥

मर्त्यासो मर्त्या ऋत्विजोऽमृतं मरणधर्मरहितं अत एवास्रेमाणं क्षयरहितं वीळुजंभं हविर्भक्षणार्थं दृढदंतं तरणिं । तरंति यजमानाः पापमनेनेति तरणिरग्निः । तमजीजनन् । मंथनेनोदपीपदन् । अथ जातं तमग्निमभिलक्ष्य स्वसारः सरंत्यो दश दशसंख्याका अग्रुवः । कर्मकरणार्थमग्रमंगंतीत्यग्रुवोऽंगुलयः । तादृशा अंगुलयः समीचीः परस्परं संगताः सत्यः संरभंते । शब्दं कुर्वते । जातमग्निं दृष्ट्वाध्वर्य्वादयो हर्षाद्धस्तद्वयसंपुटेन शब्दं कुर्वतीत्यर्थः । तत्र दृष्टांतः । पुमांसमिति । यथा जातं पुत्रमुपलभ्य तत्रत्याः पित्रादयो हर्षादुद्घोषंति तद्वत् ॥

अजीजनन्। जनी प्रादुर्भाव इत्यस्य ण्यंतस्य लुङि चङि रूपं। असेमाणं। स्रिवु गतिशोषणयोः। भावे मनिन्निति मनिन्प्रत्ययः। लघूपधगुणः। लोपो व्योर्वलीति वलोपः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। तरणिः। तॄ प्लवनतरणयोः। अर्तिसृधृधम्यम्यश्यवितॄभ्योऽनिरित्यनिप्रत्ययः। गुणः। प्रत्ययस्वरः। स्वसारः। असु क्षेपण इत्यस्मात्सुन्यसेर्ऋन्निति ऋन्प्रत्ययः। सुष्ठु अस्यंति कर्मसु पदार्थानिति स्वसारः। न षट्स्वस्रादिभ्य इति ङीपः प्रतिषेधः। नित्वादाद्युदात्तः। अग्रुवः। अगि गतौ। जत्र्वादयश्च। उ० ४. १०५.। इति रुप्रत्ययः। निपातनान्नलोपः। जसि तन्वादित्वादुवङादेशः। प्रत्ययस्वरः। समीचीः। इण् गतावित्यस्मात्समीणः। उ० ४. ९४.। इति चट्प्रत्ययो धातोर्दीर्घश्च। टित्वाट्टिड्ढाणञित्यादिना ङीप्। संयंतीति समीच्यः। यद्वा संपूर्वस्यांचतेः क्विप्। समः समीति समि इत्यादेशः। अंचतेश्चोपसंख्यानमिति ङीप्। अच इत्यकारलोपः। चाविति दीर्घः। वा छंदसीति पूर्वसवर्णदीर्घः। एकादेशस्वरः। पुमांसं। पा रक्षण इत्यस्मात्पातेर्डुम्सुन्। उ०.४. १७९.। इति डुम्सुन्प्रत्ययः। पुंसोऽसुङ्। पा० ७.१.८९.। इत्यसुङादेशः। पाति कुलमिति पुमान्। नित्स्वरः। रभंते। रभ शब्द इत्यस्य लटि रूपं। निघातः॥

॥ अथ चतुर्दशी ॥

प्र स॒प्तहो॑ता सन॒काद॑रोचत मा॒तुरु॒पस्थे॒ यदशो॑च॒दूध॑नि।
न नि मि॑षति सु॒रणो॑ दि॒वेदि॑वे॒ यदसु॑रस्य ज॒ठरा॒दजा॑यत ॥१४॥

प्र। स॒प्तऽहो॑ता। स॒न॒कात्। अ॒रो॒च॒त॒। मा॒तुः। उ॒पऽस्थे॑। यत्। अशो॑चत्। ऊध॑नि।
न। नि। मि॒ष॒ति॒। सु॒ऽरणः॑। दि॒वेऽदि॑वे। यत्। असु॑रस्य। ज॒ठरा॑त्। अजा॑यत ॥१४॥

सनकात्सनातनोऽग्निः सप्तहोता। सप्त होतारो होत्रका यस्यासौ सप्तहोता सन् प्रारोचत। गार्हपत्यस्थानेऽदीप्यत। यद्यदा मातुः पृथिव्या उपस्थ उत्संगे तत्राप्यूधन्यूधःस्थान उत्तरवेद्यामशोचत् अशोभत तदा सोऽग्निः सुरणः। सुष्ठु रणयति शब्दयतीति सुरणः। सर्वैः कमनीयतया दृश्यमानः सन् दिवे दिवे प्रतिदिनं न निमिषति। न निद्राति। किंतु सर्वदा यज्ञार्थं जागर्त्येव। यद्यस्मादसुरस्याग्नेः प्रेरकस्यारणीरूपस्य काष्ठस्य जठरादुदरादजायत कर्मार्थमुदपद्यत तस्मान्न निमिषतीति पूर्वेणान्वयः॥ अरोचत। रुच दीप्तावित्यस्य लङि रूपं। निघातः। अशोचत्। शुच दीप्तौ। ऊधनि। सकारस्य नकारश्छांदसः। मिषति।

मिषु सेचन इत्यस्य लटि रूपं। सुरणः। रण शब्दे। तत्करोतीति णिच्। तस्मादकृच्छ्रार्थे खल्। लित्स्वरः। असुरस्य। असु क्षेपण इत्यस्मादसेरुरन्नित्युरन्प्रत्ययः। अस्यतीत्यसुरः। नित्स्वरः। जठरात्। जनी प्रादुर्भाव इत्यस्मात् जनेररष्ठ च। उ॰ ५.३८.। इत्यरप्रत्ययः ठकारश्चांतदेशः। प्रत्ययस्वरः। अजायत। जनी प्रादुर्भाव इत्यस्य लङि श्यनि ज्ञाजनोर्जेति धातोर्जादेशः। यद्योगादनिघातः॥

॥ अथ पंचदशी ॥

अमित्रायुधो मरुतामिव प्रयाः प्रथमजा ब्रह्मणो विश्वमिद्विदुः।
द्युम्नवद्ब्रह्म कुशिकास एरिर एकएको दमे अग्निं समीधिरे ॥ १५ ॥

अमित्रऽयुधः। मरुतांऽइव। प्रऽयाः। प्रथमऽजाः। ब्रह्मणः। विश्वं। इत्। विदुः।
द्युम्नऽवत्। ब्रह्म। कुशिकासः। आ। ईरिरे। एकःऽएकः। दमे। अग्निं। सं। ईधिरे ॥ १५ ॥

अमित्रायुधोऽमित्रैः कर्मविघ्नकारिभिरसुरैः सह योद्धारः। यद्वा अमित्राणि पापानि। तैः सह योद्धारः। तत्र दृष्टांतः। मरुतामिव प्रया इति। यथा मरुतां देवानां प्रयाः प्रकर्षेण शत्रूनभियांतीति प्रया बलानि शत्रूणां हंतॄणि तद्वत्कर्मविघ्नकारिणां पापानां च हंतारो ब्रह्मणः सर्वस्य जगतः स्रष्टुः प्रथमजाः प्रथममुत्पन्नाः कुशिकासः कुशिकगोत्रोत्पन्ना ऋषयो विश्वं स्थावरजंगमात्मकं सर्वं जगद्विदुरित्। जानंत्येव। तेऽमी कुशिका द्युम्नवद्धविर्युक्तं ब्रह्म स्तोत्रमेरिरे। अग्नय आ समंतात्प्रेरयंति। ते च दमे स्वे स्वे गृह एक एक एकैको भूत्वाग्निं समीधिरे। आज्याद्याहुतिभिः सम्यग्दीपयंति ॥ अमित्रायुधः। युध संप्रहारे। क्विप्। कृदुत्तरपदस्वरः। संहितायां पूर्वपदस्य दीर्घश्छांदसः। प्रयाः। या प्रापणे। अन्येभ्योऽपि दृश्यंत इति विच्। प्रथमजाः। जनी प्रादुर्भावे। जनसनेत्यादिना विट्। विड्वनोरित्यात्वं। विदुः। विदेर्लटि विदो लटो वेति झेरुसादेशः। ईरिरे। ईर गतावित्यस्य लिटि रूपं। मंत्रत्वादाम्न भवति। दमे। दमु उपशमने। करणे घञ्। नोदात्तोपदेशस्येति वृद्धिप्रतिषेधः। ञित्स्वरः। ईधिरे। ञिइंधी दीप्तावित्यस्य लिटि इंधिभवतिभ्यां चेति किद्वद्भावान्नकारलोपः। निघातः।

॥ अथ षोडशी ॥

यदद्य त्वां प्रयति यज्ञे अस्मिन्होतश्चिकित्वोऽवृणीमहीह।
ध्रुवमया ध्रुवमुताशमिष्ठाः प्रजानन्विद्वाँ उप याहि सोमं ॥ १६ ॥

यत्। अद्य। त्वा। प्रऽयति। यज्ञे। अस्मिन्। होतरिति। चिकित्वः। अवृणीमहि। इह।
ध्रुवं। अयाः। ध्रुवं। उत। अशमिष्ठाः। प्रऽजानन्। विद्वान्। उप। याहि। सोमं ॥ १६॥

होतर्होमनिष्पादक चिकित्वः कर्मविषयज्ञानवन् हे अग्ने अद्येदानीं प्रयति प्रवर्तमानेऽस्मिन् ज्योतिष्टोमादौ यज्ञे त्वा त्वां यद्यस्मात्कारणादवृणीमहि त्वद्विषयं वरणमकुर्म तस्मात्तादृशस्त्वमिह कर्मणि देवान् ध्रुवमयाः। ध्रुवं यथा भवति तथास्माभिर्दत्तानि हवींषि प्रापय। उत अपि चाशमिष्ठाः। हविःस्वीकरणात्तृप्तैर्देवैः शांतस्त्वमकरिष्ठाः। अथ प्रजानन्निमं यज्ञं सम्यक् जानन्विद्वान्यत्किंचित्सर्वं जानानस्त्वं सोममस्माभिः क्रियमाणमिममभिषुतं सोममभिलक्ष्योप याहि। समीप आगच्छ ॥ प्रयति। इण् गतावित्यस्य शतरि रूपं। शतुरनुम इति विभक्तेरुदात्तत्वं। अवृणीमहि। वृञ् वरणे। क्र्यादित्वात् श्ना। लङ्युत्तमबहुवचन ई हल्यघोरितीत्वं। आमंत्रितस्याविद्यमानवत्त्वेन पादादित्वादनिघातः। अयाः। या प्रापण इत्यस्य लङि सिपि रूपं। निघातः। अशमिष्ठाः। शमु उपशमन इत्यस्य ण्यंतस्य कर्मणि लुङि स्यसिच्सीयुट्। पा॰ ६.४.६२। इति विकल्पेनेडागमः। तस्यासिद्धत्वाण्णेरनिटीति णिलोपः। निघातः। प्रजानन्। ज्ञा अवबोधने। शतरि रूपं। याहि। यातेर्लोटि रूपं ॥

॥ इति तृतीयस्य प्रथमे चतुस्त्रिंशो वर्गः ॥

॥ इति तृतीये मंडले द्वितीयोऽनुवाकः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके प्रथमोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

तृतीयेऽनुवाके नव सूक्तानि । तत्रेच्छंति त्वेति द्वाविंशत्यृचं प्रथमं सूक्तं । तत्रेयमनुक्रमणिका । इच्छंति द्व्यधिकेंद्रमिति । मंडलद्रष्टा विश्वामित्र ऋषिः । इंद्रो देवता । अनुक्तत्वात्त्रिष्टुप् छंदः ॥ आभिप्लविके प्रथमेऽहनि दशरात्रे प्रथमेऽहनि च माध्यंदिने सवनेऽच्छावाकशस्त्रेऽहीनसूक्तस्थाने द्वितीयमिदं संपातसूक्तं । अभिप्लवपृष्ठ्याहानीति खंडे सूत्रितं । इमामू ष्विच्छंति त्वा शासद्वह्निरिति संपाताः । आ॰ ७.५. । इति ॥ इंद्रस्य वृत्रघ्नः संबंधिनि पशौ सहदानुमिति वपाया याज्या । सहदानुं पुरुहूत क्षियंतं स्तुत इंद्रो मघवा यद्ध वृत्र । आ॰ ३.८. । इति सूत्रितं ॥ स्वस्तये वाजिभिश्चेत्येषेंद्रे पशौ हविषो याज्या । सूत्रितं च स्वस्तये वाजिभिश्च प्रणेतः शुची वो हव्या मरुतः शुचीनां । आ॰ ३.७. । इति ॥ शुनासीरीये वैकल्पिकस्येंद्रस्य शुनस्य शुनं हुवेमेत्यनुवाक्या । सूत्रितं च शुनं हुवेम मघवानमिंद्रमश्वायंतो गव्यंतो वाजयंतः । आ॰ २.२०. । इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

इ॒च्छंति॑ त्वा सो॒म्यासः॒ सखा॑यः सु॒न्वंति॒ सोमं॒ दध॑ति॒ प्रयां॑सि ।
तिति॑क्षंते अ॒भिश॑स्तिं॒ जना॑ना॒मिंद्र॒ त्वदा कश्च॒न हि प्र॑के॒तः ॥ १ ॥
इ॒च्छंति॑ । त्वा॒ । सो॒म्यासः॑ । सखा॑यः । सु॒न्वंति॑ । सोमं॑ । दध॑ति । प्रयां॑सि ।
तिति॑क्षंते । अ॒भिऽश॑स्तिं । जना॑नां । इंद्र॑ । त्वत् । आ । कः॑ । च॒न । हि । प्र॒ऽके॒तः ॥ १ ॥

विश्वामित्रः स्तौति । हे इंद्र सोम्यासः सोमार्हा ब्राह्मणास्त्वा त्वां शंसितुमिच्छंति । अत एव सखायस्ते ब्राह्मणास्त्वदर्थं सोमं सुन्वंति । अभिषुण्वंति । प्रयांसीतराण्यपि हवींषि दधति । त्वदर्थं धारयंति । त्वया प्रेरिताः संतो जनानां सपत्नानामभिशस्तिं तत्कृतां हिंसां तितिक्षंते । सहंते । एवमनुग्राहकस्त्वत् त्वत्तोऽन्यः कश्चन हि को नाम पुरुषः खलु आ प्रकेतः । सर्वतो जगति । प्रकेत्यते ज्ञाप्यत इति प्रकेतः । प्रज्ञापितो विद्यते ॥ सोम्यासः । सोममर्हतीत्यर्थे सोममर्हति य इति यः । प्रत्ययस्वरः । सुन्वंति । षुञ् अभिषवे । स्वादित्वात् श्नुः । सति शिष्टस्वरो

बलीयानिति क्रिप्रत्ययस्वरः । दधति । दधातेर्लेटि रूपं । समानवाक्ये युष्मदस्मदादेशनिघाताः । पा० ८.१.१८.५. । इति सोमपदस्येतरवाक्ये नान्वयान्न निघातः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । तितिक्षंते । तिज निशान इत्यस्य क्षमायां गुप्तिज्किद्भ्यः सन्निति सन् । अभ्यस्तस्वरः । अभिशस्तिं । शसु हिंसायामित्यस्माद्भावे क्तिन् । तादौ च निति कृत्यताविति गतेः प्रकृतिस्वरत्वं । प्रकेतः । कित ज्ञाने । कर्मणि घञंतः । थाथघञ्क्तेत्यंतोदात्तत्वं ॥

॥ अथ द्वितीया ॥

न ते॑ दू॒रे प॑र॒मा चि॒द्रजां॑स्या तु प्र या॑हि हरिवो॒ हरि॑भ्यां ।
स्थि॒राय॑ वृष्णे॒ सव॑ना कृ॒तेमा यु॒क्ता ग्रावा॑णः समिधा॒ने अ॒ग्नौ ॥२॥

न । ते॒ । दू॒रे । प॒र॒मा । चि॒त् । रजां॑सि । आ । तु । प्र । या॒हि॒ । ह॒रि॒ऽव॒ः । हरि॑ऽभ्यां ।
स्थि॒राय॑ । वृष्णे॑ । सव॑ना । कृ॒ता । इ॒मा । यु॒क्ताः । ग्रावा॑णः । सं॒ऽइ॒धा॒ने । अ॒ग्नौ ॥२॥

हरिवः । हरिवर्णावश्वौ यस्य सोऽयं हरिवानिंद्रः । हे हरिवः परमा चित् परमाणि दूरे वर्तमानान्यपि रजांसि स्थानानि ते तव दूरे न भवंति । यस्माद्धरिभ्यामुपेतस्त्वं तु क्षिप्रमा प्रयाहि । अस्मदीयं यज्ञमभिलक्ष्यागच्छ । स्थिराय फलप्रदाने दृढचित्तायात एव वृष्णे कामानां वर्षित्रे तुभ्यमिमा इमानि सवना सवनानि प्रातरादीनि कृता । कृतानि । किंच । अग्नावाहवनीये समिधान आहुत्यधिकरणतया सम्यग्दीप्यमाने सति ग्रावाण उपला युक्ताः । सोमाभिषवार्थमुद्युक्ताः । अतस्त्वं क्षिप्रमागच्छेति भावः ॥ याहि । या प्रापण इत्यस्य लोटि रूपं । हरिवः । हरी अस्य स्त इति मतुप् । छंदसीर इति तस्य वत्वं । आमंत्रितत्वान्निघातः । स्थिराय । ष्ठा गतिनिवृत्तावित्यस्मादजिरशिशिरेत्यादिना किरच् । प्रत्ययांतत्वेन निपातनादाकारलोपः । चित्स्वरः । सवना । षुञ् अभिषव इत्यस्मादधिकरणे ल्युट् चेति ल्युट् । सूयते सोमो यत्रेति सवनानि प्रातरादीनि । लित्स्वरः । समिधाने । ञिइंधी दीप्तावित्यस्य कानचि रूपं । क्ङित्वान्नकारलोपः । चित्स्वरः ॥

॥ अथ तृतीया ॥

इंद्रः॑ सु॒शिप्रो॑ म॒घवा॒ तरु॑त्रो म॒हाव्रा॑तस्तुवि॒कूर्मि॒र्ऋघा॑वान् ।
यदु॒ग्रो धा बा॑धि॒तो मर्त्ये॑षु॒ क्व१॒॑त्या ते॑ वृषभ वी॒र्या॑णि ॥३॥

इंद्रः । सुऽशिप्रः । मघऽवा । तरुत्रः । महाऽव्रातः । तुविऽकूर्मिः । ऋघावान् ।

यत् । उग्रः । धाः । बाधितः । मर्त्येषु । क्व । त्या । ते । वृषभ । वीर्याणि ॥ ३ ॥

वृषभ कामानां वर्षक हे इंद्र यस्त्वमिंद्रः परमैश्वर्यसंपन्नः सुशिप्रः । शिप्रशब्देन शिरस्त्राणमभिधीयते । शोभनशिरस्त्राणोपेतः । यद्वा शोभनहनुमान् । शिप्रे हनू नासिके वा । नि॰ ६. १७. । इति यास्कः । मघवा धनवान् तरुत्रः । तरंत्यनेन शत्रून्देवा इति तरुत्र इंद्रः । महाव्रातः । मरुद्भिर्महान्व्रातः समूहो यस्येति स तथोक्तः । तुविकूर्मिः संग्रामे नानाविधकर्मणां कर्ता ऋघावान् शत्रुविषयहिंसावान् अत एवोग्रः शत्रूणां भयंकरः स तादृशस्त्वं बाधितोऽसुरैः संग्रामे बाधितः सन् मर्त्येषु मारयितृष्वसुरेषु यत् यानि वीर्याणि धा व्यधा इदानीं ते तव त्या तानि वीर्याणि क्व । क्वासते वद ॥ सुशिप्रः ॥ सृप्लृ गतौ । औणादिको रन्प्रत्ययः । बाहुलकात्सृ इत्यस्य शि इत्यादेशः । बहुव्रीहावाद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं । तरुत्रः । तरतेरशित्रादिभ्य इत्रोत्रावित्युत्रप्रत्ययः । व्यत्ययेनाद्युदात्तत्वं । महाव्रातः । आन्महत इत्याकारादेशो महतस्तकारस्य । तुविकूर्मिः । करोतेरौणादिको मिप्रत्ययः । गुणे कृतेऽकारस्योत्वं छांदसं । हलि चेति दीर्घः । ऋघावान् । ऋन् हंतीत्यृघाः । अन्येभ्योऽपि दृश्यंत इति विच् । दृशिग्रहणान्नलोपो हकारस्य घत्वं । तदस्यास्तीति मतुबर्थे छंदसीवनिपाविति वनिप् । व्यत्ययेनाद्युदात्तः । क्व । किंशब्दस्य सप्तम्यर्थे किमोऽदित्यत्प्रत्ययः । तस्मिन् क्वातीति क्वादेशः । तित्स्वरः ॥

॥ अथ चतुर्थी ॥

त्वं हि ष्मा च्यावयन्नच्युतान्येको वृत्रा चरसि जिघ्नमानः ।

तव द्यावापृथिवी पर्वतासोऽनु व्रताय निमितेव तस्थुः ॥ ४ ॥

त्वं । हि । स्म । च्यवयन् । अच्युतानि । एकः । वृत्रा । चरसि । जिघ्नमानः ।

तव । द्यावापृथिवी इति । पर्वतासः । अनु । व्रताय । निमिताऽइव । तस्थुः ॥ ४ ॥

हे इंद्र त्वमेकोऽसहाय एवाच्युतानि च्युतिरहितानि दृढमूलान्यपि तव प्रतिपक्षभूतानि रक्षांसि च्यावयन् स्वस्वस्थानात्पातयन् तथा वृत्रा वृत्राणि पापानि जिघ्नमानो हिंसन् चरसि हि स्म । वर्तसे खलु । किंच । एवंविधसामर्थ्योपेतस्य तव व्रताय कर्मण आज्ञायै द्यावापृथिव्यौ पर्वताश्च निमितेव निखाता निश्चला इवानुतस्थुः । तिष्ठंति ॥ स्म । चादित्वादनुदात्तः । च्यावयन् । च्युङ् गतावित्यस्य

ण्यंतस्य शतरि रूपं। णिच्स्वरः। चरसि। चर गतिभक्षणयोः। हियोगादनिघातः। जिघ्नमानः। हन हिंसागत्योरित्यस्य घञर्थे कविधानमिति कः। तस्य छंदस्युभयथेति सार्वधातुकत्वाच्छप्। तस्य श्लुः। बहुलं छंदसीत्यभ्यासस्येत्वं। हंतीति जिघ्नः। आचारार्थे क्विप्। अस्मात्ताच्छील्यार्थे चानश्। शप्। व्यत्ययेनाद्युदात्तत्वं। द्यावापृथिवी। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। निमितेव। डुमिञ् प्रक्षेपण इत्यस्य कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। सुपां सुलुगिति सुपो डादेशः। इवेन विभक्त्यलोप इत्युक्तत्वात्पूर्वपदस्वरः। तस्थुः। ष्ठा गतिनिवृत्तावित्यस्य लिट्युस्यातो लोपे कृते तस्य द्विर्वचनेऽचीति स्थानिवद्भावाद्द्विर्वचनं। निघातः॥

॥ अथ पंचमी ॥

उताभये पुरुहूत श्रवोभिरेको दृळ्हमवदो वृत्रहा सन्।
इमे चिदिंद्र रोदसी अपारे यत्संगृभ्णा मघवन्काशिरित्ते ॥५॥

उत। अभये। पुरुऽहूत। श्रवःऽभिः। एकः। दृळ्हं। अवदः। वृत्रऽहा। सन्।
इमे इति। चित्। इंद्र। रोदसी इति। अपारे इति। यत्। संऽगृभ्णाः। मघऽवन्। काशिः। इत्। ते॥५॥

उतेत्यामंत्रणे। हे इंद्र पुरुहूत पुरुभिर्बहुभिर्यज्वभिराहूत। यद्वा देवैरसुरेभ्यो रक्षार्थं बहुवारमाहूत। श्रवोभिर्वीर्यैरुपेत एकोऽसहायस्त्वं वृत्रहा वृत्रशत्रोर्हंता सन् अभयेऽसुरेभ्यः सकाशान्मा बिभीतेति देवान्प्रति यद्वाक्यमवदोऽवोचस्तद्वाक्यं दृढं। सत्यमेव। किंच। मघवन्निंद्र त्वमपारे चित् दूरपारेऽपीमे रोदसी द्यावापृथिव्यौ यद्यस्मात्कारणात्संगृभ्णाः संगृह्णासि। परस्परमधरोत्तरभावेन संयोजिते करोषीति यावत्। एष ते तव महिमा काशिरित् प्रकाशो लोके प्रसिद्ध एव। यद्वा यत् येन ते रोदसी संगृह्णासि ते तव काशिर्मुष्टिर्महान्। काशिर्मुष्टिः। नि° ६.१.। इति यास्कः॥ अभये। ञिभी भय इत्यस्माद्भाव एरजित्यच्प्रत्ययः। नञा समासे तस्य स्वरः। अवदः। वद व्यक्तायां वाचि। लङि रूपं। निघातः। अपारे। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। संगृभ्णाः। ग्रह उपादाने। क्र्यादित्वात् श्ना। ग्रहिज्यावयीत्यादिना संप्रसारणं। हृग्रहोर्भश्छंदसीति हकारस्य भकारः। इतश्चेति सिप इकारलोपः। बहुलं छंदसीत्यडभावः। समासस्वरः। काशिः। काशृ दीप्तौ। औणादिक इप्रत्ययः। प्रत्ययस्वरः॥

॥ इति तृतीयस्य द्वितीये प्रथमो वर्गः॥

॥ तस्मिन्सूक्ते षष्ठी ॥

प्र सू त इंद्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन्नेतु शत्रून्।
जहि प्रतीचो अनूचः पराचो विश्वं सत्यं कृणुहि विष्टमस्तु ॥ ६॥
प्र। सु। ते। इंद्र। प्रऽवता। हरिऽभ्यां। प्र। ते। वज्रः। प्रऽमृणन्। एतु। शत्रून्।
जहि। प्रतीचः। अनूचः। पराचः। विश्वं। सत्यं। कृणुहि। विष्टं। अस्तु ॥ ६॥

हे इंद्र ते तव हरिभ्यामश्वाभ्यां युक्तो रथः शत्रूनभिलक्ष्य प्रवता प्रवणेन मार्गेण सु सुष्ठु प्रैतु। शीघ्रं गच्छतु। तथा ते वज्रोऽशनिः शत्रूनसुरान्प्रमृणन् हिंसन्प्रैतु। त्वं च प्रतीचस्त्वदाभिमुख्येनागच्छतः शत्रून् जहि। मारय। तथानूचोऽनुगच्छतः पार्ष्णिग्राहानसुरान्पराचः पलायनपरांश्च जहि। एवं शत्रुषु बाधितेषु सत्सु विश्वं जगत्सत्यं कृणुहि। सत्यभूताग्निहोत्रादिकर्मपरं कुरु। एवंविधं सामर्थ्यं त्वयि विष्टं निविष्टमस्तु ॥ प्रवता। प्रशब्दादुपसर्गाच्छंदसि धात्वर्थ इति वतिः। प्रत्ययस्वरः। प्रमृणन्। मृण हिंसायां। जहि। हन हिंसागत्योरित्यस्य लोटि सिपो हिरादेशः। तस्मिन्हंतेर्ज इति जादेशः। अतो हेरिति लुकि प्राप्त आभाच्छास्त्रस्यासिद्धत्वान्निवृत्तिः। हेर्ङित्त्वादंतोदात्तः। प्रतीचः। अंचु गतिपूजनयोः। अंचेश्छंदस्यसर्वनामस्थानमिति विभक्तेरुदात्तत्वं। पराचः। अनिगंतोऽंचतौ वप्रत्यय इति गतेः प्रकृतिस्वरत्वं। कृणुहि। कृवि हिंसाकरणयोः। अस्तु। अस भुवि ॥

॥ अथ सप्तमी ॥

यस्मै धायुरदधा मर्त्यायाभक्तं चिद्भजते गेह्यं१सः।
भद्रा त इंद्र सुमतिर्घृताची सहस्रदाना पुरुहूत रातिः ॥ ७॥
यस्मै। धायुः। अदधाः। मर्त्याय। अभक्तं। चित्। भजते। गेह्यं। सः।
भद्रा। ते। इंद्र। सुऽमतिः। घृताची। सहस्रऽदाना। पुरुऽहूत। रातिः ॥ ७॥

हे इंद्र धायुर्निरंतरमैश्वर्यं दधानस्त्वं यस्मै मर्त्याय मनुष्यायादधा यद्वीर्यं दधासि स मर्त्योऽभक्तं चित् पूर्वमप्राप्तमपि गेह्यं गृहेषु भवं कनकपश्वादिकं भजते। प्राप्नोति। किंच। हे पुरुहूत बहुभिराहूतेंद्र घृताची। घृतशब्दो हविर्मात्रमुपलक्षयति। तथा च सोमाज्यपुरोडाशादिलक्षणं हविरंचति प्राप्नोतीति घृताची ते तव सुमतिः शोभना बुद्धिर्भद्रा। कल्याणकरी। तथा तव रातिर्धनशक्तिः

सहस्रदाना। अपरिमितधनदानसमेता। इंद्रस्य बहुदातृत्वे मंत्रवर्णः। भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर। ऋग्वे० ४.३२.२०.। इति ॥ धायुः। दधातेरौणादिक उण्प्रत्ययः। अदधाः। दधातेर्लङि रूपं। यद्वृत्तयोगादनिघातः। मर्त्याय। मर्त एव मर्त्यः। वस्वादिषु पाठात् स्वार्थिको यत्। यतोऽनाव इत्याद्युदात्तत्वं। गेह्यं। गेहशब्दात्तत्र भव इत्यर्थे भवे छंदसीति यत्। तित्स्वरितः। सुमतिः। मंत्रे वृषेत्यादिना मतिशब्दोंऽतोदात्तः। समासे कृदुत्तरपदस्वरः। रातिः। रा दाने। मंत्रे वृषेत्यादिना क्तिन्नुदात्तः ॥

॥ अथाष्टमी ॥

सहदानुं पुरुहूत क्षियंतमहस्तमिंद्र सं पिणक्कुणारुं।
अभि वृत्रं वर्धमानं पियारुमपादमिंद्र तवसा जघंथ ॥ ८॥
सहऽदानुं। पुरुऽहूत। क्षियंतं। अहस्तं। इंद्र। सं। पिणक्। कुणारुं।
अभि। वृत्रं। वर्धमानं। पियारुं। अपादं। इंद्र। तवसा। जघंथ ॥ ८॥

हे पुरुहूतेंद्र त्वं सहदानुं। दानुर्दानवी वृत्रमाता तया सह वर्तमानं। तथा च मंत्रवर्णः। दानुः शये सहवत्सा। ऋग्वे० १.३२.९.। इति। सहदानुं दानुभिर्दानवैः सह वर्तत इति सहदानुः। तं क्षियंतं बाधमानं कुणारुं क्वणनशीलं कंचिदसुरमहस्तं हस्तहीनं कृत्वा सं पिणक्। सम्यक् चूर्णीकुरु। किंच। हे इंद्र वर्धमानं सर्वत इषुमात्रं वर्धमानं। स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धतेति श्रुतेः। पियारुं हिंस्रं वृत्रं वृत्रासुरमपादं पादहीनं कृत्वा तवसा बलेनाभिजघंथ। हतवानसि। यद्वा सहदानुमुदकदानोपेतं क्षियंतमाकाशे निवसंतं कुणारुं गर्जंतं वृत्रं। वृणोत्याच्छादयति नभ इति वृत्रो मेघः। तमिमं वर्धमानं मेघं हस्तपादशून्यं कृत्वा संपिणक्। संपिंढि। तथा च यास्कः। अहस्तमिंद्र कृत्वा संपिंढि परिक्वणनं मेघं। नि० ६.१.। इति ॥ सहदानुं। दो अवखंडने। दाभाभ्यां नुरिति नुप्रत्ययः। द्यतीति दानुर्दानवः। यद्वा दानुर्दानं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। क्षियंतं। क्षि निवासगत्योः। तुदादित्वाच्छः। प्रत्ययस्वरः। पिणक्। पिषॢ संचूर्णने। रुधादित्वात् श्नं। हेर्लुक् षकारस्य ककारश्छांदसः। कुणारुं। कुण शब्दने। बाहुलकाद्रूपसिद्धिः। आद्युदात्तः। जघंथ। हन हिंसागत्योरित्यस्य लिटि थलि रूपं। अभ्यासाच्चेति धातुहकारस्य घत्वं। निघातः। उपदेशेऽत्वत इतीट्प्रतिषेधः ॥

॥ अथ नवमी ॥

नि सा॑म॒नामि॑षि॒रामि॑द्र॒ भूमिं॑ म॒हीम॑पा॒रां सद॑ने ससत्थ ।
अस्त॑भ्नाद्द्यां वृ॑ष॒भो अ॒न्तरि॑क्ष॒मर्ष॒न्त्वापस्त्वये॒ह प्रसू॑ताः ॥ ९ ॥
नि । सा॒म॒नां । इ॒षि॒रां । इ॒न्द्र॒ । भूमि॑ं । म॒हीं । अ॒पा॒रां । सद॑ने । स॒स॒त्थ॒ ।
अस्त॑भ्नात् । द्यां । वृ॒ष॒भः । अ॒न्तरि॑क्षं । अर्ष॑न्तु । आप॑ः । त्वया॑ । इ॒ह । प्रऽसू॑ताः ॥ ९ ॥

हे इंद्र महीं महतीमत एवापारामिषिरां स्थानाभावेन चलंतीं एवंविधां भूमिं सामनां समानां। तथा च मंत्रवर्णः। गावौ ते सामनावितः। ऋग्वे॰ १०. ८५.११.। इति। यद्वा सम एव साम। तथा च शतपथे श्रूयते। यदेव समः प्लुषिणा समो मशकेन समो नागेन सम एतैस्त्रिभिर्लोकैस्तस्मादेव सामेति। तदस्यास्तीति सामना। तां साम्यवतीं कृत्वा सदने स्वे स्थाने निषसत्थ। निवेशयामासिथ। तथा वृषभोऽभिमतफलानां वर्षक इंद्रो द्यां द्युलोकमस्तभ्नात्। यथा न पतति तथाधारयत्। तथांतरिक्षं। एवं द्यावापृथिव्योरवस्थितौ सत्यां त्वया प्रसूता मेघभेदनेन प्रेरिता आप इह भूमावर्षंतु। आगच्छंतु। तथा च मंत्रवर्णः। यः पृथिवीं व्यथमानामदृंहत्। ऋग्वे॰ २.१२.२.। इति ॥ सामनां। सम एव साम। तदस्यास्तीति मतुबर्थे पामादित्वान्नप्रत्ययः। प्रत्ययस्वरः। इषिरां। इष गतौ। इषिमदीत्यादिना। उ॰ १.५१.। किरच्प्रत्ययः। कित्त्वादगुणः। चित्स्वरः। ससत्थ। षद्लृ विशरणगत्यवसादनेष्वित्यस्यांतर्भावितण्यर्थस्य लिटि थल्युपदेशेऽत्वत इतीट्प्रतिषेधः। निघातः। अस्तभ्नात्। स्तंभु स्तंभन इति सौत्रो धातुः। स्तंभुस्तुंभित्यादिना श्नाप्रत्ययः। श्नान्नलोप इति धातुनकारलोपः। अडागमस्वरः। अर्षंतु। ऋषी गतौ। व्यत्ययेन शप्प्रत्ययः। गुणः। पादादित्वादनिघातः। आपः। आप्लृ व्याप्तौ। क्विप् धातोर्ह्रस्वश्च। जस्यसृन्तृजित्यादिना दीर्घः। जसः सुप्त्वादनुदात्तत्वे धातुस्वरः। प्रसूताः। षू प्रेरण इत्यस्य कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥

॥ अथ दशमी ॥

अ॒ला॒तृ॒णो व॒ल इ॑न्द्र व्र॒जो गोः पु॒रा हन्तो॒र्भय॑मानो॒ व्यार ।
सु॒गान्प॒थो अ॑कृणोन्नि॒रजे॒ गाः प्राव॒न्वाणीः॑ पुरुहू॒तं धम॑न्तीः ॥ १० ॥

अलातृणः। वलः। इंद्र। व्रजः। गोः। पुरा। हंतोः। भयमानः। वि। आर।
सुऽगान्। पथः। अकृणोत्। निःऽअजे। गाः। प्र। आवन्। वाणीः। पुरुऽहूतं।
धमंतीः ॥१०॥

हे इंद्र अलातृणः। बहूदकतयालमत्यर्थमातृद्यते हिंस्यत इत्यलातृणः। गोर्माध्यमिकाया वाचो व्रजो गोष्ठभूतो वलः। वृणोत्याकाशमिति वलो मेघः। पुरा हंतोस्तव वज्रप्रहारात् प्राक् भयमानो बिभ्यद्व्यार। विश्लिष्टो बभूव। अनंतरं स इंद्रो गा अपो निरजे निर्गमयितुं सुगान् सुगमान् पथो मार्गानकृणोत्। अकरोत्। अतो वाणीर्वननीया धमंतीः शब्दायमानास्ता आपः पुरुहूतं बहुभिराहूतं पार्थिवमुदकं प्रति प्रावन्। अभ्यागच्छन्। एतामृचं यास्क एवं व्याख्यत्। अलातृणो वल इंद्र व्रजो गोः। अलातृणोऽलमातर्दनो मेघो वलो वृणोतेर्व्रजो व्रजत्यंतरिक्षे गोरेतस्या माध्यमिकाया वाचः पुरा हननाद्भयमानो व्यार। सुगान्पथो अकृणोन्निरजे गाः। सुगमनान्पथोऽकरोन्निर्गमनाय गवां। प्रावन्वाणीः पुरुहूतं धमंतीः। आपो वा वहनाद्वाचो वा वदनाद्बहुभिराहूतमुदकं भवति। धमतिर्गतिकर्मा। नि॰ ६. २.॥ अलातृणः। तृहि हिंसायां। अलंपूर्वात्तृहेर्घञर्थे कविधानमिति कर्मणि कप्रत्ययः। अलमो मकारस्याकारः। समासस्वरः। वलः। वल संवरणे। वल्यत आच्छाद्यते नभोऽनेनेति वलो मेघः। पुंसि संज्ञायामिति घः। प्रत्ययस्वरः। व्रजः। व्रज गतौ। गोचरसंचरेत्यादिना। पा॰ ३. ३. ११९.। घप्रत्ययांतत्वेन निपातनात्कुत्वाभावः। व्रजत्यंतरिक्ष इति। प्रत्ययस्वरः। भयमानः। ञिभी भये। व्यत्ययेन शप्। आर। ऋ गतावित्यस्य लिटि णलि रूपं। निघातः। सुगान्। गम्लृ गतावित्यस्मादधिकरणे सुदुरोरधिकरण इति डप्रत्ययः। डित्त्वाट्टिलोपः। कृत्स्वरः। निरजे। अज गतिक्षेपणयोरित्यस्मात्संपदादिलक्षणो भावे क्विप्। कृदुत्तरस्वरः। आवन्। अव रक्षणगत्यादिष्वित्यस्य लङि रूपं। पुरुहूतं। ह्वयतेर्निष्ठायां यजादित्वात्संप्रसारणं। हल इति दीर्घः। थाथादिस्वरः। धमंतीः। ध्मा शब्दे। शपि पाघ्रेत्यादिना धमादेशः। वा छंदसीति जसः सवर्णदीर्घः। शतुर्लसार्वधातुकस्वरे कृते धातुस्वरः॥

॥ इति तृतीयस्य द्वितीये द्वितीयो वर्गः॥

॥ अथ तस्मिन्सूक्त एकादशी ॥

एको द्वे वसुमती समीची इंद्र आ पप्रौ पृथिवीमुत द्यां ।

उतांतरिक्षादभि नः समीक इषो रथीः सयुजः शूर वाजान् ॥ ११ ॥

एकः । द्वे इति । वसुमती इति वसुऽमती । समीची इति संऽईची । इंद्रः । आ । पप्रौ । पृथिवी । उत । द्यां ।

उत । अंतरिक्षात् । अभि । नः । संऽईके । इषः । रथीः । सऽयुजः । शूर । वाजान् ॥ ११ ॥

योऽयमिंद्र एकोऽसहाय एव सन् पृथिवीमुत अपि च द्यां द्वे एते द्यावापृथिव्यौ समीची परस्परसंगते वसुमती धनयुक्ते सत्यावा पप्रौ समंतात्पूरयामास उत अपि च हे शूर सामर्थ्योपेत तादृशस्त्वं रथी रथवान् स नोऽस्माकं समीके समीप इषः स्यातुमिच्छन् सयुजः संगतान्वाजान् । वजंति गच्छंतीति वाजा अश्वाः । तानश्वानंतरिक्षादंतरिक्षसकाशात् अभि प्रेरय । रथारूढस्त्वमस्मत्समीपं शीघ्रमागच्छेति भावः ॥ वसुमती । वा छंदसीति पूर्वसवर्णदीर्घः । पप्रौ । प्रा पूरण इत्यस्य लिटि णलि आत औ णल इत्यौकारः । निघातः । इषः । इषु इच्छायां । अस्मादिगुपधलक्षणः कः । कित्त्वादगुणः । प्रत्ययस्वरः । रथीः । रथोऽस्यास्तीति मतुबर्थे छंदसीवनिपाविति ईप्रत्ययः । प्रत्ययस्वरः ॥

॥ अथ द्वादशी ॥

दिशः सूर्यो न मिनाति प्रदिष्टा दिवेदिवे हर्यश्वप्रसूताः ।

सं यदानळध्वन आदिदश्वैर्विमोचनं कृणुते तत्त्वस्य ॥ १२ ॥

दिशः । सूर्यः । न । मिनाति । प्रऽदिष्टाः । दिवेऽदिवे । हर्यश्वऽप्रसूताः ।

सं । यत् । आनट् । अध्वनः । आत् । इत् । अश्वैः । विऽमोचनं । कृणुते । तत् । तु । अस्य ॥ १२ ॥

हर्यश्वप्रसूताः । हरी अश्वौ यस्यासाविति हर्यश्व इंद्रः । तेन प्रेरिता दिशः प्रागादयो दिवे दिवे प्रतिदिवसं प्रदिष्टाः सूर्यस्य गमनार्थं दत्ता या दिशो विद्यंते ताः सूर्यो न मिनाति । न हिनस्ति । किंतु ताभिरेव व्रजति । यद्यदा सूर्योऽध्वनो गंतव्यान्प्रदेशानश्वैर्गमनसाधनभूतैः समानट् सम्यगश्नुते आदित् अनंतरमेव विमोचनं कृणुते । अश्वानां विमोचनं कुरुते । तदेतत्सर्वं कर्मास्य । तवैव खलु । तु प्रसिद्धौ ॥ सूर्यः । षू प्रेरण इत्यस्मात्सुसूधागृधिभ्यः क्रन्निति क्रन्प्रत्ययः ।

सुवति प्रेरयतीति सूर आदित्यः। सूर एव सूर्यः। वस्वादित्वात्स्वार्थिको यत्। यतोऽनाव इत्याद्युदात्तत्वं। मिनाति। मीञ् हिंसायां। मीनातेर्निगम इति ह्रस्वः। हर्यश्वप्रसूताः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। आनट्। अशू व्याप्तावित्यस्य बहुलं छंदसीति लङः म्लुः। अश्नोतेश्चेति नुडागमः। व्रश्चादिना षत्वं। यद्योगादनिघातः॥

॥ अथ त्रयोदशी ॥

दिदृक्षंत उषसो यामन्नक्तोर्विवस्वत्या महि चित्रमनीकं।

विश्वे जानंति महिना यदागादिंद्रस्य कर्म सुकृता पुरूणि ॥१३॥

दिदृक्षंते। उषसः। यामन्। अक्तोः। विवस्वत्याः। महि। चित्रं। अनीकं।

विश्वे। जानंति। महिना। यत्। आ। अगात्। इंद्रस्य। कर्म। सुऽकृता। पुरूणि ॥१३॥

विश्वे सर्वे जना विवस्वत्या विवासनवत्या निर्गमनपराया अक्तो रात्रेः संबंधिन उषसो यामन् यामनि निर्गमने सति महि महत् चित्रं चायनीयमनीकं सौरं तेजो दिदृक्षंते। द्रष्टुमिच्छंति। यद्यदा आगात् उषःकालः समंतादागातो व्यपैति तदा तेजो दिदृक्षमाणाः सर्वे जना महिना महनीयान्यग्निहोत्रादीनि कर्माणि जानंति। कर्तव्यतयावबुध्यंते। हे इंद्र पुरूणि बहूनि सुकृता सुष्ठु कृतानि कर्म कर्माणींद्रस्य तवैव॥ दिदृक्षंते। दृशिर् प्रेक्षण इत्यस्य सनि ज्ञाश्रुस्मृदृशां सनः। पा० १.३.५७.। इत्यात्मनेपदं। अभ्यस्तस्वरः। विवस्वत्याः। विवासतेः संपदादिलक्षणः क्विप्। व्यत्ययेनोपधाह्रस्वत्वं। तस्मात्तदस्यास्तीति मतुप्। मादुपधाया इति तस्य वत्वं। मतुपः पित्त्वादनुदात्तत्वे धातुस्वरः। जानंति। ज्ञा अवबोधने। ज्ञाजनोर्जेति जादेशः। निघातः। अगात्। इण् गतावित्यस्य लुङि रूपं। यद्योगादनिघातः। सुकृता। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥

॥ अथ चतुर्दशी ॥

महि ज्योतिर्निहितं वक्षणास्वामा पक्वं चरति बिभ्रती गौः॥

विश्वं स्वाद्म संभृतमुस्रियायां यत्सीमिंद्रो अदधाद्भोजनाय ॥१४॥

महि। ज्योतिः। निऽहितं। वक्षणासु। आमा। पक्वं। चरति। बिभ्रती। गौः।

विश्वं। स्वाद्म। संऽभृतं। उस्रियायां। यत्। सीं। इंद्रः। अदधात्। भोजनाय ॥१४॥

वक्षणासु। वक्ष्यंते यासूदकानीति वक्षणा नद्यः। तासु महि महत् ज्योतिर्ज्योतिष्मदुदकं निहितमिंद्रेनामा नवसूतिका गौः पक्वं क्षीरादिकं बिभ्रती दधाना सती चरति। सर्वत्र वर्तते। यद्यस्मादुदकात्स्वाद्म स्वादुतरं संभृतं स्वेन संपादितं दधिघृतक्षीरादिकं सीमेतद्विश्वं सर्वमुस्रियायां गवि भोजनायेंद्रोऽदधात्। तस्मात्क्षीरादिकं बिभ्रती गौश्चरतीति पूर्वेणान्वयः॥ वक्षणासु। वक्ष रोषे। अस्मात्करणाधिकरणयोश्चेति करणे ल्युट्। लित्स्वरः। पक्वं। पचतेर्निष्ठातकारस्य पचो व इति वत्वं। प्रत्ययस्वरः। चरति। चरतिर्गत्यर्थः। बिभ्रती। डुभृञ् धारणपोषणयोः। जुहोत्यादिः। शतुरुगित्त्वादुगितश्चेति ङीप्। अभ्यस्तानामादिरित्याद्युदात्तत्वं। उस्रियायां। वस निवासे। स्फायितंचीत्यादिनाधिकरणे रक्प्रत्ययः। यजादित्वात्संप्रसारणं। शासिवसिघसीनां चेति षत्वाभावश्छांदसः। स्वार्थिको घप्रत्ययः। प्रत्ययस्वरः॥

॥ अथ पंचदशी ॥

इंद्र दृह्य यामकोशा अभूवन्यज्ञाय शिक्ष गृणते सखिभ्यः।
दुर्मायवो दुरेवा मर्त्यासो निषंगिणो रिपवो हंत्वासः॥१५॥
इंद्र। दृह्य। यामऽकोशाः। अभूवन्। यज्ञाय। शिक्ष। गृणते। सखिऽभ्यः।
दुःऽमायवः। दुःऽएवाः। मर्त्यासः। निषंगिणः। रिपवः। हंत्वासः॥१५॥

हे इंद्र दृह्य। दृढो भव। यतो यामकोशाः। यांत्यस्मिन्निति यामो मार्गः। तस्य कोशाः कोशवदाच्छादका मार्गप्रतिबंधका राक्षसा अभूवन्। त्वं यज्ञाय यज्ञकर्त्रे गृणते स्तोत्रं कुर्वते यजमानाय सखिभ्यः पुत्रादिभ्यश्च शिक्ष। अपेक्षितं फलं दत्स्व। दुर्मायवः। दुष्टमायुधानि मिन्वंति प्रक्षिपंतीति दुर्मायवः। दुरेवा दुष्टं गच्छंतो मर्त्यासो मारयितारो निषंगिणः। निषंगशब्देनेषुधिरभिधीयते। तद्वंतः। एवंविधसामर्थ्योपेता रिपवः शत्रवो राक्षसा हंत्वासः। त्वया हननीयाः॥ दृह्य। दृह दृहि वृह वृहि वृद्धौ। व्यत्ययेन श्यन्। लोटि रूपं। नित्स्वरः। अभूवन्। भू सत्तायां। अस्य लुङि रूपं। गातिस्थेति सिचो लुक्। भूसुवोस्तिङीति गुणे प्रतिषिद्धे भुवो वुग्लुङ्लिटोरिति वुगागमः। निघातः। शिक्ष। शिक्ष विद्योपादाने। अयं धातुरत्र दाने वर्तते। व्यत्ययेन परस्मैपदं। निघातः। दुर्मायवः। मिनोतेः कृवापाजिमीत्यादिना उण्प्रत्ययः। कृदुत्तरपदस्वरः। दुरेवाः। इण् गतौ। इण्शीङ्भ्यां वन्निति कर्तरि वन्प्रत्ययः। रिपवः। रपेरित्वोपधाया इत्युप्रत्ययः।

उपधाया इत्वं। प्रत्ययस्वरः। हंत्वासः। हन हिंसागत्योः। कृत्यार्थे तवैकेन्केन्यत्वन इति त्वन्। नित्त्वादाद्युदात्तः॥

॥ इति तृतीयस्य द्वितीये तृतीयो वर्गः॥

॥ अथ तस्मिन्सूक्ते षोडशी ॥

सं घोषः शृण्वेऽवमैरमित्रैर्जही न्येष्वशनिं तपिष्ठां।

वृश्चेमधस्ताद्वि रुजा सहस्व जहि रक्षो मघवन्रंधयस्व ॥१६॥

सं। घोषः। शृण्वे। अवमैः। अमित्रैः। जहि। नि। एषु। अशनिं। तपिष्ठां।

वृश्च। ईं। अधस्तात्। वि। रुज। सहस्व। जहि। रक्षः। मघऽवन्। रंधयस्व ॥१६॥

हे इंद्र अवमैः समीपे वर्तमानैरमित्रैः शत्रुभिरसुरैरुत्सृष्टो योऽशनिर्घोषो घुष्यमाणः सं शृण्वे सम्यगस्माभिः श्रूयते तपिष्ठामतिशयेन तापिकां तामशनिमेषु शत्रुष्वेव निधाय जहि। मारय। तैः प्रयुक्तामशनिं तानेव प्रापयेति भावः। ईमेनान् शत्रून् अधस्तान्मूलतो वृश्च। छिंधि। किंच वि रुज। तान्विशेषेण बाधस्व। सहस्व। अभिभव च। हे मघवन्निंद्र रक्षः कर्मविघ्नकारीणि रक्षांसि जहि। मारय। अनंतरमिमं यज्ञं रंधयस्व। पारं नय॥ शृण्वे। निघातः। जहि। हन हिंसागत्योः। अस्य लोटि रूपं। अशनिं। अशू व्याप्तौ। अश्यवितृभ्योऽनिरित्यनिप्रत्ययः। प्रत्ययस्वरः। तपिष्ठां। तप्तृशब्दादिष्ठन्प्रत्ययः। नित्स्वरः। वृश्च। ओव्रश्चू छेदने। तुदादिः। ग्रहिज्यादिना संप्रसारणं। सहस्व। वाक्यभेदादनिघातः। रंधयस्व। रध हिंसासंराद्ध्योरित्यस्य ण्यंतस्य लोटि रधिजभोरचीति नुडागमः। वाक्यभेदादनिघातः॥

॥ अथ सप्तदशी ॥

उद्वृह रक्षः सहमूलमिंद्र वृश्चा मध्यं प्रत्यग्रं शृणीहि।

आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य ॥१७॥

उत्। वृह। रक्षः। सहऽमूलं। इंद्र। वृश्च। मध्यं। प्रति। अग्रं। शृणीहि।

आ। कीवतः। सललूकं। चकर्थ। ब्रह्मऽद्विषे। तपुषिं। हेतिं। अस्य ॥१७॥

हे इंद्र रक्षः कर्मविघ्नकारि रक्षो रक्षःकुलं सहमूलं मूलसहितं यथा भवति तथोद्वृह। उद्धर। किंच। मध्यं तस्य मध्यभागं वृश्च। छिंधि। प्रत्यग्रमग्रं

प्रत्यागतं तत् शृणीहि। जहि। तस्य रक्षःकुलस्य मध्ये सललूकं सरणशीलं रक्ष आ कीवतः। आङ् मर्यादायां। कियतोऽनिर्ज्ञायमानपरिमाणादतिदूराद्देशाच्चकर्थ। कुरु। कृत्वा च ब्रह्मद्विषे ब्राह्मणद्वेषकारिणे तस्मै रक्षसे तपुषिं तापकं हेतिं घातकमायुधमस्य। क्षिप। उक्तमर्थं यास्कोऽब्रवीत्। उद्धर रक्षः सहमूलमिंद्र। मूलं मोचनाद्वा मोषणाद्वा मोहनाद्वा। वृश्च मध्यं प्रति शृणीह्यग्रं। अग्रमागतं भवति। आ कियतो देशात्सललूकं संलुब्धं भवति पापकमिति नैरुक्ताः सररूकं वा स्यात्सर्तेरभ्यस्तात्। तपुषिस्तपतेर्हेतिर्हंतेः। नि० ६.३.। इति॥ वृह। वृहू उद्यमन इत्यस्य लोटि रूपं। शृणीहि। शॄ हिंसायां। अस्य लोटि हौ ई हल्यघोरितीत्वं। निघातः। कीवतः। किंशब्दात्किं परिमाणमस्येत्यर्थे किमिदंभ्यां वो घ इति किंशब्दाद्वतुबस्तीति ज्ञातत्वाद्वतुब्वादेशाभावश्छांदसः। इदंकिमोरीश्की इति की इत्यादेशः। सललूकं। सृ गतौ। छांदसी रूपसिद्धिः। चकर्थ। डुकृञ् करण इत्यस्य लिटि थलि रूपं। ऋादित्वादिडभावः। निघातः। तपुषिं। तप संताप इत्यस्मादर्तिपृवपियजितनिधनितपिभ्यो निदित्युसिप्रत्ययो निच्च। अकारस्य इकारश्छांदसः। नित्स्वरः। हेतिं। हन हिंसागत्योः। ऊतियूतिजूतिसातीत्यादिना निपातनादंतोदात्तः। अस्य। असु क्षेपणे। लोटि रूपं॥

॥ अथाष्टदशी ॥

स्वस्तये वाजिभिश्च प्रणेतः सं यन्महीरिष आसत्सि पूर्वीः।
रायो वंतारो बृहतः स्यामास्मे अस्तु भग इंद्र प्रजावान्॥१८॥

स्वस्तये। वाजिऽभिः। च। प्रनेतरिति प्रऽनेतः। सं। यत्। महीः। इषः। आऽसत्सि। पूर्वीः।
रायः। वंतारः। बृहतः। स्याम। अस्मे इति। अस्तु। भगः। इंद्र। प्रजाऽवान्॥१८॥

प्रणेतः प्रकर्षेण जगतो निर्वाहक हे इंद्र अस्मान्वाजिभिरश्वैः सहितान् कुरु। स्वस्तये चाविनाशाय कुरु। यदा त्वं समासत्सि अस्माकं समीपे यज्ञनिर्वाहार्थमासीदसि तदा वयं महीर्महांतीषोऽन्नानि पूर्वीः प्रभूतानि रायो धनानि वंतारस्तेषां संभक्तारः संतो बृहतो महांतः स्याम। भवेम। किंच प्रजावान् अपत्योपेतं भगो धनमस्मे अस्मास्वस्तु। भवतु॥ आसत्सि। षद्लृ विशरणादिषु। बहुलं छंदसीति शपो लुक्। यद्योगादनिघातः। इषो राय इति च द्वे षष्ठ्यर्थे द्वितीये। वंतारः। वन षण संभक्तावित्यस्य तृचि आगमानुशासनस्यानित्यत्वा-

दिङ्भावः। चित्स्वरः। स्याम। अस भुवीत्यस्य लिङि रूपं। अस्मे। अस्मच्छब्दस्य सप्तम्याः सुपां सुलुगिति शे इत्यादेशः ॥

॥ अथैकोनविंशी ॥

आ नो भर भगमिंद्र द्युमंतं नि ते देष्णस्य धीमहि प्ररेके।
ऊर्व इव पप्रथे कामो अस्मे तमा पृण वसुपते वसूनां ॥१९॥
आ। नः। भर। भगं। इंद्र। द्युऽमंतं। नि। ते। देष्णस्य। धीमहि। प्रऽरेके।
ऊर्वःऽइव। पप्रथे। कामः। अस्मे इति। तं। आ। पृण। वसुऽपते। वसूनां ॥१९॥

हे इंद्र नोऽस्मदर्थं द्युमंतं दीप्तियुक्तं भगं धनमाभर। आ समंतात्संभर। देष्णस्य दानशीलस्य ते तव संबंधिनो धनस्य प्ररेके प्रेरचने दाने निधीमहि। धनदानस्य वयं पात्रभूता स्म इत्यर्थः। कुत इत्यत आह। अस्मे अस्माकं कामोऽभिलाष ऊर्व इव अनवाप्तकामो वडवानल इव पप्रथे। प्रभूतो वर्तते। वसूनां वसुपते धनानां मध्य उत्तमधनानामधिपते हे इंद्र तं महांतं काममापृण। बहुधनप्रदानेनापूरय ॥ भर। भृञ् भरण इत्यस्य लोटि रूपं। देष्णस्य। डुदाञ् दाने। गादाभ्यामिष्णजितीष्णच्प्रत्ययः। अत्यर्थं ददातीति देष्णः। चित्स्वरः। धीमहि। दधातेर्लिङि बहुलं छंदसीति शपो लुक्। छंदस्युभयथेति महिङः सार्वधातुकत्वात्सीयुटः सलोपः। आर्द्धधातुकत्वादातो लोपः। निघातः। ऊर्व इव। पूर्वपदस्वरः। पप्रथे। प्रथ प्रख्यान इत्यस्य लिटि रूपं। पृण। पृण प्रीणन इत्यस्य लोटि सेर्हिः। तुदादिः। अतो हेरिति हेर्लुक्। वसूनां। नित्त्वादाद्युदात्तः ॥

॥ अथ विंशी ॥

इमं कामं मंदया गोभिरश्वैश्चंद्रवता राधसा पप्रथश्च।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इंद्राय वाहः कुशिकासो अक्रन् ॥२०॥
इमं। कामं। मंदय। गोभिः। अश्वैः। चंद्रऽवता। राधसा। पप्रथः। च।
स्वःऽयवः। मतिऽभिः। तुभ्यं। विप्राः। इंद्राय। वाहः। कुशिकासः। अक्रन् ॥२०॥

हे इंद्र इमं धनादिविषयं काममस्मदीयमभिलाषं गोभिरग्निहोत्रादिकर्मसाधनभूतैर्गवादिभिर्वाहनसाधनभूतैरश्वैश्च चंद्रवता दीप्तियुक्तेन राधसा धनेन च मंदय। एतानि दत्वेममभिलाषं पूरय। किंच। एतैरस्मान्पप्रथः। प्रथितांश्च

कुरु। पश्चात्स्वर्येवः स्वर्गादिसुखमात्मन इच्छंतो विप्राः कर्मकुशलाः कुशिकासः कुशिका मतिभिर्मननीयैर्मंत्रैर्वाहः स्तोत्रमिंद्राय तुभ्यमक्रन्। अकार्षुः ॥ मंदय। मदि स्तुत्यादिष्वित्यस्य लोटि रूपं। गोभिः। सावेकाच इति विभक्तेरुदात्तत्वे प्राप्ते न गोश्वन्सावर्णेत्यादिना प्रतिषेधः। प्रकृतिस्वरः। पप्रथः। प्रथ प्रख्याने। क्विप्। छंदस्युभयथेति तस्य सार्वधातुकत्वात् शप्। तस्य बहुलं छंदसीति श्लुः। धातुस्वरः। अक्रन्। करोतेर्लुङि मंत्रे घसह्वरेत्यादिना लुक्। निघातः ॥

॥ अथैकविंशी ॥

आ नो गोत्रा दर्दृहि गोपते गाः सम॒स्मभ्यं॑ स॒नयो॑ यंतु॒ वाजाः॑।

दि॒वक्षा॑ असि वृषभ स॒त्यशु॑ष्मो॒ऽस्मभ्यं॑ सु म॑घवन्बोधि गो॒दाः ॥२१॥

आ। नः। गो॒त्रा। द॒र्दृ॒हि। गो॒ऽप॒ते। गाः। सं। अ॒स्मभ्यं॑। स॒नयः॑। यं॒तु। वाजाः॑।

दि॒वक्षाः॑। अ॒सि॒। वृ॒ष॒भ॒। स॒त्यऽशु॑ष्मः। अ॒स्मभ्यं॑। सु। म॒घ॒ऽव॒न्। बो॒धि॒। गो॒ऽदाः ॥२१॥

गोपते गवां पते स्वर्गाधिपते हे इंद्र नोऽस्मदर्थं गोत्रा गोत्राण्यभ्राणि गा अपः प्रत्या दर्दृहि। आद्रियस्व। अभ्राणि विदार्य जलानि प्रापयेत्यर्थः। ततः सनयः संभजनीयानि वाजा अन्नान्यस्मभ्यमस्मदर्थं संयंतु। समागच्छंतु। वृषभ कामानां वर्षितर्हे इंद्र त्वं दिवक्षा असि। दिवं व्याप्य वर्तमानत्वेन महानसि। अत एव सत्यशुष्मः सत्यसामर्थ्यो मघवन् धनवन् हे इंद्र अस्मभ्यं गोदा गवां प्रदाता भवामीति सु बोधि। सुष्ठु बुध्यस्व ॥ दर्दृहि। दृङ् आदरे। यङ्लुकि लोटि रूपं। ऋतश्च। पा॰ ७.४.९२.। इत्यभ्यासस्य रुगागमः। निघातः। गाः। औतोऽम् शसोः। पा॰ ६.१.९३.। इत्योकारस्याकारः। एकादेशस्वरः। अस्मभ्यं। भ्यसो भ्यमिति चतुर्थीबहुवचनस्य भ्यमादेशः। यंतु। इण् गतौ। लोटि रूपं। दिवक्षाः। अक्षू व्याप्तौ। असुन्। दिवं व्याप्नोतीति दिवक्षाः। कृदुत्तरपदस्वरः। गोदाः। डुदाञ् दान इत्यस्माद्विच्। कृदुत्तरपदस्वरः ॥

॥ अथ द्वाविंशी ॥

शु॒नं हु॑वेम म॒घवा॑नमिंद्रम॒स्मिन्भरे॒ नृत॑मं॒ वाज॑सातौ।

शृ॒ण्वंत॑मु॒ग्रमू॒तये॑ स॒मत्सु॒ घ्नंतं॑ वृ॒त्राणि॑ सं॒जितं॒ धना॑नां ॥२२॥

शु॒नं। हु॒वे॒म॒। म॒घऽवा॑नं। इंद्रं॑। अ॒स्मिन्। भरे॑। नृऽत॑मं। वाज॑ऽसातौ।

शृ॒ण्वंतं॑। उ॒ग्रं। ऊ॒तये॑। स॒मत्ऽसु। घ्नंतं॑। वृ॒त्राणि॑। सं॒ऽजितं॑। धना॑नां ॥२२॥

हे इंद्र वाजसातौ। वाजस्यान्नस्य सातिर्लाभो यस्मिन् सोऽयं वाजसातिः। तस्मिन्भरे। बिभ्रति जयलक्ष्मीमनेन योद्धार इति भरः संग्रामः। तस्मिन्संग्रामे शुनं शूनमुत्साहेन प्रवृद्धं। यद्वा शुनमिति सुखनाम। सुखकरं मघवानं धनवंतं अत एवेद्रं निरतिशयैश्वर्यसंपन्नं नृतमं सर्वस्य जगतोऽतिशयेन नेतारं त्वां हुवेम। कुशिका वयं यज्ञार्थमाह्वयेम। तथा शृखंतमस्माभिः क्रियमाणां स्तुतिं शृखंतमुग्रं शत्रूणां भयंकरं समत्सु संग्रामेषु वृत्राणि वृत्रोपलक्षितानि सर्वाणि रक्षांसि घ्नंतं हिंसंतं धनानां शत्रुसंबंधिनां संजितं सम्यग्जेतारं त्वामूतये रक्षणाय वयमाह्वयेम ॥ शुनं। टुओश्वि गतिवृद्ध्योरित्यस्य निष्ठायां यस्य विभाषेतीट्प्रतिषेधः। यजादित्वात्संप्रसारणं। दीर्घाभावश्छांदसः। प्रत्ययस्वरः। हुवेम। ह्वयतेर्बहुलं छंदसीति संप्रसारणे कृते शपो लुकि कृते च लिङि रूपं। निघातः। भरे। भृञ् भरणे। घः। वृषादित्वादाद्युदात्तः। वाजसातौ। षणु दाने। भावे क्तिन्। जनसनेत्यादिनानुनासिकस्यात्वं। बहुव्रीहौ पूर्वपदस्वरः। समत्सु। अद भक्षणे। संपूर्वात् क्विप्। संभक्षयंति योद्धॄणामायूंषीति समदः संग्रामाः। कृदुत्तरपदस्वरः। घ्नंतं। हन हिंसागत्योरित्यस्य शतरि गमहनेत्यादिनोपधालोपः। हो हंतेरिति घत्वं। संजितं। जि जये। क्विप् ॥

॥ इति तृतीयस्य द्वितीये चतुर्थो वर्गः ॥

शासद्वह्निरिति द्वाविंशत्यृचं द्वितीयं सूक्तं। अत्रानुक्रमणिका। शासत् कुशिको विश्वामित्र एव वा श्रुतेरिति। इषीरथस्य पुत्रः कुशिको विश्वामित्र एव वा ऋषिः। इंद्रो देवता। त्रिष्टुप् छंदः॥ चातुर्विंशिकेऽहनि माध्यंदिने सवनेऽच्छावाकशस्त्र आरंभणीयाया ऊर्ध्वमहीनसूक्तसंज्ञकमेतत्सूक्तं शंसनीयं। सूचितं च। अस्मा इदु प्रतवसे शासद्वह्निरितीतरावहीनसूक्ते। आ॰ ७.४। इति॥ पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि माध्यंदिनसवनेऽच्छावाकशस्त्रेऽहीनसूक्तस्य स्थाने त्रीणि संपातसूक्तानि। तत्रेदं तृतीयं संपातसूक्तं। इमामू ष्विच्छंति त्वा शासद्वह्निरिति संपाताः। आ॰ ७.५। इति॥

॥ तस्मिन्सूक्ते प्रथमा ॥

शास॒द्वह्नि॑र्दुहि॒तुर्न॒प्त्यं॑ गाद्वि॒द्वाँ ऋ॒तस्य॒ दीधि॑तिं सप॒र्यन्।

पि॒ता यत्र॑ दुहि॒तुः सेक॑मृं॒जन्त्सं श॒ग्म्ये॑न॒ मन॑सा द॒धन्वे ॥१॥

शास॑त्। वह्निः॑। दु॒हि॒तुः। न॒प्त्य॑म्। गा॒त्। वि॒द्वान्। ऋ॒तस्य॑। दीधि॑तिं। स॒प॒र्यन्।
पि॒ता। यत्र॑। दु॒हि॒तुः। सेक॑म्। ऋ॒ञ्जन्। सं। श॒ग्म्ये॑न। मन॑सा। द॒ध॒न्वे ॥१॥

कुशिकः प्रसंगात् कंचित् शास्त्रार्थं ब्रूते। अपुत्रस्य पितुः पुत्री दायादा पुत्रिका सती यतः संतानकृत्तस्याः पुत्र इत्यनयोच्यत इति। अपुत्रो यः पिता कन्यामन्यकुलं प्रापयति स वह्निरित्युच्यते। स पिता शासत् अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां। अस्यां यो जायते पुत्रः स मे पुत्रः पुत्रो भवेदिति स्मृत्युक्तमनुशासनं कुर्वन् दुहितुः पुत्रिकाया नप्त्यं नप्तारं पौत्रं गात्। गच्छति। दुहितुः पुत्रत्वेन स्वीकाराद्दौहित्रं नप्तृभवं पिंडदानादिकं कर्तव्यतया गात्। गच्छति। किं कुर्वन्। विद्वान् अस्यां दुहितरि जातः पुत्रो मम स्वधाकरो भविष्यतीति ज्ञानन् ऋतस्य सत्यस्य पुत्रोत्पादनसमर्थस्य रेतसो दीधितिं धर्तारं जामातरं तत्पतिं सपर्यन् वस्त्रालंकारादिना पूजयन् पिता नप्तृभवं गच्छति। यत्र यस्मिन्विषये पितापुत्रो जनको दुहितुरप्रत्तायाः स्वकन्यायाः सेकं रेतसः सेकं तस्यां रेतःसेकमृंजन् प्रसाधयन् शग्म्येन सुखनिमित्तेन मनसा संदधन्वे। आत्मानं संधत्ते। अपुत्रत्वनिमित्तदुःखापगमात्। यस्या दुहितुः पिता पालकः पतिर्जामाता सेकं तस्यां रेतःसेकमृंजन् प्रसाधयन् सं शग्म्येन केवलं सुखनिमित्तेन मनसा तया स्वशरीरं संदधन्वे। संधत्ते। न तु पुत्रनिमित्तेन मनसा। एतमर्थं यास्कोऽप्याह। प्रशास्ति वोढा संतानकर्मणे दुहितुः पुत्रभावं। दुहिता दुर्हिता दूरे हिता दोग्धेर्वा। नप्तारमुपागमद्दौहित्रं पौत्रमिति विद्वान्प्रजननयज्ञस्य रेतसो ऽंगादंगात्संभूतस्य हृदयादधि जातस्य मातरि प्रत्यृतस्य विधानं पूजयन्नित्यादिना। नि॰ ३.४.॥ शासत्। शासेः शतर्यभ्यस्तत्वान्नुमभावः। दुहितुः। दुह प्रपूरणे। नप्तृनेष्टृ इत्यादिना तृचि निपातनादिडागमः। चित्स्वरः। नप्त्यं। नप्तरि भवं। भवे छंदसीति यत्। रीङृत इति रीङादेशः। यस्येति लोपः। रेफलोपश्छांदसः। तित्स्वरितः। गात्। इण् गतावित्यस्य छांदसे लुङि रूपं। ऋंजन्। ऋंजतिः प्रसाधनकर्मा। शग्म्येन। शं सुखं गच्छंतीति गमेरौणादिकः कप्रत्ययः। किल्वाद्गमहनेत्यादिनोपधालोपः। शग्मे साधुरिति तत्र साधुरिति यत्प्रत्ययः। वीरवीर्यौ चेत्यत्र यतोऽनाव इत्यस्यानित्यत्वस्य ज्ञापितत्वादत्र तित्स्वरः। दधन्वे। धवि सौत्रो धातुः। लिटि रूपं। प्रत्ययस्वरः। यद्योगादनिघातः॥

॥ अथ द्वितीया ॥

न जामये तान्वो रिक्थमारैक्चकार गर्भं सनितुर्निधानं ।
यदी मातरो जनयंत वह्निमन्यः कर्ता सुकृतोरन्य ऋंधन् ॥ २ ॥

न । जामये । तान्वः । रिक्थं । अरैक् । चकार । गर्भं । सनितुः । निऽधानं ।
यदि । मातरः । जनयंत । वह्निं । अन्यः । कर्ता । सुऽकृतोः । अन्यः । ऋंधन् ॥ २ ॥

अभ्रातृकाया दुहितुः पुत्रिकाकरणात् सा रिक्थभागित्युक्तं । भ्रातृमत्यास्तस्या रिक्थभाक्त्वं नास्तीति ब्रूते । तान्वस्तनूज औरसः पुत्रो जामये भगिन्यै रिक्थं पित्र्यं धनं नारैक् । न प्ररेचयति । न प्रददाति । किं तर्हि सनितुरेनां संभजमानस्य भर्तुर्गर्भं । षष्ठ्यर्थे द्वितीया । गर्भस्य निधानं रेतःसेकनिधानीमेनां चकार । पाणिग्रहणेन संस्कृतामेनां करोति । न तु तस्यै रिक्थं ददातीत्यभिप्रायः । असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः । भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकमिति याज्ञवल्क्यस्मरणात् । २. १२४. । स्त्रीपुंसलक्षणस्यापत्यस्यैकोत्पाद्यत्वाविशेषात्पुमपत्यस्य को विशेष इत्याशंक्य विशेषं दर्शयति । यदि यद्यपि मातरो मातापितरौ वह्निं । अवह्निः स्त्री वह्निः पुमान् स्वभार्याया वोढृत्वात् । अवह्निश्च वह्निः । तादृशं स्त्रीपुंसलक्षणमपत्यं जनयंत । तथापि तयोर्मध्येऽन्यः पुंलक्षणः सुकृतोः शोभनस्य पिंडदानादेः कर्मणः कर्ता भवति । अन्यः स्त्रीलक्षण ऋंधन् वस्त्रालंकारादिना ऋध्यमान एव भवति । पिंडदानादिकर्तृत्वात्पुत्रो दायार्हः दुहिता तथा नेति न दायार्हा सा तु केवलं परस्मै दीयते । तथा च निरुक्तं । न जामये भगिन्यै । जामिरन्येऽस्यां जनयंति जामपत्यं जमतेर्वा स्याद्गतिकर्मणो निर्गमनप्राया भवति । तान्व आत्मजः पुत्रो रिक्थं प्रारिचत्प्रादाच्चकारैनां गर्भनिधानीं सनितुर्हस्तग्राहस्य यदिह मातरोऽजनयंत वह्निं पुत्रमवह्निं च स्त्रियमन्यतरः संतानकर्ता भवति पुमान्दायादोऽन्यतरोऽर्धयित्वा जामिः प्रदीयते परस्मै । नि० ३. ६. । इति ॥ तान्वः । तन्वाः प्राणाधिष्ठितत्वात्तनूः प्राणवती । तद्विकार इत्यर्थे प्राणिरजतादिभ्योऽञित्यञ् संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः । रिक्थं । रिचिर् विरेचने । पातृतुदिवचिरिचिभ्यस्थक् । प्रत्ययस्वरः । अरैक् । रिचिर् विरेचन इत्यस्य लुङि सिचि वदव्रजेत्यादिना वृद्धिः । बहुलं छंदसीतीडभावः । हल्ङ्यादिसंयोगांतलोपौ । निघातः । सनितुः । षण संभक्तावित्यस्य तृचि रूपं । निधानं । दधातेर्ल्युटि रूपं । तित्स्वरः । मातरः । पिता

मात्रेति पितुः शेषे प्राप्ते मातुः शेषश्छांदसः। द्विर्वचनस्य बहुवचनं पूजार्थं। जनयंत। जनेर्णिचि रूपं। वह्निं। पुमां स्त्रिया। पा॰ १.२.६७.। इति वह्नेः शेषः। सुकृतोः। करोतेरौणादिकः क्तुप्रत्ययः। ऋंधन्। ऋधु वृद्धौ। व्यत्ययेन श्नम्॥

॥ अथ तृतीया ॥

अग्निर्जज्ञे जुह्वा३ रेजमानो महस्पुत्राँ अरुषस्य प्रयक्षे।
महान्गर्भो मह्या जातमेषां मही प्रवृद्धर्यश्वस्य यज्ञैः ॥३॥

अग्निः। जज्ञे। जुह्वा। रेजमानः। महः। पुत्रान्। अरुषस्य। प्रऽयक्षे।
महान्। गर्भः। महि। आ। जातं। एषां। मही। प्रऽवृत्। हरिऽअश्वस्य। यज्ञैः॥३॥

हे इंद्र अरुषस्यारोचमानस्य तव प्रयक्षे यज्ञार्थं जुह्वा ज्वालाभी रेजमानः कंपमानोऽग्निर्महः प्रभूतान् पुत्रान् रश्मीन् जज्ञे। उत्पादयामास। एषां रश्मीनां गर्भो जलात्मना क्रोडीकारो महानासीत्। किंच एषां रश्मीनां मेलनं आ जातं सर्वत ओषध्यात्मना जातं महि महद्भूत्। किंच एषां रश्मीनां प्रवृत् अनेन प्रकारेण प्रवृत्तिर्हर्यश्वस्येंद्रस्य यज्ञैर्यज्ञार्हैः सोमाहुतिभिर्मही महती भवति॥ जज्ञे। जनी प्रादुर्भाव इत्यस्या लिटि रूपं। अंतर्भावितण्यर्थः। जुह्वा। जुहोतेर्ह्वे दीर्घश्चेति क्विप् द्विर्वचनं दीर्घश्च धातोः। उदात्तस्वरितयोरिति स्वरितत्वं। हर्यश्वस्य। हरी अश्वौ यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥

॥ अथ चतुर्थी ॥

अभि जैत्रीरसचंत स्पृधानं महि ज्योतिस्तमसो निरजानन्।
तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इंद्रः ॥४॥

अभि। जैत्रीः। असचंत। स्पृधानं। महि। ज्योतिः। तमसः। निः। अजानन्।
तं। जानतीः। प्रति। उत्। आयन्। उषसः। पतिः। गवां। अभवत्। एकः। इंद्रः॥४॥

जैत्रीर्जित्वर्यो विशो मरुतः स्पृधानं वृत्रेण सह स्पर्धमानमिंद्रमभ्यसचंत। सर्वतः समगच्छन्। ते च मरुतस्तस्मिन्वृत्रे हते महि महत् ज्योतिः सूर्याख्यं तेजस्तमसस्तमोरूपाद्वृत्रान्निरजानन्। निर्गतमज्ञासिषुः। तत इंद्रं वृत्रहंतारमुदितं सूर्यं जानतीर्जानाना उषसस्तं प्रत्युत् अभिलक्ष्यैव आयन् प्राप्नुवन्। अथ तत्रोद्भूतानां गवां रश्मीनामेकोऽद्वितीय एवेंद्रः पतिरभवत्॥ जैत्रीः। जयतेस्तृनि

रूपं। गुणस्य स्थाने व्यत्ययेन वृद्धिः। तित्स्वरः। असचंत। षच समवाय इत्यस्य लङि रूपं। स्पृधानं। स्पर्ध संघर्षे। छंदसि कानजादेशः। छंदसि द्विर्वचनस्य विकल्पितत्वाद्द्विर्वचनाभावः। चित्स्वरः। अजानन्। ज्ञा अवबोधन इत्यस्य लङि रूपं। निघातः। आयन्। अय पय गतावित्यस्य लङि रूपं॥

॥ अथ पंचमी ॥

वीळौ सतीरभि धीरा अतृंदन्प्राचाहिन्वन्मनसा सप्त विप्राः।
विश्वामविंदन्पथ्यामृतस्य प्रजानन्नित्ता नमसा विवेश ॥५॥

वीळौ। सतीः। अभि। धीराः। अतृंदन्। प्राचा। अहिन्वन्। मनसा। सप्त। विप्राः।
विश्वां। अविंदन्। पथ्यां। ऋतस्य। प्रऽजानन्। इत्। ता। नमसा। आ। विवेश॥५॥

पुरा किलांगिरसां गावः पणिनामकैरसुरैरपहृत्य निगूढे कस्मिंश्चित्पर्वते स्थापिताः। ते चांगिरसस्तत्प्राप्त्यर्थमिंद्रं तुष्टुवुः। स्तुतश्च स इंद्रो गवान्वेषणाय देवशुनीं प्राहिणोत्। सा च गवां गवेषणपरा सती तत्स्थानमलभत। तया विज्ञापित इंद्रस्ता गा आनीयांगिरोभ्यः प्रादादित्यैतिहासिकी कथा। तथा चास्या ऋचोऽयमर्थः। धीरा धीमंतः सप्त विप्रा मेधाविनः सप्तसंख्याका अंगिरसो वीळौ दृढे पर्वते सतीर्निरुद्धाः सतीर्गा अभि अभिलक्ष्यातृंदन्। निधानमपावृण्वन्। उपेक्षामकुर्वन्। ततस्तेऽंगिरसः पर्वतविले गावः संतीति मनसा निश्चित्य प्राचा येन मार्गेण प्रविष्टास्तेनैव प्राचीनेन मार्गेण ता गा अहिन्वन्। निरगमयन्। यद्वा प्राचा। प्रकर्षेणेंद्रमंचति प्राप्नोतीति प्राक्। तेनेंद्रविषयेण मनसा। मन्यत इति मनः स्तोत्रं। तेन स्तोत्रेणाहिन्वन्। अवर्धयन्। इंद्रं तुष्टमकुर्वन्। स्तुत्वा च ऋतस्य पथ्यां यज्ञस्य मार्गे साधुभूतां विश्वां सर्वामपहृतां गामविंदन्। अलभंत। ततः स इंद्रस्ता तान्यंगिरसां कर्माणि प्रजानन्नित् प्रकर्षेण जानन्निंद्रो नमसा नमस्कारेणांगिरसः संभावयन् तैरधिष्ठितं पर्वतमाविवेश॥ अतृंदन्। उतृदिर् हिंसानादरयोरित्यस्य लङि रुधादित्वात् श्नम्। तस्य श्नसोरित्यल्लोपः। निघातः। प्राचा। अंचेश्छंदस्यसर्वनामस्थानमिति विभक्तेरुदात्तत्वं। अहिन्वन्। हि गतिवर्धनयोरित्यस्य लङि रूपं। अविंदन्। विद्लृ लाभ इत्यस्य लङि मुचादित्वान्नुम्। निघातः। पथ्यां। पथि साधुरित्यर्थे तत्र साधुरिति यत्प्रत्ययः। यचि भमिति भसंज्ञायां नस्तद्धित इति टिलोपः।

यतोऽनाव इत्यस्यानित्यत्वान्नित्स्वरित इति स्वरितः। विवेश। विश प्रवेशन इत्यस्य लिटि रूपं ॥

॥ इति तृतीयस्य द्वितीये पंचमो वर्गः ॥

॥ अथ तस्मिन्सूक्ते षष्ठी ॥

विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः।

अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥ ६॥

विदत्। यदि। सरमा। रुग्णं। अद्रेः। महि। पाथः। पूर्व्यं। सध्र्यक्। करिति कः।

अग्रं। नयत्। सुऽपदी। अक्षराणां। अच्छं। रवं। प्रथमा। जानती। गात् ॥ ६॥

यदि यदा सरमेंद्रेण गवान्वेषणार्थं प्रेषिता सरमा नाम देवशुन्यद्रे रुग्णं भग्नं द्वारं विदत् अलभत तदानीमिंद्रो महि महत्पूर्व्यं पूर्वं प्रेषणकालेऽन्नादिनी ते प्रजां करिष्यामीति प्रतिज्ञातं सध्र्यक् इतरैरपि भोज्यैः सध्रीचीनं पाथो गव्यादिलक्षणमन्नं कः। अकार्षीत्। तस्यै दत्तवान्। ततः सुपदी शोभनपादयुक्ता सा सरमाक्षराणां क्षयरहितानां गवामग्रं प्रांतं नयत्। प्राप्नोत्। कुत इत्यत आह। यतो रवं तेषां हंभारवं प्रथमा प्रथमं जानती सती अच्छ शब्दाभिमुख्येन गात्। जगाम॥ विदत्। विद्लृ लाभ इत्यस्य लुङि लृदित्त्वात् च्लेरङादेशः। तस्य स्वरः। सरमा। सृ गतौ। औणादिकोऽमप्रत्ययः सरतीति। सरमा सरणादिति यास्कः। प्रत्ययस्वरः। रुग्णं। रुजो भंग इत्यस्य निष्ठायामोदितश्चेति नत्वं। प्रत्ययस्वरः। पाथः। पा रक्षणे अन्ने च। उ° ४.२०६.। इत्यसुन्प्रत्ययः। थुडागमः। पातीति पाथोऽन्नं। नित्स्वरः। सध्र्यक्। अंचु गतिपूजनयोः। ऋत्विगित्यादिना क्विन्। सहांचतीति। सहस्य सध्रिरिति सध्र्यादेशः। क्विन्प्रत्ययस्य कुत्वं। अद्रिसध्र्योरंतोदात्तत्वनिपातनं कृत्स्वरनिवृत्त्यर्थमिति सध्रि इत्यादेशोऽंतोदात्तः। यणादेशे कृत उदात्तस्वरितयोर्यणः स्वरित इति यणः स्वरितत्वं। कः। करोतेर्लुङि सिपि च्लेर्मंत्रे घसह्वरेत्यादिना लुक्। गुणे कृते हल्ङ्यादिना सिपो लोपः। विसर्जनीयः। निघातः। नयत्। नयतेर्लङि रूपं। सुपदी। पादोऽन्यतरस्यां। पा° ४.१.८.। इति ङीप्। गात्। इणो लुङि रूपं ॥

॥ अथ सप्तमी ॥

अगच्छदु विप्रतमः सखीयन्नसूदयत्सुकृते गर्भमद्रिः ।
ससान मर्यो युवभिर्मखस्यन्नथाभवदंगिराः सद्यो अर्चन् ॥ ७ ॥

अगच्छत् । ऊं इति । विप्रऽतमः । सखिऽयन् । असूदयत् । सुऽकृते । गर्भं । अद्रिः ।
ससान । मर्यः । युवऽभिः । मखस्यन् । अथ । अभवत् । अंगिराः । सद्यः । अर्चन् ॥ ७ ॥

विप्रतमोऽतिशयेन मेधावी सखीयन् अंगिरोभिः साकमात्मनः सखित्वमिच्छन् इंद्रोऽगच्छत् । गोभिरधिष्ठितं पर्वतमगमदेव । सोऽद्रिः सखित्वमिच्छन् सुकृते सुष्ठु युद्धकर्त्रे इंद्राय गर्भं गवात्मकं गर्भमसूदयत् । निरगमयत् । युवभिर्नित्यतरुणैर्मरुद्भिः सह मखस्यन् गोधनमंगिरसामिच्छन् मर्योऽसुराणां मारयितेंद्रः ससान । असुरैरपहृतास्ता गा भेजे । अथानंतरमंगिराः सप्तानामंगिरसां मध्ये वरिष्ठोऽंगिरा ऋषिरिंद्रात्ता गा लब्ध्वा सद्यस्तदानीमेवार्चन् इंद्रं पूजयन्नभवत् ॥ अगच्छत् । गमेर्लङि रूपं । सखीयन् । सुप आत्मनः क्यच् । असूदयत् । षूद निरास इत्यस्य ण्यंतस्य लङि रूपं । ससान । षण संभक्तावित्यस्य लिटि णलि रूपं । लित्स्वरः । मखस्यन् । छंदसि परेच्छायामिति परेच्छायामपि क्यच् । सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्य इति सुगागमः । एकादेशस्वरः । अंगिराः । सृ गतौ । अंगारशब्द उपपदे सर्तेर्धातोरसुन्प्रत्ययः । उपपदे गकारात्परस्येत्वमंत्यलोपश्च धातोर्लोपश्च अंगिरा इति सूत्रेण । पा॰ २. ४. ६५. । निपात्यते । भूतकालेऽंगारेभ्यः सृत इत्यंगिरा ऋषिः । अंगारेष्वंगिरा इति यास्कः । नित्स्वरः ॥

॥ अथाष्टमी ॥

सतःसतः प्रतिमानं पुरोभूर्विश्वा वेद जनिमा हंति शुष्णं ।
प्र णो दिवः पदवीर्गव्युरर्चन्त्सखा सखीँरमुंचन्निरवद्यात् ॥ ८ ॥

सतःऽसतः । प्रतिऽमानं । पुरःऽभूः । विश्वा । वेद । जनिम । हंति । शुष्णं ।
प्र । नः । दिवः । पदऽवीः । गव्युः । अर्चन् । सखा । सखीन् । अमुंचत् । निः । अवद्यात् ॥ ८ ॥

योऽयमिंद्रः सतः सत उत्तमस्य वस्तुनः प्रतिमानं । प्रतिमीयत उपमीयतेऽनेन सर्वमिति प्रतिमानं प्रतिनिधिः । यद्वा सतः सतो जातस्य सर्वस्य प्रतिमानं स्वस्य महत्त्वेन प्रतिमातीयत्तया सर्वं परिच्छिनत्तीत्यर्थः । पुरोभूर्युद्धे पुरतः

शत्रूनवाप्नोतीति पुरोभूश्च विश्वा जनिम सर्वाणि जातानि वेद। जानाति। शुष्णं शुष्णनामानमसुरं हंति। पदवीः कवितमो गव्युर्गोधनमंगिरसामिच्छन् अस्माकं सखेंद्रः सखीन्नोऽस्मान् दिवो द्युलोकादागत्य प्रार्चन् प्रकर्षेण पूजयन् अवद्यादृवबाधरूपाद्दोषान्निरमुंचत्। नितरां मुंचतु॥ प्रतिमानं। मातीति मानं। औणादिको नन्प्रत्ययः। यद्वा करणे ल्युट्। पुरोभूः। भू प्राप्तौ। क्विप्। वेद। वेत्तेर्लटि रूपं। जनिम। जनी प्रादुर्भावे। जनिहृभ्यामिमनिन्निती मनिन्प्रत्ययः। भूतकाले जातानीति जनिम। सुपां सुलुगिति सुपो लुक्। नित्स्वरः। हंति। हंतेर्लटि रूपं। वाक्यभेदादनिघातः। शुष्णं। शोषयतीति शुष्णः। प्र णः। उपसर्गाद्बहुलमिति संहितायां णत्वं। पदवीः। वी कांत्यादिषु। क्विप्। पदानि वेत्ति परस्परसंगतानि करोतीति पदवीः कविः। गव्युः। गोशब्दात्परेच्छायां छंदसीति क्यच्। वांतो यि प्रत्यय इति वांतादेशः। क्याच्छंदसीत्युप्रत्ययः। प्रत्ययस्वरः। अर्चन्। अर्चतेः शतरि रूपं। सखीन्। संहितायां नकारस्य दीर्घादटीति रुः। पूर्वस्य वर्णस्य अत्रानुनासिक इत्यनुनासिकादेशः। अमुंचत्। मुच्लृ मोक्षण इत्यस्य लङि शे मुचादीनामिति नुमागमः। निघातः। अवद्यात्। वद व्यक्तायां वाचीत्यस्य नञ्पूर्वस्य गर्ह्यार्थेऽवद्यपण्यवर्या इति निपातनात्। पा० ३.१.१०१। यत्प्रत्ययः॥

॥ अथ नवमी ॥

नि गव्यता मनसा सेदुरर्कैः कृण्वानासो अमृतत्वाय गातुं।
इदं चिन्नु सदनं भूर्येषां येन मासाँ असिषासन्नृतेन ॥९॥
नि। गव्यता। मनसा। सेदुः। अर्कैः। कृण्वानासः। अमृतऽत्वाय। गातुं।
इदं। चित्। नु। सदनं। भूरि। एषां। येन। मासान्। असिसासन्। ऋतेन॥९॥

गव्यता गा इच्छता मनसा युक्ता अर्कैरर्चनीयैः स्तोत्रैरमृतत्वाय देवत्वप्राप्त्यर्थं गातुं। गच्छंत्यनेनेति गातुर्मार्गः। अमृतत्वप्राप्त्युपायभूतं मार्गं कृण्वानासः कुर्वाणास्तेऽंगिरसो निषेदुः। सत्राख्ये कर्मण्यासीदन्। एषामंगिरसामिदं चित्सदनं इदमेव सत्राख्ये कर्मण्यासदनं भूरि नु। प्रभूतं। अमृतत्वप्राप्त्यर्थं महानुपायः खलु। कुत इत्यत आह। ऋतेन सत्यभूतेन येन सत्रकर्मणा तेऽंगिरसो मासानभिप्लवपृष्ठ्यषडहैः कल्पितान् मासान् असिसासन्। संभक्तुमैच्छन्॥ गव्यता। गोशब्दात् क्यचि रूपं। वांतो यि प्रत्यय इति वांतादेशः। एकादेशस्वरः। सेदुः।

सदेर्लिटि अत एकहल्मध्येऽनादेशादेर्लिटीत्येत्वाभ्यासलोपौ । निघातः । कृखानासः । कृवि हिंसाकरणयोरित्यस्य ताच्छीलिकश्चानश् । धिन्विकृण्व्योरश्चेत्युप्रत्ययः । चित्स्वरः । गातुं । गाङ् गतौ । कमिमनिजनिगाभायाहिभ्य इति करणे तुप्रत्ययः । प्रत्ययस्वरः । असिषासन् । षण संभक्तावित्यस्य सनि जनसनखनां सन्झलोरित्यात्वं । अभ्यासस्य सन्यत इतीत्वं । सनोतेरन इति संहितायां षत्वं । तदंताल्लङि रूपं । यद्वृत्तयोगादनिघातः ॥

॥ अथ दशमी ॥

संपश्यमाना अमदन्नभि स्वं पयः प्रत्नस्य रेतसो दुघानाः ।
वि रोदसी अतपद्घोष एषां जाते निःष्ठामदधुर्गोषु वीरान् ॥ १० ॥
संऽपश्यमानाः । अमदन् । अभि । स्वं । पयः । प्रत्नस्य । रेतसः । दुघानाः ।
वि । रोदसी इति । अतपत् । घोषः । एषां । जाते । निःऽस्थां । अदधुः । गोषु । वीरान् ॥ १० ॥

स्वं स्वकीयं गोधनमभि अभिलक्ष्य संपश्यमाना मदीया एता गाव इत्यात्मीयतया जानानास्तेऽंगिरसः प्रत्नस्य पुरा जातस्य रेतसस्तदुपलक्षितस्य पुत्रस्य धारणार्थं पयो दुघानास्ता गाः पयो दुहंतः संतोऽमदन् । अहृष्यन् । एषामंगिरसां घोषो हर्षादुत्पन्नो महाध्वनिः स्तुतिजातो वा रोदसी द्यावापृथिव्यौ व्यतपत् । ते व्याप्यातपिष्ट । ततस्तेऽंगिरसो जात आत्मीयतया संपन्ने चराचरात्मके वस्तुनि निःष्ठां पूर्वं यथा स्थितिमकार्षुः । तथा गोष्वाहृतासु वीरान् रक्षाकर्मण्यतिशूरान्पुरुषानादधुः । स्थापयामासुः ॥ संपश्यमानाः । संपूर्वस्य हशेर्हशेश्चेति वक्तव्यमित्यात्मनेपदं । शानचो लसार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः । अमदन् । मदी हर्षे इत्यस्य लुङि णिच्यङि रूपं । निघातः । दुघानाः । दुह प्रपूरण इत्यस्मात् शानच् । अदादित्वाच्छपो लुक् । घत्वं छांदसं । वृषादित्वादाद्युदात्तः । अतपत् । विपूर्वस्य तपतेश्च सकर्मकत्वादात्मनेपदाभावः । लङि रूपं । घोषः । घुष संशब्दने । घञंतः । ञित्स्वरः । निःष्ठां । ष्ठा गतिनिवृत्तौ । स्थः क च । पा० ३. २. ७७. । इति क्विप् । कृदुत्तरस्वरः । अदधुः । दधातेर्लङि झेः सिजभ्यस्तेति जुसादेशः । वाक्यभेदान्निघाताभावः । गोषु । सावेकाच इति विभक्तेरुदात्तत्वे प्राप्ते न गोश्वन्निति प्रतिषिद्धत्वात्प्रातिपदिकस्वरः ॥

॥ इति तृतीयस्य द्वितीये षष्ठो वर्गः ॥

॥ अथ तस्मिन्सूक्त एकादशी ॥

स जातेभिर्वृत्रहा सेदु हव्यैरुदुस्रिया असृजदिंद्रो अर्कैः ।
उरूच्यस्मै घृतवद्भरंती मधु स्वाद्म दुदुहे जेन्या गौः ॥ ११ ॥

सः । जातेभिः । वृत्रऽहा । सः । इत् । ऊं इति । हव्यैः । उत् । उस्रियाः । असृजत् । इंद्रः । अर्कैः ।
उरूची । अस्मै । घृतऽवत् । भरंती । मधु । स्वाद्म । दुदुहे । जेन्या । गौः ॥ ११ ॥

स इंद्रो जातेभिः सहायतया संपन्नैर्मरुद्भिः सहितः सन् वृत्रहा वृत्रस्यासुरस्य हंता भवति । सेदु स एवेंद्रोऽर्कैरर्चनीयैः अत एव हव्यैर्होतव्यैर्मरुद्भिः सहितः सन् उस्रियाः । ऊर्ध्वं वसत्यासु क्षीरादिरूपं हविरित्युस्रिया गावः । यद्वा ऊर्ध्वं क्षीरदधिनवनीतादि क्रमेणासु वसतीति । उस्रियेति गोनामोत्स्राविणोऽस्यां भोगाः । नि° ४. १९. । इति यास्कः । ता गा उदसृजत् । यज्ञार्थं सम्यक् ससर्ज । यस्मादेवं तस्मात् घृतवत् घृतोपेतं क्षीरादिकं हविर्भरंती बिभ्राणा अत एवोरूची । उरु प्रभूतमग्निहोत्रादिकर्माचति हविः प्रदातुं प्राप्नोतीत्युरूची । जेन्या जेतव्या प्रशस्ता गौरस्मै यजमानाय स्वाद्म स्वादुतरं क्षीरादि दुदुहे । दुह्यते स्म ॥ उस्रियाः । वस निवास इत्यस्मात् स्फायितंचीत्यादिना रक्प्रत्ययः । उस्रशब्दात् स्वार्थे घप्रत्ययः । प्रत्ययस्वरः । यद्वा सृ गतौ । उत्पूर्वस्य सरतेः कप्रत्ययः । पूर्वपदस्यांत्यलोपश्छांदसः । अत्रापि स्वार्थिको घप्रत्ययः । असृजत् । सृज विसर्ग इत्यस्य लङि रूपं । ऊरूची । उर्वंचतीति क्विन् । अंचतेश्चोपसंख्यानमिति ङीप् । उदात्तनिवृत्तिस्वरेणांतोदात्तः । दुदुहे । दुह प्रपूरण इत्यस्य लिटि रूपं । जेन्या । जयतेः कृत्यार्थे केन्यप्रत्ययः । इकारलोपश्छांदसः । प्रत्ययस्वरः ॥

॥ अथ द्वादशी ॥

पित्रे चिच्चक्रुः सदनं समस्मै महि त्विषीमत्सुकृतो वि हि ख्यन् ।
विष्कभ्नंतः स्कंभनेना जनित्री आसीना ऊर्ध्वं रभसं वि मिन्वन् ॥ १२ ॥

पित्रे । चित् । चक्रुः । सदनं । सं । अस्मै । महि । त्विषिऽमत् । सुऽकृतः । वि । हि । ख्यन् ।
विऽस्कभ्नंतः । स्कंभनेन । जनित्री इति । आसीनाः । ऊर्ध्वं । रभसं । वि । मिन्वन् ॥ १२ ॥

सत्रमनुतिष्ठंतोऽंगिरसः पित्रे चित्पालकायास्मा इंद्राय महि महत् त्विषीमद्दीप्तिमत् सदनमुत्तमं स्थानं संचक्रुः । कथमिति चेदुच्यते । यतः सुकृतः समु-

पार्जितकर्माणस्तेऽंगिरसस्तादृशमिंद्रस्योचितं स्थानं वि हि ख्यन्। विशेषेणा-दर्शयन् खलु। कुत इत्यत आह। आसीनाः सत्रमुपतिष्ठंतस्तेऽंगिरसो जनित्री सर्वस्य जगतो जनयित्र्यौ द्यावापृथिव्यौ स्कंभनेन स्तंभनसाधनेनांतरिक्षेण विष्कभ्नंतो यथा ते रोदस्यावधो न पततस्तथा विष्टब्धीकुर्वंतः संतो रभसं वेगवंतं तमिंद्रमूर्ध्वं द्युलोके वि मिन्वन्। हविःस्वीकरणार्थं विशेषेणास्थापयन्॥ चक्रुः। करोतेर्लिट्युसि रूपं। निघातः। ख्यन्। ख्या प्रकथने। अस्य लुङि च्लेरस्यतिवक्तिख्यातिभ्योऽङित्यङादेशः। आतो लोप इटीत्याकारलोपः। हियो-गादनिघातः। विष्कभ्नंतः। स्कम्भु रोधने। सौत्रो धातुः। तस्माच्छतरि रूपं। वेः स्कभ्नातेर्नित्यं। पा॰ ८. ३. ७७.। इति षत्वं। शतृप्रत्ययस्वरः। जनित्री। ऋन्नेभ्यो ङीप्। जनिता मंत्र इति निपातनाण्णिलोपः। वा छंदसीति सवर्णदीर्घः। आसीनाः। आस उपवेशन इत्यस्माच्छानच्। ईदासः। पा॰ ७. २. ८३.। इतीकारः। शानचो लसार्वधातुकस्वरे कृते धातुस्वरः। मिन्वन्। डुमिञ् प्रक्षेपण इत्यस्य लङि रूपं। निघातः॥

॥ अथ त्रयोदशी ॥

मही यदि धिषणा शिश्नथे धात्सद्योवृधं विभ्वं१ रोदस्योः।
गिरो यस्मिन्ननवद्याः समीचीर्विश्वा इंद्राय तविषीरनुत्ताः॥ १३॥
मही। यदि। धिषणा। शिश्नथे। धात्। सद्यःऽवृधं। विऽभ्वं। रोदस्योः।
गिरः। यस्मिन्। अनवद्याः। सम्ऽईचीः। विश्वाः। इंद्राय। तविषीः। अनुत्ताः॥ १३॥

मही महती धिषणास्माभिः क्रियमाणेंद्रविषया स्तुती रोदस्योः शिश्नथे द्यावापृथिव्योरन्योन्यविश्लेषाय सद्योवृधं तदानीमेव वर्धमानं विभ्वं विभुं तयोर्धा-रणसमर्थं साधनं यदि धात् अकरोत् ततस्तत्र वर्तमाने यस्मिन्निंद्रेऽनवद्या दोषरहिता गिरः स्तुतिलक्षणा वाचः समीचीः संगता भवंति। इंद्रायेति विभ-क्तिव्यत्ययः। तादृशस्येंद्रस्य विश्वास्तवषीः सर्वाणि बलान्यनुत्ता अपरप्रेषितानि स्वभावसिद्धान्येव॥ धिषणा। ञिधृषा प्रागल्भ्ये। धृषेर्धिष च संज्ञायामिति क्युप्रत्ययः। धातोर्धिषादेशः। धृष्णोत्यनयेति धिषणा स्तुतिः। प्रत्ययस्वरः। शिश्नथे। श्नथ हिंसार्थः। अस्मात्क्विप्। छंदस्युभयथेति तस्य सार्वधातुकत्वाच्छप्। तस्य बहुलं छंदसीति श्लुः। बहुलं छंदसीत्यभ्यासस्येत्वं। धातुस्वरः। धात्। दधातेश्छांदसे लुङि रूपं। यदियोगादनिघातः। विभ्वं। भवतेः क्विप्। छंदस्यु-

भयथेति यणादेशः । उदात्तस्वरितयोर्यण इति स्वरितत्वं । अनुत्ताः । णुद् प्रेरण इत्यस्य नञ्पूर्वस्य निष्ठायां नसत्तनिषत्तानुत्तेत्यादिना निपातनान्निष्ठातकारस्य नत्वाभावः । नञः स्वरः ॥

॥ अथ चतुर्दशी ॥

मह्या ते सख्यं वश्मि शक्तीरा वृत्रघ्ने नियुतो यंति पूर्वीः ।

महि स्तोत्रमव आगन्म सूरेरस्माकं सु मघवन्बोधि गोपाः ॥ १४ ॥

महि । आ । ते । सख्यं । वश्मि । शक्तीः । आ । वृत्रऽघ्ने । निऽयुतः । यंति । पूर्वीः ।

महि । स्तोत्रं । अवः । आ । अगन्म । सूरेः । अस्माकं । सु । मघऽवन् । बोधि । गोपाः ॥ १४ ॥

हे इंद्र ते तव महि महत्सख्यमावश्मि । आकामये । शक्तीस्त्वत्संबंधीनि दानानि चाकामये । वृत्रघ्ने वृत्रासुरस्य हंत्रे तुभ्यं पूर्वीर्बह्व्यो नियुतो वडवा आयंति । वहनार्थमागच्छंति । सूरेर्विदुषस्तव महि महत् स्तोत्रमवो हविर्लक्षणमन्नं चागन्म । प्रापयामः । हे मघवन्निंद्र तादृशस्त्वमस्माकं सु सुष्ठु गोपाः पालयिता भवामीति बोधि । बुध्यस्व ॥ सख्यं । सख्युर्य इति भावार्थे यप्रत्ययः । प्रत्ययस्वरः । वश्मि । वश कांतौ । लटि रूपं । नियुतः । यु मिश्रणे । क्विप् । नितरां युवंति मिश्रयंत्यात्मानं रथेष्विति नियुतो वडवाः । अगन्म । गमेर्लङ्युत्तमबहुवचने बहुलं छंदसीति शपो लुक् । म्वोश्चेति मकारस्य नकारः । निघातः । बोधि । बुधेर्लोटि हेर्धौ रूपं । निघातः । गोपाः । गुपू रक्षणे । गुपूधूपेत्यादिना आयप्रत्ययः । तदंतात् क्विप् । अतोलोपयलोपौ । प्रत्ययस्वरः ॥

॥ अथ पंचदशी ॥

महि क्षेत्रं पुरु श्चंद्रं विविद्वानादित्सखिभ्यश्चरथं समैरत् ।

इंद्रो नृभिरजनद्दीद्यानः साकं सूर्यमुषसं गातुमग्निं ॥ १५ ॥

महि । क्षेत्रं । पुरु । चंद्रं । विविद्वान् । आत् । इत् । सखिऽभ्यः । चरथं । सं । ऐरत् ।

इंद्रः । नृऽभिः । अजनत् । दीद्यानः । साकं । सूर्यं । उषसं । गातुं । अग्निं ॥ १५ ॥

योऽयमिंद्रो महि महत् क्षेत्रं केदारादि पुरु प्रभूतं चंद्रं हिरण्यं च विविद्वान् अर्थिभ्यः सखिभ्योऽस्मभ्यं लंभयन् । आदित् अनंतरं चरथं चरात्मकं गवादिकं च समैरत् सम्यक् प्रैरयत् । दत्तवानित्यर्थः । दीद्यानो दीप्यमानः सोऽयमिंद्रो

नृभिर्नेतृभिः कर्मसहायभूतैर्मरुद्भिः साकं सहितः सन् सूर्यं कालस्य निर्वाहकमादित्यं उषसमुषःकालं गातुं। गायंति स्तुवंत्यस्यामिंद्रादिदेवानिति गातुः पृथिवी। तां। अग्निमग्निहोत्रादिकर्मसाधनभूतमाहवनीयादिलक्षणमग्निं चाजनत्। अजनयत्॥ पुरु चंद्रं। संहितायां ह्रस्वाच्चंद्रोत्तरपदे मंत्र इति सुडागमः। तस्य श्चुत्वेन शकारः। पदकाले नास्ति सुडागमः। पुरु। कुप्रत्ययस्वरः। चंद्रं। रक्। प्रत्ययस्वरः। चरथं। चर गत्यर्थः। अस्मादौणादिकोऽथप्रत्ययः। प्रत्ययस्वरः। ऐरत्। ईर गतावित्यस्य लङि आडजादीनामित्याडागमः। निघातः। अजनत्। जनेर्ण्यंतस्य लङि रूपं। बहुलमन्यत्रापि संज्ञाच्छंदसोरिति णिलुक्। गातुं। गै शब्दे। गापायाहिभ्य इति तुप्रत्ययः। प्रत्ययस्वरः॥

॥ इति तृतीयस्य द्वितीये सप्तमो वर्गः॥

॥ अथ तस्मिन्सूक्ते षोडशी॥

अपश्चिदेष विभ्वो३ दमूनाः प्र सध्रीचीरसृजद्विश्वश्चंद्राः।
मध्वः पुनानाः कविभिः पवित्रैर्द्युभिर्हिन्वंत्यक्तुभिर्धनुत्रीः॥१६॥

अपः। चित्। एषः। विऽभ्वः। दमूनाः। प्र। सध्रीचीः। असृजत्। विश्वऽचंद्राः।
मध्वः। पुनानाः। कविऽभिः। पवित्रैः। द्युऽभिः। हिन्वंति। अक्तुऽभिः। धनुत्रीः॥१६॥

दमूनाः। दांतं मनो यस्यासौ दमूनाः। दांतमनाः। यद्वा दाम्यतीति दमूनाः। उपरत इत्यर्थः। स एष एवेंद्रो विभ्वो व्याप्ताः सध्रीचीः परस्परसंगता विश्वश्चंद्रा विश्वस्याह्लादयित्रीः। विश्वस्याह्लादो याभ्यस्ता इति वा। एवंभूता अपश्चिदपोऽपि प्रासृजत्। सृष्टवान्। सृष्टाश्च ता आपो मध्वो माधुर्योपेतान्सोमान्कविभिः पवित्रैरग्निवायुसूर्यैः पुनानाः शोधयित्र्यो धनुत्रीः सर्वस्य जगतः प्रीणयित्र्यः सत्यो द्युभिर्दिवसैरक्तुभी रात्रिभिर्हिन्वंति। रात्रिदिवं सर्वं जगत्स्वस्वव्यापारप्रवणं कुर्वंतीत्यर्थः॥ दमूनाः। दमु उपरमे। दमेरूनसिरित्यूनसिप्रत्ययः। दाम्यतीति दमूनाः। यद्वा दांतशब्दस्य दभावो मनसो मकारात्परस्याकारस्य ऊकारश्छांदसः। असृजत्। सृज विसर्गे। हिन्वंति। हि गतौ। निघातः। धनुत्रीः। धन धान्य इत्यस्मादशित्रादित्वादुत्रप्रत्ययः। शार्ङ्गरवादिषु ङीन् द्रष्टव्यः। नित्स्वरः॥

॥ अथ सप्तदशी ॥

अनु कृष्णे वसुधिती जिहाते उभे सूर्यस्य मंहना यजत्रे ।

परि यत्ते महिमानं वृजध्यै सखाय इंद्र काम्या ऋजिप्याः ॥ १७ ॥

अनु । कृष्णे इति । वसुधिती इति वसुऽधिती । जिहाते इति । उभे इति । सूर्यस्य । मंहना । यजत्रे इति ।

परि । यत् । ते । महिमानं । वृजध्यै । सखायः । इंद्र । काम्याः । ऋजिप्याः ॥ १७ ॥

हे इंद्र सूर्यस्य सुष्ठु जगतः प्रेरकस्य तव मंहना महत्त्वेन सामर्थ्येन वसुधिती वस्तव्यपदार्थधारणोपेते यजत्रे यजनार्हे ते उभे कृष्णे अहोरात्रे अनु जिहाते । पुनःपुनरावृत्य वर्तेते । किंच । ऋजिप्या ऋजुगतयः सखायस्ते मित्रभूताः काम्याः कमनीया मरुतो वृजध्यै । कर्मविघ्नकारिणामसुराणां वर्जनाय परिभवाय । यद्यस्य ते तव महिमानं सामर्थ्यमनुसृत्य परि परितः प्रभवंति ॥ जिहाते । ओहाङ् गतौ । जुहोत्यादिः । भृञामिदित्यभ्यासस्येत्वं । निघातः । मंहना । महि वृद्धौ । ल्युट् । लित्स्वरः । वृजध्यै । वृजी वर्जने । तुमर्थे कध्यैप्रत्ययः । कित्त्वाद्गुणाभावः । प्रत्ययस्वरः । काम्याः । कमेर्ण्यंतस्याचो यदिति यत्प्रत्ययः । यतोऽनाव इत्याद्युदात्तत्वं । ऋजिप्याः । ओप्यायी वृद्धौ । क्विप् । लोपो व्योर्वलीति यलोपः । पूर्वपदस्योकारस्येकारो व्यत्ययेन । बहुवचनस्यैकवचनं छांदसं । कृदुत्तरपदप्रकृतिस्वरः ॥

॥ अथाष्टादशी ॥

पतिर्भव वृत्रहन्सूनृतानां गिरां विश्वायुर्वृषभो वयोधाः ।

आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ॥ १८ ॥

पतिः । भव । वृत्रऽहन् । सूनृतानां । गिरां । विश्वऽआयुः । वृषभः । वयःऽधाः ।

आ । नः । गहि । सख्येभिः । शिवेभिः । महान् । महीभिः । ऊतिऽभिः । सरण्यन् ॥ १८ ॥

हे वृत्रहन्निंद्र विश्वायुः । विश्वं संपूर्णमायुर्यस्यासौ विश्वायुः । अविनाशी वृषभः कामानां वर्षिता वयोधा अन्नस्य दाता तादृशस्त्वं सूनृतानां गिरामस्माभिः क्रियमाणानां प्रियतमानां वाचां पतिः स्वामी भव । तथा सरण्यन् सरणं यज्ञार्थं गमनमिच्छन् महान्महीभिर्महतीभिरूतिभी रक्षाभिः शिवेभिः कल्याणैः सख्येभिः फलप्रदानरूपोपकारलक्षणैः सख्यैश्च सहितस्त्वं नोऽस्मान्प्रत्यागहि । यज्ञार्थ-

मागच्छ ॥ सूनृतानां । ऊन परिहाणे । सुतरामूनयत्यप्रियमिति सूनिति प्रियमुच्यते । तच्च तद्दतं सत्यं चेति सूनृतं । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । वयोधाः । वयस्युपपदे दधातेर्विच् । गहि । गमेर्लोटि बहुलं छंदसीति शपो लुक् । सेर्हिरादेशः । अपिच्च । तस्य ङित्त्वादनुदात्तोपदेशेत्यादिना मलोपः । तस्यासिद्धत्वादतो हेरिति हेर्लुक् न भवति । निघातः । सरण्यन् । सरणशब्दात्क्यच् । एकादेशस्वरः ॥

॥ अथैकोनविंशी ॥

तमं॑गिर॒स्वन्नम॑सा सप॒र्यन्नव्यं॑ कृणोमि॒ सन्य॑से पुरा॒जां ।

द्रुहो॒ वि या॑हि बहु॒ला अदे॑वीः॒ स्व॑श्च नो मघवन्सा॒तये॑ धाः ॥ १९ ॥

तं । अं॒गि॒र॒स्वत् । नम॑सा । स॒प॒र्यन् । नव्यं॑ । कृ॒णो॒मि॒ । सन्य॑से । पु॒रा॒ऽजां ।

द्रुहः॑ । वि । या॒हि॒ । ब॒हु॒लाः । अदे॑वीः । स्व१॒रिति॑ स्वः॑ । च॒ । नः॒ । म॒घ॒ऽव॒न् । सा॒तये॑ । धाः॒ ॥ १९ ॥

हे इंद्र अंगिरस्वत् अंगिरस इव नमसा स्तोत्रेण सपर्यन् पूजयन् विश्वामित्रोऽहं तं तादृशमहिमोपेतं पुराजां पुरातनं त्वां सन्यसे संभजनाय नव्यं कृणोमि । स्तोतव्यतयाभिनवं करोमि । अदेवीस्तमोरूपत्वेनाद्योतमानान्बहुला बहून् द्रुहो द्रोग्धृन् शत्रुभूतान् राक्षसान् वि याहि । विशेषेण मृतिं प्रापय । हे मघवन्निंद्र नोऽस्मभ्यं स्वः स्वं धनं च सातये संभजनार्थं धाः । धेहि ॥ अंगिरस्वत् । अंगिरस इव तेन तुल्यमिति वतिप्रत्ययः । नभोऽंगिरोमनुषां वत्युपसंख्यानमिति भसंज्ञायां सकारस्य रुत्वाभावः । सपर्यन् । सपरशब्दः कंड्वादिः । नव्यं । णु स्तुतावित्यस्मादचो यदिति यत्प्रत्ययः । धातोस्तन्निमित्तस्येति वांतादेशः । यतोऽनाव इत्याद्युदात्तत्वं । कृणोमि । कृवेर्लटि रूपं । सन्यसे । सनतेर्भावे क्विप् । यसु प्रयत्ने । अस्मात् क्विप् । सनः संभजनस्य यसे यत्नाय । संभजनार्थमित्यर्थः । पुराजां । जनेर्विट्व्रात्वे रूपं । याहि । यातेर्लोटि रूपं । स्वः । स्वरादिनिपातमव्ययमित्यव्ययसंज्ञायामव्ययादाप्सुप इति सुपो लुक् । सातये । षण संभक्तौ । भावे क्तिन् । जनसनेत्यादिना आत्वं । ऊतियूतीत्यादिना निपातनादुदात्तः ॥

॥ अथ विंशी ॥

मिहः॑ पाव॒काः प्रत॑ता अभूवन्स्व॒स्ति नः॑ पिपृहि पा॒रमा॑सां ।

इंद्र॒ त्वं र॑थि॒रः पा॑हि नो रि॒षो म॒क्षूम॑क्षू कृणुहि गो॒जितो॑ नः ॥ २० ॥

मिहः। पावकाः। प्रऽतताः। अभूवन्। स्वस्ति। नः। पिपृहि। पारं। आसां।
इंद्र। त्वं। रथिरः। पाहि। नः। रिषः। मक्षुऽमक्षु। कृणुहि। गोऽजितः। नः ॥२०॥

हे इंद्र ते पावकाः पापानां शोधयित्र्यो मिहः सेचनसाधनान्यापः प्रतता लोके प्रकर्षेण विस्तृता अभूवन्। आसामपां स्वस्ति विनाशरहितं पारं तीरं नोऽस्मदर्थं पिपृहि। जलैः संपूर्णं कुरु। जलमवारपारीणं कुर्वित्यर्थः। रथिरो रथवांस्त्वं रिषो हिंसकाच्छत्रोः सकाशान्नोऽस्मान्पाहि। पालय। अनंतरं नोऽस्मान् मक्षु मक्षु अतिशीघ्रं गोजितो गवादिपशूनां जेतॄन् कृणुहि। कुरु। वृष्टिप्रदानेन तटाकादिजलाशयान् संपूर्णान् कृत्वा गवादिधनयुक्तान् कुर्विति भावः ॥ अभूवन्। भू सत्तायामित्यस्य लुङि रूपं। निघातः। पिपृहि। पृ पालनपूरणयोः। जुहोत्यादिः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। हेर्ङित्त्वादगुणः। निघातः। रथिरः। मत्वर्थे मेधारथाभ्यामिरन्निरचावितीरच्प्रत्ययः। रिषः। रिष हिंसायां। क्विप्। सावेकाच इति विभक्तेरुदात्तत्वं। मक्षू मक्षू। नित्यवीप्सयोरिति द्विर्वचनं। संहितायामृचि तुनुघमक्षुतङ्कुत्रोरुष्याणामिति दीर्घः ॥

॥ अथैकविंशी ॥

अदेदिष्ट वृत्रहा गोपतिर्गा अंतः कृष्णाँ अरुषैर्धामभिर्गात्।
प्र सूनृता दिशमान ऋतेन दुरश्च विश्वा अवृणोदप स्वाः ॥२१॥
अदेदिष्ट। वृत्रऽहा। गोऽपतिः। गाः। अंतरिति। कृष्णान्। अरुषैः। धामऽभिः। गात्।
प्र। सूनृताः। दिशमानः। ऋतेन। दुरः। च। विश्वाः। अवृणोत्। अप। स्वाः ॥२१॥

वृत्रहा वृत्रस्य हंता गोपतिर्गवां स्वामी सन्निंद्रो गा अदेदिष्ट। अस्मभ्यं दिशतु। तथा कृष्णान् कर्मविघ्नकारिणोऽसुरानरुषैरारोचमानैर्धामभिस्तेजोभिरंतरंतर्धानं विनाशं गात्। गमयतु। तथा सूनृताः प्रियतमा गा ऋतेन प्रतारणवर्जितेन सत्येन वाक्येन प्रदिशमानोऽंगिरोभ्यः प्रदिशन्निंद्रो विश्वाः सर्वाणि दुरो गवां स्वेच्छया निर्गमनद्वाराणि स्वाः स्वकीया गाश्चापावृणोत्। व्रजे गाः स्थापयित्वा तानि द्वाराण्याच्छादितवानित्यर्थः ॥ अदेदिष्ट। दिश अतिसर्जन इत्यस्माद्यङ्लुकि लङि व्यत्ययेनात्मनेपदं। अडागमस्वरः। गोपतिः। पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरः। गात्। इण् गतौ। अंतर्भावितण्यर्थः। दिशमानः।

दिशेर्व्यत्ययेन शानच्। तस्य लसार्वधातुकस्वरेणानुदात्तत्वे शस्वरः। अवृणोत्। वृञ् वरण इत्यस्य लङि रूपं ॥

॥ अथ द्वाविंशी ॥

शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ।

शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥ २२ ॥

शुनं। हुवेम। मघऽवानं। इंद्रं। अस्मिन्। भरे। नृऽतमं। वाजऽसातौ।

शृण्वंतं। उग्रं। ऊतये। समत्ऽसु। घ्नंतं। वृत्राणि। संऽजितं। धनानां ॥ २२ ॥

व्याख्यातेयमृक् ॥

॥ इति तृतीयस्य द्वितीयेऽष्टमो वर्गः ॥

इंद्र सोमं सोमपत इति सप्तदशर्चं तृतीयं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं। अनुक्रांतं च। इंद्र सोमं त्र्यूनेति ॥ पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहनि मरुत्वतीय इंद्र सोममितीदं सूक्तं निविद्धानीयं। द्वितीयस्येति खंडे सूचितं। इंद्र सोमं या त ऊतिरवमेति मध्यंदिनः। आ॰ ७. ६.। इति ॥ गोसवविवधयोरपि मरुत्वतीयशस्त्र एतत्सूक्तं। सूचितं च। इंद्र सोममेतायामेति मध्यंदिनः। आ॰ ९. ८.। इति ॥ उद्भिद्बलभिदोरपि मरुत्वतीय एतत्सूक्तं। सूचितं च। इंद्र सोममिंद्रः पूर्भिदिति मध्यंदिनः। आ॰ ९. ८.। इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

इंद्र सोमं सोमपते पिबेमं माध्यंदिनं सवनं चारु यत्ते।

प्रमुथ्या शिप्रे मघवन्नृजीषिन्विमुच्या हरी इह मादयस्व ॥ १ ॥

इंद्र। सोमं। सोमऽपते। पिब। इमं। माध्यंदिनं। सवनं। चारु। यत्। ते।

प्रऽमुथ्य। शिप्रे इति। मघऽवन्। ऋजीषिन्। विऽमुच्य। हरी इति। इह। मादयस्व ॥ १ ॥

विश्वामित्रो ब्रूते। सोमपते सोमस्याधिपते हे इंद्र इममस्माभिर्माध्यंदिने सवने क्रियमाणं सोमं सोमरसं पिब। यद्यस्मात्ते त्वदर्थं क्रियमाणं माध्यंदिनं मध्यंदिनसंबंधि सवनं निष्केवल्याख्यं शस्त्रं चारु रमणीयं वर्तते। मघवन् धनवन् ऋजीषिन्। ऋजीषशब्देन गतसारं सोमद्रव्यमुच्यते। तद्वन् हे इंद्र हरी रथे योजितावश्वौ रथाद्विमुच्य शिप्रे हनू प्रमुथ्याचत्येन ग्रासेन पूरयित्वेह

देवयजनदेशे मादयस्व । तावच्चौ हर्षय ॥ प्रप्रुथ्य । प्रोथृ पर्याप्तावित्यस्य ल्यपि रूपं । ह्रस्वश्छांदसः । लित्स्वरः । ऋजीषिन् । अर्ज षर्ज अर्जन इत्यस्मादर्जेश्च ऋजि च । उ॰ ४.२८.। इतीषन्प्रत्यय ऋजि इत्यादेशश्च धातोः। अर्ज्यत इत्यृजीषं। तदस्यास्तीतीनिप्रत्ययः । आमंत्रितत्वान्निघातः । मादयस्व । मदि स्तुत्यादिषु । हेतुमण्णिच् । निघातः ॥

॥ अथ द्वितीया ॥

गवाशिरं मंथिनमिंद्र शुक्रं पिबा सोमं ररिमा ते मदाय ।
ब्रह्मकृता मारुतेना गणेन सजोषा रुद्रैस्तृपदा वृषस्व ॥ २ ॥
गोऽआशिरं । मंथिनं । इंद्र । शुक्रं । पिब । सोमं । ररिम । ते । मदाय ।
ब्रह्मऽकृता । मारुतेन । गणेन । सऽजोषाः । रुद्रैः । तृपत् । आ । वृषस्व ॥ २ ॥

हे इंद्र गवाशिरं गव्यस्य पयस आशीर्मिश्रणं यस्मिन् तं सोमं। अपि च मंथिनं मंथसंयुक्तं शुक्रमभिनवं यद्वा शुक्रामंथिग्रहे वर्तमानं। एवं त्रिषु सवनेषु वर्तमानमिमं सोमं पिब । ते तव मदाय हर्षाय ररिम । तं सोमं वयं प्रयच्छामः । मारुतेन। मरुतां गणो मारुतः। स च ब्रह्मकृता। ब्रह्म स्तोत्रं करोतीति ब्रह्मकृत्। इंद्रस्तोत्रं कुर्वाणेन मारुतेन गणेन रुद्रैरेकादशसंख्याकै रुद्रैश्च सजोषाः संगतस्त्वं तृपत् सोमपानेन तृप्यन् आ वृषस्व। तमिमं सर्वतो जठरे सिंच। धारय॥ गवाशिरं। श्रिणातेराङ्पूर्वात्क्विप्यपस्पृधेथामानृचुरित्यादिना निपातनादाशिरादेशः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। पिबा। द्व्यचोऽतस्तिङ इति संहितायां दीर्घः। ररिम। रातेश्छांदसे वर्तमाने लिटि रूपं । असमानवाक्यत्वान्निघाताभावः । आगमा अनुदात्ता इतीटोऽनुदात्तत्वात्प्रत्ययस्वरः। तृपत्। तृप प्रीणने। तुदादिः। आगमानुशासनस्यानित्यत्वान्नुमभावः । वृषस्व । वृष सेचने । व्यत्ययेन शः ॥

॥ अथ तृतीया ॥

ये ते शुष्मं ये तविषीमवर्धन्नर्चंत इंद्र मरुतस्त ओजः ।
माध्यंदिने सवने वज्रहस्त पिबा रुद्रेभिः सगणः सुशिप्र ॥ ३ ॥
ये । ते । शुष्मं । ये । तविषीं । अवर्धन् । अर्चंतः । इंद्र । मरुतः । ते । ओजः ।
माध्यंदिने । सवने । वज्रऽहस्त । पिब । रुद्रेभिः । सऽगणः । सुऽशिप्र ॥ ३ ॥

हे इंद्र ये मरुतस्ते तव शुष्मं शत्रूणां शोषकं तेजो ये च मरुतस्तविषीं बलं चावर्धन् युद्धसहकारितयावर्धयन् ते मरुतोऽर्चंतस्त्वां स्तुवंतः संतस्ते तवौजो युद्धसामर्थ्यमवर्धयन्। वज्रहस्त वज्रयुक्तौ हस्तौ यस्येति तादृश सुशिप्र शोभनहनो। शिप्रे हनू नासिके वेति यास्कः। हे इंद्र रुद्रेभिः। रोदयंति शत्रूनिति रुद्रा मरुतः। तैः सगणस्त्वं माध्यंदिने सवने सोमं पिब॥ अवर्धन्। वृधु वर्धने। अंतर्भावितण्यर्थः। यद्वृत्तयोगादनिघातः। माध्यंदिने। उत्सादित्वादञ्। जित्त्वादाद्युदात्तः॥

॥ अथ चतुर्थी ॥

त इन्न्वस्य मधुमद्विविप्र इंद्रस्य शर्धो मरुतो य आसन्।
येभिर्वृत्रस्येषितो विवेदामर्मणो मन्यमानस्य मर्म ॥४॥

ते। इत्। नु। अस्य। मधुऽमत्। विविप्रे। इंद्रस्य। शर्धः। मरुतः। ये। आसन्।
येभिः। वृत्रस्य। इषितः। विवेद। अमर्मणः। मन्यमानस्य। मर्म ॥४॥

ये मरुत इंद्रस्य शर्धो बलभूता आसन् त इत् त एव मरुतोऽस्य। द्वितीयार्थे षष्ठी। इममिंद्रं मधुमत् तव सहाया वयमास्महे त्वं युद्धमभिगच्छेति माधुर्योपेतं वाक्यं यथा भवति तथा विविप्रे नु। क्षिप्रं प्रैरयन्। येभिर्यैर्युद्धसहायैर्मरुद्भिरिषितः प्रेरित इंद्रोऽमर्मणः परैरविदितमर्मस्थानस्यात एव मन्यमानस्य न कोऽपि मम हंतेत्यभिमन्यमानस्य वृत्रस्यासुरस्य मर्म यस्मिन् स्थाने प्रहृतौ सत्यां स मरिष्यति तादृशं स्थानं विवेद। अज्ञासीत्॥ विविप्रे। विप क्षेपण इत्यस्य लिटि व्यत्ययेनात्मनेपदं। इरेच इरयो रे इति रे इत्यादेशः। निघातः। आसन्। अस भुवीत्यस्य लङि रूपं। यद्वृत्तयोगान्निघाताभावः। विवेद। विद ज्ञान इत्यस्य लिटि रूपं। लित्स्वरः। मर्म। मृङ् प्राणत्याग इत्यस्मादौणादिको मनिन्। नित्स्वरः॥

॥ अथ पंचमी ॥

मनुष्वदिंद्र सवनं जुषाणः पिबा सोमं शश्वते वीर्याय।
स आ ववृत्स्व हर्यश्व यज्ञैः सरण्युभिरपो अर्णा सिसर्षि ॥५॥

मनुष्वत्। इंद्र। सवनं। जुषाणः। पिब। सोमं। शश्वते। वीर्याय।
सः। आ। ववृत्स्व। हरिऽअश्व। यज्ञैः। सरण्युऽभिः। अपः। अर्णा। सिसर्षि ॥५॥

हे इंद्र मनुष्वत् मनोर्यज्ञमिव ममेदं सवनं यज्ञं जुषाणः सेवमानस्त्वं शश्वते शाश्वताय वीर्याय परपरिभवलक्षणाय सामर्थ्यायेमं सोमं पिब। हे हर्यश्व स तादृशस्त्वं यज्ञैर्यजनीयैर्मरुद्भिः साकमाववृत्स्व। आगच्छ। किंच सरण्युभिरेकश्रुतिमन्मंत्रानात्मन इच्छद्भिः यद्वा सरण्युभिः सरणशीलैर्मरुद्भिः सहितस्त्वमपोऽतरिक्षस्थितान्युदकानि अर्णा पार्थिवान्युदकानि सिसर्षि। प्रापय। यद्वा अपः। पंचम्यंतमेतत्पदं। अपो व्याप्नादंतरिक्षात्सकाशादर्णांसि प्रापय॥ ववृत्स्व। वृतु वर्तने। व्यत्ययेन शपः श्लुः। लोटि रूपं। सरण्युभिः। रण शब्दार्थः। क्विप्। समानो रणो ध्वनिर्येषां ते सरणा मंत्राः। तानिच्छंतः। सुपः क्यच्। क्यादित्युप्रत्ययः। यद्वा सृ गतौ। सृयुवचिभ्योऽन्युजागूजक्नुचः। उ० ३.८०.। इत्यन्युच्प्रत्ययः। रषाभ्यां। पा० ८.४.१.। इति णत्वं। चित्त्वादंतोदात्तः। अपः। आप्लृ व्याप्तौ। आप्नोतेः क्विप् ह्रस्वश्चेति क्विप् धातोर्ह्रस्वश्च। सावेकाच इति विभक्तेरुदात्तत्वं। सिसर्षि। सृ गतौ। छांदसो जुहोत्यादिः। बहुलं छंदसीत्यभ्यासस्येत्वं॥

॥ इति तृतीयस्य द्वितीये नवमो वर्गः॥

॥ अथ तस्मिन्सूक्ते षष्ठी॥

त्वमपो यद्ध वृत्रं जंघन्वाँ अत्याँ इव प्रासृजः सर्तवाजौ।
शयानमिंद्र चरता वधेन वव्रिवांसं परि देवीरदेवं॥६॥

त्वं। अपः। यत्। ह। वृत्रं। जघन्वान्। अत्यान्ऽइव। प्र। असृजः। सर्तवै। आजौ।
शयानं। इंद्र। चरता। वधेन। वव्रिऽवांसं। परि। देवीः। अदेवं॥६॥

हे इंद्र त्वं देवीर्देवनशीला अपः परि वव्रिवांसं परित आवृत्य वर्तमानं अत एवादेवं बहूदकतयास्वच्छत्वेनाप्रतिभासमानं शयानमेकत्र निश्चलतया वर्तमानं वृत्रं मेघं यद्यदा चरता तमुद्दिश्य वर्तमानेन वधेन युद्धेन जघन्वान् हतवानसि तदा त्वमाजौ युद्धे सर्तवै अतिवेगगमनायात्यानिव यथाश्वान् प्रेरयसि तथा त्वमप उदकान्यंतरिक्षादाकाशात् प्रासृजो ह। प्रकर्षेण मेघभेदनं कृत्वासृजः खलु। तं यजाम इत्युत्तरेणान्वयः॥ जघन्वान्। हन हिंसागत्योरित्यस्य क्वसौ विभाषा गमहनविदविशामितीटो विकल्पितत्वादत्रेडभावः। अभ्यासाच्चेति हकारस्य घत्वं। प्रत्ययस्वरः। असृजः। सृज विसर्गे। शविकरणी। यद्योगादनिघातः। सर्तवै। सृ गतौ। तुमर्थे तवैप्रत्ययः। अंतश्च तवै युगपदिति धातोः प्रत्ययस्य चोदात्तत्वं।

आजौ। अज गतिक्षेपणयोः। अज्यतिभ्यां च। उ॰ ४.१३२.। इति इण्प्रत्ययः। णित्त्वादुपधावृद्धिः। अजंति गच्छंत्यस्मिन्नित्याजिर्युद्धं। प्रत्ययस्वरः। सर्तवाजावित्यत्र संहितायामायादेशे कृते तस्य लोपः शाकल्यस्येति यकारलोपः। सर्वविधीनां छंदसि विकल्पितत्वात्सवर्णदीर्घत्वे कर्तव्ये यलोपो नासिद्धो भवति। सवर्णदीर्घः। शयानं। शीङ् स्वप्ने। शानच्। अदादित्वाच्छपो लुक्। ङित्त्वाल्लसार्वधातुकस्वरेण शानचोऽनुदात्तत्वे धातुस्वरः। वधेन। हंतेर्भावे हनश्च वध इत्यप्प्रत्ययो वधादेशश्च धातोरंतोदात्तश्च। वव्रिवांसं। वृञ् वारण इत्यस्य क्वसाविडागमश्छांदसः। प्रत्ययस्वरः॥

॥ अथ सप्तमी ॥

यजा॑म॒ इन्नम॑सा वृ॒द्धमिंद्रं॑ बृ॒हंत॑मृ॒ष्वम॒जरं॒ युवा॑नं।
यस्य॑ प्रि॒ये म॒मतु॑र्य॒ज्ञिय॑स्य॒ न रोद॑सी महि॒मानं॑ म॒माते॑ ॥७॥

यजा॑मः। इत्। नम॑सा। वृ॒द्धं। इंद्रं॑। बृ॒हंतं॑। ऋ॒ष्वं। अ॒जरं॑। युवा॑नं।
यस्य॑। प्रि॒ये इति॑। म॒मतुः॑। य॒ज्ञिय॑स्य। न। रोद॑सी॒ इति॑। म॒हि॒मानं॑। म॒माते॒ इति॑ ॥७॥

नमसा हविर्लक्षणेनान्नेन वृद्धं प्रवृद्धं अत एव बृहंतं महांतमृष्वं। ऋष्यते गम्यते स्तुतिलक्षणैर्मंत्रैरिति ऋष्वं स्तोतव्यं। अजरं जरारहितं अत एव युवानं नित्यतरुणं एवंविधमिंद्रं यजाम इत्। कुशिका वयं यज्ञसिद्ध्यर्थं स्तुतिवाक्यैः पूजयामः। प्रिये प्रियतमे अपरिमिते रोदसी द्यावापृथिव्यौ यज्ञियस्य यज्ञार्हस्य यस्येंद्रस्य तव महिमानं वैभवं न ममतुः। न परिच्छेत्तुं शक्नुतः। न ममाते इति द्वितीयं क्रियापदमादरार्थं॥ यजामः। यजेर्लेटि रूपं। ऋष्वं। ऋषी गतौ। सर्वनिघृष्वऋष्वेत्यादिना वप्रत्ययांतो निपातितः। प्रत्ययस्वरः। प्रिये। ईदूदेदिति प्रगृह्यसंज्ञा। ममतुः। मा मान इत्यस्य लिट्यतुसि रूपं। यद्वृत्तयोगादनिघातः। प्रत्ययस्वरः। महिमानं। महिशब्दात्तस्य भाव इत्यर्थे पृथ्वादित्वादिमनिच्। चित्स्वरः। ममाते। माङ् माने शब्दे चेत्यस्य लिट्यातामि रूपं॥

॥ अथाष्टमी ॥

इंद्र॑स्य॒ कर्म॒ सुकृ॑ता पु॒रूणि॑ व्र॒तानि॑ दे॒वा न मि॑नंति॒ विश्वे॑।
दा॒धार॒ यः पृ॑थि॒वीं द्यामु॒तेमां ज॒जान॒ सूर्य॑मु॒षसं॑ सु॒दंसाः॑ ॥८॥

इंद्रस्य । कर्म । सुऽकृता । पुरूणि । व्रतानि । देवाः । न । मिनंति । विश्वे ।

दाधार । यः । पृथिवीं । द्यां । उत । इमां । जजान । सूर्यं । उषसं । सुऽदंसाः ॥ ८ ॥

विश्वे सर्वे देवा इंद्रस्य तव कर्म कर्माणि सुकृता सुकृतानि सुष्ठु निर्मितानि पृथिव्यादीनि पुरूणि बहूनि व्रतानि यज्ञादीनि च न मिनंति । एतानि सर्वाणि तव कर्माणि न हिंसंति । किंत्वाद्रियंते । किंच योऽयमिंद्रः पृथिवीं भूलोकं द्यां द्युलोकं उत अपि चेमामिममंतरिक्षलोकं च एतांस्त्रीन् लोकान् दाधार । सुदंसाः सुकर्मा शोभनकर्मा सन्निंद्रः सूर्यं लोकप्रकाशकमादित्यमुषसमग्निहोत्रादिकर्मनिर्वाहकमुषःकालं जजान । उत्पादयामास ॥ इंद्रस्य कर्म सुकृता पुरूणीत्येतत्पदकदंबकमेको द्वे वसुमती इत्यस्मिन्वर्गे । ऋग्वे॰ ३.२.३. । पठितं । अत्रापि तदेव पठ्यते पदकाले नोत्सृज्यत इति चेत् न । वाक्यभेदात् । तत्रेंद्रस्य कर्म सुकृता पुरूणीत्येकं वाक्यं अत्र तु कर्म सुकृतेत्येकं वाक्यं पुरूणि व्रतानीत्यपरं । किंच तत्रत्यं पदकदंबकं प्रथमांतं अत्रत्यं द्वितीयांतं । अतो वाक्यभेदाद्विभक्तिभेदाच्च पदकाले नोत्सृज्यते ॥ मिनंति । मीञ् हिंसायामित्यस्य लटि रूपं । निघातः । दाधार । धृञ् धारण इत्यस्य लिटि रूपं । तुजादित्वादभ्यासस्य दीर्घः । लित्स्वरः । जजान । जन जनन इत्यस्यांतर्भावितण्यर्थस्य लिटि रूपं । लित्स्वरः । सुदंसाः । सोर्मनसी इत्युत्तरपदाद्युदात्तत्वं ॥

॥ अथ नवमी ॥

अद्रोघ सत्यं तव तन्महित्वं सद्यो यज्जातो अपिबो ह सोमं ।

न द्याव इंद्र तवसस्त ओजो नाहा न मासाः शरदो वरंत ॥ ९ ॥

अद्रोघ । सत्यं । तव । तत् । महिऽत्वं । सद्यः । यत् । जातः । अपिबः । ह । सोमं ।

न । द्यावः । इंद्र । तवसः । ते । ओजः । न । अहा । न । मासाः । शरदः । वरंत ॥ ९ ॥

अद्रोघ द्रोहवर्जित हे इंद्र ते तव तन्महित्वं तादृशं माहात्म्यं सत्यं यथार्थं । यद्यस्माज्जात उत्पन्नः सद्यस्तदानीमेव सोममस्माभिर्दीयमानं सोमरसमपिबः । ह प्रसिद्धौ । किंच तवसो बलवतस्ते तवौजः सामर्थ्यं द्यावो दिवोपलक्षिताः सर्वे लोका न वरंत । न वारयंति । किंच । अहा प्रतिपदादीन्यहानि न वारयंति । तथा मासाश्चैत्राद्याः शरदः संवत्सराश्च तव सामर्थ्यं न वारयंति । किंतु तव सामर्थ्यमनुसृत्य सर्वे वर्तंत इति भावः ॥ अद्रोघ । आमंत्रितस्य चेति षाष्ठिकमा-

द्युदात्तत्वं। अपिबः। यद्योगादनिघातः। मासाः। मसी परिमाने। मस्यते परिमीयते त्रिंशता दिनैरिति मासः। कर्मणि घञ्। ञित्वादाद्युदात्तः। शरदः। शॄ हिंसायामित्यस्मात् शॄदॄभसोऽदिरित्यधिकरणेऽदिप्रत्ययः। शीर्यंतेऽस्यां तृणगुल्मवनस्पतीनां तेजांसीति शरत्। प्रत्ययस्वरः। वरंत। वृञ् वरणे। अंतर्भावितण्यर्थोऽचातिवारणे वर्तते। भौवादिकः। छांदसे लङि रूपं। निघातः॥

सद्यस्क्रीनाम्न्येकाहे निष्केवल्यशस्त्रे त्वं सद्यो अपिब इति सूक्तमुखीया। सूचितं च। त्वं सद्यो अपिबो जात इंद्रानु त्वाहिघ्ने अध देव देवाः। आ० ९.५.। इति॥

॥ सैषा सूक्ते दशमी ॥

त्वं सद्यो अपिबो जात इंद्र मदाय सोमं परमे व्योमन्।
यद्ध द्यावापृथिवी आविवेशीरथाभवः पूर्व्यः कारुधायाः ॥१०॥

त्वं। सद्यः। अपिबः। जातः। इंद्र। मदाय। सोमं। परमे। विऽओमन्।
यत्। ह। द्यावापृथिवी इति। आ। अविवेशीः। अथ। अभवः। पूर्व्यः। कारुऽधायाः॥१०॥

हे इंद्र सद्यस्तदानीमेव जातः परमे व्योमन् उत्तमे स्थाने स्थितस्त्वं मदाय हर्षाय सोममपिबः। यद्यदा त्वं द्यावापृथिवी द्यावापृथिव्यावाविवेशीर्ह। आ समंताद्भृशं प्रविष्टोऽसि खलु। अथानंतरं पूर्व्यः पुरातनः सन् कारुधायाः कर्मणां विधाताभवः खलु॥ व्योमन्। अव रक्षणगत्यादिषु। विपूर्वस्यावतेर्नामन् सामन्नित्यादिना मनिन्। ज्वरत्वरेत्यादिना ऊट्। विशेषेणौम व्याप्तिर्यस्य तत्। सुपां सुलुगित्यादिना सुपो लुक्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। आविवेशीः। विश प्रवेशन इत्यस्य यङ्लुकि लङि सिपि यङो वेतीडागमः। इतश्चेति सिप इकारलोपः। यद्योगादनिघातः। कारुधायाः। कारुः। करोतेः कृवापाजिमिस्वदिसाध्यशूभ्य उण्प्रत्ययः। णित्वाद्वृद्धिः। दधातेर्वहिहाधाञ्भ्यश्छंदसीत्यसुन्। णिदित्यनुवृत्तेरातो युक् चिण् कृतोरिति युगागमः। समासे गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति सूत्रात्पूर्वपदप्रकृतिस्वरः॥

॥ इति तृतीयस्य द्वितीये दशमो वर्गः ॥

॥ तस्मिन्सूक्त एकादशी ॥

अहन्नहिं परिशयानमर्ण ओजायमानं तुविजात तव्यान्।
न ते महित्वमनु भूदध द्यौर्यदन्यया स्फिग्या३ क्षामवस्थाः ॥११॥

अहंन्। अहिं। परिऽशयानं। अर्णः। ओजायमानं। तुविऽजात। तव्यान्।
न। ते। महिऽत्वं। अनु। भूत्। अध। द्यौः। यत्। अन्यया। स्फिग्या। क्षां। अवस्थाः ॥११॥

तुविजात। बहूनि जातानि पृथिव्यादीनि यस्मात्सोऽयं तुविजातः। हे तुविजात इंद्र तव्यानतिशयेन प्रवृद्धस्त्वमर्णः परिशयानमुदकं परितः शयानमुदकमंतः कृत्वा परितो वर्तमानं अत एवौजायमानं बलमाचरंतमहिं। आ समंताद्धंत्यपहरत्युदकमित्यहिर्मेघः। तमिमं मेघमहन्। उदकप्रेरणाय हतवानसि। अध अथ ते महित्वं महिमानं द्यौर्नानुभूत्। नानुभवति। न जानाति। यद्यस्मात्त्वमन्ययैकतरया स्फिग्या कट्या क्षां भूमिमवस्थाः। अवच्छाद्य तिष्ठसि ॥ अहन्। हंतेर्लङि सिब्लोपे रूपं। अहिं। हन हिंसागत्योः। आङि श्रिहनिभ्यां ह्रस्वश्चेति इण्प्रत्ययः। डिच्च पूर्वपदस्य ह्रस्वश्च। वृषादित्वादाद्युदात्तत्वं। ओजायमानं। ओजःशब्दादाचारार्थे कर्तुः क्यङ् सलोपश्चेति क्यङ्प्रत्ययः सलोपश्च। ङित्त्वादात्मनेपदं। प्रत्ययस्वरः। तव्यान्। तु इति सौत्रो धातुः। अस्मात्तृजंतात्तुश्छंदसीतीयसुन्। तुरिष्ठेमेयःस्विति तृचो लोपः। भसंज्ञायामोर्गुणः। इकारलोपश्छांदसः। नित्स्वरः। भूत्। भवतेर्लुङि रूपं। स्फिग्या। यचि भमिति भसंज्ञां बाधित्वा स्वादिष्वसर्वनामस्थान इति पदसंज्ञायां जश्त्वं। तृतीयायाः पूर्वसवर्णः। क्षां। क्षि निवासगत्योः। अन्येभ्योऽपि दृश्यत इति निरुपपदादपि डप्रत्ययः। ततष्टाप्। क्षियंति निवसंत्यस्यां प्राणिन इति क्षा भूमिः। उदात्तनिवृत्तिस्वरेणांतोदात्तः। अवस्थाः। वस आच्छादन इत्यस्य लङ्यनुदात्तत्वादात्मनेपदं। थास्यदादित्वाच्छपो लुक्। यद्योगादनिघातः। अडागमस्वरः ॥

॥ अथ द्वादशी ॥

यज्ञो हि त इंद्र वर्धनो भूदुत प्रियः सुतसोमो मियेधः।
यज्ञेन यज्ञमव यज्ञियः सन्यज्ञस्ते वज्रमहिहत्य आवत् ॥१२॥

यज्ञः। हि। ते। इंद्र। वर्धनः। भूत्। उत। प्रियः। सुतऽसोमः। मियेधः।
यज्ञेन। यज्ञं। अव। यज्ञियः। सन्। यज्ञः। ते। वज्रं। अहिऽहत्ये। आवत् ॥१२॥

हे इंद्र अस्मदीयो यज्ञस्ते तव वर्धनो हविःप्रदानेन वर्धयिता भूद्धि। भवति खलु। उत अपि च सुतसोमोऽभिषुतसोमवान्मियेधो यज्ञस्तव प्रियः। स त्वं यज्ञियो यज्ञार्हः सन् यज्ञं यज्ञस्य कर्तारं यजमानं यज्ञेनानुष्ठीयमानेनानेनाव।

फलप्रदानेन रक्ष। किंचायं यज्ञस्ते तव वज्रमहिहत्ये वृत्रहनने कर्मण्यावत्। रक्षतु॥ वर्धनः। वृधु वर्धन इत्यस्य ण्यंतस्य नंद्यादित्वात् ल्युप्रत्ययः। लित्स्वरः। भूत्। हियोगादनिघातः। अव। अवतेर्लोटि रूपं। निघातः। सन्। असेः शतरि रूपं। प्रत्ययस्वरः। अहिहत्ये। हन हिंसागत्योरित्यस्य भावे हनस्त चेति क्यप् तकारश्चांतादेशः। कृदुत्तरपदस्वरः। आवत्। अवतेश्छांदसे लङि रूपं। निघातः॥

॥ अथ त्रयोदशी ॥

यज्ञेनेंद्रमवसा चक्रे अर्वागैनं सुम्नाय नव्यसे ववृत्यां।
यः स्तोमेभिर्वावृधे पूर्व्येभिर्यो मध्यमेभिरुत नूतनेभिः॥१३॥

यज्ञेन। इंद्रं। अवसा। आ। चक्रे। अर्वाक्। आ। एनं। सुम्नाय। नव्यसे। ववृत्यां।
यः। स्तोमेभिः। ववृधे। पूर्व्येभिः। यः। मध्यमेभिः। उत। नूतनेभिः॥१३॥

हे इंद्र सर्वो यजमानोऽवसा स्वरक्षकेण यज्ञेनेंद्रं त्वामर्वागाचक्रे। हविःप्रदानेनाभिमुखं करोति। तथाहं नव्यसे नवतराय सुम्नाय धनायैनं त्वामा ववृत्यां। यज्ञेनावृत्तं मदभिमुखं कुर्यां। कीदृशस्त्वं। यः पूर्व्येभिः पुरातनैः स्तोमेभिः स्तोत्रैर्ववृधे। तथा य इंद्रो मध्यमेभिर्मध्ये भवैः स्तोत्रैरुतापि च नूतनेभिरस्माभिः क्रियमाणैरधुनातनैः स्तोत्रैर्वर्धते॥ चक्रे। करोतेर्लिटि रूपं। नव्यसे। नवशब्दादीयसुनि भसंज्ञायामकारलोप ईकारलोपश्छांदसः। नित्त्वादाद्युदात्तः। ववृत्यां। वृतु वर्तने। लिङि बहुलं छंदसीति शपः श्लुः। व्यत्ययेन परस्मैपदं। निघातः। ववृधे। वृधु वर्धन इत्यस्य लिटि रूपं। प्रत्ययस्वरः। मध्यमेभिः। मध्यशब्दात् शैषिकार्थे मध्यान्मः। पा० ४.३.८.। इति मप्रत्ययः। प्रत्ययस्वरः। नूतनेभिः। नवशब्दस्य त्नप्तनप्खाश्च प्रत्यया वक्तव्या नू इत्यादेशश्चेति तनप्प्रत्ययो नू इत्यादेशश्च॥

॥ अथ चतुर्दशी ॥

विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिंद्रमह्नः।
अंहसो यत्र पीपरद्यथा नो नावेव यांतमुभये हवंते॥१४॥

विवेष। यत्। मा। धिषणा। जजान। स्तवै। पुरा। पार्यात्। इंद्रं। अह्नः।
अंहसः। यत्र। पीपरत्। यथा। नः। नावाऽइव। यांतं। उभये। हवंते॥१४॥

यद्यदा धिषणेंद्रं स्तवानीति मदीया बुद्धिर्मा विवेष व्याप्नोत् तदाहं स्तोत्रं

जजान। करोमि। बुद्धेः स्वरूपं दर्शयति। अहं पार्यात्पारे भवादतिदूरवर्तिनो विघ्नकारिणोऽहूः पुरा पूर्वं स्तवै। स्तवानि। यत्र यस्यां धिषणायामेव जातायां सत्यां स इंद्रो नोऽस्मानंहसः पापरूपाद्दारिद्र्याद्यथा पीपरत् यथा पारं नयेत् तथास्मदुभयपार्श्ववर्तिधनार्थिनो जना हवंते। आह्वयंति। तत्र दृष्टांतः। नावेव यांतं। यथा नद्यादिषु नौकया यांतं गच्छंतं पुरुषमुभय उभयकूलवर्तिनो जना हवंते। आह्वयंति। तद्वत्॥ विवेष। विष्लृ व्याप्तावित्यस्य लिटि णलि रूपं। लित्स्वरः। जजान। जन जनन इत्यस्य लिट्युत्तमे णलि रूपं। वाक्यभेदाद-निघातः। अंहसः। अम गत्यादिषु। अमेर्हुक् च। उ॰ ४. २१२.। इत्यसुन्प्रत्ययो हुगागमश्च। नित्स्वरः। पीपरत्। पॄ पालनपूरणयोरित्यस्य लुङि चङि ह्रस्वा-भ्यासेत्वदीर्घगुणाः। यथायोगादनिघातः। लित्स्वरः। नावेव। नुद प्रेरण इत्य-स्माद्ग्लानुदिभ्यां डौः। उ॰ २. ६४.। इति डौप्रत्ययः। नुद्यत इति नौः प्लवः। सावे-काच इति तृतीयाया उदात्तत्वं। इवेन नित्यसमासो विभक्त्यलोप इत्यादि। उभये। उभशब्दात्परस्य तयप उभादुदात्तो नित्यं। पा॰ ५. २. ४४.। इत्ययजादेशः। वचनसामर्थ्यादादेरुदात्तत्वं। हवंते। ह्वयतेर्लटि रूपं॥

माध्यंदिने सवन आग्नीध्रीयस्य आ पूर्णो अस्येति प्रस्थितयाज्या। सूत्रितं च। आ पूर्णो अस्य कलशः स्वाहेति माध्यंदिन्यः। आ॰ ५. ५.। इति॥

॥ सैषा सूक्ते पंचदशी॥

आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै।
समु प्रिया आववृत्रन्मदाय प्रदक्षिणिदभि सोमास इंद्रं॥१५॥

आऽपूर्णः। अस्य। कलशः। स्वाहा। सेक्ताऽइव। कोशं। सिसिचे। पिबध्यै।
सं। ऊं इति। प्रियाः। आ। अववृत्रन्। मदाय। प्रऽदक्षिणित्। अभि। सोमासः। इंद्रं॥१५॥

हे इंद्र अस्य तव पानार्थं कलशो द्रोणकलशः सोमेनापूर्णः। स्वाहा स्वाहा-कृतो दत्तश्च सोमसहितः कलशः पिबध्यै तव पानार्थं। सिसिचे। तं सोमं चोदि-ताधारे सिंचामि। तत्र दृष्टांतः। कोशं सेक्तेव। यथा सेक्तोत्सेचको जलपूर्णात्को-शात् दृतेः सकाशाज्जलं पात्रांतरे सिंचति तद्वत्। प्रियाः स्वादुतमाः सोमासो दत्तास्ते सोमा इंद्रं त्वामभि अभिलक्ष्यैव मदाय तव हर्षार्थं प्रदक्षिणित् प्राद-क्षिण्येन समाववृत्रन्। सम्यगावृत्य वर्तंतां॥ आपूर्णः। पॄ पालनपूरणयोरित्यस्य

कर्मणि निष्ठा। रदाभ्यामिति तस्य नत्वं। गतिरनंतर इति गतिस्वरः। स्वाहा। निपातत्वादाद्युदात्तः। सेक्तेव कोशं। न लोकाव्ययेति षष्ठीप्रतिषेधः। सिसिचे। षिच क्षरण इत्यस्य लिटि रूपं। पिबध्यै। पा पान इत्यस्य तुमर्थे शध्यैन्प्रत्ययः। शित्त्वात्पिबादेशः। नित्त्वादाद्युदात्तः। अववृत्रन्। वृतु वर्तन इत्यस्य लङि शप्। बहुलं छंदसीति तस्य शपः श्लुः। व्यत्ययेन परस्मैपदं। बहुलं छंदसीति झे रुडागमः॥

॥ अथ षोडशी ॥

न त्वा॑ ग॒भी॒रः पु॑रुहू॒त सिंधु॒र्नाद्र॑यः॒ परि॒ षंतो॑ वरंत।
इ॒त्था सखि॑भ्य इषि॒तो यदि॑द्रा दृ॒ळ्हं चि॒दरु॑जो॒ गव्य॑मू॒र्वं ॥१६॥
न। त्वा॒। ग॒भी॒रः। पु॒रु॒ऽहू॒त॒। सिंधुः॑। न। अद्र॑यः। परि॑। संतः॑। व॒रं॒त॒।
इ॒त्था। सखि॑ऽभ्यः। इ॒षि॒तः। यत्। इं॒द्र॒। आ। दृ॒ळ्हं। चि॒त्। अरु॑जः। गव्यं॑। ऊ॒र्वं ॥१६॥

हे पुरुहूतेंद्र गभीरो गंभीरः सिंधुः समुद्रस्त्वा त्वां न वारयति। ततः परि परितो वर्तमानाः संतोऽद्रयः शैलास्त्वां न वरंत। न वारयंति। किंतु त्वामनुसृत्य वर्तंते। यद्यस्मादित्थेत्थमनेन प्रकारेण सखिभ्यः सखिभिर्देवैरिषितः प्रार्थितस्त्वं दृळ्हं चिदतिप्रबलमपि गव्यं गवि भवमवटे वर्तमानमूर्वमूर्वानलमारुजः। सम्यगभांक्षीः॥ गभीरः। गाधृ प्रतिष्ठालिप्सयोर्ग्रंथे च। अस्मादीरच्प्रत्ययः। धकारस्य भकार आकारस्य ह्रस्वश्च गभीरगंभीरौ। उ० ४. ३५.। इत्यनेन निपात्यते। चित्स्वरः। सिंधुः। स्यन्दू प्रस्रवणे। स्यंदेः संप्रसारणं धश्चेत्युप्रत्ययः संप्रसारणं दकारस्य धकारः। निदित्यनुवृत्तेराद्युदात्तः। परि षंतः। संतः। अस्तेः शतरि रूपं। उपसर्गप्रादुर्भ्यामस्तिर्यच्पर इति षत्वं। केचित्परेः क्रियान्वयमिच्छंति। तदा षत्वमनुपपन्नं। परि। निपातस्वरः। संतः। प्रत्ययस्वरः। वरंत। वृञ् वरणे। भौवादिकः। लङि रूपं। निघातः। अरुजः। रुजो भंग इत्यस्य लङि रूपं। गव्यं। गोर्विकार इत्यर्थे गोपयसोर्यदिति यत्। यतोऽनाव इत्याद्युदात्तत्वं॥

॥ अथ सप्तदशी ॥

शु॒नं हु॑वेम म॒घवा॑न॒मिंद्र॑म॒स्मिन्भरे॒ नृत॑मं॒ वाज॑सातौ।
शृ॒ण्वंत॑मु॒ग्रमू॒तये॑ स॒मत्सु॒ घ्नंतं॑ वृ॒त्राणि॑ सं॒जितं॒ धना॑नां ॥१७॥

शुनं। हुवेम। मघऽवानं। इंद्रं। अस्मिन्। भरे। नृऽतमं। वाजऽसातौ।
शृण्वंतं। उग्रं। ऊतये। समत्ऽसु। घ्नंतं। वृत्राणि। संऽजितं। धनानां ॥१७॥

एषा ऋक् पूर्वमेव व्याख्याता ॥

॥ इति तृतीयस्य द्वितीय एकादशो वर्गः ॥

प्र पर्वतानामिति त्रयोदशर्चं चतुर्थं सूक्तं। अत्रेयमनुक्रमणिका। प्र पर्वतानां सप्तोना संवादो नदीभिर्विश्वामित्रस्योत्तितीर्षोस्तत्र नदीवाक्यं चतुर्थीषष्ठ्यष्टमीदशम्यः षष्ठीसप्तम्योस्त्विंद्रस्तुतिरंत्यानुष्टुबिति। अत्र चतुर्थीषष्ठ्यष्टमीदशमीनां नदीवाक्यत्वान्नद्य एव ऋषयः शिष्टानां विश्वामित्रवाक्यत्वात्स एव ऋषिः। अंत्यानुष्टुप् शिष्टास्त्रिष्टुभः। इंद्रो देवता। यद्यपि षष्ठ्यां सप्तम्यां च विश्वामित्रो नद्यश्च स्तूयंते तथापींद्र एव देवता ॥ सूक्तविनियोगो लैंगिकः ॥ पुरा किल विश्वामित्रः पैजवनस्य सुदासो राज्ञः पुरोहितो बभूव। स च पौरोहित्येन लब्धधनः सर्वं धनमादाय विपाट्छुतुद्र्योः संभेदमाययावनुययुरितरे। अथोत्तितीर्षुर्विश्वामित्रोऽगाधजले ते नद्यौ दृष्ट्वोत्तरणार्थमाद्याभिस्तिसृभिस्तुष्टाव ॥

॥ तत्रैषा सूक्ते प्रथमा ॥

प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने।
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते ॥१॥

प्र। पर्वतानां। उशती इति। उपऽस्थात्। अश्वे इवेत्यश्वेऽइव। विसिते इति विऽसिते। हासमाने इति।
गावाऽइव। शुभ्रे इति। मातरा। रिहाणे इति। विऽपाट्। शुतुद्री। पयसा। जवेते इति ॥१॥

पर्वतानां गिरीणां शैलानामुपस्थादुत्संगान्निर्गत्योशती समुद्रगमनं कामयमाने। गमने दृष्टांतः। अश्वे इव। यथा विषिते मंदुरातो विमुक्ते हासमाने अन्योन्यजवेन स्पर्धमाने। यद्वा हृष्यंत्यावश्वे इव वडवे इव त्वरया गच्छंत्यौ परस्परं हृष्यंत्यौ। तथा गावेव शुभ्रे। यथा द्वौ गावौ शोभमानौ वर्तेते तद्वच्छुभ्रे शोभमाने। किंच मातरा। यथा मातरौ धेनू रिहाणे। अंतर्णीतसनर्थो लिहिः। वत्सं जिह्वया लेढुमिच्छंत्यौ शीघ्रं गच्छतस्तद्वत्समुद्रं गंतुं जवाद्गच्छंत्यौ पयसा संयुक्ते विपाट्। कूलविपाटनात् विपाशनाद्वा विमोचनाद्वा विपाट्। शुतुद्री शु

क्षिप्रं तु तुन्ना तुन्नेव द्रवति गच्छतीति शुतुद्री। एतन्नामके नद्यौ प्रजवेते। समुद्रं प्रति शीघ्रं गच्छतः। अत्र निरुक्तं। पर्वतानामुपस्थादुपस्थानादुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषखे इति वा हासमाने हासतिः स्पर्धायां हर्षमाणे वा गावाविव शुभ्रे शोभने मातरौ संरिहाणे विपाट्छुतुद्र्यौ पयसा प्रजवेते। नि॰ ९. ३९.। इति॥ उशती। वश कांतौ। अस्य शतुर्ङित्त्वाद्ग्रहिज्यावयीत्यादिना संप्रसारणं। विषिते। षिञ् बंधन इत्यस्य कर्मणि निष्ठा। संहितायां परिनिविभ्यः सेवसितसयसिवुसहेत्यादिना। पा॰ ८. ३. ७०.। षत्वं। गतिरनंतर इति गतेः प्रकृतिस्वरः। हासमाने। हासतिः स्पर्धाकर्मा हसे हसने वा। शानच्। तस्य लसार्वधातुकस्वरे कृते धातुस्वरः। रिहाणे। लिह आस्वादने। स्वरितेत्त्वादुभयपदी। शानच्। अदादित्वाच्छपो लुक्। लकारस्य रेफश्छांदसः। रेफमवलंब्य णत्वं। चित्त्वादंतोदात्तः। विपाट्। पट गतौ पश बाधनस्पर्शनयोरिति वा ण्यंतावेतौ विपूर्वौ। शकारस्य व्रश्चादिना षत्वं। शुतुद्री। छांदसी रूपसिद्धिः। जवेते। जुङ् गतौ। भौवादिकः। ङित्त्वादात्मनेपदं। आतो ङित इतीयादेशः। निघातः॥

॥ अथ द्वितीया ॥

इंद्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः।
समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे ॥२॥

इंद्रेषिते इतींद्रऽइषिते। प्रऽसवं। भिक्षमाणे इति। अच्छ। समुद्रं। रथ्याऽइव। याथः। समाराणे इति संऽआराणे। ऊर्मिऽभिः। पिन्वमाने इति। अन्या। वां। अन्यां। अपि। एति। शुभ्रे इति ॥२॥

हे नद्यौ इंद्रेषिते इंद्रेण प्रेषिते प्रसवं तस्येंद्रस्यानुज्ञां भिक्षमाणे प्रार्थयमाने युवां समुद्रमच्छाभिमुख्येन याथः। गच्छथः। तत्र दृष्टांतः। रथ्येवेति। यथा रथिनौ लक्ष्यं देशमभिगच्छतस्तद्वत्। किं कुर्वत्यौ। समाराणे परस्परं संगच्छंत्यावूर्मिभिस्तरंगैः पिन्वमाने परिसरप्रदेशं संतर्पयंत्यौ शुभ्रे शोभमाने। युवां समुद्रं गच्छथ इति पूर्वेणान्वयः। तथा वां युवयोर्मध्येऽन्यैकान्यामपरां नदीमप्येति। अपिगच्छति। परस्परमैक्यमापद्यत इत्यर्थः॥ इंद्रेषिते। इष गतावित्यस्य कर्मणि निष्ठायास्तीषसहेत्यादिना इडागमः। तृतीया कर्मणीति पूर्वपदस्वरः। प्रसवं। षू प्रेरण इत्यस्याप्। थाथादिस्वरः। भिक्षमाणे। भिक्ष याच्ञायां।

आत्मनेपदी। शानचो लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः। रथ्येव। रथस्येमौ। तस्येदमित्यर्थे रथाद्यदिति यत्प्रत्ययः। तित्स्वरितः। इवेन विभक्त्यलोपः। याथः। यातेर्लेटि रूपं। समाराणे। ऋ गतावित्यस्य लिट्। संपूर्वस्यार्तेः समो गमीत्यादिनात्मनेपदत्वात्तस्य कानजादेशः। ऋच्छत्यृतामिति गुणः। पिन्वमाने। पिवि सेचने। भूवादिः। लसार्वधातुकस्वरेण शानचोऽनुदात्तत्वे धातुस्वरः॥

॥ अथ तृतीया ॥

अच्छा सिंधुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म।
वत्समिव मातरा संरिहाणे समानं योनिमनु संचरंती ॥३॥
अच्छ। सिंधुं। मातृऽतमां। अयासं। विऽपाशं। उर्वीं। सुऽभगां। अगन्म।
वत्संऽइव। मातरा। संरिहाणे इति संऽरिहाणे। समानं। योनिं। अनु। संचरंती इति संऽचरंती ॥३॥

हे नद्यौ मातृतमामतिशयेन मातरं सिंधुं स्रवंतीं शुतुद्रीं त्वामच्छाभिमुख्येनायासं। विश्वामित्रोऽहं प्राप्तोऽभूवं। उर्वीं महतीं सुभगां सौभाग्यवतीं विपाशं त्वामगन्म। वयं प्राप्ताः स्मः। किं कुर्वंत्यौ। मातरा मातरौ द्वे धेनू वत्समिव संरिहाणे। अंतर्णीतसनर्थो लिहिः। जिह्वया लेढुमिच्छंत्यौ यथा वत्समनुगच्छतस्तद्वत् समानमेकं योनिं स्थानं समुद्रमनु अभिलक्ष्य संचरंती सम्यक् चरंत्यौ। युवामयासिषमिति पूर्वेणान्वयः॥ अयासं। या प्रापण इत्यस्य रूपं। इडभावश्छांदसः। अगन्म। गमेर्लङि बहुलं छंदसीति शपो लुक्। म्वोश्चेति मकारस्य नकारः। निघातः। संचरंती। चरतिर्गत्यर्थः। तृतीयायुक्तत्वाभावादात्मनेपदाभावः। शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः॥

॥ अथ चतुर्थी ॥

एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरंतीः।
न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति ॥४॥
एना। वयं। पयसा। पिन्वमानाः। अनु। योनिं। देवऽकृतं। चरंतीः।
न। वर्तवे। प्रऽसवः। सर्गऽतक्तः। किंऽयुः। विप्रः। नद्यः। जोहवीति ॥४॥

एवं स्तुते नद्यौ विश्वामित्रं प्रत्यूचतुः। एनैनेन पयसा पिन्वमानाः संतर्पयंत्यो

देवकृतं देवेनेंद्रेण कृतं संदिष्टं योनिं स्थानं समुद्रमनु लक्षीकृत्य चरंतीर्गच्छंत्यो वयमास्महे। द्वयोर्बहुवचनं पूजार्थं। तासामस्माकं सर्गतक्तः सर्गे गमने प्रवृत्तः प्रसव उद्योगो न वर्त्तवे। निवर्तनाय न भवति। किंयुः किमिच्छन्नसौ विप्रो ब्राह्मणो नद्यो नदीरस्मान् जोहवीति। भृशमाह्वयति॥ एना। इदंशब्दस्य तृतीयाया एनादेशः। सुपां सुलुगिति तृतीयाया आजादेशः। ऊडिदमिति विभक्तेरुदात्तत्वं। पिन्वमानाः। पिवि सेचने। देवकृतं। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः। वर्त्तवे। वृतु वर्तने। तुमर्थे तवेन्प्रत्ययः। नित्स्वरः। सर्गतक्तः। क्ते चेति पूर्वपदप्रकृतिस्वरः। किंयुः। किमिच्छन्। क्यचो मांताव्ययप्रतिषेध इति छांदसत्वादत्र प्रतिषेधो न भवतीति क्यच्। क्याच्छंदसीत्युप्रत्ययः। प्रत्ययस्वरः। नद्यः। छांदसो यणादेशः। जोहवीति। ह्वयो यङ्लुक्यभ्यस्तस्य चेति संप्रसारणे कृते गुणो यङ्लुकोरित्यभ्यासस्य गुणः। ङो वेतीडागमः। गुणः। निघातः॥

॥ अथ पंचमी ॥

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः।
प्र सिंधुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः॥५॥
रमध्वं। मे। वचसे। सोम्याय। ऋतऽवरीः। उप। मुहूर्तं। एवैः।
प्र। सिंधुं। अच्छ। बृहती। मनीषा। अवस्युः। अह्वे। कुशिकस्य। सूनुः॥५॥

विश्वामित्रो नदीः प्रति ब्रूते। ऋतावरीः। ऋतमुदकं। तद्वत्यो हे नद्यो यूयं मे विश्वामित्रस्य मम सोम्याय उत्तीर्याहं सोमं संपादयामीत्येवं सोमसंपादिने वचसे तदर्थमेवैः। पंचम्यर्थे तृतीया। शीघ्रगमनेभ्यो मुहूर्तं मुहूर्तमात्रमुपरमध्वं। उपपूर्वो रमिरुपसंहारे वर्तते। क्षणमात्रं शीघ्रगमनादुपरता भवत। सामान्येन नदीषूच्यमानासु समीहितं प्रयोजनमकुर्वतीषु पुरोवर्तिनीं शुतुद्रीं प्रति ब्रूते। कुशिकस्य राजर्षेः सूनुर्विश्वामित्रोऽहं बृहती महत्या मनीषा मनीषया स्तुत्यावस्युरात्मनो रक्षणमिच्छन् सन् सिंधुं शुतुद्रीं त्वामच्छाभिमुख्येन प्राह्वे। प्रकर्षेणाह्वयामि। अत्र निरुक्तं। उपरमध्वं मे वचसे सोम्याय सोमसंपादिन ऋतावरीर्ऋतवत्य ऋतमित्युदकनाम प्रत्यृतं भवति मुहूर्तमेवैरयनैरवनैर्वा। प्राभिह्वयामि सिंधुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वावनाय कुशिकस्य सूनुः कुशिको राजा बभूव। नि॰ २.२५.। इति॥ रमध्वं। रमु उपरमे। उपपूर्वा-

द्रमतेर्विभाषाकर्मकात्। पा॰ १.३.८५.। इत्यात्मनेपदं। ऋतावरीः। ऋतशब्दान्मत्वर्थे छंदसीवनिपाविति वनिप्। वनो र चेति ङीप् रेफश्चांतादेशः। वा छंदसीति सवर्णदीर्घः। आमंत्रितस्य पादादित्वात्षाष्ठिकमाद्युदात्तत्वं। एवैः। इण् गतौ। इण्शीङ्भ्यां वन्। आर्द्धधातुकलक्षणो गुणः। नित्स्वरः। बृहती मनीषा। उभयत्र तृतीयायाः पूर्वसवर्णदीर्घः। अवस्युः। अवो रक्षणमिच्छन्। सुप आत्मनः क्यच्। नः क्य इति नकारांतस्य पदसंज्ञाया नियमितत्वादत्र सकारस्य रुर्न भवति। क्याच्छंदसीत्युप्रत्ययः। अह्वे। ह्वयतेर्लुङि सिच आत्मनेपदेष्वन्यतरस्यां। पा॰ ३.१.५४.। इत्यङादेशः। गुणः। निघातः॥

॥ इति तृतीयस्य द्वितीये द्वादशो वर्गः॥

॥ अथ तस्मिन्सूक्ते षष्ठी॥

इंद्रो॑ अ॒स्माँ अ॑रद॒द्वज्र॑बाहु॒रपा॑हन्वृ॒त्रं प॑रि॒धिं न॒दीनां॑।
दे॒वो॑ऽनयत्सवि॒ता सु॑पा॒णिस्तस्य॑ व॒यं प्र॑स॒वे या॑म उ॒र्वीः॥६॥
इंद्रः॑। अ॒स्मान्। अ॒र॒द॒त्। वज्र॑ऽबाहुः। अप॑। अ॒ह॒न्। वृ॒त्रं। प॒रि॒ऽधिं। न॒दीनां॑।
दे॒वः। अ॒न॒य॒त्। स॒वि॒ता। सु॒ऽपा॒णिः। तस्य॑। व॒यं। प्र॒ऽस॒वे। या॒मः॒। उ॒र्वीः॥६॥

नद्यः प्रत्यूचुः। हे विश्वामित्र वज्रबाहुः। वज्रयुक्तो बाहुर्यस्यासौ वज्रबाहुः। तादृशो बलवानिंद्रो नदीरस्मानरदत्। रदतिः खनतिकर्मा। अखनत्। कथमखनत्। उच्यते। नदीनां शब्दकारिणीनामपां परिधिं परितो निहितमुदकमंतः कृत्वा परितो वर्तमानमित्यर्थः। तादृशं वृत्रं। वृणोत्याकाशमिति वृत्रो मेघः। तं मेघमपाहन्। जघान। तस्मिन्हत आपः पतिताः। ताभिर्गच्छंतीभिर्वयं खाताः। एवं मेघहननद्वारेणाखनत्। न केवलमखनत् किं तर्हि सविता सर्वस्य जगतः प्रेरकः सुपाणिः शोभनहस्त उत्पत्तिस्थितिकर्तृत्वात्तादृशो देवो द्योतमान इंद्रोऽस्माननयत्। मेघभेदनं कृत्वोदकप्रेरणेन समुद्रमपूरयत्। तस्य तादृशसामर्थ्योपेतस्येंद्रस्य प्रसवेऽभ्यनुज्ञायां वर्तमाना उर्वीरुदकैः प्रभूता वयं यामः। गच्छामः। न तव वचनादुपरमामहे। उक्तार्थं यास्को ब्रवीति। इंद्रो अस्मानरदद्वज्रबाहू रदतिः खनतिकर्मापाहन्वृत्रं परिधिं नदीनामिति व्याख्यातं। देवोऽनयत्सविता सुपाणिः कल्याणपाणिः। पाणिः पणायतेः पूजाकर्मणः प्रगृह्य पाणी देवान्पूजयंति। तस्य वयं प्रसवे याम उर्वीरुर्व्यः। नि॰ २.२६.। इति॥ अरदत्। रद-

तेर्लङि रूपं। वज्रबाहुः। बहुव्रीहौ पूर्वपदस्वरः। अहन्। हंतेर्लङि रूपं। निघातः। परिधिं। डुधाञ् धारणपोषणयोरित्यस्मात्कर्मण्युपसर्गे घोः किरिति किप्रत्ययः। आतो लोपः। कृदुत्तरपदस्वरः। अनयत्। नयतेर्लङि रूपं। सुपाणिः। पण व्यवहारे स्तुतौ च। अशिपणाय्यो रुडायलुकौ च। उ° ४.१३४। इतीण्। आयलुक्। बहुव्रीहौ नञ्सुभ्यामिति स्वरः। प्रसवे। षू प्रेरणे। ऋदोरबिति भावेऽप्प्रत्ययः। थाथघञ्क्तेत्युत्तरपदांतोदात्तत्वं। यामः। या प्रापण इत्यस्य लटि रूपं। निघातः। उर्वीः। उरुशब्दाद्वोतो गुणवचनादिति ङीष्। वा छंदसीति सवर्णदीर्घः। प्रत्ययस्वरः॥

॥ अथ सप्तमी ॥

प्रवाच्यं शश्वधा वीर्यं१तदिंद्रस्य कर्म यदहिं विवृश्चत्।
वि वज्रेण परिषदो जघानायन्नापोऽयनमिच्छमानाः॥७॥
प्रऽवाच्यं। शश्वधा। वीर्यं। तत्। इंद्रस्य। कर्म। यत्। अहिं। विऽवृश्चत्।
वि। वज्रेण। परिऽसदः। जघान। आयन्। आपः। अयनं। इच्छमानाः॥७॥

योऽयमिंद्रोऽहिं मेघं विवृश्चत् उदकप्रेरणार्थं जघानेति यत्कर्म छेदनरूपं तदिदं तस्येंद्रस्य वीर्यं सामर्थ्यं शश्वधा सर्वदा प्रवाच्यं। प्रकर्षेण वचनीयं। तथा स इंद्रः परिषदः परितः सीदत आसीनान् प्रतिबंधकारिणोऽसुरान् वज्रेण विजघान। अथायनं स्थानमिच्छमाना इच्छंत्य आप आयन्। यांति॥ प्रवाच्यं। वच परिभाषण इत्यस्माहहलोर्ण्यदिति ण्यत्। णित्त्वादुपधावृद्धिः। वचोऽशब्दसंज्ञायां। पा° ७.३.६७। इति कुत्वाभावः। व्यत्ययेनाद्युदात्तत्वं। यद्वा वाचयतेरचो यत्। यतोऽनाव इति स्वरः। शश्वधा। शश्वच्छब्दात्स्वार्थे धाप्रत्ययस्तकारलोपश्च द्रष्टव्यः। विवृश्चत्। ओव्रश्चू छेदने। तुदादिः। लङि ग्रहिज्यावयीत्यादिना संप्रसारणं। सह सुपेत्यत्र सहेति योगविभागात्समासः। समासस्वरः। परिषदः। क्विप्। संहितायां सदेरप्रतेरिति षत्वं। जघान। हंतेर्लिटि णलि रूपं। निघातः। आयन्। अय गतावित्यस्य लङि रूपं। पादादित्वादनिघातः। इच्छमानाः। इषु इच्छायामित्यस्माद्व्यत्ययेन शानच्। तस्य लसार्वधातुकस्वरे कृते प्रत्ययस्वरः॥

॥ अथाष्टमी ॥

एतद्वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि ।
उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते ॥ ८॥
एतत् । वचः । जरितः । मा । अपि । मृष्ठाः । आ । यत् । ते । घोषान् । उत्ऽतरा । युगानि ।
उक्थेषु । कारो इति । प्रति । नः । जुषस्व । मा । नः । नि । करिति कः । पुरुषऽत्रा ।
नमः । ते ॥ ८॥

नद्यः प्रसंगादिंद्रस्तोत्रं कृत्वा विश्वामित्रं प्रत्यूचुः । जरितः स्तोतर्हे विश्वामित्र ते त्वदीयं यत्संवादात्मकं वचस्त्वं नोऽभीत्याघोषानुद्घोषयन्वर्तसे तद्वचो मापिमृष्ठाः । मा विस्मार्षीः । किं कारणं । उत्तरा युगान्युत्तरेषु याज्ञिकेषु युगेष्वहःसूक्थेषु कारो शस्त्राणां कर्तस्त्वं नोऽस्मान्प्रतिजुषस्व । संवादात्मकेन तेन वाक्येन प्रतिसेवस्व। इदानीं नोऽस्मान् पुरुषत्रा पुरुषेषु मा निकः। उक्तिप्रत्युक्तिरूपसंवादवाक्याध्यापनेन नितरां पुंवत् प्रागल्भ्यं मा कार्षीः । ते तुभ्यं नमः ॥ मृष्ठाः । मृजूष् शुद्धावित्यस्य लङि व्यत्ययेनात्मनेपदं । अदादित्वाच्छपो लुक् । व्रश्चादिना षत्वं । निघातः । घोषान् । घुषिर् संशब्दन इत्यस्य शतरि सर्वविधीनां छंदसि विकल्पितत्वादतो गुण इति पररूपत्वाभावः । सवर्णदीर्घः । शतुर्लसार्वधातुकस्वरे कृते धातुस्वरः । युगानि । युजिर् योगे। उंछादिषु घञंतत्वेन निपातनाद्गुणत्वं । विशिष्टविषयं च निपातनमिष्यते । कालविशेषरथाद्युपकरणे चेति तत्र पाठादेवांतोदात्तत्वं । कालाध्वनोरत्यंतसंयोग इति द्वितीया । कारो । करोतेः कृवापाजिमीत्यादिना उण्प्रत्ययः । आमंत्रितत्वान्निघातः । कः । करोतेर्लुङि च्लेर्मंत्रे घसेत्यादिना लुक् । हल्ङ्यादिना सिचो लोपः । न माङ्योग इत्यडभावः । पुरुषत्रा । देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलमिति सप्तम्यर्थे त्राप्रत्ययः । प्रत्ययस्वरः ॥

॥ अथ नवमी ॥

ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन ।
नि षू नमध्वं भवता सुपारा अधोअक्षाः सिंधवः स्रोत्याभिः ॥ ९॥
ओ इति । सु । स्वसारः । कारवे । शृणोत । ययौ । वः । दूरात् । अनसा । रथेन ।
नि । सु । नमध्वं । भवत । सुऽपाराः । अधःऽअक्षाः । सिंधवः । स्रोत्याभिः ॥ ९॥

विश्वामित्रो नदीः प्रत्युवाच। स्वसारो भगिन्यः सिंधवो हे नद्यः कारवे स्तोत्रं कुर्वाणस्य मम वचनं सु सुष्ठु ओ शृणोत। शृणुतैव। अनसा शकटेन रथेन च सह दूराद्विप्रकृष्टाद्देशाद्वो युष्मान्ययौ। प्राप्तोऽस्मि। यूयं सु सुष्ठु निनमध्वं। आत्मना स्वयं प्रह्वा भवत। तथा सुपाराः। रथादीनां तीरात्सुखेनावरोहणारोहणे यथा स्यातां तथा शोभनरोधसश्च भवत। किंच यूयं स्रोत्याभिः स्रवणशीलाभिरद्भिरधोअक्षा रथांगस्याक्षस्याधस्ताद्भवत। यदापोऽक्षस्याधस्ताद्भवंति तदा रथादीनि नेतुं शक्यंते। तस्मात्तत्परिमाणोदका भवतेत्यर्थाभिप्रायः॥ ओ इति प्रगृह्यसंज्ञा। शृणोत। श्रु श्रवण इत्यस्य लोटि तप्रत्ययस्य तप्तनप्तनाश्चेति तबादेशः। पित्त्वाद्गुणः। निघातः। ययौ। या प्रापण इत्यस्य भूतमात्रे लिट्युत्तमे णल्यात औ णल इत्यौकारः। एकादेशस्वरः। वः। युष्मच्छब्दस्य द्वितीयाया बहुवचनस्य वस्नसाविति वसादेशः। षू। निपातस्येति संहितायां दीर्घः। नमध्वं। णमु प्रह्वत्वे शब्दे चेत्यस्य कर्मकर्तरि न दुहस्नुनमां यक्चिणाविति प्रतिषेधाद्यगभावः। अधोअक्षाः। अधरशब्दस्य पूर्वाधरावराणामसि पुरधवश्चैषामित्यसिप्रत्ययोऽधादेशश्च। अक्षशब्दोऽशू व्याप्तावित्यस्मादशेर्देवने। उ॰ ३.६५.। इति सप्रत्ययांतः। कृदुत्तरपदप्रकृतिस्वरः। सिंधवः। आमंत्रितत्वान्निघातः। स्रोत्याभिः। स्रोतःशब्दात्स्रोतसो विभाषा ड्यड्ड्यौ। पा॰ ४.४.११३.। इति ड्यप्रत्ययः। डित्त्वाट्टिलोपः। प्रत्ययस्वरः॥

॥ अथ दशमी ॥

आ ते॑ कारो शृणवामा॒ वचां॑सि य॒याथ॑ दू॒राद॑न॑सा॒ रथे॑न।
नि ते॑ नं॑सै पीप्या॒नेव॒ योषा॒ मर्या॑येव क॒न्या॑ शश्व॒चै ते॑ ॥१०॥
आ। ते॒। का॒रो॒ इति॑। शृ॒ण॒वा॒म॒। वचां॑सि। य॒याथ॑। दू॒रात्। अन॑सा। रथे॑न।
नि। ते॒। नं॒सै॒। पी॒प्या॒नाऽइ॑व। योषा॑। मर्या॑यऽइव। क॒न्या॑। श॒श्व॒चै॒। त॒ इति॑ ते ॥१०॥

नद्यः पूर्वं विश्वामित्रवाक्यं प्रत्याख्यायानयर्चा तस्य वाक्यमाशुश्रुवुः। कारो स्तोत्रं कुर्वाण हे विश्वामित्र ते तव वचांसीमानि वाक्यान्याशृणवाम। शृणुमः। तव समीहितं प्रयोजनं कुर्म इत्यर्थः। अनसा शकटेन रथेन च सह ययाथ। यतो दूरादागतोऽसि। वयं च ते त्वदर्थं नि नंसै। नीचैर्नमाम। प्रत्येकविवक्षयाचैकवचनं। रथेन गंतुं गाधोदका भवामेत्यर्थः। तत्र दृष्टांतः। पीप्यानेव योषा। पीप्याना पुत्रं स्तनं पाययंती योषा माता यथा प्रह्वीभवति। दृष्टांतांतरं।

यथा कन्या युवतिर्मर्यायेव मनुष्याय पित्रे भ्रात्रे वा शश्वचै परिष्वजनाय नम्रा भवति तद्वत्ते त्वदर्थं प्रह्वीभवामः। ते इति पुनरुक्तिरादरार्थं। एतामृचं यास्क एवं व्याचष्टे। आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषा पुत्रं मर्यायेव कन्या परिष्वजनाय निनमा इति वा। नि॰ २.२७.। इति ॥ कारो। संबुद्धौ शाकल्यस्येतौ। पा॰ १.१.१६.। इति प्रगृह्यसंज्ञा। शृणवाम। श्रु श्रवण इत्यस्य लोट्याडुत्तमस्य पिच्चेत्याडागमः। पित्त्वाद्गुणः। निघातः। ययाथ। या प्रापण इत्यस्य भूतमात्रे लिटि थल्येकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः। लित्स्वरः। अनसा। सहार्थे तृतीया। नंसै। णमु प्रह्वत्व इत्यस्य लेट्युत्तमे लेटि सिब्बहुलमिति सिप्। वैतोऽन्यत्रेत्यैकारादेशः। निघातः। पीप्यानेव। पीङ् पान इत्यस्यांतर्भावितण्यर्थस्य लिटि कानचि रूपं। चित्स्वरः। योषा। यु मिश्रणे। वृतॄवदिहनीत्यादिना। उ॰ ३.६२.। सप्रत्ययः। यौतीति योषा। वृषादित्वादाद्युदात्तः। शश्वचै। ष्वन्ज परिष्वंग इत्यस्मात्संपदादिलक्षणो भावे क्विप्। पृषोदरादित्वादिष्टरूपसिद्धिरंतोदात्तश्च ॥

॥ इति तृतीयस्य द्वितीये त्रयोदशो वर्गः ॥

॥ अथ तस्मिन्सूक्त एकादशी ॥

यदंग त्वा भरताः संतरेयुर्गव्यन्ग्राम इषित इंद्रजूतः।
अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानां ॥११॥

यत्। अंग। त्वा। भरताः। संऽतरेयुः। गव्यन्। ग्रामः। इषितः। इंद्रऽजूतः।
अर्षात्। अह। प्रऽसवः। सर्गऽतक्तः। आ। वः। वृणे। सुऽमतिं। यज्ञियानां॥११॥

विश्वामित्रो नदीः प्रत्युवाच। अंगेत्यामंत्रणे। हे नद्यो यद्यस्माद्युष्माभिरुत्तितीर्षोर्ममोत्तरणमभ्यनुज्ञातं तस्माद्भरता भरतकुलजा मदीयाः सर्वे त्वा परस्परमेकतामापन्नां नदीं त्वां संतरेयुः। सम्यगुत्तीर्णा भवेयुः। तदेव विशिनष्टि। गव्यन् गा उदकानि तरीतुमिच्छन्निषितस्त्वयाभ्यनुज्ञात इंद्रजूतो युष्माकं प्रवर्तकेनेंद्रेण च प्रेरितो ग्रामो भरतानां संघोऽर्षात्। संतरेत्। यतः सर्गतक्तो गमनाय प्रवृत्तः प्रसवस्तेषामुद्योगोऽह पूर्वं युष्माभिरनुज्ञातः। अहं तु यज्ञियानां यज्ञार्हाणां वो युष्माकं सुमतिं शोभनां स्तुतिमा वृणे। सर्वतः संभजे ॥ भरताः। भरतशब्दादुत्सादित्वादञ्। तस्य यञञोश्चेति लुक्। अतच्प्रत्ययस्वरः। संतरेयुः। तरतेर्लिङि

जुसि रूपं। झलेसार्वधातुकस्वरे धातुस्वरः। तिङि चोदात्तवतीति गतेर्निघातः। गव्यन्। गा आत्मन इच्छन्। सुपः क्यच्। एकादेशस्वरः। ग्रामः। ग्रसतेरा च।उ॰ १.१४१.। इति मन्प्रत्यय आकारादेशश्च। नित्स्वरः। इंद्रजूतः। जू इति सौत्रो धातुर्गत्यर्थः। श्र्युकः कितीति निष्ठायामिट्प्रतिषेधः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः। अर्षात्। ऋ गतावित्यस्य लेटि तिपि सिब्बहुलमिति सिप्। लेटोऽडागमः। एकाच इतीट्प्रतिषेधः। गुणः। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। वृणे। वृङ् संभक्तावित्यस्य लटि रूपं। यज्ञियानां। यज्ञर्त्विग्भ्यां घखञाविति घप्रत्ययः। प्रत्ययस्वरः॥

॥ अथ द्वादशी ॥

अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनां।
प्र पिन्वध्वमिषयंतीः सुराधा आ वक्षणाः पृणध्वं यात शीभं॥१२॥
अतारिषुः। भरताः। गव्यवः। सं। अभक्त। विप्रः। सुऽमतिं। नदीनां।
प्र। पिन्वध्वं। इषयंतीः। सुऽराधाः। आ। वक्षणाः। पृणध्वं। यात। शीभं॥१२॥

गव्यवो गा आत्मन इच्छंतो भरता भरतकुलजाः सर्वेऽतारिषुः। तां नदीं समतरन्। विप्रो मेधावी विश्वामित्रो नदीनां सुमतिं शोभनां स्तुतिं समभक्त। समभजत। यूयं तु यथा पूर्वमिषयंतीः कुल्यादिद्वारान्नं कुर्वाणा अत एव सुराधाः शोभनधनोपेता यूयं वक्षणाः कृत्रिमसरितः कुल्याः प्र पिन्वध्वं। प्रकर्षेण तर्पयत। आ पृणध्वं। ताः सर्वतः पूरयत च। शीभं शीघ्रं यात। गच्छत च॥ अतारिषुः। तॄ प्लवनतरणयोरित्यस्य लुङि सिचि वृद्धिः परस्मैपदेष्विति वृद्धिः। अडागमस्वरः। गव्यवः। सुपः क्यच्। क्याच्छंदसीत्युप्रत्ययः। तस्य स्वरः। अभक्त। भज सेवायामित्यस्य लुङि सिचो झलो झलीति लोपः। पादादित्वादनिघातः। पिन्वध्वं। पिवि सेचन इत्यस्य लोटि रूपं। निघातः। इषयंतीः। इषं कुर्वत्यः। तत्करोतीति णिच्। णाविष्ठवत्प्रातिपदिकस्येतीष्ठवद्भावाट्टेरिति टिलोपः। वा छंदसीति सवर्णदीर्घः। प्रत्ययस्वरः। पृणध्वं। पृण प्रीणने। लोटि रूपं। व्यत्ययेनात्मनेपदं। वाक्यभेदादनिघातः। यात। या प्रापण इत्यस्य लोटि रूपं। अत्रापि न निघातः। शीभं। शीभृ कत्थने। श्लाघ्यतेऽनेन तद्वानिति करणे घञ्। ञित्स्वरः॥

॥ अथ त्रयोदशी ॥

उद्व ऊर्मिः शम्या हंत्वापो योक्त्राणि मुंचत।
मादुष्कृतौ व्येनसाघ्न्यौ शूनमारतां ॥१३॥

उत्। वः। ऊर्मिः। शम्याः। हंतु। आपः। योक्त्राणि। मुंचत।
मा। अदुःऽकृतौ। विऽएनसा। अघ्न्यौ। शूनं। आ। अरतां ॥१३॥

पूर्वमुत्तितीर्षुर्विश्वामित्रो नदीरुक्त्वाधुनोत्तितीर्षुः पुनराह। हे नद्यो वो युष्माकमूर्मिस्तरंगः शम्या युगकीला युग्यकटपार्श्वादिसंलग्ना रज्जव उदूर्ध्वं यथा भवंति तथा हंतु। गच्छतु। स तरंगो रज्जूनामधो गच्छत्वित्यभिप्रायः। तथा हे आपो यूयं योक्त्राणि ता रज्जूर्मुंचत। यथा न स्पृशंति तथा यांत्वित्यभिप्रायः। व्येनसा विगतपापे अत एवादुष्कृतौ कल्याणकर्मकारिण्यौ अघ्न्यावघ्ने न केनापि तिरस्करणीये विपाट्छुतुद्र्यौ शूनं समृद्धिमारतां। आगच्छतां। एवं विश्वामित्रो नदीः स्तुत्वा ताभिरनुज्ञातोऽतरदिति ॥ ऊर्मिः। ऋ गतौ। अर्तेरूच्चेति मिप्रत्ययः। ऊरित्ययमादेशो धातोः। ऋच्छतीत्यूर्मिः। प्रत्ययस्वरः। शम्याः। शमु उपशमे। पोरदुपधादिति यत्प्रत्ययः। यतोऽनाव इत्याद्युदात्तत्वं। हंतु। हन हिंसागत्योरित्यस्य लोटि रूपं। निघातः। योक्त्राणि। युजिर् योगे। करणे दाम्नीशसयुयुजेत्यादिना ष्ट्रन्प्रत्ययः। नित्स्वरः। मुंचत। मुच्लृ मोक्षणे। निघातः। अदुष्कृतौ। इसुसोः सामर्थ्ये इति विसर्जनीयस्य षत्वं। व्येनसा। बहुव्रीहौ पूर्वपदस्वरः। सुपो डादेशः। अघ्न्यौ। हन हिंसागत्योरित्यस्य नञ्पूर्वस्याघ्न्यादयश्चेति निपातनाद्यक्। कित्त्वादुपधालोपः। हो हंतेरिति घत्वं। सर्वविधीनां छंदसि विकल्पितत्वादत्रौङः शीभावाभावः। एकादेशस्वरः। शूनं। श्वयतेर्नपुंसके भावे क्त इति क्तः। यजादित्वात्संप्रसारणं। हल इति दीर्घत्वं। ओदितश्चेति निष्ठानत्वं। निष्ठा च द्व्यजनादित्याद्युदात्तः। अरतां। ऋ गतावित्यस्य लुङि च्लेः सर्तिशास्त्यर्तिभ्यश्चेत्यङादेशः। ऋदृशोऽङि गुणः। न माङ्योग इत्यडभावः। निघातः ॥

॥ इति तृतीयस्य द्वितीये चतुर्दशो वर्गः ॥

इंद्रः पूर्भिदित्येकादशर्चं पंचमं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं। अत्रानुक्रमणिका। इंद्रः पूर्भिदेकादशेति ॥ अग्निष्टोमे माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्र इंद्रः पूर्भिदिति सूक्तं। होत्रकाणामिति खंडे सूचितं। इंद्रः पूर्भिदुदु ब्रह्माणि। आ०५.१६.

इति ॥ पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे चातुर्विंशिकातिदिष्टस्याहीनसूक्तस्य स्थाने त्रीणि संपातसूक्तानि। तत्रेदं प्रथमं। इंद्रः पूर्भिद्य एक इद्यस्तिग्मशृंगः। आ० ७.५.। इति ॥ उज्जिद्वलभिदोर्निष्केवल्य एतत्सूक्तं निविद्धानीयं। सूचितं च। इंद्र सोममिंद्रः पूर्भिदिति माध्यंदिनः। आ० ९.८.। इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

इंद्रः पूर्भिदातिरद्दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून्।
ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे ॥१॥

इंद्रः। पूःऽभित्। आ। अतिरत्। दासं। अर्कैः। विदत्ऽवसुः। दयमानः। वि। शत्रून्। ब्रह्मऽजूतः। तन्वा। ववृधानः। भूरिऽदात्रः। आ। अपृणत्। रोदसी इति। उभे इति ॥१॥

विश्वामित्रः स्तौति। पूर्भिदसुरपुरां भेत्ता अत एव विदद्वसुर्वेदयद्भिः स्वमहिमप्रख्यापकैर्वसुभिर्युक्तः शत्रूनसुरान्विदयमानो विशेषेण हिंसन्। तथा च यास्कः। विदद्वसुर्दयमानो वि शत्रूनिति हिंसाकर्मा। नि० ४. १७.। इति। तादृश इंद्रो दासं। दस्यतेऽनेन तम इति दासो वासरः। तमर्कैरर्चनीयैः स्वतेजोभिरातिरत्। समंतादवर्धयत् इंद्रस्य सूर्यात्मकत्वात्। तथा च स्मृतिः। चैत्रमासे तपेदिंद्र इति। किंच। ब्रह्मजूतो ब्रह्मणा स्तोत्रेणाकृष्टः। यद्वा ब्रह्मणा जगत्स्रष्ट्रा प्रेरितस्तन्वा स्वशरीरेण वावृधानो वर्धमानो भूरिदात्रः। दायते लूयतेऽनेन शत्रुशिर इति दात्रमायुधं। बहुविधायुधोपेतः। तादृश इंद्र उभे रोदसी द्यावापृथिव्यावापृणत्। सर्वतोऽतर्पयत् ॥ पूर्भित्। भिदिर् विदारणे। क्विप्। अतिरत्। तरतेर्व्यत्ययेन शः। ॠत इद्धातोरितीत्वं। निघातः। दासं। करणे घञ्। ञित्स्वरः। विदद्वसुः। विदेरंतर्भावितण्यर्थस्य शतर्येदादित्वाच्छपो लुकि सति प्रत्ययस्वरेण शतुरुदात्तत्वं। बहुव्रीहौ पूर्वपदस्वरः। दयमानः। दय दानगतिरक्षणहिंसाग्रहणेषु। आत्मनेपदी। लटः शानच्। न लोकाव्ययेति षष्ठीप्रतिषेधः। ववृधानः। वृधु वर्धने। कानचि रूपं। संहितायामभ्यासस्य तुजादित्वाद्दीर्घः। भूरिदात्रः। दाप् लवने। करणे दाम्नीत्यादिना ष्ट्रन्प्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। अपृणत्। पृण प्रीणन इत्यस्य लङि तुदादित्वाच्छः। निघातः। रोदसी। रुदेरसुनि रूपं। नित्स्वरः ॥

॥ अथ द्वितीया ॥

मखस्य ते तविषस्य प्र जूतिमियर्मि वाचममृताय भूषन् ।
इंद्र क्षितीनामसि मानुषीणां विशां दैवीनामुत पूर्वयावा ॥ २ ॥
मखस्य । ते । तविषस्य । प्र । जूतिं । इयर्मि । वाचं । अमृताय । भूषन् ।
इंद्र । क्षितीनां । असि । मानुषीणां । विशां । दैवीनां । उत । पूर्वऽयावा ॥ २ ॥

हे इंद्र भूषन् त्वामलंकुर्वन्नहं मखस्य महनीयस्य स्तुत्यस्य तविषस्य बलवतस्ते तव जूतिं मनसा प्रेरितां वाचं स्तुतिलक्षणाममृतायान्नार्थं प्रेयर्मि । प्रकर्षेणोच्चारयामि । मानुषीणां क्षितीनां मनोर्जातानां मनुष्याणां उत अपि च दैवीनां देवसंबंधिनीनां विशां प्रजानां पूर्वयावाग्रतो गंता त्वमसि ॥ मखस्य । मह पूजायां । नहेर्हलोपश्च । उ॰ ५. २३. । इति हलोप इत्यनुवृत्तौ महेश्चेति खप्रत्ययो हलोपश्च । मह्यते पूज्यते सर्वैरिति मखः । खांतस्याश्मादेः । फि॰ १. ६. । इत्यंतोदात्तत्वं । यद्यपि मकारादिर्भवति तथापि वचनसामर्थ्याद्भवति । तविषस्य । तवतेष्टिषच्प्रत्ययः । चित्स्वरः । जूतिं । ऊतियूतीत्यादिना क्तिन उदात्तत्वं । इयर्मि । अर्तिर्जुहोत्यादिः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । अभ्यासस्येतीयङादेशः । पादादित्वान्न निघातः । अभ्यस्तस्वरः । भूषन् । भूष अलंकार इत्यस्य शतरि रूपं । शतुर्लसार्वधातुकस्वरे धातुस्वरः । असि । अस्तेर्लेटि रूपं । निघातः । मानुषीणां । मनोर्जाताविंत्यञ् । षुगागमः । टिड्ढाणञिति ङीप् । ञित्स्वरः । दैवीनां । देवाद्यञञाविंत्यञ् । अत्रापि पूर्ववत् ङीप् । ञित्स्वरः । पूर्वयावा । या प्रापण इत्यस्मादातो मनिन्क्वनिब्वनिपश्चेति वनिप् । कृदुत्तरपदस्वरः ॥

॥ अथ तृतीया ॥

इंद्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
अहन्व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणां ॥ ३ ॥
इंद्रः । वृत्रं । अवृणोत् । शर्धऽनीतिः । प्र । मायिनां । अमिनात् । वर्पऽनीतिः ।
अहन् । विऽअंसं । उशधक् । वनेषु । आविः । धेनाः । अकृणोत् । राम्याणां ॥ ३ ॥

शर्धनीतिः । नयनं नीतिः कर्म । शर्धं प्रवृद्धं नीतिः कर्म यस्य स तथोक्तः । स इंद्रो वृत्रमसुरमवृणोत् । बलेनारुंधत् । तथा वर्पणीतिर्युद्धे परप्रहाराणां

निवारककर्मेंद्रो मायिनां। द्वितीयार्थे षष्ठी। मायिनोऽसुरान् प्रामिनात्। प्रकर्षेणावधीत्। उशधक् शत्रुवधं कामयमान इंद्रो वनेषु गूढचारिणमसुरं व्यंसं विगतांसं यथा भवति तथाहन्। जघान। अथ तस्मिन् रात्रिचरे गवामपहर्तरि हते सति राम्याणां। रमणं स्त्रीभिः सह क्रीडा रामः। तमर्हंतीति राम्या रात्रयः। तासां रात्रीणामंतःस्थिता धेना गा आविरकृणोत्। प्रकटा अकरोत्। रात्रीणामसुराक्रांतत्वे तैत्तिरीयकं। अहर्देवानामासीद्रात्रिरसुराणां तेऽसुरा यद्देवानां वित्तं वेद्यमासीत्तेन सह रात्रिं प्राविशन्निति ये दिवा स्तोतारो राम्यास्तेषां वाचो धेना इति॥ अवृणोत्। वृञ् वरण इत्यस्य लङि रूपं। निघातः। शर्धनीतिः। शर्धतिरुत्साहार्थः। अस्मात्कर्मणि घञ्। बहुव्रीहौ पूर्वपदस्वरः। अमिनात्। मीञ् हिंसायामित्यस्य लङि मीनातेर्निगम इति ह्रस्वः। निघातः। अहन्। हंतेर्लङि रूपं। उशधक्। वश कांतौ। पृषोदरादित्वाद्रूपसिद्धिः। आविः। स्वरादिष्वंतोदात्तत्वेन पठितत्वादंतोदात्तः। धेनाः। धेट् पाने। धेट ई च। उ० ३.११.। इति नप्रत्यय ईकारश्चांतादेशः। गुणः। धयंति तामिति धेना वाक्। धेना जिगाति। ऋग्वे० १.२.३.। इत्यत्र प्रत्ययस्वरेणांतोदात्तः। अत्र व्यत्ययेनाद्युदात्तत्वं। अकृणोत्। कृवि हिंसाकरणयोः। निघातः। राम्याणां। रमु क्रीडायां। राममर्हतीत्यर्थे छंदसि चेति यप्रत्ययः। तस्य स्वरः। यद्वा रमेरंतर्णीतण्यर्थादघ्न्यादयश्चेति यक्प्रत्ययः। प्ररमयति भूतानि नक्तंचारीण्युपरमयतीतराणीति यास्कः। नि० २.१८.। वर्णव्यत्ययः॥

॥ अथ चतुर्थी ॥

इंद्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः।
प्रारोचयन्मनवे केतुमह्नामविंदज्ज्योतिर्बृहते रणाय॥४॥

इंद्रः। स्वःऽसाः। जनयन्। अहानि। जिगाय। उशिक्ऽभिः। पृतनाः। अभिष्टिः।
प्र। अरोचयत्। मनवे। केतुं। अह्नां। अविंदत्। ज्योतिः। बृहते। रणाय॥४॥

स्वर्षाः स्वर्गप्रद इंद्रोऽहानि स्वतेजोभिर्जनयन्नुशिग्भिर्युद्धं कामयमानैरंगिरोभिः सह पृतनाः परकीयाः सेना अभिष्टिरभिभावुकः सन् जिगाय। शत्रूनजैषीत्। शत्रुवधानंतरं मनवे मनुष्याय कर्मकर्त्रे यजमानाय तथाह्नां केतुं प्रज्ञापकं सूर्यं प्रारोचयत् यथा च तमोरूपासुरवधात्प्रकर्षेणादीपयत्। ततो बृहते रणाय युद्धप्रकाशनाय ज्योतिः प्रकाशमविंदत्। अलभत॥ स्वर्षाः। षणु दाने। क्विप्।

जनसनखनां सन्झलोरित्यात्वं । सनोतेरन इति षत्वं । अहरादीनां पत्यादिषूपसंख्यानमिति विसर्जनीयस्य रुत्वं । जिगाय । जि जय इत्यस्य लिटि सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कवर्गादेशः । लित्स्वरः । पृतनाः । पृङ् व्यायामे । कृपृभ्यां क्विदिति तनन्प्रत्ययः । व्याप्रियंतेऽत्र योद्धार इति पृतनाः सेनाः । नित्त्वादाद्युदात्तः । अभिष्टिः । अभिगंता । इष गतौ । मंत्रे वृषेत्यादिना क्तिन्नुदात्तः । स हि भावपरोऽपि भवितारं लक्षयति । तितुत्रतथेत्यादिनेट्प्रतिषेधः । शकंध्वादित्वात्पररूपत्वं । कृदुत्तरस्वरः । अरोचयत् । रुच दीप्तावित्यस्य लङि रूपं । मनवे । मन ज्ञाने । शृस्वृस्निहीत्यादिना उप्रत्ययः । निदनुवृत्तेराद्युदात्तः । अविंदत् । विदिर् लाभ इत्यस्य शे मुचादीनामिति नुम् । पादादित्वादनिघातः । रणाय । क्रियाग्रहणं कर्तव्यं । पा॰ १.४.३२.१.। इति संप्रदानसंज्ञा । रणतिः शब्दार्थः । वशिरण्योरुपसंख्यानमित्यप्प्रत्ययः । रणंति शब्दं कुर्वंति परस्परं योद्धारोऽत्रेति रणः संग्रामः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः ॥

॥ अथ पंचमी ॥

इंद्रस्तुजो बर्हणा आ विवेश नृवद्दधानो नर्या पुरूणि ।
अचेतयद्धिय इमा जरित्रे प्रेमं वर्णमतिरच्छुक्रमासां ॥ ५ ॥
इंद्रः । तुजः । बर्हणाः । आ । विवेश । नृऽवत् । दधानः । नर्या । पुरूणि ।
अचेतयत् । धियः । इमाः । जरित्रे । प्र । इमं । वर्णं । अतिरत् । शुक्रं । आसां ॥ ५ ॥

स तादृश इंद्रस्तुजो बाधिका बर्हणा युद्धोत्साहेन वर्धमानाः परकीयाः सेना नृवन्मनुष्यवदाविवेश । प्रकाशं लब्ध्वा प्राविशत् । किं कुर्वन् । पुरूणि बहूनि नर्या युद्धनयनकारिणां योग्यानि धनानि दधानः प्रयच्छन्नाविवेशः । स इंद्रो जरित्रे स्तोत्र इमा दृश्यमाना धिय उषसः । ध्यायंत्यासु मनुष्या इति । ता धियोऽचेतयत् । अज्ञापयत् । अथासामुषसामिमं शुक्रं वर्णं प्रकाशेन युक्तं प्रातिरत् । स्वतेजसा प्रकर्षेण वर्धयति । धीशब्दस्योषःपरत्वे मंत्रवर्णः । शुक्रवर्णामुदु नो यंसते धियं । ऋग्वे॰ १.१४३.७.। इति ॥ तुजः । तुज हिंसायां । क्विप् । धातुस्वरः । बर्हणा । वृहि वृद्धौ । अस्माद्युच् बहुलमिति कर्तरि युच् । व्यत्ययेनाद्युदात्तत्वं । विवेश । विशतेर्लिटि रूपं । निघातः । नृवत् । नृशब्दात्तेन तुल्यमिति वतिप्रत्ययः । तस्य स्वरः । दधानः । दधातेः शानचि रूपं । अभ्यस्तानामादिरि-

त्याद्युदात्तत्वं । नर्या । नरेषु साधूनीत्यर्थे तत्र साधुरिति यत् । यतोऽनाव इत्याद्युदात्तत्वं । अचेतयत् । चिती संज्ञान इत्यस्य ण्यंतस्य लङि रूपं । अडागमस्वरः । धियः । ध्यै चिंतायां । अन्येभ्योऽपि दृश्यत इति क्विप् । दृशिग्रहणात्संप्रसारणं । धातुस्वरः । इमाः । दश्च । पा॰ ७.२.१०९. । इति दकारस्य मकारः । एकादेशस्वरः । अतिरत् । तरतेर्व्यत्ययेन शः । निघातः । आसां । इदमोऽन्वादेशेऽशित्यशादेशोऽनुदात्तश्च । प्रत्ययः सुप्त्वादनुदात्तः । अतः सर्वानुदात्तः ॥

॥ इति तृतीयस्य द्वितीये पंचदशो वर्गः ॥

॥ अथ तस्मिन्सूक्ते षष्ठी ॥

महो महानि पनयंत्यस्येंद्रस्य कर्म सुकृता पुरूणि ।
वृजनेन वृजिनान्त्सं पिपेष मायाभिर्दस्यूँरभिभूत्योजाः ॥ ६ ॥
महः । महानि । पनयंति । अस्य । इंद्रस्य । कर्म । सुऽकृता । पुरूणि ।
वृजनेन । वृजिनान् । सं । पिपेष । मायाभिः । दस्यून् । अभिभूतिऽओजाः ॥ ६ ॥

महो महतोऽस्यैतादृशसामर्थ्यस्येंद्रस्य महानि महनीयानि पुरूणि बहूनि सुकृता सुष्ठु कृतानि कर्म वृत्रहननादीनि कर्माणि पनयंति । स्तुवंति । इंद्रस्य कर्म सुकृता पुरूणीत्येतत्पदकदंबकमत्रार्थभेदात्पदकाले नोत्सृज्यते । तादृश इंद्रो वृजनेन । वर्ज्यंते शत्रवोऽनेनेति वृजनं बलं । तेन बलेन वृजिनान्पापरूपानसुरान् संपिपेष । सम्यक् चूर्णीचकार । तथाभिभूत्योजाः । अभिभूतिः शत्रुविषयोऽभिभवः । तत्रौजो बलमस्येत्यभिभूत्योजाः शत्रूणां पराभवे समर्थः । तादृश इंद्रो दस्यूनुपक्षपयितॄनसुरान्मायाभिः कपटैः संपिपेष ॥ पनयंति । पनतेः स्तुत्यर्थस्य गुपूधूपविच्छिपणिपनिभ्य इत्यायप्रत्ययः । ह्रस्वश्छांदसः । निघातः । वृजनेन । वृजी वर्जने । कृपृवृजिमंदिनिधाञ्भ्यः क्युरिति क्युप्रत्ययः । किच्वादगुणः । प्रत्ययस्वरः । वृजिनान् । वृजी वर्जने । वृजेः किच्च । उ॰ २.४८. । इतीनच्प्रत्ययः । वृजिनं पापं । तद्वंतः । अर्शआदित्वादच् । एकादेशस्वरः । पिपेष । पिष्लृ संचूर्णन इत्यस्य लिटि णलि रूपं । निघातः । अभिभूत्योजाः । भूतिर्भवनं । भावे क्तिन् । तादौ च नितीत्यभेः प्रकृतिस्वरत्वं । अभिभूतावोजो यस्येति सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरिति समासः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः ॥

॥ अथ सप्तमी ॥

युधेंद्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः ।
विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणंति ॥ ७ ॥

युधा । इंद्रः । मह्ना । वरिवः । चकार । देवेभ्यः । सत्ऽपतिः । चर्षणिऽप्राः ।
विवस्वतः । सदने । अस्य । तानि । विप्राः । उक्थेभिः । कवयः । गृणंति ॥ ७ ॥

सत्पतिः सतां देवानां पतिश्चर्षणिप्राश्चर्षणीनां मनुष्याणामपेक्षितफलप्रदानेन कामपूरकः स इंद्रो मह्ना महता युधा युद्धेन वरिवः । भृशं व्रियतेऽर्थिभिरिति वरिवो धनं । तादृशं धनं युद्धेन लब्ध्वा देवेभ्यो देवनशीलेभ्यः स्तोतृभ्यश्चकार । दत्तवान् । विप्रा मेधाविनः कवयः स्तोतारो विवस्वतो विशेषेणाग्निहोत्रादिकर्मार्थं वसतो यजमानस्य सदने गृहेऽस्येंद्रस्य तानि वृत्रहननबहुप्रदानानि कर्माण्युक्थेभिः स्तोत्रैर्गृणंति । स्तुवंति ॥ युधा । युध संप्रहारे । भावे संपदादिलक्षणः क्विप् । सावेकाच इति विभक्तेरुदात्तता । वरिवः । वृञ् वरण इत्यस्य यङ्लुकि ऋतश्चेत्यभ्यासस्य रिगागमः । तदंतादसुन् । बाहुलकाट्टिलोपः । नित्स्वरः । चकार । करोतेर्लिटि रूपं । निघातः । सत्पतिः । अस्तेः शतरि रूपं सदिति । पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं । चर्षणिप्राः । प्रा पूरणे । विच् । विवस्वतः । विपूर्वाद्वस निवास इत्यस्मात्संपदादिलक्षणो भावे क्विप् । तदस्यास्त्यस्मिन्निति मतुप् । मादुपधाया इति तस्य वत्वं । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । गृणंति । गृ शब्द इत्यस्य लटि रूपं । निघातः ॥

॥ अथाष्टमी ॥

सत्रासाहं वरेण्यं सहोदां ससवांसं स्वरपश्च देवीः ।
ससान यः पृथिवीं द्यामुतेमामिंद्रं मदंत्यनु धीरणासः ॥ ८ ॥

सत्राऽसहं । वरेण्यं । सहःऽदां । ससऽवांसं । स्वः । अपः । च । देवीः ।
ससान । यः । पृथिवीं । द्यां । उत । इमां । इंद्रं । मदंति । अनु । धीऽरणासः ॥ ८ ॥

धीरणासो धिया स्तुत्या रणयंतः स्तोतारः सत्रासाहं महतो वृत्रादेरभिभवितारमत एव वरेण्यं सर्वैर्वरणीयं सहोदां दुर्बलस्यार्थिनो बलप्रदं देवीर्देवनशीला अपः स्वश्च स्वर्लोकं च ससवांसं भजमानमिंद्रमनु मदंति । हृष्यंति । हर्षमनु

स्वयं हृष्यंतीत्यर्थः। य इंद्रः पृथिवीमुत अपि च द्यां द्युलोकमिमामिममंतरिक्षलोकं चैतांस्त्रींल्लोकान् ससान तत्तल्लोकवासिभ्यो ददौ। तमनुमदंतीत्यन्वयः॥ सत्रासाहं। षह मर्षणे। छंदसि सह इति ण्विः। ण्वित्वादुपधावृद्धिः। ससवांसं। षण संभक्तावित्यस्य क्वसाविडभावे नकारलोपे रूपं। प्रत्ययस्वरः। ससान। षणु दान इत्यस्य लिटि रूपं। लित्स्वरः। मदंति। मदि स्तुत्यादिष्वित्यस्य व्यत्ययेन परस्मैपदं। निघातः। धीरणासः। रणतीति रणा वाक्। धिया स्तुत्या रणा येषां ते धीरणाः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥

॥ अथ नवमी ॥

ससानात्याँ उत सूर्यं ससानेंद्रः ससान पुरुभोजसं गां।
हिरण्ययमुत भोगं ससान हत्वी दस्यून्प्रार्यं वर्णमावत्॥९॥

ससान। अत्यान्। उत। सूर्यं। ससान। इंद्रः। ससान। पुरुऽभोजसं। गां।
हिरण्ययं। उत। भोगं। ससान। हत्वी। दस्यून्। प्र। आर्यं। वर्णं। आवत्॥९॥

पूर्वमंत्रे प्रतिपादितः स इंद्रोऽत्यानश्वान् ससान। युद्धार्थं मरुद्भ्यो ददौ। उत अपि च सूर्यं जगत्प्रकाशकमादित्यं ससान। प्राणिनां व्यवहारनिर्वाहाय तेभ्यो ददौ। तथा पुरुभोजसं। पुरुभिः सर्वैर्जनैः क्षीरादिद्वारेणोपभुज्यत इति पुरुभोजाः। क्षीरादिरूपबहुविधान्नोपेतां गामग्निहोत्रादिसिद्ध्यर्थं ससान। तेभ्यो ददौ। उत अपि च हिरण्ययं सुवर्णमयं भोगं धनं। भुज्यतेऽस्मिन्निति भोगो गृहं वा। ससान। अर्थिभ्यो ददौ। ततो दस्यून् बाधकानसुरान् हत्वी हत्वार्यमुत्तमं वर्णं त्रैवर्णिकं प्रावत्। यथा कर्मविघ्नो न भवेत्तथापालयत्॥ ससान। षणु दान इत्यस्य लिटि णलि रूपं। लित्स्वरः। हिरण्ययं। हिरण्यशब्दाद्विकारार्थे मयड्वैतयोः। पा॰ ४. ३. १४३.। इति विहितस्य छंदसि विषय ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छंदसीति निपातनान्मयटो मकारलोपः। प्रत्ययस्वरः। हत्वी। हंतेः क्त्वार्थे स्नात्व्यादयश्चेति निपातितः। प्रत्ययस्वरः। आवत्। अवतेर्लङि रूपं॥

॥ अथ दशमी ॥

इंद्र ओषधीरसनोदहानि वनस्पतींरसनोदंतरिक्षं।
बिभेद वलं नुनुदे विवाचोऽथाभवद्दमिताभिक्रतूनां॥१०॥

इंद्रः । ओषधीः । असनोत् । अहानि । वनस्पतीन् । असनोत् । अंतरिक्षं ।
बिभेद । वलं । नुनुदे । विऽवाचः । अथ । अभवत् । दमिता । अभिऽक्रतूनां ॥ १० ॥

तादृश इंद्र ओषधीः पक्कफलसंयुक्तास्तृणगुल्मादिका असनोत् । प्राणिनामुपभोगार्थं प्रादात् । तथाहानि दिवसांश्चायुःपरिक्लृप्त्यर्थं प्रायच्छत् । किंच वनस्पतीन्यज्ञार्थं खदिरपलाशादिलक्षणान् वृक्षानसनोत् । तथांतरिक्षं संचारार्थं प्रादात् । तथा वलं । संव्रियतेऽनेनाकाशमिति वलो मेघः । तं मेघं बिभेद । उदकप्रेरणार्थमभिंदत् । विवाचो विरुद्धवाचः प्रतिकूलानसुरान् नुनुदे । प्राणिनां रक्षार्थं तान् बबाध । अथानंतरमभिक्रतूनां । क्रतुः कर्म । अभि आभिमुख्येन युद्धार्थं कर्म येषां तेऽभिक्रतवो बलीयांसः शत्रवः । तेषामपि दमितोपशमयिताभवत् । एवं हितकरणाहितपरिहाराभ्यां सर्वाः प्रजाः पालयति स्मेति भावः ॥ असनोत् । षणु दान इत्यस्य लङि रूपं । वनस्पतीन् । पारस्करप्रभृतित्वात् सुडागमः । वनशब्दो नब्विषयस्येत्याद्युदात्तः । पतिशब्दः प्रत्ययस्वरेणाद्युदात्तः । उभे वनस्पत्यादिषु युगपदित्युभयपदप्रकृतिस्वरत्वं । बिभेद । भिदिर् विदारण इत्यस्य लिटि रूपं । लित्स्वरः । नुनुदे । नुद प्रेरण इत्यस्य लिटि रूपं । वाक्यभेदादनिघातः । प्रत्ययस्वरः । दमिता । दमु उपशम इत्यस्य तृचि रूपं । चित्स्वरः । अभिक्रतूनां । बहुव्रीहौ पूर्वपदस्वरः ॥

॥ अथैकादशी ॥

शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥ ११ ॥

शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ ।
शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ ११ ॥

एषा ऋक् पूर्वमेव व्याख्याता ॥

॥ इति तृतीयस्य द्वितीये षोडशो वर्गः ॥

तिष्ठा हरी इत्येकादशर्चं षष्ठं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं । तिष्ठा हरी इत्यनुक्रमणिका ॥ अग्निष्टुति मरुत्वतीयशस्त्रे निविद्धानं सूक्तं । सूचितं च । तिष्ठा हरी यो जात एवेति मध्यंदिनः । आ० ९. ७. । इति ॥ इंद्राग्न्योः कुलायनाम्न्येकाहेऽप्येतन्मरुत्वतीयनिविद्धानं । सूचितं च । तिष्ठा हरी तमु ष्टुहीति मध्यंदिनः । आ० ९. ७. ।

इति ॥ समूढे दशरात्रे तृतीये छंदोमे मरुत्वतीयशस्त्र एतत्सूक्तं। सूचितं च। तिष्ठा हरी प्र मंदिने इमा उ त्वेति मरुत्वतीयं। आ० ८.७.। इति ॥ अतिरात्रे तृतीये पर्याये होतुः शस्त्रे परिहिते सत्याद्या तिष्ठा हरी इत्येषा शस्त्रयाज्या। सूचितं च। विश्वजिते तिष्ठा हरी रथ आ युज्यमानेति याज्या। आ० ६.४.। इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

तिष्ठा हरी रथ आ युज्यमाना याहि वायुर्न नियुतो नो अच्छ।
पिबास्यंधो अभिसृष्टो अस्मे इंद्र स्वाहा ररिमा ते मदाय ॥१॥

तिष्ठ। हरी इति। रथे। आ। युज्यमाना। याहि। वायुः। न। निऽयुतः। नः। अच्छ।
पिबासि। अंधः। अभिऽसृष्टः। अस्मे इति। इंद्र। स्वाहा। ररिम। ते। मदाय ॥१॥

विश्वामित्रः स्तौति। हे इंद्र रथे स्यंदने युज्यमाना संयुज्यमानौ हरी अश्वावभिलक्ष्य कंचित्कालमातिष्ठ। तत्र दृष्टांतः। वायुर्नेति। यथा वायू रथे नियुज्यमाना नियुतो वडवा अभिलक्ष्य कंचित्कालं तिष्ठति तद्वत्। अथ रथारूढस्त्वं नोऽस्मानच्छाभिलक्ष्यायाहि। शीघ्रमागच्छ। आगत्य चास्मे अस्माभिरभिसृष्टोऽनुज्ञातस्त्वमंधः सोमलक्षणमन्नं पिबासि। पिब। स्वाहा। दत्तश्चायं सोमः। वयं ते तव मदाय हर्षाय स्वाहाकृतमिमं सोमं ररिम। ददाम ॥ अत्र याहि वायुर्न नियुतो नो अच्छेत्यत्र रथेना याहीत्यर्थः। आपश्चित्पिप्युः स्तर्यो न गावः। ऋग्वे० ७.२३.४.। इत्यत्र तन्न तथेति पदकाले नोत्सृज्यते ॥ तिष्ठ। तिष्ठतेर्लोटि रूपं। तिष्ठादेशस्याद्युदात्तः। याहि। यातेर्लोटि रूपं। हेर्ङित्त्वादंतोदात्तः। वायुः। वा गतिगंधनयोरित्यस्मात्कृवापेत्यादिना उण्। आतो युक्। प्रत्ययस्वरः। पिबासि। पातेर्लेट्याडागमः। आगमस्यानुदात्तत्वाद्धातुस्वरः। अंधः। अद भक्षणे। अदेर्नुम् धश्चेत्यसुन्नुमागमो धकारश्चांतादेशः। अद्यते प्राणिभिस्तद्वा स्वयमत्तीति। तथा च श्रुतिः। अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यत इति। नित्स्वरः। अस्मे। सुपां सुलुगिति तृतीयायाः शे इत्यादेशः। ररिम। रातेर्लिटि रूपं। वाक्यभेदादनिघातः। प्रत्ययस्वरः ॥

॥ अथ द्वितीया ॥

उपाजिरा पुरुहूताय सप्ती हरी रथस्य धूर्ष्वा युनज्मि।
द्रवद्यथा संभृतं विश्वतश्चिदुपेमं यज्ञमा वहात इंद्रं ॥२॥

उप॑ । अ॒जि॒रा । पु॒रु॒ऽहू॒ताय॑ । सप्ती॒ इति॑ । हरी॒ इति॑ । रथ॑स्य । धूः॒ऽसु । आ । यु॒न॒ज्मि॒ ।
द्र॒वत् । यथा॑ । सं॑ऽभृ॑तं । वि॒श्वतः॑ । चि॒त् । उप॑ । इ॒मं । य॒ज्ञं । आ । व॒हा॒तः॒ । इं॒द्र॑ ॥२॥

हे इंद्र पुरुहुताय पुरुभिर्बहुभिर्यजमानैर्यज्ञार्थमाहूताय तुभ्यमजिरा शीघ्रगमनशीलौ सप्ती सर्पणशीलौ हरी हरिनामकावश्वौ रथस्य धूर्षु युगप्रांतेषूपायुनज्मि। अहं तथा योजयामि। द्रवत् स रथो यथा गच्छेत्तथेति शेषः। विश्वतश्चित् सर्वतः संभृतं अग्निर्यजुर्भिः सविता स्तोमैरित्यादियज्ञसंभारैः संपूर्णमिमं यज्ञं प्रतींद्रं त्वामुपा वहातः। तावश्वौ सम्यगावहतां ॥ धूर्षु । धुर्वी हिंसार्थः । क्विप् । राल्लोप इति वकारलोपः । र्वोरुपधाया इति दीर्घः । सावेकाच इति विभक्तेरुदात्तता । युनज्मि । युजिर् योगे । रुधादिः । लटि रूपं । निघातः । द्रवत् । द्रु गतावित्यस्य छांदसे लङि रूपं । व्यत्ययेनांतोदात्तत्वं । वहातः । वहेर्लेट्याडागमे रूपं ॥

॥ अथ तृतीया ॥

उपो॑ नयस्व॒ वृष॑णा तपु॒ष्पोतेम॑व॒ त्वं वृ॑षभ स्वधावः ।
ग्रसे॑ता॒मश्वा॒ वि मु॑चे॒ह शोणा॑ दि॒वेदि॑वे स॒दृशी॑रद्धि धा॒नाः ॥३॥

उपो॒ इति॑ । न॒य॒स्व॒ । वृष॑णा । त॒पुः॒ऽपा । उ॒त । ई॒ । अ॒व॒ । त्वं । वृ॒ष॒भ॒ । स्व॒धा॒ऽव॒ः ।
ग्रसे॑तां । अश्वा॑ । वि । मु॒च॒ । इ॒ह । शोणा॑ । दि॒वेऽदि॑वे । स॒ऽदृशीः॑ । अ॒द्धि॒ । धा॒नाः ॥३॥

वृषभ कामानां वर्षक स्वधावोऽन्नवन् हे इंद्र वृषणा सेचनसमर्थौ तपुष्पा तापकेभ्यः शत्रुभ्यो रक्षकावश्वावुपो नयस्व । अस्मत्समीपं प्रापय। उत अपि च त्वमीमेनं यजमानमव । पालय । शोणा शोणवर्णौ तावश्वाविहास्मिन्देवयजने विमुच। विमुक्तौ तावश्वौ ग्रसेतां। विघसं भक्षयतां । त्वं तु सदृशीरेकरूपान् धाना भृष्टयवान् दिवे दिवे प्रतिदिवसमद्धि। भक्षय ॥ नयस्व। नयतेर्लोटि रूपं। तपुष्पा। पा रक्षणे। आतोऽनुपसर्गे कः। सुपां सुलुगिति डादेशः। इसुसोः सामर्थ्ये इति संहितायां विसर्जनीयस्य षत्वं। कृदुत्तरपदप्रकृतिस्वरः। अव। अवतेर्लोटि रूपं। स्वधावः। मतुवसोरिति नकारस्य रुत्वं। निघातः। ग्रसेतां। ग्रसु अदन इत्यस्य लोट्यातामि रूपं। पादादित्वादनिघातः। आतामो लसार्वधातुकस्वरे धातुस्वरः। मुच। मुंचतेर्लोटि रूपं। आगमानुशासनस्यानित्यत्वान्नुमभावः। सदृशीः। समानशब्द उपपदे दृशिर् प्रेक्षण इत्यस्मात्समानान्ययोश्चेति कञ्प्रत्ययः। समानस्य दृग्दृश्वतुष्विति सभावः। टिड्ढाणञ् इत्यादिना ङीप्। तस्य

पित्त्वादनुदात्तत्वे धातुस्वरः । अद्धि । अद भक्षणे इत्यस्य लोट्यदादित्वाच्छपो लुक् । हुझल्भ्यो हेर्धिरिति ध्यादेशः । निघातः । धानाः । डुधाञ् धारणपोषणयोः । धापॄवस्यज्यतिभ्यो न इति नप्रत्ययः । प्रत्ययस्वरः ॥

चतुर्विंशिकेऽहनि माध्यंदिने सवने ब्राह्मणाच्छंसिशस्त्रे ब्रह्मणा त इत्यारंभणीया । सूचितं च । ब्रह्मणा ते ब्रह्मयुजा युनज्म्युरुं नो लोकमनु नेषि विद्वान् । आ॰ ७.४. । इति ॥

॥ सैषा सूक्ते चतुर्थी ॥

ब्रह्म॑णा ते ब्रह्म॒युजा॑ युनज्मि॒ हरी॒ सखा॑या सध॒माद॑ आ॒शू ।

स्थि॒रं रथं॑ सु॒खमिं॑द्राधि॒तिष्ठ॑न्प्रजा॒नन्वि॒द्वाँ उप॑ याहि॒ सोम॑म् ॥ ४ ॥

ब्रह्म॑णा । ते॒ । ब्र॒ह्म॒ऽयुजा॑ । यु॒न॒ज्मि॒ । हरी॒ इति॑ । सखा॑या । स॒ध॒ऽमादे॑ । आ॒शू इति॑ ।

स्थि॒रं । रथं॑ । सु॒ऽखं । इं॒द्र॒ । अ॒धि॒ऽतिष्ठ॑न् । प्र॒ऽजा॒नन् । वि॒द्वान् । उप॑ । या॒हि॒ । सोम॑म् ॥ ४ ॥

हे इंद्र ब्रह्मयुजा ब्रह्मणा मंत्रेण योक्तव्यौ सधमादे । माद्यंति योद्धारोऽत्रेति मादो युद्धं । सहमादः सधमादः । तस्मिन्युद्धे सखाया समानप्रसिद्धी अत एवाशू क्षिप्रगमनोपेतौ ते तव हरी अश्वौ ब्रह्मणा स्तोत्रेण युनज्मि । रथे संयोजयामि । स्थिरं सुदृढं सुखं सुष्ठुद्वारं तादृशं रथमधितिष्ठन् आरूढस्त्वं सोमपानार्थमायाहि । प्रजानन्नित्याद्युगमत् ॥ ब्रह्मयुजा । युजेरौणादिकः कर्मणि क्विप् । युनज्मि । युजेर्लटि रूपं । निघातः । सधमादे । मदी हर्षे । अधिकरणे घञ् । सध मादस्थयोश्छंदसीति सहस्य सधादेशः । कृदुत्तरपदप्रकृतिस्वरः । रथं । अधिशीङ्स्थासां कर्मेति कर्मसंज्ञा । सुखं । खनु विदारणे । अन्येभ्योऽपि दृश्यत इति डः । कृदुत्तरस्वरः ॥

॥ अथ पंचमी ॥

मा ते॒ हरी॒ वृष॑णा वी॒तपृ॑ष्ठा॒ नि री॑रम॒न्यज॑मानासो अ॒न्ये ।

अ॒त्याया॑हि॒ शश्व॑तो व॒यं तेऽरं॑ सु॒तेभिः॑ कृणवाम॒ सोमैः॑ ॥ ५ ॥

मा । ते॒ । हरी॒ इति॑ । वृष॑णा । वी॒तऽपृ॑ष्ठा । नि । री॒र॒म॒न् । यज॑मानासः । अ॒न्ये ।

अ॒ति॒ऽआया॑हि । शश्व॑तः । व॒यं । ते॒ । अरं॑ । सु॒तेभिः॑ । कृ॒ण॒वा॒म॒ । सोमैः॑ ॥ ५ ॥

हे इंद्र वृषणा कामानां सेचकौ वीतपृष्ठा कमनीयपृष्ठभागौ ते तव हरी अन्ये अस्मदन्ये यजमानासो यजमाना मा नि रीरमन् । मा हर्षयन् । वयं तु सुतेभिरभिषुतैः सोमैस्ते तवारं पर्याप्तं कृणवाम । यथा तव तृप्तिर्भवति तथा कुर्मे

इत्यर्थः। त्वं तु अत्यायाहि शश्वतः। बहूनन्याननतिक्रम्य सोमपानार्थं शीघ्रमागच्छ॥ वीतपृष्ठा। वी कांत्यादिषु। अस्मात्क्तप्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। रीरमन्। रमु क्रीडायामित्यस्य ण्यंतस्य लुङि चङि रूपं। न माङ्योग इत्यडभावः। निघातः। अत्यायाहि। यातेर्लोटि रूपं। गतिर्गताविति पूर्वस्य निघातः। कृणवाम। कृणोतेर्लोटि रूपं। निघातः॥

॥ इति तृतीयस्य द्वितीये सप्तदशो वर्गः॥

तवायं सोम इति माध्यंदिने सवने नेष्टुः प्रस्थितयाज्या। सूचितं च। तवायं सोमस्त्वमेह्यर्वाङिंद्राय सोमाः प्रदिवः। आ० ५. ५.। इति॥

॥ सैषा सूक्ते षष्ठी॥

तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमं सुमना अस्य पाहि।
अस्मिन्यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इंदुमिंद्र॥६॥

तव। अयं। सोमः। त्वं। आ। इहि। अर्वाङ्। शश्वत्ऽतमं। सुऽमनाः। अस्य। पाहि। अस्मिन्। यज्ञे। बर्हिषि। आ। निऽसद्य। दधिष्व। इमं। जठरे। इंदुं। इंद्र॥६॥

हे इंद्र अयं सोमस्तव त्वदर्थमभिषुतः। त्वमर्वाङ् सोमाभिमुख्येनैहि। आयाहि। आगत्य च सुमनाः शोभनमनस्को भूत्वा शश्वत्तमं भूयांसमस्येमं सोमं पाहि। पिब। बर्हिषि प्रवृद्धेऽस्मिन्यज्ञे निषद्योपविश्येंदुं क्लेदनशीलमिमं सोमं जठर आदधिष्व। धारय। यथा नाभेरधस्तान्न गच्छति तथा धारय॥ अंगिरोभिरा गहि यज्ञियेभिः। ऋग्वे० १०. १४. ५.। इत्यत्र न यज्ञविशेषणं बर्हिर्भिन्नरूपं वा तदित्यतो नोत्सृज्यते॥ इहि। इण् गतौ। अस्य लोटि रूपं। निघातः। शश्वत्तमं। उञ्छादित्वादंतोदात्तत्वं। पाहि। पा पान इत्यस्य लोटि रूपं। बहुलं छंदसीति शपो लुक्। निघातः। निषद्य। सदेर्ल्यपि सदेरप्रतेरिति षत्वं। लित्स्वरः। दधिष्व। दधातेर्लोटि छंदस्युभयथेति थास आर्द्धधातुकत्वादिडागमः। प्रत्ययस्वरः। इंदुं। उन्दी क्लेदने। उंदेरिच्चादेरित्युप्रत्ययः। धातोरादेरिकारदेशः। निदित्यनुवृत्तेराद्युदात्तः॥

॥ अथ सप्तमी॥

स्तीर्णं ते बर्हिः सुत इंद्र सोमः कृता धाना अत्तवे ते हरिभ्यां।
तदोकसे पुरुशाकाय वृष्णे मरुत्वते तुभ्यं राता हवींषि॥७॥

स्तीर्णं। ते। बर्हिः। सुतः। इंद्र। सोमः। कृताः। धानाः। अत्तवे। ते। हरिऽभ्यां।

तत्ऽओकसे। पुरुऽशाकाय। वृष्णे। मरुत्वते। तुभ्यं। राता। हवींषि ॥ ७॥

हे इंद्र ते तवोपवेशनार्थं बर्हिः स्तीर्णं। विस्तृतं। तथा सोमश्च त्वदर्थं सुतः। अभिषुतः। ते तव हरिभ्यामत्तवे भक्षणार्थं धाना भृष्टयवाः कृताः। संपादिताः। तदोकसे। तद्बर्हिरोको निलयो यस्य तस्मै। पुरुशाकाय बहुभिः स्तुत्याय यद्वा बहुसहायाय वृष्णे कामानां वर्षित्रे मरुत्वते। मरुतो देवविशः। तद्वते। एवंभूताय तुभ्यं हवींषि सोमाज्यादीनि राता। अस्माभिर्दत्तानि। तानि सेवस्वेति भावः॥ स्तीर्णं। स्तृञ् आच्छादन इत्यस्य ॠत इद्धातोरितीत्वं। रदाभ्यामिति निष्ठानत्वं। प्रत्ययस्वरः। अत्तवे। अद भक्षण इत्यस्मात्तुमर्थे तवेन्प्रत्ययः। नित्स्वरः। तदोकसे। बहुव्रीहौ पूर्वपदस्वरः। पुरुशाकाय। शच व्यक्तायां वाचीत्यस्मात्कर्मणि घञ्। चजोः कु घिण्ण्यतोरिति कुत्वं। कृदुत्तरपदस्वरः। मरुत्वते। तसौ मत्वर्थ इति भसंज्ञायां तकारस्य जश्त्वाभावः। प्रत्ययस्य पित्त्वादनुदात्तत्वे प्रातिपदिकस्वरः। राता। रा दान इत्यस्मात्कर्मणि क्तः। प्रत्ययस्वरः॥

॥ अथाष्टमी ॥

इमं नरः पर्वतास्तुभ्यमापः समिंद्र गोभिर्मधुमंतमक्रन्।

तस्यागत्या सुमना ऋष्व पाहि प्रजानन्विद्वान्पथ्या३ अनु स्वाः ॥ ८॥

इमं। नरः। पर्वताः। तुभ्यं। आपः। सं। इंद्र। गोभिः। मधुऽमंतं। अक्रन्।

तस्य। आऽगत्य। सुऽमनाः। ऋष्व। पाहि। प्रऽजानन्। विद्वान्। पथ्याः। अनु। स्वाः॥८॥

हे इंद्र नरः कर्मणां नेतारोऽध्वर्य्वादयः पर्वता ग्रावाण आपश्चैते सर्वे संभूय तुभ्यं त्वदर्थमिमं सोमं गोभिः पयोभिर्मधुमंतं माधुर्योपेतं समक्रन्। सम्यगकार्षुः। ऋष्व दर्शनीय हे इंद्र सुमनाः शोभनमनस्को विद्वान्कर्माभिज्ञः स्वाः स्वकीयाः पथ्या वैदिके पथि कर्मणि साधुभूताः स्तुतीरनु प्रजानन् त्वमस्य पाहि। इममभिषुतं सोमं पिब॥ अक्रन्। करोतेर्लुङि रूपं। निघातः। आगत्य। गमेर्ल्यपि रूपं। लित्स्वरः। पाहि। पातेर्लोटि रूपं॥

॥ अथ नवमी ॥

याँ आभजो मरुत इंद्र सोमे ये त्वामवर्धन्नभवन्गणस्ते।

तेभिरेतं सजोषा वावशानो३ऽग्नेः पिब जिह्वया सोममिंद्र ॥ ९॥

यान्। आ। अभजः। मरुतः। इंद्र। सोमे। ये। त्वां। अवर्धन्। अभवन्। गणः। ते।
तेभिः। एतं। सऽजोषाः। वावशानः। अग्नेः। पिब। जिह्वया। सोमं। इंद्र ॥९॥

हे इंद्र यान्मरुतः सोमे सोमपानविषये आभजः समभावयः ये च मरुतस्त्वामवर्धन् युद्धे प्रोत्साहोत्पादनेनावर्धयन् ये च मरुतस्ते तव गणोऽभवन् सहाया अभूवन्नित्यर्थः। हे इंद्र एवंविधैस्तेभिस्तैर्मरुद्भिः सजोषाः संगतः सन् एतमभिषुतं सोमं वावशानः कामयमानस्त्वमग्नेराहुत्यधिकरणभूतस्याहवनीयस्य ज्वालारूपया जिह्वयेमं पिब ॥ अभजः। भज सेवायामित्यस्य लङि रूपं। यद्वृत्तयोगादनिघातः। अवर्धन्। वृधु वर्धन इत्यस्य ण्यंतस्य लङि रूपं। छंदस्युभयथेति ऋेरार्द्धधातुकत्वाण्णेरनिटीति णिलोपः। अत्रापि यद्योगादनिघातः। अभवन्। वाक्यभेदादनिघातः। वावशानः। वश कांतावित्यस्य यङ्लुकि चानशि रूपं। चित्स्वरः। पिब। पा पाने। निघातः ॥

॥ अथ दशमी ॥

इंद्र पिब स्वधया चित्सुतस्याग्नेर्वा पाहि जिह्वया यजत्र।
अध्वर्योर्वा प्रयतं शक्र हस्ताद्धोतुर्वा यज्ञं हविषो जुषस्व ॥१०॥
इंद्र। पिब। स्वधया। चित्। सुतस्य। अग्नेः। वा। पाहि। जिह्वया। यजत्र।
अध्वर्योः। वा। प्रऽयतं। शक्र। हस्तात्। होतुः। वा। यज्ञं। हविषः। जुषस्व ॥१०॥

हे इंद्र स्वधया। स्वमात्मानं दधाति पोषयतीति स्वधा बलं। तेन। बलादपहृत्य सुतस्य सुतमभिषुतं हुतं वा पिब। यजत्र यष्टव्येंद्राग्नेर्ज्वालारूपया जिह्वया वाहुतं सोमं पाहि। पिब। हे शक्र समर्थेंद्र अध्वर्योर्हस्ताद्वा प्रयतं दातुमुपक्रांतं सोमं पिब। अथवा होतुर्यज्ञं यजनीयं वषट्कारोपेतं हविषो भागं जुषस्व। सेवस्व। सर्वथापि त्वमत्रागत्यास्माभिर्दीयमानं सोमं पिबेति भावः ॥ पिब। आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः। अध्वर्योः। अध्वरं कामयतीति क्यच्। कव्यध्वरेत्यकारलोपः। प्रत्ययस्वरः। तत एकादेशस्वरः। प्रयतं। यम उपरम इत्यस्य कर्मणि निष्ठा। शक्र। शकॢ शक्तौ। स्फायितंचीत्यादिना रक्। हस्तात्। असिहसीत्यादिना तन्। नित्स्वरः। होतुः। जुहोतेस्ताच्छीलिकस्तृन्। नित्स्वरः। जुषस्व। जुषी प्रीतिसेवनयोरित्यस्य लोटि रूपं। निघातः ॥

॥ अथैकादशी ॥

शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ ।
शृखंतमुग्रमूतये समत्सु घ्नंतं वृचाणि संजितं धनानां ॥ ११ ॥
शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ ।
शृखंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृचाणि । संऽजितं । धनानां ॥ ११ ॥

पूर्वं व्याख्याता ॥

॥ इति तृतीयस्य द्वितीयेऽष्टादशो वर्गः ॥

इमामू ष्वित्येकादशर्चं सप्तमं सूक्तं चैष्टुभमैंद्रं । अचानुक्रमणिका । इमामू षूपांत्यां घोरोऽपश्यत् सा निर्दहेच्छस्यमानेति श्रूयत इति । दशम्या आंगिरसो घोर ऋषिः शिष्टानां विश्वामिचः ॥ अग्निष्टोमे माध्यंदिनसवनेऽच्छावाकशस्त्रे दशमीवर्जितमिमामू ष्विति सूक्तं । सूचितं च । इमामू ष्वित्युपोत्तमामुद्धरेत्सर्वंच । आ॰ ५. १६. । इति ॥ पृष्ठ्याभिप्लवषडहयोर्माध्यंदिनसवनेऽच्छावाकशस्त्रे चातुर्विंशिकातिदिष्टस्याहीनसूक्तस्य स्थाने चीणि संपातसूक्तानि । तचोपोत्तमावर्जमेतत्प्रथमं सूक्तं । सूचितं च । इमामू ष्विच्छंति त्वा । आ॰ ७. ५. । इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

इमामू षु प्रभृतिं सातये धाः शश्वच्छश्वदूतिभिर्यादमानः ।
सुतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो भूत् ॥ १ ॥
इमां । ऊं इति । सु । प्रऽभृतिं । सातये । धाः । शश्वत्ऽशश्वत् । ऊतिऽभिः । यादमानः ।
सुतेऽसुते । ववृधे । वर्धनेभिः । यः । कर्मऽभिः । महत्ऽभिः । सुऽश्रुतः । भूत् ॥ १ ॥

विश्वामिच इंद्रं स्तौति । हे इंद्र ऊतिभिः । अवंति रक्षंति सर्वमित्यूतयो मरुतः । तैः शश्वच्छश्वत्सर्वदा यादमानः संगतिं याचमानस्त्वं प्रभृतिं । प्रकर्षेण भ्रियते धार्यते यज्ञार्थमिति प्रभृतिः सोमः स्तुतिर्वा । इमामिमं सोममिमां स्तुतिं वा सातयेऽस्माकं धनलाभार्थं सु धाः । सुष्ठु संपादय । तथा स इंद्रः सुते सुते सोमेऽभिषुते सति वर्धनेभिर्वर्धनकारिभिः सोमाज्यादिभिर्हविर्भिर्वावृधे । वर्धते । य इंद्रो महद्भिः कर्मभिरसुरवधमेघभेदनादिलक्षणैर्व्यापारैः सुश्रुतो लोके प्रसिद्धोऽभूत् । स इंद्र इति पूर्वेणान्वयः ॥ प्रभृतिं । तादौ च निति कृत्यताविति गतेः प्रकृति-

स्वरत्वं। धाः। दधातेश्छांदसे लुङि रूपं। निघातः। शश्वच्छश्वत्। नित्यवीप्सयोरिति द्विर्वचनं। यादमानः। टुयाचृ याच्ञायां। शानचि रूपं। चकारस्य दकारश्छांदसः। वावृधे। वृधु वर्धन इत्यस्माल्लिटि रूपं। तुजादित्वादभ्यासस्य दीर्घः संहितायां। निघातः। वर्धनेभिः। वर्धतेर्ण्यंतस्य नंद्यादितत्वाल्ल्युट्। लित्स्वरः। सुश्रुतः। श्रु श्रवण इत्यस्मात्कर्मणि क्तः। गतिरनंतर इति गतिस्वरः। भूत्। भवतेर्लुङि रूपं॥

माध्यंदिने सवनेऽच्छावाकस्य प्रस्थितयाज्येंद्राय सोमाः प्रदिव इत्येषा। सूचितं च। इंद्राय सोमाः प्रदिवो विदाना आपूर्णो अस्य। आ॰ ५.५.। इति॥

॥ सैषा सूक्ते द्वितीया॥

इंद्राय सोमाः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा विहायाः।
प्रयम्यमानान्प्रति षू गृभायेंद्र पिब वृषधूतस्य वृष्णः॥२॥

इंद्राय। सोमाः। प्रऽदिवः। विदानाः। ऋभुः। येभिः। वृषऽपर्वा। विऽहायाः।
प्रऽयम्यमानान्। प्रति। सु। गृभाय। इंद्र। पिब। वृषऽधूतस्य। वृष्णः॥२॥

हे इंद्र इंद्राय तुभ्यं सोमाः प्रदिवः प्रगतेषु पूर्वेष्वहःसु विदानाः। अस्माभिर्लंभिताः। वृषपर्वा। वृषाणः फलस्य वर्षकाः पर्वाणि कालावयवा वर्षाद्या यस्य स तथोक्तः। कालात्मक इत्यर्थः। अत एव विहायाः। विजहात्युत्सृजत्यर्थानर्थिभ्य इति विहाया महान्। तादृश इंद्रो येभिर्यैर्दत्तैः सोमैर्ऋभुर्दीप्तो वर्तते हे इंद्र त्वं प्रयम्यमानान् प्रकर्षेण मंत्रैरुपयम्यमानानिमान्सोमान् सु सुष्ठु प्रतिगृभाय। प्रतिगृहाण। गृहीत्वा च वृषधूतस्य वृषभिर्ग्रावभिरभिषुतं वृष्णः स्वर्गादिफलवर्षकमिमं सोमं पिब॥ प्रदिवः। दिवु क्रीडादौ। क्विप्। कालाध्वनोरत्यंतसंयोग इति द्वितीया। दिवशब्दो दिवसवाची। कृदुत्तरपदस्वरः। विदानाः। विद्लृ लाभ इत्यस्य व्यत्ययेन शानच्। बहुलं छंदसीति विकरणस्य लुक्। विहायाः। ओहाक् त्यागे। वहिहाधाञ्भ्यश्छंदसीत्यसुन्। णिदित्यनुवृत्तेरातो युक् चिण्कृतोरिति युगागमः। गतिकारकयोरिति पूर्वपदप्रकृतिस्वरत्वं। गृभाय। ग्रह उपादान इत्यस्य लोटि हौ श्नाप्रत्ययस्य छंदसि शायजपीति शायजादेशः। हृग्रहोर्भ इति भत्वं। अतो हेरिति हेर्लुक्। निघातः॥

माध्यंदिने सवनेऽच्छावाकशस्त्रे याज्या पिबा वर्धस्वेत्येषा। सूचितं च। पिबा वर्धस्व तव घा सुतास इति याज्या। आ॰ ५.१६.। इति॥

॥ सैषा सूक्ते तृतीया ॥

पिबा वर्धस्व तव घा सुतास इंद्र सोमासः प्रथमा उतेमे ।
यथापिबः पूर्व्याँ इंद्र सोमाँ एवा पाहि पन्यो अद्या नवीयान् ॥ ३ ॥

पिब । वर्धस्व । तव । घ । सुतासः । इंद्र । सोमासः । प्रथमाः । उत । इमे ।
यथा । अपिबः । पूर्व्यान् । इंद्र । सोमान् । एव । पाहि । पन्यः । अद्य । नवीयान् ॥ ३ ॥

हे इंद्र इमं सोमं पिब । ततो वर्धस्व । शरीरेण पुष्टो भव । त्वदर्थं प्रथमाः पुरातना उत अपि चेमेऽभिनवा उभयविधाः सोमाः सुतासो घ । ग्रावभिरभिषुताः खलु । हे इंद्र पूर्व्यान्पुरातनान्सोमान्यथा त्वमपिब एवैवमद्याधुना पन्यः स्तुत्योऽत एव नवीयानतिशयेनाभिनवस्त्वमिमानभिनवान्सोमान्पाहि । पिब ॥ पिब । पातेर्लोटि रूपं । वर्धस्व । तिङ उत्तरत्वान्निघाताभावः । अपिबः । यथायोगादनिघातः । पाहि । पातेर्लोटि बहुलं छंदसीति शपो लुक् । निघातः । पन्यः । पनतेः स्तुत्यर्थस्याघ्न्यादित्वाद्यत् । यतोऽनाव इत्याद्युदात्तत्वं । नवीयान् । नवशब्दादीयसुनि रूपं । नित्स्वरः ॥

॥ अथ चतुर्थी ॥

महाँ अमत्रो वृजने विरप्श्यु१ग्रं शवः पत्यते धृष्ण्वोजः ।
नाह विव्याच पृथिवी चनैनं यत्सोमासो हर्यश्वममंदन् ॥ ४ ॥

महान् । अमत्रः । वृजने । विऽरप्शी । उग्रं । शवः । पत्यते । धृष्णु । ओजः ।
न । अह । विव्याच । पृथिवी । चन । एनं । यत् । सोमासः । हरिऽअश्वं । अमंदन् ॥ ४ ॥

योऽयमिंद्रो महानतिशयितसामर्थ्यवान् वृजने बलोपलक्षिते युद्धेऽमत्रः शत्रूणामभिभविताऽत एव विरप्शी विरपणशीलो भुजास्फालनेन युद्धार्थं शत्रूणामाह्वानकारी । यद्वा विविधं रपणं स्तुतिलक्षणं यस्येति । सर्वैः स्तुत्य इत्यर्थः । तादृशस्येंद्रस्योग्रमुद्गूर्णं शवो बलं धृष्णु धर्षणशीलमोजः पराक्रमलक्षणं तेजः पत्यते । सर्वत्र प्रसरति । एनमेतादृशमहिमोपेतमिंद्रं पृथिवी विस्तीर्णा भूमिर्न विव्याच । न व्याप्नोति । अहशब्द एवार्थे । चनेत्यप्यर्थे । द्यौरपि न व्याप्नोतीत्यर्थः । यद्यदा सोमासः स्वाहाकृताः सोमा हर्यश्वमिंद्रममंदन् । अमादयन् । तदा तमेनं द्यावापृथिव्यौ व्याप्तुं न शक्नुत इत्यर्थः ॥ अमत्रः । अम गत्यादिषु । अमिनक्षिय-

जीत्यादिनाचन्प्रत्ययः। नित्स्वरः। विरप्शी। रप लप व्यक्तायां वाचि। औणादिकः शप्रत्ययः। विविधं रपंतीति विरप्शाः स्तोतारः। तेऽस्य संतीत्यत इनिः। यद्वा विविधं रपणं विरप्शं। तदस्यास्तीति। प्रत्ययस्वरः। पत्यते। व्यत्ययेन कर्तरि यक्। निघातः। धृष्णु। ञिधृषा प्रागल्भ्ये। त्रसिगृधिधृषिक्षिपेः क्नुप्रत्ययः। रषाभ्यामिति णत्वं। प्रत्ययस्वरः। विव्याच। व्यचेर्लिटि णलि लिट्यभ्यासस्योभयेषामित्यभ्यासस्य संप्रसारणं। निघातः। चनेति निपातसमुदायश्चार्थे वर्तते। एवमादित्वादंतोदात्तः। अमंदन्। मदि स्तुत्यादिष्वित्यस्य लङि रूपं। यद्योगादनिघातः॥

॥ अथ पंचमी ॥

महाँ उग्रो वावृधे वीर्याय समाचक्रे वृषभः काव्येन।

इंद्रो भगो वाजदा अस्य गावः प्र जायंते दक्षिणा अस्य पूर्वीः ॥५॥

महान्। उग्रः। ववृधे। वीर्याय। संऽआचक्रे। वृषभः। काव्येन।

इंद्रः। भगः। वाजऽदाः। अस्य। गावः। प्र। जायंते। दक्षिणाः। अस्य। पूर्वीः॥५॥

महान्युद्धकर्मणि बलवानुग्रः शत्रूणां भयंकर इंद्रो वीर्याय वीर्यकरणाय वावृधे। वर्धते। वृषभः फलस्याभिवर्षको भगः सर्वैर्भजनीयः स इंद्रः काव्येन। कवयः स्तोतारः। तत्कर्म स्तोत्रं। तेन स्तोत्रेण समाचक्रे। संगच्छते। तादृशस्यास्येंद्रस्य गावो वाजदाः क्षीरादिलक्षणान्नप्रदाः प्रजायंते। तथास्य पूर्वीर्बह्व्यस्ता गावो दक्षिणाः प्रजायंते॥ वावृधे। वर्धतेर्लिटि रूपं। निघातः। वीर्याय। वीरे भवं वीर्यं। भवे छंदसीति यत्। वीरवीर्यौ चेत्यत्र यतोऽनाव इत्यस्यानित्यत्वस्य ज्ञापितत्वात्तित्स्वरितः। समाचक्रे। करोतेर्लिटि रूपं। गतिर्गताविति पूर्वपदस्य गतेर्निघातः। काव्येन। कवेः कर्म काव्यं। ब्राह्मणादित्वात् ष्यञ्। ञित्वादुपधावृद्धिः। ञित्स्वरः। वाजदाः। ददातेरातोऽनुपसर्गे कः। जायंते। जनी प्रादुर्भाव इत्यस्य लटि रूपं। दक्षिणाः। दक्ष वृद्धावित्यस्मात् द्रुदक्षिभ्यामिनन्निनितीनन्प्रत्ययः। नित्त्वादाद्युदात्तः॥

॥ इति तृतीयस्य द्वितीय एकोनविंशो वर्गः॥

॥ अथ तस्मिन्सूक्ते षष्ठी॥

प्र यत्सिंधवः प्रसवं यथायन्नापः समुद्रं रथ्येव जग्मुः।

अतश्चिदिंद्रः सदसो वरीयान्यदीं सोमः पृणति दुग्धो अंशुः ॥६॥

प्र। यत्। सिंधवः। प्रऽसवं। यथा। आयन्। आपः। समुद्रं। रथ्याःऽइव। जग्मुः।
अतः। चित्। इंद्रः। सदसः। वरीयान्। यत्। ईं। सोमः। पृणति। दुग्धः। अंशुः ॥६॥

सिंधवो नद्यो यथा प्रसवं। प्रकर्षेण सूयत इति प्रसवः कामः। तमनुसृत्य यद्यदा प्रायन् प्रकृष्टमतिदूरं समुद्रं गच्छंति तदापो महांतं समुद्रं रथ्येव रथिन इव जग्मुः। प्रीणनार्थं गच्छंति। तद्वत् अतश्चित्सदसोऽस्मादंतरिक्षादसाविंद्रो वरीयान्। उरुतरः खलु। यदी यमेनमिंद्रं दुग्धोऽभिषुतोंऽशुर्लताखंडरूपोऽल्पः सोमः पृणति प्रीणयति। यथाल्पा नद्योऽल्पीयांसि च जलानि महांतं समुद्रं प्रीणयंति तद्वदल्पतरोंऽशुभूतः सोमो वरीयांसमिंद्रं प्रीणयति ॥ प्रसवः। सुवतेः कर्मण्यप्। थाथादिस्वरः। आयन्। अयतेर्लङि रूपं। यद्योगादनिघातः। रथ्येव। रथस्येमे रथ्याः। रथाद्यदिति यत्। सुपां सुलुगिति सुपो डादेशः। तित्स्वरितः। इवेन विभक्तेरलोपः। पूर्वपदप्रकृतिस्वरः। जग्मुः। गमेर्लिटि रूपं। गमहनेत्यादिनोपधालोपः। निघातः। वरीयान्। उरुशब्दादीयसुनि प्रियस्थिरेत्यादिना वरादेशः। नित्त्वादाद्युदात्तः। पृणति। पृण प्रीणने। तुदादिः। यद्योगादनिघातः। दुग्धः। दुहेः क्तः। एकाच इतीट्प्रतिषेधः। दादेर्धातोर्घ इति हकारस्य घत्वं। झषस्तथोर्धोऽधः। प्रत्ययस्वरः ॥

॥ अथ सप्तमी ॥

समुद्रेण सिंधवो यादमाना इंद्राय सोमं सुषुतं भरंतः।
अंशुं दुहंति हस्तिनो भरित्रैर्मध्वः पुनंति धारया पवित्रैः ॥७॥

समुद्रेण। सिंधवः। यादमानाः। इंद्राय। सोमं। सुऽसुतं। भरंतः।
अंशुं। दुहंति। हस्तिनः। भरित्रैः। मध्वः। पुनंति। धारया। पवित्रैः ॥७॥

समुद्रेण। सहिता नद्यादिरूपेणापोऽभिद्रवंत्येनमिति समुद्रः। तेन यादमानास्तेन सह संगतिं याचमानाः सिंधवो नद्यो यथा तं पूरयंति तद्वद्धस्तिनो हस्तवंतोऽध्वर्य्वादय इंद्राय तुभ्यं सुषुतं सुष्ठभिषुतं सोमं भरंतः संपादयंतोंऽशुं दुहंति। लताखंडमभिषुण्वंति। तथा तेऽध्वर्य्वादयः स्रवतो रसस्य धारया पवित्रैः पावनैर्भरित्रैः। कर्मकरणार्थं पदार्थान्बिभ्रतीति भरित्रा बाहवः। तैर्मध्वो माधुर्योपेतान्सोमान्पुनंति। शोधयंति ॥ समुद्रेण। समुत्पूर्वाद्द्रवतेरन्येभ्योऽपि दृश्यत इति डः। डित्त्वाट्टिलोपः। यद्वा उन्दी क्लेदने। संपूर्वस्य स्फायितंचीत्यादिना रक्।

क्त्वादुपधालोपः । उभयत्र प्रत्ययस्वरः । सुपा सहैकादेशे कृत एकादेश उदात्त एव । याद्मानाः । टुयाचृ याच्ञायां । शानच् । व्यत्ययेन चकारस्य दकारः । शानचो लसार्वधातुकस्वरे धातुस्वरः । दुहंति । दुह प्रपूरण इत्यस्य लटि रूपं । भरित्रैः । डुभृञ् धारणपोषणयोरित्यस्मादशित्रादिभ्य इत्रोत्राविती त्रप्रत्ययः । प्रत्ययस्वरः । पुनंति । पूञ् पवन इत्यस्य लटि रूपं ॥

॥ अथाष्टमी ॥

ह्रदा इव कुक्षयः सोमधानाः समी विव्याच सवना पुरूणि ।
अन्ना यदिंद्रः प्रथमा व्याश वृत्रं जघन्वाँ अवृणीत सोमं ॥ ८ ॥

ह्रदाःऽइव । कुक्षयः । सोमऽधानाः । सं । ईमिति । विव्याच । सवना । पुरूणि ।
अन्ना । यत् । इंद्रः । प्रथमा । वि । आश । वृत्रं । जघन्वान् । अवृणीत । सोमं ॥ ८ ॥

इंद्रस्य कुक्षय उदराणि सोमधानाः । सोमो निधीयते येष्विति सोमधानाः । तत्र दृष्टांतः । ह्रदा इव । यथा ह्रदा जलाधारा भवंति तद्वत् । ईं सोऽयमिंद्रः पुरूणि सवना त्रीणि सवनानि सं विव्याच । सम्यक् व्याप्नोति । इंद्रः प्रथमा प्रथमान्यन्ना भक्षणीयानि सोमादीन्यन्नानि यद्यस्माद्व्याश विशेषेण जघास ततो वृत्रं जघन्वान्वृत्रस्य हंतेंद्रः सोमं माध्यंदिने सवने देवेभ्योऽवृणीत । समभजत ॥ कुक्षयः । कुष निष्कर्षे । प्लुषिकुषिशुषिभ्यः क्सिः । उ॰ ३.१५३. । कुष्यत इति कुक्षिः । प्रत्ययस्वरः । सोमधानाः । दधातेरधिकरणे ल्युट् । लित्स्वरः । विव्याच । व्यचेर्लिटि रूपं । अन्ना । अद भक्षणे । अद्यत इत्यन्नं । आश । अश भोजन इत्यस्य लिटि णलि रूपं । अत आदेरित्यभ्यासस्य दीर्घः । यद्योगादनिघातः । लित्स्वरः । वृत्रं । न लोकाव्ययेति षष्ठीप्रतिषेधः । जघन्वान् । हंतेः क्वसाविडभावे रूपं । प्रत्ययस्वरः । अवृणीत । वृङ् संभक्तावित्यस्य लङि रूपं ॥

॥ अथ नवमी ॥

आ तू भर माकिरेतत्परि ष्ठाद्विद्मा हि त्वा वसुपतिं वसूनां ।
इंद्र यत्ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व प्र यंधि ॥ ९ ॥

आ । तु । भर । माकिः । एतत् । परि । स्थात् । विद्म । हि । त्वा । वसुऽपतिं । वसूनां ।
इंद्र । यत् । ते । माहिनं । दत्रं । अस्ति । अस्मभ्यं । तत् । हरिऽअश्व । प्र । यंधि ॥ ९ ॥

हे इंद्र तु क्षिप्रं धनमाभर। एतत्त्वया दीयमानं धनं माकिः को वा परिष्ठात्। प्रतिबध्य तिष्ठेत्। त्वा त्वां वसूनां धनानां वसुपतिमुत्तमस्य धनस्य स्वामिनं विद्म हि। जानीमः खलु। ते तव माहिनं मंहनीयं यद्वसं धनमस्ति हे हर्यश्व तद्धनमस्मभ्यं प्रयंधि। प्रयच्छ ॥ तु। ऋचि तुनुघेत्यादिना संहितायां दीर्घः। भर। भरतेर्लोटि रूपं। माकिः। निपातः। स्यात्। तिष्ठतेश्छांदसे लुङि रूपं। उपसर्गात्सुनोतीत्यादिना संहितायां षत्वं। निघातः। विद्म। वेत्तेर्लटि विदो लटो वेति मसो मादेशः। प्रत्ययस्वरः। संहितायां द्व्यचोऽतस्तिङ इति दीर्घः। वसुपतिं। पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरः। माहिनं। महेरिनण् चेतीनण्प्रत्ययः। णित्त्वादुपधावृद्धिः। ग्रामादित्वादाद्युदात्तः। यंधि। यमु उपरमे। लोटि बहुलं छंदसीति शपो लुक्। सेर्हिः। तस्य वा छंदसीति पित्त्वस्य विकल्पितत्वादत्रा-ङित्त्वादङितश्चेति हेर्ध्यादेशः। निघातः ॥

जातकर्मण्यंसाभिमर्शनेऽस्मे प्रयंधीत्येषा। गृ° सू° १.१५.। यद्यपि सा निर्देहे-दिति वचनेन शंसने निषिद्धा तथाप्यभिमर्शनस्य शंसने चोदितत्वान्नोक्तदोषः ॥

॥ सैषा सूक्ते दशमी ॥

अ॒स्मे प्र य॑ंधि मघवन्नृजीषि॒न्निंद्र॑ रा॒यो वि॒श्ववा॑रस्य॒ भूरेः॑।
अ॒स्मे श॒तं श॒रदो॑ जी॒वसे॑ धा अ॒स्मे वी॒राञ्छश्व॑त इंद्र शिप्रिन् ॥ १० ॥

अ॒स्मे इति॑। प्र। य॒धि॒। म॒घ॒ऽव॒न्। ऋ॒जी॒षि॒न्। इंद्र॑। रा॒यः। वि॒श्वऽवा॑रस्य। भूरेः॑।
अ॒स्मे इति॑। श॒तं। श॒रदः॑। जी॒वसे॑। धाः॒। अ॒स्मे इति॑। वी॒रान्। शश्व॑तः। इं॒द्र॒। शि॒प्रि॒न् ॥ १० ॥

मघवन्धनवन्नृजीषिन् गतसारसोमवन् हे इंद्र विश्ववारस्य। विश्वैः सर्वैः संभ-जनीयतया वरणं यस्य तत्। भूरेर्भूरि बहु रायो धनं। द्वितीयार्थे षष्ठी। अस्मे अस्मभ्यं प्रयंधि। प्रयच्छ। किंच अस्मे अस्माकं जीवसे जीवनाय शतं शरदः संवत्सरान्धाः। देहि। शिप्रिन् शोभनहनो हे इंद्र अस्मे अस्माकं शश्वतः। शश्व-दिति बहुनाम। बहून्वीरान्पुत्रान्देहि ॥ जीवसे। जीव प्राणधारण इत्यस्य तुमर्थेऽसे-प्रत्ययः। प्रत्ययस्वरः। शश्वतः। टु ओश्वि गतिवृद्ध्योः। अस्मात्संश्वद्वेहदित्यादिना अतिप्रत्ययांतत्वेन निपातनादिष्टरूपसिद्धिः ॥

॥ अथैकादशी ॥

शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥ ११ ॥

शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ ।
शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ ११ ॥

॥ इति तृतीयस्य द्वितीये विंशो वर्गः ॥

वार्त्रहत्यायेत्येकादशर्चमष्टमं सूक्तं । एकादश्यनुष्टुप् शिष्टा गायत्र्यः । तथा चानुक्रांतं । वार्त्रहत्याय गायत्रमंत्यानुष्टुबिति ॥ अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रे वार्त्रहत्यायेत्युत्तमावर्जं सूक्तं शंसनीयं । तथा च सूचितं । वार्त्रहत्यायेत्युत्तमामुद्धरेत् । आ० ६. ४. । इति ॥ महाव्रते गायत्रीतृचाशीतावुत्तमावर्जमिदं सूक्तं पंचमारण्यके सूचितं । वार्त्रहत्याय शवस इत्युत्तमामुद्धरति । ऐ० आ० ५. ११. । इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

वार्त्रहत्याय शवसे पृतनाषाह्याय च । इंद्र त्वा वर्तयामसि ॥ १ ॥

वार्त्रऽहत्याय । शवसे । पृतनाऽसह्याय । च । इंद्र । त्वा । आ । वर्तयामसि ॥ १ ॥

विश्वामित्रः स्तौति । हे इंद्र वार्त्रहत्याय वृत्रहननिमित्ताय शवसे बलायापि च पृतनासाह्याय परकीयसेनाभिभवाय त्वामा सर्वतो वर्तयामसि । प्रवर्तयामः ॥ वार्त्रहत्याय । वृत्रघ्नः कर्मेत्यर्थे ब्राह्मणादित्वात् ष्यञ् । हनस्तोऽचिण्णलोः । पा० ७. ३. ३२. । इति तकारः । जित्वादाद्युदात्तः । पृतनाषाह्याय । षह मर्षण इत्यस्माद्भावे शकिसहोश्चेति यत् । संहितायां सहेः पृतनर्ताभ्यां च । पा० ८. ३. १०९. । इति षत्वं । दीर्घश्छांदसः । वर्तयामसि । वृतु वर्तन इत्यस्य ण्यंतस्य मस इदंतो मसिरिति मसि इत्यादेशः । निघातः ॥

॥ अथ द्वितीया ॥

अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो । इंद्र कृण्वंतु वाघतः ॥ २ ॥

अर्वाचीनं । सु । ते । मनः । उत । चक्षुः । शतक्रतो इति शतऽक्रतो । इंद्र । कृण्वंतु । वाघतः ॥ २ ॥

हे शतक्रतो। शतं क्रतवो यस्यासौ शतक्रतुः। हे इंद्र वाघतः। वहंति यज्ञियां धुरमिति वाघतः स्तोतारः। ते तव सु अस्मदभिमतफलसंपादनेन शोभनं मनोऽर्वाचीनमस्मदभिमुखं कृणवंतु। कुर्वंतु। उत अपि च चक्षुस्त्वदीयं दर्शनमस्मास्वनुग्रहदृष्टिं कुर्वंतु ॥ अर्वाचीनं। विभाषांचेरदिक्स्त्रियामिति खप्रत्ययः। खस्येनादेशः। चक्षुः। चक्षेः शिच्चेत्युसिप्रत्ययः। शिद्वद्भावात् ख्याञादेशाभावः। निदित्यनुवृत्तेराद्युदात्तः। कृणवंतु। कृवि हिंसाकरणयोरित्यस्य लोटि रूपं। आमंत्रितस्याविद्यमानवत्त्वेन पादादित्वादनिघातः। प्रत्ययस्वरः। वाघतः। वह प्रापणे। संश्वद्वेहदित्यादिना अतिप्रत्ययांतत्वेन निपातनादुपधावृद्धिः। हकारस्य घत्वं। प्रत्ययस्वरः ॥

॥ अथ तृतीया ॥

नामा॑नि ते शतक्रतो॒ विश्वा॑भिर्गी॒र्भिरी॑महे। इंद्रा॑भिमाति॒षाह्ये॑ ॥ ३ ॥

नामा॑नि। ते॒। श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो। विश्वा॑भिः। गी॒ःऽभिः। ई॒म॒हे॒। इंद्र॑। अ॒भि॒मा॒ति॒ऽसह्ये॑ ॥ ३ ॥

शतक्रतो हे इंद्र अभिमातिषाह्ये। मातिर्मानो गर्वः। अभितो मानो येषां तेऽभिमातयः शत्रवः। तेषां सहनमेव सह्यं। तस्मिन्युद्धेऽस्माकमुपस्थिते सति ते तव नामानि शक्रवज्रहस्तादीनि नामधेयानि। यद्वा तदुपलक्षितानि बलानि विश्वाभिर्गीर्भिः सर्वाभिः स्तुतिलक्षणाभिर्वाग्भिरीमहे। वयं याचामहे ॥ ईमहे। ई कांत्यादिषु। व्यत्ययेनात्मनेपदं। अदादित्वाच्छपो लुक्। निघातः ॥

॥ अथ चतुर्थी ॥

पु॒रु॒ष्टु॒तस्य॒ धाम॑भिः श॒तेन॑ महयामसि। इंद्र॑स्य चर्षणी॒धृत॑ः ॥ ४ ॥

पु॒रु॒ऽस्तु॒तस्य॑। धाम॑ऽभिः। श॒तेन॑। म॒ह॒या॒म॒सि॒। इंद्र॑स्य। च॒र्ष॒णि॒ऽधृत॑ः ॥ ४ ॥

हे इंद्र पुरुष्टुतस्य पुरुभिर्बहुभिः स्तोतृभिः स्तुतस्य शतेनापरिमितसंख्याकैर्धामभिस्तेजोभिर्युक्तस्य चर्षणीधृतश्चर्षणीनां मनुष्याणां कर्मानुष्ठातॄणामभिमतफलसंपादनेन धारकस्येंद्रस्य। यद्वा। आकृषंति सर्वमनेनेति चर्षणि बलं। तद्धारकस्य तव महयामसि। स्तोत्रं कुर्मः ॥ पुरुष्टुतस्य। ष्टुञ् स्तुतौ। कर्मणि क्तः। थाथादिस्वरः। संहितायां स्तुतस्तोमयोश्छंदसीति षत्वं। महयामसि। मह पूजायामित्यस्य लटीदंतो मसिः। निघातः। चर्षणीधृतः। कृष आकर्षणे। कृषेरादेश्च

चः । उ० २.१००.। इत्यनिप्रत्ययः । ककारस्य चकारादेशः । यद्वा । कृष विलेखने। कर्षंतीति चर्षणयो मनुष्याः । धृ धारणे । क्विप् । कृदुत्तरपदस्वरः ॥

॥ अथ पंचमी ॥

इंद्रं वृत्राय हंतवे पुरुहूतमुप ब्रुवे । भरेषु वाजसातये ॥ ५॥

इंद्रं । वृत्राय । हंतवे । पुरुऽहूतं । उप । ब्रुवे । भरेषु । वाजऽसातये ॥ ५॥

हे इंद्र वृत्राय हंतवे वृत्रनामकमसुरं हंतुं भरेषु युद्धेषु वाजसातयेऽन्नोपलक्षितधनलाभाय च पुरुहूतं पुरुभिराहूतमिंद्रं बलवंतं त्वामुपब्रुवे। सोमपानार्थं विश्वामित्रोऽहमाह्वयामि ॥ वृत्राय। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानं। हंतवे । हंतेस्तुमर्थे तवेन्प्रत्ययः । नित्स्वरः । ब्रुवे । ब्रूञ् व्यक्तायां वाचीत्यस्य लट्युत्तम इटि रूपं । निघातः। वाजसातये । सननं सातिः। वाजस्य सातिर्वाजसातिः । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरः ॥

॥ इति तृतीयस्य द्वितीय एकविंशो वर्गः ॥

॥ अथ तस्मिन्सूक्ते षष्ठी ॥

वाजेषु सासहिर्भव त्वामीमहे शतक्रतो । इंद्र वृत्राय हंतवे ॥ ६॥

वाजेषु। ससहिः। भव। त्वां। ईमहे। शतक्रतो इति शतऽक्रतो। इंद्र। वृत्राय। हंतवे॥६॥

शतक्रतो हे इंद्र वाजेषु ग्रामेषु सासहिः शत्रूणामभिभविता भव। वृत्राय हंतवे वृत्रं हंतुं त्वामीमहे । प्रार्थयामहे ॥ सासहिः । सहिवहिचलिपतिभ्यो यङंतेभ्यः किकिनौ वक्तव्याविति किप्रत्ययः । तस्य स्वरः । वृत्राय । कर्मणः संप्रदानं। हंतवे। तुमर्थे तवेन्प्रत्ययः ॥

॥ अथ सप्तमी ॥

द्युम्नेषु पृतनाज्ये पृत्सुतूर्षु श्रवःसु च । इंद्र साक्ष्वाभिमातिषु ॥ ७॥

द्युम्नेषु। पृतनाज्ये। पृत्सुतूर्षु। श्रवःऽसु। च। इंद्र। साक्ष्व। अभिऽमातिषु ॥७॥

द्युम्नेषु द्योतमानेषु धनेषु प्राप्तव्येष्वभिमानिनो ये सपत्नाः पृतनाज्ये। पृतनानामजनं गमनं यस्मिन्निति पृतनाज्यं संग्रामः। तस्मिन्संग्रामे च पृत्सुतूर्षु पृतनासु तरणशीलेषु शूरेषु श्रवःसु बलेषु च येऽभिमानिनः सपत्नाः संति तान् साक्ष्व। अभिभव। तथाभिमातिषु सर्वतो गर्वयुक्तेषु शत्रुषु पुरुषेषु ये सपत्नाः

तांश्चाभिभव ॥ पृतनाज्ये । अज गतिक्षेपणयोरित्यस्य ण्यंतस्य अचो यत् । पृतनानामाज्यं पृतनाज्यं । एकादेशस्वरः । पृत्सुतूर्षु । पृतनाशब्दस्य सौ परतः मांस्पृत्स्नूनामुपसंख्यानमिति पृदादेशः । ञित्वरा संभ्रमे । ताच्छीलिकः क्विप् । ज्वरत्वरेत्यादिना ऊट् । तत्पुरुषे कृति बहुलमिति पूर्वपदस्य सप्तम्या अलुक् । कृदुत्तरपदस्वरः । साक्ष्व । सह मर्षणे इत्यस्य लोटि बहुलं छंदसीति शपो लुक् । ढत्वकत्वे । दीर्घश्छांदसः ॥

चातुर्विंशिकेऽहनि माध्यंदिने सवने ब्राह्मणाच्छंसिशस्त्रे शुष्मिन्तमं न ऊतय इति तृचो वैकल्पिकोऽनुरूपः । सूचितं च । शुष्मिन्तमं न ऊतये आयंत इव सूर्यं । आ॰ ७. ४. । इति ॥

॥ सैषा सूक्तेऽष्टमी ॥

शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविं । इंद्र सोमं शतक्रतो ॥ ८ ॥

शुष्मिन्ऽतमं । नः । ऊतये । द्युम्निनं । पाहि । जागृविं । इंद्र । सोमं । शतक्रतो इति शतऽक्रतो ॥ ८ ॥

शतक्रतो हे इंद्र शुष्मिन्तमं बलवतां मध्येऽतिशयेन बलवंतं द्युम्निनं दीप्तिमंतं । यद्वा शुष्मिन्तमं शत्रूणां शोषकतमं द्युम्निनं यशस्विनं जागृविं जागरणशीलं । पीतः सोमो जागृविः स्वप्ननिवारक इति । तादृशं नोऽस्माकं संबंधिनं सोममूतयेऽस्माकं रक्षणाय पाहि । अत्रागत्य पिब ॥ शुष्मिन्तमं । तमपः पित्त्वादनुदात्तत्वे प्रत्ययस्वरः । पाहि । पातेर्लोटि बहुलं छंदसीति शपो लुक् । निघातः । जागृविः । क्विन्प्रत्ययांतः । नित्त्वादाद्युदात्तः ॥

॥ अथ नवमी ॥

इंद्रियाणि शतक्रतो या ते जनेषु पंचसु । इंद्र तानि त आ वृणे ॥ ९ ॥

इंद्रियाणि । शतक्रतो इति शतऽक्रतो । या । ते । जनेषु । पंचऽसु । इंद्र । तानि । ते । आ । वृणे ॥ ९ ॥

शतक्रतो हे इंद्र ते तव संबंधिषु पंचसु जनेषु गंधर्वाः पितरो देवा असुरा रक्षांसीत्येषु या यानींद्रियाणि रूपग्रहणादिसामर्थ्यानि स्थितानि ते त्वदीयानि तानींद्रियाण्यहमावृणे । संभजे । यद्वा पंचजनेषु निषादपंचमेषु चतुर्षु जनेषु यानींद्रियाणि सामर्थ्याणि तानि त्वदीयान्यहमावृणे ॥ इंद्रियाणि । इंद्रियमिंद्र-

लिंगमिंद्रदृष्टमिंद्रसृष्टमिंद्रजुष्टमिंद्रदत्तमिति वेति घच्। प्रत्ययांतत्वेन निपातनादंतोदात्तः। वृणे। वृङ् संभक्तावित्यस्य लटि रूपं। निघातः ॥

॥ अथ दशमी ॥

अगन्निंद्र श्रवो बृहद्युम्नं दधिष्व दुष्टरं। उत्ते शुष्मं तिरामसि ॥१०॥

अगन्। इंद्र। श्रवः। बृहत्। द्युम्नं। दधिष्व। दुस्तरं। उत्। ते। शुष्मं। तिरामसि॥१०॥

हे इंद्र बृहन्महत् श्रवः सोमलक्षणमस्माभिर्दीयमानमन्नमगन्। त्वां गच्छतु। त्वं दुष्टरं दुस्तरं शत्रुभिस्तरीतुमशक्यं द्युम्नं धनं दधिष्व। अस्मभ्यं प्रयच्छ। वयं तु ते त्वदीयं शुष्मं बलमुत्कृष्टं तिरामसि। सोमाज्यादिभिर्वर्धयामः ॥ अगन्। गमेर्लङि बहुलं छंदसीति शपो लुक्। हल्ङ्यादिना तिलोपः। मो नो धातोः। अडागमस्वरः। दधिष्व। दधातेर्लोटि छंदस्युभयथेति थास आर्द्धधातुकत्वादिडागमः। निघातः। दुस्तरं। तरतेः कृच्छ्रार्थे खल्। सुषामादित्वात्संहितायां षत्वं। लित्स्वरः। तिरामसि। इदंतो मसिः। निघातः ॥

॥ अथैकादशी ॥

अर्वावतो न आ गह्यथो शक्र परावतः।
उ लोको यस्ते अद्रिव इंद्रेह तत आ गहि ॥११॥

अर्वाऽवतः। नः। आ। गहि। अथो इति। शक्र। पराऽवतः।
ऊं इति। लोकः। यः। ते। अद्रिऽवः। इंद्र। इह। ततः। आ। गहि ॥११॥

शक्र बलवन्हे इंद्र अर्वावतोऽर्वाचीनात्समीपाद्देशात् अथो अपि च परावतोऽतिदूराद्देशान्नोऽस्मानभिलक्ष्यागहि। आगच्छ। अद्रिवः। अत्ति भक्षयति शत्रूनित्यद्रिर्वज्रः। तद्वन् हे इंद्र ते तव य उ लोक उत्तमो लोकोऽस्ति ततस्तस्मादपि लोकादिहास्मिन्देवयजने देशे सोमपानार्थमागहि। आगच्छ ॥ गहि। गमेर्लोटि रूपं। परावतः। उपसर्गाच्छंदसि धात्वर्थ इति वतिः। प्रत्ययस्वरः। अद्रिवः। मतुवसो रुरिति रुः। ततः। पंचम्यास्तसिलिति तसिल्। लित्स्वरः॥

॥ इति तृतीयस्य द्वितीये द्वाविंशो वर्गः ॥

अभि तष्टेवेति दशर्चं नवमं सूक्तं। अत्रानुक्रमणिका। अभि तष्टेव दश प्रजापतिः स वैश्वामित्रो वाच्यो वा द्वौ वा तौ न वैकोऽपीति। विश्वामित्रगोत्रः

प्रजापतिर्वाचः पुत्रः प्रजापतिर्वा ऋषिः। तावुभावपि समुच्चितावस्य सूक्तस्य ऋषी इति द्वितीयः पक्षः। अथवा नोभावपि किंतु विश्वामित्र एवेति तृतीयः पक्षः। त्रिष्टुप् छंदः। इंद्रो देवता ॥

चातुर्विंशिकेऽहनि माध्यंदिने सवनेऽच्छावाकशस्त्रेऽभि तष्टेवेत्यहरहःशस्यनामकं सूक्तं। सूचितं च। उदु ब्रह्माण्यभि तष्टेवेतीतरावहरहःशस्ये। आ॰ ७.४। इति ॥ एवं सर्वत्राहर्गणेषु द्वितीयादिष्वहःसु माध्यंदिने सवनेऽच्छावाकशस्त्र एतत्सूक्तं ॥

॥ अथ तस्मिन्सूक्ते प्रथमा ॥

अभि तष्टेव दीधया मनीषामत्यो न वाजी सुधुरो जिहानः।
अभि प्रियाणि मर्मृशत्पराणि कवीँरिच्छामि संदृशे सुमेधाः ॥ १ ॥

अभि। तष्टाऽइव। दीधय। मनीषां। अत्यः। न। वाजी। सुऽधुरः। जिहानः।
अभि। प्रियाणि। मर्मृशत्। पराणि। कवीन्। इच्छामि। संऽदृशे। सुऽमेधाः ॥ १ ॥

यजमानः स्तोतारं प्रति ब्रूते। हे स्तोतर्मनीषामिंद्रविषयां स्तुतिमभिदीधय। सर्वतो दीप्तां कुरु। तत्र दृष्टांतः। तष्टेव। यथा तष्टा तक्षणेन काष्ठं संस्करोति तद्वत्। सुधुरः शोभनया धुरान्वितो वाजी वेगवानत्यो नाश्व इव जिहानः कर्मणि प्रवर्तमानः पराण्युत्तमानि प्रियाणींद्रस्य प्रियतमानि। यद्वा पराण्युत्तरेष्वहःसु क्रियमाणानि कर्माण्यभिमर्मृशत् अत्यर्थमभिमृशन् सुमेधाः शोभनमेधावानहं कवीन्। ये पूर्वमनुष्ठितयज्ञाद्देवभूयमगमन् ते कवयः। तान् संदृशे संद्रष्टुमिच्छामि। उक्तार्थं ब्राह्मणं। अभि तष्टेव दीधया मनीषामित्यच्छावाकोऽहरहः शंसत्यभिवत्तत्यै रूपमभि प्रियाणि मर्मृशत्पराणीति यान्येव पराण्यहानि तानि प्रियाणि तान्येव तदभिमर्मृशतो यंत्यभ्यारभमाणाः परो वा अस्माल्लोकात्स्वर्गो लोकस्तमेव तदभिवदति कवीँरिच्छामि संदृशे सुमेधा इति ये वै तेन ऋषयः पूर्वे प्रेतास्ते वै कवयस्तानेव तदभ्यतिवदति। ऐ॰ ब्रा॰ ६.२०। इति ॥ तष्टेव। तक्षू त्वक्षू तनूकरण इत्यस्य तृनि रूपं। नित्स्वरः। दीधय। दीधीङ् दीप्तिदेवनयोरित्यस्यांतर्भावितण्यर्थस्य लोटि शपो बहुलं छंदसीति लुगभावः। व्यत्ययेन परस्मैपदं। सुधुरः। आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। जिहानः। ओहाङ् गतावित्यस्य शानचि भृञामिदित्यभ्यासस्येत्वं। चित्त्वादंतोदात्तत्वे प्राप्तेऽभ्यस्तानामादिरित्याद्युदात्तत्वं। मर्मृशत्। मृश आमर्शन इत्यस्य यङ्लुकि रुग्रिकौ च

लुकीत्यभ्यासस्य रुगागमः। तदंताच्छतरि रूपं। नाभ्यस्ताच्छतुरिति नुमभावः। अभ्यस्तस्वरः। संदृशे। दृशिर् प्रेक्षण इत्यस्मात्तुमर्थे दृशे विख्ये चेति केन्प्रत्ययांतत्वेन निपातनादाद्युदात्तः। समासे कृदुत्तरपदस्वरः। सुमेधाः। नित्यमसिच् प्रजामेधयोरित्यसिच्प्रत्ययः। चित्स्वरः॥

॥ अथ द्वितीया ॥

इनोत पृच्छ जनिमा कवीनां मनोधृतः सुकृतस्तक्षत द्यां।
इमा उ ते प्रण्यो३ वर्धमाना मनोवाता अध नु धर्मणि ग्मन् ॥२॥
इना। उत। पृच्छ। जनिम। कवीनां। मनःऽधृतः। सुऽकृतः। तक्षत। द्यां।
इमाः। ऊं इति। ते। प्रऽन्यः। वर्धमानाः। मनःऽवाताः। अध। नु। धर्मणि। ग्मन्॥२॥

उतेत्यामंत्रणे। हे इंद्र कवीनां सुकृतकर्मणां देवभूयगतानां जनिम जन्म। केन कर्मणा दिवं गताः कुतो वा तेषामुत्पत्तिरित्येतमर्थमिना ईश्वरान् गुरून्पृच्छ। ते कवयो मनोधृतः संयतमनस्का अत एव सुकृतः शोभनकर्माणः संतो द्यां दिवं तक्षत। अकुर्वन्। अध अथेदानीं धर्मण्यस्मिन्यज्ञे ते त्वदर्थं प्रण्यः प्रणीयमाना मनोवाता मनोवेगा वर्धमानास्त्वां वर्धयंत्य इमा अस्माभिः क्रियमाणाः स्तुतयो नु क्षिप्रं ग्मन्। त्वां गच्छंतु। उ सर्वत्र प्रसिद्ध्यर्थः॥ पृच्छ। प्रच्छ ज्ञीप्सायामित्यस्य लोटि तुदादित्वाच्छः। तस्य ङित्त्वाद्ग्रहिज्यादिना संप्रसारणं। निघातः। प्रण्यः। णीञ् प्रापण इत्यस्मादौणादिकः कर्मणि क्विप्। सर्वविधीनां छंदसि विकल्पितत्वादियङादेशं बाधित्वा यणादेशः। उदात्तस्वरितयोरिति स्वरितत्वं। ग्मन्। गमेर्लेङि बहुलं छंदसीति शपो लुक्। ऋङित्त्वाद्गमहनेत्यादिनोपधालोपः। निघातः॥

॥ अथ तृतीया ॥

नि षीमिदत्र गुह्या दधाना उत क्षत्राय रोदसी समंजन्।
सं मात्राभिर्ममिरे येमुरुर्वी अंतर्मही समृते धायसे धुः ॥३॥
नि। सीं। इत्। अत्र। गुह्या। दधानाः। उत। क्षत्राय। रोदसी इति। सं। अंजन्।
सं। मात्राभिः। ममिरे। येमुः। उर्वी इति। अंतः। मही इति। समृते इति संऽऋते।
धायसे। धुरिति धुः ॥३॥

अत्र भूलोके गुह्या गूढानि कर्माणि सीमित् सर्वत एव निदधानाः कुर्वाणा एते कवय उत अपि च क्षत्राय बलाय धनाय वा रोदसी द्यावापृथिव्यौ समंजन्। ओषधीभिः पृथिवीं देवैश्च दिवं संगतामकार्षुः। किंच ते मात्राभिः। मीयंते मांतीति वा मात्राः शिलोच्चयाः। ताभिर्मात्राभिः संममिरे। ते रोदस्या-वियत्तया परिच्छिन्ने चक्रुश्च। समृते परस्परं संगते उर्वी विस्तीर्णे मही महत्यौ ते द्यावापृथिव्यौ येमुः। विष्टंभकेनांतरिक्षेणांतरुदयच्छन्। तथा धायसे तयोर्धा-रणार्थमंतरिक्षं धुः। व्यधुः॥ इद्वधारणार्थे। गुह्या। गुहायां भवानि। भवार्थे यत्। यतोऽनाव इत्याद्युदात्तः। दधानाः। दधातेः शानचि रूपं। अभ्यस्तस्वरः। अंजन्। अंजू व्यक्तिम्रक्षणगतिष्वित्यस्य लङि श्नसोरल्लोपः। निघातः। मा-त्राभिः। मा माने माङ् माने वा। हुयामेत्यादिना त्रन्प्रत्ययः। नित्स्वरः। ममिरे। माङ् मान इत्यस्य लिटि रूपं। चादिलोपे विभाषेति न निघातः। येमुः। यम उपरम इत्यस्य लिट्युसि रूपं। तिङ्ङत्तरत्वादनिघातः। धायसे। वहिहाधाञ्भ्यश्छं-दसीत्यसुन्। नित्स्वरः। धुः। दधातेर्लुङि रूपं॥

॥ अथ चतुर्थी ॥

आतिष्ठंतं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः।
महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ॥४॥

आऽतिष्ठंतं। परि। विश्वे। अभूषन्। श्रियः। वसानः। चरति। स्वऽरोचिः।
महत्। तत्। वृष्णः। असुरस्य। नाम। आ। विश्वऽरूपः। अमृतानि। तस्थौ॥४॥

विश्वे सर्वे कवयो रथमातिष्ठंतमिंद्रं पर्यभूषन्। परितोऽलमकुर्वन्। स्वरोचिः। स्वमेव रोचिर्यस्यासौ स्वरोचिः। स्वप्रभयैव दीप्यमान इत्यर्थः। अत एव श्रियो दीप्तीर्वसान आच्छादयन् सोऽयमिंद्रश्चरति। सर्वत्र वर्तते। वृष्णः कामानां वर्षि-तुरसुरस्य। अस्यति प्रेरयति सर्वानंतर्यामितयेत्यसुरः। तस्येंद्रस्य तत्तादृशमनुभू-तपूर्वं नाम। नमयति सर्वान् शत्रूनिति नाम कर्म। यद्वा नम्यते सर्वैर्नम-स्क्रियत इति नामेंद्रस्य शरीरं कर्म वा। महदाश्चर्योपेतं वर्तते। तथा विश्वरूपो नानाविधरूपतां भजमानः स इंद्रो वरुणात्मनामृतानि जलान्यातस्थौ। अधि-तिष्ठति॥ विश्वे। जसः शी। अभूषन्। भूष अलंकार इत्यस्य लङि रूपं। वसानः। वस आच्छादन इत्यस्य शानचि रूपं। तस्य लसार्वधातुकस्वरे धातु-

स्वरः । नाम । णमु प्रह्वत्व इत्यस्मान्नामन्सीमन्नित्यादिना मनिन्प्रत्ययांतत्वेन निपातनादाद्युदात्तः । विश्वरूप इति तस्य संज्ञा । बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं । अमृतानि । कालाध्वनोरत्यंतसंयोग इति द्वितीया । तस्थौ । तिष्ठतेर्लिटि णलि रूपं ॥

॥ अथ पंचमी ॥

असूत पूर्वो वृषभो ज्यायानिमा अस्य शुरुधः संति पूर्वीः ।

दिवो नपाता विदथस्य धीभिः क्षत्रं राजाना प्रदिवो दधाथे ॥ ५ ॥

असूत । पूर्वः । वृषभः । ज्यायान् । इमाः । अस्य । शुरुधः । संति । पूर्वीः ।

दिवः । नपाता । विदथस्य । धीभिः । क्षत्रं । राजाना । प्रऽदिवः । दधाथे इति ॥ ५ ॥

वृषभः कामानां वर्षकः पूर्वश्चिरंतनोऽत एव ज्यायानिंद्रोऽसूत । अपः ससर्ज । पूर्वीर्बह्व्य इमा अनेन सृष्टा आपोऽस्य शुरुधः संति । शुचः पिपासाया रोधयित्र्यो भवंति । दिवो नपाता दिवो न पातयितारौ हे राजानाविंद्रावरुणौ प्रदिवः प्रकर्षेण द्योतमानस्य विदथस्य यज्ञकारिणः स्तोतुर्धीभिः स्तुतिभिः क्षत्रं धनं दधाथे । अस्मभ्यं दातुं धारयेथे ॥ असूत । षूङ् प्राणिगर्भविमोचन इत्यस्य लङि रूपं । अडागमस्वरः । ज्यायान् । प्रशस्यशब्दादीयसुनि ज्य चेति ज्यादेशः । ज्यादादीयस इतीयस आदेराकारादेशः । नित्त्वादाद्युदात्तः । शुरुधः । पृषोदरादिः । नपाता । नभ्राण्नपादिति निपातनान्नञः प्रकृतिभावः । आमंत्रितत्वान्निघातः । धीभिः । सावेकाच इति विभक्तेरुदात्तत्वं । राजाना । आमंत्रितत्वान्निघातः । दधाथे । दधातेर्लटि रूपं । निघातः ॥

॥ इति तृतीयस्य द्वितीये त्रयोविंशो वर्गः ॥

॥ अथ तस्मिन्सूक्ते षष्ठी ॥

त्रीणि राजाना विदथे पुरूणि परि विश्वानि भूषथः सदांसि ।

अपश्यमत्र मनसा जगन्वान्व्रते गंधर्वाँ अपि वायुकेशान् ॥ ६ ॥

त्रीणि । राजाना । विदथे । पुरूणि । परि । विश्वानि । भूषथः । सदांसि ।

अपश्यं । अत्र । मनसा । जगन्वान् । व्रते । गंधर्वान् । अपि । वायुऽकेशान् ॥ ६ ॥

हे राजानाविंद्रावरुणौ विदथेऽस्मिन्यज्ञे विश्वानि व्याप्तानि पुरूणि यजनीयैः

सोमादिभिः पूर्णानि त्रीणि सदांसि सवनानि परि भूषथः। सर्वतोऽलंकुरुथः। हे इंद्र त्वं जगन्वान्। यज्ञं प्रति गतवानसि। अपि संभावनायां। यतोऽहमत्र व्रते यज्ञे वायुकेशान् वायुवच्चलनरश्मीन् गंधर्वान् सोमरक्षकान् स्वानभ्राजादीन् मनसापश्यं। ते च स्वानभ्राजादयस्तैत्तिरीयके स्पष्टमभिहिताः। स्वान भ्राजांघारे बंभारे हस्त सुहस्त कृशानो। एते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्निति ॥ भूषथः। भूष अलंकार इत्यस्य लटि रूपं। अपश्यं। दृशिर् प्रेक्षण इत्यस्य लङि रूपं। पादादित्वादनिघातः। जगन्वान्। गमेः क्वसौ विभाषा गमहनविदविशामितीटो विकल्पितत्वाद्वेडभावः। मो नो धातोर्म्वोश्चेति मकारस्य नकारः। प्रत्ययस्वरः। गंधर्वान्। धृञ् धारण इत्यस्य गोशब्द उपपदे गवि गन् धृञो व इति वप्रत्ययः। तत्संनियोगेन गोशब्दस्य गनादेशः। प्रत्ययस्वरः ॥

॥ अथ सप्तमी ॥

तदिन्न्वस्य वृषभस्य धेनोरा नामभिर्ममिरे सक्म्यं गोः।
अन्यदन्यदसुर्यं१ वसाना नि मायिनो ममिरे रूपमस्मिन् ॥७॥

तत्। इत्। नु। अस्य। वृषभस्य। धेनोः। आ। नामऽभिः। ममिरे। सक्म्यं। गोः।
अन्यत्ऽअन्यत्। असुर्यं। वसानाः। नि। मायिनः। ममिरे। रूपं। अस्मिन् ॥७॥

ये यजमाना वृषभस्याभिमतफलप्रदस्यास्येंद्रस्यार्थं धेनोर्गोर्नामभिर्विश्वायुर्विश्वव्यचा इत्यादिभिरुपलक्षितां गां सक्म्यं संभजनार्हं तत्क्षीरादिकं हविर्नु क्षिप्रमाममिर आदुहंति। धातूनामनेकार्थत्वात्। तेन च हविषा यज्ञमनुष्ठाय देवभूयं प्राप्तास्ते कवयोऽन्यदन्यन्नूतनमसुर्यमसुराणां बलं वसाना आच्छादयंत अत एव मायिनो मायया स्वीकृतकामरूपाः। यद्वा मायिनः प्रज्ञावंतः संतोऽस्मिन्निंद्रे रूपं स्वं स्वं रूपं निममिरे। इयत्तया परिच्छिद्य निदधुः ॥ इत् पूरणं। ममिरे। माङ् माने। लिटि रूपं। निघातः। सक्म्यं। युजिरुचितिजां कुश्चेत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात्सचतेर्मक्प्रत्ययः कुत्वं च। सचनं सक्मः। तत्र भव इत्यर्थे भवे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तः। गोः। एकादेशस्वरः। असुर्यं। असुरस्य स्वमित्यर्थेऽसुरस्य स्वं। पा० ४.४.१२३.। इति यत्। तित्स्वरितः। रूपं। रूप रूपक्रियायां। ण्यंतः। खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः। उ० ३.२८.। इति पप्रत्ययांतत्वेन निपातनात्पकारलोपोऽगुणत्वं च। रूपयति रूप्यते वेति रूपं। प्रत्ययस्वरः ॥

॥ अथाष्टमी ॥

तदिन्न्वस्य सवितुर्नकिर्मे हिरण्ययीममतिं यामशिश्रेत् ।
आ सुष्टुती रोदसी विश्वमिन्वे अपीव योषा जनिमानि वव्रे ॥ ८ ॥

तत् । इत् । नु । अस्य । सवितुः । नकिः । मे । हिरण्ययीं । अमतिं । यां । अशिश्रेत् ।
आ । सुऽस्तुती । रोदसी इति । विश्वमिन्वे इति विश्वंऽइन्वे । अपिऽइव । योषा ।
जनिमानि । वव्रे ॥ ८ ॥

तन्नस्मात्सवितुः सर्वस्य जगतोऽंतर्यामितया प्रेरयितुरस्येंद्रस्य मे मम हिरण्ययीं सुवर्णमयीममतिं दीप्तिं नकिः को वा परिच्छिनत्ति खलु । यां मदीयां दीप्तिमशिश्रेत् य आश्रयति स सुष्टुती शोभनया स्तुत्या स्तुतः सन् विश्वमिन्वे सर्वस्य संतर्पयित्र्यौ रोदसी द्यावापृथिव्यावा वव्रे । स्वकीयतया सर्वतो वृणुते । तत्र दृष्टांतः । अपीव योषा जनिमानि । यथा योषा स्त्री जनिमानि जातान्यपत्यानि वृणोति तद्वत् ॥ नकिः । निपातः । हिरण्ययीं । हिरण्यस्य विकारार्थे मयड्वैतयोरिति मयट् । ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छंदसीति निपातनान्मयटो मकारलोपः । टिड्ढाणञिति ङीप् । प्रत्ययस्वरः । अमतिं । अम गत्यादिषु । अमेरतिरित्यतिप्रत्ययः । प्रत्ययस्वरः । अशिश्रेत् । श्रयतेर्लङि बहुलं छंदसीति शपः श्लुः । यद्वृत्तयोगादनिघातः । सुष्टुती । सुपां सुलुगिति तृतीयायाः सवर्णदीर्घः । विश्वमिन्वे । इवि व्याप्तिप्रीणनयोरित्यस्मात्कर्मण्यण् । इदित्त्वान्नुम् । तत्पुरुषे कृति बहुलमिति द्वितीयाया अलुक् । कृदुत्तरपदस्वरः । योषा । यौतेर्मिश्रीभावकर्मणो वृतृवदिहनिकमिकषियुमुचिभ्यः स इति सप्रत्ययः । ग्रामादित्वादाद्युदात्तः । जनिमानि । जनी प्रादुर्भावे । हृजनिभ्यामिमनिन्निितीमनिन्प्रत्ययो भूतकाले । नित्त्वादाद्युदात्तः । वव्रे । वृञ् वरण इत्यस्य लिटि रूपं ॥

॥ अथ नवमी ॥

युवं प्रत्नस्य साधथो महो यद्दैवी स्वस्तिः परि णः स्यातं ।
गोपाजिह्वस्य तस्थुषो विरूपा विश्वे पश्यंति मायिनः कृतानि ॥ ९ ॥

युवं । प्रत्नस्य । साधथः । महः । यत् । दैवी । स्वस्तिः । परि । नः । स्यातं ।
गोपाजिह्वस्य । तस्थुषः । विऽरूपा । विश्वे । पश्यंति । मायिनः । कृतानि ॥ ९ ॥

हे इंद्रावरुणौ युवं युवां प्रत्नस्य स्तोतुर्महस्तादृशं श्रेयः साधथः। साधयथः। कीदृशं तदित्यत आह। यद्दैवी स्वस्तिर्यदिदं देवसंबंधि श्रेयः स्वराज्यलक्षणं। किंच युवां नोऽस्मान्परि परितः स्यातं। रक्षकौ भवेतं। विश्वे सर्वे मायिनो देवा गोपाजिह्वस्य। गोप्त्री जिह्वा मा बिभीतेत्येतादृशी वाग्यस्य स तथोक्तः। तस्थुषः स्थिरतरस्येंद्रस्य विरूपा नानाविधानि वृत्रहननादीनि कृतानि कर्माणि पश्यंति। एवमिंद्रस्य विश्वरूपत्वमुक्तं ॥ युवं। युष्मच्छब्दस्य द्विवचने युवावौ द्विवचन इति युवादेशः। ङेप्रथमयोरमिति सुपोऽमादेशः। साधथः। साध संसिद्धावित्यस्य ण्यंतस्य लटि रूपं। बहुलमन्यत्रापीति णेर्लुक्। निघातः। दैवी। देवाद्यञञावित्यञ्प्रत्ययः। ञित्स्वरः। स्यातं। अस्तेर्लिङि रूपं। गोपा-जिह्वस्य। गुपू रक्षण इत्यस्यायप्रत्ययांतस्य क्विपतोलोपयलोपयोः कृतयो रूपं गोपा इति। बहुव्रीहौ पूर्वपदस्वरः। तस्थुषः। ष्ठा गतिनिवृत्तावित्यस्य क्वसौ वस्वेकाजाद्घसामिति प्राप्तस्येटः संप्रसारणं। संप्रसारणाश्रयं च बलीय इति संप्रसारणस्य बलीयस्त्वान्निवृत्तिः। वसोः संप्रसारणं। प्रत्ययस्वरः। पश्यंति। दृशिर् प्रेक्षणे। निघातः ॥

॥ अथ दशमी ॥

शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ।

शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥ १० ॥

शुनं। हुवेम। मघऽवानं। इंद्रं। अस्मिन्। भरे। नृऽतमं। वाजऽसातौ।

शृण्वंतं। उग्रं। ऊतये। समत्ऽसु। घ्नंतं। वृत्राणि। संऽजितं। धनानां ॥ १० ॥

॥ इति तृतीयस्य द्वितीये चतुर्विंशो वर्गः ॥

॥ इति तृतीये मंडले तृतीयोऽनुवाकः ॥

अथ चतुर्थेऽनुवाके पंचदश सूक्तानि। तत्रेंद्रं मतिरिति नवर्चं प्रथमं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं। इंद्रं मतिर्नवेत्यनुक्रांतं। सूक्तविनियोगो लिंगादवगंतव्यः॥

॥ तत्रैषा सूक्ते प्रथमा ॥

इंद्रं मतिर्हृद आ वच्यमानाच्छा पतिं स्तोमतष्टा जिगाति।

या जागृविर्विदथे शस्यमानेंद्र यत्ते जायते विद्धि तस्य ॥ १ ॥

इंद्रं। मतिः। हृदः। आ। वच्यमाना। अच्छ। पतिं। स्तोमऽतष्टा। जिगाति।
या। जागृविः। विदथे। शस्यमाना। इंद्र। यत्। ते। जायते। विद्धि। तस्य ॥१॥

विश्वामित्रः स्तौति। हे इंद्र हृदो हृदयाद्वच्यमानोच्यमाना स्तोमतष्टा स्तोमकारिभिः कृता मतिः स्तुतिः पतिं सर्वस्य जगतः स्वामिनं त्वामच्छाभिलक्ष्या जिगाति। समंतागच्छतु। या मदीया स्तुतिर्जागृविः स्तुत्यस्य तव जागरणं कुर्वाणा विदथे यज्ञे शस्यमाना भवति। हे इंद्र ते त्वदर्थं यत्स्तोत्रं मत्तो जायते तद्विद्धि। जानीहि। तस्येति द्वितीयार्थे षष्ठी ॥ मतिः। मंत्रे वृषेत्यादिना क्तिन्नुदात्तः। हृदः। हृदयशब्दस्य पद्दन्नोमासित्यादिना हृदादेशः। ऊडिदमिति विभक्तेरुदात्तत्वं। वच्यमाना। वच परिभाषण इत्यस्य कर्मणि यक्। संप्रसारणाभावश्छांदसः। प्रत्ययस्वरः। स्तोमतष्टा। तक्षू त्वक्षू तनूकरण इत्यस्य कर्मणि निष्ठा। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। जिगाति। गा स्तुतौ छंदसीति जुहोत्यादिः। बहुलं छंदसीत्यभ्यासस्येत्वं। निघातः। जायते। जनी प्रादुर्भाव इत्यस्य लटि रूपं। यद्वृत्तयोगादनिघातः। विद्धि। विद ज्ञान इत्यस्य लोटि हेर्हुझल्भ्यो हेर्धिरिति ध्यादेशः। वाक्यभेदादनिघातः ॥

॥ अथ द्वितीया ॥

दिवश्चिदा पूर्व्या जायमाना वि जागृविर्विदथे शस्यमाना।
भद्रा वस्त्राण्यर्जुना वसाना सेयमस्मे सनजा पित्र्या धीः ॥२॥

दिवः। चित्। आ। पूर्व्या। जायमाना। वि। जागृविः। विदथे। शस्यमाना।
भद्रा। वस्त्राणि। अर्जुना। वसाना। सा। इयं। अस्मे इति। सनऽजा। पित्र्या। धीः ॥२॥

हे इंद्र दिवश्चित् द्योतमानात्सूर्यादपि पूर्व्या पूर्वे भवोषःकालसंबंधिन्याजायमाना या स्तुतिलक्षणा वाग्विभवति सेयं वाग्विदथे यज्ञे शस्यमाना जागृविः स्तुत्यस्य तव जागरणं कुर्वाणा भद्रा कल्याणान्यर्जुना शुक्लवर्णानि वस्त्राणि योग्यतया तेजांसि वसानास्मे अस्माकं पित्र्या पितृक्रमागता अत एव सनजा पुरातनी सती धीस्तव स्तुतिर्भवति ॥ दिवः। दिवेः क्विप्। ऊडिदमिति विभक्तेरुदात्तत्वं। अर्जुना। अर्जेर्णिलुक्चेत्युनन्। नित्स्वरः। सनजा। जनेरन्येभ्योऽपि दृश्यत इति डः। प्रत्ययस्वरः। पित्र्या। पितृशब्दात्तत आगत इत्यर्थे पितुर्यच्चेति यत्प्रत्ययः। रीङृत इति रीङादेशः। यस्येति लोपः। यतोऽनाव इत्याद्युदात्तत्वं ॥

॥ अथ तृतीया ॥

यमा चिदत्र यमसूरसूत जिह्वाया अग्रं पतदा ह्यस्थात् ।
वपूंषि जाता मिथुना सचेते तमोहना तपुषो बुध्न एता ॥ ३ ॥

यमा । चित् । अत्र । यमऽसूः । असूत । जिह्वायाः । अग्रं । पतत् । आ । हि । अस्थात् ।
वपूंषि । जाता । मिथुना । सचेते इति । तमःऽहना । तपुषः । बुध्ने । आऽइता ॥ ३ ॥

प्रसंगादुषःकालं प्रशंसति । यमसूः । यमौ यमलौ सूत इति यमसूरुषोऽभिमानिनी देवता । सा यमा यमलावश्विनावत्रोषःकालेऽसूत । अश्विनोस्तत्र शस्यमानत्वात्तावश्विनौ स्तोतुं मम जिह्वाया अग्रं पतच्चंचलमास्थाद्धि । तिष्ठति खलु । तमोहना तमसो हंतारौ तपुषः । तपत्यस्मिन्सूर्य इति तपुर्दिवसः । तस्य बुध्ने मूल एता एतावागतौ मिथुना परस्परं संगतौ तावश्विनौ जातोत्पन्नानि वपूंषि । उप्यंते निधीयंत इति वपूंष्युषःकाले क्रियमाणानि शस्त्रादीनि कर्माणि । सचेते । संगच्छतः ॥ यमसूः । षूङ् प्राणिगर्भविमोचन इत्यस्य क्विप् । कृदुत्तरपदस्वरः । असूत । तस्यैव धातोर्लङ्यदादित्वाच्छपो लुक् । निघातः । पतत् । पत्लृ गतौ । शतुर्लसार्वधातुकस्वरे धातुस्वरः । अस्थात् । ष्ठा गतिनिवृत्तौ । लुङि रूपं । हियोगादनिघातः । वपूंषि । डुवप् बीजसंताने । अर्तिपृवपियजितनिधनितपिभ्यो निदित्युसिप्रत्ययः । नित्त्वेत्युक्तत्वादाद्युदात्तः । सचेते । षच समवाय इत्यस्य लटि रूपं । तपूंषि । तप संतापे । अर्तिपृवपीत्यादिना उसिः । बुध्ने । बन्ध बंधने । बंधेर्ब्रधिबुधी च । उ॰ ३. ५. । इति नक्प्रत्ययः । ब्रधिबुधी एतावादेशौ धातोः । प्रत्ययस्वरः । एता । इण् गतावित्यस्य कर्मणि निष्ठा । गतिरनंतर इति गतेः स्वरः ॥

॥ अथ चतुर्थी ॥

नकिरेषां निंदिता मर्त्येषु ये अस्माकं पितरो गोषु योधाः ।
इंद्र एषां दृंहिता माहिनावानुद्गोत्राणि ससृजे दंसनावान् ॥ ४ ॥

नकिः । एषां । निंदिता । मर्त्येषु । ये । अस्माकं । पितरः । गोषु । योधाः ।
इंद्रः । एषां । दृंहिता । माहिनऽवान् । उत् । गोत्राणि । ससृजे । दंसनाऽवान् ॥ ४ ॥

हे इंद्र सत्रे प्रवृत्तानामस्माकं ये पितरोऽंगिरसो गोषु पणिभिरपहृतेषु योधा योद्धारो वर्तंते तेषामेषां मर्त्येषु निंदिता दूषको नकिर्न कश्चिदस्ति । कुत इत्यत

आह। माहिनावान्महिमोपेतो दंसनावान्वृत्रहननादिकर्मवानिंद्र एषामंगिरसां दृंहितानि समृद्धानि गोत्राणि गवां वृंदान्युत्ससृजे। तेभ्योऽंगिरोभ्यो ददौ॥ निंदिता। निदि कुत्सायामित्यस्य तृचि रूपं। मर्त्येषु। वस्वादित्वात्स्वार्थिको यत्। यतोऽनाव इत्याद्युदात्तत्वं। योधाः। युध संप्रहार इत्यस्य पचाद्यचि रूपं। दृंहिता। दृह दृहि वृद्धावित्यस्य निष्ठायां रूपं। माहिनावान्। महेरिनणचेतीनण्प्रत्ययः। तदस्यास्तीति मतुप्। माहिनावानिति तस्य संज्ञा। मतौ बह्वचोऽनजिरादीनामिति संहितायां दीर्घः। गोत्राणि। गवां समूह इत्यर्थे खलगोरथादित्यनुवृत्ताविनित्रकट्यचश्चेति गोशब्दात्त्रप्रत्ययः। प्रत्ययस्वरः। ससृजे। सृज विसर्गे इत्यस्य लिटि रूपं॥

दशपेये निष्केवल्ये निविद्धानीयस्य पुरस्तात्सखा ह यत्रेत्येषा। सूचितं च। सखा ह यत्र सखिभिर्नवग्वैरिति निविद्धानीययोराद्ये। आ॰ ९. ३.। इति॥

॥ तत्रैषा सूक्ते पंचमी॥

सखा॑ ह॒ यत्र॒ सखि॑भि॒र्नव॑ग्वैरभि॒ज्ञ्वा सत्व॑भि॒र्गा अ॑नु॒ग्मन्।
स॒त्यं तदिंद्रो॑ द॒शभि॒र्दश॑ग्वैः सूर्यं॑ विवेद॒ तम॑सि क्षि॒यंतं॑॥५॥

सखा॑। ह॒। यत्र॑। सखि॑ऽभिः। नव॑ऽग्वैः। अ॒भि॒ऽज्ञु। आ। सत्व॑ऽभिः। गाः। अ॒नु॒ऽग्मन्।
स॒त्यं। तत्। इंद्रः॑। द॒शऽभिः॑। दश॑ऽग्वैः। सूर्यं॑। वि॒वे॒द॒। तम॑सि। क्षि॒यंतं॑॥५॥

सखिभिः समानख्यानैः सत्वभिरिंद्रमभितः सीदद्भिर्नवग्वैः। मेधातिथिप्रभृतयोऽंगिरसः केचिन्नव मासान्सत्रमनुष्ठाय फलं लेभिरे केचिद्दश मासाननुष्ठायेति। तत्र ये नव मासान् सत्रमनुष्ठाय लब्धफला उदतिष्ठन् ते नवग्वाः। तैः सत्वभिरंगिरोभिः सखा समानख्यान इंद्रो यत्र यस्मिन्बिले पणिभिर्निरुद्धा गा अभिलक्ष्याभिज्ञु अभिगतजानुकं यथा भवति तथानुग्मन् अनुगच्छन्निंद्रस्तत्र बिले दशग्वैः। ये दश मासान्सत्रमनुष्ठाय लब्धफला उदतिष्ठन्ते दशग्वाः। दशभिर्दशसंख्याकैरंगिरोभिः सहितः सन् तमसि बिलवर्तिन्यंधकारे क्षियंतं निवसंतं सत्यं यथार्थप्रकाशं सूर्यं विवेद। लेभे। ततो लब्धप्रकाशः स इंद्रस्ता गा आनीयांगिरोभ्यः प्रादादिति भावः॥ सखा। ख्या प्रकथने। समाने ख्यश्चोदात्त इतीण्प्रत्ययः। डिच्च। समानस्य छंदसीति समानस्य सभावः। उदात्त इत्युक्तेन सामार्थ्यादुपपदस्येति गम्यते। आद्युदात्तः। नवग्वैः। गमेरौणादिको ड्वप्रत्ययः।

बहुव्रीहौ पूर्वपदस्वरः । अभिज्ञु । प्रसंभ्यां जानुनो ज्ञुरिति विधीयमानो ज्ञुरभेरुत्तरस्य व्यत्ययेन भवति । सत्वभिः । षद्लृ विशरणगत्यवसादनेष्वित्यस्मात्प्र ईरसद्योस्तुट् चेति क्वनिप्प्रत्ययः । तुडागमः । नित्त्वादाद्युदात्तः । अनुग्मन् । गमेः शतरि बहुलं छंदसीति शपो लुकि कृते गमहनेत्यादिनोपधालोपः । प्रादिसमासः । शतृस्वरः । विवेद् । विद् ज्ञान इत्यस्माल्लिटि णलि रूपं । क्षियंतं । क्षि निवासगत्योरित्यस्य शतरि रूपं ॥

॥ इति तृतीयस्य द्वितीये पंचविंशो वर्गः ॥

॥ तस्मिन्सूक्ते षष्ठी ॥

इंद्रो मधु संभृतमुस्रियायां पद्वद्विवेद शफवन्नमे गोः ।
गुहा हितं गुह्यं गूळ्हमप्सु हस्ते दधे दक्षिणे दक्षिणावान् ॥ ६ ॥
इंद्रः । मधु । संऽभृतं । उस्रियायां । पत्ऽवत् । विवेद् । शफऽवत् । नमे । गोः ।
गुहा । हितं । गुह्यं । गूळ्हं । अप्ऽसु । हस्ते । दधे । दक्षिणे । दक्षिणऽवान् ॥ ६ ॥

इंद्र उस्रियायां क्षीरदध्यादिक्रमेणोत्स्राविण्यां भोगवत्यां गवि संभृतं संपादितं मधु क्षीरादि विवेद । अज्ञासीत् । ततस्तदर्थं पद्वत्पादयुक्तं शफवत्खुरोपेतं गोधनं विवेद । लेभे । कथं लब्धवानिति तदुच्यते । नमे गोः । गोरिति द्वितीयार्थे षष्ठी । पणिनामकैरसुरैरपहृतां गां नमे । आनीतामकरोत् । तथा दक्षिणावानौदार्यवान्समर्थः स इंद्रो गुहा गुहायां हितं गुह्यं प्रच्छन्नं अत एवाप्स्वंतरिक्षे गूढं गूढचारिणं मायिनमसुरं दक्षिणे हस्ते दधे । दधार । अग्रहीदित्यर्थः ॥ द्वितीयाष्टके ।२.६.३.। श्रुधि हवमित्यस्मिन्वर्गे गुहा हितमित्येतत्सम्यगभ्यधायि । उस्रियायां प्रक्रिया सम्यक् पूर्वमेवावादि ॥ विवेद । विद ज्ञाने विद्लृ लाभे । एतयोर्लिटि रूपं । शफवत् । शफोऽस्यास्तीति मतुप् । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । नमे । णमु प्रह्वत्व इत्यस्य लिटि रूपं । द्विर्वचनस्य छंदसि विकल्पितत्वादत्र द्विर्वचनाभावः । वाक्यभेदादनिघातः । गुह्यं । गुहू संवरण इत्यस्माच्छंसिगुहिदुहिभ्यो वेतिवक्तव्यमिति क्यप् । कित्त्वादगुणः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । दधे । दधातेर्लिटि रूपं । दक्षिणावान् । दक्ष वृद्धौ । द्रुदक्षिभ्यामिनन्नितीनन्प्रत्ययः । तदस्यास्तीति मतुप् । संहितायामन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घः । नित्स्वरः ॥

॥ अथ सप्तमी ॥

ज्योतिर्वृणीत तमसो विजानन्नारे स्याम दुरितादभीके ।
इमा गिरः सोमपाः सोमवृद्ध जुषस्वेंद्र पुरुतमस्य कारोः ॥ ७ ॥
ज्योतिः । वृणीत । तमसः । विऽजानन् । आरे । स्याम । दुःऽइतात् । अभीके ।
इमाः । गिरः । सोमऽपाः । सोमऽवृद्ध । जुषस्व । इंद्र । पुरुऽतमस्य । कारोः ॥ ७ ॥

तमसो रात्रेः सकाशाद्विजानन्विशेषेण जानन् प्रादुर्भवन्सूर्यात्मक इंद्रो ज्योतिर्वृणीत । जगद्व्यवहारनिर्वाहकं प्रकाशं समभक्त । यद्वा तमसस्तमोरूपाद्वृत्रादेर्विजानन् प्रादुर्भवन् । वृत्रं हत्वा प्रकाशमवृणीत । वयं दुरितात्पापादारे दूरे पापवर्जिताः संतोऽभीके भयरहिते स्थाने स्याम । भवेम । सोमपाः सोमस्य पातरत एव सोमवृद्ध सोमपानेषु वृद्ध हे इंद्र पुरुतमस्य । पुरून् शत्रून् तामयति ग्लापयतीति पुरुतमः । तादृशस्य कारोः स्तोत्रं कुर्वाणस्य ऋत्विज इमाः स्तुतिलक्षणा गिरो वाचो जुषस्व । सेवस्व ॥ वृणीत । वृङ् संभक्तावित्यस्य लङि रूपं । विजानन् । ज्ञा अवबोधने । विशेषेण ज्ञानं प्रकाशः । प्रत्ययस्वरः । अभीके । न विद्यते भीर्यस्मिन् । ततः शेषाद्विभाषा । पा॰ ५.४.१५४. । इति कप्प्रत्ययः । नञ्सुभ्यामित्यंतोदात्तत्वे प्राप्ते कपि पूर्वस्यांतोदात्तत्वं । पुरुतमस्य । तमु ग्लान इत्यस्माण्ण्यंतात्पचाद्यचि परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं ॥

॥ अथाष्टमी ॥

ज्योतिर्यज्ञाय रोदसी अनु ष्यादारे स्याम दुरितस्य भूरेः ।
भूरि चिद्धि तुजतो मर्त्यस्य सुपारासो वसवो बर्हणावत् ॥ ८ ॥
ज्योतिः । यज्ञाय । रोदसी इति । अनु । स्यात् । आरे । स्याम । दुःऽइतस्य । भूरेः ।
भूरि । चित् । हि । तुजतः । मर्त्यस्य । सुऽपारासः । वसवः । बर्हणाऽवत् ॥ ८ ॥

हे इंद्र ज्योतिर्जगत्प्रकाशकः सूर्यो यज्ञायाग्निहोत्रादिकर्मकरणाय रोदसी द्यावापृथिव्यावनुष्यात् । अनुभवतु । प्रकाशयतु । वयं भूरेः प्रभूतस्य दुरितस्य पापस्यारे दूरे स्याम । भवेम । हे वसवः सर्वस्य वासयितार इंद्रादयः सुपारासः सुपाराः शोभनपाराः स्तुत्याभिमुखीकर्तुं शक्या यूयं भूरि चिदतिप्रभूतं बर्हणावत्समृद्धियुक्तं धनं तुजतो भूरिप्रदस्य मर्त्यस्य प्रयच्छथ । अत्र योग्यक्रियाध्याहारः ॥ स्यात् ।

अस्तेर्लिङि रूपं । संहितायामनोरुत्तरस्यास्तेरुपसर्गप्रादुर्भ्यामस्तिर्यच्पर इति षत्वं। निघातः। तुजतः। तुजि पिंजि लाज हिंसादाननिकेतनेषु। शतुरनुम इति विभक्तेरुदात्तत्वं। बर्हणावत्। वृहि वृद्धावित्यस्य भाव औणादिको युप्रत्ययः। प्रत्ययस्वरः॥

॥ अथ नवमी ॥

शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥ ९॥
शुनं। हुवेम। मघऽवानं। इंद्रं। अस्मिन्। भरे। नृऽतमं। वाजऽसातौ।
शृण्वंतं। उग्रं। ऊतये। समत्ऽसु। घ्नंतं। वृत्राणि। संऽजितं। धनानां॥९॥

॥ इति तृतीयस्य द्वितीये षड्विंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके द्वितीयोऽध्यायः समाप्तः ॥

---

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

इंद्र त्वेति नवर्चं द्वितीयं सूक्तं वैश्वामित्रं गायत्रमैंद्रं। तथा चानुक्रांतं। इंद्र त्वा गायत्रं हीति॥ अग्निष्टोमे प्रातःसवने ब्राह्मणाच्छंसिशस्त्र इदं सूक्तं। सूचितं च। इंद्र त्वा वृषभमुद्वेदभीति तिस्रः। आ० ५.१०.। इति॥ आद्या प्रातःसवने ब्राह्मणाच्छंसिनः प्रस्थितयाज्या। सूचितं च। इंद्र त्वा वृषभं मरुतो यस्य। आ० ५.५.। इति॥

॥ तत्रैषा सूक्ते प्रथमा ॥

इंद्रं त्वा वृषभं वयं सुते सोमे हवामहे। स पाहि मध्वो अंधसः ॥ १ ॥

इंद्रं। त्वा। वृषभं। वयं। सुते। सोमे। हवामहे। सः। पाहि। मध्वः। अंधसः ॥ १ ॥

इंदौ स्रवति सोमरसे रमते क्रीडतीतींद्रः। यद्वा इदं सर्वं जगत्साक्षाद्दर्शयतीतींद्रः। तस्य संबुद्धिः। हे इंद्र वृषभं कामानां वर्षकं त्वा त्वां सुते ग्रावभिरभिषुते सोमे वयं हवामहे। सोमपानार्थमाह्वयामः। स त्वं मध्वो मदकरमंधसोऽन्नलक्षणं सोमं पाहि। पिब। इंद्रशब्दं यास्को बहुधा निर्विवेच। इंद्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयतीति वेरां धारयतीति वेंदवे द्रवतीति वेंदौ रमत इति वेंद्धे भूतानीति वा। तद्यदेनं प्राणैः समैंधंस्तदिंद्रस्येंद्रत्वमिति। यत्र यत्र योऽर्थोऽनुगुणस्तत्र सोऽर्थः स्वीकार्यः। इदंदर्शनादित्यौपमन्यवः। इदं ब्रह्म साक्षात्पश्यतीतींद्रः। तथा चारण्यके श्रूयते। स एतमेव पुरुषं ब्रह्मततममपश्यदिदमदर्शमिती३ँ। तस्मादिंद्रो नामेदंद्रो ह वै नाम तमिदंद्रं संतमिंद्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः। ऐ॰ आ॰ २.२३.। इति ॥ इंद्र। इदि परमैश्वर्ये इति धातुः। स्वमायया जगद्रूपत्वं परमैश्वर्यं। अनेनाभिप्रायेण श्रूयते। इंद्रो मायाभिः पुरुरूप ईयत इति। इंदुशब्द उपपदे रमतेरन्येभ्योऽपि दृश्यत इति डः। पूर्वपदस्योकारलोपः। इदि परमैश्वर्ये इत्यस्मादृज्रेंद्राग्र इत्यादिना रन्प्रत्ययांतत्वेन निपातितः। एवमेतानि निर्वचनानि द्रष्टव्यानि। आमंत्रिताद्युदात्तत्वं। हवामहे। ह्वयतेर्बहुलं छंदसीति संप्रसारणे लटि रूपं। मध्वः। मधुशब्दः फलिपाटीत्यादिनोन्प्रत्ययांतः। आगमानुशासनस्यानित्यत्वान्नुमभावः। संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः। यणादेशः। अंधसः। अदेर्नुम् धश्चेत्यसुन्। नित्स्वरः ॥

ब्राह्मणाच्छंसिनः प्रातःसवन इंद्र क्रतुविदमिति शस्त्रयाज्या। सूचितं च। इंद्र क्रतुविदं सुतमिति याज्या। आ॰ ५.१०.। इति ॥

॥ सैषा सूक्ते द्वितीया ॥

इंद्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत। पिबा वृषस्व तातृपिं ॥ २ ॥

इंद्र। क्रतुऽविदं। सुतं। सोमं। हर्य। पुरुऽस्तुत। पिब। आ। वृषस्व। ततृपिं ॥ २ ॥

हे इंद्र क्रतुविदं क्रतोः प्रज्ञाया लंभकं सुतमभिषुतमिमं सोमं हर्य। पातुं कामयस्व। हे पुरुष्टुत पुरुभिर्बहुभिः स्तुतेंद्र तातृपिं तर्पकमाप्यायनकारिणमिमं

सोमं पिब। पीतमिमं सोममावृषस्व। जठरे सिंच। यथा नाभेरधो न पतति तथा धारयेति भावः ॥ हर्य। हर्य गतिकांत्योरित्यस्य लोटि रूपं। निघातः। पुरुष्टुत। स्तुतस्तोमयोश्छंदसीति संहितायां षत्वं। वृषस्व। वृष सेचन इत्यस्य लोटि रूपं। आङ उत्तरत्वान्निघातः। तातृपिं। तृप प्रीणन इत्यस्माच्छंदसि सदादिभ्यो दर्शनादिति क्विन्। तस्य लिड्वद्भावाद्द्विर्वचनादि। संहितायामन्येषामपीत्यभ्यासस्य दीर्घः। नित्त्वादाद्युदात्तः ॥

॥ अथ तृतीया ॥

इंद्र प्र णो धितावानं यज्ञं विश्वेभिर्देवेभिः। तिरः स्तवान विश्पते ॥ ३ ॥

इंद्र। प्र। नः। धितऽवानं। यज्ञं। विश्वेभिः। देवेभिः। तिरः। स्तवान। विश्पते ॥ ३ ॥

हे स्तवान स्तोतृभिः स्तूयमान विश्पते विशां मरुतां पते हे इंद्र विश्वेभिर्देवेभिः सर्वैर्यजनीयैर्देवैः सहितस्त्वं धितावानं। वन्यते संभज्यत इति वानं हविः। धितं निहितं हविर्यस्य तं। संभृतहविष्कमित्यर्थः। अस्मदीयमिमं यज्ञं प्रतिरः। प्रकर्षेण वर्धय। हविःस्वीकरणेन संपूर्णं कुर्विति भावः ॥ णः। उपसर्गाद्बहुलमिति संहितायां णत्वं। धितावानं। डुधाञ् धारणपोषणयोरित्यस्मान्निष्ठा। बहुव्रीहौ पूर्वपदस्वरः। तिरः। तरतेर्व्यत्ययेन शः। प्रत्ययस्वरः। स्तवान। ष्टुञ् स्तुतौ। सम्यानच् स्तुव इत्युपपदाभावेऽपि कर्मण्यानच्प्रत्ययः। आमंत्रितत्वान्निघातः ॥

॥ अथ चतुर्थी ॥

इंद्र सोमाः सुता इमे तव प्र यंति सत्पते। क्षयं चंद्रास इंदवः ॥ ४ ॥

इंद्र। सोमाः। सुताः। इमे। तव। प्र। यंति। सत्ऽपते। क्षयं। चंद्रासः। इंदवः ॥ ४ ॥

हे सत्पते इंद्र चंद्रास आह्लादयितार इंदवो दीप्ताः सुता अभिषुता इमेऽस्माभिर्दत्ताः सोमाः क्षयं। क्षियंति निवसंत्यन्नादीन्यत्रेति क्षयो जठरं। प्रयंति। प्रकर्षेण गच्छंति। तान् धारयेति भावः ॥ क्षयं। क्षि निवासगत्योरित्यस्मादधिकरणे घप्रत्ययः। प्रत्ययस्वरेणांतोदात्तत्वे प्राप्ते क्षयो निवास इत्याद्युदात्तत्वं। चंद्रासः। चदि आह्लादने दीप्तौ च। अस्मात्स्फायितंचीत्यादिना रक्प्रत्ययः। आज्जसेरसुगित्यसुक्। प्रत्ययस्वरः। इंदवः। उंदेरिच्चादेरित्युप्रत्ययः। निदित्यनुवृत्तेराद्युदात्तः ॥

॥ अथ पंचमी ॥

दधिष्वा जठरे सुतं सोममिंद्र वरेण्यं । तव द्युक्षास इंदवः ॥ ५ ॥

दधिष्व । जठरे । सुतं । सोमं । इंद्र । वरेण्यं । तव । द्युक्षासः । इंदवः ॥ ५ ॥

हे इंद्र वरेण्यं सर्वैर्वरणीयं सुतमभिषुतं सोमं जठरे दधिष्व । धारय । इंदवो दीप्ता इमे सोमास्तव द्युक्षासः । दिवि क्षियंति वसंतीति द्युक्षासः । अतस्त्वं तान् धारयेति भावः ॥ दधिष्व । दधातेर्लोटि रूपं । आगमा अनुदात्ता इतीटोऽनुदात्तत्वात्प्रत्ययस्वरः । वरेण्यं । वृङ् संभक्तौ । वृङ एण्यप्रत्ययः । वृषादित्वादाद्युदात्तः । द्युक्षासः । क्षियतेरन्येभ्योऽपि दृश्यत इति डप्रत्ययः । कृदुत्तरपदस्वरः ॥

॥ इति तृतीयस्य तृतीये प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे । इंद्र त्वादातमिद्यशः ॥ ६ ॥

गिर्वणः । पाहि । नः । सुतं । मधोः । धाराभिः । अज्यसे । इंद्र । त्वाऽदातं । इत् । यशः ॥ ६ ॥

गिर्वणो गीर्भिर्वननीय । तथा च यास्कः । गिर्वणो देवो भवति गीर्भिरेनं वनयंति । नि० ६.१४. । इति । तादृशेंद्र नोऽस्मदीयं सुतमभिषुतमिमं सोमं पाहि । पिब । यतो मधोर्मदकरस्य सोमस्य धाराभिरज्यसे सिच्यसे हे इंद्र त्वादातमित्त्वया शोधितं विशदीकृतमेव यशोऽन्नमस्मासु भवति ॥ गिर्वणः । वन संभक्तावित्यस्मादसुन् । गिर उपधाया दीर्घाभावश्छांदसः । आमंत्रितस्येति षाष्ठिकमाद्युदात्तत्वं । पाहि । पा पान इत्यस्माल्लोटि रूपं । आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः । प्रत्ययस्वरः । त्वादातं । दैप् शोधने । सत्यपि पकारे नानुबंधकृतमनेजंतत्वमित्येजंत एवायं । तत आदेच इत्यात्वं । अस्मात्कर्मणि क्तः । दाधा घ्वदाबित्यत्रादाबिति प्रतिषेधेन घुसंज्ञाया अभावाद्दो दद्घोरिति ददादेशो न भवति । त्वेति युष्मच्छब्दस्य तृतीया कर्तृकरणे कृता बहुलमिति समासः । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः । यशः । अशू व्याप्तौ । अशेर्युट्चेत्यसुन् । तत्संनियोगेन धातोर्युडागमः । नित्त्वादाद्युदात्तः ॥

॥ अथ सप्तमी ॥

अभि द्युम्नानि वनिन इंद्रं सचंते अक्षिता । पीत्वी सोमस्य वावृधे ॥ ७ ॥

अभि । द्युम्नानि । वनिनः । इंद्रं । सचंते । अक्षिता । पीत्वी । सोमस्य । ववृधे ॥ ७ ॥

वनिनः। वनं देवताविषयं संभजनमस्यास्तीति वनी। तस्य देवान् संभजमानस्य यजमानस्य द्युम्नानि द्योतमानान्यक्षिता क्षयरहितानि संपूर्णानि सोमादीनि हवींषींद्रमभि अभितः सचंते। समवयंति। तेषु मध्ये सोमस्य पीत्वी सोमं पीत्वा वावृधे। स इंद्रो वर्धते ॥ वनिनः। अत इनिठनाविती॑निप्रत्ययः। तस्य स्वरः। सचंते। षच समवाय इत्यस्य लटि रूपं। अक्षिता। क्षि क्षय इत्यस्य निष्ठा। अत्र एयदर्थ इति दीर्घाभावः। तस्मादेव क्षियो दीर्घादिति निष्ठानत्वाभावः। नञा समासे तस्य स्वरः। पीत्वी। पा पान इत्यस्मात् क्त्वाप्रत्ययस्य स्नात्व्यादयश्चेति निपातनात् त्वी इत्यादेशः। प्रत्ययस्वरः। घुमास्थागापेत्यादिना ईत्वं ॥

॥ अथाष्टमी ॥

अर्वावतो न आ गहि परावतश्च वृत्रहन्। इमा जुषस्व नो गिरः ॥ ८ ॥

अर्वाऽवतः। नः। आ। गहि। पराऽवतः। च। वृत्रऽहन्। इमाः। जुषस्व। नः। गिरः ॥ ८ ॥

हे वृत्रहन्निंद्र अर्वावतोऽर्वाचीनात्समीपाद्देशात्परावतोऽतिदूराद्देशाद्वा नोऽस्मानभिलक्ष्यागहि। आगच्छ। आगत्य च नोऽस्मदीया इमाः स्तुतिलक्षणा गिरो वाचो जुषस्व। सेवस्व ॥ परावतः। उपसर्गाच्छंदसि धात्वर्थ इति वतिः। प्रत्ययस्वरः ॥

॥ अथ नवमी ॥

यदंतरा परावतमर्वावतं च हूयसे। इंद्रेह तत आ गहि ॥ ९ ॥

यत्। अंतरा। पराऽवतं। अर्वाऽवतं। च। हूयसे। इंद्र। इह। ततः। आ। गहि ॥ ९ ॥

हे इंद्र यद्यस्मिन्परावतमतिविप्रकृष्टस्य देशस्यार्वावतं संनिकृष्टस्य देशस्य चांतरा तयोर्मध्यदेशे हूयसे सम्यगिज्यसे ततस्तस्माद्देशादिहास्मिन्यज्ञ आगहि। सोमपानार्थमागच्छ ॥ परावतं अर्वावतं। अंतरांतरेण युक्ते। पा॰ २.३.४.। इति द्वितीया। ततः। पंचम्यास्तसिल्। लित्स्वरः ॥

॥ इति तृतीयस्य तृतीये द्वितीयो वर्गः ॥

आ तू न इंद्रेति नवर्चं तृतीयं सूक्तं वैश्वामित्रं गायत्रमैंद्रं। आ तू न इत्यनुक्रांतं ॥ अतिरात्रे द्वितीये पर्याये ब्राह्मणाच्छंसिशस्त्र एतदादिके द्वे सूक्ते। सूचितं च। आ तू न इंद्र मद्र्यगिति सूक्ते। आ॰ ६.४.। इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

आ तू न इंद्र मद्र्यग्घुवानः सोमपीतये । हरिभ्यां याह्यद्रिवः ॥१॥

आ । तु । नः । इंद्र । मद्र्यक् । हुवानः । सोमऽपीतये । हरिऽभ्यां । याहि । अद्रिऽवः ॥१॥

हे अद्रिवो हे वज्रिन् हे इंद्र हुवानो होतृभिराहूयमानस्त्वं मद्र्यक् मदभिमुखः सन् नोऽस्मदीये यज्ञे सोमपीतये सोमपानार्थं हरिभ्यामश्वाभ्यां सह तु क्षिप्रमायाहि ॥ तु । ऋचि तुनुघेत्यादिना संहितायां दीर्घः । मद्र्यक् । मामंचतीति ऋत्विग्दधृगित्यादिना क्विन् । प्रत्ययोत्तरपदयोश्चेत्यस्मच्छब्दस्यैकवचने मपर्यंतस्य मादेशः । विश्वग्देवयोश्च टेरद्र्यंचतौ वप्रत्यय इति टेरद्रि इत्यादेशः । अद्रिसध्र्योरंतोदात्तत्वनिपातनं कृत्स्वरनिवृत्त्यर्थमिति वचनादद्र्यादेशोऽंतोदात्तः । यणादेशे कृत उदात्तस्वरितयोर्यण इति यणः स्वरितत्वं । क्विन्प्रत्ययस्य कुरिति कुत्वं । सोमपीतये । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं । अद्रिवः । मतुवसो रिति रुत्वं । आमंत्रितत्वान्निघातः ॥

॥ अथ द्वितीया ॥

सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक् । अयुंजन्प्रातरद्रयः ॥२॥

सत्तः । होता । नः । ऋत्वियः । तिस्तिरे । बर्हिः । आनुषक् । अयुंजन् । प्रातः । अद्रयः ॥२॥

हे इंद्र नोऽस्मदीये यज्ञे होता ऋत्विक् तवाह्वानार्थमृत्वियः प्राप्तकालः सन् सत्तो निषण्णो वर्तते । तथा बर्हिरानुषक् अनुषक्तं परस्परसंबद्धं यथा भवति तथा तिस्तिरे । हविष्वासन्नेषु स्तीर्णमभूत् । तथा प्रातः प्रातःसवने सोमाभिषवार्थमद्रयो ग्रावाणोऽयुंजन् । परस्परं संगता अभूवन् । तस्मात्सोमपानार्थं त्वमागच्छेति भावः ॥ सत्तः । षद्लृ विशरणादिष्वित्यस्माद्गत्यर्थाकर्मकश्लिषेत्यादिना । पा॰ ३.४.७२. । कर्तरि क्तः । सर्वविधीनां छंदसि विकल्पितत्वादत्र निष्ठातकारस्य नत्वाभावः । ऋत्वियः । ऋतुशब्दाच्छंदसि घसिति घस्प्रत्ययः । घस्येयादेशः । सितीति पदसंज्ञायामोर्गुण इति भसंज्ञाधीनो गुणो न भवति । यणादेशः । प्रत्ययस्वरः । तिस्तिरे । स्तृञ् आच्छादन इत्यस्य कर्मणि लिट्यृत इद्धातोरितीत्वं । द्विर्वचने शर्पूर्वाः खय इति तकारस्य शेषः । लिटस्तझयोरेशिरेजिति तप्रत्ययस्यैशित्यादेशः । पादादित्वादनिघातः । प्रत्ययस्वरः । आनुषक् । षञ्ज संगे । क्विप् । अनिदितामिति नलोपः । आङन्वोरुपसर्गयोः प्राक्प्रयोगः । गतिसमासः ।

कृदुत्तरपदस्वरः । अयुजन् । युजिर् योग इत्यस्य लुङि च्लेरिरितो वेत्यङादेशः । बहुलं छंदसीति रुडागमः । पादादित्वादनिघातः । अडागमस्वरः ॥

॥ अथ तृतीया ॥

इमा ब्रह्म ब्रह्मवाहः क्रियंत आ बर्हिः सीद । वीहि शूर पुरोळाशं ॥ ३ ॥

इमा । ब्रह्म । ब्रह्मऽवाहः । क्रियंते । आ । बर्हिः । सीद । वीहि । शूर । पुरोळाशं ॥ ३ ॥

ब्रह्माणि स्तोत्राणि स्तुत्यतया वहतीति ब्रह्मवाहा ब्रह्मणा स्तोत्रेण प्राप्यत इति वा । हे ब्रह्मवाह इंद्र तुभ्यमिमेमानि ब्रह्म ब्रह्माणि स्तोत्राण्यस्माभिः क्रियंते । अतो बर्हिरासीद । स्तुत्यतया बर्हिषि यज्ञ उपविश । हे शूर समर्थेंद्रास्माभिर्दीयमानमिमं पुरोडाशं पुरोडाशाख्यं हविर्वीहि । भक्षय ॥ ब्रह्मवाहः । वह प्रापण इत्यस्माद्वहिहाधाञ्भ्यश्छंदसीत्यसुन् । णिदित्यनुवृत्तेरुपधावृद्धिः । आमंत्रितत्वान्निघातः । क्रियंते । करोतेः कर्मणि यक् । रिङ् शयग्लिंक्ष्विति रिङादेशः । प्रत्ययस्वरः । पादादित्वादनिघातः । बर्हिः । कालाध्वनोरत्यंतसंयोगे द्वितीया । वीहि । वी कांत्यादिषु । लोटि रूपं । हेर्ङित्त्वादुदात्तः । पुरोळाशं । दाशृ दान इत्यस्मात्पुरस्पूर्वान्मंत्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् । पुरो दाशंत एनमिति । निपातनाद्दकारस्य ळकारः । कृदुत्तरपदस्वरः ॥

॥ अथ चतुर्थी ॥

रारंधि सवनेषु ण एषु स्तोमेषु वृत्रहन् । उक्थेष्विंद्र गिर्वणः ॥ ४ ॥

ररंधि । सवनेषु । नः । एषु । स्तोमेषु । वृत्रऽहन् । उक्थेषु । इंद्र । गिर्वणः ॥ ४ ॥

हे गिर्वणो गीर्भिः स्तुतिभिर्वननीय वृत्रहन् वृत्रस्य हंतर्हे इंद्र नोऽस्माकं संबंधिषु त्रिषु सवनेष्वेषु क्रियमाणेषु स्तोमेषु स्तोत्रेषूक्थेषु शस्त्रेषु च रारंधि । रमस्व ॥ ररंधि । रमतेर्लोटि बहुलं छंदसीति शपः श्लुः । छंदस्युभयथेति हेरार्धधातुकत्वेनाङित्त्वादङितश्चेति हेर्धिः । सवनेषु । सूयते सोमो येष्वित्यधिकरणे सुनोतेर्ल्युट् । लित्स्वरः । णः । नसो नकारस्य नश्च धातुस्थोरुषुभ्य इति संहितायां णत्वं ॥

॥ अथ पंचमी ॥

मतयः सोमपामुरुं रिहंति शवसस्पतिं । इंद्रं वत्सं न मातरः ॥ ५ ॥

मतयः । सोमऽपां । उरुं । रिहंति । शवसः । पतिं । इंद्रं । वत्सं । न । मातरः ॥ ५ ॥

हे इंद्र मतयोऽस्माभिः क्रियमाणाः स्तुतय उरुं महांतं सोमपां सोमस्य पातारं शवसो बलस्य पतिमिंद्रं त्वां रिहंति। लिहंति। तत्र दृष्टांतः। वत्सं न। यथा वत्सं मातरो धेनवो लिहंति तद्वत्॥ मतयः। मन ज्ञान इत्यस्मात्कर्मणि मंत्रे वृषेत्यादिना क्तिन्नुदात्तः। उरुं। ऊर्णुञ् आच्छादन इत्यस्मान्महत्यर्थे गम्यमाने महति ह्रस्वश्च। उ° १. ३१.। इति कुप्रत्ययो धातोर्ह्रस्वश्च। प्रत्ययस्वरः। रिहंति। लिह आस्वादन इत्यस्य लटि रूपं। रलयोरभेदः। प्रत्ययस्वरः। शवसस्पतिमिति संहितायां षष्ठ्याः पतिपुत्रपृष्ठेत्यादिना विसर्जनीयस्य सत्वं। वत्सं। वद व्यक्तायां वाचि। अस्माद्वृतृवदिहनीत्यादिना सप्रत्ययः। वदत्यभीक्ष्णं मातरमिति वत्सो गोबालः। प्रत्ययस्वरः॥

॥ इति तृतीयस्य तृतीये तृतीयो वर्गः॥

॥ अथ षष्ठी॥

स मंदस्वा ह्यंधसो राधसे तन्वा महे। न स्तोतारं निदे करः॥ ६॥

सः। मंदस्व। हि। अंधसः। राधसे। तन्वा। महे। न। स्तोतारं। निदे। करः॥ ६॥

हे इंद्र स तथाविधस्त्वं महे महते राधसे धनायांधसोऽस्माभिर्दीयमानस्य सोमस्य पानेन तन्वा शरीरेण सह मंदस्व। हृष्टो भव। हिरत्र समुच्चयार्थः। किंच त्वं स्तोतारं मां निदे निंदायै विषयभूतं न करः। मा कार्षीः॥ मंदस्व। मदि स्तुत्यादिष्वित्यस्य लोटि रूपं। हि चेति निघातप्रतिषेधेन भवितव्यमिति चेत् न। तत्राप्रातिलोम्य इति वर्तते। अत्र हेः समुच्चयार्थत्वान्निघातः। तन्वा। उदात्तस्वरितयोरिति स्वरितत्वं। महे। तकारलोपश्छांदसः। बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं। निदे। णिदि कुत्सायामित्यस्मात्संपदादिलक्षणो भावे क्विप्। आगमानुशासनस्यानित्यत्वान्नुमभावः। सावेकाच इति विभक्तेरुदात्तत्वं। करः। करोतेर्लुङि च्लेः कृमृदृरुहिभ्यश्छंदसीत्यङादेशः। निघातः॥

॥ अथ सप्तमी॥

वयमिंद्र त्वायवो हविष्मंतो जरामहे। उत त्वमस्मयुर्वसो॥ ७॥

वयं। इंद्र। त्वाऽयवः। हविष्मंतः। जरामहे। उत। त्वं। अस्मऽयुः। वसो इति॥ ७॥

हे इंद्र त्वायवो यज्ञार्थं त्वामात्मन इच्छंतस्त्वत्कामाः संतो हविष्मंतः संभृतहविष्का वयं जरामहे। त्वां स्तुमः। हे वसो सर्वस्य वासक इंद्र उत त्वमप्यस्म-

युर्हविःस्वीकरणार्थमस्मानात्मन इच्छन् भव ॥ त्वायवः । त्वामिच्छंतीत्यर्थे सुप आत्मनः क्यच् । प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः । क्याच्छंदसीत्युप्रत्ययः । त्वद्यव इति प्राप्तौ युष्मदस्मदोरनादेश इत्यविभक्तावपि हलादौ व्यत्ययेनात्वं । प्रत्ययस्वरः । हविष्मंतः । तसौ मत्वर्थ इति भसंज्ञायां सकारस्य रुत्वाभावः । स्वरविधौ व्यंजनमविद्यमानवदिति परिभाषानाश्रयणान्मतुप उदात्तताभावः । सिप्रत्ययस्वरः । जरामहे । जरतिः स्तुतिकर्मेति यास्कः । अस्मयुः । अस्मानिच्छतीत्यर्थे सुपः क्यच् । तस्मादुप्रत्ययः । पूर्वपदांतलोपश्छांदसः । प्रत्ययस्वरः ॥

॥ अथाष्टमी ॥

मारे अस्मद्वि मुमुचो हरिप्रियार्वाङ्याहि । इंद्र स्वधावो मत्स्वेह ॥ ८ ॥

मा । आरे । अस्मत् । वि । मुमुचः । हरिऽप्रिय । अर्वाङ् । याहि । इंद्र । स्वधाऽवः । मत्स्व । इह ॥ ८ ॥

हे हरिप्रिय हरी अश्वौ प्रियौ यस्य तादृश हे इंद्र अस्मदस्मत्त आरे दूरे रथे योजितावश्वौ मा विमुमुचः । मा विमोचय । ताभ्यामुपेत एवार्वाङ् अस्मदाभिमुख्येन याहि । आगच्छ । हे स्वधावः सोमलक्षणान्नवन्निंद्र इहास्मिन्देवयजने मत्स्व । सोमं पीत्वा हृष्टो भव ॥ अस्मत् । अस्मच्छब्दस्य पंचमीबहुवचनस्य पंचम्या अत् । पा॰ ७.१.३१. । इत्यदादेशः । मुमुचः । मुच्ल मोक्षण इत्यस्य णयंतस्य छांदसे लुङि चङि रूपं । अभ्यासस्य दीर्घाभावश्छांदसः । न माङ्योग इत्यडभावः । निघातः । हरिप्रिय । आमंत्रितस्य पादादित्वात्षाष्ठिकमाद्युदात्तत्वं । मत्स्व । मदि स्तुत्यादिष्वित्यस्य लोटि बहुलं छंदसीति विकरणस्य लुक् । आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः ॥

॥ अथ नवमी ॥

अर्वाचं त्वा सुखे रथे वहतामिंद्र केशिना । घृतस्नू बर्हिरासदे ॥ ९ ॥

अर्वाचं । त्वा । सुऽखे । रथे । वहतां । इंद्र । केशिना । घृतस्नू इति घृतऽस्नू । बर्हिः । आऽसदे ॥ ९ ॥

हे इंद्र घृतस्नू श्रमजनितजलप्रस्रवणयुक्तौ केशिना केशिनौ स्कंधप्रदेशे लंबमानकेशयुक्तौ हरी आसद आसदनीयं बर्हिरभिलक्ष्य सुखे सुखकरे रथेऽर्वाचमस्मदभिमुखं त्वा त्वां वहतां ॥ अर्वाचं । अंचतेः क्विन्युगिदचामिति नुम् । वहतां ।

वहेर्लोटि रूपं। तसो लसार्वधातुकस्वरे कृते धातुस्वरः। आसदे। सदेः कृत्यार्थे केन्प्रत्ययः। नित्स्वरः। कृदुत्तरपदप्रकृतिस्वरः॥

॥ इति तृतीयस्य तृतीये चतुर्थो वर्गः॥

उप नः सुतमिति नवर्चं चतुर्थं सूक्तं वैश्वामित्रं गायत्रमैंद्रं। उप न इत्यनुक्रमणिका। पूर्वसूक्तेन सहोक्तो विनियोगः॥

॥ अथ तस्मिन्सूक्ते प्रथमा॥

उप॑ नः सु॒तमा ग॑हि॒ सोम॑मिंद्र॒ गवा॑शिरं। हरि॑भ्यां॒ यस्ते॑ अस्म॒युः॥१॥

उप॑। नः॒। सु॒तं। आ। ग॒हि॒। सोमं॑। इं॒द्र॒। गोऽआ॑शिरं। हरि॑ऽभ्यां। यः। ते॒। अ॒स्म॒ऽयुः॥१॥

हे इंद्र नोऽस्मदीयं सुतमभिषुतं गवाशिरं पयसा मिश्रितं सोमं प्रति उपागहि। समीप आगच्छ। यतो हरिभ्यामश्वाभ्यां युक्तस्तव रथोऽस्मयुरस्मान्कामयमानो वर्तते॥ गवाशिरं। आङ्पूर्वस्य श्रीणातेः क्विप्यपस्पृधेथामानृचुरित्यादिनाशिरित्यादेशः। बहुव्रीहौ पूर्वपदस्वरः॥

॥ अथ द्वितीया॥

तमिं॑द्र॒ मद॒मा ग॑हि ब॒र्हिः॒ष्ठां ग्राव॑भिः सु॒तं। कु॒विन्न्व॑स्य तृ॒प्णवः॑॥२॥

तं। इं॒द्र॒। मदं॑। आ। ग॒हि॒। ब॒र्हिः॒ऽस्थां। ग्राव॑ऽभिः। सु॒तं। कु॒वित्। नु। अ॒स्य॒। तृ॒प्णवः॑॥२॥

हे इंद्र ग्रावभिः सुतमभिषुतं बर्हिःष्ठां बर्हिषि स्थितं मदं। मद्यतेऽनेनेति मदः सोमः। तमिमं सोममागहि। आगच्छ। कुवित्प्रभूतं यथा भवति तथास्य सोमस्य पाने नु क्षिप्रं तृप्णवः। तृप्तो भव॥ मदं। मदी हर्षे। मदोऽनुपसर्ग इत्यप्प्रत्ययः। तस्य पित्त्वादनुदात्तत्वे धातुस्वरः। बर्हिःष्ठां। ष्ठा गतिनिवृत्तौ। क्विप्। संहितायां पूर्वपदसकारस्यादेशप्रत्यययोरिति षत्वं। ष्टुत्वं। कृदुत्तरपदस्वरः। तृप्णवः। तृप प्रीणन इत्यस्य लेट्यडागमः। कुविद्योगादनिघातः। क्षुभ्नादिषु नृमन तृप्नोतीति पठितं। तथापि सर्वविधीनां छंदसि विकल्पितत्वादत्र णत्वप्रतिषेधो न भवति। प्रत्ययस्वरः॥

॥ अथ तृतीया॥

इंद्र॑मि॒त्था गिरो॒ ममाच्छा॑गुरिषि॒ता इ॒तः। आ॒वृते॒ सोम॑पीतये॥३॥

इंद्रं॑। इ॒त्था। गिरः॑। मम॑। अच्छ॑। अ॒गुः॒। इ॒षि॒ताः। इ॒तः। आ॒ऽवृते॑। सोम॑ऽपीतये॥३॥

हे इंद्र इषितास्त्वदर्थं प्रेरिता इत्थेत्थमनेन प्रकारेणोच्यमाना मम गिरः स्तुतिलक्षणा वाच इंद्रं त्वामितोऽस्माद्देवयजनदेशादच्छागुः । आभिमुख्येन गच्छंतु । किमर्थं । सोमपीतये सोमपानार्थमावृते त्वामावर्तयितुं ॥ इत्था । इदंशब्दात्था हेतौ च छंदसीति व्यत्ययेन थाप्रत्ययः । इदम एतेतौ रथोरितीदित्यादेशः । प्रत्ययस्वरः । अच्छ । अच्छ गत्यर्थवदेष्विति गतिसंज्ञा । अगुः । इण् गतावितिस्य लुङि रूपं । निघातः ॥

॥ अथ चतुर्थी ॥

इंद्रं सोमस्य पीतये स्तोमैरिह हवामहे । उक्थेभिः कुविदागमत् ॥ ४ ॥

इंद्रं । सोमस्य । पीतये । स्तोमैः । इह । हवामहे । उक्थेभिः । कुवित् । आऽगमत् ॥ ४ ॥

स्तोमैस्त्रिवृत्पंचदशादिस्तोमसाध्यैः स्तोत्रैरुक्थेभिरुक्थैः शस्त्रैश्चेह कर्मणि सोमस्य पीतये सोमपानार्थमिंद्रं हवामहे । वयमाह्वयामः । कुविद्बहुवारमाहूतः स इंद्र आगमत् । यज्ञं प्रत्यागच्छतु ॥ आगमत् । गमेर्लेट्यडागमः । आगमा अनुदात्ता इत्यटोऽनुदात्तत्वाद्धातुस्वरः । तिङि चोदात्तवतीति गतेर्निघातः । कुविद्योगादनिघातः ॥

॥ अथ पंचमी ॥

इंद्र सोमाः सुता इमे तान्दधिष्व शतक्रतो । जठरे वाजिनीवसो ॥ ५ ॥

इंद्र । सोमाः । सुताः । इमे । तान् । दधिष्व । शतक्रतो इति शतऽक्रतो । जठरे ।
वाजिनीवसो इति वाजिनीऽवसो ॥ ५ ॥

हे शतक्रतो इंद्र इमे सोमाः सुताः । ग्रावभिस्त्वदर्थमभिषुताः । हे वाजिनीवसो अन्नधन । यद्वा वाजोऽन्नमासु फलत्वेनास्तीति वाजिन्यः क्रियाः । तासां वासक हे इंद्र तान्सोमरसान् जठरे दधिष्व । धारय ॥ वाजिनीवसो । वाजशब्दान्मत्वर्थेऽत इनिठनावितीनिप्रत्ययः । ऋन्नेभ्यो ङीबिति ङीप् । तासां वसो । संबुद्धौ चेति गुणः । आमंत्रितत्वादाष्टमिकमनुदात्तत्वं ॥

॥ इति तृतीयस्य तृतीये पंचमो वर्गः ॥

॥ अथ षष्ठी ॥

विद्म हि त्वा धनंजयं वाजेषु दधृषं कवे । अधा ते सुम्नमीमहे ॥ ६ ॥

विद्म । हि । त्वा । धनंऽजयं । वाजेषु । दधृषं । कवे । अध । ते । सुम्नं । ईमहे ॥ ६ ॥

हे कवे क्रांतदर्शिन्निंद्र वाजेषु युद्धेषु दधृषं शत्रूणामभिभवितारं अत एव धनंजयं। धनं जयतीति धनंजयः। तादृशं त्वा त्वां विद्म हि। जानीमः खलु। अधानंतरं ते तव सुम्नं धनमीमहे। याचामहे॥ विद्म। विदेर्लेटि विदो लटो वेति मसो मादेशः। पादादित्वादनिघातः। धनंजयं। जि जय इत्यस्माद्धन उपपदे संज्ञायां भृतॄवृजिधारिसहितपिदम इति खच्प्रत्ययः। अरुर्द्विषदजंतस्य मुमिति पूर्वपदस्य मुमागमः। चित्त्वादंतोदात्तः। दधृषं। जिधृषा प्रागल्भ्य इत्यस्य यङ्लुक्यभ्यासस्य रीगभावश्छांदसः। तदंतात्पचाद्यचि यङोऽचि चेति यङो लुक्। लघूपधगुणे प्राप्ते न धातुलोप इति तस्य प्रतिषेधः। चित्त्वादंतोदात्तः॥

॥ अथ सप्तमी ॥

इममिंद्र गवाशिरं यवाशिरं च नः पिब। आगत्या वृषभिः सुतं ॥७॥

इमं। इंद्र। गोऽआशिरं। यवऽआशिरं। च। नः। पिब। आऽगत्यं। वृषऽभिः। सुतं ॥७॥

हे इंद्र गवाशिरं गव्यमिश्रणोपेतं सोमं तथा यवाशिरं यवमिश्रणोपेतं वृषभिर्ग्रावभिः सुतमभिषुतं नोऽस्मदीयमिमं सोमं देवयजनमागत्य पिब॥ गवाशिरं यवाशिरमित्यत्र आङ्पूर्वस्य श्रीणातेः क्विप्यपस्पृधेथामानृचुरित्यादिनाशिर् इत्यादेशः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥

॥ अथाष्टमी ॥

तुभ्येदिंद्र स्व ओक्ये३सोमं चोदामि पीतये। एष रारंतु ते हृदि ॥८॥

तुभ्यं। इत्। इंद्र। स्वे। ओक्यें। सोमं। चोदामि। पीतयें। एषः। ररंतु। ते। हृदि॥८॥

हे इंद्र तुभ्येत्तुभ्यमेव पीतये पानार्थं स्वे स्वकीय ओक्ये स्थाने जठरेऽभिषुतमिमं सोमं चोदामि। प्रेरयामि। एष पीतः सोमस्ते तव हृदि हृदये ररंतु। अत्यर्थं रमतां॥ तुभ्य। युष्मच्छब्दस्य चतुर्थ्येकवचने तुभ्यमह्याविति तुभ्यादेशः। सुपां सुलुगिति सुपो लुक्। ङयि चेत्याद्युदात्तः। ओक्ये। वस्वादित्वात्स्वार्थिको यत्प्रत्ययः। तित्स्वरितः। चोदामि। चुद प्रेरणे। ण्यंतस्य लटि रूपं। बहुलमन्यत्रापीति णेर्लुक्। निघातः। रारंतु। रमु क्रीडायामित्यस्य यङ्लुकि लोटि सर्वविधीनां छंदसि विकल्पितत्वाद्वाभ्यासस्य नुमभावः। संहितायामन्येषामपीत्यभ्यासस्य दीर्घः। निघातः। हृदि। हृदयशब्दस्य पद्दन्नोमास्हृदित्यादिना हृदादेशः। ऊडिदमिति विभक्तेरुदात्तत्वं॥

॥ अथ नवमी ॥

त्वां सुतस्य पीतये प्रत्नमिंद्र हवामहे । कुशिकासो अवस्यवः ॥ ९ ॥

त्वां । सुतस्य । पीतये । प्रत्नं । इंद्र । हवामहे । कुशिकासः । अवस्यवः ॥ ९ ॥

हे इंद्र अवस्यवस्त्वत्तो रक्षणमिच्छंतः कुशिकासः कुशिकगोत्रोत्पन्ना वयं सुतस्य ग्रावभिरभिषुतस्य सोमस्य पीतये पानार्थं प्रत्नं पुरातनं त्वां हवामहे । स्तुतिलक्षणाभिर्गीर्भिराह्वयामः ॥ पीतये । स्थागापापचो भाव इति क्तिन् । हिष्ठवत्सरतिशत्थांतानां । फि॰ १. ७. । इत्यंतोदात्तत्वं । हवामहे । ह्वयतेर्लटि बहुलं छंदसीति संप्रसारणे रूपं । अवस्यवः । अव इच्छंतीत्यर्थे सुपः क्यच् । क्याच्छंदसीत्युप्रत्ययः । कुशिकासो अवस्यव इत्यत्र संहितायामव्यादवद्यादित्यादिना । पा॰ ६. १. ११६. । एङः प्रकृतिभावः ॥

॥ इति तृतीयस्य तृतीये षष्ठो वर्गः ॥

आ याह्यर्वाङित्यष्टर्चं पंचमं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं । आ याह्यष्टावित्यनुक्रमणिका ॥ दशरात्रे चतुर्थेऽहनि स्तोमवृद्धौ माध्यंदिने सवनेऽच्छावाकशस्त्रे स्तोमाभिशंसनार्थमिदं सूक्तं । सूत्रितं च । आ याह्यर्वाङित्यष्टर्चान्यावपेरन् । आ॰ ७. १२. । इति ॥ महाव्रतेऽप्यावपनीयं ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

आ याह्यर्वाङुप वंधुरेष्ठास्तवेदनु प्रदिवः सोमपेयं ।
प्रिया सखाया वि मुचोप बर्हिस्त्वामिमे हव्यवाहो हवंते ॥ १ ॥

आ । याहि । अर्वाङ् । उप । वंधुरेऽस्थाः । तव । इत् । अनु । प्रऽदिवः । सोमऽपेयं ।
प्रिया । सखाया । वि । मुच । उप । बर्हिः । त्वां । इमे । हव्यऽवाहः । हवंते ॥ १ ॥

हे इंद्र वंधुरेष्ठाः । वंधुरशब्देनेषाद्वयसंबंधस्थानमभिधीयते । तेन तद्विशिष्टो रथो लक्ष्यते । तस्मिन् रथे तिष्ठन् त्वमर्वाङस्मदभिमुखः सन् आ अभिलक्ष्योप याहि । समीप आगच्छ । प्रदिवः प्रत्नं पूर्वक्रमगतं तवेत्तवैव संबंधि सोमपेयं सोमपानं त्वमनु उद्दिश्य प्रिया तव प्रियतमौ सखाया समानख्यानावश्वौ बर्हिरुप बर्हिषः समीपे विमुच । विमुंच । हव्यवाहः । हव्यं वहंतीति हव्यवाहः । इमे ऋत्विजस्त्वां हवंते । सोमपानार्थमाह्वयंति । तस्मादागच्छेति भावः ॥

वंधुरेष्ठाः। तिष्ठतेर्विच्। तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक्। प्रदिवः। सकारांतमव्ययं। सोमपेयं। पा पान इत्यस्य भावेऽचो यदिति यत्प्रत्ययः। ईद्यतीतीत्वं। आर्द्धधातुकलक्षणो गुणः। यतोऽनाव इत्याद्युदात्तत्वं। समासे कृदुत्तरपदस्वरः। मुच। मुंचतेर्लोट्याद्यागमानुशासनस्यानित्यत्वान्नुमभावः॥

॥ अथ द्वितीया ॥

आ याहि पूर्वीरति चर्षणीराँ अर्य आशिष उप नो हरिभ्यां।
इमा हि त्वा मतयः स्तोमतष्टा इंद्र हवंते सख्यं जुषाणाः॥२॥
आ। याहि। पूर्वीः। अति। चर्षणीः। आ। अर्यः। आऽशिषः। उप। नः। हरिऽभ्यां।
इमाः। हि। त्वा। मतयः। स्तोमऽतष्टाः। इंद्र। हवंते। सख्यं। जुषाणाः॥२॥

हे इंद्र पूर्वीः सर्वाश्चर्षणीः प्रजा अत्यायाहि। अतिक्रम्यागच्छ। द्वितीय आङ् पूरणः। अर्योऽस्माकं स्वामी त्वं न आशिषस्त्वमत्रागत्य सोमं पिबेत्येवमादिका अस्माकं प्रार्थना हरिभ्यामश्वाभ्यां युक्तः सन् उपागच्छ। किंच ते तव सख्यं जुषाणाः सेवमानाः स्तोमतष्टाः स्तोमकारिभिः स्तोतृभिः कृता इमा मतयः स्तुतयो हवंते। सोमपानार्थं त्वामाह्वयंति। हि प्रसिद्धौ। करणे कर्तृव्यापारः। काष्ठानि पचंतीतिवत्॥ आ। संहितायामाङोऽनुनासिकश्छंदसीत्यनुनासिकः। अर्यः। ऋ गतौ। अर्यः स्वामिवैश्ययोरिति निपातनाद्यत्प्रत्ययः। यतोऽनाव इत्याद्युदात्तत्वे प्राप्तेऽर्यस्य स्वाम्याख्या चेदित्यंतोदात्तत्वं। आशिषः। क्विपि शास इदङ्हलोरित्युपधाया इत्वं। शासिवसिघसीनां चेति षत्वं। स्तोमतष्टाः। तक्षू त्वक्षू तनूकरण इत्यस्मात्कर्मणि क्तः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः॥

॥ अथ तृतीया ॥

आ नो यज्ञं नमोवृधं सजोषा इंद्र देव हरिभिर्याहि तूयं।
अहं हि त्वा मतिभिर्जोहवीमि घृतप्रयाः सधमादे मधूनां॥३॥
आ। नः। यज्ञं। नमःऽवृधं। सऽजोषाः। इंद्र। देव। हरिऽभिः। याहि। तूयं।
अहं। हि। त्वा। मतिऽभिः। जोहवीमि। घृतऽप्रयाः। सधऽमादे। मधूनां॥३॥

देव द्योतमान हे इंद्र नोऽस्माकं नमोवृधं नमसोऽन्नस्य वर्धकमिमं यज्ञं हरिभिरश्वैः सजोषाः सहप्रीतिस्त्वं तूयं क्षिप्रमायाहि। घृतप्रयाः। घृतसहितानि

प्रयांस्यन्नरूपाणि हवींषि यस्य स तथोक्तः। तादृशोऽहं मधूनां सोमानां सधमादे। सह माद्यंति यत्र सोम इति सधमादः। तस्मिन् स्थाने मतिभिः स्तुतिभिस्त्वा त्वां जोहवीमि हि। भृशमाह्वयामि खलु ॥ जोहवीमि। यङ्क्यभ्यस्तस्य चेति संप्रसारणं। गुणो यङ्कोरित्यभ्यासस्य गुणः। यङो वेतीडागमः। हियोगादनिघातः। अभ्यस्तानामादिरित्याद्युदात्तः। घृतप्रयाः। घृ क्षरणदीप्त्योरित्यस्मादंजिघृषिभ्यः क्त इति क्तप्रत्ययः। बहुव्रीहौ पूर्वपदस्वरः ॥

॥ अथ चतुर्थी ॥

आ च त्वामेता वृषणा वहातो हरी सखाया सुधुरा स्वंगा।
धानावदिंद्रः सवनं जुषाणः सखा सख्युः शृणवद्वंदनानि ॥ ४ ॥
आ। च। त्वां। एता। वृषणा। वहातः। हरी इति। सखाया। सुऽधुरा। सुऽअंगा।
धानाऽवत्। इंद्रः। सवनं। जुषाणः। सखा। सख्युः। शृणवत्। वंदनानि ॥ ४ ॥

हे इंद्र वृषणा सेचनसमर्थौ सुधुरा शोभनया धुरान्वितौ स्वंगा शोभनावयवोपेतौ सखाया शोभनख्यानावेतौ हरी त्वामावहातः। यज्ञं प्रत्यागमनाय रथे त्वामावहतः। अथ धानावत् भृष्टयवोपेतं सवनं जुषाणः सेवमानः सखा सखिभूतः स इंद्रः सख्युः स्तोतुर्मम वंदनानि स्तोत्राणि शृणवत्। शृणुयात् ॥ वहातः। वहेर्लेट्याडागमे रूपं। चवायोगे प्रथमेति न निघातः। शृणवत्। श्रु श्रवण इत्यस्य लेट्यडागमे रूपं। निघातः ॥

॥ अथ पंचमी ॥

कुविन्मा गोपां करसे जनस्य कुविद्राजानं मघवन्नृजीषिन्।
कुविन्म ऋषिं पपिवांसं सुतस्य कुविन्मे वस्वो अमृतस्य शिक्षाः ॥ ५ ॥
कुवित्। मा। गोपां। करसे। जनस्य। कुवित्। राजानं। मघऽवन्। ऋजीषिन्।
कुवित्। मा। ऋषिं। पपिऽवांसं। सुतस्य। कुवित्। मे। वस्वः। अमृतस्य। शिक्षाः ॥ ५ ॥

हे इंद्र कुविदपि च मा मां जनस्य गोपां गोप्तारं करसे। कुरु। तथा हे मघवन्धनवन्नृजीषिन्सोमवन् हे इंद्र मां राजानं सर्वस्य स्वामिनं कुरु। कुविच्च मा मामृषिमतींद्रियार्थस्य द्रष्टारं कुरु। ऋषिर्दर्शनादिति यास्कः। तथा सुतस्याभिषुतस्य सोमस्य पपिवांसं पातारं कुरु। अपि च मे मह्यममृतस्य क्षयरहितं

अयं। ते। अस्तु। हर्यतः। सोमः। आ। हरिऽभिः। सुतः।
जुषाणः। इंद्र। हरिऽभिः। नः। आ। गहि। आ। तिष्ठ। हरितं। रथं ॥१॥

हे इंद्र हरिभिः। हरंति सोमरसानेभिरिति हरयो ग्रावाणः। तैरासुतः सर्वतोऽभिषुतो हर्यतः कमनीयो जुषाणः प्रीतिविषयोऽयं सोमस्ते तुभ्यमस्तु। त्वं हरिभिरश्वैर्युक्तं हरितं हरिद्वर्णं रथमातिष्ठ। अधितिष्ठ। ततो नोऽस्मानभिलक्ष्यागहि। आगच्छ॥ हर्यतः। हर्य गतिकांत्योरित्यस्माद्भृमृदृशीत्यादिनातच्प्रत्ययः। चित्त्वादंतोदात्तः। हरितं। हृञ् हरणे। हृश्याभ्यामितन्। उ॰ ३.९२। इतीतन्प्रत्ययः। नित्त्वादाद्युदात्तः। रथं। रमु क्रीडायां। हनिकुषिनीत्यादिना क्थन्प्रत्ययः। कित्त्वादनुनासिकलोपः। नित्स्वरः॥

॥ अथ द्वितीया ॥

हर्यन्नुषसमर्चयः सूर्यं हर्यन्नरोचयः।
विद्वांश्चिकित्वान्हर्यश्व वर्धस इंद्र विश्वा अभि श्रियः ॥२॥
हर्यन्। उषसं। अर्चयः। सूर्यं। हर्यन्। अरोचयः।
विद्वान्। चिकित्वान्। हरिऽअश्व। वर्धसे। इंद्र। विश्वाः। अभि। श्रियः ॥२॥

हे इंद्र हर्यन् सोमं कामयमानस्त्वमुषसमुषःकालमर्चयः। पूजयसि। तथा हर्यन्नुदिते सूर्ये सोमं कामयमानस्त्वं सूर्यमरोचयः। दीपयसि। हे हर्यश्वेंद्र विद्वानेतत्सर्वं जानानश्चिकित्वानस्मदभिलषितफलविषयज्ञानवांस्त्वं विश्वाः सर्वाः श्रियो नः संपदोऽभिवर्धसे। अभिमतफलप्रदानेनाभितो वर्धयसि॥ चिकित्वान्। कित ज्ञान इत्यस्य क्वसौ रूपं। प्रत्ययस्वरः। वर्धसे। वृधु वर्धन इत्यस्यांतर्भावितण्यर्थस्य लटि रूपं। निघातः॥

॥ अथ तृतीया ॥

द्यामिंद्रो हरिधायसं पृथिवीं हरिवर्पसं।
अधारयद्धरितोर्भूरि भोजनं ययोरंतर्हरिश्चरत् ॥३॥
द्यां। इंद्रः। हरिऽधायसं। पृथिवीं। हरिऽवर्पसं।
अधारयत्। हरितोः। भूरि। भोजनं। ययोः। अंतः। हरिः। चरत् ॥३॥

सोऽयमिंद्रो हरिधायसं। हरितो हरितवर्णा धायसो धारका रश्मयो यस्याः

सा। तां द्यामधारयत्। तथा हरिवर्पसमोषधीभिर्हरितवर्णां पृथिवीमधारयत्। हरितोर्हरिद्वर्णयोर्द्यावापृथिव्योर्मध्ये स्वकीययोरश्वयोर्भूरि प्रभूतं भोजनं। भुज्यत इति भोजनं यवसादि। लभ्यते। ययोर्द्यावापृथिव्योरंतर्मध्ये हरिरिंद्रश्चरत्। चरति। ते द्यावापृथिव्याविंद्रोऽधारयदित्यर्थः॥ हरिधायसं। डुधाञ् धारणपोषणयोरित्यस्माद्वहिहाधाञ्भ्यश्छंदसीत्यसुन्। णिदित्यनुवृत्तेरातो युक्। बहुव्रीहौ पूर्वपदस्वरः। पृथिवी। प्रथेः षिवन् संप्रसारणं चेति षिवन्प्रत्ययः। षिद्गौरादिभ्यश्चेति ङीष्। प्रत्ययस्वरेणांतोदात्तः। हरिवर्पसं। वृङ् संभक्तौ। वृङ्शीङ्भ्यां रूपस्वांगयोरित्यसुन्प्रत्ययः पुगागमश्च। संभज्यते तदिति वर्पो रूपं। बहुव्रीहौ पूर्वपदस्वरः। हरितोः। हृञ् हरण इत्यस्मात् हृसृरुहियुषिभ्य इतिः। उ॰ १.९७.। इतीतिप्रत्ययः। प्रत्ययस्वरः। भोजनं। भुज पालनाभ्यवहारयोरित्यस्मात्कृत्यल्युटो बहुलमिति कर्मणि ल्युट्। लित्स्वरः। अंतः। स्वरादिष्वंतोदात्तत्वेन पठितत्वादंतोदात्तः। चरत्। चरतिर्गत्यर्थः। लेटि रूपं। यद्वृत्तयोगादनिघातः॥

॥ अथ चतुर्थी ॥

जज्ञानो हरितो वृषा विश्वमा भाति रोचनं।
हर्यश्वो हरितं धत्त आयुधमा वज्रं बाह्वोर्हरिं॥४॥
जज्ञानः। हरितः। वृषा। विश्वं। आ। भाति। रोचनं।
हरिऽअश्वः। हरितं। धत्ते। आयुधं। आ। वज्रं। बाह्वोः। हरिं॥४॥

वृषा कामानां वर्षको हरितो हरिद्वर्णोपेतो जज्ञानो जात इंद्रो विश्वं सर्वं रोचनं दीप्यमानं लोकमा भाति। सर्वतः प्रकाशयति। तथा हर्यश्व इंद्रो हरितं हरिद्वर्णोपेतमायुधं धत्ते। बाह्वोर्धत्ते। तथा हरिं शत्रूणां प्राणहारकं वज्रं बाह्वोराधत्ते॥ जज्ञानः। जनी प्रादुर्भाव इत्यस्य लिटः कानच्। गमहनेत्यादिनोपधालोपः। चित्त्वादंतोदात्तः। भाति। भा दीप्तावित्यस्यांतर्भावितण्यर्थस्य लटि रूपं। रोचनं। रुच दीप्तावित्यस्मादनुदात्तेतश्च हलादेरिति युच्। चित्त्वादंतोदात्तः। बाह्वोः। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं॥

॥ अथ पंचमी ॥

इंद्रो हर्यंतमर्जुनं वज्रं शुक्रैरभीवृतं।
अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत॥५॥

इंद्रः । हर्यंतं । अर्जुनं । वज्रं । शुक्रैः । अभिऽवृतं ।

अप । अवृणोत् । हरिऽभिः । अद्रिऽभिः । सुतं । उत् । गाः । हरिऽभिः । आजत ॥५॥

सोऽयमिंद्रो हर्यंतं कमनीयमर्जुनं शुभ्रं । शुभ्रत्वमुपपादयति । शुक्रैः शुभ्रैः क्षीरादिभिरभिवृतं व्याप्तं वज्रं वेगवंतं हरिभिः । हरंत्येभिः सोमरसानिति हरयः । तैरद्रिभिर्ग्रावभिः सुतमभिषुतं सोममपावृणोत् । आवरणरहितमकरोत् । तथा च मंत्रवर्णः । पूषा राजानमाघृणिरपगूळ्हं गुहा हितं अविंदत् । ऋग्वे॰ १. २३. १४. । इति । तथा गाः पणिभिरपहृता गा हरिभिरश्वैरुपेतः स इंद्र उदाजत । बिलान्निरगमयत् ॥ अर्जुनं । अर्ज षर्ज अर्जन इत्यस्मादर्जेर्णिलुक्चेत्युनन् । नित्स्वरः । अभिवृतं । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । आजत । अज गतिक्षेपणयोः । लङि व्यत्ययेनात्मनेपदं । निघातः ॥

॥ इति तृतीयस्य तृतीयेऽष्टमो वर्गः ॥

आ मंद्रैरिति पंचर्चं सप्तमं सूक्तं वैश्वामित्रं बार्हतमैंद्रं । आ मंद्रैरित्यनुक्रमणिका । पूर्वसूक्ते बार्हतं त्वित्युक्तत्वादस्यापि बार्हतत्वं ॥ विशेषविनियोगस्तु यत्र श्रुत्या न सूचितः । स्मार्तं तत्र विजानीयादृग्विधानादिशास्त्रतः ॥

॥ तत्र प्रथमा ॥

आ मंद्रैरिंद्र हरिभिर्याहि मयूररोमभिः ।

मा त्वा के चिन्नि यमन्विं न पाशिनोऽति धन्वेव ताँ इहि ॥१॥

आ । मंद्रैः । इंद्र । हरिऽभिः । याहि । मयूररोमऽभिः ।

मा । त्वा । के । चित् । नि । यमन् । विं । न । पाशिनः । अति । धन्वऽइव । तान् । इहि ॥१॥

हे इंद्र मंद्रैर्मादयितृभिर्मयूररोमभिर्मयूररोमसदृशरोमयुक्तैर्हरिभिरश्वैरुपेतस्त्वमायाहि । यज्ञं प्रत्यागच्छ । केचिदपि जनास्त्वा त्वां मा नियमन् । मा नियच्छंतु । गमनप्रतिबंधं मा कुर्वंत्वित्यभिप्रायः । प्रतिबंधे दृष्टांतः । विं न । यथा पाशिनः पाशहस्ता व्याधा विं गच्छंतं पक्षिणं नियच्छंति तद्वन्मा नियच्छंतु । किंच धन्वेव । यथा पांथा धन्व मरुदेशं शीघ्रमतिगच्छंति । तद्वद्गमनप्रतिबंधकानतीत्य शीघ्रमिहि । आगच्छ ॥ मंद्रैः । मदि स्तुत्यादिष्वित्यस्य स्फायितंचीत्यादिना रक्प्रत्ययः । इदित्वान्नुम् । प्रत्ययस्वरः । मयूररोमभिः । मयूररोमवद्रोमाणि येषामिति सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्च । पा॰ २. २. २४. ३. । इति समास उत्तर-

पदलोपश्च । मयूरशब्दो मीनातेरूरन् । उ॰ १.६७. । इत्यूरन्प्रत्ययांतः । मीनाति सर्पानिति मयूरो वर्ही । नित्त्वादाद्युदात्तत्वे प्राप्ते मादीनां । फि॰ ३.४. । इति सूत्रेण मध्योदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । यमन् । यम उपरम इत्यस्य लेट्यडागमे रूपं । इहि । इण् गतावित्यस्य लोटि रूपं ॥

॥ अथ द्वितीया ॥

वृत्रखादो वलंरुजः पुरां दर्मो अपामजः ।

स्थाता रथस्य हर्योरभिस्वर इंद्रो दृळ्हा चिदारुजः ॥ २ ॥

वृत्रऽखादः । वलंऽरुजः । पुरां । दर्मः । अपां । अजः ।

स्थाता । रथस्य । हर्योः । अभिऽस्वरे । इंद्रः । दृळ्हा । चित् । आऽरुजः ॥ २ ॥

सोऽयमिंद्रो वृत्रखादः । वृत्रं खादति हिनस्तीति वृत्रखादः । वलंरुजः । वृणोत्याकाशमिति वलो मेघः । तस्य भंजकः । तथा च मंत्रवर्णः । बिभेद वलं । ऋग्वे॰ ३.३४.१०. । इति । ततोऽपामजो मेघभेदनद्वारापां प्रेरकः पुरां शत्रुसंबंधिनीनां दर्मो दारकः । तथा हर्योरश्वयोरभिस्वरेऽस्मदाभिमुख्येन प्रेरणे निमित्तभूते सति रथस्य स्थाता रथमधिष्ठाता । तथा दृळ्हा चित् दृढानामतिबलवतां शत्रूणामप्यारुजः समंताद्भंजको भवति ॥ वृत्रखादः । खादृ भक्षण इत्यस्मात्कर्मण्यण् । कृदुत्तरपदस्वरः । वलंरुजः । रुजो भंगे । कर्मण्युपपदे मूलविभुजादित्वात्कप्रत्ययः । तत्पुरुषे कृति बहुलमिति द्वितीयाया अलुक् । थाथादिस्वरः । आरुजः । रुजो भंग इत्यस्मादिगुपधलक्षणः कः । समासे थाथादिस्वरः ॥

॥ अथ तृतीया ॥

गंभीराँ उदधीँरिव क्रतुं पुष्यसि गा इव ।

प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥ ३ ॥

गंभीरान् । उदधीन्ऽइव । क्रतुं । पुष्यसि । गाःऽइव ।

प्र । सुऽगोपाः । यवसं । धेनवः । यथा । ह्रदं । कुल्याःऽइव । आशत ॥ ३ ॥

हे इंद्र त्वं गंभीरान्महावकाशानुदधीन् समुद्रानुदकैर्यथा पोषयसि तद्वत्क्रतुं यज्ञस्य कर्तारमिमं यजमानमभिमतफलप्रदानेन पुष्यसि । पोषयसि । अत्र दृष्टांतः । यथा सुगोपाः समीचीनो गोपालो यवसेन गाः पोषयति तद्वत् । यथा

धेनवो यवसं तृणादिकं प्राप्नुवंति तद्वत्त्वं सोमान् प्राप्नोषि। ते च सोमाः कुल्या इव कृत्रिमसरितो ह्रदं महाजलाशयं यथा प्राप्नुवंति तद्वत्त्वामाशत। व्याप्नुवंति॥ गंभीरान्। गाधृ प्रतिष्ठालिप्सयोर्ग्रंथे चेत्यस्माद्गभीरगंभीरावित्यनेन सूत्रेण इरच्प्रत्ययः। नुमागमोपधाह्रस्वभकाराः सर्वे निपात्यंते। चित्त्वादंतोदात्तः। उदधीनिव। उदकशब्द उपपदे दधातेरधिकरणेऽर्थे कर्मण्यधिकरणे चेति किप्रत्ययः। उदकशब्दस्य पेषंवासवाहनधिषु च। पा॰ ६.३.५८.। इत्युदभावः। कृत्स्वरः। इवेन विभक्त्यलोपः। पुष्यसि। पुष पुष्टावित्यस्यांतर्णीतण्यर्थस्य लटि रूपं। निघातः। सुगोपाः। गोपायतेः क्विपि रूपं। यथा। यथेति पादांते। फि॰ ४.१५.। इति निघातः। आशत। अशू व्याप्तावित्यस्माल्लङि बहुलं छंदसीति विकरणस्य लुक्। निघातः॥

॥ अथ चतुर्थी ॥

आ नस्तुजं रयिं भरांशं न प्रतिजानते।
वृक्षं पक्वं फलमंकीव धूनुहींद्र संपारणं वसु॥४॥

आ। नः। तुजं। रयिं। भर। अंशं। न। प्रतिऽजानते।
वृक्षं। पक्वं। फलं। अंकीऽइव। धूनुहि। इंद्र। संऽपारणं। वसु॥४॥

हे इंद्र नोऽस्माकं तुजं शत्रूणां बाधकं रयिं धनेनोपलक्षितं पुत्रमाभर। संपादय। तत्र दृष्टांतः। अंशं न। यथा पिता प्रतिजानते व्यवहारज्ञाय पुत्राय स्वकीयस्य धनस्य भागं ददाति तद्वत्। किंच पक्वं फलं प्रति वृक्षमंकीवांकुशी यथा धूनोति तथा त्वं संपारणमस्मदिच्छायाः सम्यक् पूरकं वसु धनं धूनुहि। चालय। प्रयच्छेत्यर्थः॥ प्रतिजानते। ज्ञा अवबोधन इत्यस्य शतरि रूपं। प्रादिसमासः। शतुरनुम इति विभक्तेरुदात्तत्वं। धूनुहि। धूञ् कंपन इत्यस्य लोटि रूपं। संपारणं। पॄ पालनपूरणयोरित्यस्य ण्यंतस्य करणे ल्युट्। समासे कृत्स्वरः॥

॥ अथ पंचमी॥

स्वयुरिंद्र स्वराळसि स्मद्दिष्टिः स्वयशस्तरः।
स वावृधान ओजसा पुरुष्टुत भवा नः सुश्रवस्तमः॥५॥

स्वऽयुः। इंद्र। स्वऽराट्। असि। स्मत्ऽदिष्टिः। स्वयशःऽतरः।
सः। ववृधानः। ओजसा। पुरुऽस्तुत। भव। नः। सुश्रवःऽतमः॥५॥

हे इंद्र स्वयुर्धनवानसि। तथा स्वराट् स्वर्गस्य राजासि। स्मद्दिष्टिर्भद्रवाक्यः स्वयशस्तरोऽतिशयेन प्रभूतकीर्तिरसि। हे पुरुष्टुत बहुभिराहूतेंद्र स त्वमोजसा बलेन वावृधानः वर्धमानः सन् नोऽस्मदर्थं सुश्रवस्तमोऽतिशयेन शोभनान्नोपेतो भव॥ स्वयुः। स्वशब्दान्मत्वर्थीयो युः। स्वराट्। राजृ दीप्तौ। क्विप्। व्रश्चादिना षत्वं। स्मद्दिष्टिः। स्मत् सुमदित्यर्थे। उकारलोपश्छांदसः। बहुव्रीहौ पूर्वपदस्वरः। पुरुष्टुत। संहितायां स्तुतस्तोमयोश्छंदसीति षत्वं। भव। भवतेर्लोटि रूपं। द्व्यचोऽतस्तिङ इति संहितायां दीर्घः। सुश्रवस्तमः। श्रवःशब्दोऽसुनंतः। बहुव्रीहावाद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। तदंतादतिशायने तमप्। तस्य पित्त्वादनुदात्तत्वे बहुव्रीहिस्वरः॥

॥ इति तृतीयस्य तृतीये नवमो वर्गः॥

युध्मस्य त इति पंचर्चमष्टमं सूक्तं वैश्वामित्रमैंद्रं। युध्मस्येत्यनुक्रमणिका॥ दशरात्रे चतुर्थेऽहनि निष्केवल्ये युध्मस्य त इति सूक्तं निविद्धानं। सूत्रितं च। कुह श्रुत इंद्रो युध्मस्य त इति निष्केवल्यं। आ॰ ७. ११.। इति॥ ऋषभनाम्न्येकाहेऽपि निष्केवल्य इदं सूक्तं निविद्धानं। सूत्रितं च। युध्मस्य त इति मध्यंदिनः। आ॰ ९. ७.। इति॥

॥ तत्र प्रथमा॥

युध्मस्यं ते वृषभस्यं स्वराजं उग्रस्य यूनः स्थविरस्य घृष्वेः।
अजूर्यतो वज्रिणो वीर्याइंद्र श्रुतस्यं महतो महानि॥१॥
युध्मस्यं। ते। वृषभस्यं। स्वऽराजः। उग्रस्यं। यूनः। स्थविरस्य। घृष्वेः।
अजूर्यतः। वज्रिणः। वीर्याणि। इंद्र। श्रुतस्यं। महतः। महानि॥१॥

हे इंद्र युध्मस्य योधनशीलस्य वृषभस्याभिमतफलसेचकस्य स्वराजो धनाधिपतेरुग्रस्य समर्थस्य यूनो नित्यतरुणस्य स्थविरस्य चिरंतनस्य घृष्वेः शत्रूणां संघर्षकस्याजूर्यतो जरारहितस्य वज्रिणः श्रुतस्य त्रिषु लोकेषु प्रसिद्धस्य अत एव महतस्ते तव वीर्याणि महानि। महांति खलु॥ युध्मस्य। युध संप्रहारे। इषियुधीधिदसीत्यादिना मक्प्रत्ययः। यूनः। यौतेः कनिन्युवृषीत्यादिना कनिन्। श्वयुवमघोनामतद्धित इति संप्रसारणं। नित्स्वरः। स्थविरस्य। अजिरशिशिरशिथिलेत्यादिना किरच्प्रत्ययांतो निपातितः। घृष्वेः। घृषु संघर्षे। कृविघृष्विच्छवीत्यादिना क्विन्प्रत्ययांतो निपात्यते। नित्त्वादाद्युदात्तः॥

॥ अथ द्वितीया ॥

महाँ असि महिष वृष्ण्येभिर्धनस्पृदुग्र सहमानो अन्यान्।
एको विश्वस्य भुवनस्य राजा स योधया च क्षयया च जनान् ॥ २ ॥
महान्। असि। महिष। वृष्ण्येभिः। धनऽस्पृत्। उग्र। सहमानः। अन्यान्।
एकः। विश्वस्य। भुवनस्य। राजा। सः। योधय। च। क्षयय। च। जनान् ॥ २ ॥

हे महिष महनीय उग्र इंद्र त्वं महानसि। धनस्पृत् धनानि दानभोगत्यागैः पारं नयंस्त्वं वृष्ण्येभिर्वीर्यैरन्यान् शत्रून्सहमानोऽभिभवन्वर्तसे। तथा विश्वस्य सर्वस्य भुवनस्यैकोऽसहायो राजा स त्वं योधय च। सपत्नान् प्रहर। जनान् क्षयय च। निवासय। बाधकान्हत्वा साधुजनान् स्वस्थाने स्थापयेत्यभिप्रायः ॥ महिष। मह पूजायां। अविमह्योष्टिषच् । उ० १. ४५.। इति टिषच्प्रत्ययः। आमंत्रितत्वान्निघातः। वृष्ण्येभिः। वृष्णि भवानि भवे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तः। योधय। युध संप्रहार इत्यस्य ण्यंतस्य लोटि रूपं। चादिषु चेति न निघातः। णित्स्वरः। क्षयय। क्षि निवासगत्योरित्यस्य ण्यंतस्य लोटि रूपं। अत्रापि पूर्ववदनिघातः ॥

॥ अथ तृतीया ॥

प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्रतीतः।
प्र मज्मना दिव इंद्रः पृथिव्याः प्रोरोर्महो अंतरिक्षादृजीषी ॥ ३ ॥
प्र। मात्राभिः। रिरिचे। रोचमानः। प्र। देवेभिः। विश्वतः। अप्रतिऽइतः।
प्र। मज्मना। दिवः। इंद्रः। पृथिव्याः। प्र। उरोः। महः। अंतरिक्षात्। ऋजीषी ॥ ३ ॥

रोचमानो दीप्यमानो विश्वतः सर्वैरप्रतीत एतावदस्य सामर्थ्यमित्यपरिच्छिद्यमान ऋजीषी सोमवानिंद्रो मात्राभिः। मीयंते परिच्छिद्यंत इति मात्राः शिलोच्चयाः। तेभ्योऽपि प्ररिरिचे। प्रकर्षेण महत्तयातिरिक्तोऽभूत्। तथा देवेभिर्देवेभ्योऽपि मज्मना। मज्जयति शत्रून्दुःखसागर इति मज्म बलं। तेन बलेन प्ररिरिचे। तथा दिवः पृथिव्या द्यावापृथिवीभ्यां च प्ररिरिचे। तथोरोर्विस्तीर्णान्महो महतोऽंतरिक्षादपि प्ररिरिचे ॥ मात्राभिः। माङ् माने शब्दे चेत्यस्मात् हुयामाश्रुभसिभ्यस्त्रन्निति त्रन्प्रत्ययः। नित्त्वादाद्युदात्तः। ढ्रलोपे पूर्वस्य दीर्घोऽण इति संहितायां दीर्घः। रोचमानः। रुच दीप्तावित्यस्मात् शानचि

रूपं। तस्य लसार्वधातुकस्वरे धातुस्वरः। अप्रतीतः। इण् गतौ। कर्मणि क्तः। प्रादिसमासः। नञा समासे तस्य स्वरः। मज्मना। टुमस्जो शुद्धौ। औणादिको मनिच्प्रत्ययः। झलां जश् झशीति जश्त्वं। चित्त्वादंतोदात्तः। पृथिव्याः। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं॥

॥ अथ चतुर्थी ॥

उरुं गभीरं जनुषाभ्यु१ग्रं विश्वव्यचसमवतं मतीनां।
इंद्रं सोमासः प्रदिवि सुतासः समुद्रं न स्रवत आ विशंति ॥४॥
उरुं। गभीरं। जनुषा। अभि। उग्रं। विश्वऽव्यचसं। अवतं। मतीनां।
इंद्रं। सोमासः। प्रऽदिवि। सुतासः। समुद्रं। न। स्रवतः। आ। विशंति ॥४॥

उरुं महांतं अत एव गभीरं महावकाशं जनुषा जन्मना स्वभावत एवोग्रं शत्रूणां भयंकरं। गभीरत्वमेवोच्यते। विश्वव्यचसं विश्वव्याप्तं मतीनां स्तुतीनां स्तोतृणां वावतं रक्षकं तादृशमिंद्रं प्रदिवि पूर्वेष्वहःसु सुतासो ग्रावभिरभिषुताः सोमासः सोमा अभि आभिमुख्येनाविशंति। तत्र दृष्टांतः। समुद्रं न। यथा स्रवतः स्रवंत्यो नद्यः समुद्रमाविशंति तद्वत्॥ जनुषा। जनी प्रादुर्भाव इत्यस्माज्जनेरुसिरित्युसिप्रत्ययः। विश्वव्यचसं। व्यच व्याजीकरण इत्यस्मादसुन्। व्यचेः कुटादित्वमनसीति वक्तव्यमित्यचानसीति पर्युदासात् ङित्त्वाभावः। विश्वव्यचा इतींद्रस्य नाम। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदस्यांतोदात्तत्वं। अवतं। अव रक्षणादिषु। औणादिकोऽतच्प्रत्ययः। चित्त्वादंतोदात्तः॥

॥ अथ पंचमी ॥

यं सोममिंद्र पृथिवीद्यावा गर्भं न माता बिभृतस्त्वाया।
तं ते हिन्वंति तमु ते मृजंत्यध्वर्यवो वृषभ पातवा उं ॥५॥
यं। सोमं। इंद्र। पृथिवीद्यावा। गर्भं। न। माता। बिभृतः। त्वाऽया।
तं। ते। हिन्वंति। तं। ऊं इति। ते। मृजंति। अध्वर्यवः। वृषभ। पातवै। ऊं इति ॥५॥

हे इंद्र पृथिवीद्यावा द्यावापृथिव्यौ त्वाया त्वत्कामतया यं सोमं बिभृतोऽंतर्धारयतः। अत्र दृष्टांतः। गर्भं न। यथा माता गर्भं बिभर्ति तद्वत्। हे वृषभ कामानां वर्षक हे इंद्र अध्वर्यवोऽध्वरं यजमानायेच्छंतस्ते त्वदर्थं तं सोमं हिन्वंति। प्रेरयंति।

किंच ते तव पातवै पानाय तं सोमं मृजंति। शोधयंति। उ प्रसिद्धौ॥ पृथिवीद्यावा। दिवो द्यावेति द्यावादेशः। आद्युदात्तः। नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमंथिष्वित्यत्र पर्युदासाद्देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरः। कृतसमासस्य विपर्यासश्छांदसः। बिभृतः। डुभृञ् धारणपोषणयोरित्यस्माल्लटि भृञामिदित्यभ्यासस्येत्वं। यद्वृत्तयोगादनिघातः। अजादिप्रत्ययपरत्वाभावादत्राभ्यस्तानामादिरिति स्वरो न भवति। प्रत्ययस्वरः। त्वाया। त्वामिच्छतीत्यर्थे सुप आत्मनः क्यच्। पूर्वपददकारस्याकारश्छांदसः। अ प्रत्ययादिति भावेऽप्रत्ययः। सुपां सुलुगिति तृतीयायाः सवर्णदीर्घः। एकादेशस्वरः। अध्वर्यवः। अध्वरमिच्छंतः। सुपः क्यच्। कव्यध्वरपृतनास्यर्चि लोप इत्याकारलोपः। क्याच्छंदसीत्युप्रत्ययः। प्रत्ययस्वरः। पातवै। पा पाने। तुमर्थे तवैप्रत्ययः। अंतश्च तवै युगपदिति धात्वंतस्य प्रत्ययस्य चोदात्तत्वं। उञ इति प्रगृह्यसंज्ञा॥

॥ इति तृतीयस्य तृतीये दशमो वर्गः॥

मरुत्वानिति पंचर्चं नवमं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं। मरुत्वानित्यनुक्रमणिका॥ दशरात्रे चतुर्थेऽहनि मरुत्वतीयशस्त्र एतत्सूक्तं निविद्धानीयं। सूचितं च। श्रुधी हवमिंद्र मरुत्वाँ इंद्रेति मरुत्वतीयं। आ॰ ७.११.। इति॥ ऋषभनाम्न्येकाहेऽपि मरुत्वतीयशस्त्र एतन्निविद्धानं। सूचितं च। मरुत्वाँ इंद्र युध्मस्य त इति मध्यंदिनः। आ॰ ९.७.। इति॥

॥ तत्र प्रथमा॥

मरुत्वाँ इंद्र वृषभो रणाय पिबा सोममनुष्वधं मदाय।
आ सिंचस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानां॥१॥

मरुत्वान्। इंद्र। वृषभः। रणाय। पिब। सोमं। अनुऽस्वधं। मदाय।
आ। सिंचस्व। जठरे। मध्वः। ऊर्मिं। त्वं। राजा। असि। प्रऽदिवः। सुतानां॥१॥

हे इंद्र यो वृषभोऽपां वर्षिता मरुत्वान्। मरुतो देवविशस्तद्वान्। स त्वमनुष्वधं स्वधया सवनीयपुरोडाशादिरूपेणान्नेनानुगतं सोमं रणाय रमणीयसंग्रामार्थं मदाय तं सोमं पिब। किंच मध्वो मदकरस्य सोमस्योर्मिं संघातं बहुरसं जठरे। जग्धमन्नमस्मिंस्तिष्ठतीति जठरमुदरं। तस्मिन्नुदर आ सिंचस्व। सर्वतः क्षारय। यतस्त्वं प्रदिवः पूर्वेष्वहःसु सुतानामभिषुतानां सोमानां राजासीशितासि। न केवलमधुनातनानामिति भावः। उक्तमर्थं यास्को ब्रवीति। मरुत्वानिंद्र

मरुद्भिस्त्वद्वान् वृषभो वर्षितापां रणाय रमणीयाय संग्रामाय पिब सोममनुष्वधमन्वन्नं मदाय मदनीयाय जैत्रायासिंच स्वजठरे मधुन ऊर्मिं । मधु सोममित्यौपमिकं माद्यतेरिदमपीतरन्मध्वेतस्मादेव । त्वं राजासि पूर्वेष्वप्यहःसु सुतानां । नि॰ ४.८. । इति ॥ अनुस्वधं । स्वधामनुगम्य वर्तमानं । अत्यादयः क्रांताद्यर्थे द्वितीययेति समासः । संहितायां पूर्वपदात् । पा॰ ८.३.१०६. । इति षत्वं । निरुदकादित्वादंतोदात्तत्वं । ऊर्मिं । अर्तेरूच्चेति मिप्रत्ययः । धातोरूः इत्यादेशो रपरः । प्रत्ययस्वरः ॥

सजोषा इंद्रेति मरुत्वतीयग्रहस्य याज्या । सूचितं च । सजोषा इंद्र सगणो मरुद्भिरिति भक्षयित्वैतत्पात्रं । आ॰ ५.१४. । इति ॥

॥ सैषा सूक्ते द्वितीया ॥

सजोषा इंद्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥ २ ॥

सऽजोषाः । इंद्र । सऽगणः । मरुत्ऽभिः । सोमं । पिब । वृत्रऽहा । शूर । विद्वान् ।
जहि । शत्रून् । अप । मृधः । नुदस्व । अथ । अभयं । कृणुहि । विश्वतः । नः ॥ २ ॥

हे शूर बलवन् हे इंद्र सजोषाः संगतो देवैर्मरुद्भिः सगणो वृत्रहा वृत्रस्य हंता विद्वान्कर्मविषयाभिज्ञस्त्वं सोमं पिब । ततो नः शत्रून् जहि । मृधो हिंसकान् शत्रूनपनुदस्व । यद्वा मृधः । हिंस्यंतेऽत्र प्राणिन इति मृधः संग्रामाः । तत्र वर्तमानान् शत्रूनपनुदस्व । अथानंतरं नोऽस्माकं विश्वतः सर्वतोऽभयं कृणुहि । कुरु । सर्वतो भयरहितानस्मान्कुर्वित्यर्थः ॥ वृत्रहा । ब्रह्मभ्रूणवृत्रेषु क्विप् । अभयं । ञिभी भय इत्यस्मादेरच् । नञा समासे तस्य स्वरः । विश्वतः । पंचम्यास्तसिल् । लित्स्वरः ॥

॥ अथ तृतीया ॥

उत ऋतुभिर्ऋतुपाः पाहि सोममिंद्र देवेभिः सखिभिः सुतं नः ।
याँ आभजो मरुतो ये त्वान्वहन्वृत्रमदधुस्तुभ्यमोजः ॥ ३ ॥

उत । ऋतुऽभिः । ऋतुऽपाः । पाहि । सोमं । इंद्र । देवेभिः । सखिऽभिः । सुतं । नः ।
यान् । आ । अभजः । मरुतः । ये । त्वा । अनु । अहन् । वृत्रं । अदधुः । तुभ्यं । ओजः ॥ ३ ॥

उत अपि च हे ऋतुपाः कालनिर्वाहकतया ऋतूनां पातः । ऋतुषु सोमं पिबतीति वा ऋतुपाः । यद्वा ऋतुभिर्मरुद्भिः सह सोमं पिबतीति ऋतुपाः । तादृश हे इंद्र सखिभिः समानख्यानैर्ऋतुभिर्मरुद्भिर्देवेभिर्देवैः सहितस्त्वं नः संबंधिनं सुतमभिषुतं सोमं पाहि । पिब । किंच यान्मरुत आभजो युद्धसहायार्थमसेवथा ये च मरुतस्त्वा त्वां युद्धे स्वामिनमन्वभजंत । ततस्त्वं वृत्रमहन् । हतवानसि । ते मरुतस्तुभ्यं त्वदर्थमोजो युद्धे शत्रुहननादिरूपं पराक्रममदधुः । अकुर्वन् ॥ अभजः । भज सेवायामित्यस्य लङि रूपं । यद्वृत्तयोगादनिघातः । अहन् । हन हिंसागत्योरित्यस्य लङि सिपो हल्ङ्यादिना लोपः । पादादित्वादनिघातः । अदधुः । दधातेर्लङि झेः सिजभ्यस्तेति जुस् । वाक्यभेदादनिघातः ॥

मरुत्वतीयशस्त्रे याज्या ये त्वाहिहत्य इत्येषा । सूचितं च । ये त्वाहिहत्ये मघवन्नवर्धन्निति याज्या । आ॰ ५.१४. । इति ॥

॥ सैषा सूक्ते चतुर्थी ॥

ये त्वाहिहत्ये मघवन्नवर्धन्ये शांबरे हरिवो ये गविष्टौ ।
ये त्वा नूनमनुमदंति विप्राः पिबेंद्र सोमं सगणो मरुद्भिः ॥४॥
ये । त्वा । अहिऽहत्ये । मघऽवन् । अवर्धन् । ये । शांबरे । हरिऽवः । ये । गोऽइष्टौ ।
ये । त्वा । नूनं । अनुऽमदंति । विप्राः । पिब । इंद्र । सोमं । सऽगणः । मरुत्ऽभिः ॥४॥

हे मघवन्निंद्र ये मरुतोऽहिहत्ये वृत्रहननरूपे कर्मणि त्वा त्वामवर्धन् प्रहर भगवो जहि वीरयस्वेति बलदानेनावीवृधन् । हे हरिवोऽश्ववन्निंद्र ये च शांबरे शंबरवधसंबंधिनि युद्धे त्वामवीवृधन् । इंद्रः शंबरमवधीदित्यस्मिन्नर्थे मंत्रवर्णः । यः शंबरं पर्वतेषु क्षियंतं चत्वारिंश्यां शरद्यन्वविंदत् । ओजायमानं यो अहिं जघान । ऋग्वे॰ २.१२.११. । इति । तथा ये मरुतो गविष्टौ पणिनामकैरसुरैः सह गवार्थे युद्धे च त्वामवीवृधन् । विप्रा मेधाविनो ये च मरुतो नूनमिदानीं त्वामनुमदंति मादयंति तादृशैस्तैर्मरुद्भिः सगणः सन् इमं सोमं पिब ॥ अहिहत्ये । हंतेर्भावे हनस्त चेति क्यप् । कृदुत्तरपदस्वरः । अवर्धन् । वृधु वृद्धावित्यस्य ण्यंतस्य लङि रूपं । छंदस्युभयथेति झेरार्धधातुकत्वाण्णेर्लोपः । यद्वृत्तयोगादनिघातः । शांबरे । शंबरस्येदमित्यर्थे तस्येदमित्यण्प्रत्ययः । गविष्टौ । इषु इच्छायां । भावे क्तिन् । बहुव्रीहौ पूर्वपदस्वरः । अनुमदंति । मदि स्तुत्यादिष्वित्यस्य लटि व्यत्ययेन

परस्मैपदं । आगमानुशासनस्यानित्यत्वान्नुमभावः । झलैसार्वधातुकस्वरे कृते धातुस्वरः । तिङि चोदात्तवतीति गतेर्निघातः ॥

॥ अथ पंचमी ॥

मरुत्वंतं वृषभं वावृधानमकवारिं दिव्यं शासमिंद्रं ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥ ५ ॥
मरुत्वंतं । वृषभं । ववृधानं । अकवऽअरिं । दिव्यं । शासं । इंद्रं ।
विश्वऽसहं । अवसे । नूतनाय । उग्रं । सहःऽदां । इह । तं । हुवेम ॥ ५ ॥

हे इंद्र मरुत्वंतं मरुद्भिस्तद्वंतं वृषभं मेघभेदनद्वारापां वर्षकं ववृधानं वृत्रहननादिकर्मसूत्साहेन वर्धमानमकवारिं प्रभूतशत्रुकं यद्वा अकुत्सितारिं । तथा च मंत्रः । स्वरिरमत्रो ववक्षे रणाय । ऋग्वे° १. ६१. ९. । इति । दिव्यं दिवि स्वर्गलोके वर्तमानं शासं हितोपदेशाहितपरिहाराभ्यां शासितारं विश्वासाहं विश्वस्य प्रतिपक्षस्य सर्वस्याभिभवितारमुग्रं शत्रुषूद्गूर्णं सहोदां युद्धसहकारिणां मरुतां बलप्रदं तं तादृशसामर्थ्योपेतमिंद्रं नूतनाय नवतरायावसे रक्षणायेह कर्मणि हुवेम । त्वामाह्वयेम ॥ नूतनाय । नवशब्दस्य नू इत्यादेशः । त्नप्तनप्खाश्च प्रत्यया वक्तव्या इति तनप्प्रत्ययः ॥

॥ इति तृतीयस्य तृतीय एकादशो वर्गः ॥

सद्यो हेति पंचर्चं दशमं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं । सद्यो हेत्यनुक्रमणिका ॥ अग्निष्टोमे माध्यंदिनसवने मैत्रावरुणशस्त्रे सद्यो ह जात इत्येतत्सूक्तं । सूत्रितं च । सद्यो ह जात एवा त्वामिंद्र । आ° ५. १६. । इति ॥ चतुर्विंशिकेऽप्यहनि मैत्रावरुणशस्त्रेऽहरहःशस्यसंज्ञमेतत्सूक्तं । सूत्रितं च । सद्यो ह जात इत्यहरहःशस्यं मैत्रावरुण । आ° ७. ४. । इति ॥ अहर्गणे द्वितीयादिष्वहःसु माध्यंदिनसवनेऽस्मिन् शस्त्र एतत्सूक्तं । अहरहःशस्यानीति होत्रका द्वितीयादिष्वेव । आ° ७. १. । इति सूत्रितं ॥ साद्यस्क्र एकाहे मरुत्वतीये शस्त्रे सद्यो ह जात इत्याद्या सूक्तमुखीया । सूत्रितं च । सद्यो ह जातो वृषभः कनीनस्त्वं सद्यो अपिबो जात इंद्र । आ° ९. ५. । इति ॥

॥ सैषा सूक्ते प्रथमा ॥

सद्यो ह जातो वृषभः कनीनः प्रभर्तुमावदंधसः सुतस्य ।
साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य ॥ १ ॥

सद्यः । ह । जातः । वृषभः । कनीनः । प्रऽभर्तुं । आवत् । अंधसः । सुतस्य ।
साधोः । पिब । प्रतिऽकामं । यथा । ते । रसऽआशिरः । प्रथमं । सोम्यस्य ॥ १ ॥

वृषभो वृष्टिद्वारापां वर्षिता सद्यस्तदानीमेव जात उत्पन्नः कनीनः कमनीय इंद्रः सुतस्याभिषुतस्यांधसो हविर्लक्षणस्यान्नस्य सोमस्य प्रभर्तुं प्रकर्षेण भर्तारं संग्रहीतारं यजमानमावत् । रक्षतु । ह प्रसिद्धौ । किंच तादृशस्त्वं प्रतिकामं कामे कामे सोमपानेच्छायां सत्यां ते तव यथा कामस्य पूर्तिर्भवति तथा साधो रसात्मना संसिद्धं रसाशिरो गोपयोमिश्रणोपेतं सोम्यस्य सोममयं रसं प्रथमं सर्वेभ्यो देवेभ्यः पुरस्तात्पिब ॥ प्रतिकामं । कामं कामं प्रति । वीप्सायामव्ययीभावः । समासस्वरः । यथा । अपादांतत्वादेव लित्स्वरः । रसाशिरः । आङ्पूर्वात् श्रीणातेः क्विपपस्पृधेथामित्यादिनाशिर् इत्यादेशः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । सोम्यस्य । सोमशब्दान्मयडर्थे मये चेति यप्रत्ययः ॥

॥ अथ द्वितीया ॥

यज्जायथास्तदहरस्य कामेंऽशोः पीयूषमपिबो गिरिष्ठां ।
तं ते माता परि योषा जनित्री महः पितुर्दम आसिंचदग्रे ॥ २ ॥

यत् । जायथाः । तत् । अहः । अस्य । कामे । अंशोः । पीयूषं । अपिबः । गिरिऽस्थां ।
तं । ते । माता । परि । योषा । जनित्री । महः । पितुः । दमे । आ । असिंचत् । अग्रे ॥ २ ॥

हे इंद्र त्वं यद्यस्मिन्नहनि जायथा अजायथाः तदहस्तस्मिन्नेवाहन्यस्य सोमस्य कामे पिपासायां सत्यां गिरिष्ठां गिरिस्थां पर्वतस्योच्चस्थाने वर्तमानमंशोः सोमलताखंडविशिष्टस्य ऋजीषस्य पीयूषमभिनवं रसमपिबः । पीतवानसि । उत्पत्तिक्षण एव सोमपाने कारणं दर्शयति । ते तव जनित्री माता योषा युवतिरदितिर्महो महतः पितुर्जनकस्य कश्यपस्य दमे सूतिकागृहेऽग्रे स्तन्यदानात् प्राक् तं तादृशं सोमं पर्यासिंचत् । तवास्ये परितोऽक्षारयत् ॥ जायथाः । जनी प्रादुर्भाव इत्यस्य लङि बहुलं छंदसीत्यडभावः । यद्वृत्तयोगादनिघातः । जनित्री । जनिता मंत्र इति निपातनाण्णिलोपः ॥

॥ अथ तृतीया ॥

उपस्थाय मातरमन्नमैट्ट तिग्ममपश्यदभि सोममूधः ।
प्रयावयन्नचरद्गृत्सो अन्यान्महानि चक्रे पुरुधप्रतीकः ॥ ३ ॥

उपऽस्थाय । मातरं । अन्नं । ऐट्ट । तिग्मं । अपश्यत् । अभि । सोमं । ऊधः ।
प्रऽयवयन् । अचरत् । गृत्सः । अन्यान् । महानि । चक्रे । पुरुधऽप्रतीकः ॥ ३ ॥

स इंद्रो मातरमुपस्थाय प्रार्थयित्वान्नमैट्ट । तामन्नमयाचत । ईळिरध्येषणाकर्मेति यास्कः । ततस्तस्या ऊध ऊधसि क्षीररूपेण स्थितं तिग्मं दीप्तं सोममभ्यपश्यत् । सर्वतोऽदर्शत् । गृत्सः । अभिकांक्ष्यते सर्वैर्देवैः शत्रुहननार्थमिति गृत्स इंद्रः । अन्यान्सपत्नान्प्रयवयन् स्वस्वस्थानात्प्रकर्षेणोच्चालयन्नचरत् । सर्वत्र चरति । किंच पुरुधप्रतीकस्तेजोयोगाद्बहुधा विक्षिप्तांगो महानि महांति वृत्रहननादीनि कर्माणि चक्रे ॥ उपस्थाय । तिष्ठतेर्ल्यपि घुमास्थेतीत्वे प्राप्ते न ल्यपीति प्रतिषेधः । लित्स्वरः । ऐट्ट । ईळियाच्ञार्थः । तस्माल्लङि रूपं । आडजादीनामित्याडागमः । ष्टुत्वं । निघातः । तिग्मं । तिज निशाने । अस्माद्युजिरुचितिजां कुश्चेति मक्प्रत्ययः कवर्गादेशश्च । प्रयवयन् । यु मिश्रणामिश्रणयोरित्यस्य ण्यंतस्य शतरि रूपं । लित्स्वरः । गृत्सः । गृधु अभिकांक्षायां । गृधिपण्योर्दकौ चेति सप्रत्ययो दकारश्चांतादेशः । वृषादित्वादाद्युदात्तः । पुरुधप्रतीकः । पुरुशब्द इह संख्यावाची । संख्याया विधार्थे धेति धाप्रत्ययः । ह्रस्वश्छांदसः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः ॥

॥ अथ चतुर्थी ॥

उग्रस्तुराषाळभिभूत्योजा यथावशं तन्वं चक्र एषः ।
त्वष्टारमिंद्रो जनुषाभिभूयामुष्या सोममपिबच्चमूषु ॥ ४ ॥

उग्रः । तुराषाट् । अभिभूतिऽओजाः । यथावशं । तन्वं । चक्रे । एषः ।
त्वष्टारं । इंद्रः । जनुषा । अभिऽभूय । आऽमुष्य । सोमं । अपिबत् । चमूषु ॥ ४ ॥

य एष इंद्र उग्रः शत्रूणां भयंकरस्तुराषाट् त्वरया शत्रूणामभिभविता अत एवाभिभूत्योजाः शत्रूणामभिभवनपराक्रमोपेतः सन् तन्वमात्मीयं शरीरं यथावशं यथाकामं नानाविधरूपोपेतं चक्रे । तथा च मंत्रवर्णः । रूपंरूपं मघवा बोभवीति । ऋग्वे० ३.५३.८. । इति । स इंद्रो जनुषा सामर्थ्येन त्वष्टारं त्वष्टृनामकमसु-

रमभिभूय चमूषु चमसेषु स्थितमामुष्य चोरयित्वा सोममपिबत्। त्वष्टा हतपुत्रो वींद्रमित्यादि प्रासहा सोममपिबत्। सं° २.४.१२.। इति तैत्तिरीयकं॥ तुराषाट्। जित्वरा संभ्रमे। क्विप्। ज्वरत्वरेत्यादिना ऊठ्। सहेश्छंदसि सह इति ख्विः। कर्तृकरणे कृता बहुलमिति समासः। तत्पुरुषे कृति बहुलमिति तृतीयाया अलुक्। सहेः साडः स इति षत्वं। कृदुत्तरपदस्वरः। यथावशं। वशं काममनतिक्रम्येत्यव्ययीभावसमासः। समासस्वरः। आमुष्य। मुष स्तेये। ल्यप्। चमूषु। चमु अदने। कृषिचमितनिधनिसर्जिखर्जिभ्य ऊरित्यूप्रत्ययः। प्रत्ययस्वरः॥

॥ अथ पंचमी ॥

शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ।
शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥५॥
शुनं। हुवेम। मघऽवानं। इंद्रं। अस्मिन्। भरे। नृऽतमं। वाजऽसातौ।
शृण्वंतं। उग्रं। ऊतये। समत्ऽसु। घ्नंतं। वृत्राणि। संऽजितं। धनानां ॥५॥

सिद्धैषा ॥

॥ इति तृतीयस्य तृतीये द्वादशो वर्गः ॥

शंसा महामिति पंचर्चमेकादशं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं। शंसा महामित्यनुक्रमणिका॥ समूळ्हे दशरात्रेऽष्टमेऽहनि मरुत्वतीयशस्त्र एतत्सूक्तं। सूचितं च। शंसा महां महश्चित्त्वमिंद्र। आ° ८.७.। इति ॥

॥ तत्र प्रथमा ॥

शंसा महामिंद्रं यस्मिन्विश्वा आ कृष्टयः सोमपाः काममव्यन्।
यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयंत देवाः ॥१॥
शंस। महां। इंद्रं। यस्मिन्। विश्वाः। आ। कृष्टयः। सोमऽपाः। कामं। अव्यन्।
यं। सुऽक्रतुं। धिषणे इति। विभ्वऽतष्टं। घनं। वृत्राणां। जनयंत। देवाः ॥१॥

हे होतः महां महांतमिंद्रं शंस। शस्त्रैः स्तुहि। यस्मिन्निंद्रे रक्षितरि सति विश्वाः कृष्टयः सर्वे मनुष्याः सोमपा यज्ञमनुष्ठाय सोमपाः संतः कामं। काम्यत इति कामः स्वर्गादिः। तमाव्यन् सर्वतः प्राप्नुवंति। धिषणे देवमनुष्यादीनां धारयित्र्यौ। यद्वा प्रगल्भे समर्थे स्वाश्रितान् रक्षितुमिति धिषणे द्यावापृथिव्यौ।

देवाश्च सुक्रतुं । क्रतुः कर्म जगत्पालनादि । शोभनः क्रतुर्यस्यासौ सुक्रतुः । तादृशं विश्वतष्टं विभुना ब्रह्मणा जगदाधिपत्ये स्थापितं महांतं वृत्राणां पापरूपाणां घनं हंतारं यमिंद्रं जनयंत । अजनयन् ॥ शंस । शन्सु स्तुतावित्यस्य लोटि रूपं । पादादित्वादनिघातः । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । अव्यन् । वी कांतिगत्यादिषु । लङि रूपं । यद्वृत्तयोगादनिघातः । अट्स्वरः । सुक्रतुं । क्रत्वादयश्चेत्युत्तरपदाद्युदात्तः । धिषणे । ञिधृषा प्रागल्भ्य इत्यस्माद्धृषेर्धिष च संज्ञायामिति क्युप्रत्ययः । धिष इत्यादेशः । प्रत्ययस्वरः । घनं । हंतेः पुंसि संज्ञायामिति घः । हो हंतेरिति कुत्वं । प्रत्ययस्वरः । जनयंत । जनेर्ण्यंतस्य लङि रूपं । यद्वृत्तयोगादनिघातः ॥

॥ अथ द्वितीया ॥

यं नु नकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठां ।
इनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्दस्योः ॥ २ ॥
यं । नु । नकिः । पृतनासु । स्वऽराजं । द्विता । तरति । नृऽतमं । हरिऽस्थां ।
इनऽतमः । सत्वऽभिः । यः । ह । शूषैः । पृथुऽज्रयाः । अमिनात् । आयुः । दस्योः ॥ २ ॥

पृतनासु । व्याप्रियंतेऽत्र योद्धार इति पृतनाः संग्रामाः । तेषु स्वराजं हरिष्ठां हरिस्थां हरियुक्ते रथे वर्तमानं नृतमं बलस्य युद्धे नेतृतमं द्विता युद्धमासाद्य सेनां द्विधा कृत्वा वर्तमानं यमिंद्रं नकिर्न कश्चिदपि तरति उत्तीर्य गच्छति । न कोऽप्यभ्यस्तीत्यर्थः । नु प्रसिद्धौ । स इंद्र इनतमोऽतिशयेन सेनास्वामी सत्वभिः परितः सीदद्भिर्मरुद्भिः सह यो यान् गच्छन् शूषैः । शोषयंति परबलानीति शूषाणि बलानि । तैः पृथुज्रया युद्धं प्रति तीव्रवेगः सन् दस्योः शत्रोरायुरन्नं प्राणं वा मिनाति । हिनस्ति । ह प्रसिद्धौ ॥ अत्र निरुक्तं । पृथुज्रयाः पृथुजवः । पृथुज्रया अमिनादायुर्दस्योः । प्रामापयदायुर्दस्योः । ५. ९. । इति ॥ तरति । तॄ प्लवनतरणयोरित्यस्य लटि रूपं । यद्वृत्तयोगादनिघातः । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । यः । या प्रापणे । औणादिकः कप्रत्ययः । आतो लोपः । प्रत्ययस्वरः ॥

॥ अथ तृतीया ॥

सहावा पृत्सु तरणिर्नार्वा व्यानशी रोदसी मेहनावान् ।
भगो न कारे हव्यो मतीनां पितेव चारुः सुहवो वयोधाः ॥ ३ ॥

सहऽवा। पृत्ऽसु। तरणिः। न। अर्वा। विऽआनशिः। रोदसी इति। मेहनाऽवान्।
भर्गः। न। कारे। हव्यः। मतीनां। पिताऽइव। चारुः। सुऽहवः। वयःऽधाः ॥३॥

य इंद्रः सहवा बलवान्पृत्सु संग्रामेषु तरणिः। शत्रूनुत्तीर्य वर्तत इति तरणिः। तत्र दृष्टांतः। अर्वा न। यथार्वा बलवानश्वः शत्रुबलं तरति तथा रोदसी द्यावापृथिव्यौ व्यानशिर्व्याप्नुवन्मेहनावान्। मिह्यते सिच्यते दीयतेऽर्थिभ्य इति मेहनं धनं। तद्वान्भवति। तादृश इंद्रः कारे। क्रियत इति कारो यज्ञादिः। तस्मिन्यज्ञे भगो न पूषा देव इव हव्यो हवनीयो मतीनां स्तोतॄणां स्तुतीनां वा पितेव पालयिता चारुः कमनीयः सुहवः सुष्ठाह्वानोपेतो वयोधा अन्नस्य दाता भवति ॥ सहावा। सहोऽस्यास्तीति मतुबर्थे छंदसीवनिपाविति वनिप्। अन्येषामपि दृश्यत इति संहितायां दीर्घः। पृत्सु। पृतनाशब्दस्य सौ परतः मांस्पृत्स्नूनामुपसंख्यानमिति पृदादेशः। सावेकाच इति विभक्तेरुदात्तत्वं। व्यानशिः। अशू व्याप्तावित्यस्माच्छंदसि सदादित्वात्किप्रत्ययः। तस्य लिड्वद्भावः। अत आदेरित्यभ्यासस्य दीर्घे कृतेऽश्नोतेश्चेति नुमागमः। प्रादिसमासः। कारे। करोतेः कर्मणि घञ्। कर्षात्वतो घञोऽंत उदात्त इत्यंतोदात्तत्वं। हव्यः। जुहोतेरचो यत्। यतोऽनाव इत्याद्युदात्तत्वं। सुहवः। ह्वयतेर्भावेऽनुपसर्गस्य। पा॰ ३. ३. ७५। इत्यप्प्रत्ययः। संप्रसारणं। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। आद्युदात्तं द्व्यच्छंदसीति बहुव्रीहावुत्तरपदाद्युदात्तत्वं ॥

॥ अथ चतुर्थी ॥

धर्ता दिवो रजसस्पृष्ट ऊर्ध्वो रथो न वायुर्वसुभिर्नियुत्वान्।
क्षपां वस्ता जनिता सूर्यस्य विभक्ता भागं धिषणेव वाजं ॥४॥
धर्ता। दिवः। रजसः। पृष्टः। ऊर्ध्वः। रथः। न। वायुः। वसुऽभिः। नियुत्वान्।
क्षपां। वस्ता। जनिता। सूर्यस्य। विऽभक्ता। भागं। धिषणाऽइव। वाजं ॥४॥

स इंद्रो दिवो द्युलोकस्य रजसोऽंतरिक्षस्य च धर्ता धारकः पृष्टः सर्वत्र वर्तमानो रथो न तदीयो रथ इवोर्ध्वो वायुरूर्ध्वं गंता वसुभिः सहायतया निवसद्भिर्मरुद्भिर्नियुत्वान्सहायवान्। यद्वा नेत्ययमुत्तरेणापि संबध्यते। यथा वायुर्नियुत्वान्नियुन्नामकवडवाभिस्तद्वानेवमिंद्रो वसुभिर्मरुद्भिः सहायवान्। तथा क्षपां वस्ता रात्रिमाच्छादयन्सूर्यस्य जगत्प्रकाशकस्यादित्यस्य जनिता जनयिता भागं

भजनीयं वाजं कर्मफलरूपमन्नं विभक्ता साधु विभागकर्ता भवति। तत्र दृष्टांतः। धिषणेव। यथाढ्यानां वागस्येदमिति विभागं करोति तद्वत्॥ रजसः। रंज राग इत्यस्माद्भूरंजिभ्यां कित्। उ॰ ४.२१६.। इत्यसुन्। कित्त्वान्नलोपः। रज्यते प्रकाशेनेति रजोऽंतरिक्षं। नित्त्वादाद्युदात्तः। वस्ता। वस आच्छादन इत्यस्य तृचि रूपं। जनिता। जनयतेस्तृचि जनिता मंत्र इति निपातनाण्णिलोपः। विभक्ता। भज सेवायामित्यस्य साधुकारिण्यर्थे तृन्। एकाच उपदेश इतीट्प्रतिषेधः। तादौ च निति कृत्यताविति गतेः प्रकृतिस्वरत्वं॥

॥ अथ पंचमी ॥

शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ।
शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां॥५॥

शुनं। हुवेम। मघऽवानं। इंद्रं। अस्मिन्। भरे। नृऽतमं। वाजऽसातौ।
शृण्वंतं। उग्रं। ऊतये। समत्ऽसु। घ्नंतं। वृत्राणि। संऽजितं। धनानां॥५॥

॥ इति तृतीयस्य तृतीये त्रयोदशो वर्गः॥

इंद्रः स्वाहेति पंचर्चं द्वादशं सूक्तं वैश्वामित्रं त्रैष्टुभमैंद्रं॥ दशरात्रे नवमेऽहनि मरुत्वतीयशस्त्र इदं सूक्तं। सूचितं च। तृतीयस्येंद्रः स्वाहा गायत्साम। आ॰ ८.७.। इति॥

॥ तत्र प्रथमा ॥

इंद्रः स्वाहा पिबतु यस्य सोम आगत्या तुम्रो वृषभो मरुत्वान्।
ओरुव्यचाः पृणतामेभिरन्नैरास्य हविस्तन्वः१ काममृध्याः॥१॥

इंद्रः। स्वाहा। पिबतु। यस्य। सोमः। आऽगत्य। तुम्रः। वृषभः। मरुत्वान्।
आ। उरुऽव्यचाः। पृणतां। एभिः। अन्नैः। आ। अस्य। हविः। तन्वः। कामं। ऋध्याः॥१॥

अयमिंद्रः स्वाहा स्वाहाकृतमिमं सोमं पिबतु। यस्येंद्रस्यायं सोमः स इंद्रो यज्ञं प्रत्यागत्य तुम्रः कर्मविघ्नकारिणां हिंसको वृषभो यष्टॄणामभिमतफलवर्षको मरुत्वान्मरुद्भिस्तद्वान् उरुव्यचाः प्रभूतव्याप्तिः सन् एभिरस्माभिर्दत्तैरन्नैः सोमादिलक्षणैर्हविर्भिरापृणतां। समंतात्पूरयतु। ततोऽस्येंद्रस्य संबंधिनस्तन्वः शरीरस्य कामं पुष्ट्यादिलक्षणविषयमभिलाषं हविरस्माभिर्दत्तमा ऋध्याः। सर्वतः पूरयतु॥ तुम्रः। तुमिराहननार्थः। उरुव्यचाः। व्यचेरसुन्। व्यचेः कुटादित्वम-

नसीति वक्तव्यमित्यत्रानसीति पर्युदासात् ङित्वाभावः। कृदुत्तरस्वरः। ऋध्याः। ऋध्नोतेराशीर्लिङि रूपं ॥

॥ अथ द्वितीया ॥

आ ते॑ सप॒र्यू ज॒वसे॑ युनज्मि॒ ययो॒रनु॑ प्र॒दिवः॑ श्रु॒ष्टिमाव॑ः ।
इ॒ह त्वा॑ धेयु॒र्हर॑यः सुशिप्र॒ पिबा॒ त्व१॒स्य सुषु॑तस्य॒ चारो॑ः ॥२॥

आ। ते॒। स॒प॒र्यू इति॑। ज॒वसे॑। यु॒न॒ज्मि॒। ययो॑ः। अनु॑। प्र॒ऽदिव॑ः। श्रु॒ष्टिं॑। आव॑ः।
इ॒ह। त्वा॒। धे॒यु॒ः। हर॑यः। सु॒ऽशि॒प्र॒। पिब॑। तु। अ॒स्य। सु॒ऽसु॑तस्य। चारो॑ः ॥२॥

हे इंद्र ते तव जवसे यज्ञं प्रत्यागमनाय सपर्यू परिचारकौ हरी आयुनज्मि। रथे योजयामि। प्रदिवः पुरातनस्त्वं ययोरश्वयोः श्रुष्टिं वेगं। श्रुष्टीति क्षिप्रनामेति यास्कः। तमन्वावः। अनुगच्छसि। हे सुशिप्र शोभनहनो इंद्र हरयो रथे योजितास्तेऽश्वा इह कर्मणि त्वा त्वां धेयुः। यज्ञं प्रति धारयंतु। तत आगतस्त्वं सुषुतस्य सुष्ठ्वभिषुतं चारोः कमनीयमस्येमं सोमं तु क्षिप्रं पिब ॥ सपर्यू। सपरशब्दः कंड्वादिः। तदंतादौणादिकः कुप्रत्ययः। आवः। अव रक्षणादिषु। छांदसे लङि रूपं। यद्वृत्तयोगादनिघातः। धेयुः। दधातेराशीर्लिङि किदाशिषीति यासुट्। एर्लिङि। पा॰ ६.४.६७.। इत्येकारादेशः। निघातः। पिब। पादादित्वादनिघातः। सुषुतस्य। षुञ् अभिषवे। कर्मणि क्तः। गतिरनंतर इति गतिस्वरः। उपसर्गात्सुनोतीत्यादिना संहितायां षत्वं ॥

॥ अथ तृतीया ॥

गोभि॑र्मिमि॒क्षुं द॑धिरे सुपा॒रमिंद्रं॒ ज्यैष्ठ्या॑य॒ धाय॑से गृणा॒नाः ।
मं॒दा॒नः सोमं॑ पपि॒वाँ ऋ॑जीषि॒न्त्सम॒स्मभ्यं॑ पु॒रुधा॒ गा इ॑षण्य ॥३॥

गोभि॑ः। मि॒मि॒क्षुं। द॒धि॒रे॒। सु॒ऽपा॒रं। इंद्रं॑। ज्यैष्ठ्या॑य। धाय॑से। गृ॒णा॒नाः।
मं॒दा॒नः। सोमं॑। प॒पि॒ऽवान्। ऋ॒जी॒षि॒न्। सं। अ॒स्मभ्यं॑। पु॒रु॒धा। गाः। इ॒ष॒ण्य॒ ॥३॥

गृणानाः स्तोत्रं कुर्वाणा ऋत्विजो मिमिक्षुं स्तोतृणामभिमतफलं वर्षितुमिच्छंतं सुपारं शोभनपारं स्तुतिभिरभिमुखीकर्तुं शक्यमित्यर्थः। तादृशमिंद्रं ज्यैष्ठ्याय धनादिसंपत्त्या श्रेष्ठत्वाय धायसे चिरकालमायुर्धारणाय च गोभिर्गोमिश्रितैः सोमैर्दधिरे। धारयंति। शेषः प्रत्यक्षः। हे ऋजीषिन् सोमवन्निंद्र स त्वं

मंदानो मोदमानः सोमं पपिवान् सोमस्य पाता सन् स्तोतृभ्योऽस्मभ्यं पुरुधा बहुधा गा अग्निहोत्रादिकर्मसिद्ध्यर्थं धेनूः समिषण्य । सम्यक् प्रेरय ॥ गोभिः । सावेकाच इति विभक्तेरुदात्तत्वे प्राप्ते न गोश्वन्सावकर्णेति प्रतिषेधः । मिमिक्षुं । मिह सेचन इत्यस्य सन्येकाच इतीट्प्रतिषेधे हलंताच्चेति किद्वद्भावः । सनाशंस-भिक्ष उः । प्रत्ययस्वरः । ज्यैष्ठ्याय । ज्येष्ठस्य भाव इत्यर्थे ब्राह्मणादित्वात् ष्यञ् । ञित्त्वादाद्युदात्तः । गृणानाः । गॄ शब्दे । क्र्यादित्वात् श्ना । चित्त्वादंतोदात्तः । मंदानः । मदि स्तुत्यादिष्वित्यस्य शानचि बहुलं छंदसीति शपो लुक् । पुरुधा । पुरुशब्द इह संख्यावाची । संख्याया विधार्थे धेति धाप्रत्ययः । इषण्य । इष गतौ । इषण-मिच्छतीति छंदसि परेच्छायां क्यच् । तदंतादंतर्भावितण्यर्थाल्लोटि रूपं ॥

॥ अथ चतुर्थी ॥

इमं कामं मंदया गोभिरश्वैश्चंद्रवता राधसा पप्रथश्च ।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इंद्राय वाहः कुशिकासो अक्रन् ॥४॥
इमं । कामं । मंदय । गोभिः । अश्वैः । चंद्रऽवता । राधसा । पप्रथः । च ।
स्वःऽयवः । मतिऽभिः । तुभ्यं । विप्राः । इंद्राय । वाहः । कुशिकासः । अक्रन् ॥४॥

॥ अथ पंचमी ॥

शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥५॥
शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ ।
शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥५॥

एते व्याख्याते ॥

॥ इति तृतीयस्य तृतीये चतुर्दशो वर्गः ॥

चर्षणीधृतमिति द्वादशर्चं त्रयोदशं सूक्तं वैश्वामित्रमैंद्रं । अत्रानुक्रमणिका । चर्षणीधृतं द्वादशाद्यांत्यौ तृचौ जागतगायत्राविति । आद्यस्तृचो जागतोऽत्यस्तृचो गायत्रः शिष्टा ऋचस्त्रिष्टुभः ॥ सूक्तविनियोगो लैंगिकः । उक्थ्ये क्रतौ मैत्रावरु-णशस्त्रेऽनुरूपतृचानंतरमाद्यस्तृचः शंसनीयः । सूचितं च । चर्षणीधृतमस्तभ्नाद्द्या-मसुर इति तृचौ । आ॰ ६. १. । इति ॥ विषुवति निष्केवल्ये नृणामु त्वेति तृचः ।

विषुवानिति खंडे सूचितं। नृणामु त्वा नृतमं गीर्भिरुक्थैरिति तिस्रः। आ° ८.६.। इति ॥ बृहस्पतिसवेऽप्ययं तृचो निष्केवल्ये निविद्धानीयः। सूचितं च। नृणामु त्वेति माध्यंदिनः। आ° ९.५.। इति ॥ महाव्रतेऽपि निष्केवल्येऽयं तृचः ॥ दशरात्रे चतुर्थेऽहनि मरुत्वतीय इंद्र मरुत्व इति तिस्रः। षष्ठेऽहनि षष्ठस्येति खंडे सूचितं। इंद्र मरुत्व इति तिस्र इति मरुत्वतीयं। आ° ८.१.। इति ॥ बृहस्पतिसवेऽपि मरुत्वतीयशस्त्रेऽयं तृचो निविद्धानीयः। सूचितं च। इंद्र मरुत्व इह नृणामु त्वेति माध्यंदिनः। आ° ९.५.। इति ॥ आद्या मरुत्वतीयग्रहस्यानुवाक्या। सूचितं च। मरुत्वतीयेन ग्रहेण चरंतींद्र मरुत्व इह पाहि सोमं। आ° ५.१४.। इति ॥ तृतीये पर्याये होतुः शस्त्र इदं ह्यन्वोजसेति स्तोत्रियस्तृचः। सूचितं च। इदं ह्यन्वोजसा महाँ इंद्रो य ओजसा। आ° ६.४.। इति ॥

॥ तत्र प्रथमा ॥

चर्षणीधृतं मघवानमुक्थ्य१मिंद्रं गिरो बृहतीरभ्यनूषत।
वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥१॥
चर्षणिऽधृतं। मघऽवानं। उक्थ्यं। इंद्रं। गिरः। बृहतीः। अभि। अनूषत।
ववृधानं। पुरुऽहूतं। सुवृक्तिऽभिः। अमर्त्यं। जरमाणं। दिवेऽदिवे ॥१॥

बृहतीः प्रभूता गिरोऽस्मदीयाः स्तुतिलक्षणा वाचश्चर्षणीधृतं चर्षणीनां मनुष्याणामभिमतफलप्रदानेन धारकं पोषकं। यद्वा आकृषंत्यनेन सर्वमिति चर्षणि बलं तद्धारकं। मघवानं धनवंतमुक्थ्यमुक्थैः शस्त्रैः शंसनीयं वावृधानं बलधनादिसंपत्त्या प्रतिक्षणं वर्धमानं पुरुहूतं स्तोतृभिर्बहुवारमाहूतममर्त्यं मरणधर्मरहितं सुवृक्तिभिः शोभनस्तुतिवाक्यैर्दिवे दिवे प्रत्यहं जरमाणं स्तूयमानं तमिममिंद्रमभ्यनूषत। अभितः सर्वतः स्तुवंतु ॥ बृहतीः। वा छंदसीति सवर्णदीर्घः। अनूषत। णु स्तवने। अस्माल्लुङि सिच्। धातोः कुटादित्वात्सिचो ङित्त्वेन गुणाभावः। सुवृक्तिभिः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। यद्वा सुवृक्तय इति स्तुतिकरणभूता ऋचो वृक्तिशब्देनोच्यंते। क्तिच्क्तौ चेति क्तिच्। कृत्स्वरेणांतोदात्तः। दिवे दिवे। नित्यवीप्सयोरिति द्विर्वचनं। परस्याम्रेडितत्वादनुदात्तत्वे पूर्वपदस्वरः ॥

॥ अथ द्वितीया ॥

शतक्रतुमर्णवं शाकिनं नरं गिरो म इंद्रमुप यंति विश्वतः ।

वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभिषाचं स्वर्विदं ॥ २ ॥

शतऽक्रतुं । अर्णवं । शाकिनं । नरं । गिरः । मे । इंद्रं । उप । यंति । विश्वतः ।

वाजऽसनिं । पूःऽभिदं । तूर्णिं । अप्ऽतुरं । धामऽसाचं । अभिऽसाचं । स्वःऽविदं ॥ २ ॥

मे मदीया गिरः स्तुतिलक्षणा वाचः शतक्रतुं । शतं क्रतवो यज्ञा यस्य तं । अर्णवं पर्जन्यात्मनोदकवंतं शाकिनं । शक्नोत्येभिरिंद्र इति शाकाः सहायभूता मरुतः । तद्वंतं । नरं सर्वस्य जगतो नेतारं वाजसनिं वाजस्यान्नस्य दातारं पूर्भिदं शत्रुपुरां भेत्तारं तूर्णिं युद्धं प्रति शीघ्रं गंतारमप्तुरं मेघभेदनद्वारापां प्रेरकं धामसाचं तेजो भजमानं । यद्वा धनं धाम । तदर्थिभिः सह योजयितारं । अभिषाचं शत्रूणामभिभवितारं स्वर्विदं स्वर्गस्य लंभकं तमिममिंद्रं विश्वतः सर्वत उपयंति । उपगच्छंतु ॥ अर्णवं । अर्णोऽस्यास्तीति मत्वर्थेऽर्णसः सलोपश्चेति वप्रत्ययः सकारलोपश्च । प्रत्ययस्वरः । नरं । नयतेर्डिच्चेत्यृप्रत्ययः । अमः सुप्त्वादनुदात्तत्वे प्रत्ययस्वरः । यंति । इण् गतावित्यस्य लटीणो यणिति यण् । निघातः । वाजसनिं । षणु दाने । खनिकष्यज्यसिवसीत्यादिना इप्रत्ययः । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । तूर्णिं । ञित्वरा संभ्रमे । वहिश्रीत्यादिना निप्रत्ययः । ज्वरत्वरेत्यादिना ऊट् । निदित्यतिदेशादाद्युदात्तः । अप्तुरं । तुर त्वरणे । क्विप् । कृदुत्तरपदस्वरः । अभिषाचं । षच समवाये । ण्यंतस्य क्विप् ॥

॥ अथ तृतीया ॥

आकरे वसोर्जरिता पनस्यतेऽनेहसः स्तुभ इंद्रो दुवस्यति ।

विवस्वतः सदन आ हि पिप्रिये सत्रासाहमभिमातिहनं स्तुहि ॥ ३ ॥

आऽकरे । वसोः । जरिता । पनस्यते । अनेहसः । स्तुभः । इंद्रः । दुवस्यति ।

विवस्वतः । सदने । आ । हि । पिप्रिये । सत्राऽसहं । अभिमातिऽहनं । स्तुहि ॥ ३ ॥

जरिता शत्रूणां जरयितेंद्र आकरे । आकीर्यंते युद्धार्थं धनमत्रेत्याकरो युद्धं । तस्मिन्वसोर्धनस्य स्थानभूते युद्धे पनस्यते । सर्वैः स्तूयते । यद्वा वसोः । वसत्याभिमुख्येन तिष्ठतीति वसुः शत्रुस्तस्य जरयितेति योजनीयं । स इंद्रोऽनेह-

सोऽपापाः स्तुभः स्तुतीर्दुवस्यति । परिचरति । तासां फलं प्रयच्छन् पूजयतीत्यर्थः । किंच स इंद्रो विवस्वतो विशेषेणाग्निहोत्रार्थं वसतो हविष्मतो वा यजमानस्य सदने गृह आ पिप्रिये हि । सोमपानादिनात्यंतं प्रीतो भवति खलु । सत्रासाहं शत्रूणामेव हंतारं यद्वा मरुद्भिः सह शत्रूणामभिभवितारं अत एवाभिमातिहनं शत्रूणां हंतारमिंद्रं स्तुहि । हे विश्वामित्रेति ॥ आकरे । कॄ विक्षेपे । अधिकरण ऋदोरबित्यप् । थाथादिस्वरेणांतोदात्तः । जरिता । जॄष् वयोहानावित्यस्यांतर्भावितण्यर्थस्य तृचि रूपं । चित्त्वादंतोदात्तः । पनस्यते । पनस्यतिः स्तुतिकर्मा । तस्य कर्मणि लटि रूपं । निघातः । अनेहसः । हंतेर्नञ्युपपदे नञि हन एह चेत्यसिप्रत्यय एह इत्ययं चादेशो धातोः । नञ्सुभ्यामिति स्वरेणांतोदात्तः । स्तुभः । स्तोभतिरर्चतिकर्मा । क्विप् । दुवस्यति । दुवः परिचरणमात्मन इच्छतीत्यर्थे क्यच् । निघातः । पिप्रिये । प्रीङ् तर्पणे । लिटि रूपं । हियोगादनिघातः ॥

॥ अथ चतुर्थी ॥

नृणामु त्वा नृतमं गीर्भिरुक्थैरभि प्र वीरमर्चता सबाधः ।
सं सहसे पुरुमायो जिहीते नमो अस्य प्रदिव एक ईशे ॥ ४ ॥

नृणां । ऊं इति । त्वा । नृऽतमं । गीःऽभिः । उक्थैः । अभि । प्र । वीरं । अर्चत । सऽबाधः ।
सं । सहसे । पुरुऽमायः । जिहीते । नमः । अस्य । प्रऽदिवः । एकः । ईशे ॥ ४ ॥

हे इंद्र सबाधः । रक्षोघ्नमंत्रोच्चारणेन तद्विषयबाधया सह वर्तंत इति सबाध ऋत्विजः । नृणां नृतमं मनुष्याणामतिशयेन स्वकर्मणि नेतारं वीरं सामर्थ्योपेतं त्वां गीर्भिः स्तुतिसाधनभूतैर्वाक्यैरुक्थैः शस्त्रैश्चाभ्यांभिमुख्येन प्रार्चत । प्रकर्षेणार्चंति । पुरुमायो वृत्रहननादिबहुकर्मा स इंद्रो सहसे बलाय संजिहीते । गमनोद्यमं करोति । किंच प्रदिवः पुरातन एकोऽसहायः स इंद्रो नमो नमसोऽस्य हविर्लक्षणस्यान्नस्येशे । ईष्टे । यद्वा अस्य सर्वस्य जगत ईष्टे । तस्मादिंद्राय नमः ॥ नृणां । नामन्यतरस्यामिति विभक्तेरुदात्तत्वं । अर्चत । अर्चतेर्लटि झेस्तादेशः तिङां तिङो भवंतीति वचनात् । सबाधः । बाधृ विलोडने । क्विप् । वोपसर्जनस्येति सहस्य सत्वं । कृदुत्तरपदस्वरः । पुरुमायः । अंतोदात्तप्रकरणे त्रिचक्रादीनामुपसंख्यानमित्यंतोदात्तत्वं । ईशे । ईश ऐश्वर्ये इत्यस्य लटि लोपस्त आत्मनेपदेष्विति तलोपः । निघातः ॥

॥ अथ पंचमी ॥

पूर्वीरस्य निष्षिधो मर्त्येषु पुरू वसूनि पृथिवी बिभर्ति ।
इंद्राय द्याव ओषधीरुतापो रयिं रक्षंति जीरयो वनानि ॥५॥
पूर्वीः । अस्य । निःऽसिधः । मर्त्येषु । पुरु । वसूनि । पृथिवी । बिभर्ति ।
इंद्राय । द्यावः । ओषधीः । उत । आपः । रयिं । रक्षंति । जीरयः । वनानि ॥५॥

मर्त्येषु मनुष्येष्वस्येंद्रस्य निःषिधोऽनुशासनानि पूर्वीर्हितोपदेशादिभिः प्रभूतानि नानाप्रकाराणि भवंति । इंद्रस्य शासितृत्वे मंत्रः । उक्थमिंद्राय शंस्यं वर्धनं पुरुनिष्षिधे । ऋग्वे॰ १.१०.५. । इति । तथा शासकाय तस्मा इंद्राय पृथिवी पुरु पुरूणि बहूनि वसूनि धनानि बिभर्ति । अंतर्धारयति । किंच द्यावो द्युलोका ओषधीरोषधय उत अपि चापो जलानि जीरयः । जीर्यंत इति जीरयो मनुष्याः । वनानि वृक्षाश्च एते सर्वे इंद्रस्याज्ञया तदुपभोगयोग्यं रयिं धनं रक्षंति ॥ निष्षिधः । षिधु गत्यां । संहितायां निसः सकारेणेणो व्यवधानं छांदसत्वादनाहत्योपसर्गात्सुनोतीत्यादिना षत्वं । निसः सकारस्य ष्टुना ष्टुरिति षत्वं ॥

॥ इति तृतीयस्य तृतीये पंचदशो वर्गः ॥

॥ अथ षष्ठी ॥

तुभ्यं ब्रह्माणि गिर इंद्र तुभ्यं सत्रा दधिरे हरिवो जुषस्व ।
बोध्या३पिरवसो नूतनस्य सखे वसो जरितृभ्यो वयो धाः ॥६॥
तुभ्यं । ब्रह्माणि । गिरः । इंद्र । तुभ्यं । सत्रा । दधिरे । हरिऽवः । जुषस्व ।
बोधि । आपिः । अवसः । नूतनस्य । सखे । वसो इति । जरितृऽभ्यः । वयः । धाः ॥६॥

हे हरिवोऽश्ववन्निंद्र तुभ्यं त्वदर्थं ब्रह्माणि स्तोत्राणि तथा तुभ्यं गिरः शस्त्राणि च सत्रा सत्यमेव दधिरे । ऋत्विजो धारयंति । तानि जुषस्व । सेवस्व । हे वसो सर्वस्य वासयितः सखे सखिभूत हे इंद्र आपिर्व्याप्तस्त्वं नूतनस्य नवतरमवसोऽन्नलक्षणं हविर्बोधि । त्वदर्थं दीयमानं जानीहि । अतस्त्वं जरितृभ्यः स्तोतृभ्योऽस्मभ्यं वयोऽन्नं धाः । देहि ॥ तुभ्यं । ङयि चेत्याद्युदात्तत्वं । जुषस्व । जुषी प्रीतिसेवनयोरित्यस्य लोटि रूपं । वाक्यभेदादनिघातः । बोधि । बुध अवगमन इत्यस्य लोटि वा छंदसीति हेर्विकल्पेन ङित्त्वादच पित्त्वाद्गुणः । हुझल्भ्यो हेर्धिरिति ध्यादेशः । ङित्त्वादंतोदात्तः ॥

॥ अथ सप्तमी ॥

इंद्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्मन्ना विवासंति कवयः सुयज्ञाः ॥ ७ ॥
इंद्र । मरुत्वः । इह । पाहि । सोमं । यथा । शार्याते । अपिबः । सुतस्य ।
तव । प्रऽनीती । तव । शूर । शर्मन् । आ । विवासंति । कवयः । सुऽयज्ञाः ॥ ७ ॥

हे मरुत्वो मरुद्भिस्तद्वन् हे इंद्र त्वमिहास्मदीये यज्ञ आगत्य सोमं पाहि । पिब । यथा त्वं पूर्वं शार्याते शर्यातेः पुत्रे तस्मिन्राजनि यज्ञं कुर्वाणे सुतस्याभिषुतं सोममपिबः तथात्रापि पिबेत्यर्थः । इंद्रः शार्यातस्य यज्ञे सोमरसानपिबदित्येषोऽर्थः कौषीतके स्पष्टमुक्तः । तथा मंत्रवर्णश्च । आ स्मा रथं वृषपाणेषु तिष्ठसि शार्यातस्य प्रभृता येषु मंदसे । ऋग्वे॰ १.५१.१२. । इति । हे शूरेंद्र तव संबंधिनि शर्मन् शर्मणि निर्बाधस्थाने स्थिताः सुयज्ञाः सुष्ठुकृतयज्ञाः कवयो मेधाविनो यजमानाः प्रणीती तव हविषां प्रणयनेन प्रापणेन आ समंताद्विवासंति । त्वामेव परिचरंति । विवासतिः परिचरणकर्मा ॥ शार्याते । शर्यातेरयमित्यर्थे तस्येदमित्यण्प्रत्ययः । अपिबः । यथायोगादनिघातः । अडागमस्वरः । प्रणीती । नयतेर्भावे क्तिन् । तादौ च निति कृतीति गतेः प्रकृतिस्वरत्वं । सुपां सुलुगिति तृतीयायाः सवर्णदीर्घः । उपसर्गादसमासेऽपि णत्वं ॥

॥ अथाष्टमी ॥

स वावशान इह पाहि सोमं मरुद्भिरिंद्र सखिभिः सुतं नः ।
जातं यत्त्वा परि देवा अभूषन्महे भराय पुरुहूत विश्वे ॥ ८ ॥
सः । वावशानः । इह । पाहि । सोमं । मरुत्ऽभिः । इंद्र । सखिऽभिः । सुतं । नः ।
जातं । यत् । त्वा । परि । देवाः । अभूषन् । महे । भराय । पुरुऽहूत । विश्वे ॥ ८ ॥

हे इंद्र वावशानः सोमं कामयमानः स तादृशस्त्वं सखिभिः समानख्यानैर्मरुद्भिः सह नोऽस्मत्संबंधिनीहास्मिन्यज्ञे सुतमभिषुतं सोमं पाहि । पिब । हे पुरुहूत पुरुभिराहूतेंद्र जातं पानेन प्रबलं संपन्नं यत् यं त्वां विश्वे सर्वे देवा महे महते भराय । ह्रियंते योधानामायूंषत्रेति भरः संग्रामः । तस्मै संग्रामाय पर्यभूषन् । सर्वतोऽलमकुर्वन् ॥ वावशानः । वशेर्यङ्लुकि चानशि रूपं । चित्त्वादंतोदात्तः ।

अभूषन्। भूष अलंकारे। भूवादिः। लङि रूपं। यद्योगादनिघातः। भराय। हृञ् हरणे। अधिकरणे घः। हृग्रहोर्भश्छंदसीति हकारस्य भकारः। वृषादित्वादाद्युदात्तः॥

॥ अथ नवमी ॥

अप्तूर्ये मरुत आपिरेषोऽमंदन्निंद्रमनु दातिवाराः।
तेभिः साकं पिबतु वृत्रखादः सुतं सोमं दाशुषः स्वे सधस्थे॥९॥
अप्ऽतूर्ये। मरुतः। आपिः। एषः। अमंदन्। इंद्रं। अनु। दातिऽवाराः।
तेभिः। साकं। पिबतु। वृत्रऽखादः। सुतं। सोमं। दाशुषः। स्वे। सधऽस्थे॥९॥

हे मरुतो य एष इंद्रोऽप्तूर्येऽपां प्रेरण आपिर्युष्माकं सखा सन् वर्तते दातिवाराः। वारो वरणीयं बलं धनं वा। दत्तबला दत्तधना वा ते मरुतस्तमिंद्रमन्वमंदन्। अहृष्यन्। वृत्रखादो वृत्रस्य हिंसकः स इंद्रस्तेभिस्तैर्मरुद्भिः साकं दाशुषो हविर्दत्तवतो यजमानस्य स्वे स्वकीये सधस्थे। सह तिष्ठंत्यस्मिन्निति सधस्थं गृहं। तस्मिन् सुतमभिषुतं सोमं पिबतु॥ अप्तूर्ये। तूरी त्वराहिंसयोरित्यस्मादघ्न्यादयश्चेति यत्प्रत्ययः। यतोऽनाव इत्याद्युदात्तः। समासे कृदुत्तरपदस्वरः। अमंदन्। मदि स्तुत्यादिषु। परस्मैपदी। पादादित्वादनिघातः। वृत्रखादः। खादृ भक्षणे। कर्मण्यण्। दाशुषः। दाशृ दान इत्यस्य क्वसौ दाश्वान्साह्वान्मीढ्वांश्चेति द्विर्वचनाद्यभावः। वसोः संप्रसारणं। प्रत्ययस्वरः। सधस्थे। सध मादस्थयोश्छंदसीति सहस्य सधादेशः॥

॥ अथ दशमी ॥

इदं ह्यन्वोजसा सुतं राधानां पते। पिबा त्व१स्य गिर्वणः॥१०॥
इदं। हि। अनु। ओजसा। सुतं। राधानां। पते। पिब। तु। अस्य। गिर्वणः॥१०॥

हे राधानां पते धनानां स्वामिन् गिर्वणो गीर्भिः स्तुतिभिर्वननीय हे इंद्र इदमनु अनेनानुक्रमेण। उद्देशानुक्रमेणेत्यर्थः। ओजसा बलेन ग्रावभिः सुतमभिषुतं सोमं तु क्षिप्रं पिब हि॥

॥ अथैकादशी ॥

यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वं। स त्वा ममत्तु सोम्यं॥११॥
यः। ते। अनु। स्वधां। असत्। सुते। नि। यच्छ। तन्वं। सः। त्वा। ममत्तु। सोम्यं॥११॥

हे इंद्र त्वदर्थं यः सोमः स्वधामन्नमनु अनुसृत्य ग्रावभिरभिषुतोऽसत् सुते तस्मिन् सोमे तन्वं स्वकीयं शरीरं नियच्छ। प्रेरय। स सोमः सोम्यं सोमार्हं त्वा त्वां ममत्तु। मादयतु॥ असत्। अस्तेर्लेट्यडागमे रूपं। यद्वृत्तयोगादनिघातः। आगमस्यानुदात्तत्वे धातुस्वरः॥

॥ अथ द्वादशी ॥

प्र ते॑ अश्नोतु कु॒क्ष्योः॒ प्रेंद्र॒ ब्रह्म॑णा॒ शिरः॑। प्र बा॒हू शू॑र॒ राध॑से॥१२॥

प्र। ते॒। अ॒श्नो॒तु॒। कु॒क्ष्योः॑। प्र। इं॒द्र॒। ब्रह्म॑णा। शिरः॑। प्र। बा॒हू इति॑। शू॒र॒। राध॑से॥१२॥

हे इंद्र स सोमस्ते तव कुक्ष्योः कुक्षेरुभयोः पार्श्वयोः प्राश्नोतु। प्रकर्षेण व्याप्नोतु। तथा ब्रह्मणा स्तोत्रेण सहितः स सोमः शिरः शरीरं। अवयवादिनावयवी लक्ष्यते। त्वच्छरीरं प्राश्नोतु। हे शूर इंद्र राधसे धनाय तव बाहू अपि प्राश्नोतु॥ अश्नोतु। अशू व्याप्तावित्यस्य लोटि व्यत्ययेन परस्मैपदं। निघातः। कुक्ष्योः। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं॥

॥ इति तृतीयस्य तृतीये षोडशो वर्गः ॥

धानावंतमित्यष्टर्चं चतुर्दशं सूक्तं वैश्वामित्रमैंद्रं। अत्रेयमनुक्रमणिका। धानावंतमष्टौ पूर्वार्द्धं गायत्रं षष्ठी जगतीति। आदितश्चतस्रो गायत्र्यस्तृतीये धाना इति षष्ठी जगती शिष्टास्त्रिष्टुभः॥ सूक्तविनियोगो लिंगादवगंतव्यः। प्रातःसवनीयपुरोडाशस्यानुवाक्या धानावंतमित्याद्या। धानावंतं करंभिणमिति प्रातःसवनेऽनुवाक्या। आ॰ ५.४.। इति॥

॥ तत्र प्रथमा ॥

धा॒नाव॑तं क॒रं॒भिण॑मपू॒पवं॑तमु॒क्थिन॑म्। इंद्र॑ प्रा॒तर्जु॑षस्व नः॥१॥

धा॒नाऽवं॑तं। क॒रं॒भिण॑ं। अ॒पू॒पऽवं॑तं। उ॒क्थिन॑ं। इंद्र॑। प्रा॒तः। जु॒ष॒स्व॒। नः॒॥१॥

हे इंद्र धानावंतं। धाना भृष्टयवाः। तद्वंतं करंभिणं। करंभो दधिमिश्राः सक्तवः। तद्वंतमपूपवंतं सवनीयपुरोडाशोपेतमुक्थिनं शस्त्रिणं नोऽस्मदीयमिमं सोमं प्रातः प्रातःसवने जुषस्व। सेवस्व॥ प्रातः। स्वरादिष्वंतोदात्तत्वेन पठितत्वादंतोदात्तः॥

॥ अथ द्वितीया ॥

पु॒रो॒ळाशं॑ पच॒त्यं॑ जु॒षस्वें॒द्रा गु॑रस्व च। तुभ्यं॑ ह॒व्यानि॑ सिस्रते॥२॥

पु॒रो॒ळाशं॑। प॒च॒त्यं॑। जु॒षस्व॑। इं॒द्र॒। आ। गु॒र॒स्व॒। च॒। तुभ्यं॑। ह॒व्यानि॑। सि॒स्र॒ते॒॥२॥

हे इंद्र पचत्यं पचने साधुं पुरोडाशं। पुरो दाशंत एनमिति पुरोडाशो हविः। जुषस्व। किंच आगुरस्व। पुरोडाशभक्षणार्थमुद्यमं कुरु। हव्यानि हवनयोग्यानि पुरोडाशादीनि हवींषि तुभ्यं त्वदर्थं सिस्रते। आहवनीयं गच्छंति। तानि सेवस्वेति भावः॥ पचत्यं। पचतशब्दात्तत्र साधुरिति यत्प्रत्ययांतस्य पदस्य द्व्यच्त्वाभावादत्र यतोऽनाव इत्यस्य प्राप्तिर्नास्ति। तित्स्वरितः। गुरस्व। गुरी उद्यमने। शविकरणी। निघातः। सिस्रते। सृ गतौ। छंदसि जुहोत्यादिः। व्यत्ययेनात्मनेपदं॥

॥ अथ तृतीया॥

पुरोळाशं च नो घसो जोषयासे गिरश्च नः। वधूयुरिव योषणां॥३॥

पुरोळाशं। च। नः। घसः। जोषयासे। गिरः। च। नः। वधूयुःऽइव। योषणां॥३॥

हे इंद्र नोऽस्मत्संबंधिनं पुरोडाशं घसः। भक्षय च। नोऽस्मदीयाः स्तुतिलक्षणा गिरो जोषयासे। सेवस्व च। तत्र दृष्टांतः। वधूयुरिव योषणां। यथा वधूयुः स्त्रीकामो योषणां भजनीयां युवतिं सेवते तद्वत्॥ घसः। घस्लृ अदन इत्यस्य लेट्यडागमे रूपं। चवायोगे प्रथमेति न निघातः। जोषयासे। जुषी प्रीतिसेवनयोरित्यस्य ण्यंतस्य लेट्याडागमे रूपं। आगमस्यानुदात्तत्वे णिच्स्वरः। पादादित्वादनिघातः। वधूयुरिव। सुप आत्मनः क्यच्। क्याच्छंदसीत्युप्रत्ययः। प्रत्ययस्वरः। योषणां। युष भजन इति सौत्रो धातुः। कृत्यल्युटो बहुलमिति ल्युट्। लित्स्वरः॥

॥ अथ चतुर्थी॥

पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः। इंद्र क्रतुर्हि ते बृहन्॥४॥

पुरोळाशं। सनऽश्रुत। प्रातःऽसावे। जुषस्व। नः। इंद्र। क्रतुः। हि। ते। बृहन्॥४॥

हे सनश्रुत पुराणतया प्रसिद्ध हे इंद्र नोऽस्मत्संबंधिनमिमं पुरोडाशं प्रातःसावे। सूयतेऽत्र सोम इति सावः। तस्मिन् प्रातःसवने जुषस्व। यतस्ते तव क्रतुः कर्म बृहन् महद्धि॥ प्रातःसावे। षुञ् अभिषवे। कर्मणि घञ्। प्रादिसमासः। थाथादिस्वरेणांतोदात्तः॥

माध्यंदिनसवने सवनीयपुरोडाशे माध्यंदिनस्य सवनस्य धाना इत्यनुवाक्या। सूचितं च। माध्यंदिनस्य सवनस्य धाना इति माध्यंदिने। आ॰ ५.४। इति॥

॥ सैषा सूक्ते पंचमी ॥

माध्यंदिनस्य सवनस्य धानाः पुरोळाशमिंद्र कृष्वेह चारुं ।
प्र यत्स्तोता जरिता तूर्ण्यर्थो वृषायमाण उप गीर्भिरीट्टे ॥५॥
माध्यंदिनस्य । सवनस्य । धानाः । पुरोळाशं । इंद्र । कृष्व । इह । चारुं ।
प्र । यत् । स्तोता । जरिता । तूर्णिऽअर्थः । वृषऽयमाणः । उप । गीःऽभिः । ईट्टे ॥५॥

हे इंद्र माध्यंदिनस्य मध्यंदिने भवस्य सवनस्य संबंधिनीर्धाना भृष्टयवान् चारुं कमनीयं पुरोडाशं चेह कर्मण्यागत्य कृष्व । भक्षणेन संस्कुरु । यद्यदा जरिता भवत्परिचरणं कुर्वाणस्तूर्ण्यर्थस्त्वां स्तोतुमितस्ततस्त्वरितगमनः अत एव वृषायमाणो वृषेवाचरन् स्तोता गीर्भिः स्तुतिलक्षणाभिर्वाग्भिरुप समीपे प्रेट्टे प्रकर्षेण स्तौति । तदा पुरोडाशादिहवींषि भक्षयेति भावः ॥ माध्यंदिनस्य । मध्यंदिनशब्दात्तत्र भवार्थ उत्सादित्वादञ् । ञित्त्वादाद्युदात्तः । चारुं । चर गतिभक्षणयोः । दृसनिजनिचरिचटिरहिभ्यो ञुणिति ञुण् । णित्त्वादुपधावृद्धिः । ञित्त्वादाद्युदात्तः । तूर्ण्यर्थः । तूर्णिः । ञित्वरा संभ्रम इत्यस्माद्वहिश्रीत्यादिना निप्रत्ययो निच्च । अर्थः । ऋ गतौ । उषिकुषिगार्तिभ्यस्थन्निति थन् । बहुव्रीहौ पूर्वपदस्वरः । वृषायमाणः । वृषेवाचरतीत्यर्थे कर्तुः क्यङ् सलोपश्चेति क्यङ् । अकृत्सार्वधातुकयोर्दीर्घः । ङित्त्वादनुदात्तङित इत्यात्मनेपदं । लट् । शानच् । तस्य लसार्वधातुकस्वरे धातुस्वरः । ईट्टे । ईड स्तुतावित्यस्य लटि रूपं । यद्योगादनिघातः ॥

॥ इति तृतीयस्य तृतीये सप्तदशो वर्गः ॥

तृतीयसवने सवनीयपुरोडाशस्य तृतीये धाना इत्यनुवाक्या । सूचितं च । तृतीये धानाः सवने पुरुष्टुतेति तृतीयसवने । आ॰ ५.४. । इति ॥

॥ सैषा सूक्ते षष्ठी ॥

तृतीये धानाः सवने पुरुष्टुत पुरोळाशमाहुतं मामहस्व नः ।
ऋभुमंतं वाजवंतं त्वा कवे प्रयस्वंत उप शिक्षेम धीतिभिः ॥६॥
तृतीये । धानाः । सवने । पुरुऽस्तुत । पुरोळाशं । आऽहुतं । ममहस्व । नः ।
ऋभुऽमंतं । वाजऽवंतं । त्वा । कवे । प्रयस्वंतः । उप । शिक्षेम । धीतिऽभिः ॥६॥

हे पुरुष्टुत पुरुभिर्बहुभिः स्तोतृभिः स्तुत हे इंद्र तृतीये सवने नोऽस्मदी-

यान्धाना हुतान् भृष्टयवानाहुतं पुरोडाशं च मामहस्व। भक्षणेन महय। हे कवे इंद्र प्रयस्वंतः संभृतहविष्का वयमृभुमंतं। ऋभवो ये केचन देवास्तद्वंतं। वाजवंतं। वाजो नाम सुधन्वनः पुत्रस्तद्वंतं त्वां धीतिभिः स्तुतिभिरुप शिक्षेम। समीपे परिचरेम ॥ आहुतं। जहोतेः कर्मणि क्तः। गतिरनंतर इति गतेः स्वरः। मामहस्व। मह पूजायामित्यस्य यङ्लुगंतस्य लोटि व्यत्ययेनात्मनेपदं। शपो लुगभावश्छांदसः। शिक्षेम। शिक्षतेराशीर्लिङि लिङ्याशिष्यङित्यङ्प्रत्ययः। निघातः। धीतिभिः। हिष्ठवत्सरतिशत्थांतानामित्यंतोदात्तत्वं ॥

॥ अथ सप्तमी ॥

पूषण्वते ते चकृमा करंभं हरिवते हर्यश्वाय धानाः।
अपूपमद्धि सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ॥७॥
पूषण्ऽवते। ते। चकृम। करंभं। हरिऽवते। हरिऽअश्वाय। धानाः।
अपूपं। अद्धि। सऽगणः। मरुत्ऽभिः। सोमं। पिब। वृत्रऽहा। शूर। विद्वान् ॥७॥

हे इंद्र पूषण्वते। पूषा नाम कश्चिद्देवोऽदंतकः। तद्वते ते तुभ्यं करंभं दधिमिश्रं सक्तुं चकृम। भक्षणार्थं कुर्मः। तथा च श्रुतिः। पूषा प्रपिष्टभागोऽदंतको हीति। हरिवते। हरिनामकावश्वौ। तद्वते हर्यश्वाय हरितवर्णाश्वयुक्तायेंद्राय तुभ्यं धाना भक्षणार्थं कुर्मः। तथा च मंत्रवर्णः। ग्रसेतामश्वा वि मुचेह शोणा दिवेदिवे सदृशीरद्धि धानाः। ऋग्वे॰ ३. ३५. ३.। इति। मरुद्भिः सगणस्त्वमपूपं पुरोडाशमद्धि। भक्षय। हे शूर असहाय हे इंद्र वृत्रहा वृत्रस्य हंता विद्वान् सर्वं जानानस्त्वं सोमं पिब ॥ पूषण्वते। पूषशब्दस्य मतुप्। अनो नुडिति नुडागमः। रषाभ्यामिति णत्वं। चकृम। करोतेश्छांदसे वर्तमाने लिटि ऋादित्वादिडभावः। निघातः। हरिवते। छंदसीर इति मतुपो वत्वं ॥

॥ अथाष्टमी ॥

प्रति धाना भरत तूयमस्मै पुरोळाशं वीरतमाय नृणां।
दिवेदिवे सदृशीरिंद्र तुभ्यं वर्धंतु त्वा सोमपेयाय धृष्णो ॥८॥
प्रति। धानाः। भरत। तूयं। अस्मै। पुरोळाशं। वीरऽतमाय। नृणां।
दिवेऽदिवे। सऽदृशीः। इंद्र। तुभ्यं। वर्धंतु। त्वा। सोमऽपेयाय। धृष्णो इति ॥८॥

यजमानोऽध्वर्य्वादीन्प्रति ब्रूते। हे अध्वर्य्वादयः अस्मा इंद्राय धानास्तूयं क्षिप्रं प्रतिभरत। संपादयत। नृणां वीरतमायास्मा इंद्राय पुरोडाशं च संपादयत। अथ प्रत्यक्षकृतः। ह धृष्णो शत्रूणामभिभवनशील हे इंद्र सदृशीरेकविधाः स्तुतयस्तुभ्यं त्वदर्थं दिवे दिवे प्रतिदिवसमस्माभिः क्रियंते। ताः स्तुतयः सोमपेयाय सोमपानार्थं त्वां वर्धंतु। उत्साहेन प्रवृद्धं कुर्वंतु ॥ सदृशीः। समानान्ययोश्चेति कञ्प्रत्ययः। टिड्ढाणञित्यादिना ङीप्। दृग्दृशवतुष्विति समानस्य सभावः ॥

॥ इति तृतीयस्य तृतीयेऽष्टादशो वर्गः ॥

इंद्रापर्वतेति चतुर्विंशत्यृचं पंचदशं सूक्तं। अत्रेयमनुक्रमणिका। इंद्रापर्वता चतुर्विंशतिराद्यैंद्रापार्वती पंचदश्यादिद्वे वाचे ससर्पर्यै चतस्रो रथांगस्तुतयोऽंत्या अभिशापार्थास्ता वसिष्ठद्वेषिण्यो न वसिष्ठाः शृण्वंति। दशमीषोडश्यौ जगत्यौ त्रयोदशी गायत्री द्वादशीविंशीद्वाविंश्योऽनुष्टुभोऽष्टादशी बृहतीति। विश्वामित्र ऋषिः। दशमी षोडशी च द्वे जगत्यौ त्रयोदशी गायत्री द्वादशीविंशीद्वाविंश्यस्तिस्रोऽनुष्टुभोऽष्टादशी बृहती शिष्टास्त्रिष्टुभः। आद्यैंद्रापर्वतदेवताका पंचदशीषोडश्यौ वाग्देवत्ये तदुत्तराश्चतस्रो रथांगदेवताकाः शिष्टा ऐंद्र्यः ॥

॥ तत्र प्रथमा ॥

इंद्रा॑पर्वता बृह॒ता रथे॑न वा॒मीरिष॒ आ व॑हतं सु॒वीराः॑।
वी॒तं ह॒व्यान्य॑ध्व॒रेषु॑ दे॒वा॒ वर्धे॑थां गी॒र्भिरिळ॑या॒ मद॑न्ता ॥ १ ॥

इंद्रा॑पर्वता। बृ॒ह॒ता। रथे॑न। वा॒मीः। इषः॑। आ। व॒ह॒त॒म्। सु॒ऽवीराः॑।
वी॒तम्। ह॒व्यानि॑। अ॒ध्व॒रेषु॑। दे॒वा॒। वर्धे॑थाम्। गी॒ःऽभिः। इळ॑या। मद॑न्ता ॥ १ ॥

इंद्रापर्वता इंद्रश्च पर्वतश्च। हे इंद्रापर्वतौ बृहता रथेनागत्य वामीर्वननीयाः सुवीराः शोभनपुत्रोपेता इषोऽन्नान्यावहतं। अस्मदर्थं धारयतं। प्रयच्छतमित्यर्थः। किंच हे देवौ द्योतमानावध्वरेष्वस्मत्संबंधिषु यज्ञेषु हव्यानि हवनयोग्यानि पुरोडाशादीनि हवींषि वीतं। भक्षयतं। तथेळयास्माभिर्दत्तेन हविषा मदंता हृष्यंतौ युवां गीर्भिः स्तुतिलक्षणाभिरस्मदीयाभिर्वाग्भिर्वर्धेथां। समृद्धौ भवतं ॥ इंद्रापर्वता। आमंत्रितस्य पादादित्वात्षाष्ठिकमाद्युदात्तत्वं। सुवीराः। बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। वीतं। वी कांत्यादिष्वित्यस्य लोट्यदादित्वाच्छपो लुक्। प्रत्ययस्वरः। वर्धेथां। वृधु वृद्धावित्यस्य लोट्याथामो लसार्वधातुकस्वरे धातुस्वरः॥

अहर्गणेष्वंत्यवर्जितेष्वहःसु हारियोजनस्य तिष्ठा सु कमित्यनुवाक्या। सूचितं च। तिष्ठा सु कं मघवन्मा परा गा अयं यज्ञो देवया अयं मियेधः। आ॰ ६.११.। इति॥

॥ सैषा सूक्ते द्वितीया ॥

तिष्ठा सु कं मघवन्मा परा गाः सोमस्य नु त्वा सुषुतस्य यक्षि।
पितुर्न पुत्रः सिचमा रभे त इंद्र स्वादिष्ठया गिरा शचीवः ॥ २॥
तिष्ठ। सु। कं। मघऽवन्। मा। परा। गाः। सोमस्य। नु। त्वा। सुऽसुतस्य। यक्षि।
पितुः। न। पुत्रः। सिचं। आ। रभे। ते। इंद्र। स्वादिष्ठया। गिरा। शचीऽवः ॥२॥

हे मघवन्धनवन्निंद्र कं सुखेनास्मिन्यज्ञे सु तिष्ठ। सुष्ठु कंचित्कालमत्र तिष्ठ। मा परागाः। अस्मदीयाद्यज्ञान्मा गच्छ। तत्र कारणमाह। सुषुतस्य सुष्ठ्वभिषुतेन सोमस्य सोमेन नु क्षिप्रं त्वां यक्षि। यजे। हे शचीवः शक्तिमन्निंद्र ते तव सिचं वस्त्रप्रांतं स्वादिष्ठया स्वादुतरया स्तुतिलक्षणया गिरा आरभे। आलभे। गृह्णामीत्यर्थः। तत्र दृष्टांतः। पितुर्न। यथा पुत्रो मधुरया वाचा पितुर्जनकस्य चेलांचलं गृह्णाति तद्वत्॥ सु कमिति निपातद्वयं। प्रथमस्य निपाता आद्युदात्ता इत्याद्युदात्तत्वं। द्वितीयस्य चादयोऽनुदात्ता इत्यनुदात्तत्वं। सोमस्य यक्षि। यज देवपूजासंगतिकरणदानेषु। स्वरितञित इत्यात्मनेपदं। तस्य लुङि सिच्येकाच इतीट्प्रतिषेधः। व्रश्चादिना षत्वं। षढोः कः सीति कत्वं। सिचः सकारस्य षत्वं। निघातः। रभे। डुलभष् प्राप्तौ। लट्युत्तम इटि रूपं। रलयोरभेदः। निघातः। स्वादिष्ठया। स्वादुशब्दादिष्ठनि रूपं। नित्त्वादाद्युदात्तः॥

॥ अथ तृतीया ॥

शंसावाध्वर्यो प्रति मे गृणीहींद्राय वाहः कृणवाव जुष्टं।
एदं बर्हिर्यजमानस्य सीदाथा च भूदुक्थमिंद्राय शस्तं ॥३॥
शंसाव। अध्वर्यो इति। प्रति। मे। गृणीहि। इंद्राय। वाहः। कृणवाव। जुष्टं।
आ। इदं। बर्हिः। यजमानस्य। सीद। अथ। च। भूत्। उक्थं। इंद्राय। शस्तं ॥३॥

शंसिष्यन् होताध्वर्युं ब्रूते। हे अध्वर्यो आवां शंसाव। होतस्त्वमेव शंससि। कथमहं शसानि। अत आह। प्रति मे गृणीहीति। त्वं मे प्रतिगृणीहि। ओथामोदैवेत्यादिको होतुरुत्साहजननः प्रतिगरः। आ॰ ७.११.। तं दत्स्व। तथेंद्राय जुष्टं

प्रीतियुक्तं वाहः स्तोत्रं कृणवाव । त्वं यजमानस्येदं बर्हिरस्मिन्बर्हिष्यासीद । उपविश । अथ चानंतरमिंद्रायेंद्रार्थमावाभ्यां क्रियमाणमुक्थं शस्त्रं शस्तं प्रशस्तमभूत् । भवतु ॥ शंसाव । शन्सु स्तुतावित्यस्य लोट्युत्तमद्विवचने रूपं । आडुत्तमस्येत्याडागमः । उत्तमस्य पिद्वद्भावादनुदात्तत्वे धातुस्वरः । मे । अनुप्रतिगृणश्च । पा॰ १.४.४१. । इति संप्रदानसंज्ञा । जुष्टं । नित्यं मंत्र इत्याद्युदात्तत्वं ॥

॥ अथ चतुर्थी ॥

जायेदस्तं मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरयो वहंतु ।
यदा कदा च सुनवाम सोममग्निष्ट्वा दूतो धन्वात्यच्छ ॥ ४ ॥

जाया । इत् । अस्तं । मघऽवन् । सा । इत् । ऊं इति । योनिः । तत् । इत् । त्वा । युक्ताः । हरयः । वहंतु ।
यदा । कदा । च । सुनवाम । सोमं । अग्निः । त्वा । दूतः । धन्वाति । अच्छ ॥ ४ ॥

हे मघवन्धनवन्निंद्र अस्तं । अस्यंते क्षिप्यंते पदार्था अत्रेत्यस्तं गृहं । जयैज्जायैव गृहं भवति । न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यत इति स्मृतेः । तथा सेत् सा जायैव योनिः पुरुषस्य मिश्रणस्थानं । उ प्रसिद्ध्यर्थः । तस्मात्तदित् तत्र गृह एव युक्ता रथे योजिता हरयो त्वा त्वां वहंतु । वयं तु यदा कदा च त्वदर्थं सोमं सुनवाम अभिषुतं करवाम तदास्माभिः प्रहितो दूतोऽग्निस्त्वा त्वामच्छाभिमुख्येन धन्वाति । गच्छेत् ॥ अस्तं । असु क्षेपणे । असिहसिमृग्रिण्वामीत्यादिना तन्प्रत्ययः । नित्त्वादाद्युदात्तः । सुनवाम । षुञ् अभिषव इत्यस्य लोटि रूपं । यद्वृत्तयोगादनिघातः । त्वा । युष्मत्तत्ततक्षुःष्वंतःपादमिति संहितायां षत्वं । धन्वाति । धवि गत्यर्थः । लेट्याडागमे रूपं । निघातः ॥

अहर्गणेऽंत्यवर्जितेष्वहःसु हारियोजनस्य वैकल्पिकी परा याहीत्यनुवाक्या । परा याहि मघवन्ना च याहीति वानुवाक्येति सूचितं । आ॰ ६.११. ॥

॥ सैषा सूक्ते पंचमी ॥

परा याहि मघवन्ना च याहींद्र भ्रातरुभयत्रा ते अर्थं ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो रासभस्य ॥ ५ ॥

परा । याहि । मघऽवन् । आ । च । याहि । इंद्र । भ्रातः । उभयत्र । ते । अर्थं ।
यत्र । रथस्य । बृहतः । निऽधानं । विऽमोचनं । वाजिनः । रासभस्य ॥ ५ ॥

हे मघवन्धनवन्निंद्र त्वं परा याहि । अस्माद्देवयजनात्पराङ्मुखो गृहं प्रति गच्छ । अथवा देवयजनं प्रत्यायाहि । हे भ्रातः पोषकोभयत्रापि ते तवार्थं । अर्यते प्राप्यत इत्यर्थः प्रयोजनं । अस्ति तत्र जायात्र सोमः । प्रयोजनांतरमाह । यत्र गृहं प्रति गमने बृहतो महतो रथस्योपरि निधानमवस्थानं प्रयोजनं । अत्र स्थितौ रासभस्य हेषारवं कुर्वतो वाजिनोऽश्वस्य रथाद्विमोचनं प्रयोजनं ॥ अर्थं । ऋ गतौ । उषिकुषिगार्तिभ्यस्थन्निति थन् । नित्स्वरः । निधानं । दधातेर्भावे ल्युट् । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । रासभस्य । रासृ शब्दे । रासिवल्लिभ्यां च । उ॰ ३. १२४. । इति कर्तर्यभच्प्रत्ययः । ग्रामादित्वादाद्युदात्तः ॥

॥ इति तृतीयस्य तृतीय एकोनविंशो वर्गः ॥

अंत्येष्वहःसु हारियोजनस्यापाः सोममित्यनुवाक्या । सूचितं च । हारियोजनोऽपाः सोममस्तमिंद्र प्र याहि । आ॰ ६. ११. । इति ॥

॥ सैषा सूक्ते षष्ठी ॥

अपाः सोममस्तमिंद्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत् ॥ ६ ॥
अपाः । सोमं । अस्तं । इंद्र । प्र । याहि । कल्याणीः । जाया । सुऽरणं । गृहे । ते ।
यत्र । रथस्य । बृहतः । निऽधानं । विऽमोचनं । वाजिनः । दक्षिणाऽवत् ॥ ६ ॥

हे इंद्र सोममपाः । अत्रैव स्थित्वा सोमं पिब । पीत्वास्तं गृहं प्र याहि । प्रकर्षेण गच्छ । ते तव गृहे कल्याणीर्मंगलकारिणी जाया शची विद्यते । सुरणं शोभनगीतादिध्वनिश्चास्ति । यद्वा । सुरणं सुरमणीयं यथा भवति तथा गृहे जाया तिष्ठति । यत्रेत्यादि गतं । दक्षिणावत् । अत्र स्थितौ सत्यां रथे योजितानां वाजिनां विमोचनं खादनपानादिना दक्षिणावत् प्रयोजनवद्भवति । विमुक्तेभ्यो वाजिभ्यो खादनं पानं चोपहरंति ॥ अपाः । पा पाने । लुङि गातिस्थेति सिचो लुक् । अडागमस्वरः । कल्याणीः । कल्याणमस्यास्तीति मत्वर्थे छंदसीवनिपाविति ईप्रत्ययः । सुरणं । रण शब्दार्थः । अस्मादकृच्छ्रार्थे खल् । लित्स्वरः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । समासे कृदुत्तरपदस्वरः ॥

॥ अथ सप्तमी ॥

इमे भोजा अंगिरसो विरूपा दिवस्पुत्रासो असुरस्य वीराः ।
विश्वामित्राय ददतो मघानि सहस्रसावे प्र तिरंत आयुः ॥ ७ ॥
इमे । भोजाः । अंगिरसः । विऽरूपाः । दिवः । पुत्रासः । असुरस्य । वीराः ।
विश्वामित्राय । ददतः । मघानि । सहस्रऽसावे । प्र । तिरंते । आयुः ॥ ७ ॥

हे इंद्र इमे यागं कुर्वाणा भोजाः सौदासाः क्षत्रियाः तेषां याजका विरूपा नानारूपा मेधातिथिप्रभृतयोऽंगिरसश्च दिवोऽसुरस्य देवेभ्योऽपि बलवतो रुद्रस्य पुत्रासः पुत्रा वीरा बलवंतो मरुतः ते सर्वे विश्वामित्राय मह्यं सहस्रसावे । सहस्रं सूयतेऽत्रेति सावोऽश्वमेधः । तस्मिन्नश्वमेधे मघानि महनीयानि धनानि ददतः प्रयच्छंतः संत आयुर्जीवनमन्नं वा प्र तिरंते । प्रकर्षेण वर्धयंति ॥ दिवस्पुत्रास इति संहितायां षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं । ददतः । डुदाञ् दान इत्यस्य शतरि रूपं । अभ्यस्तानामादिरित्याद्युदात्तत्वं । तिरंते । तरतेर्व्यत्ययेन शः ॥

॥ अथाष्टमी ॥

रूपंरूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं१ परि स्वां ।
त्रिर्यद्दिवः परि मुहूर्तमागात्स्वैर्मंत्रैरनृतुपा ऋतावा ॥ ८ ॥
रूपंऽरूपं । मघऽवा । बोभवीति । मायाः । कृण्वानः । तन्वं । परि । स्वां ।
त्रिः । यत् । दिवः । परि । मुहूर्तं । आ । अगात् । स्वैः । मंत्रैः । अनृतुऽपाः । ऋतऽवा ॥ ८ ॥

मघवा धनवानिंद्रो रूपं रूपं यद्यद्रूपं कामयते तत्तद्रूपं बोभवीति । तत्तद्रूपात्मको भवति । तत्र कारणमुच्यते । माया अनेकरूपग्रहणसामर्थ्योपेताः कृण्वानः कुर्वाणः स्वां तन्वं स्वकीयां तनूं परि । पंचम्यर्थे । स्वस्माच्छरीरान्नानाविधानि शरीराणि निर्मिमीते । यद्वा स्वां तनूं नानाविधरूपोपेतां करोति । तथा च मंत्रवर्णः । इंद्रो मायाभिः पुरुरूपः । ऋग्वे॰ ६. ४७. १८. । इति । यद्यस्मात्स्वैर्मंत्रैः स्वकीयैः स्तुतिलक्षणैर्वाक्यैराहूतोऽनृतुपाः । न केवलमृतुष्वेव पिबति किंत्वनृतुष्वपि । बहुशः सोमं पिबन्नित्यर्थः । ऋतावा सत्यवान् तादृश इंद्रो दिवः स्वर्गलोकात्परि मुहूर्तमेकस्मिन्नेव मुहूर्ते नानादेशवर्तिषु यज्ञेषु तत्रापि त्रिः त्रिषु सवनेष्वागात् । आगच्छति ॥ बोभवीति ।

भवतेर्यङ्लुकि तिपि यङो वेतीडागमः। निघातः। अगात्। इणो लुङि रूपं। यद्वृत्तयोगादनिघातः ॥

॥ अथ नवमी ॥

महाँ ऋषिर्देवजा देवजूतोऽस्तभ्नात्सिंधुमर्णवं नृचक्षाः।
विश्वामित्रो यदवहत्सुदासमप्रियायत कुशिकेभिरिंद्रः ॥९॥

महान्। ऋषिः। देवऽजाः। देवऽजूतः। अस्तभ्नात्। सिंधुं। अर्णवं। नृऽचक्षाः।
विश्वामित्रः। यत्। अवहत्। सुऽदासं। अप्रियायत। कुशिकेभिः। इंद्रः ॥९॥

महान् तपसातिशयितसामर्थ्यवानृषिरतींद्रियार्थद्रष्टा देवजा द्योतमानानां तेजसां जनयिता देवजूतस्तैस्तेजोभिराकृष्टो नृचक्षा नृणां कर्मनेतॄणामध्वर्य्वादीनामुपद्रष्टा स विश्वामित्रोऽर्णवमुदकवंतं सिंधुं विपाट्छुतुद्र्योः संभेदमस्तभ्नात्। निरुद्धवेगमकरोत्। किंच स विश्वामित्रः सुदासं पैजवनं राजानं यद्यदावहत् अयाजयत् तदानीमिंद्रः कुशिकेभिः कुशिकगोत्रोत्पन्नैर्ऋषिभिः सहाप्रियायत। प्रिय इवाचरत् ॥ अवहत्। वह प्रापण इत्यस्य लङि रूपं। यद्योगादनिघातः। अप्रियायत। प्रिय इवाचरतीत्यर्थे कर्तुः क्यङ् सलोपश्चेति क्यङ्। तदंताल्लङि रूपं। पादादित्वादनिघातः ॥

॥ अथ दशमी ॥

हंसा इव कृणुथ श्लोकमद्रिभिर्मदंतो गीर्भिरध्वरे सुते सचा।
देवेभिर्विप्रा ऋषयो नृचक्षसो वि पिबध्वं कुशिकाः सोम्यं मधु ॥१०॥

हंसाःऽइव। कृणुथ। श्लोकं। अद्रिऽभिः। मदंतः। गीःऽभिः। अध्वरे। सुते। सचा।
देवेभिः। विप्राः। ऋषयः। नृऽचक्षसः। वि। पिबध्वं। कुशिकाः। सोम्यं। मधु ॥१०॥

हे विप्रा मेधाविनो हे ऋषयोऽतींद्रियार्थस्य द्रष्टारो हे नृचक्षसो नृणां कर्मनेतॄणां विशेषेण द्रष्टारो हे कुशिकाः कुशिकगोत्रोत्पन्ना हे पुत्रा अध्वरे यज्ञेऽद्रिभिर्ग्रावभिः सोमे सुतेऽभिषुते सति गीर्भिर्मदंतः स्तुतिभिर्देवान्मादयंतो यूयं श्लोकं। श्लोक्यते शस्यतेऽनेनेति श्लोकः शस्त्रं। कृणुथ। सम्यगुच्चारयत। तत्र दृष्टांतः। हंसा इव। यथा हंसाः सम्यक् शब्दं कुर्वंति तद्वत्। किंच देवेभिः सचा यष्टव्यैर्देवैः सहिता यूयं सोम्यं सोममयं मधु मधुकरं रसं वि पिबध्वं। परस्परव्यतिहारेण पिबत ॥ श्लोकं। श्लोकृ शब्दे। करणे घञ्। जिह्वादाद्युदात्तः।

मदंतः। मदी हर्षे इत्यस्यांतर्भावितण्यर्थस्य व्यत्ययेन शप्। पिबध्वं। पा पाने। कर्तरि कर्मव्यतिहार इत्यात्मनेपदं। सोम्यं। सोमशब्दान्मये चेति यप्रत्ययः॥

॥ इति तृतीयस्य तृतीये विंशो वर्गः ॥

॥ अथैकादशी ॥

उप प्रेत कुशिकाश्चेतयध्वमश्वं राये प्र मुंचता सुदासः।

राजा वृत्रं जंघनत्प्रागपागुदगथा यजाते वर आ पृथिव्याः ॥ ११ ॥

उप। प्र। इत। कुशिकाः। चेतयध्वं। अश्वं। राये। प्र। मुंचत। सुऽदासः।

राजा। वृत्रं। जंघनत्। प्राक्। अपाक्। उदक्। अथ। यजाते। वरे। आ। पृथिव्याः॥११॥

हे कुशिकाः कुशिकगोत्रोत्पन्ना हे पुत्रा उप प्रेत। अश्वस्य समीपे प्रकर्षेण गच्छत। तत्र गत्वा चेतयध्वं। सावधाना भवत। यद्वा। अश्वरक्षिणः सावधानान् कुरुत। सुदासः पैजवनस्य राज्ञोऽश्वं राये तस्य दिग्विजयेन धनलाभाय प्रमुंचत। राजा देवानां स्वामींद्रो वृत्रं कर्मविघ्नकारिणमसुरं प्रागपागुदक् पूर्वपश्चिमोत्तरेषु देशेषु जंघनत्। भृशं हतवान्। तस्मादश्वं विमुंचतेति भावः। अथानंतरं पृथिव्या वर उत्तमे देवयजनदेशे यजाते। स राजा यजेत॥ चेतयध्वं। चिती संज्ञान इत्यस्य ण्यंतस्य लोटि रूपं। आमंत्रितस्याविद्यमानवत्त्वेन तिङ उत्तरत्वान्न निघातः। जंघनत्। हन हिंसागत्योरित्यस्य यङ्लुकि नुगतोऽनुनासिकांतस्येत्यभ्यासस्य नुगागमः। तदंताल्लेट्यडागमः। प्राक्। अंचतेः क्विनि रूपं। अनिगंतोऽंचतावप्रत्यय इति गतेः स्वरः। यजाते। यजतेर्लेट्यडागमः। निघातः। वरे। वृञ् वरण इत्यस्मात् ग्रहवृदृनिश्चिगमश्चेत्यप्प्रत्ययः। तस्य पित्त्वादनुदात्तत्वे धातुस्वरः॥

॥ अथ द्वादशी ॥

य इमे रोदसी उभे अहमिंद्रमतुष्टवं।

विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनं ॥ १२ ॥

यः। इमे इति। रोदसी इति। उभे इति। अहं। इंद्रं। अतुस्तवं।

विश्वामित्रस्य। रक्षति। ब्रह्म। इदं। भारतं। जनं ॥ १२ ॥

हे कुशिकाः कुशिकपुत्रा योऽहं विश्वामित्र उभे इमे रोदसी द्यावापृथिव्याविंद्रमतुष्टवं स्तावयामि। द्यावापृथिवीभ्यामिंद्रस्य स्तोत्रं मया कारितमित्यर्थः। यद्वा

उभयो रोदस्योरंतरवस्थितमिंद्रं स्तौमि। स्तोत्रं कुर्वाणस्य विश्वामित्रस्य ममेदमिंद्रविषयं ब्रह्म स्तोत्रं भारतं भरतकुलं जनं रक्षति। पालयति॥ अतुष्टवं। ष्टुञ् स्तुतौ। णयंतस्य लुङि चङि रूपं। यद्वृत्तयोगादनिघातः। भारतं। भरतशब्द उत्सादिः। ञित्त्वादाद्युदात्तः॥

॥ अथ त्रयोदशी ॥

विश्वामित्रा अरासत ब्रह्मेंद्राय वज्रिणे। करदिन्नः सुराधसः॥१३॥

विश्वामित्राः। अरासत। ब्रह्म। इंद्राय। वज्रिणे। करत्। इत्। नः। सुऽराधसः॥१३॥

विश्वामित्रा वज्रिणे वज्रहस्तायेंद्राय ब्रह्म स्तोत्रमरासत। अकुर्वन्। स्तुतः स इंद्रो नोऽस्मान् सुराधसः शोभनधनोपेतान् करदित्। करोत्वेव॥ अरासत। रासृ शब्द इत्यस्य लङि बहुलं छंदसीति शपो लुक्। निघातः। करत्। करोतेर्लुङि च्लेः कृमृदृरुहिभ्यश्छंदसीत्यङादेशः। सुराधसः। आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं॥

॥ अथ चतुर्दशी ॥

किं ते कृण्वंति कीकटेषु गावो नाशिरं दुह्रे न तपंति घर्मं।
आ नो भर प्रमगंदस्य वेदो नैचाशाखं मघवन्रंधया नः॥१४॥

किं। ते। कृण्वंति। कीकटेषु। गावः। न। आऽशिरं। दुह्रे। न। तपंति। घर्मं।
आ। नः। भर। प्रऽमगंदस्य। वेदः। नैचाऽशाखं। मघऽवन्। रंधय। नः॥१४॥

हे इंद्र कीकटेष्वनार्यनिवासेषु जनपदेषु। यद्वा क्रियाभिर्यागदानहोमलक्षणाभिः किं फलिष्यतीत्यश्रद्दधानाः प्रत्युत पिबत खादतायमेव लोको न पर इति वदंतो नास्तिकाः कीकटाः। तेषु गावस्ते तव किं कृण्वंति। किं कुर्वंति। न क्वचित्तवोपयोगं कुर्वंतीत्यर्थः। अनुपयोगं दर्शयति। आशिरं सोममिश्रणयोग्यं पयो न दुह्रे। न दुहंति। किंच घर्मं प्रवर्ग्याख्यकर्मोपयुक्तं महावीरपात्रं स्वपयःप्रदानद्वारेण न तपंति। न दीपयंति। एतेन सांनाय्याद्यर्थमपि नोपयुज्यंत इत्यपि सूचितं भवति। एवं क्वचिदपि वैदिके कर्मण्यनुपयुक्तास्ता गा नोऽस्मभ्यमाभर। आहर। न केवलं ता एव किं तर्हि प्रमगंदस्य। द्वैगुण्यादिलक्षणपरिमाणं गतोऽर्थो मामेव गमिष्यतीति बुद्ध्या परेषां ददातीति मगंदो वार्धुषिकः। तस्यापत्यं पुत्रादिः प्रमगंदः। प्रस्कण्वादिवदपत्यार्थः प्रशब्देन द्योत्यते। तस्यात्यं-

तत्कुसीदिकुलस्य वेदो धनमाहर। किंच हे मघवन्धनवन्निंद्र नैचाशाखं। नीचासु शूद्रयोनिषूत्पादिता शाखा पुत्रपौत्रादिपरंपरा येन स नीचाशाखः। शूद्रापत्यैश्च केवलैः शूद्रावेदी पतत्यध इति च पातकहेतुत्वेन स्मरणात्। पतितस्य संबंधि धनं नैचाशाखं। तद्धनं नोऽस्मभ्यं रंधय। साधय। एतेषां तद्धनं तव नोपयुज्यते अस्मदायत्तं तु तद्धनं यागादिद्वारा तवोपयुज्यते। तस्मात्तदस्मभ्यं प्रयच्छेति भावः॥ एतमर्थं यास्कोऽप्याह। किं ते कुर्वंति कीकटेषु गावः। कीकटो नाम देशोऽनार्यनिवासः। कीकटाः किंकृताः किं क्रियाभिरिति प्रेप्सवो वा। नैव चाशिरं दुह्रे न तपंति घर्मं घरणं। आ हर नः प्रमगंदस्य धनानि। मगंदः कुसीदी मांगदो मामागमिष्यतीति च ददाति। तदपत्यं प्रमगंदोऽत्यंतकुसीदिकुलीनः। प्रमदको वा योऽयमेवास्ति लोको न पर इति प्रेप्सुः। पंडको वा पंडकः पंडगः प्रार्दको वा प्रार्दयत्यांडौ। आंडावाणी इव व्रीडयति। तत्स्थं नैचाशाखं। नीचाशाखो नीचैःशाखः। शाखाः शक्नोतेः। आणिररणात्। तन्नो मघवन्रंधयेति रध्यतिर्वशगमने। नि० ६.३२.। इति॥ आशिरं। आङ्पूर्वाच्छ्रीणातेः क्विप्यपस्पृधेथामित्यादिना शिरित्यादेशः। दुह्रे। दुहेर्लिटीरयो र इति रेआदेशः। द्विर्वचनस्य विकल्पितत्वात् द्विर्वचनाभावः। चादिलोपे विभाषेति न निघातः। नैचाशाखं। तस्येदमित्यण्। प्रत्ययस्वरः। रंधय। रधेर्ण्यंतस्य रधिजभोरचीति नुमागमः॥

ससर्परीमृचे प्राहुरितिहासं पुराविदः। सौदासनृपयज्ञे वै वसिष्ठात्मजशक्तिना। विश्वामित्रस्याभिभूतं बलं वाक् च समंततः। वासिष्ठेनाभिभूतः स ह्यवासीदथ गाधिजः। तस्मै ब्राह्मीं तु सौरीं वा नाम्ना वाचं ससर्परीं। सूर्यवेश्मन आहृत्य ददुर्वै जमदग्नयः। कुशिकानां मतिः सा वागमतिं तामपानुदत्॥

॥ अथ पंचदशी ॥

ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता।
आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यं॥१५॥
ससर्परीः। अमतिं। बाधमाना। बृहत्। मिमाय। जमदग्निऽदत्ता।
आ। सूर्यस्य। दुहिता। ततान। श्रवः। देवेषु। अमृतं। अजुर्यं॥१५॥

जमदग्निदत्ता जमदग्निभिः प्रज्वलिताग्निभिर्ऋषिभिरस्मभ्यं दत्तामतिमज्ञानं बाधमाना ससर्परीः सर्वत्र शब्दरूपतया सर्पणशीला वाक् बृहत्प्रभूतं यथा

भवति तथा मिमाय। नभसि शब्दं करोति। सैषा सूर्यस्य दुहिता वाग्देवता देवेष्विंद्रादिष्वजुर्यं क्षयरहितममृतममृतलक्षणं श्रवोऽन्नमा ततान। समंतात्स्वाहाकारवाचं तनोति॥ जमदग्निदत्ता। दाण् दान इत्यस्य निष्ठायां दो दद्धोरिति ददादेशः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः। अजुर्यं। जॄ वयोहानौ। ऋहलोर्ण्यत्। बहुलं छंदसीत्युत्वं। नञ्सुभ्यामित्यंतोदात्तत्वं॥

॥ इति तृतीयस्य तृतीय एकविंशो वर्गः॥

॥ अथ षोडशी॥

ससर्परीरभरत्तूयमेभ्योऽधि श्रवः पांचजन्यासु कृष्टिषु।
सा पक्ष्या३नव्यमायुर्दधाना यां मे पलस्तिजमदग्नयो ददुः॥१६॥

ससर्परीः। अभरत्। तूयं। एभ्यः। अधि। श्रवः। पांचऽजन्यासु। कृष्टिषु।
सा। पक्ष्या। नव्यं। आयुः। दधाना। यां। मे। पलस्तिऽजमदग्नयः। ददुः॥१६॥

ससर्परीः सर्वत्र गद्यपद्यात्मकत्वेन सर्पणशीला वाग्देवता पांचजन्यासु कृष्टिषु। निषादपंचमाश्चत्वारो वर्णाः। तत्संबंधिनीषु प्रजासु यच्छ्रवोऽन्नं विद्यते तन्नोऽस्मभ्यमधि अधिकं यथा भवति तथा तूयं क्षिप्रमभरत्। भरतु। संपादयतु। पलस्तिजमदग्नयः पलस्तयः पलिता दीर्घायुषो जमदग्नयो मुनयो यां वाचं सूर्यादाहृत्य मे मह्यं ददुरददुः पक्ष्या पक्षस्य पक्षादिनिर्वाहकस्य सूर्यस्य दुहिता सा वाक् नव्यं नवतरमायुरन्नं जीवनं वा दधाना मम कुर्वाणा भवतु॥ पांचजन्यासु। बहिर्देवपंचजनेभ्यश्चेति वक्तव्यमिति ञ्यप्रत्ययः। ञित्त्वादाद्युदात्तः। पक्ष्या। पक्षे भवा। दिगादित्वाद्यत्। तित्स्वरितः। नव्यं। नवशब्दाद्भस्वादित्वात्स्वार्थिको यत्। पलस्तिजमदग्नयः। कर्मधारयसमासः। समासस्वरः॥

॥ अथ सप्तदशी॥

स्थिरौ गावौ भवतां वीळुरक्षो मेषा वि वर्हि मा युगं वि शारि।
इंद्रः पातल्ये ददतां शरीतोररिष्टनेमे अभि नः सचस्व॥१७॥

स्थिरौ। गावौ। भवतां। वीळुः। अक्षः। मा। ईषा। वि। वर्हि। मा। युगं। वि। शारि।
इंद्रः। पातल्ये३ इति। ददतां। शरीतोः। अरिष्टऽनेमे। अभि। नः। सचस्व॥१७॥

राज्ञः सुदासो यज्ञेऽवभृथं कृत्वा यज्ञशालातो निर्गंतुमिच्छन् रथेऽश्वादिकं

युंजानो विश्वामित्रो रथांगानि स्तौति। गावौ। गच्छत इति गावावश्वौ। स्थिरौ भवतां। अक्षश्च वीळुर्दृढो भवतु। ईषा दंडश्च मा विवर्हि। व्यूढो मा भवतु। युगं च मा विशारि। विशीर्णं मा भवतु। इंद्रः पातल्ये पतनशीले कीलके शरीतोर्विशरणात्प्राक् ददतां। धारयतु। हे अरिष्टनेमे अहिंसितप्रधिविशिष्ट हे रथ नोऽस्मानभि आभिमुख्येन सचस्व। संगतो भव ॥ विवर्हि। वृहि वृद्धौ। विपूर्वो वृहिर्विनाशे वर्तते। अस्मात्कर्मकर्तरि लुङि चिण् भावकर्मणोरिति चिण्। चिणो लुगिति तप्रत्ययस्य लुक्। निघातः। युगं। युगशब्द उञ्छादिषु रथाद्युपकरणेऽर्थे घञंतत्वेन निपातनादगुणत्वं। तत्र पाठादंतोदात्तत्वं। शारि। शॄ हिंसायामित्यस्य लुङि रूपं। अरिष्टनेमे। पादादित्वात् षाष्ठिकमाद्युदात्तत्वं ॥

॥ अथाष्टदशी ॥

बलं धेहि तनूषु नो बलमिंद्रानळुत्सु नः।
बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥१८॥
बलं। धेहि। तनूषु। नः। बलं। इंद्र। अनळुत्ऽसु। नः।
बलं। तोकाय। तनयाय। जीवसे। त्वं। हि। बलदाः। असि ॥१८॥

हे इंद्र नोऽस्माकं तनूषु शरीरेषु बलं धेहि। नोऽस्मत्संबंधिरथवाहेष्वनळुत्सु बलं धेहि। तोकाय पुत्राय तनयाय पौत्राय च जीवसे चिरं जीवनाय बलमायुर्विधेहि। एतादृशं दातृत्वं कुत इत्यत आह। त्वं बलदाः। बलं ददातीति बलदाः। असि हि। सर्वेषु लोकेषु प्रसिद्धोऽसि खलु ॥ अनळुत्सु। वह प्रापणे। अनसि वहेः क्विप्। अनसो डश्चेति क्विप्। अनसः सकारस्य डत्वं। वहेर्यजादित्वात्संप्रसारणं। वसुस्रंसुध्वंस्वनडुहां द इति हकारस्य दत्वं। कृदुत्तरस्वरः। असि। हियोगादनिघातः। सिपः पित्त्वादनुदात्तत्वे धातुस्वरः ॥

॥ अथैकोनविंशी ॥

अभि व्ययस्व खदिरस्य सारमोजो धेहि स्पंदने शिंशपायां।
अक्ष वीळो वीळित वीळयस्व मा यामादस्मादव जीहिपो नः ॥१९॥
अभि। व्ययस्व। खदिरस्य। सारं। ओजः। धेहि। स्पंदने। शिंशपायां।
अक्ष। वीळो इति। वीळित। वीळयस्व। मा। यामात्। अस्मात्। अव। जीहिपः। नः ॥१९॥

हे इंद्र खदिरस्य सारं। सारेण हि आणिः क्रियते। तं खदिरस्य सारभूतमाणिमभि व्ययस्व। अभितस्तत्तत्स्थानेषु दार्ढ्यार्थं निधेहि। स्पंदने रथस्य गमने सति शिंशपायां शिंशपाख्यदारुनिर्मिते रथस्य फलक ओजो धेहि। दार्ढ्यं कुरु। हे वीळो दृढ वीळितास्माभिर्दृढीकृत हे अक्ष वीळयस्व। त्वं दृढो भव। यद्वास्मान् दृढीकुरु। यामाद्गच्छतोऽस्माद्रथान्नोऽस्मान् मावजीहिपः। मा पीपतः॥ खदिरस्य। अजिरशिशिरेत्यादिना किरच्प्रत्ययांतत्वेन निपातनादंतोदात्तः। वीळित। वीळयतेर्ण्यंतस्य निष्ठायामिडागमः। निष्ठायां सेटि। पा० ६. ४. ५२.। इति णेर्लुक्। वीळयस्व। आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः। यामात्। या प्रापण इत्यस्मादर्तिस्तुसुहुसृ इत्यादिना मन्प्रत्ययः। नित्त्वादाद्युदात्तः। जीहिपः। ओहाक् त्यागे। ण्यंतस्य लुङि चङि रूपं। अकारस्येकारश्छांदसः॥

॥ अथ विंशी ॥

अ॒यम॒स्मान्वन॒स्पति॒र्मा च॒ हा मा च॑ रीरिषत्।
स्व॒स्त्या गृ॒हेभ्य॒ आव॒सा आ वि॒मोच॑नात् ॥ २० ॥
अ॒यं। अ॒स्मान्। वन॒स्पति॑ः। मा। च॒। हाः। मा। च॒। रि॒रि॒ष॒त्।
स्व॒स्ति। आ। गृ॒हेभ्य॑ः। आ। अ॒व॒ऽसै। आ। वि॒ऽमोच॑नात् ॥ २० ॥

यजमान आत्मनः श्रेय आशास्ते। वनस्पतिर्वनस्पतिनिर्मितोऽयं रथो रथारूढानस्मान् मा च हाः। मा त्याक्षीत्। किंच मा रीरिषत्। अस्मान् मा विनाशयतु। किंच गृहेभ्यः। यावद्गृहान् प्राप्नुयाम तावदस्मभ्यं स्वस्ति भवतु। तथावसे। पंचम्यर्थे चतुर्थी। यावद्रथवेगावसानं तावत्। आ विमोचनात्। यावद्रथयोजिताश्वविमोचनं तावत् स्वस्ति भवतु॥ हाः। ओहाक् त्यागे। लुङि मंत्रे घसेत्यादिना सिचो लुक्। पुरुषव्यत्ययः। चवायोगे प्रथमेति न निघातः। रीरिषत्। रिष हिंसायामित्यस्य ण्यंतस्य लुङि चङि रूपं। द्वितीयत्वान्निघातः। गृहेभ्यः। ग्रहेर्गेहे क इति कः। पंचम्यपाङ्परिभिरिति पंचमी। अवसे। षोऽंतकर्मणि। क्विप्। चतुर्थ्येकवचन आतो लोपाभावश्छांदसः। वृद्धिः। एकादेशस्वरः॥

॥ इति तृतीयस्य तृतीये द्वाविंशो वर्गः ॥

इंद्रोतिभिरित्याद्याश्चतस्रो वसिष्ठद्वेषिण्यः। पुरा खलु विश्वामित्रशिष्यः सुदा

नाम राजार्षिरासीत् स च केनचित्कारणेन वसिष्ठद्वेष्योऽभूत् । विश्वामित्रस्तु शिष्यस्य रक्षार्थमाभिर्ऋग्भिर्वसिष्ठमशपत् । इमा अभिशापरूपाः । ता ऋचो वसिष्ठा न शृखंति ॥

॥ तत्राद्या सूक्त एकविंशी ॥

इंद्रोतिभिर्बहुलाभिर्नो अद्य याच्छ्रेष्ठाभिर्मघवञ्छूर जिन्व ।

यो नो द्वेष्ट्यधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु ॥ २१ ॥

इंद्र । ऊतिऽभिः । बहुलाभिः । नः । अद्य । यात्ऽश्रेष्ठाभिः । मघऽवन् । शूर । जिन्व ।

यः । नः । द्वेष्टि । अधरः । सः । पदीष्ट । यं । ऊं इति । द्विष्मः । तं । ऊं इति । प्राणः । जहातु ॥ २१ ॥

परस्य शापं करिष्यन् आदावात्मनो रक्षां कुरुते प्रथमेनार्द्धर्चेन । हे शूर शौर्यवन्पराभिभवशक्त हे मघवन्धनवन्निंद्र अद्यास्मिन्काले यात् । यातयतिर्वधकर्मा । यातयतीति यात् । सुपां सुलुगिति शपो लुक् । यातः शत्रून् हिंसतो नोऽस्मानूतिभिस्त्वदीयाभी रक्षाभिर्जिन्व । प्रीणय । कीदृशीभिः । बहुलाभिर्बह्वीभिः श्रेष्ठाभिः प्रशस्यतराभिः । अथ शपति । नोऽस्मान्यः शत्रुर्द्वेष्यो द्वेष्ट्यस्मद्विषयामप्रीतिं करोति सोऽधरो निकृष्टः सन् पदीष्ट । पततु । वयं च यमु द्विष्मस्तमु तं द्वेष्यं प्राणो देहमध्ये वर्तमानः पंचवृत्तिर्वायुर्जहातु । परित्यजतु । उशब्दौ पूरकौ ॥

॥ अथ द्वाविंशी ॥

परशुं चिद्वि तपति शिंबलं चिद्वि वृश्चति ।

उखा चिदिंद्र येषंती प्रयस्ता फेनमस्यति ॥ २२ ॥

परशुं । चित् । वि । तपति । शिंबलं । चित् । वि । वृश्चति ।

उखा । चित् । इंद्र । येषंती । प्रऽयस्ता । फेनं । अस्यति ॥ २२ ॥

परशुं चित् । चिच्छब्द उपमार्थः । यथा परशुं कुठारं प्राप्य वृक्षो वितपति विशिष्टतापयुक्तो भवति । एवं मदीयो द्वेष्टा वितपतु । शिंबलं चित् शल्मलीकुसुमं यथानायसेन विवृश्चति विच्छिद्यते । एवं स द्वेष्टा विवृश्चति । विच्छिन्नावयवो भवतु । प्रयस्ता प्रहता येषंती स्रवंत्युखा चित् स्थालीव स द्वेष्टा मदीयमंत्रसामर्थ्येन प्रहतः सन् फेनमस्यति । फेनं मुखादुद्गिरतु ॥

॥ अथ त्रयोविंशी ॥

न सायकस्य चिकिते जनासो लोधं नयंति पशु मन्यमानाः।

नावाजिनं वाजिना हासयंति न गर्दभं पुरो अश्वान्नयंति ॥२३॥

न। सायकस्य। चिकिते। जनासः। लोधं। नयंति। पशु। मन्यमानाः।

न। अवाजिनं। वाजिना। हासयंति। न। गर्दभं। पुरः। अश्वात्। नयंति ॥२३॥

पुरा खलु तपसः क्षयो मा प्रापदिति शापान्निवृत्तं मौनिनं विश्वामित्रं वसिष्ठपुरुषा बद्ध्वानीतवंतः। तान्प्रति विश्वामित्रो ब्रूते। हे जनासो जनाः सायकस्यावसानकारिणो विश्वामित्रस्य मंत्रगणसामर्थ्यं न चिकिते। भवद्भिर्न ज्ञायते। अत एव लोधं लुब्धं तपसः क्षयो मा भूदिति लोभेन तूष्णीं स्थितमृषिं पशु मन्यमानाः। पशु इति निपातः पशुशब्दसमानार्थः। पशुवन्मन्यमाना एते नयंति। बद्ध्वा स्वकीयं देशं प्रापयंति। एवं स्वसामर्थ्यं प्रदर्श्य विसदृशो वसिष्ठो मया सह स्पर्धितुं नार्हतीति धिक्करोति। नावाजिनमिति। अवाजिनं। वाचामिनो वाजिनः सर्वज्ञः। तद्विलक्षणं मूर्खजनं वाजिना वागीशा न हासयंति हास्यास्पदं न कुर्वंति। तेन सह न स्पर्धंत इत्यर्थः। तथा गर्दभं रासभमश्वात्पुरः पुरस्तान्न नयंति। एवमेव विसदृशो वसिष्ठो न मया स्पर्धितुमीष्ट इत्यर्थः॥

॥ अथ चतुर्विंशी ॥

इम इंद्र भरतस्य पुत्रा अपपित्वं चिकितुर्न प्रपित्वं।

हिन्वंत्यश्वमरणं न नित्यं ज्यावाजं परि णयंत्याजौ ॥२४॥

इमे। इंद्र। भरतस्य। पुत्राः। अपऽपित्वं। चिकितुः। न। प्रऽपित्वं।

हिन्वंति। अश्वं। अरणं। न। नित्यं। ज्याऽवाजं। परि। नयंति। आजौ ॥२४॥

हे इंद्र भरतस्य पुत्रा भरतवंश्या इमे विश्वामित्रा अपपित्वमपगमनं वसिष्ठेभ्यश्चिकितुः। जानंति। प्रपित्वं प्रगमनं न जानंति। शिष्टैः सह तेषां संगतिर्नास्ति। ब्राह्मणा एव त इत्यर्थः। अपि चाजौ संग्रामे नित्यं सहजमरणं नारिमिव वसिष्ठान्प्रत्यश्वं हिन्वंति। प्रेरयंति। ततश्च ज्यावाजं बलं धनुं परिणयंति। वसिष्ठान्हंतुं शरसंधानेन चरंति॥

॥ इति तृतीयस्य तृतीये त्रयोविंशो वर्गः॥

॥ इति तृतीये मंडले चतुर्थोऽनुवाकः॥

पंचमेऽनुवाके नव सूक्तानि। तत्रेमं मह इति द्वाविंशत्यृचं प्रथमं सूक्तं त्रैष्टुभं वैश्वदेवं विश्वामित्रपुत्रस्य वाक्पुत्रस्य वा प्रजापतेरार्षं। अत्रेयमनुक्रमणिका। इमं महे द्व्यधिकोक्तगोत्रः प्रजापतिर्हि वैश्वदेवं हेति। अस्मिन् सूक्त आद्याग्नेयी ततः परं सप्तर्चो द्यावापृथिव्यास्ततः परा द्युदेवताका दशमी द्यावापृथिव्यैकादशी सावित्री ततः परं सुकृदिति त्वाष्ट्र्यार्भवी च विद्युद्रथेति मारुती सारस्वती च ततः परं तिस्रो विष्णिवंद्राग्निदेवताकाः स्वदस्वेत्याग्नेयीति। एवं वैश्वदेवं सूक्तं ॥ सूक्तविनियोगो लैंगिकः। अग्निप्रणयने राजन्यस्येमं मह इति प्रतिपत्पंचम्यां पौर्णमास्यामित्यत्र सूचितं। इमं महे विदथ्याय शूषं। आ° २.१७। इति ॥

॥ तस्मिन्सूक्ते प्रथमा ॥

इ॒मं म॒हे वि॑द॒थ्या॑य शू॒षं शश्व॒त्कृत्व॒ ईड्या॑य॒ प्र ज॑भ्रुः।
शृ॒णोतु॑ नो॒ दम्ये॑भि॒रनी॑कैः शृ॒णोत्व॒ग्निर्दि॒व्यैर॒ज॑स्रः ॥१॥

इ॒मं। म॒हे। वि॒द॒थ्या॑य। शू॒षं। शश्व॑त्। कृत्वः॑। ईड्या॑य। प्र। ज॒भ्रुः।
शृ॒णोतु॑। नः॒। दम्ये॑भिः। अनी॑कैः। शृ॒णोतु॑। अ॒ग्निः। दि॒व्यैः। अ॒ज॑स्रः ॥१॥

महे महते विदथ्याय विदथे यज्ञे मंथनेन निष्पाद्यमानायेड्याय सर्वैः स्तुत्यायाग्नये शूषं सुखकरमिमं स्तोमं शश्वत्कृत्वो भूयो भूयः प्रजभ्रुः। प्रभरंति। प्रकर्षेण धारयंति। उच्चारयंतीत्यर्थः। सोऽग्निर्दम्येभिः परेषां दमनकुशलैर्दमे गृहे विद्यमानैर्वानीकैस्तेजोभिर्युक्तः सन् नोऽस्मदीयमिमं स्तोमं शृणोतु। दिव्यैर्दिवि भवैस्तेजोभिरजस्रो निरंतरं युक्तोऽग्निरिमं स्तोमं शृणोतु। शश्वत्कृत्व ईड्याय प्र जभ्रुरिति स्वानामेवैनं तच्छ्रैष्ठ्यं गमयतीति ब्राह्मणानुसारेण। महदादिगुणविशिष्टाय यजमानायेममग्निं प्रजभ्रुः प्रहरंत्यृत्विज इति वा व्याख्येयं। उत्तरार्द्धर्चः समान एव ॥ विदथ्याय। तत्र भव इत्यर्थे भवे छंदसीति यत्। तित्स्वरः। ईड्याय। ईडवंदेत्यादिना उदात्तत्वं। दम्येभिः। तत्र साधुरिति यत्। यतोऽनाव इत्याद्युदात्तत्वं। दिव्यैः। दिवमर्हतीत्यर्थे छंदसि चेति यप्रत्ययः। अजस्रः। जसु मोक्षणे। नमिकंपीत्यादिना ताच्छीलिको रप्रत्ययः। नञा समासे तस्य स्वरः ॥

॥ अथ द्वितीया ॥

महिं म॒हे दि॒वे अ॑र्चा पृथि॒व्यै कामो॑ म इ॒च्छञ्चरति प्रजा॒नन्।
ययो॑र्ह॒ स्तोमे॑ वि॒दथे॑षु दे॒वाः सं॒पर्यवो॑ मा॒दयं॑ते सचा॒योः ॥२॥

महिं। महे। दिवे। अर्च। पृथिव्यै। कामः। मे। इच्छन्। चरति। प्रऽजानन्।
ययोः। ह। स्तोमे। विदथेषु। देवाः। सपर्यवः। मादयंते। सचा। आयोः ॥२॥

हे स्तोतर्महे महत्यै दिवे द्युलोकदेवतायै महत्यै पृथिव्यै च महि महत् त्वं प्रजानन् स्तोत्रमर्च। कुरु। मे मम कामो मनोरथः सर्वान् भोगानिच्छन् चरति। सर्वत्र वर्तते। आयोर्मनुष्यस्य विदथेषु यज्ञेषु ययोर्द्यावापृथिव्योः स्तोमे स्तोत्रे सपर्यवः पूजाकामा देवाः स्तोतारो वा सचा मादयंते ह सह माद्यंति खलु ॥ पृथिव्यै। उदात्तयण इति विभक्तेरुदात्तत्वं। सपर्यवः। सपर्यामिच्छतीत्यर्थे सुपः क्यच् ॥

॥ अथ तृतीया ॥

युवोर्ऋतं रोदसी सत्यमस्तु महे षु णः सुविताय प्र भूतं।
इदं दिवे नमो अग्ने पृथिव्यै सपर्यामि प्रयसा यामि रत्नं ॥३॥

युवोः। ऋतं। रोदसी इति। सत्यं। अस्तु। महे। सु। नः। सुविताय। प्र। भूतं।
इदं। दिवे। नमः। अग्ने। पृथिव्यै। सपर्यामि। प्रयसा। यामि। रत्नं ॥३॥

हे रोदसी द्यावापृथिव्यौ युवोर्युवयोर्ऋतमानृशंस्यं सत्यं यथार्थमस्तु। युवां नोऽस्माकं महे महते सुवितायाभ्युदयाय यज्ञसमाप्त्यर्थं सु सुष्ठु प्रभूतं। प्रभवतं। हे अग्ने दिवे पृथिव्यै चेदं नमोऽस्तु। प्रयसा हविर्लक्षणेनान्नेन सपर्यामि। परिचरामि। रत्नमुत्तमं धनं यामि। याचे। यातिर्याच्ञाकर्मा ईमहे इत्यादिषु पठितत्वात् ॥ षु। संहितायां सुञ इति षत्वं। णः। संहितायां नश्च धातुस्थोरुषुभ्य इति णत्वं। सुविताय। इण् गतौ। अधिकरणे क्तः। शोभनं गम्यतेऽस्मिन्निति सुवितं। उवङादेशश्छांदसः। भूतं। भवतेर्लोटि बहुलं छंदसीति शपो लुकि रूपं। यद्वा छांदसे लुङि सिचो गातिस्थेति लुक्। निघातः। दिवे पृथिव्यै। नमःस्वस्तीत्यादिना। पा० २.३.१६.। चतुर्थी। सपर्यामि कंड्वादिः परिचरणे वर्तते। प्रत्ययस्वरः। यामि। यातेर्लेटि रूपं। वाक्यभेदादनिघातः ॥

॥ अथ चतुर्थी ॥

उतो हि वां पूर्व्या आविविद्र ऋतावरी रोदसी सत्यवाचः।
नरश्चिद्वां समिथे शूरसातौ ववंदिरे पृथिवि वेविदानाः ॥४॥

उतो इति । हि । वां । पूर्व्याः । आऽविविद्रे । ऋतवरी इत्यृतऽवरी । रोदसी इति । सत्यऽवाचः । नरः । चित् । वां । संऽइथे । शूरऽसातौ । ववंदिरे । पृथिवि । वेविदानाः ॥४॥

उतो अपि च हे ऋतावरी । ऋतं सत्यं । तद्वत्यौ हे रोदसी द्यावापृथिव्यौ पूर्व्याः पूर्वे भवाः पुरातनाः सत्यवाचो महर्षयो वां युवाभ्यामाविविद्रे हि । तं तमपेक्षितमर्थं लेभिरे खलु । तथा हे पृथिवि शूरसातौ शूराणां सातिर्लाभो यस्मिन् तस्मिन्समिथे संगमननिमित्ते युद्धे नरश्चिदद्यतना मनुष्या वां युवयोर्माहात्म्यं वेविदाना जानंतोऽतो द्यावापृथिव्यौ ववंदिरे । स्तुवंति ॥ आविविद्रे । विदिर् लाभे इत्ययमुभयपदी । लिटि इरयो र इति रेआदेशः । सह सुपेत्यत्र सहेति योगविभागादाङा सह समासः । समिथे । इण् गतौ । समीण इति थक्प्रत्ययः । प्रत्ययस्वरः ॥

॥ अथ पंचमी ॥

को अद्धा वेद क इह प्र वोचद्देवाँ अच्छा पथ्या३ का समेति ।
ददृश्र एषामवमा सदांसि परेषु या गुह्येषु व्रतेषु ॥५॥

कः । अद्धा । वेद । कः । इह । प्र । वोचत् । देवान् । अच्छ । पथ्या । का । सं । एति ।
ददृश्रे । एषां । अवमा । सदांसि । परेषु । या । गुह्येषु । व्रतेषु ॥५॥

को वाद्धा सत्यभूतं तादृशमर्थं वेद । वेत्ति । को वेहास्मिन्प्रज्ञातमर्थं वोचत् । ब्रवीति । किं तत्तदुच्यते । देवानच्छाभिलक्ष्य का पथ्या पथि साधुः समीचीनः को मार्गः समेति । सम्यक् प्राप्नोतीति । इममर्थं न कश्चिज्जानाति । न कोऽपि ब्रवीति । किं ते देवा विद्यंते । बाढमित्याह । एषां दिवि स्थितानां नक्षत्ररूपाणां देवानामवमाधोमुखानि सदांसि स्थानानि ददृश्रे । दृश्यंते । तथापि परेषूत्तमेषु गुह्येषु दुर्ज्ञानेषु व्रतेषु कर्मस्वनुष्ठितेषु या यानिदिवि देवस्थानानि लभ्यंते तत्रागंतुं को मार्ग इति वेदमंतरेण न कश्चिज्जानातीत्यभिप्रायः ॥ अद्धा । स्वरादिष्वंतोदात्तत्वेन पठितत्वादंतोदात्तः । वोचत् । ब्रूञ् व्यक्तायां वाचि । लुङि ब्रुवो वचिरिति वच्यादेशः । अस्यतिवक्तिख्यातिभ्य इति च्लेरङादेशः । वच उमित्युमागमः । निघातः ॥

॥ इति तृतीयस्य तृतीये चतुर्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

कविर्नृचक्षा अभि षीमचष्ट ऋतस्य योना विघृते मदंती ।
नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने ॥ ६ ॥

कविः। नृऽचक्षाः। अभि। सीं। अचष्ट। ऋतस्य। योना। विघृते इति विऽघृते। मदंती इति।
नाना। चक्राते इति। सदनं। यथा। वेः। समानेन। क्रतुना। संविदाने इति संऽविदाने ॥ ६ ॥

कविः क्रांतदर्शी नृचक्षा नृणां द्रष्टा सूर्यः सीमेते द्यावापृथिव्यावभ्यचष्ट । सर्वतः पश्यति । ऋतस्य योना जलस्य स्थानेऽंतरिक्षे मदंती हृष्यंत्यौ विघृते । घृतमस्या ओषधयो जलममुष्या इति । एवंविधरसोपेते समानेन । समानमेतदुदकमुच्चैत्यव चाहभिः । भूमिं पर्जन्या जिन्वंति दिवं जिन्वंत्यग्नय इति परस्परप्रीणनाख्येनैकेन क्रतुना कर्मणा संविदाने परस्परमैकमत्यं प्राप्ते ते द्यावापृथिव्यौ नाना पृथग्भूतं सदनं स्थानं चक्राते । तथा च श्रुतिः । इमौ वै लोकौ सहास्तां तौ व्यैतामिति । तत्र दृष्टांतः । यथा वेः कुलायं नाना भवति तद्वत् ॥ अचष्ट । चक्षिङ् व्यक्तायां वाचीत्यस्य लङि स्कोः संयोगाद्योरिति ककारलोपः । निघातः । संविदाने । विद ज्ञान इत्यस्य समो गमीत्यादिनात्मनेपदे शानच् । चित्त्वादंतोदात्तः ॥

॥ अथ सप्तमी ॥

समान्या वियुते दूरेअंते ध्रुवे पदे तस्थतुर्जागरूके ।
उत स्वसारा युवती भवंती आदु ब्रुवाते मिथुनानि नाम ॥ ७ ॥

समान्या। वियुते इति विऽयुते। दूरेअंते इति दूरेऽअंते। ध्रुवे। पदे। तस्थतुः। जागरूके इति।
उत। स्वसारा। युवती इति। भवंती इति। आत्। ऊं इति। ब्रुवाते इति। मिथुनानि।
नाम ॥ ७ ॥

समान्या समाने परस्परप्रीणनाख्येन कर्मणैकमत्यं गते वियुते वियुज्य वर्तमाने दूरेअंते। दूरेऽंतोऽवसानं ययोस्ते दूरेअंते। अविनाशिन्यौ ते द्यावापृथिव्यौ जागरूके जागरणशीले सत्यौ ध्रुवेऽविनाशिनि पदेऽंतरिक्षे तस्थतुः । तिष्ठतः । उतापि च युवती नित्यतरुणे स्वसारा भगिन्यावेकस्मादात्मनो जाते इति भवंती तस्थतुरित्यन्वयः । आदनंतरं मिथुनानि द्वंद्वानि नाम उर्वी पृथ्वी बहुले दूरेअंते

रोदसी पुरोहिते इत्यादीनि नामानि ब्रुवाते। ते परस्परं ब्रूतः। उर्व्यादिभिर्द्वंद्वनामभिर्द्यावापृथिव्यावुच्येते इत्यर्थः॥ समान्या। सुपां सुलुगिति विभक्तेर्डादेशः। दूरेअंते। इण् गतौ। दुरीणो लोपश्च। उ० २.२१। इति रक्प्रत्ययो धातोर्लोपश्च। रो रीति रेफलोपः। द्रलोप इति दीर्घः। अंतशब्दोऽमेरसिहसीत्यादिना तन्प्रत्ययांतः। सप्तम्युपमानेति बहुव्रीहिः। हलदंतादिति सप्तम्या अलुक्। पूर्वपदस्वरः। जागरूके। जागृ निद्राक्षय इत्यस्माज्जाच्छील्यार्थे जागरूकः। पा० ३.२.१६५। इत्यूकप्रत्ययः। प्रत्ययस्वरः। स्वसारा। न षट्स्वस्रादिभ्य इति ङीपः प्रतिषेधः॥

॥ अथाष्टमी ॥

विश्वेदे॒ते जनि॑मा॒ सं वि॑विक्तो म॒हो दे॒वान्बिभ्र॑ती॒ न व्य॑थेते।
एज॑द्ध्रु॒वं प॑त्यते॒ विश्व॒मेकं॒ चर॑त्पत॒त्रि विषु॑णं॒ वि जा॒तं॥ ८॥

विश्वा॑। इत्। ए॒ते इति॑। जनि॑म। सं। वि॒वि॒क्तः॒। म॒हः। दे॒वान्। बिभ्र॑ती॒ इति॑। न। व्य॒थे॒ते॒ इति॑।
एज॑त्। ध्रु॒वं। प॒त्य॒ते॒। विश्वं॑। एकं॑। चर॑त्। प॒त॒त्रि। विषु॑णं। वि। जा॒तं॥ ८॥

एते द्यावापृथिव्यौ विश्वेज्जनिम सर्वाण्यपि भूतजातानि संविविक्तः। अवकाशप्रदानेन संविभज्य कुरुतः। किंच महो महतो देवानिंद्रसूर्यादीन् सरित्समुद्रपर्वतादींश्च बिभ्रती बिभ्राणे अपि न व्यथेते। न खिद्येते। किंच एजज्जंगमात्मकं ध्रुवं स्थावरात्मकं च विश्वं जगदेकं स्थानं पृथिवीमेव पत्यते। अभिगच्छति। तथा चरच्चंचलं पशुजातं पतत्रि पक्षिजातं च विषुणं विष्वक् नानारूपमनयोर्मध्ये वितिष्ठते। योग्यक्रियाध्याहारः॥ विविक्तः। विचिर् पृथग्भावे। जुहोत्यादिः। निघातः। बिभ्रती। डुभृञ् धारणपोषणयोरित्यस्य शतरि नाभ्यस्ताच्छतुरिति नुमभावः। अभ्यस्तस्वरः। एजत्। एजृ कंपने। शतरि रूपं। पत्यते। पद गतौ। दिवादिरात्मनेपदी। दकारस्य तकारो व्यत्ययेन। निघातः॥

॥ अथ नवमी ॥

सना॑ पुरा॒णमध्ये॑म्या॒रान्म॒हः पि॒तुर्ज॑नि॒तुर्जा॒मि तन्नः॑।
दे॒वासो॒ यत्र॑ पनि॒तार॒ एवै॑रु॒रौ प॒थि व्यु॑ते त॒स्थुरं॒तः॥ ९॥

सना॑। पु॒रा॒णं। अधि॑। ए॒मि॒। आ॒रात्। म॒हः। पि॒तुः। ज॒नि॒तुः। जा॒मि। तत्। नः॒।
दे॒वासः॑। यत्र॑। प॒नि॒तारः॑। एवैः॑। उ॒रौ। प॒थि। विऽउ॑ते। त॒स्थुः। अं॒तरिति॑॥ ९॥

हे द्यौर्महो महत्याः पितुः सर्वस्य पालयित्र्या जनितुर्जनयित्र्यास्तव सना सनातनं पुराणं पूर्वक्रमागतं नोऽस्माकं तज्जामि जामित्वं। सर्वमेकस्माज्जातमिति द्यौर्भगिनी भवति। तादृशं भगिनीत्वं तदारादधुनाध्येमि। स्मरामि। दिवः पितृत्वे जनयितृत्वे च मंत्रवर्णः। द्यौर्मे पिता जनिता नाभिरत्र। ऋग्वे° १. १६४. ३३.। इति। यत्र यस्यां दिव्यंतर्मध्य उरौ विस्तीर्णे व्युते विविक्ते पथि नभसि पनितारस्त्वां स्तुवंतो देवासो देवा एवैर्गमनसाधनैः स्वैः स्वैर्वाहनैः सहिताः संतस्तस्थुः। तत्र स्थिता देवा मदीयं स्तोत्रं शृण्वंत्विति भावः॥ पुराणं। पुराशब्दात् शैषिकार्थे सायंचिरमिति ट्युप्रत्ययः। पुराणप्रोक्तेषु ब्राह्मणकल्पेष्विति निपातनात्तुडभावः। निपातनादेवांतोदात्तत्वं। एमि। इक् स्मरणे। अदादिः। लटि रूपं। निघातः। व्युते। वेञ् तंतुसंताने। कर्मणि क्तः। यजादित्वात्संप्रसारणं। गतिरनंतर इति गतेः प्रकृतिस्वरः। तस्थुः। तिष्ठतेर्लिटि रूपं। यत्रयोगादनिघातः॥

॥ अथ दशमी ॥

इ॒मं स्तोमं॑ रोदसी॒ प्र ब्र॑वीम्यृदूद॒राः॑ शृण्वन्न॒ग्निजि॒ह्वाः।
मि॒त्रः स॒म्राजो॒ वरु॑णो॒ युवा॑न आ॒दि॒त्यासः॑ क॒वयः॑ पप्रथा॒नाः॥१०॥

इ॒मं। स्तोमं॑। रो॒द॒सी॒ इति॑। प्र। ब्र॒वी॒मि॒। ऋ॒दू॒द॒राः॑। शृ॒ण्व॒न्। अ॒ग्नि॒ऽजि॒ह्वाः।
मि॒त्रः। सं॒ऽराजः॑। वरु॑णः। युवा॑नः। आ॒दि॒त्यासः॑। क॒वयः॑। प॒प्र॒था॒नाः॥१०॥

हे रोदसी द्यावापृथिव्याविमं युष्मदीयं स्तोमं प्रब्रवीमि। प्रकर्षेण वदामि। ऋदूदराः। ऋदु मृदु उदरं येषां ते ऋदूदराः। यद्वा मृदुरुदरे सोमो येषां ते ऋदूदराः। अग्निजिह्वाः। अग्निर्जिह्वास्थानीयो येषां ते तथोक्ताः। सम्राजः सम्यग्दीप्यमाना युवानो नित्यतरुणाः। यद्वा यजमानानभिमतफलैर्मिश्रीकुर्वंतः। कवयः क्रांतदर्शिनः पप्रथानाः स्वानि स्वानि कर्माणि प्रथयंतो मित्रादयो देवाः शृण्वन्। तदिदं स्तोत्रं शृण्वंतु॥ शृण्वन्। श्रु श्रवण इत्यस्य लेट्यडागमः। अग्निजिह्वाः। चित्क्रादित्वादंतोदात्तत्वं। पप्रथानाः। प्रथ प्रख्यान इत्यस्य कानचि रूपं। चित्त्वादंतोदात्तः॥

॥ इति तृतीयस्य तृतीये पंचविंशो वर्गः ॥

॥ अथैकादशी ॥

हिरण्यपाणिः सविता सुजिह्वस्त्रिरा दिवो विदथे पत्यमानः ।
देवेषु च सवितः श्लोकमश्रेरादस्मभ्यमा सुव सर्वतातिं ॥ ११ ॥
हिरण्यऽपाणिः । सविता । सुऽजिह्वः । त्रिः । आ । दिवः । विदथे । पत्यमानः ।
देवेषु । च । सवितरिति । श्लोकं । अश्रेः । आत् । अस्मभ्यं । आ । सुव । सर्वऽतातिं ॥ ११ ॥

हिरण्यपाणिः । दानार्थं हिरण्यं पाणौ हस्ते यस्य स तथोक्तः । यद्वा देवकर्तृकयागे सवितुर्ऋत्विग्भूतस्य हस्ते प्राशित्रं भक्षणार्थमध्वर्यवो ददुः । तत्प्राशित्रं तस्य हस्तौ चिच्छेद । ततोऽध्वर्यवो हिरण्मयौ हस्तौ कृत्वा संदधुः । ततोऽयं हिरण्यपाणिः । तथा च कौषीतकं । सवित्रे प्राशित्रं प्रतिजहुस्तत्तस्य पाणी प्रचिच्छेद तस्मै हिरण्मयौ प्रतिदधुस्तस्माद्धिरण्यपाणिरिति । सुजिह्वः शोभनवाक् सविता विदथे यज्ञे त्रिस्त्रिषु सवनेषु दिवो नभसः सकाशादापत्यमान आगच्छन् भवतीति शेषः । परोऽर्द्धर्चः प्रत्यक्षः । हे सवितस्त्वं देवेषु स्तोतृषु विद्यमानं च श्लोकं । श्लोक्यतेऽनेनेति श्लोकः स्तोत्रं । तदश्रेः । प्राप्नुहि च । आदनंतरं सर्वतातिं सर्वमपेक्षितं फलमस्मभ्यमासुव । प्रेरय ॥ हिरण्यपाणिः । हिरण्यशब्दं यास्को बहुधा निर्वक्ति । हिरण्यं कस्माद्ध्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमित्यादिना । नि॰ २.१०. । पाणिशब्दं च निर्विवेच । पाणिः पणायतेः पूजाकर्मण इति ॥ हर्य कांतिगत्योः । हर्यतेः कन्यन् हिर चेति कन्यन् हिर इत्ययमादेशो धातोः । नित्त्वादाद्युदात्तः । बहुव्रीहौ पूर्वपदस्वरः । पत्यमानः । पद गतौ । दिवादिरात्मनेपदी । दकारस्य तकारश्छांदसः । अश्रेः । श्रिञ् सेवायामित्यस्य लङि बहुलं छंदसीति शपो लुक् । चवायोगे प्रथमेति न निघातः । सुव । षू प्रेरणे । तुदादिः । सर्वतातिं । सर्वदेवात्तातिल् स्वार्थिकः । लित्स्वरः ॥

॥ अथ द्वादशी ॥

सुकृत्सुपाणिः स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात् ।
पूषण्वंत ऋभवो मादयध्वमूर्ध्वग्रावाणो अध्वरमतष्ट ॥ १२ ॥
सुऽकृत् । सुऽपाणिः । स्वऽवान् । ऋतऽवा । देवः । त्वष्टा । अवसे । तानि । नः । धात् ।
पूषण्ऽवंतः । ऋभवः । मादयध्वं । ऊर्ध्वऽग्रावानः । अध्वरं । अतष्ट ॥ १२ ॥

सुकृत्सुष्ठु जगतः कर्ता सुपाणिः कल्याणपाणिः स्ववान् धनवानृतावा सत्यसंकल्पस्त्वष्टा देवस्तानि यान्यस्माकमपेक्षितान्यवसे रक्षणाय नोऽस्मभ्यं धात् । ददातु । ऋभवः । उरु भांतीत्यृभवः । हे ऋभवः पूषखंतः पूष्णा सहिता यूयं मादयध्वं । अस्मान् धनप्रदानेन हृष्टान् कुरुत । ऊर्ध्वग्रावाणः सोमाभिषवार्थमुद्यतग्रावाणः संत ऋत्विज इममस्मदीयमध्वरमतष्ट । अकुर्वन् ॥ अतष्ट । तक्षू त्वक्षू तनूकरणे । ऊदित्त्वादिडभावः । झलो झलीति सिलोपः । स्कोः संयोगाद्योरिति ककारलोपः । बहुवचनस्यैकवचनं छांदसं ॥

॥ अथ त्रयोदशी ॥

विद्युद्रथा मरुत ऋष्टिमंतो दिवो मर्या ऋतजाता अयासः ।
सरस्वती शृणवन्यज्ञियासो धाता रयिं सहवीरं तुरासः ॥ १३ ॥
विद्युत्ऽरथाः । मरुतः । ऋष्टिऽमंतः । दिवः । मर्याः । ऋतऽजाताः । अयासः ।
सरस्वती । शृणवन् । यज्ञियासः । धात । रयिं । सहऽवीरं । तुरासः ॥ १३ ॥

विद्युद्रथा विद्योतमानरथोपेता ऋष्टिमंतो दीप्तिमंतः । ऋष्टिरायुधविशेषः । तद्वंतो वा दिवो द्योतमाना मर्याः शत्रूणां मारयितार ऋतजाता उदकाद्यज्ञाद्वा प्रादुर्भूताः । यद्वा ऋतमुदकं जातं येभ्यस्ते ऋतजाताः । अयासः सततगमनशीला यज्ञियासो यज्ञार्हा मरुतः सरस्वती । गद्यपद्यरूपेण प्रसरणमस्या अस्तीति सरस्वती । वाग्देवता च । एते सर्वे देवा मदीयमिमं स्तोमं शृणवन् । शृखंतु । तुरासोऽस्माकं फलप्रदाने त्वरणयुक्ता हे मरुतः सहवीरं पुत्रसहितं रयिं धनं धात । अस्मभ्यं धत्त ॥ धात । दधातेर्लोटि बहुलं छंदसीति शपो लुक् । तप्तनप्तनथनाश्चेति तबादेशः । पादादित्वादनिघातः । तपः पित्त्वादनुदात्तत्वे धातुस्वरः । तुरासः । तुर त्वरणे । इगुपधलक्षणः कः । आमंत्रितत्वान्निघातः ॥

॥ अथ चतुर्दशी ॥

विष्णुं स्तोमासः पुरुदस्ममर्का भगस्येव कारिणो यामनि ग्मन् ।
उरुक्रमः ककुहो यस्य पूर्वीर्न मर्धंति युवतयो जनित्रीः ॥ १४ ॥
विष्णुं । स्तोमासः । पुरुऽदस्मं । अर्काः । भगस्यऽइव । कारिणः । यामनि । ग्मन् ।
उरुऽक्रमः । ककुहः । यस्य । पूर्वीः । न । मर्धंति । युवतयः । जनित्रीः ॥ १४ ॥

स्तोमासः। स्तूयंत एभिरिति स्तोमाः स्तोत्राणि। अर्का अर्चनीयानि शस्त्राणि च भगस्येव धनस्य कारिणः कर्तॄणीव स्थितानि तानि यामनि संततं प्रतायमानेऽस्मिन्यज्ञे पुरुदस्मं बहुकर्माणं। यद्वा बहून् दस्यत्युपक्षपयतीति पुरुदस्मः। तं विष्णुं देवं ग्मन्। गच्छंतु। पूर्वीर्बह्व्यो जनित्रीः सर्वस्य जनयित्र्यो युवतयः परस्परमसंकीर्णाः ककुहः। कं स्कुभ्नंति विस्तारयंतीति ककुभो दिशः। यद्वा ककुबुच्छ्रयार्थः। उच्छ्रिता इव हि दिशो वृक्षाग्रेषूपलभ्यमानास्तिष्ठंति। एता दिशो विष्णोराज्ञां न मर्धंति। न हिंसंति। स विष्णुरुरुक्रमः। उरुर्महान् क्रमः पादविक्षेपो यस्य सः। त्रिविक्रमावतार एकेनैव पादेन सर्वं जगदाक्रम्यातिष्ठत॥ ग्मन्। गमेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक्। ककुभः। पृषोदरादित्वाद्रूपस्वरसिद्धिः॥

॥ अथ पंचदशी ॥

इंद्रो विश्वैर्वीर्यैः३ः पत्यमान उभे आ पप्रौ रोदसी महित्वा।

पुरंदरो वृत्रहा धृष्णुषेणः संगृभ्या न आ भरा भूरि पश्वः॥ १५॥

इंद्रः। विश्वैः। वीर्यैः। पत्यमानः। उभे इति। आ। पप्रौ। रोदसी इति। महिऽत्वा।

पुरंऽदरः। वृत्रऽहा। धृष्णुऽसेनः। संऽगृभ्य। नः। आ। भर। भूरि। पश्वः॥ १५॥

विश्वैः सर्वैर्वीर्यैः सामर्थ्यैः पत्यमानः प्राप्यमाणः स इंद्र उभे रोदसी द्यावापृथिव्यौ महित्वा स्वकीयेन महिम्नापप्रौ। पूरयामास। शेषः प्रत्यक्षकृतः। पुरंदरः शत्रुपुरां दारयिता वृत्रहा वृत्रस्य हंता धृष्णुषेणः पराभिभवनशीलसेनोपेतः स त्वं पश्वः पशून् संगृभ्य संगृह्य नोऽस्मभ्यं भूरि प्रभूतं यथा भवति तथाभर। देहि। यद्वा पश्वः पशोर्भूरि बहुत्वं बहून् पशूंश्च यच्छेति॥ पुरंदरः। दॄ विदारण इत्यस्य पुरशब्द उपपदे पूःसर्वयोर्दारिसहोरिति खच्प्रत्ययः। वाचंयमपुरंदरौ चेति निपातनात्पूर्वपदस्यामागमः। चित्त्वादंतोदात्तः। धृष्णुषेणः। पूर्वपदादिति संहितायां षत्वं। यदा षत्वं तदा रषाभ्यामिति णत्वं। संगृभ्य। ग्रहेर्ल्यपि स्थानिवद्भावात्संप्रसारणं। हृग्रहोर्भश्छंदसीति भत्वं। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। पश्वः। पशुशब्दात् शसः जसादिषु छंदसि वावचनमिति सवर्णदीर्घाभावः॥

॥ इति तृतीयस्य तृतीये षड्विंशो वर्गः॥

॥ अथ षोडशी ॥

नासत्या मे पितरा बंधुपृच्छा सजात्यमश्विनोश्चारु नाम ।
युवं हि स्थो रयिदौ नो रयीणां दात्रं रक्षेथे अकवैरदब्धा ॥ १६ ॥
नासत्या । मे । पितरा । बंधुऽपृच्छा । सऽजात्यं । अश्विनोः । चारु । नाम ।
युवं । हि । स्थः । रयिऽदौ । नः । रयीनां । दात्रं । रक्षेथे इति । अकवैः । अदब्धा ॥ १६ ॥

हे नासत्यावश्विनौ बंधुपृच्छा । हविःप्रदातृत्वेन बंधूनस्मानपेक्षितमर्थं पृच्छत इति बंधूनां प्रष्टारौ । युवां मे पितरौ पालयितारौ भवतं । युवयोरश्विनोः सजात्यं सजाते भवं संगतं चारु नाम कमनीयं खलु । हे अश्विनौ युवं युवां नोऽस्मभ्यं रयीणां धनानां मध्ये रयिदावुत्तमस्य धनस्य दातारौ स्थो हि । भवथः खलु । किंच अदब्धा केनाप्यतिरस्कृतौ युवां दात्रं हविषां दातारं मामकवैरकुत्सितैः शोभनैः कर्मभी रक्षेथे । पालयतं ॥ नासत्या । नभ्राण्नपादित्यादिना निपातनान्नञः प्रकृतिभावः । बंधुपृच्छा । पृच्छेः क्विप् । सुपां सुलुगिति सुपो डादेशः । सजात्यं । सजाते भवं । भवे छंदसीति यत् । तित्स्वरितः । स्थः । अस्तेर्लटि रूपं । हियोगादनिघातः ॥

॥ अथ सप्तदशी ॥

महत्तद्वः कवयश्चारु नाम यद्ध देवा भवथ विश्व इंद्रे ।
सख ऋभुभिः पुरुहूत प्रियेभिरिमां धियं सातये तक्षता नः ॥ १७ ॥
महत् । तत् । वः । कवयः । चारु । नाम । यत् । ह । देवाः । भवथ । विश्वे । इंद्रे ।
सखा । ऋभुऽभिः । पुरुऽहूत । प्रियेभिः । इमां । धियं । सातये । तक्षत । नः ॥ १७ ॥

हे कवयो मेधाविनो हे देवा वो युष्माकं तत्तादृशं महत्प्रभूतं नाम कर्म नमनं वा चारु मनोहरं खलु । यद्येन कर्मणा विश्वे सर्वे यूयमिंद्र इंद्रोपलक्षिते लोके देवा भवथ ह देवत्वं प्राप्नुथ खलु । हे पुरुहूत बहुभिराहूत हे इंद्र त्वं प्रियेभिः प्रियतमैर्ऋभुभिः । ऋतेन भवंत्यृतेन भांतीति वा । ऋभुभिर्देवैः सखासि । इंद्रसहिता ऋभवो यूयमिमामस्मदीयां धियं स्तुतिं नोऽस्माकं सातये धनादिलाभार्थं तक्षत । स्वीकुरुत ॥ यत् । सुपां सुलुगित्यादिना सुपो लुक् । भवथ । भवतेर्लटि रूपं । यद्वृत्तयोगादनिघातः । सख ऋभुभिरित्यस्य संहितायामृत्यक इति प्रकृतिभावो ह्रस्वत्वं च ॥

॥ अथाष्टादशी ॥

अर्यमा णो अदितिर्यज्ञियासोऽदब्धानि वरुणस्य व्रतानि ।
युयोत नो अनपत्यानि गंतोः प्रजावान्नः पशुमाँ अस्तु गातुः ॥ १८ ॥

अर्यमा । नः । अदितिः । यज्ञियासः । अदब्धानि । वरुणस्य । व्रतानि ।
युयोत । नः । अनपत्यानि । गंतोः । प्रजाऽवान् । नः । पशुऽमान् । अस्तु । गातुः ॥ १८ ॥

अर्यमा । ऋच्छति सर्वदा गच्छतीत्यर्यमा सूर्यः । अदितिर्देवमाता यज्ञियासो यज्ञार्हा देवा यस्य वरुणस्य व्रतानि कर्माण्यदब्धान्यहिंसितानि भवंति स वरुणस्ते चार्यमादयो देवा नोऽस्मान्रक्षंत्विति शेषः । ते यूयं नोऽस्माकमनपत्यान्यपत्यानां पुत्राणामहितानि कर्माणि । यद्वा पतनकारणं न भवतीत्यपत्यं । तदन्यान्यनपत्यानि पतनकारणानि कर्माणि गंतोः सन्मार्गाद्युयोत । पृथक्कुरुत । यथा तान्यहितानि कर्माणि न स्पृशंति तथा कुरुतेत्यर्थः । अथ गातुः । गायंति स्तुवंतीद्रादीनत्रेति गातुर्गृहं । नोऽस्मदीयं गृहं पशुमान्पश्वादियुक्तं प्रजावानपत्योपेतमस्तु ॥ अर्यमा । ऋ गतौ । श्वन्नुक्षन्प्लीहन्क्लेदन्नित्यादिना निपातनाद्रूपसिद्धिः । अदितिः । दीङ् क्षय इत्यस्य कर्तरि क्तिच् । नञा समासः । अदितिरदीनेति यास्कः । छांदसं ह्रस्वत्वं । नञः स्वरः । युयोत । यौतेरमिश्रीभावकर्मणो लोटि बहुलं छंदसीति शपः श्लुः । तप्तनबिति तप्रत्ययस्य तबादेशः । गंतोः । गम्लृ गतौ । सितनिगमिमसिसच्यविधाञ्क्रुशिभ्य इति तुन्प्रत्ययः । नित्त्वादाद्युदात्तः । गातुः । गापाहिभ्यश्चेति तुप्रत्ययः ॥

॥ अथैकोनविंशी ॥

देवानां दूतः पुरुध प्रसूतोऽनागान्नो वोचतु सर्वताता ।
शृणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्षत्रैरुर्व१ंतरिक्षं ॥ १९ ॥

देवानां । दूतः । पुरुध । प्रऽसूतः । अनागान् । नः । वोचतु । सर्वऽताता ।
शृणोतु । नः । पृथिवी । द्यौः । उत । आपः । सूर्यः । नक्षत्रैः । उरु । अंतरिक्षं ॥ १९ ॥

पुरुध पुरुषु बहुषु देशेषु प्रसूतोऽग्निहोत्रार्थं विहितः । यद्वा पुरुभिर्यजमानैः प्रसूतो यष्टव्यदेवाह्वानार्थं प्रेरितो देवानां दूतः । तथा च तैत्तिरीयकं । अग्निर्देवानां दूत आसीदिति । तादृशोऽग्निः कर्मकर्तृसाधनवैगुण्येन सापराधानप्यस्माननागाननागसः सर्वताता सर्वत्र वोचतु । ब्रवीतु । किंच पृथिवी द्यौश्च उता-

पिचापः सूर्यश्च नक्षत्रैरुरु विस्तीर्णमंतरिक्षं च। एते सर्वे देवा नोऽस्मदीयां स्तुतिं शृणोतु। शृखंतु। प्रत्येकविवक्षयैकवचनं॥ प्रसूतः। षू प्रेरणे। कर्मणि क्तः। गतिरनंतर इति गतेः प्रकृतिस्वरः। अनागान्। शसि सकारलोपश्छांदसः। सवर्णदीर्घे कृते तस्माच्छसो न इति नत्वं। वोचतु। वच परिभाषणे। व्यत्ययो बहुलमिति शपोऽङादेशः। वच उम्। गुणः। निघातः। नक्षत्रैः। नक्ष गतौ। अमिनक्षियजिबंधिपतिभ्योऽत्रन्नित्यत्रन्प्रत्ययः। नित्त्वादाद्युदात्तः। यद्वा न क्षरति न क्षीयत इति वा नक्षत्रं। नभ्राण्नपादिति नञः प्रकृतिभावः। नञः स्वरः॥

॥ अथ विंशी ॥

शृ॒ण्वंतु॑ नो॒ वृष॑णः॒ पर्व॑तासो ध्रु॒वक्षे॑मास॒ इळ॑या॒ मदं॑तः।
आ॒दि॒त्यैर्नो॒ अदि॑तिः शृणोतु॒ यच्छं॑तु नो म॒रुतः॒ शर्म॑ भ॒द्रं॥२०॥
शृ॒ण्वंतु॑। नः॒। वृष॑णः। पर्व॑तासः। ध्रु॒वऽक्षे॑मासः। इळ॑या। मदं॑तः।
आ॒दि॒त्यैः। नः॒। अदि॑तिः। शृ॒णो॒तु॒। यच्छं॑तु। नः॒। म॒रुतः॑। शर्म॑। भ॒द्रं॥२०॥

वृषणोऽभिमतफलसेचका मरुतः पर्वतासः। पृणंति पूरयंत्यर्थिनां कामानिति पर्वता ग्रावाभिमानिनो देवाः ध्रुवक्षेमासो निश्चलस्थाना इळया हविर्लक्षणेनान्नेन मदंतो माद्यंतः संतो नोऽस्मदीयां स्तुतिं शृण्वंतु। किंच आदित्यैरपत्यभूतैरादित्यैरुपेतादितिर्नोऽस्मदीयां स्तुतिं शृणोतु। मरुतश्च नोऽस्मभ्यं भद्रं कल्याणकरं शर्म सुखं यच्छंतु। ददतु॥ आदित्यैः। अदितेरपत्यानीत्यर्थे दित्यदितीति ण्यः। प्रत्ययस्वरेणांतोदात्तः। सुपा सहैकादेशे कृत एकादेश उदात्तः॥

प्रवत्स्यन्यजमानः सदा सुग इत्यृचं जपन् गच्छेत्। सूचितं च। सदा सुगः पितुमाँ अस्तु पंथा इति पंथानमवरुह्य। आ॰ २.५.। इति॥

॥ सैषा सूक्त एकविंशी॥

सदा॑ सु॒गः पि॑तु॒माँ अ॑स्तु॒ पंथा॒ मध्वा॑ देवा॒ ओष॑धीः सं पि॑पृक्त।
भगो॑ मे अग्ने स॒ख्ये न मृ॑ध्या॒ उद्रा॒यो अ॑श्यां॒ सद॑नं पु॒रु॒क्षोः॥२१॥
सदा॑। सु॒ऽगः। पि॒तु॒ऽमान्। अ॒स्तु॒। पंथाः॑। मध्वा॑। दे॒वाः॒। ओष॑धीः। सं। पि॒पृ॒क्त॒।
भगः॑। मे॒। अ॒ग्ने॒। स॒ख्ये। न। मृ॒ध्याः॒। उत्। रा॒यः। अ॒श्यां॒। सद॑नं। पु॒रु॒ऽक्षोः॥२१॥

हे अग्ने अस्माकं पंथा मार्गः सदा सर्वदा सुगः सुखेन गंतुं शक्यः पितुमा-

नन्नवांश्चास्तु। हे देवा मध्वा माधुर्योपेतेनोदकेनौषधीः संपिपृक्त। संपर्चयत। सेचयतेत्यर्थः। हे अग्ने त्वया सख्ये संजाते सति मे मम भगो धनं न मृध्याः। न विनश्यतु। किंच रायो धनस्य पुरुक्षोर्बह्वन्नस्य च सदनं स्थानमुदश्यां। प्राप्नुयां॥ सदा। स्वरादिष्वाद्युदात्तत्वेन पाठादाद्युदात्तः। पिपृक्त। पृची संपर्के। लोटि बहुलं छंदसीति शपः श्लुः। बहुलं छंदसीत्यभ्यासस्येत्वं। मृध्याः। मृधिर्हिंसार्थः। लिङि तिङां तिङो भवंतीति तिपः सिप्॥

पशौ पुरोडाशस्विष्टकृतः स्वदस्व हव्येति याज्या। सूचितं च। स्वदस्व हव्या समिषो दिदीहीति पुरोडाशस्विष्टकृतः। आ॰ ३.५.। इति॥

॥ सैषा सूक्ते द्वाविंशी॥

स्वदस्व हव्या समिषो दिदीह्यस्मद्र्य१क्सं मिमीहि श्रवांसि।

विश्वाँ अग्ने पृत्सु ताञ्जेषि शत्रूनहा विश्वा सुमना दीदिही नः॥२२॥

स्वदस्व। हव्या। सं। इषः। दिदीहि। अस्मद्र्यक्। सं। मिमीहि। श्रवांसि।

विश्वान्। अग्ने। पृत्ऽसु। तान्। जेषि। शत्रून्। अहा। विश्वा। सुऽमनाः। दीदिहि। नः॥२२॥

हे अग्ने हव्या हवनयोग्यानि हवींषि स्वदस्व। स्वादय। अस्माकमिषोऽन्नानि सं दिदीहि। सम्यक् प्रकाशय। दीपितानि तानि श्रवांस्यन्नान्यस्मद्र्यगस्मदभिमुखानि सं मिमीहि। संमानय। कुर्वित्यर्थः। ततः पृत्सु संग्रामेषु तान्बाधकान्विश्वान् शत्रून् जेषि। जय। अथ सुमनाः शोभनमनस्कः सन् नोऽस्माकं विश्वाहा सर्वाण्यहानि दीदिहि। अग्निहोत्रादिकर्मयोग्यानि प्रकाशय॥ स्वदस्व। स्वद आस्वादने। लोटि रूपं। थासो लसार्वधातुकस्वरे धातुस्वरः। दिदीहि। दिवु क्रीडादावित्यस्य लोटि बहुलं छंदसीति विकरणस्य श्लुः। परत्वात् हलि चेति दीर्घत्वे कृते पश्चाद्धलि लोपः। निघातः। अस्मद्र्यक्। अस्मानंचतीत्यंचतेः क्विप्। विष्वग्देवयोश्च टेरिति यणः स्वरितत्वं। मिमीहि। माङ् माने शब्दे च। जुहोत्यादिः। तस्य लोटि व्यत्ययेन परस्मैपदं। निघातः। सुमनाः। सोर्मनसीत्युत्तरपदाद्युदात्तत्वं। दीदिहि। दिवेर्यङ्लुकि लोटि तुजादित्वादभ्यासस्य दीर्घः॥

॥ इति तृतीयस्य तृतीये सप्तविंशो वर्गः॥

उषसः पूर्वा इति द्वाविंशत्यृचं द्वितीयं सूक्तं त्रैष्टुभं। उषस इत्यनुक्रमणिका। प्रजापतेरार्षं वैश्वादेवं प्रजापतिर्हि वैश्वदेवं हेति पूर्वसूक्ते हिहशब्दप्रयोगात्। सूक्त-

विनियोगो लैंगिकः । अत्राद्योषस्या ततः परं नवर्चोऽग्न्यादिदेवतास्ततः पराहोरात्रदेवताका ततश्चतस्रो रोदस्योः पंचदशी द्युनिशोर्वा षोडशी दिग्देवताका ततः षडृचो वर्षत इंद्रस्य केचिदग्नेस्त्वष्टुश्चेति मन्यंते ॥

॥ तत्र प्रथमा ॥

उषसः पूर्वा अध यद्व्यूषुर्महद्वि जज्ञे अक्षरं पदे गोः ।
व्रता देवानामुप नु प्रभूषन्महद्देवानामसुरत्वमेकं ॥ १ ॥
उषसः । पूर्वाः । अध । यत् । विऽऊषुः । महत् । वि । जज्ञे । अक्षरं । पदे । गोः ।
व्रता । देवानां । उप । नु । प्रऽभूषन् । महत् । देवानां । असुरऽत्वं । एकं ॥ १ ॥

पूर्वा उदयकालात्प्राचीना उषसो यद्यदा व्यूषुर्व्युच्छंति अध तदानीमक्षरं । न क्षरतीत्यक्षरं । अविनाश्यादित्याख्यं महत्प्रभूतं ज्योतिर्गोरुदकस्य पदे स्थाने समुद्रे नभसि वा विजज्ञे । उत्पद्यते । अथोदिते सूर्ये प्रभूषन्नग्निहोत्रादिकर्मसु प्रभवितुमिच्छन्यजमानो व्रता कर्माणि देवानां नु क्षिप्रमुप समीपं तिष्ठति । योग्यक्रियाध्याहारः । तदिदं देवानामेकं मुख्यमसुरत्वं । अस्यति क्षिपति सर्वानित्यसुरः प्रबलः । तस्य भावोऽसुरत्वं प्राबल्यं । महदैश्वर्यं ॥ व्यूषुः । उष प्लुष दाह इत्यस्य विपूर्वस्य लिट्युसि रूपं । सहेति योगविभागात्समासः । यद्वृत्तयोगादनिघातः । प्रभूषन् । भवतेः सनि द्विर्वचनस्य छंदसि विकल्पितत्वादत्र द्विर्वचनाभावः । तदंताच्छतरि रूपं । प्रादिसमासः । शतुर्लसार्वधातुकस्वरे धातुस्वरः ॥

॥ अथ द्वितीया ॥

मो षू णो अत्र जुहुरंत देवा मा पूर्वे अग्ने पितरः पदज्ञाः ।
पुराण्योः सद्मनोः केतुरंतर्महद्देवानामसुरत्वमेकं ॥ २ ॥
मो इति । सु । नः । अत्र । जुहुरंत । देवाः । मा । पूर्वे । अग्ने । पितरः । पदऽज्ञाः ।
पुराण्योः । सद्मनोः । केतुः । अंतः । महत् । देवानां । असुरऽत्वं । एकं ॥ २ ॥

हे अग्ने अत्रास्मिन्काले देवा नोऽस्मान् सु सुष्ठु मो जुहुरंत । मा हिंस्युः । तथा पदज्ञाः कर्माण्यनुष्ठाय देवपदमनुभवंतः पूर्वे पुरातनाः पितरो मा हिंसिषुः । यस्मात्केतुर्यज्ञानां प्रज्ञापकः सूर्यः पुराण्योः पुरातनयोः सद्मनोः । सीदंत्यनयोर्देवमनुष्या इति सद्मनी रोदसी । तयोरंतर्मध्य उदेति । तस्मादत्र मा हिंसंत्वित्यर्थः ।

महद्देवानामित्यादि पूर्ववत् ॥ जुहुरंत । हृ प्रसह्यकरणे । लुङि जुहोत्यादित्वात् श्लुः । व्यत्ययेनात्मनेपदं । बहुलं छंदसीत्युत्वं । संज्ञापूर्वकस्य विधेरनित्यत्वाददादेशाभावेऽंतादेशः ॥

॥ अथ तृतीया ॥

वि मे पुरुत्रा पतयंति कामाः शम्यच्छा दीद्ये पूर्व्याणि ।
समिद्धे अग्नावृतमिद्वदेम महद्देवानामसुरत्वमेकं ॥३॥

वि । मे । पुरुऽत्रा । पतयंति । कामाः । शमि । अच्छ । दीद्ये । पूर्व्याणि ।
संऽइद्धे । अग्नौ । ऋतं । इत् । वदेम । महत् । देवानां । असुरऽत्वं । एकं ॥३॥

हे अग्ने मे मम पुरुत्रा बहवः कामा अभिलाषा वि पतयंति । विविधं गच्छंति । शम्यग्निष्टोमादिलक्षणं कर्माच्छाभिलक्ष्याहं पूर्व्याणि पुरातनानि स्तोत्राणि तदर्थं दीद्ये । दीपयामि । पश्चाद्यज्ञार्थमग्नौ समिद्धे दीप्यमाने सत्यृतमित् सत्यमेव वदेम । अनृतवचने हि यज्ञे वैगुण्यं स्यादिति ॥ पुरुत्रा । देवमनुष्यपुरुषेत्यादिना त्राप्रत्ययः । पतयंति । पतॢ गतौ । स्वार्थिको णिच् ॥

॥ अथ चतुर्थी ॥

समानो राजा विभृतः पुरुत्रा शये शयासु प्रयुतो वनानु ।
अन्या वत्सं भरति क्षेति माता महद्देवानामसुरत्वमेकं ॥४॥

समानः । राजा । विऽभृतः । पुरुऽत्रा । शये । शयासु । प्रऽयुतः । वना । अनु ।
अन्या । वत्सं । भरति । क्षेति । माता । महत् । देवानां । असुरऽत्वं । एकं ॥४॥

समानः साधारणः सर्वेषां । यद्वा एक एव राजा दीप्यमानोऽग्निः पुरुत्रा बहुषु देशेषु विभृतोऽग्निहोत्रार्थं विहृतो भवति । यद्वा राजाभिषुतः सोमः सर्वेषु देशेषु यज्ञार्थं विहृतो भवति । स चाग्निः सोमो वा शयासु । शेरते हविरादयः पदार्था अत्रेति शया वेद्यः । तासु शये । शेते । निवसति । वनानु अनुवनं वनेष्वरणिरूपेषु काष्ठेषु प्रयुतो विभक्तोऽग्निर्वर्तते । सोमश्चेद्वनेषु चमसेषु विभक्तो वर्तते । तस्य द्वे मातरौ द्यावापृथिव्यौ । तयोरन्या द्यौरस्या भूमेर्जायमानतया वत्सभूतमग्निं सोमं वा भरति । वृष्ट्यादिरूपेण भरति । पोषयति । माता वसुधा क्षेति । केवलं निवासयति ॥ विभृतः । हृञ् हरणे । कर्मणि क्तः । गतिरनंतर

इति गतेः प्रकृतिस्वरत्वं। पुरुचा। अधिकरणे चाप्रत्ययः। शये। शीङ् स्वप्ने। लोपस्त इति तकारलोपः। शीङः सार्वधातुके गुणः। शयासु। शीङ् स्वप्ने। एरजित्यधिकरणेऽच्। भरति। भृञ् भरणे। भूवादिः। एकान्याभ्यां समर्थाभ्यामिति पूर्वस्य निघातः। क्षेति। क्षि निवासगत्योरित्यस्य बहुलं छंदसीति विकरणस्य लुक्॥

॥ अथ पंचमी ॥

आक्षित्पूर्वास्वपरा अनूरुत्सद्यो जातासु तरुणीष्वंतः।
अंतर्वतीः सुवते अप्रवीता महद्देवानामसुरत्वमेकं॥५॥
आऽक्षित्। पूर्वासु। अपराः। अनूरुत्। सद्यः। जातासु। तरुणीषु। अंतरिति।
अंतःऽवतीः। सुवते। अप्रऽवीताः। महत्। देवानां। असुरऽत्वं। एकं॥५॥

पूर्वासु जीर्णास्वोषधीष्वाक्षिदावर्तमानस्तथापरा नव्या ओषधीरनूरुदनुरुंधन् उत्पत्त्यानुगुण्येनानुतिष्ठन्नग्निः सूर्यो वा सद्यो जातासु तदानीमुत्पन्नासु तरुणीषु पल्लवितास्वोषधीष्वंतर्वर्तते। ता ओषधयोऽप्रवीताः केनापि पुरुषेणानिषिक्तरेतस्का अनभ्यक्ता वा अंतर्वतीरग्निना गर्भवत्यो भूत्वा सुवते। फलं पुष्पं चोत्पादयंति। तदिदं देवानामैश्वर्यं॥ आक्षित्। क्षि निवासगत्योः। क्विप्। अनूरुत्। अनौ रुध कामे। अस्मात् क्विप्। अन्येषामपि दृश्यत इति दीर्घः। कृत्स्वरः। तरुणीषु। नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानं। पा॰ ४.१.१५.६.। इति ङीप्। अंतर्वतीः। ऋय इति मतुपो वत्वं। सुवते। षुञ् प्राणिगर्भविमोचन इत्यस्य लटि रूपं। निघातः॥

॥ इति तृतीयस्य तृतीयेऽष्टाविंशो वर्गः॥

॥ अथ षष्ठी ॥

शयुः परस्तादध नु द्विमाताबंधनश्चरति वत्स एकः।
मित्रस्य ता वरुणस्य व्रतानि महद्देवानामसुरत्वमेकं॥६॥
शयुः। परस्तात्। अध। नु। द्विऽमाता। अबंधनः। चरति। वत्सः। एकः।
मित्रस्य। ता। वरुणस्य। व्रतानि। महत्। देवानां। असुरऽत्वं। एकं॥६॥

द्विमाता। द्वे द्यावापृथिव्यौ मातरौ यस्य स द्विमाता। यद्वा द्वयोर्लोक-

योर्निर्माता सूर्यः परस्तात्पश्चिमायां दिश्यस्तवेलायां शयुः शयानोऽव्याप्रियमाणो भवति । अध नु अथोदयवेलायामेको द्यावापृथिव्योः साधारणस्तयो रसादानाद्वत्सः पुत्रोऽबंधनोऽप्रतिबद्धगतिरनालंबन एकः सन् चरति । नभसि गच्छति । ता तानीमानि मित्रस्य वरुणस्य मित्रावरुणयोर्व्रतानि कर्माणि ॥ शयुः । शीङ् स्वप्ने । भमृशीतृदृचरीत्यादिना उप्रत्ययः । द्विमाता । नद्यृतश्चेति प्राप्तस्य कप ऋतश्छंदसीति प्रतिषेधः ॥

॥ अथ सप्तमी ॥

द्विमाता होता विदथेषु सम्राळन्वग्रं चरति क्षेति बुध्नः ।
प्र रण्यानि रण्यवाचो भरंते महद्देवानामसुरत्वमेकं ॥ ७ ॥
द्विऽमाता । होता । विदथेषु । संऽराट् । अनु । अग्रं । चरति । क्षेति । बुध्नः ।
प्र । रण्यानि । रण्यऽवाचः । भरंते । महत् । देवानां । असुरऽत्वं । एकं ॥ ७ ॥

द्विमाता द्वयोर्लोकयोर्निर्माता विदथेषु यज्ञेषु होता देवानामाह्वाता सम्राट् यज्ञेषु सम्यग्राजमानोऽग्निरन्वग्रमग्रे दिवि चरति । सूर्यभूतस्तत्र वर्तते । बुध्नः सर्वस्य कर्मणो मूलभूतः सन् क्षेति । भूमौ वसति । यद्वाग्रं मुख्यं भागं चरति । भक्षयति । क्षेति । यज्वनां गृहेषु निवसति । यद्वा बुध्नः प्रतिष्ठांतेभागी स्विष्टकृद्रूपेण । प्रतिष्ठा वै स्विष्टकृदिति श्रुतेः । किंच रण्यवाचो रमणीयवाचः स्तोतारो रण्यानि रमणीयानि स्तोत्राणि भरंते । प्रणयंति । कुर्वंति । तदिदं देवानामैश्वर्यं ॥ चरति । चादिलोप इति न निघातः ॥

॥ अथाष्टमी ॥

शूरस्येव युध्यंतो अंतमस्य प्रतीचीनं ददृशे विश्वमायत् ।
अंतर्मतिश्चरति निष्षिधं गोर्महद्देवानामसुरत्वमेकं ॥ ८ ॥
शूरस्यऽइव । युध्यंतः । अंतमस्य । प्रतीचीनं । ददृशे । विश्वं । आऽयत् ।
अंतः । मतिः । चरति । निःऽसिधं । गोः । महत् । देवानां । असुरऽत्वं । एकं ॥ ८ ॥

अंतमस्य समीपे वर्तमानस्य दावाग्नेरायदभिमुखमागच्छद्विश्वं भूतजातं प्रतीचीनं पराङ्मुखं ददृशे । दृश्यते । तत्र दृष्टांतः । शूरस्येव । यथा युध्यतो युद्धं कुर्वाणस्य शूरस्य समर्थस्य राज्ञोऽभिमुखमागच्छत्परबलं पराङ्मुखं दृश्यते तद्वत् ।

मतिः सर्वैर्ज्ञायमानः सोऽग्निर्गोरुदकस्य निःषिधं हिंसिकां दीप्तिमंतश्चरति । अतर्धारयति ॥ युध्यतः । युध संप्रहारे । दिवादिः । तस्य शतरि रूपं । अंतमस्य । अंतशब्दादत इनिठनाविति ठन् । अतिशयेनांतिक इत्यर्थे तमप् । तमे तादेश्चेति तादिलोपः । नित्वादाद्युदात्तः । प्रतीचीनं । प्रतिपूर्वस्यांचतेः क्विप् । तस्माद्विभाषांचेरदिक्स्त्रियामिति खः । ईनादेशः । प्रत्ययस्वरः । आयत् । या प्रापण इत्यस्याङ्पूर्वस्य शतरि रूपं आङ्पूर्वस्य अय पय गताविस्यस्य शतरि रूपं वेति व्युत्पत्त्यनवधारणादनवग्रहः ॥

॥ अथ नवमी ॥

नि वेवेति पलितो दूत आस्वंतर्महांश्चरति रोचनेन ।

वपूंषि बिभ्रदभि नो वि चष्टे महद्देवानामसुरत्वमेकं ॥ ९ ॥

नि । वेवेति । पलितः । दूतः । आसु । अंतः । महान् । चरति । रोचनेन ।

वपूंषि । बिभ्रत् । अभि । नः । वि । चष्टे । महत् । देवानां । असुरऽत्वं । एकं ॥ ९ ॥

पलितः पालयिता पूर्णो वा देवानां दूतोऽग्निरास्वोषधीषु नि वेवेति । नितरां व्याप्य वर्तते । महान् सोऽग्नी रोचनेन सूर्येण सहांता रोदस्योर्मध्ये चरति । वपूंषि नानाविधानि रूपाणि बिभ्रत् सोऽग्निर्नोऽस्मान् यष्टॄनभि वि चष्टे । विशेषेणानुग्रहदृष्ट्या पश्यति ॥ वेवेति । वी गत्यादिषु । यङ्लुकि ईडभावे रूपं । रोचनेन । सहार्थे तृतीया । बिभ्रत् । डुभृञ् धारणपोषणयोरित्यस्य शतरि रूपं । अभ्यस्तस्वरः ॥

॥ अथ दशमी ॥

विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः ।

अग्निष्टा विश्वा भुवनानि वेद महद्देवानामसुरत्वमेकं ॥ १० ॥

विष्णुः । गोपाः । परमं । पाति । पाथः । प्रिया । धामानि । अमृता । दधानः ।

अग्निः । ता । विश्वा । भुवनानि । वेद । महत् । देवानां । असुरऽत्वं । एकं ॥ १० ॥

विष्णुर्व्याप्तो गोपाः सर्वस्य गोपायिता प्रिया प्रियतमान्यमृता क्षयरहितानि धामानि तेजांसि दधानः सोऽग्निः परमं पाथः स्थानं पाति । रक्षति । यद्वा धामानि लोकधारकाण्यमृतोदकानि दधानः सन् परमं पाथ उदकस्य स्थानमंतरिक्षं पाति । सोऽग्निस्ता तानि विश्वा सर्वाणि भुवनानि भूतजातानि वेद ।

जानाति ॥ गोपाः । गोपायतेः क्विप्यतोलोपयलोपौ । अग्निष्टेत्यत्र संहितायां युष्मत्तत्ततक्षुःष्वंतःपादमिति षत्वं ॥

॥ इति तृतीयस्य तृतीय एकोनत्रिंशो वर्गः ॥

॥ अथैकादशी ॥

नाना चक्राते यम्या३ वपूंषि तयोरन्यद्रोचते कृष्णमन्यत् ।
श्यावी च यदरुषी च स्वसारौ महद्देवानामसुरत्वमेकं ॥ ११ ॥

नाना । चक्राते इति । यम्या । वपूंषि । तयोः । अन्यत् । रोचते । कृष्णं । अन्यत् ।
श्यावी । च । यत् । अरुषी । च । स्वसारौ । महत् । देवानां । असुरऽत्वं । एकं ॥ ११ ॥

यम्या यमरूपे मिथुनभूते अहश्च रात्रिश्चेत्येते नाना नानाविधानि वपूंषि शुक्लकृष्णादीनि रूपाणि चक्राते । कुरुतः । श्यावी कृष्णवर्णारुषी शुक्लतयारोचमाना यत् ये परस्परं स्वसारौ भवतस्तयोर्मध्येऽन्यदर्जुनमहो रोचते । किरणसंबंधाद्दीप्यते । अन्यद्रात्रिलक्षणं कृष्णं तमःसंबंधात् कृष्णवर्णमाभाति ॥ यम्या । सुपो डादेशः । रोचते । एकान्याभ्यां समर्थाभ्यामिति न निघातः ॥

॥ अथ द्वादशी ॥

माता च यत्र दुहिता च धेनू सबर्दुघे धापयेते समीची ।
ऋतस्य ते सदसीळे अंतर्महद्देवानामसुरत्वमेकं ॥ १२ ॥

माता । च । यत्र । दुहिता । च । धेनू इति । सबर्दुघे इति सबःऽदुघे । धापयेते इति ।
समीची इति संऽईची ।
ऋतस्य । ते इति । सदसि । ईळे । अंतः । महत् । देवानां । असुरऽत्वं । एकं ॥ १२ ॥

माता सर्वेषां निर्मातृत्वान्माता पृथिवी च दुहिता दूरे निहिता द्यौश्च । दुहिता दुर्हिता दूरे हिता दोग्धेर्वेति यास्कः । एते सबर्दुघे सबरः स्वीयस्य क्षीररूपस्य रसस्य दोग्ध्र्यौ अत एव धेनू जगतः प्रीणयित्र्यौ द्यावापृथिव्यौ यत्रांतरिक्षे समीची परस्परं संगते सत्यौ धापयेते स्वकीयं रसमन्योन्यं पाययेते ऋतस्योदकस्य सदसि स्थानभूते तस्मिन्नंतरिक्षेऽंतः स्थिते द्यावापृथिव्यावीळे । अहं स्तौमि । यद्वा । वृष्टिलक्षणं रसं द्यौः पृथिवीं धापयत आहुतिलक्षणं रसं द्यां पृथिवीत्येवमन्योन्यं माता च दुहिता च भवतः । ऋतस्य सदसि स्थाने यज्ञसदने स्थि-

तोऽहं ते उभे स्तौमि ॥ सबर्दुघे। सबःशब्दः क्षीरवाचीति संप्रदायविद आहुः। तस्मिन्नुपपदे दुह प्रपूरण इत्यस्माद्धातोर्दुहः कब्घश्चेति कप्प्रत्ययो घश्चांतादेशः। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। धापयेते। धेट् पान इत्यस्य ण्यंतस्य लटि निगरणचलनार्थेभ्यश्चेति परस्मैपदे प्राप्ने पादिषु धेट उपसंख्यानमित्यात्मनेपदं। यद्वृत्तयोगादनिघातः ॥

॥ अथ त्रयोदशी ॥

अन्यस्यां वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः।

ऋतस्य सा पयसापिन्वतेळा महद्देवानामसुरत्वमेकं ॥ १३ ॥

अन्यस्याः। वत्सं। रिहती। मिमाय। कया। भुवा। नि। दधे। धेनुः। ऊधः।

ऋतस्य। सा। पयसा। अपिन्वत। इळा। महत्। देवानां। असुरऽत्वं। एकं ॥ १३ ॥

अन्यस्याः पृथिव्या वत्समग्निं रिहत्युदकधारारूपया जिह्वया लिहंती द्यौर्मिमाय। मेघद्वारा ध्वनिं करोति। धेनुः प्रीणयित्री सा द्यौः कया जलवर्जितया भुवा तत्रत्यं जलमादाय स्वकीयमूधो मेघरूपं निदधे। उदकेन निहितमकरोत्। सा जलवर्जितेळा पृथिव्यृतस्य सत्यभूतस्यादित्यस्य पयसोदकेनापिन्वत। वर्षकाले सिक्ता भवति। आदित्याज्जायते वृष्टिरिति स्मृतेः॥ रिहती। लिह आस्वादन इत्यस्य शतरि रूपं। शतुरनुम इति ङीप उदात्तत्वं। अपिन्वत। पिवि सेचने। मुचादिरात्मनेपदी। निघातः॥

॥ अथ चतुर्दशी ॥

पद्या वस्ते पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा।

ऋतस्य सद्म वि चरामि विद्वान्महद्देवानामसुरत्वमेकं ॥ १४ ॥

पद्या। वस्ते। पुरुऽरूपा। वपूंषि। ऊर्ध्वा। तस्थौ। त्रिऽअविं। रेरिहाणा।

ऋतस्य। सद्म। वि। चरामि। विद्वान्। महत्। देवानां। असुरऽत्वं। एकं ॥ १४ ॥

पद्या। जगत्स्रष्टुः परमेश्वरस्य पद्भ्यां जातत्वात्पद्या भूमिः। तथा च मंत्रवर्णः। पद्भ्यां भूमिः। ऋग्वे॰ १०. ९०. १४.। इति। यद्वा पादसंचारे साधुः पद्या भूमिः पुरुरूपा नानाविधस्वरूपाणि वपूंषि स्थावरजंगमात्मकानि रूपाणि वस्ते। आच्छादयति। सैषा भूमिरूर्ध्वोत्तरवेद्यात्मनोन्नता सती स्वसारभूतेन हविषा त्र्यविं। सार्द्धसंवत्सरवयस्को वत्सस्त्र्यविरित्युच्यते। तत्प्रमाणमादित्यं। त्रीन् लोका-

नवति स्वतेजसा व्याप्नोतीति व्यविरिति वा। रेरिहाणा लिहंती तस्थौ। ऋतस्य सत्यभूतस्यादित्यस्य सद्म स्थानं विद्वान् जानानोऽहं विचरामि। हविर्भिस्तमादित्यं परिचरामि॥ पद्या। पादशब्दाद्भवे छंदसीति यत्। पद्यत्यतदर्थे। पा॰ ६.३.५३। इति पादस्य पद्भावः। यद्वा तत्र साधुरिति यत्। यतोऽनाव इत्याद्युदात्तत्वं। व्यविं। अव रक्षणादिषु। इन्नितीन्प्रत्ययः। कृत्स्वरः। रेरिहाणा। लिह आस्वादन इत्यस्य यङ्लुकि शानचि रूपं। अभ्यस्तस्वरः॥

॥ अथ पंचदशी ॥

पदे इव निहिते दस्मे अंतस्तयोरन्यद्गुह्यमाविरन्यत्।
सध्रीचीना पथ्या३सा विषूची महद्देवानामसुरत्वमेकं॥ १५॥

पदे इवेति पदेऽइव। निहिते इति निऽहिते। दस्मे। अंतरिति। तयोः। अन्यत्।
गुह्यं। आविः। अन्यत्।
सध्रीचीना। पथ्या। सा। विषूची। महत्। देवानां। असुरऽत्वं। एकं॥ १५॥

पदे इव। पद्येते ज्ञायेते तत्तदसाधारणलिंगेनेति पदे। अहश्च रात्रिश्चेत्येते दस्मे सर्वैर्दर्शनीये ते उभे अंतर्नभसि निहिते स्थापिते इव वर्तेते। तयोरहोरात्रयोरन्यद्रात्रिलक्षणं गुह्यमप्रकाशमानतया गूढमिवास्ते। अन्यदहराविः सूर्यप्रकाशेन प्रकटं भवति। सध्रीचीनाहोरात्रयोः परस्परमेलनरूपा पथ्या मार्गः। काल इत्यर्थः। सा विषूची। पुण्यकृतोऽपुण्यकृतश्च प्राप्नोतीति विषूची भवति। सर्वे जना अहोरात्रयोर्वर्तंते। यद्वा पदे इव देवमनुष्यादीनां स्थानभूते द्यावापृथिव्यावंतरंतरिक्षे निहिते वर्तेते। तयोरन्यद्द्यौर्गुह्यमस्माभिरदृश्यमानतया गूढं वर्तते। अन्यत्पृथिव्याविः सर्वैर्दृश्यमानत्वेन प्रकटा भवति। सध्रीचीनेति पूर्ववत्॥ सध्रीचीना। सहपूर्वादंचतेः क्विन्। सहस्य सध्रिरिति सध्र्यादेशः। विभाषांचेरदिक्स्त्रियामिति खः॥

॥ इति तृतीयस्य तृतीये त्रिंशो वर्गः॥

॥ अथ षोडशी ॥

आ धेनवो धुनयंतामशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः।
नव्यानव्या युवतयो भवंतीर्महद्देवानामसुरत्वमेकं॥ १६॥

आ। धेनवः। धुनयंतां। अशिश्वीः। सबःऽदुघाः। शशयाः। अप्रऽदुग्धाः।
नव्याःऽनव्याः। युवतयः। भवंतीः। महत्। देवानां। असुरऽत्वं। एकं ॥१६॥

धेनवो वृष्टिद्वारा सर्वस्य जगतः प्रीणयित्र्योऽशिश्वीः शिशुरहिताः। यद्वा शिशवो न भवंतीत्यशिश्वीः। शशया नभसि शयाना वर्तमानाः केनाप्यप्रदुग्धा अक्षीणरसाः सबर्दुघा उदकलक्षणस्य क्षीरस्य दोग्ध्र्यो युवतयः परस्परमिश्रणोपेता नव्या नव्या अतिशयेन नूतना भवंतीर्दिशो मेघा वा आधुनयंतां। आदुहंतु। मेघपक्षेऽशिश्वीर्भवंतीरित्यत्र लिंगव्यत्ययः ॥ धुनयंतां। धूञ् कंपने। णिचि धूञ्प्रीणोर्नुग्वक्तव्यः। पा॰ ७.३.३७.१.। इति नुक्। ह्रस्वश्छांदसः। अशिश्वीः। सख्यशिश्वीति भाषायामिति व्यत्ययेन छंदसि भवति ॥

॥ अथ सप्तदशी ॥

यद॒न्यासु॑ वृष॒भो रोर॑वीति॒ सो अ॒न्यस्मि॑न्यू॒थे नि द॑धाति॒ रेतः॑।
स हि क्षपा॑वा॒न्स भगः॒ स राजा॑ म॒हद्दे॒वाना॑मसुर॒त्वमेकं॑ ॥१७॥

यत्। अ॒न्यासु॑। वृ॒ष॒भः। रोर॑वीति। सः। अ॒न्यस्मि॑न्। यू॒थे। नि। द॒धा॒ति॒। रेतः॑।
सः। हि। क्षपा॑ऽवान्। सः। भगः॑। सः। राजा॑। म॒हत्। दे॒वानां॑। अ॒सु॒र॒ऽत्वं। एकं॑ ॥१७॥

वृषभोऽपां वर्षको यद्यः पर्जन्यात्मेंद्रोऽन्यासु दिक्षु रोरवीति मेघद्वारा भृशं शब्दं करोति स पर्जन्य इंद्रोऽन्यस्मिन्यूथे दिशां वृंदे रेत उदकं निदधाति। तत्र वर्षति। लोके हि वृषभः कासुचिद्गोषु रेतःसेकार्थं रवं करोत्यन्यस्मिन् गोयूथे रेतः सिंचति। तद्वत्। स इंद्रः क्षपावान्। क्षिपति शत्रूनुदकं वेति क्षेपणवान्। यद्वा क्षपा रात्रिः। तथा रात्रिपर्याययागानां स्तोत्राणां भागभूता या रात्रिः सोच्यते। तद्वान्। स भगः। सर्वैर्भजनीयः। स राजा हि। तत्तत्कर्मानुरूपफलप्रदानेन सर्वेषां राजा खलु॥ रोरवीति। रु शब्द इत्यस्य यङ्लुगंतस्य लटि रूपं। एकान्याभ्यां समर्थाभ्यामिति प्रथमस्य न निघातः। यूथे। यु मिश्रणे। तिथपृष्ठगूथयूथप्रोथा इति थक्प्रत्ययांतत्वेन निपातनाद्दीर्घः। रेतः। रीङ् क्षरण इत्यस्मात् सुरीभ्यां तुट् चेत्यसुन्प्रत्ययस्तुडागमश्च। नित्त्वादाद्युदात्तः ॥

॥ अथाष्टादशी ॥

वी॒रस्य॒ नु स्वश्व्यं॑ जनासः॒ प्र नु वो॑चाम वि॒दुर॑स्य दे॒वाः।
षो॒ळ्हा यु॒क्ताः पंच॑पंचा वहंति म॒हद्दे॒वाना॑मसुर॒त्वमेकं॑ ॥१८॥

वीरस्यं। नु। सुऽअश्व्यं। जनासः। प्र। नु। वोचाम। विदुः। अस्य। देवाः।

षोळ्हा। युक्ताः। पंचंऽपंच। आ। वहंति। महत्। देवानां। असुरऽत्वं। एकं॥१८॥

हे जनासो जना वीरस्य शूरस्येंद्रस्य स्वश्व्यं शोभनाश्वोपेतत्वं नु क्षिप्रं प्र वोचाम। प्रकर्षेण वदाम। तथा देवा अप्यस्येंद्रस्य स्वश्वत्वं विदुः। जानंति। किं तत्स्वश्वत्वं। तदुच्यते। षोळ्हा मासानां इंद्रयोगकाले षोढा दृश्यमाना ऋतवोऽश्वा निरूप्यंते। ते च षट्संख्याका ऋतवो हेमंतशिशिरयोः समासेन पंच पंच युक्ताः संतः कालात्मकमिंद्रमावहंति। तदिदमिंद्रस्य स्वश्वत्वं यदृतुभिरूढत्वं॥ षोळ्हा। षषः शब्दात्संख्याया विधार्थे धेति धाप्रत्ययः। षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च। पा॰ ६. ३. १०९. ३.। इत्युत्वं ष्टुत्वं च। प्रत्ययस्वरः॥

त्वाष्ट्रे पशौ हविषोऽनुवाक्या देवस्त्वष्टेत्येषा। सूचितं च। देवस्त्वष्टा सविता विश्वरूपो देव त्वष्टर्यद्ध चारु त्वमानट्। आ॰ ३. ८.। इति॥

॥ सैषा सूक्त एकोनविंशी॥

देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान।

इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकं॥१९॥

देवः। त्वष्टा। सविता। विश्वऽरूपः। पुपोष। प्रऽजाः। पुरुधा। जजान।

इमा। च। विश्वा। भुवनानि। अस्य। महत्। देवानां। असुरऽत्वं। एकं॥१९॥

सवितांतर्यामितया सर्वस्य प्रेरको विश्वरूपो नानाविधरूपस्त्वष्टा त्वष्टृनामको देवः प्रजाः पुरुधा बहुधा जजान। जनयति। ताश्च पुपोष। पोषयति। इमेमानि विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि चास्य त्वष्टुः संबंधीनि॥ विश्वरूपः। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं॥

॥ अथ विंशी॥

मही समैरच्चम्वा समीची उभे ते अस्य वसुना न्यृष्टे।

शृण्वे वीरो विंदमानो वसूनि महद्देवानामसुरत्वमेकं॥२०॥

मही इति। सं। ऐरत्। चम्वा। समीची इति संऽईची। उभे इति। ते इति। अस्य।
वसुना। न्यृष्टे इति निऽऋष्टे।

शृण्वे। वीरः। विंदमानः। वसूनि। महत्। देवानां। असुरऽत्वं। एकं॥२०॥

महो महत्यौ समीची परस्परं संगते चम्वा। चमंत्यदंत्यनयोर्देवमनुष्या इति चम्वौ। यद्वा चम्येते अद्येते भूतजातैरिति चम्वौ द्यावापृथिव्यौ। समैरत्। इंद्रः प्रजापश्वादिभिः सम्यगयोजयत्। ते उभे द्यावापृथिव्यावस्येंद्रस्य वसुना तेजसा धनेन वा न्यृष्टे नितरां व्याप्ते भवतः। वीरः समर्थः स इंद्रो वसूनि शत्रूनभिभूय तदीयानि धनानि विंदमानो लभमानः सन् शृखे। सर्वैः श्रूयते। तवेदिदम-भितश्चेकिते वस्वित्यादिषु दृष्टत्वात्॥ ऐरत्। ईर गतावित्यस्य लङि रूपं। न्यृष्टे। ऋषी गतौ। कर्मणि क्तः। गतिरनंतर इति गतेः स्वरः। शृखे। श्रु श्रवण इत्यस्य व्यत्ययेन कर्मणि श्नुः। लोपस्त आत्मनेपदेष्विति तलोपः। विंदमानः। विद्लृ लाभ इत्यस्य लटि शानचि रूपं। तस्य लसार्वधातुकस्वरः॥

॥ अथैकविंशी ॥

इमां च नः पृथिवीं विश्वधाया उप क्षेति हितमित्रो न राजा।
पुरःसदः शर्मसदो न वीरा महद्देवानामसुरत्वमेकं॥२१॥

इमां। च। नः। पृथिवीं। विश्वऽधायाः। उप। क्षेति। हितऽमित्रः। न। राजा।
पुरःऽसदः। शर्मऽसदः। न। वीराः। महत्। देवानां। असुरऽत्वं। एकं॥२१॥

विश्वधाया विश्वस्य धाता सर्वान्नो वा नोऽस्माकं राजेंद्र इमां पृथिवीमंत-रिक्षं चोप तयोः समीपे क्षेति। निवसति। तत्र दृष्टांतः। हितमित्रो न। यथा कस्यचित् हितोपदेष्टा सुहृत्समीपे निवसति तद्वत्। वीराः समर्था युद्धसहाया मरुतः पुरःसदो युद्धार्थे पुरतो निश्चयेन गंतार इंद्रस्य शर्मसदः। न चार्थे। शर्मणि गृहे सीदंतश्च भवंति। यत्र यत्रासौ तत्र तत्र संनिधिं कुर्वाणा इत्यर्थः॥ क्षेति। क्षि निवासगत्योरित्यस्य लटि बहुलं छंदसीति विकरणस्य लुक्। निघातः॥

॥ अथ द्वाविंशी ॥

निष्षिध्वरीस्त ओषधीरुतापो रयिं त इंद्र पृथिवी बिभर्ति।
सखायस्ते वामभाजः स्याम महद्देवानामसुरत्वमेकं॥२२॥

निःऽसिध्वरीः। ते। ओषधीः। उत। आपः। रयिं। ते। इंद्र। पृथिवी। बिभर्ति।
सखायः। ते। वामऽभाजः। स्याम। महत्। देवानां। असुरऽत्वं। एकं॥२२॥

हे पर्जन्यात्मकेंद्र ओषधीरोषधयस्ते निष्षिध्वरीर्निष्षिध्वर्यो नितरां त्वत्कर्तृक-

सिद्धिमत्यः। उतापि च आपस्त्वत्तो निःसृताः। पृथिवी ते तव भोगयोग्यं रयिं धनं बिभर्ति। पुरू वसूनि पृथिवी बिभर्ति। ऋग्वे० ३.५१.५.। इति हि निगमः। ततस्ते तव सखायो हविःप्रदानेनोपकारकाः स्तोतारो वयं वामभाजः स्याम। सर्वे वननीयधनभागिनो भवेम। तदेतद्देवानां महदैश्वर्यं ॥ निष्षिध्वरीः। षिधु संराद्धौ। संपदादिलक्षणो भावे क्विप्। तदस्यास्तीत्यर्थे छंदसीवनिपाविति वनिप्। वनो र चेति ङीप् रेफश्च। निसा सह समासः। निसः सकारं छांदसत्वादनादृत्योपसर्गात्सुनोतीत्यादिना षत्वं। ङीपः पित्त्वादनुदात्तत्वे धातुस्वरः। बिभर्ति। डुभृञ् धारणपोषणयोरित्यस्य लटि भृञामिदित्यभ्यासस्येत्वं। निघातः। वामभाजः। भज सेवायां। भजो ण्विः। पा० ३. २. ६२.। इति ण्विः। कृदुत्तरपदस्वरः ॥

॥ इति तृतीयस्य तृतीय एकत्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये तृतीयाष्टके तृतीयोऽध्यायः समाप्तः ॥

---

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

न ता मिनंतीत्यष्टर्चं तृतीयं सूक्तं विश्वामित्रस्य वाचः पुत्रस्य वा प्रजापतेरार्षं त्रैष्टुभं वैश्वदेवं। तथा चानुक्रमणिका। न ताष्टाविति। सूक्तविनियोगो लिंगादवगंतव्यः। अस्मिन्सूक्ते प्रायेणादित्यैः सह संवत्सरः स्तूयते ॥

॥ तत्र प्रथमा ॥

न ता मिनंति मायिनो न धीरा व्रता देवानां प्रथमा ध्रुवाणि।
न रोदसी अद्रुहा वेद्याभिर्न पर्वता निनमे तस्थिवांसः ॥ १ ॥

न। ता। मिनंति। मायिनः। न। धीराः। व्रता। देवानां। प्रथमा। ध्रुवाणि।
न। रोदसी इति। अद्रुहा। वेद्याभिः। न। पर्वताः। निऽनमे। तस्थिऽवांसः॥१॥

मायिनः कपटबुद्ध्युपेता असुरा देवानामिंद्रादीनां प्रथमा प्रथमानि सृष्ट्यनंतरभावीनि ध्रुवाणि स्थिराणि केनापि चालयितुमशक्यानि ता तानि लोके प्रसिद्धानि व्रता व्रतानि लोकपालनादिकर्माणि न मिनंति। न हिंसंति। तथा धीरा विद्वांसोऽपि न हिंसंति। तथाद्रुहा देवमनुष्यादिषु प्रजासु द्रोहवर्जिते रोदसी द्यावापृथिव्यौ वेद्याभिः स्वाश्रयतया सर्वैर्वेदनीयाभिः प्रजाभिः सहितानि कर्माणि न मिनीतः। तदेतदुपपादयति। तस्थिवांसः पृथिव्यामूर्द्ध्वतया स्थिताः पर्वता न निनमे। निनमनीया न भवंति। एतदुक्तं भवति। यद्देवमनुष्यादीनां द्यावापृथिव्याधारकतयावस्थानं यच्च पर्वतादीनामुन्नततयावस्थानं तदिदं देवानां कर्म। तन्न कोऽप्यन्यथयितुमर्हतीति॥ मिनंति। मीङ् हिंसायामित्यस्य लटि मीनातेर्निगम इति ह्रस्वः। निघातः। वेद्याभिः। वेदनमर्हंति। छंदसि चेति यत्प्रत्ययः। निनमे। णमु प्रह्वत्व इत्यस्य कृत्यार्थे केन्प्रत्ययः। कृत्स्वरः॥

॥ अथ द्वितीया ॥

षड्भाराँ एको अचरन्बिभर्त्यृतं वर्षिष्ठमुप गाव आगुः।
तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते दर्श्येका॥२॥

षट्। भारान्। एकः। अचरन्। बिभर्ति। ऋतं। वर्षिष्ठं। उप। गावः। आ। अगुः।
तिस्रः। महीः। उपराः। तस्थुः। अत्याः। गुहा। द्वे इति। निहिते इति निऽहिते।
दर्शि। एका॥२॥

अचरन् स्थायी एकः संवत्सरः षट् षट्संख्याकान् भारान्। भ्रियते पुष्पविकासादि येष्विति भारा ऋतवः। तान्वसंतादीन् बिभर्ति। अवयवत्वेन धारयति। तथा ऋतं सत्यभूतं वर्षिष्ठं वृद्धतरमादित्यात्मकं तमेव संवत्सरं गावो रश्मय उपागुः। प्राप्नुवंति। किंच तस्मिन्नेव संवत्सरेऽत्या अतनशीला आगमापायधर्मोपेतास्तिस्रो महीस्त्रयो लोका उपरा उपर्युपरि वर्तमानास्तस्थुः। तिष्ठंति। लोकत्रयमेव दर्शयति। गुहा गुहायां स्वात्मनि द्वे भूमी द्यौश्चांतरिक्षं चेत्येते निहिते। न दृश्येते। एका भूमिर्दर्शि। सर्वभूताधारतया दृश्यते॥ भारान्। डुभृञ् धारणपोषणयोरित्यस्मादधिकरणे घञ्। कर्षात्वतो घञ इत्यंतोदात्तत्वं। निहिते।

दधातेः कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। दर्शि। दृशिर् प्रेक्षणे। कर्मणि लुङि चिणि चिणो लुगिति प्रत्ययस्य लुक्। वाक्यभेदादनिघातः॥

॥ अथ तृतीया ॥

त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान्।
त्र्यनीकः पत्यते माहिनावान्स रेतोधा वृषभः शश्वतीनां ॥३॥

त्रिऽपाजस्यः। वृषभः। विश्वऽरूपः। उत। त्रिऽउधा। पुरुध। प्रजाऽवान्।
त्रिऽअनीकः। पत्यते। माहिनऽवान्। सः। रेतःऽधाः। वृषभः। शश्वतीनां ॥३॥

त्रिपाजस्यः ग्रीष्मवर्षाहेमंताख्यैस्त्रिभिर्ऋतुभिः पाजस्यमुरो यस्य स त्रिपाजस्यः। त्र्युरस्क इत्यर्थः। उरोवचनश्च पाजस्यशब्दः। इंद्रस्य क्रोडोऽदित्यै पाजस्यं। वाज॰ २५. ८.। इत्यश्वमेधमंत्र उरःपरतयाम्नानात् पाजसि बले साधुरिति व्युत्पत्तेश्च। सर्वेषामंगानां मध्य उरसो बलवत्त्वात्। वृषभः स्वावयवभूते वर्षतोवपां वर्षको विश्वरूपस्तत्तदृत्वसाधारणकार्यैः पुष्पविकासादिभिर्लिंगैर्नानारूप उतापि च त्र्युधा। वसंतशरद्धेमंताख्यैस्त्रिभिर्ऋतुभिरूधो यस्य स त्र्युधा। प्रजावान्। प्रकर्षेण जायंत इति व्रीह्यादयो प्रजाः। पुरुध नानाप्रकारेण विद्यमानव्रीहियवादिरूपप्रजावान्। किंच त्र्यनीकस्त्रिभिरुष्णवर्षशीताख्यैरनीकैर्गुणैरुपेतो माहिनावान्महत्त्ववान् संवत्सराभिमानी देवः पत्यते। आगच्छति। वृषभः सेचनसमर्थः स संवत्सरः शश्वतीनां बह्वीनामोषधीनां पुष्पफलादिसंपत्तये रेतोधा रेतस उदकस्य धर्ता भवति॥ त्र्युधा। बहुव्रीहेरूधसोऽनङित्यनङ्। सर्वविधीनां छंदसि विकल्पितत्वात्पुंस्यपि भवति। ऊकारस्य ह्रस्वश्छांदसः। उत्तरपदांतोदात्तप्रकरणे त्रिचक्रादीनां छंदस्युपसंख्यानमित्युत्तरपदांतोदात्तत्वं॥

॥ अथ चतुर्थी ॥

अभीक आसां पदवीरबोध्यादित्यानामह्वे चारु नाम।
आपश्चिदस्मा अरमंत देवीः पृथग्व्रजंतीः परि षीमवृंजन् ॥४॥

अभीके। आसां। पदऽवीः। अबोधि। आदित्यानां। अह्वे। चारु। नाम।
आपः। चित्। अस्मै। अरमंत। देवीः। पृथक्। व्रजंतीः। परि। सीं। अवृंजन् ॥४॥

संवत्सर आसामोषधीनामभीके समीपे पदवीः। पदानि तत्तद्वनविशिष्टपुष्प-

फलादीनि वेति प्रजनयतीति पदवीः सन् अबोधि। बुध्यते। सावधानो वर्तते। तथादित्यानां। आदित्या मासाः संख्यासाम्यात्। यद्वा आदित्यसंक्रमणनिमित्तत्वादादित्या मासाः। मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चांद्रश्चैत्राद्यः स ज्ञेय इति स्मृतेः। तेषां चैत्रादीनां मासानां चारु नाम मधुश्च माधवश्चेत्यादि नामधेयमह्वे। आह्वयामि। उच्चारयामीत्यर्थः। किंच देवीर्द्योतनशीलाः पृथगितस्ततो व्रजंतीर्गच्छंत्य आपश्चित् आपोऽप्यस्मै संवत्सरायारमंत। संवत्सरसंबंधिमासचतुष्टये वृष्टिद्वारा रमंते। ता आपः सीमेनं संवत्सरं पर्यवृंजन्। अष्टसु मासेषु परिवर्जयंति॥ पदवीः। वी गत्यादिषु। क्विप्। अबोधि। बुध अवगमन इत्यस्य लुङि दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्यामिति कर्तरि चिणो लुक्। निघातः। आदित्यानां। आदित्यसंबंधिन इत्यर्थे दित्यदित्यादित्यपत्युत्तरपदाण्य इति ण्यः। अतोलोपयलोपौ। प्रत्ययस्वरः। अह्वे। ह्वयतेर्लुङि सिच आत्मनेपदेष्वन्यतरस्यामित्यङादेशः। गुणः। निघातः। अवृंजन्। वृजी वर्जन इत्यस्य लङि श्नमि रूपं। निघातः॥

॥ अथ पंचमी ॥

त्री ष॒धस्था॑ सिंधव॒स्त्रिः क॑वी॒नामु॒त त्रि॑मा॒ता वि॒दथे॑षु स॒म्राट्।

ऋ॒ताव॑री॒र्योष॑णास्ति॒स्रो अप्या॒स्त्रिरा दि॒वो वि॒दथे॒ पत्य॑मानाः॥५॥

त्री। स॒धऽस्था॑। सिं॒ध॒वः॒। त्रिः। क॒वी॒नां। उ॒त। त्रि॒ऽमा॒ता। वि॒दथे॑षु। सं॒ऽरा॒ट्।

ऋ॒तऽव॑रीः। योष॑णाः। ति॒स्रः। अप्याः॑। त्रिः। आ। दि॒वः। वि॒दथे॑। पत्य॑मानाः॥५॥

प्रजापतिः स्वविज्ञानं सिंधूनां निवेदयति। हे सिंधव आपः सर्वसाक्षिण्यो यूयं। त्री षधस्था त्रयो लोकाः। ते च प्रत्येकं त्रिर्भवंति। तथा त्रयो वा इमे त्रिवृतो लोका इति श्रुतिः। न द्याव इंद्रमोजसा नांतरिक्षाणि वज्रिणं न विव्यचंत भूमयः। ऋग्वे॰ ८.६.१५.। इति प्रत्येकं बहुवचनश्रवणात्। बहुवचनं च कपिंजलन्यायेन त्रित्वे पर्यवसितं। ते च लोकाः कवीनां देवानां निवासस्थानानि भवंति। उतापि च त्रिमाता त्रयाणाममीषां लोकानां निर्माता संवत्सरः सूर्यो वा विदथेषु यज्ञेषु सम्राट् यजनीयतया सम्यग्दीप्यमानो वर्तते। तथा ऋतावरीरुदकवत्योऽप्या नभस्या आप्नव्या वा तिस्रो योषणास्त्रिसंख्याका इलासरस्वतीभारतीत्येवंरूपाः परस्परमिश्रणोपेता देवता विदथे यज्ञे दिवो दिवसस्य त्रिस्त्रिषु सवनेष्वापत्यमाना आगच्छंत्यो भवंति॥ सधस्था। पूर्वपदादिति संहि-

तायां षत्वं । योषणाः । युष इति सौत्रो धातुः । ल्युटि रूपं । लित्स्वरः । तिस्रः । तिसृभ्यो जस इत्याद्युदात्तत्वं । अप्याः । अप् इत्यंतरिक्षनाम । तत्र भवाः । भवे छंदसीति यत् । यतोऽनाव इत्याद्युदात्तत्वं ॥

॥ अथ षष्ठी ॥

त्रिरा दिवः सवितर्वार्याणि दिवेदिव आ सुव त्रिर्नो अह्नः ।
त्रिधातु राय आ सुवा वसूनि भग त्रातर्धिषणे सातये धाः ॥ ६ ॥

त्रिः । आ । दिवः । सवितः । वार्याणि । दिवेऽदिवे । आ । सुव । त्रिः । नः । अह्नः ।
त्रिऽधातु । रायः । आ । सुव । वसूनि । भग । त्रातः । धिषणे । सातये । धाः ॥ ६ ॥

सवितः सर्वस्य प्रेरक हे आदित्य दिवो द्युलोकादागत्य त्वं वार्याणि सर्वैः संभजनीयानि धनानि दिवे दिवे प्रतिदिनं त्रिरासुव । त्रिवारमस्मभ्यं प्रेरय । प्रयच्छेत्यर्थः । तदेवोच्यते । भग सर्वैर्भजनीय त्रातरस्माकं रक्षक हे आदित्य त्रिधातु त्रिधातूनि पशुकनकरत्नभेदेन त्रिप्रकाराणि वसूनि धनानि रायः । रांति क्षीरादीनीति रायो गोधनानि । तानि च नोऽस्मभ्यमह्नः संबंधिषु त्रिस्त्रिषु सवनेष्वासुव । प्रयच्छ । धिषणे माध्यमिके हे वाक् सातये धनलाभाय धाः । अस्मान् कुरु ॥ त्रिः । द्वित्रिचतुर्भ्यः सुच् । पा॰ ५.४.१८. । इति सुच् । चित्स्वरः । सुव । षू प्रेरणे । तुदादिः । लोटि रूपं । त्रिधातु । डुधाञ् धारणपोषणयोरित्यस्मात्सितनिगमिमसीत्यादिना तुन्प्रत्ययः । धिषणे । आमंत्रितत्वान्निघातः ॥

॥ अथ सप्तमी ॥

त्रिरा दिवः सविता सोषवीति राजाना मित्रावरुणा सुपाणी ।
आपश्चिदस्य रोदसी चिदुर्वी रत्नं भिक्षंत सवितुः सवाय ॥ ७ ॥

त्रिः । आ । दिवः । सविता । सोसवीति । राजाना । मित्रावरुणा । सुपाणी इति सुऽपाणी ।
आपः । चित् । अस्य । रोदसी इति । चित् । उर्वी इति । रत्नं । भिक्षंत । सवितुः । सवाय ॥ ७ ॥

सविता देवो दिवो दिवसस्य त्रिस्त्रिषु कालेष्वासोषवीति । अस्मभ्यं धनान्यासुवतु । प्रेरयतु । किंच राजाना राजानौ सुपाणी कल्याणपाणी मित्रावरुणावापः । आप्नोति सर्वं जगदित्याप अंतरिक्षं । नित्यबहुवचनांतत्वाद्बहुवचनं । चिदपि च उर्वी विस्तीर्णे रोदसी द्यावापृथिव्यावेता देवताः सवितुः प्रेरकस्यास्य

देवस्य सवाय सवेन प्रेरणेन रत्नमपेक्षितमर्थं भिक्षंत। याचंते॥ सोसवीति। षू प्रेरण इत्यस्य यङ्लुकि लटि रूपं। मित्रावरुणा। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। भिक्षंत। भिक्ष याच्ञायामित्यस्य लङि रूपं। सवाय। जवसवौ च। पा० ३.३.५६.३.। इत्यजंतत्वेन निपातनादंतोदात्तत्वं॥

॥ अथाष्टमी ॥

त्रिरुत्तमा दूणशा रोचनानि त्रयो राजंत्यसुरस्य वीराः।

ऋतावान इषिरा दूळभासस्त्रिरा दिवो विदथे संतु देवाः॥८॥

त्रिः। उत्ऽतमा। दुःऽनशा। रोचनानि। त्रयः। राजंति। असुरस्य। वीराः।

ऋतऽवानः। इषिराः। दुःऽदभासः। त्रिः। आ। दिवः। विदथे। संतु। देवाः॥८॥

दूणशा दुर्नशा केनापि विनाशयितुमशक्यानि रोचनानि दीप्यमानानि त्रिस्त्रीण्युत्तमानि स्थानानि संति। एतेषु त्रिषु स्थानेष्वसुरस्य। अस्यति क्षिपति सर्वमित्यसुरः कालात्मा संवत्सरः। तस्य वीराः पुत्रास्त्रयोऽग्निवायुसूर्यरूपा राजंति। शोभंते। तानेव विशिनष्टि। ऋतावानः। ऋतं सत्यभूतमग्निहोत्रादिकं कर्म तद्वंतः। इषिरा यज्ञार्थं शीघ्रगतिमंतो दूळभासो दुर्दभासः केनापि स्वतेजसा तिरस्कर्तुमशक्या एते सर्वे देवा विदथेऽस्मदीये यज्ञे दिवोऽह्नः संबंधिषु त्रिस्त्रिषु सवनेष्वा संतु। समंताद्यजनीयतया भवंतु॥ उत्तमा। उत्तमशश्वत्तमौ सर्वत्रेत्युञ्छादिषु पाठादंतोदात्तत्वं। दूणशा। नशेरकृच्छ्रार्थे खल्। दुरो दाशनाशदभेषूत्वं वक्तव्यमिति रेफस्योत्वं। उत्तरपदादेः ष्टुत्वं। लित्स्वरः। दूळभासः। पूर्ववदुत्वष्टुत्वे॥

॥ इति तृतीयस्य चतुर्थे प्रथमो वर्गः ॥

प्र मे विविक्वानिति षड़ृचं चतुर्थं सूक्तं। विश्वामित्र ऋषिः। त्रिष्टुप् छंदः। विश्वे देवा देवता। अत्रानुक्रमणिका। प्र मे षळिति। सूक्तविनियोगो लैंगिकः॥

॥ तत्र प्रथमा ॥

प्र मे विविक्वाँ अविदन्मनीषा धेनुं चरंतीं प्रयुतामगोपां।

सद्यश्चिद्या दुदुहे भूरि धासेरिंद्रस्तदग्निः पनितारो अस्याः॥१॥

प्र। मे। विविक्वान्। अविदत्। मनीषा। धेनुं। चरंतीं। प्रऽयुतां। अगोपां।

सद्यः। चित्। या। दुदुहे। भूरि। धासेः। इंद्रः। तत्। अग्निः। पनितारः। अस्याः॥१॥

विविक्तान्विवेकवानिंद्रोऽग्निर्वा मे मम मनीषां देवताविषयां स्तुतिं प्राविदत्। प्रकर्षेण जानातु। तत्र दृष्टांतः। चरंती यवस इतस्ततो गच्छंती प्रयुतां पृथग्भूतामेकाकिनीमगोपां गोप्तृरहितां यथाकामं चरंती धेनुं नवसूतिकां गामिव देवतानां प्रीणयित्री स्तुतिमविददित्यन्वयः। या स्तुतिरूपा धेनुः सद्यश्चित्तदानीमेव धासेः। धारयति प्राणान् धीयते दीयतेऽर्थिभ्य इति वा धासिरन्नं। कर्मणि षष्ठी। भूरि बह्वन्नमपेक्षितं फलं दुदुहे दुग्धे इंद्रोऽग्निरन्ये च देवा अस्याः स्तुतिरूपाया धेनोस्तत्तस्यान्नभूतस्य पयसः पनितारः स्तोतारो भवंति। यद्वा इंद्राग्नी स्तोतारो वयं चास्या धेनोस्तत्पयः प्राप्नुमः॥ विविक्तान्। विचिर् पृथग्भाव इत्यस्य क्तसौ रूपं। अविदत्। विद ज्ञान इत्यस्य लङि बहुलं छंदसीति शः। दुदुहे। दुह प्रपूरण इत्यस्य लिटि रूपं। यद्वृत्तयोगादनिघातः। प्रत्ययस्वरः। पनितारः। पन स्तुतावित्यस्य तृचि रूपं॥

॥ अथ द्वितीया ॥

इंद्रः सु पूषा वृषणा सुहस्ता दिवो न प्रीताः शशयं दुदुह्रे।
विश्वे यदस्यां रणयंत देवाः प्र वोऽत्र वसवः सुम्नमश्यां॥२॥

इंद्रः। सु। पूषा। वृषणा। सुऽहस्ता। दिवः। न। प्रीताः। शशयं। दुदुह्रे।
विश्वे। यत्। अस्यां। रणयंत। देवाः। प्र। वः। अत्र। वसवः। सुम्नं। अश्यां॥२॥

वसवः सर्वस्य वासयितारो हे देवा इंद्रः पूषा च वृषणाभिमतफलस्य सेक्तारौ सुहस्ता कल्याणपाणी नासत्यौ मित्रावरुणौ वा। राजाना मित्रावरुणा सुपाणी इत्यादिषु दृष्टत्वात्। एते सर्वे देवाः। नेति संप्रत्यर्थे। इदानीं प्रीताः संतः शशयं नभसि शयानं मेघं दिवो नभसः सकाशात्सु दुदुह्रे। वृष्टिद्वारापेक्षितं फलं सुष्ठु दुहंति। यद्यस्माद्विश्वे सर्वे देवा अस्यां वेद्यां रणयंत रमयंते वो युष्माकं संबंधिन्यत्रलोके सुम्नं सुखकरमपेक्षितं फलं प्राश्यां। प्राप्नुयां॥ सुहस्ता। हसेरसिहसीत्यादिना तन्प्रत्ययः। निद्वादाद्युदात्तः। बहुव्रीहावाद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। दुदुह्रे। दुह प्रपूरण इत्यस्य लिटीरयो रे। रणयंत। रमु क्रीडायां। णयंतस्य लङि रूपं। वर्णव्यापत्तिः। अश्यां। अशू व्याप्तावित्यस्य लिङि बहुलं छंदसीति विकरणस्य लुक्। व्यत्ययेन परस्मैपदं॥

॥ अथ तृतीया ॥

या जामयो वृष्ण इच्छंति शक्तिं नमस्यंतीर्जानते गर्भमस्मिन् ।
अच्छा पुत्रं धेनवो वावशाना महश्चरंति बिभ्रतं वपूंषि ॥ ३ ॥
याः । जामयः । वृष्णे । इच्छंति । शक्तिं । नमस्यंतीः । जानते । गर्भं । अस्मिन् ।
अच्छ । पुत्रं । धेनवः । वावशानाः । महः । चरंति । बिभ्रतं । वपूंषि ॥ ३ ॥

या जामयः । जमंति वर्षाकाले प्रादुर्भवंतीति जामय ओषधयः । वृष्णेऽपां वर्षकायेंद्राय शक्तिं सेचनसामर्थ्यमिच्छंति । नमस्यंतीः प्रह्वीभूतास्ता ओषधयोऽस्मिन्निंद्रे गर्भं वृष्टिद्वारा पुष्पफलादिलक्षणगर्भाधानादिसामर्थ्यं जानते । जानंति । वावशानाः फलं कामयमाना धेनवः सर्वस्य प्रीणयित्र्य ओषधयो महो महांति नानाप्रकाराणि वपूंषि रूपाणि बिभ्रतं व्रीहियवनीवारादिफललक्षणं पुत्रं तनयमच्छाभिमुख्येन चरंति । प्राप्नुवंति । लोके हि हंभारवं कुर्वाणा धेनवो वत्समभिलक्ष्य गच्छंति । तद्वत् । यद्वा जामयः । जमंति सर्वत्र प्रसरंतीति जामयः सूर्यदीप्तयः । वृष्णेऽपां वर्षकाय । स्वरश्मिभिर्भौमान्रसानादाय पुनर्वर्षतीति वर्षकः सूर्यः । आदित्याज्जायते वृष्टिरिति स्मृतेश्च । तस्मै वर्षणशक्तिमिच्छंति । ता दीप्तयोऽस्मिन्नादित्ये गर्भमब्रूपगर्भाधानसामर्थ्यं जानंति ॥ जामयः । जमतेर्गतिकर्मणो जनिघसिभ्यामिञिति विधीयमानो बहुलवचनादस्मादपि भवति । नमस्यंतीः । नमःशब्दान्नमोवरिवश्चित्रङः क्यजिति क्यच् । तदंताच्छतरि रूपं । प्रत्ययस्वरः । जानते । ज्ञा अवबोधन इत्यस्य लटि रूपं । अच्छ । निपातस्य चेति संहितायां दीर्घः ॥

॥ अथ चतुर्थी ॥

अच्छा विवक्मि रोदसी सुमेके ग्राव्णो युजानो अध्वरे मनीषा ।
इमा उ ते मनवे भूरिवारा ऊर्ध्वा भवंति दर्शता यजत्राः ॥ ४ ॥
अच्छ । विवक्मि । रोदसी इति । सुमेके इति सुऽमेके । ग्राव्णः । युजानः । अध्वरे । मनीषा ।
इमाः । ऊं इति । ते । मनवे । भूरिऽवाराः । ऊर्ध्वाः । भवंति । दर्शताः । यजत्राः ॥ ४ ॥

अध्वरे यज्ञे ग्राव्णः सोमाभिषवार्थमुपलान् युजानः प्रयुंजानोऽहं सुमेके सुरूपे रोदसी द्यावापृथिव्यौ मनीषा मनस ईषया स्तुतिलक्षणया वाचाच्छ

विवक्मि । आभिमुख्येन स्तौमि । हे अग्ने ते तव भूरिवारा यजमानैर्बहुवारं वरणीया दर्शताः कमनीयतया दर्शनीया यजत्राः पूज्या इमा दीप्तयो मनवे मनुष्यव्यवहारार्थमूर्ध्वा ऊर्ध्वमुखा भवंति ॥ विवक्मि । वच परिभाषणे । लटि बहुलं छंदसीति शपः श्लुः । अर्तिपिपर्त्योश्च बहुलं छंदसीत्यभ्यासस्येत्वं । चकारस्य कुत्वं व्यत्ययेन । युजानः । युजिबुधिदृशः किच्चेत्यानच् । कित्वादगुणः । चित्त्वादंतोदात्तः । मनीषा । सुपो डादेशः ॥

॥ अथ पंचमी ॥

या ते जिह्वा मधुमती सुमेधा अग्ने देवेषूच्यत उरूची ।
तयेह विश्वाँ अवसे यजत्राना सादय पायया चा मधूनि ॥ ५ ॥
या । ते । जिह्वा । मधुऽमती । सुऽमेधाः । अग्ने । देवेषु । उच्यते । उरूची ।
तया । इह । विश्वान् । अवसे । यजत्रान् । आ । सादय । पायय । च । मधूनि ॥ ५ ॥

हे अग्ने ते तव मधुमत्युदकवती सुमेधाः । शोभना मेधा प्रज्ञा यस्याः सा । सर्वस्य ज्ञापयित्री या जिह्वा ज्वालोरूची बहुव्याप्तिः सती देवेषु मध्य आह्वानार्थमुच्यते प्रेर्यते तया जिह्वया यजत्रान्यजनीयान्विश्वान्देवानिह कर्मण्यस्माकमवसे रक्षणायासादय । उपवेशय । किंच तान्विश्वान्देवान्मधूनि मदकरान् सोमान्पायय ॥ सुमेधाः । नित्यमसिच्प्रजामेधयोरित्यसिच् । उच्यते । वच परिभाषणे । कर्मणि यकि रूपं । यद्वृत्तयोगादनिघातः । उरूची । अंचतेः क्विन् । अंचतेश्चोपसंख्यानमिति ङीप् । अनुदात्तस्य च यत्रोदात्तलोप इति ङीप उदात्तत्वं । पायय । पा पान इत्यस्य णौ परतः शाच्छासाह्वाव्यावेपां युगिति युक् । तिङ उत्तरत्वादनिघातः ॥

॥ अथ षष्ठी ॥

या ते अग्ने पर्वतस्येव धारासश्चंती पीपयद्देव चित्रा ।
तामस्मभ्यं प्रमतिं जातवेदो वसो रास्व सुमतिं विश्वजन्यां ॥ ६ ॥
या । ते । अग्ने । पर्वतस्यऽइव । धारा । असश्चंती । पीपयत् । देव । चित्रा ।
तां । अस्मभ्यं । प्रऽमतिं । जातऽवेदः । वसो इति । रास्व । सुऽमतिं । विश्वऽजन्यां ॥ ६ ॥

देव दीप्यमान हे अग्ने चित्रा नानारूपासश्चंत्यसदन्यत्र संगतिमकुर्वाणा या

ते तव प्रमतिः प्रकृष्टा बुद्धिः पीपयत् अपेक्षितफलदानेनास्मान्वर्धयति । तत्र दृष्टांतः । पर्वतस्येव धारा । यथा पर्वतस्य मेघस्योदकधारौषधिवनस्पत्यादिषु संगतिं कुर्वाणा तान्वर्धयति तद्वत् । वसो सर्वस्य वासयितर्जातवेदो जातप्रज्ञ हे अग्ने तां प्रमतिं परहितकरणसमर्थां बुद्धिमस्मभ्यं रास्व । दत्स्व । तथा विश्वजन्यां सर्वजनहितां सुमतिं शोभनां बुद्धिं दत्स्व ॥ असश्चंती । सश्चतिर्गतिकर्मा । शतर्युगितश्चेति ङीप् । नञा समासे नञ्स्वरः । पीपयत् । पा पाने । ण्यंतस्य लुङि चङि रूपं । चङ्यन्यतरस्यामिति चङि परतः पूर्वस्योदात्तत्वं । यद्वृत्तयोगादनिघातः । प्रमतिं । तादौ च निति कृत्यताविति गतेः प्रकृतिस्वरत्वं । रास्व । रा दाने । व्यत्ययेनात्मनेपदं । लोटि रूपं । आमंत्रितस्याविद्यमानत्वान्निघाताभावः ॥

॥ इति तृतीयस्य चतुर्थे द्वितीयो वर्गः ॥

धेनुः प्रत्नस्येति नवर्चं पंचमं सूक्तं वैश्वामित्रं त्रैष्टुभमाश्विनं । तथा चानुक्रांतं । धेनुर्नवाश्विनमिति ॥ प्रातरनुवाक आश्विनक्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे चास्य सूक्तस्य विनियोगः । सूत्रितं च । धेनुः प्रत्नस्य क उ श्रवदिति सूक्ते । आ॰ ४.१५. । इति ॥ व्यूळ्हे दशरात्रे द्वितीये छंदोमे प्रउगशस्त्रेऽयमाश्विनस्तृचः । द्वितीयस्याग्निं व इति खंडे सूत्रितं । धेनुः प्रत्नस्य काम्यं दुहाना ब्रह्माण इंद्रोप याहि विद्वान् । आ॰ ८.१०. । इति ॥

॥ तत्र प्रथमा ॥

धेनुः प्रत्नस्य काम्यं दुहानांतः पुत्रश्चरति दक्षिणायाः ।
आ द्योतनिं वहति शुभ्रयामोषसः स्तोमो अश्विनावजीगः ॥ १ ॥

धेनुः । प्रत्नस्य । काम्यं । दुहाना । अंतरिति । पुत्रः । चरति । दक्षिणायाः ।
आ । द्योतनिं । वहति । शुभ्रऽयामा । उषसः । स्तोमः । अश्विनौ । अजीगरिति ॥ १ ॥

धेनुः प्रीणयित्र्युषाः प्रत्नस्य पुरातनस्याग्नेः काम्यं कमनीयं पयो दुहाना । दोग्ध्री भवति । दक्षिणाया उषसः पुत्रः सूर्यस्तस्या अंतश्चरति । उषसोऽनंतरं शुभ्रयामा । सूर्यकिरणसंपर्काच्छुभ्रतया गमनं यस्यासौ शुभ्रयामा दिवसः । द्योतनिं सर्वस्य प्रकाशकं सूर्यमावहति । बिभर्ति । अत उषसः पुराश्विनौ स्तोतुं स्तोमः स्तोत्रकारी होत्रादिरजीगः । जागर्ति । उत्तिष्ठति ॥ शुभ्रयामा । या प्रापणे । आतो मनिन् । बहुव्रीहौ पूर्वपदस्वरः । अजीगः । जागृ निद्राक्षये ।

लङि तिप्यदादित्वाच्छपो लुक्। आकारस्येकारश्छांदसः। गुणे कृते हल्ङ्यादिना तिपो लोपः ॥

॥ अथ द्वितीया ॥

सुयुग्वहंति प्रति वामृतेनोर्ध्वा भवंति पितरेव मेधाः।
जरेथामस्मद्वि पणेर्मनीषां युवोरवश्चकृमा यातमर्वाक् ॥ २॥

सुऽयुक्। वहंति। प्रति। वां। ऋतेन। ऊर्ध्वाः। भवंति। पितराऽइव। मेधाः।
जरेथां। अस्मत्। वि। पणेः। मनीषां। युवोः। अवः। चकृम। आ। यातं। अर्वाक्॥२॥

हे अश्विनौ सुयुक् सुष्ठु रथे योजिता अश्वा ऋतेन सत्यभूतेन रथेन वां युवां प्रतिवहंति। यज्ञं प्रत्यागमनाय धारयंति। मेधा यज्ञाश्चोर्ध्वा युष्मदभिमुखमूर्ध्वा भवंति। तत्र दृष्टांतः। पितरेव। यथा पुत्राः पितरौ मातापितरावभिलक्ष्य गच्छंति तद्वत्। अस्मदस्मत्तः सकाशात्पणेर्मनीषामासुरीं बुद्धिं वि जरेथां। विशेषेण नाशयतं। वयं तु युवोर्युवयोरवो हविर्लक्षणमन्नं चकृम। कुर्मः। युवामर्वागस्मदाभिमुख्येनायातं॥ सुयुक्। युजेः क्विप्। सुपां सुलुगिति सुपो लुक्। पितरेव। पिता मात्रेति पितुः शेषः। सुपो डादेशः। जरेथां। जृष् वयोहानौ। ण्यंतस्य जनीजृष्क्नसुरंजोऽमंताश्चेति मित्त्वाद्वृद्ध्यभावः। छंदस्युभयथेत्याथाम आर्द्धधातुकत्वाण्णिलोपः। शपः पित्त्वादनुदात्तत्वे धातुस्वरः॥

॥ अथ तृतीया ॥

सुयुग्भिरश्वैः सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः।
किमंग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥ ३॥

सुयुक्ऽभिः। अश्वैः। सुऽवृता। रथेन। दस्रौ। इमं। शृणुतं। श्लोकं। अद्रेः।
किं। अंग। वां। प्रति। अवर्तिं। गमिष्ठा। आहुः। विप्रासः। अश्विना। पुराऽजाः ॥३॥

हे अश्विनौ सुयुग्भिः सुष्ठु योजितैरश्वैः सुवृता। पुनःपुनरावर्तत इति वृत्तचक्रं। शोभनचक्रोपेतेन रथेनागत्य दस्रौ शत्रूणामुपक्षपयितारौ युवामद्रेः। आद्रियते सर्वैरित्यद्रिः स्तोता। तस्येमं श्लोकं स्तोत्रं शृणुतं। अंग हे अश्विनौ विप्रासो मेधाविनः पुराजाः पुरातना ऋषयो वां युवामवर्तिमस्माकं वृत्तिहानिं प्रति गमिष्ठा अतिशयेन गंताराविति किमाहुः किं कथयंतीति। किं न कथयं-

तीत्यर्थः। प्रथमाष्टकेऽष्टमेऽध्याये सुवृता रथेनेत्यादि गतं॥ गमिष्ठा। गंतृशब्दादिष्ठनि रूपं॥

॥ अथ चतुर्थी ॥

आ मन्येथामा गतं कच्चिदेवैर्विश्वे जनासो अश्विना हवंते।
इमा हि वां गोऋजीका मधूनि प्र मित्रासो न ददुरुस्रो अग्रे॥४॥

आ। मन्येथां। आ। गतं। कत्। चित्। एवैः। विश्वे। जनासः। अश्विना। हवंते।
इमा। हि। वां। गोऽऋजीका। मधूनि। प्र। मित्रासः। न। ददुः। उस्रः। अग्रे॥४॥

कच्चिदिति प्रश्ने। हे अश्विनौ आमन्येथां। इमां मदीयां स्तुतिं जानीतं। किंच एवैर्गमनसाधनैरश्वैरागतं। यज्ञं प्रत्यागच्छतं। विश्वे सर्वे जनासः स्तोतारोऽश्विनाश्विनौ वां युवां हवंते। स्तुतिलक्षणाभिर्वाग्भिराह्वयंति। किंच गोऋजीका गवां पयसामिश्रणोपेतानि मधूनि मदकराणि सोमरसरूपाणीमेमानि हवींषि युवाभ्यां प्रददुः। अध्वर्य्वादयः प्रयच्छंति। तत्र दृष्टांतः। मित्रासो न। यथा मित्राणि मित्रेभ्योऽपेक्षितं ददति तद्वत्। उस्रः। वसति नभसीत्युस्रः सूर्यः। अग्र उषसोऽग्र उदेति। तस्मादागच्छतमिति भावः॥ ददुः। दाण् दान इत्यस्य लिट्युसि रूपं। हियोगादनिघातः। उस्रः। वस निवासे। स्फायितंचीत्यादिना रक्। कित्वात्संप्रसारणं। शासिवसिघसीनां चेति षत्वाभावश्छांदसः॥

॥ अथ पंचमी ॥

तिरः पुरू चिदश्विना रजांस्यांगूषो वां मघवाना जनेषु।
एह यातं पथिभिर्देवयानैर्दस्राविमे वां निधयो मधूनां॥५॥

तिरः। पुरु। चित्। अश्विना। रजांसि। आंगूषः। वां। मघऽवाना। जनेषु।
आ। इह। यातं। पथिऽभिः। देवऽयानैः। दस्रौ। इमे। वां। निऽधयः। मधूनां॥५॥

हे अश्विनौ पुरू चिद्बहून्यपि रजांसि स्थानानि तिरः स्वतेजसा तिरस्कुर्वंतौ वां युवामिह कर्मणि देवयानैः पथिभिर्मार्गैरायातं। मघवाना धनवंतौ हे अश्विनौ जनेषु स्तोतृषु वां युवयोरांगूष आ समंताद्घोषणीयं स्तोत्रं वर्तते। दस्रौ शत्रूणामुपक्षपयितारौ हे अश्विनौ वां युवयोर्मधूनां मदकराणां सोमानामिमे निधयः। निधीयतेऽत्र सोम इति निधयः पात्रविशेषाः। संति। तस्मादागच्छ-

तमिति भावः ॥ आंगूषः । आङ्पूर्वाद्घुषेः कर्मणि घञ् । आघुष्यत इत्याघोषः । घो इत्यस्य पृषोदरादित्वाद्गू इत्यादेशः । आङो ऽनुनासिकश्छंदसीत्यनच्यप्यनुनासिकश्छांदसः । यद्वा अगिर्गत्यर्थः । अस्मादंगूष इति सूत्रेणोषच्प्रत्ययांतो निपातितः । अंगति गच्छति देवानित्यंगूषः स्तोत्रं । अंगूष एवांगूषः । प्रज्ञादित्वात्स्वार्थिकोऽण् । प्रत्ययस्वरः । एह यातमित्यर्द्धचो गतः ॥

॥ इति तृतीयस्य चतुर्थे तृतीयो वर्गः ॥

अग्नीर्यामेति रिक्तोक्थ्येऽच्छावाकशस्त्रे पुराणमोक इति चतस्रो विकल्पेन याज्याः । सूचितं च । यदि नाधीयात्पुराणमोकः सख्यं शिवं वामिति चतस्रो याज्याः । आ॰ ९. ११. । इति ॥

॥ सैषा सूक्ते षष्ठी ॥

पु॒रा॒णमोकः॑ स॒ख्यं शि॒वं वां॑ यु॒वोर्न॑रा॒ द्रवि॑णं ज॒ह्नाव्यां॑ ।

पुन॑ः कृण्वा॒नाः स॒ख्या शि॒वानि॒ मध्वा॑ मदेम स॒ह नू स॑मा॒नाः ॥ ६ ॥

पु॒रा॒णं । ओकः॑ । स॒ख्यं । शि॒वं । वां॒ । यु॒वोः । न॒रा॒ । द्रवि॑णं । ज॒ह्नाव्यां॑ ।

पुन॒रिति॑ । कृ॒ण्वा॒नाः । स॒ख्या । शि॒वानि॑ । मध्वा॑ । म॒दे॒म॒ । स॒ह । नु । स॒मा॒नाः ॥ ६ ॥

हे अश्विनौ वां युवयोः पुराणं पुरातनं सख्यमोकः सेव्यं शिवं कल्याणकरं भवति । किंच हे नरा नरावस्मदीयस्य कर्मणो नेतारौ युवोर्युवयोर्द्रविणं धनं जह्नाव्यां जह्नुकुलजायां भवति । शिवानि सुखकराणि युवयोः सख्यानि पुनः कृण्वानाः कुर्वंतः समाना हविःप्रदानेनोपकारकत्वान्मित्रभूता वयं मध्वा मदकरेण सोमेन युवां सह युगपत् नु क्षिप्रं मदेम । हर्षयेम ॥ सख्यं । सख्युर्भाव इत्यर्थे सख्युर्य इति यप्रत्ययः । जह्नाव्यां । जह्नोः संबंधिनीत्यर्थे तस्येदमित्यण् । ओर्गुणः । ह्रस्वदीर्घयोर्व्यत्ययः । मदेम । मदी हर्षे इत्यस्याशीर्लिङि लिङ्याशिष्यङ्प्रत्ययः । निघातः ॥

॥ अथ सप्तमी ॥

अश्वि॑ना वा॒युना॑ यु॒वं सु॑दक्षा नि॒युद्भि॑श्च स॒जोष॑सा युवाना ।

नास॑त्या ति॒रोअ॑ह्न्यं जुषा॒णा सोमं॑ पिबतम॒स्रिधा॑ सुदानू ॥ ७ ॥

अश्वि॑ना । वा॒युना॑ । यु॒वं । सु॒ऽद॒क्षा॒ । नि॒युत्ऽभिः॑ । च॒ । स॒ऽजोष॑सा । यु॒वा॒ना॒ ।

नास॑त्या । ति॒रःऽअ॑ह्न्यं । जु॒षा॒णा । सोमं॑ । पि॒ब॒तं॒ । अ॒स्रिधा॑ । सु॒दा॒नू॒ इति॑ सु॒ऽदा॒नू॒ ॥ ७ ॥

सुदक्षा शोभनसामर्थ्योपेतौ युवाना नित्यतरुणौ नासत्या। न विद्यतेऽसत्यं ययोस्तौ। सुदानू शोभनफलस्य दातारौ हे अश्विनौ वायुना नियुद्भिश्च सजोषसा संगतौ जुषाणा सोमविषयप्रीतियुक्तावस्निधानुपक्षीणौ युवं युवां तिरोअह्म्यमह्नि तिरोहिते हूयमानमिमं सोमं पिबतं ॥ नियुद्भिः। यौतेः क्विप्। तिरोअह्म्यं। अह्नि भवमह्म्यं। भवे छंदसीति यत्। तिरो भूतमह्म्यं यस्मिन्काले स तिरोअह्म्यः। पूर्वपदप्रकृतिस्वरः ॥

॥ अथाष्टमी ॥

अश्विना परि वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः।
रथो ह वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः ॥८॥
अश्विना। परि। वां। इषः। पुरूचीः। ईयुः। गीःऽभिः। यतमानाः। अमृध्राः।
रथः। ह। वां। ऋतऽजाः। अद्रिऽजूतः। परि। द्यावापृथिवी इति। याति। सद्यः ॥८॥

हे अश्विनौ पुरूचीः पुर्वंचंति गच्छंतीति पुरूचीर्बहूनीषो हविर्लक्षणान्यन्नानि वां युवां परीयुः। परितो गच्छंति। तथामृध्राः केनाप्यतिरस्कृता यतमानाः कर्मणि प्रवर्तमानाः स्तोतारो गीर्भिः स्तुतिलक्षणाभिर्वाग्भिर्युवां परिचरंति। ऋतजा ऋतस्योदकस्य जनयिता। ऋते यज्ञे प्रादुर्भवतीति वा। अद्रिजूतः स्तोतृभिराकृष्टो वां युवयो रथो द्यावापृथिवी द्यावापृथिव्यौ सद्यस्तदानीमेव परियाति ह। सर्वतः प्राप्नोति खलु। अश्विनो रथस्य वेगवत्त्वे मंत्रवर्णः। यो वामश्विना मनसा जवीयान्रथः स्वश्वो विश आजिगाति। ऋग्वे॰ १.११७.२.। इति। अतः कारणादस्मदीयं यज्ञं प्रत्यागच्छतमिति भावः ॥ ईयुः। इण् गतावित्यस्य लिटि दीर्घ इणः कितीत्यभ्यासस्य दीर्घः। पादादित्वादनिघातः। यतमानाः। यती प्रयत्न इत्यस्य शानचि रूपं। शपः पित्त्वादनुदात्तत्वे शानचो लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः। ऋतजाः। जनेर्विट्। विड्वनोरित्यात्वं। अद्रिजूतः। जू इति सौत्रो धातुः। कर्मणि क्तः। तृतीया कर्मणीति पूर्वपदस्वरः ॥

॥ अथ नवमी ॥

अश्विना मधुषुत्तमो युवाकुः सोमस्तं पातमा गतं दुरोणे।
रथो ह वां भूरि वर्पः करिक्रत्सुतावतो निष्कृतमागमिष्ठः ॥९॥

अश्विना। मधुसुत्ऽतमः। युवाकुः। सोमः। तं। पातं। आ। गतं। दुरोणे।
रथः। ह। वां। भूरि। वर्पः। करिक्रत्। सुतऽवतः। निःऽकृतं। आऽगमिष्ठः ॥९॥

हे अश्विनौ यः सोमो मधुषुत्तमो मधुरसमत्यंतं प्रेरयन्युवाकुर्युवां कामयमानो वर्तते। यद्वा युवाकुर्वसतीवरीप्रभृतिभिर्मिश्रित इत्यर्थः। तमिमं सोमं पातं। पिबतं। दुरोणेऽस्माकं गृह आगतं। आगच्छतं। भूरि प्रभूतं वर्पो वारकं तेजः सर्वैर्वरणीयं धनं वा करिक्रत्पुनःपुनः कुर्वन्वां युवयो रथः सुतवतः सोममभिषुतवतो यजमानस्य निष्कृतं। निरित्येष समित्येतस्य स्थाने। नि॰ १२.७.। इति यास्कः। संस्कारि यद्वा संस्कृतं गृहमागमिष्ठोऽतिशयेनागच्छन् भवति ॥ युवाकुः। यौतेः कटिकुषिभ्यां काकुरिति बाहुलकादस्मादपि भवति। प्रत्ययस्वरेण मध्योदात्तः। करिक्रत्। करोतेर्यङ्लुकि शतरि दाधर्ति दर्धर्ति दर्धर्षीत्यादिना चुत्वाभावे यणादेशे कृतेऽंगस्यानृकारांतत्वादभ्यासस्य रिगागमो न प्राप्नोतीति सोऽपि निपात्यते। अभ्यस्तस्वरः। निष्कृतं। करोतेरादिकर्मणि क्तः। संस्कर्तुं प्रवृत्त इत्यर्थः। थाथादिस्वरः ॥

॥ इति तृतीयस्य चतुर्थे चतुर्थो वर्गः ॥

मित्रो जनानिति नवर्चं षष्ठं सूक्तं वैश्वामित्रं त्रैष्टुभं मैत्रं। मित्रो मैत्रं चतुर्गायत्र्यंतमित्यनुक्रमणिका। आदितः पंच त्रिष्टुभः शिष्टाश्चतस्रो गायत्र्यः। मित्रो देवता ॥ अग्निहोत्रार्थे पयसि वर्षविंदुपतने मित्रो जनानित्यनया समिधमादध्यात्। सूचितं च। मित्रो जनान्यातयति ब्रुवाण इति समिदाधानं। आ॰ ३. ११.। इति ॥

॥ तत्र प्रथमा ॥

मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्यां।
मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत ॥१॥

मित्रः। जनान्। यातयति। ब्रुवाणः। मित्रः। दाधार। पृथिवीं। उत। द्यां।
मित्रः। कृष्टीः। अनिऽमिषा। अभि। चष्टे। मित्राय। हव्यं। घृतऽवत्। जुहोत ॥१॥

ब्रुवाणः स्तूयमानः शब्दं कुर्वाणो वा मित्रः। प्रकर्षेण सर्वैर्मीयते तथा सर्वान्वृष्टिप्रदानेन त्रायत इति वा मित्रः सूर्यः। जनान् कर्षकादिजनान्यातयति। कृष्यादिकर्मसु प्रयत्नं कारयति। तथा मित्र एव पृथिवीमुतापि च द्यामेतावुभौ

लोकौ वृष्टिद्वारान्नं यागांश्च जनयन् दाधार। धारयति। तथा सति मित्रोऽनिमिषानिमिषेणानुग्रहदृष्ट्या कृष्टीः कर्मवतो मनुष्यानभिचष्टे। सर्वतः पश्यति। एतत्सर्वं ज्ञात्वा हे ऋत्विजो घृतवदुपस्तरणाभिघारणयुक्तं हव्यं हवनयोग्यं पुरोडाशादिकं तस्मै मित्राय देवाय जुहोत। जुहुत। प्रयच्छतेत्यर्थः। उक्तार्थे यास्को ब्रवीति। मित्रो जनान्यातयति ब्रुवाणः शब्दं कुर्वन्। मित्र एव धारयति पृथिवीं च दिवं च। मित्रः कृष्टीरनिमिषन्नभिविपश्यतीति। कृष्टय इति मनुष्यनाम कर्मवंतो भवंति विकृष्टदेहा वा। मित्राय हव्यं घृतवज्जुहोतेति व्याख्यातं। जुहोतिर्दानकर्मा। नि° १०.२२.। इति ॥ यातयति। यती प्रयत्न इत्यस्य ण्यंतस्य लटि रूपं। दाधार। तुजादीनामित्यभ्यासस्य दीर्घः। जुहोत। जुहोतेर्लोटि प्रत्ययस्य तबादेशः। गुणः। निघातः ॥

देवसुवां हविःषु मित्रस्य सत्यस्य प्र स मित्रेति याज्या। एषैव प्रातर्होमस्य कालात्ययनिमित्ते मैत्रे चरौ याज्या। सूचितं च। प्र स मित्र मर्तो अस्तु प्रयस्वांस्त्वां नष्टवान्महिमाय पृच्छते। आ° ४.११.। इति॥ तत इष्टिर्मित्रः सूर्योऽभि यो महिना दिवं प्र स मित्र मर्तो अस्तु प्रयस्वानिति संस्थितायां। आ° ३.१२.। इति च॥

॥ सैषा सूक्ते द्वितीया ॥

प्र स मि॑त्र॒ मर्तो॑ अस्तु॒ प्रय॑स्वा॒न्यस्त॑ आदित्य॒ शिक्ष॑ति व्र॒तेन॑।
न ह॑न्यते॒ न जी॑यते॒ त्वोतो॒ नैन॒मंहो॑ अश्नो॒त्यंति॑तो॒ न दू॒रात् ॥२॥

प्र। सः। मि॒त्र॒। मर्तः॑। अ॒स्तु॒। प्रय॑स्वान्। यः। ते॒। आ॒दि॒त्य॒। शिक्ष॑ति। व्र॒तेन॑।
न। ह॒न्य॒ते॒। न। जी॒य॒ते॒। त्वाऽऊ॑तः। न। ए॒नं॒। अंहः॑। अ॒श्नो॒ति॒। अंति॑तः। न। दू॒रात्॥२॥

हे आदित्य व्रतेन यज्ञेन युक्तो यो मनुष्यस्ते तुभ्यं शिक्षति हविर्लक्षणमन्नं ददाति हे मित्र स मर्तो मनुष्यः प्रयस्वानन्नवान् प्रास्तु। प्रभवतु। त्वोतस्त्वया रक्षितो स मनुष्यः केनापि न हन्यते। न बाध्यते। न जीयते। नाभिभूयते च। एनं तुभ्यं हविर्दत्तवंतं पुरुषमंहः पापमंतितः समीपान्नाश्नोति। न प्राप्नोति। दूरादपि न प्राप्नोति ॥ शिक्षतिर्दानकर्मा। व्यत्ययेन परस्मैपदं। यद्वृत्तयोगादनिघातः। जीयते। जयतेः कर्मणि यक्यकृत्सार्वधातुकयोरिति दीर्घः। त्वोतः। तृतीया कर्मणीति पूर्वपदस्वरः। अश्नोति। अशू व्याप्तौ। स्वादिः। व्यत्ययेन परस्मैपदं ॥

देवसुवां हविःषु मित्रस्य सत्यस्यानुवाक्या। अनमीवास इळया मदंतः प्र स मित्र मर्तो अस्तु प्रयस्वानिति सूचितं। आ॰ ४.११.॥

॥ सैषा सूक्ते तृतीया ॥

अनमीवास इळया मदंतो मितज्ञवो वरिमन्ना पृथिव्याः।
आदित्यस्य व्रतमुपक्षियंतो वयं मित्रस्य सुमतौ स्याम ॥ ३॥

अनमीवासः। इळया। मदंतः। मितऽज्ञवः। वरिमन्। आ। पृथिव्याः।
आदित्यस्य। व्रतं। उपऽक्षियंतः। वयं। मित्रस्य। सुऽमतौ। स्याम ॥ ३॥

हे मित्र अनमीवासो रोगवर्जिता इळयान्नेन मदंतो माद्यंतः पृथिव्या वरिमन्विस्तीर्णे प्रदेशे मितज्ञवो मितजानुका आ यथाकामं सर्वत्र गच्छंत आदित्यस्य संबंधि व्रतं कर्मोपक्षियंतस्तस्य कर्मणः समीपे निवसंतः। तदीयं कर्म कुर्वाणा इत्यर्थः। तादृशा वयं मित्रस्यादित्यस्य सुमतौ शोभनायामनुग्रहबुद्ध्यां स्याम। वर्तेमहि ॥ मदंतः। मदी हर्षे इत्यस्य शतरि व्यत्ययेन शप्। मितज्ञवः। जानुशब्दस्य ज्ञुश्छांदसः। वरिमन्। उरुशब्दात्पृथ्वादित्वादिमनिच्। प्रियस्थिरेत्यादिना वरादेशः। सुपां सुलुगिति सप्तम्या लुक्। व्यत्ययेनाद्युदात्तः ॥

॥ अथ चतुर्थी ॥

अयं मित्रो नमस्यः सुशेवो राजा सुक्षत्रो अजनिष्ट वेधाः।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ ४॥

अयं। मित्रः। नमस्यः। सुऽशेवः। राजा। सुऽक्षत्रः। अजनिष्ट। वेधाः।
तस्य। वयं। सुऽमतौ। यज्ञियस्य। अपि। भद्रे। सौमनसे। स्याम ॥ ४॥

अयं पूर्वमंत्रे प्रतिपादितो मित्रः सूर्यो नमस्यः सर्वैर्नमस्करणीयः सुशेवः शोभनसुखः। सुखेन सेव्य इत्यर्थः। राजा सर्वस्य जगतः प्रकाशप्रदानेन स्वामी सुक्षत्रः। क्षत्रशब्देन बलमुच्यते। शोभनबलोपेतो वेधाः सर्वस्य जगतो विधाता। एवंगुणोपेतः सूर्योऽजनिष्ट। प्रादुरभूत्। तस्यैवंविधगुणोपेतस्य यज्ञियस्य यज्ञार्हस्य सूर्यस्य सुमतौ शोभनायां बुद्ध्यां भद्रे कल्याणकारिणि सौमनसे सौमनस्येऽपि यजमाना वयं स्याम। भवेम ॥ नमस्यः। नमसि साधुः। तत्र साधु-

रिति यत्। तित्स्वरितः। अजनिष्ट। जनी प्रादुर्भाव इत्यस्य लुङि सिचि रूपं। सौमनसे। सुमनस इदमित्यर्थे तस्येदमित्यण्। प्रत्ययस्वरः॥

॥ अथ पंचमी ॥

महाँ आदित्यो नमसोपसद्यो यातयज्जनो गृणते सुशेवः।
तस्मा एतत्पन्यतमाय जुष्टमग्नौ मित्राय हविरा जुहोत ॥५॥

महान्। आदित्यः। नमसा। उपऽसद्यः। यातयत्ऽजनः। गृणते। सुऽशेवः।
तस्मै। एतत्। पन्यऽतमाय। जुष्टं। अग्नौ। मित्राय। हविः। आ। जुहोत ॥७॥

योऽयमादित्यो महान् अत एव नमसा नमस्कारेणोपसद्यः सर्वैरुपसदनीयो यातयज्जनः। प्रातः प्रातः स्वस्वकर्मणि प्रवर्तनीया जना येनेति स तथोक्तः। गृणते स्तोत्रं कुर्वते जनाय सुशेवश्च भवति तस्मै पन्यतमाय स्तुत्यतमाय मित्रायादित्याय जुष्टं प्रीतिविषयमेतद्धविरग्नावाजुहोत। जुहुत॥ यातयज्जनः। यती प्रयत्न इत्यस्य ण्यंतस्य शतरि रूपं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरे प्राप्ते मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। गृणते। गृ शब्दे। शतुरनुम इति विभक्तेरुदात्तत्वं। पन्यतमाय। पनतेरघ्न्यादित्वाद्यत्। यतोऽनाव इत्याद्युदात्तत्वं। जुष्टं। नित्यं मंत्र इत्याद्युदात्तत्वं॥

॥ इति तृतीयस्य चतुर्थे पंचमो वर्गः॥

अभिप्लवषडहे दशरात्रे च सप्तदशैकविंशादिस्तोमे सति होत्रादिकशस्त्रेष्वावापस्थाने पंचसप्तादिसंख्याका ऋच आवपनीयाः। तत्र मैत्रावरुणशस्त्रे मित्रस्य चर्षणीधृत इत्याद्याश्चतस्र आवापार्थाः। सूत्रितं च। मित्रस्य चर्षणीधृत इति चतस्रो मैत्र्यः।आ॰ ७.५.। इति॥

॥ अथ षष्ठी ॥

मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि। द्युम्नं चित्रश्रवस्तमं ॥६॥

मित्रस्य। चर्षणिऽधृतः। अवः। देवस्य। सानसि। द्युम्नं। चित्रश्रवःऽतमं ॥६॥

चर्षणीधृतो मनुष्याणां वृष्टिप्रदानेन धारकस्य मित्रस्य देवस्य संबंध्यवोऽन्नं सानसि सर्वैः संभजनीयं द्युम्नं तदीयं धनं च चित्रश्रवस्तमं। अतिशयेन चायनीयकीर्तियुक्तं॥ सानसि। सनोतेः सानसिपर्णसीत्यादिनासिच्प्रत्ययांतत्वेन निपातनादुपधावृद्धिः। चित्त्वादंतोदात्तः। स्वमोरिति स्वमोर्लुक्॥

प्रातर्होमस्य कालात्यये मैत्रेष्टिः । तस्यामभि यो महिनेत्यनुवाक्या । सूचितं च । अभि यो महिना दिवं प्र स मित्र मर्तो अस्तु प्रयस्वान् । आ॰ ३.१२. । इति ॥

॥ सैषा सूक्ते सप्तमी ॥

अभि यो महिना दिवं मित्रो बभूव सप्रथाः । अभि श्रवोभिः पृथिवीं ॥७॥

अभि । यः । महिना । दिवं । मित्रः । बभूव । सऽप्रथाः । अभि । श्रवःऽभिः । पृथिवीं ॥७॥

यो मित्रो महिना स्वकीयेन महिम्ना दिवमंतरिक्षमभिबभूवाभिभवति स मित्रः सप्रथाः । प्रथः प्रसिद्धिः कीर्तिः । तत्सहितः श्रवोभिर्वृष्टिद्वारोत्पादितैरन्नैः पृथिवीमप्यभिभवति । बह्वन्नयुक्तां करोतीत्यर्थः ॥ सप्रथाः । प्रथ प्रख्याने । असुन् । वोपसर्जनस्येति सहस्य सभावः ॥

॥ अथाष्टमी ॥

मित्राय पंच येमिरे जना अभिष्टिशवसे । स देवान्विश्वान्बिभर्ति ॥८॥

मित्राय । पंच । येमिरे । जनाः । अभिष्टिऽशवसे । सः । देवान् । विश्वान् । बिभर्ति ॥८॥

पंच जना निषादपंचमाश्चत्वारो वर्णा अभिष्टिशवसे शत्रूणामभिगंतृबलयुक्ताय मित्राय येमिरे । हवींष्युद्यच्छंति । स तादृशो मित्रो विश्वान् सर्वान्देवान्बिभर्ति । स्वस्वरूपतया धारयति ॥ अभिष्टिशवसे । इषेर्मंत्रे वृषेत्यादिना क्तिन् । तादौ च नितीत्यभेरंतोदात्तत्वं । शकंध्वादित्वात्पररूपत्वं । बहुव्रीहौ पूर्वपदस्वरः ॥

॥ अथ नवमी ॥

मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे । इषं इष्टव्रता अकः ॥९॥

मित्रः । देवेषु । आयुषु । जनाय । वृक्तऽबर्हिषे । इषः । इष्टऽव्रताः । अकरित्यकः ॥९॥

मित्रो भगवानादित्यो देवेषु द्योतमानादिगुणयुक्तेष्वायुषु मनुष्येषु मध्ये यो जनो वृक्तबर्हिः । वृक्तं लूनं बर्हिर्येन सः । बर्हिर्लवनासादनपूर्वं हविषो दाता ऋत्विगित्यर्थः । तस्मै वृक्तबर्हिषे जनायेष्टव्रताः । इष्टानि कल्याणानि व्रतानि कर्माणि याभिः सिध्यंति ता इषस्तादृशान्यन्नान्यकः । करोति । तस्मै ददातीत्यर्थः ॥ वृक्तबर्हिषे । ओव्रश्चू छेदने । कर्मणि निष्ठायां यस्य विभाषेतीट्प्रतिषेधः । बहुव्रीहौ पूर्वपदस्वरः । अकः । करोतेर्लुङि च्लेर्मंत्रे वृषेत्यादिना लुक् । सिपो हल्ङ्यादिलोपः । निघातः ॥

॥ इति तृतीयस्य चतुर्थे षष्ठो वर्गः ॥

इहेह व इति सप्तर्चं सप्तमं सूक्तं वैश्वामित्रं जागतमृभुदेवताकं। अंत्यस्तृच इंद्रदेवताकश्च। तथा चानुक्रांतं। इहेह सप्तार्भवं जागतं तृचोऽंत्य ऐंद्रश्चेति॥ सूक्तविनियोगो लैंगिकः। आद्यास्तिस्रः पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि वैश्वदेवशस्त्र आर्भवनिविद्धानीयाः। सूचितं च। इहेह व इति चतस्रः। आ० ७.५.। इति॥

॥ तत्र प्रथमा ॥

इहेह वो मनसा बंधुता नर उशिजो जग्मुरभि तानि वेदसा।
याभिर्मायाभिः प्रतिजूतिवर्पसः सौधन्वना यज्ञियं भागमानश ॥१॥

इहऽइह। वः। मनसा। बंधुता। नरः। उशिजः। जग्मुः। अभि। तानि। वेदसा।
याभिः। मायाभिः। प्रतिजूतिऽवर्पसः। सौधन्वनाः। यज्ञियं। भागं। आनश ॥१॥

हे ऋभवो वो युष्माकं बंधुता। बध्नंति फलेन संयोजयंतीति बंधवः कर्माणि। तेषां भावो बंधुता। इहेह सर्वत्र मनसा सर्वैर्ज्ञायते। नरो हे मनुष्या ऋभव उशिजो यज्ञभागं कामयमाना भवंतो वेदसा यज्ञभागप्रापककर्मविषयज्ञानेन तानि तादृशानि कर्माण्यभिजग्मुः। प्राप्नुवंति। कानि तानि। मायाभिः। मीयंते ज्ञायंत इति मायाः कर्माणि। याभिर्मायाभिर्यैः कर्मभिः प्रतिजूतिवर्पसः प्रतिपक्षाभिभवनशीलतेजोयुक्ताः सौधन्वनाः। सुधन्वनामांगिरसः पुत्रः कश्चिदृषिः। तस्य पुत्राः सौधन्वनाः। ते च त्रय ऋभुर्विभ्वा वाज इति। एतन्नामका यूयं यज्ञियं यज्ञार्हं भागं सोमपानादिलक्षणमानश। व्याप्ताः स्थ। तथा च मंत्रवर्णः। ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन। ऋग्वे० १.१६१.६.। इति। अयमर्थो ब्राह्मणेऽप्यृभवो वै देवेषु तपसा सोमपीथमभ्यजयन्नित्यत्रोपाख्यानपूर्वकं स्पष्टमभिहितः। यद्वा। नरः कर्मणां नेतारो हे ऋभव उशिजः कामयमाना वेदसा हविर्लक्षणेन धनेन युक्ताः स्तोतारो वो युष्माकं तानि चमसतक्षणादीनि कर्माणि बंधुता बंधुतया सख्येन मनसा जग्मुः। अभिगच्छंति। कानीत्याशंकायामाह। यैश्चमसतक्षणादिभिः कर्मभिर्यज्ञार्हं भागं यूयमाप्नुत तान्यभिगच्छंति। युष्माकं बुद्धिनैपुणानि चिंतयंतीत्यर्थः॥ इहेह। नित्यवीप्सयोरिति द्विर्वचनं। परस्याम्रेडितत्वादनुदात्तत्वे पूर्वपदस्वरः। बंधुता। बन्ध बंधने। शृस्वृस्निहीत्यादिना कर्तर्युप्रत्ययः। समूह इत्यर्थे ग्रामजनबंधुसहायेभ्यस्तल्। पा० ४.२.४३.। इति तल्। लित्स्वरः॥

॥ अथ द्वितीया ॥

याभिः शचीभिश्चमसाँ अपिंशत यया धिया गामरिणीत चर्मणः ।
येन हरी मनसा निरतक्षत तेन देवत्वमृभवः समानश ॥ २ ॥

याभिः । शचीभिः । चमसान् । अपिंशत । यया । धिया । गां । अरिणीत । चर्मणः ।
येन । हरी इति । मनसा । निःऽअतक्षत । तेन । देवऽत्वं । ऋभवः । सं । आनश ॥ २ ॥

हे ऋभवो याभिः शचीभिः शक्तिभिश्चमसान् चतुरोऽपिंशत विभक्तवंतः स्थ । यया धिया प्रज्ञया गां मृतामरिणीत चर्मणो चर्मणा योजनात्प्रापितवंतः स्थ । येन मनसा प्रज्ञानेन हरी एतन्नामकाविंद्रस्याश्वौ निरतक्षत नितरामकुरुत । तथायं मंत्रवर्णः । य इंद्राय वचोयुजा ततक्षुर्मनसा हरी । ऋग्वे॰ १.२०.२.। इति । तेन सर्वेणानेन कर्मणा देवत्वं यज्ञभागार्हत्वलक्षणं देवभावं समानश । सम्यक् प्राप्ताः स्थ ॥ अपिंशत । पिश अवयवे । तुदादिः । तस्य लङि मध्यमे रूपं । यद्वृत्तयोगादनिघातः । अरिणीत । री गतिरेषणयोः । क्र्यादिः । तस्य लङि रूपं । अत्रापि पूर्ववदनिघातः । निरतक्षत । तक्षू त्वक्षू तनूकरणे । लङि रूपं । पूर्ववदनिघाते तिङि चोदात्तवतीति गतेर्निघातः । अडुदात्तः । आनश । अश्नोतेर्लिटि रूपं । निघातः ॥

॥ अथ तृतीया ॥

इंद्रस्य सख्यमृभवः समानशुर्मनोर्नपातो अपसो दधन्विरे ।
सौधन्वनासो अमृतत्वमेरिरे विष्ट्वी शमीभिः सुकृतः सुकृत्यया ॥ ३ ॥

इंद्रस्य । सख्यं । ऋभवः । सं । आनशुः । मनोः । नपातः । अपसः । दधन्विरे ।
सौधन्वनासः । अमृतऽत्वं । आ । ईरिरे । विष्ट्वी । शमीभिः । सुऽकृतः । सुऽकृत्यया ॥ ३ ॥

मनोर्नपातो मनुष्यस्यांगिरसः पुत्रा अपसो यागादिलक्षणकर्मवंत ऋभव इंद्रस्य सख्यं समानख्यानत्वं समानशुः । सम्यक् प्राप्नुवन् । तथेंद्रस्य सख्यं प्राप्तास्त ऋभवो दधन्विरे । पूर्वं मनुष्यत्वेन मरणयोग्या अपीदानीमिंद्रस्य सख्येन प्राणान्धारयंति । तथा मंत्रः । अधारयंत वह्नयः । ऋग्वे॰ १.२०.८.। इति । सौधन्वनासः सुधन्वनामकस्यर्षेः पुत्रा ऋभवः सुकृतः शोभनकर्माणः संतः प्रभूतैः शमीभिर्देवत्वप्राप्तिप्रतिबंधनिवारणहेतुभिः कर्मभिः सुकृत्यया शोभनेन कर्मणा च विष्ट्वी

व्याप्यामृतत्वमेरिरे। देवत्वं प्रापुः। तथा च मंत्रांतरमाम्नायते। मर्तासः संतो अमृतत्वमानशुः। ऋग्वे॰ १.११०.४.। इति॥ नपातः। नभ्राण्नपादित्यादिना नञः प्रकृतिभावः। दधन्विरे। धविर्गत्यर्थः। व्यत्ययेनात्मनेपदं। लिटि रूपं। ईरिरे। ईर गतौ। मंत्रत्वादाम्न भवति। निघातः। सुकृत्यया। करोतेर्भावे कृञः श चेति क्यप्। प्रत्ययस्य व्यत्ययेनांतोदात्तत्वं। समासे कृदुत्तरस्वरः॥

॥ अथ चतुर्थी ॥

इंद्रे॑ण याथ स॒रथं॑ सु॒ते सचाँ॒ अथो॒ वशा॑नां भवथा स॒ह श्रि॒या।
न वः॑ प्रति॒मै सु॑कृ॒तानि॑ वाघतः॒ सौध॑न्वना ऋभवो॒ वी॒र्या॑णि च॥४॥
इंद्रे॑ण। या॒थ॒। स॒ऽरथ॑म्। सु॒ते। सचा॑। अथो॒ इति॑। वशा॑नाम्। भ॒व॒थ॒। स॒ह। श्रि॒या।
न। वः॒। प्र॒ति॒ऽमै। सु॒ऽकृ॒तानि॑। वा॒घ॒तः॒। सौध॑न्वनाः। ऋ॒भ॒वः॒। वी॒र्या॑णि। च॒॥४॥

हे ऋभवो यूयमिंद्रेण सचा सह सरथं समानमेकं रथमारुह्य सुतेऽभिषुतसोमवति यज्ञे याथ। गच्छथ। अथो अनंतरमिंद्रेण सहैकरथमारूढा यूयं वशानां। उश्यते काम्यते यजमानेन स्वर्गादिलक्षणं फलमेभिरिति वशा मनुष्याः। तेषां श्रिया स्तुतिहविरादिरूपया सह भवथ। हे सौधन्वनाः सुधन्वनः पुत्रा वाघतोऽमृतत्वादिलक्षणफलस्य वोढारो मेधाविनो वेति यास्कः। तादृशा हे ऋभवो वो युष्माकं सुकृतानि देवत्वस्य प्रापकाणि शोभनानि कर्माणि न प्रतिमै। प्रतिमातुमियत्तया परिच्छेत्तुं न केनापि शक्यानि। तथा वीर्याणि युष्माकं सामर्थ्यानि च नैव प्रतिमातुं शक्यानि॥ वशानां। वश कांतौ। वशिरण्योरुपसंख्यानमिति करणेऽप्प्रत्ययः। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। वशाशब्दो बंध्यावचनश्चेदंतोदात्तो भवति। वशा मेषा अवसृष्टास आहुताः। ऋग्वे॰ १०.९१.१४.। इति। वः। युष्मच्छब्दस्य षष्ठीबहुवचने वसादेशः। निघातः। प्रतिमै। माङ् माने। विच्। प्रतिमाः प्रतिमानं। तस्य चतुर्थ्येकवचन आतो लोपश्छांदसः। एकादेशस्वरः॥

आभिप्लविके पंचमेऽहनि वैश्वदेवशस्त्र इंद्र ऋभुभिरित्यार्भवस्तृचः। सूत्रितं च। घृतवती भुवनानामभिश्रियेंद्र ऋभुभिर्वाजवद्भिरिति तृचौ। आ॰ ७.७.। इति॥ आद्यस्तृतीयसवने होतुः प्रस्थितयाज्या। सूत्रितं च। इंद्र ऋभुभिर्वाजवद्भिः समुक्षितमिंद्रावरुणा सुतपाविमं सुतं। आ॰ ५.५.। इति॥

॥ सैषा सूक्ते पंचमी ॥

इंद्रं ऋभुभिर्वाजवद्भिः समुक्षितं सुतं सोममा वृषस्वा गभस्त्योः ।
धियेषितो मघवन्दाशुषो गृहे सौधन्वनेभिः सह मत्स्वा नृभिः ॥ ५ ॥

इंद्रं । ऋभुऽभिः । वाजवत्ऽभिः । संऽउक्षितं । सुतं । सोमं । आ । वृषस्व । गभस्त्योः ।
धिया । इषितः । मघऽवन् । दाशुषः । गृहे । सौधन्वनेभिः । सह । मत्स्व । नृऽभिः ॥ ५ ॥

हे इंद्र वाजवद्भिः । वाजो नाम ऋभूणां भ्राता यद्वा वाजोऽन्नं । तत्सहितैर्ऋभुभिः सहितस्त्वं समुक्षितं सम्यगद्भिः सिक्तं ग्रावभिः सुतं सोमं गभस्त्योः । बप्सत्यदंत्याभ्यामन्नमिति गृह्णीति पदार्थानाभ्यामिति वा गभस्ती बाहू । तयोर्बाह्वोरावृषस्व । आक्षारय । ग्रहमुभाभ्यां गृहीत्वा सोमं पिबेत्यर्थः । हे मघवन् हे इंद्र धिया स्तोत्ररूपेण कर्मणेषितः प्रेरितस्त्वं दाशुषो हविर्दत्तवतो यजमानस्य गृहे सौधन्वनेभिः सुधन्वनः पुत्रैर्नृभिर्मनुष्यैर्ऋभुभिः सह साकं मत्स्व । सोमपानेन हृष्टो भव ॥ समुक्षितं । उक्ष सेचने । कर्मणि क्तः । गतिरनंतर इति गतेःस्वरः । गभस्त्योः । भस भर्त्सनदीप्त्योरित्यस्माद्गसेर्गद्वेति सूत्रेण तिप्रत्ययो धातोर्गडागमश्च । यद्वा गृह्णातेः पृषोदरादित्वादेवं नेयं । मत्स्व । मदि स्तुत्यादिषु । लोटि बहुलं छंदसीति विकरणस्य लुक् । निघातः ॥

॥ अथ षष्ठी ॥

इंद्रं ऋभुमान्वाजवान्मत्स्वेह नोऽस्मिन्सवने शच्या पुरुष्टुत ।
इमानि तुभ्यं स्वसराणि येमिरे व्रता देवानां मनुषश्च धर्मभिः ॥ ६ ॥

इंद्रं । ऋभुऽमान् । वाजऽवान् । मत्स्व । इह । नः । अस्मिन् । सवने । शच्या । पुरुऽस्तुत ।
इमानि । तुभ्यं । स्वसराणि । येमिरे । व्रता । देवानां । मनुषः । च । धर्मऽभिः ॥ ६ ॥

पुरुष्टुत बहुभिः स्तुत हे इंद्र ऋभुमान् ऋभुणा तद्वान् वाजवान् वाजेन ऋभोर्भ्राता युक्तः शच्येंद्राण्या कर्मणा वा सहितः सन् नोऽस्माकमिह कर्मण्यस्मिन् तृतीयसवने मत्स्व । हृष्टो भव । हे इंद्र तुभ्यं त्वदर्थमिमानि स्वसराण्यहानि येमिरे । तव सोमपानार्थं त्रिषु सवनेषु नियतान्यासते । किंच देवानामग्न्यादीनां व्रता व्रतानि कर्माणि च मनुषो मनुष्यस्य धर्मभिः कर्मभिः साकं त्वदर्थं नियतान्यासते ॥

॥ अथ सप्तमी ॥

इंद्र ऋभुभिर्वाजिभिर्वाजयन्निह स्तोमं जरितुरुप याहि यज्ञियं ।
शतं केतेभिरिषिरेभिरायवे सहस्रणीथो अध्वरस्य होमनि ॥ ७ ॥

इंद्र । ऋभुऽभिः । वाजिऽभिः । वाजयन् । इह । स्तोमं । जरितुः । उप । याहि । यज्ञियं ।
शतं । केतेभिः । इषिरेभिः । आयवे । सहस्रऽनीथः । अध्वरस्य । होमनि ॥ ७ ॥

हे इंद्र वाजिभिर्वाजयुक्तैर्ऋभुभिः सहितस्त्वं वाजयन् स्तोतुर्वाजमन्नं कुर्वाण इह यज्ञे यज्ञियं यज्ञार्हं जरितुः स्तोमं स्तोत्रमुपयाहि । आगच्छ । पुनः किंविशिष्टः । केतेभिः । केत्यते ज्ञायते सर्वमेभिरिति केताः प्राज्ञा मरुतः । तैः शतं शतसंख्याकैरिषिरेभिरिषिरैर्गमनकुशलैरश्वैः सहित आयवे मनुष्याय यजमानाय सहस्रनीथो बहुप्रकारनयनोपेतोऽध्वरस्य । न विद्यते ध्वरो हिंसा यस्य तादृशस्य सोमस्य होमनि होम आगच्छेति शेषः ॥ वाजयन् । वाजं करोतीति णिच् । णाविष्ठवदितीष्ठवद्भावात्तुरिष्ठेमेयःस्विति टिलोपः । केतेभिः । कित ज्ञाने । घञ् । ञित्त्वादाद्युदात्तः ॥

॥ इति तृतीयस्य चतुर्थे सप्तमो वर्गः ॥

उषो वाजेनेति सप्तर्चमष्टमं सूक्तं वैश्वामित्रमुषोदेवताकं । तथा चानुक्रांतं । उष औषस्यमिति ॥ प्रातरनुवाक उषःक्रतावाश्विनशस्त्रे च त्रैष्टुभे छंदस्येतस्य सूक्तस्य विनियोगः । सूचितं च । उषो वाजेनेदमु त्यत् । आ॰ ४. १४. । इति ॥

॥ तत्र प्रथमा ॥

उषो वाजेन वाजिनि प्रचेताः स्तोमं जुषस्व गृणतो मघोनि ।
पुराणी देवि युवतिः पुरंधिरनु व्रतं चरसि विश्ववारे ॥ १ ॥

उषः । वाजेन । वाजिनि । प्रऽचेताः । स्तोमं । जुषस्व । गृणतः । मघोनि ।
पुराणी । देवि । युवतिः । पुरंऽधिः । अनु । व्रतं । चरसि । विश्वऽवारे ॥ १ ॥

वाजेन वाजिन्यन्नेनान्नवति । तथा च मंत्रः । सं वाजैर्वाजिनीवति । ऋग्वे॰ १. ४९. १६. । इति । मघोनि धनवति हे उषः प्रचेताः प्रकृष्टज्ञानवती सती गृणतः तव स्तोत्रं कुर्वतः स्तोतुः स्तोमं स्तोत्रं जुषस्व । यद्वा वाजेन हविर्लक्षणेनान्नेन सह स्तोमं जुषस्वेति संबंधः । विश्ववारे विश्वैः सर्वैर्वरणीये हे उषो देवि पुराणी

पुरातनी युवतिरित्युपमा तद्वच्छोभमाना। सुसंकाशा मातृमृष्टेव योषा। ऋग्वे॰ १.१२४.११.। इतिवत्। पुरंधिः। पुरु बहु धीः स्तोत्रलक्षणं कर्म यस्याः सा। बहुस्तोत्रवती। पुरंधिर्बहुधीरिति यास्कः। पुरंधिः शोभमाना वा। एवंविधगुणोपेता त्वमनुव्रतं यज्ञकर्माभिलक्ष्य चरसि। यष्टव्यतया वर्तसे॥ मघोनि। मघशब्दान्मतुबर्थे छंदसीवनिपाविति वनिप्। स्त्रियामृन्नेभ्यो ङीप्। श्वयुवमघोनामतद्धित इति संप्रसारणे कृते गुणः। संबुद्धावंबार्थनद्योर्ह्रस्वः। निघातः। पुराणी। पुराणशब्दः पुराणप्रोक्तेष्विव्यंतोदात्तत्वेन निपातितः। टिड्ढाणञिति ङीप्। अनुदात्तस्य च यत्रोदात्तलोप इत्यंतोदात्तत्वं। पुरंधिः। पृषोदरादित्वादुकारस्यामादेश ईकारस्य ह्रस्वश्च। आद्युदात्तप्रकरणे दिवोदासादीनां छंदस्युपसंख्यानमित्याद्युदात्तत्वं॥

॥ अथ द्वितीया ॥

उषो देव्यमर्त्या वि भाहि चंद्ररथा सूनृता ईरयंती।
आ त्वा वहंतु सुयमासो अश्वा हिरण्यवर्णां पृथुपाजसो ये॥२॥
उषः। देवि। अमर्त्या। वि। भाहि। चंद्रऽरथा। सूनृताः। ईरयंती।
आ। त्वा। वहंतु। सुऽयमासः। अश्वाः। हिरण्यऽवर्णां। पृथुऽपाजसः। ये॥२॥

हे उषो देव्यमर्त्या मरणधर्मरहिता चंद्ररथा सुवर्णमयरथोपेता सूनृताः प्रियसत्यरूपा वाच ईरयंत्युच्चारयंती। तथा च मंत्रवर्णः। सुम्नावरी सूनृता ईरयंती। ऋग्वे॰ १.११३.१२.। इति। तादृशी त्वं वि भाहि। सूर्यकिरणसंबंधाद्विशेषेण दीप्यस्व। पृथुपाजसः प्रभूतबलयुक्ता अरुणवर्णा येऽश्वा विद्यंते सुयमासाः सुष्ठु नियंतुं शक्या रथे योजितास्तेऽश्वा हिरण्यवर्णां त्वा त्वामावहंतु॥ सुयमासाः। यमेरकृच्छ्रार्थे खल्। लित्स्वरः॥

॥ अथ तृतीया ॥

उषः प्रतीची भुवनानि विश्वोर्ध्वा तिष्ठस्यमृतस्य केतुः।
समानमर्थं चरणीयमाना चक्रमिव नव्यस्या ववृत्स्व॥३॥
उषः। प्रतीची। भुवनानि। विश्वा। ऊर्ध्वा। तिष्ठसि। अमृतस्य। केतुः।
समानं। अर्थं। चरणीयमाना। चक्रंऽइव। नव्यसि। आ। ववृत्स्व॥३॥

हे उषो देवि विश्वा सर्वाणि भुवनानि प्रतीची। प्रत्याभिमुख्येनांचति प्राप्नो-

तीति प्रतीची। अमृतस्य मरणधर्मरहितस्य सूर्यस्य केतुः प्रज्ञापयित्री त्वमूर्ध्वा नभस्युन्नता तिष्ठसि। नव्यसि पुनःपुनर्जायमानतया नवतरे हे उषो देव्यर्थं। अर्थ्यते गम्यतेऽस्मिन्नित्यर्थो मार्गः। समानमेकं मार्गमुदयात्प्राचीनकाललक्षणं चरणीयमाना चरितुमिच्छंती त्वमाववृत्स्व। पुनस्तस्मिन्मार्ग आवृत्ता भव। तत्र दृष्टांतः। चक्रमिव। यथा नभसि चरितुः सूर्यस्य रथांगं पुनःपुनरावर्तते तद्वत्॥ प्रतीची। प्रतिपूर्वादंचतेः क्विन्। अंचतेश्चोपसंख्यानमिति ङीप्। अच इत्यकारलोपे चाविति दीर्घः। उदात्तनिवृत्तिस्वरेणांतोदात्तः। केतुः। चायृ पूजानिशामनयोरित्यस्माच्चायः की चेति तुः। की इत्यादेशः। आर्द्धधातुकलक्षणो गुणः। अर्थं। अर्तेस्थन्प्रत्ययः। नव्यसि। नवशब्दादीयसुनि ङीपि रूपं। ईकारलोपश्छांदसः। ववृत्स्व। वृतु वर्तने। बहुलं छंदसीति विकरणस्य श्लुः॥

॥ अथ चतुर्थी ॥

अव स्यूमेव चिन्वती मघोन्युषा याति स्वसरस्य पत्नी।

स्व१र्जनंती सुभगा सुदंसा आंताद्दिवः पप्रथ आ पृथिव्याः॥४॥

अव। स्यूमऽइव। चिन्वती। मघोनी। उषाः। याति। स्वसरस्य। पत्नी।

स्वः। जनंती। सुऽभगा। सुऽदंसाः। आ। अंतात्। दिवः। पप्रथे। आ। पृथिव्याः॥४॥

येयमुषाः स्यूमेव वस्त्रमिव विस्तृतं तमोऽवचिन्वत्यवचयमपक्षयं प्रापयंती मघोनी धनवती स्वसरस्य। सुष्ठ्वस्यति क्षिपति तम इति स्वसरः सूर्यो वासरो वा। तस्य पत्नी सती याति गच्छति। स्वः स्वकीयं तेजो जनंती जनयंती सुभगा सुधना सौभाग्ययुक्ता सुदंसाः शोभनाग्निहोत्रकर्मा सेयमुषा दिवो द्युलोकस्यांतात्पृथिव्याश्चांतादवसानात्पप्रथे। प्रथते। प्रकाशत इत्यर्थः॥ स्यूमेव। षिवु तंतुसंताने। अविषिविस्युषिभ्यः किदिति मन्प्रत्ययः। छ्वोः शूडनुनासिके चेत्यूट्। यणादेशः। सुपां सुलुगिति शेर्लुक्। निन्त्वादाद्युदात्तः। चिन्वती। शतुरनुम इति ङीप उदात्तत्वं। जनंती। जन जनन इत्यस्य ण्यंतस्य शतरि रूपं। छंदस्युभयथेति तिप आर्द्धधातुकत्वेन णिलोपः॥

॥ अथ पंचमी ॥

अच्छा वो देवीमुषसं विभातीं प्र वो भरध्वं नमसा सुवृक्तिं।

ऊर्ध्वं मधुधा दिवि पाजो अश्रेत्प्र रोचना रुरुचे रण्वसंदृक्॥५॥

अच्छ॑। वः॒। दे॒वीम्। उ॒षस॑म्। वि॒ऽभा॒तीम्। प्र। वः॒। भ॒र॒ध्व॒म्। नम॑सा। सु॒ऽवृ॒क्तिम्।
ऊ॒र्ध्वम्। म॒धु॒धा। दि॒वि। पाजः॑। अ॒श्रे॒त्। प्र। रो॒च॒ना। रु॒रु॒चे॒। र॒ण्वऽसं॑दृक् ॥५॥

हे स्तोतारो वो युष्मानच्छाभिलक्ष्य विभातीं शोभमानामुषसं देवीं प्रति वो युष्माकं संबंधिना नमसा नमस्कारेण सह सुवृक्तिं शोभनां स्तुतिं प्रभरध्वं। यूयं कुरुत। मधुधा। मधुराणि स्तुतिलक्षणानि वाक्यानि दधातीति। मधुः स्तोमः। तं धारयतीति वा। यद्वा मधुधादित्यधाची। यद्वावग्रहाभावादव्युत्पन्नावयवमखंडमिदं पदमुषोनाम। सेयमुषा दिवि नभस्यूर्ध्वं पाज ऊर्ध्वाभिमुखं पाजस्तेजोऽश्रेत्। श्रयति। तथा रोचना रोचनशीला रण्वसंदृक् रमणीयदर्शनोषाः प्र रुरुचे। प्रकर्षेण दीप्यते। यद्वा रोचना लोकान्प्र रुरुचे। प्रकर्षेण स्वतेजसा दीपयति। तथा च मंत्रवर्णः। व्युच्छंती हि रश्मिभिर्विश्वमाभासि रोचनं। ऋग्वे० १. ४९. ४.। इति॥ रण्वसंदृक्। रवेर्गत्यर्थस्याच्प्रत्ययः। इदित्वान्नुमागमः। संपूर्वाद्दृशेः क्विन्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः॥

॥ अथ षष्ठी ॥

ऋ॒तावं॑री दि॒वो अ॒र्कैर॑बोध्या रे॒वती॑ रोद॑सी चि॒त्रम॑स्थात्।
आ॒य॒तीम॑ग्न उ॒षसं॑ वि॒भा॒तीं वा॒मम॑षि॒ द्रवि॑णं॒ भिक्ष॑माणः ॥६॥
ऋ॒तऽव॑री। दि॒वः। अ॒र्कैः। अ॒बो॒धि॒। आ। रे॒वती॑। रोद॑सी॒ इति॑। चि॒त्रम्। अ॒स्था॒त्।
आ॒ऽय॒तीम्। अ॒ग्ने॒। उ॒षस॑म्। वि॒ऽभा॒तीम्। वा॒मम्। ए॒षि॒। द्रवि॑णम्। भिक्ष॑माणः ॥६॥

ऋतावरी सत्यवती येयमुषा दिवो द्युलोकादर्कैस्तेजोभिरबोधि सर्वैर्ज्ञायते। ततो रेवती धनवती येयं रोदसी द्यावापृथिव्यौ चित्रं नानाविधरूपयुक्तं यथा भवति तथास्थात् सर्वतो व्याप्य तिष्ठति हे अग्ने आयतीं त्वदभिमुखमागच्छंतीं विभातीं भासमानामुषसमुषोदेवीं भिक्षमाणो हवींषि याचमानस्त्वं वामं वननीयं द्रविणमग्निहोत्रादिलक्षणं धनमेषि। प्राप्नोषि॥ अबोधि। बुध अवगमने। कर्मणि लुङि चिण् भावकर्मणोरिति चिण्। चिणो लुक्। रेवती। रयिशब्दान्मतुप्। छंदसीर इति वत्वं। रयेर्मतौ बहुलमिति संप्रसारणपरपूर्वत्वे। गुणः। उगितश्चेति ङीप्। रेशब्दाच्चोपसंख्यानमिति मतुप उदात्तत्वं॥

॥ अथ सप्तमी ॥

ऋतस्य बुध्न उषसामिषण्यन्वृषा मही रोदसी आ विवेश ।
मही मित्रस्य वरुणस्य माया चंद्रेव भानुं वि दधे पुरुत्रा ॥ ७ ॥
ऋतस्य । बुध्ने । उषसां । इषण्यन् । वृषा । मही इति । रोदसी इति । आ । विवेश ।
मही । मित्रस्य । वरुणस्य । माया । चंद्राऽइव । भानुं । वि । दधे । पुरुऽत्रा ॥ ७ ॥

वृषा वृष्टिद्वारा प्रेरक आदित्य ऋतस्याग्निहोत्रादिकर्मकरणे सत्यभूतस्याह्नो बुध्ने मूल उषसामिषण्यन् प्रेरणं कुर्वन्मही महत्यौ रोदसी द्यावापृथिव्यावाविवेश । सर्वतः प्रविष्टवान् । यद्वा वृषा वर्षितेषण्यन् सर्वतो गच्छन्नुषसां संबंधी रश्मिसमूहो रोदसी द्यावापृथिव्यौ विष्टवानिति योजनीयं । तत उषा मही महती मित्रस्य वरुणस्य मित्रावरुणयोर्माया प्रभारूपा सती चंद्रेव सुवर्णानीव भानुं स्वप्रभां पुरुत्रा बहुषु देशेषु विदधे । विदधाति । सर्वत्र प्रसारयति ॥ मही । अत्लोपश्छांदसः । पुरुत्रा । देवमनुष्येत्यादिनाधिकरणे त्राप्रत्ययः ॥

॥ इति तृतीयस्य चतुर्थेऽष्टमो वर्गः ॥

इमा उ वामित्यष्टादशर्चं नवमं सूक्तं । अत्रेयमनुक्रमणिका । इमा उ द्व्यूनेंद्रावरुणबार्हस्पत्यपौष्णसावित्रसौम्यमैत्रावरुणास्तृचा अंत्यो जमदग्न्यार्षो वा चतुर्थ्याद्या गायत्र्य इति । कृत्स्नस्य विश्वामित्र ऋषिरंत्यस्य तृचस्य जमदग्निर्वा । आद्यास्तिस्रस्त्रिष्टुभः शिष्टाः पंचदश गायत्र्यः । प्रथमस्येंद्रावरुणौ देवता द्वितीयस्य बृहस्पतिस्तृतीयस्य पूषा चतुर्थस्य सविता पंचमस्य सोमः षष्ठस्य मित्रावरुणौ ॥ आभिप्लविकेषूक्थ्येषु तृतीयसवने स्तोमवृद्धौ सत्यां स्वस्वशस्त्रे होत्रका अंत्यसूक्तमवशेष्य स्तोमाभिशंसनार्थं तृचादिसंख्या ऋच आवपेयुः । तत्र मैत्रावरुणस्यावापार्थमाद्यस्तृचः । सूचितं च । इमा उ वां भृमयो मन्यमाना इति तिस्रः । आ० ७.९. । इति ॥

॥ तत्र प्रथमा ॥

इमा उ वां भृमयो मन्यमाना युवावते न तुज्या अभूवन् ।
क्व१त्यदिंद्रावरुणा यशो वां येन स्मा सिनं भरथः सखिभ्यः ॥ १ ॥
इमाः । ऊं इति । वां । भृमयः । मन्यमानाः । युवाऽवते । न । तुज्याः । अभूवन् ।
क्व । त्यत् । इंद्रावरुणा । यशः । वां । येन । स्म । सिनं । भरथः । सखिऽभ्यः ॥ १ ॥

हे इंद्रावरुणौ वां युवयोः संबंधिन्यो मन्यमाना बलिभिः शत्रुभिरभिमन्यमाना अत एव भृमयो भ्रमणशीला इमाः प्रजा युवावते । तृतीयार्थे चतुर्थी । यौवनवता बलिना शत्रुणा तुज्या हिंस्या नाभूवन् । न भवंतु । वां युवयोस्त्यत्तादृशं यशः क्व कुत्रास्ते । येन यशसा सखिभ्योऽस्मभ्यं सिनमन्नं भरथः स्म प्रदातुं संपादयथः । तत्क्वास्त इत्यन्वयः । यद्वा हे इंद्रावरुणौ वां युवयोः संबंधिन्य इमा अस्माभिः क्रियमाणा भृमयो युवां प्राप्तुं क्रमणशीला मन्यमानाः । मन्यतिरर्चतिकर्मा । युवामर्चंत्यस्ताः स्तुतयो युवावते युवाभ्यां सदृशायान्यस्मै देवाय न तुज्याः । तुजतिर्दानकर्मार्थः । प्रदेया मा भूवन् । शिष्टं समानं ॥ भृमयः । भ्रमु अनवस्थाने । भ्रमेः संप्रसारणं चेतीन्प्रत्ययः संप्रसारणं च । व्यत्ययेनांतोदात्तत्वं । युवावते । युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप् । अविभक्तावपि युवादेशश्छांदसः । तुज्याः । तुज हिंसादाननिकेतनेषु । अघ्न्यादयश्चेति यत् । यतोऽनाव इत्याद्युदात्तत्वं । सिनं । षिञ् बंधने । इणषिञ्दीङुष्यविभ्यो नगिति नक् । व्यत्ययेनाद्युदात्तत्वं ॥

॥ अथ द्वितीया ॥

अ॒यमु॑ वां पु॒रु॒तमो॑ र॒यी॒यञ्छ॑श्वत्त॒मम॑व॑से जोहवीति ।
स॒जोषा॑विंद्रावरुणा म॒रुद्भि॑र्दि॒वा पृ॑थि॒व्या शृ॑णुतं॒ हवं॑ मे ॥ २ ॥

अ॒यं । ऊं॒ऽइति॑ । वा॒ं । पु॒रु॒ऽतमः॑ । र॒यि॒ऽयन् । श॒श्वत्ऽत॒मं । अव॑से । जो॒ह॒वी॒ति॒ ।
स॒ऽजोषौ॑ । इं॒द्रा॒व॒रु॒णा॒ । म॒रुत्ऽभिः॑ । दि॒वा । पृ॒थि॒व्या । शृ॒णु॒तं॒ । हवं॑ । मे॒ ॥ २ ॥

हे इंद्रावरुणौ रयीयन् रयिमात्मन इच्छन्नयमु पुरुतमो वैदिककर्मप्रवृत्ततयातिशयेन पुरुर्महान्यजमानोऽवसे रक्षणायान्नाय वा वां युवां शश्वत्तमं सर्वदा जोहवीति । भृशमाह्वयति । मरुद्भिर्देवविशेषैर्दिवा पृथिव्या च सजोषौ संगतौ युवां मे मम हवं युष्मदीयमाह्वानं शृणुतं ॥ पुरुतमः । तमपो व्यत्ययेनाद्युदात्तत्वं । जोहवीति । ह्वयतेर्यङ्लुक्यभ्यस्तस्य चेति संप्रसारणे रूपं । दिवा । ऊडिदमिति विभक्तेरुदात्तत्वं । पृथिव्या । उदात्तयणो हल्पूर्वादित्युदात्तत्वं । हवं । ह्वयतेर्भावेऽनुपसर्गस्येत्यप् । प्रत्ययस्य पित्त्वादनुदात्तत्वं ॥

॥ अथ तृतीया ॥

अ॒स्मे तदिं॑द्रावरुणा॒ वसु॑ ष्याद॒स्मे र॒यिर्म॑रुतः॒ सर्व॑वीरः ।
अ॒स्मान्वरू॑त्रीः श॒रणै॑रवंत्व॒स्मान्होत्रा॒ भार॑ती॒ दक्षि॑णाभिः ॥ ३ ॥

अस्मे इति॑ । तत् । इं॒द्रा॒व॒रु॒णा॒ । वसु॑ । स्या॒त् । अ॒स्मे इति॑ । र॒यिः । म॒रु॒तः॒ । सर्व॑ऽवीरः ।
अ॒स्मान् । वरू॑त्रीः । श॒र॒णैः । अ॒वं॒तु॒ । अ॒स्मान् । होत्रा॑ । भार॑ती । दक्षि॑णाभिः ॥३॥

हे इंद्रावरुणावस्मे अस्मासु तदभिलषितं तादृशं वसु धनं स्यात् । भवतु । हे मरुतः सर्ववीरः सर्वेषु कर्मसु वीरः समर्थो रयिः पुत्रपशुसंघः । पशवो वै रयिरिति तैत्तिरीयकं। सोऽस्मे अस्माकं भवतु। वरूत्रीः सर्वैः संभजनीया देवपत्न्यः शरणैः । शृणंति शीतादिक्लेशमिति शरणानि गृहाः । तैरस्मानवंतु । होत्रा । हूयंतेऽस्यां हवींषीति यद्वा हूयते तत्र प्राण इति होत्रा वाक् । तथा च श्रुतिः । वाचि हि प्राणं जुहुमः प्राणे वा वाचमिति । यद्वा होत्रेति यज्ञनाम । हूयते तत्र हविरिति । यज्ञश्च वागुच्यते । वाचं यच्छति वाग्वै यज्ञ इति ब्राह्मणं। तादृशी भारती सरस्वती दक्षिणाभिर्गोरूपाभिर्दक्षिणाभिः । यद्वा उदाराभिर्वाग्भिरस्मान् पालयतु ॥ वसु ष्यादित्यत्र संहितायां पूर्वपदादिति षत्वं । वरूत्रीः । ग्रसितस्कभितेत्यादिना ङीबंतत्वेन निपातनादिष्टसिद्धिः । होत्रा । हु दानादनयोः । हुयामाश्रुभसिभ्यस्त्रन्नित्यधिकरणे त्रन्प्रत्ययः ॥

॥ अथ चतुर्थी ॥

बृह॑स्पते जु॒षस्व॑ नो ह॒व्यानि॑ विश्वदेव्य । रास्व॑ रत्ना॑नि दा॒शुषे॑ ॥४॥
बृह॑स्पते । जु॒षस्व॑ । नः॒ । ह॒व्यानि॑ । वि॒श्व॒ऽदे॒व्य॒ । रास्व॑ । रत्ना॑नि । दा॒शुषे॑ ॥४॥

विश्वदेव्य सर्वदेवहित हे बृहस्पते नोऽस्मत्संबंधीनि हव्यानि हवनयोग्यानि पुरोडाशादीनि हवींषि जुषस्व। सेवस्व। ततस्त्वं दाशुषे हविर्दत्तवते यजमानाय मह्यं रत्नान्युत्तमानि धनानि रास्व। देहि ॥ रास्व। रा दाने। व्यत्ययेनात्मनेपदं ॥

॥ अथ पंचमी ॥

शुचि॑म॒र्कैर्बृह॒स्पति॑मध्व॒रेषु॑ नमस्यत । अना॒म्योज॒ आ च॑के ॥५॥
शुचि॑ । अ॒र्कैः । बृह॒स्पति॑ । अ॒ध्व॒रेषु॑ । न॒म॒स्य॒त॒ । अना॑मि । ओजः॑ । आ । च॒के॒ ॥५॥

हे ऋत्विजो यूयमध्वरेषु शुचिं शुद्धं बृहस्पतिमर्कैरर्चनीयैः स्तोत्रैर्नमस्यत । परिचरत। अनाम्यनमनशीलं परैरनभिभवनीयमोजस्तस्य बलमा चके। सर्वतो याचे ॥ बृहस्पतिं । वनस्पत्यादित्वादुभयपदप्रकृतिस्वरः । चके । कमेर्लिट्युत्तमे मकारलोपश्छांदसः ॥

॥ इति तृतीयस्य चतुर्थे नवमो वर्गः ॥

॥ अथ षष्ठी ॥

वृषभं चर्षणीनां विश्वरूपमदाभ्यं। बृहस्पतिं वरेण्यं ॥ ६॥

वृषभं। चर्षणीनां। विश्वऽरूपं। अदाभ्यं। बृहस्पतिं। वरेण्यं ॥ ६॥

चर्षणीनां मनुष्याणां वृषभमभिमतफलवर्षकं विश्वरूपं व्याप्तरूपं। यद्वा विश्वरूपानामकगोवाहनोपेतं। तथा च मंत्रवर्णः। बृहस्पतिर्विश्वरूपामुपाजत। ऋग्वे॰ १.१६१.६.। इति। अदाभ्यं केनाप्यतिरस्करणीयं वरेण्यं सर्वैर्भजनीयं बृहस्पतिं। अभिमतफलं याच इति पूर्वेणान्वयः॥ विश्वरूपं। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। यद्वा विश्वरूपास्य सतीति अर्शआदित्वादच्प्रत्ययः। मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। अदाभ्यं। दभेश्चेति वक्तव्यमिति ण्यत्प्रत्ययः॥

॥ अथ सप्तमी ॥

इयं ते पूषन्नाघृणे सुष्टुतिर्देव नव्यसी। अस्माभिस्तुभ्यं शस्यते ॥ ७॥

इयं। ते। पूषन्। आघृणे। सुऽस्तुतिः। देव। नव्यसी। अस्माभिः। तुभ्यं। शस्यते ॥ ७॥

आघृणे दीप्तिमन् हे पूषन् देव नव्यसी नवतरेयं सुष्टुतिः शोभना स्तुतिरूपा वाक् ते त्वत्संबंधिनी भवति। सैषा स्तुतिरस्माभिः स्तोतृभिस्तुभ्यं त्वदर्थं शस्यते। तां जुषस्वेत्युत्तरेणान्वयः॥

॥ अथाष्टमी ॥

तां जुषस्व गिरं मम वाजयंतीमवा धियं। वधूयुरिव योषणां ॥ ८॥

तां। जुषस्व। गिरं। मम। वाजऽयंतीं। अव। धियं। वधूयुःऽइव। योषणां ॥ ८॥

हे पूषन् स्तोत्रं कुर्वाणस्य मम तां तादृशीं गिरं स्तुतिलक्षणां वाचं जुषस्व। सेवस्व। स्तुत्या प्रीतस्त्वं वाजयंती वाजमन्नमिच्छंती हर्षकारिणी धियमिमां स्तुतिं प्रत्यव। अभिगच्छ। तत्र दृष्टांतः। वधूयुरिव। यथा वधूयुः स्त्रीकामो योषणां स्त्रियं प्रत्यागच्छति तद्वत्॥ वाजयंती। वाजशब्दादिच्छतीत्यर्थे क्यच्। तदंताच्छतरि रूपं। ङीपोऽनुदात्तत्वे प्रत्ययस्वरः। अव। अव रक्षणादिष्वित्यस्य लोटि रूपं॥

॥ अथ नवमी ॥

यो विश्वाभि विपश्यति भुवना सं च पश्यति। स नः पूषाविता भुवत् ॥ ९॥

यः। विश्वा। अभि। विऽपश्यति। भुवना। सं। च। पश्यति। सः। नः। पूषा। अविता। भुवत् ॥ ९॥

यः पूषा विश्वा भुवना सर्वांल्लोकानभि आभिमुख्येन विपश्यति विशेषेण पश्यति । किंच तानि संपश्यति तत्तद्वस्तुयाथात्म्यं सम्यक् जानाति । स तादृशः पूषा देवो नोऽस्माकमविता रक्षको भुवत् । भवतु ॥ विपश्यति । यद्वृत्तयोगाद्निघातः । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । तिङि चोदात्तवतीति गतेर्निघातः । पश्यति । अत्र सकर्मकत्वात्परस्मैपदं । पूर्ववदनिघातः । भुवत् । भवतेर्लेट्यडागमः । भूसुवोस्तिङीति गुणप्रतिषेध उवङादेशः । निघातः ॥

दशरात्रस्य षष्ठेऽहनि वैश्वदेवशस्त्रे तत्सवितुरिति द्वे ऋचौ प्रतिपत्तृचस्य द्वितीयतृतीये । सूचितं च । तत्सवितुर्वरेण्यमिति द्वे दोषो आगात् । आ॰ ८.१. । इति ॥ अभिप्लवपृष्ठ्यषडहयोर्द्वितीयेऽहनि वैश्वदेवशस्त्रे प्रतिपत्तृचस्यैते एव प्रथमाद्वितीये । सूचितं च । तत्सवितुर्वरेण्यमिति द्वे आविश्वदेवं । आ॰ ७. ६. । इति ॥

॥ सैषा सूक्ते दशमी ॥

तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि । धियो॒ यो नः॑ प्रचो॒दया॑त् ॥ १० ॥

तत् । स॒वि॒तुः । वरे॑ण्यं । भर्गः॑ । दे॒वस्य॑ । धी॒म॒हि॒ । धियः॑ । यः । नः॒ । प्र॒ऽचो॒दया॑त् ॥ १० ॥

यः सविता देवो नोऽस्माकं धियः कर्माणि धर्मादिविषया वा बुद्धीः प्रचोदयात् प्रेरयेत् तत्तस्य देवस्य सवितुः सर्वांतर्यामितया प्रेरकस्य जगत्स्रष्टुः परमेश्वरस्य वरेण्यं सर्वैरुपास्यतया ज्ञेयतया च संभजनीयं भर्गोऽविद्यातत्कार्ययोर्भर्जनाद्भर्गः स्वयंज्योतिः परब्रह्मात्मकं तेजो धीमहि । वयं ध्यायामः । यद्वा तदिति भर्गोविशेषणं । सवितुर्देवस्य तत्तादृशं भर्गो धीमहि । किंतदित्यपेक्षायामाह । य इति लिंगव्यत्ययः । यद्भर्गो धियः प्रचोदयात् । तद्ध्यायेमेति समन्वयः । यद्वा यः सविता सूर्यो धियः कर्माणि प्रचोदयात् प्रेरयति तस्य सवितुः सर्वस्य प्रसवितुर्देवस्य द्योतमानस्य सूर्यस्य तत्सर्वैर्दृश्यमानतया प्रसिद्धं वरेण्यं सर्वैः संभजनीयं भर्गः पापानां तापकं तेजोमंडलं धीमहि । ध्येयतया मनसा धारयेम । यद्वा भर्गःशब्देनान्नमभिधीयते । यः सविता देवो धियः प्रचोदयति तस्य प्रसादादन्नादिलक्षणं फलं धीमहि । धारयामः । तस्याधारभूता भवेमेत्यर्थः । भर्गःशब्दस्यान्नपरत्वे धीशब्दस्य कर्मपरत्वे चाथर्वणं । वेदांश्छंदांसि सवितुर्वरेण्यं भर्गो देवस्य कवयोऽन्नमाहुः कर्माणि धियस्तदु ते प्रब्रवीमि प्रचोदयंत्सविता याभिरेतीति । गो॰ ब्रा॰ १.३२. ॥ भर्गः । भ्रस्ज पाके । असुन् । भ्रस्जो रोपधयो रमन्यतरस्यां । पा॰ ६.४.४७. । इति रोपधयोर्लोपो रमागमः । न्यंक्वादिपाठात् कुत्वं । धीमहि । ध्यायतेर्लिङि बहुलं छंदसीति संप्रसारणं । व्यत्ययेना-

त्मनेपदं। यद्वा धीङ् आधारे। लिङि बहुलं छंदसीति विकरणस्य लुक्। प्रचोदयात्। चोदयतेर्लेट्याडागमः। यद्वृत्तयोगादनिघातः। आगमस्यानुदात्तत्वे णिचः स्वरः॥

॥ इति तृतीयस्य चतुर्थे दशमो वर्गः ॥

॥ अथैकादशी ॥

देवस्य सवितुर्वयं वाजयंतः पुरंध्या। भगस्य रातिमीमहे ॥११॥

देवस्य। सवितुः। वयं। वाजऽयंतः। पुरंऽध्या। भगस्य। रातिं। ईमहे ॥११॥

वाजयंतो वाजमन्नमात्मन इच्छंतो वयं देवस्य द्योतमानस्य सवितुः पुरंध्या तद्विषयस्तुत्या प्रज्ञया वा भगस्य भजनीयस्य धनस्य रातिं दानमीमहे। याचामहे॥ रातिं। मंत्रे वृषेत्यादिना क्तिन उदात्तत्वं॥

॥ अथ द्वादशी ॥

देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः। नमस्यंति धियेषिताः ॥१२॥

देवं। नरः। सवितारं। विप्राः। यज्ञैः। सुवृक्तिऽभिः। नमस्यंति। धिया। इषिताः ॥१२॥

नरः कर्मणां नेतारो विप्रा मेधाविनोऽध्वर्य्वादयो धियेषिताः कर्मणा बुद्ध्या वा प्रेर्यमाणाः संतः सवितारं देवं त्वां यज्ञैर्यजनीयैर्हविर्भिः सुवृक्तिभिः शोभनस्तोत्रैश्च नमस्यंति। परिचरंति॥ नमस्यंति। नमोवरिवश्चित्रङः क्यजिति क्यच्॥

अग्नीषोमप्रणयने सोमो जिगातीत्याद्यास्तिस्र ऋचः। सूचितं च। सोमो जिगाति गातुविद्देवानां तमस्य राजो वरुणस्तमश्विनेत्यर्धर्चे आरमेत्। आ० ४.१०.। इति॥

॥ सैषा सूक्ते त्रयोदशी ॥

सोमो जिगाति गातुविद्देवानामेति निष्कृतं। ऋतस्य योनिमासदं ॥१३॥

सोमः। जिगाति। गातुऽवित्। देवानां। एति। निःऽकृतं। ऋतस्य। योनिं। आऽसदं॥१३॥

गातुवित्। गातुर्मार्गः। तं जानानः सोमो जिगाति। गच्छति। गंतव्यं स्थानं दर्शयति। देवानां निष्कृतं संस्कृतमासदं सर्वैरासदनीयमृतस्य यज्ञस्य योनिं स्थानं हविर्धानाख्यमेति। प्राप्नोति॥ जिगाति। गा स्तुतौ। जुहोत्यादिः॥

॥ अथ चतुर्दशी ॥

सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे। अनमीवा इषस्करत् ॥१४॥

सोमः। अस्मभ्यं। द्विऽपदे। चतुःऽपदे। च। पशवे। अनमीवाः। इषः। करत् ॥१४॥

सोमः स्तोतृभ्योऽस्मभ्यं तथा द्विपदेऽस्मदीयेभ्यो द्विपाद्भ्यश्चतुष्पदे पशवे चतुःपाद्भ्यो गवादिपशुभ्यश्चानमीवा रोगवर्जितानीषोऽन्नानि करत्। करोतु ॥ चतुष्पदे। भसंज्ञायां पादस्य पद्भावः। इसुसोः सामर्थ्ये इति संहितायां सत्वं। आदेशप्रत्यययोरिति षत्वं। बहुव्रीहौ पूर्वपदस्वरः। करत्। करोतेर्लेट्यडागमः। इषस्करदित्यच संहितायां कःकरतीत्यादिना सत्वं ॥

॥ अथ पंचदशी ॥

अस्माकमायुर्वर्धयन्नभिमातीः सहमानः। सोमः सधस्थमासदत् ॥१५॥

अस्माकं। आयुः। वर्धयन्। अभिऽमातीः। सहमानः। सोमः। सधऽस्थं। आ। असदत् ॥१५॥

स सोमो देवोऽस्माकमायुरन्नं जीवनं वा वर्धयन्वृद्धिं प्रापयन्नभिमातीः कर्मविघ्नकारिणः शत्रून् सहमानोऽभिभवन्नस्माकं सधस्थं हविर्धानाख्यं स्थानमासदत्। आसीदतु ॥ असदत्। सदेर्लेटि रूपं। निघातः ॥

अग्निष्टोमे प्रातःसवने मैत्रावरुणशस्त्र आ नो मित्रावरुणेति स्तोत्रियस्तृचः। सूचितं च। आ नो मित्रावरुणा नो गंतं रिशादसा। आ॰ ५. १०.। इति ॥ चतुर्विंशेऽहनि प्रातःसवने मैत्रावरुणे शस्त्र आ नो मित्रावरुणेति षडहस्तोत्रियसंज्ञकस्तृचः। सूचितं च। आ नो मित्रावरुणा मित्रं वयं हवामहे। आ॰ ७. २.। इति ॥ स्तोमवृद्धावयमेव तृच आवापार्थः। सूचितं च। आ नो मित्रावरुणेति तृचौ। आ॰ ७. ५.। इति ॥ दाक्षायणे यज्ञे द्वे अमावास्ये कर्तव्ये। तत्रोत्तरस्याममावास्यायां द्वितीयेऽहनि मैत्रावरुण आ नो मित्रावरुणेति तस्यानुवाक्या। सूचितं च। आ नो मित्रावरुण यद्बंहिष्ठं नातिविधे सुदानू। आ॰ २. १४.। इति ॥

॥ सैषा सूक्ते षोडशी ॥

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं। मध्वा रजांसि सुक्रतू ॥१६॥

आ। नः। मित्रावरुणा। घृतैः। गव्यूतिं। उक्षतं। मध्वा। रजांसि। सुक्रतू इति सुऽक्रतू ॥१६॥

सुक्रतू शोभनकर्माणौ हे मित्रावरुणौ नोऽस्माकं गव्यूतिं गवां मार्गं गोनिवासस्थानं घृतैः क्षरणसाधनैः पयोभिरोक्षतं। समंतात्सिंचतं। अस्मभ्यं दोग्ध्रीर्गाः प्रयच्छतमिति भावः। रजांस्यस्मदावासस्थानानि मध्वा मधुररसेन सिंचतं ॥ गव्यूतिं। गोर्यूतौ छंदसीति वांतादेशः। मध्वा। सर्वविधीनां छंदसि विकल्पितत्वादत्र नुमागमाभावः ॥

WELLCOME LIBRARY

॥ अथ सप्तदशी ॥

उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः । द्राघिष्ठाभिः शुचिव्रता ॥ १७ ॥

उरुऽशंसा । नमःऽवृधा । मह्ना । दक्षस्य । राजथः । द्राघिष्ठाभिः । शुचिऽव्रता ॥ १७ ॥

शुचिव्रता परिशुद्धकर्माणौ हे मित्रावरुणावुरुशंसा उरुभिर्बहुभिः शंसनीयौ । यद्वा उरु महच्छंसः शस्त्रं ययोस्तौ । नमोवृधा नमसा हविर्लक्षणेनान्नेन स्तोत्रेण वा वर्धमानौ द्राघिष्ठाभिरत्यंतं दीर्घस्तुतिलक्षणाभिर्वाग्भिर्युक्तौ युवां दक्षस्य । दक्षं धनं बलं वा । तस्य मह्ना महत्त्वेन राजथः । ईशाथे ॥ उरुशंसा । शन्सु स्तुतौ । कर्मणि घञ् । कृत्स्वरः । द्राघिष्ठाभिः । दीर्घशब्दादिष्ठनि प्रियस्थिरेत्यादिना द्राघीत्यादेशः । नित्त्वादाद्युदात्तः ॥

मैत्रावरुणस्य ग्रहस्य याज्या गृणाना जमदग्निनेत्येषा । सूत्रितं च । होता यक्षन्मित्रावरुणा गृणाना जमदग्निना । आ॰ ५.५. । इति ॥ अध्यायोपाकरणे मंडलाद्यंतहोमे गृणाना जमदग्निनेत्येषा । आ॰ गृ॰ ३.५. ॥

॥ सैषा सूक्तेऽष्टादशी ॥

गृणाना जमदग्निना योनावृतस्य सीदतं । पातं सोममृतावृधा ॥ १८ ॥

गृणाना । जमत्ऽअग्निना । योनौ । ऋतस्य । सीदतं । पातं । सोमं । ऋतऽवृधा ॥ १८ ॥

हे मित्रावरुणौ जमदग्निनैतन्नामकेन महर्षिणा गृणाना स्तूयमानौ यद्वा जमदग्निना प्रज्वलिताग्निना विश्वामित्रेण स्तूयमानौ युवामृतस्य यज्ञस्य योनौ देवयजनाख्ये देशे सीदतं । उपविशतं । ऋतावृधा ऋतस्य कर्मफलस्य वर्धयितारौ युवां सोमं पातं । पिबतं ॥ गृणाना । गॄ शब्दे । कर्मणि शानच् । चित्त्वादंतोदात्तः । सीदतं । सदेर्लोटि पाघ्रेत्यादिना सीदादेशः । पातं । पा पाने । बहुलं छंदसीति शपो लुक् ॥

॥ इति तृतीयस्य चतुर्थ एकादशो वर्गः ॥

॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे तृतीयाष्टके तृतीये मंडले पंचमोऽनुवाकः समाप्तं च तृतीयं मंडलं ॥

---

WELLCOME LIBRARY INSTITUTE

# SARVÁNUKRAMAH.

| Hymn. | Mandala Anuvaka Sukta. | Ashtaka Adhyaya Varga. | Beginning of the hymn. | Number of Verses. | Author. | Deity. | Metre. | Pag. |
|---|---|---|---|---|---|---|---|---|
| 122 | 1.18.2 | 2.1.1 | Pra vaḥ pántam | 15 | Kakshíván. | Viśve Deváḥ. | Trishṭup, 5 and 6 Virádrúpá. | 1 |
| 123 | 1.18.3 | 2.1.4 | Pṛithú rathaḥ | 13 | The same. | Usháḥ. | Trishṭup. | 11 |
| 124 | 1.18.4 | 2.1.7 | Ushá ucchantí | 13 | ...... | The same. | The same. | 19 |
| 125 | 1.18.5 | 2.1.10 | Prátá ratnam | 7 | ...... | Svanayasya dána-stutiḥ. | 1–3, 6 and 7 Trish-ṭup, 4 and 5 Jagatí. | 29 |
| 126 | 1.18.6 | 2.1.11 | Amandán | 7 | Kakshíván, Bhá-vayavyaḥ and Romaśá. | 1–6 Bhávayavyaḥ, 7 Romaśá. | 1–5 Trishṭup, 6 and 7 Anushṭup. | 34 |
| 127 | 1.19.1 | 2.1.12 | Agnim hotáram | 11 | Parucchepaḥ, son of Divodásaḥ. | Agniḥ. | 1–5 Atyashṭiḥ, 6 A-tidhṛitiḥ, 7–11 A-tyashṭiḥ. | 39 |
| 128 | 1.19.2 | 2.1.14 | Ayam jáyata | 8 | The same. | The same. | Atyashṭiḥ. | 49 |
| 129 | 1.19.3 | 2.1.16 | Yam tvam ra-tham | 11 | ...... | 1–5 Indraḥ, 6 In-duḥ, 7–11 Indraḥ. | 1–7 and 10 Atyash-ṭiḥ, 8 and 9 Atiśak-varí, 11 Ashṭiḥ. | 56 |
| 130 | 1.19.4 | 2.1.18 | Endra yáhy upa naḥ | 10 | ...... | Indraḥ. | 1–9 Atyashṭiḥ, 10 Trishṭup. | 66 |
| 131 | 1.19.5 | 2.1.20 | Indráya hi | 7 | ...... | The same. | Atyashṭiḥ. | 75 |
| 132 | 1.19.6 | 2.1.21 | Tvayá vayam | 6 | ...... | Indraḥ, 6 *a* Indrá-parvatau. | The same. | 82 |
| 133 | 1.19.7 | 2.1.22 | Ubhe punámi | 7 | ...... | Indraḥ. | 1 Trishṭup, 2–4 A-nushṭup, 5 Gáya-trí, 6 Dhṛitiḥ, 7 Atyashṭiḥ. | 87 |
| 134 | 1.20.1 | 2.1.23 | Á tvá juvaḥ | 6 | ...... | Váyuḥ. | 1–5 Atyashṭiḥ, 6 Ashṭiḥ. | 92 |
| 135 | 1.20.2 | 2.1.24 | Stírṇam barhiḥ | 9 | ...... | 1–3 Váyuḥ, 4–8 In-draḥ, 9 Váyuḥ. | 1–6 Atyashṭiḥ, 7 & 8 Ashṭ., 9 Atyashṭiḥ. | 97 |
| 136 | 1.20.3 | 2.1.26 | Pra su jyeshṭham | 7 | ...... | Mitrávaruṇau, 6 and 7 Lingoktadevate. | Atyashṭiḥ, 7 Trish-ṭup. | 104 |
| 137 | 1.20.4 | 2.2.1 | Sushumá yátam | 3 | ...... | Mitrávaruṇau. | Atiśakvarí. | 110 |
| 138 | 1.20.5 | 2.2.2 | Prapra púshṇaḥ | 4 | ...... | Púshá. | Atyashṭiḥ. | 113 |
| 139 | 1.20.6 | 2.2.3 | Astu śraushaṭ | 11 | ...... | 1 Viśve Deváḥ, 2 Mitrávaruṇau, 3–5 Aśvinau, 6 Indraḥ, 7 Agniḥ, 8 Marutaḥ, 9 Indrágní, 10 Bṛi-haspatiḥ, 11 Viśve Deváḥ. | 1–4 Atyashṭiḥ, 5 Bṛi-hatí, 6–10 Atyash-ṭiḥ, 11 Trishṭup. | 116 |

| Hymn. | Mandala Anuvaka Sukta. | Ashtaka Adhyaya Varga | Beginning of the hymn. | Number of Verses. | Author. | Deity. | Metre. | Pag. |
|---|---|---|---|---|---|---|---|---|
| 140 | 1.21.1 | 2.2.5 | Vedishade | 13 | Dírghatamáḥ, son of Ucathyaḥ. | Agniḥ. | 1–9 Jagatí, 10 Trishṭup or Jagatí, 11 Jagatí, 12 and 13 Trishṭup. | 126 |
| 141 | 1.21.2 | 2.2.8 | Baḷ itthá | 13 | The same. | The same. | 1–11 Jagatí, 12 and 13 Trishṭup. | 134 |
| 142 | 1.21.3 | 2.2.10 | Samiddhaḥ | 13 | ...... | 1 Saminnámako Agniḥ, 2 Tanúnapát, 3 Naráśaṅsaḥ, 4 Iḷaḥ, 5 Barhiḥ, 6 Devír Dváraḥ, 7 Ushásánaktá, 8 Daivyau Hotárau Pracetasau, 9 Tisro Devyaḥ, 10 Tvashṭá, 11 Vanaspatiḥ, 12 Sváhákṛitayaḥ, 13 Indraḥ. | Anushṭup. | 142 |
| 143 | 1.21.4 | 2.2.12 | Pra tavyasím | 8 | ...... | Agniḥ. | 1–7 Anushṭup, 8 Trishṭup. | 149 |
| 144 | 1.21.5 | 2.2.13 | Eti pra hotá | 7 | ...... | The same. | Jagatí. | 154 |
| 145 | 1.21.6 | 2.2.14 | Tam pṛicchatá | 5 | ...... | ...... | 1–4 Jagatí, 5 Trisht. | 158 |
| 146 | 1.21.7 | 2.2.15 | Trimúrddhánam | 5 | ...... | ...... | Trishṭup. | 162 |
| 147 | 1.21.8 | 2.2.16 | Kathá te | 5 | ...... | ...... | The same. | 165 |
| 148 | 1.21.9 | 2.2.17 | Mathíd yat | 5 | ...... | ...... | ...... | 168 |
| 149 | 1.21.10 | 2.2.18 | Mahaḥ saḥ | 5 | ...... | ...... | Viráṭ. | 172 |
| 150 | 1.21.11 | 2.2.19 | Puru tvá | 3 | ...... | ...... | Ushṇik. | 175 |
| 151 | 1.21.12 | 2.2.20 | Mitram na yam | 9 | ...... | 1 Mitraḥ, 2–9 Mitrávaruṇau. | Jagatí. | 177 |
| 152 | 1.21.13 | 2.2.22 | Yuvam vastráṇi | 7 | ...... | Mitrávaruṇau. | Trishṭup. | 183 |
| 153 | 1.21.14 | 2.2.23 | Yajámahe vám | 4 | ...... | The same. | The same. | 187 |
| 154 | 1.21.15 | 2.2.24 | Vishṇor nu kam | 6 | ...... | Vishṇuḥ. | ...... | 189 |
| 155 | 1.21.16 | 2.2.25 | Pra vaḥ pántam | 6 | ...... | 1–3 Vishṇuḥ and Indraḥ, 4–6 Vishṇuḥ. | Jagatí. | 194 |
| 156 | 1.21.17 | 2.2.26 | Bhavá mitraḥ | 5 | ...... | Vishṇuḥ. | The same. | 198 |
| 157 | 1.22.1 | 2.2.27 | Abodhy agnir jmaḥ | 6 | ...... | Aśvinau. | 1–4 Jagatí, 5 and 6 Trishṭup. | 202 |
| 158 | 1.22.2 | 2.3.1 | Vasú rudrá | 6 | ...... | The same. | 1–5 Trishṭup, 6 Anushṭup. | 205 |
| 159 | 1.22.3 | 2.3.2 | Pra dyává | 5 | ...... | Dyáváprithivyau. | Jagatí. | 210 |
| 160 | 1.22.4 | 2.3.3 | Te hi | 5 | ...... | The same. | The same. | 213 |
| 161 | 1.22.5 | 2.3.4 | Kim u śreshṭhaḥ | 14 | ...... | Ribhavaḥ. | 1–13 Jagatí, 14 Trishṭup. | 217 |
| 162 | 1.22.6 | 2.3.7 | Má no mitraḥ | 22 | ...... | Aśvastutiḥ. | 1 and 2 Trishṭup, 3 Jagatí, 4 and 5 Trishṭup, 6 Jagatí, 7–22 Trishṭup. | 226 |

| Hymn. | Mandala Anuvaka Sukta. | Ashtaka Adhyaya Varga. | Beginning of the hymn. | Number of Verses. | Author. | Deity. | Metre. | Pag. |
|---|---|---|---|---|---|---|---|---|
| 163 | 1.22.7 | 2.3.11 | Yad akrandaḥ | 13 | Dírghatamáḥ. | A'śvastutiḥ. | Trishṭup. | 238 |
| 164 | 1.22.8 | 2.3.14 | Asya vámasya | 52 | The same. | 1–41 Viśve Deváḥ, 42*a* Vák, 42*b* A'paḥ, 43*a* S'akadhúmaḥ, 43*b* Somaḥ, 44 Agnisúryaváyavaḥ, 45 Vák, 46 and 47 Súryaḥ, 48 Saṁvatsarátmá Kálaḥ, 49 Sarasvatí, 50 Sádhyáḥ, 51 Súryaḥ, or Parjanyaḥ, or Agnayaḥ, 52 Sarasván or Súryaḥ. | 1–11 Trishṭup, 12 Jagatí, 13 and 14 Trishṭup, 15 Jagatí, 16–22 Trishṭup, 23 Jagatí, 24–28 Trishṭup, 29 Jagatí, 30–35 Trishṭup, 36 Jagatí, 37–40 Trishṭup, 41 Jagatí, 42 Prastárapanktiḥ, 43–50 Trishṭup, 51 Anushṭup, 52 Trishṭup. | 246 |
| 165 | 1.23.1 | 2.3.24 | Kayá śubhá | 15 | 1 and 2 Indraḥ, 3 Marutaḥ, 4 Indraḥ, 5 Marutaḥ, 6 Indraḥ, 7 Marutaḥ, 8 Indraḥ, 9 Marutaḥ, 10–12 Indraḥ, 13–15 Agastyaḥ. | Marutván Indraḥ. | Trishṭup. | 291 |
| 166 | 1.23.2 | 2.4.1 | Tan nu | 15 | Agastyaḥ. | Marutaḥ. | 1–13 Jagatí, 14 and 15 Trishṭup. | 299 |
| 167 | 1.23.3 | 2.4.4 | Sahasram te | 11 | The same. | 1 Indraḥ, 2–11 Marutaḥ. | Trishṭup. | 307 |
| 168 | 1.23.4 | 2.4.6 | Yajnáyajná | 10 | ...... | Marutaḥ. | 1–7 Jagatí, 8–10 Trishṭup. | 313 |
| 169 | 1.23.5 | 2.4.8 | Mahaś cit tvam | 8 | ...... | Indraḥ. | 1 Trishṭup, 2 Catushpadá Viráṭ, 3–8 Trishṭup. | 318 |
| 170 | 1.23.6 | 2.4.10 | Na núnam asti | 5 | 1 Indraḥ, 2 Agastyaḥ, 3 and 4 Indraḥ, 5 Agastyaḥ. | The same. | 1 Bṛihatí, 2–4 Anushṭup, 5 Trishṭup. | 323 |
| 171 | 1.23.7 | 2.4.11 | Prati vaḥ | 6 | Agastyaḥ. | 1 and 2 Marutaḥ, 3–6 Marutván Indraḥ. | Trishṭup. | 325 |
| 172 | 1.23.8 | 2.4.12 | Citro vaḥ | 3 | The same. | Marutaḥ. | Gáyatrí. | 328 |
| 173 | 1.23.9 | 2.4.13 | Gáyat sáma | 13 | ...... | Indraḥ. | Trishṭup. | 329 |
| 174 | 1.23.10 | 2.4.16 | Tvam rájá | 10 | ...... | The same. | The same. | 337 |
| 175 | 1.23.11 | 2.4.18 | Matsy apáyi | 6 | ...... | ...... | 1 Skandhogríví bṛihatí, 2–5 Anushṭup, 6 Trishṭup. | 342 |
| 176 | 1.23.12 | 2.4.19 | Matsi naḥ | 6 | ...... | ...... | 1–5 Anushṭup, 6 Trishṭup. | 345 |
| 177 | 1.23.13 | 2.4.20 | A' carshaṇipráḥ | 5 | ...... | ...... | Trishṭup. | 348 |

| Hymn. | Mandala Anuvaka Sukta. | Ashtaka Adhyaya Varga. | Beginning of the hymn. | Number of Verses. | Author. | Deity. | Metre. | Pag. |
|---|---|---|---|---|---|---|---|---|
| 178 | 1.23.14 | 2.4.21 | Yad dha syá | 5 | Agastyaḥ. | Indraḥ. | Trishṭup. | 351 |
| 179 | 1.23.15 | 2.4.22 | Púrvír aham | 6 | 1 and 2 Lopámudrá, 3 and 4 Agastyaḥ, 5 and 6 Tacchishyaḥ. | Ratiḥ. | 1–4 Trishṭup, 5 Bṛihatí, 6 Trishṭup. | 353 |
| 180 | 1.24.1 | 2.4.23 | Yuvo rajáṅsi | 10 | Agastyaḥ. | Aśvinau. | Trishṭup. | 356 |
| 181 | 1.24.2 | 2.4.25 | Kad u preshṭhau | 9 | The same. | The same. | The same. | 362 |
| 182 | 1.24.3 | 2.4.27 | Abhúd idam | 8 | ...... | ...... | 1–5 Jagatí, 6 Trishṭup, 7 Jagatí, 8 Trishṭup. | 367 |
| 183 | 1.24.4 | 2.4.29 | Tam yunjáthám | 6 | ...... | ...... | Trishṭup. | 371 |
| 184 | 1.24.5 | 2.5.1 | Tá vám | 6 | ...... | ...... | The same. | 375 |
| 185 | 1.24.6 | 2.5.2 | Katará púrvá | 11 | ...... | Dyáváprithivyau. | ...... | 378 |
| 186 | 1.24.7 | 2.5.4 | Á na ilábhiḥ | 11 | ...... | Viśve Deváḥ. | ...... | 384 |
| 187 | 1.24.8 | 2.5.6 | Pitum nu | 11 | ...... | Annastutiḥ. | 1 Anushṭubgarbhoshṇik, 2 Gáyatrí, 3 Anushṭup, 4 Gáyatrí, 5–7 Anushṭup, 8–10 Gáyatrí, 11 Anushṭup or Bṛihatí. | 390 |
| 188 | 1.24.9 | 2.5.8 | Samiddho adya | 11 | ...... | Ápriyaḥ. | Gáyatrí. | 394 |
| 189 | 1.24.10 | 2.5.10 | Agne naya | 8 | ...... | Agniḥ. | Trishṭup. | 398 |
| 190 | 1.24.11 | 2.5.12 | Anarváṇam | 8 | ...... | Bṛihaspatiḥ. | The same. | 402 |
| 191 | 1.24.12 | 2.5.14 | Kankataḥ | 16 | Vishaśankáván Agastyaḥ prábravít. | Aptṛiṇasúryáḥ. | 1–9 Anushṭup, 10–12 Mahápanktiḥ, 13 Mahábṛihatí, 14–16 Anushṭup. | 406 |
| 1 | 2.1.1 | 2.5.17 | Tvam agne dyubhiḥ | 16 | Gṛitsamadaḥ, son of Śunahotraḥ, of the family of Angiráḥ, afterwards adopted by Śunakaḥ, of the family of Bhṛiguḥ. | Agniḥ. | Jagatí. | 415 |
| 2 | 2.1.2 | 2.5.20 | Yajnena vardhata | 13 | The same. | The same. | The same. | 424 |
| 3 | 2.1.3 | 2.5.22 | Samiddho agniḥ | 11 | ...... | Ápriyaḥ. | 1–6 Trishṭup, 7 Jagatí, 8–11 Trishṭup. | 430 |
| 4 | 2.1.4 | 2.5.24 | Huve vaḥ | 9 | Somáhutiḥ, of the family of Bhṛiguḥ. | Agniḥ. | Trishṭup. | 435 |
| 5 | 2.1.5 | 2.5.26 | Hotájanishṭa | 8 | The same. | The same. | Anushṭup. | 440 |
| 6 | 2.1.6 | 2.5.27 | Imám me | 8 | ...... | ...... | Gáyatrí. | 444 |
| 7 | 2.1.7 | 2.5.28 | Śreshṭham yavishṭha | 6 | ...... | ...... | The same. | 446 |
| 8 | 2.1.8 | 2.5.29 | Vájayann iva | 6 | Gṛitsamadaḥ. | ...... | 1–5 Gáyatrí, 6 Anushṭ. | 448 |

| Hymn. | Mandala Anuvaka Sukta. | Ashtaka Adhyaya Varga. | Beginning of the hymn. | Number of Verses. | Author. | Deity. | Metre. | Pag. |
|---|---|---|---|---|---|---|---|---|
| 9 | 2.1.9 | 2.6.1 | Ni hotá | 6 | Gṛitsamadaḥ. | Agniḥ. | Trishṭup. | 450 |
| 10 | 2.1.10 | 2.6.2 | Johútraḥ | 6 | The same. | The same. | The same. | 453 |
| 11 | 2.1.11 | 2.6.3 | S'rudhí havam | 21 | ...... | Indraḥ. | 1–20 Virâṭsthâná Trishṭup, 21 Trishṭup. | 456 |
| 12 | 2.2.1 | 2.6.7 | Yo játaḥ | 15 | ...... | The same. | Trishṭup. | 466 |
| 13 | 2.2.2 | 2.6.10 | Ṛitur janitrí | 13 | ...... | ...... | 1–12 Jagatí, 13 Trishṭup. | 474 |
| 14 | 2.2.3 | 2.6.13 | Adhvaryavo bharata | 12 | ...... | ...... | Trishṭup. | 481 |
| 15 | 2.2.4 | 2.6.15 | Pra ghá nvasya | 10 | ...... | ...... | The same. | 487 |
| 16 | 2.2.5 | 2.6.17 | Pra vaḥ satám | 9 | ...... | ...... | 1–8 Jagatí, 9 Trishṭup. | 492 |
| 17 | 2.2.6 | 2.6.19 | Tad asmai | 9 | ...... | ...... | 1–7 Jagatí, 8 and 9 Trishṭup. | 496 |
| 18 | 2.2.7 | 2.6.21 | Prátá rathaḥ | 9 | ...... | ...... | Trishṭup. | 500 |
| 19 | 2.2.8 | 2.6.23 | Apáyy asya | 9 | ...... | ...... | The same. | 504 |
| 20 | 2.2.9 | 2.6.25 | Vayam te vayaḥ | 9 | ...... | ...... | ...... | 509 |
| 21 | 2.2.10 | 2.6.27 | Vis'vajite | 6 | ...... | ...... | 1–5 Jagatí, 6 Trishṭ. | 513 |
| 22 | 2.2.11 | 2.6.28 | Trikadrukeshu | 4 | ...... | ...... | 1 Ashṭiḥ, 2 and 3 Atis'akvarí, 4 Atis'akvarí or Ashṭiḥ. | 516 |
| 23 | 2.3.1 | 2.6.29 | Gaṇánám | 19 | ...... | 1 Brahmaṇaspatiḥ, 2–4 Bṛihaspatiḥ, 5 Brahmaṇaspatiḥ, 6–8 Bṛihaspatiḥ, 9 Brahmaṇaspatiḥ, 10 Bṛihaspatiḥ, 11 Brahmaṇaspatiḥ, 12–16 Bṛihaspatiḥ, 17 Brahmaṇaspatiḥ, 18 Bṛihaspatiḥ, 19 Brahmaṇaspatiḥ. | 1–14 Jagatí, 15 Trishṭup, 16–18 Jagatí, 19 Trishṭup. | 519 |
| 24 | 2.3.2 | 2.7.1 | Semám | 16 | ...... | 1–11 Brahmaṇaspatiḥ, 12 Indraḥ and Brahmaṇaspatiḥ, 13–16 Brahmaṇaspatiḥ. | 1–11 Jagatí, 12 Trishṭup, 13–15 Jagatí, 16 Trishṭup. | 529 |
| 25 | 2.3.3 | 2.7.4 | Indhánaḥ | 5 | ...... | Brahmaṇaspatiḥ. | Jagatí. | 538 |
| 26 | 2.3.4 | 2.7.5 | Ṛijuḥ | 4 | ...... | The same. | The same. | 541 |
| 27 | 2.3.5 | 2.7.6 | Imá giraḥ | 17 | Kúrmaḥ, son of Gṛitsamadaḥ, or Gṛitsamadaḥ himself. | A'dityáḥ. | Trishṭup. | 543 |
| 28 | 2.3.6 | 2.7.9 | Idam | 11 | The same. | Varuṇaḥ. | The same. | 552 |
| 29 | 2.3.7 | 2.7.11 | Dhṛitavratáḥ | 7 | ...... | Vis've Deváḥ. | ...... | 558 |

| Hymn. | Mandala Anuvaka Sukta. | Ashtaka Adhyaya Varga | Beginning of the hymn. | Number of Verses. | Author. | Deity. | Metre. | Pag. |
|---|---|---|---|---|---|---|---|---|
| 30 | 2.3.8 | 2.7.12 | Ṛitam deváya | 11 | Gṛitsamadaḥ. | 1–5 Indraḥ, 6 Indrá-somau, 7 Indraḥ, 8*a* Sarasvatí, 8*b* Indraḥ, 9 Bṛihaspatiḥ, 10 Indraḥ, 11 Marutaḥ. | 1–10 Trishṭup, 11 Jagatí. | 561 |
| 31 | 2.3.9 | 2.7.14 | Asmákam | 7 | The same. | Viśve Deváḥ. | 1–6 Jagatí, 7 Trishṭup. | 566 |
| 32 | 2.3.10 | 2.7.15 | Asya me | 8 | ...... | 1 Dyávápṛithivyau, 2 and 3 Indraḥ or Tvashṭá, 4 and 5 Ráká, 6 and 7 Sinívālí, 8 Gungúḥ, Sinívālí, Ráká, Sarasvatí, Indráṇí, Varuṇání. | 1–5 Jagatí, 6–8 Anushṭup. | 570 |
| 33 | 2.4.1 | 2.7.16 | Á te pitaḥ | 15 | ...... | Rudraḥ. | Trishṭup. | 574 |
| 34 | 2.4.2 | 2.7.19 | Dhárávaráḥ | 15 | ...... | Marutaḥ. | 1–14 Jagatí, 15 Trishṭup. | 581 |
| 35 | 2.4.3 | 2.7.22 | Upem | 15 | ...... | Apámnapát. | Trishṭup. | 590 |
| 36 | 2.4.4 | 2.7.25 | Tubhyam | 6 | ...... | 1 Indraḥ and Madhuḥ, 2 Marutaḥ and Mádhavaḥ, 3 Tvashṭá and Śukraḥ, 4 Agniḥ and Śuciḥ, 5 Indraḥ and Nabhaḥ, 6 Mitrávaruṇau and Nabhasyaḥ. | Jagatí. | 597 |
| 37 | 2.4.5 | 2.8.1 | Mandasva | 6 | ...... | 1–4 Draviṇodáḥ, 5 Aśvinau, 6 Agniḥ. | The same. | 601 |
| 38 | 2.4.6 | 2.8.2 | Ud u shyaḥ | 11 | ...... | Savitá. | Trishṭup. | 604 |
| 39 | 2.4.7 | 2.8.4 | Grávāṇeva | 8 | ...... | Aśvinau. | The same. | 609 |
| 40 | 2.4.8 | 2.8.6 | Somápúshaṇá | 6 | ...... | 1–6*a* Somápúshaṇau, 6*b* Aditiḥ. | ...... | 612 |
| 41 | 2.4.9 | 2.8.7 | Váyo ye te | 21 | ...... | 1 and 2 Váyuḥ, 3 Indraváyú, 4–6 Mitrávaruṇau, 7–9 Aśvinau, 10–12 Indraḥ, 13–15 Viśve Devaḥ, 16–18 Sarasvatí, 19*ab* Dyávápṛithivyau or Havirdhánam, 19*c* the same or Agniḥ, 20 and 21 Dyávápṛithivyau or Havirdhánam. | 1–15 Gáyatrí, 16 and 17 Anushṭup, 18 Bṛihatí, 19–21 Gáyatrí. | 615 |
| 42 | 2.4.10 | 2.8.11 | Kanikradat | 3 | ...... | Indraḥ Kapinjalarúpí. | Trishṭup. | 622 |
| 43 | 2.4.11 | 2.8.12 | Pradaxiṇit | 3 | ...... | The same. | 1 Jagatí, 2 Atiśakvarí or Ashṭiḥ, 3 Jagatí. | 623 |

| Hymn. | Mandala Anuvaka Sukta. | Ashtaka Adhyaya Varga. | Beginning of the hymn. | Number of Verses. | Author. | Deity. | Metre. | Pag. |
|---|---|---|---|---|---|---|---|---|
| 1 | 3.1.1 | 2.8.13 | Somasya má | 23 | Viśvámitraḥ. | Agniḥ. | Trishṭup. | 625 |
| 2 | 3.1.2 | 2.8.17 | Vaiśvánaráya | 15 | The same. | Agnir Vaiśvánaraḥ. | Jagatí. | 635 |
| 3 | 3.1.3 | 2.8.20 | Vaiśvánaráya | 11 | ...... | The same. | The same. | 641 |
| 4 | 3.1.4 | 2.8.22 | Samit samit | 11 | ...... | Ápriyaḥ. | Trishṭup. | 646 |
| 5 | 3.1.5 | 2.8.24 | Pratyagnir ushasaḥ | 11 | ...... | Agniḥ. | The same. | 650 |
| 6 | 3.1.6 | 2.8.26 | Pra káravaḥ | 11 | ...... | The same. | ...... | 654 |
| 7 | 3.1.7 | 3.1.1 | Pra ya áruḥ | 11 | ...... | ...... | ...... | 661 |
| 8 | 3.1.8 | 3.1.3 | Anjanti | 11 | ...... | Yúpastutiḥ. 1–5 Yúpaḥ, 6 and 7 Yúpáḥ, 8 Viśve Deváḥ or Yúpáḥ, 9 and 10 Yúpáḥ, 11 Cinnayúpasya múlabhútaḥ sthánuḥ. | 1 and 2 Trishṭup, 3 Anushṭup, 4–6 Trishṭup, 7 Anushṭup, 8–11 Trishṭup. | 670 |
| 9 | 3.1.9 | 3.1.5 | Sakháyas tvá | 9 | ...... | Agniḥ. | 1–8 Brihatí, 9 Trishṭ. | 680 |
| 10 | 3.1.10 | 3.1.7 | Tvám agne | 9 | ...... | The same. | Ushṇik. | 686 |
| 11 | 3.1.11 | 3.1.9 | Agnir hotá | 9 | ...... | ...... | Gáyatrí. | 692 |
| 12 | 3.1.12 | 3.1.11 | Indrágní | 9 | ...... | Indrágní. | The same. | 697 |
| 13 | 3.2.1 | 3.1.13 | Pra vo deváya | 7 | Rishabhaḥ, son of Viśvámitraḥ. | Agniḥ. | Anushṭup. | 702 |
| 14 | 3.2.2 | 3.1.14 | Á hotá | 7 | The same. | The same. | Trishṭup. | 707 |
| 15 | 3.2.3 | 3.1.15 | Vi pájasá prithuná | 7 | Utkílaḥ, of the family of Kataḥ. | ...... | The same. | 712 |
| 16 | 3.2.4 | 3.1.16 | Ayam agniḥ | 6 | The same. | ...... | 1, 3 and 5 Brihatí, 2, 4 and 6 Satobrihatí. | 717 |
| 17 | 3.2.5 | 3.1.17 | Samidhyamánaḥ | 5 | Kataḥ, of the fam. of Viśvámitraḥ. | ...... | Trishṭup. | 721 |
| 18 | 3.2.6 | 3.1.18 | Bhavá no agne | 5 | The same. | ...... | The same. | 726 |
| 19 | 3.2.7 | 3.1.19 | Agnim hotáram | 5 | Gáthí, son of Kuśikaḥ. | ...... | ...... | 730 |
| 20 | 3.2.8 | 3.1.20 | Agnim ushasam | 5 | The same. | 1 Viśve Deváḥ, 2–4 Agniḥ, 5 Viśve Deváḥ. | ...... | 733 |
| 21 | 3.2.9 | 3.1.21 | Imam naḥ | 5 | ...... | Agniḥ. | 1 Trishṭup, 2 and 3 Anushṭup, 4 Trishṭup, 5 Virádrúpá Satobrihatí. | 738 |
| 22 | 3.2.10 | 3.1.22 | Ayam saḥ | 5 | ...... | Puríshyá Agnayaḥ. | 1–3 Trishṭup, 4 Anushṭup, 5 Trishṭ. | 741 |
| 23 | 3.2.11 | 3.1.23 | Nirmathitaḥ sudhitaḥ | 5 | Devaśraváḥ and Devavátaḥ, sons of Bharataḥ. | Agniḥ. | 1 and 2 Trishṭup, 3 Satobrihatí, 4 and 5 Trishṭup. | 745 |
| 24 | 3.2.12 | 3.1.24 | Agne sahasva | 5 | Viśvámitraḥ. | The same. | 1 Anushṭup, 2–5 Gáyatrí. | 748 |
| 25 | 3.2.13 | 3.1.25 | Agne divaḥ | 5 | The same. | 1–3 Agniḥ, 4 Indrágní, 5 Agniḥ. | Viráṭ. | 751 |

| Hymn. | Mandala Anuvaka Sukta. | Ashtaka Adhyaya Varga. | Beginning of the hymn. | Number of Verses. | Author. | Deity. | Metre. | Pag. |
|---|---|---|---|---|---|---|---|---|
| 26 | 3.2.14 | 3.1.26 | Vaiśvánaram manasá | 9 | 1–6 Viśvámitraḥ, 7 Brahma, 8 and 9 Viśvámitraḥ. | 1–3 Agnir Vaiśvánaraḥ, 4–6 Marutaḥ, 7 and 8 Agniḥ or Brahma, (Átmá,) 9 Viśvámitropádhyáyaḥ. | 1–6 Jagatí, 7–9 Trishṭup. | 754 |
| 27 | 3.2.15 | 3.1.28 | Pra vo vájáḥ | 15 | Viśvámitraḥ. | 1 Agniḥ or Ritavaḥ, 2–15 Agniḥ. | Gáyatrí. | 762 |
| 28 | 3.2.16 | 3.1.31 | Agne jushasva | 6 | The same. | Agniḥ. | 1, 2 and 6 Gáyatrí, 3 Ushṇik, 4 Trishṭup, 5 Jagatí. | 770 |
| 29 | 3.2.17 | 3.1.32 | Astídam | 16 | ...... | 1–4 Agniḥ, 5 Ritvijaḥ or Agniḥ, 6–16 Agniḥ. | 1, 4, 10 and 12 Anushṭup, 2, 3, 5, 7–9, 13 and 16 Trishṭup, 6, 11, 14 and 15 Jagatí. | 774 |
| 30 | 3.3.1 | 3.2.1 | Icchanti tvá | 22 | ...... | Indraḥ. | Trishṭup. | 786 |
| 31 | 3.3.2 | 3.2.5 | Śásad vahniḥ | 22 | Kuśikaḥ, son of Ishírathaḥ, or Viśvámitraḥ. | The same. | The same. | 801 |
| 32 | 3.3.3 | 3.2.9 | Indra somam | 17 | Viśvámitraḥ. | ...... | ...... | 817 |
| 33 | 3.3.4 | 3.2.12 | Pra parvatánám | 13 | 1–3 Viśvámitraḥ, 4 Nadyaḥ, 5 Viśvámitraḥ, 6 Nadyaḥ, 7 Viśvámitraḥ, 8 Nadyaḥ, 9 Viśvámitraḥ, 10 Nadyaḥ, 11–13 Viśvámitraḥ. | ...... | 1–12 Trishṭup, 13 Anushṭup. | 828 |
| 34 | 3.3.5 | 3.2.15 | Indraḥ púrbhit | 11 | Viśvámitraḥ. | ...... | Trishṭup. | 838 |
| 35 | 3.3.6 | 3.2.17 | Tishṭhá harí | 11 | The same. | ...... | ...... | 846 |
| 36 | 3.3.7 | 3.2.19 | Imám ú shu | 11 | 1–9 Viśvámitraḥ, 10 Ghoraḥ, of the family of Angiraḥ, 11 Viśvámitraḥ. | ...... | ...... | 853 |
| 37 | 3.3.8 | 3.2.21 | Vártrahatyáya | 11 | Viśvámitraḥ. | ...... | 1–10 Gáyatrí, 11 Anushṭup. | 860 |
| 38 | 3.3.9 | 3.2.23 | Abhi tashṭeva | 10 | Prajápatiḥ, of the family of Viśvámitraḥ, or Prajápatiḥ, son of Vák, or both together, or Viśvámitraḥ himself. | ...... | Trishṭup. | 864 |
| 39 | 3.4.1 | 3.2.25 | Indram matiḥ | 9 | Viśvámitraḥ. | ...... | The same. | 871 |
| 40 | 3.4.2 | 3.3.1 | Indra tvá | 9 | The same. | ...... | Gáyatrí. | 877 |
| 41 | 3.4.3 | 3.3.3 | Á tú na indra | 9 | ...... | ...... | The same. | 881 |
| 42 | 3.4.4 | 3.3.5 | Upa naḥ sutam | 9 | ...... | ...... | ...... | 886 |

| Hymn. | Maṇḍala Anuvaka Sukta. | Ashtaka Adhyaya Varga. | Beginning of the hymn. | Number of Verses. | Author. | Deity. | Metre. | Pag. |
|---|---|---|---|---|---|---|---|---|
| 43 | 3.4.5 | 3.3.7 | Á yáhy arváṅ | 8 | Viśvámitraḥ. | Indraḥ. | Trishṭup. | 889 |
| 44 | 3.4.6 | 3.3.8 | Ayam te astu | 5 | The same. | The same. | Bṛihatí. | 893 |
| 45 | 3.4.7 | 3.3.9 | Á mandraiḥ. | 5 | ...... | ...... | The same. | 896 |
| 46 | 3.4.8 | 3.3.10 | Yudhmasya te | 5 | ...... | ...... | Trishṭup. | 899 |
| 47 | 3.4.9 | 3.3.11 | Marutván | 5 | ...... | ...... | The same. | 902 |
| 48 | 3.4.10 | 3.3.12 | Sadyo ha | 5 | ...... | ...... | ...... | 905 |
| 49 | 3.4.11 | 3.3.13 | Śansá mahám | 5 | ...... | ...... | ...... | 908 |
| 50 | 3.4.12 | 3.3.14 | Indraḥ sváhá | 5 | ...... | ...... | ...... | 911 |
| 51 | 3.4.13 | 3.3.15 | Carshaṇídhṛitam | 12 | ...... | ...... | 1–3 Jag. 4–9 Trishṭ., 10–12 Gáyatrí. | 913 |
| 52 | 3.4.14 | 3.3.17 | Dhánávantam | 8 | ...... | ...... | 1–4 Gáyatrí, 5, 7 & 8 Trishṭup, 6 Jagatí. | 920 |
| 53 | 3.4.15 | 3.3.19 | Indráparvatá | 24 | ...... | 1 Indrá-parvatau, 2–14 Indraḥ, 15 and 16 Vák, 17–20 Ratháṅgáni, 21–24 Indraḥ; (abhiśápárthás, Vasishṭhadveshiṇyaḥ.) | 1–9, 11, 14, 15, 17, 19, 21, 23 and 24 Trishṭup, 10 and 16 Jagatí, 12, 20 and 22 Anushṭup, 13 Gáyatrí, 18 Bṛihatí. | 924 |
| 54 | 3.5.1 | 3.3.24 | Imam mahe | 22 | Prajápatiḥ, son of Viśvámitraḥ, or Prajápatiḥ, son of Vák. | Viśve Deváḥ. | Trishṭup. | 938 |
| 55 | 3.5.2 | 3.3.28 | Ushasaḥ púrváḥ | 22 | The same. | Viśve Deváḥ. 1 Ushásḥ, 2–10 Agni, 11 Ahorátrau, 12–15 Rodasyau, 15 Rodasyau or Dyu-niśau, 16 Diśaḥ, 17–22 Indraḥ Parjanyátmá, or Agniḥ and Tvashṭá. | The same. | 950 |
| 56 | 3.5.3 | 3.4.1 | Na tá minanti | 8 | ...... | Viśve Deváḥ. | ...... | 962 |
| 57 | 3.5.4 | 3.4.2 | Pra me vivikván | 6 | Viśvámitraḥ. | The same. | ...... | 967 |
| 58 | 3.5.5 | 3.4.3 | Dhenuḥ pratnasya | 9 | The same. | Aśvinau. | ...... | 971 |
| 59 | 3.5.6 | 3.4.5 | Mitro janán | 9 | ...... | Mitraḥ. | 1–5 Trishṭup, 6–9 Gáyatrí. | 976 |
| 60 | 3.5.7 | 3.4.7 | Iheha vaḥ | 7 | ...... | 1–4 Ṛibhavaḥ, 5–7 Ṛibhavaḥ & Indraḥ. | Jagatí. | 981 |
| 61 | 3.5.8 | 3.4.8 | Usho vájena | 7 | ...... | Usháḥ. | Trishṭup. | 985 |
| 62 | 3.5.9 | 3.4.9 | Imá u vám | 18 | 1–15 Viśvámitraḥ, 16–18 Jamadagniḥ or Viśvámitraḥ. | 1–3 Indrávaruṇau, 4–6 Bṛihaspatiḥ, 7–9 Púshá, 9–12 Savitá, 13–15 Somaḥ, 16–18 Mitrá-varuṇau. | 1–3 Trishṭup, 4–18 Gáyatrí. | 989 |

# CORRECTIONS.

## VOL. I.

Page 12, line 8, read शुन्याय वसथाय—12, 29. प्रमायुक्ो—21, 23. मा नयति—31, 28. अन्नाद:—41, 6. तदु ह—49, 13. त्वेनैव—49, 19. संधिकार्यं—58, 7. अह:ऽविद:—60, 2. विंशति—63, 20. सामर्थ्यात्—64, 5. वील्वि—70, 11. दी—100, 14. न्ना गहि—101, 15. रजस:—242, 5. पुत्रामा—244, 23. आरभे—266, 7. प्रिया:—298, 17, 20, 25. सि—298, 24. ग्रे—308, 4. चकृमा—309, 21. इतीण्—314, 19. यथा—318, 19. प्रासहा—320, 7. तमगच्छ—365, 18. वं हवा—379, 23. तां वि—398, 24. य: स्तोमं—417, 25. पथन—449, 11. विश्वान्दे—483, 16. ४—539. म° १—738, 17, 19. २३—776, 4. भीम:—830, 17. द्विती—840, 23. पित्र्य—983, 5. गोषु.

## VOL. II.

Page 12. अ° १—21, 18. सम्यगान—25, 18. सभास्य—40, 7. अतुं—49, 4. त्वग्ने—91, 3. घृण—118, 23. कुर्वंत—120, 26. गिर्वाह—126, 8. सप्तदश—226, 21. षष्ठं—279, 12. भोक्तृ°—317, 22. पृश्निये—338, 22. वस्तोर्वस्तुं—353, 13. षड्चं—408, 1. स्तूयते—453. सू° १०.—456, 23. त्वात्। इंद्रो—522, 22. समुच्छ्रित:—581. सू° ३४—741, 18. आ° ४.८—754, 12. देवता द्वितीयस्य मरुत:—754, 23. आ° ४.८.—755, 12. क्रुष्टाद्यर्थे—795, 14. आगतो.

WELLCOME LIBRARY INSTITUTE